[illegible] ..	.. १०	जयादित्यः ..	.. २०	रामाश्रमापरनामभानुदीक्षित-			

एतद्भिन्ना अपि टीका वर्त्तन्ते ॥

अथाहृतविषयवृन्दं शब्दसिन्धुकृतरत्नञ्च विज्ञापयामि ।

कोषगणातिरिक्तनानाशास्त्रोक्तशब्दप्रमाणप्रयोगोपाख्यानादीनि । चातुर्वैदिकषाड्दर्शनिकमतविवरणपदार्थकर्म्मोपासनाज्ञानकाण्डब्रह्मनिरूपण[illegible] । शाब्दिककाव्यालङ्कारिकछान्दसिकसूत्रवृत्तिभाषानामलक्षणोदाहरणचित्रकाव्यनवरसरनिबन्धादयः । श्रौतस्मार्त्तयज्ञमलमासादि[illegible] तुष्यादव्यवहारैकादश्याद्युपवासनिर्णयतडागभवनवृषोत्सर्गव्रतप्र[illegible] । पौराणिकतान्त्रिकवर्णतत्त्वषट्कर्म्मस्नानतर्पणपूजामुद्रामन्त्रयन्त्रजपहोमबलिध्यानस्तवकवचमाहात्म्यभुवनस्वर्गनरकदेवदानवतीर्थावतारनदनदीदे[illegible] [illegible]धुत्पत्तिसृष्टिप्रलयदुर्गपुरमन्दिरस्त्रीमूर्त्तिनिर्म्माणप्रमाणादीनि । ज्यौतिषिक[illegible] [illegible]ादीनि । आयुर्वेदीयजन्मक्रमशारीरस्थानरोगनिदानपूर्व्वरूपसम्प्राप्त्युपशयचिकित्सौषधद्रव्यगुणपाचनजारणमा[illegible] । गान्धर्व्ववेदीयनृत्यगीतवाद्यस्वरताललयतानमानग्रामश्रुतिमूर्च्छनारागरागिणील[illegible]निरूपणादीनि । युक्तिकल्पतरुग्रन्थीयनीतिदन्दनगरीवास्तुराजगृहविशेषसामान्यासनोपकरणालङ्कारास्त्र[illegible] तथा चतुष्पदद्विपदनिष्पदयानोद्देशाः । पत्रकौमुदीयपत्रप्रमाणभङ्गरचनलेखननयनपटनचिह्नकोणच्छेदनपदन्यास श्रीशब्दविन्यासप्रय[illegible]दीनि । कुलाचार्य्यादिग्रन्थीयब्राह्मणवैद्यकायस्थानामुत्पत्तिगोत्रप्रवरपर्य्यायश्रोत्रियकुलीनमौलिकगोष्ठीपतिनिर्णयादीनि च शब्दकल्पद्रुमस्य [illegible] मया समाहृतानि । यान्यवशिष्टानि तानि परिशिष्टे प्रवक्ष्यामि । तत्तद्ग्रन्थनामानि बाहुल्यभिया नोक्तानि । तथापि शब्दसमुद्रस्य [illegible] दुष्करतरं । तदुक्तं कलापमुग्धबोधटीकाधृतश्लोके ।

श्रहस्र भाष्यकारस्य कुशाग्रीयधियावुभौ । नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः ॥

य:—दिवादि:। दिवु जिगीषेच्छादौ। दिवस्तुदेति दीव्यति ॥

र:—वैदिक:। वेदेष्वेव प्रयुज्यन्ते नतु भाषायामित्यर्थ:। गार्न्भितुनौ जन्मनि। जगाति ॥

न:—अदादिक:। अद्लृ भक्षे। लुगद्योऽप: श्नि ॥

नि.—ह्रादि:। ह्रादेरदाद्यन्तर्गणत्वेन स्थानवाददादित्वसूचकानुबन्धो न इत:। अथवा मु: स्वपादिश्च निह्रादिरित्येकं वाक्यं। धातु क्रमात् स्वपादिह्रादीनां। चकारस्तूभयत्र समस्यादरादौ चेत्यर्थ:। ह्रादि: पृथक्‌गण इत्येके। अतएव पठन्ति च "ह्रादयदादौ जुहोत्यादिर्दिवादि: स्वादिरेव च। तुदादिश्च रुधादिश्च तनक्र्यादिचुरादय:" ॥ इति। हनि होमेऽदने। ह्रादौ रे द्वि: जुहोति।

मु:—स्वपादिश्च। चकाराददादिश्च। स्वमते स्वपादे: प्रयोजनं नास्ति। दरिद्रतीत्यादौ स्वपादित्वादगादौ मार्व्वधातुके। आद्युदात्त... वृत्त इ व स्व वर्त्तने। हद्योनेम पे इति तेनैव परस्मैपदे वर्त्स्यति विवृत्सति। आत्मनेपदे तु वर्त्तिष्यते विवर्त्तिषते

व:—वृतादि:। वृत ङ व स्व वर्त्तने। हद्योनेम पे इति तेनैव परस्मैपदे वर्त्स्यति विवृत्सति। आत्मनेपदे तु वर्त्तिष्यते विवर्त्तिषते विवृत्सा ॥

श:—तुदादिक:। तुदौ ञ श व्यथे। दिवसुतुदेति तुदति ॥

शि:—कुटादिश्च। चकारात् तुदादिश्च। कुटां नुमौ ञ्णिति इति नियमात् कुट शि कौटिल्ये इत्यादीनां अकुटीत् इत्यादौ न गुण इत्यादीनां अनुवीदित्यादिषु न वृद्धि:। अगुणत्वादुव् च ॥

ष:—षदडवान्। आख्यातिकस्याडोऽप्राप्त्यर्थं षदिति विशेषणं। स्वमते तूभयत्र ङ एव। डु ञौ श पच पाके। भौपि चिनोति पचा।

ष:—अजादि:। अच ष लु ष भक्षहासयो:। द्विरुक्त जत्वादौति द्विसंज्ञायां प्रयत्नस्य मिद्दोऽदेशिति न नुण् अचत्। क्लीबे अम्नरोऽस्ति इति जचति अचन्ति। आख्यातिकेऽन्त्योऽन्को दैरिति जचति। अनुस् सिद्देरिति अजचु:। इति धातुदीपिकायां अनुबन्धकथनिरूपणं

कारिकोपविवरणं।

सर्वेषां कोषाणामादि अग्निपुराणोक्ताभिधानं। तत्रादौ स्वर्गपातालादिवर्ग:। ततोऽव्ययवर्ग:। ततो नानार्थवर्ग:। ततो भूपुराद्रिवनौ... दिवर्ग:। ततो नृब्रह्मक्षत्रविट्शूद्रवर्गा:। एते सामान्यानि नामलिङ्गानि सन्तीति मया दृष्टं। अमरसिंहस्तु उक्ताग्निपुराणोक्ताभिधानस्य कथंचित् वर्गस्य व्यतिक्रमं कृत्वा तदोदित-सामान्य-नामलिङ्गानां विशेष्य-निघ्न-वर्गसङ्कीर्णवर्गाविति संज्ञां स्थापयित्वा अन्ते लिङ्गादिसंग्रहवर्गस्य दे... कोषकोषं रचितवान्। एवं जटाधरोऽपि अमरकोषस्यानुकरणं कृतवान्। इति विस्तप्रचार: ॥

प्राक्कोषादिनामानि।

अत्राभिधाने समासयद्यत्कोषादित: शब्दादय: संगृहीतास्तेषां संज्ञा: यथाविद्यन्ते ॥

अमरसिंहकृतं ..	नामलिङ्गानुशासनं	.. १	पुरुषोत्तम देवकृत: ..		
...कृत ..	नानार्थसंग्रह: ..	.. २	तत्कृता	..	त्रिकाण्डशेष ..
...सिंहकृता ..	नानार्थमञ्जरी	.. ३	मात्रसिंहकृत:	..	हारावली ..
...शाश्वतकृता ..	शब्दरत्निका ..	.. ४	मदुरेशपरिकृता ..	..	मातृकाह ..
...धराचार्यकृत: ..	पर्यायरत्नार्णवकोष	.. ५	महेश्वरवैद्यकृत: ..	..	शब्दरत्नावली .
...भिधानकृता ..	नानार्थरत्नमाला	.. ६	मेदिनीकरवैद्यकृत: ..	..	विश्वप्रकाश ..
...दासविद्यावागीशकृता	धातुदीपिका ..	.. ७	रामेश्वरशर्म्मकृता ..	.	नानार्थशब्दकोष:
...कविकृता ..	नाममाला ..	.. ८	रत्नमालाकरवैद्यकृता	..	शब्दमाला .
...सिंहकृत ..	सारसंग्रहनामनानार्थसमुच्चय:	९	वामदेवविप्रकृत: ..	..	कार्य्येदार्थोत्तिपर्यायरत्न
...लोचनकृत: ..	त्रिकाण्डशेष पर्याय शब्दनिघण्टु १०		श्रीभद्रवभट्टाचार्यकृतं	..	कविकल्पद्रुम .
...कविराजकृत ..	शब्दरत्नम: ..	.. ११	श्रीरामशर्म्मकृत: ..	..	वर्णाभिधान
...कृत ..	धरणिकोष ..	.. १२	सिद्धान्तकौमुदीमध्यस्थसारकारकृते		उणादिकोष
...कृत ..	शब्दार्णव ..	.. १३	हलायुधभट्टकृता ..		उणादिवृत्ति
	त्रिकाण्डकोष: ..	.. १४	हेमचन्द्रकृत: ..	..	अभिधानरत्नमाला
				..	अभिधानचिन्तामणि

अन्यकोषनामानि।

...इत्यनेकानेकाभिधानानि सन्ति। यद्यपि तानि मया अनाप्तानि तदापि तेषां मध्ये बहुकोषाणां प्रयोगप्रमाणानि अमरटीका... वि। इत्थं त्रिकाण्डशेषे तत्तत्कर्त्राभिधानानां शब्दा: समाहृता:। उक्तकोषद्वयशब्दानां शब्दकल्पद्रुमाभ्यन्तरितत्वेन वक्ष्यमाण... ...नां शब्दा: तत्कोषान्तर्गता मता:।

विश्वधृतप्राचीनकोषाः।

ग्नि ..	.. १	वाचस्पति ..	.. ४	मङ्गल ..	.. ७	भागुरिरचितकोषाः	.. १०
ाटम ..	.. २	व्याड़ि ..	.. ५	शुभाङ्ग ..	.. ८		
माङ्ग ..	.. ३	विश्वरूप ..	.. ६	वोपालित ..	.. ९		

मेदिनीधृतप्राचीनकोषाः।

लिमी ..	१	रन्तिदेव ..	.. ७	गङ्गाधर ..	.. १३	चन्द्र ..	.. १९
र्णवः ..	.. २	रत्नापरनामधर	.. ८	वाभट ..	.. १४	विक्रमादित्य	.. २०
ावर्त्तः	.. ३	गोवर्द्धन ..	.. ९	माधव ..	.. १५	शैमिररचितकोषाः	.. २१
मालाख्यः	.. ४	रभसपाल ..	.. १०	धर्म्म ..	.. १६	पाणिनिपदानुशासनञ्च	.. २२
चि ..	.. ५	रुद्र ..	.. ११	तारपाल ..	.. १७		
रत् ..	.. ६	अमरदत्त ..	.. १२	वामन ..	.. १८		

एतदन्ये बलहट्टप्रभृतिकृतकोषाः सन्ति ॥

लब्धालब्धामरकोषटीकानामानि।

अमरकोषस्य भृशप्रामाणिकः व्युत्पादकश्च। तस्मात् बहुतरटीकाकारैस्तस्य नानाविधा टीका कृता। तन्मध्ये कतिपयलब्धटीकानां प्रमाणानि ...मे दत्तानि। किन्तु तत्समुदायटीकाकृन्नामानि टीकानामधेयानि चाहं व्यक्तीकरोमि ॥

स्वामी	.. १	माधवी ..	.. ११	कोलाहलाचार्य्यः	.. २१	रामाश्रमापरनामभानुदीक्षितकृता व्याख्यासुधा	.. ३०
तिः ...	.. २	मधुमाधवी ..	.. १२	शबरस्वामी	.. २२	अच्युतोपाध्यायकृतव्याख्याप्रदीपः ..	.. ३१
चन्द्रः ..	.. ३	सर्व्वानन्दः ..	.. १३	रामतर्कवागीशः	.. २३	मथुरेशविद्यालङ्कारकृता सारसुन्दरी	.. ३२
ङ्कः ..	.. ४	अभिनन्द ..	.. १४	नयनानन्दः ..	.. २४	नारायणचक्रवर्त्तिकृता पदार्थकौमुदी ..	.. ३३
टः ..	.. ५	मल्लिनाथः ..	.. १५	विद्याविनोदः	.. २५	रमानाथविद्यावाचस्पतिकृतत्रिकाण्डविवेक	.. ३४
धरः ..	.. ६	रायमुकुटमणिः	.. १६	रघुनाथचक्रवर्त्ती	.. २६	भरतमल्लिककृता मुग्धबोधसम्मता टीका	.. ३५
दिवः ..	.. ७	नीलकण्ठः ..	.. १७	व्याख्यामृतः	.. २७		
र्द्धनः ..	.. ८	अरुणः ..	.. १८	टीकासर्व्वस्वः	.. २८		
रड़ः ..	.. ९	भगीरथः ..	.. १९	सन्देहभञ्जिका	.. २९		
राजः ..	.. १०	जयादित्यः ..	.. २०				

एतद्भिन्ना अपि टीका वर्त्तन्ते ॥

अथाहृतविषयवृन्दं शब्दसिन्धुदुस्तरत्वञ्च विज्ञापयामि।

कोषगणातिरिक्तनानाशास्त्रोक्तशब्दप्रमाणप्रयोगोपाख्यानादीनि। चातुर्वैदिकषाड्दर्शनिकमतविवरणपदार्थकर्म्मोपासनाज्ञानकाण्डब्रह्मनिरूपण-...ङ्गशिक्षादीनि। शाब्दिककाव्यालङ्कारिकछान्दसिकसूत्रवृत्तिभाषानामलक्षणोदाहरणचित्रकाव्यनवरसरतिबन्धादयः। श्रौतस्मार्त्तयज्ञमलमासादि-...दायभागाशौचसंस्कारप्रायश्चित्तोद्वाहतिथिकृत्यजन्माष्टमीदुर्गोत्सवाष्टादशविवादपद-चतुष्पादव्यवहारैकादश्याद्युपवासनिर्णयतड़ागभवनवृक्षोत्सर्गव्रतप्र-...तिशुभाशुभदिनादिवास्तुयागदीक्षाह्निकाचारमासकृत्यपुरुषोत्तमादिमाहात्म्यश्राद्धशूद्रकृत्यकर्म्मविपाकद्वादशयात्राधिकरणदत्तकव्यवस्था-...। पौराणिकतान्त्रिकवर्णितत्त्वषट्कर्म्मस्नानतर्पणपूजामुद्रामन्त्रयन्त्रजपहोमबलिध्यानस्तवकवचमाहात्म्यभुवनस्वर्गनरकदेवतावादानवतीर्थावतारनन्दनादीदि-पीठपर्व्वतवृक्षराजनीतिवर्णाश्रमधर्म्मवर्णसङ्करद्रव्यशुद्धिमहादाननिधिरत्नाद्युत्पत्तिसृष्टिप्रलयदुर्गपुरमन्दिरश्रीमूर्त्तिनिर्म्माणप्रमाणादीनि। ज्यौतिषिक-...न्तिकवारतिथिनक्षत्रयोगकरणसंक्रान्तिमासर्त्तुपक्षवर्षायनजातफलाकालग्रहणनष्टचन्द्रधूमकेतुस्त्रीपुरुषादिशुभाशुभलक्षणशकुनस्वरोदयगणिताङ्कक्षेत्र-हारराशिचक्रभूगोलखगोलदृग्गोलवर्णनादीनि। आयुर्व्वेदीयजन्मक्रमशारीरिकस्थानरोगनिदानपूर्व्वरूपसम्प्राप्त्युपशयचिकित्सौषधद्रव्यगुणपाचनजारणमा-नाड़ीमूत्रजिह्वापरीक्षापञ्चकर्म्मषड्रसोत्पत्त्याख्यानादयः। गान्धर्व्ववेदीयनृत्यगीतवाद्यस्वरतालजयतानमानग्रामश्रुतिमूर्च्छनारागरागिणीत-त्तदङ्गार्थ्यागानसमयध्रुवकगमकनायकनायिकानिरूपणादीनि। युक्तिकल्पतरुग्रन्थीयगीतिवृन्दनगरीवास्तुराजगृहविशेषसामान्यासनोपकरणालङ्कारास्त्र-नायुक्तयः तथा चतुष्पददिपदनिष्पदयानोद्देशाः। पत्रकौमुदीयपत्रप्रमाणभङ्गरचनलेखननयनपठनचिह्नकोणच्छेदनपदन्यास श्रीशब्दविन्यासप्रश्न-प्रकरणादीनि। कुलाचार्य्यादिग्रन्थीयब्राह्मणवैद्यकायस्थानामुत्पत्तिवंशगोत्रप्रवरपर्य्यायश्रोत्रियकुलीनमौलिकगोष्ठीपतिनिर्णयादीनि च शब्दकल्पद्रुमस्य ...काण्डे मया समाहृतानि। यान्यवशिष्टानि तानि परिशिष्टे प्रवक्ष्यामि। तत्तद्ग्रन्थनामानि बाहुल्यभिया नोक्तानि। तथापि शब्दसमुद्रस्य ...रगमनं दुष्करतरं। तदुक्तं कलापमुग्धबोधटीकाधृतश्लोके।

अद्यस्य भाष्यकारस्य कुशाग्रीयधियावुभौ। नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः ॥

परिशिष्टकरणकारणम्।

अस्मिन् सप्तकाण्डात्मकशब्दकल्पद्रुमपुस्तके ये ये शब्दार्थप्रमाणप्रयोगादयः पूर्व्वं प्राप्त्यभावेन न संगृहीताः। अथवा भ्रमवशात् पति यस्य यस्य रोगस्य निदानमात्रं लिखितं तत्तदौषधानि न विवृतानि। एवं येषां शब्दानां अमरातिरिक्तकोषोक्तपर्य्यायशब्दसङ्कलनं न दीकारोत्तरवकारादिवर्णयुक्तकतिपयशब्दानां मुद्राङ्कनप्रमादेन स्खलनं जातं। एवं अकाराद्यादिवर्गवकारादिपर्य्यन्तधातूनां तत्तट्टीकाघृतप णादयः पुरा न लिखिताः। एतत्सर्व्वमवशिष्टं परिशिष्टमध्ये लिपिबद्धीकरिष्यामि। अतःपरमेतत्परिशिष्टीयापुनरुक्तशब्दादीन् प्रागुदि ण्डीयशब्दसूचीमध्ये यथास्थानं स्थापयित्वा ग्रन्थसमाप्तौ मङ्गलाचरणवीजं परिशिष्टकरणकारणञ्च हित्वा एतन्मुखबन्धनं प्रथमकाण्डस्य पूर्व्वे पुनर्मुद्राङ्कने कृते एष कोषः सुसम्पूर्णो भविष्यति। किञ्च पश्चिमदेशीयलोकानां महोपकाराय देवनागराचरेण एतत्कोषमुद्राङ्कनार्थं मद्बन्धुवर्गा ममान्तिके बहुशः प्रार्थयन्ते। किन्तु तत्प्रार्थनापूरणे मदीयायुषोऽनुकूलतायां सन्दिहानो विरतोऽस्मि। यद्यपि कश्चित् किम्वा विषयी स्वोपलाभार्थं मत्कृतैतद्ग्रन्थाधिकारं यथारीति गृहीत्वा अस्मिन् कर्म्मणि प्रवर्त्तेत तत्र ममापत्तिर्नास्तीति॥

शाके वह्निसमुद्रशैलधरणीमानेऽरुणे कर्कटे, याते खाग्निमिताब्दतः परमसौ सत्शब्दकल्पद्रुमः।
काण्डैः सप्तभिरन्वितो भगवतोऽनुक्रोशतः, पूर्णतां प्राप्तो दूषणमस्ति किञ्चिदिह चेत् तत् क्षम्यतां साधुभिः॥

अथ सर्व्वोपासकसम्मतमङ्गलाचरणैकविंशतिपद्यानि।

वेदा वदन्ति यं सत्यमानन्दमद्वितीयकम्।
तथाप्येकस्वरूपमवाङ्मनसगोचरम्॥
सर्व्वातीतं सर्व्वगतं चिदेकरसमेव च
देशकालापरिच्छिन्नमपादमपि शीघ्रगम्॥
सर्व्वग्रहमपाणिञ्च सर्व्वेषां दर्शकं तथा।
अचक्षुषमपि श्रोत्रहीनं श्रोतारकं पुनः॥
अचिन्त्यमपि सर्व्वज्ञं सर्व्वेषाञ्च नियामकम्।
सर्व्वशक्तियुतं सृष्टिस्थितिप्रलयकारकम्॥ १॥
तथौपनिषदा यं हि शुद्धबुद्धस्वभावकम्॥२॥
कथयन्त्यादिविद्वांसं सिद्धं यं कापिला विदुः॥ ३॥
क्लेशकर्म्मविपाकाशयापरामृष्टमेव यं।
निर्म्माणकायमास्थाय सम्प्रदायप्रवर्त्तकम्॥
तथानुग्राहकमपि प्रभाषन्ते पतञ्जलाः॥ ४॥
लोकवेदविरुद्धैर्यं निर्लेपञ्च स्वतन्त्रकम्॥
महापाशुपताः सर्व्वे ब्रुवन्ति सततं भुवि। ५।
शैवाः शिवं यं वदन्ति वैष्णवाः पुरुषोत्तमम्॥ ६। ७॥
पितामहमिति ब्राह्माः पौराणिकजना विदुः। ८।
याज्ञिका यज्ञपुरुषं सर्व्वज्ञमिति सौगताः॥ ९। १०॥
निरावरणमित्येव प्रजपन्ति दिगम्बराः। ११।
यमुपास्यत्वरूपेण देशितं हि निरन्तरम्॥
मीमांसका वै भाषन्ते चार्व्वाकाः प्रवदन्ति यं।
लोकानां व्यवहारेण सिद्धं सन्ततमेव च॥ १२। १३॥
यावदुक्तोपपन्नं हि न्यायज्ञाः सम्प्रचक्षते। १४।
शिल्पिनो विश्वकर्म्मेति यं भणन्ति सुनिश्चितम्॥ १५॥
शाक्ता वदन्ति यं नित्यामाद्याप्रकृतिरूपिणीम्। १६।
सौरास्तेजोमयं सूर्य्यं गाणपत्या गणेश्वरम्॥ १७। १८॥
रामानुजा यं वदन्ति विशिष्टाद्वैतवादिनः।
लक्ष्मीनारायणं भक्ताधीनं नित्यशरीरिणम्॥ १९॥
निम्बादित्यास्तथा माध्वाचार्य्याद्या द्वैतवादिनः।
विष्णुं सशक्तिं सन्मूर्त्तिं यमाहुर्भक्तवत्सलम्॥ २०॥
रामानन्दा रामचन्द्रं भक्तानुग्रहकारकम्।
सीतया सहितं प्रोचुर्यं नित्यं नित्यविग्रहम्॥ २१॥
श्रीमन्माध्वानुयायि श्रीनित्यानन्दादिवंशजाः।
गोस्वामिनो नन्दसूनुं श्रीकृष्णं प्रवदन्ति यं॥ २२॥
कायेन मनसा वाचा भक्त्या च प्रणिपत्य तम्।
श्रीराधाकान्तदेवेन राज्ञातिशययत्नतः।
शब्दादीन्यवशिष्टानि संगृह्य बहुशास्त्रतः।
परिशिष्टः शब्दकल्पद्रुमस्य क्रियतेऽधुना॥

अथ ग्रन्थप्रतिष्ठानवश्लोकाः।

शब्दकल्पद्रुमग्रन्थे सप्तकाण्डसमन्विते।
दैवात्तैर हि शब्दार्थपर्य्यायाणां तथैव च॥
प्रमाणानां प्रयोगाणां धातुसम्बन्धिनां पुनः।
पदोदाहरणानाञ्च चिकित्सानां गदस्य च॥
न संग्रहोऽभवत् पूर्व्वग्रन्थे कारणकूटतः।
तेषां सङ्कलनञ्चास्मिन् परिशिष्टे करोम्यहम्॥

तथा वेदनिघण्ट्वाख्यः पञ्चाध्यायसमन्वितः ।
वैदिकानाञ्च शब्दानामतिप्राचीनकोषकः ॥
तस्यात्र देशे विरलप्रचारत्वेन तद्गतः ।
पर्य्यायशब्दसन्दोहः केनापि कोषकारिणा ॥
न संगृहीतस्तद्धेतोर्दुरूहोऽश्रुत एव च ।
प्रायो वैदिकशब्दार्थो बोधगम्यो भवेन्नहि ॥

अतस्तत्प्रथमाध्याये द्वितीये च तृतीयके ।
येषां स्थितानां शब्दानां पर्य्यायान् परिशिष्टगान् ॥
करिष्याम्यस्य निम्ने हि तेषां वर्गस्तु नाम च ।
तथा सङ्ख्या विलिख्यन्ते लोकानां ज्ञानहेतवे ॥
चतुर्थे पञ्चमाध्याये यदस्ति पदवृन्दकम् ।
तत्पर्य्यायस्य बोधस्य चाभावान्नात्र दृश्यते ॥

तत्र प्रथमाध्याये ४१४ नामानि यथा ।

वर्गः	नाम	सङ्ख्या
१	पृथिवीनामधेयानि ..	२१
२	हिरण्यनामानि	१५
३	अन्तरीक्षनामानि ..	१६
४	साधारणनामानि ..	६
५	रश्मिनामानि	१५
६	दिङ्नामानि	८
७	रात्रिनामानि	२३
८	उषोनामानि ..	१६
९	अहर्नामानि	१२
१०	मेघनामानि	३०
११	वाङ्नामानि	५७
१२	उदकनामानि ..	१००
१३	नदीनामानि	३७
१४	अश्वनामानि	२६
१५	आदिष्टोपयोजननामानि	१०
१६	ज्वलतिकर्म्माणः ..	११
१७	ज्वलतो नामधेयानि	११

इति वेदनिघण्टौ प्रथमाध्यायः ॥

द्वितीयाध्याये ५१६ नामानि ।

वर्गः	नाम	सङ्ख्या
१	कर्म्मनामानि	२६
२	अपत्यनामानि ..	१५
३	मनुष्यनामानि	२५
४	बाहुनामानि	१२
५	अङ्गुलिनामानि ..	२२
६	कान्तिकर्म्माणः ..	१८
७	अन्ननामानि	२८
८	अत्तिकर्म्माणः ..	१०
९	बलनामानि	२८
१०	धननामानि	२८
११	गोनामानि	९
१२	क्रुध्यतिकर्म्माणः ..	१०
१३	क्रोधनामानि	११
१४	गतिकर्म्माणः	१२२
१५	क्षिप्रनामानि	२६
१६	अन्तिकनामानि ..	११
१७	संग्रामनामानि ..	४६
१८	व्याप्तिकर्म्माणः ..	१०
१९	वधकर्म्माणः	३३
२०	वज्रनामानि	१८
२१	ऐश्वर्य्यकर्म्माणः ..	४
२२	ईश्वरनामानि ..	४

इति वेदनिघण्टौ द्वितीयाध्यायः ॥

तृतीयाध्याये ४१० नामानि ।

वर्गः	नाम	सङ्ख्या
१	बहुनामानि	१२
२	ह्रस्वनामानि	११
३	महन्नामानि	२५
४	गृहनामानि	२२
५	परिचरणकर्म्माणः ..	१०
६	सुखनामानि	२०
७	रूपनामानि	१६
८	प्रशस्यनामानि ..	१०
९	प्रज्ञानामानि	११
१०	सत्यनामानि	६
११	पश्यतिकर्म्माणः ..	८
१२	उत्तराणि पदानि सर्व्वपदसमाम्नानाय ..	९
१३	उपमानामानि ..	१२
१४	अर्चतिकर्म्माणः ..	४४
१५	मेधाविनामानि ..	२४
१६	स्तोतृनामानि	१३
१७	यज्ञनामानि	१५
१८	ऋत्विङ्नामानि ..	८
१९	याच्ञाकर्म्माणः ..	१७
२०	दानकर्म्माणः	१०
२१	अध्येषणाकर्म्माणः ..	४
२२	स्वपितिकर्म्माणः ..	२
२३	कूपनामानि	१४
२४	स्तेननामानि	१४
२५	निर्णीतान्तर्हितनामधेयानि	६
२६	दूरनामानि	५
२७	पुराणनामानि ..	६
२८	नूतननामानि	६
२९	द्विश उत्तराणि नामानि	२६
३०	द्यावापृथिव्योर्नामधेयानि	२४

इति वेदनिघण्टौ तृतीयाध्यायः ॥

चतुर्थाध्याये २७८ पदानि ।

वर्गः	पदं	सङ्ख्या
१	जहा इत्यादिपदानि	६२
२	सस्निमित्यादिपदानि	८४
३	आशुशुक्षणिरित्यादिपदानि	१३२

इति वेदनिघण्टौ चतुर्थाध्यायः ॥

पञ्चमाध्याये १५१ पदानि ।

वर्गः	पदं	सङ्ख्या
१	अग्निरित्यादिपदानि	३
२	द्रविणोदा इत्यादिपदानि	१३
३	अश्व इत्यादिपदानि ..	३६
४	वायुरित्यादिपदानि ..	३२
५	श्येन इत्यादिपदानि ..	३६
६	अश्विनावित्यादिपदानि	३१

इति वेदनिघण्टौ पञ्चमाध्यायः ॥

अथ ग्रन्थस्यानुक्रमणिकादिलेखनाभावकारणं वृत्तद्वयम् ।

ग्रन्थस्यानुक्रमणिका माद्धेताक्षरलक्ष्म च । परिशिष्टस्य करणे कारणादिकमेव हि ॥
पूर्व्वं सप्तमकाण्डीयमुखबन्धे प्रकीर्त्तितम् । अतो न लिख्यतेऽत्रैव पुनरुक्तिभयान्मया ॥

अथादर्शपत्राणां वल्मीकभक्षणजन्यनक्षापतन्निवारणहेतुपद्यपद्यानि ।

इदानीं परिशिष्टीयबङ्गलादर्शपत्रिकाः ।
यन्त्रालयसमुत्पन्नवल्मीकगणभक्षिताः ॥
अतस्तद्गतशब्दानां नाभवन्मुद्रयाङ्कनम् ।
तद्धेतुतं तदा ग्रन्थवाहुल्यं समजायत ॥
किन्तु सांप्रतमादर्शनाशजन्यो मनोगतः ।

तापो जामातृदौहित्रगणैरेव निवारितः ॥
यतस्ते परिशिष्टीयशब्दैरन्यैश्च संयुतम् ।
देवनागरवर्णेन शब्दकल्पद्रुमं पुनः ॥
मुद्राङ्कितं प्रकुर्वन्ति यत्नेनातिशयेन च ।
तस्य प्रकाशाल्लोकानामुपकारो भविष्यति ॥

अथ ग्रन्थकर्तुर्व्वंशवर्णनश्लोकाः ।

आसीत् श्रीहरिदेवाख्यः श्रीहरेरंशरूपकः ।
कायस्थानां कुले देववंशस्योद्भवहेतुकः ॥
मुरशिदाबादनगरासन्ने स्वजनपालकः ।
कर्णसुवर्णनामधेयसमाजे वासकारकः ॥
सदा हरिपदाम्भोजयुगलध्यानकारकः ।
मौद्गल्यगोत्रजातानामेष बीजाभिधानकः ॥ १ ॥
तस्य दुर्गावरो नाम सुतः सर्वगुणान्वितः । २ ।
तस्मादिवेश्वरो जातस्तस्य विश्वेश्वरः सुतः ॥ ३ । ४ ॥
सदानन्देन संपूर्णः पूर्णानन्दोऽभवत्ततः । ५ ।
खानोपाधिस्तत्तनयः पीताम्बर इति स्मृतः ॥
अदभ्रशालिशालित्वाड्डान्यपीताम्बरेति च ।
विख्यातो भुवि सर्वत्र गोष्ठीपतिवरः स च ॥ ६ ॥
पृथ्वीधरस्तत्तनूजस्तस्माच्च कुरुनन्दनः । ७ । ८ ।
चत्वारस्तनयास्तस्य चतुर्द्दशनिवासिनः ॥
प्रथमः शिवदासाख्यश्चौधपिडख्यातिसंयुतः ।
ममुयीनामके देशे वासलेन सदा हृतः ॥
नित्यानन्दो द्वितीयस्तु रायोपाधिः सुविश्रुतः ।
हलसीदपुरावासो नित्यानन्देन पूरितः ॥
चतुर्भुजस्तृतीयो यः सोऽपि रायेत्युदाहृतः ।
तान्नाग्रामशतावासचतुर्भुजपदाश्रितः ॥
चतुर्थः श्रीनाथरायो धुले पुरस्तनायनः ।
सदा श्रीनाथचरणाम्भोजार्चनपरायणः ॥ ९ ॥
नित्यानन्दात्मजः श्रीमान् श्रीमन्तेतिसमीरितः ॥१०॥
चण्डीवरस्तस्य पुत्रश्चण्डिकापूजने रतः ॥ ११ ॥
तज्जातः परमानन्दः परमानन्ददायकः ॥ १२ ॥
काशीनाथश्च विजयारामस्तत्कुमारकः ।
ज्येष्ठस्तु मल्लिकोपाधी रायोपाधिः कनिष्ठकः । १३ ।
विजयारामात्मजातः कृष्णानन्दोद्विजार्चकः ॥ १४ ॥
रघुनन्दनदेवस्तत्तनयः परिकीर्तितः । १५ ।
विद्याधरस्तस्य सूनू रायेतिख्यातिमागतः ॥
चादो नाजिरपामराम्री मितारामस्ततः । १६ ।
तस्यात्मजो हरिहरो जातो हरिहरार्चितः ॥ १७ ॥
षट् सुतास्तस्य विशेषाः सर्वलोकप्रशंसिताः ।
ज्येष्ठस्तु यादवानन्दः सदा यादवसेविता ॥
दिनोदिगामचन्द्रास्ततृतीयो मतरूणो मतः ।
ईशानचतुर्थोऽभूत् मजुमदार उपाधितः ॥
नित्यकार्निरतः सदा बन्धुभिराहृतः ।
ग्रामादाहिदिशानां कानुनगोपदमागतः ॥
स तस्मिन् समये कर्मस्वर्गमासतः ।

उत्थाय वासमकरोत् पुत्रदारादिभिर्युतः ।
दुर्गादासः पञ्चमस्तु सदा दुर्गाप्रपूजकः ।
षष्ठस्तु माधवानन्दः सर्वानन्दप्रदायकः ॥
देवीदासमजुमदारतनयाः षट् प्रजाघ्नताः ।
गौरीकान्तो ज्येष्ठपुत्रः स च वंशविवर्जितः ।
चण्डीचरणसंज्ञस्तु मध्यमश्चण्डिकार्चकः ।
तृतीयः पुण्डरीकाक्षः सहस्राक्षश्चतुर्थकः ॥
महावक्षाङ्कतो यो हि पदे पैत्र्ये नियोजितः ।
सरकारोपाधियुतो राजेन्द्रः पञ्चमः सुतः ॥
कामारपोलग्रामान्तर्वासमकेन विनिर्मितः ।
कनिष्ठो रुक्मिणीकान्तो बहुभिर्ज्ञातिभिर्वृतः ॥
सुड़ागाछाप्रदेशे तु पञ्चग्रामे ह्यधिष्ठितः ।
स च केशवरायस्य क्षत्रियस्य विशेषतः ॥
अप्राप्तव्यवहारस्य विख्यातस्य समन्ततः ।
तद्देशाधिपते राज्ये नवाबेन नियोजितः ॥
अपश्यद्व्यवहारांश्च तद्राज्यशासने रतः ।
अतोऽस्मिन् भूतले लोकैर्व्यवहर्त्तेति कीर्त्तितः ॥ १९ ॥
तस्यैव तु कनिष्ठस्य चत्वारो देहसम्भवाः ।
धार्म्मिकाः कर्म्मकुशला लोके संप्राप्तगौरवाः ॥
ज्येष्ठो रामेश्वरः पैत्र्यं पदं प्राप्तः कृतश्रमः ।
महावक्षाङ्कतस्तेषु कृष्णरामस्तु मध्यमः ॥
राजारामस्तृतीयस्तु तेषां रुद्रेश्वरोऽन्तिमः ।
अनपत्यतया सोऽपि रुद्राराधकसत्तमः ॥ २० ॥
रामेश्वरस्य षट् पुत्रास्तेषां ज्येष्ठो महागुणः ।
रामचन्द्रस्तथा रामचरणो मध्यमः पुनः ॥
तृतीयो रघुनाथाख्यः श्रीरामस्तु तुरीयकः ।
रामकेशवनामा च पञ्चमः केशवार्चकः ॥
बलरामाभिधः षष्ठो बलवान् बलिनां वरः ।
एषां ज्येष्ठः कनिष्ठश्च वंशाभावमुपागतः ॥ २१ ॥
मध्यमो रामचरणो गुणैर्बहुभिरन्वितः ।
व्यवहर्त्तोपाधियुक्तो गोविन्दपुरसंस्थितः ॥
स च हिजलीतमोलिप्तमहिषादलदेशतः ।
लवणस्य तथा राज्ञः करादाने नियोजितः ॥
कटकादिप्रदेशस्य महावक्षाङ्कतस्ततः ।
देवानीसञ्ज्ञकपदं प्राप्तवान् बहुमानितः ॥
बहुभिर्वैरिभिः सार्द्धं मेदिनीपुरमध्यतः ।
संग्रामं तुमुलं कृत्वा रणमध्ये निपातितः ॥ २२ ॥
देवानरामचरणव्यवहर्त्तमहाशयात् ।
समुत्पन्नास्त्रयः पुत्रा अशेषकुशलान्वयात् ॥

व्यवहर्त्तोपाधियुक्तो रामसुन्दर आदिमः ।
विद्यान्नौषधदानेन गणनीयः स चाधिमः ॥
पञ्चकोटादिदेशे सोऽभवदध्यक्षसत्तमः ।
माणिक्यचन्द्रदेवस्य मध्यमः पुण्यकृत्तमः ॥
अङ्कर्षिधरणीचन्द्रमाणे हिजरिहायने ।
दिल्लीश्वरप्रसादेन सम्प्राप्तौ तौ शुभक्षणे ॥
फर्माननामकलिपिं रायोपाधिं तथैव च ।
मन्सबानां सहस्रं सादिपञ्चशतमेव च ॥ * ॥
कनिष्ठो नवकृष्णाख्यदेवो जातो गुणाकरः ।
आसीत् किलकिलारूपामरावत्यां पुरन्दरः ॥
रूपवान् धनवान् मान्यो वदान्यः पण्डिताश्रयः ।
कुलशीलादिसम्पन्नो गोष्ठीपतिमहाशयः ॥
रसेषुसिन्धुशुभ्रांशुमाने इंरेजिहायने ।
कोम्पानिना मुन्सिपदे नियुक्तोऽसौ शुभे दिने ॥
सोऽभवत् कारणं तेषां वङ्गराज्यस्य शासने ।
ततः किलकिलापुर्य्यां वाणिज्यकार्य्यसाधने ॥
स्थितान् इंरेजनिचयान् नवाबो बलमाश्रितः ।
सेराजद्दौलाभिधानो दूरीकृत्य गतस्ततः ॥
अथ तत्परवर्षे तु कर्णेल् क्लाइव् महाबलः ।
आगत्य नवकृष्णेन मुन्सिना सहितः किल ॥
योद्धुं ययौ नवाबेन सार्द्धं स्वबलसंहतः ।
गत्वा पलाशिग्रामे स युद्धं कृत्वाजयत् ततः ॥
धरणीरसवाजीन्दुमित इंरेजिवत्सरे ।
कासमालीखाननामा नवाबोऽभूत्ततः पुरे ॥
स एंरेजपक्षीयान् प्रधानराजपूरुषान् ।
निहत्य साधयामास निखिलान् स्वमनोरथान् ॥
मेजर् आदम् ततः शीघ्रं सार्द्धं तेनैव मुन्सिना ।
गत्वा उदयनालायां रणं कृत्वा दुरात्मना ॥
विजित्य बलवन्तं तं नवाबं सेनया सह ।
निष्कण्टकमिदं राज्यं कृतवान् स भयापहः ॥
बाणर्त्तुसिन्धुशशभृन्मित इंरेजिवत्सरे ।
भूत्वा गवर्णरो लार्ड क्लाइव् किलकिलापुरे ॥
समेत्य मुन्सिना सार्द्धं परामृश्य च विस्तरं ।
जाफरालीखानसंज्ञं नवाबं मतिमत्तरं ॥
वङ्गदेशस्य च सुबादारं कृत्वा ततः परं ।
मोजफ्फर्जङ्गनामानमतिबुद्धिमतां वरं ॥
तं नायेबसुबादारं चकार गुणसागरं ।
पञ्चविंशतिलक्षन्तु मुद्राणां कृतवान् स्थिरं ॥
तयोर्व्ययार्थं प्रत्यब्दं ततः क्लाइव् गुणाकरः ।
तेनैव मुन्सिना सार्द्धं दिल्लीं गत्वा च सत्वरः ॥
शाहालम्बादशाहेन नवाबेन च धीमता ।

सुजाद्दौला नामकेन स सन्धिमकरोत् सदा ॥
अङ्काब्धिचन्द्रभूमाने हिजरिसंवत्सरे ततः ।
श्रीपालस्य द्वितीयाह्वे नवकृष्णाय तोषतः ॥
श्रीशाहालम्बादशाहो फर्मानाख्यं लिपिं मुदा ।
दत्तवान् यत्र लिखितं दिल्लीशेन सुसम्पदा ॥
सहस्रपञ्चकस्यैव मन्सबानां हि सादिनां ।
सहस्रत्रितयं वीर्य्ययुतानां शीघ्रगामिनां ॥
उत्तमं शिविकायानं झल्लरेण सुशोभितं ।
नकाराख्यं वाद्ययन्त्रं ध्वजं तोगेतिनामितं ॥
राजबाहादुरोपाधिं मानवृद्धियशस्करं ।
कृपया दत्तवानस्मै वङ्कमानपुरःसरं ॥
सुजाद्दौला नवाबस्य समीपात् राजयोग्यकं ।
खेलातनामकं प्राप्तो वसनं भूषणादिकं ॥
तस्मिन् वर्षे स भूपालो नवकृष्णोऽतिधीमते ।
नवद्वीपाधिपश्रीलकृष्णचन्द्राय भूभृते ॥
महाराजेन्द्रबाहादुरोपाधिं मानवृद्धितः ।
दापयामास शाहालम् बादशाहसमीपतः ॥
ततः स सहितो लार्ड क्लाइवेन महात्मना ।
काशीधाम समागम्य बभूवासौ महामनाः ॥
महाराजोपाधिकश्रीबलवन्ताह्वयेन च ।
सिंहेन हि सुबे वाराणस्याः सुनियमं स च ॥
कृत्वा विश्वेश्वरस्याग्रे नाट्यमन्दिरमध्यतः ।
नवकृष्णेश्वरं लिङ्गं स्थापयामास भक्तितः ॥
ततः पाट्नानामदेशे महाराजेन तत्र च ।
शेताबरायेण सह सुबे वेहारकस्य च ॥
कृत्वा सुनियमं तत्र तेनैव सहितो हि सः ।
कलिकाताख्यनगरे समायातो गतालसः ॥
ततस्तुष्टमनाः क्लाइव् कोम्पानिर्दत्तवान् पदं ।
देवानीसंज्ञकं तस्मै राज्ञे वङ्गलमानदं ॥
रसर्त्तुसिन्धुभूमाने इंरेजिहायने पुनः ।
शाहालम्बादशाहस्य प्रागुक्तस्य महात्मनः ॥
समीपतः फर्मानाख्यलिपिमानीय यत्नतः ।
तस्मै राज्ञे ददौ प्रीत्या प्रीतये तस्य धीमतः ॥
यत्रासीदं विलिखितं दिल्लीशेन सता स्वयं ।
मन्सबानां षट्सहस्रं सहस्राणां चतुष्टयं ॥
सादिनाञ्च महाराजोपाधिमस्मै प्रदत्तवान् ।
एवं सुवर्णघटितं पदकञ्च ददौ महान् ॥
यत्र मुद्रितपारस्यभाषयासीति वर्णितं ।
इंरेजकोम्पानिकर्म्मोत्तमरूपेण साधितं ॥
पश्चतो बादशाहस्य समीपात् सननामकं ।
सप्ताशीत्यधिकं चैव सप्तदशशतेऽब्दके ॥

राजोपाधेस्तथा बाहादुरोपाधेस्तथैव च ।
भूपालसवलक्षणाभिधानबाहादुराय च ॥
दातुं दयाभवत् लार्ड क्राइवस्य महामतेः ।
तन्मया सहितं चिह्नं कोम्पानेलग्नसहीश्वते ॥
दत्तं तथा दशविधं खेलातं वस्त्ररूपकं ।
किरीटं कुण्डलं रत्नभूषां हारञ्च मौक्तिकं ॥
फलकं करवालञ्च दण्डं चामरमुत्तमं ।
मयूरपुच्छव्यजनं घटीयन्त्रं मनोरमं ॥
हस्त्यश्वं भ्रमरैर्युक्तं शिविकायानमेव च ।
लार्ड क्राइव् ददौ राज्ञे सदा हितकराय च ॥
एवं सिपाहसंज्ञानां नृणां तद्द्वारपालने ।
आज्ञां दत्त्वा तस्य हस्तं गृहीत्वा तु वरासने ॥
हस्तिपृष्ठे समारोप्य पुरं प्रेरितवांस्ततः ।
हस्त्यश्वपत्तिनिकरैर्ध्वजदण्डैश्च संवृतः ॥
स च राजा रौप्यमुद्रां क्षिपन् मार्गेति हर्षतः ।
विवेश स्वं पुरं रम्यं सर्वलोकैः प्रशंसितः ॥
समुद्ररसराजेन्दुमाने हरेजिहायने ।
स लार्ड क्राइवो सेस्तर् वार्न्सृाय महात्मने ॥
राज्यभारं समर्प्याय स्वस्थाने प्रस्थितोऽभवत् ।
चकार च महाराजो देवार्चाकर्म पूर्ववत् ॥
तस्मिन् समये माता सुता विष्णोः पदं गता ।
कन्दर्पसमुद्राभिलेखाद्या सत्क्रिया कृता ॥
ततः कोम्पानिसंज्ञानां कर्म त्यक्त्वा स भूपतिः ।
पारमार्थिकचिन्तायां नियुक्तोऽभून्महामतिः ॥
अथ कोम्पानितः सिन्धं निर्माणार्थं प्रयाचितः ।
कुञ्जं विंशतिदिशां भूमिं दत्तवानतिमोदतः ॥
वसुविधुमुनिशीतांशुमाने हरेजिहायने ।
[illegible] प्रात्तानिह पत्तने ॥
[illegible] धर्मशिक्षानिमासिनः ।
[illegible] हि बहुशः [illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] च ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।

तथा सप्तशतं मुद्राः सप्तविंशतिकाधिकाः ॥
स्वर्णं कृत्वा महाभागो महाराजसकाशतः ।
राज्ञः करं राजकोषे प्रेषयामास यत्नतः ॥
ततो गवर्णरस्यैव ह्यनुमत्यनुसारतः ।
खालिसासंज्ञकात् स्थानात् महाराजोऽतिबाधितः ।
क्रमशः क्रमशश्चैव मुद्रास्ताः प्रतिवर्षतः ।
आदानमकरोत् राजाधिराजस्योपकारतः ॥
रामर्षिशशिभूमाने वङ्गसंवत्सरे स च ।
श्रीमद्राधावल्लभस्य सेवनार्थं चिराय च ॥
दत्तवान् वल्लभपुरं कृत्वा देवोत्तरं मुदा ।
श्रीमन्नन्ददुलालस्य सेवार्थमपि सर्वदा ॥
आनरपुरेतिख्यातायां परगणायां प्रयत्नतः ।
चारग्रामं तथा देवोत्तरं कृत्वा ददौ ततः ॥
तथाग्रद्वीपतः श्रीमद्गोपीनाथं मनोहरं ।
विग्रहं वल्लभपुरात् श्रीराधावल्लभं परं ॥
एवञ्च खड्दहग्रामात् श्रीश्यामसुन्दराह्वयं ।
श्रीमन्नन्ददुलालाख्यं शान्तिवनग्रामतः स्वयं ॥
स्वकं पुरं समानीय स राजा बहुयत्नतः ।
विधिबोधितरूपेण चिरं संसेव्य संयतः ॥
नानाविधानलङ्कारान् मुक्तावज्रविभूषितान् ।
तापनीयान् मणिमयान् दत्त्वा प्रेरितवांश्च तान् ॥
पिपीतकाख्यद्वादश्यां समाहूयाथ पण्डितान् ।
दानमानैः पुरस्कृत्य दिग्विदिक्षु समाश्रितान् ॥
श्रीमद्गोपीनाथसंज्ञं श्रीगोविन्दं तथा परं ।
विग्रहं संप्रतिष्ठाप्याकरोदाराधनं वरं ॥
बेहालाग्राममारभ्य कुल्पीं यावदुत्तमं ।
स व्ययेन पन्थानं कृतवान् सर्वतः समं ॥
तथा स्वकीयपुरतः पुरोऽतिशयविस्तृतं ।
चकार राजपन्थानं सघनं सुपरिष्कृतं ॥
सेनाम्बराब्धिभूमाने शकसंज्ञकहायने ।
कुलाचार्यान् बुधगणांश्चानीय स्वनिकेतने ॥
स च दाक्षिणपर्यायिमुख्यानां बहुयत्नतः ।
कुलीनानामेकपर्यायीमकरोद्हृदिरामतः ॥
आषाढायामगपक्षेन्दुमानेऽस्मौ वङ्गवत्सरे ।
विहाय देहमगमत्पादाम्भोजयुगं हरेः ॥ २१ ॥
रामसुन्दरदेवस्य नवरत्नादिधर्मस्य च ।
श्रीमदगुणसम्पन्नाः पुत्रा जाता हि पञ्च च ॥
हरमोहनदेवस्तु तेषां ज्येष्ठः प्रकीर्तितः ।
मन्मोहनदेवो यः स धीमान् मध्यमः सुतः ॥
गोपीमोहनदेवश्च तृतीयो भुवि विश्रुतः ।
भूपेन्द्रवल्लभाख्यः स एव दत्तकः सुतः ॥

चतुर्थो निरपत्योऽभूद्देवो गोलोकमोहनः।
कनिष्ठो वैष्णवोऽपुत्त्रो देवो भुवनमोहनः॥ * ॥
माणिक्यचन्द्ररायस्य द्वौ सुतौ च तयोः पुनः।
ज्येष्ठो राधाकृष्णदेवो निरपत्यो महागुणः॥
गोपीकृष्णाख्यदेवस्तु कनिष्ठो देवतार्चकः।
शुद्धाचारः कृती दान्तो बुद्धिमान् वंशकारकः॥ २३ ॥
पुत्त्रावुभौ महाराजनवकृष्णस्य चाग्रिमः।
गोपीमोहनदेवस्तु तयोर्यः स च द्वितिमः॥
कौन्सेलाध्यक्षजान् इष्टे विल्माभिधानकस्य च।
एवमादिमजेन्रेल् जान् कार्णकस्य तथैव च॥
गवर्णरसेक्रेटारिनस्य देवानीसंज्ञकं पदं।
स प्राप्य तत्र कर्त्तव्यं कृतवानतिमानदं॥
तथात्र सत्स्वविपणेर्व्वेतनार्थं बहुमूल्यकं।
कोम्पानये ददौ स्थानं सर्व्वेषां हितकारकं॥
अर्द्धेन्दुपचभूमाने वङ्गसंज्ञकहायने।
पौत्रोद्वाहार्थमाहूय स तु यत्नात् शुभे दिने॥
कुलाचार्य्यान् कुलीनांश्च गृहीत्वा तत्सुसम्मतिं।
कनिष्ठपड्भ्रातृजयोः कुलयोश्चिरसंस्थितिं॥
कृतवानथ मात्रा स तुलापुरुषदानकं।
कारयामास यत्नेन यथोक्तविधिपूर्व्वकं॥
ततश्च मातृकृत्ये स सुवर्णदानसागरं।
कृत्वा ददौ द्विजाग्र्येभ्यस्तानाहूय च सादरं॥
रामाग्निनागभूमाने इंरेजाब्दे स मानदं।
गवर्णरस्य कारुण्यात् प्राप्तवानुत्तमं पदं॥
राजवाहादुरोपाधिं सुवर्णाम्बरमस्तकं।
अनेकरत्नघटितं शिरोभूषणयुग्मकं॥
तथा सन्मौक्तिकं हारं फलकं करवालकं।
शस्त्रिषट्सह्यपत्तीनां शिविकाग्रगमार्थकं॥
आज्ञाञ्च प्राप्तवान् सोऽपि बहुसम्मानपूर्व्वकं।
चिरमाध्यादिरहितः कृत्वा राज्यमकण्टकं॥
वह्निवेदाचिशशभृन्माने वङ्गाख्यहायने।
सौरचैत्रे शुक्लपक्षस्यैकादश्यां तिथौ दिने॥
अर्द्धं नारायणस्येऽन्यार्द्धं कारणजीवने।
देहस्याधायात्मजनैर्गीयमाने जनार्द्दने॥
भावयन्निष्टदेवस्य रूपं हृदयसंस्थितं।
ज्ञानतः स महीपालः संप्राप्तोऽथ मृतोऽमृतं॥ * ॥
कनिष्ठो राजकृष्णाख्य औरसो गुणिमानकृत्।
राजाग्रगण्यो मान्यश्च वदान्यो गानशास्त्रवित्॥
स च त्रयोविंशसंख्यपर्य्यायाणां महात्मनां।
कुलीनानामेकयात्रीं कृतवान् गुणशालिनां॥
तथा कुलप्रदीपाख्यं कुलशास्त्रं प्रयत्नतः।

कुलीनानन्दजनकं चकार कीर्त्तिलाभतः॥
यथा चैतन्यदेवेन कृतं नगरकीर्त्तनं।
तथा राज्ञा कृतञ्चेति जनाः कुर्व्वन्ति कीर्त्तनं॥
रामाग्निवसुशुभ्रांशुमाने इंरेजिवत्सरे।
गङ्गातीरे ज्ञानपूर्वं मृतोऽगात् हरिमन्दिरे॥ २३॥
कृष्णमोहनदेवस्य तनयौ द्वौ सुशीलकौ।
राजनारायणाख्यानश्रीनारायणदेवकौ॥ * ॥
व्रजमोहनदेवस्याप्युभौ पुत्त्रौ तयोः परः।
धार्म्मिको रामरत्नाख्यो हरनारायणोऽवरः॥ * ॥
गोपीकृष्णस्य देवस्य पुत्त्राश्चत्वार एव च।
तेषां ज्येष्ठस्तु गोपालकृष्णोऽतिसात्त्विकः स च॥
श्रीलगोकुलकृष्णस्तु मध्यमो गुणसागरः।
वाङ्गालवेङ्के नायेवदेवानीकर्म्मतत्परः॥
गोपेन्द्रकृष्णगोपेशकृष्णौ सन्तानवर्ज्जितौ।
तृतीयकतुरीयौ च वाल्ये देहान्तरं गतौ॥ २४ ॥
वाणाम्बरषिभूमानसमायां शकभूपतेः।
गोपीमोहनदेवस्य गोष्ठीपतिमहीपतेः॥
श्रीराधाकान्तदेवेति नाम्ना पुत्त्रोऽभ्यजायत।
वङ्गविद्यां तथा हिन्दीं पारसीमारवीं ततः॥
इंरेजीं संस्कृतञ्चैवाधीतवान् सोऽतियत्नतः।
तथा चतुर्धुरीणस्य गोपीकान्तस्य धीमतः॥
सर्व्वाग्रमान्यस्य गोष्ठीपतेर्मौलिकराजतः।
सिंहेत्युपाधियुक्तस्य प्रपौत्रीं स उपायत॥
गोष्ठीपतिरभूत्तेन कुलाचार्य्यादिसम्मतः।
वर्म्मिलण्ड्फ्रान्सजर्म्माण्डेन्मार्कादिप्रदेशतः॥
रुषियामेरिकासंज्ञदेशानाञ्चैव सभ्यतः।
विद्यादिविषयाणान्तु सभानां सभ्यतामितः॥
एवं धर्म्मसभायाश्च तथान्यासां सभापतिः।
बभूव बहुसम्मानपूर्व्वकं स महामतिः॥
स वाणशीभशशभृन्मित इंरेजिवत्सरे।
प्राप्तः किलकिलानामनगरेऽस्मिन् मनोहरे॥
गवर्णरस्यैवेच्छातो माजिष्ट्रेटीयकं पदं।
यदेवैकान्तमान्यानां गुणिनामपि मानदं॥
मुन्यग्निनागभूमाने इंरेजाब्दे तु पैतृकं।
राजोपाधिञ्च कौन्सेलात् वसनं भूषणादिकं॥
मानवर्द्धनपत्रेण सहितं बहुमूल्यकं।
तथा गवर्णरस्यैव सभायामादिपीठकं॥
प्राप्तवानतिदुष्प्राप्यं यशोके मानदायकं।
अङ्कवेदाचिभूमाने वङ्गाब्दे विधिपूर्व्वकं॥
गयातीर्थप्रयाणार्थं प्रस्थितः पथिमध्यतः।
मुरशिदावादनगरे श्रीनवावसभाङ्गतः॥

सम्मानितः स च समादरतस्तत्समीपतः ।
राजार्हं हैमवसनं मस्तकं सतरूपतः ॥
हीमाख्यपक्षिपुच्छेन युक्तं युग्मं किरीटकं ।
कुण्डलं मौक्तिकं हारं फलकं करवालकं ॥
यत् सदा भूपतीनां हि भूरिसम्भ्रमवर्द्धकं ।
प्राप्तवांस्तत्तु दुष्प्रापं बहुसम्मानपूर्व्वकं ॥
शरेन्दुरसपक्षाङ्कमाने बङ्गाख्यहायने ।
पौषे दाहोपलक्ष्ये च सभां कृत्वा शुभे दिने ॥
समाहूय कुलाचार्य्यान् कुलीनान् पण्डितान् स च ।
कायस्थानां चतुर्विंशपर्य्यायाणां तथैव च ॥
सुमुख्यानां कुलीनानां कनिष्ठानाञ्च सर्व्वशः ।
एवं षड्भावजातानामैकथार्थीं चकार सः ॥
तत्पत्रिकां कारिकायाः पुस्तकञ्चापि मुद्रितं ।
कुलीनघटकादिभ्यः कृत्वा तेन समर्पितं ॥
पाठशालाध्यापनाय ग्रन्थनिर्म्माणहेतुतः ।
स्कुल्बुक् कोम्पानीनाम या सभास्मिन् प्रदेशतः ॥
स तदर्थं नीतिकथा वर्णमालादिपुस्तकं ।
[illegible] दृष्टान्तैर्द्वाचकं ॥
पुस्तं पारस्यभाषात इंरेजीभाषया पुनः ।
अनुवाद्य [illegible] राज्ञा महात्मनः ॥
स च रायल् एसियाटिक् समाजे प्रेरयत्ततः ।
तच्च मुद्राङ्कितं कृत्वा तन्मतं परिमाणतः ॥
अनुवादकमाभिख्ये सद्धैर दर्शनार्थिनः ।
कृपया प्रेषयामास [illegible] प्रयत्नतः ॥
तदाह [illegible]सम्पादकीयकं ।
शब्दकल्पद्रुमाख्याभिधानस्य सप्तकाण्डकं ॥
[illegible] कृत्वा गुणिभ्योऽभयदायिना ।
[illegible] मनुष्याः सर्व्वदेशीयपण्डिताः ॥
प्रत्येकं प्रेषयामास [illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
पुस्तकं [illegible] ।
[illegible] मुद्रितं तेन [illegible] ॥ २४ ॥
अथैव [illegible] पुरातनं ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।

क्रस्नीग्रामस्य मेजिष्ट्रेट् नामकेनाविचारतः ॥
पोलिस्मुपरिण्टेनडेण्टसंज्ञकस्य समीपतः ।
क्रुधा तन्मिथ्यापवादः पत्रेण प्रकटीकृतः ॥
तेन सेक्रेटरिद्वारा गवर्णराय वेदितः ।
सोऽपि तैर्ब्बहुधा चेष्टां कृतवान् तद्दमार्थतः ॥
किन्तु सेशन्जजाख्यस्य माड्विश्वाकस्य धीमतः ।
अतिसूक्ष्मविचारेण राजा निर्द्दोषतां गतः ॥
तस्माद्विपक्षपक्षाणां क्रूराणाञ्च विशेषतः ।
तेषामुद्यमभङ्गेन लज्जाधिक्यमजायत ॥
तेन सर् हर्बर्ट मेडाक् डेपिउटी गवर्णरः ।
स्नेहेनाक्लिन्नहृदयः सदयश्चातिमत्सरः ।
आह्वानार्थं तस्य राज्ञः प्रेषयामास पत्रकं ।
स चानीय स्वभवने तस्य सम्मानपूर्व्वकं ॥
सान्त्वयित्वा जयात्तस्मै धन्यवादं प्रदत्तवान् ।
एवं गवर्णरो जेनरेल् लार्डडेल्हौसिनामकवान् ॥
स्वदेशयानसमये सभामध्येऽतिहर्षितः ।
तद्राज्ञो दक्षिणं हस्तं गृहीत्वातिप्रयत्नतः ॥
लार्डेन च तथा लेडी वेलिङ्टन महोत्सुकः ।
साक्षात् सं कारयामास मानिनां मानवर्द्धकः ॥
पूर्व्वोक्तमिथ्याभियोगे दण्डार्हकरणाय च ।
उद्योगजन्यदोषस्याप्यकरोत् शासनं स च ॥
स तु मुन्सी पुनरपि दण्डपारुष्यवादतः ।
फरासडाङ्गानगरे पलायित्वा स्थितस्ततः ॥
राजकृष्णस्य नृपतेर्ज्ञाता वसुमिताः सुताः ।
शिवकृष्णो नृपो ज्येष्ठो यस्यास्ति शिवतुल्यता ॥
रूपवान् गुणवांश्चापि कालीकृष्णस्तु मध्यमः ।
दयालुर्बुद्धिमान् मान्यो धार्म्मिको मानवोत्तमः ॥
इंरेजीभाषया सोऽपि महानाटकनामकं ।
तथा रसलसित्याख्यमिं रेशासास्य पुस्तकं ॥
बङ्गीयभाषया दैवानुवादमकरोत्ततः ।
राजबाहादुरोपाधिं प्राप्तो गवर्णमेण्टतः ॥
देवीकृष्णोऽतिसरलो देवभक्तस्तृतीयकः ।
अपूर्व्वगुणसंयुक्तोऽपूर्व्वकृष्णस्तुरीयकः ॥
देवान् कुडर् नामधेयं ग्रन्थं स पारस्यभाषया ।
निर्म्माय कृतवान् सोऽपि [illegible] ॥
ततो माधवकृष्णस्तु सुधीमान् पुण्यकीर्त्तितः ।
पञ्चमो देवनामकः सोऽल्पे वयसि संस्थितः ॥
कृतवान् स च वेतालपञ्चविंशतिनामकं ।
ग्रन्थं पारस्यभाषातोऽनुवादं यत्नपूर्व्वकं ॥
षष्ठः कमलकृष्णस्तु देवो पैत्र्ये सदा रतः ।
कार्य्ये बहुगुणोपेतस्तथा पण्डितमण्डितः ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥

श्रीमन्नारायणस्यैतस्य पौत्रौ द्वौ च धीमतः ॥

मार्कण्डेयदेव धरवेशी [illegible]

[illegible]

श्रीमदाद्यदेवस्य भाग्याद्भवत् च ।

[illegible] पुत्रः [illegible] ॥

[illegible] पुत्रो हरिदेवाख्य विश्रुतः ।

तेषां ज्येष्ठः श्रीमद्वीरनारायण इतीरितः ॥

देवब्राह्मणभक्तः स बुद्धिमांश्च गुणान्वितः ।

ज्यायान् श्रीलक्ष्मीनारायण इति स्मृतः ॥

धार्मिकः सत्यवादी च सर्वशास्त्रस्य पारगः ।

तस्य श्रीदेवेन्द्रनारायणो देवः स धार्मिकः ॥

सद्वंशजातनृपः प्रतापादिगुणान्वितः ।

कलशारोहणनिपुणो धीमान् धीरसुधीरकः ॥

धर्मे भारतवर्षीयसर्वशास्त्रमार्गतः ।

सह [illegible] गुणादिसर्वादिकं मतः ॥

सदा प्रकाशं प्रसादं भयरूपं गभीरकं ।

यथा महोदयाः पार्थ प्रदीपे निशि यथा ॥१४॥

जाताः पुत्रास्तस्य श्रीमन्नृसिंहदेवस्य भूपतेः ।

तेषां श्रीपुरुषोत्तमदेवो ज्येष्ठः प्रकीर्त्तितः ॥

तस्मात् [illegible] श्रीलक्ष्मीनारायण भूपतिः ।

तेषां ज्येष्ठः श्रीहरिकृष्णस्य इत्यभिधीयते ॥

[illegible] दिपदे स्थितः ।

श्रीदेवीप्रसाददेवस्य तनयौ द्वौ च धीमतः ॥

श्रीमदानन्दचन्द्रो ज्येष्ठः स च ख्यातः ।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥१५॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥१६॥

[illegible]

[illegible]

[illegible] ॥१७॥

[illegible]

[illegible]

[illegible]

श्रीमद्भूपेन्द्रनारायणस्य [illegible] ॥१८॥

श्रीमद्देवेन्द्रनारायणदेवस्य धीमतः ।

[illegible] ॥

[illegible] ।

श्रीमद्वीरेन्द्रनारायणः पुत्रो ज्यायान् ॥

एवं श्रीपुरन्दरेन्द्रनारायणदेवकः ।

श्रीमद्भूमीन्द्रनारायणैर्नियोजितः ॥१९॥

श्रीमन्नृपेन्द्रदेवस्य पुत्रा जातोऽतिसुन्दरः ।

श्रीजितेन्द्रदेवेतिख्यातिपुत्रः प्रियदर्शः ॥

श्रीमदुपेन्द्रदेवस्य तनयस्तातिशोभनः ।

श्रीमद्देवेन्द्रदेवोऽजात कर्णिकामनः ॥२०॥

जगत्प्रख्यातमस्य ज्येष्ठोऽभूदतिधीमताम् ।

श्रीमत्कार्त्तिकेयेतिनाम्ना ख्यातोऽतिबुद्धिमान् ॥

श्रीलक्ष्मीनारायणस्य सुत उत्तमः ।

श्रीमद्भूपेन्द्रादिनारायणः सर्वधरोपमः ॥२१॥

इत्येकादिकषड्विंशपुरुषान्तातिनिर्मला ।

देववंशावली या सा समाप्ता मौक्तिकातुला ॥

वर्णमाला।

नागरी	English	বাঙ্গালা	[illegible]	नागरी	English	বাঙ্গালা
अ	a	অ	[illegible]	ञ	ñ	ঞ
आ (ा)	ā	আ (া)	[illegible]	ट	ṭ	ট
इ (ि)	i	ই (ি)	[illegible]	ठ	ṭh	ঠ
ई (ी)	ī	ঈ (ী)	[illegible]	ड	ḍ	ড
उ (ु)	u	উ (ু)	[illegible]	ढ	ḍh	ঢ
ऊ (ू)	ū	ঊ (ূ)	[illegible]	ण	ṇ	ণ
ऋ (ृ)	ṛi	ঋ (ৃ)	[illegible]	त	t	ত
ॠ (ॄ)	ṛī	ৠ (ৄ)	[illegible]	थ	th	থ
ऌ (ॢ)	lṛi	ঌ (ৢ)	[illegible]	द	d	দ
ॡ (ॣ)	lṛī	ৡ (ৣ)	[illegible]	ध	dh	ধ
ए (े)	e	এ (ে)	ଏ (େ)	न	n	ন
ऐ (ै)	ai	ঐ (ৈ)	ଐ (ୈ)	प	p	প
ओ (ो)	o	ও (ো)	ଓ (ୋ)	फ	ph	ফ
औ (ौ)	au	ঔ (ৌ)	ଔ (ୌ)	ब	b	ব
ं	n or m	ং	[illegible]	भ	bh	ভ
ः	h	ঃ	[illegible]	म	m	ম
क	k	ক	କ	य	y	য
ख	kh	খ	ଖ	र	r	র
ग	g	গ	ଗ	ल	l	ল
घ	gh	ঘ	ଘ	व	v	ব
ङ	ṅ	ঙ	ଙ	श	ś	শ
च	c	চ	ଚ	ष	sh	ষ
छ	ch	ছ	ଛ	स	s	স
ज	j	জ	ଜ	ह	h	হ
झ	jh	ঝ	ଝ	क्ष	ksh	ক্ষ

शब्दकल्पद्रुमः।

अ, अकारः। आद्यस्वरवर्णः। अस्योच्चारणस्थानं कण्ठः। स तु ह्रस्वो दीर्घः प्लुतश्च भवति। इति व्याकरणं। अस्य लेखनप्रकारो यथा,—

"दक्षतः कुण्डली भूत्वा कुञ्चिता वामतो गता।
ततोर्द्ध्वङ्गता रेखा दक्षोर्द्ध्वा तासु शङ्करः।
विधिर्नारायणश्चैव अन्तिष्ठेत् क्रमतः सदा।
अर्द्धमात्रा शक्तिरूपा ध्यानमस्य च कथ्यते।"

इति वर्णोद्धारतन्त्रं। अस्य तत्त्वं यथा,—

"शृणु तत्त्वमकारस्य अतिगोप्यं वरानने।
शरच्चन्द्रप्रतीकाशं पञ्चकोणमयं सदा।
पञ्चदेवमयं वर्णं शक्तित्रयसमन्वितं।
निर्गुणं त्रिगुणोपेतं स्वयं कैवल्यमूर्त्तिमान्।
बिन्दुतत्त्वमयं वर्णं स्वयं प्रकृतिरूपिणी"।

इति कामधेनुतन्त्रं। अस्य पर्य्यायः।

"अः श्रीकण्ठो मातृकाद्योऽनन्तो विष्णुस्तुतः"।

इति वीजवर्णाभिधानं। अन्यच्च।

"अः श्रीकण्ठः सुरेशश्च ललाटैकरमाभिधः।
पूर्णोदरी सृष्टिमेधौ कारणः प्रियम्वदः।
महाग्रस्रो वासुदेवो धनेशः केशवोऽमृतं।
कीर्त्तिर्निवृत्तिर्व्वागीशो नरकारिहरौ मरुत्।
ब्रह्मा वामार्द्धगो कण्ठः करलः प्रतिवादकः"।

प्रतिवादावद्य इत्यर्थः।

"महाद्री वामरूपश्च पारमेष्ठी वालिनी बिलत्।
विश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिधिरंहिनी।
अर्द्धनरप्रवरोधो ब्राह्मणः कामकर्षिणी"।

इति वर्णाभिधानतन्त्रं।

अ, व्य, अभावः। अन्यः। निषेधः। अनुकम्पा। इति मेदिनी। (नञोऽनकारः षड्विधान् नञर्थान् बोधयति। यथा,—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"।

इति। सादृश्ये यथा—अब्राह्मणः ब्राह्मणसदृश इत्यर्थः। अभावे यथा—अज्ञानं ज्ञानाभावः। अन्यत्वे यथा,—पटः अघटः, पटः घटभिन्न इत्यर्थः। अल्पत्वे यथा—अनुदरी कन्या अल्पोदरी इत्यर्थः। अप्राशस्त्ये यथा,—अधनं धर्म्मधनं, धर्म्मधनम् अप्रशस्तधनम् इत्यर्थः। विरोधे यथा—अधर्म्मः परापकारः, परापकारः धर्म्मविरोधी इत्यर्थः।)

अ, पुं, (अवति सर्व्वं व्याप्नोति इति अवतेर्डः) विष्णुः। इति मेदिनी।

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकार उच्यते ब्रह्मा प्रणवेन त्रयो मताः"।

इति दुर्गादासकृतवचनं। (क्ली। ब्रह्म। यथा,— अ इ उ ऋ ओ ओम् कलाश्च मूलं ब्रह्म इति कीर्त्तितम्, इति अग्निपुराणम्।)

अऋणी, [न्], त्रि, (न ऋणी, नञ्समासः। अत्र ऋणशब्दो न नञ्भानः, तथापि अनृणी इत्येव स्यात्। अपितु सामर्थ्यादेव ततश्च अनुमावनिपातनात् नात्र नलिरिति ध्येयम्।) अनृणी। अऋणग्रस्तः। अधनी। यथा,—

"दिवसस्याष्टमे भागे शाकं पचति यो नरः।
अनृणी चाप्रवासी च स वारिचर मोदते"।

इति महाभारतं।

अंश, त् क विभाजने। अंशकरणे। इति कविकल्पद्रुमः। तालव्योपधः। विभाजन इति भाज तु क तु इदन्तद्वयां इत्यस्य रूपं। अंशयति अंशापयति धनं वणिक्। इति दुर्गादासकृतधातुदीपिका।

अंशः, पुं, (अंश विभाजने, अदन्तचुरादिः। कर्म्मणि घञ्।) विभाजनं। तत्पर्य्यायः। भागः २। वण्टकः ३। इत्यमरः। विभागः ४ भक्तिः ५। इति जटाधरः। अंसशब्दो दन्त्यसान्तोऽपि। अंसि तु क विभाजने इति कविकल्पद्रुमदर्शनात्। स्कन्धः। इति विद्याविनोदादयः। (वस्त्वेकदेशः। रिक्थविभागः। चतुर्थभागः। भाज्याङ्कः। रविमूर्त्तिविशेषः। आदित्यविशेषः, यथा,—

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा।
एकादशस्तथा त्वष्टा द्वादशो विष्णुरेव च।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः"।

इति महाभारतम्। वनस्य यदक्षिरविभागतनमातः। यदुवंशीयः क्षत्रविशेषः, यथा,—ततः कुरुवंशः तस्य अनुरथः ततः पुरुहोत्रो जज्ञे तस्य अंश इति।)

अंशकं, क्ली, दिनं। इति त्रिकाण्डशेषः।

अंशकः, पुं, (अंशमनर्हं हरति इति अंशं दायीति वन्।) ज्ञातिः। दायादः। इति त्रिकाण्डशेषः। (अंशांशः। अल्पार्थे कन्।)

अंशभाक्, [ज्], त्रि, (अंशं भजते इति अंश + भज् + ण्विः।) अंशी। (दायादः) यथा। बौधायनः।

"स्वर्णोद्धिरदास त्रयो दर्शा दिमावदः।
प्रातस्त्याय कर्त्तव्यं देवर्षिपितृतर्पणं"।
निरङ्गास्तु न कुर्व्वीरन् अंशभाक् तत्र सेतुकत्।

इति प्रायश्चित्ततत्त्वं।

अंशलः, त्रि, (अंशः प्रचुरस्कन्धः अस्ति अस्य इति अंश + लच्।) अंसलः। बलवान्। इत्यमरटीकायां रमानाथः। (प्रचुरस्कन्धविशिष्टः)

अंशी, [न्], त्रि, (अंशोऽस्त्यस्येति अंश + इनि।) अंशयोग्यः। वस्त्वर्द्धविशिष्टः। भागी। यथा दायकरः।

"विभागश्चेत् पिता कुर्य्यात् स्वेच्छया विभजेत् सुतान्।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः"।

इति। सति तु पितरि मातृभावादधिकारात् पुत्राणां नांशिता। एवं पत्नेः पौत्रपुत्रोपरमे तदंशलाभे प्रपौत्राणामंशिता। इति दायतत्त्वं।

अंशुः, पुं, (अंशयति इति अंश विभाजने। मृगय्वादित्वात् कुः।) किरणः। प्रभा। इति मेदिनी। वेशः। इति धरणी। सूत्रादिसूक्ष्मांशः। इति हेमचन्द्रः। वेगः। सूर्य्यः। इति विश्वः। (ऋषिविशेषः। लतावयवः। सोमलतावयवः। भागः।)

अंशुकं, क्ली, (अंशून् कायति। कै शब्दे। आतइति कः। यद्वा अंशुभिः कायते। काय दीप्तौ। अन्येष्वपीति डः।) वस्त्रमात्रं। सूक्ष्मवस्त्रं। उत्तरीयवस्त्रं। इति मेदिनी। शुक्लवस्त्रं। इत्यमरटीकायां रमानाथः। (अधोवस्त्रं।) पत्रं। तेजपात इति भाषा। इति राजनिर्घण्टः।

अंशुधरः, पुं, (अंशूनां धरः। धरति इति धरः। पचाद्यच्।) सूर्य्यः। इति त्रिकाण्डशेषः।

अंशुमत्फला, स्त्री, (अंशुमन्ति सूक्ष्मावयववन्ति फलानि यस्याः। अंशुमन्तिव फलानि यस्याः इति वा। अजादित्वात् टाप्।) कदलीवृक्षः। इत्यमरः।

अंशुमती स्त्री, (अंशवः सन्ति यस्याः। मतुप् ङीप् च। अंशुमत्याः पर्णं सूक्ष्म अंशुमती। अनुदात्तादेरिति अञ्। प्रस्वात्मूषेषु इति लुपि युक्तवद्भावः।) शालपर्णीवृक्षः। इत्यमरः। (पट्टदेवता।)

अंशुमान्, [त्] पुं, (अंशवो विद्यन्ते अस्य इति। तदस्यास्तीति मतुप्।) सूर्य्यः। इति त्रिकाण्डशेषः। असमञ्जपुत्रः सूर्य्यवंशीयराजविशेषः। यथा।

"असमञ्जसस्तु पुत्रोऽभूदंशुमान्।
दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः"।

इति रामायणे बालकाण्डे ७० सर्गः ॥ सूर्य्यवंशीयासमञ्जोराजपौत्रः । यथा,—

"ततश्चकारासमञ्जा गङ्गानयनकारणं ।
लक्षवर्षं तपस्तप्त्वा ममार कालयोगतः ॥
दिलीपस्तस्य तनयो गङ्गानयनकारणं ।
तपः कृत्वा लक्षवर्षं ययौ लोकान्तरं नृपः ॥
अंशुमांस्तस्य पुत्रोऽभूद्गङ्गानयनकारणं ।
तपः कृत्वा लक्षवर्षं ममार कालयोगतः ।
भगीरथस्तस्य पुत्रो महाभागवतः सुधीः ।
तपः कृत्वा लक्षवर्षं ममार कालयोगतः" ॥

इत्यादि ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः ॥ (विश्वधारिप्रकाशैः परमात्मा ।) अंशुयुक्ते त्रि । शोभनतया अवयवविशिष्टः ।)

अंशुमाली, [न्] पु, (अंशूनां माला अस्ति अस्य इति । व्रीह्यादित्वात् इनिः ।) सूर्य्यः । इति त्रिकाण्डशेषः । (आदित्य इवांशुमाली चचार, इति विष्णुपुराणम् ।)

अंशुमत्, पुं, (अंशुः विद्याज्योतिः अस्ति अस्य । इति । अंशु+मतुप् ।) शाक्यमुनिः । इति त्रिकाण्डशेषः ।

अंशुहस्त, पु, (अंशुरेव हस्तः यस्य सः ।) सूर्य्यः । इति जटाधरः ।

अंस, त् क विभाजने । अंशकरणे । इति कविकल्पद्रुमः ॥ दन्त्योपधः । विभाजन इति भाजत् क तु पृथक्कृतौ इत्यस्य रूपं । अंसयति अंसापयति धनं वणिक् । इति दुर्गादासः ॥

अंसः, पुं, क्ली, (अंस्यते समाहन्यते । अंस समाघाते । घञ् । यद्वा अमति अम्यते वा भारादिना । अम गतौ । अमेः सन् ।) स्कन्धः । इत्यमरः । विभागे पुं । इति विश्वो हेमचन्द्रश्च । (ब्यूढ़ोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः । महौजाः ?) [note: see below]

अंसकूटः पुं, (अंस स्कन्धे कूटइव इति ।) ककुद् । षाँडेर भूँट इति भाषा । इति हेमचन्द्रः ।

अंसलः, त्रि, (अंसोऽस्यास्तीति । बलवान् अंसलस्तस्मात् इति लच् ।) बलवान् । इत्यमरः ।

अंहः, [स्] क्ली, (अमति गच्छति प्रायश्चित्तादिना । अम गत्यादिषु । अमेः हुक् च इति असुन् हुगागमश्च । अमति गच्छति अधोऽनेन वा । अंहेरसुना सिद्धे अमेरसुनि अहू इति माभूदिति अमेः हुक् चेति सूत्रं । तदा च—

"स्यात्कल्मषोऽभ्युपगंस्यमानसमंहसोऽहंसकाह" ।

इति द्विरूपकोषः । अतएव 'दन्तावोः सिद्धसङ्केतिरचनु एकः दायभक्रोऽविधानम्' इति सूत्रे पक्षे पाठः अनुनासिकान्ता प्रामाणिक इति वदन्ति ।) पापं । इत्यमरः । (दुरितं । किल्बिषं । अघं । ।)

अंहतिः, स्त्री, (हन्ति दुरितमनया । अमेरंहच इति अतिः ।) दानं । इत्यमरः । रोगः । क्लेशः । इति मेदिनी ।

अंहतिः, स्त्री, (अमेरंह च इति अतिः, अङ्घ्रिशिवात् ङीष् ।) दानं । इत्यमरटीकायाम्रायमुकुटः ।

अंहितिः, स्त्री, (अहन्+ अति । अंहादेशः इडागमश्च ।) दानं । इत्यमरटीकायां रायमुकुटः ।

अंङ्घ्रिः, पुं, (अहि+क्रिन् । वंक्रादयश्च इति उणादिसूत्रम् ।) पादः ॥ वृक्षमूलं । इत्यमरः ।

अंङ्घ्रिपः, पुं, (अङ्घ्रिभिः पिबति इति । पा पाने । सुपीति योगविभागात् कः । वृक्षः । इति हलायुधः ।

अंङ्घ्रिस्कन्धः, पुं, (अङ्घ्रिः पादः । तस्य स्कन्ध इव ।) गुल्फः । (कुर्चशिरः ।) इति हेमचन्द्रः ॥

अक, म वक्रगतौ । कुटिलगमने । इति कविकल्पद्रुमः ॥ म अकयति अकति सर्पः । इति दुर्गादासः ॥

अक, इ क लक्षणि । इति कविकल्पद्रुमः । लक्ष चिह्नकरणं । इ क अङ्कयति वस्त्रं रजकः । गोपथपाठेऽपि णेर्नित्यत्वाङ्गसदृनलोपेऽनावित्यस्याप्राप्तौ यगादौ अङ्क्यते इत्यादौ सिद्धे इदित् पाठश्चुरादेर्णेरनित्यत्वज्ञापनार्थः । तेन अङ्कतीत्यपि स्यात् । तथाच वोपदेवः ।

"सिद्धे नित्यणिजन्तत्वान्निदनुन्वे कितामिदित् ।
णिजनित्यत्वबोधार्थं न दृष्टोऽनुम्विधिः क्वचिदिति" ॥

अस्यार्थः । कितां कानुबन्धानां नित्यणिजन्तत्वान्निदनुन्वे नियनकारवत्त्वे सिद्धे इदित् इदनुबन्धकरणं णिचो णेरनित्यत्वबोधार्थं । किन्तु अनुम्विधिर्नकाराभावः क्वचिदपि न दृष्टः । इति दुर्गादासः ॥

अक, इ ङ गत्यां । लक्षणि । इति कविकल्पद्रुमः ॥ इ अङ्क्यते । ङ अङ्कते पुण्यतीर्थेषु सगर्य्यस्यान्वयद्विजः । इति हलायुधः ॥ इति दुर्गादासः ॥

अकं, क्ली, (न कं सुखं । तद्विरुद्धं वा । नञ्समासः । नञः न लोपः ।) पापं । दुःखं । इति मेदिनी ॥

अकचः, पुं, (नास्ति कचः केशः यस्य सः ।) केतुग्रहः । इति शब्दरत्नावली ॥ वाच्यलिङ्गस्तु केशशून्ये ।

अकथ्यः, त्रि, न कथ्यः । नञ्समासः ।) अकथनीयः । अवक्तव्यः ॥

अकनिष्ठः, पुं, (न कनिष्ठः नञ्समासः । बुद्धः । इति शब्दरत्नावली ॥ (अकनिष्ठाः शतसहस्राणि यावदकनिष्ठाना देवानां सन्निपतितान्यभूवन् इति ललितविस्तरः ।) अनिष्ठभिन्ने वाच्यलिङ्गः ॥

अकनिष्ठगः, पुं, (अकनिष्ठ+गम्+डः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

अकम्पितः, पुं, (न कम्पितः । नञ्समासः ।) बौद्धगणाधिपविशेषः । इति हेमचन्द्रः ॥ कम्परहिते वाच्यलिङ्गः ॥ (धर्मदिग्धान् महतान् मृगादविसृष्टानकम्पिताम् । इति ऋग्वेदीयप्रातिशाख्यवचनम् ।)

अकरणिः, स्त्री, (न+कृ अनि ।) आक्रोशविशेषः । शापः । यथा तस्याकरणिरेवास्तु । इत्यमरः ॥

अकरा, स्त्री, (न+कृ+अच् । स्त्रियां टाप् ।) आमलकी । इति शब्दचन्द्रिका ॥ वाच्यलिङ्गस्तु करहीने ।

अकरुणः, त्रि, (नास्ति करुणा यस्य इति ।) करुणः-

शून्यः । निर्दयः । अकृपः । यथा,—

"रथोत्तंशे कुसुमशकलं समुत्सारयति

इति महानाटकं ॥

अकर्कशः, त्रि, (न कर्कशः । नञ्समासः ।) कठोरहितं । कोमलः इति हेमचन्द्रः । (अ अपगता । इति ललितविस्तरः ।)

अकर्णः, त्रि, (नास्ति कर्णौ यस्य सः ।) कर्णर यथा,—

"अयाचिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः" ।

इति श्रीधरस्वामिकृतश्रुतिः ।) वधिरः । हेमचन्द्रः ॥

अकर्त्तनः, पुं, (न+कृत्+ल्युट् ।) वामनः । इति जटाधरः ॥

अकर्त्तव्यं, त्रि, (न+कृ+तव्य । न कर्त्तव्यं समासः ।) अकरणीय । अकरणार्हं । अ यथा,—

"अविरोधी भवान्धौ च सर्व्वमङ्गलमङ्गलं
विरोधी नाशवीजस्य सर्व्वोपद्रवकारकं ।
अकर्त्तव्यो विरोधश्च दारुणैः क्षत्रियैः

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४८ अध्याय

अकर्त्ता, [र्तृ] त्रि, (न कर्त्ता । नञ्समासः ।) -रकः । यथा,—

"चातुर्व्वर्ण्यं मया सृष्टं गुणकर्म्मविभागशः
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्य

इति श्रीभगवद्गीतायां ४ अध्याये १३ (कर्म्मनिर्लिप्तः साङ्ख्योक्त पुरुषः । कुकर्म्म

अकर्म्म, [न्] क्ली, (न कर्म्म । नञ्समास । दुष्कार्य्यं । यथा,—

"किं कर्म्म किमकर्म्मेति कवयोऽप्यत्र मोहि
तत्ते कर्म्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशु
कर्म्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मण
अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणो गतिः
कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म य
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्म्म

इति श्रीभगवद्गीतायां ४ अध्याये १६ । १८ श्लोकाः ॥ (अप्रशस्तं कर्म्म । कर्म्म दुष्कर्म्म ।)

अकर्म्मण्यं, त्रि, (न कर्म्मणि साधुः । न+ +यत् । कर्म्मायोग्यं । कार्य्याक्षमं । अकर्म्मण्य । अकेजुया इति भाषा । यथा,—

"षष्टिदण्डात्मिकायाश्च तिथेर्विंशकमश्च म
अकर्म्मण्यं तिथिमयं विद्यादेकादशी ति

इति तिथ्यादितत्त्वं ॥

अकर्म्मा, [न्] त्रि, (नास्ति कर्म्म यस्य । मोहितः । कार्य्याक्षमः । निष्कर्म्मा । का युक्तः । (क्रियामन्दः । कुकर्म्मा । खेच्छा

अकर्म्मान्वितः, त्रि, (कर्म्मणा अन्वित नेति । न+कर्म्मन्+अन्वितः ।) कुकर्म्मा अकर्म्मविशिष्टः । दुष्कर्म्मयुक्तः ॥

अकल्कनः, त्रि, (नास्ति कल्कनं दम्भः यस्य न+कल्कन ।) दम्भरहितः । मत्सरहीन

दम्भः २। इति हेमचन्द्रः॥ (शाठ्यरहितः। सरलः।)
अकल्कन इत्यपि पाठः।

[अक]ल्का, स्त्री, (नास्ति कल्कः अन्धकारमालिन्यं यस्याम् इति।) ज्योत्स्ना। इति शब्दचन्द्रिका॥ वाच्यलिङ्गन्तु कल्करहिते॥ (शाठ्यशून्यः। दम्भशून्यः। सरलः। निर्म्मलः।)

[अक]ल्पितः, त्रि, (न कल्पित इति। नञ्समासः।) कल्पनारहितः। अकाल्पनिकः। अकृत्रिमः। अरचितः। (सत्यः। प्रकृतः। अवितथः।)

[अक]ल्यः, त्रि, (न कल्यः सुस्थः। नञ्समासः।) रोगी॥ (यथा,—
"अकल्यबालस्थविरविषमस्थक्रियाकुलान्।
... ... नाह्वाययेन्नृपः"॥
इति मिताक्षराधृतवचनम्॥ असमर्थः। यथा,—
"अकल्यः साङ्ख्ययोगायां शकुन्त इव पञ्जरे"।
इति भागवते।) कल्यो निरामयः तत्र नञ्समासः॥

[अक]ल्याणं, क्ली, (न कल्याणं। नञ्समासः।) अमङ्गलं। अशुभं॥ (त्रि। कल्याणरहितः।)

[अक]स्मात्, व्य, अतर्कितं। हठात् १। तत्पर्य्यायः। सहसा २ सद्यः ३ सपदि ४ तत्क्षणे ५ एकपदे ६। इति हेमचन्द्रः॥ नञ्समस्तकिम्शब्दस्य पञ्चम्यन्तप्रयोगोऽयं। इति केचित्॥

[अका]रणं, त्रि, (नास्ति कारणं यस्य सः। न+कारणं।) कारणशून्यं। निर्हेतु। अनिमित्तं। यथा,—
"कुतः पुनः शश्वदभद्रमीश्वरे,
न चार्पितं कर्म्म यदप्यकारणम्"।
इति श्रीभागवतं॥ (कारणं विना। कारणाभावः। यथा,—"कारणसामान्ये द्रव्यकर्म्मणां कर्म्माकारणमुक्तम्"। इति वैशेषिकसूत्रम्।)

अकारणगुणोत्पन्नगुणः, पुं, (विना कारणगुणं उत्पन्ना जाताः ये गुणाः। अकारणगुण+उत्पन्न+गुण।) स्वाभाविकगुणः। न्यायमते विभुनिष्ठविशेषगुणाः यथा,—बुद्धिः १ सुखं २ दुःखं ३ इच्छा ४ द्वेषः ५ यत्नः ६ धर्म्मः ७ अधर्म्मः ८ भावना ९ शब्दः १०।
("अतीन्द्रिया विभूनान्तु ये स्युर्वैशेषिका गुणाः।
अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः"॥
इति भाषापरिच्छेदे। अकारणेति कारणगुणपूर्व्वका रूपादयो वक्ष्यन्ते। बुद्ध्यादयस्तु न तादृशाः। आत्मादेः कारणाभावात्।) इति सिद्धान्तमुक्तावली॥

अकार्पण्यं, क्ली, (न कार्पण्यम्। नञ्समासः।) कृपणतारहितत्वं। यथा,—
"लोभादपि च दातव्यमदीनेनैव चात्मना।
अकार्पण्येन दातव्यमित्येवं हि सतां मतम्"।
इति [illegible]॥

अकार्य्यं, क्ली, (न कार्य्यम्। नञ्समासः।) कार्य्याभावः। अकृत्यं। अकर्म्म। (दुष्कर्म्म। कुकार्य्यम्।) यथा,—
"किमकार्य्यं कदर्य्याणां दुस्त्यजं किं धृतात्मनां"।
इति श्रीभागवतं॥

अकालः, पुं, (न कालः, अप्रशस्तः कालो वा। नञ्समासः।) असमयः। अप्रशस्तकालः। यथायोग्यकालातिरिक्तसमयः। अशुद्धकालः। यथा,—गुरोरस्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्यास्ते द्वात्रिंशद्दिनं। तस्योदयात् परं बालत्वे पञ्चदशाहः। गुर्व्वादित्ययोगे स्थितिकालः दशत्रिंशद्दिनादिः।
सिंहे गुरोः स्थितिकालः सम्वत्सरस्थूलः। अस्य विशेषः यदि माघपौर्णमास्यां मघानक्षत्रं प्राप्यते तदैव भाव्यं। वक्रिगुरौ अष्टाविंशतिदिनं। पूर्व्वराशावनागतातिचारिगुरौ एकवर्षः। अयमेव लुप्तसम्वत्सरः। पूर्व्वराशिगन्तातिचारिगुरौ पञ्चचत्वारिंशत् दिनं। नीचस्थगुरोः स्थितिकालः संवत्सरस्थूलः। राहुयुक्तगुरोः स्थितिसमयः एकाब्दः स्थूलः। भृगोर्मध्यास्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्य मध्यास्ते द्विसप्ततिदिनं। तस्योदयात् परं बालत्वे दशाहः। एतत्त्रयं प्रोषितास्तमुच्यते॥ भृगोः पादास्तात् प्राक् वृद्धत्वे दशाहः। तस्य पादास्ते द्वादशाहः। तस्योदयात् परं बालत्वे दिनत्रयं। एतत्त्रयं वक्रास्तमुदितं। मलमासे मासमेकं॥ भानुलङ्घितमासे क्षयमासे च तदेव॥ भूकम्पाद्यद्भुते सप्ताहः॥ पौषादिचतुर्मासे एकदिनवर्षणाद्धितवर्षणे तद्दिनं। दिनद्वयवर्षणाद्धितवर्षणे दिनत्रयं। दिनत्रयवर्षणाद्धितवर्षणे सप्ताहः॥ दक्षिणायने षण्मासाः॥ श्रीहरिशयने चतुर्मासः॥ चन्द्रसूर्य्यग्रहणे कर्म्मविशेषे एकत्रिसप्तदिनानि॥ इति ज्योतिषतत्त्वं॥

अकालजः, त्रि, (अकाले जायते इति। अकाल+जन+ड। अकालजातः। असमयोत्पन्नः। अपूर्णकालोद्भवः। यथा,—
"अकालजन्तु विरसं न धान्यं गुणवत् स्मृतं"॥
इति राजवल्लभः॥

अकालजलदोदयः, पुं, कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदयः॥ यथा रघुवंशे—
"अवकीर्णयवप्राणां सेहे मधमदं न सः।
बालातपमिवाब्जानामकालजलदोदयः"॥

अकालमेघोदयः, पुं, (अकाले यः मेघानाम् उदयः।) कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदयः॥

अकिञ्चनः, त्रि, (नास्ति किञ्चन यस्य। मयूरव्यंसकादित्वात् बहुव्रीहिसमासः।) दरिद्रः। नास्ति किञ्चिदपि यस्य। इति हेमचन्द्रः॥ (यथा,—'अकिञ्चनः सन् प्रभवः स सम्पदाम्' इति कुमारसम्भवे।)

अकिञ्चनता, स्त्री, (अकिञ्चनस्य भावः। अकिञ्चन+तल्।) अकिञ्चनस्य भावः। सा तु परिग्रहत्यागरूपतपोविशेषः। इति हेमचन्द्रः॥

अकिल्बिष, त्रि, (नास्ति किल्बिषं यस्य। बहुव्रीहिः।) किल्बिषशून्यः पापरहितः। यथा,—
"[illegible] अकल्मषमकिल्बिषं"।
इति [illegible]॥

अकीर्त्तिः, स्त्री, (न कीर्त्तिः। नञ्समासः।) अयशः। यथा,—
"अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययां।
सम्भावितस्य चाकीर्त्तिर्म्मरणादतिरिच्यते"॥
इति श्रीभगवद्गीतायां २ अध्याये ३४ श्लोकः॥

अकीर्त्तिकरं, त्रि, (अकीर्त्तिं करोति जनयति इति। यद्वा कीर्त्तिकरं न भवतीति नञ्समासः।) अयशस्करं। यथा,—
"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं।
अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्ज्जुन"॥
इति श्रीभगवद्गीतायां २ अध्याये २ श्लोकः॥

अकुतोभयः, त्रि, (नास्ति कुतोऽपि भयं यस्य सः। मयूरव्यंसकादिगणान्तर्गतः। न+कुतः+भयं।) नास्ति कस्माद्भयं यस्य। निर्भयः। यथा। इच्छतामकुतोभयमिति भक्तिरसामृतसिन्धुः॥

अकुप्यं, क्ली, (न कुप्यं, कुप्यादन्यदित्यर्थः। नञ्समासः।) स्वर्णं। रूप्यं इति स्वामी॥ यथा—कृत्स्नकुप्यं वसु वासवोपमः'। इति भारविः)॥

अकूपार, पुं, (न कूपारः। नञ्समासः। कुं पृथिवीं पिपर्त्ति इति कूपारः। पृ पालनपूरणयोः। कर्म्मणि अण्। अन्येषामपीति दीर्घः।) समुद्रः। इत्यमरः॥ कूर्म्मराजः। पाषाणादिः। इति मेदिनी॥ कमठः। इति त्रिकाण्डशेषः॥

अकूर्च्चः, पुं, (नास्ति कूर्च्चः कैतवं यस्य। बहुव्रीहिः।) बुद्धः। इति त्रिकाण्डशेषः। कैतवशून्ये त्रि। (दम्भशून्ये)।

अकृतं, त्रि, (न+कृ+क्त।) न कृतं। अनिष्पादितं। यथा,—
"कालातीतन्तु यत् कुर्य्यादकृतन्तद्विनिर्द्दिशेत्"
इति स्मृतिः॥ (नियः। प्रमाणाविषयः। (क्ली) मोक्षः। कारणं। (स्त्री) प्रकृतिविशेषः। यथा—"अपां निसर्गमनादिलक्षणा प्रकृतिः सा न केनचित् कृता"।)

अकृतज्ञः, त्रि, (न+कृत+ज्ञा+क। न कृतज्ञः इति नञ्समासः।) कृतघ्नः। हिताकाङ्क्षी। उपकारनाशी। उपकारघ्नः। यथा,—
"मन्तोऽपि न वै केचिदकृतज्ञस्य सम्भवः।
[illegible] अकृतज्ञा गुरुद्रुहः"॥
इति श्रीभागवतं॥

अकृतित्वं, क्ली, (अ+कृतिन्+त्व।) अकुशलता। अपटुता। कर्म्माकुशलत्वं। अयोग्यत्वं॥

अकृती, [न्] त्रि, (न+कृती। नञ्समासः।) अकर्म्मण्यः। कार्य्याक्षमः। [illegible]॥

अकृत्रिमं, त्रि, (कृत्रिमात् [illegible]। न कृत्रिमम् इति नञ्समासः।) अकपटं। अव्याजं। निर्द्दोषं। अकारणजातं। यथा [illegible]।
"[illegible]
[illegible]"
[illegible]
[illegible]

शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनं" ।
स्वभावोक्तं अकृत्रिमं । इति व्यवहारतत्त्वं ॥
(अक्रियोत्पन्नः । नैसर्गिकः । अयत्नकृतः । यथा,—
"तरङ्गनिमग्नौ हार्द्दमापत्स्वपि न मुञ्चति" ।
इति हितोपदेशः ।)

अकृपः, त्रि, (नास्ति कृपा यस्य सः ।) कृपाशून्यः । निर्द्दयः । अकरुणः । यथा,—
"अनन्तो वरुणो रुद्रस्त्रिरामी सदयोऽकृपः" ।
इत्यनुकृताचार्य्यः ॥

अकृपणः, त्रि, (न कृपणः । नञ्समासः ।) कार्पण्यरहितः । दीनताशून्यः । यथा,—
"महतो व्यसनं प्राप्तो दीनः कृपण उच्यते ।
कुलेऽप्यकृपणे राम संभूतः सर्व्वकामदे" ॥
इति रामायणं । (मुक्तहस्तः । वदान्यः । यथा,—
"भुक्तानि नयपक्षैरकृपणैरविलष्ठ यामो वयम्" ।
इति वैराग्यशतके ।)

अकृष्णकर्म्मा, [न्] त्रि, (न कृष्णं मलिनं कर्म्म यस्य सः । न+कृष्ण+कर्म्मन् ।) दुष्कर्म्मरहितः । निष्पापः । शुद्धाचारः । अकृष्णं निष्पापत्वात् शुक्लं कर्म्मास्य । इत्यमरटीकायां भरतः ॥

अकेशः, त्रि, (नास्ति केशो यस्य । अल्पः अप्रशस्तो वा केशो यस्य सः ।) केशरहितः । अल्पकेशयुक्तः अप्रशस्तकेशविशिष्टः ॥

अकैतवं, क्ली, (न कैतवम् । नञ्समासः ।) कैतवाभावः । अकपटता । अधूर्त्तता । अवञ्चना ॥

अकोटः, पुं, (न+कुट+भावे घञ् ।) गुवाकः । इति त्रिकाण्डशेषः ॥

अकोविदः, त्रि, (न कोविदः । नञ्समासः ।) अपण्डितः । मूर्खः ॥

अकौटिल्यं, क्ली, (न+कौटिल्यं । नञ्समासः ।) कौटिल्याभावः । सरलता ॥

अक्का, स्त्री, (अकं दुःखं कायति शब्दायते इति कै शब्दे ।) माता । इति शब्दरत्नावली ॥

अक्तः, त्रि, (अञ्जेर्व्वा क्तः । [illegible] इति भाष्यस्य कैयटेन तथा व्याख्यातत्वात् । अनक्ति व्यक्तं वा । अञ्ज् व्यक्तादौ । अञ्जिघृसिभ्यः क्तः इति औणादिकः क्तः ।) युक्तः । हतः । व्याप्तः । [illegible] इकारात् अक्तमिति क्तः । यथा,—
"[illegible] पूर्व्वं तैलाक्तं नेव दृश्यते" ।
इति [illegible] । (स्त्रियां अक्ता इति पदं [illegible] वेदे दृष्टम् ।)

अक्तुः, स्त्री, रात्रिः । अनक्ति प्रदीपं गच्छति अक्तुः । [illegible] [illegible] [illegible] । वेदभुवःस्त्वेषूदं । (अन्धं । तिमिरः । कान्तिः । वस्त्रं । [illegible] । [illegible] । इति अर्थो वैदिकशब्देऽर्थोऽत्र ।)

अक्रन्दः, त्रि, (न क्रन्दः । नञ्समासः ।) [illegible] । यथा,—
"[illegible] [illegible] [illegible] [illegible] [illegible]" ।
[illegible] [illegible] [illegible] ॥

इति मानवे ११ अध्याये १३३ श्लोकः ॥

अक्रमः, त्रि, (न क्रमः । नञ् समासः । नास्ति क्रमो यस्य इति वा ।) क्रमरहितः । व्यतिक्रमः । यथा,—
"अक्रमाच्छेपमो वृद्धिं योऽभिवाञ्छति मूढधीः" ।
इति माघवकारः ॥ (क्रमाभावः । क्रमविपर्य्ययः । यथा,—'इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः' इति शृङ्गारशतकम् ।)

अक्रान्ता, स्त्री, (न+क्रम्+क्त+आप् ।) वृहती । इति कार्त्तिकमलमाला ॥ अनाक्रान्ते त्रि ॥

अक्रियः, त्रि, (नास्ति क्रिया यस्य । अप्रशस्ता वा क्रिया यस्य ।) अक्रियान्वितः । कुकर्म्मविशिष्टः । क्रियारहितः । यथा 'अक्रियत्वाच्च सर्व्वदा' । इति चरकः ॥ (निश्चेष्टः । स्पन्दरहितः । कर्म्मत्यागी । यथा,—
"अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः ।
स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः" ॥
इति गीतायाम् ।) (स्त्री । क्रियाभावः । क्रियात्यागः । अयथाक्रिया । यथा,—
"अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः सर्व्वकर्म्मिणाम् ।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया" ॥
इति कात्यसङ्कलितः ।)

अक्रूरः, पुं, (क्रौर्य्यवान् क्रूरः, स न भवति इति अक्रूरः । यद्वा क्रूर इति भावप्रधानो निर्द्देशः । न विद्यते क्रौर्य्यम् इति अक्रूरः ।) गान्दिनीपुत्रः । श्रीकृष्णपितृव्यः । तस्य पिता श्वफल्कः । (तस्य माता गान्दिनी ।) इति श्रीभागवतं ॥ क्रूरताशून्ये त्रि ॥ (सरले । यथा,—
"श्लोका सुखोच्चमक्रूरं विस्पष्टार्थं मनोरमम्" ।
इति मनुः । पुंसि विष्णुः । यथा,—
"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः" ।
इति भारते ।)

अक्रोधः, पुं, (न क्रोध इति नञ् समासः । नास्ति क्रोधो यस्य इति वा ।) क्रोधचित्तविकारः तद्विपरीतः । स तु आश्रमिणां दशधर्म्मान्तर्गतधर्म्मः । इति जटाधरः ॥ (यथाह मनुः—
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्व्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" ॥
इति ।) वाच्यलिङ्गः क्रोधरहितश्चेत् ॥

अक्लान्तः, त्रि, (न+क्लम्+क्त । न क्लान्त इति नञ्समासः ।) क्लान्तिरहितः । अनवसन्नः । अम्लानः ॥

अक्लिका, स्त्री, नीलीवृक्षः । इति शब्दचन्द्रिका ॥

अक्लिष्टकर्म्मा, [न्] त्रि, (अक्लिष्टम् अनायासलब्धं कर्म्म यस्य । बहुव्रीहिः ।) अक्लेशेन कर्म्मकर्त्ता । यथा,—
"[illegible] कोऽक्लिष्टस्य रामस्याक्लिष्टकर्म्मणः" ।
इति रामायणं ।

अक्लेदः, पुं, (न क्लेद इति नञ् समासः ।) क्लेदाभावः । यथा,—
"[illegible] मे. कर्म्मनिर्व्वर्त्तितः ।

अक्षरोग शरीरस्य कुर्व्वीत धनसञ्चयं
इति मानवे ४ अध्याये ३ श्लोकः । क्षेत्र
त्रि ॥

अक्षोभः, त्रि, (नास्ति क्षोभो यस्य इति ब
क्षोभशून्यः । अनायासः । अक्लेशः ॥

अक्ष, न ऊ व्याप्तौ । संहतौ । इति कवि
न अक्ष्णोति धनं लोकः । व्याप्नोति रा
वा इत्यर्थः । ऊ अक्षिष्टा । अष्ट
दुर्गादासः ।

अक्ष, ऊ व्याप्तौ । संहतौ । इति कवि
अक्षति धनं लोकः । व्याप्नोति राशी
इत्यर्थः । ऊ अक्षिष्टा । अष्टा । इति दु

अक्षं, क्ली, (अक्ष्णोति अक्षति वा अक्ष्यते
अत्र वा अक्ष् व्याप्तौ । पचाद्यच् अश्
नुते व्याप्नोति अशू व्याप्तौ । अर्थेभ्यो
वा ।) इन्द्रियं । (यथा विष्णुपुराणे,—
"शब्दादिष्वनुरक्तानि निगृह्याक्षाणि
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरा
सौवर्च्चलं । तुत्थं । इति मेदिनी । (अ
रामायणे,—
"सर्व्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतस

अक्षः, पुं, कर्षपरिमाणं । (यथा,—
"ते षोडशाक्ष कर्षोऽस्त्री पलं कर्ष
पाशकः । (अक्षैर्दीव्यति वा दीव्यति
सिद्धान्तकौमुदी ।) (पाशक्रीडा । यथा
'मृगयाक्षो दिवास्वप्नः परीवादः स्त्रिये
कलिद्रुमः । इत्यमरः । (विभीतकवृक्ष
छान्दोग्ये—यथा वै द्वे आमलके द्वे
वाक्षौ मुष्टिरनुभवति ।) आत्मा । प्र
हारः । गरुडः । इन्द्रादः । सर्पः । च
मेदिनी । (चक्रधारणदारुभेदः । यथा
"छिन्नमाश्लेषे समयुगे तिर्य्यक् प्रतिमुख
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च
आत्मा । रावणपुत्रः । इति हेमचन्द्रः ।
मायणे—'निशम्य राजा समरे सहोत्थ
कुमारमक्षं प्रसमीक्षताथ वै
जातान्धः । गरुडः । इति शब्दरत्नावली
यथा भारते—
"अक्षश्च रथयोगी च सर्व्वयोगी मह
इति) संस्कृतचक्षुः । यथा,—
"अक्षाश्रितशिप्रा पञ्चमाङ्किता च
जङ्घावधिः स्यादिह दक्षिणोत्त" ।
इति भास्वती ॥
"समा शरप्ला लघुरीययोगा-
दक्षः सदा दक्षिणदिक् प्रदिष्टः" ।
इति जातकार्णवः—
"दक्षिणोत्तररेखायां सा तत्र विषुव
शङ्कुच्छाया चले निन्ये विषुवत् कर्ण
तन्माध्ये तयोश्चापे क्रमाक्षो दक्षि
इति सूर्य्यसिद्धान्तः ।

अक्षकः, पुं, (अक्ष+क) तिनिशवृक्ष
रत्नमाला ।

क्रीड़ा, स्त्री. (अक्षैः या क्रीड़ा) द्यूतक्रीड़ा पाशकक्रीड़ा। यथा। अक्षक्रीडायां श्यामयुधि-ष्ठिरसंवादः प्रचरति। इति तिथ्यादितत्त्वं॥ तद्विवरणं चतुरङ्गशब्दे द्रष्टव्यं॥ *॥ कार्त्तिक-शुक्लप्रतिपदि तत्क्रीड़ाविधिर्यथा। ब्रह्मपुराणे,—

"शङ्करश्च पुरा द्यूतं ससर्ज सुमनोहरं।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी गौरी नित्यं सुखोषिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः॥
पराजयो विरुद्धस्तु लब्धनाशकरो भवेत"।

द्यूतपाशप्राणिभिः क्रीड़नं। यथा मनुः,—
"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते"।
इति तिथ्यादितत्त्वं॥ ०॥ दशमीद्वादश्योस्तत्-करणनिषेधो यथा। स्मृतिः,—

"शाकं माषं मसूरञ्च पुनर्भोजनमैथुने।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत्"॥

कूर्म्मपुराणे,—
"कांस्यं मांसं सुरां क्षौद्रं हिंसां तैलमसत्यताम्।
द्यूतक्रीड़ां दिवानिद्रां व्यायामं क्रोधमैथुनं॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्"।

इत्येकादशीतत्त्वं॥ ०॥ अन्यत् द्यूतशब्दे द्रष्टव्यं॥

अक्षजः पुं, (अक्ष+जन्+ड) वज्रं। इति पुरुषोत्तमः। अक्षिज इति क्वचित् पाठः। (विष्णुः। यथा भागवते,—
"जघानोत्पत्य गदया हनावसुरमक्षजः"।

अक्षतं, क्ली, (क्षण् हिंसायां। नपुंसके भावे क्तः। अनुदात्तोपदेशेत्यादिना नलोपः।) लाजाः। नपुंसकं। इति मेदिनी।

अक्षतः, त्रि, (न+क्षण्+क्त) अहिंसितः। इति मेदिनी। अखण्डितः। इति शब्दरत्नावली। (यथाह मनुः,—
"दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु स्थानेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्"।)

अक्षतः, पुं, यवः। इति मेदिनी। (यथा आश्वलायनगृह्यसूत्रे,—
"अक्षतसक्तूनां नवं कलसं पूरयित्वा"।)
शस्यमात्रं। इति अमरटीकायां भानुदीक्षितः॥ अक्षताः पुं भू म्नीति स्वामी॥ (न क्षताः येषां ते इति अक्षताः। मुकुटस्तु अमरव्याख्यानावसरे लाजाः पुं भूम्नि तेऽक्षतमिति पठित्वा कर्म्मणि क्तः। क्षतं खण्डितं। न क्षतमक्षतमिति विग्रहः नित्य-पुंलिङ्गाः नित्यबहुवचनान्ताश्च लाजा अक्षतमिति व्याचष्टे॥ केचित्तु अखण्डतण्डुला अक्षतमित्याहुः।)

अक्षता स्त्री, कर्कटशृङ्गी। काँकड़ाशृङ्गी इति भाषा। इति शब्दचन्द्रिका॥ पुरुषसंसर्गरहिता स्त्री। स्मृतिः॥ यथाह याज्ञवल्क्यः—
"अक्षतायां क्षतायां वा जातः पौनर्भवः पुनः"।

अक्षदर्शकः, पुं, (अक्षाणां व्यवहाराणां दर्शकः। अक्ष+दृश्+ण्वुल्।) व्यवहारद्रष्टा व्यवहाराणां ऋणादानादिविवादानां द्रष्टा निर्णेता। धर्म्माध्यक्ष इत्यर्थः। इत्यमरः तट्टीका च॥ जज् इति इंराजीयभाषा॥

अक्षदृक्, (श्) पुं, (अक्ष+दृश्+क्विप्।) अक्षदर्शकः। (व्यवहारस्य ज्ञाता।)

अक्षदेवी, (न्) त्रि, (अक्षैर्दीव्यति। दिवु क्रीड़ादौ। सुपीति णिनि।) द्यूतक्रीड़ाकारकः। इत्यमरः॥

अक्षद्यू, पुं, (अक्षैर्दीव्यति। दिवु क्रीड़ादौ। अक्ष+दिव्+क्विप्+ऊट्।) अक्षक्रीड़कः। इति व्याकरणं॥

अक्षधरः पुं, (अक्ष+धृ+अच्।) शाखोटवृक्षः। इति भूरिप्रयोगः॥

अक्षधूर्त्तः पुं, (अक्षेषु धूर्त्तः। सप्तमी शौण्डैरिति समासः।) द्यूतक्रीड़कः। तत्पर्य्यायः। धूर्त्तः २ अक्षदेवी ३ कितवः ४ द्यूतकृत् ५। इत्यमरः॥ जुयारी इति भाषा॥

अक्षधूर्त्तिल पुं, (अक्ष+धुर्+तिलच्।) वृषः। इति हारावली॥

अक्षपाटकः पुं, (अक्ष+पाट+वुन्।) धर्म्माध्यक्षः। इति जटाधरः॥ जज् इति भाषा॥

अक्षपादः पुं, (अक्ष+पाद।) तार्किकः। तत्पर्य्यायः। नैयायिकः २। इति हेमचन्द्रः॥

अक्षपीड़ा स्त्री, (अक्ष+पीड़ा।) यवतिक्ता लता। इति राजनिर्घण्टः॥

अक्षमः त्रि, (नास्ति क्षमा यस्य सः।) क्षमारहितः। क्षमाशून्यः। (असमर्थः।)
"विष्णुसेवी च श्वपचो वंशानां कोटिमुद्धरेत्।
हरेरभक्तो विप्रश्च स्वञ्च रक्षितुमक्षमः"॥
इति ब्रह्मवैवर्त्ते ३३ अध्यायः॥

अक्षमा स्त्री, (न क्षमा इति नञ्समासः।) अक्षान्तिः। ईर्षा। इति शब्दरत्नावली॥ (यथा किरातार्ज्जुनीये—
"अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापिनी।
जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति"॥

अक्षमाला स्त्री, (अक्षाणां माला।) अक्षसूत्रं। वशिष्ठपत्नी। इति मेदिनी॥ (यथाह मनुः—
"अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजा"।
अक्षसूत्रेति तान्त्रिकभाषया अकारादिक्षकारान्तवर्णमाला रुद्राक्षमाला च। यथा गौतमीये,—
"पञ्चाशल्लिपिभिर्माला विहिता जपकर्म्मसु।
अकारादिक्षकारान्ता अक्षमाला प्रकीर्त्तिता॥
क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥
इति तन्त्रसारः॥ *॥ अन्यत् मालाशब्दे वर्णमालाशब्दे च द्रष्टव्यं॥

अक्षयः त्रि, (नास्ति क्षयो यस्य सः। बहुव्रीहिः।) क्षयरहितः। अव्ययः। कल्पान्तस्थायी। यथा—
"अक्षराणि फलान्याहुरमरांस्त्रिदशानिव।
कल्पान्तस्थानसम्बन्धान्नजन्या नाशवर्ज्जिनः"॥
इति मीमांसककारिका॥ अपि च। भविष्यपुराणे।
"चतुर्द्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः।
योऽब्दमेकं न भुञ्जीत शिवार्च्चनपरो नरः॥
यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां।
तत् पुण्यं सकलं तस्य शिवलोकञ्च गच्छति"॥
इति तिथ्यादितत्त्वं॥ *॥ पापपुण्याक्षयजनकयोगविशेषः। यथा ज्योतिषे,—
"सोमवारेऽप्यमावास्या आदित्याहे तु सप्तमी।
चतुर्थ्यङ्गारवारे तु अष्टमी च बृहस्पतौ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः।
षष्टिजन्मसहस्राणि प्रति जन्म तदक्षयं"॥
इति तिथ्यादितत्त्वं॥ (अनन्तः। अक्षयकालाभिमानी। अः वासुदेवः तस्मिन् क्षयो निवासोऽस्य इति व्युत्पत्त्या ब्रह्मनिष्ठः।)

अक्षयतृतीया स्त्री, (अक्षया या तृतीया तिथिः।) वैशाखशुक्लतृतीया। सा तु सत्ययुगाद्या। तत्र स्नानदानादावक्षयफलं। इति। स्मृतिः। यथा,—
"वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता॥
तस्यां दानादिकं पुण्यमक्षयं समुदाहृतं"।
इति तिथ्यादितत्त्वं॥ *॥ विवरणं तु वैशाखशब्दे द्रष्टव्यं॥

अक्षया स्त्री, (नास्ति क्षयो यस्याः सा।) वारतिथिघटितयोगविशेषः। यथा,—
"अमा वै सोमवारेण रविवारेण सप्तमी।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया"॥
इति भविष्यपुराणम्॥

अक्षरः पुं, (न क्षरति। क्षर सञ्चलने। पचाद्यच्। यद्वा। अश्नुते। अशू व्याप्तौ। अशेः सरः।) शिवः। विष्णुः। इति शब्दरत्नावली। यथा महाभारते,—
"विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च"॥
इति।) (अजः। जीवः।)

अक्षरं क्ली, (न क्षरति इति व्युत्पत्त्या।) ब्रह्म। (अविनाशि निर्व्विशेषं प्रणवाख्यं ब्रह्म। कूटस्थः नित्यः आत्मा। यथा,—
"क्षरादिरुद्धधर्म्मत्वादक्षरं ब्रह्म भण्यते।
कार्य्यकारणरूपं तु नश्वरं क्षरमुच्यते॥
यत्किञ्चिद्वस्तु लोकेऽस्मिन् वाचो गोचरतां गतं।
प्रमाणस्य च तत्सर्व्वमक्षरे प्रतिषिध्यते॥
यदप्रबोधात् कार्पण्यं ब्राह्मण्यं यत्प्रबोधतः।
तदक्षरं प्रबोद्धव्यं यथोक्तस्वरवर्त्मना"॥
अकारादिक्षकारान्तिकपञ्चाशद्वर्णः। इति मेदिनी॥ अस्योत्पत्तिकारणं। यथा बृहस्पतिः,—
"षाण्मासिके तु समये भ्रान्तिः सञ्जायते यतः।
धात्राक्षराणि सृष्टानि पत्रारूढ़ाण्यतः पुरा"॥
इत्याह्निकतत्त्वं॥ तच्च पञ्चविधं। यथा,—
"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा।
गुण्डिका घुर्णसु[illegible] लिपयः पञ्चधा स्मृताः"।
इति [illegible] ॥ अन्यत् मुद्राशब्दे वर्णशब्दे [illegible] गणनं। धर्म्मः। तमन्या

अपामार्गः। इति हेमचन्द्रः। मोक्षः। इत्यमरः। जलं। इति वेदप्रयोगः।

अक्षरः त्रि, (न क्षरतीति।) अक्षरणीयः। अच्युतः। यथा,—

"तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्"।

इति वेदान्तसारधृता श्रुतिः।

अपिच।

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते"।

इति श्रीभगवद्गीतायां १५ अध्याये १७ श्लोकः। क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्रसिद्धौ। तावेवाह। तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः। कूटो राशिः शिलाराशिः पर्व्वतइव एकदेशेन नाशत्वपि निर्व्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स तु अक्षरः पुरुष उच्यते विवेकिभिः। इति तट्टीकायां श्रीधरस्वामी।

अक्षरचञ्चुः पुं, (अक्षरैर्व्वित्तः। तेन वित्त इति चञ्चुप्।) लेखकः। इत्यमरटीकायां वाचस्पतिः।

अक्षरचणः पुं, (अक्षरैर्व्वित्तः। तेन वित्त इति चणप्।) लिपिकरः। इत्यमरः। मुन्शी इति भाषा।

अक्षरचुञ्चुः पुं, (अक्षरैर्व्वित्तः। तेन वित्त इति चुञ्चुप्।) अक्षरचणः। लेखकः। इत्यमरः।

अक्षरजननी स्त्री, (अक्षराणाम् अक्षरस्य वा जननी उत्पादिका।) लेखनी। कलमः। यथा,—

"लेखन्यक्षरजननी वर्णमाला मसिप्रसूः"।

इति द्वाराबलीति केचित्।

अक्षरजीवकः पुं, (अक्षर+जीवक।) लिपिकरः। इति हेमचन्द्रः।

("लेखकेऽक्षरचुञ्चुर्ना स्यादक्षरजीवकचुञ्चुः"। इति हेमचन्द्रः।)

अक्षरजीविकः पुं, (अक्षरैर्ज्जीविका यस्य सः।) कायस्थः।

"लेखकः स्याल्लिपिकरः कायस्थोऽक्षरजीवकः"। इति जटाधरः। अक्षरजीविनि त्रि।

अक्षरतूलिका स्त्री, (अक्षराणां तूलिका लेखनसाधनविशेषः।) लेखनी। इति जटाधरः।

अक्षरविन्यासः पुं, अक्षराणां विन्यासः। लिपिः। लिखनं। इत्यमरटीकायां भरतादयः।

अक्षरमुखः पुं, (अक्षराणि मुखे मुखाग्रे यस्य सः।) शिष्यः। छात्रः। इति त्रिकाण्डशेषः।

अक्षरसंस्थानं क्लो, (अक्षराणां संस्थानं विन्यासः।) लिपिः। लिखनं। इत्यमरः।

अक्षरा स्त्री, (न क्षरति पतति दोषं अवद्याम इति अच्।) [illegible]। वाक्शक्तिः। (इदा महाभारते,— "अक्षरेविद्यं सौवैरावन्दितवाम्"।)

अक्षवाटः पुं, (अक्षस्य मल्लयुद्धस्य वाटः परिसरः।) मल्लभूमिः। तत्पर्य्यायः। नियुद्धभूः २। इति हेमचन्द्रः। कुस्तिर आखड़ा इति भाषा।

अक्षवित् [द्] त्रि, (अक्षं व्यवहारं द्यूतं वा वेत्ति इति विदः क्विप्।) द्यूतज्ञः। व्यवहारज्ञः।

अक्षसूत्रं क्ली, (अक्षाणां सूत्रं माला।) अक्षमाला। जपमाला। इति जटाधरः। यथा—

"पाणौ कार्म्मुकमक्षसूत्रवलयं दण्डोऽपरः पैतृकः"। इति महावीरचरिते।)

अक्षाग्रकीलकः पुं, (अक्षस्य नाभिच्छेद्यकाष्ठस्य अग्रे अन्ते बन्धनार्थं कीलकः।) शकटचक्रपुरोवर्त्तिकीलकः। तत्पर्य्यायः। अणिः २। इत्यमरः। अणी ३ आणिः ४। इति भरतः। चाकारखिल् इति भाषा।

अक्षान्तिः स्त्री, (न क्षमणम्। क्षमूष् सहने। दिवादिः। अस्याविश्वात् क्तिन्। अनुनासिकस्येति दीर्घे नञ्समासः।) परस्याभ्युदयासहिष्णुत्वं। मात्सर्यादेः परदर्शनादसहिष्णुत्वं। इति भरतः। तत्पर्य्यायः। ईर्ष्या २। इत्यमरः। ईर्षा ३ असूया ४। इति शब्दरत्नावली।

("अक्षान्तिसारसर्व्वस्वं दुर्व्वाससमवेहि माम्"। इति विष्णुपुराणे।)

अक्षारलवणं क्ली, (न क्षारलवणम् इति नञ्समासः।) हविष्यान्नविशेषः। महाहविष्यमिति ख्यातं। यथा। "अक्षारादिमत्स्यगोक्षीरगोघृतधान्यमुद्गतिलयवसैन्धवसामुद्रलवणाककर्कटं। कृत्रिमात् लवणात् भिन्नमक्षारलवणं मतं"। इदं मतन्तु कांस्य। रत्नाकरमतं। यथा—

"गोक्षीरं गोघृतं चैव धान्यमुद्गयवास्तिलाः।
सामुद्रं सैन्धवञ्चैवमक्षारलवणं मतं"।

इति नारायणवन्द्यघटीयकृतशुद्धिकारिका।

(यथाह मनुः—

"मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं।
अक्षारलवणं चैव प्रकृत्या हविरुच्यते"।)

अक्षि क्ली, (अश्नुते अनेन। अशू व्याप्तौ संघाते च। अशेर्न्निदिति क्सिः। यद्वा। अक्षति। अक्ष व्याप्तौ। इन्।) चक्षुः। इत्यमरः। अक्षिगोलकः। इति केचित्।

अक्षिकः पुं, रक्तवृक्षः। आच् इति भाषा। इति रत्नमाला।

अक्षिकूटकः पुं, (अक्षि+कूटक।) अक्षितारा।

अक्षिगतः त्रि, (अक्षि गतः; अक्षिविषय इव खेदकृद्विषयः।) द्वेष्यः। इत्यमरः।

अक्षिभेषजः पुं, (अक्षि+भेषज।) पट्टिकालोध्रः। इति राजनिर्घण्टः। (क्ली, नेत्रौषधम्।)

अक्षिवः पुं, (अक्षि वाति वादति वा। वा गतिगन्धनयोः। आतोऽनुपेति कः।) शोभाञ्जनवृक्षः। सामुद्रलवणे क्लो। इत्यमरटीकायां भरतः।

अक्षिविकूणितं क्ली, (अक्षि+वि+कूण+भावे क्त।) कटाक्षः। अपाङ्गदृष्टिः। इति हेमचन्द्रः।

अक्षीवः पुं, रक्तवृक्षः। आच् इति भाषा। इति रत्नमाला।

अक्षीवं क्ली, (न क्षीवति अनेन वा। क्षीव मदे। पचाद्यच्।) समुद्रलवणं। इत्यमरः।

अक्षीवः त्रि, (न क्षीवति माद्यति इति न+क्षीव+अच्।) अमत्तः। इति मेदिनी।

अक्षीवः पुं, शोभाञ्जनवृक्षः। इत्यमरः।

अक्षुण्णः त्रि, (न क्षुण्णः इति नञ्समासः।) दितः। अचूर्णितः। इति शब्दरत्नावली। अच्छिन्नः। यथा। अक्षुण्णं परिवेष। इति पुरश्चरणे पशुपतिः।

अक्षुब्धः त्रि, क्षोभरहितः। अक्षोभितः। [illegible] धातोः क्तप्रत्यये क्षुब्धः। ततो न इति नञ्समासनिष्पन्नः।

अक्षेमं क्ली, (न क्षेमम् इति नञ्समासः।) अकुशलं। यथा—

"किन्नु तेषां गृहे क्षेममक्षेमं किन्नु साम्प्रतम्।
कथन्ते किन्नु सद्वृत्ता दुर्वृत्ताः किन्नु मे सुताः"।

इति देवीमाहात्म्ये १ अध्यायः।

अक्षोटः पुं, (अक्ष्णोति। अक्षू व्याप्तौ संज्ञे बाहुलकात् ओटः। अक्षस्येव उटाः पर्णान्यस्य इति वा।) अक्षोड़वृक्षः। स च पर्व्वतजो वृक्षः। इत्यमरटीकायां भरतः। आख्रोट् इति हिन्दीभाषा। इति राजनिर्घण्टः।

"पीलः शैलभवोऽक्षोटः कर्परालश्च कीर्त्तितः।
अक्षोटकोऽपि वातादसदृशः कफपित्तकृत्"।

इति भावप्रकाशः।

अक्षोड़ः पुं, (अक्ष्णोति इति अक्ष+ओड़प्रत्ययः।) पर्व्वतोत्पन्नपीलुवृक्षः। तत्पर्य्यायः। कर्परालः २ कन्दरालः ३ आखोड़ः ४ अक्षोटः ५ आक्षोटः। इत्यमरः तट्टीका च।

अक्षोड़कः पुं, (अक्षोड़ एव इति स्वार्थे कन्।) पर्व्वतोत्पन्नपीलुवृक्षः। इति रत्नमाला।

अक्षोभः पुं, (न क्षोभ इति नञ्समासः। नञ् क्षोभो यस्येति वा।) हस्तिबन्धनस्तम्भः। तत्पर्य्यायः। आलानं २ शृङ्खः ३। इति त्रिकाण्डशेषः। क्षोभरहिते त्रि।

अक्षौहिणीं क्ली, दुरितकर्म्मविहितनक्षत्रं। यथा,—

"उत्तरात्रितयान्यरोहिणी-
रौद्रसर्पपितृभेषु चाश्विने।
शास्त्रकर्म्म सकलं विवर्ज्जयेत्
प्रेतकार्य्यमपि बुद्धिमान् नरः।
चन्द्रशुद्धिर्यदा नास्ति ताराया विशेषतः।
अक्षौहिणीभेऽपि कर्त्तव्यं चन्द्रचन्द्रजयोर्द्दिने"।

इति ज्योतिस्तत्त्वं।

अक्षौहिणी स्त्री, (ऊहः समूहः अस्ति अस्या इति इनि। अक्षाणाम् ऊहिनी। पूर्व्वपदादिति णत्वम्। अक्षादूहिन्यामिति वृद्धिः।) सेनाविशेषः। तद्यथा। २१८७० हस्तिनः। २१८७० रथाः। ६५६१० घोटकाः। १०९३५० पदातयः। समुदायेन २१८७००। तथा चोक्तं।

"अक्षौहिण्यामित्यधिकैः सप्तत्याष्टभिः शतैः

[illegible]

यथा च चित्रयाणि विज्ञाः स सर्व्वाणाः" ॥

अखर्व्व स्त्री, (अखर्व । [illegible] संघाते च । [illegible] ॥

अखट्ट, पुं. पियालवृक्षः । इति राजनिर्घण्टः ॥ पियासाल इति भाषा ॥

अखट्टि, पुं, अनवधानता: । आभुटि इति ख्यातः । इति त्रिकाण्डशेषः ॥

अखण्ड, त्रि, (न खण्ड्यते इति । खडि भेदने घञ् । नास्ति खण्डो यस्य इति वा ।) खण्डरहितः । पूर्णः । इत्यमरः ॥ ("अखण्डं पुण्यानां फलमिव च तद्रूपमनघम्" इति शाकुन्तले ।)

अखण्डनः, पुं, (नास्ति खण्डनं विच्छेदो यस्य सः ।) कालः । इति शब्दचन्द्रिका ॥

अखण्डितर्त्तुः, त्रि, (न खण्डितः ऋतुर्यस्य इति । बहुव्रीहिः ।) सफलवृक्षादिः । इति शब्दचन्द्रिका ॥

अखातं, क्ली, पुं, (न खातं खननमात्रम् । खातभिन्नम् इत्यर्थः ।) देवखातं । अकृत्रिमजलाशयः । इत्यमरः ॥ अखातमिति नामी ॥ पुंसि यथा,—अखातो देवखातक इत्यमरदत्तः ॥

अखाद्यं, त्रि, (न खाद्यं । अप्रशस्तं विरुद्धं वा खाद्यम् ।) खाद्यानर्हं । अभक्ष्यं ॥

[illegible]

अगण्यं, त्रि, (न गण्यं । [illegible] ।) अगणनीयं । अगणितं । असंख्येयं । यथा,— "[illegible]" ।

अगदः, पुं, (अगदो नास्ति गदो यस्मात् [illegible] इति वा ।) औषधं । इत्यमरः ॥ अगदं वैद्यशास्त्रप्रकाशकग्रन्थादिः । यथा,— "[illegible] तथैव प्रतिपद्यन्ते" । इति मनुः ।) नीरोगे त्रि । इति अमरः ॥

अगदङ्कारः, पुं, (अगदम् आरोग्यं करोति इति । अगद+कृ+अण् । मुमागमः ।) वैद्यः । इत्यमरः ॥

अगमः, पुं, (न गच्छतीति । न+गम+अच् । पचाद्यच् ।) वृक्षः । इत्यमरः ॥ पर्व्वतः । न गच्छतीत्यगमः ॥

अगम्यं, त्रि, (न गम्य इति । न+गम+यत् ।) अगन्तव्यं । अगमनीयं । गमनायोग्यं । यथा,— "अगम्या नामवसत्र यथाभूत् स महासुरः" । इति देवीमाहात्म्ये ॥

अगम्या, स्त्री, धर्म्मशास्त्रनिषिद्धा नारी । गम्यागम्याविचारो यथा, यम उवाच,—
"या या गम्या ह्यगम्या च निबोध कथयामि ते ।
स्वस्त्री गम्या च सर्व्वेषामिति वेदनिरूपिता ॥
अगम्या च तदन्या या इति वेदविदो विदुः ।
सामान्यं कथितं सर्व्वं विशेषं शृणु सुन्दरि ! ॥
अगम्याश्चैव या याश्च निबोध कथयामि ताः ।
शूद्राणां विप्रपत्नी च विप्राणां शूद्रकामिनी ॥
अत्यगम्या च निन्द्या च लोके वेदे पतिव्रते ।
शूद्रश्च ब्राह्मणीं गच्छेद् ब्रह्महत्याशतं लभेत् ॥
तत्समं ब्राह्मणी चापि कुम्भीपाकं व्रजेद्ध्रुवं ।
यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः ॥
स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः ।
विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणं ॥

[illegible]

इति [illegible] ॥

अगस्ती, स्त्री, (अ+गस्+ति+ङीष् ।) देवदारुवृक्षः । इति [illegible] ॥

अगर्हित, त्रि, (न गर्हितः । [illegible]) अनिन्दितः । यथा,—
"[illegible] ।
[illegible]" ॥
इति मनौ । अध्याये १० श्लोकः ॥

अगरु, क्ली पुं. (न गिरति दुर्गन्धं [illegible] इति ।) अगुरु । इति हेमचन्द्रः ॥

अगस्ति, पुं. (विन्ध्याख्यम् अगम् अस्यति इति अगस्तिः । अगम् अस्यति क्षिपति । [illegible] क्तिच् ।) मुनिविशेषः । अगस्त्यमुनिः । इति मेदिनी ॥ यथा वेदे,—
"अगस्तिः [illegible] द्विजः ।
[illegible]" ॥

अगस्तिद्रु, पुं. बकपुष्पवृक्षः । इति त्रिकाण्डशेषः ॥

अगस्त्यः, पुं. (अगं विन्ध्यं स्त्यायति स्तभ्नाति वा । ष्ट्यै संघाते । आतोऽनुपसर्गे इति कः । अग+स्त्यै+क ।) बकपुष्पवृक्षः । इति राजनिर्घण्टः ॥ मित्रावरुणयोः पुत्रः मुनिविशेषः । तस्य पर्य्यायः । कुम्भसम्भवः २ मैत्रावरुणिः ३ । इत्यमरः ॥ अगस्तिः ४ पीताब्धिः ५ वातापिद्विट् ६ आग्नेयः ७ और्व्वशीयः ८ आग्निमारुतः ९ घटोद्भवः १० इति हेमचन्द्रः ॥ (तदुत्पत्तिर्यथा वाल्मीकिरामायणे,—
"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतत् वासतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वशिष्ठश्च तत्रर्षी सम्बभूवतुः ॥
बहुधा पतितं रेतः कलसे च जले स्थले ।
स्थले वशिष्ठस्तु मुनिः सम्भूतवर्षिसत्तमः ॥
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः ॥
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भादृषिर्जातः कुम्भेनापि महीयते" ॥

अगस्त्योदयः, पुं, (अगस्त्यस्य नक्षत्रस्य उदयः प्रत्यक्षाणि गगने आविर्भावः ।) आकाशे नक्षत्ररूपेण अगस्त्यमुनेरुदयः । स तु सौरभाद्रस्य सप्त-

दयदिने भवति। अस्यार्घ्यदानं तन्मासीयशेष-
दिनत्रये कर्त्तव्यं। यथा,—
"अगस्त्यार्घ्यदानं सौरेण सिंहराशौ विधानात्"।
यथा ब्रह्मवैवर्त्ते,—
"अप्राप्ते भास्करे कन्यां शेषभूतैस्त्रिभिर्दिनैः।
अर्घ्यं दद्यादगस्त्याय गौड़देशनिवासिनः"॥
यथा भीमपराक्रमे।
"यस्तु भाद्रपदस्यान्ते उदिते कलसोद्भवे।
अर्घ्यं दद्यादगस्त्याय सर्व्वान् कामान् लभेत सः"॥
यथा नारसिंहे।
"शङ्खे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतं।
मन्त्रेणानेन वै दद्यात् दक्षिणाशामुखस्थितः॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते"॥
प्रार्थनन्तु।
"वातापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु"॥
गन्धादिकन्तु अगस्त्याय नमः इत्यनेन देयं।
विशेषानुपदेशे सामान्यतः प्राप्तत्वात् दक्षि-
णाशामुखस्थित इति गन्धादावपि प्रयोगाङ्ग-
कर्त्तृधर्म्मत्वादिति रत्नाकरः॥*॥ तत्पत्न्यर्घ्य-
मन्त्रस्तु।
"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते।
गृहाणार्घ्यं मया दत्तं मित्रावरुणिवल्लभे"॥
इति मलमासतत्त्वं॥ (अगस्त्योदये जलानि
प्रसीदन्ति इत्यागमः। तथा च रघौ,—
"प्रससादोदयादम्भः कुम्भयोनेर्महौजसः।

अगाधः, त्रि, (नास्ति गाधः स्थितिरत्र। नञो-
ऽस्त्यर्थानामिति बहुव्रीहिः।) अतिगभीरः। अतल-
स्पर्शः। इत्यमरः॥ (अतिगम्भीरः। दुर्बो-
धाशयः।)

अगाधं, क्ली, छिद्रं। इति मेदिनी॥

अगाधजलः, पुं, (अगाधं जलं यस्मिन्। बहु-
व्रीहिः।) ह्रदः। इत्यमरः॥ त्रि। अपरि-
च्छेद्यजलविशिष्टः।)

अगारं, क्ली, (अगान् ऋच्छति। ऋ गतौ। कर्म्म-
ण्यण्।) आगारं। गृहं। इत्यमरटीकायां
भरतः॥
गृहाणि चाप्यगाराणि वसान् पुनरावसि च"।
इति। 'स्वगार् देवागारागारा' इति मनुः।)

अगेरः, पुं, (अग+इर।) अग्निः। सूर्य्यः।
पादपः। इति जटाधरः।

अगुः, पुं, (नास्ति गौः किरणो यस्य वा। बहु-
व्रीहिः।) राहुग्रहः इति दीपिका॥ किरण-
रहिते त्रि।

अगुरु, क्ली, (न गुरु दुर्भरं यस्मात् इति।
बहुव्रीहिः।) शिंशपावृक्षः। कालागुरु। अ-
गरुर्गन्धद्रव्यविशेषः। अगर इति
भाषा। तस्य पर्य्यायः। वंशिकं १ राजार्हं
२ लोहं ३ कृमिजं ४ योगजं ५। इत्यमरः।
अगुरु ६ इति ७ वंशाख्यं ८ अनु ९। इति
शब्दरत्नावली। लोहं १० कृमिजाख्यं ११ अनार्य्यकं

१२ असारं १३ कृमिजग्धं १४ काष्ठकं १५। इति
राजनिर्घण्टः॥ अस्य गुणाः। तिक्तत्वं। उष्णत्वं।
कटुत्वं। लेपे रूक्षत्वं। श्लेष्मकफवायुवान्तिमुख-
रोगनाशित्वञ्च। इति राजवल्लभः राजनिर्घण्टश्च॥
अगुरुर्वा पुंसीति वोपालितः॥ पुमान् इति सर्व्वा-
नन्दः॥ गन्धद्रव्यविशेषः। यथा,—
अगुरु प्रवरं लोहं राजार्हं योगजं तथा।
वंशिकं कृमिजञ्चापि कृमिजग्धमनार्य्यकं॥
अगुरूष्णं कटुत्वं च तिक्तं तीक्ष्णञ्च पित्तलं।
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत्॥
कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जति।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः"॥
इति भावप्रकाशः॥

अगुरुः, त्रि, (न गुरुः। नञ् समासः।) गुरुभिन्नः।
लघुः। इति मेदिनी॥

अगुरुशिंशपा, स्त्री, शिंशपाभेदः। इत्यमरटीकायां
स्वामी॥

अगूढ़गन्धं, क्ली, (न गूढ़ः अत्युत्कटः गन्धः यस्य।
बहुव्रीहिः।) हिङ्गु। इति राजनिर्घण्टः॥

अगोचरः, त्रि, (न गोचरः। नञ् समासः।) इन्द्रिय-
जन्यप्रत्यक्षाविषयः। अज्ञातः। यथा,—
"अगोचरहतं श्राद्धमदितंमासमुत्सृजेत्"।
इति राजवल्लभः॥ (वाचामगोचरचरित्रविचि-
त्रिताय इति शृङ्गारशतके।)

अगौकाः [स्] पुं, (अगः ओकः यस्य सः।
बहुव्रीहिः।) शरभः। सिंहः। पक्षी। इति
मेदिनी॥ (त्रि। पर्व्वतवासी।)

अग्नायी, स्त्री, (अग्नेः स्त्री इत्यस्मिन् अर्थे वृषा-
कप्यग्निकुसितेत्यादिसूत्रेण अग्निशब्दस्यैकारादेशो
ङीप् च।) अग्निभार्य्या। इत्यमरः॥ त्रेतायुगं।
इति जटाधरः॥ ('अग्नायी स्वाहा च हुतभुक्-
प्रिया' इत्यमरः।)

अग्निः, पुं, (अङ्गयन्ति अग्र्यं जन्म प्रापयन्ति इति
व्युत्पत्त्या हविः प्रक्षेपाधिकरणेषु गार्हपत्याहवनी-
यदक्षिणाग्निसभ्यावसथ्यौपासनाख्येषु षड्ग्निषु।
यद्वा अङ्गति ऊर्द्ध्वं गच्छति इति। अगि गतौ।
अङ्गेर्नलोपश्चेति निः नलोपश्च।) तेजःपदार्थ-
विशेषः। आगुन इति भाषा। धर्म्मस्य वसु-
भार्य्यायां जातः पञ्चमोऽग्निः। तस्य पत्नी स्वाहा।
पुत्रास्त्रयः पावकः १ पवमानः २ शुचिः ३। षष्ठ-
मन्वन्तरे अग्नेर्बोधंरायां हविष्मदादयः पुत्राः।
एतेभ्यः पञ्चचत्वारिंशदग्नयो जाताः। सर्व्वे मिलित्वा
एकोनपञ्चाशदग्नयः। इति पुराणं॥ अस्य
पर्य्यायः। वैश्वानरः १ वह्निः २ वीतिहोत्रः ३
धनञ्जयः ४ कृपीटयोनिः ५ ज्वलनः ६ जातवेदाः
७ तनूनपात् ८ तनूनपाः ९ बर्हिःशुष्मा १० वर्हिः
११ शुष्मा १२ कृष्णवर्त्मा १३ शोचिष्केशः १४ उष-
र्बुधः १५ आश्रयाशः १६ आश्रयाशः १७
बृहद्भानुः १८ कृशानुः १९ पावकः २० अनलः
२१ रोहिताश्वः २२ वायुसखः २३ वायुसखा
२४ शिखावान् २५ शिखी २६ आशुशुक्षणिः
२७ हिरण्यरेताः २८ हुतभुक् २९ हव्यभुक्
३० दहनः ३१ हव्यवाहनः ३२ सप्तार्चिः
दमुनाः ३४ दमूनाः ३५ शुक्रः ३६ चि[त्रभानुः]
३७ विभावसुः ३८ शुचिः ३९ अर्चि[ष्मान् ४०]।
इत्यमरस्तट्टीका च॥ वृषाकपिः ४१ कृ[शानुः]
४२ कपिलः ४३ पिङ्गलः ४४ अरणिः ४[५ ...]
४६ पाचनः ४७ विश्वपाः ४८ कामना[...]
ज्वालार्चिः ५० शुष्मवारः ५१ उदर्चिः ५२ [...]
५३ वसुः ५४ शुक्रः ५५ हिमाराति ५६ [...]
५७ सप्तशिखः ५८ सप्तजिह्वः ५९ चर[...]
६० सर्व्वदेवमुखः ६१। इति जटाधरः॥ [अस्य]
गुणाः। वायुकफस्तम्भशीतकम्पनाशकत्वं।
आमपाचकत्वं। रक्तपित्तप्रकोपकत्वञ्च।
राजवल्लभः॥ अपिच।
"अग्नेर्दुर्द्धर्षता ज्योतिस्तापः पाकः प्रका[शः]
शौचो रोगो लघुस्तैक्ष्ण्यं सततञ्चोर्द्ध्वमा[र्गः"]
इति मोक्षधर्म्मः॥*॥
अथ कर्म्मविशेषेऽग्नेर्नामानि। यथा,—
"लौकिके पावको ह्यग्निः प्रथमः परिकी[र्त्तितः"]
लौकिके नवगृहप्रवेशादौ।
"अग्निस्तु मारुतो नाम गर्भाधाने विधीयते[२]
पुंसवने चन्द्रनामा ३ शुङ्गाकर्म्मणि शोभन[४]
सीमन्ते मङ्गलो नाम ५ प्रगल्भो जातकर्म्म[णि ६]
नाम्नि स्यात् पार्थिवो ह्यग्निः ७ प्राशने च शु[चिः ८]
सत्यनामाथ चूड़ायां ९ व्रतादेशे समुद्भव[१०]
व्रतादेशे उपनयने।
"गोदाने सूर्य्यनामा च ११ केशान्ते ह्यग्निरु[च्यते]
गोदाने गोदानाख्यसंस्कारे। केशान्ते
वर्णने।
"वैश्वानरो विसर्गे तु १३ विवाहे योजकः कृ[तः]
विसर्गे साग्निकसंस्थकर्म्मविशेषे।
"चतुर्थ्यान्तु शिखीनाम १५ धृतिरग्निस्तथा[...]
चतुर्थ्यां विवाहान्ते चतुर्थीहोमे। अप[रे]
होमादौ।
"प्रायश्चित्ते विधुश्चैव १७ पाकयज्ञे तु साहस[ः]
प्रायश्चित्ते प्रायश्चित्तात्मकमहाव्याहृतिहो[मे]
पाकयज्ञे पाकाङ्गकहोमे वृषोत्सर्गगृहप्र[तिष्ठादौ]
"लक्षहोमे च वह्निःस्यात्१९ कोटिहोमे हुता[शनः]
पूर्णाहुत्या मृडो नाम २० शान्तिके वरदस्त[था]
पौष्टिके बलदश्चैव २२ क्रोधाग्निश्चाभिचारि[के]
वश्यर्थे शमनो नाम २५ वरदानेऽभिदूषक[ः]
कोष्ठे तु जठरो नाम २७ क्रव्यादो मृतभक्ष[णे]
इति गोभिलपुत्रकृतसंग्रहः॥*॥ अथ [...]
यथा,—
"पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुण[ः]
छागस्थः साक्षसूत्रोऽग्निः सप्तार्चिः शक्तिध[रः"]
इत्यादित्यपुराणं॥*॥ अथ होमीया[ग्नेः]
लक्षणानि। यथा,—
"अर्च्चिष्मान् पिण्डितशिख सर्पिःकाञ्चनस[न्निभः]
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्य[सिद्धये"]
इति वायुपुराणं॥*॥ वैद्यकमते अ[ग्निः]
भौम १ दिव्यः २ उदर्य्यः ३ तन्नाथ [...]
प्रभवः ऊर्द्ध्वज्वलनस्वभावः पचनदाहादिसमर्थ[ः]

तीय उद्रेकेणगः पर्य्यनुभ्रमणशीलो वातजः । तीय उभयेन्धनः पर्य्यनुभ्रमणशीलः सुमहद्याहारस्य रसादिपरिणामनिमित्तस्य विधुरादिव । इति विजयरक्षितोपरि सन्देहभञ्जिका ॥*॥ अपिच,—

मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः ।
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः" ॥

तेषां कार्य्यं यथा,—

विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान् ।
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥
मासमाग्नेरशिता मात्रा सम्यग्विपच्यते ।
स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ॥
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते ।
तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते" ॥

इति माधवकरः ॥ अत्यन्ततीक्ष्णाग्निरेव हि भस्मक उच्यते । स तु आहाराभावे शोणितादीन् धातून् पाचयित्वा आशु मारयति । इति रक्षितः ॥*॥ (देहजन्याग्नेः नादोत्पादकत्वं यथा सङ्गीतदर्पणे,—

"आत्मना प्रेरितं चित्तं वह्निमाहन्ति देहजम् ।
ब्रह्मग्रन्थिस्थितं प्राणं स प्रेरयति पावकः ॥
पावकप्रेरितः सोऽथ क्रमादूर्द्धपथे चरन् ।
अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः ॥
पुष्टं शीर्षे त्वपुष्टञ्च कृत्रिमं वदने तथा ।
आविर्भावयतीत्येवं पञ्चधा कीर्त्त्यते बुधैः ॥
नकारं प्राणनामानं दकारमनलं विदुः ।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते"

अग्नेः सर्व्वसाक्षित्वादि यथा रामायणे,—

त्वमग्ने सर्व्वदेवानां शरीरान्तरगोचरः ।
त्वं साक्षी मम देहस्थस्त्राहि मां देवसत्तम" ।

यथा च भारते,—

"आदित्यचन्द्रावनिलोऽनलश्च ।
द्यौर्भूमिरापो हृदयं यमश्च ॥
अहश्च रात्रिश्च उभे च सन्ध्ये ।
धर्म्मश्च जानाति नरस्य वृत्तम्" ॥

अस्य सर्व्वप्रथमाराध्यत्वं ऋग्वेदस्य सर्व्वप्रथमसूक्ते उक्तं यथा,—"अग्निमीले पुरोहितम्" । इत्यादि । विष्णुः । सूर्य्यः ।) अग्निकोणाधिपतिः । इत्यमरः । चित्रकवृक्षः । रक्तचित्रकः । भल्लातकः । निम्बुकः ॥ पित्तं । स्वर्णं । इति राजनिर्घण्टः ।

अग्निकः, पुं, (अग्नि + सादृश्ये कप्रत्ययः) इन्द्रगोपनामरक्तवर्णकीटः । इति हेमचन्द्रः ॥

अग्निकणः, पुं, (अग्नेः कणः । अग्नि + कण ।) अग्निकणा । स्फुलिङ्गः । इत्यमरः ॥

अग्निकारिका, स्त्री, (अग्नि + कारिका ।) अग्निकार्य्यं । इति हेमचन्द्रः ॥

अग्निकार्य्यं, क्ली, (अग्नि + कार्य्यं ।) अग्नावेव कार्य्यं । हविर्दानादिपूर्व्वकाग्निज्वालनं । तत्पर्य्यायः । अग्नीन्धनं २ अग्नीध्रा ३ अग्निकारिका ४ । इति हेमचन्द्रः ॥ (होमादौ हविर्दानादिपूर्व्वकाग्निज्वालनं । अग्नौ सायं प्रातः समिद्धोमानुष्ठानं । यथा—

"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च" ॥

इति मनुः ।)

अग्निकाष्ठं, क्ली, (अग्नि + काष्ठं ।) अगुरु । इति राजनिर्घण्टः ॥

अग्निकुक्कुटः, पुं, (अग्नेः कुक्कुट इव ।) ज्वलदग्निउल्का । ज्वलन्त नुड़ा इति ख्यातः । इति त्रिकाण्डशेषः ॥

अग्निकोणं, क्ली, (अग्नेः अग्निदेवेन अधिष्ठितमित्यर्थः कोणं ।) पूर्व्वदक्षिणकोणं । तत्कोणाधिपतिरग्निः । इति ज्योतिषं ॥ यथा कृत्यायुधधृतं,—

"तत्रैव तीर्थं कर्त्तव्यं श्राद्धं तत्प्रीतिहेतुकम् ।
पूर्व्वाह्णेऽप्यथवा प्रातर्देशे स्यात् पूर्व्वदक्षिणे" ॥

पूर्व्वदक्षिणे अग्निकोणे । इति प्रायश्चित्ततत्त्वं ॥

अग्निक्रीड़ा, स्त्री, (अग्निभिः क्रीड़ा ।) अग्निखेला । रघुपादित्यागः । आतशवाजीति ख्याता ॥

अग्निगर्भः, पुं, (अग्निः गर्भे अभ्यन्तरे यस्य सः ।) अग्निजारवृक्षः । सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (शमीवृक्षः । त्रि । अग्नियुक्तगर्भविशिष्टः । यथा,—"अग्निगर्भां शमीमिव" । इति शाकुन्तले ।)

अग्निगर्भा, स्त्री, (अग्निः गर्भे यस्याः सा ।) महाज्योतिष्मतीवृक्षः । इति राजनिर्घण्टः ॥ (शमीवृक्षः ।)

अग्निचित्, पुं, (अग्निं चितवान् स्वयम् इति चि चयने । अग्नौ चेरिति क्विप् तुगागमश्च ।) अग्निहोत्री । साग्निकः । इत्यमरः ॥ (यथा रघुवंशे—

"विदधे विधिमस्य नैष्ठिकं ।
यतिभिः सार्द्धमनग्निमग्निचित्" ।)

अग्निजः, पुं, (अग्नि + जन् + ड ।) अग्निजारवृक्षः । इति राजनिर्घण्टः ॥ (त्रि । अग्निजातमात्रे ।)

अग्निजातः, पुं, (अग्नेः जातः । अग्नि + जन् + क्त ।) अग्निजारवृक्षः । इति राजनिर्घण्टः । (त्रि । अग्निजातमात्रे ।)

अग्निजारः, पुं, (अग्नि + जार, अग्निं जठराग्निं जारयति परिपाकशक्तिं प्रदाय वर्द्धयति जॄ कर्म्मण्यण् इति पाणिनिसूत्रं) औषधविशेषः । अस्य पर्य्यायः । अग्निनिर्य्यासः २ अग्निगर्भः ३ अग्निजः ४ वड़वाग्निमलः ५ जरायुः ६ अर्णवोद्भवः ७ अग्निजातः ८ अग्निजालः ९ सिन्धुफलः १० । अस्य गुणाः । कटुत्वं । उष्णत्वं । कफवायुसन्निपातशूलातिशीतरोगनाशित्वं । पित्तप्रदत्वञ्च । इति राजनिर्घण्टः ॥

अग्निजालः, पुं, (अग्नि + जाल ।) अग्निजारवृक्षः । इति राजनिर्घण्टः ॥

अग्निज्वाला, स्त्री, (अग्नेरिव ज्वाला यस्याः । अग्नेः ज्वाला इति वा ।) जलपिप्पली । धातकीवृक्षः । इति राजनिर्घण्टः ॥ अग्निशिखा ॥ (लाङ्गलिकी ।)

अग्निजिह्वा, स्त्री, (अग्नेः जिह्वा ।) लाङ्गलीवृक्षः । विषलाङ्गला इति भाषा । इति राजनिर्घण्टः ॥ अग्नेः काल्यादिसप्तार्च्चिंषि । इति जटाधरः ॥ अग्नेः सप्तशिखाः । तासां नामादिकं सप्तजिह्वशब्दे द्रष्टव्यं ॥ (योगविशेषः । यथा,—

"सप्तषष्ठ्यादितिथयः सोमवारादिभिर्युताः ।
अग्निजिह्वाः सप्त योगा मङ्गलेष्वतिगर्हिताः" ॥

इति । योगशास्त्रे ।)

अग्निदमनी, स्त्री, (अग्नेः जठरानलस्य दमनी ।) क्षुपविशेषः । अस्य पर्य्यायः । वह्निदमनी २ मङ्क्षकण्टका ३ वह्निकण्टारिका ४ गुच्छफला ५ क्षुद्रफला ६ क्षुद्रदुःस्पर्शा ७ क्षुद्रकण्टारिका ८ मर्य्येन्द्रमाता ९ दमनी १० । अस्या गुणाः । कटुत्वं । उष्णत्वं । रुच्यत्वं । वातकफगुल्मप्लीहनाशित्वं । रुचिकरत्वं । अग्निदीपनत्वं । हृद्यत्वञ्च । इति राजनिर्घण्टः ॥

अग्निदीपनः, त्रि, (अग्नेः जठरानलस्य दीपनः ।) अग्निवर्द्धकः । जठराग्निकारकौषधविशेषः । यथा रसेन्द्रचिन्तामणौ,—

"पारदामृतलवङ्गगन्धकं,
भागयुग्ममरिचेन मिश्रितम् ।
तत्र जातिफलमर्द्धभागिकं,
तिन्तिड़ीफलरसेन मर्दितम् ॥
वह्निमान्द्यदशवक्त्रनाशनो,
रामवाण इति विश्रुतो रसः ।
संग्रहग्रहणिकुम्भकर्णक-
मामवातखरदूषणं जयेत् ॥
दीयते तु शणकानुमानतः,
सद्य एव जठराग्निदीपनः" ।

"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुड़ेन वा ।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी" ॥

इति च भावप्रकाशः ॥

अग्निदीप्ता, स्त्री, (अग्नि + दीप्ता) महाज्योतिष्मतीवृक्षः । इति राजनिर्घण्टः ॥ (त्रि । वह्निज्वलितः । यथा,—"नापि कर्णाकारचकैः वाणैः नापि विषाक्तैः नाप्यग्निदीप्तफलकैः" इति कुल्लूकभट्टः ।)

अग्निदेवा, स्त्री, (अग्निः देवः अधिष्ठात्री देवता अस्याः इति) कृत्तिकानक्षत्रं । इति हेमचन्द्रः ॥ (पुं, अग्निदेवः अग्निरूपो देवः । अग्निः देवः अस्य इति विग्रहे त्रि । अग्निपूजकः ।)

अग्निनिर्य्यासः, पुं, अग्निजारवृक्षः । इति राजनिर्घण्टः ॥

अग्निप्रस्तरः, पुं, अग्निजनकपाषाणः । चकमकीर पाथर इति भाषा ॥

अग्निवर्द्धनं, क्ली, (अग्नेः जठरानलस्य वर्द्धनं वृद्धिकारकम् ।) जठराग्निवृद्धिकारकम् । तथा,—

"जीरकं रुचिकृत् स्वर्य्यं गन्धाढ्यं कफवातनुत् ।
पाके च कटुतीक्ष्णोष्णं लघुपित्ताग्निवर्द्धनम्" ॥

इति राजवल्लभः ॥

अग्निभं, क्ली, (अग्निरिव भाति इति । अग्नि + भा + क ।) स्वर्णं । इति राजनिर्घण्टः ॥

अग्निभूः, पुं, (अग्नेर्भवतीति । अग्नि + भू + क्विप् ।) कार्त्तिकेयः । इत्यमरः ॥ ([illegible] तारकासुरेण उत्पीड़ितानां दे[illegible]ार्थं शिवेन

अग्निरूपं स्ववीर्य्यं वह्निमुखे क्षिप्तं। तेन अग्निना कृत्तिकासु क्षिप्तं। ताश्च देवागतगर्भरक्षार्थं शरवनं प्रविश्य प्रसूताः। तेन अग्निभूरिति कार्त्तिकेयः। जले क्ली। इति वेदपुराणे॥ यथाह मनुः,—
"अग्नौ दत्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः"॥

अग्निभूतिः, पुं, (अग्नि+भू+क्तिन्।) बौद्धभेदः। स च श्रेयर्जैनाचार्य्यशिष्यः। इति हेमचन्द्रः॥

अग्निमणिः, पुं, सूर्य्यकान्तमणिः। इति जटाधरः॥

अग्निमन्थः, पुं, (अग्निं मथ्नाति इति। मन्थ विलोडने। कर्म्मणि अण्।) गणिकारिकावृक्षः। इत्यमरः॥ (यथा वैद्यके,—
"अग्निमन्थः श्वयथुहृत् वीर्य्योष्णः कफवातहृत्।
पाण्डुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः"॥
अग्निमन्थकुसुमशाकञ्च—
"अग्निमन्थभववालसुनीता
सत्वरानमुदके सुसाधिता।
तक्रमिश्रघृतयुक्तपाचिता
हिङ्गुना जनितवासवासिता"॥
अपिच—
"अग्निमन्थोऽपि तथैव त्रिदोषशमनः सरः।
आध्मानश्वयथुहरा शोथपाण्डुरोगविनाशकृत्" ॥)

अग्निमारुतिः, पुं, (अग्नौ जठराग्निविषये मारुतिः हनूमान् इव। तस्य जठराग्नौ वातापिप्रभृतयो राक्षसाः भस्मीभूता आसन्। इत्यसौ अग्निमारुतिरुच्यते) अगस्त्यमुनिः। इति हेमचन्द्रः॥

अग्निमुखः, पुं, (अग्निः मुखं यस्य, बहुव्रीहिः।) देवता। ब्राह्मणः। इति मेदिनी॥ चित्रकवृक्षः। भल्लातकः। इति विश्वः॥ (स्त्री। अग्नेः पञ्चसु मुखेषु।)

अग्निमुखी, स्त्री, (अग्निरिव मुखं यस्याः। बहुव्रीहिः।) भल्लातकी (भेला)। इत्यमरः॥ लाङ्गलिकी। इति राजनिर्घण्टः॥

अग्निरक्षणं, क्ली, (अग्नेः रक्षणम्। षष्ठीतत्पुरुषः।) अग्न्याधानं। अग्निहोत्रं। इति हेमचन्द्रः॥

अग्निरजः, [स्] पुं, (अग्नेः रजः स्फुलिङ्ग इव॥) इन्द्रगोपाख्यकीटः। इति हेमचन्द्रः॥ (क्ली— अग्निवीर्य्यं। स्वर्णं)।

अग्निरहा, स्त्री, मांसरोहिणी। इति राजनिर्घण्टः॥

अग्निवर्द्धक, त्रि, (अग्निं जठरानलं वर्द्धयति इति) अग्नि+वृध्+ण्वुल्।) अग्निवर्द्धकारकौषधादि। पथ्यं। इति वैद्यकं॥

अग्निवल्लभ, पुं, (अग्नेः वल्लभः उद्दीपकत्वात् प्रियः।) शालवृक्षः। रालः। इति राजनिर्घण्टः॥

अग्निवाहः, पुं, (अग्नेः वाहः।) धूमः। इति त्रिकाण्डशेषः॥ (छागः)।

अग्निवाहः, पुं, (अग्नेः वाह इव।) धूमः। इति जटाधरः। (त्रिदशमधुम। सायकत्र्यम्बकुल।)

अग्निविद्, पुं, (अग्निं वेत्ति इति विदः क्विप्।) अग्निहोत्री। अग्निहोत्री। इति हेमचन्द्रः॥ (अग्निहोत्रपरायणः।)

अग्निवीजं, क्ली, (अग्निः वीजं उत्पत्तिस्थानं यस्य तत्। अग्नेः स्वर्णस्य उत्पत्तिं यथाह मनुः,—
"अपामग्नेश्च संयोगात् हेमं रूप्यञ्च निर्बभौ।
तस्मात् तयोः स्वयोन्येव निर्णेको गुणवत्तरः"॥)
स्वर्णं। इति त्रिकाण्डशेषः॥

अग्निवीर्य्यं, क्ली, (अग्नेः वीर्य्यं सार इव।) स्वर्णं। इति राजनिर्घण्टः॥ (त्रि, अग्नितुल्यशक्ते)।

अग्निशिखं, क्ली, (अग्नेरिव शिखा केशरः अस्य।) स्वर्णं। इति राजनिर्घण्टः॥ कुङ्कुमं। कुसुम्भपुष्पं। इति मेदिनी॥ (शाङ्गलिवृक्ष.)।

अग्निशिखः, पुं, (अग्नेरिव शिखा रक्तवर्णः केशरः यस्य।) कुसुम्भवृक्षः। कुङ्कुमं। दीपः। वाणः। इति शब्दरत्नावली॥

अग्निशिखा, स्त्री, (अग्नेरिव शिखा केशरः यस्याः।) लाङ्गलिकीवृक्षः। विषलाङ्गला इति भाषा। वृक्षविशेषः। तस्य पर्य्यायः। विशल्या १ अनन्ता २ फलिनी ३ शक्रपुष्पी ४। इत्यमरः॥ (अग्नेः शिखा।) ज्वाला। आगुनेर शिष इति भाषा॥

अग्निशेखरं, क्ली, (अग्नेरिव शेखरं केशरः यस्य।) कुङ्कुमं। इति राजनिर्घण्टः॥

अग्निष्टोमः, [पुं, (अग्नीनां स्तोमः। अग्नेः स्तुत् स्तोमसोमाः इति षः।) यज्ञविशेषः। इति शब्दरत्नावली॥ तस्य विधिः। ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यविहितज्योतिष्टोमनामकयागविशेषस्य गुणविकारोऽग्निष्टोमो नाम। तस्य कालो वसन्तः। तत्राधिकारी अधीतवेद आहिताग्निश्च। द्रव्यं सोमः। देवता इन्द्रवाय्वादयः। ऋत्विजः षोडश। तेषाञ्च चत्वारो गणाः। होतृगणः १ अध्वर्य्युगणः २ ब्रह्मगणः ३ उद्गातृगणः ४। एकैकस्य गणस्य चत्वारश्चत्वारः। तत्र होतृगणे होता १ प्रशास्ता २ अच्छावाकः ३ ग्रावस्तोता ४। अध्वर्य्युगणे अध्वर्य्युः १ प्रतिप्रस्थाता २ नेष्टा ३ उन्नेता ४। ब्रह्मगणे ब्रह्मा १ ब्राह्मणाच्छंसी २ अग्नीत् ३ पोता ४। उद्गातृगणे उद्गाता १ प्रस्तोता २ प्रतिहर्त्ता ३ सुब्रह्मण्यः ४। स च पञ्चाहसाध्यः। प्रथमदिने दीक्षा दीक्षणीयादितदङ्गानुष्ठानं। तत्र द्वितीयदिवसे प्रायणीययागः सोमक्रयणं। ततो द्वितीयतृतीयचतुर्थदिवसेषु प्रातःकाले सायंकाले च प्रवर्ग्योपसन्नामकयागानुष्ठानं। चतुर्थदिवसे प्रवर्ग्योद्वासनानन्तरं अग्नीषोमीयपश्वनुष्ठानं। तत्र यस्य यजमानस्य पक्षे पितृपितामहप्रपितामहानां मध्ये केनापि वेदो नाधीतोऽग्निष्टोमो वा न कृतः स दुर्ब्राह्मणो भवति। तस्य दीक्षणीयपरिहारायाग्निमप्सु कार्य्यः। यस्य यजमानस्य पितृपितामहप्रपितामहानां मध्ये केनापि सोमपानं न कृतं स्यात् तस्य सोमपानविच्छेददोषपरिहारार्थमैन्द्राग्नपश्वनुष्ठानं कार्य्यं। इत्थं यदाक्षा पशूनां युगपदालम्भपक्षे एकस्मिन्नेव यूपे यदाक्षा पशूनां बन्धनं। इत्थं पश्वनुष्ठानं चतुर्थदिवसे तस्मिन्नेव दिने वा तृतीयभागे उत्थाय प्रयोगारम्भः कार्य्यः। प्रातरनुवाकपाठनं। ग्रावादि च यज्ञायज्ञीयेति। तत्र ग्रहपात्राणि। उलूखलादीनि। ऊर्द्धपात्राणि तावत्परिमितान्येव निर्य्यगाहृतीनि एयत्रिशिष्टानि आग्नायणचमसादीनि। मार्त्तिकः। तत आरभ्य सोमरसं निष्काश्य निष्काश्य कर्त्तव्यः। तत्र सूर्य्योदयानन्तरं कर्त्तव्यः। एवमुक्थ्यपर्य्यायान्ते कृते समाप्तिः। ततो मध्यन्दिनसवनं। दानं। दक्षिणा च द्वादशोत्तरशतं गावः। तृतीयसवनं। इत्थं तृतीयसवनरूपसवनत्रयात्मकः अग्निष्टोमयागः। इतरेऽङ्गयागाः। शुक्तरमवभृथयागः। उदके हविर्होमः। तदनन्तरमनुबन्ध्या। तत्र गौः पशुः। तस्य च निषिद्धत्वात् तत् स्थाने आमिक्षायागः। उदयनीया तत उदवसानीया। दिवसे यावद्रात्रि कर्त्तव्या। यागसमाप्तिः। सूची॥

अग्निष्ठः, पुं, (अग्नौ तिष्ठतीति। अग्नि+स्था+क।) लौहमयतप्तकुण्डादिभर्जनपात्रं। इति शेषः॥ (कड़ा इति भाषा)।

अग्निसखः, पुं, (अग्नेः सखा इति समासे सखिभ्यष्टच् इति समासान्तष्टच्।) वायुः। वायुसखोऽग्निरिति दर्शनात्॥

अग्निसन्दीपनं, त्रि, (अग्नेः सन्दीपनम्। सम्+दीप्+ल्युट्।) वह्निवर्द्धकौषधादि। यथा,—
"एला लवङ्गनागपुष्पाणां मात्रोत्तरविवर्द्धितं मरिचं पिप्पली शुण्ठी चतुर्भागसमन्विताः।
अष्टाङ्गेनानि यावन्ति तावती सितशर्करा।
चूर्णमेतत् प्रयोक्तव्यमग्निसन्दीपनं परं"॥
इति भावप्रकाशः॥
अपि च।
"अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणं"।
इति राजवल्लभः॥

अग्निसम्भवः, पुं, (अग्निः सम्भवो यस्य सः। सम्+भू+अप्।) अरण्यकुसुम्भः। इति राजनिर्घण्टः॥ (कार्त्तिकेयः। त्रि। अग्निसमुद्भवे।)

अग्निसहायः, पुं, (अग्नेः जठरानलस्य सहायः उद्दीपकः। कपोतभासस्य अग्निवर्द्धकत्वात्।) वनकपोतः। इति राजनिर्घण्टः॥ (अग्नेः बन्धुः। वायुः।)

अग्निसारं, क्ली, (अग्नेरिव सारः बलं यस्य तत्।) रसाञ्जनं। इति राजनिर्घण्टः॥

अग्निस्तम्भनं, क्ली, (अग्नेः स्तम्भनम्। षष्ठीतत्पुरुषः।) मन्त्रौषधिद्वारा अग्नेर्दाहशक्तिनिवारणं। तद्यथा,—
"मायूरस्य वसा यस्य गात्रे तस्य न दह्यते"

…क्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमं ॥
…लूरस्य स्थाने मानुषस्य इति वा पाठः ॥१॥
…लक्षीरसमादाय खरमूत्रे निधापितं ।
…गन्धागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमं ॥२॥
…यसी उदरं गृह्य मण्डूकवसया सह ।
…गुटिकां कारयेत्तेन ततोऽग्निं प्रक्षिपेद्बुधो ॥
एवमेतत् प्रयोगेण अग्निस्तम्भनमुत्तमं ॥३॥
…पाटलमूलन्तु अवष्टभ्य मूलकैः ॥
…दिव्यं स्तम्भयते क्षिप्रं पयःपिष्टं जलान्तकं ॥४॥
…कुमारिका वचा कुष्ठं मरीचं नागरं तथा ॥
चर्व्वित्वा च इमं वह्नौ जिह्वया ज्वलनं लिहेत् ॥५॥
…गोरोचनां भृङ्गराजं चूर्णयित्वा घृतं क्रमं ॥
…दिव्यस्तम्भश्च पीत्वा स्याग्मन्त्रेणानेन वै तथा" ॥६॥
…मोघं अग्निस्तम्भनं कुरु । इति गारुडे १८६ अध्यायः ॥

…त्ताः, पुं, (अग्निना सुष्ठु यथा स्यात् एवम् आत्ताः भक्षिताः, श्रौतकार्य्याभिदग्धा इत्यर्थः । …ग्न्यादिस्मृतिषु मूर्द्धन्यषकारवान् एव पाठः । मूर्द्धन्यादेशस्तु न युक्तः ।) मरीचिपुत्रपितृगणविशेषः । नित्यबहुवचनान्तशब्दोऽयं । इति शब्दमाला,—
"विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः ।
अग्निष्वात्ताश्च देवानां मारीचा लोकविश्रुताः" ॥
इति मनुः ।

…होत्रं, क्ली, (अग्नये होत्रम् अत्र इति बहुव्रीहिः ।) यज्ञविशेषः । तत् द्विविधं । मासमाध्यं यावज्जीवनसाध्यञ्च । द्वितीये विशेषोऽयं । तदग्नौ यावज्जीवं प्रत्यहं प्रातः सायं हवनं । तदग्निना यागकर्तुर्दाहश्च । इति श्रुतिः । तत्र क्रमो यथा । ब्राह्मणक्षत्रियवैश्यानां कृतदारपरिग्रहाणां कामत्वान्धत्वबधिरत्वपङ्ग्वादिदोषरहितानां वर्णक्रमेण वसन्तग्रीष्मशरत्सु अग्न्याधानं विहितं । अग्नयस्त्रयः गार्हपत्यः १ दक्षिणाग्निः २ आहवनीयः ३ । एषामाधानं नाम देशविशेषे तत्तन्मन्त्रैः स्थापनं । तेष्वग्निषु सायंकाले प्रातःकाले चाग्निहोत्रहोमः कर्त्तव्यः । अग्निहोत्रं नाम होमस्य नामधेयं । अग्नये होत्रं होमो यस्मिन् कर्म्मणीति षष्ठीतत्पुरुषबहुव्रीहिः । तत्र द्रव्याणि दश । पयः १ दधि २ यवागूः ३ घृतं ४ ओदनः ५ तण्डुलाः ६ सोमरसः ७ मांसं ८ तैलं ९ आपः १० । [illegible]

कालेः आरम्भणीयः । तत्र प्रातर्होमे सूर्य्यो देवता सायंकाले अग्निर्देवता । आधानानन्तरं प्रथमपौर्णमास्यां दर्शपूर्णमासयागारम्भः कर्त्तव्यः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विधिवाक्यं । तत्र षड्यागाः । पौर्णमास्यां त्रयः । अमायां त्रयः । पौर्णमास्यामाग्नेयाग्नीषोमीयोपांशुयागास्त्रयो यागाः । अमावास्यायामाग्नेयैन्द्रदधिपयो यागास्त्रयः । तत्रामायां कर्त्तव्ययागत्रयस्य दर्शपदं नामधेयं । पौर्णमास्यां कर्त्तव्ययागत्रयस्य पूर्णमासपदं नामधेयं । दर्शश्च पूर्णमासश्च दर्शपूर्णमासाविति द्वन्द्वः । पौर्णमासयागस्य प्राथमिकत्वेऽपि अभ्यर्हितत्वमिति पाणिनीयानुशासनानुसारेण दर्शशब्दस्याल्पाच्कत्वात् पूर्व्वनिपातः । दर्शपूर्णमासावपि यावज्जीवं कार्य्यौ । तत्रापि त्रयाणां वर्णानामुपरि लिखितान्धत्वाद्यधिकारप्रतिबन्धकीभूतदोषसम्बन्धाभाववतां कृतागिधानानां सपत्नीकानामधिकारः । सामान्यतः पर्व्वण्यारम्भः प्रतिपदि याग इति परिभाषा । तत्रासोमयागस्य यजमानस्य पौर्णमास्यामाग्नेयपुरोडाशयागः आज्येनोपांशुयाजयागः । अमायान्तु आग्नेयपुरोडाशयागः ऐन्द्राग्नपुरोडाशयागः । कृतसोमयागस्य यजमानस्य तु पौर्णमास्यामाग्नेयपुरोडाशयागः आज्येनोपांशुयाजयागः अग्नीषोमीयपुरोडाशयागः । अमायान्तु आग्नेयपुरोडाशयागः ऐन्द्रपयोयागः ऐन्द्रदधियागश्चेति त्रयः । तत्र ऋत्विजश्चत्वारः । अध्वर्य्युः १ ब्रह्मा २ होता ३ अग्नीदिति ४ । यजुर्व्वेदकर्म्मकर्त्ता अध्वर्य्युः । ऋग्यजुःसामवेदत्रयकर्म्मकर्त्ता ब्रह्मा । ऋग्वेदकर्म्मकर्त्ता होता । अग्नीत्तु प्रायशोऽध्वर्य्योरेवानुयायी तत्प्रेरितकर्म्मकर्त्ता । पुरोडाशो ब्रीहितण्डुलैर्यवतण्डुलैर्वा कर्त्तव्यः । अग्निहोत्रवद्दर्शेन इष्ट्यारम्भः कृतस्तेनैव इष्ट्या यावज्जीवं यागः कर्त्तव्यः । आरम्भवैगुण्यादिनिष्ठैव नियामिकेत्यादिदिङ्मात्रमिदं । इति यजुर्व्वेदः ॥ यज्ञाग्निरक्षणः । तत्पर्य्यायः । अग्न्याधानं २ अग्निरक्षणं ३ । इति हेमचन्द्रः ॥

अग्निहोत्रः, पुं, अग्निः । घृतं । इति मेदिनी ॥

अग्निहोत्री, [न्] पुं, (अग्निहोत्रम् अस्यास्तीति । अत इनिठनाविति इनिः ।) अग्निहोत्रयागकर्त्ता । तत्पर्य्यायः । अग्निचित् २ आहिताग्निः ३ । इति हेमचन्द्रः ॥ अग्निचित् ४ । इत्यमरः ॥ साग्निकः ५ । इति पुराणं ॥
("अग्निहोत्र्यपविध्याग्नीन् ब्राह्मणः कामकारतः ।
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत्" ॥
इति मनुः ।)

[illegible]

अग्नीन्धनं, क्ली, (अग्नौ इन्धनम् । अग्नि+इन्ध्+करणे ल्युट् ।) अग्निकार्य्यं । हविर्द्दानादिपूर्व्वकाग्निज्वालनं । इति हेमचन्द्रः ॥ यथाह मनुः—
"अग्नीन्धनं भैक्षचर्य्यामधः शय्यां गुरोर्हितम् ।
आसमावर्त्तनात् कुर्य्यात् कृतोपनयनो द्विजः" ॥

अग्न्यस्त्रं, क्ली, (अग्निमयम् अस्त्रम् । कर्म्मधारयः ।) आग्नेयास्त्रं । अग्निघटितास्त्रं । बन्दूककामान इत्यादिभाषा ॥

अग्न्याधानं, क्ली, (अग्नेः आधानं । अग्नि+आ+धा+ल्युट् ।) श्रुतिविहिताग्निसंस्कारः । अग्निरक्षणं । अग्निहोत्रं । इति हेमचन्द्रः ॥

अग्न्यालयः, पुं, (अग्नेः आलयः ।) यज्ञाग्न्याधारकुण्डं । इति जटाधरः ॥

अग्न्युत्पातः, पुं, (अग्नेः उत्पातः ।) आकाशादिषु अग्निविकारः । धूमकेतूल्कापातादिः । अग्निनिष्ठोत्पातो वा । स तु मन्त्रादिद्वारा अग्नेर्दोषशान्तिनिवारणं । तत्पर्य्यायः । उपाहितः २ । इत्यमरटीका च ॥

अग्रं, क्ली, (अग्यते अगति वा । अग कुटिलायां गतौ ऋज्रेन्द्रेति साधु ।) उपरिभागः । आगा इति भाषा । अस्य पर्य्यायः । शिखरः शिरः ३ । इत्यमरः ॥ पुरस्तात् । अवलम्बनं । पलपरिमाणं । प्रान्तं । समूहः । इति मेदिनी ॥ (भिक्षाविशेषः । ग्रासचतुष्टयम् । "ग्रासप्रमाणा भिक्षा स्यादग्रं ग्रासचतुष्टयम्" । इति स्मृतिः ।)

अग्रः, त्रि, श्रेष्ठः । उत्तमः । इत्यमरः ॥ प्रधानं । अधिकः । प्रथमः । इति मेदिनी ॥

अग्रगण्यः, त्रि, (अग्रे गण्यः । गणगणनाने, यत् ।) अग्रे गणनीयः । यथा,—
"[illegible]" ।
इति महानाटकं ।

अग्रगामी [न्] त्रि, (अग्रे गच्छतीति । अग्र+गम्+णिनि ।) अग्रे गमनकर्त्ता । अग्रेसरः । इति हेमचन्द्रः ॥

अग्रजः, पुं, (अग्रे जात इति जनेर्ड्डः ।) ज्येष्ठभ्राता । तत्पर्य्यायः । पूर्व्वजः २ अग्रियः ३ । इत्यमरः ॥ (यथाह मनुः,—
"[illegible]" ।)
ब्राह्मणः । इति हेमचन्द्रः ॥ अग्रे जाते त्रि ॥

[illegible]

अग्रजातिः, पुं, (अग्रे जातिर्जन्म यस्य सः) (जन् + भावे क्तिन्) ब्राह्मणः । इति हेमचन्द्रः ॥

अग्रणीः, त्रि, (अग्रे नीयतेऽसौ अग्र + नी + क्विप् अग्रग्रामाभ्याञ्च इति पाणिनिसूत्रेण णत्वं ।) (वक्तौ च पुं, यथा चास्यायमणीतं तथाभिशब्दे निरुक्तव्याख्यायामुक्तम्) अग्रिमः । श्रेष्ठः । इति हेमचन्द्रः ॥

अग्रतः, [स्] (अग्रे अग्र + सप्तम्यर्थे तस् अर्थे) अग्रे । प्रथमे । तत्पर्य्यायः । पुरतः २ पुरः ३ । इत्यमरः ॥

अग्रतःसरः, त्रि, (अग्रतः अग्रे सरति गच्छति यः सः अग्रतः + सृ + टः । स्त्रियां ङीप् अग्रतःसरी) (पुरोऽग्रतोऽग्रेषु सर्त्तेः इति पाणिनिसूत्रम्) अग्रगामी । इत्यमरः ॥

अग्रदानी, [न्] पुं, (अग्रे दानं प्रेतोद्देशेन तिलादर्पणं याचकत्वेन विद्यतेऽस्य अग्र + दान + विद्यमानार्थे इन्) पतितब्राह्मणविशेषः । स च प्रेतसम्प्रदानकषड्कृतिलादिद्रव्यग्राही । यथा,—
"लोभी विप्रश्च शूद्राणामग्रे दानं गृहीतवान् ।
ग्रहणे मृतदानानामग्रदानी बभूव सः" ॥
इति ब्रह्मवैवर्त्तपुराणं । तत्पर्य्यायः । आग्रहारिकः २ । इति स्मृतिः ॥

अग्रपर्णी, स्त्री, (अग्रे पर्णं पत्रं यस्याः सा जातित्वात् ङीप्) अजलोमावृक्षः । इति रत्नमाला । आलकुशी इति केचित् ॥

अग्रमांसं, क्ली, (अग्रं प्रधानं मन्यते ज्ञायते यत् अग्र + मन् + स । पृषोदरादित्वात् दीर्घः ।) हृदयं । इत्यमरः ॥ उदरमध्यवर्त्तिमांसवर्द्धनरूपरोगविशेषः । इति वैद्यकं ॥

अग्रयाणं, क्ली, (अग्रं प्रथमं यानं सेनागमनं) नासीरं । सेनाग्रगमनं । इति हेमचन्द्रः ॥

अग्रलोहिता, स्त्री, (अग्रमग्रभागः लोहितं रक्तवर्णं यस्याः सा बहुव्रीहिः) चिल्लीशाकं । इति राजनिर्घण्टः ॥

अग्रबीजः, पुं, (अग्रं शाखायां बीजमुत्पत्तिकारणं यस्य सः बहुव्रीहिः । कलम इति भाषायाम्) वीजप्ररोहप्रधानं । स च कुरुबकादिः । इति हेमचन्द्रः ॥

अग्रसन्धानी, स्त्री, (अग्रे फलभोगात्पूर्व्वं सन्धीयते अन्विष्यते कार्य्यमनया अग्र + सम् + धा + करणे ल्युट् स्त्रियां ङीप्) यमपञ्जिका । जीवानां शुभाशुभकर्म्मलिखितं यमस्य पुस्तकं । इति त्रिकाण्डशेषः ॥

अग्रसरः, त्रि, (अग्रे सरति गच्छति अग्र + सृ + टः ।) अग्रेसरः । अग्रगामी । इति हेमचन्द्रः ॥ (यथा,—"अग्रसरो जयन्दानां") इति भट्टिकाव्ये ।

अग्रहः, पुं, (नास्ति ग्रहः गार्हस्थ्यमस्मिन् आश्रमो यस्य स बहुव्रीहिः । वानप्रस्थे । नास्ति ग्रहो दारं यस्य सः ।) वनस्थे च । वानप्रस्थः । इति त्रिकाण्डशेषः । अग्रह इति पाठे गार्हस्थ्याश्रमवर्ज्जितः ॥

अग्रहायणः, पुं, (हायनस्य वर्षस्य अग्रः । इत्य ग्रीहिकालयोरिति सूत्रेण हा + ल्युट् युक् च ।) मासविशेषः । तस्य व्युत्पत्तिर्यथा,—"हायनस्याग्रोऽग्रहायणः निपातनात् परनिपातणत्वञ्च" । इत्यमरटीकायां भरतः ॥ मार्गशीर्षमासः । इति शब्दरत्नावली ॥ अस्य पर्य्यायः आग्रहायणिके जातफलं तत्कृत्यञ्च मार्गशीर्षे द्रष्टव्यम् ॥

अग्राह्यं, त्रि, (न ग्राह्यं ग्रहणीयं ग्रह + कर्म्मणि ण्यत् ग्रहणायोग्ये) अग्रहणीयं । ग्रहणायोग्यं यथा,—
"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलं ।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रतां" ॥
इति तिथ्यादितत्त्वं ॥

अग्रिमः, त्रि, (अग्रे भवः अग्र + डिमच्) प्रधानं । उत्तमः । इति हेमचन्द्रः ॥ ज्येष्ठः । अग्रजः । इति जटाधरः ॥

अग्रिमा, स्त्री, (अग्रे भवा अग्र + डिमच्) लवलीफलं । लोणा इति ख्याता । इति शब्दचन्द्रिका ॥

अग्रियं, त्रि, (अग्रे भवम् अग्र + घ) प्रधानं । इत्यमरः ॥

अग्रियः, पुं, (अग्रे भव अग्र + घ) अग्रजः । ज्येष्ठभ्राता । इत्यमरः ॥

अग्रीयं, त्रि, (अग्रे भवः अग्र + छ) प्रधानं । इत्यमरः ॥ अग्रजे पुं, । इति तट्टीकायां रमानाथः ॥

अग्रुः, स्त्री, (अग्रते हर्षं स्पृश्यतेऽनया अगि + कु ऊङुत इति स्त्रियां वा ऊङ् । निपातनात् नलोपः ।) अङ्गुलिः । वेदमधुरप्रयोगोऽयं ॥

अग्रेगाः, पुं, अग्रगामी । इति मुग्धबोधव्याकरणं ॥

अग्रेगूः, पुं, (अग्रे गच्छति यः अग्रे + गम् + क्विप् ऊङगमादीनामित्युपसङ्ख्यानमिति पाणिनिवार्त्तिकेन मलोपः अकारस्य ऊकारः ।) अग्रगामी । इत्युणादिवृत्तिः ॥

अग्रेदिधिषुः, पुं, (दिधिं धैर्य्यं स्यति इन्द्रियदौर्ब्बल्यात् त्यजति दिधि + सो + अत्सृकृगृकुलम्बकन्दुकतेजूकर्कन्धूदिधिषु इत्युणादिसूत्रेण कु प्रत्ययश्च दिधिषुः पुनर्भूर्योषित् अग्रे गणनीया दिधिषुः द्विरूढा स्त्री यस्य सः बहु० हलदन्तात् सप्तम्याः संज्ञायामिति पाणिनिसूत्रेण अलुक् पुनर्भूविवाहकारिणि जने) द्विरूढैव यस्य कुटुम्बिनी स द्विजः । द्विज इत्युपलक्षणं । दिधिषुः सैवपूर्व्वाया दिधिषूस्तदुपरिभिकः । इति सामान्येन नाममालादर्शनात् । द्वितीयवारविवाहितपुत्रादिमती स्त्रियास्तोर स्वामी इति भाषा । इत्यमरः ॥

अग्रेदिधिषू, स्त्री, (प्रागनूढज्येष्ठभगिन्याः प्रागूढकनिष्ठभगिन्यां । अग्रे प्रथमे ज्येष्ठायां भगिन्यां विद्यमानायां गणनीया दिधिषुः ज्येष्ठा विवाहकालातिक्रमपदधैर्य्यनाशकारिणीति विग्रहे शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च ।) अविवाहितज्येष्ठभगिनीसत्त्वे अग्रे विवाहिता कनिष्ठा । यथा,—
"ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा ।
सा चाग्रे दिधिषूर्ज्ञेया पूर्व्वा च दिधिषूः स्मृता" ॥
इति देवलः । दिधिषूर्[illegible]

अग्रेवणं, क्ली, (वनस्याग्रे राजदन्तादित्वात् निपातः अलुक् । वनं पुरगे इत्यादित्वात् णत्वं) वनस्याग्रभागः । इति शब्दमाला ॥

अग्रेसरः, त्रि, (अग्रे सरति गच्छतीति अग्रे + सृ + टः ।) अग्रे गमनकर्त्ता । तत्पर्य्यायः । २ प्रष्ठः ३ अग्रतःसरः ४ पुरःसरः ५ मरः ॥ अग्रगामी ६ अग्रसरः ७ अग्रगमः ८ पुरोगामी १० । इति हेमचन्द्रः

अग्रेसरिकः, त्रि, (अग्रेसरणं गमनम् अग्रे भावे अप् अग्रेसरे गमने प्रसृत अग्रे अग्रगामिनि ।) अग्रगामी । इति त्रिका[ण्डशेषः]

अग्र्यः, त्रि, (अग्रे भवः अग्र + यत् ।) उत्तमः इत्यमरः । ज्येष्ठभ्रातरि पु इति [तट्टी]कायां रमानाथः ॥

अघ इ ङ गतौ (अघि गतौ कर्म्मणि लट् ते नुम् धातोरिदितः इति पाणिनिसूत्रेण नुम् कर्त्तरि लट् ते अङ्घते) । निन्दायां । जवे । इति कविकल्पद्रुमः ॥ जवो वेगः अङ्घते । ङ अङ्घते वायुवेगेन गच्छति जवे एव केचित् पठन्ति । इति दुर्गादास

अघ स् क सत्कृतौ । इति कविकल्पद्रुमः । क्षतिः पापक्षतिः । अघयति अघं । इयं अध्यपाठादकर्म्मकोऽयं । तथा च,—
"धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्
प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रि[या]"
इति गोयीचन्द्रः ॥ धात्वर्थेन सह कर्म्म सङ्ग्रहादित्यर्थः । कर्म्मणोदाहरणानि । वहति भारतीत्यर्थः । अघयति अघं । घटः । आहते जनः । इति दुर्गादासः ॥

अघं, क्ली, (अघ पापकरणे चुरां अघयति अघ् + अच् ।) पापं । दुःखं । व्यसनं । इ[ति]

अघमर्षणं, त्रि, (अघं पापं मृष्यते उत्पन्नाशनेन कर्म्मात्मत्वात् सहतेऽनेन अघ + कारणे ल्युट् ।) पापनाशनं । सर्व्वपापजयं । इत्यमरः ॥ (उत्पन्नपापनाशार्थे मन्त्रे भेदे यथा सन्ध्यामन्त्रे द्रुपदादिवेत्यादि) अघ यद्वाऽशावभृथस्नानमन्त्रः । वैदिकसन्ध्याङ्ग मन्त्रकरणकाधालजलप्रक्षेपरूपपापनाशक विशेषः । इति स्मृतिः ॥ तान्त्रिकसन्ध्यायाम्
"षडङ्गन्यासमाचर्य्य वामहस्ते जलं ततः ।
गृहीत्वा दक्षिणेनैव संपुटं कारयेद्बुधः ।
शिववायुजलपृथ्वीवह्निबीजैस्त्रिधा पुनः ।
अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया ।
निःक्षिपेत् तज्जलं मूर्द्ध्नि शेष दक्षिणघ्राणे
इडयाकृष्य देहान्तःक्षालितं पापसञ्चयं ।
कृष्णवर्णं तदुदकं दक्षनाडा विरेचयेत् ।
दक्षहस्ते च तन्नवीत्वा पापरूप विचिन्त्य च
पुरतो वज्रपाषाणे निक्षिपेदस्त्रमुच्चरन्" ।
इति तन्त्रसारः ॥

अघवान्, [त्] त्रि, (अघं पापं विद्यतेऽस्य मतुप्) अघविशिष्टः । पापी ॥

ा घसुरः ग्रामपार्धिशादि-
पटनीपस्य) अघनामासुरः ।
मतिः । इति श्रीभागवतं ॥
बोधकं । यथा अघो यस्य इति

ारः सौम्यरूपः "या ते रुद्र !
ा पापनाशिनी" इति वेदः ।)
शिवचतुर्दशीव्रतपूजायां ॥
मघानके च त्रि ॥
न्ति घोरा भयानका मूर्त्तिर्यस्याः ।
इति व्युत्पत्त्यर्थः) मानदस्यचतु-

—
सते पक्षे यथोरास्या चतुर्दशी ।
धितः स्यालुर्नदेच्छिवपुरं ध्रुवं" ॥

॥
(नास्ति घोषः शब्दो यत्र बहुव्रीहिः
न अन्यः घोषः शब्दो यत्र बहुव्रीहिः
दुक्तौ । तथाहि,—
सम्भावश्च तदन्यत्वं तदल्पता ।
न्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" ॥
तरत्वात् ।) आभीरशून्यदेशादिः । शब्द-
। अल्पध्वनियुक्तः । वर्णापारिभाषयाल्य
प्रभेदे पुं । स तु वर्गप्रथमद्वितीयवर्णाः
ाय ॥
पुं, (न हन्ति विनाशयति सदृत्वात् न+
+कर्त्तरि दक् । निपातनात् साधु ।) ब्रह्मा ।
ादिकोषः ॥
, स्त्री, (न हन्यते या हन्+कर्म्मणि दक्
त्रयामास । पतिं वो अघ्न्यानां धनूनाम् इति वेदः ।
अवध्याश्च स्त्रियं प्राहुस्तिर्यग्योनिगतामपि" ॥
ति निषेधात् ।) स्त्रीगवी । इत्यमरः ॥
त् क मदे । लक्षणि । इति कविकल्पद्रुमः ॥
तु क पदे । लक्ष्मणि । पदं सङ्ख्यासंस्थानं । लक्ष्म
वाग्रवर्गाद्योपधः । पदं सङ्ख्यासंस्थानं । लक्ष्म
चिह्नयुक्तक्रिया । तथा च,—
"अर्थक्रियैव धातूनां कर्त्तृव्यापारलक्षणा ।
आत्मनिष्ठं क्रियार्थत्वं धात्वर्थेष्वक्रियात्मसु" ॥
इति वोपदेवः ॥
"अङ्कयत्यरिसैन्यानि युधि दृष्टेषु शायकैः" ।
इति हलायुधः ॥ अङ्कयति अङ्कापयति । इति
दुर्गादासः ॥
अङ्कः, पुं, (अङ्कयति चिह्नयति, अङ्क+अच्)
चिह्नं । (स्वनामकाङ्कं निचखान शायकं इति
रघुवंशे ।) क्रोड़ं । (मपर्वीतनदं दृष्ट्वा तमङ्कारोह-
...) । इति विष्णुपुराणे ।) रूपकविशेष
नाटकं । इति ... देखा । विभूषणं । समीपं स्थानं
अपराधः । इति मेदिनी ॥ (प्रत्यक्षनेतृचरितो
नाटकांशः । इति मेदिनी ॥ ... रूढ
रसभावसमुज्ज्वल । भवेदगूढशब्दार्थं ...
चूर्णकसंयुतः ॥ अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क
इति कीर्त्तितः इति साहित्यदर्पणे) । चित्र-
युद्धं । इति विश्वः ॥ शरीरं । इत्याद्यादिकोषः ॥
नवसङ्ख्या । इति ज्योतिषं ॥ (कुचभूषाया
प्रकरणे । अगं । कटिप्रदेशे । कलङ्कः । एको हि

दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवा-
ङ्कः । इति कुमारसम्भवे ।)
अङ्कतिः, पुं, (अच्यते पूज्यतेऽसौ अन्च+कर्म्मणि
अति न्यङ्क्वादीनाञ्च इति पाणिनिसूत्रेण अन्य
कः । वायुपक्षे अञ्चति गच्छति इति व्युत्पत्त्या)
ब्रह्मा । अग्निः । अग्निहोत्री । इति विश्वः ॥ वायुः ।
इति त्रिकाण्डशेषः ॥
अङ्कनं, क्ली, (अङ्क+णिच् भावे ल्युट्) सङ्ख्यासंस्थानं ।
चिह्नयुक्तीकरणं । आँकन् दागन इति भाषा ।
चिह्नकरणं । यथा पराशरसंहितायां ।
"अन्यत्राङ्कनलक्ष्मभ्यां वाहनिर्म्मोचने कृते ।
सायं संयमनार्थन्तु न दुष्येद्दोषबन्धयोः" ॥
अङ्कनं त्रिशूलादिचिह्नकरणं । लक्ष्म स्थिरचिह्न-
करणं । इति प्रायश्चित्ततत्त्वं ॥
अङ्कमालिका, स्त्री, (अङ्कमालि+स्वार्थे कः स्त्रियां
टाप् ।) आलिङ्गनं । इति शब्दमाला ॥
अङ्कपाली, स्त्री, (अङ्केन क्रोड़ेन पालयति अङ्क+पा
+अनि स्त्रियां वा ङीप् पक्षे अङ्कपालिः ।) आलि-
ङ्गनं । धात्री । वेदिकाख्यगन्धद्रव्यं । तस्य नामा-
ग्रं कोटिः । इति मेदिनी ॥
अङ्कलोडः, पुं, (अङ्केन लोड्यतेऽसौ लोड़+घञ्)
चिञ्चोटकवृक्षः । चँचुको इति भाषा । चिञ्चो-
ड़मूल इति केचित् ॥ अस्य गुणाः । गुरुत्वं ।
अश्मरीकारित्वं । शीतलत्वञ्च । इति राजव-
ल्लभः ॥
अङ्कितः, त्रि, (अङ्क+क्त ।) लाञ्छितः । चिह्नितः ।
इति व्याड़िः ॥
अङ्की, स्त्री, (अङ्कः+स्त्रियां ङीप् ।) अङ्क्या ।
मृदङ्गविशेषः । इति शब्दरत्नावली ॥
अङ्कुरः, पुं, (अङ्क+उरच्) बीजोद्भवः । नूतनोत्पन्न-
लतादिः । (दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा । इति शाकु-
न्तले ।) अस्य पर्य्यायः । अभिनवोद्भिद् २ । इत्य-
मरः ॥ उद्भेदः ३ प्ररोहः ४ (भूताङ्कुरास्वाद-
कषायकण्ठः ।। इति कुमारसम्भवे ।) अङ्कुरः ५ ।
इति राजनिर्घण्टः । रोहः ६ अङ्करः ७ । इति
हेमचन्द्रः ॥ जलं । रक्तं । लोम । इति मे-
दिनी ॥
अङ्कुरकः, पुं, (अङ्क्यते वृक्षादिभिर्निर्म्मीयतेऽसौ अङ्क
+उरच् ततः स्वार्थे कः) नीड़ः । पक्षिवासस्थानं ।
इति शब्दमाला ॥
अङ्कुशः, पुं स्त्री, (अङ्क्यते हस्तिचालनार्थमाहन्यते-
ऽनेन अङ्क+उशच् ।) हस्तिचालनार्थलौहमय-
दण्डाग्रस्थं । डाङ्कश इति भाषा । तत्पर्य्याय
सृणिः २ इत्यमरः । सृणिः ३ इति नट्टीका ।
अङ्कुशः ४ इत्यमरटीका । ... यथा,—
"उद्यन् इत्यादि ... ।
... ॥"
अङ्कुशदुर्धरः, पुं, (अङ्कुशेन दुर्धरः दुर्दमनःऽसौ इति
दुर्+धृ+कर्म्मणि खल् ।) दुष्टहस्ती । इति
त्रिकाण्डशेषः ॥
अङ्कुशी, स्त्री, (अङ्क्यते अन्याभ्यो...ऽसौ) बौद्धविशेषे

अङ्क+उरच् स्त्रियां ङीप् । अङ्कुशादीनाञ्च इति
अस्य कः ।) जिनानां चतुर्विंशतिशासनदेवता-
न्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥
अङ्कूरः, पुं, (अङ्क+खर्जूरादित्वात् ऊरच् वा उरच्)
अङ्कुरः । अभिनवोद्भिद् । इति हेमचन्द्रः ॥
अङ्कूषः, पुं स्त्री, (अङ्क्यते हस्तिचालनार्थमाहन्यतेऽनेन
अङ्क+ऊषच् करणे) अङ्कुशः । इत्युणादिकोषः ॥
अङ्कोटः, पुं, (अङ्क+ओटच्) अङ्कोटवृक्षः । इति
रत्नमाला ॥
अङ्कोठः, पुं, (अङ्क्यतेऽनुभूयतेऽसौ अङ्क+ओठच्)
वृक्षविशेषः । आकोड़ इति ख्यातः । अस्य-
ाँकूड़ा इति केचित् । अस्य पर्य्यायः ।
निकोचकः २ । इत्यमरः ॥ निकोठकः ३ निको-
चकः ४ । इति भरतः ॥ अङ्कोलकः ५ बोधः
६ नेदिष्ठः ७ दीर्घकीलकः ८ । इति जटाधरः ॥
अङ्कोटः ९ रामठः १० । इति रत्नमाला ॥
कोठरः ११ रेची १२ गूढ़पत्रः १३ गुणाढ्यः
१४ पीतसारः १५ मदनः १६ गूढ़वल्लिका
१७ पीतः १८ ताम्रफलः १९ दीर्घकीलः २०
गुप्तस्नेहः २१ कोलकः २२ लम्बकर्णः २३ गन्ध-
पुष्पः २४ रोचनः २५ विषघ्नतैलगर्भः २६ । अस्य
गुणाः । कटुत्वं । स्निग्धत्वं । विषभूतादिदोष-
नाशित्वं । कफवातपित्तहारित्वं । सूतशुद्धिकारित्वं ।
रेचकत्वञ्च ॥ * ॥ तत्फलगुणाः । शीतलत्वं ।
स्वादुत्वं । श्लेष्मनाशित्वं । गुरुत्वं । बलकारित्वं ।
धातुपोषकत्वं । विरेचकत्वं । वातपित्तदाहक्षय-
दुष्टरक्तनाशित्वञ्च । इति राजनिर्घण्टः ॥
अङ्कोलः, पुं, (अङ्क्यतेऽनुभूयतेऽसौ अङ्क+ओलच्)
अङ्कोटवृक्षः । आकोड़ इत्यस्य प्रसिद्धिः । इत्यम-
रटीकायां स्वामी ॥
अङ्कोलकः, पुं, (अङ्कोल+स्वार्थे कः) अङ्कोठवृक्षः ।
इति जटाधरः ।
अङ्कोलिका, स्त्री, आलिङ्गनं । इति शब्दमाला ॥
अङ्कोल्लसारः, पुं, (अङ्कोल्लस्य सारः यत्रीव...)
स्थिराङ्गः ।) स्थावरविषप्रभेदः । इति हेमचन्द्रः ॥
अङ्क्यः, पुं, (अङ्क्यते वाद्यते हरीतक्याकृतिविशेष...
विशेषः यः । अङ्क+ण्यत् ।) हरीतक्याकृतिमृदङ्ग...
पाखवोयाज इति भाषा । इत्यमरः ॥ तदुक्तं,
"आङ्क्यालिङ्ग्यादयामस्तु ...
हरीतक्याकृतिर्यः स्यादङ्क्योऽङ्के स हि वाद्यते
इति भरतः ॥ (अपराधविशेषाणां ... ललाट...
... अङ्कनीयः । मनुः,—
"प्रायश्चित्तन्तु कुर्व्वाणाः सर्व्वे वर्णा यथोदि...
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाह...
...
... ॥
... ।
... ।
इति वोपदेवः । ...
दुर्गादासः ।

ङ्ग, अ सम्बोधनं। इत्यमरः॥ (रामायणे,—
"अङ्गवित्तस्त सौमित्रे कथमेवं मन्यसे धमुं"।
पुनरर्थः।)

अङ्गं, क्ली, शरीरादेरेकदेशः। अंग इति हिन्दी-
भाषा। तत्पर्य्यायः। अवयवः २ प्रतीकः ३ अप-
घनः ४। इत्यमरः॥ गात्रं। (शृङ्गारतिलके,—
"अङ्गानि चम्पकदलैः स विधाय धाता"।)
अप्रधानं। (साहित्यदर्पणे,—
"एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्व्वे कार्य्यनिर्व्वहणेऽद्भुतं"॥
उपायः। इति मेदिनी॥ (अङ्ग्यते विषयो बुध्यते
अनेन अङ्ग+करणे घञ् इति व्युत्पत्त्या) मनः।
अङ्गं मनसि काये चेत्यभिधानान्तरदर्शनात्।
यथा। "हिरण्यगर्भाङ्गभुवं मुनिं हरिरिति
माघः"॥ वेदाङ्गशास्त्राणि षट्। यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु"॥
शिक्षा १ कल्पः २ व्याकरणं ३ निरुक्तं ४ ज्यो-
तिषं ५ छन्दः ६। इत्यमरः॥ अङ्गस्य लक्षणं
यथा। तदीयप्रधानफलजनकव्यापारजनकत्वे सति
तदीयप्रधानफलाजनकत्वं। इति तिथ्यादितत्त्व-
टीका॥

अङ्गः, पुं, स्वनामख्यातदेशः। इति हेमचन्द्रः॥ मे-
दिनीकारमते नित्यबहुवचनान्तशब्दोऽयं। देश-
विशेषः। यथा,—
"वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे।
तावदङ्गाभिधो देशो यात्रायां न हि दुष्यते"॥
इति शक्तिसङ्गमतन्त्रे ७ पटलः॥ (अयञ्च देशः
भागलपुर समीपे वर्त्तते, अत्र महादेवस्य
कोपात् कामस्य अङ्गदाहात् अयं अङ्गनाम्ना
ख्यातः। यथा रामायणे,—
"अनङ्ग इति विख्यातस्तदाप्रभृति राघव।
स चाङ्गविषयः श्रीमान् यत्राङ्गं स मुमोच ह"॥

अङ्गः, त्रि, (अङ्गं विद्यतेऽस्य अङ्ग+अर्श आदित्वात्
अच्, मेदिन्यां अङ्गं क्लीबे प्रतीकोपाययोः पुं भूमि-
नीवृति। क्लीबैकत्वे त्वप्रधाने त्रिष्वङ्गवति चा-
न्तिके इति मेदिनी।) अङ्गविशिष्टः। निकटः।
इति मेदिनी॥

अङ्गग्रहः, पुं, (अङ्ग+भावे अच्। अङ्गानां ग्र-
हणं यत्र वेदना) गात्रवेदना। इति वै-
द्यकं॥

अङ्गजं, क्ली, (अङ्गे जायते अङ्ग+जन्+सप्तम्यां
जनेर्डः इति डः कर्त्तरि) रक्तं।
इति मेदिनी॥ शरीरजे अन्यलिङ्गं॥

अङ्गजः, पुं, पुत्रः। केशः। कामः। मदः। इति
त्रिकाण्डशेषः। मदनो ज्वरः। इति शब्दर-
त्नावली॥ (कोटरे कोटरे शालिवनादिषु।
यथा कुमारसम्भवे,—
"कोटरे कलमञ्जरी॰॰॰
अङ्गजोऽयं ॰॰॰

अङ्गजा, स्त्री, कन्या। अङ्गजस्य इवकन्या इति
शब्दार्थः।)

अङ्गणं, क्ली, (अङ्ग्यते गम्यते अत्र+अधिकरणे ल्युट्
पृषोदरादित्वात् णत्वम्) अङ्गनं। चत्वरं। इत्यमर-
टीकायां भरतः॥ (देवीमाहात्म्ये, विमानं हंस-
संयुक्तमेतत्तिष्ठति तेऽङ्गने।)

अङ्गतिः, पुं, (अङ्ग्यते सेवायै गम्यते अगि+कर्म्मणि
अति। ब्रह्मणि विष्णौ अग्नौ च।) ब्रह्मा। विष्णुः।
अग्निः। अग्निहोत्री। इति शब्दरत्नावली॥
(अग्निहोत्रिपक्षे तु कर्त्तरि अति। अङ्ग्यते गम्यते
ऽनेन इति व्युत्पत्त्या वाहने।)

अङ्गदं, क्ली, (अङ्गं द्यति खण्डयति अङ्ग+दो+कः
उपपदसमासः) केयूरं। ताड़ बाजू इत्यादि
भाषा। इत्यमरः॥ (रामायणे,—
"धूयमानैश्च वासोभिः शुभ्रैरङ्गदनूपुरैः"।)

अङ्गदः, पुं, (अङ्गं द्यति युद्धकाले अवखण्डयति
अङ्ग+दो+कर्त्तरि कः) कपिभेदः। स च वालि-
नामवानरराजपुत्रः। इति मेदिनी॥ (रामायणे,—
"कुमारं पश्यदग्निभिर्जाम्बवन्तञ्च सप्तभिः।
अशीत्या वालिनः पुत्रमङ्गदं बिभिदे शरैः"॥

अङ्गदा, स्त्री, अङ्गं देहं ददाति स्वस्वामिने समर्पयति
या अङ्ग+दा+कर्त्तरि कः स्त्रियामाप्) दक्षिण
दिग्गजस्त्रीभार्य्या। इति मेदिनीकारहेमचन्द्रौ॥

अङ्गनं, क्ली, अङ्गनभूमिः। आङ्गन् उठान इति
भाषा। तत्पर्य्यायः। चत्वरं २ अजिरं ३।
इत्यमरः॥ अङ्गणं ४। इति तट्टीका॥ प्राङ्गणं।
(रामायणे,—
"महाराजाङ्गनं शूराः प्रविशन्तु महोदयं"।)
५। यानं। गमनं। इति मेदिनी॥

अङ्गना, स्त्री, प्रशस्तानि अङ्गानि अस्याः इति
अङ्गात् कल्याणे इति नः। कामिनी। सुन्दराङ्गी
स्त्री। इति मेदिनी। (मनुः—
"प्रज्ञाहत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः"।)
सार्व्वभौमनाम उत्तरदिग्गजस्य पत्नी। इत्य-
मरः॥ वृषकर्कटकन्यालिवृश्चिकमकरमीनराशयः।
इति ज्योतिस्तत्त्वम्॥

अङ्गनाप्रियः, पुं, (अङ्गनानां प्रियः प्रीतिप्रदः। स्त्रि-
यश्च अशोकपुष्पेण सौभाग्यमङ्गनजन्मन्ति इति
लोके प्रसिद्धिः। अङ्गनाया दक्षिणदिक्पत्न्याः
प्रियः इति व्युत्पत्त्या तत्स्वामिनि) अशोकवृक्षः।
इति शब्दमाला॥

अङ्गपालिः, पुं, (अङ्गेन पाल्यते संश्रियतेऽनेन अङ्ग
+पा+णिच्) आलिङ्गनं। इति त्रिकाण्डशेषः॥
स्त्रियां ङीप् वैदिकास्त्वत्वन्तरशब्दे।)

अङ्गमर्द्दः, पुं, (अङ्गं मर्द्दयति यः अङ्ग+मर्द्द+कर्म्म-
ण्यण् उपपदसमासः।) अङ्गमर्द्दकारकभृत्यः।
तत्पर्य्यायः। संवाहकः २। इति हेमचन्द्रः॥ अङ्ग-
मर्द्दकः ३। इति त्रिकाण्डशेषः॥ अङ्गमर्द्दी ४।
इति जटाधरः॥

अङ्गमर्द्दकः, पुं, (अङ्गस्य मर्द्दकः संवाहकः कर्ता-
णच्।) अङ्गमर्द्दः। इति त्रिकाण्डशेषः॥

अङ्गमर्द्दी [न्] पुं, अङ्गं साधु मर्द्दयति संवाहयति
यः अङ्ग+मर्द्द+णिनि।) अङ्गमर्द्दः। इति जटा-
धरः॥

अङ्गरक्षः, पुं, (रक्षं रक्षणं अङ्गं यस्य स रक्षाः
वाहिताग्न्यादिषु इति सूत्रेण परं पूर्व्वं निपात्-
यते।) कवचविशेषः। गुजराटदेशे
ख्यातः। तत्पर्य्यायः। सिक्तलः २ रोज्जकः
लघुपत्रकः ४। इति शब्दचन्द्रिका॥ वर्म्म
५ कर्कटः ६ चक्रः ७ रक्षाङ्गः ८। इत्यमरः।

अङ्गरक्षिणी, स्त्री, अङ्गं रक्षति पालयति या अङ्ग-
रक्ष+णिनि।) अङ्गत्राणं। जोड़ा इति भाषा।
भाषा। तत्पर्य्यायः। आनिका २ जालिका
आयसी ४। इति हेमचन्द्रः॥

अङ्गरागः, पुं, रज्यतेऽङ्गमलङ्क्रियतेऽनेन रञ्-
करणे घञ् घञि च भावकरणयोरिति नलोपे
वृद्धिश्च। अङ्गस्य रागः षष्ठीतत्पुरुषः।) गा-
त्रलग्नं। अङ्गे चन्दनादिलेपनं। तत्पर्य्यायः। विलेप-
२। इति हेमचन्द्रः॥ (रामायणे,—
"यानानि चाङ्गरागांश्च माल्यानि विविधानि च"।

अङ्गराट्, पुं, (अङ्गे तद्देशे राजते यः अङ्ग+राज्+
क्विप् उपपदसमासः)। अङ्गदेशाधिपतिः। इति
कर्णः। इति हेमचन्द्रः॥ (दशरथस्य वै-
वाहिकः रामायणे,—
"सख्यं तस्याङ्गराजेन भविष्यति महात्मना।
कन्या चास्य महाभागा शान्ता नाम भविष्यति
अङ्गराजे ऽनपत्यस्तु लोमपादो भविष्यति।
स राजानं दशरथं प्रार्थयिष्यति भूमिपः"।)

अङ्गलोड्यः, पुं, (अङ्गेन अङ्गुल्यादिना लोड्यते
यतेऽसौ लोडि+कर्म्मणि यत् अङ्गेन लोड्यः
यतत् पुरुषः। अङ्गलोड्य इति पाठे
स्वव्यापितचिह्नविशेषेण लोड्यः अनुमेयः अङ्ग-
मनेकार्थत्वाद्धात्वर्थलोडिधातुरनुमानार्थः।) वि-
कल्पं। इति रत्नमाला॥ अङ्गलोप इति

अङ्गवः, पुं, अङ्गे स्वदेहे वाति अतिशुष्कत्वात्
मिव भवति अङ्ग+वा+कर्त्तरि कः। इमली
इति शब्दचन्द्रिका॥

अङ्गविकृतिः, पुं, (अङ्गानां विकृतिर्व्विकारो यस्मिन्
बहुव्रीहिः।) अपस्माररोगः। इति राजनिर्घण्टः।

अङ्गविक्षेपः, पुं, (वि+क्षिप्+भावे घञ्। अङ्ग-
विक्षेपः एकस्थानादन्यस्थाने चालनं षष्ठीतत्पुरुषः।
अङ्गहारोऽङ्गविक्षेप इत्यमरः।) अङ्गहारः।
नृत्यानवस्थत्वं। इत्यमरः॥

अङ्गवैकृतं, क्ली, (विकृति+प्रज्ञादित्वात् इति
अण् अङ्गस्य वैकृतम्) आकारः। इङ्गितं। इति
जटाधरः॥

अङ्गसंस्कारः, पुं, (अङ्गस्य संस्कारः शोभा
तत्। सम्+कृ+भावे घञ् सम्परिभ्यामिति
दिना इति सुट्।) कुङ्कुमादिना शरीरस्य
भावलेपसंस्कारः। इति भरत। अर्थान्तर-
मादिः। इति स्वामी। शरीरसंस्कारः
इत्यन्ये। सेदादिक्लिन्नदौर्गन्ध्यहरणाय
उद्वर्त्तनानुलेपनादि। इति सारसुन्दरी।
पर्य्यायः। परिकर्म्म २। इत्यमरः। प्रतिकर्म्म
इति क्वचित् पाठः॥

अङ्गहारः, पुं, (अङ्गानां हारः एकस्थानादन्यस्थाने

लगं षष्ठीतत्पुरुषः।) अङ्गानां स्थानात् स्थानान्तयनं। तत्पर्य्यायः। अङ्गविक्षेपः २। इत्यमरः॥ ङ्गहारः ३। इति तट्टीका॥ (स्थिरहस्तपर्य्यस्तादिको द्वात्रिंशत्प्रकारः। इति मधुः॥ स्थिकभमरादिद्वात्रिंशद्रूपः। इति रायः। अङ्गुशादिविन्यासस्त्रिंशद्रूपः। इति कौमुदी॥

ङ्गहारिः, पुं, (अङ्गानि ह्रियन्ते चाल्यन्तेऽत्र अङ्ग+हृ+इञ् अञ्जादिभ्यश्च इति पाणिनिसूत्रेण अधिकरणे इञ्। रङ्गभूमिः, नृत्यभूमिश्च।) अङ्गहारः। इति भरतधृतचन्द्रचन्द्रः॥

ङ्गहीनः, त्रि, (अङ्गेन हीनः रहितः तृतीया तत्पुरुषः। हा+कर्म्मणि क्तः।) अवयवरहितः। अङ्गहानिविशिष्टः। (यथा, याज्ञवल्क्यः,—
"कालकर्म्मात्मवीजानां दोषैर्मातुस्तथैव च।
गर्भस्य वैकृतं दृष्टमङ्गहीनादि जन्मतः॥)
अङ्गहीनं क्रियाहीनं विधिहीनञ्च यद्भवेत्"॥
इति स्मृतिः॥ कामदेवे पुंलिङ्गः॥

ङ्गाधिपः, पुं, (अङ्गस्य देशविशेषस्य अधिपः षष्ठीतत्पुरुषः।) अङ्गदेशाधिपतिः। स च कर्णः। इति भूरिप्रयोगः॥

ङ्गारः, पुं, स्त्री, (अगि+आरन् इदितो नुम्धातोरिति नुम्।) दग्धकाष्ठखण्डं। तत्तु निरग्नि साग्नि च। कयला आङ्गरा इति भाषा। तत्पर्य्यायः। अलातं २ उल्मूकं ३। इत्यमरः॥ आलातं ४ उल्मूकं ५। इति तट्टीका।
("घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्"।)

ङ्गारः, पुं, (रक्तं रक्तवर्णमङ्गं यस्य स बहुव्रीहिः पृषोदरादित्वात् साधुः।) मङ्गलग्रहः। इति मेदिनी॥ हितावली। इति वैद्यकं॥

ङ्गारकः, पुं, (अङ्गार+स्वार्थे कः।) मङ्गलग्रहः इत्यमरः,—
("धरात्मजः कुजो भौमो भूमिजो भूमिनन्दनः।
अङ्गारको यमश्चैव सर्व्वरोगापहारकः"॥
इति वराहपुराणम्।) (रामायणे,—
"दिवीव ग्रहयोर्घोरं बुधाङ्गारकयोर्महत्।
कौशलानाञ्च नक्षत्रं ज्येष्ठा मैत्राभिदैवतं।
आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे"॥)
अङ्गारः। कुरण्टकवृक्षः। इति मेदिनी॥ भृङ्गराजः। इति राजनिर्घण्टः॥

अङ्गारतैलं, क्ली, (अङ्गारेण पक्वं तैलं शाकपार्थिवादित्वात् समासः। मध्यपदलोपश्च) स्वनामख्यातपक्वतैलं। तस्य पाकप्रकारो गुणश्च।
यथा,—
"मूर्व्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी।
बृहती सैन्धवं कुष्ठं रास्ना मांसी शतावरी॥
आरनालाढ़केनैव तैलप्रस्थं विपाचयेत्।
तैलमङ्गारकं नाम सर्व्वज्वरविमोक्षणं"॥
इति सुखबोधः॥

अङ्गारकमणिः, पुं, (रक्तवर्णत्वादङ्गारकवत् मणिः अथवा अङ्गारकस्य मणिः षष्ठीतत्पुरुषः। माणिक्यं भास्करे देयं चन्द्रे मुक्तां प्रदापयेत् प्रवालञ्च कुजे दद्यादित्यादिना तत्कृताशुभप्रतिकाराय प्रवालदानोक्तेः तत्प्रियत्वं।) प्रवालः। इति राजनिर्घण्टः॥

अङ्गारकुष्ठकः, पुं, (अङ्गारवर्णं कुष्ठमिव कन्) हितावली। इति राजनिर्घण्टः॥

अङ्गारधानिका, स्त्री, (अङ्गाराणि धीयन्ते धार्य्यन्तेऽत्र धा+अधिकरणे ल्युट् स्त्रियां ङीप्। अङ्गाराणां धानी ततः स्वार्थे कः। पक्षे अङ्गारधानी।) अङ्गारधारणपात्रं। आङ्टा इति ख्याता। साँगाल इति केचित्। तत्पर्य्यायः। अङ्गारशकटी २ हसन्ती ३ हसनी ४। इत्यमरः॥

अङ्गारपरिपाचितं, क्ली, (अङ्गारेण परिपाच्यते परि+पच्+स्वार्थे णिच् ततः कर्म्मणि क्तः।) अङ्गारपक्वं। शूलविद्धाङ्गारदग्धमांसं। काबाब इति ख्यातं। इति शब्दचन्द्रिका॥

अङ्गारपर्णः, पुं, (अङ्गारवत् पर्णं पत्रं यस्य स बहुव्रीहिः। वनभेदे। सोऽस्यास्ति ततः अर्श आद्यच् तत्स्वामी) चित्ररथगन्धर्व्वः। इति महाभारतं॥

अङ्गारपुष्पः, पुं, (अङ्गारवत् रक्तवर्णं पुष्पं यस्य सः बहुव्रीहिः।) इङ्गुदीवृक्षः। जियापुता। इति ख्यातः। इति रत्नमाला॥

अङ्गारमञ्जी, स्त्री, (अङ्गारवत् रक्तवर्णा मञ्जी मञ्जरी यस्याः सा बहुव्रीहिः। समासान्तविधेरनित्यत्वात् कवभावः।) करञ्जविशेषः। इति शब्दरत्नावली॥ अस्य नामान्तरं अङ्गारमञ्जरी॥

अङ्गारवल्लरी, स्त्री, करञ्जविशेषः। इत्यमरः॥ भार्गी। गुञ्जा। इति राजनिर्घण्टः॥

अङ्गारवल्ली, स्त्री, (अङ्गारवत् रक्तवर्णा वल्ली कर्म्मधारयः। गुञ्जालता, स्वार्थे कन् अङ्गारवल्लिका।) महाकरञ्जः। भार्गी। इति राजनिर्घण्टः॥

अङ्गारशकटी, स्त्री, (शक्नोति वोढुं शकटं। शकट+स्त्रियां ङीप् अल्पार्थे शकटी। अङ्गारस्य शकटी षष्ठीतत्पुरुषः। आङ्टा इति भाषा। धुनाची इति) अङ्गारधानिका। इत्यमरः॥

अङ्गारिः, स्त्री, (अङ्गारमस्या अस्ति अङ्गार+अत इन् ठनाविति ठन् तस्य इ कः पृषोदरादित्वात् कलोपः) अङ्गारधानिका। इति जटाधरः॥

अङ्गारिका, स्त्री, (अङ्गारवत् रक्तवर्णा अङ्गार+इवार्थे कन् स्त्रियां टाप्) इक्षुकाण्डं। पलाशकलिका। इति मेदिनी॥ (अङ्गारमस्या अस्ति अङ्गार+मत्वर्थे ठन् तस्य इ कः स्त्रियां टाप् इति व्युत्पत्त्या अङ्गारपात्रम्।)

अङ्गारिणी, स्त्री, (अङ्गारमस्या अस्ति अङ्गार+मत्वर्थे इन् स्त्रियां ङीप्।) अङ्गारधानिका। भास्करत्यक्ता दिक्। (सूर्य्यत्यक्ततया अङ्गारवत् रक्तवर्णा दिक्।) इति मेदिनी॥

अङ्गारितं, क्ली, (अङ्गारमिवाचरति अङ्गार+क्विप् ततः क्तः।) पलाशकलिकोद्गमः। (अङ्गारं करोति अङ्गार+णिच् कर्म्मणि क्तः। मत्वर्थे इतच् वा दग्धप्रायकाष्ठं) दग्धे त्रि। इति विश्वः।

अङ्गिका, स्त्री, कञ्चुकः। काँचली इति ख्याता। इति हेमचन्द्रः॥

अङ्गिरा, [स्] पुं, (अङ्गति ब्रह्मणो मुखान्निःसरति अगि गतौ+असुन् इरस् च) मुनिविशेषः। स च ब्रह्मणो मुखाज्जातः। तस्य भार्य्या कर्दममुनिकन्या श्रद्धा। पुत्त्रः उतथ्यः १ बृहस्पतिः २। कन्या सिनीवाली १ कुहूः २ राका ३ अनुमतिः।४। इति श्रीभागवतं॥

अङ्गी, [न्] त्रि, (अङ्गं विद्यतेऽस्य अङ्ग+मत्वर्थे इन्।) अङ्गविशिष्टः। अवयवी। यथा येनाङ्गेनाङ्गी विकृतो भण्यते तस्मादङ्गाच त्रि। इति मुग्धबोधटीकायां दुर्गादासः॥ प्रधानं। मुख्यः। यथा। "यद्यङ्गी स्याद्रसान्तरे"। इति अग्निकारः॥

अङ्गीकारः, पुं, (अङ्गीति चान्तं तत्पूर्व्वकात् कृ+घञ्) स्वीकारः। तत्पर्य्यायः। सम्वित् २ आगूः ३ प्रतिज्ञानं ४ नियमः ५ आश्रवः ६ संश्रवः ७ अभ्युपगमः ८ समाधिः ९ प्रतिश्रवः १०। इत्यमरः॥

अङ्गीकृतं, त्रि, (अङ्गीति चान्तं तत्पूर्व्वकात् कृ+कर्म्मणि क्तः) स्वीकृतं तस्य पर्य्यायः। ऊरीकृतं २ उररीकृतं ३ आश्रुतं ४ प्रतिज्ञातं ५ संगीर्णं ६ विदितं ७ संश्रुतं ८ समाहितं ९ उपश्रुतं १० उपगतं ११ प्रतिश्रुतं १२ अभ्युपगतं १३। इत्यमरः॥

अङ्गुरिः, स्त्री, (अगि गतौ+उ णिच् रलयोरेकत्वस्मरणात् लस्य रत्वम्) पाणिपादाङ्गुली। इत्युणादिकोषः॥

अङ्गुरी, स्त्री, (अङ्ग+उणिच् पक्षे ङीप्) अङ्गुली। इत्यमरटीका॥

अङ्गुरीयः, पुं, क्ली, (अङ्गुरेरिदं तत्र भवं वा अङ्गुरि+छः तस्य ईयः) अङ्गुलीयकं। आङ्टी इति भाषा। अङ्गुलौ भवं अङ्गुलीयं गहादित्वात् लस्य रः। इति भरतः॥ (यथा रामायणे,—
"ददौ चास्य तदा प्रीतः स्वनामाङ्काभिचिह्नितं।
अङ्गुरीयमभिज्ञानं राजपुत्र्याः परन्तपः"॥)

अङ्गुरीयकं, क्ली, पुं, (स्वार्थे कः) अङ्गुलीयकं। इत्यमरटीकायां मुकुटादयः॥ रामायणे,—
"रामनामाङ्कितञ्चेदं पश्य हार्याङ्गुरीयकं"।

अङ्गुलः पुं, (अङ्ग+उन् अङ्गौ हस्ते लीयते अङ्गु+ली+डः) हेमचन्द्रः॥ अङ्गुली॥ इत्यमरटीकायां रमानाथः॥ अष्टयवपरिमाणं। इत्यमरटीकायां वाचस्पतिः॥ (अष्टसंख्यकयवोदरपरिमाणे यवोदरैरङ्गुलमष्टसंख्यैरिति भास्कराचार्य्योक्तेः न०।) (यथा रामायणे,—
"न ह्याविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरं"।)

अङ्गुलिः, स्त्री, (अङ्ग+उलिच्) करशाखा। आङ्गुल इति भाषा। (यथा मनुः,—
"कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः"।)
गजकर्णिका। हस्तिशुण्डाग्रभागः। इति हेमचन्द्रः॥ अङ्गुष्ठः। इत्युणादिकोषः॥

अङ्गुलितोरणं क्ली, (अङ्गुलेः तोरणं बहिर्द्वारमिव षष्ठीतत्पुरुषः) चन्दनादिद्वारा ललाटे कृतोऽर्द्धचन्द्रः। इति हारावली॥

अङ्गुलिमुद्रा, स्त्री, (अङ्गुलेः मुदं नामाङ्कं धारयितु-र्हर्षं राति ददाति या अङ्गुलिमुद् + रा + कर्त्तरि कः) साक्षरोर्म्मिका। प्रभुनाम्ना लक्षिता वा अ-ङ्गुलिमुद्रीयकं। छापेर आङ्गुटी मोहरखोदा आङ्गुटी इति भाषा। इत्यमरः॥

अङ्गुलिमुद्रिका, स्त्री, (अङ्गुलिमुद्रा + स्वार्थे कः) अङ्गुलिमुद्रा। इत्यमरटीकायां रमानाथः॥

अङ्गुलिमोटनं, क्ली, (अङ्गुल्योर्म्मोटनं मर्द्दनं यस्मिन् तत् बहुव्रीहिः) अङ्गुलिद्वयमर्द्दनजातशब्दः। आ-ङ्गुलमट्काण इति भाषा। तत्पर्य्यायः। पुच्छटी २। इति त्रिकाण्डशेषः। सच्छटी ३ अङ्गुलिसन्देशः ४। इति हारावली। मुचुटी ५। इति जटाधरः॥ मुचुटीतु मुष्टिपर्य्याये हेमचन्द्रेण लिखिता।

अङ्गुलिसन्देशः, पुं, (अङ्गुल्या अङ्गुलिध्वनिना सन्देशः मोटनं षष्ठीतत्पुरुषः सम् + दिश् + भावे घञ्) अङ्गुलिमोटनं। इति हारावली।

अङ्गुली, स्त्री, (अङ्ग + उलिच् स्त्रियां वा ङीप् पक्षे अङ्गुलिः) शरीरावयवविशेषः। आङ्गुल इति भाषा। (रामायणे,—

"कनिष्ठायामप्यङ्गुल्यां भ्रातुर्मम स राक्षसः।
ज्वालाङ्गुलीभिर्भगवान् विष्टब्धः स कृताञ्जनः"।)

तत्पर्य्यायः। करशाखा २। इत्यमरः। (अङ्गुलिः ३ अङ्गुरिः ४ अङ्गुरी ५ अङ्गुलः ६।) इति तट्टीका। सा क्रमेण पञ्चधा, यथा—अङ्गुष्ठः १ तर्ज्जनी २ मध्यमा ३ अनामिका ४ कनिष्ठा ५ इत्यमर-जटाधरौ। करिशुण्डायां। इति मेदिनी।

अङ्गुलीकं, पुं, क्ली, (अङ्गुल्यां कायते निधीयते-ऽसौ अङ्गुली + कै + घञर्थे कर्म्मणि कः) अङ्गु-लीयकं। इति त्रिकाण्डशेषः।

अङ्गुलीपञ्चकं, क्ली, (पञ्चानामङ्गुलीनां समाहारः द्विगुसमासः राजदन्तादित्वात् पञ्चशब्दस्य पर-निपातः) करस्य पञ्चाङ्गुलानि यथा,—अङ्गुष्ठः १ प्रदेशिनी २ मध्यमा ३ अनामिका ४ कनिष्ठिका ५। इति राजनिर्घण्टः।

अङ्गुलीयः, पुं, क्ली, (अङ्गुल्या अयं तत्र भवो वा अङ्गुली + छ तस्य ईयः) अङ्गुलीयकं। इत्यमरटीका।

अङ्गुलीयकं, क्ली पुं, (अङ्गुलीय + स्वार्थे कः) अ-ङ्गुलिभूषणं। आङ्गुटी इति भाषा। तत्पर्य्यायः। ऊर्म्मिका २। इत्यमरः। अङ्गुरीयकं ३ अङ्गु-रीयः ४ अङ्गुलीयः ५। इति तट्टीका। करा-सोटः ६ अङ्गुलीकं ७। इति त्रिकाण्डशेषः। दृष्टि प्रमाणं। अयं मैथिलीभिज्ञानं काकुत्स्थस्या-ङ्गुरीयकः। इति भट्टिः।

अङ्गुलीसम्भूतः, पुं, (अङ्गुल्यां सम्भूतः जातः सप्तमी-तत्पुरुषः) नखः। इति राजनिर्घण्टः।

अङ्गुष्ठः, पुं, (अङ्गौ हस्ते मुख्यत्वेन तिष्ठति यः अङ्गु + कर्त्तरि कः अम्बाम्बगोभू इत्यादिना षत्वम्) वृद्धाङ्गुलिः। इत्यमरः। बुड़ो आङ्गुल इति भाषा। (मनुः,—

"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते"।)

अङ्गूषः, पुं, (अङ्गति गच्छति अगि + ऊषन्) नकुलः। बाणः। इत्युणादिकोषः।

अङ्घः, [स्] क्ली, (अङ्घते दुर्गतिं गच्छत्यनेन अघि + सर्व्वधातुभ्योऽसुन् इति असुन्) अघं। पापं। इत्युणादिकोषः। (सूर्य्यशतके,—

"विदधतु घृणयः शीघ्रमङ्घोविघातं"।)

अङ्घिः, पुं, (अङ्घते गच्छत्यनेन अघि + करणे इन्) अङ्घ्रिः। इति विश्वः।

अङ्घ्रिः, पुं, (अङ्घते गच्छत्यनेन अघि + करणे क्रिः) पादः। (सूर्य्यशतके,—"शीर्णघ्राणाङ्घ्रिपाणीन्"।) वृक्षमूलं। इति त्रिकाण्डशेषः।

अङ्घ्रिनाम, [न्] क्ली, (अङ्घ्रिरूपेण नमते जलादा-कर्षणेन कल्पते यत् अङ्घ्रि + नम् + अन् णिच्) वृक्षमूलं। इति हेमचन्द्रः।

अङ्घ्रिनामकः, पुं, (अङ्घ्रिनाम + स्वार्थे कः) वृक्ष-मूलं। इत्यमरः।

अङ्घ्रिपः, पुं, (अङ्घ्रिणा पिबति अङ्घ्रि + पा + क) वृक्षः। इति हेमचन्द्रः।

अङ्घ्रिपर्णी, स्त्री, (अङ्घ्रिवत् पर्णं पत्रं यस्याः सा बहुव्रीहिः स्त्रियां ङीप्) पृश्निपर्णी। चाकुलिया इति ख्याता। इत्यमरटीकायां रमानाथः।

अङ्घ्रिवल्लिका, स्त्री, (अङ्घ्रिवत् वल्लिः उपमित-कर्म्मधारयः। स्वार्थे कः) पृश्निपर्णीवृक्षः। चाकुलिया इति भाषा। इत्यमरः। अस्या रूपान्तरं अङ्घ्रि-वल्लिः अङ्घ्रिवल्ली।

अच इ पूजायां। इति कविकल्पद्रुमः। इ अ-ञ्चते। अचु गतिपूजनयोरिति पूजार्थो यः स एवायं। इदित् पाठः पूजायां नलोपाभावात्। उदनुबन्धाभावश्च क्षुधवसपशार्थाश्वेत्यादिना क्ता-प्रत्ययस्य निष्ठायाञ्च नित्येड्विधानात्। इति दुर्गा-दासः।

अच इ ञ गतौ। श्लिष्टोक्तौ। इति कविकल्प-द्रुमः। इ अञ्चते। ञ अचति अचते। इति दुर्गादासः।

अच उ ञ गतौ श्लिष्टोक्तौ। इति कविकल्प-द्रुमः। अचति अचते। उ अचित्वा (उदितो वा इडभावपक्षे) अक्त्वा। श्लिष्टोक्तिरव्यक्त-शब्दः। इति दुर्गादासः।

अचण्डी, स्त्री, (चडि कोपने पचाद्यच् इदित्वात् नुम् स्त्रियां ङीप् न चण्डी नञ्समासः) सुशीला गौः। शान्त गाइ इति भाषा। तत्पर्य्यायः सुकरा २। इत्यमरः। अक्रोधना स्त्री।

अचलः, पुं, (चलति यः चल् + पचाद्यच् न चलः नञ्समासः) पर्व्वतः। (रामायणे,—

"आससाद ततो रामं स्थितं शैलमिवाचलं"।)

कीलकः। इति मेदिनी। अकम्पे त्रि। (स्थिरः, स्थिरः। यदुक्तं,—

"न लाघवात् न सामर्थ्यात्
नच चापादिकात् गुणात्।
चलनं विद्यते यस्मि-
न्नचलः कीर्त्तितोऽच्युतः"।

अधिकारी, कूटस्थः)।

अचलकीला, स्त्री, (अचलः सुमेरुपर्व्वतः कीलः शङ्कुस्वरूपो यस्याः सा बहुव्रीहिः। कीले शेषे द्वयोः काम्य इति मेदिनी) पृथिवी। शब्दरत्नावली।

अचलत्विट्, [ष्] पुं, (अचला स्थिरा त्विट् यस्य बहुव्रीहिः) कोकिलः। इति शब्दचन्द्रिका।

अचलभ्राता, [तृ] पुं, बौद्धगणाधिपविशेषः। तु शेषजैनामाय्यस्य एकादशशिष्यान्तर्गतः। हेमचन्द्रः।

अचला, स्त्री, (न चला नञ्समासः) पृथिवी। मेदिनी। यथा रामायणे,—

"पृथिवीमपि कामं तं ससागरवनाचलां"।

अचिरद्युतिः, स्त्री, (अचिरा क्षणस्थायिनी कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति त्रि-काण्डशेषः।

अचिरप्रभा, स्त्री, (अचिरा क्षणस्थायिनी कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति हेम-चन्द्रः।

अचिररोचिः, [स्] स्त्री, (अचिरा रोचिः कान्ति-र्यस्याः सा बहुव्रीहिः) विद्युत्। इति जटा[illegible]

अचिरा, स्त्री, (अचिं ज्ञानोपदेशं राति द[illegible] या अचि + रा + कर्त्तरि क उपपदसमास[illegible] + भावे इक्) अर्हतो मातृविशेषः। इति [illegible] चन्द्रः।

अचिरांशुः, स्त्री, (अचिराः क्षणस्थायिन[illegible] किरणा प्रभा यस्याः सा बहुव्रीहिः।) विद्युत्। [illegible] हलायुधः। अचिरात् अ अचिरं। [illegible] अविलम्बं। यथा,—

"अचिरादुपकर्त्तुराचरे-
दथवात्मौपयिकीमुपक्रियां"।

इति नैषधं।

अचिराभा, स्त्री, (अचिरा क्षणस्थायिनी आभा [illegible] र्यस्याः सा बहुव्रीहिः) विद्युत्। इति हारा[illegible]

अचेतनः, त्रि, (नास्ति चेतना ज्ञानं यस्य स ब-हुव्रीहिः) चेतनारहितः। चैतन्यशून्यः। [illegible] यथा,—

"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु"।

इति मेघदूतकाव्यं। सेन्द्रियं चेतनं द्रव्यं नि-रिन्द्रियमचेतनं। इति चरकः।

अचैतन्यं, क्ली, (न चैतन्यं चेतना नञ्तत्पु[illegible] निश्चेतना। चेतनाभावः। अज्ञानं। यथा,—

"अचैतन्यमिदं विश्वं चैतन्यं देवमेव यत्।
न जानन्त्यपि शास्त्रज्ञा भ्रमन्त्येव हि [illegible]

इति चैतन्यचन्द्रामृतं। तद्वति त्रि।

अच्छं, अ, (न छ्यति सम्मुखत्वात् दृष्टिं बाधते न छो + घञर्थे कः नञ्तत्पुरुषः) आभिमु-[illegible] साम्मुख्यं। इति मेदिनी।

अच्छः, त्रि, (न छ्यति निर्म्मलत्वात् दृष्टिं बाधते नञ् + छो + कर्त्तरि कः उपपदसमासः) स्वच्छः। निर्म्मलः। इत्यमरः। (अमरुशतके, अच्छ[illegible] मूलस्खलितैः)।

अच्छः, पुं, (न छ्यति निर्म्मलत्वात् दृष्टिं बाधते न + छो + कर्त्तरि कः उपपदसमासः) स्फटिकः। भल्लूकः। इति मेदिनी।

अच्छभल्लः, पुं, (अच्छाः निर्म्मलाः भल्लाः शल्यानीव अङ्गे लोमानि यस्य सः बहुव्रीहिः यद्वा—मेदिन्यां भल्लः स्यात् पुंसि भल्लूके शस्त्रभेदे पुनर्द्वयोः) भल्लूकः। इत्यमरः। तट्टीकायाम्भरते अच्छो भल्लेति इच्छदयमपि ॥

अच्छा, स्त्री, (अविष्णुन्यायते आच्छाद्यतेऽनया, छो + करणे घञ्। अस्य विष्णोः छा आच्छादनं षष्ठीतत्पुरुषः। अकारो वासुदेवः स्यादित्येकाक्षरकोषे।) विष्णोराच्छादनं। इति मुग्धबोधव्याकरणं॥

अच्छिद्रं, त्रि, (नास्ति छिद्रं यत्र बहुव्रीहिः) छिद्ररहितं। दोषाभावविशिष्टं। यथा शातातपपराशरौ।—

"अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः।
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः समं" ॥

इति श्राद्धतत्त्वं ॥

अच्छिद्रावधारणं, क्ली, (अच्छिद्रस्य दोषरहितकर्म्मणः अवधारणं निश्चयः) दोषरहितकर्म्मनिश्चयः। तज्ज्ञापकवाक्यं। यथा,—

ततः कर्म्मसमाप्तावच्छिद्रावधारणं कुर्य्यात्।
तथाच शातातपपराशरौ।—

"अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः।
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः समं" ॥

इति श्राद्धतत्त्वं ॥

अपि च। वशिष्ठः।

"ततः शान्तिं प्रकुर्व्वीत अवधारणवाचनं"।

अवधारणं अच्छिद्रावधारणं। इति तिथ्यादितत्त्वं ॥ तद्वाक्यं यथा,—अद्यामुके मासि अमुकपक्षे अमुकतिथौ मत्कृतैतदमुककर्म्माच्छिद्रमस्तु ॥

अच्छिन्नं, त्रि, (छिद + कर्म्मणि क्तः न छिन्नं नञ्समासः) छेदरहितं। अकर्त्तितं। यथा गर्गः,—

"श्रुत्वा पुत्रस्य वै जन्म कृत्वा देवोदिताः क्रियाः।
अच्छिन्ननालं मङ्क्तेत्तं दत्त्वा रत्नं फलान्वितं" ॥

इति शुद्धितत्त्वं ॥

अपि च। शङ्खः।

"अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः" ॥

अच्छिन्नसंशयः फलोपायेतिकर्त्तव्यतासु निश्चयशून्यः। इति प्रायश्चित्ततत्त्वं ॥

अच्युतः, पुं, (न च्यवते स्वरूपतो न गच्छति यः नित्य इति यावत्। च्यु + कर्त्तरि क्तः न च्युतः नञ्समासः। पीताम्बरोऽच्युतः शार्ङ्गीत्यमरः) विष्णुः। इत्यमरः॥ (यथा कुमारसम्भवे,—तमावतीर्य्याच्युतदत्तहस्तः।) स्थिरे त्रि॥ सोऽन्त्यवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति छान्दोग्योपनिषत्।

अच्युताग्रजः, पुं, (अच्युतस्य अग्रजः) बलरामः। इत्यमरः॥ इन्द्रः। इति हेमचन्द्रः॥

अच्युतावासः, पुं, (उष्यते वासः क्रियतेऽत्र आ + वस् + अधिकरणे घञ् यद्वा अच्युतस्य आवासः। 'अश्वत्थः सर्व्ववृक्षाणां देवर्षीणाञ्च नारदः' इति भगवद्गीतायाम्।) अश्वत्थवृक्षः।
इति राजनिर्घण्टः॥

अज क्षेपे। गतौ। इति कविकल्पद्रुमः॥ अजति। इति दुर्गादासः॥

अज इर भासि (अजि दीप्तौ भुग इदित्वान्नुम्।) इति कविकल्पद्रुमः॥ इर अञ्जयति। भासि दीप्तौ। इति दुर्गादासः॥

अजः, पुं, (न जायते नोत्पद्यते यः नञ् + जन् + अन्येष्वपि दृश्यते इति कर्त्तरि डः उपपदसमासः।) ("न हि जातो न जायेऽहं न जनिष्ये कदाचन।
क्षेत्रज्ञः सर्व्वभूतानां तस्मादहमजः स्मृतः" ॥
इति भारते।

"योमामजमनादिञ्च वेत्ति लोकमहेश्वरम्"।
इति भगवद्गीतायाम्।) ब्रह्मा। विष्णुः। शिवः। कामदेवः। सूर्य्यवंशीयराजविशेषः। स च रघुराजपुत्रः दशरथपिता च। मेषः। इति ज्योतिषं॥ माक्षिकधातुः। इति हेमचन्द्रः॥ जन्मरहिते वाच्यलिङ्गः। छागः। इति मेदिनी॥ तत्परीक्षा। यथा,—

"वर्णानां विभेदेन छागानान्तु गणत्रयं।
तेषां स्वभाव निर्द्दिष्टं मध्यवर्णत्रयं बली॥
ये कृष्णाः शुक्लच्छागाः पशवोऽन्ये तथैव च।
देवजातिनिवृत्त्यास्ते सर्व्वार्थोपसिद्धये॥
ये पीता हरिता वापि नरजातेस्तदीरिताः।
ये कुष्माण्ड महान्तो वा रक्षोजातेः शुभप्रदाः॥
यो मोहादथवाज्ञानादलिमन्यं प्रयच्छति।
बध एव फलं तस्य नान्यत् किञ्चित् फलं भवेत्" ॥

इति युक्तिकल्पतरुः॥

अजकर्णः, पुं, (अजस्य छागस्य कर्णवत् पत्रं यस्य सः) असनवृक्षः। इति रत्नमाला॥ यथा वैद्यके।
("अजकर्णः कटुस्निग्धः कषायोष्णो व्यपोहति।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान्" ॥)

अजकर्णकः, पुं, (अजकर्णः + स्वार्थे कः) शालवृक्षः। इति राजनिर्घण्टः॥

अजकवः, पुं, क्ली, (अजो विष्णुश्च कः ब्रह्मा च द्वन्द्वः तौ वाति शिवः त्रिपुरासुरवधे प्रीणयत्यनेन अज क + वा + करणे कः। "कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः" इत्येकाक्षरीयकोषे) शिवधनुः। इति त्रिकाण्डशेषः॥

अजकावः, पुं, क्ली, शिवधनुः। इति त्रिकाण्डशेषः॥

अजगन्धा, स्त्री, (अजस्य गन्धवत् गन्धो यस्याः सा) वनयवानी। तत्पर्य्यायः। अजमोदा २। खराश्वा ३ कारवी ४। इति रत्नमाला॥ उग्रगन्धा ५। इत्यमरः॥ वृक्षविशेषः। ववरी इति हिन्दीभाषा॥ इति मदनविनोदः॥ तिलोवि इति राजनिर्घण्टः॥ तत्पर्य्यायः। वस्तगन्धा ३ खरपुष्पा ४ अविगन्धिका ५ उग्रगन्धा ६ ब्रह्मगर्भा ७ ब्राह्मी ८ पूतिमयूरिका ९। अस्या गुणाः। कटुत्वं। उष्णत्वं। वातगुल्मोदरकर्णार्त्तिशूलनाशित्वं। मीता पेदज्ञे हिता। इति राजनिर्घण्टः॥

अजगन्धिका, स्त्री, (अजस्य गन्धः षष्ठीतत्पुरुषः तद्वत् गन्धोऽस्यास्ति अजगन्ध + मत्वर्थे ठन् ठस्येक इति ठस्य इकः) वर्व्वरीवृक्षः। इत्यमरः॥ बावरि इति भाषा।

अजगन्धिनी, स्त्री, (अजगन्धोऽस्यास्ति अजगन्ध + मत्वर्थे इन् स्त्रियां ङीप्) अजशृङ्गीवृक्षः। इति रत्नमाला॥

अजगरः, पुं, (अजं गिरति ग्रसते यः गॄ + पचाद्यच् अजस्य गरः षष्ठी तत्पुरुषः) स्थूलकायसर्पः। तत्पर्य्यायः। शयुः २ वाहसः ३। इत्यमरः॥

अजगवं, क्ली, (अजयोर्विष्णुब्रह्मणोर्गं त्रिपुरासुरवधे गीतं षष्ठी तत्पुरुषः। तादृशं गीतं वाति कम्प्राप्नोति यत् अजग + वा + कर्त्तरि क उपपदसमासः; "गश्च गीतञ्च गौश्चैव गृत्य धेनुः सरस्वती" इत्येकाक्षरीयकोषे) पिनाकः। शिवधनुः। इत्यमरः॥ तस्य रूपान्तरं। अजकवं। अजकावं। अजीकवं। अजगावं॥

अजगावं, क्ली, (अजयोर्विष्णुब्रह्मणोर्गं गीतं षष्ठी तत्पुरुषः। तादृशं गीतमवति रक्षति यत् अजग + अव + कर्म्मण्यण् उपपदसमासः) शिवधनुः। इति शब्दमाला॥

अजजीविकः, पुं, (अजः जीविका जीवनोपायो यस्य सः) अजाजीवी। छागपालकः। तत्पर्य्यायः। जावालः २। इति हेमचन्द्रः॥

अजटा, स्त्री, (नास्ति जटा यस्याः सा) भूम्यामलकी। इति राजनिर्घण्टः॥ तस्या रूपान्तरं। अजड़ा। अज्झटा॥

अजड़ा, स्त्री, (अजड़ां जाड्याभावं सम्पादयति या अजड़ा + करोत्यर्थे णिच् ततः पचाद्यच्) कपिकच्छुः। आलकुशी इति भाषा॥ इति राजनिर्घण्टः॥

अजन्या, स्त्री, (अजानां समूहः अज + यत् स्त्रियां टाप् अजसमूहः। तद्भक्षणाकरत्वात्) स्वर्णयूथिका। इति दीक्षिताः॥

अजदण्डी, स्त्री, (अजस्य ब्रह्मणो यज्ञार्थ दण्डः काष्ठमस्याः सा स्त्रियां ङीप्। ब्रह्मदण्डीवृक्षकाष्ठेन यज्ञविधानात्) ब्रह्मदण्डीवृक्षः इति राजनिर्घण्टः॥

अजनकः, त्रि, (न जनकः नोत्पादकः नञ्समासः। जनयति जन् + णिच् ण्वुल्) अनुत्पादकः। अजन्मदः। असृष्टा। अकारकः॥

अजननिः, पुं, (न + जन् + आक्रोशे नञ्यनिरिति सूत्रेण निन्दायां भावे अनिः। तस्याजननिरेवास्तु जननीक्लेशकारिण इति प्रसिद्धप्रयोगोऽप्यस्ति) जन्मराहित्यं। उत्पत्त्यभावः। अकरणिः। शापः। यथा। अजननिरस्तु तस्य। इत्यमरटीकायां रायमुकुटः॥

अजन्यं, क्ली, (न जन्यते सम्पाद्यते केनापि न + जन् णिच् यत्) उत्पातः। शुभाशुभसूचकभूकम्पादिः। इत्यमरः॥ अजननीये त्रि॥

अजपः, पुं, (असत्कर्म्म जपति पठति यः। जप् + पचाद्यच् न जपः नञ्समासः।) असदध्येता। कुपाठकः। इति हेमचन्द्रः॥ (अजं पाति रक्षति यः + अज + पा + कर्त्तरि क उपपदसमासः) छागपालकः।
यथा,—

"ओयधीं [illegible] ना वने"।
इति [illegible]॥

अजपा, स्त्री, (न [illegible]

...मोदीं मोदामस्ति अस्याः ... अद् + ... स्त्रियां टाप् ... समुन्नताः ।) ...दयमन्त्र । यथा,—

[illegible]

...कत्री पम् धीमि दुर्गा ... ॥"

...शेषाद्धैकौ ... मूर्त्ति । यथा,—

[illegible]

हस्तिकारवी ७ ब्रह्मपर्णिका ८ मायूरी ९ वि-
त्तिमोदा १० मोदाढ्या ११ वह्निदीपिका १२
ब्रह्मकोषी १३ शिखाली १४ हस्तिमयूरा १५ उग्र-
गन्धिका १६ मोदिनी १७ ... १८ वि-
... १९ । अस्या गुणाः । कटुत्वं । उष्णत्वं ।
रूक्षत्वं । वह्निकारित्वं । कफवातशूलाध्मानारुचि-
जठरामयनाशित्वञ्च । इति राजनिर्घण्टः ॥ य-
मानी । यथा,—

"अजमोदा खराह्वा च मयूरो दीप्यकस्तथा ।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तकः ॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत् ।
उष्णा विदाहिनी हृद्या वृष्या बलकरी लघुः ॥
नेत्रामयकृमिच्छर्द्दिहिक्कावस्तिरुजो हरेत्" ॥
यद्य ... ।
"अजमोदयवानी तु ... ।
... ॥"
इति भावप्रकाशः ॥

अजमोदिका, स्त्री, (अजं मोदयति हर्षयति या ।
मुद् + णिच् ... स्त्रियां टाप् । अजस्य मोदिका
...) यमानी । इति वैद्यकं ।

अजम्भ, पुं, (न जम्भः ... यस्य सः) (सूर्य्ये
...) भेक । इति ... । न जम्भ
... ॥

अजय, पुं, (न + जि + अच् न अः समासः ।)
पराजयः । यथा,—
"... ॥"
इति ... ॥

अजया, स्त्री, (न जीयते ... स्त्रियां टाप् न अः समासः
...) ... इति ख्याता । इति
निर्घण्टः ॥

अजर्य्यं, त्रि, (... न + जॄ + ... "अजर्य्यं सङ्गतम्"
... इति ... समासः) ...
... इति मुग्धबोधव्याकरणं ॥ ...
...

अजर, त्रि, (... ।
...
... । यथा,—
...
इति ... ॥

अजरा, स्त्री, ...
...
... । इति राजनि...

अजर्य्यं, क्ली, ...
...
... ॥

अजवस्ति, पुं, ...
...
इति ... ॥

अजशृङ्गी, ...

दस्य स) वृक्षविशेष । गुड़ाजमिया । ...
हिन्दी इति च भाषा । तत्पर्यायः । ...
वेरी ३ महाकसा ४ अजपर्णी ५ । इति र...
माला ।

अजशृङ्गी, स्त्री, (अजस्य छागस्य शृङ्गमिव ...
दस्या सा स्त्रियां ङीप्) वृक्षविशेषः । ...
ड़ाशिङ्गी मेढ़ाशिङ्गी । इति ख्याता । त...
र्य्याय । विषाणी २ । इत्यमरः । विषाणिका ...
चक्षुष्या ४ अजनाशिनी ५ मौर्वी ६ मे...
षश्री ७ आवर्तिनी ८ । इति रत्नमाला । ...
मेषशृङ्गी ९ वर्तिका १० सर्पदंष्ट्रिका ११ चक्षुष्या ...
तिक्तदुग्धा १३ पुत्रशृङ्गी १४ कर्कटिका १५ । ...
गुणाः । कटुत्वं तिक्तत्वं । कफार्शःशूलशोथका...
श्वासविषशोषकासकुष्ठनाशित्वं । चक्षुर्हित...
त्वञ्च । तत्फलस्य गुणाः । तिक्तत्वं । उष्ण...
कटुत्वं कफवातनाशित्वं । जठरानलदीपका...
रुच्यत्वं । ... । इति राजनिर्घण्टः ॥
(यथा सुश्रुते,—
"अजशृङ्ग्यारग्वधश्च ... ।
... ॥"

अजसं, क्ली, (न + जस + ...) निरन्तरं । सततं । इत्यम...
(यथा रघुवंशे, "अजस्रदीक्षाप्रयतस्य मद्गु...
... ।)
..., स्त्री, ... अजस् ...

ण्डितश्च इति गुणः ततः पदाद्यम् नञ्समासः ।) अज्ञानवृक्षः । इति शब्दरत्नावली । आगन्तुकः । दृढे त्रि ।

…जी, स्त्री, (अजेन वीयते अप्युल्कटगन्धतया ज्ञायतेऽसौ अज् + इन् अजादिभ्यश्च इति कर्मणि …त् । अजेन आजिः तृतीया तत् । स्त्रियां …डीप्) श्वेतजीरकः । कृष्णजीरकः । शाखोट्वृक्षः । इति राजनिर्घण्टः ॥

…जीवः, पुं, (अजेन अजक्रयादिना आजीवति अन्यत् प्राणान् धारयति यः, आ + जीव + पचाद्यच् अजेन आजीवः तृतीयातत्पुरुषः) जाबालः । …अजोपजीवी । इत्यमरः ॥

…जातः, त्रि, (जन् + कर्त्तरि क्तः न जातः नञ्समासः ।) अजन्मविशिष्टः । अनुत्पन्नः । यथा, अजातपक्षा इव मातरं खगाः । इति श्रीभागवतं ॥ (यथा दायभागे,—

"ये जाता येऽप्यजाता वा ये च गर्भे व्यवस्थिताः । वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः" ॥)

…जातशत्रुः, पुं, (अजातः सर्व्वप्रियत्वात् अनुत्पन्नः शत्रुर्यस्य सः) राजा युधिष्ठिरः । इति हेमचन्द्रः ॥ (यथा महाभारते,—

"अजातशत्रुमासाद्य कुन्ती वचनमब्रवीत्" ।)

(शिवः । काशीपुत्रः । शमीकपुत्रः ।)(यथा हरिवंशे,

"श्यामपुत्रः शमीकस्तु शमीको राज्यमावहत् । जुगुप्समानो भोजत्वाद्राजसूयमवाप सः । अजातशत्रुः शत्रूणां जज्ञे तस्य विनाशनः" ॥)

(विम्बिसारपुत्रः स च बुद्धमुनिसमकालीनः ॥)

…जातारिः, पुं, (अजातः सर्व्वप्रियत्वात् अनुत्पन्नः अरिः शत्रुर्यस्य सः) राजा युधिष्ठिरः । इति भूरिप्रयोगः ॥

…जातौल्वलिः, पुं, (अजया उपजीवी तौल्वलिः मुनिविशेषः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च । तुल्वलस्यापत्यं तुल्वल + अत इञिति इञ्) अजोपजीविमुनिविशेषः । इति मध्यपदलोपिकर्म्मधारयसमासे सुपद्मव्याकरणं ॥ तुल्वलस्यापत्यं तौल्वलिः अजोपजीवी चासौ तौल्वलिश्चेति । इति तट्टीका ॥

…जादनी, स्त्री, (अजेन छागेनाद्यते भक्ष्यतेऽसौ अद् + कर्म्मणि ल्युट् स्त्रियां ङीप् अजस्य अदनी खाद्या षष्ठीतत्पुरुषः) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

अजानेयः, पुं, (अजवत् शिवरूपवत् पदास्थानमारोहिणं नयति प्रापयति । आ + नी + बाहुलकात् यत् ...) ... कर्त्तरि यत् । अजन्यागे हरिब्रह्मधातुकामदरे इति मेदिनी) उत्तमघोटकः । तत्पर्य्यायः । हयोत्तमः २ वाताश्वः ३ । इति त्रिकाण्डशेषः ॥ अजानेयः ४ कुलीनः ५ । इत्यमरः ॥ निर्भये त्रि । इति त्रिकाण्डशेषः ॥

अजान्त्री, स्त्री, (अजस्य अन्त्रमिव देहबन्धनमिव अन्त्रं तदाकारमञ्जरी यस्याः सा गिरिगौरादिभ्यश्च इति ङीष्) वृक्षविशेषः । नीलवर्णवीना इति भाषा तत्पर्य्यायः । नीलबुह्ना २ नीलपुष्पी ३ अतिलोमशा ४ नीलिनी ५ कृष्णाजी ६ अस्फोटपुष्पी ७ । इति रत्नमाला ॥ वस्त्रान्त्री । रञ्जनकः । इति राजनिर्घण्टः ॥

अजापालकः, त्रि, (अजानां पालकः रक्षकः षष्ठीतत्पुरुषः) अजाजीवी । छागरक्षकः । इति शब्दरत्नावली ॥

अजितं, त्रि, (न जितं न पराजितं नञ्समासः । जि + कर्म्मणि क्तः) अविजितं । इति हेमचन्द्रः ॥ अतिपराजितञ्च ॥

अजितः, पुं, (न जितः न केनापि पराजित एवार्थः । "मेधाः शार्ङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युत" इति सहस्रनाम पर्य्याये ।) विष्णुः । बुद्धः । तीर्थङ्करजिनविशेषः । इति हेमचन्द्रः ॥ शिवः । इति तस्य सहस्रनाममध्ये पठितः ॥

अजिनं, स्त्री, (अजति धूल्यादि आक्षिपतीति यत् अज् + कर्त्तरि इनन् बाहुल्यात् अजेर्व्यघञपोरिति वी इति नवी आदेशः) (अजाजिनं शोणितबिन्दुवर्षि चेति कुमारसम्भवे) चर्म्म । कृष्णसाराद्यादिचर्मत्वसाधारणमिदं । इत्यमरः ॥ जिनभिन्ने वाच्यलिङ्गं ।

अजिनपत्रा, स्त्री, (अजिनं चर्म्म पत्रं पक्षो यस्याः सा) चर्म्मचटिका । चामचिका इति ख्याता । तत्पर्य्यायः । जतुका २ । इत्यमरः ॥ जतूका ३ । इति तट्टीका ।

अजिनपत्री, स्त्री, (अजिनं चर्म्म पत्रं यस्याः सा गौरादित्वात् ङीष्) जतुका । इति राजनिर्घण्टः ॥

अजिनयोनिः, पुं, (अजिनानां चर्म्मणां योनिः आकरः षष्ठीतत्पुरुषः । योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे इति मेदिनी) हरिणः । इत्यमरः ॥

अजिरं, क्ली, (अजति स्वच्छन्दं सञ्चरति यत्र अज + अधिकरणे किरच् । उठान इति भाषा । अजति गच्छति यः इति वायुः । अजति गच्छति स्वयमङ्कुरमिति यावत् इति शरीरं । अजन्ति इन्द्रियाणि गच्छन्त्यत्र इति बुत्पत्त्या विषयः ।) चत्वरं । (यथा विष्णुपुराणे,—

"पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे" ।)

वायुः । शरीरं । मण्डूकः । विषयः । इति मेदिनी ॥

अजिह्मं, त्रि, (जिहि वक्रतायां जिहि + मक् न जिह्मं नञ्समासः) अवक्रं । सरलं । इत्यमरः ॥ भेके पुं । इति शब्दरत्नावली ॥ (यथा मनुः,—

"अजिह्मामशठां शुद्धां जीवेत् ब्राह्मणजीविकां" ।)

अजिह्मगः, पुं, (अजिह्मं सरलं गच्छति यः अजिह्म + गम् + डः उपपदसमासः) बाणः । इत्यमरः ॥ अवक्रगे वाच्यलिङ्गः ॥ (यथा रामायणे,—

"ते तस्य कायं निर्भिद्य रक्तदिग्धा अजिह्मगाः । निष्पेतुर्मेदिनीं भित्त्वा रक्ता इव महोरगाः ॥ न छागिदं तयोर्गात्रे बभूवाङ्गुलमन्तरं । नानिर्भिन्नं न चाध्वस्तमपि सूक्ष्ममजिह्मगैः" ॥)

अजिह्वः, पुं, (नास्ति जिह्वा यस्य सः) भेकः । इति त्रिकाण्डशेषः ॥ जिह्वारहिते त्रि ॥

अजीर्णं, क्ली,(जॄ + क्तः, न जीर्णं नञ्समासः) अपाकः । तत्पर्य्यायः । वायुगण्डः २ आनाहः ३ अध्मानः ४ । इति त्रिकाण्डशेषः ॥ अथाजीर्णस्य विप्रकृष्टं निदानमाह । अत्यम्बुपानाद्विषमाशनाच्च सन्धारणात् स्वप्नविपर्य्ययाच्च । कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य ॥ सन्धारणात् वेगावरोधात् मूत्रपुरीषादीनां । स्वप्नविपर्य्ययात् दिवास्वपनाद्रात्रौ जागरणात् । लघु चापीत्यपिशब्दात् स्निग्धोष्णादिगुणयुक्तमपि ॥ * ॥ अन्यच्च ।

"ईर्ष्याभयक्रोधपरिप्लुतेन
लुब्धेन शुग्दैन्यनिपीड़ितेन ।
प्रद्वेषयुक्तेन च सेव्यमान-
मन्नं न सम्यक् परिपाकमेति" ॥

परिप्लुतेन व्याप्तेन । उक्तकारणेभ्योऽतिमात्रभोजनं विशेषादजीर्णस्य कारणमजीर्णञ्च बहुव्याधीनां कारणमित्याह ।

"अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः । रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि" ॥

अनात्मवन्तः अजितेन्द्रियाः । रोगानीकस्य विकारादेः । मूलं कारणं ॥ * ॥ अन्यच्च ।

"प्रायेणाहारवैषम्यादजीर्णं जायते नृणां । तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति" ॥

तद्विनाशाद्विनश्यति अजीर्णविनाशात् विनश्यति रोगसंघात इत्यर्थः । यदा तत् अजीर्णं यात्यात् भक्षणात् विना भक्ष्याभावे विनश्यति निवर्त्तते इत्यर्थः ॥ * ॥ अजीर्णस्य सामान्यस्य लक्षणमाह ।

"ग्लानिर्गौरवमाटोपो भ्रमो मारुतमूढ़ता । विबन्धोऽतिप्रवृत्तिर्वा सामान्याजीर्णलक्षणं" ॥

मारुतमूढ़ता वायोरवरोधः । विबन्धः मलाप्रवृत्तिः ॥ * ॥ सन्निपातकारणैः षड्विधाजीर्णस्य भेदानाह ।

"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः" ।

त्रिभिरित्येकशो न तु मिलितैः ।

"अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः" ॥

केचित् सुश्रुतादयः ॥ रसशेषतः भुक्तस्य पक्वस्य सारभूतो यो द्रवः स रसः सोऽपि पच्यते । भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्वः स रसशेषः तस्मात् चतुर्थमजीर्णं रसाजीर्णं ॥ * ॥ तन्वामाजीर्णाद्रसशेषस्य को भेद उच्यते । आमं मधुरत्वागतमपक्वं अन्नमेव । रसशेषस्तु भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्व इति भेदः ।

अजीर्णं पञ्चमं केचित् निर्दोषं दिनपाकि च । निर्दोषं गौरवमलमूत्रादिदोषाजनकं । दिनपाकि च आहारोऽहोरात्रेण पाकं यातीति स्वभावः । यत्तु मात्राकालाद्यादिदोषाद्दिनान्तरे पाकं याति तद्दिनपाकि । अतएव यामद्वये न भोक्तव्यमिति वचनं,—

वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरं" ।

प्राकृतं अविकारकं । प्रतिवासरं प्रतिदिनभावि । भुक्तं यावदजीर्णं तावदजीर्णमित्युच्यते । एतदभिधानस्य प्रयोजनं मात्रार्थं यामयामार्द्धमध्ये-

प्रियप्रस्वादिभेदनादिकं। न चामाहारस्य निषेधः। प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यतीति वचनेन सायमाशस्यावश्यं कर्त्तव्यत्वात् ॥*॥ आमाजीर्णस्य लक्षणमाह,—

"तत्रामे गुरुतोत्क्लेशः शोथो गण्डाक्षिकूटगः।
उद्गारश्च यथाभुक्तमविदग्धः प्रवर्त्तते"॥

गुरुता उदराद्ययोः। उत्क्लेशः उपस्थितं वमनमिव। अक्षिकूटोऽक्षिपुटकः। अविदग्धः अनम्लो निर्गन्धश्च ॥*॥ विदग्धाजीर्णस्य लक्षणमाह,—

"विदग्धे भ्रमतृण्मूर्च्छाःपित्ताच्च विविधा रुजः।
उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते"॥

विविधा रुजः शोषचोषदाहादयः ॥*॥ विष्टब्धाजीर्णस्य लक्षणमाह,—

"विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः।
मलवातप्रवृत्तिश्च स्तम्भो मोहोऽङ्गपीड़नं"॥

वातवेदनाः तोदभेदादयः। स्तम्भो गात्राणां। मोहो मूर्च्छा ॥*॥ रसशेषाजीर्णस्य लक्षणमाह,

"रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे" ॥*॥

एतस्य उपद्रवानाह,—

"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः।
उपद्रवा भवन्त्येते मृतिश्च रसशेषेन."॥*॥

अतिशयितेभ्यः आमादजीर्णेभ्यो विसूच्यादिरोगानाह,—

"आमं विदग्धं विष्टब्धमित्यजीर्णं यदीरितं।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका"॥

नाम दण्डालसकं गुदा विष्टब्धादिलम्बिका भवितु मर्हति। सा च कफवाताभ्यां भवतीत्येके कतोऽजीर्णादिसूच्यादिप्रदोत्पत्तिः ॥*॥ विसूच्यादिनिरुक्तिमाह,—

"सूचीभिरिव गात्राणि तुदन्संतिष्ठतेऽनिलः।
यस्याजीर्णेन सा वैद्यैर्विसूचीति निगद्यते"॥*॥

विसूच्या निदानमाह,—

"न तां परिमिताहारा लभन्ते विदितागमाः।
मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः"॥

विदितागमाः शास्त्रदर्शिनः ॥*॥ विसूच्या लक्षणमाह,—

"मूर्च्छातिसारौ वमथुः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः"॥

...नं कृष्णपादादेः। शिरसो भेदः शिरःशूलं॥

...स्या उपद्रवानाह,—

...निद्राऽरति कम्पो मूत्राघातो विसंज्ञता।
...अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः"॥

...अरतिः घोरा भयानका ...
...पञ्च दारुणा विसूच्या ...
...दारुणा उपद्रवाः ॥*॥ अलसक-

...,—

...ष्टेऽसमर्थे दृश्येते परिपूर्णम्।
...कफवात गुदावर्त्तं ...
...चेतौ च ...

तस्मात्सकमाषष्टे ह्याध्मानोद्गारौ च यस्य तु"॥

आनह्यते आध्मायते। प्रताम्येत् ग्लायति। परिकूजति आर्त्तनादं करोति। कुक्षौ अजीर्णेन निरुद्धो मारुतः उपरि धावति हृदयकण्ठादिकं गच्छतीत्यर्थः। काश्यपस्त्वाह,—

"नाधो याति न चाप्यूर्द्ध्वमाहारो न च पच्यते।
कोष्ठे स्थितोऽलसीभूतस्ततोऽसावलसः स्मृतः"॥

विसूच्यलसयोररिष्टमाह,—

"यः श्यावदन्तौष्ठनखोऽल्पसंज्ञः
छर्द्यर्द्दितोऽभ्यन्तरयातनेत्रः।
क्षामस्वरः सर्व्वविमुक्तसन्धि-
र्यायान्नरः सोऽपुनरागमाय"॥

सर्व्वविमुक्तसन्धिः सर्व्वे विमुक्ताः शिथिलीभूताः सन्धयो यस्य सः ॥*॥ विलम्बिकाया लक्षणमाह,—

"दुष्टञ्च भुक्तं कफमारुताभ्यां
प्रवर्त्तते नोर्द्ध्वमधश्च यत्र।
विलम्बिका तां भृशदुश्चिकित्स्या-
माचक्षते शास्त्रविदः पुराणाः"॥

भृशदुश्चिकित्स्यां प्रत्याख्यायोपचरणीयम्। असाध्येति जेज्जटः ॥*॥ जीर्णस्याहारस्य लक्षणमाह,—

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गौ यथोचितं।
लघुता क्षुत्पिपासे च जीर्णाहारस्य लक्षणं"॥*॥

अथ चिकित्सा,—

"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन वा।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी॥
गुडेन शुण्ठीमथवोपकुल्यां
पथ्यां तृतीयामथ दाडिमं वा।
आमेष्वजीर्णेषु गुदामयेषु
वर्च्चौविबन्धेषु च नित्यमद्यात्॥
क्षोदं दन्ती त्रिवृच्चित्रं छायामूलं विचूर्णितं।
मधुमं गुड़संमिश्रं भक्षयेत् प्रातरुत्थितः॥
एतद्गुड़ाष्टकं नाम बलवर्णाग्निवर्द्धनं।
शोथोदरार्शःशूलघ्नं प्लीहपाण्ड्वामयापहं॥

सर्व्वचूर्णसमो गुडो देयः। केचित्तु द्विगुणं गुडं दत्त्वा गुटिका कुर्व्वन्ति। टैचकोऽयं योगः। गुड़ाष्टकम् ॥*॥ दहनाजमोदसैन्धवनागरमरिचानि चाक्षमात्रेण। समाहारमिकारं पाचनं परमं। दौषधमिदमथाहार्थे,—

"तत्रामे वमनं कार्य्यं विदग्धे लङ्घनं हितं।
विष्टब्धे स्वेदनं शस्तं रसशेषे शयीत च॥

वचा लवणतोयेन वान्तिरामे प्रशस्यते।
धान्यसिन्धुकषायं वा पीत्वा शिशिरं भवेत्॥

...सितमाषं। वचा कर्षार्द्धमिता। सैन्धवं कर्षार्द्धमितं। दशोष्णमुद्गतेन जलेन पीतेन।

"ककादिसङ्गं वा पीत्वा वान्तिरामे प्रशस्यते"

दशनेनाद्यदः ॥*॥

"धान्यनागरसिद्धं वा तोयं दद्याद्विचक्षणः।
आमाजीर्णप्रशमनं शूलघ्नं बस्तिशोधनं॥
भवेद् यदि तु गाढ़जीर्णता
तदाम्लः नागरसैन्धवाभ्यां।

अजीर्णं

विचूर्णितां शीतजलेन युक्ता ...
भुक्तप्रमध्ये मितमन्नकाले॥
विरच्यते यस्य तु भुक्तमात्रं
दंदह्यते हृच्च गलश्च यस्य।
माद्यां सिताभाक्षिकसम्प्रयुक्तां
निद्राभयां चातिसुखं लभेत॥
त्रिकटुकमजमोदा सैन्धवं जीरके ...
समधरणधृतानामष्टमो हिङ्गुभागः ...
प्रथमकवलभुक्तं सर्पिषा चूर्णमेत-
ज्जनयति जठरेऽग्निं वातरोगांश्च हन्ति ...

अजमोदात्र यवानी। अन्तःसंभाक्षान्ते ... एके द्वे शुक्लं कृष्णञ्च। धरणमत्र मा... समधरणं एतासां तुल्यमानं गृहीतानां ... दीनां भागाः सप्त। तत्राष्टमो भागो हिङ्गु...
हिङ्ग्वष्टकम् ॥*॥

"शुद्धं सूतं गन्धकञ्च पलमानं पृथक् पृथक्।
हरीतकी च द्विपला नागरस्त्रिपलः स्मृतः॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतं।
चतुष्पला च विजया मर्द्दयेन्निम्बुकद्रवैः॥
पुटानि सप्त देयानि घर्म्ममध्ये पुनः पुनः।
अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः॥
भक्षयेद्विगुणं भक्ष्यं पाचयेद्रेचयेदपि।

अजीर्णारिः ॥*॥

"द्वौ क्षारौ चित्रकं पाठा करञ्जं लवणानि च।
सूक्ष्मैलापत्रकं भार्गी क्रिमिघ्नं हिङ्गु पौष्करं॥
शटी दार्व्वी त्रिवृन्मुस्तं वचा चेन्द्रयवास्तदा।
धात्रीजीरकं वृक्षाम्लं श्रेयसी चोपकुञ्चिका॥
अम्लवेतसमम्लीका यवानी देवदारु च।
अभयातिविषा श्यामा हपुषारग्वधं समं॥
तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः।
क्षाराणि लौहकिट्टञ्च तप्तं गोमूत्रसेचितं॥
समभागानि ...तु सम्भागानि कारयेत्।
मातुलुङ्गरसेनैतद्भावयेद्दिवसत्रयं॥
दिनत्रयन्तु शुक्तेन तथार्द्रकरसेन च।
अग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभं॥
उपयुक्तं विधानेन नाशयत्यचिराद्ध्रुवम्।
अजीर्णमथ गुल्मांश्च प्लीहानं गुदजानि च॥
उदराण्यन्त्रवृद्धिञ्च अष्ठीलां वातशोणितं।
प्रणुदत्युल्बणान्दोषानमग्निं प्रदीपयेत्"॥

द्वौ क्षारौ सर्ज्जिका यवक्षारश्च। वृक्षाम्लं विषाम्लिष इति लोके। लवणानि पञ्च ... तकी। उपकुञ्चिका मगरैला। श्रेयसी हस्तिपिप्पली। अम्लवेतसः ... शुकं दातव्यं। श्यामा सागर। मुष्कक मोखा इति लोके। कोकिलाक्षः कोइलमा इति लोके। वह्निमुखचूर्णं ॥*॥

"चन्द्रसेनरसादग्धः सप्तवर्षं।
तिलापामार्गकदलीपलाशं तिन्तिडी तदा॥
गृहीत्वा भस्मदेतत् प्रथमं भस्मासितश्च तत्।
अष्टाढके जलमध्ये यावत् पादावशेषितम्॥
सम्यक् विनिस्राव्य शुक्लमम्लसंयुतं।
पचेत् निर्धूमलतिकं सूक्ष्मपूर्व्वोक्तं द्रवः॥
यवानीजीरकद्वयोषसूक्ष्मजीरकहिङ्गुभिः।

अजीर्णं

एवमङ्गैर्पनेदैमिधूर्मितैमत् विनिक्षिपेत् ।
आर्द्रकस्य रसेनापि भावयेच्चोपयेत् पुनः ।
शीतोदकेन मङ्गं पिबेत् प्रातर्दिने मानवः ।
तस्मिन् जीर्णेऽमलनोदादुदर्भागे ततः रसैः ।
मैदर्षैः मन्दर्षैः मुनिनोर्द्वैर्विदीपनैः ।
रक्तमाक्षिर्किर्दर्डैन वन्मारोठनेन च ।
तथाजुमदं प्रातं हि तथं वा भोजनं हितं ।
मन्दाग्न्यौर्विकारेषु वालदेहामयेषु च ।
[illegible] ।
कार्श्यं प्रदं नाशाय [illegible] ।
[illegible] । ६ ।
“[illegible] बुधैः ।
[illegible] ।
पिप्पली पिप्पलीमूलं पथ्यं [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible]

अजीर्णं

मिगतात्प्रदेवोडे जायते नात्र संशयः ।
ज्वालामुखोचूर्णं । ८ । अथ अजीर्णे रसाः,—
“हिङ्गुलं गन्धकं शुद्धं पलैकैकञ्च पारदं ।
स्वर्णं लौहं तथा ताम्रं वर्णदर्भितं पृथक् ।
संचूर्ण्य सर्वं सम्मिश्र्य भावयित्वाभिदोषतः ।
मन्दागुरुं मसनं तत्पाककुम्भे क्षिपेत् ।
पुनः संचूर्ण्य तत्सर्वं लौहपात्रे निधाय च ।
जम्बीरस्य रसं तत्र घृतं पश्चात् क्षिपेत् ।
चुल्ल्यां निवेश्य तत्पश्चात् मृदुना वह्निना पचेत् ।
रसे तस्मिन् द्रवीभूते तत्सर्वं विमर्दयेत् ।
पञ्चकोलकषायेन मुण्डी गर्दिकाच्च च ।
भावनाह्रय शाल्मल्याः पृथक् कर्त्तव्या बुधैः ।
[illegible] मधु मेलयेत् ।
[illegible] त्रिभ्रेन च ।
भावयेत् [illegible] च ।
ततः संशोध्य संपिष्य कूपीमध्ये निधापयेत् ।
रसः प्रवालमात्रं [illegible] ।
[illegible] ।
महादेवेन [illegible] ।
[illegible] पश्चात् पिबेत् [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible]

अजीर्णं

[illegible] पाचयेदेषदेदपि ।
अजीर्णारिः । ० ।
“[illegible]
[illegible] निर्मितं ।
तत्र ज्ञातिमनस्कमानिकं
तिन्तिडीरसतोय मर्दितं ।
वह्निमान्द्यकरनाशकारको
[illegible] इति विश्रुतो रसः ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible] ।
[illegible] ।
[illegible]

सत्वरमजीर्णसंस्थाने वक्रेद्धी कपाध्मये" ।
अजीर्णकण्टको रसः ॥ ॰ ॥
"जलपीतमपामार्गमूलं हन्याद्विसूचिकां ।
सतैलं कारवेल्लाम्बु विधुनोति विसूचिकां ॥
बालमूलस्य निःक्वाथः पिप्पलीचूर्णसंयुतः ।
विसूचीनाशनः श्रेष्ठो जठराग्निविवर्द्धनः ॥
विश्वनागरनिःक्वाथो हन्याच्छर्द्दिविसूचिकां ।
विश्वनागरकैडर्य्यक्वाथस्तदधिको गुणैः" ॥
कैडर्य्यं कट्फलम्,—
"योषं करञ्जस्य फलं हरिद्रे
मूलं समासाद्य च मातुलुङ्ग्याः ।
छायाविशुष्का गुटिकाः कृतास्ता
हन्युर्विसूचीं नयनाञ्जनेन" ॥
मातुलुङ्गी मधुकर्कटी । अनुभूतमिदम्,—
"अपामार्गस्य पत्राणि मरिचानि समानि च ।
अन्नस्य लालया पिष्टान्यञ्जनाद् घ्नन्ति सूचिकां ॥
विसूच्यामतिवृद्धायां तक्रं दधिसमं जलं ।
नारिकेलाम्बु पेयं वा प्राणनाशाय योजयेत् ॥
लकुचनरायागुरुशिग्रुकुष्ठै-
रम्लप्रपिष्टैः सवचाग्रताक्षैः ।
उद्वर्त्तनं शस्तविसूचिकायां
तैलं विपक्वं च तदर्थकारि" ॥
लकुतैलम् ॥ ॰ ॥
"कुष्ठसैन्धवयोः कल्कं चुक्रं तैलं तु तत्समं ।
विसूच्यां मर्द्दनं तेन खल्लीशूलनिवारणम्" ॥
कुष्ठतैलम् ॥ ॰ ॥
"पिपासायां लवङ्गस्य जातीफलस्य वा शीतं शृतं भद्रघनस्य वा ॥ ॰ ॥
उत्क्लेशलक्षणम्,—
"उत्क्लिष्टान्नं न निर्गच्छेत् प्रसेकष्ठीवनेरितं ।
हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेदिति ।
सक्षाराम्लमुदरमसृदिष्टैः प्रलेपयेत् ।
दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः" ॥
हैमवती श्वेतवचा । दारुषट्कम् ॥ ॰ ॥
"तक्रेण युक्तं यवचूर्णमुष्णं
सक्षारमार्त्तिं जठरे निहन्यात्
स्वेदो घटैर्वा बहुवाष्पपूर्णै-
रुष्णैस्तथान्यैरपि पाणितापैः ॥
...विस्तारलक्षणम्...
...तेषाञ्च एतत् नेह चिकित्सितम् ॥
...
...
...
...
...
...
...

"फलं पनसपाकाय फलं कदलसम्भवं ।
कदलस्य तु पाकाय बुधैरभिहितं घृतं ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ।
नारिकेलफलतालवीजयोः
पाचकं समदि तण्डुलं विदुः ।
क्षीरमाशु सहकारपाचनं
चारमञ्जनि हरीतकी हिता ॥
मधूकमालूरकपादपानां
परूषखर्ज्जूरकपित्थकानां ।
पाकाय पेयं पिचुमर्द्दवीजं
घृतेऽपि तक्रेऽपि तदेव देयं ॥
खर्ज्जूरशृङ्गाटकयोः प्रशस्तं
विश्वौषधं मुस्त च भद्रमुस्तं ।
यष्ट्याह्वकेषिदुफलेषु शीतं
प्रोक्ते तथा वाह्युचितं प्रणीतं ॥
तण्डुलेषु पयसः पयो हितं
दीप्यकन्तु चिपिटे कषायितं ।
मण्डिका दधिजलेन जीर्य्यते
कर्कटी च समनेषु जीर्य्यते" ॥
समनेषु गोधूमेषु । जीर्य्यते कथ्यते ।
"गोधूममाषहरिमन्थसतीलमुद्ग-
पाको भवेत् झटिति मातुलपुत्रकेण ।
खण्डश्च खण्डयति माषभवं तज्जीर्णं
तैलं कुलत्थमथवा विदधाति जीर्णं" ॥
मातुलपुत्रकः धत्तूरफलं ।—
"कङ्गुश्यामाककोद्रवाः कुलत्थश्चाविलम्बितं ।
दभ्रौ जलेन जीर्य्यन्ति वैदला काञ्जिकेन तु ॥
पिष्टान्नं शीतलं वारि छत्वरान् सैन्धवं पचेत् ।
माषेण्डरी निम्बमूलं पायसं मुद्गयूषकैः" ॥
वटोरिभ्रवाराहवकेन फेणीपमं पर्पटः शिग्रुवीजेन
याति । कण्टकमूलतो लड्डुकापूपभट्टाविपाको
भवेच्छ्युली मण्डयोश्च ॥ वेशवारः वेगर इति
लोके । तद् यथा ।—
"स्वेदो निशाहिङ्गुलवङ्गकैला-
धान्याकजीरार्द्रकनागराणि ।
अम्लोषधं सैन्धवचूर्णमन्ने
यदोचितं मांसरवे प्रणीतम्" ॥ इति ॥
भट्टा भट्टकः पानकविशेषः । मण्डः माण्डे
इति लोके ।—
"चिमन्न चिनं बहुमत्स्यमांस
भोज्ये हवी काञ्जिकपानतः स्यात् ।
इक्ष्वक्षतं केवलशृङ्गिमत्स्य-
मांसेन मत्स्यः परिपाकमेति ॥
आममांसयणं मीने तक्रीमं पिष्टिते हितं ।
शूकमांसं दशनात्कवोष्णं पाकमुपैति हि ॥
कपोतपारावतलावकादि
वर्त्तिपक्षिणां पिष्टितानि भुक्त्वा ।
काकस्य मूलं परिपीय पिष्टं
हस्ती मनोज्ञा बहुदो हि दृष्टं ॥
करीरो ग्रहकः मादृः ।
"हारादि कर्मोक्तदि यानि
मार्गे सदैव सदर्थिम्नकालेन ।

मधूकसिद्धार्थकनालुका...
गायत्रिसारकथितेन पा...
मधूकं पेपुड इति लोके । गाय...
"पलाण्डुकाकेमुककारवेल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानां ।
उपोदिकालाबुपटोलकानां
सिद्धार्थको मेघरवस्य पक्वा"...
मेघरवः चवराई इति लोके ।—
"विपच्यते शूरणकं गुडेन
तथालुकं तण्डुलतोदकेन ।
पिण्डालुकं जीर्य्यति कोरदूषात्
कसेरुपाकः किल नागरेण ॥
लवणस्तण्डुलतोयात् सर्पिर्जम्बीरकाद्यसात्...
मरिचादपि तच्छीघ्रं पाकं यात्येव काञ्जिके...
क्षीरं जीर्य्यति तक्रेन तद्वत् कोष्णमणकाञ्जि...
माहिषं माषिमन्थेन शङ्खचूर्णेन तद्दधि" ॥
मण्डकः माण्डे इति लोके,—
"रसाला जीर्य्यति क्षीरात् खण्डं नागरचूर्ण...
सिता नागरमुस्तेन तथेक्षुविकारकाः—
जरामिरागैरिकचन्दनाभ्या-
मभेति शीघ्रं मुनिभिः प्रणीतं ।
उष्णेन शीतं शिशिरेण चोष्णं
जीर्णं भवेत् चारगवत्सपाने" ॥
इरा मदिरा ।
"तप्तं तप्तं हेम वा तारमन्तौ
तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।
पीतान्जीर्णं तोयजातं निहन्या-
तत्र क्षौद्रं मद्यजं विशेषात्" ॥
तत्र तोयाजीर्णे । इति जठराग्निविका...
विसूचिकालसविलम्बिकाचिकित्सा । इति
प्रकाशः ॥
अजीवः, त्रि, (नास्ति जीवः आत्मा यस्य स बहुव्री...
मृतः । अचेतनः । इति त्रिकाण्डशेषः ॥
अजीवनिः, स्त्री, (नञ् + जीव + आक्रोशे नञ्य...
रिति सूत्रेण अनिः) जीवनाभावः । आक्रोश...
शापः । यथा । तस्याजननिरेवास्तु । इत्यम...
टीकायां भरतः ॥ अजीवनिस्तव भूयात् । इति...
मुग्धबोधं ॥
अजुगुप्सितः, त्रि, (गुप् + सन् + क्त न...
नञ् समासः) अनिन्दितः । यथा,—
"उपवेश्य तु तान् विप्रानासनेष्वजुगुप्सिता...
गन्धमाल्यैः सुरभिभिरर्च्चयेद्देवपूर्व्वकं" ॥
इति मानवे ३ अध्याये २०९ श्लोकः ॥
अजेयः, त्रि, (न जेयः नञ् समासः) इति नञ् पूर्व...
जिधातोः कर्म्मणि यत्प्रत्ययः । अजेतव्यः । अ...
जयनीयः । यथा ।—
"अजेयस्तव संग्रामे ममापि हि भविष्यति" ।
इति स्कान्दे काशीखण्डे २३ अध्यायः ।
अज्येष्ठवृत्तिः, पुं, (ज्येष्ठस्य वृत्तिः आचारः तत्...
तत्पुरुषः नास्ति ज्येष्ठवृत्तिः ज्येष्ठाचरणं यस्य...
स बहुव्रीहिः) ज्येष्ठवृत्तिरहितः । भ्रातृषु ति...
बहुमानाभाववान् । यथा,—

॥ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः।
ज्येष्ठवृत्तिर्यस्तु स्यात् स सम्पूज्यस्तु बन्धुवत्" ॥
ति मानवे ९ अध्याये ११० श्लोकः ॥
ज्येष्ठोऽनुजेषु पितृवद्वर्त्तते स पितेव मातेव
गर्हणीयो भवति। यः पुनस्तथा न वर्त्तेत स
तुलादिवदर्चनीयः। इति तट्टीकायां कुल्लूक-
ट्टः।
ज्ञपात्, [द्] पुं, (अजस्य छागस्य एकः पाद इव
दो यस्य सः बहुव्रीहिः अलोपः) एकादश-
द्रान्तर्गतरुद्रविशेषः। इति शब्दमाला॥ (हरि-
शे,—
अजैकपादहिर्बध्न त्वष्टा रुद्रश्च भारत।
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः" ॥)
ज्ञपादः, पुं, (अजस्य छागस्य एकः पाद इव पादो-
स्य सः विकल्पे अलोपः) रुद्रविशेषः। इति
टाधरः॥ छन्दोऽनुरोधादसन्धिरपि विष्णुपुराणे
द्रकलापप्रस्तावे अजएकपादिति॥ (यथा
ारते।—
"अजैकपादहिर्बध्नो विरूपाक्षः सुरेश्वरः।
जयन्तो बहुरूपश्च त्र्यम्बकोऽप्यपराजितः।
वैवस्वतश्च सावित्रो हरो रुद्रा इमे स्मृताः")
ज्ञुका, स्त्री, (अर्ज्जयति नायकादर्थमुपार्ज्जयति
ा अर्ज्जि+समिक स इति बाहुलकादुकन्
स्य ज) नाट्योक्तौ वेश्या। इत्यमरः॥ (एसा
अज्जु आ हि अ एन किम्पि आलिहन्ती चिट्ठदि
ृच्छकटिके।)
भटा, स्त्री, (कारट इति वत् उज्झति सर्व्वदोषान्
ाशयति या उज्झ+कर्त्तरि अटन् स्त्रियां टाप्
पृषोदरादित्वात् उकारस्य अः। यद्वा, अदव्यय-
र्य्ये अत् आश्चर्य्यकारी भटः सङ्घातोऽस्याः।
े क्विप् भटति भटसंघाते अच्। टाप्। अ-
सौ भटा च वा॥
("अम्लं समधुरं तिक्तं कषायं कटुकं सरम्।
चक्षुष्यं सर्व्वदोषघ्नं वृष्यमामलकीफलम्" ॥
इति सुश्रुते।) भूम्यामलकी। इत्यमरः॥
ज्ञालं, क्ली, उज्झति अम्लं वारयति या उज्झ+
कर्त्तरि अलच् पृषोदरादित्वात् उकारस्य
अकारः) फलकं। ढाल इति ख्यातं। इति
हेमचन्द्रः॥ (पुं, अङ्गारः, कोकिलः।)
ज्ञः, त्रि, (ज्ञा+कर्त्तरि कः नञः नञ्समासः।)
जड़ः। मूर्खः। इत्यमरः। (यदुक्तं,—
"अज्ञो भवति वै बालः पिता भवति मन्त्रदः।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदं" ॥
यथा काष्ठोऽफलं दानं तथा विप्रोऽनृचोऽफलः।
इदं शरत्महानां।
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः।")
अज्ञानं, क्ली, (ज्ञा+भावे ल्युट् नज्ञानं नञ्समासः)
विरुद्धज्ञानं। तत्पर्य्यायः। अविद्या २ अहम्मति
३। इत्यमरः॥ सृष्टिकाले ब्रह्मा प्रथमं पञ्च-
प्रकारमज्ञानं ससर्ज। यथा। तमः १ मोहः २
महामोहः ३ तामिस्रं ४ अन्धतामिस्रं ५।

इति श्रीभागवतं॥ वेदान्तमते सदसद्भ्यामनि-
र्व्वचनीयं त्रिगुणात्मकं भावरूपं ज्ञानविरोधि
यत्किञ्चित्। ज्ञानरहिते त्रि॥ (यथा मनुः—
अज्ञानात् वारुणीं पीत्वा संस्कारेणैव शुद्ध्यति।
अज्ञानात्प्राश्य विण्मूत्रं।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते॥)
अञ्चतिः, पुं, (अञ्चति गच्छति यः अञ्च+कर्त्तरि
अति) वायुः। इति त्रिकाण्डशेषः॥
अञ्चलः, पुं, (अञ्चति प्रान्तभागं गच्छति अञ्च+
अलच्) वस्त्रप्रान्तभागः। आँचल इति भाषा।
इति हलायुधः॥ (यथा साहित्यदर्पणे।—
"उरः कुरङ्गकदृशश्चञ्चलचेलाञ्चलो भाति"॥
अञ्चितः, त्रि, (अञ्च+कर्म्मणि क्तः नाञ्चेः पूजाया-
मिति नलोपाभावः) पूजितः। इत्यमरः॥ (यथा
रघुवंशे।—
"उभावलञ्चक्रतुरञ्चिताभ्यां
तपोवनावृत्तिपथं गताभ्यां॥)
अञ्चितभ्रूः, स्त्री, (अञ्चिते उत्कृष्टे भ्रुवौ यस्याः सा
बहुव्रीहिः) सुन्दरभ्रूयुक्तनारी। इति स्त्रीपर्य्याये
राजनिर्घण्टः॥
अञ्जनं, क्ली, (अनूज+भावे ल्युट्, कज्जले तु गम्य-
माने करणे ल्युट्) म्रक्षणं। गमनं। व्यक्तीकरणं।
इत्यनट् प्रत्ययान्तानुजधात्वर्थः। कज्जलं। तत्तु
षड्विधं। यथा,—
"सौवीरं जाम्बलं तुत्थं मयूरग्रीवकं तथा।
दर्व्विका नीलमेवञ्च अञ्जनानि भवन्ति षट्॥
तल्लक्षणानि यथा"—
"स्वरूपन्तु सौवीरं जाम्बलं प्रस्तरं तथा।
मयूरग्रीवकं रत्नं मेघनीलन्तु तैजसं॥
दृष्ट्वा निगाल्य चैतानि शिलायां तैजसेऽथवा।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक॥
घृततैलादियोगेन ताम्रादौ दीपवह्निना।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता॥
सर्व्वाभावे तु तां दद्यात् देवीभ्यो दर्व्विकाञ्जनं।
महामाया जगद्धात्री कामाख्या त्रिपुरा तथा।
आप्नुवन्ति महातोयं षड्भिरेभिः सदाञ्जनैः॥
विधवा नाञ्जनं कुर्य्यात् महामायायैमुत्तमं।
नादत्ते त्वञ्जनं देवी वैष्णवी विधवाहृतं॥
न मृत्पात्रे योजयेत्तु साधको नेत्रञ्जनं।
न पूजाफलमाप्नोति मृत्पात्रविहिताञ्जनैः॥
चतुर्व्वर्गप्रदो धूपः कामदं नेत्रञ्जनं।
तस्माद्द्वयमिदं दद्याद्देवेभ्यो भक्तितो नरः" ॥
इति कालिकापुराणे ६८ अध्यायः॥ अस्य गुणाः।
नागर्ग्मेत्स्यकारित्वं। निर्म्मलचन्द्रतुल्यनिराकुल-
दृष्टिकारित्वञ्च। इति राजवल्लभः॥ सौवीरा-
ञ्जनं रसाञ्जनं अस्ति मर्म्म। इति हेम
चन्द्र॥ व्यक्ति इति विश्व॥ आलङ्कारिकभाषया
व्यञ्जनाख्यवृत्तिः यथा —
"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनं॥
इति काव्यप्रकाशः॥
अञ्जनः, पुं, (अनक्ति ... दिक् रक्षकत्वेन प्रत्य.

क्ते यः अनञ्ज+कर्त्तरि ल्युट्) पश्चिमदिग्हस्ती।
अञ्जयति स्वेन शुभाशुभे सूचयति अनूज+णिच्+
ल्युट्) नेत्रौ। नेठी इति भाषा। इति विश्व-
मेदिन्यौ, (दिवा नतु प्रयोक्तव्यं नेत्रयोस्तीक्ष्ण-
मञ्जनं। विरेकदुर्ब्बलादृष्टिरादित्यं प्राप्य सीदति॥
इति आगमः)।
अञ्जनकेशी, स्त्री, (अञ्जनवत् केशो यस्याः सा बहु-
व्रीहिः स्त्रियां ङीप् यत्संयोगेन केशस्य कृष्णता
भवेत्) हट्टविलासिनीनामगन्धद्रव्यं। इत्यमरः॥
अञ्जना, स्त्री, (अनक्ति स्वकान्त्या शोभते अनूज+युच्
कर्त्तरि) वानरीविशेषः। सा च हनूमन्माता।
इति मेदिनी॥ (रामायणे,—
"अञ्जनेति परिख्याता पत्नी केशरिणः कपेः।
अभिशापक्षयाज्जाता पुनश्च दिवि चारिणी"॥)
अञ्जनाधिका, स्त्री, (अञ्जनात् कज्जलादधिका कृष्ण-
वर्णा) अञ्जनिका। इति हेमचन्द्रः॥
अञ्जनावती, स्त्री, (अञ्जनं विद्यतेऽस्याः अतिकृष्णवर्ण-
त्वात् अञ्जन+मतुप् स्त्रियां ङीप्) मतौ च बह्व-
चोऽञ्जनाजरादीनामिति दीर्घः मस्य वः) सुप्रतीक-
नामदिग्गजभार्य्या। इत्यमरः॥
अञ्जनिका, स्त्री, (अञ्जनम् अञ्जनवत् वर्णो विद्यतेऽस्याः
सा अञ्जन+अर्शआद्यच् स्त्रियां टाप् स्वार्थे कः।)
क्षुद्रमूषिकाविशेषः आँजनाइ इति। आञ्जिना इति च
भाषा। तत्पर्य्यायः। अञ्जनाधिका २ हालिनी
३ हलाहलः ४। इति हेमचन्द्रः॥ क्षुद्रमूषिका।
इति जटाधरः॥
अञ्जनी, स्त्री, (अनक्ति चन्दनकुङ्कुमादिभिः शोभते
अनूज+कर्त्तरि ल्युट् स्त्रियां ङीप्) लेप्यनारी।
चन्दनादिलेपनयोग्या। इति विश्वमेदिन्यौ॥
कटुकावृक्षः। काकाञ्जनीवृक्षः। इति राज-
निर्घण्टः।
अञ्जलिः, पुं, (अनूज+अलि अवधाञ्जलिपुटमेव-
मिति वेणीसंहारनाटके) हस्तसम्पुटः। आँजला
इति भाषा। कुड़वपरिमाणं। इति मेदिनी॥
(यथा रामायणे। न प्रमातं लयेच्छामि निशे
नक्षत्रभूषिते। क्रियतां मे दया भद्रे मयाऽयं-
रचितोऽञ्जलिः)॥
अञ्जलिका, स्त्री, (अञ्जलि+स्वार्थे क) बालमूषिका।
इति जटाधरः॥ अञ्जनिका। इति च पाठः॥
अञ्जलिकारिका, स्त्री, (अञ्जलेः कारिका) लज्जालु-
लता। इति राजनिर्घण्टः॥ पुत्तलिका। इति
हेमचन्द्रः॥
अञ्जसः, त्रि, (अञ्ज+असच्) अवक्रः। ऋजुः॥
इति हेमचन्द्रः।
अञ्जसा च (अञ्जं गतिं विलम्बम्वा स्यति नाश-
यति अञ्ज+सो+कर्त्तरि का) द्रुतं, शीघ्रं,
यथार्थं, प्रकृतं, इत्यमरः। (यथा मनुः,—
"आम्नायैः शरीरस्य यस्तु गृह्णाति गुरुं
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म॥
अञ्जिः, पुं, (अनूज+इन्। निम्न...
टिकः। प्रेरकः। इत्युणादि...
अञ्जिष्ठः, पुं, (अनक्ति ...

...[illegible]) सूर्य्यः। इत्युणादिकोषः॥

अञ्जीरं, क्ली, (अञ्ज+भावे इन् स्त्रियां वा ङीप् अञ्जीम् अभिव्यक्तिस्वादि गुणं राति ददाति अञ्जी आतोऽनुपसर्गे इति कर्त्तरि कः। अथवा अञ्ज+ईरम्) स्वनामख्यातफलवृक्षविशेषः। अञ्जिर+इति पेयारा इति च भाषा। तत्पर्य्यायः। मञ्जुलं २ काकोदुम्बरिकाफलं ३। अस्य गुणाः। शीतलत्वं। स्वादुत्वं। गुरुत्वं। वायुपित्तरक्तक्रिमिशूल-हृत्पीडाकफमुखवैरस्यनाशित्वं। अभिष्यन्दित्वञ्च। लघ्वञ्जीरं तस्मादल्पगुणं। इति राजवल्लभराज-निर्घण्टौ॥

अटनं, क्ली, (अट्+भावे ल्युट्) भ्रमणं। (यथा सर्व्व-शक्तमधीश्वरत्वमगमत् त्वां माश्च भिक्षाटनं। इति घटकर्परः॥)

अटनिः, स्त्री, (अटति तया गच्छति यत्र अट्+अधिकरणे अनि) धनुरग्रभागः। धनुकेर ऊल् इति भाषा। इत्युणादिकोषः॥

अटनी, स्त्री, (अटनि+स्त्रियाम्वा ङीप्) अटनिः। धनुष्कोटिः। इत्यमरः॥ (यथा उत्तरचरिते। ध्वनद्गुरुगुणाटनीघटितकरालकोलाहलं)॥

अटरुषः, पुं, यत्नेन वासकवृक्षः। इत्यमरः॥

अटरूषः, पुं, (अटति मृत्युपाशे यत्नेन अट+घञर्थे कः। अटं कासाख्यरोगं रोषति नाशयति रुष्+कर्त्तरि कः। अथवा रूष्+कर्त्तरि कः अटस्य रूषो वा षष्ठीतत्पुरुषः। वासकः कासनाशक इति वैद्यके) वासकवृक्षः। इत्यमरटीकायां रायमुकुटः॥

[अट]विः, स्त्री, (अटति वार्द्धक्ये गच्छति यत्र अट्+अधिकरणे अवि यद्वाश्रुतिः वनं व्रजेदिति।) वनं। [इ]ति रायमुकुटः॥

[अटवी], स्त्री, (अटवि+स्त्रियां ङीप्) वनं। इत्य[मरः]। (यथा रामायणे। आनर्त्तांश्चैव मागध्वं [क]ाराण्यटवीस्तथा)॥

[अटा], स्त्री, (अट्+भावे अङ् ततष्टाप्) पर्य्यटनं। [...]। इति रत्नकोषः नीलकण्ठश्च॥

[अटाटा], स्त्री, (पौनः पुन्येन अटनं भ्रमणम् अट्+[...]चिभूताथर्त्त्यादिना यङ्+भावे अ। [...टा]प्) पर्य्यटनं। इत्यमरः॥ पुनःपुनर्भ्रमणं। [...]भ्रमणं। इति व्याकरणं॥) अट्ट क [...] अनादरे। इति कविकल्पद्रुमः॥ टद्द-[...क] अट्टयति। एकटकार उति राम॥ [...]ीभावः। इति दुर्गादासः॥ [...]क्रमे। वधे। इति कविकल्पद्रुमः॥ [...]योपध। ह अटिट्टिषते दन्त्यवर्गा-[...] अतिट्टिषते। दन्त्यवर्गाद्वितीयो-[...] अट्टितिषते खलं राजा। इति [...]

[...ट्]+अच्) शुष्कं। भक्तं। अन्नं। [...]रिप्रयोगश्च। [...]कं यद्दमतिक्रम्य यत्र गृहे गच्छति [...ति अच्]) क्षौम। इत्यमरः॥ [...]ति भरतः॥ प्राकारायमित-

रणगृहं। इति कौटिल्यः। अट्टेति स्थानमुच-विशेषः। इति कोशटः॥ प्राकारमण्डपस्योपरि शाला। इति केचित्॥ हर्म्म्यादिवातगुटिका। इति केचित्। मण्डपोपरि हर्म्म्यपृष्ठं। इति केचित्॥ प्राकारधारणार्थोऽभ्यन्तरे मौमाम्यो-ऽट्टः। इति भट्टः॥ अतिशये। इति मेदिनी॥ हट्टः इति हेमचन्द्रः॥

अट्टट्ट अ (वीप्सायाद्विर्वचनम् प्रकारभ्यादित्वात् परक-त्वमस्य अट्टट्टहासमशिवं शिवदूती चकार इति चण्डी) अत्युच्चं। इति जटाधरः॥

अट्टनं (क्ली) चक्रपणास्त्रं। इति त्रिकाण्डशेषः॥

अट्टहासः, पुं, महत्तरो हासः। प्रम्लुक्तहास्यं। इति हेमचन्द्रः॥ (यथा देवीमाहात्म्ये। देवी-गणादोषैः साट्टहासं मुहुर्मुहुः॥ स्तम्बकृष्याट्ट-हासः॥ मेघदूते)॥

अट्टहासकः, पु, (अट्टं सातिशयं हासकः अतिश्वेत-पुष्पत्वात् हास्यकारीव दिवोदात्तत् पुरुषः) कुन्द-पुष्प वृक्षः। इति राजनिर्घण्टः॥

अट्टहासी [न्] पु, (अट्टं सदानन्दत्वात् सातिशयं हसति अट्ट+हस+णिनि उपपद समासः) शिवः। इति हेमचन्द्रः॥

अट्टालः, पुं, (अट्टवत् प्रासादस्य इव अलति भवति अल+अच्) प्राकारादुपरितनयुद्धस्थानं। इति श्रीधरस्वामी॥ यथा। भज्यमानपुरोद्यानप्राका-राट्टालगोपुरं। इति श्रीभागवतं॥

अट्टालकः, पुं, (अट्टवत् प्रासादस्य इव अलति भवति अल्+अच् स्वार्थे कन्) उपरितनगृहं। अट्टालिकोपरि गृहं। तत्पर्य्यायः। क्षौम. २ अट्ट ३। इति हेमचन्द्रः॥

अट्टालिका, स्त्री, (अट्टाल+स्वार्थे कन् स्त्रियां टाप्) राजगृहं। तत्पर्य्यायः। ग्मागारं २ हर्म्म्यं ३ सौधं ४ धवलागारं ५। इति जटाधरः॥ (राजतरङ्गिनी, अटिखाट्टालि-कादिभ्यो देशेभ्यः।)

अट्टालिकाकारः, पु, (अट्टालिकां करोति यः अट्टा-लिका+कृ+अण् उपपद समासः प्रासादकारक) शूद्रागर्भे चित्रकारौरसजातजातिविशेष। तस्य कर्म्म गृहनिर्म्माणादि। राज इति थैकार इति च भाषा।

"कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः।
बभूवाट्टालिकाकार पतितो जारदोषतः"।
इति ब्रह्मवैवर्त्तपुराणं॥

अट्या, स्त्री, (अटनम् अट्+भावे क्यप् स्त्रियां टाप् समस्या इति वत्) परिभ्रमणं। पर्य्यटनं। इत्य-मरटीकायां रायमुकुटः॥ यथा,—
"तीर्थभिक्षा ट्याच्या च कामजो दशको गणः"।
इति स्मृतिः॥

अठ इ ङ गतौ इति कविकल्पद्रुमः॥ इ (कर्म्मणि) अण्ठ्यते ङ अण्ठते। इति दुर्गादासः॥ अठ गतौ। इति कविकल्पद्रुमः॥ अठति। इति दुर्गादासः॥

अड र न अप्तौ (स्वादिं सेट्।) इति कविकल्प-द्रुमः॥ र वैदिकदास॥

अड उद्यमे। (भ्वादिं से[ट्]) [...]द्रुमः॥ अडति मोघं [...]

अड्ड अभियोगे। इति क[वि...] [...]इतीयोपध। (भ्वादिं से[ट्]...तिप्) अडिड्डिषति। [...] अभियोगः समाधानं। [...] अभि समन्तात् योगोऽभि[...] भट्ट॥ इति दुर्गादासः।

अण रवे। इति कविकल्पद्रुम[ः...] शब्दः। इति दुर्गादासः॥

अण य ङ जीवने। प्राणने। इति [...] य ङ अण्यते जनो दुःखेन जीव[...] दुर्गादासः॥

अणकः, त्रि, (अण्+अक् कुत्सायां) अधमः। इत्यमरः॥

अणव्यं, क्ली, (अणोः सूक्ष्मधान्यस्य भवनं [...] मुत्पत्तिस्थानमिति यावत् अणु+यत् [...] (अणोः, सूक्ष्मधान्यस्य चीनादिकस्य भ[वनं] स्थानमिति यावत् अणु+यत् तस्य [...] खड्गिश)। अणधान्योत्पादकक्षेत्रं। इ[ति राय]मुकुटः॥

अणिः, पुं, स्त्री (अणति शब्दायते अण्+इन् [स्त्रियां] वा ङीप्) अक्षाग्रकीलकः। रथचक्र[...] कील। इत्यमरः॥ अणिः। सूक्ष्मादन[...] सीमा। इति मेदिनी॥ तस्य रूपान्तरं। आणिः (अणति शब्दायते अण्+इञ्, [...] भवः इति इञ्, आणि इति वृन्))। इ[ति...] टीका॥

अणिमा [न्] पु, (अणु+भावे इमनिच्। अणि[मा] लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ईशित्व वशित्व च तथा कामावसायिता इति सांख्य कौमुद्याम्) अणोर्भावः। अणुत्वं। सूक्ष्म[त्वं] इति व्याकरणं। अष्टविधैश्वर्य्यमध्ये ऐश्वर्य्यविशे[षः] इत्यमरः॥ यत्प्रभावात् देवा सिद्धाश्च सूक्ष्मी[भूय] सर्व्वत्र विचरन्ति कैश्चिदपि न लक्ष्यन्ते। इ[ति] तट्टीका॥

("अणिमा लघिमा प्राप्तिः प्राकाम्यं म[हिमा तथा]।
ईशित्वञ्च वशित्वञ्च तथा कामावसा[यिता]"।
इति आगम।)

अणीयः, [स्] त्रि, अतिशयेन अणु अणु+[ईयसुन्] अत्यल्पं। अतिसूक्ष्मं। इत्यमरः॥ (यथा
"प्रशासितारं सर्व्वेषामणीयांसमणोरपि।
रुक्माभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परं"।)

अणु, त्रि, (अणति सूक्ष्मत्व गच्छति अण्+[उ]...) सवलेसश्लाकलाग्रेण इत्यमरः) सूक्ष्म। सूक्ष्म।[...] मेदिनी॥

अणुः, पु, (अण्+उन्) लेशः। व्रीहिविशेष सूक्ष्मधान्यं। चिना इत्यादि भाषा। इत्यमरः। (यथा मनुः। न गृह्णीयात् शुल्कमणवपि।)

अणुकः, त्रि, (अणुप्रकारः अणु+स्थूलादित्[वात् कन्]...

...तार्थे अन्। अणुप्रकारे, अणुशब्दार्थे श्री-
...दिधाने) चतुरः। निपुणः। अल्पः। स्तोकः।
...ति मेदिनी ॥

...ा, स्त्री, (अणुः सूक्ष्मा भा दीप्तिर्यस्याः सा बहु-
...ीहिः) विद्युत्। इति त्रिकाण्डशेषः ॥

...रेवती, स्त्री, (अणुः सूक्ष्मा रेवती नक्षत्रमिव।)
...न्तीवृक्षः। इति राजनिर्घण्टः ॥

...व्रीहिः, पुं, (अणुः सूक्ष्मः व्रीहिः, कर्म्मधारयः,
...गौरादि।) सूक्ष्मधान्यं। तत्पर्य्यायः। प्रसातिका २।
...ति रत्नमाला ॥

..., स्त्री, (अम् संयोगे भावे क्विप् अमं संयोगं
...यन्ते गच्छन्त्यनेन अम्+डी+ करणे डः।
...सोऽवयवभेदे मुष्के, पक्षिडिम्बे। "तदण्डमभव-
...र्मं सहस्रांशुसमप्रभमिति" मनुः।) मत्स्यादि-
...ादुर्भावककोषः। अण्डा। डिम्। इति भाषा।
...तत्पर्य्यायः। पेशी २ कोषः ३। इत्यमरः॥ मेढ्रः
... कोशः ५ पेशीकोषः ६। इति तट्टीका॥
...डिम्बः ७। इति मेदिनी॥ मत्स्यपक्षिकूर्म्माण्डानां
...गुणाः,—

"नातिस्निग्धानि वृष्याणि स्वादुमाकरसानि च।
वातघ्नान्यतिशुक्राणि गुरूण्यण्डानि पक्षिणाम्"॥

इति वैद्यके।)
स्वादुत्वं। कटुपाकित्वं। रुचिशुक्रकारित्वं। वात-
श्लेष्मनाशित्वञ्च। इति राजवल्लभः॥ मुष्कः।
वीर्य्यं। इति विश्वः॥ मृगनाभिः। इति केचित्॥

...ण्डकः, पुं, (अण्ड+स्वार्थे कन्) अण्डकोषः। इति
हेमचन्द्रः॥

...ण्डकोटरपुष्पी, स्त्री, (अण्डवत् कोटरे अभ्यन्तरे
पुष्पं यस्याः सा बहुव्रीहिः,स्त्रियां ङीप्।) अधःपुष्पी-
वृक्षः। नीलराला। नीलबुक्ष इति ख्याता।
इति काचिद्रत्नमाला॥ अन्तःकोटरपुष्पी इत्यपि
पाठः॥

अण्डकोशः, पुं, (अण्डस्य मुष्कस्य कोशः, षष्ठीतत्।)
अण्डकोषः। इत्यमरटीका॥

अण्डकोषः, पुं, (अण्डस्य मुष्कस्य कोषः, षष्ठीतत्-
पुरुषः।) स्वनामख्यातशरीरावयवविशेषः। तत्प-
र्य्यायः। मुष्कः २ वृषणः ३। इत्यमरः॥ अण्डं ४
पेलं ५ अण्डकः ६। इति हेमचन्द्रः॥ बीजग्रन्थिका
७। इति राजनिर्घण्टः॥ सीमा ८। इति जटाधरः॥
फलकोषकः ९। इति त्रिकाण्डशेषः॥ फलं १०।
इति रामायणं॥ कोषकोषकमुष्काण्डवृषणा अण्ड-
कोषकः। सीमा च पेलसीमानौ फलमित्यपि
कुत्रचित्॥ इति शब्दरत्नावली॥

अण्डकोषकः, पुं, (अण्डकोष+स्वार्थे कन्) अण्ड-
कोषः। इति शब्दरत्नावली॥

अण्डजः, पुं, (अण्डे जायते अण्ड+जन्+कर्त्तरि ड
उपपदसमासः) पक्षी। सर्पः। मत्स्यः। कृकलासः।
इति विश्वमेदिन्यौ॥ अण्डजातमात्रे त्रि।
इत्यमरः॥
("अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः।
यानि चैवंप्रकाराणि स्थलजान्यौदकानि च"॥
इति मनुः।)

अण्डजा, स्त्री, (अण्डे जायते इति अण्ड+जन्+
कर्त्तरि ड, उपपदसमासः, स्त्रियां टाप्।) मृग-
नाभिः। कस्तूरी। इति विश्वमेदिनीहेम-
चन्द्राः॥

अण्डालुः, पुं, (अण्डं विद्यते यस्य अण्ड+मत्वर्थे
आलुच्) मत्स्यः। इति शब्दचन्द्रिका॥

अण्डीरः, पुं, (अण्ड+मत्वर्थे ईरन्, विशिष्टसामर्थ्य-
वान्।) पुरुषः। शक्तः। इति मेदिनी॥

अण्वी, स्त्री, (अणु+वोतोगुणवचनादिति पक्षे
ङीप्) अङ्गुलिः। अस्याः प्रचुरप्रयोगो वेदे।
वीणा॥

अत, इ बन्धने (इदित्वात् नुम् भ्वादिं सेट् परं)
इति कविकल्पद्रुमः॥ अन्तीति बध्ये। शैषो दीर्घा-
दिरित्यन्यः। अतएव अन्त्यते इन्त्यते। समते तु
अन्त्यते इन्त्यते। छन्दोऽनुरोधादुभयत्र इकारः॥
इति दुर्गादासः॥

अत ई बन्धने। इति कविकल्पद्रुमः॥

अत सातत्यगते। इति कविकल्पद्रुमः॥ सातत्यगतं
नैरन्तर्य्येण भ्रमणं प्रापणञ्च। अतति वायुः।
अतति सूर्य्यो गगनं प्राप्नोतीत्यर्थः। इति दुर्गा-
दासः।

अतः, [स्] व्य, (एतस्मात्, एतद्+एतदोऽशिति
पञ्चम्यर्थे तस् एतद्शब्दस्य अशादेशः) कारणं।
अपदेशः। निर्द्देशः। इति विश्वः॥

अतएव, व्य, (एतद्+तस् पञ्चम्यर्थे तस्। एतदः
अन् इति एकारस्य अकारः।) अस्मादेव।
एतत्कारणेनैव। अनेनैव हेतुना। यथा,—
"अतएव महेशानि रलयोः समता भवेत्"।
इति सारदातिलकटीकायां राघवभट्टः॥ अतएव
मं। इति वोपदेवः॥

अतटः, पुं, (तट्यते आहन्यते जलेन इति तट्+घ-
ञर्थे कः, तटं जलप्रपातस्थानं न विद्यते यस्य बहु-
व्रीहिः) पर्व्वतस्योच्चस्थानं। तत्पर्य्यायः। प्रपातः २
भृगुः ३। इत्यमरः॥ (यथा शाकुन्तले। मनो-
रथानामतटप्रपातः॥)

अतर्कः, पुं, (तर्क्यतेऽनेन तर्क+घञर्थे कः। तर्कस्तर्क-
हेतुः स नास्ति यस्य स बहुव्रीहिः) अहैतुकः। शुष्क-
तर्कपरः। इति महाभारते दानधर्म्मः॥

अतलं, क्ली, (नास्ति तलं गाधमागो यस्य तत् बहु-
व्रीहिः। अतलस्पर्शमिति युक्तमर्थः।) प्रथमखण्ड-
पातालं। भूमिप्रयोगः॥

अतलस्पर्शः, त्रि, (नास्ति तलस्य अधोभागस्य स्पर्शो-
यस्य स बहुव्रीहिः।) अगाधः। अतिगभीरः।)
इत्यमरः॥

अतलस्पृक् [श्] त्रि, (न तलं गाधमागः नञ्समासः,
तत् स्पृशति यः अतल+स्पृश्+कर्त्तरि क्विन्
अतलस्पर्शकारी। कर्म्मणि क्विन् तत् स्पृश्यते
येन।) अतलस्पर्शः। तत्पर्य्यायः। अस्थाघ अस्ताघं
अगाधं ४ अगाधं ५। इति हेमचन्द्रः॥

अतसः, पुं, (अतति सततं गच्छति यः अत्+कर्त्तरि
असच्, स्त्रियां ङीप्।) (अतसीवृक्षविशेषः)
वायुः। इत्युणादिकोषः॥ आत्मा। इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः॥ वल्कलनिर्म्मितवस्त्रं।
अस्त्रं। यथा—"अतसः क्षौमं प्रहरणं वायुरेति
धातुवृत्तौ" माधवः॥

अतसी, स्त्री, (अत+असच्, स्त्रियां ङीप्।) क्षुप्य-
पुष्पक्षुद्रवृक्षभेदः। मसिना इति ख्याता। तत्-
पर्य्यायः। चणका २ उमा ३ क्षौमी ४ रुद्रपत्नी
५ सुवर्च्चला ६। इति रत्नमाला॥ पिच्छिला ७
देवी ८ मदगन्धा ९ मदोत्कटा १० क्षुमा ११
हैमवती १२ सुनीला १३ नीलपुष्पिका १४।
अस्या गुणाः। उष्णत्वं। तिक्तत्वं। वातहारित्वं।
श्लेष्मपित्तकारित्वञ्च। अस्यास्तैलस्य गुणाः। मधु-
रत्वं। पिच्छिलत्वं। मदगन्धित्वं। कषायत्वं। वायु-
कफकासनाशित्वं॥ स्वादुत्वं। उष्णत्वं। अस्रत्वं।
पाके कटुत्वञ्च। इति राजवल्लभराजनिर्घण्टौ॥
यथा,—
"अतसी नीलपुष्पी च पार्व्वती स्यादुमा क्षुमा।
अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः।
उष्णा दृक्शुक्रवातघ्नी कफपित्तविनाशिनी"॥
इति भावप्रकाशः॥ शणवृक्षः। इत्यमर-
टीका॥

अति, व्य, प्रशंसा। (अत्+इ। पूजायां। अतिरति-
क्रमणे चेति। अत्यादयः क्रान्ताद्यर्थे इति पाणिनि-
सूत्रम्।) प्रकर्षं। लङ्घनं। इति विश्वमेदिन्यौ॥
अतिशयं। क्रान्तं। पूजनं। असम्भावना। इति
दुर्गादासः। प्रादिविंशत्युपसर्गान्तर्गतोऽयं॥

अतिकथः, त्रि, (कथामतिक्रान्तः कुगतिप्रादय इति
समासः। कथनायोग्यं।) अश्रद्धेयः। नष्टः। इति
मेदिनी॥ नष्टधर्म्मः। इति हेमचन्द्रः॥

अतिकथा, स्त्री, (अत्युत्कृष्टा कथा कर्म्मधारयः।)
अपार्थवाक्यं। व्यर्थभाषणं। इति विश्वः हेम-
चन्द्रश्च॥

अतिकन्दकः, पुं, (अतिरिक्तः कन्दो मूलं यस्य
कप्) हस्तिकन्दवृक्षः। इति राजनिर्घण्टः॥

अतिकेशरः, पुं, (अतिरिक्ताः केशराः किञ्जल्काः
यस्य सः।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥

अतिक्रमः, पुं, (अतिक्रान्तः क्रमः नियमः, अति क्रम्
+भावे घञ् वृद्ध्यभावः) क्रमोल्लङ्घनं। तत्-
पर्य्यायः। अतिपातः २ (अति पत्+भावे घञ्)
उपात्ययः ३ पर्य्ययः ४। अभिक्रमः। रणे शत्रून्
प्रति अभीतयोधादिगमनं। इत्यमरः॥

अतिक्रान्तः, त्रि, (अति+क्रम्+कर्त्तरि क्तः) कृताति-
क्रमः। कृतक्रमोल्लङ्घनः। राजानमतिक्रान्ता
अतिराजी। इति वोपदेवः॥ अतीतः। यथा।
येनो तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। इति
रक्षितः॥

अतिक्रामकः, त्रि, अतिक्रमकर्त्ता। क्रमोल्लङ्घकः।
अतिपूर्व्वक्रमधातोः कर्त्तरि ण्वुल्॥

अतिगण्डः, पुं, (गण्डमतिक्रान्तः अत्यादयः क्रान्ता-
द्यर्थे।) विष्कुम्भादिसप्तविंशतियोगमध्ये षष्ठयोगः।
तत्र जातफलं।
"कलिप्रियो वेदविनिन्दकश्च
मूर्खः कृतघ्नो गलरोगयुक्तः।"

सरोमदेहः पुरुषोऽतिदीर्घः
प्रकाण्डगण्डस्तनितगण्डजन्मा" ॥
इति कोष्ठीप्रदीपः ।

अतिगन्धः, पुं, (अतिरिक्तो गन्धो यस्य सः ।) भूतृणं । चम्पकः । मुद्गरवृक्षः । गन्धकः । इति राजनिर्घण्टः ॥ (अतिगर्व्वितः ।)

अतिगन्धालुः, पुं, (अतिगन्धो विद्यतेऽस्य अति-गन्ध+मत्वर्थे आलु । अतिशयितगन्धयुक्ते) पुत्र-दात्रीलता । इति राजनिर्घण्टः ॥

अतिगर्व्वितः, त्रि, (अति अधिको गर्व्वः कर्म्मधारयः सोऽस्य जातः अतिगर्व्व+इतच् ।) महाहङ्कृतः । अतिशयगर्व्वयुक्तः । तत्पर्य्यायः । समुद्धतः २ । इति हलायुधः ॥

अतिगुहा, स्त्री, (गुहामतिक्रान्ता कुगतिप्रादीति समासः ।) पृश्निपर्णीविशेषः । क्षुद्रपाकुलिया इति भाषा । इति रत्नमाला ॥ गुहातिक्रामके त्रि ॥

अतिचरा, स्त्री, (गन्धविस्तारेण स्वस्थानमतिक्रम्य चरति गच्छतीव अति चर+कर्त्तरि अच् स्त्रियां टाप् ।) पद्मचारिणीवृक्षः । स्थलपद्मिनी । इत्यमरः ॥ राजनिर्घण्टश्च ॥

अतिचारः, पुं, (अतिक्रम्य चरणं गमनम् अति+चर +भावे घञ् ।) शीघ्रगमनं । अतिक्रम्य गमनं । कुजादिपञ्चग्रहाणां राशिभोगकालासमाप्तौ राश्यन्तरगमनं । तत्र पूर्व्वराशिगमने वक्रातिचारः । पराराशिगमने अतिचारः । एतौ गुरो-र्वेरकालो भवति । गुरुस्तु यदि पुनः पूर्व्वराशिं नायाति तदा महातिचारः । तेन लुप्तसम्वत्सरो भवति । यज्ञाद्या नभोऽन्मागराशावपि वक्राति-चारौ भवतः ॥ तत्र नाकाम । इति ज्योति-[...]ज्योतिषे ॥

[...]च्छत्रः, पुं, (छाद्यते आच्छाद्यतेऽनेन छद्+ [...]णिच्+करणे ष्ट्रन् । अतिक्रान्तश्छत्रम् इति [...]तया छत्रातिक्रमकारी ।) भूतृणं । इति [...]जनिर्घण्टः ॥ जन्तुविशेषः । छत्रकर्कुल्या-[...]का इति ख्यातः । इति रत्नमाला ॥ छत्रा । [...]छत्रा । पुंस्त्राति । पोटालछत्राति इति [...]ना । इत्यमरः ॥

[...]त्रः, पुं, (अति+छद+स्वार्थे कन्) [...]ः । छातादिविशेष इति ख्यातः । तस्य [...]ि यथाकारः कटुरसश्च । इति रत्नमाला ॥ [...] । इति राजनिर्घण्टः ॥

[...] स्त्री, ([...], अतारस्य इति [...]) अतिच्छत्रा । मौरी इति ख्याता । [...]ग्गाक्रा । शतपुष्पा इति प्रसिद्धा । इति [...] ([...] कटिर्वा प्रच्छ-[...] एकुते ।)

[...] ([...]) [...] । [...]रेखाकार् । ([...]) [...] । इति [...]) ॥ तत्-[...] २ । इत्यमरः । [...] २ [...]महीना ।

[...]रत्र+भावे घञ् अतिरहितो

जागरो जागरणं यस्य सः । अतिजागरणयुक्ते त्रि ।) नीलक्रौञ्चः । कालकः । इति राजनिर्घण्टः ॥

अतिडीनं, क्ली, (डी+भावे क्तः तस्य नः । अत्यन्तं डीनं गमनं कर्म्मधारयः ।) पक्षिणां प्रचण्डगमनं । इति महाभारतं ॥

अतितीव्रा, स्त्री, (अतिशयेन तीव्रा) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

अतिथिः, पुं, कुशपुत्रः । स च श्रीरामचन्द्रस्य पौत्रः । इति मेदिनी ॥ कोपः । इति विश्वः ॥

अतिथिः, त्रि, (अतति सातत्येन गच्छति न तिष्ठति अत्+इथिन्) अज्ञातपूर्व्वगृहागतव्यक्तिः । इति श्रीधरस्वामी ॥ अतिथ् इति भाषा । तत्पर्य्यायः । आगन्तुः २ आवेशिकः ३ गृहागतः ४ । इत्य-मरः ॥ स्त्रीलिङ्गे आवेशिकी ५ अतिथी ६ । इति तट्टीकासारसुन्दरी ॥ आगान्तु ७ । इति हड्-चन्द्रः । प्राघूर्णः ८ अभ्यागतः ९ प्राघूर्णिकः १० । इति हेमचन्द्रः ॥ प्राघुणिकः ११ । इति विश्वः ॥ प्राघुणः १२ । इति त्रिकाण्डशेषः ॥०॥ तस्य लक्षणं । यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः । अकस्मात् गृहमायाति सोऽतिथिः प्रोच्यते बुधैः ॥०॥ तस्य निवर्त्तने गृहस्थस्य दोषः यथा,—

"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति" ॥

इति पुराणं ॥०॥ तस्य ग्रहणकालः । "ततो गोदोहमात्रन्तु कालं तिष्ठेद्गृहाङ्गने । अति-थिग्रहणार्थाय तदूर्द्ध्वं वा यदृच्छया" ॥ इति विष्णुपुराणं ॥०॥ गोदोहकालश्च मुहूर्त्ताष्टम-भागः । यथा । "आचम्य च ततः कुर्य्यात् प्राज्ञो द्वारावलोकनं । मुहूर्त्तस्याष्टमं भागमुद्वीक्षो ह्यतिथिर्भवेत्" ॥ इति मार्कण्डेयपुराणं ॥०॥ तस्य मूर्खत्वादिविचारो नास्ति । "प्रियो वा यदि वा द्वेष्यो मूर्खः पतित एव वा । संप्राप्ते वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः" ॥ इति शातातपः ॥०॥ तस्य देशादयो न प्रष्टव्याः ।

"स्वाध्यायगोत्रचरणमपृष्ट्वापि तथा कुलं ।
हिरण्यगर्भबुद्ध्या तं मन्येताभ्यागतं गृही" ॥

इति विष्णुपुराणं ॥०॥ तस्य देयादौ एते दोषाः ।

"देहि नाम कुलं विद्या एता योऽग्रं प्रयच्छति ।
न स तत्फलमाप्नोति दत्त्वा स्वर्गं न गच्छति" ॥

इति स्मृतिः ॥०॥ अतिथये शक्त्यनुसारेण दातव्यं ।

"भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्त्वा नैव भोक्तव्यं यथा विभवमात्मनः" ॥

इति मार्कण्डेयपुराणं ॥०॥ भिक्षादिलक्षणं ।

"ग्रासप्रमाणा भिक्षा स्यादग्रं ग्रासचतुष्टयं ।
अग्राच्चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः" ॥

इति मार्कण्डेयपुराणम् । इत्याह्निकतत्त्वं ॥

अतिनिद्रूपणं, क्ली, (अतिदं पूरणं येषा बठोरत् पुरत ।) अतिदिक्षेत्रा । अतिविशिरा । तत्प-र्य्याय । [...] २ । इति हेमचन्द्रः ॥

अतिदानं, क्ली, (दा+भावे ल्युट्, अत्यन्तं दानं सत-

इ[...]
"[...]
इति [...]
अतिदि[...] णाम[...] साल्वध[...] शिष्टः । तेनानेन [...] इति चे[...] गत्वतिदि[...]

अतिदीप्यः, पुं, [...] आत्मना प्र[...] रक्तचित्रक[...]

अतिदेशः, पुं, [...] धर्म्मस्यान्यत्र [...] इत्यादिः । इति [...] "प्रकृतात् कर्म्म[...] धर्म्मोऽतिदिश्यते[...] इति मलमासतत्त्व[...] तिदेशः । १ यथा[...] इत्यत्र तुल्यशब्देन [...] देशः २ यथा,—"अ[...] निषेधेन दर्शपौर्णमा[...] शातिदेशः ३ यथा,—[...] श्रौतिककार्य्यकारिणि मु[...] धर्म्माः प्रोक्षणादयः का[...] तिदेशः ४ यथा,—"[...] इत्यत्र माससाध्यगत्य[...] देशात् अग्निहोत्रधर्म्मातिदेशः" ५ यथा,—"यज[...] न यूपे यजमानादन्यत्वरूप[...] धर्म्मस्य तदीयपरिमाणस्याति[...] विवेकटीकायां श्रीकृष्णः ॥

अतिनु, त्रि, (कुगतिप्रादीतिसमा[...] सर्जनस्येति ह्रस्वः ।) अतीतनौक[...] नावोत्तीर्णः । इत्यमरः । तस्य [...] अतिनौः इति रूपं ॥

अतिपतनं, क्ली, (अति+पत्+भावे [...] अतिक्रमणं । इति शब्दरत्नावली ॥

अतिपथाः [न्], पुं, (अत्युत्कृष्टः पन्था [...] अतेः पूजार्थत्वात् समासान्तप्रत्यय ।) सुपथः । इत्यमरः ॥

अतिपत्रः, पुं, (अतिवृहत् पत्रं यस्य स बहु[...] हस्तिकन्दवृक्षः । शाकवृक्षः । इति राजनि[...]

अतिपातः, पुं, (अति+पत्+भावे घञ्) क्रम । उपात्यय । पर्य्यय । इत्यमरः । ([...] शाकुन्तले—न चेदन्यकार्य्यातिपात) ।

अतिपातकं, क्ली, (अतिदुष्टतया अन्यत् [...] पापमतिक्रान्तं प्रादिसमास ।) नवविधपात[...] गुरुतरपातकं । तत् त्रिविधं । पुंस मातृ[...]

ागमनजन्यं । स्त्रियास्तु पुत्रमित्रस्वसुरगमन-
ं । इति प्रायश्चित्तविवेकः ॥

लः, त्रि, (अतिशयितं बलं यस्य सः बहु-
हिः ।) प्रबलः । अतिशयबलवान् । प्रकृष्टबल-
शिष्टः । इति मेदिनी ॥ (विजृम्भमाणोऽतिबलः
प्रबुध्यत राक्षसः ॥ इति रामायणम्) ॥

तिबला, स्त्री, अत्यन्तं बलं यस्याः सा बहु-
हिः ।) विश्वामित्रेण रामाय दत्ते अस्त्रविद्या-
शेषे यथा,—
"दाय द्वे इमे विद्ये बलामतिबलां तथा" ।
गदि रामायणे ।) पीतबला । पीतवर्णवाड़ियाला
ति ख्याता । पिटारशी । इति मदनविनोदः ॥
ृक्षविशेषः । इति राजनिर्घण्टः ॥ तत्पर्य्यायः ।
लेका २ बल्या ३ विकङ्कता ४ वाट्यपुष्पिका ५
घंटा ६ शीता ७ शीतपुष्पा ८ भूरिचला ९
कघण्टिका १० । तस्या गुणाः । तिक्तत्वं । कटुत्वं ।
तदोषमिनाशित्वं । दाहतृष्णाविषच्छर्द्दिक्लेदोप-
मकारित्वञ्च । इति राजनिर्घण्टः ॥

भारगः, पुं, (अतिभारेण वेगेन गच्छति अति-
ार + गम् + कर्त्तरि ड, उपपदसमासः ।) (खरः ।
ागतरः । गर्दभात् वड़वाजातः अश्वभेदः ।) खे-
रः । खचर इति भाषा । इति राज-
र्घण्टः ॥

तभीः, पुं, (अतिबिभेत्यस्याः अति भी + अपा-
ाने क्विप् ।) वज्रज्वाला । इति त्रिकाण्डशेषः ॥

भूमिः, स्त्री, (अतिशयिता भूमिर्म्मर्य्यादा
र्म्मधारयः,अतिमर्य्यादा ।) आधिक्यं ।यथा ।प्राप्य
न्मथमदादतिभूमिं दुर्व्वहस्तनभराः सुरतस्येति
ाघः ॥ अतिशयितभूमिः ॥

तमङ्गल्यः, पुं, (अतिमङ्गलाय हितः अतिमङ्गल
+ यत् ।) बिल्ववृक्षः । इति रत्नमाला ॥ अतिशय-
मङ्गलजनके त्रि ॥

तमर्य्याद, त्रि, (मर्य्यादामतिक्रान्तः प्रादि-
समासः ।) अतिशयितः । इति हेमचन्द्रः ॥ अति-
ान्ते क्ली ॥

तमात्रं, क्ली, (मात्रामल्पमतिक्रान्तं प्रादि-
समासः ।) अतिशयः । तद्युक्ते त्रि । इत्यमरः ॥
(यथा प्रावृष्काले । अतिमात्रलोहितवर्णा याः
एतोरनुपपत्रात् ।)

तमुक्तः, (पुं) माधवीलता । इत्यमरः ॥ तिनिश-
वृक्ष । इति हेमचन्द्रः ॥

तमुक्तः, त्रि, (अतिशयेन मुक्तः निर्व्वाणमुक्तिं गतः
अति + मुच् + कर्त्तरि क्तः । निर्व्वाणमुक्तिविशिष्टः ।)
निष्फलः । निस्सङ्गः । इति विश्वमेदिन्यौ ॥ प्राप्त-
निर्व्वाणः ॥

तमुक्तकः, पुं, (मुच् + भावे क्त, अतिशयेन मुक्तं
[illegible] दस्य सः बहुव्रीहिः, कप् ।) तिनिश-
वृक्षः । इत्यमरः । तिन्दुकवृक्षः । हेमचन्द्रविवेकः ।
तत्पर्य्यायः । पुण्ड्रकः २ वासन्ती ३ अमरा-
लता ४ कामुकवल्ली ५ । तस्य गुणाः । कषायत्वं ।
शैत्यत्वं । मदकारित्वं । पित्तदाहज्वरोन्माद-
हिक्काच्छर्द्दिनाशकत्वञ्च । इति राजनिर्घण्टः ॥

(कर्णिकारान् कुरवकान् चम्पकानतिमुक्तकान् ॥
इति रामायणे) ॥

अतिमोदा, स्त्री, (अत्यन्तो मोदो गन्धो यस्याः सा ।)
नवमल्लिका । इति राजनिर्घण्टः ॥

अतिरसा, स्त्री, अत्यन्तो रसो यस्याः सा ।) मूर्व्वा-
लता । रास्ना । क्लीतनकं । इति राजनिर्घण्टः ॥

अतिरिक्तः, त्रि, (अति रिच् + कर्त्तरि क्तः । श्रेष्ठे भिन्ने
शून्ये च । भावे क्तः, अतिरेके आधिक्ये च ।)
अधिकः । अतिशयितः । तत्पर्य्यायः । समधिकः २ ।
इत्यमरः ॥

अतिरेकः, त्रि, (अति रिच् + भावे घञ् । आधिक्ये
श्रेष्ठत्वे च ।) अतिशयः । यथा,—
"सम्पूर्णे तूभयोर्भेद्यमतिरेके परेऽहनि" ।
इति तिथ्यादितत्त्वं ॥

अतिरोगः, पुं, (अत्यन्तोरोगः व्याधिः अति रुज् +
भावे घञ् ।) क्षयव्याधिः । इति राजनिर्घण्टः ॥

अतिरोमशः, पुं, (अतिशयितं रोम तदेव विद्यतेऽस्य
अतिरोमन् + मत्वर्थे श) वनच्छागलः । इति
हारावली ॥ वृहत्वानर इति केचित् ॥ अति-
शयलोमयुक्ते त्रि ॥

अतिलोमशा, स्त्री, (अतिशयितं लोम अतिलोमन् +
मत्वर्थे श, स्त्रियां टाप् ।) नीलवुह्ना । इति रत्न-
माला ॥

अतिवर्त्तुलः, पुं, (अतिशयितो वर्त्तुलः कर्म्मधारयः ।)
कलायविशेषः । वाँटुला कड़ाइ इति भाषा । इति
रत्नमाला ॥ अस्य गुणाः कलायशब्दे द्रष्टव्याः ॥

अतिवादः, पुं, (अति + वद् + भावे घञ् ।) अभि-
वादः । परुषोक्तिः । इत्यमरटीकायां रमानाथः ॥
("अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥ मनुः ।)

अतिविकटः, पुं, (अतिशयितो विकटः भीषणः)
दुष्टहस्ती । इति शब्दमाला ॥ अतिकराले त्रि ॥

अतिविषा, स्त्री, (विषमतिक्रान्ता प्रादिसमासः । वा
विषमतिक्रान्तं यया बहुव्रीहिः ।) वृक्षविशेषः ।
आतइच । आतैच इति भाषा । तत्पर्य्यायः । विश्वा
२ विषा ३ प्रतिविषा ४ उपविषा ५ अरुणा ६
शृङ्गी ७ महौषधं ८ । इत्यमरः ॥ काश्मीरा ९
श्वेता १० । इति रत्नमाला ॥ श्वेतकन्दा ११
भङ्गुरा १२ भङ्गुरा १३ विरूपा १४ श्यामकन्दा
१५ विषरूपा १६ वीरा १७ माद्री १८ श्वेत-
वचा १९ अमृता २० । इति राजनिर्घण्टः ॥ तस्या
गुणाः । पाचकत्वं । पाचित्वं । दोषत्रयहारित्वञ्च ।
इति राजवल्लभः ॥ कटुत्वं । कफपित्तज्वरामा-
तिसारकासविषच्छर्द्दिनाशित्वञ्च ।
"विविधातिविषा प्रोक्ता शुक्ला कृष्णा तथारुणा ।
रसवीर्य्यविपाकेषु निर्व्विशेषगुणाधिका" ॥
इति राजनिर्घण्टः ॥
"विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा ।
शुक्लकन्दा चोपविषा भङ्गुरा घुणवल्लभा ॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् ।
कफपित्तातिसारामविषकासवमिक्रिमीन्" ॥
इति भावप्रकाशः ॥

अतिविस्रब्धनवोढ़ा, स्त्री, (अतिविस्रब्धा अति-
प्रत्ययरहिता नवोढ़ा प्रथमदिनी नायिका इति यावत्
कर्म्मधारयः ।)स्वीयान्तर्गतमध्यनायिकाभेदः । तस्याः
लक्षणं । नायकातिशयप्रत्यययुक्ता । अस्याश्चेष्टा ।
सधैर्य्यसापराधनायके वक्रोक्तिः । अधैर्य्यसापरा-
धनायके परुषवाक् । इति रसमञ्जरी ॥

अतिवृष्टिः, स्त्री, (अतिशयेन वृष्टिः वर्षणं ।) अति-
शयवृष्टिः । ईतिविशेषः । स तु मन्ददर्शयत्नरूपः
शस्योपघातजनकः । यथा,—
"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षड़ेता ईतयः स्मृताः ॥
इति पराशरः ॥

अतिवेलं, क्ली, (वेलां मर्य्यादां कूलं वा अतिक्रान्तं
प्रादिसमासः, क्लत्वं ।) अतिशयिते त्रि । इत्यमरः ॥
(जलमतिवेलं पयोराशेः ॥ नीतिमाला) ।

अतिव्यथा, स्त्री, (अत्यन्ता व्यथायातना कर्म्मधारयः ।
व्यथ + भावे अङ् स्त्रियां टाप् ।) अतिशययातना ।
तीव्रवेदना । इति शब्दरत्नावली ॥

अतिव्याप्तिः, स्त्री, (अतिशयेन व्याप्तिर्व्यापनं ।) अतिशय-
व्यापनं । अलक्ष्ये लक्षणस्य गमनं । यथा साध्या-
भाववदवृत्तित्वमिति व्याप्तिलक्षणे धूमवान् वह्नि-
रित्यत्र धूमाभावाधिकरणवृत्तित्वाभावमादाय
अतिव्याप्तिः । इति तार्किकाः ॥ साध्यवदित-
राभावावच्छेदेन [illegible]
[illegible] मल्लगताल्पं
भानुमत्यिति अतिव्याप्तिवारणाय [illegible]
तिन विधेयमीयं । इति मल्लमागतायटीका ॥
[illegible]
[illegible] घटादावतिव्याप्तिवारणाय [illegible]
इति तिथ्यादितत्त्वटीका च ॥

अतिशक्तिता, स्त्री, (अतिशयिता शक्तिः कर्म्मधारय-
सामर्थ्यं यस्य बहुव्रीहिः, तस्य भावः तल् स्त्रियां
टाप्) विक्रमः । महाबलं । इत्यमरः ॥

अतिशक्तिभाक् [ज्] पुं, (अतिशयिता शक्तिः कर्म्म
साधनसामर्थ्यं कर्म्मधारयः । तां भजते अतिशक्ति
+ भज् + कर्त्तरि ण्विः, उपपदसमासः ।) अति-
शयशक्तिविशिष्टः । अतिसमर्थः । सर्व्वार्थसाधकशक्ति-
भाक् । इत्यमरः ॥

अतिशयः, पुं, (अति + शी + अच्) आधिक्यं । तत्-
पर्य्यायः । भरः २ अतिवेलं ३ भृशं ४ अत्यर्थं ५
अतिमात्रं ६ उद्गाढ़ं ७ निर्भरं ८ तीव्रं ९
एकान्तं १० नितान्तं ११ गाढ़ं १२ वाढ़ं १३
दृढ़ं १४ । इत्यमरः ॥ अतिशयोक्तः १५ उरु-
कर्षः १६ । इति हेमचन्द्रः ॥ [illegible]
[illegible] । इत्य-
[illegible] ॥
इति [illegible] ॥

अतिशयनं, क्ली, (अति + शी + भावे ल्युट्) अति-
शयः । [illegible] त्रि । [illegible] ।
[illegible]
[illegible] ॥

अतिशायनं, क्ली, (अति शी + कर्त्तरि [illegible]

ल्युट्।) अतिशयनं। इति शब्दरत्नावली॥ (आधिक्यं। प्रकर्षः। प्रशंसा।)

अतिशोभनः, त्रि, (अतिशोभते अति + शुभ + कर्त्तरि ल्युः।) अतिशयशोभायुक्तः। अतिप्रशस्तः। श्रेष्ठः। इत्यमरः॥

अतिसर्ज्जनं, क्ली, (अतिशयेन सर्ज्जनं दानं अति + सृज् + भावे ल्युट्) अतिशयदानं। तत्पर्य्यायः। विलम्भः २। इत्यमरः॥ दानं। वधः। इति मेदिनी॥ (विधुरां ज्वलनातिसर्ज्जनात् ननु मां प्रापय पत्युरन्तिकं॥ इति कुमारसम्भवे॥)

अतिसारः, पुं, (अतिशयेन मलं द्रवीकृत्य सरति निःसारयति अति + सृ + आधिमत्स्यबलेष्विति वक्तव्यमिति वार्त्तिकसूत्रेण कर्त्तरि घञ् वृद्धिर्दीर्घश्च।) बहुद्रवमलनिःसरणरोगः। तत्पर्य्यायः। आमग्रन्थिः २ उदरामयः ३। इति त्रिकाण्डशेषः॥ अतीसारः ४। इति वैद्यकं॥ *॥ तस्य निदानं।

"गुर्व्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः।
विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः॥
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः।
शोकाद्दुष्टाम्बुमद्यातिपानैः सात्म्यर्त्तुपर्य्ययैः॥
जलाभिरमणैर्व्वेगविघातैः क्रिमिदोषतः।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते"॥

संप्राप्तिर्यथा,—
"संशम्यापां धातुरग्निं प्रवृद्धः
शकृन्मिश्रो वायुनाधः प्रणुन्नः।
सरत्यतीवातिसारं तमाहु-
र्व्याधिं घोरं षड्विधं तं वदन्ति॥
एकैकशः सर्व्वशश्चापि दोषैः
शोकेनान्यः षष्ठ आमेन चोक्तः"॥ *॥

पूर्व्वरूपं यथा,—
"हृन्नाभिपायूदरकुक्षितोद-
गात्रावसादानिलसन्निरोधाः।
विट्सङ्ग आध्मानमथाविपाको
भविष्यतस्तस्य पुरःसराणि॥"

[इ]ति माधवकरः॥ अथ सामान्यातिसारस्य
[चि]कित्सामाह।

[आ]मपक्वक्रमं हित्वा नातिसारक्रिया यतः।
[अत]ोऽतिसारे सर्व्वस्मिन्नामं पक्वञ्च लक्षयेत्॥
[...]चिकित्सा। तत्रामपक्वदोषलक्षणं।
[...]ृष्मान्वैर्दोषैस्त्वप्सु निमज्जति।
[...] शकृदुर्गन्धि पिच्छिलं चामसंज्ञितं॥
[...]न्तु विपरीतानि यस्य वै।
[...] विद्धेव तत्तु पक्वं विनिर्दिशेत्॥
[...]मादावं दद्यात् पूर्व्वमामातिसारिणे।
[...]स्थितो हि निर्य्यान् कुरुते बहून्॥
[...]ामयं शोथपाण्डुप्लीहरुजाः।
[...]रोचकाध्मानविबन्धज्वराम्॥
[...]ानाहं बहुरोगं समाचरेत्।
[...]मेव दद्यात् पाचनार्थं भिषक्।
[...]ः स्वल्पे स्वल्पे प्रसादयेत्।
[...]रं तद् पाचयेत् तदा शमयेत्॥

लङ्घनमेव दोषदुःखपिपासायां दोषपाकात् मङ्गलविधिमाह्वयन्तं योगचतुष्टयमाह,—
"धान्योदीच्यशृतं तोयं दद्यादाहातिसारिणे।
क्वीवेरशृङ्गवेराभ्यां मुस्तपर्पटकेन वा॥
मुस्तोदीच्यशृतं शीतं प्रदातव्यं पिपासवे।
हितं लङ्घनमेवादौ पूर्व्वरूपेऽतिसारिणः॥
कार्य्यं वानशनस्यान्ते प्रद्रवं लघुभोजनं।
पथ्यादारुवचामुस्तैर्नागरातिविषान्वितैः॥
आमातीसारनाशाय क्वाथमेभिः पिबेन्नरः।
पथ्यादिक्वाथः॥ *॥
"पाठाहिङ्ग्वग्नमोदोयापथ्याशोणाब्दगं रजः।
उष्णाम्बुपीतं सरुजं जयत्यामं ससैन्धवं॥"
पाठादिचूर्णं॥ *॥
"हरीतकीं सातिविषां हिङ्गु सौवर्च्चलं वचां।
सैन्धवञ्चापि संपिष्य पाययेदुष्णवारिणा॥
आमातिसारं योगोऽयं पाचयित्वा चिकित्सति।
आमातिसारो योगेन यद्येतेन न शाम्यति।
न तं योगशतेनापि चिकित्सति चिकित्सकः॥"
चिकित्सति अपनयति। हरीतक्यादिकल्कः॥ *॥
"वत्सकातिविषा बिल्वमुस्तबालकजं शृतं।
अतीसारं जयेत् सामं चिरजं रक्तशूलजित्॥"
वत्सकादिक्वाथः॥ *॥
"एरण्डरससंपिष्टं पक्वमामञ्च नागरं।
आमातिसारशूलघ्नं दीपनं पाचनं परं॥"
नागरस्य पुटपाकः कल्कश्च॥ *॥
"धान्यबालकबिल्वाब्दनागरैः पाचितं जलं।
आमशूलविबन्धघ्नं पाचनं नित्यसेवितं॥"
धान्यपञ्चकं॥ *॥
"पित्ते धान्यचतुष्कन्तु शुण्ठीत्यागाद्वदन्ति।
रक्तेऽपि पित्तसाधर्म्यात्तद्धितं धान्यचतुष्कं॥ इति आमातिसारस्य चिकित्सा।
"सलोध्रं धातकीबिल्वं मुस्ताम्रास्थिकलिङ्गकं।
पिबेन्माक्षिकयुक्तेन पक्वातीसारनाशनं॥"
लोध्रादिचूर्णं॥ *॥
"अम्बष्ठा धातकी लोध्रं समङ्गा पद्मकेशरं।
मधुकारलुबिल्वञ्च पक्वातीसारहा गणः॥"
अरलुः श्योनाकः। पाठादिर्गणः॥ *॥
"समङ्गा धातकीपुष्पं मञ्जिष्ठा लोध्रमेव च।
शाल्मलीवेष्टको लोध्रो दाडिमद्रुमवल्कलौ।
आम्रास्थिमध्यं लोध्रञ्च बिल्वमध्यं प्रियङ्गु च
मधूकं शृङ्गवेरञ्च दीर्घवृन्तत्वगेव च।
चत्वार एते योगाः स्युः पक्वातिसारनाशनाः
ते योगा उपयोज्याः स्युः सक्षौद्रास्तण्डुलाम्बुना
समङ्गा लज्जालुः। शाल्मलीवेष्टको मोचरसः
दाडिमस्य द्रुमस्य दोर्म्लवधौ। प्रियङ्गोर्पुंसकाप्यमः
पक्वे वर्त्तमानता तृ शृङ्गवेरमत्र शुण्ठी। दीर्घवृन्तः
श्योनाकः तस्य त्वक्। समङ्गादीनि चत्वारि चूर्णानि।
"कुटजमधुदाडिमशृङ्गाटकफलविल्वरहितं। जल-
धरनागरसहितं मङ्क्षामपि वेगवाहिनीं रुन्ध्यात्"॥
कुटजं चतुरादि शाकस्य भेदः। कुटजादिभि-
श्चतुर्भिः पञ्चकम् समग्रवे। रहितं वागकं
गङ्गाधरपादः॥ *॥

रक्तातीसारस्य संप्राप्तिमाह,—
"पित्तकृन्ति यदात्यर्थं द्रव्याण्यश्नाति पैत्तिके ।
तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्बणः ॥"
तस्य चिकित्सा ।
वत्सकतरुत्वगार्द्रा दाड़िमफलसम्भवा त्वक् च ।
पलयुगलं पलमानं विपचेदष्टांशसम्मिते तोये ॥
अष्टमभागं शेषं क्वाथं मधुनापिबेत् पुरुषः ।
रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतं ॥
कुटजदाड़िमक्वाथः ॥ * ॥
"कुटजातिविषा मुस्तं वालकं लोध्रचन्दनं ।
धातकी दाड़िमं पाठा क्वाथमेषां समाक्षिकं ॥
पिबेद्रक्तातिसारे तु दाहशूलामसंयुते ।
कुटजादिकषायोऽयं सर्व्वातीसारनाशनः ॥"
चन्दनमत्र रक्तचन्दनं । कुटजादिक्वाथः ॥ * ॥
"गुड़ेन भक्षयेद्बिल्वं रक्तातीसारनाशनं ।
आमशूलविबन्धघ्नं कुक्षिरोगहरं परं ॥"
बिल्वं सुस्विन्नं बालबिल्वगर्भं शीतं तदुत्स्वेदनोदकं
चानुपेयं । गुड़बिल्वं ॥ * ॥
"जम्ब्वाम्रामलकीनान्तु कुट्टयेत् पल्लवान् नवान् ।
संगृह्य स्वरसं तेषां छागक्षीरेण योजयेत् ॥"
तत्पिबेन्मधुना युक्तं रक्तातीसारनाशनं ।
जम्ब्वादिस्वरसः ॥ * ॥
"निष्क्वाथ्य मूलममलं शिशिरस्निग्धायाः
सम्यक् पलद्वितयमम्बुचतुःशरावे ।
तत्पादशेषमनिलं खलु शीतवीर्य्यं
क्षीरे पलद्वयमिते कुशलैश्च यदाः ॥
प्रक्षिप्य माषकाष्टौ मधुनश्च शीतले ।
रक्तातिसारी तत्पीत्वा नैरुज्यं क्षिप्रमाप्नुयात्" ॥
कुटजक्षीरं ॥ * ॥
"पीत्वा शतावरीकल्कं पयसा क्षीरभुक् जयेत् ।
रक्तातिसारं पीत्वा वा तया सिद्धं घृतं नरः ॥"
शतावरीकल्कघृतञ्च ॥ * ॥
"गोदुग्धचीनितन्तु मधुना सितया सह ।
पीतं रक्तातिसारे तु याष्टिकं परमं मतं" ॥
[illegible] ॥ * ॥
"पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना ।
रक्तातिसारं [illegible]" ॥
चन्दनमत्र श्वेतं । चन्दनकल्कः ॥ * ॥
"[illegible] गुदं [illegible] ।
[illegible]" ॥
[illegible] ।
"[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
"[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।

प्रविष्टं स्वेदयेन्मन्दं मूषकस्यामिषेण हि ॥"
मूषकस्यामिषेण काञ्जिकेनोत्स्विन्नेन एरण्ड-
पत्रादिस्थापितेन स्वेदयेत् ।
"मूषकस्याथ वसया पायुं सम्यक् प्रलेपयेत् ।
गुदभ्रंशाभिधो व्याधिः प्रशाम्यति न संशयः ॥
चाङ्गेरीकोलदध्यम्लनागरक्षारसंयुतं ।
घृतं विपक्वं पातव्यं गुदभ्रंशगदापहं ॥
चाङ्गेरी चतुष्पत्रा अम्ललोनिका तस्याः स्वरसः
कोलस्य क्वाथः दध्यम्लं दधिरूपमम्लं एतत्रयं
मिलितं घृताच्चतुर्गुणं । क्षारनागरयोः कल्कः ।
चाङ्गेरीघृतं ॥ * ॥
"कोमलं पद्मिनीपत्रं यः खादेच्छर्कराम्वितं ।
एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः ॥
पद्मिनीपत्रं पुरइनिपत्रं तत्संशोष्य संचूर्ण्य शर्करा
युक्तं खादेत् । अयन्तु गुदभ्रंशोऽतीसारं विनापि
भवति । ततः क्षुद्ररोगेषु लिखितः । अत्र तु
गुदस्य दाहसाम्यात् प्रसङ्गात् भ्रंशोऽपि लिखितः ।
चिकित्सा तूभयत्र तुल्यैव ॥ * ॥ अथ श्लेष्माति-
सारस्य लक्षणं ।
"श्वेतं स्निग्धं घनं विस्रं शीतलं मन्दवेदनं ।
गौरवादिसंयुक्तं श्लेष्मणा सार्य्यते भृशत् ॥
विस्रं स्यादामगन्धि यत् ॥ * ॥ अथ तस्य चिकित्सा ।
"श्लेष्मातिसारे प्रथमं हितं लङ्घनपाचनं ।
योज्यश्चामातिसारघ्नो यथोक्तो दीपनो गणः ॥
पथ्यातिविषा कुष्ठं बालबिल्वं समागरं ।
वत्सकत्वक्फले पथ्या हर्द्दि श्लेष्मातिसारनुत्" ॥
पथ्यादिक्वाथः ॥ * ॥
"हिङ्गुसौवर्चलं व्योषमभयातिविषा वचा ।
पीतमुष्णाम्बुना चूर्णमेषां श्लेष्मातिसारनुत् ॥"
हिङ्ग्वादिचूर्णं ॥ * ॥
"शमिरामदधाविल्वदेवीधान्याग्रवाटरणं ।
यथा क्वाथं नियच्छात् चलीसारे बलाकजे" ॥
विड़ङ्गादिक्वाथः ॥ * ॥ अथ द्विदोषजातिसाराणां
लक्षणानि चिकित्सा च ।
"द्विदोषलक्षणैर्विद्यादतीसारं द्विदोषजं ।
तेषां चिकित्सा प्रोक्तैव द्विदोषा च विधीयते ॥
कटूफलं मधुरं लोध्रत्वक् दाड़िमफलस्य च ।
[illegible] चूर्णं वातपित्तातिसारनुत्" ॥
वातपित्तातिसारे ॥ * ॥
"चित्रकातिविषा मुस्तं बालबिल्वं समागरं ।
वत्सकत्वक्फलं पथ्या वातश्लेष्मातिसारनुत्" ॥
वातश्लेष्मातिसारे ॥ * ॥
"मुस्ता कालिङ्गविषा मूर्व्वा वचा च कुटजं समाः ।
[illegible] पित्तश्लेष्मातिसारनुत्" ॥
पित्तश्लेष्मातिसारे । अथ त्रिदोषातिसारस्य लक्षणं ।
"[illegible]
[illegible] ।
[illegible]
[illegible]" ॥
अथ तस्य चिकित्सा ॥ * ॥
"[illegible] ।
[illegible] ॥

सर्व्वान् हन्त्यतीसारं ज्वरञ्चापि तथा वमिं ।
सशूलोपद्रवं श्वासं कासं वापि सुदुस्तरं ॥
पञ्चमूल्यत्र सामान्या पित्ते योज्या कनीयसी ।
वाते पुनर्व्वलासे च सा योज्या महती भवा" ॥
वर्द्धितं बालकं । पञ्चमूल्यादिक्वाथः ॥ * ॥
"वचया नागरं मुस्तं गुड़ेन सह योजितं ।
चतुःसमेयं गुटिका स्यात्त्रिदोषातिसारनुत् ॥
आमातिसारमानाहं सविबन्धं विसूचिकां ।
हमीनरोचकं हन्याद्दीपयत्याशु चानलं" ॥
चतुःसमो मोदकः ॥ * ॥
"तत्कालाहृतकुटजत्वचं तण्डुलवारिणा ।
पिष्टां चतुःपलमितां जम्बुपत्रवेष्टितां ॥
सूत्रेण बद्धा गोधूमपिष्टेन परिवेष्टितां ।
लिप्ताञ्च घनपङ्केन निर्द्दहेद्गोमयाग्निना ॥
अङ्गारवर्णाञ्च मृदं दृष्ट्वा वह्नेः समुद्धरेत् ।
ततो रसं समादाय शीतं क्षौद्रयुतं पिबेत् ॥
उग्रः शमयानिपुणैरयं पुटपाकस्तु कौटजः ।
जयेत् सर्व्वानतीसारान् दुस्तरान् सर्व्वरोगोत्थितान्
कुटजपुटपाकः ॥ * ॥
"कुटजस्य घृतः क्वाथो घनपूतो घनीकृतः ।
स लीढोऽतिविषायुक्तः स्यात्त्रिदोषातिसारनुत् ॥
[illegible] क्वाथादतिविषारजः ।
प्रक्षिपेत्ता चतुर्थांशमिति केचिद्वदन्ति हि" ॥
कुटजावलेहः ॥ * ॥
"पलमङ्कोटमूलस्य पाटां दार्व्वीञ्च तत्समां ।
पिष्ट्वा तण्डुलतोयेन वटकान् काम्लितान् ॥
छायाशुष्कांश्च तान् पश्चात्तैरेवं तण्डुलाम्बुना ।
पेषयित्वा प्रयोक्तव्या मात्राय मतिमान् भिषक् ॥
वातपित्तकफोद्भूतान् द्वन्द्वजान् सान्निपातिकान् ।
हन्यात् सर्व्वानतीसारान् वटकोऽयं प्रयोजितः" ॥
अङ्कोटवटकः ॥ * ॥ अथाग्नेयस्य शोकाति-
सारस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।
[illegible]
[illegible] ।
[illegible]
[illegible] ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

लात्। एषोऽतिसारः वैद्यैः कष्टः कष्टेन साध्यः। प्रदिष्टः कथित इत्यर्थः ॥ * ॥ अथागन्तुजत्वेन साम्यात् भयातिसारस्यापि संप्राप्तिपूर्व्वकं लक्षण-मत्रैवाह।

"भयेन क्षोभिता दोषा दूषयन्ति मलं यदा।
तदातिसार्य्यते तन्तु क्षिप्रमुष्णञ्चलद्रवं॥'
वातपित्तातिसारस्य प्रायो लिङ्गैः समन्वितं।
न भयोपशमाच्छाम्यै यस्मिन् स्यात् स भयात् स्मृतः॥

द्रवत इति द्रवं जले द्रवमानं। ननु भयाति-सारस्य कथमागन्तुजत्वमपि दोषज एव। दत आह। भयेन क्षोभिता दूषिता दोषा मलं दूषयन्ति। तन्मलमतिसरति। अत्र पूर्व्वमेव दोषसम्बन्धः। उच्यते।

"रागद्वेषभयात् ये च ते स्युरागन्तवो गदाः"।
इति वचनाद्भयातीसार आगन्तुज एव। शोकस्य चयमर्थः। भयेनैव हेतुभूतेन दोषा वातपित्त-कफा अतीसारणाय क्षोभिताः सञ्चालिताः न दूषिता भयेन भयाख्यामपि दोषाणां दूषणासम्भ-वात्। अतिसर्त्तुं चलिता वातपित्तकफा मलं दूषयन्ति तत् सर्व्वं वातपित्तकफमलं भयेनैवाति-सार्य्यते। यद्यावातसम्बन्धो भयादागुरिति वच-नादिति समाधिः ॥ * ॥ अथ तयोश्चिकित्सा।

"भयशोकसमुद्भूतौ ज्ञेयौ वातातिसारवत्।
तयोर्व्वातहरी कार्य्या हर्षणाश्वासनैः क्रिया"॥

वातातिसारवत् वातातिसारलक्षणैः। तयो-श्चिकित्सा च हर्षणाश्वासनपूर्व्विका वातहरी कार्य्या ॥ * ॥ अथामातीसारस्य संप्राप्तिपूर्व्वकं लक्षणमाह।

"अन्नाजीर्णात् प्रद्रुताः क्षोभयन्तो
दोषाः कोष्ठे धातुसंघात् मलांश्च।
नानावर्णं नैकशः सारयन्ति
शूलोपेतं षष्ठमेनं वदन्ति॥

अयं शूलं तदजीर्णं चेति कर्म्मधारये अन्नाजीर्णं तस्मात् प्रद्रुता उपद्रुताः। क्षोभयन्तः आत्म-स्थं। भेदेन इदन्तु आमादिनामापरविष-दर्शः। कथमेव दोषा दूष्यन्ते पूर्व्वादिभ्य-...

...

आमातिसारस्य चिकित्सा पूर्व्वमुक्तैव ॥ * ॥

"शोथघ्नीन्द्रयवाः पाठा विश्वातिविषा घनाः।
क्वथिताः शोथघ्नाः पीताः शोथातिसारनाशनाः"॥

शोथघ्नी पुनर्नवा। उषणं मरिचं। सशोथाती-सारे ॥ * ॥

"आम्रास्थिमध्यमाम्रूरपल्लकाथः समाक्षिकः।
मान्दूरपर्णं विल्वयवं।
हन्यात् छर्द्दतीसारमुल्वणं॥"
"कषायो मधुमूदस्य सलाजमधुशर्करः।
निहन्याच्छर्द्दतीसारं दध्यादाढं ज्वरं भ्रमं"॥

छर्द्दतीसारे ॥ * ॥

"दध्ना ससारेण समाक्षिकेण
भुञ्जीत निःसारकपीड़ितश्च।
सुतप्तकुप्यक्वथितेन चापि
क्षीरेण शीतेन मधुप्लुतेन"॥

निःसारकः निष्कासी इति लोके। सुतप्तकुप्य-क्वथितेन। सुतप्तसुवर्णरजततरलौहनिर्व्वापण-क्वथितेन। भुञ्जीत पथ्यमिति शेषः ॥ निःसा-रके ॥ * ॥

"दीप्ताग्निर्निष्पुरीषो यः सार्य्यते फेनिलं शकृत्।
स पिबेत् फाणितं शुण्ठीं दधि तैलं पयो घृतं॥
वचा विश्वाघृतं क्षीरं गुड़तैलानुयोजितं।
दीप्ताग्निं पाययेत् प्रातः सुखरं वर्च्चसक्षये"॥

पुरीषक्षये ॥ * ॥

"शुण्ठीं संकुच्य विल्वस्य पचेत् पादावशेषितं।
सक्षीरं साधयेत्तैलं शृणुपिष्टैरिमैः समैः॥
विल्वं सधातकीकुष्ठं शुण्ठी रास्ना पुनर्नवा।
देवदारु वचा मुस्तं लोध्रमोचरसान्वितं॥
रभिर्म्मृदर्गिमा पक्वं यद्यग्योऽतिसारजुत्।
बिल्वतैलमिति ख्यातमग्निप्रलेप भाषितं॥
यद्यन्योऽधिकारे ये येऽत्र समुपदर्शिताः।
प्रयोज्यास्तेऽतिसारेऽपि नयायां तुल्यहेतुता"॥

नयायां यद्यन्योऽतिसारायां। विल्वतैलं ॥ * ॥ अथातिसारभेदस्य प्रवाहिकाख्याधेः संप्राप्ति-पूर्व्वकलक्षणमाह।

"वायुः प्रवृद्धो निचितं बलासं
नुदत्यधस्तादहिताशनस्य।
प्रवाहतोऽल्पं बहुशो मलाक्तं
प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः"॥

अस्यायमर्थः। अहिताशनस्य अतिशयेन वातल-भक्ष्यभोजिनः। प्रवृद्धो वायुः प्रवाहतः कण्ठ-शुष्कत्वेन सञ्चयं वादमपानमार्गैव व्यक्तः। निचितं सञ्चितं। बलासं कफं। मलाक्तं पुरी-षयुक्तं अल्पं। बहुशः वारंवारं। अधस्तात् गुदमार्गेण। नुदति प्रेरयति। तज्ज्ञाः पुरा-णा वैद्याः। तां प्रवाहिकां। प्रवदन्ति कथ-यन्ति ॥ * ॥

तस्या वातादिभेदेन लक्षणमाह।

"प्रवाहिका वातकृता सशूला
पित्तात् सदाहा सकफा कफाच्च।
सशोणिता शोणितसम्भवाच्च
ताः स्नेहरूक्षप्रभवा मताश्च"॥

...

विष्णादिदवलेहः ॥ * ॥

"धातकीबदरीपत्र...
सलोध्रमेकतो दध्ना पि...
एकतः प्रत्येकं दध्ना पिबे...
प्रवाहिका। धातक्यादिः...
तिसारिणोऽसाध्यलक्षणमाह।

"पक्वजाम्बवसंकाशं यकृत्खण्ड...
घृततैलवसामज्जवेसवारपयो...
मांसधावनतोयाभं कृष्णं नील...
दध्यादाढकवित्रमानिसारजु...
संमूर्च्छारतिसंमोहयुक्तं पक्वगुद...
प्रलापयुक्तश्च भिषक् वर्ज्जयेदतिसारिण...
असंवृतगुदं क्षीणं शूनाध्मानैरपद्रुतं।
गुदे पक्वे गतोष्माणमतीसारिणमुत्सृजेत्॥
असंवृतगुदं गुरुवर्णस्वाद्यं।
गुदे पक्वे गतोष्मायं गुदपाकर्...
विद्यमानेऽपि शीतगात्रं नष्टाग्निं वा।
"श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितं।
विशेषेण नरं वृद्धमतीसारो विनाशयेत्॥
शोथं शूलं ज्वरं तृष्णां श्वासं कासमरोचकं।
छर्द्दिमूर्च्छाञ्च हिक्काञ्च दृष्ट्वातिसा...
हस्तपादाङ्गुलीसन्धिप्रपाकी मूत्र...
पुरीषस्तोयातीव मरणायातिसा...
अतीसारी राजरोगी यक्ष्मीरोगा...
मांसादिवर्णहीनो यो दुर्लभं तस्य जीव...
बाले वृद्धे त्वसाध्योऽयं लिङ्गैरेतैरपदुतः।
अपि युवामसाध्यः स्यादतिदुष्टेव शुद्...
एतैर्लिङ्गैः पक्वाद्वैः पक्वजाम्बवसंकाशता...
अथातिसारमुक्तस्य लक्षणं।

"यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति।
दीप्ताग्नेर्लघु कोष्ठस्य स्थितस्तस्योदरामयः"॥

उच्चारं पुरीषं विना स्थित निवृत्त उदरा...
ऽनातिसारः ॥ * ॥ अथातीसारिणो वर्ज्यानि।

"आमवगाहनाभ्यङ्गगुरुस्निग्धादिभोजनं।
व्यायाममग्निसन्तापमतीसारी विवर्ज्जयेत्"।

स्नानयुक्तजलेन। अवगाहन मज्जनं। ...
सारांधिकारः। इति भावप्रकाश।

अतिसारकी, [न्] त्रि, (अतिसार + ... ततो मत्वर्थे इन्) सातिसार। अतिसारी...
दुष्टः। उदरामयी। इत्यमर॥

अतिसाम्या, स्त्री, (साम्यं समतामतिक्रान्ता...
दीति समासः अतुल्यत्वगुणा इति ...

यष्टिमधु। इति राजनिर्घण्टः॥ अस्या गुणाः …नकशब्दे द्रष्टव्याः॥ (यष्टिमधु इति भाषा।)

…करः, त्रि, (स्फायी अोष्याया वृद्धौ अति + य + स्फायितञ्चिवञ्चिशकीत्यादिसूत्रेण रक् …दरादित्वात् आयभागस्य इ अतिवृद्धः) …स्फूर्त्तिशाली। तत्पर्य्यायः। स्फेठः २। इति …धरः॥

…सितं, क्ली, (अतिशयेन हसितं हास्यं हस् + …क्तः।) अतिशयहास्यं। इति जटाधरः॥ …ठानां स्मितहसिते मध्यानां विहसितावहसिते च। नीचानामपहसितं तथातिहसितञ्च भेदाः॥ "मधुरस्वरं विहसितं सांसशिरःकम्पमवहसितं। अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितं"॥ इति साहित्यदर्पणे॥)

…हासः, पुं, (अतिशयेन हासः हास्यम् अति + हस् + भावे घञ्।) सशब्दहासः। तत्पर्य्यायः। …स्यूतः २। इति हेमचन्द्रः॥

…, त्रि, (अति + इण् + क्तः) भूतकालः। तत्र …क्तो घी टी ठी विभक्तयो भवन्ति। यथा …द्भूतभये त्रिघः क्वादाः। क्वादाः क्तयक्तिवन्तः क्रमाद्वर्त्तमानातीतभविष्यत्सु कालेषु स्युः। इति मुग्धबोधव्याकरणं॥ तस्य लक्षणादि यथा। …वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वं। लङ्लुङोरतीतत्वं। लिट्क्तसोर्व्वक्तुः परोक्षत्वं अतीतत्वञ्च। …डोऽतीतत्वं क्रियातिक्रमस्य। कुतश्चिद्वैगुण्यात् क्रियानिष्पत्तिः क्रियातिक्रमः। क्तक्तवत्वोरतीतत्वं। इति सारमञ्जरी॥

…तः, त्रि, (अति इण् कर्त्तरि क्तः।) गतः। भूतः। …तिक्रान्तः। यथा,—

"…न नस्यं न्यूनसप्ताब्दे नातीताशीतिवत्सरे"। इति वैद्यकपरिभाषा॥ सङ्गीतशास्त्रमते मानभेदः॥

…न्द्रियं, त्रि, (इन्द्रियमतिक्रान्तम् अत्यादीति समासः।) अप्रत्यक्षं। प्रत्यक्षाविषयं। इन्द्रियागोचरं। इन्द्रियाग्राह्यं। इत्यमरः॥

("योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः"। इति मनुः।

"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः"॥ इति रघुवंशे।)

…तिव, अ, (अत्येव इव अवधारणे प्रादिसमासः, अवहतातिशयेऽत्यन्तातिशये च।) अतिशयः। इत्यमरः॥

("अहं हि कारणं श्रुत्वा वैरस्यातीवमानद"॥ इति रामायणे।)

…तीसारः, पुं, अतिसाररोगः। इति वैद्यकं॥

…तुलः, पुं, (नास्ति तुला सादृश्यं यस्य सः।) तिलवृक्षः। इति शब्दचन्द्रिका। तुलनारहिते त्रि॥ ("राक्षसेन्द्रप्रभावेण श्रिया चातुलया तथा"॥ इति रामायणे॥)

…तुल्यं, त्रि, (न तुल्यं सदृशं नञ्समासः।) निस्तुल्यं। अनुपमं। असाम्यं। असदृशं। यथा,—

"अतुल्यमहसा साकं मम रामेण विग्रहः"। इति भट्टिः॥

अतुष्टिकरं, त्रि, (तुष्टिं सन्तोषं करोति तुष्टि + कृ + कर्त्तरि टच् उपपदसमासः स्त्रियां ङीप् अतुष्टिकरी।) सन्तोषाजनकं। यथा मनुः,—

"अनिर्द्दशञ्च प्रेतान्नं अतुष्टिकरमेव च"॥ इत्याह्निकतत्त्वं।

अतृप्तिः, स्त्री, (तृप् + भावे क्तिन् न तृप्तिः सन्तोषः नञ्समासः। बहुव्रीहौ तु तृप्तिरहितः असन्तोषकरः।) तृप्त्यभावः। अपरितुष्टिः। अन्नाभिलाषः। यथा,—

"उष्णार्त्तृप्तितमः प्रवेशदहनं कट्वम्लतिक्ता रसा।
वर्णः पाण्डुविवर्जितः क्षयितता कर्म्माणि पित्तस्रवे"
इति रक्षितः॥ अतृप्ते त्रि॥

अतेजः, [स्] क्ली, (न तेजः तेजोविरोधितमः नञ्समासः।) छाया इति राजनिर्घण्टः॥ तेजोरहिते त्रि॥

अत्कः, पुं, शरीरावयवः। अङ्गं। इत्युणादिकोषः॥

अत्कः, त्रि, (अतति सततमनित्यतया विकारं गच्छति अत् + कन् अतति सततं गच्छति अत् + कन्) पथिकः। पान्थः। इत्युणादिकोषः॥

अत् ट ङ अतिक्रमे। वधे। इति कविकल्पद्रुमः॥ दन्त्यवर्गाद्योपधः। ङ अतिट्टियते। इति दुर्गादासः॥

अत्ता, स्त्री, (अतति सततं स्नेहं संबध्नाति अत् + तक् स्त्रियां टाप्।) माता। ज्येष्ठा भगिनी। इत्यमरटीकायां रमानाथः॥ अत्ता मातापि जस्वसा। इति नानार्थकोषः॥ प्राकृतभाषायां श्वश्रूः। इति साहित्यदर्पणटीका॥

अत्तिः, स्त्री, (अत्यते सततं कर्म्मणि सम्बध्यतेऽनया, अत् करणे क्तिन् माता च।) नाट्योक्तौ ज्येष्ठा भगिनी। इति शब्दरत्नावली।

अत्तिका, स्त्री, (अत्ति + स्वार्थे कन्) अन्तिका। नाट्योक्तौ ज्येष्ठा भगिनी। इति भरतः द्विरूपकोषश्च।

अत्नुः, पुं, (अतति सततं गच्छति अत् + कर्त्तरि न वायुः सततगन्ता पथिकः।) सूर्य्यः। इत्युणादिकोषः॥

अत्यः, पुं, (अतति शीघ्रं गच्छति अत् + कर्त्तरि यत्, क्वचिदपवादविषयेऽप्युत्सर्गोऽप्यभिनिविशते इति न्यायात् अन्यथा हलन्तात् ण्यति आत्य इति स्यात् द्रुतगामी अश्वः।) अश्वः। वैदिकशब्दोऽयं॥

अत्यन्तं, क्ली, (अन्तं सीमामतिक्रान्तम् अत्यादीति समासः।) अतिशयः। यथा। अत्यन्तं कठिनौ तथापि हृदयानन्दाय वक्षोरुहौ। इति नरहरिकविः॥

अत्यन्तकोपनः, त्रि, (अत्यन्तं कोपनः क्रोधशीलः द्वितीयातत्, कुप् + कर्त्तरि युच्।) अतिशयक्रोधी। तत्पर्य्यायः। चण्डः २। इत्यमरः॥

अत्यन्तगामी, [न्] त्रि, (अत्यन्तं शीघ्रं गच्छति अत्यन्त + गम् + णिनि उपपदसमासः।) अतिशयगमनशील: [illegible]गमनकर्त्ता। तत्पर्य्यायः। अत्यन्ति[illegible] हेमचन्द्रः॥

अत्यन्तः सुकुमारः, पुं, (अत्यन्तः सुकुमारः कर्म्मधारयः।) कङ्गुनीवृक्षः। इति राजनिर्घण्टः॥

अत्यन्तिकः, पुं, (अत्यन्तं गच्छति अत्यन्त + ठन् ठस्येक इति ठस्य इकः अति सातिशयमन्तिकं कर्म्मधारयः, अतिनिकटम्।) अतिशयभ्रमणकर्त्ता। अत्यन्तगामी। इति हेमचन्द्रः॥

अत्यन्तीनः, त्रि, (अन्तस्यात्ययः अव्ययीभावसमासः। अत्यन्तं गामी द्वितीयातत्पुरुषः। लक्ष्मीं परम्परीणां त्वमत्यन्तीनतामुपनये इति भट्टिः।) भृशगामी। अतिशयगमनशीलः। इत्यमरः॥

अत्यम्लं, क्ली, (अत्यन्तः अम्लोरसः फलपत्रादौ यस्य सः।) वृक्षाम्लं। इति राजनिर्घण्टः॥ तेँतुल इति भाषा॥

अत्यम्लपर्णी, स्त्री, (अत्यम्लं पर्णं पत्रं यस्याः सा जातित्वात् ङीप्।) लताविशेषः। तत्पर्य्यायः। तीक्ष्णा २ कण्डुरा ३ वल्लिसूरणः ४ करवड़वल्ली ५ वयस्था ६ अरण्यवासिनी ७। अस्य गुणाः। तीक्ष्णाम्लत्वं। प्लीहशूलविनाशित्वं। वातहारित्वं। अभिरुचिकारित्वं। गुल्मश्लेष्मरोगापहारित्वञ्च। इति राजनिर्घण्टः।

अत्यम्ला, स्त्री, (अत्यन्तः अम्लरसो यस्याः सा स्त्रियां टाप्) वनबीजपूरः। मधुरलेबु। मधुटावा इति ख्याता। इति रत्नमाला॥

अत्ययः, पुं, (अति + इण् + भावे अच्।) मृत्युः। अतिक्रमः। दण्डः। दोषः। कृच्छ्रं। इत्यमरः॥

("जीविताव्ययमापन्नो योऽन्नमत्ति यतस्ततः।
आकाशमिव पङ्केन न स पापेन लिप्यते॥
इति मनुः॥)

अत्यर्थं, क्ली, (अर्थमतिक्रान्तं अत्यादीति समासः।) अतिशयः। तद्विशिष्टे वाच्यलिङ्गं। इत्यमरः॥।

("लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया"। इति रामायणे॥)

अत्यल्पं, त्रि, (अत्यन्तमल्पं मनाक्।) यत्किञ्चित्। अतिसूक्ष्मं। तत्पर्य्यायः। अल्पिष्ठं २ अल्पीयः ३ कणीयः ४ अणीयः ५। इत्यमरः॥

अत्याकारः, पुं, (अति आधिक्येन आकारः तिरस्कारः। आ + कृ + भावे घञ्।) अतिशयितः। आकारो देहः कर्म्मधा। दृढदेहः। अतिशयितः आकारो यस्य सः तद्विशिष्टः।) न्यक्कारः। तिरस्कारः। इति हेमचन्द्रः॥

अत्याधारं, क्ली, (आधारमतिक्रान्तं [illegible] समासः।) विचक्षाचरणं। [illegible] व्ययीभावसमासनिष्पन्नं॥

अत्याचारः, पुं, (अति [illegible] अनुचिताचारः। [illegible] हर्नं। अन्यायः। [illegible] रतं दमाः

अत्याश्यं, त्रि. [illegible]

"मरीचिमयद्विरसौ प्रजस्तं पुनरं क्रतुं।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च"।)
अघिजात, पुं. (अघे‍र्जात उत्पन्नः पञ्चमीतत्पुरुषः।)
चन्द्रः। हिमभा। यथा,—
"अघिजातस्य या मूर्त्तिः शशिनः सज्जनस्य च।
सा कापि केवलाभिजातस्य तमसो दुर्जनस्य च"।
इति त्रिविक्रमभट्टः।
अघिदृग्जः, पुं. (अघेः दृक् चक्षुः षष्ठीतत्पुरुषः तस्मा
जातः अघि दृश्+जन्+ड उपपदसमासः।)
चन्द्रः। इति हेमचन्द्रः।
अघिनेत्रज, (पुं.) चन्द्रः। इति जटाधरः।
अघिनेत्रप्रसूत, पुं. (अत्रिनेत्रात् प्रसूतः पञ्चमी-
तत्पुरुषः) चन्द्रः। इति हलायुधः।
अघिनेत्रभू, पुं. (अघिनेत्रात् भवति यः अघिनेत्र+
भू+कर्त्तरि क्विप्) चन्द्रः। इति त्रिकाण्डशेषः।
अघिभारद्वाजिका, स्त्री, अत्रेश्च भरद्वाजस्य द्वन्द्वः
तयोः स्त्रीपुंसयोर्मैथुनात् जाता अत्रि भर-
द्वाज+"द्वन्द्वाद्वुन् वैरमैथुनयोरिति" वुन् तस्य
अक स्त्रियां टाप्) अत्रिभारद्वाजो विवाहः।
इति शब्दरत्नावली।
अथ, अ, (अर्थ+ड पृषोदरादित्वात् रस्य लोपः।)
मङ्गलं। अनन्तरं। आरम्भः। प्रश्नः। कार्त्स्न्यं।
इत्यमरः। अधिकारः। संशयः। विकल्पः। समु-
च्चयः। इति मेदिनी। (अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव पार्थिवः। इति रघुवंशे।)

[illegible]

अद इ बन्धे। (भादि परस्मैपदी से[illegible]
कविकल्पद्रुमः। इ अन्द्यते। इति [illegible]
अद ल श्नौ भक्षणे (अनिट् परस्मै[illegible]
इति कविकल्पद्रुमः। ल अत्ति। [illegible]
गणकृतमनित्यमिति न्यायात् श्यपि[illegible]
तीत्यपीति वररुचिः। इति दुर्गादास[illegible]
अदः [स्] त्रि, (न दस्यते अनु इदन्तात्[illegible]
दिष्यते यत्र न+दस्+बाहुल्यात् [illegible]
लिङ्गत्वञ्च।) एतत्। पुरोवर्त्ति। एद इ[illegible]
परं। परोक्षभूतं। इति मेदिनी। बे[illegible]
भाषा।
अदत्तं, त्रि, (न दत्तम् उत्कृष्टं नञ्समास[illegible]
अभावार्थे यथा कारिकायां।
"तत् सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"
इति।) अन्यायेन दत्तं। यथा। [illegible]
येन दत्तं तददत्तं। षोडशप्रकारमपि [illegible]
अमेव द्वयपांडुतां भवति। नारदेन [illegible]
सप्तविधं प्रोक्तमदत्तं षोडशात्मकमिति [illegible]
दत्तादत्तयोः स्वरूपं विवृतं।
"अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः।
बालमूढास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितं।
कर्त्ता ममायं कर्म्मेति प्रतिलाभेच्छया च यत्।
अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते।

[illegible]

शब्दकल्पद्रुमः ।

अर्थात्

एतद्देशप्रचलसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तन्त्राख्यान-काव्यालङ्कार-छन्दःप्रभृतिनाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-सत्पुरुषव्यवस्थादिसंयुक्त-सर्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः ।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः ।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्याय-धातुपरिशिष्टोदाहरणादिभिः

नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-

सप्रशस्तपरिशिष्टेन च सार्द्धम् ।

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

नागराक्षरैः

प्रकाशितः ।

प्रथमः खण्डः ।

द्वितीयमङ्गा ।

कलिकाता राजधान्यां

बाप्तिस्मिशनयन्त्रे मुद्रिताऽभूत् । शकाब्दाः १८०८ ।

"गङ्गान्तः मरौ विधा भवतः ह्राणुमिच्छति"
इति रामायणं ।)

अदत्ता, स्त्री, (न दत्ता गोत्रदत्ता नञ्समासः, नञत्र निषेधार्थः ।) अविवाहिता । इति स्मृतिः ।

अदनं, क्ली, (अद् भोजने भावे ल्युट् ।) भक्षणं । भोजनं । इति हेमचन्द्रः ॥
("इन्धनार्थमशुष्काणां द्रुमाणामवपातनं ।
आत्मार्थञ्च क्रियारम्भो निन्दितान्नादनं तथा" ॥
इति मनुः ।)

अदभ्रः, त्रि, (दन्भ + रक् । दभ्रमल्पं नदभ्रं नञ्समासः ।) प्रचुरः । बहुः । इत्यमरः ॥ (अदभ्रदर्भामधिशय्य स स्थलीं जहाति निद्रामशिवैः शिवारुतैः ॥ इति किरातार्ज्जुनीयं ।)

अदर्शनं, क्ली, (दृश् दर्शने, भावे ल्युट्, नञ्समासः ।) दर्शनाभावः । (अदर्शनस्य ते वीर भूयो मां तापयिष्यति ॥ इति रामायणं ।) असाक्षात् । दृष्ट्यगोचरं । तत्पर्य्यायः । विनाशः २ । इत्यमरः । (व्याकरणमते लोपः यथा ऋग्वेदप्रातिशाख्ये,—
"विरक्तिषु प्रत्ययादेरदर्शनम्" । इति ।)

अदलः, पुं, (न दल्यते भिद्यते यत्, न दल् + कर्म्मणि कन् ।) हिज्जलवृक्षः । इति शब्दचन्द्रिका ॥ दलरहिते त्रि ॥

अदला, स्त्री, (नास्ति दलं पत्रं यस्याः सा ।) घृतकुमारी । इति शब्दचन्द्रिका ॥

अदाता, त्रि, (न दाता नञ्समासः । दा + तृच् ।) कृपणः । दानशक्तिरहितः । यथा,—
"अदाता पुरुषस्त्यागी सधनं त्यज्य गच्छति" ।
इति प्राचीनाः ॥
("काले दाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।
मृते भर्त्तरि पुत्रस्तु वाच्यो मातुररक्षिता" ॥
इति मनुः ।)

अदान्तः, त्रि, (न दान्तः नञ्समासः ।) तपःक्लेशासहिष्णुः । अवशवाह्येन्द्रियनिग्रहः । इति पुराणं ॥

अदितिः, स्त्री, (दितिभिन्ना अदितिः । नञो दाणो डितिरिति शाकटायनोक्तेर्डितिप्रत्ययान्तो वा । अदनाददितिः वा ।) दक्षप्रजापतिकन्या । सा काश्यपपत्नी । देवमाता च । इति त्रिकाण्डशेषः ॥ भूमिः । अखण्डः । इति शब्दरत्नावली ॥

अदितिनन्दनः, पुं, (अदितेर्नन्दनः पुत्रः, षष्ठीतत्पुरुषः ।) देवता । इत्यमरः ॥

अदृक्, [श्] त्रि, (नास्ति दृक् चक्षुर्यस्य सः ।) दृष्टिरहितः । अन्धः । इत्यमरः ॥

अदृश्यं, त्रि, (दृश् + कर्म्मणि क्यप् न दृश्यं, नञ्समासः ।) अदर्शनीयं । अलक्ष्यं । "यथा,—
कन्याऽरतिकोमला त्रिभुवनव्याप्याप्यदृश्या जनैः" ।
इत्युद्भटः ॥

अदृष्टं, क्ली, (न दृष्टं नञ्समासः ।) अग्निजलादिद्वारा जातं भयं । इत्यमरः ॥ जन्मान्तरीयसंस्कारः । भाग्यं । यथा । "अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिं ॥ इति श्रीहर्षः ॥ तच्च आत्मनोऽतीन्द्रियगुणः । इदं वामनास्यं । तत्त्वज्ञाननाश्यं । भोगनाश्यञ्च । धर्म्माधर्म्मभेदेन तत् द्विविधं । धर्म्मस्तु स्वर्गादिकारणं । गङ्गास्नानयागादिजन्यः । कर्म्मनाशागमनादिस्पर्शनाश्यश्च । अधर्म्मस्तु नरकादिकारणं । प्रायश्चित्तादिनाश्यश्च । इति भाषापरिच्छेदः ॥

अदृष्टः, त्रि, (न दृष्टः ।) अप्रत्यक्षः । परोक्षितः ।
"अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता" ।
इति रसतरङ्गिण्यां भानुदत्तः ॥

अदृष्टवान्, [त्] त्रि, (अदृष्टं भाग्यं विद्यतेऽस्य, अदृष्टं मतुप् ।) भाग्यवान् । कदाचिदपि इति भाषा । (स्त्रियां ङीप् अदृष्टवती) ।

अदृष्टिः, स्त्री, (न दृष्टिः नञ्समासः ।) प्रतिकूला दृष्टिः । कुत्सिता दृष्टिः । सरोषवक्रदृष्टिः । कुटिलचक्षुः । असौम्याक्षि । वक्रदृष्टियुक्तचक्षुः । इत्यमरः ॥

अदृष्टिका, स्त्री, (विरुद्धा दृष्टिः नञ्समासः । नञत्र विरोधार्थे, स्वार्थे कन् स्त्रियां टाप् ।) सरोषवक्रदृष्टिः । इति शब्दरत्नावली ॥

अदेवमातृकः, पुं, (देवो वृष्टिस्तु माता मातृतुल्यो यत्र सः, समासान्तः कः, ततो नञ्समासः ।) देवमातृकभिन्नदेशः । नदीमातृकदेशः । यथा । (वितन्वति क्षेममदेवमातृकाः ॥ इति भारविः ।)

अद्मः, पुं, (अद्यते भुज्यते यत्, अद् कर्म्मणि मन् ।) अन्नं । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

अदृट ङ अतिक्रमे वधे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गतृतीयोपधः । (अदिट्टिषु अतिक्रमितुमिच्छति—अदृट् + सन् + लट् ते ।) ङ अदिट्टिषते । इति दुर्गादासः ॥

अदृड, अभियोगे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गतृतीयोपधः । (अड्डितुं अभियोक्तुमिच्छति अदृड् + सन् + लट् तिप् ।) अड्डिडिषति । क्विपि संयोगान्तलोपे अद् । अभियोगः समाधानं । अड्डति पक्षे विद्वान् । अभि समन्तात् योगोऽभियोगः इति गोविन्दभट्टः ॥ इति दुर्गादासः ॥

अद्धा, अ, (अतं सततं गमनं ध्यानं वा दधाति अत् + धा + क्विप् ।) यथार्थं । तत्पर्य्यायः । तत्त्वं २ अञ्जसा ३ । इत्यमरः ॥ (अद्धा श्रियं पालितसङ्गराय प्रत्यर्पयिष्यत्यनघां स साधुः ॥ इति रघुः ।)

अद्भुतं, क्ली, अपूर्व्वं । तत्पर्य्यायः । विस्मयः २ आश्चर्य्यं ३ चित्रं ४ । तद्विशिष्टे वाच्यलिङ्गं । इत्यमरः ॥

अद्भुतं, त्रि, (अततीति अत् + क्विप् आकस्मिकार्यमव्ययं तथा भाति-भा + डुतच् ।) आश्चर्य्यं । तत्पर्य्यायः । हृद्यं २ । इति जटाधरः ॥ * ॥ अथाद्भुतं । अद्भुतसागरे आचार्य्यवाहूववचनं । प्रकृतिविरुद्धमद्भुतमापदः प्राक् प्रबोधाय देवाः सृजन्तीति । तेन आपज्ज्ञानाय भूम्यादीनां पूर्व्वस्वभावप्रच्युतोदयवैकोऽद्भुत इति ॥ एवञ्च बुधोदयपर्व्वग्रहणादीनां गणितागतत्वेन प्रकृतानामपि यदुत्पातत्वं तद्भ्रान्तं ।
तत्कारणञ्च गर्गसंहितावार्हस्पत्ययोः ॥
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपचारान्नियतमपवर्ज्जन्ति देवताः ।
ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान् ॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च" ॥
तांश्च परं न दर्शयेदित्याह विष्णुः ॥ नोत्पातं दर्शयेदिति ॥ * ॥ तत्र वेलानक्षत्रमण्डलनिरूपणं ।
यथा दीपिकायां ॥
"प्राग्द्वित्रिचतुर्भागेषु द्युनिशोरद्भुतेषु सर्व्वेषु ।
अनिलाग्निशक्रवरुणा मण्डलपतयः शुभाशुभैश्च ॥
वेलासरणं ॥ * ॥
"अर्य्यमादिचतुष्कचन्द्रतुरगादित्येषु वायुर्भवेत् ।
देवेज्याग्निविशाखयाम्ययुगले पित्रद्वये चानलः ॥
विश्वादित्रयधातृमैत्रयुगलेष्विन्द्रो भवेन्मण्डलः ।
सर्पोपान्त्यमृगान्त्यमूलयुगलेष्वेषामीश्वरः ॥
पवनदहनौ नेष्टौ योगक्षयोरतिदुष्करः ।
सुरपवरुणौ शस्तौ योगक्षयोरतिशोभनः ॥
रवरूक्षमरुन्मिश्रः शुक्लच्छायाभिसमावृतः ।
फलविरहितः सेन्द्रो वायुस्तथाग्नियुतोऽम्बुपः ॥
यन्मण्डलेऽद्भुतं जातं शान्तिस्तद्देवताश्रया ।
तथा शान्तिद्वयं कार्य्यं मण्डलद्वयजाद्भुते" ॥ * ॥
विष्णुधर्म्मोत्तरे ।
"ग्रहर्क्षवैकृतं दिव्यं आन्तरीक्षं निबोध मे ।
उल्कापातो दिशां दाहः परिवेशस्तथैव च ॥
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता तथा ।
एवमादीनि लोकेऽस्मिन् नाभसानि विनिर्द्दिशेत् ॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजं ।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितं ॥
भौमञ्चाल्पफलं ज्ञेयं चिरेण परिपच्यते ।
नाभसं मध्यफलदं मध्यकालफलप्रदं ॥
दिव्यं तीव्रफलं ज्ञेयं शीघ्रकारि तथैव च ॥ * ॥
शीतोष्णता विपर्य्यासस्त्वृतूनां रिपुजं भयं ॥
पुष्पे फले च विकृते राज्ञो मृत्युं तथादिशेत् ।
अकालप्रभवा नार्य्यः कालातीताः प्रजास्तथा ॥
विकृताः प्रसवाश्चैव युग्मप्रसवनं तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा त्रयः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत् ॥ * ॥
प्रदोषे कुक्कुटारावो हेमन्ते चापि कोकिलाः ।
अर्कोदयेऽर्काभिमुखश्वारावो भयं दिशेत् ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे ।
श्येनो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥
गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च चर्म्मचिल्लश्च भासः पाण्डर एव च ॥
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते ।
षण्मासाभ्यन्तरे वर्षान्मृत्युः स्याद्गृहमेधिनः ॥
पत्न्याः पुत्रस्य वा मृत्युर्द्रव्यस्यापि विनश्यति ।
ब्राह्मणाय गृहं दत्त्वा दत्त्वा तन्मूल्यमेव वा ॥
गृहीयाद्यदि रोचेत शान्तिश्चेमां प्रयोजयेत् ।
मांसास्थीनि समादाय श्मशानाद्दुष्प्रदायकाः ॥
श्वा श्मशानोऽथ वा मध्ये पुरस्य प्रविशन्ति चेत् ।
विकिरन्ति गृहादौ च श्मशानं सा मही भवेत् ॥

चौरैश्च हन्यते लोकः परचक्रसमागमः ।
संग्रामश्च महाघोरो दुर्भिक्षं मरकं तथा ॥
अद्भुतानि प्रसूयन्ते तत्र देशस्य विद्रवः ।
अकाले फलपुष्पाणि देशविद्रवकारणं" ॥ * ॥
मत्स्यपुराणे ।
"अतिवृष्टिरनावृष्टिर्दुर्भिक्षादिभयं मतं ।
अनृतौ तु दिनाद्रूर्द्ध वृष्टिर्ज्ञेया भयाय च ॥
निरभ्रे वाथ रात्रौ वा श्वेतं याम्योत्तरेण तु ।
इन्द्रायुधं ततो दृष्ट्वा उल्कापातं तथैव च ॥
दिग्दाहपरिवेषौ च गन्धर्व्वनगरं तथा ।
परचक्रभयं विद्यात् देशोपद्रवमेव च" ॥
भासो वनकुक्कुटः ॥ * ॥ कंसनिधनसूचने हरिवंशः,—
"वक्रमङ्गारकश्चक्रे चित्रायां घोरदर्शनः ।
चलत्यपर्व्वणि मही गिरीणां शिखराणि च" ॥ * ॥
वाणोत्पाते स एव ।
"दक्षिणां दिशमास्थाय धूमकेतुः स्थितो भवेत् ।
वक्रमङ्गारकश्चक्रे छत्तिकासु भयङ्करः" ॥ * ॥
ज्योतिषचिन्तामणौ ।
"व्यक्ताशौचविवेकतत्त्ववसुधा लोकाः क्षुधापीडिताः ।
विप्रा वेदहताक्रिया प्रचलिता वर्णाश्रिणो दुःखिताः ।
क्षौणी मन्दफला नृपाश्च विकलाः संग्रामघोरा मही
प्रेताघातदुरन्तपीडिततरा देवेज्यराहोर्युतौ ॥
रक्ते शस्त्रोद्योगो मांसास्थित्वसादिभिर्मरकः ।
धान्यहिरण्यत्वक्फलकुसुमाद्ये वर्षिते भयं विद्यात् ॥
अङ्गारपांशुवर्षे विनाशमुपयाति तन्नगरं ।
उपलं विना जलधरैर्विकृता वा यदा प्राणिनो वृष्ट्या ॥
छिद्रं वाप्यतिवृष्टिं शस्यानामीतिसंजननं" ॥ * ॥
बुधकौशिकसम्वादे ।
"पक्षगः प्रपाते च फलं शरटस्य प्ररोहणे ।
शीर्षे राजश्रियोऽथाभिर्भाले चैश्वर्य्यमेव च ।
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनं ॥
नासिकायाश्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनं ।
कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत् ॥
धनलाभो बाहुमूले करयोर्धनसङ्क्षयः ।
स्तनयुग्मे च सौभाग्यं हृदि सौख्यविवर्द्धनं ॥
पृष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनं ।
कटिद्वये वस्त्रलाभो गुह्ये मृत्युसमागमः ॥
जङ्घे पार्श्वद्वयो नित्यं गुदे रोगभयं भवेत् ।
उर्व्वोस्तु वाहनावाप्तिर्जानुजङ्घेऽर्थसंक्षयः ॥
वामदक्षिणयोः पादोर्भ्रमणं नियतं भवेत् ।
पक्षगः प्ररोहणे चैव पतने शरटस्य च ॥
अथाग्राश्च फलस्यैव तद्वदेवं प्रजायते ।
पक्षगः प्ररोहणं रात्रौ शरटस्य प्रपातनं ॥
निधनायैव भवति व्याधिपीड़ाविपर्य्यये ।
पतनानन्तरश्चैवारोहणं यदि जायते ॥
पतने फलमुत्सृष्टं रोहणेऽन्यत् फलं भवेत् ।
आरोहणञ्चोर्द्धवक्त्रे अधोवक्त्रे च पातनं ॥
अनिष्टफलं तस्य तत्फलं जायते ध्रुवं ।
दृष्टमात्रेण यः सद्यः सचैलं जलमाविशेत् ॥
स्वयन्दप्राज्यश्च कुर्य्यादर्कावलोकनं ।
होमं सर्वस्य रत्नवस्त्रेण वेष्टयेत् ॥
देवदूतप्राप्तौ वादये पूर्णकुम्भके ।

पञ्चगव्यं पञ्चरत्नं पञ्चाम्रं गन्धकं ॥
पञ्चपल्लवपत्रञ्च निःक्षिप्यावाहयेत् ततः ।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैर्नामभिर्यथा यथाक्रमात् ॥
मृत्युञ्जयेन मन्त्रेण समिद्भिः खादिरैः शुभैः ।
तिलैर्व्याहृतिभिर्होममष्टोत्तरसहस्रकं" ॥
यज्ञो मृत्युञ्जयोऽपि । मृत्युञ्जयमन्त्रात्मककमका ।
इति विद्याकरः ॥ * ॥ गर्गसंहितावार्हस्पत्ययोः ।
"ये तेषु शान्तिं कुर्व्वन्ति न ते यान्ति पराभवं ।
ये तु न प्रतिकुर्व्वन्ति क्रियया श्रद्धयान्विताः ।
दाम्भिकाद्वा विमोहाद्वा विनश्यन्त्येव तेऽचिरात्" ॥ * ॥
अत्र निमित्तनिश्चयस्तोऽधिकारः । अन्यथा
दोषः । इत्याह मत्स्यपुराणं,—
"भिन्नमण्डलवेलायां ये भवन्त्यद्भुताः क्वचित् ।
तत्र शान्तिद्वयं कार्य्यं निमित्ते सति नान्यथा ।
निर्निमित्तकृता शान्तिर्निमित्तमुपपादयेत् ।
एतच्च तत्तद्विशेषविहितशान्तिविषयं । अन्यथा
वेलामण्डलसन्देहे शान्तिर्न स्यात् साधारण-
शान्तिश्च निर्विषया स्यात् । अत एवोक्तं योगि-
याज्ञवल्क्येन,—
"यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या समुदाहृतः ॥
गायत्र्या प्रयतः शुद्धः सर्व्वपापैः प्रमुच्यते ।
शान्तिकामश्च जुहुयात् गायत्रीमक्षतैः शुचिः ॥
हन्तुकामश्च नृपतेर्घृतेन जुहुयात् शुचिः ।
सावित्र्या शान्तिहोमांश्च कुर्य्यात् पर्व्वसु नित्यशः ॥
प्रणवव्याहृतिभ्याश्च स्वाहान्ता होमकर्म्मणि ।
प्रतिलोमा प्रयोक्तव्या षट्कारान्ताभिचारके ॥ * ॥
विश्वामित्रेणापि निमित्तसन्देहे लक्षादीन्युक्तानि ।
यथा,—
"लक्षचान्द्रायणादीनि शुद्ध्यभ्युदयकारणं ।
प्रकाशे च रहस्ये च संशयेऽशुभकेऽस्फुटे ॥ * ॥
मार्कण्डेयपुराणं ।
"दिग्देशजनसामान्यं नृपसामान्यमात्मनि ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभं ॥
परस्पराभिवादश्च ग्रहदोषेषु जायते" ॥
तथा,—
"तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ॥
लोकवादांश्च शान्तीश्च ग्रहपीड़ासु कारयेत् ।
भूदोहानुपवासांश्च शक्तं चैत्याभिवन्दनं ॥
कुर्य्यात् होमं तथा दानं श्राद्धं क्रोधविवर्जनं ।
अद्रोहं सर्व्वभूतेषु मैत्रीं कुर्य्याच्च पण्डितः ॥
वर्जयेद्दुष्टतीं वाचमतिवादांस्तथैव च ।
ग्रहपूजाश्च कुर्व्वीत सर्व्वपीड़ासु मानवः ॥
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यनेकशः" ॥ * ॥
लोकवादाश्च तत्रैवोक्ताः । यथा,—
"आकाशाद्देवतानाञ्च दैत्यादीनाञ्च सौहृदात् ।
दधिष्या प्रतिलोके च लोकवादा इति स्मृताः ॥"
कौमधमन्त्रादयः त्रिमधुरीमकृष्णचण्डिकागीतादय
चैत्यहत्यादौ क्षेत्रपालदेवतापूजा च । तथा-
चापस्तम्बः । लोभ्योऽत्ररवर्णेभ्यो धर्म्मश्रेयान्

प्रणीतादिभिश्च इति ।
नारायणमुपनिषद्भिर्वि...
भूदोहश्च पानं ...
दुर्ग्गोत्सवं । चैत्र पुष्प...
ब्रतः । तदा च भूमीपाते
"अनेकानर्थफल निपतन...
अर्चितः सर्व्वकल्याभिर्दान...
उत्तरीयकल्याणी । ...
भावनं ॥ * ॥ मत्स्यपुराणं,—
"काकस्यैककर्णाया प्रभाते दु...
काको मैथुनकामश्च श्वेतो वा
उन्मत्तो वसते यत्र निपतेद्वा यदा
शेषे । गृहपतेर्मृत्युर्धननाशस्तथैव
वराहसंहितायां,—
क्रोड़ानुरक्तो रतिमान्नशुभो
भीतो जनानां पतितो विश्व ।
नासौ गृहस्थस्य विनाशहेतु-
र्दोषः समुत्पद्य व्याकराणां ॥ * ॥
अस्मृतशान्तिमाह मात्स्ये,—
"गृहे पक्षिनिकारेषु कुर्य्यादामरणं
देवाः कपोता इति वा जनयं सर्व...
गावश्च देया त्रिविधा द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते पापमुपैति शान्तिं
मृगैर्द्विजैर्वा विनिवेदितं यत् ।"
द्विजैः पक्षिभिः । अपिना अन्यैरपि ॥ * ॥
वल्लभीये ।
"एको हृषच्छ्रयो गावः समाख्या वा दक्षि...
सिंहप्रवृत्तिका गावः कथिताः शान्तिकर्म...
मत्स्यपुराणे ।
"अङ्गे दक्षिणभागे तु शस्तं त्रिस्फुरणं भवेत्
अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च ।
लाञ्छनं पिटकं चैव ज्ञेयं त्रिस्फुरितं तथा ।
विपर्य्ययेण विहितं सर्व्वं स्त्रीणां फलं तथा ।
अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्ण-
तर्पणं स्यात् । शङ्कः । "दुःस्वप्नविदुःस्वर्ग...
हिरण्यञ्च दद्यात्" इति । मात्स्ये ।
"नमस्ते सर्व्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ।
एवं शुक्रोदये कुर्व्वन् यात्रादिषु च भारत ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीय...
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृहस्पते ।
क्रूरग्रहैः पीड़ितानाममृताय नमो नमः ।
सङ्क्रान्तावपि कौन्तेय यात्रास्वभ्युदयेषु च ।
कुर्व्वन् बृहस्पतेः पूजां सर्व्वान् कामान् समश्नु...
वैशम्पायनस्ते व्यासः ।
"ग्रहयज्ञैः शान्तिकैश्च किं क्रियन्ति नराः ...
महाशान्तिकरः श्रीमान्नस्या पूजितो हरिः
उत्पातान् दारयन् पुंसां दुर्निमित्तानशेषतः
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः
अथ ब्रह्मपुराणीयो मन्त्रः ।
"नमस्ते बहुरूपाय विष्णवे परमात्मने हरि...

इति ॥ * ॥ छन्दोगपरिशिष्टं । अथातो रजस्वलाभिगमने गोऽश्वभार्य्यासु गमने यमजजनने विजातीयजनने वा काककङ्कगृध्रवकश्येनभासखिल्लकपोतानां गृहप्रवेशे मानुषस्योपरि विश्रामणे श्यामेव क्रियमाणे गृहद्वारारोहणे वाद्भुतेषु कल्पदृष्टेन विधिनाग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्जुहोति अद्भुताय अग्नये स्वाहा सोमाय विष्णवे रुद्राय वायवे सूर्य्याय मृत्यवे विश्वेभ्यो देवेभ्यः स्वाहेति स्थालीपाकहुतान्यदिति ॥ * ॥ कपोतं विशेषयति शौनकः ।

"रक्तपादः कपोताख्यः अरण्यौकाः शुकच्छविः ।
स चेच्छालां विशेच्छालासमीपस्थ भजेद्यदि ॥
अन्येषु गृहमध्ये वा वल्मीकस्योद्गमादिषु" ।

कल्पदृष्टेन विधिना गृह्योक्तेन । प्रायश्चित्ताज्याहुतीः अद्भुतदोषप्रशमनार्थाः सप्ताज्याहुतीः । अद्भुताय अग्नये स्वाहा इत्यादिमन्त्रैः । तत्र स्थालीपाकेतिकर्त्तव्यतायां पायसचरुभिरेतेभ्यो देवेभ्यो जुहुयात् । छन्दोगपरिशिष्टं । पश्चात् घृतपायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा शान्तिर्भवतीति । गोवरं गोश्रेष्ठं दक्षिणां तां गां कृत्वा दोषशान्तिर्भवतीति । तथाचोक्तं,—

"गौर्विशिष्टतमा लोके वेदेष्वपि निगद्यते ।
न ततोऽन्यद्वरं यस्मात् तस्माद्गौर्वरमुच्यते" ॥ * ॥

छन्दोगपरिशिष्टं । यस्त्वेषामन्यतममापन्नः प्रायश्चित्तं न कुर्य्यात् तस्य गृहपतेर्मरणं सर्व्वस्वनाशो वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं कर्म्मापवर्गे वामदेव्यगानं शान्तिः शान्तिरिति । अपवर्गे समाप्तौ । वामदेव्यगानं शान्तिः कर्त्तव्या आवृत्तिप्रकारसमाप्त्यर्था । वार्हस्पत्ये । शमयन्त्याशमा-शात् कश्यादिकृतं निमित्तमात्रेव । अतिवर्षणोः पवाग्न्युद्दीप्तानपुष्पवनानि ॥ * ॥ वराहः ।

ये च न दोषं जनयन्त्युत्पातास्तानृतुस्वभावकृतान् ।
ऋषिपुत्रकृतैः श्लोकैर्विद्यादेभिः समासोक्तैः ॥

तथा च मत्स्यपुराणं ।

"वज्राशनिमहीकम्पसन्ध्यानिर्घातनिस्वनाः ।
परिवेशरजोधूमरक्ताकास्तमयोदयाः ॥
द्रुमेभ्योऽन्नरसस्नेहमधुपुष्पफलोद्गमाः ।
गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥ * ॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलं ।
अनग्निज्वलनं स्फोटं धूमरेणुनिलाकुलं ॥
रक्तपद्मारुणा सन्ध्या नभः क्षुब्धार्णवोपमं ।
सरितामम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥ * ॥
शक्रायुधपरीवेशौ विद्युच्छुष्कविरोहणं ।
कम्पोद्वर्त्तनवैकृत्यं रसनं दरणं क्षितेः ॥
नद्युदपानसरसां वृद्ध्यूर्ध्वं प्लवनसरणाः ।
पतनादिनिरोहाणां वर्षासु न भयावहं" ॥

हरिवंशे वर्षादर्शनात्,—

"क्वचित् कन्दरदाराद्यं निर्म्मोकाभरणं क्वचित्" ।

इति दर्शनात् वर्षासु निर्म्मोकोद्गमो न भयावहः ॥ * ॥

"दिव्यस्त्रीभूतमर्त्त्यैर्विमानाद्भुतदर्शनं ।
गन्धर्व्वनगराणां दर्शनं दिवाम्बरे ।
गीतवादित्रनिर्घोषो वनपर्व्वतसानुषु ।
शस्यवृद्धिरसोत्पत्तिरपापाः शरदि स्मृताः ॥ * ॥
शीतानीलतुषारत्वं नर्द्दनं मृगपक्षिणां ।
रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी ।
दिशो धूमान्धकाराश्च सशब्दा वनपर्व्वताः ।
उच्चैः सूर्य्योदयास्तत्वं हेमन्ते शोभना मताः ॥ * ॥
हिमपातानिलोत्पातविरूपाद्भुतदर्शनं ।
कृष्णाञ्जनाभमाकाशं तारोल्कापातपिञ्जरं ॥
चित्रा गर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिणां ।
पत्राङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः ॥
ऋतुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभावहाः ।
ऋतावन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः" ॥ * ॥
उन्मत्तानाञ्च या गाथाः शिशूनाञ्चेष्टितञ्च यत् ।
स्त्रियो यच्च प्रभाषन्ते तत्र नास्ति व्यतिक्रमः ॥
पूर्व्वं चरति देवेषु पश्चाद्गच्छति मानुषान् ।
नादेशिता वाग्वदति सत्या ह्येषा सरस्वती ॥ * ॥

वृहस्पतिः,—

"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणां ।
श्रावयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नतः ॥

विनेया दण्डनीयाः । इति ज्योतिस्तत्त्वं ॥

अद्भुतः, पुं, शृङ्गारादिनवरसानां मध्ये रसविशेषः । तस्य स्थायिभावो विस्मयः । देवता गन्धर्व्वः । वर्णः पीतः । आलम्बनं लोकातीतवस्तु । उद्दीपनं तद्गुणमहिमा । अनुभावाः स्तम्भस्वेदरोमाञ्चगद्गदस्वरविभ्रमनेत्रविकाशादयः । अस्य व्यभिचारिभावाः वितर्कावेगसम्भ्रान्तिहर्षादयः । इति साहित्यदर्पणं ॥

अद्भुतस्वनः, पुं, (अद्भुतः अतिशयितः स्वनः शब्दो यस्य सः ।) महादेवः । इति त्रिकाण्डशेषः । (अद्भुतः स्वन इति कर्म्मधारये आश्चर्य्यशब्दः) ।

अद्भुतसारः, पुं, (अद्भुतः अतिकठिनः सारः स्थिरांशो यस्य सः ।) खदिरसारः ॥ इति केचित् ॥

अद्मनिः, पुं, (अत्ति भक्षयति सर्व्वान् अदेर्मुट् चेत्यनिः ।) अग्निः । इत्युणादिकोषः ॥

अद्मरः, त्रि, (अद् भक्षणे, सृघस्यदः क्मरच् ।) भक्षकः । भक्षणपरः । इत्यमरः ॥

अद्य अ, (सद्यःपरुत् परार्य्यैषम इति इदमोऽश्भावो द्यश्च निपात्यते ।) वर्त्तमानदिनं । आजि इति भाषा । इत्यमरः ॥

अद्यतनः, पुं, (सायञ्चिरमित्यादिना ट्युट्युलौ तुट् च ।) कालविशेषः । स च भाष्यमते दुर्गसिंहमते च पूर्व्वरात्रिशेषयामचतुष्टयावधिपरगामिरात्र्यर्द्धयामपर्य्यन्तः । पूर्व्वरात्रिशेषार्द्धावधिपरगामिरात्रिप्रथमार्द्धपर्य्यन्तो वा । मतान्तरे भट्टोजिमते पूर्व्वरात्रिशेषप्रहरावधिपरगामिप्रथमप्रहरपर्य्यन्तः । अद्य भवस्तद्वति त्रि ॥

अद्यश्वीनं, त्रि, (अद्य श्वस् + ख तस्य ईन टिलोपः ।) आसन्नप्रसवादि । अद्य श्वो वा भवति अद्यश्वीनं मरणं । इति [illegible]परिशिष्टं ।

अद्यश्वीना, स्त्री, (अद्यश्वस् + "अद्यश्वीनावष्टब्धे" इति सूत्रेण ख तस्य ईन टिलोपश्च स्त्रियां टाप् ।) आसन्नप्रसवा अद्य श्वो वा इति अद्यश्वीना गौः इति संक्षिप्तसारपरिशिष्टं ।

अद्यावधि, स्त्री, (अद्य अवधिः सीमा यस्य तत् ।) अद्यारभ्य । आजि हइते । इति भाषा । वर्त्तमानदिवसपर्य्यन्तं । आजि नागाद् इति भाषा ॥

अद्रिः, पुं, (अत्ति अदीति क्रिन् ॥) सूर्य्यः । पर्व्वतः । वृक्षः । इत्यमरः ॥ परिमाणविशेषः । इति शब्दरत्नावली ॥ (शाखी । मानभेदः । सप्ताङ्कः । पर्व्वतमूषिका ॥)

अद्रिकर्णी, स्त्री, (पर्व्वतमूषिकायाः कर्णवत् पुष्पमध्यस्थपत्रं यस्याः सा स्त्रियां ङीप् ।) अपराजिता । इति राजनिर्घण्टः ॥

अद्रिकीला, स्त्री, (अद्रयः कीलाः स्तम्भवत् यस्याः सा पृथिवी ।) भूमिः । इति त्रिकाण्डशेषः ॥

अद्रिजं, क्ली, (अद्रौ जातं इति जनेर्डः ।) शिलाजतु इति रत्नमाला ॥ पर्व्वतजातवस्तुनि त्रि ॥

अद्रिजा, स्त्री, (अद्रेर्जाता इति जनेर्डः ततष्टाप्, पार्व्वती ।) दुर्गा । इति हेमचन्द्रः ॥ सैंहलीवृक्षः । इति राजनिर्घण्टः ॥

अद्रितनया, स्त्री, (अद्रेः तनया ।) पार्व्वती । यथा— एषोऽहमद्रितनयामुखपद्मजन्मेति काव्यप्रकाशः ॥ (अथैनमद्रेस्तनया शुशोच ॥ इति रघुः ॥)

अद्रिनन्दिनी, स्त्री, (अद्रेर्नन्दिनी । पार्व्वती ।) दुर्गा ॥ हिमालयाद्रिजातत्वात् ॥

अद्रिभिद्, पुं, (अद्रीन् पर्व्वतान् भिनत्ति अद्रि + भिद् + क्विप् तुक् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

अद्रिभूः, पुं, (त्रि, अद्रौ भवति अद्रि + भू + क्विप् । पर्व्वतजातमात्रे ।) आखुकर्णलता । इति राजनिर्घण्टः ॥

अद्रिराजः, पुं, (अद्रीनां राजा इति समासे राजाहःसखिभ्यष्टच् ।) हिमालयपर्व्वतः । इति हेमचन्द्रः ।

अद्रिसारः, पुं, (अद्रेः सारः स्थिरांशः ।) लौहः । इति रत्नमाला ॥

अद्रीशः, पुं, (अद्रेः ईशः) शिवः । हिमालयः । इति धरणी ॥

अद्वयः, पुं, (नास्ति द्वयं द्वित्वं यस्य ।) बुद्धः । इति हेमचन्द्रः ॥ (आत्मा । अद्वैतवादी ।)

अद्वयवादी, [न्] पुं, (अद्वयं सर्व्वमेव चित्स्वरूपं नातोऽन्यत् किञ्चनेति वदति अद्वय + वद् + णिनि । वैदान्तिकः ।) बुद्धः । इत्यमरः ॥

अद्वारं, क्ली, (अप्रशस्तं प्रवेशादौ द्वारं ।) द्वारव्यतिरिक्तप्रदेशः । यथा—

"अद्वारेण च नातीयाद्ग्रामं वा वेश्म वावृतं ।
रात्रौ च वृक्षमूलानि दूरतः परिवर्ज्जयेत्" ॥

इति मानवे ४ अध्याये ७३ श्लोकः ॥ प्राचीराद्यावृतं ग्रामं गृहञ्च द्वारव्यतिरिक्तप्रदेशेन प्राकारादिलङ्घनं कृत्वा न विशेत् । रात्रौ च वृक्षमूलान्याश्रयं दूरतस्त्यजेत् । इति मन्वर्थमुक्तावल्यां कुल्लूकभट्टः । द्वारशून्ये त्रि ।

अद्वितीयः, त्रि, (न द्वितीयं यस्य ।) द्वितीयरहितः । ([illegible] द्वितीयं इति [illegible] । अनुपमः । यथा,— [illegible] इति [illegible] । [illegible]

नेयः सहि नाद्वितीयः। इति नैषधं॥

अद्वैतः, त्रि, (द्विधाभेदमितः प्राप्तः। द्वित+स्वार्थे अण् न द्वैत। द्वितीयरहितः।) एकः। यथा,— यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा। इति श्रीचैतन्यचरितामृतं॥

अद्वैतः, पुं, (द्विधाभेदमितः प्राप्तः द्वीतीयातत्, प्रज्ञादित्वात् स्वार्थे अण् ततोभिन्नः नञ्समासः।) द्वैतरहितः विष्णुः। यथा,—

"विष्णुमानन्दमद्वैतं विज्ञानं सर्व्वगं प्रभुं।
प्रणमामि सदा भक्त्या चेतसा हृदयालयं॥"

इति गारुड़े २३८ अध्यायः॥ • ॥ शिवावतारविशेषः। यथा,—

"नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिवः॥*॥"

तज्जिन्मादिविवरणं यथा,—

"महादेवस्य मित्रं यः कुवेरो गुह्यकेश्वरः।
कुवेरपण्डितः सोऽद्य जनकोऽस्य विदांवरः॥
पुरा कुवेरः कैलासे सिध्यसाध्यनिषेविते।
जजाप परमं मन्त्रं शैवं श्रीशिववल्लभः॥
ततो दयानुर्भगवान् वरं वृणिवति सोऽब्रवीत्।
ततः कुवेरो वरयामास त्वं मे सुतो भव॥
प्रार्थितस्तेन देवेशो वरदेशः सदाशिवः।
जन्मजन्मान्तरे पुत्र प्राप्स्यामि पुत्रतां तव॥
इति प्राप्य वरं कष्टं कियन्तं कालमास्थितः।
काम्यादीशवशात् सोऽप्यद्वैतस्य जनकोऽभवत्॥
योगमाया भगवती गृहिणी तस्य साम्प्रतं।
सीतारूपेणावतीर्णा श्रीनाम्नी तत्प्रकाशतः॥
तस्य पुत्रोऽच्युतानन्दः कृष्णचैतन्यवल्लभः।
श्रीमत्पण्डितगोस्वामिशिष्यप्रिय इति श्रुतं॥
यः कार्त्तिकेयः प्रागासीदिति;जल्पन्ति केचन"।

इति गौरगणोद्देशदीपिका॥

अद्वैतवादी, [न्] त्रि, (अद्वैतं "चिदेव सर्व्वं नान्यत् किञ्चिन" इति वदति, अद्वैत+वद्+णिनि उपपदसमासः।) एकब्रह्मवादी। तस्य मतं यथा,— ब्रह्मैव सत्यं प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि आरोपितं। यथा रज्जुः रज्जुस्वरूपाज्ञानात् सर्पवत् प्रतिभाति। तथा ब्रह्मस्वरूपाज्ञानात् विश्वं [illegible]वत् प्रतिभाति ब्रह्मतिर्ज्जीवश्चापि पर्य्यवसाने [illegible]व ब्रह्मान्यत् सहस्तु नास्ति। अत्र प्रमाणं [illegible]रीरिकसूत्रस्य शङ्कराचार्य्यकृतभाष्यतट्टीकाक[illegible]सभाषरत्नप्रभादि॥

[illegible][स्]] अ, (अधरस्य अधादेशः ततः असिच्।) [illegible] नीचं। अधोभागः। यथा,—

"[illegible]ानुपर्य्युपर्य्यास्तेऽधोऽधोऽप्यधि च माधवः"।

[illegible]परेशः॥ पातालं। योनिः। इति त्रिकाण्ड[illegible]

[illegible] स्त्री, (अधः अधोमुखं पुष्पं यस्याः। [illegible]पुष्प+ङीप्।) गोजिह्वा। इति राम[illegible] [illegible] दृक्षविशेषः। हेंडाक्रान्नी। चोर[illegible] [illegible]ाँटुर इति भाषा। तत्पर्य्यायः। अवाक्[illegible] [illegible]स्का २ अमरपुष्पिका ३। इति रत्न।

अध'छिन्नः, त्रि, (अधः अधोभागे छिन्नः पतितः।) अधस्थ्यमस्तु। इति जटाधरः॥

अधमः, त्रि, (अव पालने+अम, वस्य धादेशः।) न्यूनः। निन्दितः। अपकृष्टः। तत्पर्य्यायः। निकृष्टः २ प्रतिकृष्टः ३ अर्व्वा ४ रेफः ५ याप्यः ६ अवमः ७ कुत्सितः ८ अवद्यः ९ कुपूयः १० खेटः ११ गर्ह्यं १२ अणकः १३। इत्यमरः॥ रेपः १४ अरमः १५ आणकः १६ अनकः १७। इति तट्टीका॥ (या- च्ञा मोघा वरमधिगुणे नाधमे लब्धकामा। इति मेघदूते)॥

अधमः, पुं, (अव पालने+अम, वस्य धादेशः।) उपपतिभेदः। तस्य लक्षणं। भयरयाकाङ्क्षाशून्यत्वं। कामक्रीड़ाविषये कार्य्याकार्य्यविचारकत्वञ्च। इति रसमञ्जरी॥

अधमभृतकः, त्रि, (अधम+भृ+क्त+स्वार्थे कन्।) (अधमः। निकृष्टः। भृतकः। भृत्यः।) अधमभृत्यः। नीचदासः। दौवारिकभारवाहकादयः॥

अधमर्णं, त्रि, (अधम+ऋण ऋणविषये अवश्यदेयविषये अधमः निन्दितः राजदन्तादित्वात् परनिपातः। वा अधमं ऋणमवश्यदेयत्वेन विद्यते यस्य।) ऋणग्रहीता। ऋणी। इत्यमरः॥ खातक इति भाषा।

("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः।
दापयेत् धनिकस्यार्थमधमर्णात् विभावितं॥
अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि।
अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत्"॥

इति मनुः।)॥

अधमर्णिकः, त्रि, (अधममवश्यदेयत्वेन निन्दितं ऋणं। तदेव दातृत्वेन विद्यते अस्य। अधमर्ण+ अत इनिठनाविति ठन्। तस्य इक।) अधमर्णः। यथा,—

"गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः।
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरं॥"

इति मिताक्षरा॥

("यै यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः।
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकं"॥

इति मनुः।)॥

अधमा, स्त्री, (अधम+स्त्रियां टाप्।) स्त्रीयाद्यन्तर्गतनायिकाभेदः। अस्या लक्षणं। हितकारिप्रियतमे अहितकारित्वं। अस्या निष्कारणकोपत्वात् चण्डीति नाम। अस्याः क्रिया अधमा। इति रसमञ्जरी॥

अधमाङ्गं, क्ली, (अधमम् अङ्गं कर्म्मधारयः।) पादः। चरणः। इति शब्दचन्द्रिका॥

अधरं, क्ली पुं, (न ध्रियते कामुकस्य धैर्य्यं न तिष्ठति अत्र, न+धृ+पुंसि संज्ञायां घः प्रायेणेति अधिकरणे घः।) शरागारं। रतिगृहं। योनिरिति यावत्। इति शब्दरत्नावली त्रिकाण्डशेषश्च॥

अधरः, पुं, (न ध्रियतेऽसौ धृ+अप् ततो नञ्समासः।) मुखावयवविशेषः। नीचे ठोंट। इति भाषा। ओष्ठः। उपर ठोंट। इति भाषा। तयोः

पर्य्यायः। रदनच्छदः २ द[illegible] पारम्परयोरपि ओष्ठाधा[illegible] चर्ज्यौ दशनवासमी उभय[illegible] धरावपि उभयेति शब्दा[illegible] ऽप्याह उपरिवर्त्ती अधोवर्त्ती[illegible] ऽप्येवं। पुनश्च रत्नाधरः प्र[illegible] "पालिपाटलको रत्नौ नेत्राल[illegible] सानुस्रोऽधरनिका च स्त्र रत्न[illegible] स्निग्धास्तु यथा,—

"पाटलाश्चोण स्निग्धो रेखाभूषि[illegible] सीमन्तिनीनामधरो राज्ञां चैव [illegible] श्यामः स्थूलोऽधरोष्ठः स्यात् वैधव्य[illegible] मध्यो मस्ताग्निन्याचोत्तरोष्ठ[illegible]

इति सामुद्रकं॥

अधरः, त्रि, (न धरः नञ्समासः। नीच[illegible] तमं। हीनः। अपकृष्टः। इति मेदिनी[illegible] वादी। इति हेमचन्द्रः॥ (यथा [illegible] पिबति रतिसर्व्वस्वमधरं।)॥

अधरतः, अ, [स्] (अधर+तसिल् प्रथमास्थ[illegible] र्य्यस्तौ।) अधस्तात्। अ[illegible] हलायुधः॥

अधरमधु, क्ली, (अधरस्य मधु षष्ठीत[illegible] अधरामृतं। अधररसः। इति त्रि[illegible]

अधरस्तात्, अ, अधरतः। इति हलायुध[illegible]

अधरस्मात्, अ, (अधर+अस्ताति विक[illegible] अधादेशः।) अधस्तात्। अधरात्। [illegible] शब्दात् दिग्देशकालवाची प्रथमापञ्चमी[illegible] स्थाने तात् प्रत्ययो भवति। इति व्याकर[illegible]

अधरा, स्त्री, (न धरा नञ्समासः।) अ[illegible] इति व्याकरणं॥ नीचा। यथा। अधराद्[illegible] यदैव सा। इति नैषधं॥

अधरात्, अ, अधरतः। अधरेण। अधस्[illegible] इत्यमरटीका॥

अधरामृतं, क्ली, (अधरस्य अमृतम्।) अधरम[illegible] यथा,—

"सिञ्चाङ्ग नस्त्वदधरामृतपूर[illegible]
हासावलोककलगीतजहृच्छय[illegible]
नो चेद्वयं विरहजाग्न्युपयुक्तदे[illegible]
ध्यानेन याम पदयोः पदवीं सखे[illegible]"

इति श्रीभागवते १० स्कन्धे २९ अध्याय[illegible]

अधरीणः, त्रि, (अधरः कृतः निरस्कृतः [illegible] ख तस्य ईन।) धिक्कृतः। तिरस्कृतः। जटाधरः॥

अधरेण, अ, (अधरे देशे अधरस्यां दिशि [illegible] अधर+एनप्।) अधोदिग्देशकालः। [illegible] दिग्देशकाले। इति व्याकरण॥

अधरेद्युः, [स्] अ, (अधरे परे दिवसे [illegible] एद्युस्।) अधरदिवसः। परदिन। इति रत्नावली॥

अधर्म्मः, पुं, (ध्रियतेऽनेन धृ+मनिन् ततो [illegible] समास, नञत्र विरोधार्थः।) धर्म्मविरोधी [illegible] तु ब्रह्मणा पृष्ठाज्जातः। इति श्रीभागवत। [illegible]

राधः। श्रुतिस्मृतिविरुद्धाचारः। यथा,—
"अधर्म्मेणैधते राजन् ततो भद्राणि पश्यति।
ततः सपत्नान् जयति समूलस्तु विनश्यति॥"
इति महाभारतम्।
"अधर्म्मभिदमत्यन्तं कथं भीष्मोऽनुमन्यते"।
इति महाभारतं।)

अधर्म्मी, [न्] त्रि, (अधर्म्मः पापं विद्यतेऽस्य।) अधार्म्मिकः। अधर्म्मात्मा। अधर्म्मशब्दादस्त्यर्थे इनि॥

अधश्चरः, पुं, (अधश्चरति इति अधस् + चर + अच्।) चौरः। इति हारावली॥ अधोगामिनि त्रि॥

अधश्चौरः, पुं, (अधः चौरः। अधस् + चुर + अच् + स्वार्थे अण्) नीचचौरः। सिंदालचोर इति भाषा। इति केचित्॥

अधस्तात् अ, (अधर + अस्ताति।) अधोभागः। नीचे इत्यादुधः॥ (तस्याधस्तात् वदनमपि रता-भिषु पर्य्यटन्नेषु। इति उत्तरचरितं।) (तथा "एनमन्तोऽधस्तादशौ दारुप्रतीच्छकौ"॥ इति मनुः।) पश्चाद्भागः। इत्यमरटीका॥ रतिबन्धं। अधमं। इति त्रिकाण्डशेषः॥

अधामार्गवः, पुं, (न धीयतेऽसौ अधाः न + धा + असुन्। तादृशं मार्गं वाति गच्छति। अधा + मार्ग + वा + कः।) (अपामार्गः। इति क्षीरस्वामी।) अपामार्गवल्कः। इत्यमरटीकायां रायमुकुटः॥

अधार्म्मिकः, त्रि, (धर्म्मं चरति। धर्म्म + ठक्। न धार्म्मिकः।) अधर्म्मी। अधर्म्मात्मा। पापी। तत्पर्य्यायः। अधार्म्मिकः २। इति त्रिकाण्ड-शेषः॥ यथा,—
"यस्तु यत्र मदाचारविहीनः स निराकृतः।
अधार्म्मिकः स्यादयसः अवकीर्णी व्रतच्युती"॥
इति जटाधरः॥ अतो माधार्म्मिके वसेद्ग्रामे। इति कुलूकभट्टश्च॥

अधि अ, (न धीयते धार्य्यते। नञ् + धा + कि।) प्रादिविंशत्युपसर्गमध्ये उपसर्गविशेषः। अ-स्यार्थः। उपरिभागः। इति दुर्गादासः॥ अधि-कारः। ईश्वरः। इति मेदिनी॥ अधिकं। यथा अधिमासः अधिको मासः इत्यर्थः। इति स्मृतिः॥

अधिः, पुं, आधिः। मनःपीड़ा। इत्यमरटीकायां भरतः॥

अधिकं, क्ली, (अधि + स्वार्थे कन्।) काव्यालङ्कार-भेदः। तस्य लक्षणं। अधिकं पृथ्वाधाराधाधे-याधिक्यवर्णनं। उदाहरणं यथा। ब्रह्माण्डानि यत्र यत्र मान्ति न ते गुणाः॥ इति कुव-लयानन्दे अप्पयदीक्षितः॥

अधिकः, त्रि, (अध्यारूढः सन् अधि + स्वार्थे कन्) अतिरिक्तः। अधिकः। इति हेमचन्द्रः। (इमान् सर्वेऽधिके तुषे। स्त्री भवत्यधिके स्त्रियाः। इति मनुः।)

अधिकरणं, क्ली, (अधि + कृ + अधिकरणे ल्युट्।) सम्बन्धार्थोपस्थापकं। इति हेमचन्द्रः॥ अधि-क्रियते अत्र। [illegible] मीमां-सकाः। यथा,—
"विषयो विशयश्चैव पूर्व्वपक्षस्तथोत्तरं।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं"॥
विषयो विचारार्हवाक्यं। विशयोऽन्यायमर्थो न वेति संशयः। पूर्व्वपक्षः प्रकृतार्थविरोधितर्कोप-न्यासः। उत्तरं सिद्धान्तानुकूलतर्कोपन्यासः। निर्णयो महावाक्यार्थतात्पर्य्यनिश्चयः। एवं क्रमेण विवेचनमत्राधिक्रियते इत्यधिकरणं। इति ति-थ्यादितत्त्वं॥ अधिक्रियतेऽर्थादिचारोऽस्मिन्ने-नेति वा अधिकरणं वेदविचारग्रन्थात्मिका मी-मांसा। सा च द्विधा कर्म्ममीमांसा ब्रह्ममी-मांसा चेति। कर्म्मकाण्डवेदविचारग्रन्थः कर्म्म-मीमांसा जैमिनिप्रणीता सैव मीमांसात्वेन प्र-सिद्धा पूर्व्वमीमांसा इत्युच्यते। ब्रह्मकाण्डवेद-विचारग्रन्थश्च ब्रह्ममीमांसा वेदव्यासप्रणीता सा च वेदान्तत्वेन प्रसिद्धा उत्तरमीमांसा इत्युच्यते। इत्यत्र मीमांसापदमपि करणाधिकरणव्युत्पत्त्या ग्रन्थपरं ज्ञेयं। भावव्युत्पत्त्या तु विचारपूर्व्वक-निर्णयपरमिति। यत्तु अधिक्रियते विचारोऽस्मिन् इति व्युत्पत्त्या अधिकरणं मीमांसासिद्धान्त इत्युदीच्येनाभिहितं तत्र। सिद्धान्तस्याधिकरण-चरमावयवत्वेनाधिकरणाङ्गत्वात् अधिकरणत्वा-नुपपत्तेः। यथा न्यायमते निगमनस्य न्यायाव-यवत्वं न तन्मात्रस्य न्यायत्वं तद्वेदापीति सुधीभि-र्भाव्यं। तस्य चाधिकरणस्य पञ्चाङ्गानि। तदुक्तं,—
"विषयोऽविषयश्चैव पूर्व्वपक्षस्तथोत्तरं।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं"॥
विषयो विचारार्हवाक्यं। यथा। खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीत इत्यादि संयोगपृथक्त्वाधिकरणादेः। एवं विषयो निश्चयस्तद्भिन्नस्तद्विरोधी वा अविषयः संशयः। तदुक्तं,—
"विशब्दश्च विशेषार्थः सिनोतिर्बन्धनार्थकः।
विशेषेण सिनोतीति विषयोऽर्थनियामकः"॥
नियामकः कोटिनिश्चायकतया विषयदर्शनात्मक-व्याप्यत्वादिनिश्चय एव। एवमेव न्यायगुरु-न्यायवागीशभट्टाचार्य्यचरणाः। अन्ये तु विशय इति विपूर्व्वस्य शीङः संशयार्थकत्वमालोच्य ता-लव्यमध्यपाठं वदन्तः विशयः संशयः इति व्याच-क्षते तच्च विपूर्व्वशीङः संशयार्थकत्वे मानमनु-सन्धेयं। संशयः अन्यायमर्थो न वेत्याकारकः। पूर्व्वपक्षः सिद्धान्तविरुद्धतर्कोपन्यासेन सिद्धान्त-विरुद्धसंशयैककोटिप्रदर्शनं। उत्तरं प्रकृत-सिद्धान्तानुकूलतर्कोपन्यासेन प्रकृतसिद्धान्तविरुद्ध-संशयानर्हकोटिप्रदर्शनं। निर्णयः सिद्धान्तसिद्ध-विचार्य्यवाक्यतात्पर्य्यावधारणं। कर्म्ममीमांसा-धिकरणानि [illegible] जैमिनिप्रणीतानि [illegible] [illegible] इति [illegible]॥ ०॥ [illegible] अधारमात्रं॥ तच्चतुर्व्विधं। [illegible] यथा [illegible]। [illegible] वेदे। [illegible] यथा [illegible]। [illegible] वेदे। [illegible] यथा [illegible]।

कुशलः॥ व्याप्तिः ४ यथा तिलेषु तैलं। सकले स्थितः॥ *॥

अधिकर्द्धिः, त्रि, (अधिका ऋद्धिः सम्पत्तिर्यस्य सः।) अतिशयसम्पत्तियुक्तः। तत्पर्य्यायः। स-मृद्धः २। इत्यमरः॥

अधिकर्म्मिकः, पुं, (अधिकृत्य हट्टं कर्म्मणि प्रभवति अधिकर्म्मन् + ठन् तस्य इक) हट्टाध्यक्षः। इति हेमचन्द्रः॥ हाटेर दारोगा इति भाषा।

अधिकाङ्गं, क्ली, (अङ्गादधिकं मयूरव्यंसकादित्वात् समासः।) सकञ्चुकाः मध्ये यद्बध्नन्ति तत्। क-ञ्चुकादिदार्ढ्यार्थं सूत्रैर्मध्यकाये निबध्यपट्टिकादि। तत्पर्य्यायः। सारसनं २। इत्यमरः॥ विंशत्य-ङ्गुल्याद्यतिरिक्ताङ्गविशिष्टे त्रि॥ (यथा मनुः।—
"नोद्वहेत् कपिलां कन्यां
नाधिकाङ्गीं न रोगिणीं"॥)

अधिकारः, पुं, (अधि + कृ + घञ्।) राजादीनां चामरधूननच्छत्रधारणादिव्यापारः। तत्पर्य्यायः। प्रक्रिया २। इत्यमरः॥ प्रकरणं। यथा नैमि-त्तिकोऽयं प्रायश्चित्ताधिकार इति मिताक्षरा॥ स्वामित्वं। यथा "सर्व्वेष्वधिकारिणः" इति स्मृतिः॥ अधिकृतदेशादिः। यथा निजाधिकारः भिन्नाधिकारः इत्यादि बहवः शिष्टप्रयोगाः॥ (यथा मनुः।—
"तस्य शास्त्रेऽधिकारोऽस्मिन्
ज्ञेयो नान्यस्य कस्यचित्"॥)

अधिकारी, [न्] त्रि, (अधिकरोति अधि + कृ + नन्द्यादित्वात् णिनि।) प्रभुः। स्वामी। अधि-पतिः। अधिकारविशिष्टः। स्वत्ववान्। इति स्मृतिः॥ यथा,—
"इत्यपूर्वं द्विजातीनां धर्म्मः सामान्य उच्यते।
अधिकारी भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके"॥
इति मलमासतत्त्वं॥ अपिच।
"जातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि"।
इत्याह्निकाचारतत्त्वं॥ वेदान्तमते विधिवदधीत-वेदाङ्गत्वेन आपाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्ज्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गत-निखिलकल्मषतया नितान्तनिर्म्मलस्वान्तः साधन-चतुष्टयसम्पन्नः प्रमाता। इति वेदान्तसारः॥ ०॥ धनाधिकारिणो दायभागशब्दे द्रष्टव्याः॥ ०॥ श्रीमूर्त्त्यादीनां सेवकश्च। इति लोकप्रसिद्धं॥

अधिकारी, [न्] पुं, (अधिकरोति अधि + कृ + नन्द्यादित्वात् णिनि।) वेदान्तशास्त्रवेत्ता। अधि-गताखिलवेदार्थनितान्तनिर्म्मलस्वान्तः साधनच-तुष्टयसम्पन्नः प्रमाता। इति वेदान्तसारः॥ [illegible]। इति [illegible]॥

अधिकृतः, पुं, (अधि + कृ + क्त) अध्यक्षः। आय-व्ययादिलेखकः। इत्यमरः॥ (आयात इत्यधिकृतेन सदा सर्व्वेणा या [illegible] [illegible]। इति [illegible]।) [illegible] [illegible]।

अधिक्रमः, पुं, (अधि + क्रम + घञ् [illegible]) आक्रमणं। इति है-

अधित्यका, स्त्री, (अधिरूढा पर्व्वतोपरिभागम् अधि + त्यकन् प्रत्ययः टाप् ।) पर्व्वतोपरिभूमिः । इत्यमरः । (उपत्यकादेशासन्ना भूमिरूर्द्ध्वमधित्यका । इत्यमरः । यथा रघुः,—"अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं" ।)

अधिप, त्रि, (अधिपाति रक्षति अधि + पा + क ।) अधिपतिः । स्वामी । ईश्वरः । राजा । इति [illegible] । (यथा रघुः,—[illegible] ।)

अधिपति, पुं, (अधिपाति रक्षति अधि + पा + डति ।) प्रभुः । स्वामी । इति [illegible] । (यथा [illegible] ।)

अधिभू, पुं, (अधि + भू + क्विप् ।) स्वामी । प्रभुः । ईश्वरः ।

अधिष्ठान, पुं, [illegible]

[illegible]

अधिवचनं, क्ली, (अधि + वच् + ल्युट् । पक्षपातेन कथनं । "अधिकं वचनं पक्षपातेन वचनं" इति माधवाचार्य्यः ।) नाम । संज्ञा । इति त्रिकाण्डशेषः ॥

अधिवासः, पुं, (अधि + वस् + घञ् ।) निवासः । धूपनादिभिः संस्कारः । इति मेदिनी ॥ तद्द्रव्याणि । मृत्तिका १ गन्धः २ शिला ३ धान्यं ४ दूर्व्वा ५ पुष्पं ६ फलं ७ दधि ८ घृतं ९ स्वस्तिकं १० सिन्दूरं ११ शङ्खः १२ कज्जलं १३ रोचना १४ श्वेतसर्षपः १५ स्वर्णं १६ रौप्यं १७ ताम्रं १८ चामरं १९ दर्पणं २० दीपः २१ प्रशस्तपात्रं २२ । इति भवदेवः ॥ क्वचित् पुस्तके श्वेतसर्षपस्थाने सिद्धार्थं क्वचिच्च चामरस्थाने । तत्रानुष्ठानं । "दुर्गापूजादौ यागादौ पूर्व्वदिने सायंकाले आचारात् संस्कारकर्म्माणि तद्दिने पूर्व्वाह्णे मन्त्रं पठित्वा क्रमेणोक्तद्रव्याणि धात्री देवादीनां ललाटे यथाभूमौ स्पर्शयित्वा प्रशस्तपात्रे स्थापयित्वा तत्पात्रं पूजासमये वारत्रयं स्पर्शयेत् । इत्यधिवासेन संस्कारः । तत्र यजुर्व्वेदोक्तमन्त्राः पञ्चविंशतिद्रव्याणि च यथा । तैलहरिद्रां गृहीत्वा,—

"ॐ कोऽसि कतमोऽसि कस्मै त्वा काय त्वा सुश्लोक सुमङ्गल सत्यराजन् । अनया तैलहरिद्रया अस्य शुभाधिवासनमस्तु । इदं सर्व्वं" । १ ।

गन्धं गृहीत्वा,—

"ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं । ईश्वरीं सर्व्वभूतानां तामिहोपह्वये श्रियं" । २ ।

मृदं गृहीत्वा,—

"ॐ भूरसि भूमिरस्य दितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृ(ꣳ)ह पृथिवीं मा हि(ꣳ)सीः" । ३ ।

दूर्व्वादौ[illegible] मन्त्रमिति ।

शिलां गृहीत्वा,—

"ॐ प्रपर्व्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः ता आववृत्रन्नधराग् उदक्ता अहिं बुध्न्यमनुरीयमाणा । विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि" । ४ ।

धान्यं गृहीत्वा,—

"ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञन्यं" । ५ ।

दूर्व्वां गृहीत्वा,—

"ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि । एवा नो दूर्व्वे प्रतनु सहस्रेण शतेन च" । ६ ।

पुष्पं गृहीत्वा,—

"ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्णन्निषाण मुम्म इषाण सर्व्वलोकम्म इषाण" । ७ ।

फलं गृहीत्वा,—

"ॐ या फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व(ꣳ)हसः" । ८ ।

दधि गृहीत्वा,—

"ॐ दधिक्राव्णोऽकारिषं जिष्णोरश्वस्य वाजिनः सुरभिनो मुखाकरत् प्रणआयू(ꣳ)षि [illegible]

घृतं गृहीत्वा,—

"ॐ तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि" । [illegible]

स्वस्तिकं गृहीत्वा,—

"ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु" । ११ ।

सिन्दूरं गृहीत्वा,—

"ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्तु घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः" । अत्र "[illegible] पतयन्ति यह्वा" । इत्यपि पठन्ति । १२ ।

शङ्खं गृहीत्वा,—

"ॐ प्रतिश्रुत्काया अर्त्तनं घोषाय [illegible] अन्तवादिनमनन्ताय मूक(ꣳ) शब्दायाडम्बराघातं महसे वीणावादं क्रोशाय तूणवध्मं अवरस्पराय शङ्खध्मं वनाय वनपमन्यतोऽरण्याय दावपं" । [illegible]

कज्जलं गृहीत्वा,—

"ॐ समिद्धोऽअञ्जन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः वाजी वहन् वाजिनं जातवेदो देवानां वक्षिप्रियमासधस्थं" । १४ ।

रोचनां गृहीत्वा,—

"ॐ युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः रोचन्ते रोचना दिवि" । १५ ।

सिद्धार्थं गृहीत्वा,—

"ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः प्रदातारं तारिषऊर्ज्जं नो धेहि द्विपदे चतुष्पदे । सिद्धार्थमत्र आतपतण्डुलाः" । [illegible]

काञ्चनं गृहीत्वा,—

"ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम" । १७ ।

रजतं गृहीत्वा,—

"ॐ तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनं" । १८ ।

ताम्रं गृहीत्वा,—

"ॐ असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ये चैन(ꣳ) रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषा(ꣳ) हेड ईमहे" । १९ ।

[illegible] गृहीत्वा,—

"ॐ रक्षोहणो बलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो बलगहनो अवनयामि वैष्णवान् रक्षोहणो बलगहनोऽवस्तृणामि वैष्णवान् रक्षोहणौ वां बलगहना उपदधामि वैष्णवी रक्षोहणौ वां बलगहनौ पर्य्यूहामि वैष्णवी वैष्णवमसि वैष्णवाः स्थ" । [illegible]

दर्पणं गृहीत्वा,—

"ॐ [illegible] रथेन [illegible] हिरण्ययेन सविता [illegible] भुवनानि पश्यन्" [illegible]

दीपं गृहीत्वा,—

"ॐ अम आयाहि वीतये गृणानो हव्यदातये। होता सत्सि बर्हिषि"। २२।

इति यवगुड़ाञ्जलयं गृहीत्वा,—

"ॐ प्रतिपदसि प्रतिपदे त्वा अनुपदसि अनुपदे सम्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा"। २३।

इति यजुर्वेदीयदुर्गोत्सवपद्धतिः ॥ ॥ सामवेदिनामधिवाससमन्त्रास्तद्द्रव्याणि च यथा। प्रथमं गन्धेन,—

"ॐ मद्रा इन्द्रस्य रातयः यो ऽस्य कामं विधतो न रोषति मनो दानाय चोदयन्"। १।

"ॐ महित्रीणामवरस्तु द्युक्षमित्रस्यार्यम्णः दुराधर्षं वरुणस्य"। २।

इति मद्या।

सिन्दूरेण,—

"ॐ भद्रा इन्द्रस्य रातयः इत्यादि"। ३।

"ॐ विलदायो न पर्व्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः तत्वागिरः॥ सुष्टुतयो वाजदत्या नगिर्व्वर्दशो शियुरस्रा"। ४।

इति शिलया।

"ॐ धानावन्तं करम्भिणमपूपवन्तमुक्थिनं इन्द्र प्रातर्जुषस्व नः"। ५।

इति धान्येन।

"ॐ अज्ञायथा अपूर्व्व्य मघवन् वृत्रहत्याय। तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम्"। ६।

इति दूर्व्वया।

"ॐ पवमान व्यश्नुहि रश्मिभिर्व्वाजसातमः। दधत्स्तोत्रे सुवीर्य्यम्"। ७।

इति पुष्पेण।

"ॐ इन्द्रश्रीने मधिता हवन्ते यत्पार्य्या युनजते धियस्ताः शूरो नृषाता श्रवसश्च कामता गोमति व्रजे भजात्वन्नः"। ८।

इति फलेन।

"ॐ दधिक्राव्णोऽकारिषं जिष्णोरश्वस्य वाजिनः सुरभिणो मुखाकरोत् प्रणतायूंषि तारिषत्"। ९।

इति दध्ना।

"ॐ घृतवती भुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभिते अजरे भूरिरेतसा"। १०।

इति घृतेन।

"ॐ अस्ति सोमोऽयं सुतः पिबन्त्यस्य मरुतः उत स्वराजो अश्विना"। ११।

इति स्वस्तिकेन।

"ॐ सिन्धोरिवप्रध्वासे पतयन्तमुक्षणं हिरण्यपावा पशुमप्सु गृभ्णते"। १२।

इति सिन्दूरेण।

"ॐ स्वस्त्ययेन वस्तूनां यो राया मानेता य इडानां सोमो यः सुक्षितीनां"। १३।

इति शङ्खेन।

"ॐ अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते"। १४।

इति कज्जलेन।

"ॐ आयन्त इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत वसूनि जातो जनिमान्योजसा प्रतिभागन्नदीधिमः"। १५।

इति गोरोचनया।

"ॐ प्रलीउया यमूर्व्या युक्तानि प्रिया दिवस्तये वा मन्विना हुवत्"। १६।

इति सिद्धार्थेन।

"ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं। सनिं मेधा मयासिषं"। १७।

इति काञ्चनेन।

"ॐ यद्वर्चो हिरण्यस्य यद्वा वर्च्चो गवामुत। सत्यस्य ब्रह्मणो वर्च्चसेन मा संसृजामसि"। १८।

इति रौप्येण।

"ॐ रूपमदासि सूर्य्य बडादित्य महां असि महस्ते सतो महिमापनिष्ट मह्ना देव मह्नां असि"। १९॥

इति ताम्रेण।

"ॐ मनज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं। यज्ञं समिमं दधातु विश्वे देवाः स इह मादयन्तां ओं प्रतिष्ठ"। २०।

इति दीपेन।

"ॐ आदित्य प्रयतस्य रेतसो ज्योतिः पश्यन्ति वासरं पावाय दिवं तोदिवि"। २१।

इति दर्पणेन।

"ॐ उदाक्षोकानरोचय प्रभभूतमरोचय छोड़ इमान् लोकानरोचय छोड़ विश्वभूतमरोचय। चौड़ा गेवात्र धर्म्मो ज्योतीषि"। २२।

इति प्रशस्तपात्रेण। प्रशस्तपात्रं पूर्व्वोक्तसर्व्वद्रव्यस्थापितैकपात्रं। इति सामवेदीयदुर्गोत्सवपद्धतिः॥

अधिवासनं, क्ली, (अधिवासयति स्थापयति देवता अनेन अधि+वस्+णिच्+करणे ल्युट्।) अधिवासः। गन्धमाल्यादिभिः संस्कारकरणं। इत्यमरः॥ (अनया तैलहरिद्रया अस्याः शुभाधिवासनमस्तु॥ इति दुर्गोत्सवपद्धतिः॥)

अधिविन्ना, स्त्री, (अधिविद्यते लभ्यतेऽसौ, अधि+विद्+कर्म्मणि क्तः स्त्रियां टाप्।) अध्यूढ़ा। प्रथमविवाहिता स्त्री। कृतानेकविवाहस्वामिनः यापेक्षिकप्रथमोढ़ा भार्य्या। इत्यमरः॥

("अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं"॥ इति मनुः।)

अधिश्रयणी, स्त्री, (अधि श्रियते पच्यतेऽत्र अधि+श्रि+अधिकरणे ल्युट् स्त्रियां ङीप्।) चुल्ली। इत्यमरः॥ चुला इति भाषा।

अधिष्ठानं, क्ली, (अधितिष्ठत्यत्र अधि+स्था+अधिकरणे ल्युट्।) नगरं। चक्रं। प्रभावः। अध्यासनं। अवस्थानं। इत्यमरः॥ (यथा रामायणे,—

"यद्भयात् सम्परित्यज्य स्वमधिष्ठानमृद्धिमत्। कैलासं पर्व्वतश्रेष्ठमध्यास्ते नरवाहनः"।)

अधिक्षिप्तः, त्रि, (अधि+क्षिप्+कर्म्मणि क्तः।) प्रतिक्षिप्तः। इत्यमरः॥ प्रेरितः। इति भरतः॥ प्रणिहितः। स्थापितः। कुत्सितः। भर्त्सितः। इति मेदिनी॥

अधीतः, त्रि, (अधि+इङ्+कर्म्मणि क्तः।) कृताध्ययनः। पठितः। यथा,—

"अधीते शतसाहस्रमनन्तं वेदपारगे"।

इति स्मृतिः॥ पठितशास्त्रं। पाठे करी॥

अधीतिः, स्त्री, (अधि+इङ्+भावे क्तिन्।) अध्ययनं। पठनं। इति जटाधरः॥

अधीती, [न्] त्रि, (अधीतमनेन अधीत+इन्।) अध्ययनविशिष्टः। कृताध्ययनः। इति व्याकरणं॥

अधीनः, त्रि, (इनं प्रभुमधिगतः अत्यादीति समासः।) परवशः। तत्पर्य्यायः। निघ्नः २ आयत्तः ३ अस्वच्छन्दः ४ गृह्यकः ५। इत्यमरः॥ (यथा कुमारसम्भवे,—

"त्वदधीनं खलु देहिनां सुखं"॥)

अधीरः, त्रि, (न धीरः स्थिरः नञ्समासः।) चञ्चलः। इति हलायुधः॥ कातरः। इत्यमरः॥ (यथा नागानन्दे,—

"निर्व्याजं विधुरेऽस्वधीर इति मां येनाभिधत्ते भवान्"॥)

अधीरा, स्त्री, (न धीरा स्थिरस्थायिनी, नञ्समासः।) विद्युत्। इति हारावली॥ मानावस्थायां मध्याप्रगल्भनायिकयोर्भेदः॥ तस्या लक्षणं। अव्यक्तकोपप्रकाशकत्वं। मध्याधीरायाः परुषवाक् कोपप्रकाशिका॥ प्रौढ़ाधीरायास्तर्ज्जनताड़नादिकं कोपप्रकाशं। सा द्विधा। ज्येष्ठा कनिष्ठा च। इति रसमञ्जरी॥

अधीशः, त्रि, (अधिक ईशः कर्म्मधारयः।) अधिपतिः। प्रभुः। इति हलायुधः॥ (यथा पञ्चतन्त्रे,—

"चन्द्रे मण्डलसंस्थे विगृह्यते राहुणा दिनाधीशः॥)

अधीश्वरः, त्रि, (अधिक ईश्वरः कर्म्मधारयः।) प्रणताशेषसामन्तः। महाराजः। चक्रवर्त्ती। इत्यमरः॥

अधुतं, त्रि, अकम्पितं। धुञ्कम्पे इत्यस्मात् कर्म्मणि क्तः, पश्चान्नञ्समासः। दीर्घमध्योऽपि॥

अधुना, अ, (अस्मिन् काले इदमुशब्दस्य रूपमिति निपातनात्।) अस्मिन्काले। इदानीं। सम्प्रति। इत्यमरः॥

अधुनातनं, त्रि, (अधुना भवम् अधुना+ट्यु तुट् च।) इदानीन्तनं। वर्त्तमानकालवृत्ति। एतत्कालीनं। इति व्याकरणं॥

अधृतः, पुं, (धृ क्तः, न धृतः नञ्समासः।) विष्णुः। इति तस्य सहस्रनाममध्ये पठितः। अकृतधारणवस्तुनि त्रि॥

अधृष्टः, त्रि, (धृष्+क्तः, न धृष्टः नञ्समासः।) सलज्जः। तत्पर्य्यायः। अप्रगल्भः २। इति शब्दरत्नावली॥ शारदः ३ अप्रतिभः ४। इति जटाधरः॥ शालीनः ५। इत्यमरः॥

अधृष्यः, त्रि, (धृष्+कर्म्मणि क्यप्।) प्रगल्भः। अधर्षणीयः। इति मेदिनी॥ (यथा रघुवंशे,—

"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनां। अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः"॥)

अधृष्या, स्त्री, (न+धृष्+संज्ञायां क्यप्। अस्यां

ज्ञाने पराभवो न भवति तादृशी नदी।) नदी-
विशेषः। इति मेदिनी॥

अधैर्य्यं, त्रि, (नास्ति धैर्य्यं यस्य सः।) धीरताशून्यः।
धैर्य्याभावे क्ली। यथा,—
"धैर्य्याधैर्य्यपरिग्रहग्रहिलयोरेणीदृशोः प्रीतये"।
इति भानुभट्टः॥

अधोऽंशुकं, क्ली, (अधः नीचदेशस्थम् अंशुकं वस्त्रं,
कर्म्मधारयः।) परिधानवस्त्रं। इत्यमरः॥

अधोघण्टा, स्त्री, (अधः अधोदेशादारभ्य घण्टेव
वर्णं यस्याः सा।) अपामार्गः। इति रत्नमाला॥

अधोजिह्विका, स्त्री, (अन्या जिह्वा कन् स्त्रियां टाप्,
अधः अधरा जिह्विका कर्म्मधारयः।) तालु-
मूलस्थक्षुद्रजिह्वा। इति भाषा। इति शारावली॥ आम्नजिव

अधोभुवनं, क्ली, (अधः नीचदेशस्थं भुवनं लोकः
कर्म्मधारयः।) पातालं। इत्यमरः॥

अधोमर्म्मं, [न्] क्ली, (अधः अधरं मर्म्मं छिद्रं।)
गुह्यद्वारं। इति हेमचन्द्रः॥

अधोमुखः, त्रि, (अधोमुखं यस्य सः।) अधोवदनः।
पातालमुखः। तत्पर्य्यायः। अवाङ्मुखः २। इत्य-
मरः॥ अवाचीनः ३। इति जटाधरः॥ अधो-
मुखनक्षत्रगणो यथा,—
"मघेन्द्रवह्निद्वयमपित्र्यविशाखयुक्तं
पूर्वत्रयं शतभिषा च नवाप्युडूनि।
एतान्यधोमुखगणानि शुभानि नित्यं
विद्याप्रभूमिखननेषु च शोभितानि"॥
इति ज्योतिःसारसंग्रहः।

अधोमुखा, स्त्री, (अधोमुखं यस्याः सा, स्त्रियां
टाप्।) गोजिह्वाक्षुपः। इति राजनिर्घण्टः॥

अधोवायुः, पुं, (अधः अधरः वायुः कर्म्मधारयः।)
अपानवायुः। यथा,—
"हुतेऽधोवायुगमने चमने जपमुत्सृजेत्"।
इति तन्त्रसारे योगिनीहृदयं॥

अधोक्षज, पुं, (अधः ह्रासाभावात् क्षीणम् अक्षजं
[illegible] यस्य सः। अक्षात् इन्द्रियात् जायते
अक्ष + जन् + ड, पश्चमीतत्।) विष्णुः। इत्यमरः॥
(यथा महाभारते। अधो न क्षीयते जातु यस्मा-
[illegible]क्षारधोक्षजः॥)

[illegible]

रमागायः॥ कर्म्मणि प्रत्ययः इति नयनानन्दः॥
अध्यक्षो बलीयमः। इति केचित्॥ उद्योगोद्यमौ
चात्र। इति भरतः॥

अध्यशनं, क्ली, (अधिकमशनं भोजनं कर्म्मधारयः।)
अजीर्णे भोजनं। यथा। अजीर्णे भुज्यते यत्तु
तदध्यशनमुच्यते। इति भावप्रकाशः॥

अध्यक्षः, पुं, (अध्यक्ष्णोति समन्तात् व्याप्नोति
अधि + अक्षू + अच्।) (ऋणधारणादि व्यवहारे-
ऽधिकृतः। व्यापकः।) क्षीरिकावृक्षः। इति
शब्दरत्नावली॥

अध्यक्षः, त्रि, (अक्षमिन्द्रियमधिगतः प्रादि-
समासः।) प्रत्यक्षः। इन्द्रियजन्यज्ञानं।
(यदध्यक्षेण जगतां वयमारोपितास्त्वया॥
इति कुमारसम्भवे।) अधिकृतः।
आयव्ययादिनिरीक्षकः। इत्यमरः॥

अध्यापकः, त्रि, (अधि + इङ् + णिच् + ण्वुल्।)
अध्यापनकर्त्ता। पाठगुरुः। अध्यापयिता। तत्प-
र्य्यायः। उपाध्यायः २। इत्यमरः॥

अध्यापनं, क्ली, (अधि + इङ् + णिच् + भावे ल्युट्।)
पाठनं। विद्यादानं। ब्राह्मणानां षट्कर्म्मान्तर्गत-
कर्म्मेदं। इति शब्दरत्नावली॥ (यथा मनुः,—
"अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव षट्कर्म्माण्यग्रजन्मनः"॥)

अध्यायः, पुं, (अधि + इङ् + भावे घञ् अध्ययनम्।)
वेदपुराणादिपरिच्छेदः। ग्रन्थसन्धिः। तन्नामान्त-
राणि यथा। सर्गः। वर्गः। परिच्छेदः। उद्घातः।
अङ्कः। संग्रहः। उच्छ्वासः। परिवर्त्तः। पटलः।
काण्डं। स्थानं। प्रकरणं। पर्व्व। आह्निकं॥ इति
त्रिकाण्डशेषः॥ स्कन्धः। कारिका। उल्लासः॥
पादः। उद्योतः। विरचनं॥ इत्यादयपि॥
पद्मम्।
("सर्गोवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च॥
स्थानं प्रकरणं चैव पर्व्वोल्लासाह्निकानि च।
पुराणादौ परिच्छेदा अनेके परिकीर्त्तिताः॥")

अध्यारूढः, त्रि, (अधि + आङ् + रुह् + क्तः।)
समारूढः। शतारोहणः। अभ्यधिकः। अति-
शयः। इति मेदिनी॥

अध्यारोप, पुं,(अधि + आ + रुह् + णिच्भावे अच्।)
वस्तुन्यवस्त्वारोपः। सच्चिदानन्दानन्ताद्वयब्रह्मणि
अज्ञानादिसकलजडसमूहस्यारोपणमित्यर्थः। अ-
सर्पभूतरज्जौ सर्पारोपवत्। इति वेदान्तसारः॥

अध्यावाहनिकं, क्ली, (अध्यावाहनं पितृगृहात्
स्वामिगृहागमनं तत्काले लब्धं अध्यावाहन +
लब्धार्थे ठन् तस्य इकः। अधि + आ + वह् +
णिच् ल्युट्।) स्त्रीधनविशेषः। यथा,—
"यत् पुनर्लभते नारी नीयमाना हि पैतृकात्।
अध्यावाहनिकं नाम तत् स्त्रीधनमुदाहृतं॥"
इति दायभागे कात्यायनः॥

अध्याहरणं, क्ली, (अधि + आ + हृ + भावे ल्युट्।)
अध्याहारः। तर्कः। ऊहनं। इति शब्द-
रत्नावली॥

अध्याहारः, पुं, (अधि + आ[illegible]
तर्कः। ऊहः। इत्यमरः॥ [illegible]
नारेण स्पष्टीकरणं। आ[illegible]
सन्धानं। वाक्यसम्पूर्णार्थपद[illegible]
पदान्तरमुपादाय आकीकरणं[illegible]

अध्युषः, त्रि, (अधि + वस् + [illegible]
विधेरनित्यात् इडागमाभावः। [illegible]
साथ अभिधाननियामका इति प्र[illegible]
त्रिमद्धा। १॥ साड़े तिन [illegible]
यथा,—
अवाप्य तां भूमिं भुजगनिभमध्युष्ठ[illegible]
इति आनन्दलहरी॥

अध्युद्र, पुं, (उद्रमधिगतः प्रादिसमास[illegible]
युग्मरथः। उद्वाह्यपेक्षा। इति शाग[illegible]

अध्युढ़, पुं, (अधि + वह् + क्त।) महेश्व[illegible]
मेदिनी॥ (अधिरोपितः। समूढ़। [illegible]
शाली।)

अध्युढ़, त्रि, (आधिक्येन वृद्धिं गतः अधि + ग[illegible]
क्तः।) अधिकवृद्धियुक्तः। समृद्ध। इति श[illegible]

अध्यूढा, स्त्री, (अधि + वह + कर्म्मणि क्त, [illegible]
टाप्।) प्रथमविवाहिता स्त्री, कृतसापत्न[illegible]
कृतानेकविवाहस्य प्रथमोढ़ा स्त्री। इत्[illegible]
मेदिनीकरौ॥

अध्येषणा, स्त्री, (अधि + इष् + णिच् + भावे [illegible]
स्त्रियां टाप्।) याच्ञा। इति हेमचन्द्रः। यत्[illegible]
आदरपूर्व्वकं कार्य्ये नियुक्तकरणं। इ[illegible]
सत्कारपूर्व्वकं कार्य्ये नियोजनं। तत्प[illegible]
मनिः २। इत्यमरः॥ सनो ३। इति व्[illegible]

अध्वगः, पुं, (अध्वना पथा गच्छति अध्वन् + ग[illegible]
डः, उपपदसमासः।) पथिकः। इत्यमरः। ग[illegible]
इति त्रिकाण्डशेषः॥ सूर्य्यः। इति हेमच[illegible]
खेसरः। इति राजनिर्घण्टः॥ खचर इति म[illegible]

अध्वगभोग्य, पु, (अध्वगेन पथिकेन भोग्[illegible]
वासलभ्यफलत्वात्, तृतीयातत्पुरुषः।)
तकवृक्षः। इति त्रिकाण्डशेषः॥

अध्वगा, स्त्री, (अध्वन् + गम् + डः, उपपद[illegible]
स्त्रियां टाप्।) गङ्गा। इति त्रिकाण्डशे[illegible]

अध्वजा, स्त्री, (अध्वनि जायते अध्वन् + जन् [illegible]
उपपदसमास, स्त्रियां टाप्।) स्वर्णक्षीर[illegible]
इति राजनिर्घण्टः॥

अध्वनीनः, त्रि, (अध्वनि साधु अध्वन् +
ईनः।) पथिकः। इत्यमरः॥

अध्वन्यः, त्रि, (अध्वनि साधु अध्वन् + [illegible]
पथिकः। इत्यमरः॥ (अध्वन्येन विमुक्तकण्ठ[illegible]
रात्रिं तथा क्रन्दितं॥ इति अमरुशत[illegible]

अध्वरः, पुं, (अध्वानं सन्मार्गं राति ददाति अध्व[illegible]
रा + कः उपपदसमासः।) यज्ञः। ग[illegible]
सावधानः। इति मेदिनी॥ ("तमध्वरे विश्[illegible]
क्षितीशं"। इति रघुवंशे।)

अध्वरथ, पुं, (अध्वैव रथो गमनसाधन[illegible]
पथरथः। अध्वगमनोपयुक्तरथ। तत्पर्य्या[illegible]
परियानिकः २। इति हेमचन्द्र।

अध्वग्, पुं, (अध्वानं गच्छं याति अध्वन् + गम् + डः क्विप्, पृषोदरादित्वात् साधुः ... क्विप्, ... ।) [illegible] ... । इत्यमरः। (यथा कुमारसम्भवे,—
"[illegible]
[illegible]" ।)

अध्वशल्यः, पुं, (अध्वनि पथि शल्यमिव आचरति अध्वशल्य + क्विप् ततोऽच् ।) अपामार्गः। इति राजनिर्घण्टः।

अध्वा [न्] पुं, (अत्ति भक्षयति बलं नाशयति, अद् + बाहुलकात् क्वनिप्, पृषोदरादित्वात् दकारस्य धः।) पन्थाः। मार्गः। संस्थानं। अवस्कन्दः। इति मेदिनी। कालः। गगनं। इति च पाठान्तरं। [illegible] । [illegible] । इति [illegible] ।

अध्वाध्वगश्रमः, पुं, (अध्वगमनजन्यः श्रमः [illegible] श्रमवत्, षष्ठीतत्पुरुषः।) [illegible] । इति शब्दचन्द्रिका।

अन अ नु प्राणने। जीवने। इति कविकल्पद्रुमः। अ नु अनिति लोके जीवति इत्यर्थः। इति दुर्गादासः।

अन ह य प्राणने। जीवने। इति कविकल्पद्रुमः। य ङ अन्यते। इति दुर्गादासः।

अनंशुमत्फला, स्त्री, (न अंशुमत् रौपामार्जविशि-तया सूर्यकिरणशून्यं फलं यस्याः सा।) अंशुमत्फला। कदली। इति जटाधरः।

अनः [स्] क्ली, (अनिति जीवत्यनेन जीविकोपायत्वात् अन् + असुन्।) शकटं। इत्यमरः। (यथा मनुः,—
"हीना वापि एकैकस्मिन् दाप्यनःशते"।)
अन्नं। इत्युणादिकोषः। जननी। जन्म। जननी। इति कोषान्तरं।

अनकः, त्रि, (अन् + अच् + कुत्सायां कन्।) अवाच्यः। अधमः। इत्यमरटीकायां भरतः।

अनुयोगकृत्, पु, (अनुयोगं [illegible] कृन्तति, अनुयोग+कृत्+क्विप् ।) [illegible] इति हेमचन्द्रः ॥

अनुयोजनं, क्ली, (अनु+युज्+णिच्+ल्युट् ।) [illegible] इति हेमचन्द्रः ॥

अनुयोज्यं, त्रि, (अनुयुज्यते नियुज्यते, युज्+प्रश्नार्थे ण्यत् ।) निन्दार्हं । [illegible] निन्दार्थयुजधातो कर्म्मणि यत्प्रत्यय ।([illegible] भिषास्यः ।
"ममेदमिति यो ब्रूयात् सोऽनुयोज्यो [illegible]"
इति मनुः ।)

अनुरक्तः, त्रि, (अनु+रन्ज+कर्म्मणि क्तः ।) [illegible] सक्तः । अनुरागयुक्तः । यथा,—
"अनुरक्तो गुणान् ब्रूते विरक्तो दूषणं [illegible]"
इत्युद्भटः ॥

(अनुरञ्ज)नं, स्त्री, (अनु+रन्ज+भावे ल्युट्।) अनुरागः। हर्षजननं। यथा,—विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवरेति जयदेवः॥ प्रीतिजननं। आह्लादनं। आराधनं। "युक्तः प्रजानामनुरञ्जने स्यात्तस्मात् यशो यत् परमं धनं वः"। इति उत्तरचरिते।)

(अनुर)क्तः, त्रि, (अनु+रम्+कर्त्तरि क्तः।) अनुरागविशिष्टः। प्रीतः। अनुरक्तः। अनुपूर्व्वरमधातोः कर्त्तरि क्तः॥

"धर्म्मानुरतमव्यग्रं शान्तं सत्यतमार्य्यिणम्"। इति भारते)॥

(अनुर)तिः, स्त्री, (अनु+रम्+भावे क्तिन्।) अनुरागः। इति हेमचन्द्रः॥

(अनु)रागः, पुं, (अनु+रन्ज+भावे घञ्।) प्रीतिः। आसक्तिः। तत्पर्य्यायः। रतिः २ रागः ३ अनुरक्तिः ४। इति हेमचन्द्रः॥

"कण्टकितेन प्रथयति मय्यनुरागं कपोलेन"। इति शाकुन्तले।)

(अनु)रागी, [न्] त्रि, (अनु+रन्ज+कर्त्तरि घिनुण् कुत्वं निपातनात् नलोपश्च।) अनुरागविशिष्टः। अनुरक्तः। इति शब्दरत्नावली॥

(अनु)राधा, स्त्री, (राधां विशाखामनुगता, कुगतिप्रादयइति सूत्रेण समासः।) सप्तदशनक्षत्रं। तस्या रूपं। सर्पाकृतिसप्ततारामयं। इति कालिदासः। "बलिनिभतारा चतुष्टयात्मकं"। इति दीपिकाटीका॥ अस्या अधिदेवता मित्रः। तत्र जातफलं। यथा,—

"लक्ष्मीर्त्तिकान्तिश्च सदोत्सवःस्या-
ज्जेता रिपूणाञ्च कलाप्रवीणः।
स्यात्सम्भवे यस्य किलानुराधा
सम्पत्प्रमादौ विविधौ भवेतां॥"

इति कोष्ठीप्रदीपः॥

(अन)ुरूपः, त्रि, (रूपमनुगतः प्रादिसमासः।) तुल्यरूपः। सदृशः। यथा,—

"देवानामनुरूपा हि चरन्तीते महीतले"। इति रामायणं॥ (तुल्यगुणः। योग्यः।

"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः"। इति रघुवंशे।)॥

अनुरोधः, पुं, (अनु+रुध्+घञ्।) आराध्यादेरिष्टसम्पादनं। उपरोधः। ("तदनुरोधात् कठोरगर्भामपि वधूं जानकीं विमुच्य गुरुजनस्तत्र गतः"। इति उत्तरचरिते।) तत्पर्य्यायः। अनुवर्त्तनं २। इत्यमरः॥

अनुलापः, पुं, (अनु वारं वारं लपनं, अनु+लप्+भावे घञ्।) पुनः पुनः कथनं। पुनरुक्तिः। इत्यमरः॥

अनुलेपनं, स्त्री, (अनु+लिप्+भावे ल्युट्।) गात्रे गन्धद्रव्यादिलेपनं। तद्द्रव्यञ्च। तस्य गुणाः। प्रीत्योजःपुष्टिकारित्वं। घर्म्मदौर्गन्ध्यतन्द्रातापश्रमनाशित्वञ्च। इति राजवल्लभः॥ ("निश्वसमाल्याभरणानुलेपना"। इति ऋतुसंहारे।)

अनुलोमः, पुं, (अनुपूर्व्वात् लोमशब्दात् अच्, प्रशस्तवेति अच्।) यथाक्रमं। अविलोमः। यथा,—

"वर्णमाला समाख्याता अनुलोमविलोमिका"। इति तन्त्रसारे नारदवचनं॥ (क्रमानुगतः। अनुकूलः।

"जडानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः"। इति शिशुपालवधे।)

अनुलोमजः, त्रि, (अनुलोमेन यथाक्रमेण जातः, अनुलोम+जन+डः, उपपदसमासः)। अनुलोमजातः। अप्रतिलोमजः। यथा। ब्राह्मणात् क्षत्रियागर्भजातः। क्षत्रियात् वैश्यायां जातः। इत्यादि उत्तमादधमायां जातः। यथा,—

"सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः।
अन्योऽन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः"॥

इति मनुः॥

अनुवत्सरः, पुं, (अनुकूलोवत्सरः, दानादिविशेषाय।) वर्षः। इति हेमचन्द्रः॥ संवत्सरादिपञ्चकान्तर्गतवत्सरविशेषः। यस्मिन् वर्षे धान्यदाने महाफलं। शकाब्दात् पञ्चभिर्हृते यः शेषस्तिष्ठति तेन एकादिक्रमेण सं-परि-इदा-अनु-उदा-पूर्व्वकवत्सरसंज्ञका वत्सरा भवन्ति। इति मलमासतत्त्वं॥

अनुवर्त्तनं, स्त्री, (अनु+वृत्+भावे ल्युट्।) अनुरोधः। इत्यमरः॥ व्याकरणमते पूर्व्वबद्धस्थितपदादेरनुवृत्तिः॥ (पश्चाद्गमनं। अनुसरणं।

"इदानीं तदाज्ञानुवर्त्तनं उचितम्"। इति हितोपदेशः।)

अनुवाकः, पुं, (अनूच्यते अनु+वच्+घञ्, कुत्वं।) ऋग्यजुःसामसमूहः। इत्यमरः॥ वेदविशेषः। इति सुभूतिः॥ ("जेतुं जैत्रानयं खलु जयन् सूक्तसामानुवाकान्"। इति महावीरचरिते।)

अनुवादः, पुं, (अनु+वद्+घञ्।) कुत्सितार्थवाक्यं। इति शब्दरत्नावली॥ पुनरुक्तिः। उक्तस्य पुनःकथनं। यथा,—

"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः"॥

इति मुद्रितन्यटीका॥ आचारभनमात्रं। यथा,—

"विनानुवादं न च तन्मनीषितं
सम्यग्यतस्त्यक्तमुपाददत् पुमान्"।

इति श्रीभागवतं॥

अनुवासनं, स्त्री, (अनु+वास+सौरभ्ये भावे ल्युट्।) स्नेहनं। धूपनं। इति हेमचन्द्रः॥ स्नेहवस्तिः। यथा,—

"अथानुवासनं स्नेहवस्तिधूपनयोरपि"। इति मेदिनी॥

"द्विधा वस्तिः परिज्ञेयो निरूहश्चानुवासनं।
कषायाद्यैर्निरूहः स्यात् स्नेहाद्यैरनुवासनं"॥

इति वैद्यकं॥

अनुवृत्तिः स्त्री, (अनु+वृत्+क्तिन्। अनुवर्त्तनं। अनुरोधः। इति। हेमचन्द्रः। व्याकरणमते,—

"पूर्व्वसूत्रस्थितपदस्य परसूत्रेषूपस्थितिः"। तत्पर्य्याय अधिकारः २। सा त्रिविधा यथा,—

"सिंहावलोकितान्यस्य मण्डूकप्लुतिरेव च।
गङ्गास्रोत इति ख्यातः अधिकारास्त्रयो मताः"॥

सिंहावलोकितो यथा। वावगोदान्ते इत्यस्मात् दान्त इति पदस्य अकव्यमित्यन्तेषूपस्थितिः॥ मण्डूकप्लुतिर्यथा। टा भिस् ङे ङसील्यस्मात् अत इति पदस्य आस्मिभवीत्यन्तेषूपस्थितिः॥ गङ्गास्रोतो यथा। लिः सि औ जसित्यस्मात् लेरिति पदस्य तद्धितपर्य्यन्तेषूपस्थितिः॥ इति मुग्धबोधटीकायां दुर्गादासः॥ (अनुवर्त्तनं। अनुसरणं। अनुमोदनं। अनुरञ्जनं।

"अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्त्तुमुत्सहे"।

इति कुमारसम्भवे। अनुकरणं। "यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा"। इति साहित्यदर्पणे।

"कान्तानुवृत्तिचातुर्य्यमपि अनुशिक्षितं वत्सेन"। इति उत्तरचरिते।)

अनुव्रजनं, स्त्री, (अनु+व्रज+भावे ल्युट्।) अनुव्रज्या। गृहागतानां शिष्टानां गमनसमये कियद्दूरपर्य्यन्तपश्चाद्गमनरूपशिष्टाचारः। आग बाडान इति भाषा। यथा,—

"आयान्तमग्रतो गच्छेत् गच्छन्तं तमनुव्रजेत्"। इति तन्त्रसारे निगमकल्पद्रुमः॥

अनुशयः, पुं, (अनु+शी+भावे अच्, शयं हस्तमनुगतः प्रादिसमासः, हस्तानुगते त्रि।) दीर्घद्वेषः। पूर्व्ववैरता। अनुतापः। इत्यमरः। ("अनुशयादनुरोदिमि चोत्सुकः"। "अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम्"। इति शाकुन्तले।) द्वेषः। अनुबन्धः। इति मेदिनी॥ (क्रोधः। मध्यस्थामादिकारणात् विप्रतिपत्तिः। यथा,—

"क्रयविक्रयानुशयो विवादः स्वामिपालयोः"। इति मनुः।)

अनुशयाना, स्त्री, (अनु+शी+शानच्, अनुतापकर्त्तरि त्रि।) परकीयान्तर्गतनायिकाभेदः। तस्या लक्षणं। इष्टहानिजनितानुतापवती। सा त्रिधा। वर्त्तमानसङ्केतस्थानविघट्टनेन १ भाविसङ्केतस्थानाभावशङ्कया २ स्वानधिष्ठितसङ्केतस्थाने भर्त्तुर्गमनानुमानेन ३। इति रसमञ्जरी॥

अनुशयी, स्त्री, (अनुशय्यते अनुतप्यतेऽनया, अनु+शी+अच्, गौरादित्वात् ङीष्।) क्षुद्ररोगान्तर्गतपादरोगविशेषः। तस्य लक्षणं। यथा,—

"गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थितां।
पादस्यानुशयीं तान्तु विद्यादन्तःप्रपाकिनीं"॥

इति माधवकरः॥ तच्चिकित्सा यथा,—

"हरेदनुशयीं वैद्यः क्रियया श्लेष्मविद्रधेः"। इति भावप्रकाशः॥

अनुशयी, [न्] त्रि, (अनु+शी+इनि।) दृढवत्सलतामैश्वरस्मूले शेते यः। यथा। "यं संपद जघान्यजनानुशयी सुमः कुमारं यथा"। इति श्रीभागवतं॥ (बहुर्थमासक्तः। अनुरक्तः। पश्चात्तापयुक्तः। अनुशोचनपरः।)

अनुशासः, पुं, (अनुशास्ति [illegible] नु+शस+ [illegible] घञ्।) राक्षस [illegible] ॥

[illegible]

अनुसन्धानं, क्ली, (अनु+सम्+धा भावे ल्युट्।) अन्वेषणं। चेष्टा। इत्यादिकाद्यानुसन्धानवना-
[illegible] इति शब्दकल्पः।

अनुसारः, पुं, (अनु+सृ+भावे घञ्।) अनुसरणं। अनुक्रम। यथा,—
"कद [illegible] विधिं यस्ते लौकशास्त्रानुसारतः"।
इति वैद्यकशब्दबोध।

अनुहारः, पुं, (अनु+हृ+घञ्।) अनुहारः। सदृशो-
करणं। सदृश [illegible] आदाविष्करणं। इत्य-
मरः। उपमा। इति हेमचन्द्र।
("तद्रूपमनुहारस्तु हेतौ सम्यक्तद्गुणः"।
इति साहित्यदर्पणे।)

अनुक्षणं, क्ली, (क्षणे क्षणे वीप्सायामव्ययीभावः।)
प्रतिक्षणं। सर्वदा। अनवरतं। [illegible]
वीप्सायामव्ययीभावसमासः।

अनूकं, क्ली, (अनु+उच्+घञर्थे क, न्यङ्क्वादीनाञ्च
इति कुत्वम्।) कुलं। वंशः। शीलं। स्वभावः।
इति मेदिनी।

अनूकः, पुं, (अनु+उच्+घञर्थे क, न्यङ्क्वादीनाञ्च
इति कुत्वम्।) [illegible]। पूर्वजन्म। इति मेदिनी।
(वंशः। कुलं। स्वभावः। शीलं।
"अनूकं तु कुले शीले पुंसि स्यात् [illegible]"।
इति मेदिनी।)

अनूचानः, पुं, (अनु+वच्+लिट् तस्य कानच्।)
साङ्गवेदविचक्षणः। [illegible]
[illegible]। इत्यमरः।
("[illegible]"।
इति कुमारसम्भवे।
"[illegible] धर्मं योऽनूचानः स नो महान्"।
इति मनुः।)

अनूचानः, त्रि, (अनु+वच्+लिट् तस्य कानच्।
[illegible]) विनीतः। [illegible]। इति मेदिनी।
[illegible]

अनूनकं, त्रि, (न ऊनं, नञ्[illegible])
सकलं। पूर्णं। अखण्डं। [illegible]

अनूपं, त्रि, (अनुगता आपो [illegible]
यस्य उत्तं।) जलबहुल[illegible]
तत्पर्यायः। जलप्रायं२। [illegible]
शीतलत्वं। स्निग्धत्वं। वात[illegible]
इति राजवल्लभः। एतद्देशी[illegible]
घनत्वं। पिच्छिलत्वं। मधु[illegible]
स्निग्धत्वं। अग्निमान्द्यं।
श्लेष्मादिप्रकृतिरोगकारित्वञ्च। [illegible]

अनूपः, पुं, (अनुगता आपो[illegible]
बाहोवाधोतरमरलोपश्चेति [illegible]
इति त्रिकाण्डशेषः। (जलप्रायः।
बहुमुद्रक। "अनूपो महिषे [illegible]
वाच्यवत्"। इति मेदिनी।)

अनूपजं, क्ली, (अनूपे जलप्रायदेशे जायते,
जन्+डः उपपदसमासः।) आर्द्रकं। [illegible]
निघण्टुः।

अनूपदेशः, पुं, (अनूपः जलप्राय देशः [illegible]
जलप्रायदेशः। तस्य लक्षणं यथा,—
"नदीपल्वलशैलाद्युपेतो [illegible]
हंससारसकारण्डवचक्रवाकादिसेवितः।
[illegible]
प्रभूतद्रुमगुल्माढ्यो नानाकन्दफलान्वितः।
[illegible]
अनूपदेशो ज्ञातव्यो वातश्लेष्म[illegible]"
इति भावप्रकाशः।

अनूरुः, पुं, (नास्ति ऊरू यस्य सः।)
अरुणः। इत्यमरः। (उरुहीन।)

अनूरुसारथिः, पुं, (अनूरुः सारथिः
[illegible] यस्य सः।) सूर्यः। यथा,—
"[illegible]"।
इति माघः।

अनृजु, त्रि, (न ऋजु सरलः, नञ्समासः।)
[illegible]। शठः। इत्यमरः।
("[illegible]"
इति मनुः।)

[illegible]

शर्म्मास गर्भं लिखितं गृहाणो
महाभमे तेन रमाःश पताः ।
कस्मिन् महामोहमये कटाहे
सूर्य्याग्निना रात्रिदिवेन्धनेन ।
मासर्त्तुदर्व्वीपरिघट्टनेन
भूतानि कालः पचतीति वार्त्ता" ॥
इति मुद्राङ्कितमहाभारते वनपर्व्वणि ३१३ अध्यायः ॥ अपि च ।
"देशकालान्तरो भवतीतिसंभवति मानवः" ।
इत्यादि मुद्रलघ्वं ।

...तं, क्ली, (न ऋतं नञ्समासः ।) मृषाः । मिथ्या । इत्यमरः । विवाहादिपञ्चकेष्वनृतं न पातकजनकं । यथा,—
"विवाहकाले रतिसंप्रयोगे
प्राणात्यये सर्व्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेत
पञ्चानृतान्याहुरपातकानि" ॥
इति महाभारते कर्णपर्व्वणि अर्ज्जुनं प्रति श्रीकृष्णवचनं ॥

...क, त्रि, (एकस्मात् अन्यत् नञ्समासः ।) एकातिरिक्तसंख्यान्वितविशेष्य । बहु । यथा,—
"अनेकराजन्यरथाश्वसङ्कुलं" ।
इति भारविः ॥

...जः, पुं, (अनेकधा जायते, अनेक+जन्+डः, उपपदसमासः ।) पक्षी । इति त्रिकाण्डशेषः ॥ बहुजाते त्रि ॥

...कधा, अ, (अनेक+प्रकारार्थे धा ।) अनेकप्रकारं । बहुधा । यथा,—
"पाटीसूत्रोपमं वीजं गूढ़मित्यवभासते ।
नास्ति गूढ़मगूढ़ानां नैव षोढ़ात्यनेकधा" ॥
इति लीलावती ॥ अनेकवारार्थेऽपि क्वचित्प्रयोगः ॥

...केपः, पुं, (अनेकाभ्यां मुखशुण्डाभ्यां पिबति, अनेक+पा+कः, उपपदसमासः ।) हस्ती इत्यमरः ॥

...केकाश्रितगुणः, पुं, (अनेकानि आश्रितः, द्वितीयाश्रितातीत इत्यादिना समासः, तादृशः गुणः कर्म्मधारयः ।) बहुनिष्ठगुणः । तद्यथा । संयोगः १ विभागः २ द्वित्वपृथक्त्वादिः ३ एकत्वान्यसङ्ख्या ४ । इति सिद्धान्तमुक्तावली ॥
("संयोगश्च वियोगश्च सङ्ख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः" ।
इति भाषापरिच्छेदे ।)

...नेडमूकः, त्रि, (नास्ति एडः वधिरः मूकः वाक्शक्तिरहितश्च यस्मात् सः ।) धूर्त्तः । शठः । श्रुतिवाग्विहीनः । इति मेदिनी ॥ काला वोवा इति भाषा ।

...नेहाः, [स्] पुं, (न हन्यते, न+हन्+असुन् पृषोदरादित्वात् हन् स्थाने एहादेशः, ततः सौ कृते अनङादेशः ।) कालः । समयः । इत्यमरः ॥
("तस्मुखस्यान्तिके मोहश्चिरमानेहःप्रतीक्षिणः" ।
इति राजतरङ्गिणी ।)

...नैक्यं, क्ली, (न एक भावे ष्यञ् ।) ऐक्याभावः । अनेकता । इत्यस्य भावः ऐक्यं पदार्थानामभावः ॥

अनो, अ, (न ऊ ओ) निषेधार्थः । अभावः । इत्यमरटीकायां भरतमल्लः ॥

अनोकहः, पुं, (अनसः शकटस्य अकं गमनं गतिं हन्ति, हन्+अनोक+हन्+डः ।) वृक्षः । इत्यमरः ॥
("एतान्नुपार्श्वे निविशिरमाना-
मनोकहाकम्पितपुष्पगन्धी" ।
इति रघुवंशे ।)

अन्त्र उ गतिपूजनयोः । इति मुग्धबोधे वोपदेवः ॥

अन्त्र उ भूषणे । गमने । शिरोभागे । इति कविकल्पद्रुमः ॥ उ अन्दित्वा अन्दुरा । शिरोभिषेकणार्थः । इति दुर्गादासः ॥

अन्त्र क व्याप्तौ । इति कविकल्पद्रुमः ॥ अस्ति विशेषणं । क अन्दयति बुद्धिं सुधीः । विविन्दयती-त्यर्थः । इति दुर्गादासः ॥

अन्तृ उ ध नि व्याप्तौ । गतौ । प्रकाशे । इति कविकल्पद्रुमः ॥ उ अञ्चित्वा अक्त्वा । ध अनक्ति । नि आक्तोऽस्ति । अस्तिः स्फुटीकरणं ।
"रात्रिभागो भवदीयदर्शनं
यदशक्ति कालमितरेऽपि योगतां" ।
इति माघः ॥ अनक्ति गाव तैलेन जनः । इति दुर्गादासः ॥

अन्तं, क्ली, (अम्+तन् ।) स्वरूपं । स्वभावः । इति मेदिनी त्रिकाण्डशेषश्च ॥

अन्तं, क्ली, पुं, (अम्+तन् ।) शेषः । इति मेदिनी ॥ तत्पर्य्यायः । जघन्यं२ चरमं ३ अन्त्यं ४ पाश्चात्यं ५ पश्चिमं ६ । इत्यमरः ॥

अन्तः, पुं, (अम्+तन् ।) नाशः । इत्यमरः ॥ स्वरूपः । प्रान्तः । सीमा । निश्चयः । अवयवः । इति हेमचन्द्रः ॥

अन्तः, त्रि, (अम्+तन् ।) अन्तिकः । निकटः । इति मेदिनी ॥ अतिमनोहरः । इति विश्वः ॥

अन्तःकरणं, क्ली, (अन्तर्मध्यवर्त्ति करणं ज्ञानसाधनं, कर्म्मधारयः, कृ+करणे ल्युट् ।) अन्तरिन्द्रियं । धीन्द्रियं । तत्पर्य्यायः । मनः २ चित्तः २ । इति त्रिकाण्डशेषः ॥ अस्य कार्य्यभेदान्नामचतुष्टयं, यथा,—
"मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरं ।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी" ॥
इति वेदान्तः ॥ (अस्योत्पत्तिर्यथा,—"मिलितैस्तु तैः अन्तःकरणमेकं स्यात्" इति । तैः पञ्चभूतस्य सत्त्वांशैर्मिलितैः अन्तःकरणं भवतीत्यर्थः ।)
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विशङ्कैः" ।
इति रघुवंशे ।)

अन्तःकुटिलः, पुं, (अन्तरभ्यन्तरे कुटिलः वक्रः ।) शङ्खः । इति राजनिर्घण्टः ॥ कुटिलान्तःकरणे त्रि ॥

अन्तःपुरं, क्ली, (अन्तर्मध्यवर्त्ति पुरं गृहं, कर्म्मधारयः ।) राज्ञः स्त्रीगृहं । तत्पर्य्यायः । अवरोधनं२ अवरोधः ३ शुद्धान्तः ४ । इत्यमरः ॥ अन्तःपुरादयो राजदारेष्वपि तात्स्थ्यात् वर्त्तन्ते । यथा । "शुद्धान्तसम्भोगनितान्ततुष्टे" । इति नैषधम् । इति भरतः ॥ "दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा" । इत्यभिज्ञानशकुन्तलम् ॥

अन्तःपुराध्यक्षः, पुं, (अन्तःपुरस्य अध्यक्षः रक्षकः, षष्ठीतत्पुरुषः ।) राज्ञामन्तःपुरचारः । तल्लक्षणं यथा,—
"वृद्धः कुलोद्गतः शक्तः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते" ॥
इति युक्तिकल्पतरुः ॥

अन्तःशल्या, स्त्री, (अन्तर्मध्ये गत्वं प्राप्ती मार्गो वा यस्याः सा, स्त्रियां टाप् ।) मल्लातकः । इति शब्दचन्द्रिका ॥ गर्भवती । अन्तर्गतस्रष्टा मलं प्राप्नी यस्याः सा ॥

अन्तःस्वेदः, पुं, (अन्तः मध्ये स्वेदः मदजलं यस्य सः ।) हस्ती । इति त्रिकाण्डशेषः ॥

अन्तकः, पुं, (अन्तं विनाशं करोति, अन्त+करोत्यर्थे णिच् ततो ण्वुल् ।) यमः । इत्यमरः ।
("अधिप्रभावात् मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः" । इति रघुवंशे ।)

अन्तगः, त्रि, (अन्तं पारं गच्छति, अन्त+गम्+डः, उपपदसमासः ।) अन्तगामी । पारगः । यथा,
"वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत्"
इति महाभारते विष्णुसहस्रनामपर्व्व ॥ अन्तः । अन्तं नाशं गच्छतीति ॥

अन्ततः, [स्] अ, (अन्त+तस् ।) सम्भावना । अवयवः । पश्चाद्यं । शासनं । इति विश्वः ॥
(शेषादारभ्य । प्रान्तभागेन । अग्रभागेन ।
"वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः"
इति मनुः ।)

अन्तर्, अ, (अम्+अरन् तुडागमश्च ।) मध्यं । प्रान्तं । स्वीकारः । इति विश्वः ॥

अन्तरं, क्ली, (अन्तं राति ददाति, अन्त+रा+कः, उपपदसमासः ।) अवकाशः । अवधिः । परिधानं । अन्तर्धानं । भेदः । तादर्थ्यं । अवसरः । मध्यं । अन्तरात्मा । छिद्रं । आत्मीयः । विना । वहिः । इत्यमरः ॥ सदृशः । इति तट्टीका मेदिनी च ॥०॥ अवकाशे यथा । "मृणालसूत्रान्तरमप्यलभ्यं" । इति कुमारसम्भवे ॥ अवधौ यथा । "निरन्तराभ्यन्तरवासरष्टिषु" ॥ परिधाने यथा । अन्तरे शाटकाः परिधानीया इत्यर्थः ॥ अन्तर्द्धौ यथा, "पर्व्वतान्तरितो रविः" ॥ भेदे यथा,—
"यदन्तरं सर्षपशैलराजयो-
र्यदन्तरं वायसवैनतेययोः" ।
इति रामायणं ॥ तादर्थ्ये यथा । त्वामन्तरेण ऋणं गृहीतं त्वदर्थमित्यर्थः ॥ छिद्रे यथा । "प्रहरेदन्तरे रिपुं" ॥ आत्मीये यथा । "अयमत्यन्तरो मम" ॥ विनार्थे यथा । "हरे त्वदालोकनमन्तरेण" ॥ वहिरर्थे यथा । अन्तरे चण्डालगृहा वाह्या इत्यर्थः ॥ अवसरे यथा । "अथान्तरे च कुलटा कुलवर्त्मपातेत्यादि" ॥ मध्ये यथा । "आवयोरन्तरे जाताः पर्व्वताः परितो द्रुमाः" ॥ सदृशे

[illegible] सदातैल मवसिद्धाः । द्वितीयदिने दशमः ।
[illegible] चौपैकाहयोरेकाह एव दशमिद्धाः । षष्ठौ-
[illegible]

[illegible]

सन्धौ यन्त्रिरूपं ग्रथ्यं कुर्य्यात् इत्यर्थः ॥ ० ॥
उपेक्षिताया अन्त्रवृद्धेरवस्थामाह ।
"उपेक्षमाणस्य सर्व्वादवृद्धि-
माध्मानरुक् स्तम्भवतीञ्च कुर्य्यात् ।
स पीड़ितोऽन्तः स्वनवान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः ॥
उपेक्षमाणस्य वृद्धिमित्यर्थः । मदवृद्धिं मुष्क-
माध्मानरुक् स्तम्भवतीं कुर्य्यात् । तथा-
ध्मानमुदरे रुक् वृद्धयोर्मुष्कयोः स्तम्भो गात्रे तद्-
युक्तां कुर्य्यात् इत्यर्थः । भोजोऽप्याह ।
"अन्त्रं द्विगुणमादाय वातो नयति वंक्षणं ।
वंक्षणासदृशा युक्तां फलकोश्यां प्रपद्यते" ॥
स मुष्कवृद्धिः । अन्तः उदरे प्रध्मापयन् आग-
मनमार्गमुख्कूनं कुर्व्वन् रति प्रयाति ॥ ० ॥ अ-
साध्यमाह ।
"यस्यान्त्रात्रयन्त्रिरूपा मुष्कयोर्व्यातसञ्चयात् ।
स्यादन्त्रवृद्धिः सोऽसाध्यो वातवृद्धिसमाकृतिः" ॥
स कीदृक् स्यादित्याकाङ्क्षायामाह । वातवृद्धि-
समाकृतिः ॥ ० ॥ सामीप्यादन्त्रैव ब्रध्नमाह ।
"अत्यभिष्यन्दिगुर्व्वन्नमुष्कपूत्याभिघाशनात् ।
करोति यन्त्रिवच्छोथं दोषो वंक्षणसन्धिषु ॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्दिशेत्" ॥ ० ॥
अथ वृद्धिचिकित्सा ।
"वृक्षारण्यामलं मार्गमुपवासं गुरूण्यपि च ।
वेगाघातं पृष्ठयानं व्यायामं मैथुनं त्यजेत् ॥
वातवृद्धौ पिबेत् स्निग्धं यथायोगं विरेचनं ।
तक्षीरं वा पिबेत् तैलं मासमेरण्डसम्भवं ॥
गुग्गुलुमेरण्डजं तैलं गोमूत्रेण पिबेन्नर ।
वातवृद्धिं नयत्याशु चिरकालानुबन्धिनीं ॥
पित्तार्यन्त्रिवमेवैनं पित्तवृद्धिमुपाचरेत् ।
[illegible]
चन्दनं मधुकं पद्ममुशीरं नीलमुत्पलं ।
क्षीरपिष्टप्रलेपेन दाहशोथरुजापहं ॥
त्रिकटु त्रिफलाक्वाथं सक्षारं लवणं पिबेत् ।
विरेचनमिदं श्रेष्ठं कफवृद्धिविनाशनं ॥
[illegible] च ।
[illegible]
[illegible] हरेत् ।
[illegible]
[illegible] तथा ।
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

अन्दू

[illegible] तैलेन संयुक्तमन्त्रवृद्धिं [illegible]
[illegible] दिवाय: ॥ ० ॥
"गन्धर्व्वहस्ततैलेन हरीतकीं
[illegible] मूलजं चूर्णं वृद्धिं हन्ति
[illegible] इन्द्रवारुणी ॥ ० ॥
"वचासर्षपकल्केन प्रलेपः शोथ[illegible]
[illegible] पिष्टैः शोथ[illegible]
[illegible] दिघागन्धं सूतान्येतानि [illegible]
लौहं रङ्गं तथा ताम्रं कांस्यञ्च [illegible]
तालकं तुत्थकं चापि तथा शङ्खं वराट[illegible]
त्रिकटु त्रिफला चव्यं विडङ्गं वृद्धदार[illegible]
कर्चूरं मागधीमूलं पाठां सहजुषां [illegible]
एलाबीजं देवकाष्ठं तथा लवणपञ्चकं ।
एलादिसममागानि चूर्णयेत् कारयेत् ।
कषायेण हरीतक्या वटिकां टङ्कमितां ।
एकां तां वटिकां दत्तु निमित्रेदारि[illegible]
अपड़वृद्धिरसाध्योऽपि तस्य नश्यति [illegible]
वृद्धिबाधिका वटी ॥ ० ॥ अथ ब्रध्न
"रुबुकैरण्डतैलेन सन्दक् ब्रध्नोऽन्त[illegible]
[illegible] ब्रध्नरोगहरः पर ।
[illegible] गोमेदवरराज्ञितं ।
काञ्चिकेन तु संपिष्टं तल्लेपो ब्रध्नजित्
गोमेदं पत्रं । तथा च निर्घण्टौ [illegible]
"पत्रं हलाह्वयं रामं गोमेदं [illegible]"
इति वृद्धिब्रध्नाधिकारः । इति भावप्रकाशः ।

अन्दिका, स्त्री, (अन्दति बध्नाति [illegible]
सम्बध्नाति, अदि + ण्वुल् स्त्रियां टाप्
ज्येष्ठभगिनी इत्यमरटीकायां ।)
चुल्ली । इत्यमरटीकायां नीलकण्ठः
इति भाषा ।

अन्दुः, स्त्री, (अन्द्यते बध्यतेऽनेन, अदि+
उ [illegible] ।) इति निगड । [illegible]
भाषा । स्त्रीपादभूषणं । इति हेमचन्द्रः
[illegible] इत्यादि भाषा ।

अन्दुकः, पुं, (अन्द्यते बध्यतेऽनेन, अदि+
उक, तत स्वार्थे कन् ।) हस्तिपादबन्धनं
तत्पर्यायः । निगड २ । इत्यमरः ।
[illegible]
आलानः ।

अन्दूः, स्त्री, (अन्द्यते बध्यतेऽनेन, अदि+ऊ
ऊपत इति स्त्रियां ऊङ् ।) [illegible]
[illegible] निगड । [illegible] इति भाषा ।
भूषणं । मम [illegible] इत्यादि भाषा ।
मेदिनी । (निगड । [illegible]
अन्दूः स्त्रियां [illegible]
मेदिनी ।)

अन्दुक, पुं, (अन्दु + स्वार्थे कन्
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[वि]घाते चुरादि सेट्।) दृक्क्षयो दृष्टिरहिती-
भावः। तेनाकर्म्मकोऽयं। सत्ताजीवनदर्पभीति-
यनक्रीडानिवासच्छायाप्रव्यक्ताध्यानभोगतिस्थिति-
रालस्याप्रमादोदये। मोहे खोटनवेगयुद्धदहन-
प्रातिचरोन्मादके सुद्धिखेदपलायनभ्रमणके
न्तौ सुतौ मज्जने। वृत्तौ जागरघोषवक्रगम-
त्साहे मृतौ संश्रये स्नानौ मन्दगतौ च नृत्य-
तने चेष्टाक्रुधौ रोदने। वृद्धौ धावनतौ च
सद्धिविरतौ हर्षोपवेशे बले कम्पोद्वेगनिमेषभङ्ग-
तनाये धातवोऽकर्म्मकाः। दीर्घत्यादिषु चा-
र्थेषु वर्त्तमानास्तु धातवः। वाचका भावमात्रस्य
तत्साधकर्म्मकाः॥ कौटिल्यादिषु चार्थेषु प्रोक्ता
ते तु धातवः। तद्द्वारेऽकर्म्मकाः स्युस्तद्
र्थां सकर्म्मकाः॥ इति। अन्धयति अन्धापयति
द्वः। इति दुर्गादासः॥

[अन्धं], क्ली, (अन्ध+अच्।) अन्धकारः।
"सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा"।
इति उत्तरचरिते।) जलं। इति मेदिनी।

[अन्धः], त्रि, (अन्ध+अच्।) चक्षुर्द्वयहीनः। आन्धा
आँधला इति हिन्दी भाषा। तत्पर्य्यायः। अ-
दृक् २। इत्यमरः। ("वृद्धोऽन्धः पतिरेष मञ्चक-
गतः"। इति साहित्यदर्पणे।
"अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह।
यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभाङ्गतः"।
इति मनुः।)

[अन्धः], [स्] क्ली, (अन्ध+असुन्।) अन्नं। इत्य-
मरः॥

[अन्ध]कः, पुं, (अन्ध+ण्वुल्।) देशभेदः। इति
शब्दरत्नावली॥ नृपभेदः।
("कुदंष्ट्रं च सुधारं च ख्यातमित्यन्धकास्त्रयः"।
इति हरिवंशे।) असुरभेदः। इति महाभारतं॥
("स प्रजात्यन्धवत्तस्मादनन्धोऽपि हि भारत।
तमन्धकोऽयं नाम्नेति प्रोचुस्तत्र निवासिनः"।
इति हरिवंशे।) मुनिविशेषः। इति याद-
वप्रकाशः। (दृष्टिहीनः। चक्षुर्द्वयहीनः।
"अन्धकः कुब्जकश्चैव राजकन्या च चित्रगी।
यतोऽप्यन्यायतः सिद्धाः सम्मुखे कर्म्मणि स्थिते"॥
इति पञ्चतन्त्रे।)

[अ]न्धकरिपुः, पुं, (अन्धकस्य असुरस्य रिपुः नाशक-
तया शत्रुः, षष्ठीतत्पुरुषः।) शिवः। इत्यमरः॥
विशेषकाव्यादौ अन्धकारनाशकत्वात् सूर्य्याग्नि-
चन्द्रेषु च वर्त्तते॥

[अ]न्धकारः, पुं, क्ली, (अन्धमन्धवत् करोति, अन्ध
+कृ+अण्।) तेजःसामान्याभावः। आँधार
इति भाषा। तत्पर्य्यायः। ध्वान्तं २ तमिस्रं ३
तिमिरं ४ तमः ५। इत्यमरः॥ ("अथान्धकारं
गिरिगह्वराणां"। इति रघुवंशे।) भूच्छायं ६।
इति राजनिर्घण्टः॥ महान्धकारे अन्धतमसं।
७ सर्व्वव्यापकान्धकारे सन्तमसं। ८ अल्पान्धकारे
अवतमसं ९। इत्यमरः॥ अस्य गुणाः। मददृष्टि-
तेजोऽवरोधकारित्वं। तिक्तत्वं। सर्व्वदाधिक्य-
त्वञ्च। इति राजवल्लभः॥

अन्धकासुहृद्, पुं, (अन्धकस्य असुरस्य असुहृत्,
नाशकतया शत्रुः, षष्ठीतत्पुरुषः।) शिवः। इति
हेमचन्द्रः॥

अन्धकूपः, पुं, (अन्धमन्धकारं करोति, अन्ध+करो-
त्यर्थे णिच्+पचाद्यच्, तादृशः कूपः।) सान्ध-
कारकूपः। इति त्रिकाण्डशेषः। आँधुया पातुया
इति भाषा।
("मज्जत्यात्मा भक्तिहीनो महामोहमये भवे।
अन्धकूपे निरालम्बश्छिन्नरज्जुर्यथा घटः"॥
इति सद्भावे।)

अन्धतमसं, क्ली, (अन्धयति, अन्ध+अच्, अन्धं
तमः कर्म्मधारयः, समासान्त अच्।) निविडा-
न्धकारं। इत्यमरः॥
("प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः"।
इति शिशुपालवधे।)

अन्धतामसं, क्ली, (तम एव तामसं प्रज्ञादित्वात्
स्वार्थे अण्।) निविडान्धकारं। महान्धकारं।
इत्यमरटीकायां स्वामी।

अन्धतामिस्रं, क्ली, (तमिस्रैव तामिस्रं, स्वार्थे अण्,
अन्धं निविडं तामिस्रं कर्म्मधारयः।) निविडा-
न्धकारमयनरकविशेषः। पञ्चप्रकाराज्ञानान्तर्ग-
ताज्ञानविशेषः। देहनाशे अहमेव मृतोऽस्मीति
बुद्धिः। इति भारतभागवते,—
("एकविंशतिविधनरकान्तर्गतद्वितीयनरकवि-
शेषः"। स च निविडान्धकारमयः। "तस्यां धर्म्म-
पत्न्यामन्धतामिस्रमभ्यधायत्"। इति महावीर-
चरिते।)

अन्धमूषिका, स्त्री, (अन्ध दृष्टिविघाते, अन्ध+भावे
घञ्, अन्धं दृष्टिविघातं मुष्णाति तत्सेवनेन नाश-
यति, मुष्+ण्वुल् पृषोदरादित्वात् दीर्घः स्त्रियां
टाप्।) देवताड़वृक्षः। इति शब्दचन्द्रिका॥

अन्धाहिः, पुं, स्त्री, (अन्धः अहिः सर्प इव।) मत्स्य-
भेदः। इति त्रिकाण्डशेषः॥ कुँचिया इति ख्यातः।

अन्धिका, स्त्री, (अन्ध+ण्वुल् स्त्रियां टाप्।) द्यूत-
विशेषः। रात्रिः। इति मेदिनी॥ सर्षपी। इति
हेमचन्द्रः॥ स्त्रीविशेषः। चक्षूरोगविशेषः। इति
शब्दरत्नावली॥

अन्धुः, पुं, (अन्ध+उन्।) कूपः। इत्यमरः॥

अन्धुलः, पुं, (अन्ध+उलच्।) शिरीषवृक्षः इति
शब्दचन्द्रिका॥

अन्ध्रः, पुं, (अन्धयति गीतेन मृगान् अन्धवत्
करोति, अन्ध+कर्त्तरि रः।) व्याधः। मृगया-
जीवी। इति कश्चित् संग्रहकारः। (वैदेहिकात्
कारावरस्त्रियां जातो जातिविशेषः, स तु सततं
ग्रामबहिर्व्वासी मृगयाजीवी च।
"कारावरनिषादात् तु चर्म्मकारः प्रसूयते।
वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ"॥
इति मनुः।)

अन्नं, क्ली, (अद्+कर्म्मणि क्तः।) सिद्धतण्डुलं।
यथा,—
"अन्नं ब्रह्मरसं प्राहुः सतुषं धान्यमुच्यते।
आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतं"॥
इति श्राद्धतत्त्वधृतवशिष्ठवचनं॥ तत्पर्य्यायः।
भक्तं २ अन्धः ३ भिस्सा ४ ओदनं ५ दीदिविः ६।
इत्यमरः॥ भिस्सा ७। इति तट्टीका॥ कूरं ८।
इति राजनिर्घण्टः॥ अष्टं ९ कसिपुः १० जीवातुः
११। इति जटाधरः॥ कूरं १२ आपूपिकं १३
जीवन्तिः १४ प्रसादनं १५। इति शब्दरत्ना-
वली॥ * ॥ अस्य गुणाः। बुद्धिवृद्धिप्रीतिपुष्टि-
धातिन्द्रियबलकारित्वं। गुरुत्वं। क्षुधाद्यखरोग-
श्रमकार्श्यनाशित्वञ्च॥ * ॥ नवान्नगुणाः। श्लेष्म-
कारित्वं। स्वादुत्वं। सुस्निग्धत्वं। दृंहणत्वं। गुरु-
त्वञ्च॥ * ॥ पुराणान्नगुणाः। विरसत्वं। रूक्षत्वं।
पथ्यत्वं। अग्निकारित्वञ्च॥ * ॥ उष्णान्नगुणाः।
प्रशंसनीयत्वं। हृद्यत्वं। अग्निकारित्वं। वायुश्लेष्म-
नाशित्वं। रक्तपित्तप्रकोपकारित्वञ्च॥ * ॥ अत्यु-
ष्णान्नगुणाः। बलनाशित्वं॥ * ॥ शीतशुष्कान्नयो-
र्गुणाः। दुर्ज्जरत्वं॥ * ॥ अतिक्लिन्नान्नगुणाः। ग्लानि-
कारित्वं॥ * ॥ तण्डुलान्वितान्नगुणाः। दुर्ज्जरत्वं॥ * ॥
जलधौतसद्योऽन्नगुणाः। शीघ्रपाकित्वं। हिमत्वं।
लघुत्वञ्च॥ * ॥ रात्रिस्थितजलयुक्तान्नगुणौ। त्रि-
दोषकोपकारित्वं। रूक्षत्वञ्च॥ * ॥ भृष्टतण्डुलान्न-
गुणौ। लघुत्वं। अग्निप्रदीपनत्वञ्च। इति राज-
वल्लभः॥ * ॥ धान्यं। इति राजनिर्घण्टः॥ विष्णुः।
इति तस्य सहस्रनाममध्ये पठितं॥ अदनीयद्रव्य-
मात्रं॥ अन्नसाधनं यथा,—
"सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्।
तद्भक्तं प्रस्रुतं चोष्णं विषदं गुणवन्मतं"॥
तद्गुणाः।
"भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु।
अधौतमसृतं शीतं गुर्व्वरुच्यं कफप्रदं"॥
इति भावप्रकाशः॥ * ॥ तद्दानफलं यथा,—
"वारिदस्तृप्तिमायाति सुखमक्षय्यमन्नदः"॥
अन्नस्य प्रजापतिर्द्देवता। अक्षयसुखप्राप्तिः फलं।
प्रतिग्रहे सुप्त्यिग्रहणं। इति शुद्धितत्त्वं॥ अपि च,
"ब्रह्महत्यादिकं पापं अन्नदानात् प्रणश्यति।
अन्नदः पापकर्म्मापि मृतः स्वर्गे महीयते"॥
इति प्रायश्चित्ततत्त्वं॥ * ॥ अथ प्रजापतिदैवतान्न-
दानावर्त्तः। तत्र अन्नदानस्तुतिः। ब्रह्मपुराणे।
"अन्ने प्रतिष्ठिता लोका अन्नमाश्चर्य्यं परं।
तस्मादन्नं प्रशंसन्ति सदैव पितृमानवाः॥
अन्नस्य हि प्रदानेन नरो याति परां गतिं।
सर्व्वकामसमायुक्तः प्रेत्य चेहाधिकं शुभं"॥
तथा,—
"अन्नमूर्ज्जस्करं लोके दत्त्वोर्ज्जस्वी भवेन्नरः।
सतां पन्थानमाश्रित्य सर्व्वपापैः प्रमुच्यते"॥
महाभारते।
"अन्नदः पशुमान् पुत्री धनवान् भोगवानपि।
प्राणवांश्चापि भवति रूपवांश्च तथा नृप"॥
तथा,—
"अन्नदस्य मनुष्यस्य बलमोजो यशांसि च।
कीर्त्तिश्च वर्द्धते शश्वत् त्रिषु लोकेषु भारत"॥
वामनपुराणे। अन्नस्तुतिस्तत्रैव।
"तस्मादन्नं सदा देहि श्रद्धया नृपसत्तम।

अन्नदानादिकं यानं अन्नस्य प्रशस्यति"।

"अन्नदानात् परं दानं न भूतं न भविष्यति।

एतद्देवायने मोक्षं द्विगुणं पुण्यगौरवं।
अन्नं विना क्षमायुक्तस्य दत्त्वान्नं देशकालतः।
अन्नं पञ्चगुणं मोक्षं सर्व्वभावसमन्वित"।
सर्व्वभावसमन्वित इति सम्बोधनं। अत्र यज-
मानः प्राणिमात्रेभ्यो गृहीतोदपूर्णताम्रपात्रः
उदङ्मुखः सङ्कल्प यथेष्टकालावधि अन्नं दद्यात्।
तद्यथा। ॐ नन्दिपुरगोलोकप्राप्तिमात्रान्नदान-
फलप्राप्तिकामोऽहं प्राणिभ्योऽन्नं दास्ये। तदवधि
यथासम्भवं प्राणिमात्रेभ्यः सम्यक् अन्यत्र वा
भक्षणार्थं कृत्वा अविच्छिन्नमन्नं देयं। अतएव
धार्म्मिकाणामपट्टविलिखितां भूमिं समुपकल्प्य
यावच्चन्द्रार्कस्थायिनीं भक्षणार्थं ददाति।•।
वायुपुराणे।
"नियमयुक्तमक्लिष्टं दद्यादन्नं बुभुक्षिते।
सद्यमन्नं सदा क्षिप्रं भव्यं सत्कृत्य यत्नतः"।
नियमतिथिप्रादलकारमेव। अक्लिष्टमनुपहतं।
भव्यमप्रतिषिद्धं।
"तस्मादिदमन्नाद्यं विमानं हंसवाहनं।
अन्नदो लभते नित्यं कल्पकोटीस्तथैव च।
अन्नदानात् परं दानं न भूतं न भविष्यति।
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः।
अन्नदानात् परं दानं न किञ्चिदपि विद्यते।
अन्नाज्जीवति त्रैलोक्यं त्रैलोक्यस्यैव तत्परं"।
बुभुक्षितेभ्योऽन्नं पूर्व्ववत् संकल्प्य दद्यात्।
ॐ वायुपुराणोक्तान्नदानफलप्राप्तिकामोऽहं बुभु-
क्षितेभ्य सद्यमन्नं क्षिप्रमन्नं दास्ये। एवं सङ्कल्प्य
बुभुक्षितानन्विष्य तेभ्यो यथोक्तमन्नं दद्यात्।•।
महाभारते।
"आन्नाय दुर्भिक्षनाशाय यः प्रयच्छति भूमिप।
आयस्थं भवन् स्थानं न गच्छति नराधिप"।
आन्नाय दुर्भिक्षनाशाय पूर्व्ववत् सङ्कल्प्य दद्यात्।
ॐ ... प्राप्तिकामोऽहं आन्नाय दुर्भि-
... दास्ये। इति सङ्कल्प्य यथाकाले आन्नं
... तस्मै दद्यात्।•। तथा,—

[illegible]

स्पष्टं संस्कृतं। सद्यमन्न...
र्थिभ्यो दद्यात्। ...
भोजनस्पष्टान्नदानफलप्राप्ति...
स्पष्टान्नार्थिभ्यो स्पष्टमन्नं ...
स्पष्टान्नार्थिनोऽनुसन्धाय तेभ्यो ...
दद्यात्।•। तथान्नदानप्रक...
"सहस्रपरिवेशस्तु नरकन्तु ...
विमानेनार्कवर्णेन स्वर्गलोके म...
सहस्रपरिवेश ...
सम्भवं सहस्राय मनुष्येभ्यो नि...
सङ्कल्प्य दद्यात्। ॐ विष्णुधर्म्मो...
परिवेशनफलप्राप्तिकामोऽहं यथा...
मनुष्येभ्यो व्यञ्जनादिसहितमन्नं ...
सङ्कल्प्य यथाशक्ति नानाविधैः ...
भोजयेत्। देवलः।
"हत्वापि पातकं कर्म्म यो ...
ब्राह्मणानां विशेषेण स निष्कल्मषः ...
विशेषेण इत्यभिधानात् ...
भवत्येव। एवञ्च सामान्येनान्नदानमिदं।
मिथ्यर्थिनं सुधा ...
तेभ्यः पूर्व्ववत् सङ्कल्प्य दद्यात्। ॐ
नानावर्णेभ्य ...
ईप्सितमन्नं दास्ये। ततः प्रभृति ...
क्षितेभ्य ईप्सितमन्नं दद्यात्। इत्यादि
दानसागरे अन्नदानानि।
अन्नः, पुं, (अनित्यनेन अन+नन्, ...
अद्+क्त वा।) सूर्य्यः। इति
मुदी।
अन्नः, त्रि, (अनित्यनेन अन+नन्।)
लादित। इति मेदिनी।
अन्नकोष्ठकः, पुं, (कोष्ठमिव, कोष्ठ
तद्गुणादे कोष्ठकः ...
... इति हेमचन्द्र ...
इत्यादि भाषा।
अन्नगन्धिः, पुं, (अन्नस्य ...
सः। उपमानाच्च इति पाणि
...) उदरामयरोग।
अन्नपूर्णा, स्त्री, (अन्नं पूर्णं यया सा
... अन्नपूर्णादि यथा,—
"माया ...
अन्नपूर्णे ...
"प्रकटाख्या ...
अन्नदा ...

…माया पुस्तवीणाद्या सर्व्वसम्पत्तिपूरणी" ॥ ० ॥ …षां पूजा प्रातःकृत्यादिपीठन्यासान्तं विधाय …दलपद्मस्य केशरेषु मध्येषु च भुवनेश्वरीपीठ- …मन्त्रान्तं पीठशक्तीर्न्यस्य ऋष्यादिन्यासं कुर्य्यात्। …यथा शिरसि ब्रह्मणे ऋषये नमः। मुखे पङ्क्ति- …छन्दसे नमः। हृदि अन्नपूर्णायै देवतायै नमः।

…तत्रैव।

"एतेषां मन्त्रराशीनां ऋषिर्ब्रह्मा उदाहृतः। पङ्क्तिः छन्दः समाख्यातं देवता चान्नपूर्णिका" ॥ …ततः कराङ्गन्यासौ। ह्रीं अङ्गुष्ठाभ्यां नमः। ह्रीं …हृदयाय नमः। इत्यादि सर्व्वत्र मायावीजेन …कुर्य्यात्। तथा च निबन्धे।

…अङ्गानि मायया कुर्य्यात् ततो देवीं विचिन्तयेत्।

…कल्पे च।

"षड्दीर्घाद्या मयेर्हिया तद्वीजेनाङ्गकल्पना" ॥०॥

…ततो ध्यानं।

"रक्तां विचित्रवसनां नवचन्द्रचूडा-
मन्नप्रदाननिरतां स्तनभारनम्राम्।
नृत्यन्तमिन्दुशकलाभरणं विलोक्य
हृष्टां भजे भगवतीं भवदुःखहन्त्रीम्" ॥

एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततः सामान्योक्तपीठपूजां विधाय भुवनेश्वरी-कल्पोक्तऋष्यादिपीठमन्त्रान्तां पीठपूजां विधाय पुन-ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं वि-धाय आवरणपूजामारभेत। यथा केशरेष्वग्नि-कोणे ह्रीं हृदयाय नमः। नैरृते ह्रीं शिरसे स्वाहा। वायव्ये ह्रीं शिखायै वषट्। ऐशान्यां ह्रीं कवचाय हुं। मध्ये नेत्रत्रयाय वौषट्। चतु-र्दिक्षु ह्रीं अस्त्राय फट्। अष्टदलेषु पूर्व्वादिषु ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी चामुण्डायै महालक्ष्म्यै प्रणवादिनमोऽन्तेन पूज-येत्। तत्रैव।

"दलेषु पूजयेदेता ब्राह्म्याद्याः क्रमशः सुधीः"। [illegible] …

[illegible]

अन्नपूर्णास्तोत्रं।

[illegible]

उद्यद्भानुसहस्राभे नयनत्रयभूषिते।
चन्द्रचूड़े महादेवि अन्नपूर्णे नमोऽस्तु ते ॥
विचित्रवसने देवि अन्नदाननतेऽनघे।
शिवनृत्यकृतामोदे अन्नपूर्णे नमोऽस्तु ते ॥
साधकाभीष्टदे देवि भवदुःखविनाशिनि।
कुचभारनते देवि अन्नपूर्णे नमोऽस्तु ते ॥
षट्कोणपद्ममध्यस्थे षडङ्गयुवतीमये।
ब्रह्माण्यादिस्वरूपे च अन्नपूर्णे नमोऽस्तु ते ॥
देवि चन्द्रकृतापीड़े सर्व्वसाम्राज्यदायिनि।
सर्व्वानन्दकरे देवि अन्नपूर्णे नमोऽस्तु ते ॥
इन्द्राद्यर्च्चितपादाब्जे रुद्रादिरूपधारिणि।
सर्व्वसम्पत्प्रदे देवि अन्नपूर्णे नमोऽस्तु ते ॥
पूजाकाले पठेद्यस्तु स्तोत्रमेतत् समाहितः।
तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः ॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरःसरं।
तस्य चान्नसमृद्धिः स्याद्वर्द्धमाना दिने दिने ॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन।
प्रकाशात् कार्य्यहानिः स्यात्तस्माद्यत्नेन गोपयेत्" ॥

इत्यन्नपूर्णास्तोत्रं समाप्तं ॥ ० ॥

अथ अन्नपूर्णाकवचं ॥

"कथितास्त्वन्नपूर्णाया या या विद्याः सुदुर्लभाः।
कृपया कथिताः सर्व्वा श्रुताश्चाधिगता मया ॥
साम्प्रतं श्रोतुमिच्छामि कवचं यत् पुरोदितं।
त्रैलोक्यरक्षणं नाम कवचं मन्त्रविग्रहं" ॥

ईश्वर उवाच।

"शृणु पार्व्वति वक्ष्यामि सावधानावधारय।
त्रैलोक्यरक्षणं नाम कवचं ब्रह्मरूपकं ॥
सर्व्वविद्यास्वरूपञ्च महदैश्वर्य्यदायकं।
पाठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्य्यभाग्भवेत् ॥
त्रैलोक्यरक्षणस्यास्य कवचस्य ऋषिः शिवः।
छन्दो विराडन्नपूर्णा देवता सर्व्वसिद्धिदा ॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः।
ह्रीं नमो भगवत्यन्ते माहेश्वरिपदं ततः।
अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी ॥
पातु मामन्नपूर्णा मा या स्वाना भुवनप्रदे।
[illegible]
[illegible]

पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु।
कुवेरश्चोत्तरे पातु मामैशान्यां शिवोऽवतु ॥
ऊर्द्ध्वाधः सततं पातु ब्रह्मानन्तौ यथाक्रमात्।
वज्राद्यायुधाः पान्तु दशदिक्षु यथाक्रमात् ॥
इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परं।
यद्धृत्वा पठनाद्देवाः सर्व्वैश्वर्य्यमवाप्नुयुः ॥
ब्रह्मा विष्णुश्च रुद्रश्च कवचं धारणाद्यतः।
सृजत्यवति हन्त्येव कल्पे कल्पे पृथक् पृथक् ॥
पुष्पाञ्जल्यष्टकं देव्यै मूलेनैव पठेत्ततः।
युगायुतकृतायास्तु पूजायाः फलमाप्नुयात् ॥
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे।
वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः ॥
यो धारयति पुण्यात्मा त्रैलोक्यत्राणकं परं।
…विधिः स्मृतः।
भूर्ज्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ॥
कण्ठे वा दक्षिणे बाहौ सोऽपि सर्व्वतपोमयः।
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं प्राप्य पार्व्वति।
माल्यानि कुसुमान्येव भवन्त्येव न संशयः" ॥

इति भैरवतन्त्रे भैरवभैरवीसंवादे अन्नपूर्णाकवचं समाप्तं। इति तन्त्रसारः ॥ ० ॥ तस्याः स्तवस्तु यथा। ॐ नमोऽन्नपूर्णायै।

"ॐ नित्यानन्दकरी वराभयकरी सौन्दर्य्यरत्नाकरी
निर्द्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥
नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी।
काश्मीरागुरुवासिताङ्गरुचिरा काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥
योगानन्दकरी रिपुक्षयकरी धर्म्मैकनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी।
सर्व्वैश्वर्य्यकरी तपःफलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥
[illegible]

[illegible] ताकः ।)

अन्वाहार्य्यं, क्ली, (प्रतिमासमाह्रियतेऽदः, अनु+आ+हृ+ण्यत् ।) मासिकश्राद्धं । इत्यमरः ॥ तत्तु प्रथमावास्याविहितं मासिकश्राद्धं यद्धनसपिण्डीकरणस्य प्रकाशे प्रतिमासं तत् श्राद्धं तदिति केचित् । इति भरतः ॥ गोभिलस्य प्रोक्तकर्म्मावामावस्याश्राद्धं । तदनादाप्रचिह्निया च । यथा,— "यत् श्राद्धं कर्म्मणामादौ दाताने दक्षिणा भवेत् । अमावास्यां द्वितीयं तदन्वाहार्य्यं विदुर्बुधाः" ॥ इति गोभिलसूत्रं ।

अन्वाहार्य्यकं क्ली, (प्रतिमासमाह्रियतेऽदः, अनु+आ+हृ+ण्यत्, ततः स्वार्थे कन् ।) अन्वाहार्य्यं । यथा,— "पित्र्यानाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकं" । इति मनुः ।

अन्वाहितं, त्रि, (अनु+आ+धा+कर्म्मणि क्त ।) देशान्तरं गच्छता अन्यस्य हस्ते निहितं द्रव्यं तेनापि यथा पुनरन्यस्य हस्ते अर्पितं निहितं तत् । इति मिताक्षरा । ("[illegible] विधि" । इति [illegible],— "[illegible] वाणिज्यान्तरेष्वपि" । इति [illegible] ।) [illegible] इति भाषा ।

अन्वित, त्रि, (अनु+इण्+क्त ।) युक्तः । मिलितः । इति शब्दरत्नावली । यथा,— "[illegible]" । इति [illegible] । ([illegible] ।)

[illegible], त्रि, (अनु+इष्+क्त ।) अन्वेषितं । [illegible] । ("[illegible]" । इति कुमा[illegible] ।)

[illegible], त्रि, (अनु+ईक्ष+क्त ।) [illegible] । इति [illegible] ।

[illegible] स्त्री, (अनु+इष्+युच्) अन्वेषणा [illegible] ।

[illegible] । इति [illegible] ।

[illegible]

अन्वेष्टा, (ष्टृ) त्रि, (अनु+इष्+तृच् ।) अन्वेषणकर्त्ता । तत्पर्य्यायः ॥ अनुपदः २ । इति हेमचन्द्रः ॥ ("अन्वेष्टारो ब्राह्मणाश्च भ्रमन्ति शतशो महीं" । इति नलोपाख्यानं ।)

अप, व्य, (न पाति, न+पा+ड "पादयोऽसत्त्वे" इति निपातसंज्ञया स्वरादिर्निपातमव्ययमिति अव्ययम् ।) उपसर्गविशेषः । अस्यार्थः । अनादरः । अंशः । असाकल्यं । वैरूप्यं । त्यागः । नञर्थः । इति दुर्गादासः ॥ अपकृष्टार्थः । वर्ज्जनार्थः । वियोगः । विपर्य्ययः । विकृतिः । चौर्य्यं । निर्द्देशः । हर्षः । इति मेदिनी ॥

अप, [स्] क्ली, (आप्+असुन्, पृषोदरादित्वात् ह्रस्वः ।) यज्ञकर्म्म । इत्युणादिकोषः ।

अपकर्म्म, क्ली, (अपकृष्टं कर्म्म ।) दुष्क्रिया । मन्दकर्म्म । अपकृष्टार्थोपसर्गेण कर्म्मशब्दस्य कर्म्मधारयसमासः ।

अपकारः, पुं, (अप+कृ+भावे घञ् ।) द्रोहः । अनुपकारः । मन्दकरणं । इति हलायुधः । (अनिष्टसाधनं । असद्व्यवहारः । अपचारः । द्वेषः । "उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा । उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" । इति माघः ।)

अपकारगी, [र्] स्त्री, (अपकारेण गीः वाक्यं ।) अपकारवाक्यं । भर्त्सनं । इत्यमरः ।

अपकारी, [न्] त्रि, (अपकरोति, अप+कृ+णिनि ।) अपकारक । द्रोहकः । यथा,— "अपकारिणि चेत् क्रोध क्रोधे क्रोधः कथं न ते । धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि" ॥ इत्युद्भटः । (अहितकारी । अनिष्टसाधकः । पीडकः । दुर्वृत्तः । कुकर्म्मकारी । "किं मद्रेनाप्यमर्थेन किं ग्रहेणापकारिणा" । इति पञ्चतन्त्रम् ।)

अपकृष्टं, त्रि, (अप+कृष्+क्त ।) जघन्यं । तत्पर्य्यायः । अधमं । २ निकृष्टं । ३ याप्यं । ४ गर्ह्यं । ५ अवद्यं । ६ काणकं । ७ कुत्सितं । ८ प्रतिकृष्टं । ९ खेटं । १० रेफ । ११ अवमं । १२ अर्व्वं । १३ पापं । १४ अपसदं । १५ कुपूयं । १७ चेल । १८ अणकं । १९ । इति हेमचन्द्रः ।

अपक्रम, पुं, (अप+क्रम+भावे घञ्, "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति वृद्धिनिषेधः ।) पलायनं । इत्यमरः ।

अपक्रिया, स्त्री, (अप+कृ+भावे श ।) द्रोहः । इति हेमचन्द्रः ॥ (विपरीतप्रयोगः । "[illegible] तु विधौ साध्यमर्थं यदा" । इति [illegible] ।)

अपक्रोशः, पुं, (अप+क्रुश्+भावे घञ् ।) निन्दनं । भर्त्सनं । इति शब्दरत्नावली ।

अपक्व, त्रि, (न पक्वं, पच्+कर्म्मणि क्त, नञ्समासः ।) अपरिणतं । कांचा इति भाषा । यथा,— "[illegible] पक्वं वा [illegible]" । इति [illegible] । २ [illegible] ।

१ आमं । २ अपक्वं । ("अपक्वे लवणं दद्यात् प[illegible]" इति श्राद्धवाक्ये ।)

अपगतः, त्रि, (अप+गम्+क्त । पलायिते च ।) मृतः । इति [illegible] दूरीभूतः । यथा,—"तापो[illegible] छाया धूली न धौता तयोः" [illegible]

अपगा, स्त्री, (अधोमुखेन गच्छ[illegible] कर्त्तरि डः, स्त्रियां टाप् ।) [illegible] इत्यमरटीकायां भरतः । (स्रोत[illegible] स्रवन्ती निम्नगापगा इत्यमरः ।)

अपघनः, पुं, (अपहत्य मिलिता [illegible] हन्+"अपघनोऽङ्ग"-मिति पाणिनि[illegible] हस्थाने च ।) अवयवः । अङ्गं । इत्यमर[illegible] भिरपघनैर्घरत्यक्तभोमान्" । इति सु[illegible]

अपघातः, पुं, अपहननं । हनधातोर्भावे घञ् हस्य घः नस्य तः । मृत्युफलकव्यापारः । अपहन्यते इति अपपूर्व्वक हनधातोर्भावे घञ्प्रत्ययेन सिद्धं ।

अपचयः, पुं, (अप+चि+भावे अच् । [illegible]) क्षतिः । हानिः । तत्पर्य्यायः । अपचारः [illegible] मरः ॥ (पूजा सम्मानना । यथा [illegible] मतौ निविशते गाढं महेशु यद्" [illegible] शतके ।) [पुंलि[illegible]

अपचायितः, त्रि, (अप+चाय+[illegible]

अपचारः, पुं, (अप+चर्+भावे [illegible] सेवनं ।) अहिताचरणं । यथा, "[illegible] भवन्ति ह्रियो यथोपदंशा त्रिविधास्त्वि[illegible]" इति माधवकरः । ("कृतापचारोऽपि परैरनाविष्कृतविक्रियः । असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा" । इति माघः ।)

अपचितः, त्रि, (अप+चाय+पूजार्थे क्त । अपचितश्चेति पाणिनिसूत्रेण चये चिभावः । अप+चि+क्त ।) क्षीणः । [illegible] अवदानाद्यपचयदृष्टः । पूजितः । अर्चितः । "[illegible] मपि गात्रं यातदलावनाम्य" । इति कु[illegible]

अपचितिः, स्त्री, (अप+चि+भावे क्तिन् ।) व्ययः । पूजा । निष्कृतिः इति मेदिनी । ध्वंसः । सम्मानना । "याहं त्वपचितिं यामु पितुष [illegible]" इति रामायणे ।)

अपच्छाद, त्रि, (अपगता छाया [illegible]) देवः । उपदेवः । निषुण [illegible] तस्मात् इति बहुव्रीहौ [illegible] विशिष्टः । पिशाचादि । "अपच्छाया [illegible] दीपवदपच्छादेर [illegible]

अपच्छेदनं, स्त्री, ([illegible] अपूर्वकाले चि हृ+क्त, [illegible] [illegible] । पर्य्यायः [illegible] वेशपल्लव ।

...मनोबुद्धिदशेन्द्रियसमन्वितं।
...तभूतोत्थं सूक्ष्माङ्गं भोगसाधनं"॥
...हृदयां।)
...ं, त्रि, (पटेन वस्त्रेण तिरस्कारिण्या इति
...अन्तरं व्यवधानं यत्र तत्, ततो नञ्-
...सः।) आसन्नं। संसक्तं।) अपदान्तरं। अव्य-
...तं। इत्यमरटीकायां स्वामी॥
..., स्त्री, (अल्पः पटः अल्पार्थे नञ्समासः,
...रादित्वात् ङीष्।) वस्त्रप्रावरणं। इति हेम-
...न्द्रः। कानात्। इति भाषा। (यवनिका। पर्दा।
...त्यादि भाषा।)
...टुः, स्त्री, (न पटुः, नञ्समासः।) व्याधितः।
...रोगी। इत्यमरः। पटुतारहितः। कार्य्याक्षमः।
यथा,—
"सा कान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतं"।
इत्यमरुकविः॥
...पतर्पणं, स्त्री, (अप+तृप्+भावे ल्युट्। लङ्घनं।
रोगादौ भोजनाभावः। इति हेमचन्द्रः। (अप-
गतं तर्पणं तृप्त्यभावो यस्य तत्। गतलोमः।
तृप्तिशून्यः।)
...पत्यं, स्त्री, (न पतति वंशो यस्मात्, पत+बाड-
लात् यत्, ततो नञ्समासः।) पुत्रः। कन्या।
तत्पर्य्यायः। २ सन्तानः। ३ तोकं। ४ सन्ततिः।
५ प्रसूतिः। इति जटाधरः।
("असिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते")।
इति हितोपदेशे।
"महीभृतः पुत्रवतोऽपि दृष्टिं
तस्मिन्नपत्ये न जगाम तृप्तिं"।
इति कुमारसम्भवे।)
...पत्यदा, स्त्री, (अपत्यं गर्भं तत्सेवनेन ददाति,
अपत्य+दा+कर्त्तरि कः, उपपदसमासः।)
गर्भदात्रीक्षुपः। इति राजनिर्घण्टः।
...पत्यपथः, पुं, (अपत्यस्य गर्भान्निःसारणस्य पन्था
मार्गः, षष्ठीतत्पुरुषः, समासान्त अच्।) भगं।
योनिः। इति हेमचन्द्रः।
...पत्यशत्रुः, पुं, (अपत्यस्य शत्रुः, षष्ठीतत्पुरुषः।)
कर्कटः। इति शब्दचन्द्रिका। काँकड़ा। इति
भाषा।
...त्रपः, त्रि, (अप+त्रप्+भावे अङ्।) त्रपा-
रहितः। निर्लज्जः। अपगता त्रपा यस्येति
[illegible] ("सापत्रपः कुल-
वधूरिव शास्त्रस्य इतः [illegible] इति धनञ्जयविजय
...व्यायोगे।)
...पत्रपा, स्त्री, (अपगता त्रपा अन्यतो लज्जा
यस्याः सा, स्त्रियां टाप् लज्जाहीना। लज्जा-
शून्या।) अन्यतो लज्जा। परस्मात् लज्जा। इत्य-
मरः। लज्जामात्रं। इति रत्नकोषः।
...पत्रपिष्णुः, त्रि, (अप+त्रप्+शीलार्थे कर्त्तरि
इष्णुच्।) सभावशत्रपः। लज्जाशीलः। इत्यमरः।
लाजुक इति भाषा।
...पथं, स्त्री, न, (न प्रशस्तः पन्थाः मार्गः, नञ्स-

मासः। नास्ति पन्थाः प्रशस्तः मार्गो यत्र तत्।
प्रशस्तवर्त्मशून्ये नगरादौ।) अपन्थाः। मार्ग
एव यो न भवति तत्। इत्यमरः। योनिः। इति
शब्दरत्नावली। (विमार्गः। कुपथः। असन्मार्गः।
साधुविगर्हितः पन्थाः। "अपथे पदमर्पयन्ति
हि श्रुतवन्तोऽपि रजोनिमीलिताः"। इति
रघुवंशे।
"न कश्चित् वर्णानामपथमपकृष्टोऽपि भजते"।
इति शाकुन्तले।)
अपथ्यं, त्रि, (पथ्यो वैद्योक्तभोजनादिनियमाय नीत्यु-
क्ताचाराय वा हितं यत् ततो नञ्समासः।)
पथ्यभिन्नं। अहितं। यथा,—
"यतपथ्यं यदपथ्यञ्च वक्ष्यते रक्तपित्तिनां"।
इति पथ्यापथ्यग्रन्थः।
अपदानं, स्त्री, (अप+दैप्शोधने भावे ल्युट्, विच-
मानार्थे अर्श आद्यच्। अथवा अपदायति परि-
शुध्यत्वेन कर्म्मणा, अप+दैप्+शोधने करणे
ल्युट्।) अवदानं। वृत्तं कर्म्म। वृत्तिः प्रवर्त्तनं
सा प्रशस्ता विद्यते यत्र तत्। यत्र कर्म्मणि
वृत्तिः सर्व्वैः प्रशस्यते तत् इत्यर्थः। इत्यमर-
टीकायां स्वामी॥
("गव्यायत्यपदानसम्मितां
भवतः सोऽपि न सत्क्रियामिमां"।
इति शाकुन्तले।)
अपदान्तरः, त्रि, (नास्ति पदान्तरं व्यवधानं यत्र
सः।) अव्यवहितः। संयुक्तः। इत्यमरः। अभिन्न-
पदे स्त्री। (सन्निकर्षः। सान्निध्यं। सामीप्यं।
नैकट्यं।)
अपदिशं, स्त्री, अ, (दिशोर्मध्ये, अव्ययीभावः, समा-
सान्त अच्।) दिक्कोणः। दिशोर्मध्यं। तत्-
पर्य्यायः। विदिक् २। इत्यमरः।
("क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियां"।
इत्यमरः।)
अपदेशः, पुं, (अप+दिश्+घञ्। स्थानं।) निमित्तं।
शरव्यं। स्वरूपाच्छादनं। तत्पर्य्यायः। २ व्याजः।
३ लक्ष्यं। इत्यमरः। परानिष्टकारिभिन्नशठता।
इति महाभारतटीका। (ख्यातिः। कीर्त्तिः।
छलं।
"रक्षापदेशान्मुनिहोमधेनो-
र्वन्यान् विनेष्यन्निव दुष्टसत्त्वान्"।
इति रघुवंशे।)
अपध्वंसजः, पुं, (अपध्वस्यतेऽनेन, अपध्वन्स+
करणे घञ्, अपध्वंसो जातीनां भिन्नतासम्पा-
दकः सङ्करस्तस्माज्जायते, अपध्वंस+जन्+ड,
उपपदसमासः।) वर्णसङ्करः। यथा,—
"शूद्रायान्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः"।
इति मनुः। (प्रतिलोमजातः। भिन्नवर्णक्रम-
जातः करणादिसङ्कीर्णवर्णः।)
अपध्वस्तः, त्रि, (अप+ध्वन्स+क्तः।) धिक्कृतः।
निन्दितः। चूर्णितः। इति मेदिनी। (अति-
त्यक्तः।) धिक्कृतः। "अपध्वस्तः धिक्कृते
निन्दितेऽप्यवचूर्णिते"। इति मेदिनी।

अपनयनं, स्त्री, (अप+नी+भावे ल्युट्।) खण्डनं।
दूरीकरणं। यथा,—"इति श्रीशाम्बपुराणे रो-
गापनयने श्रीसूर्य्यवक्त्रविनिर्गतस्तवराजः समाप्तः"
इति।
("नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रं"।
इति शाकुन्तले।)
अपनोदनं, स्त्री, (अप+नुद्+भावे ल्युट्।) खण्डनं।
दूरीकरणं। यथा,—"मानापनोदनविनोदनते
गिरीशे"। इति श्रीहर्षः। (अपनुदति दूरी-
करोति, अप+नुद+कर्त्तरि बाहुल्यात् ल्युट्।)
खण्डकः। दूरीकारकः।
"यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः।
तथाघमर्षणं जप्यं सर्व्वपापापनोदनं"।
इति मनुः।)
अपन्थाः, [थिन्] पुं, (न पन्थाः, नञ्समासः,
समासान्तविधेरनित्यत्वात् अत्र अजभावः।) अ-
पथं। इत्यमरः।
अपपात्रितः, त्रि, (अपकृष्टं पात्रं भोजनपात्रं यस्य
सः, येन जनेन भुक्ते भोजनपात्रमस्पृश्यं भवतीति
यावत् चण्डालादिः, अपपात्रः कृतः, अपपात्र+
करोत्यर्थे णिच्+क्तः।) उत्कटदोषैर्ज्ञातिभि-
र्भिन्नोदकीकृतः। यथा,—"अपपात्रितस्य रिक्थ-
पिण्डोदकानि निवर्त्तन्ते"। इति शुद्धितत्त्वे
शङ्खलिखितौ।
अपभ्रंशः, पुं, (अप+भ्रन्स+घञ्।) ग्राम्यभाषा।
अपभाषा। तत्पर्य्यायः। अपशब्दः २। इत्यमरः॥
पतनं। यथा,—
"अत्यारूढ़िर्भवति महतामप्यपभ्रंशनिष्ठा"।
इत्यभिज्ञानशकुन्तलं॥ (अधः पतनं। ध्वंसः।
अधोगतिः।)
अपमः, पुं, (अपकृष्टतया मीयते, अप+मा
घञर्थे घः।) क्रान्तिः। इति सिद्धान्तशिरोम[णौ]
गोलाध्यायः॥
अपमानं, स्त्री, (अप+मा+भावे ल्युट्।) अना[दरः।]
अमर्य्यादा। इति शब्दरत्नावली॥ तत्पर्य्याय[ः]
"स्यादवज्ञा परीहारः परिहारः पराभवः
अपमानं परिभवस्तिरस्कारस्तिरस्क्रिया।
अवहेला च हेला स्यादवहेलनहेलने।
दोषो निकारधिक्कारौ पर्य्यायः स्यादनादर[ः]"
इति शब्दरत्नावली॥ • ॥ तस्य अप[...]
यथा,—
"अर्थनाशं मनस्तापं गृहे दुश्चरितानि [च।]
वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत्"
इति चाणक्यः॥
("अपमानं पुरस्कृत्य मानं कृत्वा तु पृ[...]
स्वकार्य्यमुद्धरेत् प्राज्ञः कार्य्यध्वंसो हि [...]
अपमित्यकं, स्त्री, (अपमित्य अपमानं [...]
अप+मेङ् प्रतिदाने+क्त। तस्य
[illegible]
[illegible] इति [illegible]।
अपमृत्युः, पुं, (अपकृष्टः [illegible]

भेदाः परेऽपि बहवोऽपराधाः महर्षिभिः ।
आचारैः शास्त्रविहितनिषिद्धातिक्रमादिभिः" ॥
अथापराधशमनं ।
"संवत्सरस्य मध्ये च तीर्थे शौकरके मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ॥
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ।
अनयोस्तीर्थयोरद्धे यः सेवेत् सुकृती नरः ॥
सहस्रजन्मजनितानपराधान् जहाति सः" ।
स्कान्दे ।
"अहन्यहनि यो मर्त्त्यो गीताध्यायन्तु संपठेत् ।
द्वात्रिंशदपराधैस्तु अहन्यहनि मुच्यते" ॥
अथ कार्त्तिकमाहात्म्ये ।
"तुलस्या कुरुते यस्तु शालग्रामशिलार्च्चनं ।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः" ॥
तत्रैवान्यच्च ।
"द्वादश्यां जागरे विष्णोर्यः पठेत्तुलसीस्तवं ।
द्वात्रिंशदपराधानि क्षमते तस्य केशवः ॥
यः करोति हरेः पूजां कृष्णशस्त्राङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः" ॥
इति श्रीहरिभक्तिविलासे ८ विलासः ॥

[अ]पराह्णः, पुं, (अह्नः अपरः एकदेशिसमासः, समासान्तः टच्, अहःस्थाने अह्नादेशः ।) शेषं अहः । दिनशेषभागः । इत्यमरः ।
"रामाणां रमणीयतां विदधति ग्रीष्मापराह्णागमे"
इति अमरुशतके ।
"तथा श्राद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते" ।
इति मनुः ।) विकाल इति भाषा । तस्य भेदाः । द्विधा विभक्तदिनस्य शेषभागः ॥ त्रिधा विभक्तदिनस्य तृतीयभागः ॥ स तु त्रिंशद्दण्डदिनमाने विंशतिदण्डात् परं दशदण्डं यावत् । पञ्चधा विभक्तदिनस्य चतुर्थभागः । स तु अष्टादशदण्डात् परं षड्दण्डं यावत् । इति श्रुतिस्मृती ॥

[अ]पराह्णतनं, त्रि, (अपराह्णे भवम् सायञ्चिरमित्यादिना अपराह्ण+ट्यु तुट्च, "घकालतनेषु कालनाम्न इति" पक्षे अलुक् ।) अपराह्णभववस्तु । अपराह्णजातं । इति सिद्धान्तकौमुदी ॥

[अ]पराह्णेतनं, त्रि, (अह्नोऽपरः एकदेशिसमासः, तत्र भवम् अपराह्णे+ट्यु तुट्च, "घकालतनेषु कालनाम्न" इति पक्षे अलुक् ।) अपराह्णतनं । इति सिद्धान्तकौमुदी ॥

[अ]परिकलितः, त्रि, (परि+कल्+कर्म्मणि क्तः, ततो नञ्समासः ।) अज्ञातः । अदृष्टः । यथा,—
"अपरिकलितपूर्व्वः कश्चमत्कारकारी
स्फुरति मम गरीयानेष माधुर्य्यपूरः ।
अयमहमपि हन्त प्रेक्ष्य यं लुब्धचेताः
सरभसमुपभोक्तुं कामये राधिकेव" ॥
इति ललितमाधवः ॥

[अ]परिच्छन्नं, त्रि, परिच्छदशून्यं । परिपूर्व्वच्छदधातोः कर्त्तरि क्ते नञ्समासः ॥

[अ]परिच्छिन्नं, त्रि, (परि+छिद+क्त ततो नञ्समासः ।) परिच्छेदरहितं । असीम । वहिरन्तरशून्यं । यथा,—"किञ्च परिच्छिन्नस्य नीडे पक्ष्यादेरिव प्रवेशो भवेत् तव त्वनावृतत्वात् अपरिच्छिन्नत्वेन वहिरन्तरभेदो नास्ति कुतः प्रवेशः" ।
इति श्रीधरस्वामी ॥

अपरिपक्वं, त्रि, परिपाकरहितं । किञ्चित्पक्वं । परिपूर्व्वपचधातोः कर्त्तरि क्ते तस्य वत्वे अस्य च वत्वे परिपक्वं ततो नञ्समासः ॥

अपरिमितं, त्रि, (परि+मा+क्त, ततो नञ्समासः ।) परिमाणरहितं । मानतुलासंख्याशून्यं । यथा,—"अपरिमिता ध्रुवास्तनुभृतो यदि सर्व्वगतास्तर्हि न शास्यतेति नियमो ध्रुवनेतरथा" ।
इति श्रुत्यध्यायः ।

अपरिम्लानः, पुं, (परि+म्लै+क्त तस्य नत्वं, ततो नञ्समासः ।) महाम्लानवृक्षः । इति राजनिर्घण्टः ॥ म्लानिरहिते वाच्यलिङ्गः ॥ (नूतनः । अपरिशुष्कः । निर्म्मलः ।)

अपरिष्कारः, पुं, ("संपर्य्युपेभ्यः करोतौ भूषणे इति" सुडागमः ।) परिष्काराभावः । अनिर्म्मलत्वं । तद्वति त्रि । परिपूर्व्वकृधातोर्भावे घञि नञ्समासः ।

अपरिष्कृतं, त्रि, अमार्जितं । अनिर्म्मलं । अभूषितं । अनलङ्कृतं । परिपूर्व्वकृधातोः कर्म्मणि क्ते नञ्समासः । यथा,—
"मलपूतिसमायुक्तमश्रुविण्मूत्रपिच्छिलं ।
रेतोनिष्ठीवमानाभिः सवद्भिरपरिष्कृतं" ॥
इति कालिकापुराणे ५६ अध्यायः ॥

अपरिहार्य्यं, त्रि, (परि+हृ+कर्म्मणि ण्यत्, ततो नञ्समासः ।) अपरिहरणीयं । अत्याज्यं । यथा,
"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि" ॥
इति श्रीभगवद्गीता ॥

अपरूपं, त्रि, (अपकृष्टं रूपं कर्म्मधारयसमासः ।) अपकृष्टरूपं । विकृतरूपं । अपोपसर्गेण रूपशब्दस्य बहुव्रीहिसमासः ॥ कर्म्मधारयसमासे क्ली ॥ लोके तु आश्चर्य्यमिति प्रसिद्धं ॥

अपरेद्युः, [स्] व्य, (अपरस्मिन् दिवसे दिवसस्य एद्युसादेशः) । अपरेऽह्नि । अपरदिने । इत्यमरः ॥ ("पूर्व्वेद्युरपरेद्युर्व्वा श्राद्धकर्म्मण्युपस्थिते निमन्त्रयेत विप्रान् वै" इति स्मृतिः ।)

अपर्णा, स्त्री, (नास्ति पर्णं तपस्यायां पर्णभक्षणवृत्तिर्व्वा यस्याः सा, टाप् ।)
दुर्गा । इत्यमरः ॥
("स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः" । इति कुमारसम्भवे ।)
पत्रशून्ये त्रि ॥

अपर्य्याप्तं, त्रि, (परि+आप्+क्त, नञ्समासः ।) पर्य्याप्तिशून्यं । असीम । असमर्थं । यथा,—
"अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितं ।
पर्य्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं" ॥
इति श्रीभगवद्गीता ॥

अपर्य्युषितं, क्ली, (परि+वस्+क्त, नञ्समासः ।) अशुष्कं । सद्योभवं । यथा नारसिंहे,—
"अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्ज्जितैः ।
आत्मारामोद्भवैर्व्वापि पुष्पैः संपूजयेद्धरिं" ॥
इत्याह्निकाचारतत्त्वम् ॥

अपर्व्वदण्डः, पुं, (अपर्व्वः पर्व्वरहितः ग्रन्थिशून्य इति यावत् दण्डः कर्म्मधारयः ।) रामशरवृक्षः । इति राजनिर्घण्टः ॥

अपलं, क्ली, (अपलाति अपराक्रमणं गृह्णाति येन, अप+ला+करणे क । नास्ति पलं मांसं यस्य सः, मांसशून्यं ।) कीलकं । इति शब्दमाला ॥
पलशून्ये त्रि ॥

अपलपनं, क्ली, अपलापः । अपोपसर्गात् लपधातोर्भावे अनट् प्रत्ययः ॥ (पाणिनिमते तु अप+लप्+भावे ल्युट् ।)

अपलापः, पुं, (अप+लप्+भावे घञ् ।) सतोऽप्यसत्त्वेन कथनं । ज्ञातस्य गोपनं । तत्पर्य्यायः । २ निह्नुतिः । ३ अपह्नुतिः । ४ अपह्नवः । ५ निह्नवः । इति शब्दरत्नावली ॥ प्रेम । इति । मेदिनी ॥

अपलापिका, स्त्री, (अप+लप्+भावे ण्वुल् ।) तृष्णा । इति हेमचन्द्रः ॥

अपवनं, क्ली, (अपकृष्टं कृत्रिमत्वात् अल्पत्वाच्च वनं कर्म्मधारयः ।) उपवनं । कृत्रिमवनं । इति हेमचन्द्रः ॥

अपवरकः, पुं, (अपव्रियन्ते लोकाः संभज्यन्तेऽत्र, अप+वृ+"ग्रहवृदृनिश्चिगमश्च" इति अप्, ततः स्वार्थे कन्, अथवा अप+वृ+क्रादिभ्यः संज्ञायां वुन् तस्य अकः ।) अन्तर्गृहं । तत्पर्य्यायः । २ गर्भागारं ३ वासौकः ४ शयनास्पदं । इति हेमचन्द्रः ॥ ("दीपोऽपवरकस्यान्तर्वर्त्तते तत्प्रभा वहिः" ।)

अपवर्गः, पुं, (अपवृज्यते संसारः मुच्यतेऽनेन, अप+वृज्+घञ् कुत्वं ।) मोक्षः । त्यागः । क्रियावसानसाफल्यं । कर्म्मफलं । इति विश्वमेदिन्यौ ॥ क्रियान्तः । कार्य्यसमाप्तिः । इति जटाधरो रत्नावली च ॥ पूर्णता । इति धरणी ॥ (निर्व्वाणं । मुक्तिः । "अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्म्मयोर्गतौ" इति रघुवंशे । समाप्तिः । शेषः । अवसानं । "क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः" । इति भारविः ।)

अपवर्ज्जनं, पुं, (अप+वृज्+भावे ल्युट् ।) दानं । मोक्षः । त्यागः । इति मेदिनी ॥

अपवादः, पुं, (अप+वद+भावे घञ् ।) आज्ञा । निन्दा । तत्पर्य्यायः । अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ उपक्रोशः ६ जुगुप्सा ७ कुत्सा ८ गर्हणं ९ इत्यमरः ॥ (वचनीयं । "लोकापवादाद्भयं" इति नीतिशतके । "दिव्यामपि हि वैदेह्यां सापवादो यतो जनः" । "हा कथं सीतादेव्या ईदृशमचिन्तनीयं जनापवादं देवस्य कथयिष्यामि" । इति उत्तरचरिते । आज्ञा । अनुमतिः । आदेशः । "ततोऽपवादेन पताकिनीपतेश्चचाल निर्ह्रादवती महाचमूः" । इति भार

विः।) विश्वासः। इति मेदिनी। विशेषः। बाधकः। यथा,—
"क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते"।
इति कलापपरिशिष्टं। रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वं। तदुक्तं।
"सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदाहृतः"।
अस्य फलं। आभ्यां अध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति। इति वेदान्तसारः।

अपवारणं, क्ली, (अप + वृ + णिच् भावे ल्युट्।) व्यवधानं। अन्तर्द्धानं। इत्यमरः।

अपवारितं, त्रि, (अप + वृ + णिच्, कर्म्मणि क्तः।) अन्तर्हितं। इति हेमचन्द्रः।

अपवित्रं, त्रि, (पू + इत्रच्, ततो नञ्समासः।) पवित्रतारहितं। अशुद्धं। यथा,—
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः"।
इति स्मृतिः। (अविशुद्धः। अनिर्म्मलः। दूषितः। मलिनः।
"अपवित्रमिदं कर्म्म कृतं मोहान्धया तया"।
इति रामायणे। "यदेष सारमेयोऽपवित्रः स्कन्धारूढो नीयते"। इति पञ्चतन्त्रे।)

अपविद्ध, त्रि, (अप + व्यध् + क्त।) प्रत्याख्यातः। निराकृतः। इति हेमचन्द्रः। (त्यक्तः। प्रतिक्षिप्तः।
"कुबेरस्य मनःशल्यं शंसतीव पराभवं।
अपविद्धगदो बाहुर्भङ्गप्रशाख इव द्रुमः"।
इति कुमारसम्भवे। चूर्णीकृतः। दलितः।
"मर्दितायापविद्धाय वृश्चन्ते कमलस्रजः"।
इति रामायणे।)

अपविद्धपुत्रः, पुं, (अपविद्धः पुत्रः, कर्म्मधारयः,) द्वादशविधपुत्रमध्ये पुत्रविशेषः। स तु पोषणासमर्थमातापितृभ्यां त्यक्तः तयोरन्यतरेण वा त्यक्तः अनन्तरं अन्येन गृहीत्वा पुत्रत्वेन परिकल्पितः। यथा,—
"मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते"।
इति मनुः।

अपविषा, स्त्री, (अप अपगतं विषं यस्याः सा, ततो टाप्।) निर्व्विषीतृणं। इति राजनिर्घण्टः।

अपशद, पुं, (अप + शद् + कर्त्तरि अच्। अपसद इति पाठे अप + सद् + अच्) अपसदः। नीच इत्यमरटीकायां भरतः।

अपशब्दः, पुं, (अप असंस्कृतः शब्दः, कर्म्मधारयः।) असंस्कृतशब्दः। अपभ्रष्टशब्दः। [illegible]। अपभ्रंशः। इत्यमरः।
("तत्र [illegible] शब्दान् [illegible]।
[illegible] अपशब्दा [illegible]"।
इति [illegible]।)

"आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितं"।
इति दण्डी।

अपशुक्[च्] पुं, (शुच् + भावे क्विप्, अपगता शुक् शोको यस्य सः।) आत्मा। यथा। "क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विनापशुघ्नात्"। इति श्रीभागवतं।

अपशोक, पुं, (अपगतः शोको यस्मात् सः।) अशोकवृक्षः। इति राजनिर्घण्टः। ("शोकरहितः। दुःखहीनः।
"हरप्रीतिकरो रम्यो ह्यशोकः शोकनाशन।
दुर्गाप्रीतिकरोऽसि त्वं मामशोकं सदा कुरु"।
देवीपूजापद्धतिः।)

अपष्ठं, क्ली, (अप + स्था + क, अम्बाम्बगोभूमिसव्याप- इत्यादिना षत्वं।) अङ्कुशाग्रं। इति हेमचन्द्रः।

अपष्ठु, व्य, (अप + स्था + "अपदुःसुषु स्थः कुः" इति कु, सुषमादित्वात् षत्वम्।) निरवद्यं। विपरीतं। शोभनं। इति शब्दमाला।

स्तेयं त्वया कृतमित्यादिमिथ्यादूषणं वाक्यं। मिथ्या-
पवादः। तत्पर्य्यायः। मिथ्याभिशंसनं २। इत्य-
मरः॥ क्रोधात् द्विजादिभिर्दुःखाभिधानं। इति
पुराणं॥ ब्राह्मणगुरुवृद्धसिद्धानां अनिष्टाभिशं-
सनं। इति विजयरक्षितः॥
("यस्याभिशापात् दुःखार्त्तो दुःखं विन्दति नैषधः"।
इति नलोपाख्याने।)
अभिषङ्गः, पुं, (अभि+सन्ज्+घञ् उपसर्गादिति
षः।) पराजयः। आक्रोशः। शपथः। इति मेदिनी॥
मिथ्यापवादः। इति मथुरानाथः॥ आलिङ्गनं।
इत्यमरटीकायां रायमुकुटः॥ सर्व्वतोभावेन
सङ्गः। इति हलायुधः॥ भूताद्यावेशः। यथा,—
"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः"।
इति माधवकरः॥ (पराभवः। परिभूतिः।
"जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः"।
इति रघुवंशे।
"लीलाभिषङ्गप्रभवेन वर्त्ति
मोहेन संगमयतेन्द्रियाणां"।
इति कुमारसम्भवे। शोकः। दुःखं। "अभि-
षङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोध-
यत्"। इति रघुः।)
अभिषवः, पुं, (अभि+सु+अप्, गुणः षत्वञ्च।)
यज्ञः। स्नानं। मद्यसन्धानं। तत्तु चिरस्थापित
मदोत्पादकद्रव्यं। इति मेदिनी। यज्ञस्नानं
सोमलतापानञ्च। तत्पर्य्यायः। सुत्या २ सवनं ३।
इत्यमरः॥
("भवेदभिषवः स्नाने मद्ये मन्थानमन्थयोः"।
इति मेदिनी)
अभिषवं, क्ली, काञ्जिकं। इति हलायुधः॥ काञ्जि
इति भाषा।
अभिषुतं, क्ली, (अभि+सु+क्तः षत्वं।) काञ्जिकं।
इत्यमरः॥
अभिषेकः, पुं, (अभि+सिच्+भावे घञ्।) स्नानं।
इति शिकाण्डशेषः॥
("........ मदान्तरे"।
इति विष्णुपुराणे।
"........ निषेकः।
........"।
इति कुमारसम्भवे।)
अथ .... निरूप्यते। ....
.... १ .... २ .... ३ .... ४ .... ५
.... ६ .... ७ .... ८ ....
.... १० .... ११ .... १२ ....
.... १३ .... १४ ....
....

("कान्तार्थिनी तु या याति संकेतं साभिसारिका" इत्युक्तलक्षणा कान्तप्रार्थनया स्वयं संकेतस्थानगामिनी सस्थाने वा कान्तागमनकारिणी नायिका। यदुक्तं दर्पणकारैः।
"अभिसारयते कान्तं या मन्मथवशंवदा।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका"॥)

अभिहारः, पुं, (अभि+हृ+घञ्।) चौर्य्यं। सम्मुखे हरणं। तत्पर्य्यायः। अभिग्रहणं २। इत्यमरः॥ अभ्यवहरणं। कवचधारणं। अभियोगः। अपचिकीर्षयाभिगम्याक्रमणं। इति मेदिनी॥ (आहरणं। अपहरणं।
"दस्याभिहारं कुर्य्याच्च स्वयमेव नराधिपः"।
इति महाभारते।)

अभिहितं, त्रि, (अभि+धा+कर्म्मणि क्तः।) उक्तं। कथितं। इत्यमरः॥
("अर्थितामभिहितोऽयं प्रवर्त्तो यदि संतथा।
कामोऽनिष्टो नाभिहिता मैत्रायी दयिता द्विजैः"॥
इति मनुः।)

अभीकः, पुं, (अभि+कन्, "अनुकामिकाभीकाः कामयिता" इति पाणिनिसूत्रम्।) कविः। इति मेदिनी॥ कामी। इति हलायुधः॥ (पतिः। कामुकः। कामी।
"ददृशे पर्व्वतप्रायो राक्षसाभीकयाच कः"।
इति भट्टिकाव्ये।
उत्सुकः। क्रूरः। निठुरः। निर्भयः। निष्ठुरः।
("अभीकः कामुके क्रूरे निर्भये निष्ठुरे कवौ"।
इति मेदिनी।)

अभीकः, त्रि, (अभि+कन्।) कामुकः। क्रूरः। उत्सुकः। निर्भयः। इति शब्दरत्नावली॥

अभीप्सितं, त्रि, (अभ्याप्तुमिष्टं, अभि+आप्+सन् कर्म्मणि क्तः।) वाञ्छितं। अभीष्टं। इत्यमरः॥
("मेने मेनापि तत्सर्व्वं पत्युः कार्य्यमभीप्सितं"।
इति कुमारसम्भवे।)

अभीरः, पुं, (अभीरयति वा अभिमुखीकृत्य गोरं ईरयति, अभि+ईर+णिच्+अच्।) आभीरः। गोपः। इत्यमरटीकायां रमानाथः॥

अभीरुः, पुं, (भी+कर्त्तरि क्रौत्पत्ये क्रुः ततो नञ्समासः।) भैरवः। यथा,—
"अभीरुर्भैरवो भीरुर्भूतपो योगिनीपतिः"।
इति बटुकस्तवराजः॥ निर्भये त्रि॥ (निर्भीकः। साहसी। निष्ठुरः। "स्वार्थे दृष्टे च क्रूरभावे रौद्रकर्म्मणि"। इति मनुः।)

अभीरुः, स्त्री, (भी+कर्त्तरि क्रु, क्रौत्पत्ये, नञ्समासः।) शतमूली। इत्यमरः।

अभीरुपत्री, स्त्री, (भी+कर्त्तरि क्रु, क्रौत्पत्ये, नञ्समासः, वा छिदा ऊरु, ...) शतमूली। इत्यमरः॥

अभीशुः, पुं, (अभि+अश्+उ, ... पृषोदरादित्वात् दीर्घः।) प्रग्रहः। रश्मिः। इति अमरः। ("... ...

यथा स रश्मिं सुसंस्कृता अभीशवः"। इति वचनम्। वेदेऽस्य प्रचुरप्रयोगः॥ किरणः। इति हलायुधः॥

अभीशुः, स्त्री, (अभितः अश्नुते व्याप्नोति, अभि+अश्+कर्त्तरि उन्, पृषोदरादित्वात् अभोभो दीर्घः।) अङ्गुलिः। वेदेऽस्य प्रचुरप्रयोगः॥

अभीषङ्गः, पुं, (अभि+सन्ज+घञ्, दीर्घः।) आक्रोशः। इत्यमरः॥

अभीषुः पुं, (अभि+इष्+उ।) किरणः। इत्यमरः॥ कामः। अनुरागः। इति शब्दरत्नावली॥

अभीष्टं, त्रि, (अभि+इष्+कर्म्मणि क्तः।) वाञ्छितं। तत्पर्य्यायः। अभीप्सितं २ हृद्यं ३ दयितं ४ वल्लभं ५ प्रियं ६। इत्यमरः॥
("प्राप्यायथाकामोऽभीष्टा भूतानामपि ते तथा"।
इति हितोपदेशः।
"अभीष्टायामभूद्भ्राता पितुरत्यन्तवल्लभः"।
इति विष्णुपुराणं।)

अभीष्टा, स्त्री, (अभि+इष्+क्त, स्त्रियां टाप्।) रेणुकानामगन्धद्रव्यं। इति शब्दचन्द्रिका॥
("ताम्बूलवल्ली ताम्बूली नागवल्ल्यथ द्विजा।
हरेणु रेणुका कौन्ती कपिला भस्मगन्धिनी॥
ताम्बूल्या कटुकाभीष्टा देवाभीष्टा महाशया"।
इति शब्दचन्द्रिका।)

अभीक्ष्णं, क्ली, (क्षणमभिगतं, प्रादिसमासः पृषोदरादित्वात् दीर्घः षत्वञ्च।) भृशं। नित्यं। तद्युक्तक्रिययोऽस्ति। इति मेदिनी॥ (पुनः पुनः। प्रायः। अविरतं। निरन्तरं। "उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमः"। इति माघः॥
"इच्छन्त्यभीक्ष्णं क्षयमात्मनोऽपि
न आतयन्त्यस्त्रकुलस्य लक्ष्मीं"।
इति भट्टिकाव्ये।)

अभीक्ष्णं, अ, (अभि+क्ष्णु तेजने डम्, पृषोदरादित्वात् दीर्घः "स्वरादिनिपातमव्ययम्" इति अव्ययं।) पुनः पुनः। अभ्यासः। इत्यमरः॥

अभुक्तः, त्रि, (भुज्+भावे क्तः अर्श आद्यच् विद्यमानार्थे, नञ्समासः, वा भुज+कर्म्मणि क्तः, नञ्समासः।) उपवासी। यथा,—
"अभुक्तस्य दिवानिद्रा प्रायशमपि जीर्य्यति"।
इति वैद्यकं। अनुपभोगं वस्तु॥ (भुक्ता भाञ्जया पीता भाव इति मालिनिभाष्यम्। 'नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि'। इति पुराणम्।)

अभूमिः, स्त्री, (न भूमिः, नञ्समासः।) स्थानाभावः। अनाधारः। आश्रयाभावः। यथा। "अभूरभूमिः प्रतिपक्षजन्मनां भियाम्" इति माघः॥ "आभुरभूमिः ... ..." इति नैषधं॥

अभेदः, त्रि, (नास्ति भेदो यस्य सः।) भेदरहितः। अविच्छेदः। यथा,—"अभेदः शिवरामयोः" इति पुराणं॥ (तादात्म्यम्।
"काकः कृष्णः पिकः कृष्णः अभेदः पिककाकयोः।
वसन्ते समुपयाते काकः काकः पिकः पिकः"॥
इति नीतिरत्ने। "भेदेऽप्यभेदः सम्बन्धे सम्बन्धार्थविवर्तेः"। इति साहित्यदर्पणे।)

अभेद्यं, क्ली, (भेत्तुं न शक्यते, भिद्+ण्यत्, नञ्समासः।) हीरकं। इति। अभेदनीयवस्तुनि त्रि। यथा,—
"अस्ताणनेकरूपाणि तदाभेद्य ..."।
इति देवीमाहात्म्यं॥

अभोजनं, क्ली, (भुज्+भावे ल्युट्, नञ्समासः।) भोजनाभावः। उपवासः। यथा,—
"अजीर्णे भोजनं येषां जीर्णे येषामभोजनम्।
... ... तेषां ... ..."।
इति वैद्यकं॥ (अनशनं।
"वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्"।
इति मलमासतत्त्वं।)

अभ्यर्णं, त्रि, (अभिमुखमर्णं यस्य तत्।) निकटं। इत्यमरः॥

अभ्यङ्गः, पुं, (अभि+अन्ज+घञ् कुत्वं।) तत्पर्य्यायः। स्नेहनं २। इति। यथा,—
"तैलमत्स्य ... ...
... ...
... ...
... ..."
इत्यायुर्वेदः॥ ... ... कफवातकफ्रिलं। धातुपुष्टिकरं। प्रदलश्च। पादाभ्यङ्गगुणाः। पादशैत्यनाशित्वम् ॥ ... ...॥ इति राजवल्लभः॥ ...॥ ...
"मूर्द्धि दत्तं यदा तैलं भवेत् सर्व्वाङ्गव्याप्तम्
स्रोतोभिस्तर्पयेद्बाह्य स अभ्यङ्ग उदाहृतः"
तत्पर्य्यायः। अभ्यञ्जनं २। इति वैद्यकं॥ ... इति भाषा।

अभ्यङ्गः, पुं, (अभि+अन्ज+घञ्, ...) तिलकल्कः। इति ...

अभ्यञ्जनं, क्ली, (अभि+अन्ज+ल्युट्) तैलं। इति हेमचन्द्रः॥ अभ्यङ्गः। (निर्वचनं ॥ (तैलादिना शिरःप्रभृतिषु मर्दनं।
"भोजनाभ्यञ्जनाद्दानात् यदन्यत् कुरुते तिलैः
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति"।
इति मनुः।)

अभ्यन्तरं, क्ली, (अन्तरमभिगतं प्रादिसमासः।) मध्यं। तत्पर्य्यायः। अन्तराल २। अन्तः ३ अन्तरं ४ अन्तरालकं ५। इति। निर्वचनं॥
("प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ"।
इति भगवद्गीता।)

अभ्यमित, त्रि, (अभि+अम्+क्त।) इत्यमरः॥

अभ्यमित्रीणः, पुं, (अमित्रमभिमुख ... समासः, ...) ... ... अभ्यमित्र्यः। इत्यमरः।

मि रामसौमित्री मृगौ भूत्वा मृगयुवौ ।
सम्भमित्रीणो यथेष्टं लब्ध सन्तु” ॥
भट्टिः ।)

...यः, पुं, (अभिमित्रस्य शत्रोरभिमुखं यथा-
..., अभ्यमित्रमलङ्गामीत्यधिकारे अभ्यमित्र
तस्य ईयः ।) अभ्यमित्र्यः । इत्यमरः ॥

..., पुं, (अभ्यमित्र + पूर्ब्बवत् यत् ।) ससा-
मेन शत्रुसम्मुखगमनकर्त्ता । युद्धस्थले
म्मुखगामी । तत्पर्य्यायः । अभ्यमित्रीयः २
मित्रीणः ३ । इत्यमरः ॥
“...तनिशातासिं प्रत्यवाच जिजीविषुः ।
योऽनुगयंस्त्वासादभ्यमित्र्योभवामि ते” ॥
भट्टिकाव्ये ।)

..., त्रि, (अभि + अर्द्द + क्तः, आविदूर्य्ये इड-
भावश्च ।) निकटं । इत्यमरः । (आसन्नः ।
...वर्त्ती । “तीव्रः स्मरसन्तापो न तथादौ बा-
धयासन्ने । तपति प्रावृषि नितरामभ्यर्ण-
गमो दिवसः” । इति रत्नावली । “उपान्तां
...तः न कैश्चिदाश्रमाभ्यर्णभूमयः परिक्रा-
...” । इति महावीरचरिते । समीपं । सन्नि-
। अन्तिकं । “अभ्यर्णे परिरभ्य निर्भरमुरः
यथा राधया” । इति गीतगोविन्दे ।)

...र्थनं,क्ली,(अभि + अव + क्षम् + भावे ल्युट् ।)
...दिकृत्याटनं । तत्पर्य्यायः । निर्हारः २ ।
...रः ॥

...न्दः, पुं, (अभि + अव + स्कन्द + घञ् ।)
...मीकरणाय शत्रुभिर्दीयमानः प्रहारः ।
...र्य्यायः । अभ्यासादनं २ प्रमातः ३ धाटी ४ ।
हेमचन्द्रः ॥

...न्दनं, क्ली, (अभि + अव + स्कन्द + भावे
...ट्) निःशालीकरणाय शत्रुभिर्दीयमानः प्रहारः ।
सम्मुखागमनं । इत्यमरभरतौ ॥

...हारः, पुं, (अभि + अव + हृ + भावे घञ् ।)
...णं । आहारः । इति हेमचन्द्रः ॥

...हृतं, त्रि, (अभि + अव + हृ + क्तः ।) भुक्तं ।
...दितं । इत्यमरः ॥

...नं, क्ली, (अभि + अस + ल्युट् ।) अभ्यास-
...णं । पौनःपुन्येन करणं विस्तरश्च । यथा,—
...तदभ्यासोऽभ्यसनेऽन्तिके” । इति मेदिनी ॥
...भ्यासः । पौनःपुन्येनैकक्रियाकरणं । पुनःपुनः
...वर्त्तनम् ।
...वदामभ्यसनेनैव प्रसादयितुमर्हसि” ।
...ति मनुः ।
...[illegible] तव [illegible]” ।
...ति गीता ।)

...या, स्त्री, (अभ्य उदकादि [illegible], [illegible]-
...[illegible] + भावे अ [illegible] ।) [illegible] ।
...[illegible] । यथा । “[illegible]
...” । इत्यमरटीकायां भरतः ॥ (“[illegible]
...[illegible]” ।
...ति भट्टिकाव्ये” । ईर्षा । [illegible] । [illegible]-
...[illegible] ।

“केनाभ्यसूया पदकाङ्क्षिणा ते ।
नितान्तदीर्घैर्जनिता तपोभिः” ।
इति कुमारसम्भवे ॥
“प्रत्याख्यातस्त्वयि करुणधि स्यादनल्पाभ्यसूयः” ।
इति मेघदूते ।)

अभ्याकाङ्क्षितं, क्ली, (अभि + आ + काङ्क्ष + भावे
क्तः, इदितान्नुम् ।) मिथ्याभियोगः । इति शब्द-
रत्नावली ॥ मिछादाबीया इति भाषा ।

अभ्याख्यानं, क्ली, (अभि + आ + ख्या + ल्युट् ।)
मिथ्याभियोगः । मिथ्याविवादः ।शतं मे धारय-
सीत्यादि मिथ्योद्भावनं । इत्यमरभरतौ ॥

अभ्यागतः, पुं, (अभि + आ + गम् + कर्त्तरि क्तः ।)
अतिथिः । इति हेमचन्द्रः ॥ “स च ज्ञातपूर्व्व-
स्त्वभ्यागतः” इति श्रीधरस्वामी ॥
“बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।
तस्य पूजा विधातव्या सर्व्वत्राभ्यागतो गुरुः” ॥
इति हितोपदेशे ।)

अभ्यागमः,पुं, (अभि + आ + गम् + अप् ।) समीपं ।
मारणं । युद्धं । वैरं । अभ्युत्थानं । इति विश्वः ॥
(घातः । प्रहारः । शत्रुता । विरोधः । समीपं ।
अन्तिकं । सन्निधानं ।
“अभ्यागमो विरोधाभिघाताभ्युद्गमनान्तिके” ।
इति मेदिनी ॥ सम्मुखागमनं । उपस्थितिः ।
“का त्वं शुभे कस्य परिग्रहो वा
किं वा मदभ्यागमकारणं ते” ।
इति रघुवंशे ।)

अभ्यागारिकः, त्रि, (अभ्यागारे तद्गतकर्म्मणि व्या-
पृतः, ठन् तस्य इकः ।) कुटुम्बव्यापृतः । पुत्र-
दारादिपोषणव्यग्रः । इत्यमरः ॥

अभ्यादानं, क्ली, (अभि + आ + दा + भावे ल्युट् ।)
आरम्भः । इत्यमरः ॥ प्रथमारम्भः । इति राय-
मुकुटः ॥

अभ्यान्तः, त्रि, (अभि + आ + अम + कर्त्तरि क्तः
इडभावः, पक्षे अभ्यामितः ।) रोगी । इत्यमरः ॥

अभ्यामर्दः, पुं, (अभ्यामर्द्यतेऽत्र, अभि + आ + मृद्
+ आधारे घञ् ।) संग्रामः । इत्यमरः ॥

अभ्याशः, त्रि, (आभिमुख्येनाश्नुते व्याप्यतेऽनेन,
अश् व्याप्तौ करणे घञ् ।) समीपं । इत्यमरटी-
कायां रायमुकुटः ॥

अभ्यासः, पुं, (आभिमुख्येनास्यते क्षिप्यते, असु क्षेपे
कर्म्मणि घञ् ।) अभ्यसनं । आवृत्तिः । इति मे-
दिनी ॥ खुरल्याभ्यासः । तत्पर्य्यायः । खुरली २ योग्या
३ । इति त्रिकाण्डशेषः । समीपे त्रि । इत्यमरः ।
[illegible] बाह्ये वा प्रतिमादावाभ्यन्त-
रर्भ्यतः समाहृत्य पुनः पुनः स्थापनमभ्यासः ॥
यथा,—
“अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय” ।
इति भगवद्गीतायां श्रीकृष्णः ॥

अभ्यासादनं, क्ली, (अभि + आ + सद् + णिच् +
ल्युट्) निःशालीकरणाय शत्रुभिर्दीयमानः प्रहारः
शत्रुसम्मुखगमनं । इत्यमरभरतौ ॥

अभ्याहारः, पुं, (अभि + आ + हृ + भावे घञ् ।)

अभिहारः । चौर्य्यं । इत्यमरटीका ॥ (अभि-
ग्रहणं । भोजनं । आहारः ।)

अभ्युत्थानं, क्ली, (अभि + उत् + स्था + भावे ल्युट् ।)
गौरवं । इति हेमचन्द्रः ॥ आसनादेरुत्थानं ।
यथा,—
“यदा यदा च धर्म्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहं” ॥
इति श्रीभगवद्गीता ॥ (ख्यातिः । कीर्त्तिः । यशः ।
गौरवेणोत्थानादिना प्रत्युद्गमनं । “अलमलम-
भ्युत्थानेन, ननु सर्व्वस्याभ्यागतो गुरुरिति भवाने-
वास्माकं पूज्यः” । इति नागानन्दः ।
“नाभ्युत्थानं क्रिया यत्र नालापा मधराक्षराः ।
गुणदोषकथा नैव तस्य हर्म्ये न गम्यते” ॥
इति पञ्चतन्त्रे । अभ्युदयः । अभ्युन्नतिः ।
“नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः” ॥
इति रघुवंशे । सूर्य्योदयः । उदयः । उद्भवः ।)

अभ्युदयः, पुं, (अभि + उत् + इन् + अच् ।) इष्ट-
लाभः । विवाहादिः । इति आभ्युदयिकशब्दार्थे
श्राद्धतत्त्वं ॥ सर्व्वतोभावेनोदयः । यथाऽङ्गजनादि-
वृद्धिः । यथा,—
“राजन्नभ्युदयोऽस्तु बल्लनकवे हस्ते किमास्ते तव
श्लोकः कस्य कवेरमुष्य सुतिनस्तत् पठ्यतां पठ्यते ।
किञ्चासामरविन्दसुन्दरदृशां दाक्षायमरान्दोलना-
दुद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः क्षणं वार्य्यतां” ॥
इत्यस्य पूर्व्वार्द्धं बल्लनकविकर्णाटराजयोर्वाक्यं
शेषार्द्धं कालिदासस्य ॥ (उन्नतिः । समृद्धिः ।
“विपदि धैर्य्यमथाभ्युदये क्षमा सदसि वाक्पटुता
युधि विक्रमः” । इति हितोपदेशे । पराक्रमः ।
वीर्य्यं । प्रभावः । “यद्बाहुदण्डाभ्युदयानुजीविनो
यदुप्रवीराः” । इति भागवतपुराणं ।)

अभ्युदितः,त्रि, (अभि + उत् + इन् + क्तः ।) यस्मिन्
सुप्ते सूर्य्य उदेति सः । सूर्य्योदयकालशायी ।
इत्यमरः ॥ उदयप्राप्तः । यथा,—
“माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ ।
ब्रह्मघ्नमपि पाताले किं पतन्तं पुनीमहे” ॥
इति तिथ्यादितत्त्वं ॥ (अभितः सर्व्वतः उदति-
प्रदेश इतं गतं प्रातर्विहितं कर्म्मःस्मादिति यत्र-
पक्षा सूर्य्योदयकाले निद्रया अननुष्ठितत्रालो-
चितक्रियाकलापः ।)

अभ्युपगतः, त्रि, (अभि + उप + गम् + क्तः ।) स्वी-
कृतः । अङ्गीकृतः । इति हेमचन्द्रः ॥
(“प्रियाभ्युपगते गार्थे मादृशा सधुरस्य ।
[illegible] किं मम दुष्कृतं” ॥
इति महाभारते । समीपागतः । [illegible]-
स्मागतः । अनुमितः । [illegible] । [illegible]-
तया [illegible] । [illegible] । [illegible] ।)

अभ्युपगमः, पुं, (अभि + उप + गम् + भावे अप् ।)
स्वीकारः । इत्यमरः ॥ निकटागमनं । इति
मेदिनी ॥ (अङ्गीकार । प्रतिज्ञा । “[illegible]
[illegible]
[illegible]” इति [illegible] । [illegible]-
[illegible] । [illegible]

"सर्व्वदोषानभिव्याहारादाम्नायसमतां गताः ।
युद्धाकमभ्युपगमाः प्रमाणं पुण्यपापयोः" ।
इति महावीरचरिते ।)

अभ्युपपत्तिः, स्त्री, (अभि+उप+पद्+क्तिन् ।) अनुग्रहः । इत्यमरः ॥ (अनिष्टनिवारणपूर्व्वकाभीष्टसम्पादनरूपोऽनुग्रहः । प्रसादः । "तदर्हस्याभ्युपपत्त्या जीवितमस्या अवलम्बितुम्" । इति शाकुन्तले । रक्षा । परित्राणं ।
"कामिनीषु विवाहेषु गवामभक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्" ।
इति मनुः ।)

अभ्युपायः, पुं, (अभि+उप+इण्+भावे अच् ।) अङ्गीकारः । स्वीकारः । इति हेमचन्द्रः ॥ उपायः । यथा । "तत्प्रीतिरथितिकरे क इहाभ्युपायः" । इति काव्यप्रकाशः ॥ (कौशलं ।
"यदैकैकभ्युपायैस्ते निघ्नोसन्ति स्म पाण्डवान्" ।
"निपुणेनाभ्युपायेन नगरं वारणावतं" ।
"निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु" ।
इति महाभारते ।)

अभ्युपायनं, क्ली, (अभि+उप+इण्+ल्युट् ।) उपायनं । उपढौकनद्रव्यं । यथा,—
"तावानय समं गोभिर्नन्दाद्यैः साभ्युपायनैः" ।
इति श्रीभागवतं ॥

अभ्युपेतं, त्रि, (अभि+उप+इण्+कर्म्मणि क्तः ।) स्वीकृतं । उपगतं । यथा,—
"अक्षममभ्युपेतस्वामर्षिभावादिति मे विषादः" ।
इति रघुः ॥ (अङ्गीकृतः ।
"मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः" ।
इति मेघदूते ।)

अभ्युषः, पुं, (अभ्युष्यते अग्निना दह्यतेऽसौ अभि+उष+बाहुलकात् कर्म्मणि कः ।) अभ्यूषः । पौलि । इत्यमरटीकायां भरतः ॥

अभ्यूषः, पुं, (अभि+उष+बाहुलकात् कर्म्मणि कः ।) ईषदग्निपक्वकलायादिः । अर्द्धपाकद्रव्यमर्य्यादिः । वह्निना ईषद्दग्धः चुट चुट शब्दवान् इति केचित् । हुडुम इति श्रीधरः ॥ तत्पर्य्यायः । आवहं २ पौलिः ३ । इत्यमरः ॥ अभ्युषः ४ अभ्योषः ५ । इति भरतः ॥ * ॥ पोलिका । रोटी इति हिन्दी । अस्य गुणाः । मधुरत्वं । गुरुत्वं । रोचकत्वं । बलकारित्वं । शुक्रवृद्धिकारकत्वं । पित्तवातहरत्वञ्च ॥ * ॥ अङ्गारपक्वानामस्या गुणाः । अग्निदीपनत्वं । वातवृद्धिकारित्वं । लघुत्वं । बलकारित्वञ्च ।
"[illegible]" ।
इति शार्ङ्गधरः । [illegible] । यथा,—
"[illegible]
अभ्यूषोऽपि च [illegible]" ॥
इति [illegible] ॥

अभ्योषः, पुं, (अभ्युष्यते अग्निना दह्यतेऽसौ, अभि+उष+कर्म्मणि घञ् ।) अभ्यूषः । इत्यमरटीका-[illegible] ॥
[illegible] । इति शब्दकल्पद्रुमः ॥ [illegible]

र्य्यायः । अभ्रति । इति दुर्गादासः ।

अभ्रं, क्ली, (अपो बिभर्त्तीति अप+भृ+क ।) मेघः । आकाशं । स्वर्णं । अभ्रकधातुः । इति मेदिनी ॥ उपधातुविशेषः । तस्योत्पत्तिनामलक्षणगुणाः ।
"पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतं ।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः ॥
ते निपेतुर्घनध्वानाच्छिखरेषु महीभृतां ।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकं ॥
तद्वज्रं वज्रजातत्वादभ्रमभ्ररवोद्भवात् ।
गगनाद्दलितं यस्माद्गगनञ्च ततो मतं ॥
विप्रक्षत्रियविट्शूद्रभेदात्तत् स्याच्चतुर्व्विधं ।
क्रमेणैव सितं रक्तं पीतं कृष्णञ्च वर्णतः ॥
प्रशस्यते सितं तारे रक्तं तत्तु रसायने ।
पीतं हेमनि कृष्णन्तु गदेषु द्रुतयेऽपि च ॥
पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्व्विधं ।
मुञ्चत्यग्नौ विनिःक्षिप्तं पिनाकं दलसञ्चयं ॥
अज्ञानाद्भक्षणात्तस्य महाकुष्ठप्रदायकं ।
दर्दुरं त्वग्निनिःक्षिप्तं कुरुते दर्दुरध्वनिं ॥
गोलकान् बहुशः कृत्वा स स्यान्मृत्युप्रदायकः ।
नागन्तु नागवद्वह्नौ फुत्कारं परिमुञ्चति ॥
तद्भक्षितमवश्यन्तु विदधाति भगन्दरं ।
वज्रन्तु वज्रवत्तिष्ठेत्तन्नाग्नौ विकृतिं व्रजेत् ॥
सर्व्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ।
अभ्रमुत्तरशैलोत्थं बहुसत्त्वं गुणाधिकं ॥
दक्षिणाद्रिभवं स्वल्पसत्त्वमल्पगुणप्रदं" ॥ * ॥
मारिताभ्रगुणाः ।
"अभ्रं कषायं मधुरं सुशीत-
मायुष्करं धातुविवर्द्धनञ्च ।
हन्यात्त्रिदोषं व्रणमेहकुष्ठं
प्लीहोदरग्रन्थिविषक्रिमींश्च ॥
रोगान् हन्ति द्रढयति वपुर्वीर्य्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव ।
दीर्घायुष्कान् जनयति सुतान् विक्रमैः सिंहतुल्यान्
मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रं" ॥ * ॥
अशोधिताभ्रदोषाः ।
"पीडां विधत्ते विविधां नराणां
कुष्ठं क्षयं पाण्डुगदञ्च शोथं ।
हृत्पार्श्वपीडाञ्च करोत्यशुद्ध-
मभ्रं त्वशिद्धं गुरुतापदं स्यात्" ॥ * ॥
अभ्र शोधनविधिर्यथा ।
"कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिःक्षिपेत् ।
भिन्नपत्रन्तु तत् कृत्वा तण्डुलीयाम्लकेऽद्रवैः ॥
भावयेदष्टयामं तदेवमभ्रं विशुध्यति" ॥ * ॥
तस्य मारणं यथा ॥
"कृत्वा धान्याभ्रकं तत्तु शोषयित्वाथ मर्द्दयेत् ।
अर्कक्षीरैर्दिनं खल्वे चक्राकारं कारयेत् ॥
वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत् ।
पुनर्मर्द्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः ।
ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयं ।
म्रियते नात्र सन्देहः प्रयोज्यं सर्व्वकर्म्मसु ॥
मृतं द्रुतं मलाभेन [illegible] विपाचयेत् ।

इति भौमिं तदभ्रन्तु सर्व्वयोगेषु योजयेत्" ॥
तत्र धान्याभ्रस्य विधिः ।
"पादांशशालिसंयुक्तमभ्रं बद्ध्वा तु कम्बले ।
त्रिरात्रं स्थापयेन्नीरे तत् क्लिन्नं मर्द्दयेत् करैः ॥
कम्बलाद्गलितं सूक्ष्मं वालुकारहितञ्च यत् ।
तद्धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये" ॥
इति भावप्रकाशः ॥

अभ्रंलिहः, पुं, (अभ्रं लेढि स्पृशति, अभ्र+कर्त्तरि खश्, मुमागमः ।) वायुः । इति [illegible] (मेघस्पर्शी । अत्युच्चः ।
"अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः" ।
इति मेघदूते ।)

अभ्रकं, क्ली, (अभ्र गतौ+ण्वुल्, [illegible]) स्वनामख्यातधातुः । अभ्र इति भाषा । तत्पर्य्यायः । गिरिजं २ अमलं ३ । गिरिजामलं ४ गौरीमलं ५ । इति [illegible] गिरिजाबीजं ६ गरुडध्वजं ७ । इति [illegible] शुभ्रं ८ । इति जटाधरः ॥ घनं ९ [illegible] अब्दं ११ । इति रत्नमाला ॥ अभ्रं १२ [illegible] अम्बरं १४ अन्तरीक्षं १५ आकाशं [illegible] पत्रं १७ खं १८ अनन्तं १९ गौरीतेजः [illegible] जेयं २१ । इति राजनिर्घण्टः ॥ [illegible] रसायनत्वं । स्निग्धत्वं बलदत्वं । इति राजवल्लभः ॥ अपि च । गुरुत्वं । बलदत्वं । कुष्ठमेहत्रिदोषनाशित्वञ्च ॥ [illegible] विधं यथा,—
"श्वेतं पीतं लोहितं नीलमभ्रं
चातुर्व्विध्यं याति भिन्नक्रियार्थे ।
श्वेतं तारे काञ्चने पीतरक्ते
नीलं व्याधिध्वंसने स्याद्गुणाढ्यं" ।
इति मदनविनोदः ॥
("अभ्रकस्तव बीजन्तु मम बीजन्तु [illegible]
अनयोर्मेलनं देवि मृत्युदारिद्र्यनाशनं" ।
इति चक्रदत्तः ।)

अभ्रङ्कषः, पुं, (अभ्रमाकाशं कषति [illegible] अनेकार्थत्वात् अभ्र+कष्+खच्+मुम् ।) इति पाणिनिः ॥ (मेघस्पर्शी । अभ्रंलिहः ।
"सर्व्वर्तुयशःशाखं रामकल्पतरुं [illegible] ।
आरोहाभ्रङ्कषं प्रायात्कपिर्वनं [illegible]" ।
इति भट्टिकाव्ये ।)

अभ्रपिशाचः, पुं, (अभ्रे आकाशे पिशाच इव छायाग्राहकत्वेन नीलवर्णतया [illegible]) राहुग्रहः । इति त्रिकाण्डशेषः ।

अभ्रपिशाचकः, पुं, (अभ्रे पिशाच इव [illegible]) राहुग्रहः । इति शब्दरत्नावली ।

अभ्रपुष्पं, क्ली, (अभ्रं मेघ एव [illegible] निदानं यस्य तत्, तस्य मेघस्य [illegible]) जलं । यथा,—
"अभ्रपुष्पमपि दित्सति शीतं
सार्थिना विमुखता यदभाजि [illegible]"

, पुं, (अभ्रमिव शुभ्रं पुष्पं यस्य सः ।)
वृक्षः । इत्यमरः ॥

त्रि, (न भ्रमः भ्रान्तिः, नञ्समासः ।)
ाभावः ।) भ्रमरहितः । अभ्रान्तः । नास्ति
यस्येति बहुव्रीहिः ॥

सी, स्त्री, (अभ्रमिव जटायां मांसमस्याः
गौरादित्वात् ङीष् ।) आकाशमांसीलता ।
राजनिर्घण्टः ॥ (जटामांसी ।)

ङ्गः, पुं, (अभ्रस्य मेघस्य अधिष्ठाता
ङ्गः, शाकपार्थिवादित्वात् समासः, मध्यमद-
य ।) ऐरावतः । इन्द्रहस्ती । इत्यमरः ॥
व समुद्रजातः पूर्व्वदिग्गजः ।)

ला, स्त्री, (अभ्राणां माला श्रेणी, षष्ठीतत्-
ः ।) मेघश्रेणी । मेघसमूहः । इति हला-
॥ (घनघटा । कादम्बिनी ।)

, स्त्री, (न भ्राम्यति, भ्रम + उत्, नञ्-
सः, मान्तत्वात् वृद्ध्यभावः ।) ऐरावतस्त्री ।
पूर्व्वदिग्हस्तिनी । इत्यमरः ॥

प्रियः, पुं, (अभ्रमोः पूर्व्वदिक्हस्तिन्याः प्रियः ।)
ावतहस्ती । इति हेमचन्द्रः ॥ (अभ्रमातङ्गः ।)

वल्लभः, पुं, (अभ्रमोः वल्लभः प्रियः ।) ऐरा-
हस्ती । इत्यमरः ॥

हं, स्त्री, (अभ्रात् मेघात् रोहः जन्म यस्य
, तस्य मेघशब्दोत्पन्नत्वात् तथात्वं ।) वैदूर्य्य-
णिः । इति राजनिर्घण्टः ॥

टिकः, पुं, (अभ्रस्येव वाटी वक्रता यस्याः सा,
रासान्तः कः, कसः ।) आम्रातकः । इति
जनिर्घण्टः ॥

न्तः, त्रि, (भ्रम् + कर्त्तरि क्तः, नञ्समासः ।)
ान्तिशून्यः । यथा ।
यामाः क्रिया विशुद्धास्ते तेषां वाक्यमसंशयम्"
च "यतोऽभ्रान्तबुद्धयः" । इति चरकटीका-
रः ॥ (यथार्थज्ञानयुक्तः । भ्रमणशून्यः ।
रस्य ।)

ः, स्त्री, (अपो बिभर्त्ति, नौकामार्ज्जनार्थं धार-
ति, अप् + भृ + कर्त्तरि क्विः ।) काष्ठकुद्दालः ।
ौकामार्ज्जनार्थकुद्दालाकृतिकाष्ठं । इत्यमरः ॥
तीक्ष्णाग्रो लौहदण्डः ।
अभ्रिं कार्ष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः",
ति मनुः ।)

यः, त्रि, (अभ्रे भवः, अभ्र + घ तस्य इय ।)
अभ्रोद्भववस्तु । तत्पर्य्यायः । मेघभवः २ । इत्य-
रः । (घनसम्भूतः । विद्युत् । मेघजलं । वर्षं ।
कुलिशं ।)

ी, स्त्री, (अभति गच्छति अभ्र + इन्,
कृदिकारादिति पक्षे ङीष् ।) काष्ठकुद्दालः ।
इत्यमरटीकायां भरतः ॥

षः, पुं, (भ्रेष् चलने + घञ्, नञ्समासः ।)
उचितः । न्यायः । इत्यमरः ॥

नोत्थं, स्त्री, (अभ्रात् मेघात् उत्तिष्ठति उद्भवति,
अभ्र + उत् + स्था + क ।) वर्षं । इति त्रिकाण्ड-
शेषः ॥

अम क रोगे । क आमयति व्याधितोकं । इति
दुर्गादासः ॥

अम गतौ । भजने । शब्दे । अमति । इति दुर्गा-
दासः ॥

अम्, व्य, (अम् + क्विप्, स्वरादित्वादव्ययत्वमस्य ।)
शीघ्रता । अल्पं । इति व्याडिः ॥

अमं, त्रि, (अम् + भावे घञ्, मान्तत्वान्न वृद्धिः,
अमो रोगो विद्यते अस्मात्, अर्शआद्यच्,
प्रायेण अपक्वफलभक्षणेन रोगोत्पत्तेरस्य तथात्वं ।)
अपक्वफलादि । इति शब्दरत्नावली ॥ रोगे पुं ।
इति मुग्धबोधव्याकरणं ॥

अमङ्गलं, क्ली, (नास्ति मङ्गलं शुभं यस्मात् तत् ।)
अशुभसूचकं । तद्यथा,—
"सार्द्धं सैन्यसमूहैश्च वाद्यभाण्डैरसङ्ख्यकैः ।
ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ॥
ययौ तथापि समरं न जगाम गृहं पुनः ।
मुक्तकेशीं छिन्ननासां रुदन्तीञ्च दिगम्बरां ॥
छायावस्त्रपरीधानामपरां विधवामपि ।
मुखदुष्टां योनिदुष्टां व्याधियुक्ताञ्च कुट्टिनीं ॥
पतिपुत्त्रविहीनाञ्च डाकिनीं पुंश्चलीमपि ।
कुम्भकारं तैलकारं व्याधं सर्पोपजीविनं ॥
कुचेलमतिरूक्षाङ्गं नग्नं काषायवासिनं ।
अङ्गविक्रयिणञ्चैव कन्याविक्रयिणं तथा ॥
चितां दग्धशवं भस्म निर्व्वाणाङ्गारमेव च ।
सर्पदष्टनरं सर्पं गोधाञ्च शशकं विषं ॥
आक्रन्दनञ्च पितृणां मोटकं वानरं तथा ।
देवलं वृषवाहञ्च शूद्रश्राद्धान्नभोजिनं ॥
शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकं ।
कुशपुत्तलिकाञ्चैव शवदाहनकारिणं ॥
शून्यकुम्भं भग्नकुम्भं तैलं लवणमस्थि च ।
कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणं ॥
दक्षिणे च शृगालञ्च कुर्व्वन्तं भैरवं रवं ।
कपर्द्दकञ्च चौरञ्च छिन्नकेशं नखं मलं ॥
कलहञ्च विलापञ्च विलापकारिणं जनं ।
अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणं ॥
मिथ्यासाक्षिप्रदातारं चौरञ्च नरघातिनं ।
पुंश्चलीपतिपुत्त्रञ्च पुंश्चल्योदनभोजिनं ॥
देवतागुरुविप्राणां वस्तुवित्तापहारिणं ।
दत्तापहारिणं दस्युं हिंसकं सूचकं खलं ॥
पितृमातृविरक्ताञ्च द्विजाश्वत्थविघातिनं ।
सत्यघ्नञ्च कृतघ्नञ्च स्थाप्यापहारिणं जनं ॥
विश्वद्रोहं मित्रद्रोहं धूर्तं विश्वासघातकं ।
गुरुदेवद्विजानाञ्च निन्दकं स्वाङ्गघातकं ॥
जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्द्दयं ।
व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकं ॥
गलितव्याधिगात्रञ्च काणं वधिरमेव च ।
पुक्कसं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा ॥
छिन्नं वमन्तं रुधिरं महिषं गर्दभं तथा ।
मूत्रं पुरीषं श्लेष्माणं कथिनं नरकपालिनं ॥
झञ्झावातं रक्तवृष्टिं वात्याञ्च वृक्षपातनं ।
वृकञ्च शूकरं गृध्रं श्येनं कङ्कञ्च भल्लुकं ॥
पाशञ्च शुष्ककाष्ठञ्च बादसं गन्धकं तथा ।
अग्रदानिब्राह्मणञ्च तन्त्रमन्त्रोपजीविनं ॥
वैद्यञ्च रक्तपुष्पञ्चैवौषधं तुषमेव च ।
कुवार्त्तां श्रवत्वार्त्ताञ्च विप्रशापञ्च दारुणं ॥
दुर्गन्धवातं दुःशब्दं राजा संप्राप वर्त्मनि ।
मनश्च कुत्सितं प्राणाः क्षुभिताश्च निरन्तरं ॥
वामाङ्गस्पन्दनं देहजातं राज्ञो बभूव ह ।
तथापि राजा निःशङ्को ददर्श दर्शमङ्गलं" ॥
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥

अमङ्गलः, पुं, (नास्ति मङ्गलं यस्य) एरण्डवृक्षः ॥
इति शब्दचन्द्रिका ॥

अमङ्गलः, त्रि, (न मङ्गलः, नञ्समासः ।) मङ्गल-
शून्यः । अकुशलः । यथा । "अमङ्गलं रूपमिदं
दधत् कथं" । इति विद्वन्मोदतरङ्गिणी ॥ मङ्गला-
भावे क्ली । यथा । "अमङ्गलाभ्यासरतिं विचिन्त्य
तं" । इति कुमारसम्भवः ॥

अमङ्गल्यः, त्रि, (मङ्गलाय हितः, मङ्गल + यत् ततो-
नञ्समासः ।) अमङ्गलजनकः । यथा,—
"अमङ्गल्यं शीलं तव भवतु नामैवमखिलं" ।
इति पुष्पदन्तः ॥ (अशुभकरः । अशिवसूचकः ।
"देवि ! मैवममङ्गल्यवादिनी भव" । इति नागा-
नन्दः ।)

अमण्डः, पुं, (नास्ति मण्डो भक्तावशिष्टं भूषा वा
यस्य सः ।) एरण्डवृक्षः । इत्यमरः ॥ (मण्डहीन-
भक्तादि । भूषणहीनश्च ।)

अमतः, पुं, (अम् रोगे + अतच्, अथवा मन् +
भावे क्तः, नास्ति मतमभिप्रायो यत्र सः । अथवा
मन् + कर्म्मणि क्तः, नञ्समासः ।) रोगः । मृत्युः ।
कालः । इत्युणादिकोषः ॥

अमतिः, पुं, (अम् + अति ।) कालः । चन्द्रः । इति
मेदिनी ॥ दुष्टे त्रि । इति शब्दरत्नावली ॥
"अमतिः पुंसि काले च दुष्टे हिमकरेऽपि च" ।
इति शब्दरत्नावली । अबुद्धिः । अज्ञानं । अन-
भिसन्धिः ।
"भुक्तातोऽद्गतमस्यान्नममत्या क्षपणं त्र्यहं ।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च" ॥
इति मनुः ।)

अमत्रं, क्ली, (अमति भुङ्क्तेऽन्नमत्र, अम् भोजने
आधारे अत्रन् ।) पात्रं । अस्य भाषा अमित्रि ।
इत्यमरः ॥ (भाजनं । स्थानं । भोजनपात्रं ।)

अमत्सरः, पुं, अन्यशुभद्वेषाभावः । अत्र नञ्समासः ॥
मात्सर्य्यरहिते त्रि । अत्र बहुव्रीहिसमासः ॥

अमनिः, स्त्री, (अमति यात्यत्र, अम + आधारे
अनि ।) वर्त्म । पन्थाः । इत्युणादिकोषः ॥

अमन्दः, पुं, (न मन्दः विरोधे नञ्समासः ।) वृक्षः ।
इति शब्दचन्द्रिका ॥ मन्दभिन्ने त्रि । यथा ।
"एष्वभ्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना-
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु
वः ।" इति श्रीभागवतं ॥ [illegible] घोरः ।
अतिगभीरः ।
"आगुञ्जद्गिरिकुञ्जकुञ्ज [illegible] कर्णज्वरम्
ज्यानिर्घोषममन्द [illegible]
इति उत्तरच [illegible] हमः ।

तथात्वे वर्द्धमानादौ प्रतिमामानुपपत्तेः। एवमेव श्राद्धविवेकः। अतएव तत्रैवामावास्याथविशिष्ट-दृश्यपक्षविहितपार्व्वणश्राद्धे यथासमिति वच-नात् अवसेयमुक्तं। तत्र सामिकर्त्तव्यत्वाविशेषिता-मावास्याव्यतिरेकाभिधानात् क्षीणादिभेदेन अ-वस्था सामिनिरंदिकाधारणीयत्वगम्यते। एवमा-मावास्यायां मृताहनिमित्तक पौरसद्धेनगपुत्त-कर्त्तव्यपार्व्वणे क्षीयमाणादिना न अवस्था किन्तु यथाक्तमित्यनेन। एतदिष्टतं मलमासतत्त्वे ॥०॥

यतु दशममुहूर्त्तस्य मत्स्यपुराणोक्तापराह्णिकत्वेऽपि श्राद्धे तस्य त्यागः। पितृपितृयथार्थं एवेति वासरतृतीयांशाभिधानं सामिपरमेवेति परि-शिष्टप्रकाशोक्तं तन्न युक्तं। पूर्व्वाह्णो वै देवानां मध्यं दिनं मनुष्याणां अपराह्णः पितॄणां इति श्रुत्या तन्मुहूर्त्तस्य मनुष्यकर्म्माङ्गत्वेन बोधनादेव श्राद्धे परित्यागः। एतच्छ्रुतिमूलकमेव वासरस्य तृती-यांश इत्युक्तं। वासरस्य तृतीयांशे त्रिधा विभक्तस्य दिनस्य तृतीयभागे नातिसन्ध्यासमीपत इति सन्ध्यासमीपैकमुहूर्त्तं त्याज्यमपि वर्ज्जनीय इत्यर्थः। तेन।

"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परं।
सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु"।

इति मत्स्यपुराणे निषिद्धमुहूर्त्तानये आपदि मुहूर्त्त-दशमभ्युपगतं अतिप्रसङ्गसरसात्। "त्रिमुहूर्त्तापि कर्त्तव्या पूर्व्वा दर्शा च वह्निभिः"। इति हारीत-वचनाच। तेन पूर्व्वदिने मुहूर्त्तत्रयमानलाभे पर-दिने वासरस्य तृतीयांशलाभे पूर्व्वदिने एव श्राद्धं। एतेन नातिसन्ध्यासमीपत इत्यनेन राक्षसी-वेलामात्रं निषिद्धम् इति मैथिलमतमपास्तं। सर्व्वकर्म्मसु सायाह्नादिष्वपि अनापनीयत्वं। इति श्राद्धविवेकः। तेनापराह्णौ तत्रामपि तत्त्व-र्थं। अतएव यमापरः।

"दिवादर्शे[?]: पूर्व्वं दिवाश्राद्धं प्रशस्यते।
अपराह्णं विद्धि यामं राहोरन्यत्र दर्शनात्"।

इति ॥०॥ एतद्द्वैधे तत्र श्राद्धमित्याह छन्दोग-परिशिष्टे कात्यायनः।

"यदा चतुर्द्दशीयामं तुरीयमनुपूरयेत्।
[...]मावास्या क्षीयमाणा तदैव श्राद्धमिष्यते"।

[...]र्द्दशीयामं चतुर्द्दशीसम्बन्धिदिवसयाममिति त-[...]स्यामावास्यासम्बन्धेऽपि चतुर्द्दशीनिर्द्देशो-[...]देव दर्शेष्टा भवतीति न्यायात्। तेन यदा [...]चतुर्द्दशीसम्बन्धिदिनस्य चतुर्थं प्रहरं [...]त्रिदिवसं वा अनुपूरयेत् व्याप्नुयादे-[...]यात् तुरीयप्रहर पारोपरवादा-[...]मुहूर्त्तं सर्व्वत्राप्तं प्रतीयते। एतेन [...]पराह्णे विधिर्व्वा व्यवस्थापयेद् वा चतु-[...]गीयते। तत्रोपरवनीयदर्शनीया[...]र्द्दशक्षयापराह्णे [...]दिने च [...] सर्व्वे। तत्र [...] इत्येव देवा-

तुदयात्। अतो यद्दिने वासरतृतीयांशे तादृश-दर्शलाभस्तत्रैव श्राद्धं। मुहूर्त्तनिर्द्देशेषु कर्म्मा-नर्हत्वात् द्वैधावसरः। तथा च भविष्ये।

"व्रतोपवासनियमे घटिकैका यदा भवेत्।
सा तिथिः सकला ज्ञेया पित्रर्थे चापराह्णिकी"।

इति। अत्र च प्रागुक्तशातातपवचनोक्ता मुहूर्त्ता-त्मिका घटिका ग्राह्या योग्यत्वात् न त्वेकदण्डा-त्मिका वक्ष्यमाणरौहिण्यादिग्रहणे तथा दृष्ट-त्वाच। ततश्च पूर्व्वोक्तद्वैधे तद्दिवसीयचतुर्द्दश्य-पेक्षया परदिने अमावास्या क्षीयमाणा न्यूनका-लव्यापिनी न तु पूर्व्वापरदिवसीयदर्शचतुर्द्दश्य-पेक्षया अनुपस्थितेः। एवं स्थितावर्द्धमानयो-रपि। तदैव पूर्व्वदर्श एव श्राद्धं। क्षीणचन्द्र-क्षयानुरोधात्। यदा त्रिंशद्दण्डात्मकदिवसे चतु-र्द्दश्यधिकचतुर्थयामपूरणे मुख्यापराह्णीयकिञ्चि-न्न्यूनमुहूर्त्तमात्रदर्शापि तदैवैत्यनेन चन्द्रक्षयानु-रोधात् पूर्व्वदिने श्राद्धं न तु मुख्यापराह्णीय-मुहूर्त्तलाभेऽपि परदिने। अत्र चन्द्रक्षयचतुर्द्दश्य-ष्टमयामात् प्रभृति अमावास्याप्रथमयामपर्य्यन्त-मिति वक्ष्यते। तदैवेत्येव भवत्यादिद्वैधे खण्ड-विशेषो नियम्यते कर्म्मणि खण्डान्तरव्युदासाय। एवञ्च द्वैधे पूर्व्वापरदिने वासरतृतीयांशीयमु-ख्यापराह्णे मुहूर्त्तैकदर्शलाभस्तथापि पूर्व्वदिन एव श्राद्धं वासरतृतीयांशचन्द्रक्षयातिप्रसङ्गसरसात्। त्रिमुहूर्त्तापीत्यनुरोधाच। यत्र तु पूर्व्वदिने त्रि-मुहूर्त्तमात्रव्यापिन्यमावास्या परदिने तृतीयांश-मुहूर्त्तव्यापिनी सती क्षीयमाणा तत्र परदिने चन्द्रक्षयाभावेऽपि मुख्यापराह्णलाभात् श्राद्धम्। अन्यथा,—

"यदा चतुर्द्दशीयामं तुरीयमनुपूरयेत्"।

इति विशेषाभिधानं व्यर्थं स्यात् ॥०॥

अथ "यत्र पूर्व्वाह्णे श्राद्धं तत्र यदहस्त्वेव चन्द्रमा न दृश्येत याममावास्यां कुर्व्वीत" इति गोभिल-विरोधः। तथाविधचतुर्द्दशीयुक्तामावास्याया सिनीवालीत्वेन प्रातश्चन्द्रदर्शनात्। तथाह सएव। "दृष्टं यदहस्त्वेव दर्शनं नेति चन्द्रमा। तत्क्षयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि"। "यदहस्त्वेव चन्द्रमा न दृश्येत याममावास्यां कुर्व्वीत" इति यज्ञोभिलसूत्रं तच्चन्द्रक्षयाभिप्रा-यिकम्। अन्यथा गोभिलीयवाद्दर्शसूत्रान्तरेण अत्र पौनरुक्त्यापत्तेः। तस्मात् प्रथमसूत्रं कुहूपरं तत्र वर्द्धमानापक्षे नियतं। क्षीणास्थितयोस्तु दर्शादेश्यमनुसरणीयम्। एवञ्च "यदहस्त्वेव चन्द्रमा न दृश्येत याममावास्यां कुर्व्वीत" इति श्रुतिरेतत्समानार्थकं सूत्रकारं वा तदपि वर्द्ध-मानादिपरं न तु कात्यायनवचनात्तत्र क्षयपक्षया वचनमस्मृतिनिबन्धादुक्ता।

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसि"।

इति विरोधात्। क्षीण इति कात्यायनेन सदा यत् दृष्टे राजनीयं तदपि क्षयाभिप्रायकम्। अथैव दृश्यमानेऽप्येकेरा इति यज्ञोभिलस्य सूत्रा-र्थं तदर्थम्। "यदहस्त्वेव" इत्यादि द्वितीय-

ावास्या सप्तमयाम इति विशेषः। तेन मार्ग-
ज्यैष्ठयोरुभयदिने चन्द्रक्षयलाभे यद्यपि यदा
[ष्टी]यामिति वचनात् पूर्व्वदिने एव श्राद्धं
ति तथापि तद्वचनं चन्द्रक्षयानुरोधमूल-
। एतत्क्षयानुरोधात् क्षीणायामपि पर-
ाह्नलाभे श्राद्धं अन्यथैतद्विशेषाभिधानं व्यर्थं
[ ] * ॥ अत्रापि विशेषान्तरमाह स एव।
अब्दे द्वादशैवात्र यद्येकस्तृतीयया परि-
 नोपजायेत। यथो मासः। तृतीयया
या चतुर्थभागोनकलया परिदृश्यचन्द्रो न
त किन्तु तदधिकन्यूनकलयेति। तेन मल-
युताब्दे अन्यमासवदनयोरपि चतुर्दश्यन्तया-
दर्शसप्तमयामपर्य्यन्तं क्षय इति। मलमास-
ब्दन्तु एकस्मान्मलमासादब्दद्वयानन्तराब्द-
येऽब्दे मलमासस्यावश्यम्भावादिति ॥ * ॥
तथानुरुद्धं क्षीणपक्षमुपसंहरति स एव।

"एवं चारं चन्द्रमसो विदित्वा
क्षीणे तस्मिन्नपराह्णे च दद्यात्"।

चारं गतिविशेषं ॥ * ॥ स्तम्भितायां व्यव-
माह स एव।

मिश्रा या चतुर्दश्या अमावास्या भवेत् क्वचित्।
र्वतां तां विदुः केचिदुपेध्वमिति चापरे" ॥

ायाः पूर्व्वमुक्तत्वात् ।वर्द्धमानायाश्च वक्ष्य-
त्वात् अस्य वचनस्य स्तम्भितापरत्वं। खर्व्वितां
ां पितृलोकप्रापकत्वानर्हां केचित् यजुर्व्वेदिनः।
रे ऋग्वेदिनः तामेव उपेध्वमुपगच्छत श्राद्धा-
र्थेयः। उपेध्वमित्यत्र गताध्वामितिपाठे
ः प्राप्तः पितृलोकप्रापकत्वाद् अध्वा यत्रयेति
ाध्वा प्रयुक्तेत्यर्थः। "तस्माच्छन्दोगा उभया-
ाधादिष्टात उभयात्र कुर्व्वन्ति" इति का-
यनसूत्रः ॥ * ॥ यत्रमाह लघुहारीतः।

त्रिमुहूर्त्तापि कर्त्तव्या पूर्व्वा दर्शा च बह्वृचैः।
ऋग्ध्वर्य्युभिः कार्य्या यथेष्टं सामगीतिभिः" ॥

त्रिमुहूर्त्तव्यमादानात् स्तम्भितायाः पूर्व्वदिने
मुहूर्त्तमात्रलाभेऽपि बह्वृचानां श्राद्धं। न तु
ापराह्णलाभादपि परदिने। सामगानां तत्रा-
नियमः। एतादृग्विषय एव उभयत्रापराह्णा-
भेऽपीयं व्यवस्थेति श्राद्धविवेकः ॥ मुख्या-
ाह्णस्य एकदिनमात्रलाभेऽप्युभयदिनालाभात् ॥
* ॥ वर्द्धमानायां व्यवस्थामाह कात्यायनः।

र्द्धमानाममावास्यां लक्षयेदपरेऽहनि।
मांश्चीनधिकान् वापि पितृयज्ञस्ततो भवेत्" ॥

मांश्चानिति पूर्व्वदिवसीययामत्रयन्यूनचतुर्दश-
यया। अथैवं वासरतृतीयांशानुरोधेन श्राद्ध-
धानात् कथममावास्याश्राद्धे पर्य्युदस्तरात्र्यादी-
रकाल्पपरिग्रहः। सत्यं। तिथिद्वैधे क्षीणादि-
दिन खण्डविशेषपरिग्रहाय वासरतृतीयांशा-
ा अन्यथोभयदिने वासरतृतीयांशप्राप्तौ
ाङ्क्षाभावप्रसक्तेः। प्रागुक्तनिरसादेः कुतपर्न्तै-
स्य निर्व्विषयतापत्तेश्च अतः पर्य्युदस्तेतरकाल-
ापि परिग्रहः। यदा तु पूर्व्वापरखण्डयोरन्य-
रस्यैव परिग्रहस्तदा यथायोग्यं तत्रैव श्राद्धा-

त्रिमुहूर्त्तद्वयपर्य्युदस्तेतरकालकुतपादिमुहूर्त्तपञ्चक-
रौहिणादिमुहूर्त्तचतुष्टयवासरतृतीयांशीयापरा-
ह्णमुहूर्त्तद्वयकालाः। यथाक्रममापत्सामान्यप्रशस्त-
प्रशस्ततर-प्रशस्ततमत्वेन ज्ञेयाः। एवमस्तङ्गति-
यावपि नातिसन्ध्यासमीपत इति पूर्व्वोक्तत्वात्।

"सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्"।
इति मत्स्यपुराणात्।
"रात्रौ श्राद्धं न कुर्व्वीत राक्षसी कीर्त्तिता हि सा।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते" ॥
इति मनुवचनाभ्यां।
"ऊर्द्ध्वं मुहूर्त्तात् कुतपात् यन्मुहूर्त्तचतुष्टयं।
मुहूर्त्तपञ्चकं वापि स्वधाभवनमिष्यते" ॥
इति मत्स्यपुराणान्मुहूर्त्तपञ्चकमित्यत्र कुतपादिति
ल्यब्लोपे पञ्चमी कुतपमारभ्येत्यर्थः। तत्रैव।
"अपराह्णे तु सम्प्राप्ते अभिजिद्रौहिणोदये।
यदत्र दीयते जन्तोस्तदक्षयमुदाहृतं" ॥
इत्युक्तं। "पूर्व्वाह्णो वै देवानां मध्यं दिनं मनुष्याणां
अपराह्णः पितॄणां"। इति श्रुतिः। वासरस्य
तृतीयांश इति कात्यायनवचनं।
"सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्"
इत्येमानेकवाक्यत्वात् वासरतृतीयांशीयापराह्ण-
मुहूर्त्तद्वयस्य लाभः। इति तिथ्यादितत्त्वं ॥

अमावासी, स्त्री, (अमा साहित्येन चन्द्रार्कयोर्वासो
यत्र, गौरादित्वात् ङीष्।) अमावस्या। इति
शब्दरत्नावली ॥

अमावास्या, स्त्री, (अमा सह चन्द्रार्कौ वसतो यत्र
तिथौ सा, अमा + वस + आधारे ण्यत्, स्त्रियां
टाप्। णित्वात् वृद्धिः।) अमावसीतिथिः।
इत्यमरः ॥

अमित्रः, पुं, (अमरोगे इत्रच्।) शत्रुः। इत्यमरः ॥
(रिपुः। विपक्षः। शत्रुपक्षीयः। प्रतिकूलः।
"मादृक्षे ममामित्रे न्यस्ते राज्यकामुके।
अमित्रो मित्ररूपेण भ्रातुस्त्वमसि लक्ष्मण" ॥
इति रामायणे।)

अमिषं, क्ली, (अम् रोगे कर्म्मणि इषन्) लौकिक-
सुखं। इत्युणादिकोषः ॥ छलाभावः ॥ (न मिष-
च्छलं नञ्समासः, छलनाभावः। नास्ति मिषच्छलं
यस्य तत्, छलशून्यः।)

अमी, [न्] त्रि, (अम् रोगे + भावे घञ्, मान्त-
त्वात् वृद्ध्यभावः, अमो रोगो विद्यतेऽस्य, इन्।)
रोगी। यथा। अम्यर्यं। इति वोपदेवः ॥

अमीवं, क्ली, (अम + वन्, ईडागमः।) पापं। दुःखं।
यथा,—
"तं त्वाहं भवभीतानां प्रपन्नानां भयापहं।
आपन्ने शापनिर्म्मुक्तः पादस्पर्शादमीवहन्" ॥
इति श्रीभागवतं ॥
("न हि त्वमीदृशं कृत्वा तस्यामीवं दशानन।
जीवितुं शक्यसि चिरं विषं पीत्वेव दुर्म्मतिः" ॥
इति रामायणे।)

अमुकं, त्रि, बुद्धिस्थत्वोपलक्षिततत्तद्धर्म्मावच्छिन्नं।
स्वस्ववृत्तिविशेषधर्म्मोल्लेखादिना तत्तदनुवाचकं।
अमुक इति भाषा। अदस्शब्दस्य अकि कृते
सोरौत्वाभावे अकोऽकारस्य उत्वे अमुक इति
भवति अमुक इत्यागमिकं। इति प्रमदीश्वरः ॥
यथा,—
"अमुकामुकगोत्रैतत् तुभ्यमन्नं स्वधा नमः"।
इति श्राद्धतत्त्वं ॥ (अभिवादये इति शब्दोच्चारणा-
नन्तरं अमुकनामाहमस्मीति स्वं नाम परिकी-
र्त्तयेत्। इति कुल्लूकभट्टः।
"संनिवेश्य प्रमाणञ्च स्वहस्तेन लिखेत् स्वयम्।
मतं मेऽमुकपुत्रस्य अमुकस्य महीपते" ॥
इति नारदः।)

अमुक्तं, क्ली, (मुच् + क्तः, न मुक्तः विरोधे नञ्-
समासः।) छुरिकाविशेषः। इति हलायुधः ॥
हातछुरी इति भाषा। मुक्तिरहिते अत्यक्ते च
त्रि ॥ (अप्राप्तमोचनः। अस्वतन्त्रः।
"अमुक्ता भवता नाथ मुहूर्त्तमपि सा पुरा"।
इति साहित्यदर्पणे।
"अमुक्तो मानसैर्दुःखैरिच्छाद्वेषसमुद्भवैः"।
इति महाभारते। खड्गादिकं। यदुक्तम्,—
"खड्गादिकममुक्तञ्च नियुद्धं विगतायुधम्"।
इति।)

अमुत्र, अ, (अमुष्मिन् अदस् + त्रल् उत्त्वमत्वे।)
जन्मान्तरं। परलोकः। इत्यमरः ॥ (अमुष्मिन्
इत्यर्थस्य वाचकः।
"अनेनैवार्भकाः सर्व्वे नगरेऽमुत्र भक्षिताः"।
इति कथासरित्सागरे। भवान्तरे। जन्मान्तरे।
"तथैव यः क्षमाकाले क्षत्रियो नोपशाम्यति।
अप्रियः सर्व्वभूतानां सोऽमुत्रेह च नश्यति"।
"इच्छद्भिः सततं श्रेय इह चामुत्र चोत्तमं" ॥
इति महाभारते।)

अमुष्यपुत्त्रः, पुं, स्त्री, (अमुष्य पुत्रः निपातनात् अलुक्
समासः।) प्रख्यातवंशोद्भवः। कुलीनः। इति
जटाधरः ॥
("स्यादामुष्यायणस्त्वार्य्योऽमुष्यपुत्त्रो महाकुलः"।
इति जटाधरः।)

अमूर्त्तः, त्रि, (मूर्च्छ + क्तः, नञ्समासः।) मूर्त्त-
भिन्नः। मूर्त्तिरहितः। यथा। सुज्ञाना अमूर्त्त-
त्वादिति वोपदेवः ॥ न्यायमते। आकाशं।
कालः। दिक्। आत्मा। एषां सामान्यगुणाः
संख्या १ परिमितिः २ पृथक्त्वं ३ संयोगः ४
विभागः ५। आकाशस्य विशेषगुणः शब्दः।
कालदिशोर्विशेषगुणो नास्ति आत्मनो विशेष-
गुणाः। बुद्धिः १ सुखं २ दुःखं ३ इच्छा ४
द्वेषः ५ यत्नः ६ भावनाख्यसंस्कारः ७ धर्म्मः ८
अधर्म्मः ९। इति भाषापरिच्छेदः ॥ (रूपहीनः।
आकृतिरहितः। वायुः। अन्तरीक्षञ्च। यदुक्तं,—
"सन्निवेशो नैवदृश्यो यस्य तन्मूर्त्तमुच्यते।
विपरीतमितरं मूर्त्तममूर्त्तं वितरद्द्वयं" ॥ इति।
"क्षितिर्जलं तथा तेजः पवनो मन एव च।
परापरत्वमूर्त्तत्वक्रियायोगाश्रया अमी" ॥
इति भाषापरिच्छेदः।)

अमृदृशः, त्रि, (माक्षिनिमते तु, अमुमिव पश्यति,
अदस् + दृश् + कञ्, दस्यात्वे आत्वे कृते ततः

मारजन्तुः। इति हेमचन्द्रः॥ गुगुक इति भाषा।
अम्बुकूर्म्मः, पुं, (अम्बुनः कूर्म्म इव)। शिशुमारः। इति हेमचन्द्रः॥
अम्बुकेशरः, पुं, (अम्बुजातः केशरोऽस्य।) कोलङ्ग-वृक्षः। इति रत्नमाला॥
अम्बुचामरं, क्ली, (अम्बुनः चामरमिव।) शैवालं। इति जटाधरः॥ शेयाला इति भाषा।
अम्बुजं, क्ली, (अम्बुनि जायते, अम्बु+जन्+डः।) पद्मं। इति मेदिनी॥ "इन्दीवरेण नयनं मुख-मम्बुजेन"। इति शृङ्गारतिलके। "अम्बुजमम्बुनि जातं क्वचिदपि न जायतेऽम्बुजादम्बु"। इत्युद्भटः।) वज्रं। इति त्रिकाण्डशेषः॥
अम्बुजः, पुं, (अम्बुसमीपे जातः।) हिज्जलवृक्षः। इत्यमरः॥ (निचुलवृक्षः॥
"अम्बुजं कमले क्लीवं हिज्जले तु पुमानयं"। इति शब्दरत्नावली।
"अम्बुजो निचुले पुंसि कमले तु नपुंसकं"। इति मेदिनी।)
अम्बुजन्म, [न्] क्ली, (अम्बुनो जन्मास्य।) पद्मं। इति राजनिर्घण्टः॥ (सारसविहङ्गः॥ शङ्खः। त्रि, जलजातः। सलिलोद्भवः।)
अम्बुताल, पुं, (अम्बुनि जले तालयति प्रतिष्ठां गच्छति अम्बु+तल+अच्।) शैवालं। इति त्रिकाण्डशेषः॥
अम्बुदः, पुं, (अम्बु जलं ददाति, दा दाने+कः।) मेघः। इति रत्नमाला॥ ("सदा मनोज्ञाम्बुदना-दसोत्सुकम्"। इति ऋतुसंहारे। "शशाक निर्व्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिर-म्बुदः"। इति रघुवंशे।) मुस्तकं। यथा। "कषी-विश्वानलदं सहाम्बुदं"। इति वैद्यकं॥
अम्बुधिः, पुं, (अम्बूनि धीयन्तेऽत्र, अम्बु+धा+ कर्म्मण्यधिकरणे किः।) समुद्रः। इति शब्द-रत्नावली॥ ("रे चापल्ययुगो मृगा. श्रितनगा कल्लोलमालाकुलामेतामम्बुधिगामिनीं व्यवसिताः सङ्गाहितुं वा कथम्"। इति भामिनीविलासे। "सुरासुराश्च गन्धर्व्वाः क्षोभयामासुरम्बुधिम्"। इति रामायणे।)
अम्बुधिस्रवा, स्त्री, (अम्बुधि+स्रु+अप्, स्त्रियां टाप्।) गृहकन्या। घृतकुमारी इति ख्याता। इति राजनिर्घण्टः॥
[अम्बु]पः, पुं, (अम्बूनि जलानि पाति पिबति वा, अम्बु+पा+कः।) चक्रमर्द्दकवृक्षः। इति शब्द-[च]न्द्रिका॥ (जलेश्वरः। वरुणः।) शतभिषानक्षत्रं। त्रि, जलपानकारी।)
[अम्बुप]त्रा, स्त्री, (अम्बूनि पत्रे यस्याः सा।) उच्चटा-[वृक्ष]ः। इति रत्नमाला॥
[अम्बुप्रस]ादः, पुं, (अम्बूनि प्रसादयति स्वच्छतां नयति [अम्बु]+प्र+सद+णिच्+अच्,उपपदसमासः।) [कतक]वृक्षः। इति राजनिर्घण्टः॥ निर्म्मली इति [भाषा]।
[अम्बुप्रसाद]नं, क्ली, (अम्बूनि प्रसादयति, प्र+सद [+णिच्+]ल्युट्।) कतकवृक्षः। इति त्रिकाण्डशेषः॥

अम्बुभृत्, पुं, (अम्बु बिभर्त्ति, अम्बु+भृ+क्विप्।) मेघः। मुस्तकं। इत्यमरः॥ समुद्रः। इति केचित्॥
अम्बुमात्रजः, पुं, (अम्बुमात्रे अम्बुमात्रे जायते, जन +डः।) शम्बूकः। शामुक इति हेमचन्द्रः॥ इति भाषा।
अम्बुरः, पुं, (अम्बु+उरच्।) द्वाराधःकाष्ठं। इति हेमचन्द्रः॥ गोबराट् इति भाषा।
अम्बुरुहा, स्त्री, (अम्बुनि रोहति, अम्बु+रुह+कः, ततष्टाप्।) स्थलपद्मिनी। इति राज-निर्घण्टः॥
अम्बुवाची, स्त्री, (अम्बु तद्धर्म्मं वाचयति सूचयति, वच्+णिच्+अण्, उपपदसमासः, ङीप्।) ऋतु-मती पृथ्वी। यथा,—
"यद्दारे यत्काले मिथुनसंक्रमणं भुवं तदादाम्भसारे ताक्ष्यात्तावधि विंशत्यादिदण्डाधिकदिनत्रयमम्बुवाची। तत्राध्ययनं वीजवपनं न कार्य्यं। सर्प-भयोपशमनाय दुग्धं पेयं"। इति कृत्यतत्त्वं॥ ॥
अपिच। ज्योतिषे।
"रजोदुष्टा क्षाम्बुवाची च रौद्राद्यपादगे रवौ।
तस्यां पाठो वीजवापो नाहृतोदुग्धपानत"॥
मृगशिरसि निवृत्ते रौद्रपादेऽम्बुवाची
ऋतुमति खलु पृथ्वी वर्जयेत् त्रीण्यहानि।
यदि वपति कृषाणः क्षेत्रमासाद्य वीजं
न भवति फलभागी शस्यपात्राणपाशः"॥
रजोदुष्टा धरा ऋतुमती पृथ्वी। मत्स्यसूक्ते।
"धरण्यामृतुमत्याञ्च भूमिकम्पे तथैव च।
अन्तरागमने चैव विद्या नैव पठेद्‌बुध"॥
ज्योतिषे।
"यस्मिन् वारे सहस्रांशुर्य्यत्काले मिथुनं व्रजेत्।
अम्बुवाची भवेन्नित्यं पुनस्तत्कालवारयोः"॥
इदन्तु प्रायिकं। इति तिथ्यादितत्त्वं॥ ॥ अन्यच्च।
"यदार्द्रं समादाय भानोर्म्मिथुनगामिता।
पुनस्तत्स्थेनमादाय यजनं त्रिदिनं त्यजेत्॥
काम्यनैमित्तिकञ्चैव यात्रां मन्नक्रियां तथा।
ऋतुमत्यां न कुर्व्वीत पूर्व्वसङ्कल्पिताद्दृते॥
न कुर्य्यात् खननं भूमेः सूचयेणापि शङ्करि।
वीजानां वपनञ्चैव चतुर्व्विंशतियामकं॥
प्रमादाद्वपनं कृत्वा गावस्तत्र प्रचारयेत्।
हलं कुर्य्यात् तत्दयाञ्च खननादिनकाशनं"॥
इति मत्स्यसूक्ते महातन्त्रे ५८ पटलः॥ ॥ अपरञ्च।
"रवौ तदाद्यपादस्थे भूमे संजायते रज।
तस्मादिनत्रयं यावत् वीजवापं परित्यजेत्॥
चत्वारिंशल्लिप्तिकषड्भागयुतो रविर्यदा भवति।
तन्नाम्बुवाची ज्ञेया शिवर्द्धपादस्थितो यावत्॥
दिग्भागशून्यलिप्तो गणितेन भवति रविर्यदा साम।
स भवति निर्गुणकालो द्वितीयपादाश्रयादौद्रे"॥
"न स्वाध्यायं वषट्कारं न देवपितृतर्पणं।
हलानां वाहनञ्चैव वीजानां वपनं तथा"॥
इति राजमार्त्तण्डः॥ ॥ अथ पाकनिषेधो यथा,—
"यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा।
अम्बुवाचीदिने चैव पाकं कृत्वा न भक्षयेत्॥

[अम्बु]राशं वा[र्य्य]र्थं वा अम्बु...
अम्भां वै ...
इति ...
अम्बुराशिनी, स्त्री, (अम्बुराशि +णिनि ङीप्।) ...
अम्बुराशी, स्त्री, (अम्बुराशे ... गौरादित्वात्, ङीप्।) ... निर्घण्टः॥
अम्बुवाहः, पुं, (अम्बूनि वहति, अम्बु... उपपदसमासः।) मेघः। इति ...
("विभार्ति ... सजलाम्बुवाह"। इति ...
त्रिपाले। "विभाव्यमानं ... मम्बुवाहः"। इति ...)
मेघनामा इत्यमरोक्तत्वात्।
अम्बुवाहिनी, स्त्री, (अम्बूनि वहति नयति, अम्बु+वह+णिनि, ... ङीप्।) काष्ठाम्बुवाहिनी। ... यनौकायां जलसेचनी। इत्यमरटीका रामाश्रयः॥
अम्बुवेतसः, पुं, (अम्बुजातो वेतसः, मध्यपदलोपश्च।) जलवेतसः। तत्पर्य्यायः २ निकुञ्ज २ वानेयी॥ इत्य...
अम्बुशिरीषिका, स्त्री, (अम्बुनि ... अम्भार्थे कन् स्त्रीत्वम्।) ... तत्पर्य्यायः। शिरीषिका २ ... दुर्म्मणा॥ वारिशिरीषिका ३। ... त्रिदोषविषकुष्ठार्शोऽपहत्वं। इति ...
अम्बुसर्पिणी, स्त्री, (अम्बुनि सर्पति ... णिनि, उपपदसमासः।) ... त्रिकाण्डशेषः॥ जोक् इति भाषा...
अम्बुसेचनी, स्त्री, (अम्बूनि सिच्यन्ते ... सिच्+करणे ल्युट्, ङीप्।) नौकाजलसेचनपात्रं। इत्यमरटीका...
[राम]श्रयः॥
अम्बूकृतं, त्रि, (अनम्बु अम्बु सम्पद्यमानं ... कृ+क्त, अभूततद्भावे च्वि।) ... सनिष्ठीवनवाक्यं। तत्पर्य्यायः। सनिष्ठीवं ... मरः॥ सथूत्कार २। इति हेमच... ष्ठीवमुखरावं। "दधति कुहरभाजा... दूनामनुरसितगुरूणि स्त्यानमम्बूकृतानि"। उत्तरचरिते।)
अम्भ, पुं, (अवि शब्दे ...) ... वादिकोष॥ अम्बल। टक इति...
अम्भः, [स्] क्ली, (आप्यते, आप्+...) ... बालनामौषधं। इत्यमर। लग्नादि... इति ज्योतिषं॥ (... वैदिकच्छन्दोभेद।)
अम्भःसारं, क्ली, (अम्भसां सारं।) मु... राजनिर्घण्टः॥ अम्भःसारमपि पाठ।
अम्भःसूः, पुं, (अम्भांसि सूते, सू+क्विप्।) ... इति हेमचन्द्रः॥ अम्भःसूरिति पाठ।

...ोजं, क्ली, (अम्भसि जायते, अम्भस् + जन् + ड ।) पद्मं । इति शब्दरत्नावली ॥ सारसपक्षी । ...टीकाकार इत्यमरशेषोक्तत्वात् । चन्द्रे पुं । यथा । ...“पिबन्तं त्वन्मुखाम्भोजच्युतं हरिकथामृतं” । इति ...श्रीभागवतं ॥ जलजाते त्रि ॥

...ोजजन्मजनिः, पुं, (अम्भोजन्मनि विष्णुनाभिपद्मे ...जनिः जन्म यस्य सः ।) ब्रह्मा । यथा,—
...“...ोजन्मजनिस्तदन्तरगतो वत्सानितो वत्सपान्” ।
...इति श्रीभागवतं ॥

...जयोनिः, पुं, (अम्भोजं नारायणनाभिपद्मं ...निरुत्पत्तिस्थानं यस्य सः ।) ब्रह्मा । यथा,—
...“...दनमुपगतोऽहं पूर्व्वमम्भोजयोनेः” ॥
...इति प्रबोधचन्द्रोदयः ॥

...जिनी, स्त्री, (अम्भोज + समूहार्थे इनि ततः ...प् ।) पद्मलता । पद्मसमूहः । पद्मयुक्तदेशः । ...इति शब्दरत्नावली । (पद्मिनी । नलिनी । “अ-...म्भोजिनीवननिवासविलासहेतुं हंसस्य हन्तुमप-...मपि तां विधाता” । इति नीतिशतके ।)

...दः, पुं, (अम्भो जलं ददाति, अम्भस् + दा + ...।) मेघः । मुस्तकं । इति शब्दरत्नावली ॥ ...जलदानकर्त्तरि, त्रि ।)

...धरः, पुं, (अम्भः जलं धरति, धृ + अच् ।) ...घः । (“अप्सीकराम्भोधरमत्तकुञ्जरः” । इति ...ऋतुसंहारे ।) मुस्तकं । इति शब्दरत्नावली ॥

...धिः, पुं, (अम्भांसि धीयन्ते अत्र, धा + आधारे ...किः ।) समुद्रः । इति शब्दरत्नावली ॥
...“अहं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया ।
...नं दूरेऽस्तु वदनमपूरि क्षारवारिभिः” ॥
...इति साहित्यदर्पणे ।
...“...सम्भृयाम्भोधिमभ्येति महानद्या नगापगाः” ।
...इति माघः ।)

...ोधिवल्लभः, पुं, (अम्भोधेः वल्लभः, षष्ठीतत्पुरुषः ।) ...प्रवालः । इति राजनिर्घण्टः ॥

...ोनिधिः, पुं, (अम्भांसि निधीयन्तेऽत्र, अम्भस् + ...नि + धा + किः ।) समुद्रः । इति शब्दरत्नावली ॥
(“अस्तूत सा नागवधूपभोग्यं
मैनाकमम्भोनिधिबद्धसख्यं” ।
...इति कुमारसम्भवे । विष्णोः सहस्रनाममध्ये ...परिगणितो नामभेदः, अम्भांसि देवमनुष्यादयो ...निधीयन्ते अस्मिन् इति व्युत्पत्त्या, नारायणस्य ...सर्व्वाश्रयत्वात् । “अम्भोनिधिरनन्तात्मा” । इति ...महाभारते ।)

...ोराशिः, पुं, (अम्भसां राशिरिव एकत्रोपचित-...त्वात् ।) समुद्रः । इति राजनिर्घण्टः ॥

...ोरुहं, क्ली, (अम्भसि रोहति, अम्भस् + रुह् + कः ।) पद्मं । (“आस्ते पूर्णशशाङ्कता नयन-...योस्तादात्म्यमम्भोरुहां” । इति भामिनीविलासे ।) ...सारसपक्षी । इत्यमरः ॥

...मयं, त्रि, (अपां विकारादि, अप् + मयट् ।) ...जलविकारं । फेनादि । इत्यमरः ॥ जलमये त्रि । ...यथा,—
“न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः” ॥
इति श्रीभागवतं ॥
(“सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः” ।
इति रघुवंशे ।)

अम्रः, पुं, (अमति सौरभेण दूरं गच्छति, अम + रन् ।) आम्रवृक्षः । फले क्लीवं । इति शब्द-रत्नावली ॥

अम्लातः, पुं, (अम्लं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति, अम्ल + अत + अण् वा लस्य रत्वं, पक्षे अम्लातः ।) आम्रातकवृक्षः ॥ इति शब्दमाला ॥

अम्रातकः, पुं, (अम्लं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति अम्ल + अत + अण् + स्वार्थे कन् ।) आम्रातकवृक्षः । इति त्रिकाण्डशेषः ॥
(“आम्राम्रातकजम्बूत्वक् कषाये विपचेद्बुधः ।
यवागूं शालिभिर्युक्तां तां भुक्त्वा ग्रहणीं जयेत्” ॥
इति शार्ङ्गधरः ।)

अम्लं, क्ली, (अम + क्त ।) तक्रं । इति राजनिर्घण्टः ॥

अम्लः, पुं, (अम + क्त ।) षड्रसमध्ये रसविशेषः । टक इति भाषा । तोयाग्निगुणबाहुल्यादम्लः । इति सुश्रुतः । अस्य गुणाः । शाकवद्धोपकारित्वं । हृद्यत्वं । रुध्यभिरक्तमांसकारित्वं । शीतलत्वं । वायुनाशित्वं । स्निग्धोष्णत्वं । कटुरसतोऽधिकोष्ण-वीर्य्यत्वं । जिह्वोद्वेगकारित्वञ्च । इति राजवल्लभः ॥ अस्य दन्तोद्वेगकारित्वगुणोऽप्यस्ति । अपि च । शीघ्राग्निपटुताकारित्वं । प्रपाचनत्वं । इति राज-निर्घण्टः ॥ * ॥ तदतिप्रयभक्षणगुणाः । पाचकत्वं । पित्तश्लेष्मवान्तिक्लेदकारित्वं । लघुत्वं । उष्णत्वं । वहिःशीतत्वं । वायुनाशित्वञ्च । इति राजवल्लभः ॥ भ्रान्तितुष्टिकण्ड्वापाण्डुदोषकार्श्यकासकारित्वं । इति राजनिर्घण्टः ॥ तद्वति त्रि । इत्यमरः ॥ * ॥ अम्लवेतसः । इति राजनिर्घण्टः ॥ (यदाह वा-भटः ॥ “अम्लः स्राव्यते मुखम् ।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः ।
अम्लोऽग्निदीप्तिकृत् स्निग्धो हृद्यः पाचनरोचनः ॥
उष्णवीर्य्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः ।
करोति कफपित्तास्रं मूढ़वातानुलोमनम् ॥
सोऽत्यभ्यस्तस्तनोः कुर्य्याच्छैथिल्यं तिमिरं भ्रमं ।
कण्डुपाण्डुत्ववीसर्पशोफविस्फोटतृड्ज्वरान्” ॥
हारीतेन यदुक्तं तद्यथा,—
“जिह्वाक्लेदं जनयति तथा नेत्रनैर्म्मल्यकारी,
बीभत्सं वा जनयति तथा वातरोगापहारी ।
कण्डूकुष्ठक्षतरुजकरो लोलितः शोषिने स्या-दम्लः प्रोक्तः पवनशमनोऽसृक्प्रकोपं तनोति” ॥
सुश्रुतश्चाह ॥ “अम्लो जरणः पाचनः पवननिग्रहणोऽनुलोमनः कोष्ठ-विदाही वहिःशीतः क्लेदनः प्रायशो हृद्यश्चेति । स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो दन्तहर्ष-नयन-सम्मीलन-रोमसंवेजनकफ-विलयन-शरीरशैथिल्यान्यापादयति तथा क्षता-भिहत-दग्ध-दष्ट-भग्न-रुग्न-प्रच्युतावमूत्रित-वि-सर्पित-छिन्न भिन्न-विद्धोत्पिष्टादीनि पाचयत्या-ग्नेयस्वभावात् परिदहति कण्ठमुरोहृदयञ्चेति” ॥ ० ॥
“अम्लोरसो भक्तं रोचयति, अग्निं दीपयति, देहं वृंहयति, ऊर्ज्जयति, मनो बोधयति, इन्द्रियाणि दृढ़ीकरोति, बलं वर्द्धयति, वातमनुलोमयति, हृदयं तर्पयति, आस्यं संस्रावयति, भुक्तमपकर्ष-यति, क्लेदं जनयति, प्रीणयति । लघुरुष्णः स्नि-ग्धश्च ॥ स एवंगुणोऽप्येकोऽत्यर्थमुपयुज्यमानो दन्तान् हर्षयति, तर्पयति, संमीलयति अक्षिणी, संवेजयति लोमानि, कफं विलापयति, पित्त-मभिवर्द्धयति, रक्तं दूषयति, मांसं विदहति, कायं शिथिलीकरोति, क्षीण-क्षत-कृशदुर्ब्बलानां श्वयथुमापादयति । अपि च क्षताभिहत-दष्ट-दग्ध-भग्न-रुग्न--च्युतावमूत्रित-परिसर्पित-मर्द्दित-च्छिन्न-विद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात् परिदहति कण्ठमुरो हृदयञ्च” ॥ इति चरकः ॥)

अम्लकः, पुं, (अल्पोऽम्लः अल्पार्थे कन् ।) लकुच-वृक्षः । इति शब्दरत्नावली ॥ (लकुचशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

अम्लकाण्डं, क्ली, (अम्लं काण्डं यस्य ।) लवणतृणं । इति राजनिर्घण्टः ॥

अम्लकेशरः, पुं, (अम्लः केशरो यस्य ।) मातुलुङ्गः । वीजपूरः । इति रत्नमाला ॥ (टावालेवु इति भाषा ।)

अम्लचूड़ः, पुं, (अम्ला चूड़ा शिखा यस्य ।) अम्ल-शाकः । इति राजनिर्घण्टः ॥

अम्लजम्बीरः, पुं, (अम्लो जम्बीरः ।) अम्लनिम्बूकः । इति राजनिर्घण्टः ॥

अम्लनायकः, पुं, (अम्लं रसं नयति, नी + ण्वुल् ।) अम्लवेतसः । इति राजनिर्घण्टः ॥

अम्लनिशा, स्त्री, (अम्लरसे निःशेषेण शेते, अम्ल + नि + शी + ड + स्त्रियां टाप् ।) शटी । इति रा-जनिर्घण्टः ॥

अम्लपञ्चफलं, क्ली । अम्लरसयुक्तपञ्चप्रकारफलं । तद्यथा । कोलं १ दाड़िमं २ वृक्षाम्लं ३ चुक्रिका ४ अम्लवेतसं ५ ॥ मतान्तरे । जम्बीरं १ नारङ्गं २ अम्लवेतसं ३ तिन्तिड़ीकं ४ वीजपूरं ५ । इति राजनिर्घण्टः ॥
(“कोलञ्च दाड़िमञ्चैव वृक्षाम्लं चुक्रिका तथा ।
अम्लवेतसमित्येतदम्लपञ्चफलं स्मृतम्” ॥
“जम्बीरं नागरङ्गञ्च तथाम्लवेतसं पुनः ।
तिन्तिड़ीकं वीजपूरमम्लपञ्चफलं स्मृतम्” ॥)

अम्लपत्रः, पुं, (अम्लं पत्रं यस्य ।) अश्मन्तकवृक्षः । इति राजनिर्घण्टः ॥

अम्लपत्री, स्त्री, (अम्लं पत्रं यस्याः सा, ङीप् ।) पलाशीलता । क्षुद्राम्लिका । इति राजनिर्घण्टः ॥

अम्लपूरं, क्ली, (अम्लेन अम्लरसेन पूर्य्यते, पूर + कर्म्मणि घञ् ।) वृक्षाम्लं । इति राजनिर्घण्टः ॥

अम्लफलं, क्ली, (अम्लं फलं यस्य ।) वृक्षाम्लं । इति राजनिर्घण्टः ॥ तेंतुल इति भाषा ।

अम्लफलः, पुं, (अम्लं फलं यस्य सः ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥

अम्लभेदनः, पुं, (अम्लार्थं भिद्यतेऽसौ, अम्ल + भिद् + कर्म्मणि ल्युट् ।) अम्लवेतसः । इति राज-निर्घण्टः ॥

अम्लरुहा, स्त्री, (अम्लाय रोहति, अम्ल + रुह् +

क ।) मालवदेशजनागवल्लीभेदः । अस्या गुणाः । सतीक्ष्णत्वं । मधुरत्वं । रुचिकारित्वं । हिमत्वं । दाहनाशित्वं । पित्तोद्रेकहरत्वं । वनिताप्रमोदस्त्रीसौभाग्यविवर्द्धनत्वं । मदकारित्वं । गुल्माध्मानविबन्धनाशित्वञ्च । इति राजनिर्घण्टः ॥ ("नाम्ना यावनवल्ली सतीक्ष्णमधुरा रुच्या हिमा दाहनुत् पित्तोद्रेकहरा प्रदीपनकरी वक्त्रारुजा मोदिनी । स्त्रीसौभाग्यविवर्द्धिनी मदकरी श्रेया सदा वल्लभा गुल्माध्मानविबन्धजित् च कथिता सा मालवे तु स्मृता" ।)

अम्ललोणिका, स्त्री, (अम्लं रसं लाति गृह्णाति अम्लेन तम् उत्नयति दीपयति, अम्लन + उन + ण्वुल्, टापम् ।) क्षुद्रवृक्षविशेषः । आमरुल । इति भाषा । तत्पर्य्यायः । चाङ्गेरी २ चुक्रिका ३ दन्तशठा ४ अम्बष्ठा ५ । इत्यमरः ॥ अस्या गुणाः । कफवायुनाशित्वं । अग्निदीपनत्वं । ग्रहणीरोगे हितकारित्वञ्च । इति राजवल्लभः ॥ वल्लादिकमणीवदिचिरकषायरागनाशकगुणोऽप्य-ति । राजनिर्घण्टोक्तगुणपर्य्यायौ चुक्राम्लिका-शब्दे द्रष्टव्यौ । तत्पर्य्यायगुणाः ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ।
अम्ललोणी शफरी कुशली चाम्लपत्रकः" ॥
क्वचित् पुस्तके कुशलीस्थाने शकली इति च पाठः ।
"चाङ्गेरी दीपनी रुच्या लघ्वुष्णा कफवातनुत् ।
पित्तलाम्ला ग्रहण्यर्शःकुष्ठातीसारनाशिनी" ॥
इति भावप्रकाशः ॥
("दीपनी चोष्णवीर्य्या च ग्राहिणी कफमारुते ।
प्रशस्यतेऽम्ल चाङ्गेरी ग्रहण्यर्शोहिता च सा" ॥
इति चरकः ॥
"चाङ्गेरी कफवातघ्नी वह्निकृत् ग्रहणी हिता" ।
इति वैद्यकदव्यगुणः ॥
"चाङ्गेर्य्यम्लाग्निदीपनी" ।
"ग्रहण्यर्शोऽनिलश्लेष्महितोष्णा ग्राहिणी लघुः" ।
इति च वाग्भटः ॥
"ग्रहण्यर्शोविकारघ्नी माम्ला वातकफे हिता ।
उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी" ॥
इति सुश्रुतः ।)

[अम्लल]ोटी, स्त्री, अम्ललोणिका । चाङ्गेरी । इत्य-[म]रटीका ॥

[अम्ललो]णी, स्त्री, (अम्लो रसो विद्यतेऽस्याः, अम्ल + [...]र् मत्व वचम् ।) क्षुद्राम्लिका । इति राज-[निर्घ]ण्टः । आमरुल । इति भाषा ।

[अम्लवर्गः], पुं, (अम्लानां अम्लरसप्रधानानां वर्गः ।) [...]रुसः । दन्ता । चाङ्गेरी । लकुचं । अम्लवेतसं । [...]कं । वीजपूरकं । नागरङ्गं । दाडिमं । [...]कं । अम्लं । तैन्तिडीकं । अम्लष्ठा । क-[...] निम्बूकं । इति राजनिर्घण्टः ॥ (मता-[न्तरे ...]ः,—
"[...]म्लानको धात्री लकुचं च कपित्थकं ।
[...]ञ्च चक्रं कार्मरं डिम्बकं ॥
[...]र्णो नारङ्गं डिम्बा करमर्दकं ।
वीजपूरं च जम्बीरं निम्बूकाम्लवेतसं ।
दन्ताम्लं हरितञ्चैव चाङ्गेरीत्यम्लवर्गकः" ।)
"अम्लवेतसजम्बीरलुङ्गाम्बुजञ्चनारङ्गकाः ।
नागरङ्गं तिन्तिडी च चिञ्चापत्रञ्च निम्बुकं ॥
चाङ्गेरी दाडिमञ्चैव करमर्दस्तथैव च ।
एष चाम्लगणः प्रोक्तो वेतसाम्लं सदोत्तमम्" ।
इति वैद्यकरत्नसारसङ्ग्रहः ।
"दाडिमामलकमातुलुङ्गाम्रातक-कपित्थ-करमर्द-बदर-कोल-प्राचीनामलक-तिन्तिडीक-कोशाम्र-भव्य-पारावत-वेत्रफल-लकुचाम्ल-वेतस-दन्तशठ-दधि-तक्र-सुरा-शुक्त-सौवीरक-तुषोदक-धान्याम्ल-प्रभृतीनि समासेनाम्लोवर्गः" । इति सुश्रुतश्च ।)

अम्लवल्ली, स्त्री, (अम्लरसवती वल्ली ।) त्रिपर्णिका-नामकन्दविशेषः । इति राजनिर्घण्टः ॥

अम्लवाटिका, स्त्री, (अम्लस्य वाटिका स्थानमिव ।) नागवल्लीभेदः । अस्या गुणाः । कटुत्वं । अम्लत्वं । तिक्तत्वं । रुच्यत्वं । उष्णत्वं । मुखपाककारित्वं । विदाहपित्तरक्तप्रकोपकारित्वं । विष्टम्भदाहत्वं । वायुनाशित्वञ्च । इति राजनिर्घण्टः ॥ (उक्तञ्च,—
"स्यादम्लवाटी कटुकाम्लतिक्ता
रुच्या तथोष्णा मुखपाककर्त्री ।
विदाहपित्तास्रविकोपिनी च
विष्टम्भदा वातनिवर्हणी च" ।)

अम्लवास्तूकं, क्ली, (अम्लरसान्वितं वास्तूकं शाक-भेदः ।) चुक्रं । इति राजनिर्घण्टः ॥

अम्लबीजं, क्ली, (अम्लस्य बीजं कारणं ।) वृक्षाम्लं । इति राजनिर्घण्टः ॥

अम्लवृक्षं, क्ली, (अम्लरसो वृक्षे यस्य ।) वृक्षाम्लं । इति राजनिर्घण्टः ॥ तैंतुल इति भाषा ।

अम्लवेतसः, पुं, स्वनामप्रसिद्धः अम्लरसवृक्षविशेषः । चुकापाक इति ख्यात इति केचित् । अम-कुषाद इति ख्यात इति केचित् । इत्यमर-टीकायां भरतः ॥ तत्पर्य्यायः । अम्ल २ वेधी ३ रसाम्लः ४ आम्लवेतसः ५ वेतसाम्लः ६ अम्ल-सारः ७ शतवेधी ८ वेधकः ९ भीमः १० भेदनः ११ भेदी १२ राजाम्लः १३ अम्लभेदनः १४ अम्ला-ङ्कुशः १५ रक्तसारः १६ फलाम्लः १७ अम्ल-नायकः १८ सहस्रवेधी १९ वीराम्लः २० गुल्म-केतुः २१ वराभिधा २२ शङ्खद्रावी २३ मांस-द्रावी २४ । इति राजनिर्घण्टः ॥ वराङ्गी २५ । इति रत्नमाला ॥ चुक्रं २६ । इत्यमरः ॥ तत्फल-गुणाः । अत्यम्लत्वं । कषायत्वं । उष्णत्वं । वायु-कफार्शःश्रमगुल्मनाशित्वं । अरुचिहारित्वञ्च । इति राजनिर्घण्टः ॥ छागमांसनीरद्रवीभव-कारित्वं । चणकाम्लवत् गुणकारित्वञ्च । इति भावप्रकाशः ॥ चाणाहरोगनाशित्वं । तत्पक्व-फलगुणाः । दोषविनाशित्वं । गुरुत्वं । धारकत्वञ्च । इति राजवल्लभः ॥ तत्पर्य्यायगुणाः ।
"स्यादम्लवेतसश्चुक्रः शतवेधी सहस्रजित् ।
अम्लवेतसमत्यम्लं भेदनं लघु दीपनं ॥
हृद्रोगशूलगुल्मघ्नं पित्तलं लोमहर्षणं ।
हृद्यं विड्भेदनं मूत्रं श्वासकासनाशनं ॥

अम्लि

हिक्कानाहाशविघ्नानाहानाशने ।
कफवातामयान् हन्ति शुक्लमांसं ...
चणकाम्लगुणं प्रोक्तं लौहसूचीद्रा...
इति भावप्रकाशः ॥
("अम्लिकाया फलं पक्वं ...
गुरुर्भेदि च मधुरं भेदनं स्याद्विनाशनम्" ।
इति च चरकः ।)

अम्लशाकं, क्ली, (अम्ल शाको यस्य तत् ।) चुक्रं । इति राजनिर्घण्टः ॥ (... विशेषो द्रष्टव्यः ।)

अम्लशाकः, पुं, (अम्लः शाको यस्य सः ।) निर्म्मेध । तत्पर्य्यायः । शाकाम्लं २ अम्लचुक्रिका ३ चिञ्चाम्लं ४ ... मारः ७ । अस्य गुणाः । अतिरुच्यत्व-नाशित्वं । कफदाहहारित्वञ्च । मिश्रितस्यास्य गुणः । दाहपित्तकर... इति राजनिर्घण्टः ॥ (उक्तञ्च,—
"अम्लशाकस्तु ...वातघ्न
साम्लेन पर्करामिश्रो ..." ।)

अम्लसारं, क्ली, (अम्लरस इव ...) काञ्जिकं । इति राजनिर्घण्टः ॥

अम्लसारः, पुं, (अम्लरस इव सारः ...) अम्लवेतसः । निम्बूकः । हिन्ताल । इति राज-निर्घण्टः ॥

अम्लहरिद्रा, स्त्री, (अम्लरसयुक्ता हरिद्रा ।) इति राजनिर्घण्टः ॥

अम्लाङ्कुशः, पुं, (अम्लं अङ्कुशाकारं ...) अम्लवेतसः । इति राजनिर्घण्टः ।

अम्लातकः, पुं, (न म्लायति, म्लै + क्त, ... नञ्समासः ।) अम्लानवृक्षः । ... अस्य गुणपर्य्यायौ राजतरणीशब्दे द्रष्टव्यौ ।

अम्लानः, पुं, (म्लै + क्त ततो नञ्समासः ।) महासहा । इत्यमरभरतौ । ... म्लातः ।

अम्लानः, त्रि, (म्लै + क्त, न म्लानः ।) म्लानिरहितः । यथा,—
"अम्लानपङ्कजा माला शिरस्युरसि च ..." ।
इति देवीमाहात्म्यं ॥ (स्वच्छ । ... निर्म्मल । उज्ज्वल । प्रसन्न । विशद । अपर्य्युषितः । अशुष्क ।)

अम्लानिनी, स्त्री, (अम्लानानां पद्मानां ... इनि ।) पद्मसमूहः । पद्मिनी । इति ...शेषः ॥

अम्लिका, स्त्री, (अम्लैव, स्वार्थे कन् ।) ... इत्यमरः ॥ पलाशीलता । ...म्लिका । ...म्लिका । इति राजनिर्घण्टः । अम्लोद्गार । इति मेदिनी ॥
("दीपन भेदन शुष्कमम्लिकाकोलयोः ..." इति ।
"अम्लिकाया फलं पक्वं तस्मादल्पान्तरं गुणैः" ।
इति चरकः ।
"अम्लिकाया फलं पक्वं तद्वद्धि गुडैः" ।
इति सुश्रुतः ।)

[illegible], पुं, ([illegible] कटकः ।) [illegible] [illegible] अपि सह [illegible] [illegible] [illegible]। [illegible] इति भाषा। अस्य गुणाः। [illegible]। [illegible]। इति [illegible]॥
"[illegible] सह [illegible]। [illegible] [illegible]। [illegible] वह्निप्रदीपकाः। [illegible] पूर्व्वैरेवोऽपि च समन्विताः" ॥)
[illegible]का, स्त्री, कण्टिका। इत्यमरटीकायां राय-मुकुटः॥
[illegible]टकः, पुं, (अयसं उटं पर्णं यस्य सः ।) अयस-[illegible]। [illegible] इति ख्यातः। इति [illegible]॥
[illegible] गतौ। (इति कविकल्पद्रुमः ।) [illegible] अयते। [इ]ति दुर्गादासः॥
[illegible], पुं, (एति शुभमनेन, इण्+करणे अच् ।) [illegible]भावदविधिः। मङ्गलानुष्ठानं। इत्यमरः॥ [illegible] कल्याणदायकं दैवं।
"[illegible] शुभमूलप्रदत्ता युद्धपार्थिवयान्वितः"। [इ]ति रघुवंशे। [illegible]भेदः। अयःपानमध्यम। [इ]ति वैद्यकरत्नमालाद्रुमः॥)
[illegible], [स्] स्त्री, (इण्गतौ, असुन् ।) लौहं। इत्यमरः॥ [illegible] शुद्धादिलौहं॥
"[illegible]प्रदाता बलवीर्य्यधाता, रोगापहर्त्ता मदनस्य कर्त्ता। अयःसमानं न हि किञ्चिदस्ति, रसायनं श्रेष्ठतमं नराणां" ॥ ॥
"गुडूचीमात्रसंयुक्तं त्रिफलारसमन्वितः। [illegible] निहन्त्यायु सर्व्ववातहरं परं" ॥)
[अय]नं, क्ली, (अय+भावे ल्युट् ।) शास्त्रं। यथा,—
"ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते"। इति तिथ्यादितत्त्वं॥ पन्थाः। सूर्य्यस्य उत्तर-दक्षिणदिग्गमनं। तद्यथा। माघादिषण्मासाः उत्तरायणं। श्रावणादिषण्मासाः दक्षिणायनं। इत्यमरः॥ गमनं। गत्यर्थाधधातोर्भावेऽनट्॥ रविसंक्रान्तिविशेषः। यथा भविष्यमात्स्यज्यो-तिषेषु।
"मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने। विषुवती तुला मेषे गोलमध्ये तथापराः" ॥
मृगो मकरः। गोलो राशिचक्रं। देवीपुराणे,
"यावद्दिनकला भुक्ता तत्पुण्यं चोत्तरायणे। निरंशे भास्करे दृष्टे दिनान्तं दक्षिणायने" ॥
तत्र स्नानदानादौ कोटिगुणफलं भवति। यथा मात्स्ये।
"अयने कोटिगुणितं लक्षं विष्णुपदीषु च।" इत्यादि।
"अयने विषुवे चैव शयने बोधने हरेः। अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु" ॥
इति तिथ्यादितत्त्वं ॥ * ॥ सूर्य्यगतिविशेषः। यथा,—
"मृगसंक्रान्तितः पूर्व्वं पश्चात्तारादिनान्तरे।
[illegible] [illegible] [illegible]।
[illegible] [illegible] [illegible]॥
[illegible] [illegible] [illegible]।
[illegible] [illegible] दक्षिणायनं" ॥
इति ज्योतिस्तत्त्वं॥
अयनांशः, पुं, (अयनस्य अंशः भागः ।) सूर्य्यगतिवि-शेषस्य भागः। अयनांशानयनप्रकारः।
"स्पष्टं लग्नं कृत्वा अयनांशैः प्रवर्द्धयेत्। स्यादेवं ते भागं नियोजिता दिने दिने" ॥
अस्यार्थः। स्पष्टं रामो[illegible]द्वेदैर्भिज्ञात्पुनः स्पष्टलग्नं कृत्वा यथा मेषस्थं ३। १० स्पष्टलग्नं वृषस्थं ४। १७ एतान्तरेण दयोराधिक्येन ३० त्रिंशत्कं तथायनांशैः प्रवर्द्धयेत्। अयनांशस्तु मानसागरोक्ताः। यथा,—
"शाकमेवाब्धिवेदोनं दिः कृत्वा ततमिदं वेत्। गतं दीनस्य तथैव षष्ट्यांशाश्चायनांशकाः" ॥
इति। गतस्थाने स्पष्टेन इति पाठः सिद्धान्त-रहस्ये। ते च इदानीं चेत्रस्थेशाव्दाः गमवत् उनविंशतिसंख्याः। ते च गतस्थानैः ३० त्रिं-शता चरेत्। भागस्तिस्त्रः उनविंशतिः १९। तत्र मेषलग्ने मिश्रयित्वा ४। ६ षट्पश्चाधिक-दशचतुष्टयात्मकं मेषलग्नं भवति। एवं वृषादिका-मूहां। किन्तु लग्नान्तरेण यथाधिकं लभ्यते तथा-धिकं लग्नं भवति। एवं यत्र लग्नान्तरेण हानि-स्तत्र लग्नेऽपि हानिरिति निष्कर्षः ॥ * ॥ इदानीं स्पष्टलग्नार्थं पद्येन लिख्यते। शालिवदो ४। ५-ऽष्टवेदैः श्रुति १। ४८-त्रिभवनैरिन्द्रियं ५। २८-खाम्बुनेषु ५। ४०-सांगो वेदागमैः ५। ३४-तात्रिभिरिषु ५। ३०-रिपुरङ्गामिते ५। १६-युःकुवेदे ५। ४१-वांतोनागेन्दुभिस्तु ५। १८ श्रुतिरपि रसरामे ४। ३६-गुंगाः सप्तवाहैः ३।५७ रामोऽब्धाद्भिस्तु ३।४७-सिद्धान्तजमतमयनांशा-दिदं लग्नमानं॥ एतच्च तमोलिप्तादिदेशीयं प्राशुद्धायनांशसाधितं ॥ * ॥ चक्रेन वेदो ४। ६ मेषः स्यात् वसुवेदैः सुखं ४।४८ वृषः। मुनिदग्भैः शरो ५।२७ द्वन्द्वः व्योमाब्धिबाण ५। ४०-कर्कटः॥ वेदरामैः शरः ५। ३४ सिंहः कन्याद्वयुग्मपञ्चकः ५। २६। तुला ऋषिरामपञ्च ५। ३७-वृश्चिकः खाब्धिपञ्चकः ५। ४०। नवचन्द्रबाण ५। १९— धनुर्वेदरामैः सुखं ४। ३४ मृगः। वसुपञ्च-त्रयः ३। ५८ कुम्भः ऋषिवेदत्रयो ३। ४७ भषः ॥ * ॥ शक्रवेदश्च ४। ६ मेषो नवसुखसुख ४-४९। -गौर्म्मेयुग्मैः शिवास्यो ५। २८ द्वन्द्वो-ऽष्टाब्धिबाणो ५।३९ हिमकरभवनो राम-रामैः कलम्बः ५। ३३। सिंहः कन्याक्षरामैरिषु ५। ३१-रिपुजसुखाभोषु ५। ३४-यूकोऽलिष्टव्यौ ५। ४१ वेदेशाव्योऽष्टप्यौक्षरहरमुख ५। १८ -कोदण्डमाङ्कवंराहाः॥ बन्धू रामश्च वेदो ४। ३४ रविसुतभवनः पर्व्वतः पञ्चरामः ३। ५७ कुम्भो मीनश्च भुक्तौ गिरिसुखदहनं ३। ४७ प्रत्यहं प्रक्रमेण। अयं यामित्रराशावनुदिनमवसायश्च गर्णावधानौ यद्वाविभक्तं मुग्धं स्यादुदयमनुदिवा-रामलाङ्कवराहाः ॥ * ॥ लग्नं लग्नान्तरं हन्तेति प्रकारान्तरेण यदुक्तं तदपि पद्येन लिख्यते यथा। वेदोऽङ्गै ४। ६-त्रिभिर्वेदैः श्रुति १। ४८-त्रिपुरिभ-पक्षैः ५। २८ कुवेदैश्च बाणो ५। ४१ बाणो नागाग्नि ५। ३३-निन्द्रियमपि नवाद्रिः ५। २९ विषः मत्तरामैः ५। ३७ बाणः मुन्याश्रिते ५।४० -षुर्विनिभ ५। १८-निपुणैरब्धि ४। ३५-ष्टेष-साधौ ३।५८ रामोऽब्धाद्रिस्तु ३। ४७ सिद्धान्त-स्मरतत्त्वदर्शनादिदं लग्नमानं॥
"चैत्रस्थेशाद्याहि तु विषुवात्स्यं यदा। तदेतल्लग्नमानं हि चैत्रमन्त्र साधनात्" ॥
इति ज्योतिषसंग्रहः॥ (गतिः। गमनं। मार्गः।
"गगनाद्विश्राद्यनात् समीपं दिगुत्तरा भास्वति सन्निवृत्ते"।
इति रघुवंशे। स्थानं। भूमिः। समरसमार-म्भकाले योधानां यथाप्रधानं युद्धभूमौ पूर्व्वाप-रादिदिग्विभागेनावस्थितिस्थानं। सेनासन्निवेश-विशेषः चक्रव्यूहप्रवेशमार्गः।
"अयनेषु च सर्व्वेषु यथाभागमवस्थिताः। भीष्ममेवाभिरक्षन्तु भवन्तः सर्व्व एव हि" ॥
इति भगवद्गीता। आश्रयः। विश्रामस्थानं।
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः" ॥
इति मनुः। गृहं। वसतिः। वासस्थानं। शास्त्रं। भावसाधनो यत्नः।
"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः। ज्योतिषामयनञ्चैव वेदाङ्गानि षड़ेव तु॥ छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ कथ्यते। ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते" ॥
इति कूर्म्मपुराणे।)
अयानयीनः, पुं, शारः। यथा। अनुपदसर्व्वान्नायानयं बद्धा भक्षयति नेयेषु। अयानयः स्थानविशेषः। तन्नेयः। अयानयीनः शारः। इति सिद्धान्त-कौमुदी॥
अयन्त्रितः, त्रि, (न यन्त्रितः, नञ्समासः ।) स्वाधः। अनर्गलः। इति हेमचन्द्रः॥ (अनियन्त्रितः। अनियमितः। स्वाधीनः।
"सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः। नायन्त्रितस्त्रिवेदोऽपि सर्व्वाशी सर्व्वविक्रयी" ॥
इति मनुः।)
अयस्कान्तः, पुं, (अयसः कान्तः रमणीयः ।) लौह-विशेषः। कान्तलौह इति ख्यातः। तत्प-र्य्यायः। कान्तलोहं २ कान्तं ३ लौहकान्तकं ४ कान्तायसं ५ कृष्णलोहं ६ महालोहं ७। अस्य गुणाः। तीक्ष्णत्वं। उष्णत्वं। रूक्षत्वं। पाण्डुशोथकफपित्तहरत्वं। रसायनत्वं। अनु-त्तमत्वञ्च। स चतुर्व्विधः। भ्रामकः १ चुम्बकः २ रोमकः ३ स्वेदकः ४। एते रसायने उत्त-रोत्तरगुणिनः।
"क्रमेण [illegible] [illegible] [illegible]"।
इति [illegible] [illegible]प्रकारोऽप्ययं। (चुम्बक

[illegible]

भरतः। (कातिम इति ख्यातः समक्रदण्डः।

"अनेकराजन्यरथाश्वसङ्कुलं
तदीयमास्थाननिकेतनाजिरं।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः"॥

इति किरातार्ज्जुनीये।)

अयुतं, क्ली, (न युतं, नञ्समासः।) दशसहस्रसंख्या। इति हेमचन्द्रः॥ १०००० दशहाजार इति भाषा। ("नागानामयुतं तुरङ्गनियुतं सार्द्धं रथानां शतं"। इति रामायणे।)

अयुतः, त्रि, (न युतः, नञ्समासः।) अमिश्रितः। अयुक्तः। यथा। अपृथग्भावोऽयुतसिद्धिः। इति चरकटीका॥ (असंयुक्तः। असंश्लिष्टः। संयोगरहितः। पुंसि सत्नामख्यातः राधिकस्य पुत्रः स च क्रोधनस्य पिता।)

अये, अ, (इण + एच्।) कोपः। विषादः। सम्भ्रमः। स्मरणं। इति मेदिनी॥ सम्बोधनं। इति शब्दरत्नावली॥ (कोमलामन्त्रणे। "अये कान्ते मुग्धे-षट्पदनयने चन्द्रवदने"। इत्युद्भटः। "अये कथं तातमारघिरम्बसेनः"। इति वेणीसंहारे।)

अयोगः, पुं, (युज् + घञ्, नञ्समासः।) विश्लेषः। विधुरः। कूटः। काठिनोद्यमः। इति मेदिनी॥ वमनविरेचनादीनां प्रतिलोमप्रवृत्तिरल्पप्रवृत्तिर्वा। यथा,—

"योगः सम्यक्प्रवृत्तिः स्यादतियोगोऽतिवर्त्तनं।
अयोगः प्रातिलोम्येन न चाल्पं वा प्रवर्त्तनं"।

इति वैद्यकं। ("तत्रासात्म्ये न्द्रियार्थसंयोगो-ऽयोगातियोगमिथ्यायोगादियुक्ता रूपरसादयः"॥ इति माधवकरक्षतरोगविनिश्चयग्रन्थे विजय-रक्षितः॥

"कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च। द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः"॥ "धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम्। असात्म्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः"॥ "सर्व्वथा अयोगः। चक्षुषो यो रूपाणाम् अतिमात्रं दर्शनमतियोगः। सर्व्वथा अदर्शनम् अयोगः। अतिसूक्ष्मातिप्रकृष्टातिविप्रकृष्ट-रौद्रभैरवाद्भुतद्विष्टबीभत्सविकृतादिरूपदर्शनं मिथ्यायोगः"। इति चरके।) योगो ध्यानं तदभावः। योगो मेलनं तदभावश्च। (विच्छेदः। विरहः।

"क्षपाचराः क्रूरतरा ... विरहेऽनया"॥ ... "अयोगे मेलनाभावे ... दर्पकारिः। ... अयोगिनी ... "।)

अयोग्य, त्रि, (अनर्ह ...)

[illegible]

"प्रसाधनोपचार...
मैरिभ्रं वागुरावृत्तिं ...
इति मनुः।)

अयोगुडः, पुं, (अयसा निर्मि... गुलिका। यथा,—

"वरमाशीविषविषं क्वथितं ...
पीतमत्यग्निसन्ताम्रा मखिना ...
इति चरकः॥

अयोग्रं, क्ली, (अयोऽग्रे मुखे ... इत्यमरः॥

अयोघनः, पुं, (अयांसि हन्यन्ते ... अप् + घनादेशश्च।) एकीभूत... इति भाषा। तत्पर्य्यायः। ... हेमचन्द्रः॥

("अयोघनेनाय इवाभितप्तं
वैदेहिबन्धोर्हृदयं विददे"।

इति रघुवंशे।

"कुरु करे गुरुमेकमयोघनं
बहिरितो मुकुरश्च कुरुष्व मे"।

इति नैषधे।)

अयोध्या, स्त्री, (योद्धुमशक्या, ... समासः।) श्रीरामनगरी। ... इति प्रसिद्धा। तत्पर्य्यायः। साकेतः ... इति हेमचन्द्रः॥ उत्तरकोशला। ... सा तु मोक्षदा। ...

"अयोध्या मथुरा माया काशी काञ्ची ...
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः"॥
"एतास्तु पृथिवीमध्ये न गण्यन्ते ...
श्रीरामधनुरग्रस्था अयोध्या सा महापुरी"।

इति भूतशुद्धितन्त्रम्॥ ... तद्वर्णनं—

"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता।
मनुना मानवेन्द्रेण या पुरी निर्म्मिता स्वयम्॥
आयता दश च द्वे च योजनानि ...
श्रीमती त्रीणि विस्तीर्णा सुविभक्त...
राजमार्गेण महता सुविभक्तेन ...
मुक्तपुष्पावकीर्णेन जलसिक्तेन ...
तान्तु राजा दशरथो महाराष्ट्र...
पुरीमावासयामास दिवि देवपतिर्यथा।
कपाटतोरणवती सुविभक्तान्तरापणा।
सर्व्वयन्त्रायुधवती मुषिता सर्व्वशिल्पिभिः।
सूतमागधसम्बाधा श्रीमत्यतुलप्रभा।
उच्चाट्टालध्वजवती शतघ्नीशतसङ्कुला।
वधूनाटकसङ्घैश्च संयुक्तां सर्व्वतः पुरीम्।
उद्यानाम्रवणोपेतां महतीं सालमेखलाम्।
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम्।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा।
सामन्तराजसङ्घैश्च बलिकर्म्मभिरावृताम्।
नानादेशनिवासैश्च वणिग्भिरुपशोभिताम्।
प्रासादै रत्नविकृतैः पर्व्वतैरिव शोभिताम्।
कूटागारैश्च सम्पूर्णामिन्द्रस्येवामरावतीम्"।

चित्रामष्टापदाकारां वरनारीगणैर्युतां ।
सर्व्वरत्नसमाकीर्णां विमानगृहशोभितां ॥
गृहगाढ़ामविच्छिद्रां समभूमौ निवेशितां ।
शालितण्डुलसम्पूर्णामिक्षुकाण्डरसोदकां ॥
दुन्दुभीभिर्म्मृदङ्गैश्च वीणाभिः पणवैस्तथा ।
नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमां ॥
विमानमिव सिद्धानां तपसाधिगतं दिवि ।
सुनिवेशितवेश्मान्तां नरोत्तमसमावृतां ॥
ये च वाणैर्न विध्यन्ति विविक्तमपरापरं ।
शब्दवेध्यञ्च विततं लघुहस्ता विशारदाः ॥
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने ।
हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ॥
तामग्निमद्भिर्गुणवद्भिरावृतां
द्विजोत्तमैर्व्वेदषड़ङ्गपारगैः ।
सहस्रदैः सत्यरतैर्महात्मभि-
र्म्महर्षिकल्पैरृषिभिश्च केवलैः" ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे पञ्चमः सर्गः ॥ * ॥

"तस्यां पुर्य्यामयोध्यायां वेदवित् सर्व्वसंग्रहः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥
इक्ष्वाकूणामतिरथो यज्वा धर्म्मपरो वशी ।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥
बलवान्निहतामित्रो मित्रवान् विजितेन्द्रियः ।
धनैश्च सञ्चयैश्चान्यैः शक्रवैश्रवणोपमः ॥
यथा मनुर्महातेजा लोकस्य परिरक्षिता ।
तथा दशरथो राजा लोकस्य परिरक्षिता ॥
तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता ।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥
तस्मिन् पुरवरे हृष्टा धर्म्मात्मानो बहुश्रुताः ।
नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ॥
नाल्पसन्निचयः कश्चित्तदा तस्मिन् पुरोत्तमे ।
कुटुम्बी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान् ॥
कामी वा न कदर्य्यो वा नृशंसः पुरुषः क्वचित् ।
द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः ॥
सर्व्वे नराश्च नार्य्यश्च धर्म्मशीलाः सुसंयताः ।
मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥
नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान् ।
नामृष्टो न न लिप्ताङ्गो नासुगन्धश्च विद्यते ॥
नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ।
नाहस्ताभरणो वापि दृश्यते नाप्यनात्मवान् ॥
नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः ।
कश्चिदासीदयोध्यायां न चावृत्तो न सङ्करः ॥
स्वकर्म्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।
दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥
नास्तिको नानृती वापि न कश्चिदबहुश्रुतः ।
नासूयको न चाशक्तो नाविद्वान् विद्यते क्वचित् ॥
नाषड़ङ्गविदत्रास्ति नाव्रतो नासहस्रदः ।
न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥
कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् ।
द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥
वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः ।
कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥
दीर्घायुषो नराः सर्व्वे धर्म्मं सत्यञ्च संश्रिताः ।
सहिताः पुत्त्रपौत्त्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥
क्षत्त्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्त्रमनुव्रताः ।
शूद्राः स्वकर्म्मनिरतास्त्रीन् वर्णानुपचारिणः ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ।
यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥
योधानामग्निकल्पानां पेशलानाममर्षिणां ।
सम्पूर्णा कृतविद्यानां गुहा केशरिणामिव ॥
काम्बोजविषये जातैर्व्वाह्लीकैश्च हयोत्तमैः ।
वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥
विन्ध्यपर्व्वतजैर्मत्तैः पूर्णा हैमवतैरपि ।
मदान्वितैरतिबलैर्मातङ्गैः पर्व्वतोपमैः ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा ।
अञ्जनादपि निष्क्रान्तैर्वामनादपि च द्विपैः ॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा ।
भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ॥
नित्यमत्तैः सदा पूर्णा नागैरचलसन्निभैः ।
सा योजने द्वे च भूयः सत्यनामा प्रकाशते ॥
तां पुरीं स महातेजा राजा दशरथो महान् ।
शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥
तां सत्यनामां दृढ़तोरणार्गलां
गृहैर्व्विचित्रैरुपशोभितां शिवां ।
पुरीमयोध्यां नृसहस्रसंकुलां
शशास वै शक्रसमो महीपतिः" ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे षष्ठः सर्गः ॥ दृढ़ायोध्ये त्रि ॥

अयोमलं, क्ली, (अयसो मलमिव ।) लौहमलं । इति राजनिर्घण्टः ॥ लोहार गु इति भाषा । तत्पर्य्यायः । मण्डूरं २ लौहकिट्टं ३ । तस्य गुणाः ।
"शतोर्द्धमुत्तमं किट्टं मध्यञ्चाशीतिवर्षकं ।
अधमं षष्टिवर्षीयं ततो हीनं विषोपमं ॥
यल्लौहं यद्गुणं प्रोक्तं तत्किट्टञ्चापि तद्गुणं" ।
इति वैद्यकं ॥
(अस्य शोधनमारणं यथा,—
"दग्ध्वाक्षकाष्ठैर्म्मलमायसन्तु,
गोमूत्रनिर्व्वापितमष्टवारान् ।
विचूर्ण्य लीढ़ं मधुना चिरेण,
कुम्भाह्वयं पाण्डुगदं निहन्ति" ॥
इति वैद्यकचक्रपाणिसंग्रहः ॥)

अरं, क्ली, (इयर्त्ति गच्छत्यनेन, ऋ + अच् ।) शीघ्रं । चकाङ्ग । चाकार पाकि इति भाषा । शीघ्रगे त्रि । इति मेदिनी ॥

अरः, पुं, (ऋ + अच् ।) जिनानां कालचक्रस्य द्वादशांशः । स तु अवसर्पिण्याः षष्ठभागः ॥ जिनानामष्टादशतीर्थङ्करः । इति हेमचन्द्रः ॥

अरकः, पुं, (अ + अकन् ।) शैवालं । इति हारावली ॥ पर्पटः । इति राजनिर्घण्टः ॥

अरग्वधः, पुं, आरग्वधवृक्षः । सोंदालि इति ख्यातः । इत्यमरटीकायां भरतः ॥ (अस्य गुणादयः आरग्वधशब्दे ज्ञेयाः ।)

अरघट्टः, पुं, (अरं शीघ्रं घट्यते चाल्यतेऽसौ, अर + घट्ट + अच् ।) महाकूपः । इत्यमरजटाधरौ ॥ (कूपात् जलनिःसारणार्थं घटीयन्त्रभेदः । कूपोपरिनिबद्धजलोत्तोलककाष्ठभेदः । "स कदाचिद्दायादैरुद्वेजितोऽरघट्टघटिकामारुह्य कूपात् क्रमेण निष्क्रान्तः" । इति पञ्चतन्त्रे ।)

अरघट्टकः, पुं, (अरघट्ट + स्वार्थे कन् ।) महाकूपः । तत्पर्य्यायः । पादावर्त्तः २ । इति हेमचन्द्रः ॥

अरजाः, [स्] स्त्री, (रजस् + असुन्, नलोपः नञ्समासः ।) कन्या । कुमारी । इति हेमचन्द्रः ॥ रजोगुणरहिते त्रि ॥ (निर्म्मलः । धौतः । परिष्कृतः ।)

अरडुः, पुं, (अरं शीघ्रं अटति, अट् + उन् ।) अरलुवृक्षः । इत्यमरटीकायां रायमुकुटः ॥

अरणिः, पुं, (ऋ + अनि ।) गणिकारिकावृक्षः । इति मेदिनी ॥ सूर्य्यः । इति काशीखण्डं ॥

अरणिः, पुं, स्त्री, (ऋ + अनि ।) निर्म्मन्थ्यदारु । अग्निसाधनीभूतकाष्ठं । घर्षणद्वाराग्निजनककाष्ठं । इत्यमरः ॥ (अग्निमन्थनकाष्ठं । अग्न्युत्पादनाय यत्काष्ठं काष्ठान्तरेण घृष्यते तदरणिनामकं काष्ठं ।
"विपक्षवक्षोऽरणिमन्थनोत्थः
प्रतापवह्नेरिव धूमलेखा" ।
इति धनञ्जयविजयव्यायोगे ।)

अरणी, स्त्री, अरणिः । इत्यमरटीकायां भरतः ॥
("विधिना मन्त्रयुक्तेन रूक्षाऽपि मथिताऽपि च ।
प्रयच्छति फलं भूमिररणीव हुताशनम्" ॥
इति पञ्चतन्त्रे ।)

अरणीकेतुः, पुं, (अरणी केतुरस्य सः ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

अरण्यं, क्ली, (अर्य्यते मृगैः, ऋ गतौ, अर्त्तेर्निरिति अन्यः ।) वनं । इत्यमरः ॥ (मोक्षप्रदं दण्डकादिकं नवारण्यं । यदुक्तं,—
"दण्डकं सैन्धवारण्यं जम्बुमार्गञ्च पुष्करं ।
उत्पलावर्त्तकारण्यं नैमिषं कुरुजाङ्गलं ॥
हिमवानर्ब्बुदश्चैव नवारण्यं विमुक्तिदं" ।)

अरण्यः, पुं, कट्फलवृक्षः । इति शब्दचन्द्रिका ॥ (स्वनामख्यातो रैवतस्य मनोः पुत्त्रः । यदुक्तं हरिवंशे,—
"अरण्यश्च प्रकाशश्च निर्मोहः सत्यवान् कृती ।
रैवतस्य मनोः पुत्त्राः पञ्चमस्यैतदन्तरं" ।)

अरण्यकदली, स्त्री, (अरण्यस्येव कदली, षष्ठीतत्पुरुषः ।) गिरिकदली । इति राजनिर्घण्टः ॥ (वनकदली । इयं ग्रामादौ न जायते ।)

अरण्यकार्पासी, स्त्री, (अरण्ये कार्पासी, सप्तमीतत्पुरुषः ।) वनकार्पासी । तत्पर्य्यायः । वनजा २ भारद्वाजी ३ वनोद्भवा ४ । अस्या गुणाः । हिमत्वं । रुजत्वं । व्रणक्षतनाशित्वञ्च । इति राजनिर्घण्टः ॥

अरण्यकुलत्थिका, स्त्री, (अरण्यस्य कुलत्थिका, षष्ठीतत्पुरुषः ।) [illegible]या । इति राजनिर्घण्टः ॥ वनकुलत्थी इ[illegible] ।

[illegible] (अरण्यस्य कुमु[illegible] षष्ठीतत्-

…। तत्पर्य्यायः। कौद्रमः २ [illegible] अम्लरूखाः शाके कटुकं। दीपनं [illegible] [illegible]। रुचिकृद्वातपित्तघ्न। इति राजनिर्घण्टः॥

अरण्यगोधी, स्त्री, (अरण्यस्य गोधी, कर्म्मधारयः।) वनगोधी। वनग्रामविशेषः। इति राजनिर्घण्टः॥

अरण्यचटक, पुं, (अरण्यस्य चटकः, षष्ठीतत्पुरुषः।) वनचटकः। तत्पर्य्यायः। धूमरः २ भूमिशयः ३। अस्य गुणाः। शीतलं। लघुत्वं। शुक्रवृद्धिकारित्वं। बलप्रदत्वं। इति राजनिर्घण्टः॥ (अस्य मांसगुणा यथा राजनिर्घण्टे,—
"चटकामांसं तु शीतं लघु वृष्यं बलप्रदं।
तस्मादरण्यचटकं लघुस्निग्धं ग्राहकम्"॥)

[illegible]

नां विन्ध्यवासिनीं स्कन्धषष्ठीमाराधयन्ति च।
कन्दमूलफलाहारा लभन्ते सन्ततिं शुभां"॥
कन्दं सूरणादि। मूलं तदितरत्। इति तिथ्यादितत्त्वं॥

अरण्यानी, स्त्री, (अरण्य+आनुक्+स्त्रियां ङीष्। महत् अरण्यम् इत्यस्मिन् अर्थे इन्द्रवरुणेति सूत्रस्थेन हिमारण्ययोर्महत्त्वे इति वार्त्तिकेन अरण्यशब्दस्य आनुगागमः, ततो ङीष्।) महावनं। इत्यमरः॥ ("अस्ति मगधदेशे चम्पकवती नामारण्यानी" इति हितोपदेशे।)

अरतत्रप, पुं, स्त्री, (अरता विरता त्रपा यस्य।) कुक्कुरः। इति त्रिकाण्डशेषः॥ रतलज्जे त्रि॥ (नास्ति रते मैथुने त्रपा लज्जा यस्य सः।)

अरति, पुं, (ऋ+अति।) क्रोधः। इत्यादिकोषः॥

अरतिः, स्त्री, (रम्+क्तिन्, नञ्समासः।) अनवस्थितचित्तत्वं। इति रत्निकः॥ क्रीडाभावः। इति बालिकः॥ रतिविरहः। रतिशून्ये त्रि॥ (विरक्तिः। प्रीतिविरहः। अनुरागराहित्यं। उत्साहहीनता। उद्यमाभावः। उद्योगराहित्यं। निश्चेष्टता। सुखाभावः। दुःखं। शोकः। औत्सुक्यं। उद्वेगः। इष्टवियोगात् चित्तस्याकुलीभावः। यदुक्तं,—
"आभीष्टवस्त्वलाभेन चेतसो यानवस्थितिः।
अरतिः सा तु विज्ञेया"। सन्तुष्टताभावः। अस्वास्थ्यं।
"श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः"।
इति सुश्रुते।)

अरत्नि, पुं, (ऋ+अत्नि, रत्नि बद्धमुष्टिकरः, स नास्ति यस्य।) विस्तृतकनिष्ठाङ्गुलिमुष्टिकाहस्तः। कूर्परः। इति मेदिनी॥
("अरत्निविंशतियूपाश्च ... अरत्निपरास्य"।
इति रामायणे। कफोणिः। हस्तः। करतलपार्श्वं। बद्धमुष्टिहस्तः। कोण, घुसी इत्यादि भाषा।
"परा मुष्टिं महाबाहुः प्रगृह्य विनदिष्यतः।
तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना"॥
इति महाभारते।)

अरन्ध्र, क्ली, (न रन्ध्रं, यत्र अभावे नञ्।) [illegible] [illegible] बलाद्बलात् इति [illegible] [illegible] [illegible]। इति [illegible]।
"[illegible]"
[illegible]

अरम्, त्रि, (न रमते, अभावे नञ्।) [illegible]। इत्यमरटीकायां भरतः॥ (नीच। [illegible]।)

अरं, त्रि, (ऋ+अम्।) [illegible]। इत्यमरः॥ [illegible] इति त्रिकाण्डशेषः॥ [illegible]

अरर, पुं, (ऋ+अर।) [illegible]। कौमुद्यामुणादिवृत्तिः॥ (अस्याते [illegible]।)

अररे, अ, (अरं शीघ्रं राति, रा+के।) सम्बुद्धिः। शीघ्रसम्बोधनं। इति शब्दरत्नावली। (शीघ्रं प्रयुक्तरत्नाभेच्छया हते सम्बोधने।
"अरे विकारसम्बोधे अररे त्वरान्विते"।
इति शब्दरत्नावली।)

अरलु, पुं, (अरं शीघ्रं लाति, ला+कु, ड+ल, रस्य ल।) श्योनाकवृक्षः। इत्यमरः॥ [illegible] इति भाषा।

अरविन्दं, क्ली, (अराकाराणि दलानि सन्त्यस्यात् अराः, तान् विन्दति लभते इति, विद्+श।) पद्मं। सारसपक्षी। इत्यमरः॥ रक्तकमलं। नीलोत्पलं। इति राजनिर्घण्टः॥
("उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम्"। इति कुमारसम्भवे।
"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलं।
स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्"।
इति साहित्यदर्पणे।)

अरविन्दिनी, स्त्री, (अरविन्द+इनि, ङीप्।) नलिनी। इति शब्दरत्नावली॥ पद्माकरः। इति रत्नमाला॥

अरसिकः, त्रि, (रसं वेत्ति, रस+ठन्, नञ्समासः।) अरसज्ञः। अविदग्धः। यथा,—
"[illegible] अरसिकेषु रसस्य निवेदनं शिरसि मा लिख मा लिख"॥ इत्युद्भटः॥

अराजकः, त्रि, (नास्ति राजा यत्र [illegible]।) राजशून्यदेशादिः। यथा,—
"चौरप्रायं जनपदं हीनसत्त्वमराजकम्"।
इति श्रीभागवतं॥ (नियमरहितः।
"अराजके जनपदे दोषा जायन्ते वै
उद्वृत्तं सततं लोकं राजा दण्डेन शास्ति"।
इति महाभारते।)

अराजन, पुं, (नास्ति राजा यत्र स, बहु।) राजशून्यदेशादि। यथा,—
"अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः"।
इति मानवे ७ अध्याये॥ ३ श्लोक॥

अराति, पुं, (न राति ददाति इत्यर्थः, नञ्समासः।) शत्रुः। इत्यमरः॥
("अरातिविक्रमालोकविकस्वरविलोचनः"।
इति साहित्यदर्पणे।
"[illegible]"।
इति [illegible]।)

अरालं, त्रि, (ऋ+आलच्, बाहुलकात् [illegible]।) कुटिलं। वक्रं। इत्यमरः॥
("[illegible]"
इति [illegible]।)

[illegible]

ः, पुं, (ऋ + विच्, अरमालाति, आ + ला
क ।) सर्ज्जरसः । मत्तहस्ती । इति मेदिनी ॥
हस्तः । इति शब्दरत्नावली ॥
ा, स्त्री, (अराल + स्त्रियां टाप्) अरालः ।
टा । इति शब्दरत्नावली ॥
, पुं, (ऋ + इन् ।) शत्रुः । इत्यमरः ॥
उपकारिणा सन्धिर्न मित्रेणापकारिणा" ।
ते हितोपदेशे । [इति मनुः ।)
अनन्तरमरिं विद्यादरिसेविनमेव च" ।
क्रं । इति त्रिकाण्डशेषः ॥ खदिरभेदः । तत्प-
ायः । सन्दानिका २ दाली ३ खदिरपत्रिका ४ ।
स्य गुणाः । कषायत्वं । कटुत्वं । तिक्तत्वं ।
कार्त्तिपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥
त्रं, स्त्री, (षट्प्रत्ययेन, ऋ + इत्र ।) कार्णः ।
ालि इति भाषा । तत्पर्य्यायः । केनिपातकः २ ।
त्यमरः ॥ केनिपातः ३ । इति भरतः ॥ ("लोलै-
रित्रैश्चरणैरिवाभितः" । इति माघः ।)
न्दमः, त्रि, (अरीन् शत्रून् कामादीन् वा दाम्यति
मयति, दम् + अन्तर्भूतण्यर्थे खच् मुम्, उपपद-
मासः ।) शत्रुदमनकारकः । इति मुग्धबोध-
ाकरणं ।
"यथाकामं यथोत्साहं यथाकालमरिन्दम ।
सेविता विषयाः पुत्र यौवनेन मया तव" ॥
'ज्ञात्वा तु तदहं सर्व्वमादौ पाण्डुनन्दनाः ।
ुरङ्गा विविशुर्न्नृपं माता सार्द्धमरिन्दमाः" ॥
इति महाभारते ।)
मेदः, पुं, (अरिं रोगरूपं शत्रुं मृद्नाति, मृद
+ अण्, उपपदसमासः ।) कासमर्दवृक्षः । इति
राजनिर्घण्टः ॥ (त्रि, शत्रुमर्द्दनकारी ।)
रिमेदः, पुं, (अरेर्विट्खदिरस्येव मेदः सारः
यस्य सः ।) वृक्षविशेषः । गूया बावला इति
भाषा । तत्पर्य्यायः । इरिमेदः २ रिमेदः ३
गोधास्कन्दः ४ अहिमेदकः ५ अहिमारः ६ पूति-
मेदः ७ अहिमेदकः ८ विट्खदिरः ९ । अस्य
गुणाः । कषायत्वं । उष्णत्वं । तिक्तत्वं । भूत-
विनाशित्वं । शोषातिसारकासविषवीसर्पनाशि-
त्वञ्च । इति राजनिर्घण्टः ॥
(अस्य व्यवहारो यत्र तदौषधं यथा,—
"तुलां हृतां कीलमहाघरस्य,
द्रोणेऽम्भसः संश्रपयेद्यथावत् ।
पूतां चतुर्भागरसे तु तैलं,
पचेच्छनैरर्द्धपलप्रयुक्तैः ॥
कल्कैरनन्ताखदिरारिमेद-
जम्बाम्रयष्टीमधुकोत्पलानां ।
तत्तैलमाश्वेव धृतं मुखेन,
स्थैर्य्यं द्विजानां विदधाति सद्यः" ॥ * ॥
महाखदिरं तैलं ॥ इति वैद्यकचक्रपाणिसंग्रहः ।)
अरिष्टं, क्ली, (रिष हिंसायां कर्त्तरि क्त, नञ्-
समासः ।) सूतिकागृहं । ("अरिष्टशय्यां परितो
विसारिणा सुजन्मनस्तस्य निजेन तेजसा" । इति
रघुवंशे ।) अशुभं । तक्रं । मरणचिह्नं । (यदुक्तम्,
"रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्याद् रिष्टमप्यभिधीयते" ॥)
शुभं । इति मेदिनी ॥ उपद्रवः । तत्पर्य्यायः । उप-
लिङ्गः २ उपसर्गः ३ अजन्यं ४ ईतिः ५ उत्पातः ६ ।
इति हेमचन्द्रः ॥ (मद्यं । यथा । द्राक्षारिष्टं ।
दशमूलारिष्टं । बब्बूलारिष्टं ।
"अरिष्टं लघुपाकेन सर्व्वतश्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया वीजद्रव्यगुणैः समाः" ॥
इति वैद्यके ।)
("मरणचिह्नार्थे लक्षणं यथा । नियतमरणा-
ख्यापकलिङ्गं ॥ इति माधवसंग्रहीतरोगविनि-
श्चयग्रन्थटीकाविजयरक्षितः ॥ * ॥ तत्र प्रकृत-
वर्णोऽर्द्धशरीरे विकृतवर्णोऽर्द्धशरीरे द्वावपि वर्णौ
मर्य्यादाविभक्तौ दृष्ट्वा यथैवं सव्यदक्षिणविभा-
गेन यथैवं पूर्व्वपश्चिमविभागेन यद्युत्तराधर-
विभागेन यद्यन्तर्व्वहिर्विभागेनातुरस्यारिष्टमिति
विद्यात्" ॥ इति चरकः ।
"शरीरशीलयोर्यस्य प्रकृतेर्विकृतिर्भवेत् ।
तत्त्वरिष्टं समासेन व्यासतस्तु निबोध मे" ॥
इति च सुश्रुतः ॥)
अरिष्टः, पुं, (रिष हिंसायां कर्त्तरि क्त, नञ्समासः ।)
लशुनः । निम्बः । फेनिलवृक्षः । काकः । कङ्क-
पक्षी । इति मेदिनी । वृषभासुरः । इत्यनेकार्थ-
ध्वनिमञ्जरी ॥ मद्यविशेषः । इक्षुविकारसहिता-
भयाचित्रकदन्तीपिप्पल्यादिभूरिभेषजक्वाथादिसं-
स्कारवान् अरिष्टोऽभिधीयते । इति सुश्रुतटीका ॥
अस्य गुणः । अर्शःशोथग्रहणीकफरोगनाशित्वं ।
इति राजवल्लभः ॥
("द्रवेषु चिरकालस्थं द्रव्यं यत्संहितं भवेत् ।
आसवारिष्टभेदैस्तत् प्रोच्यते भेषजोचितं ॥
यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं पलोन्मितं" ॥
इति शार्ङ्गधरः ॥ गुणोऽस्य यथा चरकेणोक्तः ॥
"शोथार्शोग्रहणीदोषपाण्डुरोगारुचिज्वरान् ।
हन्त्यरिष्टः कफकृतानेतान् रोचनदीपनः ॥ * ॥
दन्तीचित्रकमूलानामुभयोः पञ्चमूलयोः ।
भागान् पलांशानापोथ्य जलद्रोणे विपाचयेत् ॥
त्रिफलाया दलानाञ्च प्रक्षिप्य त्रिपलं ततः ।
रसे चतुर्थशेषे तु पूते शीते समावपेत् ॥
तुलां गुडस्य तत्तिष्ठेत् मासार्द्धं घृतभाजने ।
तन्मात्रया पिबेन्नित्यं अर्शोभ्योऽपि प्रमुच्यते ॥
ग्रहणीपाण्डुरोगघ्नं वातवर्च्चोऽनुलोमनं ॥
दीपनञ्चारुचिघ्नञ्च दन्त्यरिष्टमिदं विदुः" ॥
इति दन्त्यरिष्टः । इति चरकः ॥
"अरिष्टो मद्यसंयोगसंस्कारादधिको गुणैः ।
बहुदोषहरश्चैव दोषाणां शमनश्च सः ॥
दीपनः कफवातघ्नः सरः पित्ताविरोधनः ।
शूलाध्मानोदरप्लीहज्वराजीर्णार्शसां हितः" ॥
इति सुश्रुतः ।)
अरिष्टकः, पुं, (अरिष्ट इव स्वार्थे क ।) फेनिलवृक्षः ।
इति शब्दरत्नावली ॥ रीठाकरञ्ज इति ख्यातः ।
अरिष्टशब्दार्थोऽप्यत्र ॥ रिठा इति भाषा । (अस्य
गुणा यथा,—
"अरिष्टकश्छर्दिदोषघ्नो ग्रहजिद्गर्भपातनः" ।
इति । सूतफलचूर्णैर्हि कृतपानां नेपालदेशीय-
कम्बलानामित्यर्थः प्रक्षालनात् शुद्धिर्भवतीति शा-
स्त्रविदां मतम् । यदुक्तं मनुना,
"कौषेयाविकयोरूषैः कुतपानामरिष्टकैः ।
श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः" ॥ इति)
अरिष्टतातिः, त्रि, (अरिष्ट + तातिल् ।) क्षेमङ्क-
रः । शुभङ्करः । इति भूरिप्रयोगः ॥ (स्त्री, शुभा-
शंसनं । सौभाग्यवृद्धिः । कुशलातिशय्यं । "तदत्र-
भवता निष्पन्नाशिषां काममरिष्टतातिमाशा-
स्महे" । इति महावीरचरिते ।)
अरिष्टदुष्टधीः, त्रि, (अरिष्टेन मरणसूचकनिमित्तेन
दुष्टा धीरस्य ।) आसन्नमरणसूचितलक्षणेन दू-
षितबुद्धिः । मरणकुबुद्धियुक्तः । तत्पर्य्यायः ।
विवशः २ । इत्यमरः ॥
अरिष्टनेमिः, पुं, (अरिष्टस्य नेमिः, षष्ठीतत्पुरुषः ।)
जिनानां चतुर्विंशत्यन्तर्गतद्वाविंशतितीर्थङ्करः ।
इति हेमचन्द्रः ॥ (विनतागर्भसम्भूतः स्वनामख्यातः
काश्यपमुनिपुत्रः, यथा हरिवंशे,
"तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्च महाबलः ।
अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः" ॥
दक्षस्य प्रपौत्रश्चित्रकस्य पुत्रः स्वनामख्यातो राजा,
यथा, हरिवंशे,
"चित्रकस्याभवन् पुत्राः पृथुर्विपृथुरेव च ।
अश्वग्रीवोऽश्ववाहश्च सुपार्श्वकगवेषणौ ।
अरिष्टनेमिरश्वश्च सुधर्म्मा धर्म्मभृत्तथा" ॥
स्वनामख्यातः प्रजापतिः । यथा रामायणे,
आदिकाले महाबाहो ये प्रजापतयोऽभवन् ।
दक्षो विवस्वानपरोऽरिष्टनेमिस्तथैव च ।
काश्यपश्च महाभागस्तेषामासीदपश्चिमः" ॥)
अरिष्टसूदनः, पुं, (अरिष्टं तन्नामानमसुरं सूदयति
यः, अरिष्टस्य सूदनः नाशक इति वा ।) विष्णुः ।
इति त्रिकाण्डशेषः ॥ शुभाशुभनाशके त्रि ॥
(कृष्णः । स खलु मायुरे कल्पे अरिष्टनामानमसुरं
सूदितवान् ।)
अरिष्टा, स्त्री, (अरिष्ट + स्त्रियां टाप् ।) कटुका ।
इति राजनिर्घण्टः ॥ कट्की इति भाषा ।(स्वनाम-
ख्याता काश्यपपत्नी, सा हि सर्व्वान् गन्धर्व्वान्
जनयामास । यथा,—
"अरिष्टा तु महासत्त्वान् गन्धर्व्वानमितौजसः" ॥
इति हरिवंशे ।)
अरुः, [स्] पुं, (ऋ + उसि ।) सूर्य्यः । इत्युणादि-
कोषः ॥ रक्तखदिरः । इति राजनिर्घण्टः ॥
अरुः, [स्] पुं, क्ली, (ऋ + उस् ।) व्रणं । क्षतं ।
इत्यमरः ॥
अरुः, [स्] क्ली, (ऋ + उसि ।) मर्म्म । सन्धि-
स्थानं । इत्युणादिकोषः ॥
अरुचिः, पुं, (न रुचिर्यत्र सः ।) रोगभेदः ।
स च सप्तभिराशयैरभ्यवहाराणामरुचिरूपः । इति
रक्षितः ॥ तत्पर्य्यायः । अरोचकः २ अश्रद्धा ३
अनभिलाषः ४ । इति राजनिर्घण्टः ॥
("दोषैः पृथक् सह च चित्तविपर्य्ययाच्च,

...मक्षोयनेषु यदि चावतते प्रगाढं ।
नाम्ने रुचिर्भवति तं भिषजो विकारं,
भक्तोपघातमिह पञ्चविधं वदन्ति" ॥
इति सुश्रुतः । अन्यहारस्याखोक्तरसविधस्फार-
दशामध्ये परिगणितो वस्तुवैराग्यरूपः स्मरदशा-
विशेषः, यथा साहित्यदर्पणे,—
"अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशताऽरुचिः ।
अधृतिर्वस्तुवैराग्यं सर्व्वभारागिता धृतिः" ॥
अरुजः, पुं, (रुजति, रुज् + क, नञ्समासः ।) आर-
ग्वधवृक्षः । इति राजनिर्घण्टः ॥ सोंदालि इति
भाषा । (स्वनामख्यातदानवविशेषः ।
"प्रह्रादोऽश्वशिरा. कुम्भः संह्रादो गगनप्रियः ।
अनुह्रादो हरिहरौ वराहः संहरोऽरुजः" ॥
इति हरिवंशे ।)
अरुणं, क्ली, (ऋ + उनन् ।) कुङ्कुमं । सिन्दूरं । इति
राजनिर्घण्टः ॥
अरुणः, पुं, (ऋ + उनन् ।) सूर्य्यसारथिः । स तु
विनतापुत्रः गरुड़ज्येष्ठभ्राता च । तत्पर्य्यायः ।
सूरसूतः २ अनूरुः ३ काश्यपिः ४ गरुड़ाग्रजः ५
सूर्यः । अर्कः । अव्यक्तरागः । ईषद्रक्तवर्णः ।
इत्यमरः । सन्ध्यारागः । शब्दरहितः । कपिल-
वर्णः । कुष्ठभेदः । अरुणगुणविशिष्टे तु वाच्य-
लिङ्गः । इति मेदिनी ॥ पुन्नागवृक्षः । गुड़ः ।
इति राजनिर्घण्टः ॥ (कपिलवर्णयुक्तः । श्याव-
मिश्रितरक्तवर्णविशिष्टः ।
"कपोताङ्गारुणो धूमो दृश्यते विमलाम्बरे" ।
इति रामायणे ।)
अरुणकमलं, क्ली, (कृष्णसर्पइत्यादिवत् नित्यकर्म-
धारयः ।) रक्तोत्पलं । इति राजनिर्घण्टः ॥
अरुणलोचनः, पुं, (अरुणे रक्ते लोचने यस्य सः ।)
पारावतः । इति राजनिर्घण्टः ॥
अरुणसारथि, पुं, (अरुणः गरुड़ाग्रजः सारथिर्यस्य
सः ।) सूर्यः । इति हेमचन्द्रः ॥
अरुणा, स्त्री, (अरुण + स्त्रियां टाप् ।) अतिविषा ।
श्यामा । मञ्जिष्ठा । त्रिवृता । इति मेदिनी ॥
इन्द्रवारुणी । गुञ्जा । इति राजनिर्घण्टः ॥ मुण्डि-
तिका । इति रत्नमाला ॥
...ात्मजः, पुं, (अरुणस्य आत्मजः, षष्ठीतत्पुरुषः ।)
...टायुपक्षी । इति त्रिकाण्डशेषः ॥
...वरजः, पुं, (अरुणस्य अवरजः षष्ठीतत्पुरुषः ।)
...ड़ः । इति हेमचन्द्रः ॥
...रुणावरजं श्रीमानारुरोह रथे हरिः ।
...न वसुधा सुपर्णं रिपरोमसम्" ॥
...रिवंशे ।)
..., पुं, (अरुणस्य सूर्य्यसारथेः उदयो यत्र
...र्य्योदयात् पूर्व्वे मुहूर्तद्वयकालः । यथा,—
...ो घटिकाः प्रातररुणोदय उच्यते ।
...ानकालोऽयं गङ्गाम्भःसदृशः स्मृतः" ॥
...रार्द्धं । (यदुक्तं,—
...दामस्य सैताद्धंमरुणोदय." । इति ।
...श्च दो दण्डाश्चारुणोदये" ।
।)

अरुणोदयसप्तमी, स्त्री, (अरुणोदयकाले पुण्य-
विशेषजनिका या सप्तमी ।) माघशुक्लसप्तमी ।
माकरी सप्तमी । यथा । भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलं ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा" ॥
कोटिभास्करा कोटिसप्तमीतुल्या । सूर्य्यग्रहण-
फलं स्नानजं सन्निहिते मुद्गिरमारङ्गा इति
न्यायात् । तेन बहुशतसूर्य्यग्रहणकालीनगङ्गा-
स्नानजन्यफलसमफलप्राप्तिः फलमत्र ज्ञेयं । अत्र
बहुशतसूर्य्यग्रहणानां प्रत्येकाधिकरणतासंसर्गे-
णान्वयात् कालानां स्नानानां तत्फलानामपि बहु-
शतत्वं लभ्यते । अतो नाप्रसिद्धिः ॥ ० ॥ पूर्व्व-
सप्तम्या पूर्व्वापरयोर्व्वारुणोदयकाले सप्तमी तत्र
पूर्व्वदिने तत्काले स्नानं ।
"चतस्रो घटिकाः प्रातररुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ॥
त्रियामा रजनी प्रोक्ता त्यक्त्वाद्यन्तचतुष्टयं ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ॥
इति कालमाधवीयधृतब्रह्मवैवर्त्तीयेन पूर्व्वस्य तत्-
कालस्य पूर्व्वतिथिसम्बन्धिदिनकार्य्यकर्म्माङ्गत्वेन
इतरस्य चेतराङ्गत्वेनाभिधानात् । अतएव दक्षेण
तत्कालमारभ्याह्निककृत्यमभिहितं ॥ ० ॥ अत्रा-
रुणोदयकाले मुहूर्त्तान्यूनतिथिलाभ एव स्नानं ।
"व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।
उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी" ॥
इति विष्णुधर्म्मोत्तरात् । अत्र घटिका मुहूर्त्तः
श्राद्धयोग्यकालानुरोधादिति वक्ष्यते । ब्रह्मवैवर्त्त-
वचने घटिका दण्डरूपा । परवचने नाड़ीनामा-
द्यन्तचतुष्टयमित्येकवाक्यत्वात् ॥ ० ॥ ये तु सूर्य्यो-
दयात् प्रागपि प्रातःस्नानविधानात् तत्रैव माघ-
सप्तम्यास्नगुणफलविधिर्णायत्रादित्याहुस्तच्चिन्त्यं ।
प्रकरणान्यत्वे प्रयोजनान्यत्व इति जैमिनिसूत्रेण
प्रकरणभेदे गुणविध्यसिद्धेः । अतएव कल्पतरु-
रत्नाकरयोः ।
"य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ" ॥
इति । विष्णुस्मृतौ । "यथाहनि तथा प्रातर्नित्यं
स्नायादनातुरः" । इति नित्यस्नानप्रकरणात् प्रक-
रणान्तरपाठात् प्रकरणान्तराधिकरणन्यायेन
काम्यस्नानान्तरमिदमप्युक्तं । न तु गुणफलविधिः ।
किन्तु काम्यकरणे प्रसङ्गान्नित्यसिद्धिरिति ॥ ० ॥
अत्र माघमासनिमित्तकमाघसप्तमीनिमित्तक-
काम्यस्नानयोः प्रातर्विधानात् नैमित्तिकत्वेन प्राय-
श्चित्तवत् सकृदनुष्ठानं । "प्रधानस्याक्रिया यत्र
साङ्गं तत् क्रियते पुनः । तदङ्गस्याक्रियायान्तु
नावृत्तिर्न च तत्क्रिया" ॥ इति कात्यायनवचनात् ।
"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये" ॥

इति मनुवचनैककालताग्यगम्यते ...
"धर्मार्थिमाचरेत् स्नानमाह्निक...
इति मनुवचनाच । अत्र ...
शेषे प्रधानानामपि काम्यानां
विहितानां सङ्कोचेन निर्द्दिष्टि...
मपि ॥ निष्कामविष्णुप्रीतिकामयो...
रनुष्ठानं । गुणतारतम्यात् फल...
न्यायेन फलं बोध्यं । तत्र ...
भेदनिर्द्देशमप्युक्तं ।
"पद्माकरेऽपि कन्यास्थे रवौ ...
कन्यागते पञ्चमे तु विशेषेणैव कारयेत्" ।
इति हेमाद्रिधृतादित्यपुराणोक्तत् ।
प्रागर्द्धं कार्त्तिकसप्तमासाब्दविषयं ।
"देवकार्यमसदोनरथराष्टमनोतुन" ।
सप्तस्यापि दानस्य फलातिशयहेतवः" ।
इति मत्स्यपुराणोक्तेश्च ॥ ० ॥ तीर्थेषु
नानास्नानं ।
"त्रिषुवद्दिवसे प्राप्ते पञ्चतीर्थी विधानतः"
इति ब्रह्मपुराणादिवचनात् । "तीर्थेषु
प्रसङ्गयोरसम्भवाच्च" । अतएव ...
तीर्थचिन्तामणौ । यत्तु प्रयागे ...
कृतेऽपि ...
पुनस्तथैव प्रातःस्नानाचरणं तदुक्तं ...
स्नानस्यैव विहितत्वात् । अन्यदा
कामनादौ तदापत्त्यापत्तेरित्युक्तं ॥ ० ॥
परिपाटीमाह कृत्यकल्पलतायां विष्णु...
वररथात्रापि सप्तार्कपत्राणि च ...
"यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी" ।
इत्यर्थं स्नानादिति विशेषः । रोगं हिं ।
कृत्यस्य पौर्णमास्यन्तमासाङ्गत्वात् ।
मकराकार्थे चान्द्रमासीयविधिपरं ।
"तिथिकृत्ये च कृत्यादि व्रते ...
विवाहादौ च सौरादि मासं कृत्ये ...
इति ब्रह्मपुराणान्मन्वन्तरादिवत्
त्वाच्च । यथा मत्स्यपुराणे ।
"दशाम्मन्वन्तरादौ तु रथमाहुर्दिशारदः" ।
माघमासस्य सप्तमी तस्मात् सा रथकारी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलं" ।
अतएव नारसिंहे रथाख्यायामित्युक्तं ।
"महानवम्यां द्वादश्यां भरण्यामपि चैव हि
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद् बुधः ।
माघमासे तु सप्तम्यां रथाख्यायान्तु ...
द्वादश्यां शयनोत्थानद्वादश्या । भरण्या-
पातभरण्यामिति कल्पतरुः । अन्-
साहचर्य्याच्चान्द्रत्वं प्रतीयते । अतएव ...
मन्वन्तरादिगणने क्वापि न रथाद्युक्तेः ।
भविष्यमत्स्ययोः ।
"अश्वयुक् शुक्लनवमी द्वादशी कार्त्तिके तु
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ।
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा
आषाढस्यापि दशमी तथा माघस्य सप्तमी ।

शब्दकल्पद्रुमः ।

अर्थात्

एतद्देशस्यसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तन्त्राख्यान-काव्यालङ्कार-छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः ।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः ।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुमदोदाहरणादिभिः
नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
सुप्रशस्तपरिशिष्टेन च सार्द्धम् ।

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः । नागराक्षरैः प्रकाशितश्च ।

प्रथमः काण्डः ।

चतुर्थ-पञ्चम-षष्ठ-सप्तम-अष्टम-नवम-दशम-खण्डाः ।

कलिकाता-राजधान्यां

ब्याप्टिस्टमिसनयन्त्रे मुद्रितः ७१ नं॰ पाथुरियाघाट-ष्ट्रीट्-स्थितभवनात् प्रकाशितश्च । शकाब्दाः १८०८ ।

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET. CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71. Pathuriaghata Street, Calcutta: and at the Baptist Mission Press, No. 24 Lower Circular Road Calcutta: Price for Subscribers in India, Rs. 1. and Countries out of India 2s. for each part.

शब्दकल्पद्रुमः।

अर्थात्

एतद्देशीयसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-
सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-
तन्त्राख्यान-काव्यालङ्कार-छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-
स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मुख्यग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
सुप्रशस्तपरिशिष्टेन च सार्द्धम्।

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

प्रथमः काण्डः।

स्वरवर्णः।

कलिकाता-राजधान्यां

ब्याप्तिष्टमिसनयन्त्रे मुद्रितः। ७१ नं॰ पाथुरियाघाट-ष्ट्रीट्-स्थितभवनात् प्रकाशितश्च। शकाब्दाः १८०८।

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED
BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET. CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71, Pathuriaghata Street, Calcutta: and at the Baptist Mission Press, No. 24, Lower Circular Road,
Calcutta: Price for Subscribers in India, Rs. 10. and Countries out of India £ 1. 10 s. for this volume.

श्रीजगदीशो जयति ।

भूमिका ।

मङ्गलाचरणम् ।

उपास्महे शिवं सत्यं सर्व्वसर्व्वार्थसाधकम् ।
द्यावाभूमी स्थितं व्याप्य शब्दब्रह्म सनातनम् ॥१॥

स्वरूपं देवभाषाया विष्णोर्विश्वात्मनो यथा ।
ईदृक्तयेयत्तया वा को नु निर्वक्तुमीश्वरः ॥२॥
विष्णुवत् सा हि सत्त्वेन ब्रह्मवद् रजसा च सा ।
रुद्रवत् सा च तमसा व्यानशेऽशेषविष्टपम् ॥३॥
अज्ञानतिमिराच्छन्नं तदाऽस्थास्यत् चराचरम् ।
नाऽभविष्यद् यदि ज्योतिः संस्कृताख्यं सुमङ्गलम् ॥४॥
तमोभूतमिदं विश्वं प्रसुप्तमिव सर्व्वतः ।
अरुणोदयवेलेव भाषेयं प्रत्यबोधयत् ॥ ५ ॥
एकमेवाऽद्वितीयं तत् सच्चिदानन्दमव्ययम् ।
परं वेद्यतमं ब्रह्म भाषेयं प्रथमं जगौ ॥६॥
इयमुन्मीलयामास प्रथमं विश्ववासिनाम् ।
आत्मज्ञानमयीं दृष्टिं नलिनीमिव भानुभा ॥७॥
अनया भाषयैवादावृषिभिर्ज्ञानदृष्टिभिः ।
प्रलय-स्थिति-सर्गाणां दर्शितं तत्त्वमद्भुतम् ॥८॥
विश्व-विश्वेशयोस्तत्त्वमियमेवाऽन्वबोधयत् ।
चतुर्व्वर्गफलं ज्ञानं गुणान् सत्त्वादिकांस्तथा ॥९॥
सिद्धचारणगन्धर्व्वैर्देवदानवमानवैः ।
इयमाराध्यते भाषा जननीव युगे युगे ॥१०॥
ब्रह्मकण्ठात् किल पुरा जाता ब्रह्माण्डपूजिता ।
जयत्यमरभाषेयमासंसाराद् युगे युगे ॥११॥
न ब्रह्मा न हरिर्नेशो यस्याः पारं परं गतः ।
गीर्व्वाणवाणीं तां वन्दामहे गीर्व्वाणवन्दिताम् ॥१२॥

योनेरनन्तरत्नानां तस्याः कोषाः सहस्रशः ।
पूर्व्वाचार्य्यकृताः शस्ता विलसन्ति महीतले ॥१३॥
पर्य्यायवाचकाः केचित् केचित् नानार्थवाचकाः ।
लिङ्गानुशासनाः केचित् न तु सर्व्वार्थसाधकाः ॥१४॥
अतिसंक्षिप्तजटिलाश्छन्दोबद्धा दुरन्वयाः ।
विनाचार्य्यं न शक्यास्ते मनागपि विगाहितुम् ॥१५॥
युगपत् सर्व्वकोषाणां यथावत् स्मरणं विना ।
कार्य्यकालेऽभीप्सितार्थसम्प्राप्तिर्नोपपद्यते ॥१६॥
स्थितेष्वपि पुरः सर्व्वकोषेष्वन्धैर्यथा जनैः ।
इष्टार्थोऽतद्रहस्यज्ञैर्यत्नतोऽपि न लभ्यते ॥१७॥

सर्व्वाधिगम्यं निर्म्मातुं कोषं सर्व्वार्थसाधकम् ।
उदियाय कलौ वङ्गे राधाकान्तो नरेश्वरः ॥१८॥
अकारादिक्रमन्यस्ते शब्दे शब्दे पृथक् पृथक् ।
तत्तच्छब्दार्थसम्पूर्त्तिः प्रथमं तेन दर्शिता ॥१९॥
स एवादिगुरुस्तस्मात् कोषाणामीदृशात्मनाम् ।
यः सर्व्वभोग्यमकरोत् संस्कृतं देवदुर्लभम् ॥२०॥
अन्ये कल्याणनामाऽसौ शब्दकल्पं विनिर्म्ममे ।
एकत्र पिष्टपाशेषज्ञानैश्वर्य्यदिदृक्षया ॥२१॥
नैकत्र परिनिष्ठाऽस्ति सर्व्वज्ञानस्य यद्यपि ।
कोषस्तस्य तथाप्येष कोऽपि ज्ञानमहानिधिः ॥२२॥
वेदकर्त्ता विधातेव वाल्मीकिरिव काव्यकृत् ।
व्यासो भारतकर्त्तेव स लोके गौरवं गतः ॥२३॥

दंष्ट्रादण्डेन दैत्यारिर्निमग्नां प्रलयाम्बुधौ ।
वराहरूपी भगवान् काश्यपीमुद्दीधरत् ॥२४॥

कर्त्ता तु धरणीकान्तो राधाकान्तः प्रदीप्यते ।
उद्धृत्याऽनन्तकालाब्धेर्देवभाषां महीयसीम् ॥२५॥
न दृष्टं न श्रुतं क्वापि तद्धि शास्त्रं बुधैर्भुवि ।
यदेवोद्धृतमेतस्मिन् कोषे तेन महात्मना ॥२६॥
वेदानुद्धृतवान् पूर्वं मत्स्यरूपी जनार्द्दनः ।
असौ त्वशेषशास्त्राणि विप्लुतानि समन्ततः ॥२७॥
सुराः समेता दितिजैर्ममन्थुः क्षीरनीरधिम् ।
एकएव ममन्थाऽयमपारं शास्त्रसागरम् ॥२८॥
सुधासिन्धुसुधां पीत्वा सुरा अमरतां गताः ।
पीत्वा त्विमां कोषसुधां देवदानवमानवाः ॥२९॥
कौस्तुभाख्यमणेः सारं शौरेरेव हि भूषणम् ।
कोषरत्नमिदं तस्य जातं त्रैलोक्यभूषणम् ॥३०॥
पारिजातः सुरतरुः सुरभीकुरुते दिवम् ।
शब्दकल्पद्रुमस्त्वेष प्रीणाति भुवनत्रयम् ॥३१॥
धन्वन्तरिः स भगवान् स्वर्गस्यैव चिकित्सकः ।
अशेषाणान्तु लोकानां कोष एष चिकित्सकः ॥३२॥
समुद्राद्भूतया लक्ष्म्या लक्ष्मीवान् केवलो हरिः ।
श्रीराधाकान्त-कोषेण लक्ष्मीवद्भुवनत्रयम् ॥३३॥
न केवलं मुमुक्षुभ्यो कोषः शब्दार्थलिप्सुभिः ।
सर्व्वेषामेव सततं कामान् कल्पद्रुमो यथा ॥३४॥
योगिनामप्ययं कोषो योगशास्त्रमनुत्तमम् ।
भोगिनां भोगशास्त्रं च रोगिणां च महौषधम् ॥३५॥
सर्व्वेषामेव धर्म्माणामाश्रमाणां च सर्व्वशः ।
तत्त्वज्ञानमशेषेण प्रोक्तमत्र प्रसङ्गतः ॥३६॥
श्रीविद्यामन्त्रदक्षत्वाद् विप्राः षट्कर्म्मशालिनः ।
क्षत्रिया वैश्यशूद्राश्च ये चान्ये वर्णसङ्कराः ॥३७॥
सर्व्वशास्त्ररतैर्नित्यं शास्त्रशास्त्ररतैस्तथा ।
रागिभिर्योगिभिश्चैव सर्व्वैरेव सेव्यते ॥३८॥
वयश्चोक्ता यथैवात्र गुरुभिर्म्मद्गादृभिः ।
तत्त्वार्थस्तथैवात्र विद्वद्भिर्म्मणीषिभिः ॥३९॥

निदानं चाऽत्र रोगाणां लक्षणं च पृथक् पृथक् ।
संप्राप्तिश्च चिकित्सा च सर्व्वं प्रोक्तमशेषतः ॥४०॥
औषधीनामशेषाणां गुणपर्य्यायसंग्रहाः ।
नानाभाषाप्रचलिता आख्याश्चैवाऽत्र दर्शिताः ॥४१॥
इह सङ्गीतविज्ञानं भुक्तिमुक्तिप्रदं नृणाम् ।
प्रसङ्गतः समासेन प्रोक्तं सर्व्वमतानुगम् ॥४२॥
आयुर्व्वेदामशेषाणां ज्ञानानामाकरो महान् ।
अहो कोऽपि यशोराशिः कोषोऽयं तस्य भूभृतः ॥४३॥
मन्दभाग्येऽपि वङ्गेऽस्मिन् जज्ञिरे बहवो बुधाः ।
विहीना अपि शौर्य्येण ज्ञानेनाऽमरतां गताः ॥४४॥
तन्त्रमन्त्रादिशास्त्राणि स्मृतयो न्यायविस्तराः ।
योगशास्त्राणि काव्यानि रूपकाख्यायिकास्तथा ॥४५॥
नानादेवार्च्चनकथा ऐन्द्रजालिकमेव च ।
उपदेवकथाश्चैवा ग्राम्यदेवकथास्तथा ॥४६॥
व्रतोपवासनियमा बलिहोमजपादयः ।
पीठतीर्थादिमाहात्म्यं शक्तिपूजाः सहस्रशः ॥४७॥
एतच्चाऽन्यच्च बहुधा शास्त्रं वङ्गमनीषिभिः ।
नवद्वीपादिवास्तव्यैः प्रणीतं ज्ञानदृष्टिभिः ॥४८॥
अरक्षिष्यदयं कोषो ज्ञानं तद् वङ्गज न चेत् ।
नामाऽपि तस्याऽद्य तदाऽगमिष्यद् विलयं ध्रुवम् ॥४९॥
एकेनाऽपि गुणेनाऽयमनेनाऽमरतां व्रजेत् ।
यद्‌य वङ्गदेशस्य क्षतीः कीर्त्तीश्च रक्षति ॥५०॥
पुण्यां द्रवमयीं धारामानिनाय भगीरथः ।
पुण्यां कीर्त्तिमयीं धारां राधाकान्तोऽवतारयत् ॥५१॥
सोऽनर्घ्यं जीवितं दीर्घं विभवं चाऽतुलं निजम् ।
प्रजातम् शब्दकल्पद्रुमस्यार्थे न्ययोजयत् ॥५२॥
अस्य कोषमहासिन्धोर्बिन्दोः कालात् परं नृप ।
स प्रपेदे परं पारं भवाब्धेरिव निर्म्मसः ॥५३॥
सोऽशेषकोषमार्गज्ञ स्वकोषे त्यागिनां वर ।
अमूल्य भारत्यमां ...

स जीवन्नेव सुकृती शब्दकल्पद्रुमं फलम् ।
निर्व्याप्य सफलं मेने नरजन्म सुदुर्लभम् ॥५५॥
आमेरिकाद्यूरोपवासिनोऽपि पण्डिताः ।
शब्दकल्पद्रुमं दृष्ट्वा ययुः परमविस्मयम् ॥५६॥
धीरेन्द्राय नरेन्द्राय ये यथासन् तदा भुवि ।
तमभ्यवर्षन् सम्मानैर्मेघाः शस्यमिवाम्बुभिः ॥५७॥
वङ्गभूर्भुवने धन्या शब्दकल्पद्रुमेण या ।
कल्पद्रुमवतीं नित्यं स्पर्द्धते ह्यमरावतीम् ॥५८॥
स शब्दकल्पद्रुमकृद् यत्र तस्थौ तमालयम् ।
शोभाबाजारभूपानां सन्तस्तीर्थं प्रचक्षते ॥५९॥
साधारणोपकाराय मिलन देशवासिनाम् ।
विदुषां सङ्गमो वाऽपि तत्रैवाऽद्याऽपि जायते ॥६०॥
महावङ्गसमाजस्य तद्वंशोऽद्यापि कीर्त्यते ।
अविसंवादितं सर्व्वचूडामणिरिति क्षितौ ॥६१॥
एवं प्रतिष्ठां गमयन् स्ववशं यशसा नृपः ।
अगण्यपुण्यैर्धन्योऽसौ पुण्यलोकमुपेयिवान् ॥६२॥
गते बहुतिथे कालेऽकारि कोषेऽत्र दुर्लभे ।
वरदाकान्तमित्राद्यैः पुनर्मुद्राङ्कने यत्नः ॥६३॥
मुद्रां नीतेऽप्यविकले शब्दकल्पद्रुमे च तैः ।
अचिरेणैव पुस्तानि तानि निःशेषतां ययुः ॥६४॥
पुनरेवाऽस्य दौर्लभ्यमुपलभ्याऽन्यदुर्लभान् ।
गुणांशाऽजनि नश्चित्ते पुनर्मुद्राङ्कने स्पृहा ॥६५॥
ततः स्वत्वाधिकारिभ्यः क्रीत्वा सत्त्वं यथाविधि ।
प्रवृत्ता दुष्करे कार्य्ये वयं सत्कार्य्यगौरवात् ॥६६॥
वङ्गाक्षरैरितः पूर्व्वं कोष एष प्रकाशितः ।
तेनाऽसौ सुखपाठ्योऽभूत् केवलं वङ्गवासिनाम् ॥६७॥
नागरी वर्णमाला तु संस्कृतैकोपयोगिनी ।
सर्व्वत्राद्रियते प्रायः सर्व्वैः संस्कृतपाठिभिः ॥६८॥
सर्व्वेषां बोधसौकर्य्यमतोऽस्माभिर्विधित्सुभिः ।
प्रशस्तैर्नागरैर्वर्णैरेष कोषः प्रकाश्यते ॥६९॥
शब्दकल्पद्रुमं कोषं प्रणिनाय यदा नृपः ।
संस्कृतं प्रचरद्रूपं नाऽधुनेव तदाऽभवत् ॥७०॥
तदा प्रयोजनाभावात् स्वकोषे तेन भूभुजा ।
सर्व्वेषामेव शब्दानां व्युत्पत्तिर्नैव दर्शिता ॥७१॥
जन्मभूमिं प्रति प्रेम्णा तेनोपादानलिप्सुना ।
अस्योपादानसामग्री स्वदेशाद् भूयसाहृता ॥७२॥
मुग्धबोधं व्याकरणं वङ्गदेशस्य गौरवम् ।
तन्मतेन ततस्तेन शब्दव्युत्पत्तयः कृताः ॥७३॥
पाणिनीयं व्याकरणं प्रायः संस्कृतपाठिभिः ।
सयत्नं सेव्यते सर्व्वैरमाद्रियते च तत् ॥७४॥
दिने दिने नृणां यावत् संस्कृते भक्तिरेधते ।
पाणिनीयस्य माहात्म्यं तावदेवोपचीयते ॥७५॥
अनुसृत्य ततोऽस्माभिः पाणिनीयानुशासनम् ।
सर्व्वेषामेव शब्दानां व्युत्पत्तिः परिदर्श्यते ॥७६॥
प्रवृत्तीर्याम्यमसरिद्देशारण्यनदीभृताम् ।
सिद्धदेवर्षिभूपालशास्त्रशास्त्रकृतां तथा ॥७७॥
कलादर्शनविज्ञानज्योतिषां च नवं नवम् ।
अधुनाविष्कृतं तत्त्वं धन्यैः पाश्चात्यसूरिभिः ॥७८॥
अदृष्टपूर्व्वाः शब्दार्थाः प्रमाणानि बहूनि च ।
इदानीं ग्रन्थविस्ताराद् यान्ति दृष्टिपथं विदाम् ॥७९॥
मूलातिरिक्तं तत् सर्व्वं मूलेऽस्माभिर्निवेश्यते ।
वेष्टनाकारचिह्नाभ्यां व्यवच्छेदचिकीर्षया ॥८०॥
अनुचिन्त्य द्वयोरेव पक्षयोः सुखसाध्यताम् ।
अस्माकं ग्राहकानां च खण्डशोऽयं प्रकाश्यते ॥८१॥

परिशिष्टे वक्तव्या विषयाः ।

परिशिष्टद्वयं चैव कोषस्याऽस्य विधीयते ।
एकं धात्वादिसम्बन्धि शब्दसम्बन्धि चाऽपरम् ॥८२॥

प्रथमपरिशिष्टे वक्तव्या विषयाः ।

धातु-धात्वर्थ-रूपाणि लकारार्थाः पृथक् पृथक् ।
अनुबन्धाश्च धातूनां गणवाच्यभिदास्तथा ॥८३॥

तन्त्रादिसमाख्यानां सिद्धानां विवृतिस्तथा ।
प्रथमे परिशिष्टेऽस्य सर्व्वमेतद्विवेच्यते ॥८४॥
द्वितीयपरिशिष्टे वक्ष्यता विषयाः ।
मौलिका बहवः शब्दा वैदिकाश्च विशेषतः ।
छन्दव्याकरणाद्यप्रकारादेव स्थिताः ॥८५॥
यथायथविदुषां ज्ञानापूर्व्वमोदेन तेऽधुना ।
दिने दिने प्रकाशन्ते चार्थकीर्त्तिं वितन्वते ॥८६॥
चार्थसमाहारो मया परिशिष्टे द्वितीयके ।
डीडनो वृषभाषाद्यावैज्ञानिकमनुसारतः ॥८७॥
कांश्चित् यानि शास्त्राणि प्रमाणार्थोद्धृतानि च ।
मूलानि तेषां ग्रन्था ये बहवः सन्ति तेष्वपि ॥८८॥
केचित् कर्मैव टीकायां यथाऽभावेऽपि यत्र च ।
तदादाय यथाशास्त्रं मयाऽस्माभिर्निरस्यते ॥८९॥
इत्यादिषु यत् यत् न जानाति सरस्वती ।
तत्राहं चाऽहमिदं न को वा निर्व्वहणीश्वरः ॥९०॥
काश्चिद्व्याख्यामाश्रित्य तथाप्यन्याद्यैर्मतैः ।
परिशिष्टस्य सम्पूर्त्तौ यथाऽस्य विधीयते ॥९१॥
इदं शब्दार्थविद् च राजा भाषान्तरैः ।
पूर्णं कार्य्यं चैव सर्व्वांशविधिप्रभवा ॥९२॥

परिशिष्टं च विस्तीर्णं वेदशब्दार्थबोधकम् ।
निर्म्ममे सोऽस्य कोषस्य महान्त यत्नमाश्रितः ॥९
दुर्व्विपाकात्तु दैवस्य हस्तलेखाश्च तेऽखि
कीटैः कवलिता हन्त ! नाममात्रावशेषताः
चकमे च महात्माऽसौ सकाशात् परवर्त्तिः
संस्कृतज्ञानविस्तारेणाऽस्य संस्कारणं पुनः ॥९
अतो वयं संप्रवृत्ता अस्मिन् संस्करणे नवे ।
पुण्यश्लोकस्य तस्यैव भूपस्येच्छानुसारतः ॥९६॥
शब्दकल्पद्रुमस्रष्टुः कुलात् तस्यैव भूभृतः ।
पदे पदेऽत्र साहाय्यं कार्य्येऽस्माभिरवाप्यते ॥९७॥
देवदेव ! महादेव ! रक्ष रक्ष चिरं विभो ! ।
वंशावली तस्य राज्ञो धारां भागीरथीमिव ॥९८॥
हे विद्वद्वामिनः सर्व्वे सन्तो विद्यानुरागिणः ! ।
सहाया नो भवन्त्वस्मिन् भवन्तो ज्ञानगौरवात् ॥९९॥
करुणाकणया यस्य नरस्तरति दुस्तरम् ।
सिद्धिदाता स भगवान् नः पूरयतु काङ्क्षितम् ॥१००॥
भक्तिमात्रसहायानां हीनानां साधनान्तरैः ।
भक्तवाञ्छाप्रदो देवो वाञ्छितं प्रददातु ।

कलिकाता ।
९१ दुर्गाचरणबाड़ा ष्ट्रीट् ।
१९०८ ।

श्रीवरदाप्रसाद वसोः
तदनुजस्य च
श्रीहरिचरण वसोः ।

ास्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा ।
र्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ॥
न्तरादयस्त्वेता दत्तस्याक्षयकारिकाः" ।
अमावास्याष्टमीव्यतिरिक्ताः शुक्लाः पुनः-
त्तथापदोपाकीर्त्तनादानात् । उपक्रमोपसंहा-
ः शुक्लत्वकीर्त्तनाच ॥ अत्र कामधेनौ तृतीया
माघस्येति । कल्पतरौ तु तृतीया चैत्रमास-
त लिखितं । अत्र पाठद्वैधे श्रीपतिरत्नमा
ां । "अश्वयुजि शुक्लनवमी द्वादश्यूर्ज्जे मधौ
ीया च" । इति पाठाच्चैत्रतृतीयैव ग्राह्या ।
रक्तोऽप्येवं । माघसप्तम्याश्चाक्षत्वं सौरागमेऽपि ।
र्कपत्रैः सवदरैर्दूर्व्वाक्षतसचन्दनैः ।
ग्राङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ॥
वेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी ।
करीति च यत्प्रोक्तं तत्राथोऽक्तिदर्शनात्" ॥
ग्राङ्गविधिना ।
ोऽष्टाङ्गमर्घ्यमापूर्य्य भानोर्मूर्द्ध्नि निवेदयेत् ।
त्रयाचार्घ्यदानेन पुण्यं दशगुणं स्मृतं" ॥
त भविष्यपुराणीयेन । आदित्यपुराणे ।
दक्षराशिविशेषेण यत्कर्म्म विहितं हरेः ।
वाप्यथवा पैत्र्यं तदन्यत्रापि दृश्यते" ॥ * ॥
र्कमन्त्रस्तु ।
ननी सर्व्वभूतानां सप्तमी सप्तसप्तिके ।
त्याहृतिके देवि ! नमस्ते रविमण्डले" ॥
ग्रामन्त्रस्तु ।
प्तसप्तिवहप्रीत सप्तलोकप्रदीपन ।
प्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे" ॥
निरञ्जः । इति तिथ्यादितत्त्वं ॥
ोपलः, पुं, (अरुणः उपलः, कर्म्मधारयः ।)
वर्णमणिविशेषः । चुनी इति भाषा । तत्प-
यः । पद्मरागः २ लोहितकः ३ लक्ष्मीपुष्पः ४ ।
ति हेमचन्द्रः ॥
ुदः, त्रि, (अरूंषि मर्म्माणि तुदति, तुद +
श् + मुम् च ।) मर्म्मपीड़कः । तत्पर्य्यायः ।
र्मस्पृक् २ । इत्यमरः ॥ (परुषः । कठोरः ।
वपरुषः । "माकन्दं मकरन्दतुन्दिलममुं गा-
त काकः स्वयं वाचारुन्तुदमन्तरेण रुचितं
मम्मरे कोकिलं" । इति भामिनीविलासे ।
र्मपीड़ाकरः । हृदयग्रन्थिरूपमर्म्मस्थानस्पर्श-
ी । यथा,
ारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्म्मधीः" ।
ति मनुः ।
िलष्टा नारुन्तुदा युक्तिः कर्म्म शान्तं प्रतापवत्" ।
ति माघः ।
अरुन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः" ।
ति रघुवंशे ।)
ती, स्त्री, (न रुन्धती ।) वशिष्ठपत्नी । तत्प-
यः । अक्षमाला २ । इति हेमचन्द्रः ॥ सा
ेमकुलिकन्या महासाध्वी । इति श्रीभागवतं ॥
ाकाशे सप्तर्षिमध्ये वशिष्ठसन्निधौ तस्या उदयः ।
ासन्नमृत्यवो न पश्यन्ति । (तदुक्तं,—
दीपनिर्व्वाणगन्धञ्च सुहृद्वाक्यमरुन्धतीं ।

न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः" ॥
यथा च सुश्रुते,—
"न पश्यति स नक्षत्रां यश्च देवीमरुन्धतीं ।
ध्रुवमाकाशगङ्गां वा तं वदन्ति गतायुषं" ॥)
सप्तपदीगमनानन्तरं जामाता मन्त्रं पाठयन् बधूं
तां दर्शयति च ॥
अरुन्धतीजानिः, पुं, (अरुन्धती जाया यस्य सः,
निङ् ।) वशिष्ठमुनिः । इति हेमचन्द्रः ॥
अरुन्धतीनाथः, पुं, (अरुन्धत्या नाथः, षष्ठीतत्-
पुरुषः ।) वशिष्ठमुनिः । इति त्रिकाण्डशेषः ॥
अरुष्कः, पुं, (अरुर्म्मर्म्मस्थानं कायति पीड़यति,
कै + क ।) भल्लातकवृक्षः इति शब्दरत्नावली ॥
अरुष्करं, क्ली, (अरुः करोति अरुस् + कृ + ट, उप-
पदसमासः षत्वं ।) भल्लातकफलं । इति हेम-
चन्द्रः ॥
अरुष्करः, पुं, (अरुः करोति, अरुः + कृ + ट, षत्वं
उपपदसमासः ।) भल्लातकवृक्षः । इति शब्द-
रत्नावली ॥
अरुष्करः, त्रि, (अरुः करोति, अरुः + कृ + ट,
षत्वं, उपपदसमासः ।) व्रणकरः । क्षतकारकः ।
इति मेदिनी ॥
अरुहा, स्त्री, (रोहति, रुह् + क, नञ्समासः ।)
भूधात्री । इति राजनिर्घण्टः ॥ भूमि आमला
इति ख्याता ।
अरूपः, त्रि, (नास्ति रूपमस्य ।) रूपशून्यः ।
यथा । "अरूपवातातीसारादाविवारुण्यं" । इति
रक्षितः ॥ कुत्सितरूपः ।
("इमामरूपामसतीं भक्षयिष्यामि मानुषीम्" ।
इति रामायणे ।) .
अरूषः, पुं, (ऋट + ऊषन् ।) सर्पविशेषः । इत्युणादि-
कोषः ॥ सूर्य्यः । इति सिद्धान्तकौमुद्यामुणादि-
वृत्तिः ॥
अरे, व्य, (ऋट + ए ।) नीचसम्बोधनं । इति हेम-
चन्द्रः ॥ ओरे इति भाषा । अपाकृतिः । असूया ।
इति मेदिनी ॥ (रोषाह्वाने । असूयायां । "अरे
चेतोमीन ! भ्रमणमधुना यौवनजले अत्र त्वं
स्वच्छन्दं युवतिजघनाघौ पश्यसि न किम्" । इति
शान्तिशतके । "अरे अनुष्ठन् ! निरपराधराज-
कुलकदन महापातकिन् अशिष्टविशिष्टचेष्ट !"
इति महावीरचरिते ।)
अरेरे, व्य, (अरे + वीप्सायां द्विरुक्तिः ।) अधम-
सम्बोधनं । इति जटाधरः ॥ सक्रोधाह्वानं । इति
शब्दमाला ॥
अरोकः, त्रि, (रुच् + घञ्, नञ्समासः ।) निष्प्रभः ।
दीप्तिरहितः । इत्यमरः ॥ रोकच्छिद्रमस्त्यस्य ॥
अरोचकः, पुं, (न रोचयति प्रीणयति, रुच् +
णिच् + ण्वुल्, नञ्समासः ।) रोगविशेषः ।
अरुचिरोग इति भाषा । तस्य निदानरूपे ।
"वातादिभिः शोकभयातिलोभ-
क्रोधैर्मनोघ्नाशनरूपगन्धैः ।
अरोचकाः स्युः परिहृष्टदन्त-
कषायवक्त्रोऽस्य मतोऽनिलेन ।

कट्वम्लमुष्णं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं ।
माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
विबद्धसम्बन्धयुतं कफेन" ॥ इति माधवकरः ॥
अरोचकाः न भोजने रुचिमुत्पादयन्तीत्यरोचका
व्याधयः पञ्च वातजादिभेदैः ॥ * ॥ वातिकस्य ल-
क्षणमाह । परिहृष्टदन्तः अम्लभक्षणेनेव परि-
हृष्टौ दन्तौ यत्र सः । तथा कषायवक्त्रः । कषाय-
रसं वक्त्रं यत्र सः ॥ * ॥ पैत्तिकमाह ।
"कट्वम्लमुष्णं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं" ।
कट्वम्लमित्यादिना विद्यादित्यन्तेन पैत्तिकस्य ल-
क्षणं ॥ * ॥ श्लैष्मिकमाह । लवणञ्च वक्त्रं कफज-
लक्षणेन पठनीयः । यतो विदग्धः श्लेष्मा लवण-
भावमुपैति ।
"माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
स्निग्धत्वदौर्गन्ध्ययुतं कफेन" ।
पैच्छिल्यं मुखस्याभ्यन्तरे । स्निग्धत्वं वहिः ॥ * ॥
आगन्तुजमाह ।
"अरोचके शोकभयातिलोभात्
क्रोधाद्यहृद्याशुचिगन्धजे स्यात् ।
स्वाभाविकं चास्यमथारुचिश्च
त्रिदोषजे नैकरसम्भवेच्च" ॥
क्रोधादित्यादिशब्देनाहृद्ययोरशनरूपयोर्ग्रहणं ।
स्वाभाविकं । अविकृतरसं ॥ * ॥ त्रिदोषजमाह ।
नैकरसं अनेकरसमास्यं स्यात् । वातजादिभेदेन
मुखे विकृतिमभिधायान्यदेशे विकृतिमाह ।
"हृच्छूलपीड़नयुतं पवनेन पित्तात्
तृड्दाहचोषबहुलं सकफप्रसेकं ।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजड़ताभिरथापरञ्च" ॥
हृच्छूलपीड़नयुतं हृदि शूलेन पीड़नं तेन युतं ।
चोषः पार्श्वस्थितामिनेव सन्तापः । बहुभिस्त्रिभि-
र्दोषैः । बहुरुजं उदावर्तादिरोगयुक्तं । वैगुण्यं
मनसो व्याकुलत्वं । जड़ता शून्याङ्गता । अपरं
आगन्तुजं । भक्तद्वेषाभक्तच्छन्दौ चरकसुश्रुताभ्या-
मरोचकभेदेनैव संगृहीतौ ॥ * ॥ तद्भोजनयोः
लक्षणानि पृथगाह ।
"प्रक्षिप्तन्तु मुखे चान्नं यत्र नास्वादते नरः ।
अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु" ॥
आस्वादते अन्नस्य मिष्टतां न प्राप्नोति । तदन्नं
मिष्टं न लगति इति यावत् ।
"चिन्तयित्वा तु मनसा दृष्ट्वा स्पृष्ट्वा च भोजनं ।
द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥
क्षुधितस्य भयार्त्तस्य तथा भक्तनिरोधनः ।
यत्र नान्ने भवेच्छन्दः सोऽभक्तच्छन्द उच्यते" ॥ * ॥
अथारोचकस्य चिकित्सा ।
"भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं ।
रोचनं दीपनं वह्नेर्जिह्वाकण्ठविशोधनं ॥ १ ॥
गण्डूषकवलग्राहि मधुना सह योजयेत् ।
अरोचकनाशनं प्रतिशयनवशादपि ॥ २ ॥
महार्धिका सिता शीतवारिणा बहुवारिणा ।

एलाजवङ्गकर्पूरमरिचैरवधूलिता ।
मानकस्यास्य गण्डूषं धारयित्वा मुखे मुहुः ।
अरुचिं नाशयत्येव पित्तं प्रशमयेत्तथा” ।
अम्लिकापानं । ३ ।
“राजिका जीरको भृष्टो भृष्टं हिङ्गु सनागरं ।
सैन्धवं दधि गोः सर्व्वं वस्त्रपूतं प्रकल्पयेत् ।
तावन्मात्रं क्षिपेत्तत्र यथा स्यादुचितसमा ।
तक्रमेतद्भवेत् सद्यो रोचनं वह्निवर्द्धनं” ।
तक्रं । ४ ।
“गव्यमावर्त्तितं दुग्धं निबद्धं दधि माहिषं ।
एकीकृत्य पटे घृष्टं शुभ्रशर्करया समं ।
एलालवङ्गकर्पूरमरिचैश्च समन्वितं ।
नाम्ना शिखरिणी कुर्य्यात् रुचिं सकलवल्लभा ।
शिखरिणी । ५ ।
द्वे पले दाडिमादष्टौ खण्डाच्छोषं पलत्रयं ।
त्रिसुगन्धिपलश्चैकं चूर्णमेकत्र कारयेत् ।
तच्चूर्णं माषका भक्तमरोचकहरं परं ।
दीपनं पाचनञ्च स्यात् पीनसज्वरकासजित्” ।
दाडिमादिचूर्णं । ६ ।

“लवङ्गकङ्कोलमुशीरचन्दनं
नतं सनीलोत्पलकृष्णजीरकं ।
जलं सकृष्णागुरुभृङ्गकेसरं
कणा सविश्वा नलदं सहैलया ।
तुषारजातीफलवंशरोचना-
सिताभ्रभागाः सकलं विचूर्णितं ।
सुरोचनं तर्पणमग्निदीपनं
बलप्रदं वृष्यतमग्निदोषजित् ।
उरोविबन्धं तमकं गलग्रहं
सकासहिक्काक्षचिरज्वपीनसं ।
ग्रहण्यतीसारमुरःक्षतं तथा
तथा प्रमेहारुचिशर्म्मनिहन्ति हि” ।

कङ्कोलं फलं सुगन्धिविशेषः । नतं तगरं । जलं
बालकं । भृङ्ग त्वक् । नलदमुशीरं । तुषारः कर्पूरः ।
लवङ्गादिचूर्णं । ७ । इत्यरोचकाधिकारः । इति
भावप्रकाशः ।
(“रसाङ्कः यष्टकोलस्य कुष्ठदाढकपद्मकं ।
मुद्गयूषेण वा सम्यक् भक्षाणां भोजनं हितं ।
... संप्रकाश्यते ।
... ।
... ।
... ।
... ।
... ।
... ।
... ”।
... । ० ।
... ।
... ।
... ।
... ।
... ।
... ।

सतैलमाक्षिकाल्लेते चत्वारः कवलग्रहाः ।
चतुरोऽरोचकान् हन्युर्व्वाताद्येकजसर्व्वजान् ।
कारवी मरिचाजाजी द्राक्षावृक्षाम्लदाडिमं ।
सौवर्च्चलं गुडं क्षौद्रं सर्व्वारोचकनाशनं ।
वस्तिः समीरणे पित्ते विरेकं वमनं कफे ।
कुर्य्याद्धृद्यानुकूलानि हर्षणञ्च मनोघ्नजे” ।
इति चरकोक्तास्यचिकित्सा । सनिदानलक्षणा चि-
कित्साप्याह । * । सुश्रुतः ।

“दोषैः पृथक् सह च चित्तविपर्य्ययाच्च,
भक्तायनेषु हृदि चावतते प्रगाढ़ं ।
नान्नेऽभिलाषिर्भवति सं भिषजो विकारं,
भक्तोपघातमिह पञ्चविधं वदन्ति ।
हृच्छूलपीड़नयुतं विरसाननत्वं,
वातात्मके भवति लिङ्गमरोचके तु ।
हृद्दाहचोषबहुता मुखतिक्तता च,
मूर्च्छा सतृड् भवति पित्तकृते तथैव ।
कण्डूगुरुत्वकफसंस्रवसादतन्द्राः,
श्लेष्मात्मके मधुरमास्यमरोचके तु ।
सर्व्वात्मके पवनपित्तकफा बहूनि,
रूपाण्यथास्य हृदये समुदीरयन्ति ।
संरागशोकभयविप्लुतचेतसस्तु,
चिन्ताकृतो भवति सोऽशुचिदर्शनाच्च” ।०।

चिकित्सा यथा,—
“वाते वचाम्बु वमनं कृतवान् पिबेच्च,
स्नेहैः सुराभिरथवोष्णजलेन चूर्णं ।
कृष्णाविड़ङ्गयवभस्महरेणुभार्गी,
रास्नैलहिङ्गुलवणोत्तमनागराणां ।
पित्ते गुडाम्बुमधुरैर्वमनं प्रशस्तं,
स्नेहः ससैन्धवसितामधुसर्पिरिष्टः ।
निम्बाम्बुवामितवतः कफजेऽनुपानं,
राजद्रुमाम्बुमधुना तु मदीप्यकं स्यात् ।
चूर्णं यदुक्तमथवानिलजे तदेव,
सर्व्वैश्च सर्व्वकृतमेवमुपक्रमेत ।
द्राक्षापटोलविड़ङ्गकरीरनिम्ब-
मूर्व्वाभयाद्यवरामलकेन्द्रवल्लैः ।
वीजैः करञ्जस्थपरश्च भवैश्च पिष्टै-
लेहं पचेत् सुरभिमूत्रयुतं यथावत् ।
मुक्ता वचा त्रिकटुकं रजनीद्वयञ्च,
भार्गी च कुष्ठमथ निरंहनीश्च पिष्ट्वा ।
मूत्रेऽथवा द्विरदमूत्रयुते पचेद्वा,
पाटाग्निगामनिविषा रजनीश्च मुस्ता ।
मयूरकमर्कमम्लताश्च सशाकुलाः स्यात्,
मूत्रे पचेत् महिषस्य विधानविद्वा ।
एताश्च सन्ति चतुरो ...
गुल्मार्शचिरमनकण्ठहृदामयाश्च ।
माक्षान् स्वदेशरचितान् विविधांश्च
पानानि मूलफलमाक्षरसायनात् ।
भक्ष्यादमाद्य विविधान् विविधैः ...
भुञ्जीत वापि मधुरद्रामन सुखानि ।
भाव्यासनं विधिवदत्र विरेचनञ्च,
कुर्य्यान्मृदूनि शिरसश्च
...ण्यक्षाणि रजनीचिमर्दं,

चूर्णीकृतानि यवशूकविमिश्रितानि ।
शुद्धायुतानि विसरेन्मुखधारणार्थं
मन्यानि तिक्तकटुकानि च भेषजानि
मुस्तादिराजतरुवर्गदशाङ्गचिठैः,
क्वाथैर्जयेन्मधुयुतैर्विविधैश्च लेहैः ।
मूत्रासवैर्गुड़कृतैश्च तथार्ब्बरिष्टैः,
क्षारासवैश्च मधुमाधवतुल्यगन्धैः ।
स्यादेषएव कफवातहते विधिश्च,
शान्तिं गते कृतभुजि प्रशमाय ...
इच्छाभिघातभयशोकहतेऽन्तरा...
भावान् भवाय विनयेत् ...
अर्थेषु चाप्यपचितेषु पुनर्भवाय,
पौराणिकैः श्रुतिपथैरनुमानयेच्च
दैन्यं गते मनसि बोधनमत्र शस्तं,
यद्यत् प्रियं तदुपसेव्यमरोचके तु
रसगन्धौ समौ शुद्धौ ...
जम्बीरस्य रसेनापि चार्द्रकस्य ...
मातुलुङ्गस्य तोयेन तस्य मञ्जरीं ...
पश्चाद्विशोध्य सर्व्वास्तान् ...
देवपुष्पं चाद्यमितं रसपादं ...
मासमात्रञ्च तत् सर्व्वं नागरेण ...
सर्व्वारोचकशूलार्त्तिमामवातं हर...
सोऽयं निवारयत्याशु केशरी
सुधानिधिरसः । ० । इति
संग्रहः ।)

अर्क, क, तापे । (चुरादि उभयपदी ...
इति कविकल्पद्रुमः । एककारः
...निमित्तकहित्वं विभाषया ...
अर्कयति अर्कायति रवं सत्वंन ।

अर्कः, पु, (अर्च + कर्म्मणि घञ्, कुत्व...
इन्द्रः । ताम्रं । स्फटिकः । इति मेदि...
इति शब्दरत्नावली । ज्येष्ठभ्राता ।
दिनाथः । लक्षणया रविवारः । ...
वृक्षविशेषः । आकन्द इति भाषा ।
क्षीरदलः २ पुच्छी ३ प्रताप ...
५ विक्षीरः ६ क्षीरी ७ खर्ज्जुघ्न ...
८ अमनः १० क्षीरपर्णी ११
सदापुष्प १२ सूर्याह्व १३ आस्फोत...
भणः १६ ... १७ । इति रा...
वसुकः १८ ...
२१ ...
कंपकर्माय ।
...मी ।

[illegible]

मुहूर्त्तमुष्णे संस्थाप्य याह्योऽर्को विबुधोत्तमैः ।
पचाकान्तु शतांशेन तुल्यतोयेन सेचयेत् ।
दद्यात् घटीमर्क्करां ततोऽर्कं कलयेच्छनैः ।
वटाश्वत्थकपीतराद्यमार्द्रत्वचन्तु नीरसं ।
विंशांशं नि क्षिपेत्तोयं जलं धर्म्मे च धारयेत् ।
ततो निष्काशयेदर्कं क्रमच्छागादिमांसवत् ।
सदुग्धन्तु द्विधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात् ।
मातलावच्छेदनस्यौरिष्याद्यास्तु तीक्ष्णकाः ।
खण्डानि तेषां कृत्वाथ निःक्षिपेत् पुष्कले जले ।
दिनत्रयञ्च निष्काश्य तोयादीयञ्च कुट्टयेत् ।
तदा न दृश्यते दुग्धं दद्यात्तोयं दशांशकं ।
निष्काशयेच्छनैरर्कं स तु तीक्ष्णार्कसंज्ञकः ।
दुग्धिकार्क्कक्षीरिण्याद्या मृदुदुग्धाः प्रकीर्त्तिताः ।
जले चतुर्गुणे दद्यात्तान् घर्म्मे विनिवेशयेत् ।
यावज्जलस्याम्लता स्यात् ततो यन्त्रे विनिःक्षिपेत् ।
धाराशीतकृतार्द्धिता मध्यांशजलसंयुतं ।
एवं द्रव्यं लक्षयित्वा सपुटार्कं विनिर्हरेत् ।
स्पष्टोऽयञ्च धामानां पश्चानां मृदुकायिनां ।
सरमानाय सर्क्कोशादर्कं तोयेन वर्ज्जितं ।
काष्ठोदुम्बरिकादीनां धामानां दार्ढ्यमागिनां ।
कृत्वा सम्पानि खण्डानि चतुर्थांशं प्रदापयेत् ।
एकद् एकद् च तुवरी सर्जिक्षारञ्च सैन्धवं ।
दत्त्वा विमर्दयेत् सर्व्वं चत्वारिंशाशकं जलं ।
क्षिप्त्वा गलनं धर्म्मे यामार्द्धेनाम्लता भवेत् ।
ततो यन्त्रे तु तद्दत्त्वा सर्क्कोदारकमुत्तमं ।
षतिदहनलाभात्तु वीर्य्यंतयार्कमाहरेत् ।
पुष्पार्कांद् वोडशांशं जलं पुष्पेषु दापयेत् ।
कह्लारपद्मादीनि चिक्किकादीनि यानि च ।
पिष्यात्तुल्योदकेन तानि पुष्पलताय शान्तये ।
तत्फलानि द्विगुणं जलं दत्त्वा समाहरेत् ।
तेषामर्कमथ द्वादश्यार्कोपाय उच्यते ।
द्वादशोत्सेचनाक्ते प्रोच्यते वाचकस्पता ॥ ० ॥
मिथानावि विविधानि तेषामन्तो न विद्यते ।
हनपवमद्धनैषां भावुत्थैर्मांसनीभवैः ।
तुषरवादिभिश्चैव केतकीभिः समाचरेत् ।
दुग्धे दधि दधे तक्रे घोले तैले च सर्पिषि ।
मुखरौ दैवतोदे च चमेल्यादिविधारकं ॥ ० ॥
कालरायादलवत् हृतं दयमनुत्तमं ।
विच्छाहरेत् सर्व्वदार्कं द्वादशस्य चान्यदा ।
चदरा पञ्चकं द्रवं रचनु वनौषधं ।
दधिसर्पिश्चलयोगा मधुश्चिहरेत्तु सर्पिषः ।
कोरन्त्रकन्तु दुग्धस्य तदा मधुस्य किलार्कं ।
तैलस्य तस्य विस्वार्कं मध्ये दुग्धसमन्वितं ।
दद्यं दधः द्वादशं वदेत्क्वाथेनिवेशनं ।
तदा क्वाथं क्वार्दथाद् हरेदर्कं मदुरयेत् ।
[illegible] पुष्पं स्तानी रयारधोमुखीं ।
[illegible] कारवं जसेत्वर्कं कुर्यात् सुगन्धकं ।
[illegible] पुष्पं त्वक्ता दृश्यं द्वितीयं [illegible] ।
[illegible] हरिहरं दद्यात् दृष्टं पुरं पुनः ।
[illegible] द्वादशार्कं तदा दुर्गन्धं भवेत् ।

अर्क

तथा पुनः पुनः कार्य्यं जायते गन्धचारवं ।
आयाति रोचको गन्धो भवेत्तद्वक्तिदीपनं ॥ ० ॥
सर्व्वेष्वर्कप्रयोगेषु गन्धपाषाणवासना ।
धर्काणान्तु प्रदातव्या ते भवन्त्यर्कसम्भवाः ।
सर्व्वत्र वातरोगेषु महिषाक्षादिवासना ।
महिषाक्षस्तथा रालं निर्य्यासः सर्ज्जकस्य च ।
कृष्णागुरुः कारस्करञ्च महिषाक्षादिपञ्चकं ।
सर्व्वेषु पित्तरोगेषु चन्दनादिकवासना ।
सर्व्वेषु कफरोगेषु जटामांस्यादिवासनं ।
चन्दनञ्च तथोशीरं कर्पूरो गन्धनाकुली ।
एलाकर्पूरगोहला समेते चन्दनादयः ।
जटामासी नखं मन्त्री लवङ्गं तगरं रसः ।
शिलाया गन्धपाषाणः सप्त मांस्यादिका अमी ।
वासयेद्वा दशाङ्गेन त्रिदोषघ्नेन चार्ककं ।
नश्यन्ति यस्य धूपेन वातपित्तकफात्मकाः ।
महाशङ्खन्धपाषाणात् तावन्महिषगुग्गुलुः ।
चतुरंशं चन्दनञ्च जटामांसी च तावती ।
त्रिभागः सर्ज्जकः सारस्तावदेव हि रालकं ।
उशीरं तु द्विभागं स्यात् घृतभृष्टं नखं समं ।
कर्पूरो मृगनाभिश्च एकभागौ प्रकीर्त्तितौ ।
एष दशाङ्गधूपस्तु रक्षस्यापि मनो हरेत् ॥ ० ॥
मनायङ्गनगुनादीनां निर्गन्धीकरणं प्रभु ।
उत्पाद्यान्तर्व्विषं सम्यक् तन्मध्ये विनिःक्षिपेत् ।
पर्य्यायमेकमत्यन्तमध्येऽस्मिन् विरसे सति ।
दद्यान्निष्काश्यान्यतमं कुर्य्यात्क्वाथमाशकं ।
शोधपुष्पीरसेऽप्येवं मूर्व्वापत्ररसेऽपि वा ।
त्रिपर्य्यायोत्तरं तत्तु रसोनं क्षालयेत् सुधीः ।
हरिद्राराजिकातोये स्थाप्यं पर्य्यायमेककं ।
उष्णोदकेन संक्षाल्य पर्य्यायं वासयेत्ततः ।
सहस्रपत्नीपुष्पैर्व्वा अभावे पत्रवैरपि ।
चालोडयेद्दशांशेन मधांशेन च मस्तुना ।
युक्तं कृत्वा याममात्रं स्थापयेत् प्रकटातपे ।
ततो निष्काशयेदर्कं आत्यादिकपिधानितं ।
अस्यार्कस्य सुगन्धेन एकदा मोहितो हरः ।
को जानाति रसोनस्य क्वार्कोऽयमिति भूतले ।
एकतः सर्व्वं दशार्का स.मार्कन्तु तथैकतः ।
मया मर्त्ये गृहीतन्तु प्राप्तं तत्र च नामृतं ।
तदा प्रोक्तं शिवस्याग्रे मम धिग् जीवितं प्रभो ।
नीता वाथ प्रभुणा वा सुधा देवैर्मया श्रुतं ।
न दृष्टा तत्र देवेश शिरश्छेदं करोम्यहं ।
ततः प्रसन्नो गिरिशो वाक्यं मां प्रति सोऽब्रवीत् ।
दत्तं मया समस्तं ते देवावध्यत्वमेव च ।
किन्तु कार्य्यन्तु सर्वदा सुधातोऽधिकरोचनं ॥ ० ॥
संप्रवक्ष्यामि मांसार्कं मद्यस्यार्कं तथैव च ।
मधाक्षा विजयादीनां लभ्यते यैः सुखं महत् ।
मांसन्तु त्रिविधं प्रोक्तं मृदुलं कठिनं घनं ।
तेषामर्कं यथा प्रोक्तं यन्त्रान्निष्काशयेच्छनैः ।
मृदुलं बहुरेखाढ्यं चत्वारिंशाशकं पटुः ।
कूष्माण्डोऽस्मिन् तस्मिन् दत्त्वा तत् च.लयेच्छनैः ।
[illegible] नारायन्येन नहिभोद च विनिक्षिपेत् ।
[illegible] वर्मसमांशं तदमारे चयः क्षिपेत् ।
[illegible] मरन्द मरिचा मातङ्गेतरं ।

अर्क

मरिचं मृगनाभिश्च विद्रुमं [illegible]
कार्य्यं पुष्पपिधानाद्यमर्कं नि[illegible]
जायतेऽसौ महास्वादुः सुधा[illegible]
दृढमांसस्य खण्डानि लघून्येव [illegible]
दद्याच्च तुवरीं तत्र लवणं प्रोक्त[illegible]
क्षालयेदारनालेन त्रिवारं कोष्ण[illegible]
क्षालयेत् सप्तवाराणि हरेदर्कन्तु [illegible]
दृढमांसस्य खण्डानि कुर्य्यादतिम[illegible]
आलोड्य प्रश्नुमावेण क्षालयेत् प[illegible]
सप्तवाराणि लवणं पचेत् पूर्व्ववदेव [illegible]
तद्दत्त्वा यन्त्रमध्ये तु हरेत् पूर्व्ववदर्क[illegible]
सर्ज्जिक्षारं यवक्षारं श्वेतक्षारञ्च टङ्क[illegible]
सौभाग्यक्षारकं सोरक्षारं प्रक्षनं [illegible]
अर्कसेकुण्डयालाश्चक्षारञ्च तुवरी तथा[illegible]
अपामार्गभवं क्षारं तथाष्टौ लवणानि [illegible]
लवणाष्टकमेतच्च सैन्धवञ्च सुवर्चलं ।
विड् समुद्रसंजातं उद्भिदं रोमकं मर्द ।
कृत्वा सर्व्वाणि चैकत्र निम्बुनीरेण मर्द[illegible]
एकविंशतिवाराणि काचकूप्यां विनि[illegible]
नरास्य निम्बुरसकैः सर्व्वमार्द्रीकृतञ्च यत् ।
अथ सच्छिद्रपीठरी मध्ये कूप्या निवेशये[illegible]
मृत्कर्पटसमायुक्तां सहेरग्निं यथाविधि ।
तस्याग्रे कूपिका योज्या दीर्घकण्ठा मनो[illegible]
सा कूपिका तले स्थाप्या मेनदेव सर्द्दक[illegible]
जलमुखं यथा न स्यात् तथा चापरं[illegible]
अग्निः क्रमतो देया यामं यामञ्च पञ्च [illegible]
अनेनैव प्रकारेण क्षाराकांश्च समुद्गम[illegible]
दद्यादस्थीनि मांसानि शङ्खशङ्खादिकानि [illegible]
सर्व्वाण्यपि विलीयन्ते शङ्खदावे न संशयः ।
पारावताजपटकशशशूकरटिट्टिभाः ।
क्षुद्रमत्स्यादिकाः सर्व्वे मांसेषु मृदुला [illegible]
मृगरोहितकाद्याश्च मत्स्याः शशविष[illegible]
एते कठिनमांसाः स्युः पक्षिणो [illegible]
गजकुम्भीरघण्टाद्याः सुगन्धा वर्षारुह ।
गोधा गोऽश्वालुलायाद्या घनमांसा
अन्नादिसम्भवो योऽर्कस्तस्यापि परिकी[illegible]
तस्य भेदान् प्रवक्ष्यामि शृणु तत् [illegible]
तदासवानिष्टवर्धमष्टगन्ध प्रयोजयेत् ।
पूर्व्वोक्तैर्धूपयेत्कुम्भं जायते गन्धपूर्त्तिं ।
अर्द्धं तत्र जलं देयं सिद्धे देयोऽष्टमश्च ।
तुषोदकैर्यवैरामैः सतुषैः सकलैरपि ।
सौवीरन्तु यवैरामैः सतुषैः सकलैरपि ।
गोधूमैरपि सौवीरं जायते सम्यगाहृतं ।
आरनालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः ।
धान्याम्लं शालिपृथुकादिकोदवादिकं [illegible]
मधूकाश्वीराजिकायुक्तैः स्यान्मूलकादयः ।
सर्षपसारसैर्वापि शाल्मिपिष्टकसदृशैः ।
कन्दमूलफलादीनि सधेहमत्रयानि च ।
एकीकृत्य कृतोऽर्कः दन्तसुखमनिश्रितः ।
पक्वौषधामृतसिद्धो योऽर्कस्तत् [illegible]
अरिष्टमधुपाकेन सर्व्वतश्च गुणाधिकः ।
शालिपिष्टकपिष्टादिकृतो दोऽर्कः [illegible]

दर्शनस्पर्शनादिभिर्विहिता वारुणी स्मृता ।
इक्षोः पर्व्व भवैः सिद्धः शीधुः पक्वरसस्य च ।
आमैस्तैरेव यः सिद्धः स च शीतरसः स्मृतः ॥
पर्न्तादादाभिर्गर्दो तामस्यं रामार्गप्रियं ।
सन्धानाकाराद्गतन्तु तद्द्रवं माध्विकं भवेत् ॥
माध्विके शीतलस्यादि राजसे माहघादिकं ।
तामसे मिश्रशस्त्राणि निहाय मदिरा चरेत् ॥
भङ्गादिमत्तद्रव्याणां यथायोगप्रयोगतः ।
अर्कं निष्कासयेद्धीमान् बोधकः स्यान्मदस्य सः ॥
पुष्पाद्यादिकबीजानि नवं पयसि निःक्षिपेत् ।
वर्गकरोपविबन्धादिर्ग्गदितोऽर्को भवेत् महि" ॥
इति श्रीलङ्काधिपरावणकृतार्कचिकित्सायां अन्नप्रलयं
द्वितीयं ॥ २ ॥
"अथातः संप्रवक्ष्यामि केवलार्कगुणान् प्रिये ।
हरीतक्याः शूलहरः प्रवाममलरोगहनाशनः ॥
विभीतकस्य स्वट्छर्द्दिकफवातविनाशनः ।
आमलस्य त्रिदोषाग्निमांद्यमेहान् विनाशयेत् ॥
पिप्पल्याः श्वासकासामवातार्शोग्निपक्षशूलहृत् ।
मरीचस्य कृमीन् श्वासं हरेत् सर्व्वान् गदानपि ॥
ग्रन्थिकस्य श्लीहगुल्मकफवातोदरापहः ।
चव्यार्कोऽत्यन्तरुचिकृत् विशेषाद्गुदजापहः ॥
अर्कस्तु गजपिप्पल्या वातश्लेष्माग्निमान्द्यनुत् ।
चित्रकस्याग्निकृत् कासग्रहणीकृमिशोषहा ॥
यवान्याः पाचनो रुच्यो दीपनः शुक्रशूलहृत् ।
अजमोदोद्भवो वातकफहा वस्तिशोधनः ॥
पारसीकयवान्यास्तु ग्राही पाचनमादनः ।
जीरकस्य तु संग्राही गर्भाशयविशुद्धिकृत् ॥
कृष्णजीरस्य चक्षुष्यो गुल्मच्छर्द्यतिसारजित् ।
कारव्या बलकृत् ह्यर्को ज्वरघ्नः पाचनः सरः ॥
धान्यार्कस्य तृषादाहवमिश्वासत्रिदोषहृत् ।
शोषज्वरानिलश्लेष्मव्रणशूलादिरोगहृत् ॥
मिश्रेयाया वह्निमान्द्ययोनिशूलकृमीन् हरेत् ।
ज्वालामरीचकस्यापस्मारभूतत्रिदोषहृत् ॥
मेथिकायाः श्लेष्मवातज्वरामकफनाशनः ।
वनमेथ्याः सर्व्वरोगान् हरेत् कुञ्जरवाजिनां ॥
चन्द्रशूरस्य हिक्कास्रगवातहृत् पुष्टिवर्द्धनः ।
हिङ्गुनः पाचनो रुच्यः कृमिशूलोदरापहः ॥
वचाया वह्निवमिकृत् विबन्धाध्मानशूलहृत् ।
पारसीकवचायास्तु भूतोन्मादबलं हरेत् ॥
कुलिञ्जनस्य स्वरकृत् हृत्कण्ठमुखशोधनः ।
स्थूलग्रन्थिभवस्यार्को विशेषात् कफकासनुत् ॥
द्वीपान्तरवचायास्तु हरेच्छूलं फिरङ्गकं ।
हपुषाया हरेत् श्लीहं विषं मोहञ्च दारुणं ॥
हपुषायाः समीरार्शोग्रहणीगुल्मशूलहृत् ।
विडङ्गस्योदरश्लेष्मकृमिवातविबन्धनुत् ॥
तुम्बुरोर्गुरुताश्वासकासश्लीहकृमीन् हरेत् ।
वंशरोचनजस्तृष्णाक्षयकासज्वरान् हरेत् ॥
समुद्रफेनजः शीतो लेखनः कफहृत् सरः ।
जीरकोत्थः शुक्रकफबलकृच्छीतलः समः ॥
आर्षभः पित्तदाहास्रकासवातक्षयापहः ।
महामेदोद्भवोऽर्कस्तु स्तन्यकृत् कामवर्द्धनः ॥
महानिम्बोद्भवः शीतो रक्तपित्तज्वरप्रणुत् ।

काकोल्याः शुक्रलः शीतः पित्तशोषज्वरापहः ॥
क्षीरकाकोलिकाजातो बृंहणो दाहवातहा ।
ऋद्ध्या बन्ध्यत्रिदोषघ्नो रक्तपित्तविनाशनः ।
वृद्ध्या गर्भप्रदः शीतः क्षतकासक्षयापहः ॥
मधुयष्ट्याः केशकरः स्वर्य्यः पित्तानिलास्रजित् ।
जलयष्ट्या विषच्छर्द्दितृष्णाग्लानिक्षयापहः ॥
कम्पिल्लस्य विरेकी स्यात् मेहानाहविकारनुत् ।
आरग्वधस्य पित्तास्रवातोदावर्त्तशूलहृत् ॥
कट्व्या मेहश्वासकासकृमिकुष्ठज्वरापहः ।
भूनिम्बस्य तृषाकुष्ठज्वरव्रणकृमिप्रणुत् ॥
मन्नाया वस्तिपित्तास्रकृमिवीसर्पकुष्ठनुत् ।
मदनोत्थः छर्द्दनेन चातुर्थज्वरकादिहृत् ॥
राजोद्भवः समीरास्रवातशूलोदरापहः ।
नागभिल्लोद्भवो भोगिलूताद्याखुविकारहृत् ॥
माचिकाजस्तु पित्तास्रपक्वातीसारहा लघुः ।
तेजस्विन्याः श्वासकासश्लेष्महृद्वह्निदीपनः ॥
ज्योतिष्मत्या वान्तिकरो वह्निबुद्धिस्मृतिप्रदः ।
कुष्ठस्य हन्ति वातास्रकासकुष्ठमरुत्कफान् ॥
पौष्करस्यारुचिश्वासान् विशेषात् पार्श्वशूलनुत् ।
हैमवत्या रेचकान्तिकरः कण्डूविनाशनः ॥
भर्ग्या हरेदूर्द्ध्ववातहिक्काश्वासक्षयस्वरान् ।
काट्फलोत्थः श्वासकासप्रमेहार्शोऽरुचीन् हरेत् ॥
भार्ग्या हरेत् कफश्वासपीनसज्वरमारुतान् ।
पाषाणभेदजो योनिरोगकृच्छ्राश्मगुल्महा ॥
धातकीजस्तृषामारविषकृमिविसर्पजित् ।
मञ्जिष्ठार्को विषश्लेष्मरक्तातीसारकुष्ठहा ॥
कुसुम्भजो वर्णकरो रक्तपित्तकफापहः ।
लाक्षाजः कृमिवीसर्पव्रणोरःक्षतकुष्ठहा ॥
हरिद्राया मेहशोथत्वग्दोषव्रणपाण्डुनुत् ।
आरण्यकहरिद्रायाः कुष्ठवातास्रनाशनः ॥
कर्पूरकहरिद्रायाः सर्व्वकण्डूविनाशनः ।
दार्व्या विशेषतो लेपात् नेत्रकर्णास्यरोगनुत् ॥
रसाञ्जनोद्भवो नेत्रविकारव्रणदोषहृत् ।
वाकुच्याः कृमिविष्टम्भपाण्डुशोथकफापहः ॥
प्रपुन्नाटस्य हन्त्येव कण्डूदद्रुविषानिलान् ।
विषाख्यो दीप्तिकृत् पाके कफपित्तातिसारहा ॥
लोध्रजः शीतलो ग्राही चक्षुष्यः कफपित्तनुत् ।
वत्सकोद्भवो नेत्रोदरातीसारशोथहृत् ॥
भल्लातकोद्भवो हन्यात् ज्वरोदरकृमिव्रणान् ।
गुडूच्या दीपनो ग्राही कासपाण्डुज्वरापहः ॥
ताम्बूल्या मुखदौर्गन्ध्यमलवातश्रमापहः ॥
बैल्वः श्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ॥
गम्भारीजो भ्रमतृष्णाशूलार्शोविषदाहहृत् ।
पाटल्यारुचिशोथास्रतृट्श्लेष्मवमिदाहहा ॥
अग्निमन्थोद्भवः शोथकृमिपाण्डुबलासनुत् ।
श्योनाकजस्तु गुल्मार्शःकृमिहृद्वह्निदीप्तिकृत् ॥
शालिपर्ण्याः क्षतकृमिज्वरच्छर्द्यतिसारहा ।
पृश्निपर्ण्या ज्वरश्वासरक्तातीसारदाहजित् ॥
वार्त्ताक्या ज्वरवैरस्यमरुदारोचकशूलहा ।
कण्टकार्य्या गर्भकरः पाचनः कफकासहा ॥
गोक्षुरस्याश्मरीमेहकृच्छ्रहृद्रोगवातहा ।
जीवन्त्याः सारहृन्नेत्रदोषत्रितयनाशनः ॥

मुद्गपर्ण्याः शोथदाहज्वरदृग्दोषातिसारहृत् ।
माषपर्ण्याः शुक्रकरो वातपित्तज्वरास्रजित् ॥
महाकोलोद्भवः शूलशिरःपीडोदरापहः ।
स्नुक्कोत्थो मेहगुल्माम्लकासकुष्ठाममारुतान् ॥
मन्दारजो वातकुष्ठकण्डूव्रणविषापहः ।
अर्कार्कः श्लीहगुल्मार्शःश्लेष्मोदरकृमीन् हरेत् ॥
वशीरो लेपतो हन्यात् व्रणगण्डोदरव्रणान् ।
मातलोत्थः कफानाहकृमिशोथावर्त्तशोषहा ॥
लाङ्गल्या लेपतो हन्यात् शोफार्शव्रणगण्डजितः ।
कारवीरोद्भवो नेत्रकोपकुष्ठव्रणापहः ॥
धत्तूरोत्थस्तु विषवत् भक्षणे लेपने सुहृत् ।
धत्तूरजो हरेत् मेहशूकादिकृमिविषादिकं ॥
नागोद्भवो ज्वरच्छर्द्दिमेहकुष्ठक्षयापहः ।
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान् ॥
निम्बजो भ्रमतृट्कासज्वरारुचिवमिप्रणुत् ।
महानिम्बोद्भवो गुल्ममूषिकाविषनाशनः ॥
पारिभद्रोऽनिलश्लेष्मशोथमेदःकृमिप्रणुत् ।
काञ्चनारो गलगण्डमालागुदभ्रंशव्रणापहः ॥
कोविदारस्तु पित्तास्रप्रदरक्षयकासहा ।
शोभाञ्जनार्को रुचिकृत् शुक्लो वह्निदीपनः ॥
मधुशिग्रूद्भवो हन्यात् विद्रधिक्षयकृमीन् ।
शिग्रुजो विषहृन्नेत्रो नस्येनाक्षिशिरोरोगहृत् ॥
गिरिकर्ण्याः कुष्ठशूलशोथव्रणविषापहः ।
सिन्धुवारोद्भवो हन्ति शूलशोथाममारुतान् ॥
निर्गुण्ड्यर्को हरेज्जन्तुव्रणकुष्ठारुचीन् लघुः ।
कौटजो दीपनः शीतः कफतृष्णामकुष्ठजित् ॥
वारङ्गः कफगुल्मार्शोव्रणकृमिविषापहः ।
पूतिकारञ्जको भेदी वातार्शःकृमिकुष्ठजित् ॥
करञ्जा वमिवातार्शःकृमिकुष्ठप्रमेहजित् ।
उषटार्कः केशकरो वातपित्तकफापहः ॥
गुञ्जाया हरते श्वासमुखशोषभ्रमज्वरान् ।
कपिकच्छूद्भवो रुच्यो बृंहणो वाजिकर्म्मकृत् ॥
मांसरोहिण्युद्भवस्तु रुच्यो दोषत्रयापहः ।
चिञ्चः कुर्य्याद्धातुपुष्टिं तत्फलान्मारयेज्ज्वरान् ॥
पुस्तकान्तरे चेल्लुरिति च पाठः ॥
कण्टकार्य्या दीपनः श्लेष्मशोथोदररुजं हरेत् ।
वैतसो हरते दाहं शोथार्शोयोनिरुग्व्रणान् ॥
जलवेतसजो ग्राही शीतो वातप्रकोपनः ॥
इज्जलार्कस्तु हरते चराचरविषं स्फुटं ॥
अङ्कोठकस्य शूलामशोथग्रहविषापहः ।
बलार्को ग्राही वातास्रपित्तास्रक्षतनाशनः ॥
अतिपूर्व्वबलार्कस्तु मूत्रातीसारनाशनः ।
महाबलार्को हरते कृच्छ्रं वातानुलोमनः ॥
नागपूर्व्वबलार्कस्तु मूर्च्छामोहहरः परः ।
लक्ष्मणार्कन्तु सेवेत बन्ध्यापि लभते सुतं ॥
स्वर्णवल्लजः शिरःपीडात्रिदोषान् हन्ति दुग्धदः ।
कार्पासार्कः कर्णसंस्थः कर्णरोगान् विनाशयेत् ॥
वंशजः कफपित्तघ्नः कृच्छ्रास्रव्रणशोषजित् ।
नलार्को वस्तियोन्यर्त्तिदाहपित्तविसर्पहृत् ॥
पाठ्या जयेत् ज्वरच्छर्द्दिकुष्ठातीसारहृद्रुजः ।
श्वेतदन्त्युद्भवो रेकी पित्तशार्शोदरापहः ॥
गरपट्टोद्भवः श्लीहान् गुल्मव्रणविषापहः ।

श्वासघ्नो मदभ्रान्तिपित्तास्रकुष्ठकासजित् ।
मण्डितोऽयमवलक्षत् श्लीपदमोहानिलार्त्तिजित् ।
अपामार्गभवश्चार्द्धिकफमेदोऽनिलापहः ।
क्षारक्षायामार्गभवो धातुस्तम्भनकारकः ।
कोकिलाक्षभवः शीघ्रं सेकाच्छोफान्निवारयेत् ।
अस्थिसंहारिकायास्तु भग्नसन्धानकृच्छिवे ।
कुमारिकाया उत्थोऽग्निदग्धविस्फोटकान् जयेत् ।
पुनर्नवायाः श्वेतायाः सर्व्वनेत्रामयापहः ।
पुनर्नवाया रक्ताया ग्राही पित्तास्रनाशनः ।
प्रसारिण्या वातहरो हृद्यः सन्धानकृत् सरः ।
सारिवाया वह्निमान्द्यकासामविषनाशनः ।
भृङ्गराजस्य दन्तोऽर्कः केश्यस्त्वच्यः शिरोऽर्त्तिहृत् ।
शरपुङ्खीलतायास्तु अर्कः पित्तकफान्तकः ।
नायकव्यर्कः शूलविषविलेपीज्वरनाशनः ।
मूर्व्वाया मोहहृद्रोगपाण्डुकुष्ठज्वरापहः ।
काकमाच्या नेत्रहितश्छर्दिहृद्रोगनाशनः ।
काकनासाभवो वामी शोथार्शःश्वित्रकुष्ठहृत् ।
काकजङ्घोद्भवो हन्यात् ज्वरकण्डूविषक्रिमीन् ।
नागिन्यास्तु हरेच्छूलयोनिदोषवमिक्रिमीन् ।
मेषशृङ्ग्याः श्वासकासव्रणदेहाग्निशूलहा ।
हंसपाद्या हन्ति शूलभूतरक्षोविषव्रणान् ।
सोमवल्लयास्त्रिदोषघ्नः क्षीरदश्च रसायनः ।
आकाशवल्ल्याः शीतोऽर्कः पित्तश्लेष्मनाशनः ।
पातालगरुडीजातोऽर्को हृद्यः पवनापहः ।
वन्दाकदोद्भवोऽर्कस्तु विषरक्षोव्रणापहः ।
वटपत्रीभवश्चोष्णो योनिमूत्रगदापहः ।
त्रिवृत्पत्र्या विबन्धार्शःश्लेष्मगुल्मानिलापहः ।
वंशपत्र्याः पाचनोष्णो रक्तलिङ्गदसंघहृत् ।
मत्स्याक्ष्यर्को ग्राहिशीतकुष्ठपित्तकफास्रजित् ।
सर्पाक्ष्या रोपणः सर्पवृश्चिकोन्दुरदंशहृत् ।
शङ्खपुष्प्या विषहरः स्मृतिकान्तिबलाग्निदः ।
अर्कपुष्प्याः क्रमिश्लेष्ममेहपित्तविकारजित् ।
...लालुकाया भगन्दररक्तपित्तातिसारहृत् ।
...नग्रामभवोऽर्कः क्रमिपित्तकफापहः ।
...पिकाया कफहरो हृद्यलघ्वी क्रिमिप्रणुत् ।
...पामल्याः कासहृच्छवासकफपाण्डुक्षतापहः ।
...सा बुद्धिप्रदश्चार्कः षण्मासाभ्यासतः कविः ।
...मयुक्तिका पाण्डुविषशोथज्वरान् हरेत् ।
...रुण्या ज्वरश्वासकासशोषजन्तुजित् ।
...मुण्ड्या हरेत् स्फोटयोनिरक्तक्रमिपाण्डुता ।
...कर्कोटिकाजातः सर्वदर्पविषापहः ।
...हिरकाया दुर्गन्धविषगन्धोदरापहः ।
...त्याः शूलगुल्मदेहार्शोवातजित् परः ।
...ो ग्राहिहिमो वह्निकृद्रक्तदाहहा ।
...ाया मेहकासकफश्वासज्वरापहः ।
...ाः सर्वविषघ्नः सर्पविनाशनः ।
...ी मूषकालर्करोगोन्दविनाशिनिन् ।
...वह्निविकारार्त्तिकुष्ठक्रिमिप्रणुत् ।
...ज्वरं रक्तं मुलशोषं कफं हरेत् ।
...वातस्य कफदोषाश्मवातजित्" ।
...व्यापादनार्कचिकित्सादानौषधर्क-
...दिदशकं ३ • । अपरं नानौषध-

विधानं चतुर्थशतकं । नानारोगनिवारणार्थं पञ्चमशतकं । विस्फोटकनिवारणार्थं षष्ठशतकं । शुक्ररोगादेर्निवारणं सप्तमशतकं । कामार्थं नाष्टमशतकं । गन्धसंख्या नवमशतकं । धातुशुद्धिर्दशमशतकं । एतत् सर्व्वं अर्कप्रकाशे रावणमन्दोदरीसंवादे अस्ति बाहुल्यभिया न लिखितं ।

("अर्कक्षीरं सुधाक्षीरं तिक्तकुम्बालु मल्लकाः ।
करञ्जो वत्समूत्रञ्च सेपनं श्रेष्ठमर्मणाम्" ।
इति चक्रपाणिसंग्रहः ॥ • ।
"अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्ने-
न्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवया ला
पसहस्रचेति" । इति अर्कादिगणः ।
"अर्कादिको गणो ह्येष कफमेदोविषापहः ।
क्रिमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः" ।
इति सुश्रुतः ॥)

अर्ककान्ता, स्त्री, (अर्कोऽर्कंकिरणः कान्तोऽनुकूलो यस्याः सा, कम् + क्त स्त्रियां टाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः । ऊड्ऊडिया इति ख्याता । इति राजनिर्घण्टः । (अस्या गुणा आदित्यभक्ताशब्दे ज्ञातव्याः ।)

अर्कचन्दनं, क्ली, (अर्कस्य प्रियं चन्दनं, षष्ठीतत्पुरुषः ।) रक्तचन्दनं । इति राजनिर्घण्टः । (रक्तचन्दनशब्देऽस्य गुणावली ज्ञेया ।)

अर्कजौ, पु, (अर्काज्जायेते यौ, अर्क + जन् ड, पञ्चमीतत्पुरुषः ।) अश्विनीकुमारौ । नित्यद्विवचनान्तशब्दोऽयं । इति हेमचन्द्रः ।

अर्कतनयः, पु, (अर्कस्य तनयः, षष्ठीतत्पुरुषः ।) कर्णराजः । इति हेमचन्द्रः । वैवस्वतमनुः । सावर्णिमनुः । शनिः । यमः । यमुनायां तपत्याञ्च स्त्री । इति महाभारतं ।

अर्कनन्दनः, पु, (अर्कस्य नन्दनः, षष्ठीतत्पुरुषः ।) अर्कतनयः । इति त्रिकाण्डशेषः ।

अर्कपत्रः, पुं, (अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्य सः ।) आदित्यपत्रवृक्षः इति राजनिर्घण्टः ।

अर्कपत्रा, स्त्री, (अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्याः सा ।) वृक्षविशेषः । इशेर मूल इति भाषा । तत्पर्य्यायः । सुनन्दा २ अर्कमूला ३ विषापहा ४ । इति रत्नमाला ।

अर्कपर्णः, पु, (अर्कं इव रक्तं पर्णमस्य सः ।) अर्कवृक्षः । इत्यमरः । आकन्द इति ख्यातः । (अस्य विशेषोऽर्कशब्दे ज्ञातव्यः ।)

अर्कपादपः, पुं, (अर्कः अर्कवृक्षइव तीक्ष्णः पादपः ।) निम्बवृक्षः । इति त्रिकाण्डशेषः ।

अर्कपुष्पिका, स्त्री, (अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः सा, जातित्वात् ङीप् कप् ।) वृक्षभेदः । अर्कक्षुपी क्षुपीपुष्पचेति ख्याता । तत्पर्य्यायः । पयस्या २ सूर्य्यवल्ली ३ सितपर्णी ४ । इति रत्नमाला ।

अर्कपुष्पी, स्त्री, (अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः सा, जातित्वात् ङीप् ।) कुटुम्बिनीवृक्षः । तत्पर्य्यायगुणाः ।

"अर्कपुष्पी क्रूरकर्मा पयस्या ...
अर्कपुष्पी क्रमिश्लेष्ममेहपित्तविकारजित् ...
इति भावप्रकाशः । राजनिर्घण्टोक्त...
कुटुम्बिनीशब्दे द्रष्टव्याः ।

अर्कप्रिया, स्त्री, (अर्कं प्रीणाति, प्री + ... प्रिया इति वा ।) जवा । इति राज... (जवाशब्देऽस्य विशेषो ज्ञातव्यः ।)

अर्कबन्धुः, पुं, (अर्कस्य बन्धुरिव ।) गौतम... इक्ष्वाकुकुलोद्भवत्वात्तंशीयबुद्ध । इत्य...

अर्कबान्धवः, पुं, (बन्धुरेव बान्धवः, बन्धु + अण् ... अर्कस्य बान्धवः, षष्ठीतत्पुरुषः ।) अर्क... इति हेमचन्द्रः ।

अर्कभक्ता, स्त्री, (अर्कस्य भक्ता, षष्ठीतत्... आदित्यभक्तावृक्षः । इति राजनिर्घण्टः । ऊ... ऊडिया इति ख्याता ।

अर्कमूला, स्त्री, (अर्कं इव तिक्तमूलं ... यस्याः सा ।) अर्कपत्रा । इति रत्नमाला । ... मूल इति भाषा ।

अर्करेतोजः, पुं, (अर्कस्य रेतसो जाते, ... + जन् + ड, उपपदसमासः ।) सूर्य्यपुत्र... तत्पर्य्यायः । रेवन्तः २ अश्वः ... इति हेमचन्द्रः ।

अर्कवल्लभः, पुं, (अर्कस्य वल्लभ... बन्धूकवृक्षः । इति राजनिर्घ... शब्देऽस्य गुणादयो ज्ञेयाः ।)

अर्कवेधं, क्ली, (अर्कोण विध्यते, ... यथायथं ।) तालीशपत्रं । इति ... (तालीशपत्रशब्देऽस्य गुणादिविश...

अर्कव्रतं, क्ली, (अर्कस्य व्रतं, षष्ठीतत्... रोग्यसम्पदादि सूर्य्यव्रतं । इति स्... जनक्षोभकवर्षणाकरणरूपं । यथा,- "अष्टौ मासान् यथादित्यस्तोयं हरति ... तथा हरेत् करान्राष्ट्रान्नित्यमर्कव्रतं हि ..." इति मनुः ।

अर्कसूनुः, पुं, (अर्कस्य सूनुः पुत्रः ।) कर्ण... हेमचन्द्रः ।

अर्कसोदरः, पुं, (अर्कस्य सोदर इव हितक... ऐरावतहस्ती । इति हेमचन्द्रः ।

अर्कहिता, स्त्री, (अर्काय हिता अनुकूला, चतुर्थी... तत्पुरुषः ।) आदित्यभ... निर्घण्टः । ऊडऊडिया ... विशेष आदित्यभक्ताशब्दे ...

अर्काश्मा, [न्] पुं, (अर्कस्य ... मध्यलोपी कर्मधारयः ।) ... इति ख्यातः प्रस्तरभेदः । ... यावत् । इति हलायुधः ।

अर्काह्वः, पुं, (अर्केण आह्वयते ... ह्वे + अप् ।) अर्कवृक्षः । इत्यम... भाषा ।

अर्कोपलः, पु, (अर्कस्यानुगत उपल... सूर्य्यकान्तमणिः । इति राजनि... इति ख्यातो रत्नभेदः स्फटिकम...

क्षसितवह्निभिरह्नि तप्तात्तीव्रं महाव्रतमिवात्र
न्ति वप्राः" । इति माघः ।)
क्ली, स्त्री, (अर्ज+कलच्, कुत्वम् ।) कपाट-
ककाष्ठविशेषः । इत्यमरः ॥ हुड़का तसला
।दि भाषा ।
"ससम्भ्रमेन्द्रद्रुतपातितार्गला
नेमिलिताक्षीव भियामरावती" ।
। काव्यप्रकाशे ।
"तां मत्पनार्त्तां दृढ़तोरणार्गलां
दर्विचिन्नैरुपशोभितां शिवां" ।
। रामायणे ।
।यानमपोढ़ार्गलमध्यगारं" । इति रघुः । प्रति-
ः । प्रत्यवायः । अन्तरायः ।
ष्मितं तदवज्ञानात् विद्धि सार्गलमात्मनः" ।
। रघुवंशे ।)
तोले च । इति मेदिनी ॥ देवीमाहात्म्यपाठ-
दौ पाठ्यस्तोत्रविशेषः ॥ यथा
र्कण्डेय उवाच ।
गवन् केन प्रकारेण दुर्गामाहात्म्यमुत्तमं ।
र्थं सिद्ध्यति तत्सर्वं कथयस्व महाप्रभो ॥
श्रीवाच ।
र्गलं कीलकञ्चादौ पठित्वा कवचं पठेत् ।
येत् सप्तशतीं पश्चात् क्रम एष शिवोदितः ॥
र्गलं दुरितं हन्ति कीलकं फलदं तथा ।
वचं रक्षते नित्यं चण्डिका त्रितयं विदेत् ॥
र्गलं हृदये यस्य स धार्गलवान् सदा ।
ीलकं हृदये यस्य वंशकीलितमानसः ।
वचं हृदये यस्य स वचहृदयः खलु ।
ह्मणा निर्मितं पूर्वं विरिञ्चिनापि चेतसा" ॥
त्यादि । तदाद्यश्लोको यथा,—
जय त्वं देवि चामुण्डे जय भूतापहारिणि ! ।
य सर्वगते देवि ! कालरात्रि नमोऽस्तु ते" ।
स्य शेषश्लोको यथा,—
इदं स्तोत्रं पठित्वा च महास्तोत्रं पठेन्नरः ।
प्तशतीं समाराध्य वरमाप्नोति सम्पदं" ॥
त्यर्गलास्तोत्रं ।
लिका, स्त्री, (क्षुद्रार्गला, अर्गला गौरादित्वात्
ङीष् मार्थे कन् ।) अल्पार्गला । इति हेमचन्द्रः ।
खिल इति भाषा ।
, मूल्ये, (भ्वादि—पर—सकं सेट् ।) इति
कविकल्पद्रुमः । अर्घति गां गोपः । इति दुर्गा-
दासः । ("यत्रोच्छ्रमं यत्र न सन्ति दोषे नार्घन्ति
रत्नानि समुद्रजानि" । इति पञ्चतन्त्रे ।)
ः, पुं, (अर्घ+घञ् ।) मूल्यं ।
("कुर्य्यादर्घं यथापण्यं ततो विंशं नृपो हरेत्" ।
"शतिमुखाद्यमादाय मूल्यतो तान्तवस्य च ।
नवाग्नमार्ग प्रकाशाय विचार्यर्घमनकल्पयेत्" ।
इति मनुः ।) पूजाविधिः । इत्यमरः । अर्घं इत्यत्र
धाममार्गं सर्वत्राभिमतं मतद्वयं सर्वत्र ...
...

यथार्घभेदः । "अये वनदेवतेयं फलकुसुमपल्लवा-
र्घेण मामुपतिष्ठते" । इति उत्तरचरिते ।
"स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै" ।
इति मेघदूते ।
"दूर्वासर्षपपुष्पाणां दत्वार्घं पूर्णमञ्जलिम्" ।
इति याज्ञवल्क्यः ।)
अर्घीशः, पुं, (अर्घोऽस्यस्य इति अर्घी, तेषु ईशः ।)
शिवः । इति शब्दरत्नावली ॥
अर्घ्यं, त्रि, (अर्घ्यते पूज्यते, अर्घ+ण्यत्, न्यङ्क्वादी-
नाञ्चेति कुत्वं, अर्घमर्हतीति इति पादार्घाभ्याञ्चेति
यत् वा ।) पूजनयोग्यं । पूज्यं । इति मेदिनी ॥
अर्घ्यार्थं । तत्तु पूजार्थदूर्वाक्षतचन्दनपुष्पमिश्रित-
वारि । इत्यमरः ॥
("अनर्घमर्घेण तमद्रिनाथः,
स्वर्गौकसामर्चितमर्चयित्वा" ।
इति कुमारसम्भवे ।
"अर्घ्यमर्घ्यमितिवादिनं नृपं,
सोऽनवेक्ष्य भरताग्रजो यतः" ।
इति रघुवंशे ।) अर्घार्थजलम् इति अमरटीकायां
भरतः ॥ तत्तु सामान्यविशेषभेदेन द्विविधं ।
तत्राद्यस्य क्रमः । स्ववामे त्रिकोणवृत्तचतुरस्रभूबिम्बं
विलिख्याधारशक्तिं पूजयित्वा अस्त्रमन्त्रेण पात्रं
प्रक्षाल्य मन्त्रेण जलेनापूर्य्याङ्कुशमुद्रया मन्त्रेण
सूर्य्यमण्डलात्तीर्थमावाह्य प्रणवेन गन्धपुष्पाभ्यां
संपूज्य धेनुमुद्रां प्रदर्श्य प्रणवमथवा दशधा वा
जपेत् ॥ अन्यस्य क्रमः । स्ववामे त्रिकोणमण्डलं
कृत्वा तत्र त्रिपदिकामारोप्य अस्त्रेण शङ्खं
प्रक्षाल्य तदुपरि संस्थाप्य मन्त्रेण गन्धपुष्पाक्षत-
दूर्वादि तत्र निःक्षिप्य विमलजलेन विलोम-
मातृकया मूलेन च पूरयेत् ततस्त्रिपदिकायां
वह्निमण्डलपूजा शङ्खे सूर्य्यमण्डलपूजा जले
सोममण्डलपूजा ततो मन्त्रेणाङ्कुशमुद्रया सूर्य्यम-
ण्डलात्तीर्थमावाह्य मन्त्रेण स्वहृदयाद्देवतां तत्रा-
वाह्य कूर्च्चमन्त्रेणावगुण्ठ्यास्त्रमन्त्रेण मालिनीमुद्रां
प्रदर्श्य मन्त्रेण तज्जलं वीक्ष्य षडङ्गमन्त्रैः सकलीकृत्य
गन्धपुष्पाभ्यां देवतां संपूज्य तदुपरि मत्स्यमुद्रया-
च्छाद्य मूलमन्त्रमथवा अष्टधा धेनुमुद्रां प्रदर्श्या-
स्त्रेण संरक्ष्य तस्मात् किञ्चित् जलं प्रोक्षणीपात्रे
निःक्षिपेत् । इति तन्त्रसारः ॥
अर्घ्यं, क्ली, (अर्घ+यत् ।) आत्मारमुदितमोदनतरु-
कृतमधु । तस्य गुणाः । चक्षुष्यदहितवातित्वं ।
आमवातकफपित्तनाशित्वञ्च । इति राजवल्लभः ॥
अर्च, क, पूजे । (चुरादि—सक—सेट् ।) इति
कविकल्पद्रुमः । क अर्चयति । गोवर्द्धननिम-
मातर्पणादिकं मत्वा विनाशमे सवर्ज्जनमर्च-
यन्तीत्यादि स्वभिलिमिदाह । इति दुर्गादासः ॥
अर्च, अ, पूजे । (भ्वादि—सक—सेट् ।) इति कवि-
कल्पद्रुमः । अ अर्चति अर्चते । इति दुर्गादासः ॥
अर्चकः, त्रि, (अर्चति, अर्च+ण्वुल् ।) पूजकः ।
अर्चनाकारकः । यथा,—
"अर्चकस्य तपोयोगात् अर्चनस्यातिशायनात् ।
आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति" ।

इति तिथ्यादितत्त्वं ॥
("ब्रह्मचारी व्रती च स्यात् गुरुदेवद्विजार्चकः" ।
इति मनुः ।)
अर्चनं, क्ली, (अर्च+भावे ल्युट् ।) पूजनं । यथा,—
"धनधान्यकरं नित्यं गुरुदेवद्विजार्चनं" ।
इति राजवल्लभः ॥ पूजाद्वये त्रि । यथा,—
"अर्चकस्य तपोयोगात् अर्चनस्यातिशायनात्" ।
इति तिथ्यादितत्त्वं ।
अर्चना, स्त्री, (अर्च+युच्, टाप् ।) पूजा । इति
जटाधरः ॥ गुरुदेवद्विजानां नित्यार्चनागुणाः ।
स्वर्गयशआयुर्धनधान्यकारित्वं । अलक्ष्मीपाप-
नाशित्वञ्च । इति राजवल्लभः ॥
अर्चा, स्त्री, (अर्च+आधारे अङ् ।) पूजा । प्रतिमा ।
इति मेदिनी ॥ (देवादीनां पूजनं । "अर्चा चेत्
विधितश्च ते वद तदा किं मोक्षलाभक्रमैः" ॥
इति शिवशतके ।)
अर्चिः, स्त्री, (अर्च+इन् ।) अग्निशिखा । इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
("आसीदासन्ननिर्व्वाणप्रदीपार्चिरिवोषसि" ।
इति रघुवंशे ।)
अर्चिः, [स्] स्त्री, क्ली, (अर्च+इसि ।) अग्निशिखा ।
किरणः । इत्यमरः । दीप्तिः । इत्युणादिकोषः ॥
अयं शब्दः सान्त इत्यन्ये ॥ ("धूम्योर्णां हैमवरह-
श्रियमिव निघर्ष्टैर्र्चिषामादधानः" । "विरम
विरम वह्ने मुञ्च धूमानुबन्धं प्रकटयसि किमुच्चै-
रर्चिषां चक्रवालम्" । इति रत्नावली ।)
अर्चितः, त्रि, (अर्च+कर्म्मणि क्तः ।) पूजितः ।
इत्यमरः ॥ (पूजाविधिना सम्मानितः ।
"विश्रमेयं कृते तत्र गत्वा तान् परमार्चितान्" ।
"अर्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभ" ।
इति महाभारते ।)
अर्चिष्मान्, [त्] पुं, (अर्चिर्विद्यतेऽस्य, अर्चिस्+
मतुप् ।) अग्निः । इति हेमचन्द्रः ॥ सूर्य्यः । अर्चिः-
शब्दात् अतिशये मतुप्प्रत्ययः । (त्रि, दीप्तः । तेजो-
विशिष्टः । प्रभावान् ।) (सनामख्यातो देवर्षिभेदः ।
यदुक्तं, हरिवंशे,
"अर्चिष्मांस्त्वदखर्यैव भास्करं वदतां वरः ।
नेताते देवदेवास्मिते हि तपसान्विताः" ।)
अर्च्यः, त्रि, (अर्च+कर्म्मणि ण्यत्, अर्च+यत् वा ।)
अर्चनीयः । पूज्यः । इति हेमचन्द्रः ।
("मरुद्वृधाह मर्त्यानाम्,
तमर्च्यमाराद्भिवर्त्तमानम्" ।
इति रघुवंशे ।)
अर्ज्ज, अर्ज्जने । (भ्वादि—पर—सकं सेट् ।) इति
कविकल्पद्रुमः । अर्ज्जनमर्ज्जनं लाभः । इह-
श्रार्ज्जति यः क्रियमित्ति ...। इति
दुर्गादासः ॥
अर्ज्ज, क संस्कारे (चुरादि—उभ—सक—सेट् ।)
इति कविकल्पद्रुमः । क अर्ज्जयति विमर्ष-
...

अर्जक, पुं, (अर्जयति, अर्ज + ण्वुल्।) श्वेतपर्णासः। बाबुइ इति भाषा। तत्पर्यायः। श्वेतच्छदः २ कफहारक ३ माला ४ कुठेरकः ५। इति शब्दचन्द्रिका। बर्बरीभेदः। आवकनाह इति ख्यातः। तत्पर्यायः। सुमुखः २ सुगन्धकः ३ सुमात्रकः ४ उग्रगन्धः ५ गम्भीरः ६ कुठेरः ७ बटिपत्रः ८। अस्य गुणाः। कटुत्वं। उष्णत्वं। वातकफामदनेत्ररोगनाशित्वं। रुचिकारित्वं। सुखप्रसवकारित्वञ्च। इति राजनिर्घण्टः। नामान्तरतुलसी। इति रत्नमाला। ("अपरम्प्रकारो बर्बरा कियत्को पित्तकफनाः। कटुपाकरसाश्चैव सुगन्धार्जकभृङ्गकाः॥" इति सुश्रुते॥)

अर्जक, त्रि, (अर्जयति, अर्ज + ण्वुल्।) उपार्जनकर्त्ता। यथा। "[illegible] बहुक्लेशैः श्रेष्ठम्यामद्य- [illegible]" इति [illegible]॥

अर्जन, क्ली, (अर्ज + ल्युट्।) उपार्जनं। कालहेतु- [illegible]। यथा। अर्जनं [illegible] विप्रतिसिद्ध- [illegible] शब्दार्थ॥

("[illegible] श्रीमुखवाक्य।" "[illegible]" इति महेश्वरः। "[illegible]" इति। [illegible] "[illegible]" इति [illegible]। "[illegible]" इति [illegible]। "[illegible] अर्जनम्" [illegible]॥)

[illegible]

२१ फाल्गुनः २२ धन्वी २३। इति राजनिर्घण्टः॥ तत्पर्यायगुणाः।

"ककुभोऽर्जुननामाख्यो नदीसर्जश्च कीर्त्तितः।
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः॥
ककुभः शीतलो भग्नक्षतक्षयविषास्रजित्।
मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत्॥"

इति भावप्रकाशः॥ अस्य गुणाः। क्षतभग्नरक्त- स्तम्भनमूत्रकृच्छ्ररोगे पथ्यत्वं। इति राजवल्लभः॥ कषायत्वं। उष्णत्वं। व्रणशोधनत्वं। कफपित्तश्रम- तृष्णार्त्तिनाशित्वं। वातरोगप्रकोपकारित्वञ्च। इति राजनिर्घण्टः॥ *॥ (अस्य व्यवहारो यथा,—

"अर्जुनस्य त्वचा सिद्धं क्षीरं दद्याद्धृदामये"॥ इति वैद्यकचक्रपाणिसंग्रहः॥)

कार्त्तवीर्य्यार्जुनः। माहिष्मती नाम पुरी तस्य राजधान्यासीत्, स खलु भुजवीर्य्येण सप्तद्वीपां धरामजयत्। योगाद् बाहुसहस्रञ्च लब्धवान्।

"तस्य बाहुसहस्रन्तु युध्यतः किल भारत।
योगात् योगेश्वरस्येव प्रादुर्भवति मायया॥
तेनेयं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता।
ससमुद्रा सनगरा उग्रेण विधिना जिता॥
तेन सप्तसु द्वीपेषु सप्तयज्ञशतानि वै।
प्राप्तानि विधिना राज्ञा श्रूयन्ते जनमेजय"॥
"योऽर्ज्जुनेनार्ज्जनसुल्यो द्विबाहुर्बहुबाहुना"।

इति महाभारते॥) मयूरः। मातुरेकसुतः। इति मेदिनी॥ श्वेतवर्णः। तद्वति त्रि। इत्यमरः॥

अर्जुनध्वज, पुं, (अर्जुनस्य पार्थस्य ध्वजः, रथकेतुभूतः, सततं तत्रावस्थानात्।) हनुमान्। इति हेमचन्द्रः॥

अर्जुनी, स्त्री, (अर्जुन + उनन्, गौरादित्वात् ङीष्।) गौः। करतोयानदी। कुट्टनी। उषा। इति विश्वमेदिन्यौ॥

अर्जुनोपम, पुं, (अर्जुनः अर्जुनवृक्षः उपमा यस्य सः।) वृक्षभेदः। सेगुन इति भाषा। तत्पर्यायः। महापत्रः २ शाकवृक्षः ३ खरीपत्रः ४ अर्हः ५। इति शब्दचन्द्रिका॥ शाकाख्यः ६ स्वरपत्र ७। इति रत्नमाला॥

अर्ण, पुं, (अर्णं जलं [illegible]) शाकवृक्षः। इति शब्दचन्द्रिका। अक्षरं। इत्यागमः॥ वर्णः। यथा,—

"वर्णोऽर्णं रचिरवर्णः [illegible] कथिता बुधैः।
[illegible] वर्णाः कादयोऽष्टौ प्रकीर्त्तिताः"॥
इति तन्त्रसारोऽभिधानं॥

अर्णः, [स्] क्ली, (ऋच्छति, ऋ गतौ उनने सुट् [illegible] तस्य च नुट्।) जलं। इत्यमरः॥

अर्णव, पुं, (अर्णांसि सन्ति अस्मिन्, अर्णसो वो [illegible] लोपश्च।) समुद्रः। इत्यमरः॥ ("अर्णवस्याप्यनन्तस्य [illegible]"। इति रघुवंशे।)

अर्णोद, पुं स्त्री, (अर्णांसि [illegible] अर्णस् + ...)। [illegible] इति रत्नमाला॥ [illegible]॥)

अर्णोमन्दिर, पुं, (अर्णः मन्दिरमिव यस्य सः।) [illegible]

[illegible]

वरुणः। इति हेमचन्द्रः॥

अर्णोद्भव, पुं, (उद्भवत्यस्मात्, उत्+भू+अप्, अर्णः उद्भवो यस्य सः।) [illegible] शङ्खः। इति राजनिर्घण्टः॥ ([illegible] अस्य गुणा ज्ञातव्याः॥) (चन्द्रः। अमृत-)

अर्णोदः, पुं, (अर्णांसि ददाति, दा + क।) मेघः। इति राजनिर्घण्टः॥

अर्णोभव, पुं, (अर्णसि जले भवति, अर्णस् + भू + अप्, उपपदसमासः।) शङ्खः। इति राजनिर्घण्टः॥

अर्त्तगल, पुं, (आर्त्तमिव गलति, गल + अच्, दरादित्वात् वा ह्रस्वः।) आर्त्तगलः। भिण्टिका। इत्यमरटीकायां भरतः। [illegible] शब्देऽस्य गुणो ज्ञातव्यः॥)

अर्त्तन, क्ली, (ऋत + ल्युट्, पक्षे इत्वम्।) जुगुप्सा। निन्दा। इत्यमरः॥

अर्त्ति, स्त्री, (अर्द + क्तिन्।) पीडा। इत्यमरः॥ (पीडार्थे उदाहरणं यथा,—

"चूर्णं समं रुचकहिङ्गुमहौषधानां
शुण्ठ्यम्बुना कफसमीरणसम्भवासु।
हृत्पार्श्वपृष्ठजठरार्त्तिविषूचिकासु
पेयस्तथा यवरसेन च विड्विबन्धे।"

इति वैद्यकचक्रपाणिसंग्रहः॥)

अर्त्तिका, स्त्री, (ऋत + ण्वुल्।) भगिनी। ज्येष्ठा भगिनी। इत्यमरटीकायां भ-

अर्थ त् क ङ याचने। इति कविकल्पद्रुमः। अर्थयते अर्थापयते। प्रार्थनं प्रार्थः प्रधात् प्रार्थं करोति। परस्मैपदं। इति दुर्गादासः॥

अर्थ, पुं, (अर्थ + घञ्।) विषयः। धनं। कारणं। वस्तु, शब्दप्रतिपाद्य। निवृत्तिः। प्रयोजनं। इति मेदिनी॥ प्रकारः। [illegible] शब्दः॥ (धनार्थे यथा,—

"अर्थेन बलवान् सर्व्वः अर्थाद्भवति पण्डितः"
इति हितोपदेशे। अपरञ्च विषयार्थे,—
"कामार्थधर्म्मौ वद पीडयामि
मित्रोल्लसिटाविषदव प्रहृ।" इति
"तमसोऽपनयं कामो राजन्य
सत्वस्य लक्षणं धर्म्मः श्रेष्ठमेषां द
इति मनुः। शब्दप्रतिपाद्य [illegible]
"वागर्थाविव सम्पृक्तौ वागर्थप्रतिप
इति रघुवंशे। अभिधेय
अर्थश्चिविध, वाच्यो लक्ष्यो व्यङ्ग्य

अर्थना, स्त्री, (अर्थ + युच्। टाप्।) इत्यमरः॥

अर्थपति, पुं, (अर्थानां पतिः [illegible]) कुबेरः। राजा। इति मेदिनी। ("अर्थानामर्थपतिर्वाचमाददे वदन्" [illegible] "न मे कामान् [illegible]" [illegible])

अर्थप्रयोग, पुं, (अर्थानां प्रयोगः [illegible] तत्पुरुषः।) वृद्धिजीविका। इत्यमरः। [illegible] दत्वा वाधौ देवा इत्यादि भाषा

..., पुं। (अर्थस्य सत्यतया स्तुत्यर्थस्य निन्दा-
वा वादः, वद्+करणे घञ्।) स्तुतिः।
दा। इति हेमचन्द्रः॥ स तु त्रिविधः। गुण-
: १ अनुवादः २ भूतार्थवादः ३। यथा,—
रोधे गुणवादः स्यादनुवादोऽवधारिते।
ार्थवादस्तद्धानादर्थवादस्त्रिधा मतः"॥
भट्टः॥ तत्त्वसम्बोधिनीमते सप्तविधः। स्तुत्य-
ादः १ फलार्थवादः २ सिद्धार्थवादः ३ नि-
न्दावादः ४ परकृतिः ५ पुराकल्पः ६ मन्त्रः ७।
ामुदाहरणानि बहुत्वात् न लिखितानि॥
ाक्यसमभिव्याहृतवाक्यं। यथा। "अर्थवादश्च
यसमभिव्याहृतवाक्यरूपः" सोऽपि त्रिविधः।
वादानुवादभूतार्थवादभेदात्। यथा—
"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः"॥
॥ अयमर्थः। विरोधे विधेयविधेयकयोः
मानाधिकरण्येनान्वयविरोधे गुणवादः अङ्ग-
लत्वात्। यथा "यजमानः प्रस्तरः" इति।
त्र प्रस्तरः कुशमुष्टिः तस्य यजमानेऽभेदान्वय-
धात् यजमानस्य कुशमुष्टिधारणरूपार्थवाद-
परत्वात् गुणवादः। अवधारिते प्रमाणान्तर-
ऽर्थे यो वादः। यथा नान्तरीक्षेऽग्निश्चेतव्यः
अग्निर्हिमस्य भेषजं इत्यादि च। अन्तरीक्षेऽग्नि-
चयनस्यासम्भवेन तदभावस्य अग्नेर्हिमनाशक-
त्वस्य च लौकिकप्रमाणसिद्धत्वात् अनुवादः।
इदानीं तयोर्विरोधावधारणयोरभावे भूतार्थ-
वादः। यथा इन्द्रो वृत्रमहन्नित्यादि। सोऽपि
द्विविधः। स्तुत्यर्थवादो निन्दार्थवादश्च। यथा,—
सन्ध्यामुपासते ये च" इत्यादि स्तुत्यर्थवादः।
स्त्रीतिलमांससम्भोगी पर्व्वस्वेतेषु वै पुमान्॥
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः"।
इत्यादि निन्दार्थवादः। इति श्राद्धविवेकटीकायां
श्रीकृष्णतर्कालङ्काराः॥ * ॥
प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं"।
इति वेदान्तसारः॥ तद्विवरणं यथा। अर्थार्थ-
वादाधिकरणं। तत्रार्थवादाश्च बहवः श्रूयन्ते ते
किं प्रमाणं न वेति संशये पूर्ब्बपक्षमाह। आम्ना-
यस्य प्रवर्त्तकत्वं तदर्थेनैव तद्वत्तादिति। अ-
र्थः। आम्नायस्य वेदस्य प्रवर्त्तकत्वं विधेये इति
शेषः। तदर्थे वेदाभिधानात्। तत्र प्रवर्त्तकत्वं
कार्य्यताज्ञानद्वारैव तदिदं प्रवृत्त्यभावात्। अतः
सिद्धार्थकानां स्तुत्यर्थवादानां कार्य्यताबोध-
कत्वाभावात् न कार्य्यताबोधकत्वं। अतो-
ऽप्रामाण्यमेव। अतस्तेषामर्थवादानां प्रवर्त्त-
कार्थकत्वं विधिशब्दं स्तुतिविषयत्वं वा
युक्तं अतएव सिद्धान्तयति। विधिना त्वेकवाक्य-
त्वात् स्तुत्यर्थेन विधीनां स्युरिति। अस्यार्थः।
अर्थवादानां स्तुतिपरत्वेन विधिना सह एक-
वाक्यत्वात् ते अर्थवादाः प्रमाणानि स्युः। तथा च
विधिस्तावदेव तेषां तात्पर्यं तथैव प्रामाण्यं
... इत्यर्थः इति सिद्धान्तात् न कार्य्ये
... तत्र तात्पर्य्याभावात्। ननु यत्र दुःखेन

सम्भिन्नमित्यादेः स्वतन्त्रार्थवादानां का गतिरित्य-
ताह भूतार्थानां क्रियार्थेन समाम्नायः। अस्यार्थः।
भूतार्थानां सिद्धार्थानां क्रियार्थेन कार्य्यबोधकेन
विधिना इति यावत्। समाम्नायः पाठः कार्य्य-
इति शेषः। तस्य विधिवाक्याकाङ्क्षापूरकत्वेन
कार्य्यान्वितबोधकतया तेषां प्रामाण्यं। यथा।
लिखिष्यमाणयूपाहवनीयवाक्यानां यूपाहवनीय-
परिचयाय कार्य्यान्वितबोधकत्वेन स्वार्थबोधकत्वे
प्रामाण्यं। तथा स्वर्गकामो यजेतेत्यत्र स्वर्गरूप-
परिचयाय स्वर्गबोधकत्वेन।
"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरं।
अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदं"॥
इत्यादि वाक्यानामपि प्रामाण्यं। अन्यथा यूपा-
दिपदार्थापरिचये च तत्तद्विधिवाक्यानां प्रवृत्तिर्न
स्यादतो विधिनैकवाक्यत्वात् सिद्धार्थकानामपि
प्रामाण्यं। यत्र तु विधिना सह विरोधः तत्र
न स्वार्थे प्रामाण्यं। यथा "अहरहः सन्ध्यामुपा-
सीत" इत्यादौ।
"सन्ध्यामुपासते ये तु नियतं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्"॥
इत्याद्यर्थवादानां। अतो नित्ये कर्म्मणि फलश्रुति-
रर्थवादएव सोऽपि स्तुत्यादनपरः। अतोऽत्र
कार्य्यताज्ञानादेरप्रवृत्तिरिति दिक्। इति धर्म-
दीपिका॥

अर्थवान्, [त्] पुं, (अर्थोऽस्त्यस्य, अर्थ+मतुप्+
मस्य वः।) पुरुषः। इति राजनिर्घण्टः॥ अर्थवि-
शिष्टे त्रि॥ (ऐश्वर्य्यशाली। "तेनार्थवान् लोभपरा-
ङ्मुखेन"। इति रघुवंशे। अभिधेययुक्तः। सार्थकः।
"करोति यः सर्व्वजनातिरिक्तां
सम्भावनामर्थवतीं क्रियाभिः"।
इति किरातार्जुनीये। "अर्थवान् खलु मे राज-
शब्दः"। इति शाकुन्तले।)

अर्थविज्ञानं, क्ली, (अर्थस्य विज्ञानं, षष्ठीतत्पुरुषः।)
शुश्रूषाद्यष्टधीगुणान्तर्गतगुणविशेषः। शब्दार्थ-
ज्ञानं। इति हेमचन्द्रः॥
("शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः"॥)

अर्थपदज्ञः, त्रि, (अर्थस्य पदं तत्प्रकारं जानाति,
ज्ञा+क।) धनव्ययप्रकारवित्। (किं धनं, क्व,
कुत्र, कियत्, कस्मै वा व्ययितव्यमिति विशेषा-
भिज्ञः।) तत्पर्य्यायः। मुकुन्दः २। इति हेमचन्द्रः॥

अर्थशास्त्रं, क्ली, (अर्थस्य भूमिधनादेः प्रापकं शास्त्रं,
षष्ठीतत्पुरुषः।) चाणक्यादिप्रणीतं नीतिशास्त्रं।
तत्पर्य्यायः। दण्डनीतिः २। इत्यमरः॥ यथा,—
"बृहस्पतिप्रणीतिभिः प्रणीतमर्थशास्त्रं।
तथैव दण्डनीतिः स्यादत्र द्वैतौ महान्तौ"॥
इति शब्दरत्नावली॥ अष्टादशविद्यान्तर्गतविद्या-
विशेषः। यथा विष्णुपुराणं।
"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश॥
आयुर्वेदो धनुर्वेदो गान्धर्व्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः"॥

इति प्रायश्चित्ततत्त्वं॥ * ॥ धर्म्मशास्त्रेणार्थ-
शास्त्रस्य बाधत्वं यथा॥
"स्मृत्यर्थेन विरोधे हि अर्थशास्त्रस्य बाधनं।
परस्परविरोधे तु न्याययुक्तं प्रमाणवत्"॥
अर्थशास्त्रस्य मन्वादिप्रणीतराजनीत्यादिविष-
यस्य। यदाह,—
"अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि।
चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः॥
इत्यनयोर्धर्म्मशास्त्रार्थशास्त्रयोर्विप्रतिपत्तौ धर्म्म-
शास्त्रेण दण्डविधायकमर्थशास्त्रं बाध्यते। तत्-
स्वार्थशास्त्रस्य निपुणपौर्य्येतरपरत्वेन दुर्बोधः"।
इति मलमासतत्त्वं॥

अर्थसिद्धकः, पुं, (अर्थात् सिद्धः, अर्थः प्रयोजनं
धनं वा सिद्धोऽस्य, समासान्तः कः।) सिन्दुवार-
वृक्षः। इति राजनिर्घण्टः॥

अर्थागमः, पुं, (अर्थस्य आगमः, षष्ठीतत्पुरुषः।)
धनागमः। तत्पर्य्यायः। आयः २। इति हलायुधः॥
("अर्थागमो नित्यमरोगिता च
प्रिया च भार्य्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड्जीवलोकेषु सुखानि राजन्"॥
इति हितोपदेशे।)

अर्थिकः, पुं, (अर्थयते इत्यर्थी याचकः कुत्सितार्थे
कन्।) वैतालिकः। निद्रालस्य राजादेर्जागर-
यिता। इति हेमचन्द्रः॥

अर्थी, [न्] त्रि, याचकः। सहायः। सेवकः।
विवादी। इति विश्वः॥ धनी। अर्थो विद्यते-
ऽस्येति इन्॥

अर्थ्या, स्त्री, (अर्थ+यत्।) शिलाजतु। इत्यमर-
मेदिनीकरौ॥ अर्थ्ये इति त्रि॥

अर्थ्यः, त्रि, (अर्थे साधुः, तत्साधुरिति यत्, अर्था-
दनपेतः, धर्म्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः।)
पण्डितः। धनवान्। न्याय्यः। इत्यमरभरतौ।
याच्यः। याचनार्थकार्थधातोः कर्म्मणि यः॥
(अर्थयुक्तः। उदारार्थयुक्तः।
"अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः"।
इति रघुवंशे।
"वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे"।
इति कुमारसम्भवे।)

अर्द याचनगतियाचनेषु। (भ्वा. पर. पीड़ायां चुरा. पर.
सेट्।) इति कविकल्पद्रुमः॥ याचना
ताडनं। अर्दति पुत्रं पिता। "पुत्रहं मार्दति
धातुरोऽपि"। न याचनोऽर्थः। इति दुर्गादासः॥

अर्द वधे। (चुरा-उभं-पक्षे-सेट्।) इति कविकल्प-
द्रुमः॥ अ अर्दति अर्दते। "शत्रुसहस्राणि अर्दद्
सार्दीत्"। अयमात्मनेपदीत्यन्ये इति दुर्गादासः॥

अर्द वधे। इति कविकल्पद्रुमः॥ र अर्दति।
अयमात्मनेपदीत्यन्ये। इति दुर्गादासः॥

अर्दनं, क्ली, (अर्द+ल्युट्।) याचनं। [illegible]
[illegible]।
("[illegible]"
इति रामायणे।)

अर्दना, स्त्री, (अर्द + युच्, टाप्।) याचना। भिक्षा। इत्यमरः। (यातना। वधः। हिंसा। गतिः।)

अर्दनिः, पुं, (अर्द + अनि।) अग्निः। याचना। रोगः। इत्यमरटीकायां भरतः॥

अर्दितं, स्त्री, (अर्द + क्त।) वायुव्याधिविशेषः। तस्य (निदानपूर्व्वकं सम्प्राप्तिपूर्व्वकं) लक्षणमाह (सुश्रुतः)।

"उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि च।
हसतो जृम्भतो भारादिषमाच्छयनादपि॥
शिरोनासौष्ठचिबुकललाटेक्षणसन्धिगः।
अर्दयत्यनिलो वक्रमर्दितं जनयत्यतः॥
वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते।
शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम्॥
ग्रीवाचिबुकदन्तानां तस्मिन् पार्श्वे तु वेदना॥
(यस्याग्रजो रोमहर्षो वेपथुर्नेत्रमाविलं।
वायुरूर्द्ध्वं त्वचि स्वापस्तोदो मन्याहनुग्रहः।)
तमर्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः"॥

[illegible]

वक्रीकरोति वक्त्रार्द्धमूर्द्ध्वं हसितमीक्षितं।
ततोऽस्य कम्पते मूर्द्धा वाक्सङ्गस्तब्धनेत्रता॥
दन्तचालः स्वरभ्रंशः श्रुतिहानिः क्षवग्रहः।
गन्धाज्ञानं स्मृतेर्म्मोहस्त्रासः सुप्तस्य जायते॥
निष्ठीवः पार्श्वतोयायादेकस्याक्ष्णो निमीलनं।
जत्रोरूर्द्ध्वं रुजा तीव्रा शरीरार्द्धेऽधरेऽपि वा॥
तमाहुरर्दितं केचिदेकायाममथापरे"॥ *॥

हारीतसंहितायामप्युक्तं।

"सन्तापदाहशोषाश्च मूर्च्छापित्तान्वितोमयत्।
शैत्यं शोथोऽरुचिर्गौरवं वातश्लेष्मसमन्वितं॥
यो द्वन्द्वजाश्रितो धीरास्तं साध्यं मारुतं विदुः।
केवलोऽपि समीरोऽपि सोऽपि साध्यतमः स्मृतः॥
वक्त्रं भवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते।
वैकृत्यं नयनानाञ्च विसंज्ञो वेदनातुरः॥
ग्रीवायां गण्डयोर्दन्तपार्श्वे यस्यातिवेदना।
तमर्दितमिति प्राहुर्वातव्याधिविचक्षणाः॥
लालास्रावोऽथ शोषश्च हनुग्राहो विरस्यता।
दन्तशूलं भवेद्यस्य वातेनार्दितमेव च॥
पीतार्द्धं सज्वरं तृष्णा पित्तजे मोह एव च।
शोथस्तम्भोऽस्य भवति कफोद्भूतेऽथवार्दिते"॥*॥)

"वातात्पित्तात्कफाच्च स्यात् त्रिविधं तत्समासतः।
लालास्रावो व्यथा कम्पः स्फुरणं हनुवाग्ग्रहः॥
ओष्ठयोः श्वयथुः शूलश्चार्दिते वातजे भवेत्।
पीतमास्यं ज्वरस्तृष्णा पित्तजे मोहधूपने॥
गण्डे शिरसि मन्यायां शोथः स्तम्भः कफात्मके"॥*॥

(अथ तस्य चिकित्सामाह सुश्रुतः॥ अर्दितातुरं बलवन्तमुपकरणवन्तञ्च वातव्याधिविधानेनोपच-रेद्विशेषेण मस्तिष्कशिरोवस्तिनस्यधूपोपनाह-स्नेहनाडीस्वेदादिभिः। ततः सहस्रं महापञ्चमूलं काकोल्यादिं विदारिगन्धादिं औदकानूपमांसं स-र्व्वैरेकमंशं सम्भृत्य विशुद्धादके क्षीरद्रोणे नि-क्वाथ्य पादावशिष्टमवताय्यं परिस्राव्य तैलप्रस्थे-नाभिष्या पुनरमावधिययेत् ततस्तेन क्षीरानु-गतमवताय्यं शीतीभूतमभिमथ्नीयात्तत्र यः स्नेहः उत्तिष्ठेत्तमादाय मधुरौषधसहक्षीरयुक्तं वि-पचेदेतत् क्षीरतैलमर्दितातुराणां पानाभ्यङ्गादि-षूपदिष्टं। तैलहीनं वा क्षीरमर्दिरक्षितपंच-मिति॥*॥ चरकस्तु।

"अर्दिते नावनं मूर्द्ध्नि तैलं तर्पणमेव च।
नाडीस्वेदोपनाहाश्च आनूपपिशितैर्हिताः"॥*॥

वाग्भटश्च।

"अर्दिते नावनं मूर्द्ध्नि तैलं श्रोत्राक्षितर्पणं।
सशोथे वमनं दाहरागयुक्ते सिराव्यधः"॥*॥

हारीतसंहितायां।

"अर्द्ध यवं रसोनञ्च सिद्धमेकत्र गोरसैः।
गौरवेन संयुक्तं तथैव मधुमिश्रं॥
इदेन भक्षितं [illegible] दिने दिने।
[illegible] वातरोगञ्च अर्दितञ्च [illegible]"॥*॥

चक्रपाणिदत्तः।

"[illegible] नवनीतेन [illegible] अर्दितं हृतं।
अर्दिते नवनीतेन [illegible]।
[illegible]।

[illegible]

स्नेहाभ्यङ्गशिरोवस्तिपाननस्यपरायणं।
अर्दितं स जयेत् सर्पिः [illegible]
भावप्रकाशेऽप्येतदतिरिक्तं यत्तत्सङ्गृहीतं
"स्नेहपानानि नस्यञ्च [illegible]
उपनाहाश्च शस्यन्ते स्वेदनं वक्त्रपीडिते।
वस्तिरन्नशिरोवस्तिरेव।
"दशमूलीकषायेण मातुलुङ्गरसेन वा।
बलया पञ्चमूल्या वा क्षीरं वातार्दिते [illegible]
पिष्टं माषकृतं जग्ध्वा नवनीतेन सोऽर्दिते
क्षीरं मांसरसैर्भुक्त्वा दशमूलीरसं पिबेत्।
अर्दिते पित्तजे शीतान् स्नेहाद्यैः [illegible]
घृतवस्तिप्रसेकाश्च क्षीरसेकं तथैव च।
जिह्मीभूताननो मूको दाहवान् योऽर्दिते
कुर्य्यात् प्रतिक्रियां तस्य [illegible]
श्लेष्मभागे क्षयं नीते स्वेदैः समुपाचरेत्।
अर्दिते शोथसंयुक्ते वमनञ्च प्रशस्यते।
रसोनकल्कं तिलतैलमिश्रं
खादेन्नरो योऽर्दितरोगयुक्तः।
तस्यार्दितं नाशमुपैति शीघ्रं
वृन्दं घनानामिव वायुवेगात्"॥

अर्दितः, त्रि, (अर्द + क्तः।) याचितः। हिंसितः। इति मेदिनी॥ गतः। पीडितः। [illegible] शब्दरत्नावली॥

अर्द्धं, स्त्री, (ऋध् + घञ्।) समांशः। इत्यमरः॥ आधा इति भाषा। पुमान् क्लीवञ्च। अर्द्धशब्दः पुंलि-ङ्ग एव विभागीकृत्य वर्त्तितस्य तुल्यांशः क्लीवमेवेति केचित्। अर्द्धो [illegible] पुंसि। तथा वस्त्रार्द्धो नगरार्द्धं [illegible] वति वाच्यलिङ्गः। यथा [illegible] अर्द्ध वस्त्रं। इति माधवी॥ अमरः-त्रिलिङ्गोऽर्द्धमित्यनुन्यासः। [illegible] शब्दो नपुंसक एव नान्यलिङ्गः। इति भरतः॥

अर्द्धः, पुं, (ऋध् + घञ्।) एकदेशः। भिन्नं २ शकलं ३ खण्डं ४। इत्यमरः॥ अर्द्धेन प्रविष्टः शरपतनभयाद्भूयसा। इति शाकुन्तले। "सर्व्वनाशे समुत्पन्ने अर्द्धं त्यजति पण्डितः। अर्द्धेन कुरुते कार्य्यं सर्व्वनाशो हि दुःसहः" इति पञ्चतन्त्रं।)

अर्द्धगङ्गा, स्त्री, (अर्द्धं गङ्गायाः, एकदेशः।) कावेरी नदी। इति त्रिकाण्डशेषः॥

अर्द्धगुच्छः, पुं, (अर्द्धः गुच्छस्य गुच्छः।) चतुर्विंशतियष्टिकहारः। इति हेमचन्द्रः। दाना इति भाषा।

अर्द्धचन्द्रः, पुं, (अर्द्धं चन्द्रस्य।) अर्द्ध-चन्द्रः। ("चतुर्भिरर्द्धचन्द्रैश्च जघान चतुरो हयान्" इति रामायणे।) गलहस्तः। ("इत्यर्द्धचन्द्रं दत्वा निःसारिता"। इति इत्यादिषु यस्य प्रसिद्धिः। इति [illegible]

कारकं । इति हेमचन्द्रः । मयूरचन्द्रिका चाँद इति भाषा ।

अर्द्धचन्द्रा, स्त्री, (अर्द्धं चन्द्रस्य, अर्द्धचन्द्र + टाप् ।) कर्णस्फोटालता । इत्यमरः । काण फेटकी इति भाषा ।

अर्द्धचन्द्रिका, स्त्री, (अर्द्धचन्द्र + स्वार्थे कन्, स्त्रियां टाप् ।) कर्णस्फोटालता । इति राजनिर्घण्टः ॥

अर्द्धतोलकः, पुं, क्षुद्रतोलकः । इति हारावली ॥ तोलकी इति भाषा ।

अर्द्धजाह्नवी, स्त्री, (अर्द्धं जाह्नव्याः ।) चादेवी नदी । इति हेमचन्द्रः ॥

अर्द्धतिक्तः, पुं, (अर्द्धं अल्पमुत्कृष्टं तिक्तः ।) नेपालनिम्बः । इति राजनिर्घण्टः ॥ (नेपालनिम्बशब्देऽस्य गुणा ज्ञातव्याः ॥)

अर्द्धनारीशः, पुं, (अर्द्धाङ्गे या नारी पार्व्वतीरूपा तस्या ईशः ।) शिवः । इति शब्दरत्नावली ॥ तस्य ध्यानं यथा,—

"नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशारुणोत्पलकपालकशूलहस्तं ।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपं" ॥

इति तन्त्रसारः ॥

अर्द्धनारीश्वरः, पुं, (अर्द्धाङ्गे या नारी तस्या ईश्वरः ।) उमामहेश्वरः । स च शिवः । यथा विष्णुधर्म्मोत्तरे ।

"अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।
अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः" ॥

इति तिथ्यादितत्त्वं ॥ अपि च ।

"प्रणेमुः सर्व्वमेवानुतया साञ्जलिदानवौ ।
अर्द्धनारीश्वरयोमायान्तयापादिरतिर्गौ" ॥

इति तन्त्रसारे शिवमन्त्रे श्रीकण्ठादिन्यासः ॥ * ॥ अस्य मन्त्रादिकं यथा,—

"अग्निसंवर्त्तकादित्यवानिलौ षष्ठविन्दुमत् ।
मन्त्रामिति ख्यातं वीजं सर्व्वसमृद्धिदं" ॥

अग्नी रेफः । संवर्त्तकः क्षकारः । आदित्यो मकारः । रं रेफः । अनिलो यकारः । षष्ठौ स्वरूपं । षष्ठस्वर ऊकारः ॥ प्रपञ्चसारे । "अनलक्षयमरेफ-न्यासत्यान्तवामश्रुतिहिमरुचिखण्डैर्मण्डिता म-न्त्रराजः" । इति वचनात् रेफ एव न तु वकारः । रँ क्षँ मँ रँ यँ ऊँ । इति मन्त्रः । अस्य पूजा प्रातःकृत्यादिशैवोक्तपीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं कुर्य्यात् । यथा शिरसि कश्यपाय ऋषये नमः । मुखेऽनुष्टुप्छन्दसे नमः । हृदि अर्द्धनारीश्वराय देवतायै नमः । ततः कराङ्गन्यासौ कुर्य्यात् । रं अङ्गुष्ठाभ्यां नमः । क्षं तर्ज्जनीभ्यां स्वाहा । मं मध्यमाभ्यां वषट् । मं अनामिकाभ्यां हुँ । रं कनिष्ठाभ्यां वौषट् । यं करतलपृष्ठाभ्यां फट् । एवं हृदयादिषु । तथा च तन्त्रे । "रेफादिव्यञ्जनैः षड्भिः कुर्य्यादङ्गानि च क्रमात्" । ततो ध्यानं ।

"नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशारुणोत्पलकपालकशूलहस्तं ।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपं" ॥

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्च-पुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत । यथा । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च रं इत्यादिना षडङ्गानि पूजयेत् । ततः पत्रेषु पूर्व्ववत् वृषभादीन् पूजयेत् । पत्राग्रेषु पूर्व्वादितः ब्राह्मीं माहेश्वरीं कौमारीं वैष्णवीं वाराहीं इन्द्राणीं चामुण्डां महालक्ष्मीञ्च पूजयेत् । तद्बहि-रिन्द्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्ज्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं लक्षजपः । तथा च ।

"लक्षमेकं जपेन्मन्त्रमित्थं मन्त्री विचिन्तयन् ।
अयुतं मधुराक्तैर्ज्जुहुयात्तिलतण्डुलैः" ॥

इति तन्त्रसारः ॥

अर्द्धपारावतः, पुं, (अर्द्धेन अङ्गेन पारावत इव ।) चित्रकण्ठकपोतः । तित्तिरिपक्षी । इति मेदिनी ॥

अर्द्धमाणवः, पुं, द्वादशयष्टिकहारः । इति हेम-चन्द्रः ॥ बारोनरि हार इति भाषा ।

अर्द्धरात्रः, पुं, (अर्द्धं रात्रेः, अर्द्धं नपुंसकमित्येक-देशी समासः, अहःसर्व्वैकदेशसंख्यातपुण्याच्च रात्रेरिति समासान्तोऽच्प्रत्ययः, रात्राह्नाहाः पुंसि इति नियमात् पुंस्त्वम् ।) रात्र्यर्द्धभागः । दुइप्रहर रात्रि इति भाषा । तत्पर्य्यायः । निशीथः २ । इत्यमरः ॥ निःसम्पातः ३ अवसरालयः ४ । इति शब्दरत्नावली ॥ सुप्तजनः ५ । इति जटाधरः ॥ रात्र्यष्टममुहूर्त्तः । स तु रात्रिमध्यदण्डद्वयात्मकः । सम्पूर्णार्द्धरात्रोऽप्ययं । महानिशा । सा तु सार्द्धप्रहरानन्तरं सार्द्धतृतीयप्रहरपर्य्यन्तं । इति स्मृतिः ॥

("मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम्"।
"मध्यन्दिनेऽर्द्धरात्रे वा विश्रान्तो विगतक्लमः ।
चिन्तयेद्धर्म्मकामार्थान् सार्द्धं तैरेक एव वा" ॥

इति मनुः ।)

अर्द्धर्चः, पुं, क्ली, (अर्द्धं ऋचः समासान्तः अच्-प्रत्ययः ।) अर्द्धर्चक् । ऋङ्नामकवैदिकमन्त्रार्द्ध-भागः । इत्यमरः ॥

अर्द्धलक्ष्मीहरिः, पुं, (अर्द्धं लक्ष्म्या आकारे, अर्द्धं च हरेः, तादृशो हरिः ।) विष्णुः । यथा । गौतमीये,—

"ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।
अर्द्धलक्ष्मीहरिः प्रोक्तः श्रीवीजेन षडङ्गकं" ॥

अस्य मन्त्रादि यथा,—

"तारं नमः पदं ब्रूयाद्वरौ दीर्घसमन्वितौ ।
पवनोऽथायमन्त्रोऽयं प्रोक्तो वस्वक्षरः परः" ॥

अस्य पूजाप्रयोगः । प्रातःकृत्यादिस्नानान्तं कर्म्म कृत्वा पूजामण्डपमागत्य वैष्णवाचमनं कुर्य्यात् । तद्यथा गौतमीये,—

"केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करौ ।
द्वाभ्यामोष्ठौ विमृज्याथ द्वाभ्यां मृज्यान्मुखं ततः ॥
एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः ।
संप्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः ॥
आस्यनासादिकर्णांश्च नाभ्युरस्कं भुजौ क्रमात् ।
स्पृशेदेवं भवेदाचमनञ्च वैष्णवान्वये ॥
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत्" ॥

केशवादयस्तु केशव-नारायण-माधव-गोविन्द-विष्णु-मधुसूदन-त्रिविक्रम-वामन-श्रीधर-हृषीकेश-पद्मनाभ-दामोदर-सङ्कर्षण-वासुदेव-प्रद्युम्ना-निरुद्ध-पुरुषोत्तमाधोक्षज-नृसिंहाच्युत-जनार्द्दनो-पेन्द्र-हरिविष्णवः ॥ वाक्यन्तु ओम् केशवाय नमः । इत्यादि । तथा च ।

"स चतुर्थ्यन्तो ऽन्ते च नामभिर्व्विन्यसेत् सुधीः"

ततः सामान्यार्घ्यादिमातृकान्यासान्तं कर्म्म विधाय केशवकीर्त्यादिन्यासं कुर्य्यात् । अस्य ऋष्यादि-न्यासः । शिरसि प्रजापतये ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि अर्द्धलक्ष्मीहरये देवतायै नमः । ततः कराङ्गन्यासौ । श्रीं अङ्गुष्ठाभ्यां नमः । इत्यादि । श्रीं हृदयाय नमः । इत्यादि । तथा च गौतमीये ।

"ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।
अर्द्धलक्ष्मीहरिः प्रोक्तः श्रीवीजेन षडङ्गकं" ॥

ततो ध्यानं ।

"उद्यद्द्योतनशततरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टं ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं,
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिं" ॥

इत्यादि । इति तन्त्रसारः ॥

अर्द्धवीक्षणं, क्ली, (अर्द्धमसम्पूर्णं वीक्षणम् ।) अपाङ्गदर्शनं ॥ कटाक्षः । इति हेमचन्द्रः ॥

अर्द्धशनं, क्ली, (अर्द्धमसम्पूर्णमशनं भोजनं, अर्द्ध + अश् + ल्युट् ।) अर्द्धाशनं । अर्द्धभोजनं । इति शब्दरत्नावली ॥

अर्द्धशफरः, पुं, (अर्द्धः शफरः ।) क्षुद्रमत्स्यविशेषः । दाँड़िका माछ इति भाषा । तत्पर्य्यायः । दण्ड-पालः २ । इति हारावली ॥

अर्द्धहारः, पुं, (ऋध-वृद्धौ + अच्, अर्द्धः सम्पन्नः हारः ।) चतुःषष्टियष्टिकहारः । इत्यमरः ॥ चौ-षट्टिनरि हार इति भाषा ।

अर्द्धाशनं, क्ली, (अर्द्धमसम्पूर्णमशनं भोजनं, अर्द्ध + अश + ल्युट् ।) अर्द्धभोजनं । इति शब्दरत्नावली ॥

अर्द्धासनं, क्ली, (अर्द्धमासनस्य ।) स्नेहदानं । अकुत्सनं । इति धरणिः ॥ (उपवेशनार्थमासनार्द्धदान-रूपः स्नेहव्यञ्जकः सम्मानभेदः । यथा,—

"अर्द्धासनं गोत्रभिदोऽधितष्ठौ" । इति रघु-वंशे । "मम हि दिवौकसां समक्षम् अर्द्धा-सनोपवेशितस्य" । इति शाकुन्तले ।)

अर्द्धेन्दुः, पुं, (अर्द्धमिन्दोः ।) चन्द्रार्द्धभागः । गल-हस्तः । नखचिह्नं । अतिप्रौढस्त्रीयोन्यङ्गुलियो-जनं । इति मेदिनी ॥ अर्द्धचन्द्रबाणः । इति हेमचन्द्रः ॥

अर्द्धोदयः, पुं, (अर्द्धस्य समृद्धस्य पुण्यस्य उदयो यत्र ।) योगविशेषः । स च रविवारव्यतीपातश्रवणा-नक्षत्रैर्युक्ता चेत् पौषमाघयोरमावास्या स्यात्तदा भवति । यथा । पाश्चात्यनिर्णयामृते ।

[illegible]

मर्व्वुदानां लक्षणानि तुल्यानि भवन्ति ॥” रक्तार्व्वुदमाह ।

“दोषप्रदुष्टो रुधिरं शिरास्तु
सङ्कोच्य संपीड्य गतस्त्वपाकं ।
सस्रावमुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराचितमाशु वृद्धिं ॥
करोत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यमेतद्रुधिरात्मकन्तु ।
रक्तक्षयोपद्रवपीडितत्वात्
पाण्डुर्भवेदर्व्वुदपीडितस्तु” ॥

दोषेः दुष्टं रुधिरं शिरास्तु सङ्कोच्य संपीड्य मांसपिण्डं ... [illegible] ... अर्व्वुदपीडितः ... [illegible] ॥” मांसार्व्वुदस्य सम्प्राप्तिमाह

“मुष्टिप्रहारादिभिरर्दितेऽङ्गे
मांसं प्रदुष्टं जनयेत् शोथं ।
अवेदनं स्निग्धमनन्यवर्णं
अपाकमश्मोपममप्रचाल्यं” ॥

[illegible]

“प्रमेहिणो यस्य च मांसपिण्ड
प्रदोषदुष्टो ... [illegible]

[illegible]

विद्याद्विदुषन्निर्यवर्जितानि ।
हरिद्रा-लोध्र-पत्तङ्ग-गृहधूम मनःशिला,
मधुप्रगाढो लेपोऽयं मेदोऽर्व्वुदहरः परः ।
मूलकस्य क्षतः क्षारो हरिद्राचूर्णसंयुतः ।
[illegible] संयुक्तो लेपः सिद्धोऽर्व्वुदापहः,
घटदुग्धकुष्ठरोमकनिभं बद्धं वटस्य दलैः
स्निग्धमरावात् मस्तादप्युपरि
[illegible] रक्तोत्थं ...
[illegible]
रक्तोत्थं सर्षपं । सुरसा तुलसी । ...
अन्यदिपं करवीरं । इत्यर्व्वुदाधिकारे
भावप्रकाशः ॥

अर्व्वुद, पुं, (अर्व्व+उदच् ।) पर्व्वतविशेषः ।
मेदिनी ॥

अर्भ, पुं, (ऋ+भ ।) बालक । इति ।
(प्रभाहीनः । मलिनः । शिशुः । ...।
शावकप्रत्यादिरिदं ।)

अर्भक, पुं, (अर्भ एव, स्वार्थे कन् ।) शिशुः ॥

(“अथुष नवः प्रतिमानिषिद्धा
पितुर्मुदं तेन ततान सोऽर्भकः”।
इति रघुवंशे ।) मूर्खः । कृशः । इति
[illegible] । सदृशः । इत्यमरादिकोषः ।

अर्म्म, क्ली, पुं, (ऋ+मन् ।) ...
इति सिद्धान्तसंग्रहे अमरः । तत्
पञ्चप्रकारं ... [illegible] ॥
[illegible]
[illegible]

अर्मान, पुं, (ऋ+ ... [illegible] ।) ...
मासं । इति वैद्यकपरिभाषा ॥

अर्य, पुं, (ऋ+यत् ।) स्वामी । वैश्यः । ...
इति ... [illegible]
[illegible]

अर्य्यमा, [न्] पुं, (अर्य्यं ... [illegible]
... ।) सूर्य्यः ।

[illegible]

, स्त्री, (अर्य + यत् + टाप् ।) वैश्यजातिः । इत्यमरः ।

ी, स्त्री, (अर्य + आनुक् + ङीप् ।) वैश्यजातिः । इत्यमरः ।

, स्त्री, (अर्य + ङीप्) वैश्यपत्नी । इत्यमरः । वैश्यजातिः । इति दुर्गादासः ।

बधे । (इति कविकल्पद्रुमः ।) (भ्वादि-परं-सकं-सेट् ।) अर्व्वति । इति दुर्गादासः । अन्तःस्थवर्गान्तोऽयं ॥

ी, स्त्री, (अर्व्व + बाहुलकात् वनिप् + ङीप् ।) टर्त्री । इति हलायुधः । कुट्टनी । इति स्वारस्वामः ॥

, [न्] पुं, (ऋ + वनिप् ।) घोटकः । इत्यमरः ॥ इन्द्रः । तोयांशपरिमाणं । इति विश्वः ॥ कुत्सिते त्रि । इत्यमरः ॥

क्, अ, (अवरे काले देशे वा अञ्चति, अव + अन्च् + क्विन्, पृषोदरादित्वात् अर्व्वादेशः ।) पूर्व्वं । अन्तः पश्चात् । तत्पर्य्यायः । अवरः २ । इत्यमरः ॥ निकटं । इति भरतः । अर्व्वाच् इति क्वचित् ॥

ीचीनः, त्रि, (अर्व्वाग्भवः, खः ।) पश्चाज्जातः । विपर्य्ययः । इति धरणिः ॥ (इदानीन्तनः । अधोभागस्थितः । अवरदेशगतः ।

"यदूर्द्ध्वं पृथिव्या अर्व्वाचीनमन्तरीक्षात्" ।

इति शतपथब्राह्मणे ।)

, स्त्री, (अर्श + अच् ।) अर्शोरोगः । इति शब्दरत्नावली ॥ (वलिकाकारः गुह्यरोगभेदः ।)

ः, [स्] क्ली, (ऋ + असुन्, शुट् ।) स्वनामख्यातपायुरोगः । तत्पर्य्यायः । दुर्नामकं २ । इत्यमरः ॥ दुर्नाम ३ गुदकीलः ४ गुदाङ्कुरः ५ । इति राजनिर्घण्टः ॥ अनामकं ६ । इति शब्दरत्नावली ॥ यथा । अथार्शोऽधिकारः । तत्रार्शसः सन्निकृष्टनिदानान्याह ।

"पृथग्दोषैः समस्तैश्च शोणितात् सहजानि च ।
अर्शांसि षट्प्रकाराणि विद्याद्गुदवलित्रये" ॥

केचिद्रुधिरस्यापि दोषत्वं मन्यन्ते । तन्मतमाश्रित्याह । शोणितादिति । सहजानि शरीरेण सह जातानि । सङ्ख्यामाह । षट्प्रकाराणीति । गुदवलित्रये सार्द्धचतुरङ्गुलं गुदस्य मानं तस्यावयवभूतास्तिस्रो वलयः शङ्खावर्त्तनिभा उपर्य्युपरि सन्ति । तासां नाम प्रवाहिणी विसर्जनी संवरणी चेति । तत्र गुदौष्ठोऽर्द्धाङ्गुलमानस्तदूर्द्ध्वमङ्गुलमाना प्रथमा वलिः । सार्द्धैकाङ्गुलमाना द्वितीया । तृतीया च तावती । उक्तञ्च ।

"अर्द्धाङ्गुलप्रमाणेन गुदौष्ठं परिचक्षते ।
गुदौष्ठादङ्गुलं चैकं प्रथमान्तु वलिं विदुः ॥
सार्द्धैकाङ्गुलमानेन पृथगन्ये प्रकीर्त्तिताः" ॥ * ॥

अथ वातार्शसो विप्रकृष्टं निदानमाह ।

"कषायकटुतिक्तानि रूक्षशीतलघूनि च ।
प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनं ॥
लङ्घनं देशकालौ च शीतौ व्यायामकर्म्म च ।
शोको वातातपस्पर्शो हेतुर्व्वातार्शसां मतः" ॥

प्रमितमल्पपरिमितं । तीक्ष्णमिति मद्यविशेषणं । पैष्टादिमद्यस्य वातकरत्वात् । आतपस्पर्शोऽत्युष्णत्वात्पित्तकारकोऽपि हेतुः वातार्शसां । यद्यर्शांसि सर्व्वाणि त्रिदोषजानि । यतश्चाह ।

"पञ्चात्मा मारुतः पित्तं कफो गुदवलित्रये ।
सर्व्व एव प्रकुप्यन्ति गुदजानां समुद्भवः" ॥ इति ।

तथा सति कथं वातार्शसामिति उच्यते । तत्र दाधिक्याद्व्यपदेशभेद इति न दोषः । अतएव अग्रे वक्ष्यते । पित्तोल्वणानामिति तथाच चरकः ।

"अर्शांसि नाम जायन्ते मांसदोषनिवर्त्तिभिः ।
दोषदोषविशेषात्तु विशेषः कल्प्यतेऽर्शसां" ॥

इति ॥ * ॥ अथ पित्तार्शसो विप्रकृष्टनिदानमाह ।

"कट्वम्ललवणोष्णानि व्यायामाग्न्यातपप्रभाः ।
देशकालावशिशिरौ क्रोधो मद्यमसूयनं
विदाहि तीक्ष्णमुष्णं यत् तत् सर्व्वं पानभोजनं ।
पित्तोल्वणानां विज्ञेयः प्रकोपे हेतुरर्शसां" ॥

उष्णद्रव्यस्य ग्रहणादिह बोद्धव्यं उष्णपानभोजनस्याग्रे वक्ष्यमाणत्वात् । अग्न्यातपप्रभा अग्न्यातपयोः प्रभा तेजः । अथवा अग्न्यातपैतत्तेजस्विद्रव्यस्य दीप्तिः प्रभा । अशिशिरो देशो मरुः । असूयनं परगुणद्वेषः । पानभोजनं पीयत इति पानं । भुज्यत इति भोजनं प्रकोपे उत्पत्तौ ॥ * ॥

अथ कफार्शसो विप्रकृष्टं निदानमाह ।

"मधुरस्निग्धशीतानि लवणाम्लगुरूणि च ।
अव्यायामदिवास्वप्नशय्यासनसुखे रतिः ॥
प्राग्वातसेवा शीतौ च देशकालावचिन्तनं ।
श्लैष्मिकाणां समुद्दिष्टमेतत् कारणमर्शसां" ॥

अचिन्तनं निश्चिन्तता ॥ * ॥ अथ त्रिदोषार्शसो विप्रकृष्टं निदानमाह ।

"सर्व्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणं समं" ।

जन्मकालेन त्रयो दोषा येषां तानि त्रिदोषाणि अर्शांसि तेषां सर्व्वो हेतुः । पृथग्वातपित्तकफार्शोहेतुः । त्रिदोषार्शसां लक्षणञ्च सहजैः सहजार्शोभिः समं सदृशं । ननु त्रिदोषाणां इति विशेषणं व्यर्थं । यतः सर्व्व एव व्याधयस्त्रिदोषजाः । उक्तञ्च ।

"द्रव्यमेकरसं नास्ति न रोगोऽप्येकदोषजः ।
एकस्तु कुपितो दोष इतरावपि कोपयेत्" ॥

इति । युक्तिमप्याह । स्वकारणाद्वृद्धो वायुः शैत्याच्छीतलं श्लेष्माणं लाघवात्तेजोरूपं पित्तं वर्द्धयते । तथा पित्तं कटुकत्वात् वातं द्रवत्वात् कफं वर्द्धयते । श्लेष्मा च शैत्याद्वायुं द्रवत्वात् पित्तं वर्द्धयते इति । उच्यते । यत्र स्वस्वकारणात्त्रयो दोषाः कुप्यन्ति तत्र त्रिदोषजव्यपदेश इति न दोषः ॥ * ॥ अथार्शसां पूर्व्वरूपमाह ।

"विष्टम्भोऽन्नस्य दौर्ब्बल्यं कुक्षेराटोप एव च ।
कार्श्यमुद्गारबाहुल्यं सक्थिसादोऽल्पविट्कता ॥
ग्रहणीदोषपाण्ड्वर्त्तेः आशङ्का चोदरस्य च ।
पूर्व्वरूपाणि निर्दिष्टान्यर्शसामभिवृद्धये" ॥

दौर्ब्बल्यमावल्यं । आटोपः गुड्गुडाशब्दः । अभिवृद्धये उत्पत्तये ॥ * ॥ अथार्शसां संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह ।

"दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् ।
मांसाङ्कुरानपानादौ कुर्व्वन्त्यर्शांसि तान् जगुः" ॥

त्वङ्मांसपदेन त्वङ्मांसाश्रितं रक्तमपि गृह्यते । चिकित्सायां रक्तस्रावणोपदेशात् । अपानं गुदं । आदिशब्दाच्छ्रवणनेत्रनासामेढ्रादिष्वपि कुर्व्वन्ति ॥ * ॥ अथ वातार्शोलक्षणमाह ।

"गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमिचिमान्विताः ।
म्लानाः श्यावारुणाः स्तब्धा विशदाः परुषाः खराः ॥
मिथोविसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः ।
बिम्बीखर्ज्जूरकर्कन्धूकार्पासीफलसन्निभाः ॥
केचित्कदम्बपुष्पाभाः केचित् सिद्धार्थकोपमाः ।
शिरःपार्श्वांसकट्यूरुवङ्क्षणाभ्यधिकव्यथाः ॥
क्षवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः ।
कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः ॥
तैरार्त्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकं ।
रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते ॥
कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते ।
गुल्मप्लीहोदराष्ठीलासम्भवस्तत एव च" ॥

बह्वनिलाः वातोल्वणाः । गुदाङ्कुराः अर्शांसि । चिमिचिमान्विताः चिमिचिमा व्यथाविशेषः चनचना इति लोके तदन्विताः । श्यावारुणाः श्यावा धूम्रवर्णाः । अरुणा ईषद्रक्ताः । स्तब्धाः कठिनाः । विशदाः अपिच्छिलाः । परुषाः गोजिह्वावत् स्पर्शे कर्कशाः । खराः कर्कोटकफलवत् सूक्ष्मानेककण्टकाचिताः । बिम्ब्यादिफलसन्निभाः आकृत्याः । अत्र विकल्पबोधकं वक्ष्यमाणं केचित् केचिदिति पदं सम्बन्धनीयं ।

"कदम्बपुष्पाभाः स्थूला अनेकसूक्ष्मशिखराः ।
सिद्धार्थकोपमाः पीतसूक्ष्मपिडकान्विताः" ॥

तैरार्त्त इति अर्शोभिः पीडितः । तैरार्त्तो विडुपवेश्यत इत्यार्त्तस्य प्रयोज्यकर्त्तुः कर्म्मतार्थत्वात् । ग्रथितं मलगुटिकाग्रथितविड्वर्त्तिरूपं । पिच्छा पिच्छिलो द्रवभागः । बद्धं संहतं । विषशब्दो नपुंसकेऽप्यस्ति । उपवेश्यते त्यज्यते । अतएव वातार्शस एव गुल्मादीनां सम्भवः । अष्ठीला नाभेरधोभागे पाषाणपिण्डिकावद्वातव्याधिविशेषः ॥ * ॥ अथ पित्तार्शोलक्षणमाह ॥

"पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः ।
तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः ॥
शुकजिह्वायकृत्खण्डजलौकोवक्त्रसन्निभाः ।
दाहपाकज्वरस्वेदतृष्णामूर्च्छारतिप्रदाः ॥
सोष्माणो द्रवनीलोष्णपीतरक्तामवर्च्चसः ।
यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः" ॥

पित्तोत्तराः पित्तोल्वणाः । तनु अघनं । श्लथाः लम्बिनः । सन्निभाः आकृत्या । पाको गुदस्य । सोष्माणः उष्णस्पर्शाः । हरित् शाकवर्णं । पीतं हरितालवर्णं । हारिद्रं हरिद्रावर्णं । आदिशब्दान्मलमूत्रमुखानां ग्रहणं ॥ * ॥ अथ केचिद्रुधिरस्यापि दोषत्वं मन्यन्ते तन्मतमाश्रित्य रक्तार्शोलक्षणमाह ।

"रक्तोल्बणा गुदे कीलाः पित्ताकृतिसमन्विताः।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः॥
तेऽत्यर्थं दुष्टमुष्णञ्च गाढ़विट्कप्रपीडिताः।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः॥
विट् श्यावं कठिनं रूक्षमधोवायुर्न वर्त्तते।
तनु चारुणवर्णञ्च फेनिलञ्चासृगर्शसाम्॥
कट्यूरुगुदशूलञ्च दौर्ब्बल्यं यदि वाधिकं।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणं॥
शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलं।
यद्यर्शसां घनञ्चासृक् तन्तुमत् पाण्डु पिच्छिलं॥
गुदं सपिच्छं स्तिमितं गुरु स्निग्धञ्च कारणं।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः"॥
गदे कीला अर्शांसि। पित्ताकृतिसमन्विताः पित्तार्शोलक्षणयुक्ताः। आकारेण च वटप्ररोहादिसदृशाः। दुःखै रोगैः। त्वक्पारुष्याम्लशीतप्रार्थनादिभिः। कलुषेन्द्रियः व्याकुलसर्वेन्द्रियः॥ *॥ रक्तजस्यापि वातोल्बणस्य लक्षणमाह। तत्र रक्तार्शसि। अनुबन्धः उल्बणत्वं। रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यं। पित्तोल्बणस्य तु लक्षणं।
"रक्तोल्बणा गुदे कीलाः पित्ताकृतिसमन्विताः"।
इत्यादिनैवोक्तं। रक्तपित्तयोः समानलिङ्गत्वात्॥ *॥ कफोल्बणस्य लक्षणमाह। सपिच्छं पिच्छिलार्द्रं। स्तिमितमार्द्रचर्म्मावगुण्ठितमिव॥ *॥ अथ श्लेष्मार्शोलक्षणमाह।
"श्लेष्मोल्बणा महामूला घना मन्दरुजः सिताः।
उत्सन्नोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः॥
पिच्छिलास्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः।
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः॥
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्षिणः।
सकासश्वासहृल्लासप्रसेकारुचिपीनसाः॥
मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः।
क्लैब्याग्निमार्दवच्छर्द्दिरामप्रायविकारदाः॥
वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः।
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः"॥
उत्सन्ना उन्नताः। उपचिताः स्थूलाः। स्निग्धाः सस्नेहाः। स्थिरा निश्चलाः। पिच्छिलाः कफाश्रयत्वात्। स्तिमिता आर्द्रवस्त्रगुण्ठिता इव। श्लक्ष्णा मसृणस्पर्शाः। करीरो वंशाङ्कुरः। पनसास्थिरोल्बणा तदाकृतयः। वङ्क्षणानाहिनः वङ्क्षणदेशानाहकारिणः। पाय्वादिविकर्षणवत् पीडाकारिणः। कृच्छ्रं मूत्रकृच्छ्रं। शिरोजाड्यं शिरसो भाराक्रान्तमिव। क्लैब्यं स्त्रीष्वनिच्छा। अत्र छर्द्दिरप्यामाशयप्राधान्यात्। आमप्रायविकाराः अन्यत्र अल्पदोषोऽतीसारग्रहण्यादयः तान् ददाति॥ *॥ अथ द्वन्द्वजार्शोलक्षणमाह।
"संसृष्टलक्षणं विद्यात् द्वन्द्वोल्बणानि च"॥ *॥
अथ त्रिदोषजं सहजार्शश्च लक्षणमाह।
"सर्व्वं सर्व्वात्मकं लक्ष्म सहजानि च"।
सर्व्वैर्लक्षणैर्वातपित्तश्लेष्मार्शोलक्षणैः प्रागुक्तैः। सर्व्वात्मकानि सान्निपातिकान्यर्शांस्याहुः। तथा तैरेव लक्षणैः सहजानि चार्शांस्याहुः॥ *॥ तन्त्रान्तरे सहजार्शोलक्षणं पृथगाह।
"अर्शांसि सहजातानि दारुणानि भवन्ति हि।
दुर्द्दर्शनानि पाण्डूनि परुषाण्यरुणानि च॥
अन्तर्म्मुखानि तैरार्त्तः क्षीणः क्षीणस्वरो भवेत्।
क्षीणानलः क्षीणरेताः शिरासन्ततविग्रहः॥
अल्पप्रजः क्रोधशीलः सन्तताक्लमसमन्वितः।
शिरोदरकर्णनासासु रोगी श्लेष्मसेकवान्"॥ *॥
अथ सुखसाध्यार्शोलक्षणमाह।
"बाह्यायान्तु वलौ जातान्येकदोषोल्बणानि च।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च"॥
बाह्यायां वलौ संवरण्यां। न चिरोत्पतितानि अनतिक्रान्तसंवत्सराणि। एतानि लक्षणानि मिलितानि सुखसाध्यत्वबोधकानि॥ *॥ अथ कष्टसाध्यार्शोलक्षणमाह।
"द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च"॥
द्वितीयायां वलौ विसर्ज्जन्यां। परिसंवत्सराणि परिगतः संवत्सरो येषां तानि। अतिक्रान्तसंवत्सराणि इति यावत्। एतानि प्रत्येकं कष्टसाध्यलक्षणानि॥ *॥ अथासाध्यार्शोलक्षणमाह।
"सहजानि त्रिदोषाणि यानि चाभ्यन्तरां वलिं।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्द्दिशेत्"॥
अभ्यन्तरां वलिं प्रवाहिणीं। एतान्यपि प्रत्येकमसाध्यलक्षणानि।
"शेषत्वादायुषस्तानि चतुष्पादसमन्विते।
याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा"॥
यद्यायुषः शेषो वर्त्तते चिकित्सायाश्चत्वारः पादाश्च यथा। वश्यवचनकारी धनवानुदारो जितेन्द्रियो रोगी।१। शास्त्रे कर्म्मणि च कुशलो वैद्यः।२। अनलस आप्तः प्रियः परिचारकः।३। नवं रसवीर्य्यादियुक्तमौषधं।४। एषां समन्वये संयोगे सति दीप्तकायाग्नेः पुरुषस्य। तानि अर्शांसि। याप्यन्ते चिकित्सया। अतोऽन्यथा प्रत्याख्येयानि न चिकित्स्यानीत्यर्थः॥ *॥ अथार्शोऽरिष्टमाह।
"हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा।
शोथो हृत्पार्श्वशूलञ्च यस्यासाध्योऽर्शसो हि सः॥
असाध्यः सन्निश्चितमरणो वेद्यः। अर्शसः अर्शोरोगयुक्तः। एतन्मिलितमरिष्टलक्षणं।
"हृत्पार्श्वशूलं संमोहश्छर्द्दिरङ्गस्य रुग्ज्वरः।
तृष्णा गुदास्यपाकश्च निहन्युर्गुदजातुरं॥
गुदस्य गुदाश्रमोष्ठदेशकस्य पाकः। हृत्पार्श्वशूलादिसमस्तं अन्तं चारिष्टलक्षणं॥
"तृष्णारोचकशूलार्त्तमतिप्रस्रुतशोणितं।
शोथातिसारसंयुक्तमर्शांसि क्षपयन्ति हि"॥ *॥
अथ मेढ्रादिजार्शोलक्षणमाह।
"मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि च।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च"॥
यथास्वं दयादीनलक्षणं। न चात्रोक्तनिदान-

पूर्व्वरूपसंप्राप्तिलक्षणयुक्तं। तत्र ... मांसाङ्कुरमाग्यात्। ... अत्र मांसाङ्कुरमारभ्याधिकारे ... संप्राप्तिपूर्व्वकं लक्षणमाह।
"व्यानो गृहीत्वा श्लेष्माणं ... कीलोपमं स्थिरखरश्चर्मकीलन्तु तं विदुः"।
चर्म्मा इति लोके। खरं कर्कशं॥ *॥
वातादिभेदेन लक्षणमाह।
"वातेन तोदपारुष्यं पित्तादसितरक्तता।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता"।
सवर्णता शरीरसमानवर्णता॥ *॥
अथ अर्शश्चिकित्सा।
"यद्वायोरानुलोम्याय यदग्निबलवृद्धये।
अन्नपानौषधं सर्व्वं तत्सेव्यं नियमार्शसैः"।
अर्शसैः अर्शोरोगयुक्तैः।
"शालिषष्टिकगोधूमयवान्नानि घृतैः सह।
अजाक्षीरेण वा निम्बपटोलानां रसेन वा।
कन्दैर्व्वास्तुकमूलोत्थैः रसैर्मांसरसेन वा।
जीवन्त्यादिकशाकैश्च तण्डुलीयकशाकजैः"।
कन्दोऽत्र शूरणः। अत्र मूलं मूलकं।
"अन्येषु हृद्यविण्मूत्रमवह्निवर्द्धिनः।
अर्शांसि भिन्नवर्चांसि ...
सतक्रं लवणं दद्यात्तत्र पाठोद्भवोत्तमम्।
न प्ररोहन्ति गुदजाः पुनस्तक्रसमाहताः।
तक्राभ्यासोऽर्शसैः कार्य्यो बलवर्णाग्निवृद्धये।
स्रोतःसु तक्रशुद्धेषु सम्यक् चलति यो रसः।
तेन पुष्टिस्तथा तुष्टिर्बलं वर्णश्च जायते।
वातश्लेष्मविकाराणां शतञ्च विनिवर्त्तते।
स्रक्षिपं शूरणं कन्दं पक्त्वाग्नौ पुटपाकवत्।
अद्यात् सतैललवणं दुर्नामविनिवृत्तये।
चित्रबिल्वाग्निसिन्धूत्थनागरेन्द्रयवाम्बुना।
तक्रेण पिबतोऽर्शांसि नियतं यान्ति संक्षयम्"।
चित्रबिल्वः करञ्ज ...
अरलुः श्योनाकः। करञ्जादिचूर्णं॥१॥
"लेपं रजनिचूर्णेन सुधादुग्धयुतेन च।
अर्शोरोगनिवृत्त्यर्थं कारयेत्तच्चिकित्सकः।
पिप्पलीसैन्धवं कुष्ठं शिरीषस्य फलं तथा।
स्नुग्दुग्धमर्कदुग्धं वा लेपोऽयं गुदजापहः।
हरिद्राजालिनीचूर्णं कटुतैलसमन्वितं।
एष लेपो वरः प्रोक्तो ह्यर्शसामन्तकारकः"।
जालिनी कटुतुरइ इति लोके॥६॥
"असितानां तिलानान्तु पलं शीतजलेन तु।
खादतोऽर्शांसि ...
शस्त्रैर्व्वाथ शलाकाभिः प्रोच्छूनकठिनार्शसाम्।
शोणितं सञ्चितं दृष्ट्वा हरेत् प्राज्ञः पुनः पुनः।
कासीसं सैन्धवं कृष्णा शुण्ठी कुष्ठञ्च लाङ्गली।
शिलाभिदश्वमारश्च दन्तीजन्तुघ्नचित्रकं।
तालकं कुनटी स्वर्णक्षीरी चैतैः पचेद्भिषक्।
तैलं स्नुह्यर्कपयसा गवां मूत्रे चतुर्गुणे।
एतदभ्यक्ततोऽर्शांसि क्षारेणैव पतन्ति हि।
क्षारकर्म्मकरं ह्येतन्न च संदूषयेद्वलिं"।
कासीसं कौसीस इति लोके।

ति लोके । शिलाभित् पाषाणभेदः । अश्मारः नैल इति लोके । स्वर्णक्षीरी चोक इति लोके । इत्यासीसाद्यं तैलं ॥ ८ ॥

"शुण्ठीकणामरिचनागदलत्वगेलं
चूर्णीकृतं क्रमविवर्द्धितमूर्द्ध्वमन्त्यात् ।
खादेदिदं समसितं गुदजाग्निमान्द्य-
गुल्मारुचिश्वसनकण्ठहृदामयेषु" ॥

तद्यथा । एलात्र सूक्ष्मा ग्राह्या । यत आह मदनपालः ।
"एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत्" ।
इत्यादि । तस्या बीजभागः १ त्वग्भागः २ दलं पत्रं । यत आह निघण्टौ धन्वन्तरिः ।
"तमालपत्रं पत्रं स्यात् पलाशं दलाह्वयम्" ।
इति तस्य भागः ३ । नागो नागकेशरं । यत आह निघण्टौ धन्वन्तरिः ।
"नागपुष्पं मतं नागं केशरं नागकेशरम्" ॥
इत्यादि । तस्य भागः ४ मरीचभागः ५ पिप्पलीभागः ६ शुण्ठीभागः ७ चिनिभागः २८ । समशर्करचूर्णं ॥ १० ॥

"त्रिपलं शृङ्गवेरस्य चतुष्कं मरिचस्य च ।
पिप्पल्याः कुडवार्द्धञ्च चव्यायाः पलमेव च ॥
तालीशपत्रस्य पलं पलार्द्धं केशरस्य च ।
द्विपलं पिप्पलीमूलमर्द्धकर्षञ्च पत्रकात् ॥
सूक्ष्मैलाकर्षमेकन्तु कर्षञ्च त्वङ्मृणालयोः ।
गुडात् पलानि त्रिंशच्च चूर्णमेकत्र कारयेत् ॥
अक्षप्रमाणगुटिका प्राणदा चेति सा स्मृता ।
पूर्व्वं भक्ष्यञ्च पश्चाच्च भोजनस्य यथाबलं ॥
मद्यं मांसरसं यूषं क्षारतोयं पिबेदनु ।
हन्यादर्शांसि सर्व्वाणि सहजान्यस्रजानि च ॥
वातपित्तकफोत्थानि सन्निपातोद्भवानि च ।
पानात्यये मूत्रकृच्छ्रे उरोरोगे गलग्रहे ॥
विषमज्वरपित्ते च पाण्डुरोगे तथैव च ।
क्रिमिहृद्रोगिणाञ्चैव गुल्मशूलार्त्तिनां तथा ॥
छर्द्दतीसाररोगाणां कामलारुचिकिनां तथा ।
शुण्ठीस्थानेऽभया देया हृदयन्ते पित्तजे गदे ॥
प्राणदेयं सितां दत्त्वा गुडभागाच्चतुर्गुणां ।
अम्लपित्ताग्निमान्द्यादौ प्रयोज्या गुदजातुरे ॥
अनुपाने प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलं ।
मन्दकं त्वनिलजे पित्तजे तु पलत्रयं ॥
पलाद्धधान्यस्वरगात्रशक्ता
मद्यं महद्यौगिकि चानुपानं ।
इत्थो रसक्षारविनाम्लु पित्ते
उष्णाम्बुपूर्वो कफजे विदध्यात् ॥
कृष्णमाषसारेय भक्तो भूपे च पश्च वा ।
मुपानं प्रयोक्तव्यं देशकालमवेक्ष्य वा" ॥
इति प्राणदा गुटिका ॥ ११ ॥
"त्रिकटुत्रयं वचा हिङ्गु पाठाक्षारौ निशाद्वयं ।
दन्तिका चित्रकानि इत्याख्या लवणानि च ॥
हरिद्राजमोदा च तोऽयार्द्धविवर्जितः ।
तानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥
शृं विडालपदकं तिन्दुकेन वारिणा ।
अरोचकाद्यर्शः शा निहाशूलमिदं महत् ॥
हन्यादर्शांसि सर्व्वाणि श्वासशोथभगन्दरान् ।
हृच्छूलं पार्श्वशूलञ्च वातगुल्मं तथोदरं ॥
हिक्कां कासं प्रमेहांश्च पाण्डुरोगं सकामलं ।
आमवातमुदावर्त्तमन्त्रवृद्धिं गुदक्रिमीन् ॥
अन्ये च ग्रहणीदोषा भिषग्भिर्ये प्रकीर्त्तिताः ।
विजयो नाम चूर्णोऽयं तान् सर्व्वानाशु नाशयेत् ॥
महाज्वरोपसृष्टानां भूतोपहतचेतसां ।
अप्रजानाञ्च नारीणां हितमेतद्धि भेषजं ॥
त्रिकत्रयं त्रिफलात्रिकटुचित्रगन्धीति ।
क्षारौ स्वर्जिका यवक्षारश्च । लवणानि पञ्च । ग्रन्थिः पिप्पलीमूलं । विडालपदकं कर्षं । विजयचूर्णं ॥ १२ ॥

"मरिचमहौषधचित्रकशूरणा-
भागा यथोत्तरं द्विगुणाः ।
सर्व्वसमो गुडभागः
सेव्योऽयं मोदकः प्रसिद्धफलः ॥
ज्वलनं ज्वलयति जाठर-
मुन्मूलयति शूलगुल्मगदान् ।
निःशेषयति श्लीपद-
मर्शांसि विनाशयत्याशु" ॥

तद्यथा । मरिचभागः १ शुण्ठीभागः २ चिताभागः ४ शूरणभागः ८ गुडभागः १५ । लघुशूरणमोदकः ॥ १३ ॥

"षोडशशूरणतोऽंशा वह्नेरष्टौ महौषधस्याथ ।
अर्द्धेन भागयुक्तिर्मरिचस्य ततोऽपि चार्द्धेन ॥
त्रिफला कणा समूला तालीशारुष्करक्रमिघ्नानां ।
भागा महौषधसमा दहनांशतालमूली च ॥
भागः शूरणतुल्यो दातव्यो वृद्धदारकस्यापि ।
भृङ्गैले मरिचांशे सर्व्वाण्येकत्र कारयेत् चूर्णं ॥
द्विगुणेन गुडेन युतः सेव्योऽयं मोदकः प्रकामधनैः ।
गुरुदुष्यभोज्यनिरतैरितरैयूममवं कुर्य्यात् ॥
भस्मकमनेन जनितं पूर्व्वमगस्त्यस्य योगराजेन ।
भीमस्य मारुतेरपि महाशनौ येन तौ जातौ ॥
अग्निबलमात्रहेतुर्न केवलं शूरणो महावीर्य्यः ।
हन्ता शस्त्रक्षारानलैर्विनाप्यर्शसामियः ॥
श्वयथुश्लीपदगदहृद्ग्रहणीश्च वपानिर्म्मोहतां ।
नाशयति वलीपलितं मेधां कुरुते जरां हरते ॥
हिक्कां कासं श्वासं मराजरोगान् प्रमेहांश्च ।
श्लीहानञ्च तथोग्रं हन्यादाशु रसादनं पुंसां" ॥
अस्यां भागो यथा । शूरणभागः १६ चिताभागः ८ शोटिभागः ४ मरिचभागः २ । हरके वहेरा आमला । पीपर पिपरामूल । तालीशं तालीशपत्रं । अरुष्करं भल्लातकं । तदसद्भावे रक्तचन्दनं । विडङ्गं प्रत्येकं भागः ४ तालमूली मूषली तस्याः भागः ८ विधाराभागः १६ त्वग्भागः २ एलाश्चबीजभागः २ गुडभागः ४ । ८२ । बृहच्छूरणमोदकः ॥ १४ ॥

"त्रिवृत्तेजोवती दन्ती श्वदंष्ट्रा चित्रकं शटी ।
गवाक्षीमुस्तविश्वाह्वविडङ्गानि हरीतकी ॥
पर्णिनिकाश्चि पैत्राणि पलान्येतानि कल्पयेत् ।
दशदानान् पलान्यष्टौ शूरणस्य तु धीमता ॥
भल्लातकदे च द्विगुणं चतुर्गुणमहेर्षिणं ।
पूतं तु तं रसं भूयः क्वाथेभ्यः त्रिगुणं गुडं ॥
लेहं पचेत् पुनस्तावद्यावद्दर्व्वीप्रलेपनं ।
अवतार्य्य ततः पश्चात् चूर्णानीमानि दापयेत् ॥
त्रिवृत्तेजोवतीकन्दचित्रकान् द्विपलांशिकान् ।
एलात्वङ्मरिचं चापि नागाह्वं चापि षट्पलं ॥
द्वात्रिंशच्च पलान्यत्र चूर्णयित्वा निधापयेत् ।
ततो मात्रां प्रयुञ्जीत जीर्णे क्षीररसाशिनः" ॥
तेजोवती तेजवती तेजवल्कल इति च ।
कन्दः शूरणः ।
"हन्यादर्शांसि सर्व्वाणि तथा सर्व्वोदराण्यपि ।
गुल्मानपि प्रमेहांश्च पाण्डुरोगं हलीमकं ॥
दीपयेदनलं मन्दं यक्ष्माणं चापकर्षति ।
आढ्यवाते प्रतिश्याये पीनसेऽयं हितो मतः ॥
भवन्त्यनेन पुरुषाः शतं वर्षाण्यनामयाः ।
दीर्घायुषः प्रजनना वलीपलितवर्ज्जिताः ॥
गुडः श्रीबाङ्कशालोऽयं रसायनवरो मतः ।
दुर्नामान्तकरो ह्येष दृष्टो वारसहस्रशः ॥
यावद्दर्व्वीप्रलेपः स्याद्यावद्वा तन्तुली भवेत् ।
तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुडः ॥
क्षिप्तस्तु निश्चलस्तिष्ठेत् पतितस्तु न शीर्य्यति ।
एष पाकः समस्तानां गुडानां परिकीर्त्तितः ॥
सार्द्धं पलं पलञ्चार्द्धं भक्षयेद्गुडखण्डयोः ।
श्रेष्ठा तु मध्यमा हीना मात्रोक्ता मुनिभिस्त्रिधा" ।
बाङ्कशालो गुडः ॥ १५ ॥
"तिला भल्लातकं पथ्या गुडश्चेति समांशकं ।
दुर्नामश्वासकासघ्नं प्लीहपाण्डुज्वरापहं ॥
पित्तश्लेष्मप्रशमनो कच्छुदद्रुकशापहा ।
गुदजान्नाशयत्याशु भक्षिता सगुडाभया" ॥ १६ ॥
"प्रणम्य शङ्करं रुद्रं दण्डपाणिं महेश्वरं ।
जीवितारोग्यमन्विच्छन्नारदोऽपृच्छदीश्वरं ॥
सुखोपायेन हि नाथ शस्त्रक्षाराग्निभिर्व्विना ।
चिकित्सामर्शसां ब्रूहि कारुण्यादनुमर्हसि ॥
नारदस्य वचः श्रुत्वा नराणां हितकाम्यया ।
अर्शसां नाशनं श्रेष्ठं भैषज्यं शङ्करोऽवदत् ॥
माषचक्षादिलोद्दालमादायान्यतमं शुभं ।
कृत्वा निर्म्मलमादौ तु कुनटी माक्षिकं च ॥
धत्तूरमूलकल्केन स्निग्धमयेन च" ।
कुनटी मनःशिला । माक्षिकं स्वर्णमाक्षिकं ।
धत्तूरं वरम इति लोके । कानिला इति रसेन्द्रचिन्तामणौ । स्नेहः पारदः ।
"वह्नौ निक्षिप्य विधिवत् मानाङ्कानेन निर्धमेत् ।
ज्वाला च तत्र गेहया विषमाला रसेन वा" ॥
सारः पारदसारः । ज्वालाङ्कारेण इति रसेन्द्रचिन्तामणौ पाठः ।
"ततो निष्काय गन्ति रन्धोर्द्धं समुत्क्षिपेत् ।
त्रिफलाया रसे पूते तदाह्य तु निर्व्विपेत् ॥
न मन्दमान्तितं तत्र तेनैव विधिना पुनः ।
पात्रं निर्व्वापयेत्किन्तु लौहं तत् विषमाक्षि ॥
गृहीतं न स्वतं तत्र पात्रं मृदीतं च पूर्व्ववत् ।
मानसाङ्क स्वतं तत्र तत्पात्रमर्शोहरम् ॥
ततः संशोध्य विधिवत् धूर्त्तरोगेभ्याश्च ।
लौहेन तथा तत्र कृष्णा कृष्णचूर्णितं ॥

कृत्वा लोहमये पात्रे मार्दे वा निशि कल्पके ।
रसैः षड्भिर्दमं कृत्वा तं पचेद्धीमतामिना ॥
पुटादि क्रमतो दद्यात् एतदेषां त्रिधानतः ।
त्रिकलं पचमूर्च्छायां केशराजस्य बुद्धिमान् ॥
माकवस्कमस्नानसकोषां शूरकस्य च ।
हस्तिकर्णपलाशस्य मुण्डिकस्य तथैव च" ॥
भृङ्ग भृङ्गराजः । केशराजः भृङ्गराज इति हि ।
मुण्डितं मुण्डीतीर ।
"पुटे पुटे चूर्णयित्वा लोहात् षोडशिकं पलं ।
तन्मात्रं त्रिफलायाथ दद्यात् अधिकमाहरेत् ॥
[illegible] पचेद्बुधः ।
[illegible] च सर्पिषो लोहभाजने ।
[illegible] धिमूर्च्छितं ।
[illegible] च सर्पिषि ॥
[illegible] पाकमाचरेत् ।
[illegible]
[illegible]
[illegible] मर्दनं ।
[illegible]

"वास्तुकं धान्यशाकञ्च केमुकं चक्रवर्त्तनं" ।
चक्रवर्त्तनं चक्रवर्तशाकं ।
"नारिकेलञ्च खर्ज्जूरं दाड़िमं लवलीफलं ।
शृङ्गाटकञ्च पक्वाम्रं द्राक्षा तालफलानि च ।
जातीकोषं लवङ्गञ्च पूगं ताम्बूलपत्रकं ॥
हितान्येतानि वस्तूनि लौहमेतत् समश्नता ।
गाम्भीर्यफलकुष्मं कोलं कर्कन्धुबदराणि च ।
जम्बीरं बीजपूरञ्च तिन्तिड़ीं करमर्द्दकं" ॥
कोलं क्षुद्रबदरं । कर्कन्धुबदराणि महान्ति ।
"आनूपानि च मांसानि शकरं पुण्ड्रकानपि ।
हंससारसदात्यूहचक्रकङ्कबलाकिकाः ॥
माषकन्दकरीराणि कतकञ्च कलिङ्गकं ।
कुष्माण्डकञ्च कर्कोटं केमुकञ्च विशेषतः ॥
कटुकं कालशाकञ्च कशेरं कर्कटीं तथा ।
ककारादीनि सर्व्वाणि द्विदलानि च वर्जयेत् ॥
शङ्करेण समाख्यातचूर्णराजोऽनुकम्पया ।
जगतामुपकाराय दुर्नामारिरयं ध्रुवं ॥
स्थानादपैति मेरुश्च पृथ्वी पर्य्येति वायुना ।
पतन्ति चन्द्रताराश्च मिथ्या चेदहमसुवं ॥
गुरुघ्नाश्च कृतघ्नाश्च क्रूरा येऽसत्यवादिनः ।
वर्जनीयाः स्वधर्म्मेण भिषजा गुरुनिन्दकाः ॥
"मुनिरसपिष्टविड़ङ्गं मुनिरसलीढ़ं चिरस्थितं घर्मे ।
हारयति लोहदोषान् वह्निमुखगीतपिण्डमिव" ॥
मुनिरगस्तिः ।
"कासे सम्प्रवृत्तिमर्शांस्यमुदरे शिराद्विषद्वारे ।
शस्त्रेषु भाग्यादो मन्त्रप्रमादोऽस्य परिपाके ॥
शर्करिकापूर्णं लीढं सचितं स्वरसेन वङ्गसेनस्य ।
शमयत्यचिरात्तिलयं लोहाभीर्यान्द्भवं शूलं" ॥
वङ्गसेनस्य रसस्य ।
"भौमं लोहे पतति पूर्णं भुञ्जीत सिद्धमाराख्यं ।
लोहस्यापक्रमयति विरहते माठरो वह्निः" ॥
तद्यथा,—
"यथा नैश्चस्तुगन्धीमागधिकानां पृथक् समो भागः ।
त्रिवृतो भागौ त्रिसृ भागं तत् सिद्धमाराख्यं" ॥
"कृतेन्द्रनिमायस्य दुग्धं पीत्वा क्षमं भवेत् ।
गुड़ादस्तस्मादूर्द्ध वह्निरस्य भवप्रदा" ॥
इत्यर्शसि लोह । इति सामान्यक्रिया ॥१०॥०॥
अथ रक्तार्शसां चिकित्सा ।
"रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्भिषक् ।
दुष्टासे निगृह्णीते स्युः शूलानाहास्रजामयाः ॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
"[illegible]" ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।

समङ्गोत्पलमोचाह्वतिरीटतिलचन्दनैः ।
सिद्धं छागीपयो दद्यात् गुदजे [illegible]
समङ्गा लज्जालुः ।
लोध्रः । चन्दनमत्र रक्तं । समङ्गादिद्रव्यं ।
"भावितं रजनीचूर्णं स्नुहीक्षीरैः [illegible]
बन्धनात् सुदृढं सूत्रं छिनत्त्यर्शांसि [illegible]
क्षारसूत्रं ॥ ८ ॥
"भासानामिसमुत्थेषु तथा मेढ्रादिषु
क्रियामर्शःसु कुर्व्वीत तत्र तत्र [illegible]
चर्म्मकीलन्तु संछिद्य दहेत् [illegible]
वेगावरोधस्त्रीपृष्ठयानान्युत्कटकासनं ।
यथास्वं दोषलञ्चान्नमर्शसः परिवर्जयेत् ।
इत्यर्शोऽधिकारः ॥ ० ॥ इति भावप्रकाशः ।

अर्शसः, त्रि, (अर्शस् + मत्वर्थे अच् ।)
युक्तः । इत्यमरः ॥
("हीनक्रियं निष्पुरुषं निश्छन्दो [illegible]
इति मनुः ।
"अन्नपानौषधं सर्व्वं तत्सेयं निरमां [illegible]
हस्ते पादे मुखे नाभ्यां गुदे [illegible]
[illegible]
इति भावप्रकाशः ।)

अर्शसानः, पु, (ऋष + असानच्, सुट् ।)
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
सानाय भानुना हिंसिने" । [illegible]

अर्शी, [न्] त्रि, (अर्शांसि सन्त्यस्य,
अर्शोरोगयुतः । इति शब्दरत्नावली ।

अर्शोघ्न, पुं, (अर्शो हन्ति, अर्श + [illegible]
ओलः । तत्पर्य्यायः । शूरणः २ कन्द [illegible]
मरः ॥ सूरणः ४ । इति तट्टीका । [illegible]
भाषा । (अर्शोरोगविनाशक ।
"अर्शोघ्नं कारमं सूत्रं भातुमत् [illegible]
इति सुश्रुते ।)

अर्शोघ्नी, स्त्री, (अर्शस् + हन् + टक् + ङीप्)
मणी । इति मेदिनी ॥

अर्शोहितः, पुं, (अर्शसि हितः, [illegible]
त्वात् ।) भल्लातकः । इति त्रिकाण्डशेषः ।
इति भाषा ।

अर्ह योग्यत्वे । (भ्वादि-पर० सकं सेट् ।)
इति कविकल्पद्रुमः । अर्हति [illegible]
मकर्म्मकोऽपि ।
"अपराधमपास्य [illegible]
इति दुर्गादासः ।
("अध्यापयन् गुरुसुतो [illegible]
इति मनु ।
"[illegible]"
इति रघुवंशे ।
"[illegible]"
इति मनु ।)

अर्ह च पूजने । (चुरा-उभ-सक-सेट् ।)
कविकल्पद्रुमः । [illegible]
("[illegible]"
रघुवंशे ।)

…, पुं, (अर्हं + अच् ।) इन्द्रः । इति शब्दरत्ना- वली ॥

…, त्रि, (अर्हं + अच् ।) योग्यः । उपयुक्तः । यथा,—

"तस्मान्नार्हा वयं हन्तुं धार्त्तराष्ट्रान् सबान्धवान्"।

इति श्रीभगवद्गीता ॥

…णा, स्त्री, (अर्हं + युच् + टाप् ।) पूजा । इत्यमरः ॥ …"अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे"।

… इति रघुवंशे ।)

…न्, [त्] पुं, (अर्हः प्रशंसायां शतृ ।) क्षपणकः । …बुद्धः । इति मेदिनी ॥ शेषस्य पर्य्यायः । …जिनः २ पारगतः ३ त्रिकालवित् ४ क्षीणाष्ट- …कर्म्मा ५ परमेष्ठी ६ अधीश्वरः ७ शम्भुः …८ स्वयम्भूः ९ भगवान् १० जगत्प्रभुः ११ …तीर्थङ्करः १२ तीर्थकरः १३ जिनेश्वरः १४ …वादी १५ अभयदः १६ सार्व्वः १७ सर्व्वज्ञः १८ सर्व्वदर्शी १९ केवली २० देवाधिदेवः २१ बो- …धिदः २२ पुरुषोत्तमः २३ वीतरागाप्तः २४ । …इति हेमचन्द्रः ॥

…, (त्) त्रि, (अर्हं + शतृ ।) पूज्यः । मान्यः । इति मेदिनी ॥ स्तुतः । इति शब्दरत्नावली ॥ …"यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते"। …इति कुमारसम्भवे ।

"त्वमर्हतामग्रसरः स्मृतोऽसि नः"।

इति शाकुन्तले ।)

…न्तः, पुं, (अर्हं + बाहुलकात् झच् ।) बुद्धः । …क्षपणकः । मान्ये त्रि । इति जटाधरः ॥ शिवः । …इति शब्दरत्नावली ॥

…तः, त्रि, (अर्हं + क्त ।) पूजितः । इत्यमरः ॥

…अ वारणपर्य्याप्तिभूषासु (भ्वादिं-उभं-सकं ।) …ति कविकल्पद्रुमः ॥ अ अलति अलते पात्रं …न निवारयतीत्यर्थः । पर्य्याप्तिः सामर्थ्यं । …यामन्तु यदेष्टं स्यात् क्वमे शक्ते निवारणे"। …विश्वप्रकाशात् । अलति घोटको धावितुं …: स्मादित्यर्थः । अलति हारो जदं भूष- …त्यर्थः । इति दुर्गादासः ॥

…, (अल + अच् ।) वृश्चिकपुच्छकण्टकः । …हेमचन्द्रः । विछार हुल इति भाषा । …लं । इति रत्नमाला अमरटीका च ॥ …यदं । पर्य्याप्तिः । वारणं । निरर्थकं । इति मेदिनी ॥ अलर्थं । यथा,— …विमलं वरामललं गोलं विशालासि …ति लीलावती ॥

…री, (अलति भूषयति मुखं, अल + …ड़ुतः केशः । कर्पूरादिः घोटकूर्दं …माल्कुन्तलाः तद्धि तत्र अलते …ति भूषयति मुखं इत्यलकं । इति …टिलकुन्तलः । इति सुभूतिः । इति …तत्पर्य्यायः । चूर्णकुन्तलः २ ।

…लं नवहरिं शारं

…रा अलकेश्वरेशः"।

…15

इति ऋतुसंहारे ।

"हस्ते लीलाकमलमलके बालकुन्दानुविद्धं"।

इति मेघदूते ।)

अलकः, पुं, (अल + क्वुन् ।) अलर्कः । क्षिप्तकुक्कुरः । इत्यमरटीकायां रायमुकुटः ॥

अलकनन्दा, स्त्री, (अलति पर्य्याप्नोति, अल + क्वुन्, अलका, नन्दयति इति अच् नन्दा, अलका चासौ नन्दा चेति इति इति कर्म्मधारयः ।) कुमारी । इति त्रिकाण्डशेषः ॥ भारतवर्षीयगङ्गा । इति शब्दमाला ॥ "तथैवालकनन्दा दक्षिणेन तु ब्रह्म- सदनाद्बहूनि गिरिकूटान्यतिक्रम्य निषध-हेमकूट- हिमकूटान्यतिरभसतररंहसा लुठन्ती भारत- मपि वर्षं दक्षिणस्यां दिशि लवणजलधिमभि- प्रविशति"। इति श्रीभागवतं ॥ (हिमालयादुत्पन्ना श्रीनगरस्यादूरे गङ्गया सह मिलिता स्वनामख्याता नदी । गङ्गैव देवलोके अलकनन्देत्युच्यते । इति महाभारते । यदुक्तं,—

"देवेषु गङ्गा गन्धर्व्व ! प्राप्नोत्यलकनन्दताम् ।

तथैवालकनन्दापि दक्षिणेनैति भारतं ।

प्रयाति सागरं भूत्वा सप्तभेदा महामुने" ॥

इति भागवतपुराणे ।)

अलकप्रभा, स्त्री, (अलका पर्य्याप्ता प्रभा यस्याः सा ।) कुवेरपुरी । इति शब्दरत्नावली ॥

अलकप्रियः, पुं, (अलकान् प्रीणाति अलक + प्री + क ।) वृक्षविशेषः । इति जटाधरः ॥

अलका, स्त्री, (अल + क्वुन् + टाप् ।) कुवेरनगरी । इत्यमरः ॥ अष्टवर्षावधिदशवर्षपर्य्यन्तवयस्का कन्या । इति शब्दरत्नावली ॥

अलकाधिपः, पुं, (अलकाया अधिपः, षष्ठीतत्पुरुषः ।) कुवेरः । इति जटाधरः ॥

अलकाधिपतिः, पुं, (अलकाया अधिपतिः, षष्ठी- तत्पुरुषः ।) कुवेरः । इति शब्दरत्नावली ॥

अलक्तः, पुं, (न रक्तोऽस्मात्, रस्य लत्वं ।) वृक्षनि- र्य्यासविशेषः । लाहा । लौ इति च भाषा । तत्पर्य्यायः । राक्षा २ लाक्षा ३ जतु ४ यावः ५ द्रुमामयः ६ । इत्यमरः ॥ रक्षा ७ । इति भरतः । अलक्तः ८ । इत्यमरटीकायां भरतः ॥ जतुकं ९ यावकः १० अलक्तकः ११ रक्तः १२ । इति शब्दरत्नावली ॥ पलङ्कषा १३ द्रुमिः १४ वर- वर्णिनी १५ । इति जटाधरः ॥ तस्य गुणादिः ।

"लाक्षा पलङ्कषाम्लक्ती यावो वृक्षामयो जतु ।

लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः ।

अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत् ।

व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा ॥

अलक्तको गुणैस्तद्वद्विशेषाद्व्यङ्गनाशनः"।

इति भावप्रकाशः ॥ [illegible] । अल्ता इति भाषा । तत्पर्य्यायः । अलक्तकः २ जतुरसः ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ । [illegible] । [illegible] । उत्सर्गं । [illegible] । [illegible] । इति [illegible] ॥

अलर्कः, पुं, (अलम् अर्कः, [illegible]

निर्भर्त्सनं । अलक्तः । इति हलायुधो हा… च ॥ लाक्षा । इति राजनिर्घण्टः ॥ ("अ… कान्तानि पदानि पादयोः"। इति कुमारस…

"पादालक्तकरक्तमौक्तिकशिलःसिक्ताङ्गनाना…

इति नागानन्दे ।)

अलगर्द्दः, पुं, (लगति स्पृशति, क्विप्, लग्, अर्द्दय… अर्द्द + अच्, अर्द्दः, लग् चासौ अर्द्दश्चेति इ… लगर्द्दः, लग्नः सन् पीड़क इत्यर्थः, निर्व्विषत्वा… तद्भिन्नः ।) जलसर्पः । जलबोड़ा इति केचित् । अलाध इति केचित् । इत्यमरटीकायां भरतः ॥ (सविषो जलव्यालभेदः । विलकेउटिया इति भाषा, "तत्र सविषाः कृष्णाः कर्व्वुरा अलगर्द्दा इन्द्रायुधाः सामुद्रिका गोचनन्दाः चेति"। सुश्रुते ।)

अलगर्द्धः, पुं, (अलं गृध्यति इति गृध + अच्, पृषो- दरादित्वात् साधुः ।) जलव्यालः । इत्यमरः ॥ केउटिया इति ख्यातः । जलबोड़ा इति केचित् । अलाध इति केचित् । इति भरतः ॥

अलङ्करणं, क्ली, (अलम् + कृ + भावे ल्युट् ।) भूषणं । इति शब्दरत्नावली ॥

अलङ्करिष्णुः, त्रि, (अलम् + कृ + इष्णुच् ।) अलङ्कार- कर्त्ता । भूषणशीलः । इति रघुनाथचक्रवर्त्ती- दयः ॥ तत्पर्य्यायः । मण्डनः २ । इत्यमरः ॥ अलङ्कर्त्ता ३ । इति शब्दरत्नावली ॥ अलङ्कार- युक्तव्यक्तिः । इति सारसुन्दर्य्यादयः ॥ तत्पर्य्यायः । अलंकर्त्ता २ मण्डितः ३ प्रसाधितः ४ अलङ्कृतः ५ भूषितः ६ परिष्कृतः ७ । इत्यमरः ॥

अलङ्कर्त्ता, [र्तृ] त्रि, (अलम् + कृ + तृच् ।) अल- ङ्करिष्णुः । इत्यमरः ॥

अलङ्कर्म्मीणः, त्रि, (अलं समर्थः कर्म्मणे, खः ।) कार्य्य- कुशलः । कर्म्मक्षमः । इत्यमरः ॥

अलङ्कारः, पुं, (अलम् + कृ + भावे घञ् ।) भूषणं । तत्पर्य्यायः । आभरणं २ परिष्कारः ३ विभूषणं ४ मण्डनं ५ । इत्यमरः ॥ अलङ्क्रिया ६ भूषा ७ अलङ्करणं ८ । इति शब्दरत्नावली । कलापः ९ इति जटाधरः ॥ [illegible] । अथालङ्कारयुक्तिः । तद्वा- ग्वादिनमुच्यते ।

"दैवत्यविधनिष्ठासु [illegible] पच्छ ।

[illegible] स्थानाम्बरधारणं ।

[illegible] निर्दिष्टं [illegible] ।

उदाहे [illegible] ।

शिरस्कं मुकुटं हारः कुण्डलादृष्टमादा ।

[illegible] ।

प्रधानभूषणान्येषु [illegible] ।

[illegible] गोविन्दान्वदा ।

मुक्ता वैदूर्य्य[illegible] तथा मरकतं क्रमात् ।

[illegible] ।

[illegible] सर्व्वधानुकल्पते ।

[illegible] ।

प्रधानभूषणं [illegible] ।

तत्र प्रधानभूषणादिकाद [illegible] ।

[illegible] ।

[illegible]"।

अल

अर्थालङ्कारनामानि

विषयः ... [illegible] यथा। ... [illegible] ... इत्यादयः।

ह्रेकापह्नुतिः —— ४१

तद्गुणः —— ४२

तुल्ययोगिता —— ४३

... [illegible] द्विधा।

प्रथमा यथा ——

द्वितीया यथा ——

द्वितीया यथा ——

दीपकं —— ४४

दृष्टान्तः —— ४५

निदर्शना —— ४६

... [illegible] द्विधा।

निरुक्तिः —— ४७

परिकरः —— ४८

परिकराङ्कुरः —— ४९

परिणामः —— ५०

परिवृत्तिः —— ५१

परिसंख्या —— ५२

पर्यस्तापह्नुतिः —— ५३

पर्यायः —— ५४

... [illegible]

पर्यायोक्तं —— ५५

... [illegible]

पिहितं —— ५६

पुनरुक्तवदाभासः —— ५७

... [illegible] —— ५८

... [illegible]

प्रतिवस्तूपमा —— ५९

प्रतिषेधः —— ६०

प्रतीपं —— ६१

... [illegible]

... [illegible] —— ६२

... [illegible] —— ६३

... [illegible] —— ६४

... [illegible]

... [illegible] —— ६५

... [illegible] —— ६६

... [illegible] —— ६७

अल

तल्लक्षणानि

"ह्रेकापह्नुतिरन्यस्य शङ्कातस्तस्य निह्नवे"। ४१

"तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः"। ४२

"वर्ण्यानामितरेषां वा धर्म्मैक्यं तुल्ययोगिता"।

"हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता।
गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता"। ४३

"वदन्ति वर्ण्यावर्ण्यानां धर्म्मैक्यं दीपकं बुधाः"। ४४

"चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः"। ४५

"वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।
पदार्थगभाप्यन्ये वदन्त्यन्यां निदर्शनाम्॥
अपरां बोधनं प्राहुः क्रिययासत्सदर्थयोः"। ४६

"निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम्"। ४७

"अलङ्कारः परिकरः साभिप्रायविशेषणे"। ४८

"साभिप्रायविशेष्ये तु भवेत् परिकराङ्कुरः"। ४९

"परिणामः क्रियार्थश्चेद्विषयी विषयात्मना"। ५०

"परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः"। ५१

"परिसंख्या निषिध्यैकमेकस्मिन् वस्तुयन्त्रणम्"। ५२

"अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सा"। ५३

"पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः।
एकस्मिन् यद्यनेकं वा पर्याय सोऽपि सम्मतः"॥५४

"पर्यायोक्तं तु गम्यस्य वचोभङ्ग्यान्तराश्रयः।
पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनम्"॥ ५५

"पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितम्"। ५६

"आपाततो यदर्थस्य पौनरुक्त्यावभासनम्।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः"॥ ५७

"... [illegible] पूर्वरूपमुदाहृतम्।
... [illegible] विकृते सति वस्तुनि"॥ ५८

"वाक्यार्थयोः सामान्ये प्रतिवस्तूपमा मता"। ५९

"प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनम्"। ६०

"प्रसिद्धस्योपमानस्याप्युपमेयत्वकल्पनम्।
... [illegible] तत्॥
... [illegible]
... [illegible] तत्॥
... [illegible] मन्यते"। ६१

"... [illegible]"। ६२

"... [illegible]"। ६३

"... [illegible]
... [illegible]
... [illegible]"॥६४

"... [illegible]"। ६५

"... [illegible]"। ६६

"... [illegible]
... [illegible]"॥६७

अल

तदुदाहरणानि

"प्रजल्पन् मत्पदे लग्नः कान्तः किं नहि नूपुरः।

"पद्मरागायते नासामौक्तिकं तेऽधरत्विषा।

"सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च।
त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते।
मालतीशशभृल्लेखा कदलीनां कठोरता।
प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया।
लोकपालो यमः पाशी श्रीदः शक्रो भवान्"

"मदेन भाति कलभः प्रतापेन महीपतिः"।

"... [illegible]

"या दातुः सौम्यता केयं पूर्णेन्दोः ... [illegible]
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः।
... [illegible] विरोधीति ... [illegible]

"ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्।

"सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः"।

"चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः"॥

"प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा"॥

"यस्यानेकां शरं मुक्त्वा कटाक्षान् स रिपुश्रियः"

"स्वच्छन्दः प्रदीपेषु न सान्तेषु ... [illegible]"।

"नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम्"

"पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनप्रभा।
अधुना पुलिनं तत्र यत्र स्रोतः पुराऽभवत्"॥
समस्तमेव हतो येन सुधा ... [illegible]
यामि चूतलता हर्तुं ... [illegible]

"प्रिये समागते प्रातः कान्ता ... [illegible]

"भुजङ्गकुण्डलीव्यक्तशशिशुभ्रांशुशीतगुः।
जगन्त्यपि सदा पायादव्याच्चेतोहरः शिवः।
... [illegible] प्रियतमः ... [illegible]
दीपे निर्व्वापितेऽप्यासीत् ... [illegible]

"तापेन भ्राजते सूर्यः शूरश्चापेन राजते"॥

"न चूतमेतत् ... [illegible]

"तल्लोचनसमं पद्मं ... [illegible]
अपं गर्व्वंय ते ... [illegible]
... [illegible]
... [illegible] मुखादि ... [illegible]
... [illegible]

"... [illegible]

"... [illegible]

"... [illegible]
... [illegible]
... [illegible]

"... [illegible]

"... [illegible]

"... [illegible]
... [illegible] अर्थे"। ६७

अलङ्कारनामानि	लक्षणानि	तदुदाहरणानि
…तिशयोक्तिः —— ६८	"भेदकातिशयोक्तिः स्यात् तस्यैवान्यत्वकल्पनं" । ६८	"अन्यदेवास्य गाम्भीर्यमन्यद्धैर्य्यञ्च भूपतेः" ॥ ६८
…पह्नुतिः —— ६९	"भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे" । ६९	"तापं करोति सौत्यं ज्वरः किन्नु सखि स्मरः" ॥६९
…मान् —— ७०	"स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयं" । ७०	"अयं प्रमत्तो मधुपस्त्वन्मुखं वेत्ति पङ्कजं" ॥ ७०
…दीपकं —— ७१	"दीपकैकावलीयोगान्मालादीपकमुच्यते" । ७१	"स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः" ॥७१
…ध्यवसितिः —— ७२	"किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं" ।७२	"मिथ्याध्यवसितिर्व्वेश्यां वशयेत् खस्रजं वहन्" ॥७२
…तं —— ७३	"मीलितं यदि सादृश्याद्भेद एव न दृश्यते" । ७३	"रसो नालक्षि लाक्षायाश्चरणे सहजारुणे" ॥ ७३
—— ७४	"सूक्ष्मार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः" । ७४	"नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा" ॥ ७४
…रियं —— ७५	"यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः" । ७५	"शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय" ॥ ७५
—— ७६	"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः । क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते" । ७६	"नवपलाशपलाशवनं पुरःस्फुटपरागपरागतपङ्कजं । मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सु- मनोभरैः" ॥ ७६
—— ७७	"युक्तिः परातिसन्धानं क्रियया मर्म्मगुप्तये" । ७७	"त्वामालिखन्ति दृष्ट्वान्यं धनुः पौष्पं करेऽलिखत्" ॥७७
…णी —— ७८	"क्रमिकप्रकृतार्थानां न्यासं रत्नावलीं विदुः" । ७८	"चतुरास्यः पतिर्लक्ष्म्याः सर्व्वज्ञस्त्वं महीपते" ॥ ७८
… —— ७९ …द्विविधं । अभेदरूपकं । ताद्रूप्यरूपकञ्च । समन्यूनाधिक्यकथनद्वारा प्रत्येकं त्रिविधं । …भेदरूपकं । न्यूनाभेदरूपकं । अधिकाभेद- …कं । समताद्रूप्यरूपकं । न्यूनताद्रूप्यरूपकं । …कताद्रूप्यरूपकं । एतेन षड्विधं ।	"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्" । "रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः" ॥७९	"अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् । अयमास्ते विना शम्भुस्तार्त्तीयीकं विलोचनं ॥ शम्भुर्व्विश्वमवत्वद्य स्वीकृत्य समदृष्टितां । अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥ साध्वीयमपरा लक्ष्मीरसुधासागरोत्थिता । अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते" ॥७९
…कातिशयोक्तिः —— ८०	"रूपकातिशयोक्तिः स्यात् निगीर्य्याध्यवसानतः" । अस्यार्थः । विषयसम्बन्धेन उल्लेखनं विना विषयिवाचकशब्देन ग्रहणं विषयनिगरणं तत्पूर्व्वकं विषयस्य विषयिरूपतया अध्यवसानं तस्मिन् सति रूपकातिशयोक्तिः" । ८०	पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति सिताः शराः" ॥८०
…तं —— ८१	"प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनं" । ८१	"ललितं निर्गते नीरे सेतुमेषा चिकीर्षति" ॥ ८१
…पमा —— ८२ …ष्टधा । वाचकलुप्ता । धर्म्मलुप्ता । उपमान- । । धर्म्मवाचकलुप्ता । वाचकोपमेयलुप्ता । …कोपमानलुप्ता । धर्म्मोपमानलुप्ता । धर्म्मो- …नवाचकलुप्ता ।	"वर्ण्योपमानधर्म्माणामुपमावाचकस्य च । एकद्वित्र्यनुपादानात् भिन्ना लुप्तोपमाष्टधा" ॥ ८२	"तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम । कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ॥ यत् त्वया मेलनं तत्र लाभो मे यश्च तद्रतेः । तदेतत् काकतालीयमवितर्कितसम्भवं" ॥ ८२
…ः —— ८३	"लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं" । ८३	"अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु । "शुक पञ्जरबन्धस्ते मधुराणां गिरां फलं" ॥ ८३
…कोक्तिः —— ८४	"लोकप्रवादानुकृतिं लोकोक्तिरिति कथ्यते" । ८४	"सहस्व कतिचिन्मासान्मीलयित्वा विलोचने" ॥ ८४
…रोक्तिः —— ८५	"वक्रोक्तिः श्लेषकाकुभ्यामपूर्व्वार्थप्रकल्पनं" । ८५	"मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके" ॥८५
…कल्पः —— ८६	"विरोधे तुल्यबलयोर्व्विकल्पालङ्कृतिर्म्मता" । ८६	"सद्यः शिरांसि चापान् वा नमयन्तु महीभुजः" ॥८६
…कस्वरः —— ८७	"यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः" ॥८७	"स न जिग्ये महान्तो हि दुर्द्धर्षाः सागरा इव" ॥ ८७
…चित्रं —— ८८	"विचित्रं तत्प्रयत्नश्चेत् विपरीतफलेच्छया" । ८८	"नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिं" ॥८८
…धिः —— ८९	"सिद्धस्यैव विधानं यत्तामाहुर्व्विध्यलङ्कृतिं" । ८९	"पञ्चमोदञ्चने काले कोकिलः कोकिलोऽभवत्" ॥८९
…नोक्तिः —— ९० …भेदेन सा द्विविधा ।	"विनोक्तिः स्याद्विना किञ्चित् प्रस्तुतं हीनमुच्यते । तच्चेत् किञ्चिद्विना रम्यं विनोक्तिः सापि कथ्यते" ॥९०	"विद्या हृद्यापि सा विद्या विना विनयसम्पदं । विना खलैर्व्विभात्येषा राजेन्द्र भवतः सभा" ॥ ९०
…भावना —— ९१ …स्या लक्षणान्युदाहरणानि च षट् ।	"विभावना विनापि स्यात्कारणं कार्य्यजन्म चेत् । हेतूनामसमग्रत्वे कार्य्योत्पत्तिश्च सा मता ॥ कार्य्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके । अकारणात् कार्य्यजन्म चतुर्थी स्याद्विभावना ॥ विरुद्धात् कार्य्यसम्पत्तिर्दृष्टा काचिद्विभावना । कार्य्यात् कारणजन्मापि दृष्टा काचिद्विभावना" ॥९१	"अपलाक्तारसासिक्तं रक्तं ते चरणद्वयं । अस्त्रैरतीक्ष्णकठिनैर्ज्जगज्जयति मन्मथः ॥ नरेन्द्रानेव ते राजन् दशत्यसिभुजङ्गमः । शङ्खाद्वीणानिनादोऽयमुदेति महदद्भुतः ॥ शीतांशुकिरणास्तन्वीं हन्त सन्तापयन्ति तां । यशःपयोराशिरभूत् करकल्पतरोस्तव" ॥ ९१
…रोधः —— ९२ …दशधा ।	"जातिश्चतुर्भिर्ज्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः । क्रिया क्रियाद्रव्याभ्यां यत् द्रव्यं द्रव्येण वा मिथः । विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः" ॥ ९२	"तव विरहे मलयमरुद्दावानलः शशिरुचोऽपि सोष्मणः । हृदयमलिरुतमपि भिन्ते नलिनी- दलमपि निदाघरविरस्याः ॥ [illegible]

अथालङ्कारनामानि	तल्लक्षणानि	तदुदाहरणानि।
		कठिनाः सन्ति भवति यत्र
		यजस्य प्रकृतो नम्र निरीक्ष्य
		पतो नागरकस्य यायार्थे वेद इस्तः।
		मङ्गसङ्गेन विना हरिणचक्षुः।
		आनिर्विष्वज्वालाकुलो भवेत्।
		मागसदृश्यापि दुष्प्रापं। कुर्वन्
		मदयति हृदयं दुनोति च मे"। ९२
विरोधाभासः —९३	"आभासत्वे विरोधस्य विरोधाभास इष्यते"। ९३	"विनापि तन्वि हारेण वक्षोजौ
विवृतोक्तिः —९४	"विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि"। ९४	"वृषापेहि परक्षेत्रादिति वक्ति स सूचनं"
विशेषः —९५	"विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं।	"गते सूर्य्येऽपि दीपस्थास्तमश्छिन्दन्ति तक
स त्रिविधः।	विशेषः सोऽपि यदेकं वस्त्वनेकत्र वर्ण्यते।	अन्तर्बहिः पुरः पश्चात् सर्वदिक्ष्वपि सैव
	किञ्चिदारम्भतोऽशक्यवस्त्वन्तरकृतिश्च सः"। ९५	त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं
विशेषोक्तिः —९६	"कार्य्याजनिर्विशेषोक्तिः सति पुष्कलकारणे"। ९६	"हृदि स्नेहक्षयो नाभूत्
विषमं —९७	"विषमं वर्ण्यते यत्र घटनाननुरूपयोः।	"क्वेयं शिरीषमृद्वङ्गी क्व तावन्मदनज्वरः।
तत् त्रिविधं।	विरूपकार्य्यस्योत्पत्तिरपरं विषमं मतं।	कीर्त्तिं प्रसूते धवलां श्यामा तव कृपाणिका
	अनिष्टस्याप्यवाप्तिश्चेत्तदिष्टार्थसमुद्यमात्"। ९७	भक्ष्याशया हि मञ्जूषां दृष्ट्वाखुस्तेन भक्षितः
विषादनं —९८	"इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनं"। ९८	"दीपमुद्दीपयेद्यावत्तावन्निर्वाण एव सः"।
व्याघातः —९९	"स्याद्व्याघातोऽन्यथाकारि तथाकारि क्रियेत चेत्।	"यैर्जगत् प्रीयते हन्ति तैरेव कुसुमैः स्मरः
स द्विविधः।	सौकार्य्येण निबद्धापि क्रियाकार्य्यविरोधिनः"। ९९	दया चेद्बाल इति मय्यपरित्याज्य एव ते"।
व्याजनिन्दा —१००	"निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते"।१००	"विधे स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः"
व्याजस्तुतिः —१०१	"उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः"।१०१	"कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवं।
स द्विविधः।		साधु दूति पुनः साधु कर्त्तव्यं किमतः परं
		यन्मदर्थे विलूनासि दन्तैरपि नखैरपि"।
व्याजोक्तिः —१०२	"व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनं"। १०२	"सखि पश्य गृहारामपरागैरस्मि धूसरा"।
व्यतिरेकः —१०३	"व्यतिरेको विशेषश्चेदुपमानोपमेययोः"। १०३	"शैला इवोन्नताः सन्तु किन्तु प्रकृतिकोमलाः"।
शुद्धापह्नुतिः —१०४	"शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः"। १०४	"नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहं"।
श्लेषः —१०५	"नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रयः"। १०५	"सर्वदो माधवः पायात्
स च त्रिविधः। प्रस्तुतानेकविषयः १ अप्रस्तुतानेकविषयः २ प्रस्तुताप्रस्तुतानेकविषयः ३।		अब्जेन त्वन्मुखं तुल्यं हरिणा हतशक्तिना।
		उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः"।
सदर्थनिदर्शना —१०६	"विभावनं सम्पदाना फलं सुहृदनुग्रहः"। १०६	"उदयन्नेव सविता पद्मेष्वर्पयति श्रियं"।१०६
सन्देहः —१०७	"स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयं"।१०७	"पङ्कजं वा सुधांशुर्वेत्यस्माकन्तु न निर्णयः"।
समं —१०८	"समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः।	"स्वानुरूपं कृतं सद्म हारेण कुचमण्डलं।
तत् त्रिविधं।	सारूप्यमपि कार्य्यस्य कारणेन समं विदुः।	नीचप्रवणता लक्ष्मि जलजायास्तवोचिता।
	विना यत्नेन तत्सिद्धिर्यद्यर्थः कर्त्तुमुद्यमः"। १०८	युक्तो वारणलाभोऽयं भूपतेर्वारणार्थिनः"।
समाधिः —१०९	"समाधिः कार्य्यसौकर्य्यं कारणान्तरसन्निधेः"। १०९	"[illegible]
समासोक्तिः —११०	"समासोक्तिः परिस्फूर्त्तिः प्रस्तुते प्रस्तुतस्य चेत्"।११०	"अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः"।
समुच्चयः —१११	"बहूनां युगपद्भाजां भावगुम्फः समुच्चयः।	"नश्यन्ति पश्चात् पश्यन्ति
स द्विविधः।	अहंप्रथमिकाभाजामेककार्य्यान्वयोऽपि सः"।१११	… धनश्च मदयन्तु"।१११
सम्बन्धातिशयोक्तिः —११२	"सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनं।	"सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलं
रूपकभेदेन सा द्विधा।	योगेऽप्ययोगसम्बन्धातिशयोक्तिरितीर्य्यते"। ११२	त्वयि दातरि राजेन्द्र स्वर्द्रुमान्नाद्रियामहे
सम्भावनं —११३	"सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये"। ११३	"यदि शेषोऽभवद्वक्ता कथिता स्युर्गुणास्तव"।
सहोक्तिः —११४	"सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः"। ११४	"दिगन्तमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह"।
सामान्यं —११५	"सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः"। ११५	"मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः।
		अविभाव्याः सुखं यान्ति चन्द्रिकास्वभिसारिकाः"
सारः —११६	"उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते"। ११६	"मधुरं मधु पीयूषं तस्मात् तस्मात् कवेर्वचः"।
सूक्ष्मं —११७	"सूक्ष्मं पराशयाभिज्ञे तरसाकूतचेष्टितं"। ११७	"मयि पश्यति सा केशैः सीमन्तमणिमावृणोत्"
छेकोक्तिः —११८	"छेकोक्तिर्यदि लोकोक्तिः स्यादर्थान्तरगर्भिता"। ११८	"भुजङ्ग एव जानीते भुजङ्गचरणं सखे"। ११८
स्वभावोक्तिः —११९	"स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं"। ११९	"कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैः समीक्ष्यते"। ११९

अलङ्कारनामानि	तल्लक्षणानि	तदुदाहरणानि
तिमान् ——————१२०	"स्यात् स्मृतिमान्तिमन्देहैस्तदङ्कालङ्कृतिवदं" ।१२०	"पङ्कजं पश्यतः कान्ता मुखं मे गाहते मनः" ॥१२०
तुः ——————१२१	"हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते । हेतुर्हेतुमतोरैक्यवर्णनं हेतुरुच्यते" । १२१	"असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवां ॥ लक्ष्मीविलासो विदुषां कटाक्षावेङ्कटप्रभोः" ॥१२१
द्विविधः ।		
लपह्नुतिः ——————१२२	"गुह्यापह्नुतिरन्यस्यारोपार्थं धर्मनिह्नवः । स एव युक्तिपूर्व्वश्चेदुच्यते हेत्वपह्नुतिः" । १२२	"नेन्दुस्तीव्रो न निश्यर्कः सिन्धोरौर्व्वोऽयमुत्थितः" ॥ १२२

…ङ्क्रिया, स्त्री, (अलम् + कृ + भावे श ।) भूषणकर्म । तत्पर्य्यायः । भूषा २ । इत्यमरः ॥

…कृतः, त्रि, (अलम् + कृ + कर्म्मणि क्तः ।) अलङ्कृतः । तत्पर्य्यायः । भूषितः २ प्रसाधितः ३ परिष्कृतः ४ मण्डितः ५ । इत्यमरः ॥ "अलङ्कृतं जनाकीर्णं विविधैर्वाहनावृतम्" । इति महाभारते ।)

…रः, पुं, (अलम् + कृ + अच् ।) भूषणमध्यमाभरणमात्रं । आला इति ख्यातः । तत्पर्य्यायः । …ङ्कारः २ मण्डितं ३ । इत्यमरटीकायां भरतः ॥

…तिः, पुं, (अल + वाङ्मयकात् अतिच् ।) गीतविशेषः । इत्युणादिकोषः ॥

…धूमः, पुं, (अलसत्वधी धूमः ।) धूमसमूहः । इति जटाधरः ॥

…, अव्य, भूषणं । पूर्णता । सामर्थ्यं । निषेधः । इत्यमरः ॥ निरर्थकं । इति भरतः ॥

…म्बुषः, पुं, (अलं पुष्णाति, पुष + क, पृषोदरादित्वात् मस्य बः ।) प्रहस्तः । वमनं । राक्षसविशेषः ॥ इति मेदिनी ॥ (कुरुक्षेत्रयुद्धे कौरवाणां पक्षीयः स्वनामख्यातो राक्षसः ।
"सात्यकिश्चापि संक्रुद्धो राक्षसं क्रूरमाहवे ।
अलम्बुषं शरैर्घोरैर्विव्याध बलिनां बली" ॥
इति महाभारते ।)

अलम्बुषा, स्त्री, (अलं पुष्णाति, पुष + क, मस्य बः, ततः स्त्रियां टाप् ।) मुण्डीरी । स्वर्गवेश्याभेदः । इति मेदिनी ॥
"अलम्बुषा मिश्रकेशी पुण्डरीका तिलोत्तमा ।
सुरूपा लक्षणा क्षेमा तथा रम्भा मनोरमा" ॥
इति महाभारते ।) अन्यप्रवेशवारणार्थदत्तरेखादिः ॥ लज्जालुभेदः । तत्पर्य्यायः । खरत्वक् २ मेदः ३ गला ४ । अस्या गुणाः । लघुत्वं । स्वादुत्वं । क्रिमिपित्तकफनाशित्वञ्च । इति राजनिर्घण्टः ॥ (भावप्रकाशस्य ॥
"अलम्बुषा गोक्षुरकं त्रिफला नागरा मृताः ।
यथोत्तरं भागवृद्ध्या श्यामाचूर्णन्तु तत्समं ॥
पिबेन्मस्तुसुरातक्रकाञ्जिकोष्णोदकेन वा ।
मीतं जयत्यामवातं सशोथं वातशोणितं ॥
त्रिकजानूरुसन्धिस्थं ज्वरारोचकनाशनं ।
पथ्यान्तधान्यस्त्रिफला भागवृद्धावयं क्रमः" ॥ * ॥
अलम्बुषाद्यं चूर्णम् ॥ * ॥ इति वैद्यकचक्रपाणिसंग्रहः ॥
"अलम्बुषा गोक्षुरकं मूलं वरुणकस्य च ।
गुडूची नागरश्चेति समभागानि कारयेत् ॥
काञ्जिकेन तु तत्पेयं विडालपदमात्रकं ।
आमवाते प्रवृद्धे च योगोऽयममृतोपमः ॥ * ॥
अपरालम्बुषाद्यं चूर्णं ॥ * ॥ इति च भावप्रकाशे ॥)

अलर्कः, पुं, (अलमर्क्यते अर्च्यते वा, अर्क + अच्, अर्च + घञ् वा ।) क्षिप्तकुक्कुरः । ("आलर्कं विषमिव सर्व्वतः प्रसृप्तम्" । इति उत्तरचरिते ।) श्वेतार्कवृक्षः । श्वादा आकन्द इति भाषा । (अस्य पर्य्यायान्तरं गुणान्तरञ्च यथा—
"अलर्को गणरूपः स्यान्मन्दारो वसुकोऽपि च ।
श्वेतपुष्पः सदापुष्पः सबालार्कः प्रतापसः ॥
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः ।
रक्तपुष्पः शुक्लफलस्तथास्फोटः प्रकीर्त्तितः ॥
अर्कद्वयं सरं वातकुष्ठकण्डूविषव्रणान् ।
निहन्ति प्लीहगुल्मार्शःश्लेष्मोदरशकृत्क्रिमीन् ॥
अलर्ककुसुमं वृष्यं लघुदीपनपाचनं ।
अरोचकप्रसेकार्शःकासश्वासनिवारणम्" ॥
इति भावप्रकाशः ॥
"दुष्टकर्दमसंस्पर्शात् कण्डूक्लेदान्वितान्तराः" ।
अङ्गुल्योऽलस मित्याङ्गः ॥ इति वाभटः ॥)
तत्पर्य्यायः । प्रतापसः २ राजार्कः ३ गणरूपी ४ । इति रत्नमालामरौ ॥ शूकराकाराष्टपादतीक्ष्णदन्तसूच्याकृतिलोमजन्तुविशेषः । दंशनामासुरो भृगुशापात् अयं जन्तुर्भूत्वा कर्णस्योरू भित्त्वा परशुरामदृष्टिपातात् शापमुक्तः पूर्व्वरूपो बभूव । इति महाभारते राजधर्म्मे ॥
("ददर्श रामस्तं चापि कृमिं शूकरसन्निभं ।
अष्टपादं तीक्ष्णदंष्ट्रं सूचीभिरिव संवृतं ॥
रोमभिः संनिरुद्धाङ्गमलर्कं नाम नामतः ।
सोऽब्रवीदहमासं प्राग्दंशो नाम महासुरः ।
पुरा देवयुगे तात ! भृगोस्तुल्यवया इव ।
सोऽहं भृगोः सुदयितां भार्य्यामपहरं बलात् ॥
महर्षेरभिशापेन कृमिभूतोऽपतं भुवि" ।
स्वनामख्यातो नृपतिः ।
"शैब्यः श्येनकपोतीये स्वमांसं पक्षिणे ददौ ।
अलर्कश्चक्षुषी दत्त्वा जगाम गतिमुत्तमाम्" ॥
इति रामायणे । स्वनामख्यातः काशिराजः, स हि वत्सराजस्य पुत्रः सन्नतेश्च पिता, यथा हरिवंशे,—
"वत्सपुत्त्रस्त्वलर्कस्तु सन्नतिस्तस्य चात्मजः ।
अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसङ्गरः ॥
षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च ।
तस्यासीत् समहद्राज्यं रूपयौवनशालिनः" ।)

अलले, अव्य, पिशाचभाषाया सम्बोधनं । तत्पर्य्यायः । अले २ अलले ३ । इति शब्दरत्नावली ॥

अलवालं, क्ली, (लवमाप्नोति, आ + क, ततो नञ्समासः ।) आलवालं । वृक्षमूले जलधारणार्थं स्थानादिः । चारमादा इति ख्यातः । इत्यमरटीकायां भरतादयः ॥

अलवालकं, क्ली, (अलवाल एव, अलवाल + स्वार्थे कन् ।) आलवालं । इति शब्दरत्नावली ॥

अलसः, त्रि, (न लसति व्याप्रियते, लस + अच् ।) आलस्ययुक्तः । आलुस्या इति भाषा । तत्पर्य्यायः । मन्दः २ तुन्दपरिमृजः ३ आलस्यः ४ शीतकः ५ अनुष्णः ६ । इत्यमरः ॥ शीतलः ७ कुण्ठः ८ मुखनिरीक्षकः ९ । इति शब्दरत्नावली ॥ (क्रियामन्दः । क्रियाजड़ः । अवश्यकर्त्तव्येषु अप्रवृत्तिशीलः । "अव्यवसायिनमलसं दैवपरं साहसाच्च परिहीनं । प्रमदेव वृद्धपतिं नेच्छत्युपगूहितुं लक्ष्मीः" । इति हितोपदेशे ।)

अलसः, पुं, (लस + अच्, ततो नञ्समासः ।) वृक्षविशेषः । पादरोगभेदः । इति मेदिनी ॥ पाँकुइ इति भाषा । तस्य निदानरूपे ।
"क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ ।
दुष्टकर्दमसंस्पर्शादलसं तं विभावयेत्" ॥
अलसं कादई इति लोके । अथ तस्य चिकित्सा ।
"पादौ सिक्तारनालेन लेपनं त्वलसे हितं ।
पटोलकुलटीनिम्बरोचनामरिचैस्तिलैः ॥
सुद्धाखरससिद्धेन कटुतैलेन लेपयेत् ।
ततः कासीसकुलटीतिलचूर्णैर्विचूर्णयेत्" ॥
अवधूलयेत् ।
"करञ्जबीजं रजनी कासीसं पद्मकं मधु ।
रोचना हरितालञ्च लेपोऽयमलसे हितः" ॥
इति भावप्रकाशः ॥ ("दुष्टकर्दमसंस्पर्शात् कण्डूक्लेदान्वितान्तराः । अङ्गुल्योऽलसमित्याङ्गः" ॥ इति वाभटः ॥)

अलसकः, पुं, (न लसन्ति अनेन, लस + करणे वुन् ।) उदररोगविशेषः । इति माधवकरः ॥ तस्य रूपं ।
"कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति ।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥
वातवर्च्चोनिरोधश्च यस्यात्यर्थं भवेदपि ।
तस्यालसकमाचष्टे तृष्णोद्गारौ तु यस्य च" ॥
तन्त्रान्तरे ।
"प्रयाति नोर्द्ध्वं नाधस्तादाहारो न च पच्यते ।
आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः" ॥
अस्य लक्षणं चिकित्सा च अजीर्णशब्दे द्रष्टव्या ॥ (अलसकमुपदिश्य स दुर्बलस्याल्पाग्नेर्बहुश्लेष्मणो वातमूत्रपुरीषवेगविधारिणः स्थिरगुरुबहुरूक्ष-

'अलिनिमालिनि माधवयोषिताम्''।
ति माघः।) हस्तिकः। इति मेदिनी ॥
कं, क्ली, (अल + ईकन्।) अप्रियं। (''तदाथा
महाराजो नालीकमधिगच्छति''। इति
माटके।) मिथ्या। इत्यमरः॥ (''यातेऽलीकनि-
मीलिते नयनयोः''। इति अमरुशतके।) भर्गः।
ति मेदिनी। ललाटं। इति हेमचन्द्रः॥
कं, त्रि, (अल + ईकन्।) मिथ्या। अप्रियं।
त्यं। इति शब्दरत्नावली॥
अमत्स्यः, पुं, अङ्गारमिश्रतिलतैलमत्स्यमाषपिष्टं।
प्रमाणं राजनिर्घण्टे यथा।
नाषपिष्टिकया लिप्तनागवल्लीदलैर्मृदु।
सु संवेदयेद्युक्त्या स्थाल्यामङ्गारकोपरि॥
शो लिप्ताश्रितं खण्डं तिलतैलेन भर्ज्जयेत्।
लोकमत्स्य उक्तोऽयं प्रकारः पाकपण्डितैः॥
वृन्ताकभटित्रेण वास्तुकेन च भक्षयेत्॥''
, स्त्री, (अल + उन्।) आलुः। क्षुद्रकलसी।
अमरटीकायां रमानाथः॥
नः, त्रि, (लुभ + क्तः, नञ्समासः।) लोभ-
रहितः। यथा मनुः।
कोऽप्यलुब्धः साक्षी स्यात् बह्वः शुच्योऽपि न
स्त्रियः। स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये
ताः'' ॥
एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृत-
ठः।'' इति व्यवहारतत्त्वं॥
'अलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः'।
ति कादम्बरी।)
ध, पिशाचभाषया सम्बोधनं। इति शब्द-
नावली॥
ति, ध, पिशाचभाषया सम्बोधनं। इति शब्द-
नावली॥
भः, पुं, (न लोभः, अभावे नञ्।) लोभाभावः।
था,—
इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
लोभ इति मार्गोऽयं धर्म्मस्याष्टविधः स्मृतः''॥
ति महाभारतं॥
भी, [न्] त्रि, (लोभोऽस्त्यस्य इति लोभी, न
लोभी इति नञ्समासः।) लोभशून्यव्यक्तिः।
नास्ति लोभो यस्य इति बहुव्रीहिसमासादिन्-
प्रत्ययनिष्पन्नः॥
हितं, क्ली, (न लोहितं, नास्ति लोहितं यस्मात्
इति वा।) रक्तपद्मं। इति रत्नमाला॥
लौकिकः, त्रि, (लोके विदितः, लोक + ठक्
ततो नञ्समासः।) लौकिकप्रत्यक्षाविषयः। अमा,
नुषिकः। लोकातीतः। यथा,—

> ''अलौकिकत्वादमरः स्वकोषे
> न यानि नामानि समुल्लिलेख।
> विलोक्य तैरप्यधुना प्रचार-
> मयं प्रयत्नः पुरुषोत्तमस्य''॥

इति त्रिकाण्डशेषद्वितीयश्लोकः॥
(''उपसंहर विश्वात्मन्नदोरूपमलौकिकम्''।
इति भागवतपुराणम्।)

अल्पं, त्रि, (अल् + प।) किञ्चित्। तत्पर्य्यायः। ईषत्
२ मनाक् ३ स्तोकं ४।
(''अल्पोऽप्येवं महान् वापि विभवश्चावदेश गः''।
इति मनुः।) क्षुल्लकं ५ सूक्ष्मं ६ दभ्रं ० कृशं ८
तनुः ९ तनूः १० त्रुटिः ११ त्रुटी १२ मात्रा १३
लवः १४ लेशः १५ मात्रः १६ कणी १७ कणिका
१८ अणुः १९ श्लक्ष्णं २०। इत्यमरः॥ क्षुद्रं २१
क्षुल्लकं २२ खल्लं २३ कला २४। इति शब्दरत्नावली।
(अतिसामान्यः।

> . ''अल्पस्य हेतोर्बहु हातुमिच्छन्
> विचारमूढः प्रतिभासि मे त्वम्''।

इति रघुवंशे। संक्षिप्तं। अदीर्घं।

> ''अनन्तपारं किल शब्दशास्त्रं,
> स्वल्पं तथायुर्बहवश्च विघ्नाः''।

इति पञ्चतन्त्रम्।)
अल्पकः, पुं, (अल्प एव, अल्प + स्वार्थे कन्।)
यवासवृक्षः। इति राजनिर्घण्टः॥ अस्य गुणाः॥
''यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः।
कफमेदोमदभ्रान्तिपित्तासृक्कुष्ठकासजित्॥
तृष्णाविसर्पवातास्रवमिज्वरहरः स्मृतः।
यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा''॥
इति भावप्रकाशः।) (स्वल्पपरिमितः। किञ्चित्।
''यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीड़ां तदा सन्धिं समाश्रयेत्''॥
इति मनुः।)
अल्पकेशी, स्त्री, (अल्पः केश इव पत्रमस्याः सा।)
भूतकेशीवृक्षः। इति रत्नमाला॥
अल्पगन्धं, क्ली (अल्पो गन्धो यस्य तत्।) रक्तकैरवं।
इति रत्नमाला॥
अल्पतनुः, त्रि, (अल्पा क्षुद्रापरिमाणा तनुर्यस्य।)
खर्व्वः। दुर्व्वलः। अल्पास्थियुक्तः। क्षुद्रदेहवान्
तत्पर्य्यायः। पृश्निः २। इत्यमरः॥
अल्पपत्रः, पुं, (अल्पं पत्रं यस्य सः।) क्षुद्रपत्रतुलसी।
इति रत्नमाला॥
अल्पपद्मं, क्ली, (अल्पमसम्पूर्णं पद्मं।) रक्तपद्मं। इति
रत्नमाला॥
अल्पप्रमाणकः, पुं, (अल्पं प्रमाणमस्य, वा कन्।)
चेलानं। इति रत्नमाला॥ चेलो चेला तरमूज
इति ख्यातः। खरमूज इति केचित्।
अल्पमारिषः, पुं, (अल्पः क्षुद्रः मारिषः नटिया इति
ख्यातः शाकः, कर्म्मधारयः।) शाकविशेषः।
क्षुद्रनटिया इति ख्यातः। तत्पर्य्यायः तण्डुलीयः २।
इत्यमरः॥ (तण्डुलीयशब्देऽस्य गुणा ज्ञेयाः।)
अल्पसरः, [स्] क्ली, (अल्पं क्षुद्रं सरः, कर्म्मधारयः।)
क्षुद्रसरोवरः। डोवा गेड़े इति भाषा। तत्-
पर्य्यायः। वेशन्तः २ पल्वलं ३। इत्यमरः॥
अल्पायुः, [स्] पुं, (अल्पं संक्षिप्तं आयुर्जीवनकालो
यस्य सः।) छागः। इति त्रिकाण्डशेषः॥ अचि-
रजीविते त्रि॥ (अदीर्घजीवी।
''दुराचारो हि पुरुषो लोके भवति निन्दितः।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च''।
इति मनुः।)

अल्पिष्ठः, त्रि, (अतिशयेन अल्पः, अल्प + इष्ठन्।
अत्यल्पं। इत्यमरः॥ [अत्यल्पं। इत्यमरः॥
अल्पीयः, [स्] (अतिशयेन अल्पः, अल्प ईयसुन्।)
अल्लः, पुं, (अल + क।)
अल्ला, स्त्री, (अल + क, स्त्रियां टाप्।) } परमेश्वरः।
एतन्नाम्ना यवना उपासन्ते। यथा। ''ॐ अस्मल्लां
इल्ले मित्रावरुणौ दिव्यानि धत्ते। इल्लल्ले वरुणो
राजा पुनर्द्ददुः। हयामि मित्रो इल्लां इल्लल्लेति
इल्लाल्लां वरुणो मित्रो तेजस्कामाः। होतारमिन्द्रो
होतारमिन्द्रो महासुरिन्द्राः। अल्लो ज्येष्ठं श्रेष्ठं
परमं पूर्णं ब्रह्माणमल्लां अल्लोरसुर महमदरकं
वरस्य अल्लो अल्लां आदल्लावुकमेककं। अल्लां
वुकं। निखातकं। अल्लो यज्ञेन हुतहुत्वः
अल्ला सूर्य्यचन्द्रसर्व्वनक्षत्राः अल्ला ऋषीणां स-
दिव्या इन्द्राय पूर्व्वं मायापरमन्त अन्तरिक्षाः।
अल्लो पृथिव्या अन्तरिक्षं विश्वरूपं दिव्यानि धत्ते
इल्लल्ले वरुणो राजा पुनर्द्ददुः। इल्लाकबर इल्ला-
कबर इल्लल्लेति इल्लाल्लाः इल्ला इल्लल्ला अनादि-
स्वरूपा अथर्व्वणी शाखां ह्रूं ह्रीं जनान् पशून्
सिद्धान् जलचरान् अदृष्टं कुरु कुरु फट्। असुर-
संहारिणीं ॐ अल्लो रसुरमहमदरकं वरस्य
अल्लो अल्लां इल्लल्लेति इल्लल्लः''। इत्याथर्व्वणसूक्तं।
अल्ला, स्त्री, (अल्यते इत्यल्, क्विप्, अलं भूषायै
लाति स्वीकरोति, ला + क।) नाथ्योक्तौ माता।
इति वोपदेवः॥ (अथर्व्ववेदे अल्लालेत्यादि-
ख्यातो यवनोपास्यः परमेश्वरः।)
अव रक्षणे। (यथायथं सकं-अकं-च, भ्वादिं-
परं-सेट्।) गतौ। कान्तौ। स्पृहायामिति
यावत्। प्रीतौ। तृप्तौ। द्युतौ। शोभायामिति
यावत्। श्रुतौ। आकर्णने इति यावत्। प्राप्तौ।
श्लेषे। आलिङ्गने इति यावत्। अर्थने। याचना-
यामिति यावत्। वेशे। प्रवेशे इति यावत्।
भावे। सत्तायामिति यावत्। वृद्धौ। ग्रहे।
आदाने इति यावत्। वधे। सामर्थ्ये। अवगमे।
कृतौ। करणे इति यावत्। कामे। इच्छोत्पादने
इति यावत्। (इति वोपदेवीयकविकल्पद्रुमः
तट्टीका च॥) ''अव रक्षे गतौ कान्तौ प्रीतौ तृप्तौ
द्युतौ श्रुतौ। प्राप्तौ श्लेषेऽर्थने वेशे भागे वृद्धौ
गृहे वधे। सामर्थ्येऽवगमे कामे कृतौ''। ऊन-
विंशतिरर्थाः। कान्तिरिच्छा। द्युतिः शोभा।
काम इति अन्तर्भावितण्यर्थत्वात् इच्छोत्पादना इति
भेदः। श्लेष आलिङ्गनं। सामर्थ्यं शक्तिः। रक्षणे
प्रसिद्धोऽयं। प्रीतौ तु। ''न मामवति सद्वीपा
रत्नसूरपि मेदिनी''। इति रघुः॥ अन्यत्र विरल-
प्रयोगः। केचित्तु स्तुति-भाग-गृह-काम-कृतीर्न
पठित्वा क्रिया-श्रवण-दहन-भावानाहुः। अवति।
इति दुर्गादासः॥
अव, अ, (अव + अच्।) उपसर्गविशेषः। अस्यार्थः।
निश्चयः। असाकल्यं। अनादरः। इति दुर्गादासः॥
आलम्बनं। विज्ञापनं। व्यापनं। शुद्धिः। अल्पं।
परिभवः। नियोगः। पालनं। इति शब्दरत्ना-
वली॥

इति देवीमाहात्म्यम् ॥

अवलिप्तता, स्त्री, (अवलिप्त+तल् भावे ।) अहङ्कारः । इति हेमचन्द्रः ॥ ("तेजस्विन्यवलिप्तता मुखरता वक्तर्य्यशक्तिः स्थिरे"। इति नीतिशतके ।)

अवलीढं, त्रि, (अव+लिह+क्त कर्म्मणि ।) भक्षितं। यथा मनु,—
"पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च" ।
इत्यादि । "पतत्रिणावलीढं काकादिना भक्षितं" ।
इत्याह्निकतत्त्वम् ॥

अवलीला, स्त्री, (अवरा लीला ।) हेला। अनायासः। यथा,—
"रतिश्च नूतनं प्राप्य विषतुल्यं पुरातनं।
कामं दृष्ट्वा हिनस्त्येव सोपायेनावलीलया" ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २२ अध्यायः ।
अपिच ।
"शूलञ्च अमघं धृत्वा पपात दानवोपरि ।
चकार भस्मसाच्चैव सरथञ्चावलीलया" ॥
इति च तत्रैव प्रकृतिखण्डे १८ अध्यायः ॥

अवलुण्ठनं, क्ली, (अव+लुठि+भावे ल्युट् ।) लुण्ठनं । लोटा गड़ागड़ी इतिभाषा । अवपूर्ब्बकलुठधातोरनट्प्रत्ययेन निष्पन्नं ॥

अवलेपः, पुं, (अव+लिप+भावे घञ् ।) अहङ्कारः । ("दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्" इति मेघदूते ।) लेपनं । दूषणं । इति मेदिनी ॥ सङ्गः । इति त्रिकाण्डशेषः ॥

अवलेपनं, क्ली, (अव+लिप्+ल्युट् भावे ।) विलेपनं । अवलम्बनं । माखा इति भाषा । अवपूर्ब्बकलिपधातोरनट् प्रत्ययेन निष्पन्नं ।

अवलेहः, पुं, (अवलिह्यते क्वाथादेः पुनः पाकात् घनीभूततया खाद्यते इति अव+लिह+कर्म्मणि घञ् ।) लेह्यौषधं । तस्य लक्षणं पर्य्यायश्च यथा,—
"क्वाथादेर्यत् पुनः पाकात् घनत्वं सारसक्रिया ।
सोऽवलेहश्च लेहश्च प्राक् इष्यते बुधैः" ।
("जिह्वालेह्यावलेहिका") इति च वैद्यकपरिभाषा । यथा,—
"कट्फलं पौष्करं शृङ्गी चोषं यासश्च कारवी ।
चूर्णं पूर्व्वोक्तं चैतन्मधुना सह लेहयेत् ॥
इत्यवलेहिका हन्ति सन्निपातं सुदारुणं ।
हिक्कां श्वासञ्च कासञ्च कण्ठरोगञ्च नाशयेत् ॥
ऊर्द्ध्वं चार्द्रके पूर्व्वमार्द्रकस्य रसैः" ।
तन्त्रान्तरे च उक्तं ।
"पटोलं मधुना लिह्यादार्द्रकस्य रसेन वा ।
कफमोहं दारुणं क्षुद्रान्तःश्वासकमन्वितम्" इति ।
"सर्व्वेषु सन्निपातेषु न चौद्रमवचारयेत् ।
शीतोपचारि चौद्रं स्यात्शीतञ्चात्र विरुध्यते" ॥
[illegible] सन्निपातज्वरेषु देहविदाहार्थं [illegible] उक्तं । तथाच[illegible] [illegible] निषेधेन । उष्णेन मधुना विरोध ।
[illegible]
"[illegible] विकारकरता मधु ।
[illegible] सन्निहन्ति यथा विषं" इति ।
शीतोपचारि चौद्रमिति । शीतेनोपचारोऽस्यास्तीति शीतोपचारि । शीतञ्चात्र सन्निपाते विरुध्यते । अयमवलेहः प्रायेणोर्द्ध्वजत्रुगतरोगहरत्वात् सायमुपयुज्यते । यत उक्तं चरकेण ।
"ऊर्द्ध्वं जत्रुगतघ्नी या सा सायमवलेहिका ।
अधोरोगहरी या सा भोजनात्प्राक् प्रयुज्यते" ।
पौष्करं पुष्करमूलं तदलाभे कुष्ठं देयं ॥
शृङ्गी कर्कटशृङ्गी । चोषं शुण्ठीपिप्पलीमरिचानि च । यासो यवासः । केचित् यासस्थाने यवानीं प्रक्षिपन्ति । कारवी मगरेला इति लोके । अष्टाङ्गावलेहिका ॥"॥
"छिन्नमामलकं पिष्ट्वा द्राक्षया सह मेलयेत् ।
विश्वभेषजसंयुक्तं मधुना सह लेहयेत् ॥
तेनास्य शाम्यति श्वासः कासो मूर्च्छाविवर्जितः" ॥
इत्यवलेहः ॥॥ अन्यत् यथा,—
"पिप्पलीं त्रिफलाञ्चापि सममागां ज्वरी लिहन् ।
मधुना सर्पिषा वापि कासी श्वासी सुखी भवेत् ॥
कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह ।
श्वासकासज्वरहरो लेहोऽयं कफनाशनः" ॥
चातुर्भद्रिका ॥॥
"कट्फलं पौष्करं शृङ्गी यवानी कारवी तथा ।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्यान्मधुना वा कफज्वरी ।
कासश्वासारुचिच्छर्द्दिश्लेष्मानिलनिवृत्तये" ॥
अष्टाङ्गावलेहः । इति भावप्रकाशः ॥
("क्वाथस्य स्यात् पुनः पाकात् घनत्वं सारसक्रिया ।
सोऽवलेहश्च लेहः स्यात् तन्मात्रा स्यात्पलोन्मिता ॥
सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुड़ः ।
द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः ॥
सुपक्वे तन्तुमत्त्वं स्यादवलेहेऽप्सु मज्जनं ।
स्थिरत्वं पीड़िते मुद्रा गन्धवर्णरसोद्भवः ॥
दुग्धमिक्षुरसं यूषं पञ्चमूलकषायकं ।
वासाक्वाथं यथायोग्यमनुपानं प्रशस्यते ॥॥
तदुदाहरणं । यथा,—
"कण्टकारीतुला नीर-द्रोणे पक्त्वा कषायकं ।
पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकाः ।
मुस्तं कर्कटशृङ्गी च त्र्यूषणं धन्वयासकं ॥
भार्गी रास्ना शठी चैव शर्करा पलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्याद्घृततैलयोः ॥
पक्त्वा लेहत्वमानीय शीते मधु पलाष्टकं ।
चतुष्पलं तु गोक्षीर्य्यां पिप्पलीनां चतुष्पलं ॥
क्षिप्त्वा निदध्यात् सुदृढे मृन्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कार्त्तिश्वासकासानशेषतः ॥
कण्टकार्य्यवलेहः ॥॥ इति च शार्ङ्गधरः ।)

अवलेहनं, क्ली, (अव+लिह्+भावे ल्युट् ।) लेहनं । जिह्वाद्वारा आस्वादनं । चाटन् इति भाषा । अवपूर्ब्बलिहधातोर्भावेऽनट्प्रत्ययेन निष्पन्नं ।

अवलोकनं, क्ली, (अव+लुक्+ल्युट् भावे ।) दर्शनं । आलोकनं । इति हेमचन्द्रः ॥
("[illegible]" ।
इति नाममाले ।)

अवलोकितः, पुं, (अव+[illegible] अर्थे अच् ।) [illegible]
मेदिन्यौ ॥

अवलोकितं, त्रि, (अव+[illegible] क्त ।) निरीक्षितं । दृष्टं । [illegible] प्रेक्षणक्रियायां, क्ली [illegible]

अवल्गुजः, पुं, ([illegible] वल्गु+जन्+ड ।) सोमराजी [illegible] वर्य्योमराजी । हाकुच [illegible] गुणाः । वायु-कफ-कुष्ठ [illegible] राजयक्ष्मा । अस्य विवरणं [illegible] द्रष्टव्यं ॥
("अवल्गुजादीजकर्षं पीत्वा
भोजनं सर्पिषा कार्य्यं [illegible]"
इति वैद्यकचक्रपाणिसंग्रहः ।)

अववादः, पुं, (अव+वद+घञ् ।) [illegible] विश्वासः । इति मेदिनी ॥

अवशः, त्रि, (न विद्यते [illegible] अवशीभूतः । विवशः ।
यथा,—
"प्रेताश्च बान्धवैर्मुक्तं प्रेतो भुङ्क्ते [illegible]
अतो न रोदि[illegible]"
इति शुद्धितत्त्वं ॥ (क्लीं, अवशं । [illegible]

अवशक्थिकः, त्रि, (अवबद्धे [illegible] वस्त्रादिद्वारा [illegible] पविष्टः । पाँड़बान्धिया वसा इति [illegible] कात्यायनः ।
"आसनारूढ़पादस्तु जानुनोर्ब्बाथ जङ्घयोः
कृतावशक्थिको यस्तु प्रौढपादः स [illegible]
आसनारूढ़पादः आसनारूढ़पादस्य [illegible]
भोर्ज्जंघयो[illegible]
जानुजङ्घाबन्धः । इत्याह्निकतत्त्वं ।

अवश्लिष्टः, त्रि, (अवश्लिष्यते इति कर्[illegible] क्त ।) श्लेषः । उदर्कं । अवश्लेषण[illegible] ।
"वल्मीकमूषिकोत्खाता
शौचावशिष्टा गेहाच्च नाददात्"
इत्याह्निकतत्त्वं ॥

अवश्यं, अ, (न वश्य ।) निश्चय । तत्पर्य्यायः । निश्चितं २ । इत्यमरः ॥
("अवश्यं याति तिर्य्यक्त्वं [illegible]"
इति मनुः ॥) (न+वश+यत् ।) [illegible]

अवश्यायः, स्त्री, (अव+श्यै+ण [illegible] कर्म्मः ।) कुज्झटिका । इति [illegible]
(कुज्झटिकाशब्देऽस्य विशेषो ज्ञेयः ।)

अवश्यायः, पु, (अवश्याय [illegible] गतौ+श्याद्यधेति ण । ततो [illegible] युक् ।) हिमं । इत्यमर ॥
("अवश्यायनिपातेन किञ्चित्प्रक्लिन्न[illegible]"
इति रामायणे ।) गर्व्वं । इति [illegible]

अवष्कयणी, स्त्री, वष्कयनी । चिरप्रसूता [illegible] भरटीकाया सारसुन्दरी ॥

अवष्टब्धं, त्रि, (अवष्टभ्यते स्म इति कर्म्मणि [illegible]

...ा क्तः। स्तम्भेः अवाचेति पः। अवा-
...न इति सूत्रेण आविदूर्य्ये स्तम्भेः पत्व-
...ादवष्टब्धशब्द आसन्नपर इति अयञ्चीना-
इत्यत्र मनोरमायां स्थितं।) अविदूरः।
...ं। अवलम्बितं। आश्रितं। इत्यमरः॥ बद्धः।
इति भरतः॥ आक्रान्तः। इति मेदिनी॥
..., पुं, (अव+ष्टम्भु रोधे इति+घञ्।
...।) स्वर्णं।
("रघोरवष्टम्भमयेन पत्रिणा
हृदि क्षतो गोत्रभिदप्यमर्षणः"।
...) इति मेदिनी॥
...अवंशे।) स्तम्भः। प्रारम्भः। इति मेदिनी॥
...। इति हलायुधः॥ (अवलम्बनं। वोधनम्।
...इता।)
..., स्त्री, (अव+स्तन् शब्दे+घञ्। षत्वञ्च।)
...। इति हेमचन्द्रः॥
..., व्य, (अवर+पूर्व्वाधरावराणामित्यसि-
..., तत्सन्नियोगेन अवरस्य अवादेशश्च।)
...कः। इति केचित्॥
..., पुं, (अव रक्षणादौ अवति इति अत्यवि-
...ादिना असच् प्रत्ययः।) राजा। सूर्य्यः।
सिद्धान्तकौमुदी॥
...ी, (अव+असिच् भावे।) रक्षणं। वैदिक-
...॥
...का, स्त्री, (अवसङ्के सक्थिनी यया बन्ध-
...या सा, अव+सक्थि+समासे षप्।) खट्टा।
...यः। पर्य्यस्तिका २ परिकरः ३ पर्य्यङ्कः ४।
...हेमचन्द्रः॥ (पर्य्यङ्कबन्धः। वस्त्रादिद्वारा पृष्ठ-
...दृढबन्धनपूर्व्वकोपवेशनं। यथा,—
...जानुनोर्दृढयोक्तयु
...ढपादस्तु ...
...सक्थिको यस्तु प्रौढ़पादः स उच्य...
...ात्यायनः।
...नः प्रौढ़पादश्च कृत्वा चैवावसक्थि...
...ीतामिषं ... ...
...प्रभुः।)
..., पुं, (अव+सो+थन्।) ...
...हेमचन्द्रः॥ पाठशाला चौपाड़ी यस्य
...। ग्रामः। इति शब्दरत्नावली॥ मठं।
...हलायुधः॥
..., पुं, (अवसथ+दत्।) छात्रवेश्म।
हेमचन्द्रः॥ चौपाड़ी इति भाषा॥
..., त्रि, (अव+सद+क्त।) अवसादप्राप्तः।
...। यथा,—
...पः पारले परमविदुषो ...
...नादेशामपि तदवसन्नापत्यपि ...।
... सर्व्वामतिपरिपाकावधि ...
... ...।
...
...
...
..., पुं, (अव+ए+अप्।) ...। ...
...। यर्ष। इति मेदिनी। ...। ...।
...हेमचन्द्रः। अवसरः। यथा। "...

वधे एका चेद्गुडमिदित्युपदेशेन दण्डवत् प्राय-
श्चित्तानि भवन्तीत्यतिदेशानवसरात्। तदवस-
रत्वे प्रत्येकं पूर्णप्रायश्चित्तद्वैगुण्यं स्यात्"। इति
प्रायश्चित्ततत्त्वं॥ (योग्यकालः। क्रियास्थितियोग्य-
तासम्पादकरूपः कालिकोऽवकाशः। यथा,—
"कामस्तु बाणावसरं समीक्ष्य"। इति कुमारे।
"प्रश्नजिज्ञासानिवृत्तावश्यवक्तव्यरूपः सङ्गति-
विशेषः। अनन्तरवक्तव्यत्वम् अवसरः। "उप-
मानेऽवसरसङ्गतिः"। इति जगदीशः।)
अवसर्गः, पुं, (अव+सृज्+घञ्।) स्वेच्छाचारः।
तत्पर्य्यायः। प्रकाम्यं २ स्वाच्छन्द्यं ३ अनुमननं ४।
इति त्रिकाण्डशेषः॥
अवसर्पः, पुं, (अव+सृप्+अच्।) अपसर्पः। चरः।
इत्यमरटीकायां भरतः॥
अवसर्पिणी, स्त्री, (अव+सृप+णिनि ङीप्।)
जिनानां कालविशेषः। स तु दशकोटिकोटि-
सागरवर्षेण समाप्यते। इति हेमचन्द्रः॥
अवसव्यं, त्रि, अपसव्यं। दक्षिणं। इति रायमुकुटः॥
अवसादः, पुं, (अव+सद्+घञ्।) अवसन्नता।
तत्पर्य्यायः। विषादः २ सादः ३ विषण्णता ४।
इति हेमचन्द्रः॥ (शेषः। क्षयः। यथा,—
"धैर्य्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः"।
इति किरातार्ज्जुनीये।)
अवसानं, क्ली, (अव+सो+ल्युट्।) क्रियासमाप्तिः।
शेषः। तत्पर्य्यायः। सातिः २। इत्यमरः॥ विरामः
३। इति जटाधरः॥ मृत्युः।
("पुंसोऽवसानं व्रजतोऽपि निष्ठुरे-
...यते"।
...त हेमचन्द्रः॥
...।) शेषः। समाप्तिः।
...॥
...+सो+क्त।) परिपक्वमदित-
...। तत्पर्य्यायः। अट्टः २। इति भरतमेदिन्यौ॥
...ज्ञातं। अवसानगतं। समाप्तं। तत्पर्य्यायः। सितः
२। इत्यमरमेदिन्यौ॥ ("यदि नेपथ्यविधानम्
अवसितम्"। इति शाकुन्तले।)
अवसेकिमः, पुं, (अवसेकेन+निर्वृत्तः। अवसेक+
इमन्‌च।) वटकः। इति हेमचन्द्रः॥ बड़ा इति-
भाषा॥
अवस्कन्दः, पुं, (अव+स्कन्द+अच्।) विजिगीषूणां
निवेशस्थानं। शिविरं। इति हलायुधः॥ अव-
गाहनं। यथा,—
"लतानुपातं कुसुमान्यगृह्णात्
स नद्यवस्कन्दमुपास्पृशच्च।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त" ॥
इति भट्टौ २ सर्गे ११ श्लोकः॥ ...
... ... इति ...
... । यथा,—
...
"... ... "।
...

इति हितोपदेशः।)
अवस्कन्दनं, क्ली, (अव+स्कन्द+ल्युट्।) अव-
गाहनं। इति भट्टिः॥ अवतरणं। इति महा-
भारतं॥ अवपूर्व्वस्कन्दधातोरनट्प्रत्ययेन निष्पन्नं॥
अवस्करः, पुं, (अव कीर्य्यते क्षिप्यते इति। अव+
कॄ+अप्+सुट्।) विष्ठा। गुह्यं। इत्यमरमेदिन्यौ॥
संमार्ज्जन्यादिनिक्षिप्तधूल्यादि। इत्यमरटीकायां
मथुरानाथः सारसुन्दरी च॥
अवस्तात्, व्य, (अवरस्मिन्, अवरस्मात्, अवरमि-
त्यर्थे अस्तातिः।) अवरे। पश्चात्। शेषे। अन्ते।
इति पाणिनिः॥ ("अवस्तात्स्वर्गलोकं प्रापयन्तः"।
इति शतपथब्राह्मणे।)
अवस्तारः, पुं, (अव+स्तॄ+घञ्।) यवनिकादिः।
अवस्तीर्य्यतेऽनेनेति स्तृञ
आच्छादने घञ्॥ कानात् इत्यादि भाषा॥
अवस्तु, क्ली, (न वस्तु। नञ्‌तत्पुरुषः।) असद्वस्तु।
(यथा,—
"अवस्तुनिर्व्वन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः"।
इति कुमारे।) वेदान्तमते अज्ञानादिसकल-
जड़समूहः॥
अवस्था, स्त्री, (अव+स्था+अङ्।) दशा। कालि-
कविशेषः। इत्यमरः॥
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमापञ्चदशात् यौवनन्तु ततः परं॥
आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते।
वृद्धस्तु सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परं" ॥
इति स्मृतिः॥
अवस्थाचतुष्टयं, क्ली, (अवस्थायाश्चतुष्टयं। तत्पुरुषः।)
कालकृतचतुर्विधदशा। यथा। "आपञ्चदशवर्षं
बाल्यं। आत्रिंशद्वर्षं कौमारं। आपञ्चाशद्वर्षं यौ-
वनं। पञ्चाशत ऊर्द्ध्वं वृद्धत्वं"। इति वैद्यकशास्त्रे...
अवस्थानं, क्ली, (अव+स्था+ल्युट्।) स्थितिः।
वासः। यथा। "परः सन्निकर्षश्च उपर्य्यधोभाव...
पन्नसमधूनपातन्यायेनाकाशावच्छेदेन ...
स्थानरूपः"। इति तिथ्यादितत्त्वं॥ (अवस्...
प्रतिष्ठा। यथा, "कीदृक् ते ...
इति पञ्चतन्त्रं।
"पद्मां दृढमवस्थानं स कृत्वा कपिकुञ्जरः"
इति रामायणं।)
अवस्थितः, त्रि, (अव+स्था+क्त।) एतावत्...
अवस्थितिविशिष्टं। स्थितं। यथा।
"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः"।
इति श्रीभगवद्गीतायां २ अध्याये ६ श्लो...
अवस्थितिः, स्त्री, (अव+स्था+क्तिन्।) ...
... इति भाषा। ...
... (...। ...
अवस्यन्दः, पुं, (...। ...
... इति हेमचन्द्रः॥
अवहारः, पुं, (अव+हृ+घञ्।) ...
... । ...। ...

याहनामकमजन्तु । इति विश्वमेदिन्यौ । मर्म्मः स्थानं । इति शब्दरत्नावली । (आकाशम् । यथ म्भेदिनाममूर्धकमथोमलरयहनम् । इत्यमरः ।)

अवहारक, पुं, (अवहार + स्वार्थे कः ।) जलजन्तुविशेषः । हाङ्गर इति ख्यातः । जलहस्तीति केचित् । तत्पर्य्यायः । जलराक्षसः २ नक्रराजः ३ अवहारः ४ । इति शब्दरत्नावली । युद्धादि निवर्त्तके त्रि ।

अवहार्य्यं, त्रि, (अव + हृ + ण्यत् ।) समर्पणीयं ।
यथा,—
"व्याधितोपविधिर्योगौ न कालाग्रमर्हतः ।
अवहार्य्यौ भवेतां तौ दीर्घकालमवस्थितौ" ।
इति मानवे ८ अध्याये १४५ श्लोकः । (अर्थ-दण्डयोग्यः । यथा,—
"अवहार्य्यौ भवेचैव सान्वयः षट्शतं दमम् ।
निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषं" ।
इति मनुः ।)

अवहालिका, स्त्री, (अव + हल् + णवुल् + टाप् ।) प्राचीरं । इति हारावली ।

अवहितं, त्रि, (अव + धा + क्त ।) विख्यातं । अवधानं गतं । इति धरणी । (सावधानः । प्रमादरहितः । यथा,—
"ब्रह्मण्यावहितो भूत्वा यदुक्तं नन्दने पुरा" ।
इति मार्कण्डेयपुराणम् ।)

अवहित्था, स्त्री,क्ली, (न वहिस्तिष्ठतीति अवहिः + स्था + क + टाप् । पृषोदरादित्वात् साधुः ।) आकारगुप्तिः । रत्यादिसूचकोमुखरागादिराकारः । अङ्गवैकृतमिति बोपालितः । भयलज्जादिना तस्य गोपनं । इत्यमरटीकायां भरतः । (तल्लक्षणं, यथा साहित्यदर्पणे,—
"भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यान्यथाभाषण-विलोकनादिकरी" । उदाहरणम् । यथा कुमारसम्भवे,—
"एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती" ।
लज्जावशात् कमलदलगणनाव्याजेन हर्षं जुगोप इत्यर्थः । अनेन अवहित्याख्यः सञ्चारी भाव उक्तः, तदुक्तं,—
"अवहित्था तु लज्जादेर्हर्षाद्याकारगोपनं" ।
इति मल्लिनाथः ।)

अवहेलं, क्ली, स्त्री, (अवं + हेड् + घञ् डस्य लः, डलयोरेकत्वस्मरणात् ।) अनादरः अवज्ञा । इत्यमरः ।

अवहेलनं, क्ली, (अव + हेड् + ल्युट् ।) अवहेला अवमानना । इति शब्दरत्नावली ।

अवहेलितं, क्ली, (अव + हेड् + क्त ।) अनादरः । अवहेला । तद्विशिष्टे त्रि । क्रतावहेलनवस्तु । अवहेलं जातमस्य इत्यर्थे इतप्रत्ययेन निष्पन्नं ।

अवक्षुतं, क्ली, (अव + क्षु + क्त ।) उपरिक्षतक्षुतं । यथा मनुः,—
"द्विषदन्नं नगर्य्यन्नं पतितान्नमवक्षुतं" ।
इत्याह्निकतत्त्वं ।

अवाक्, [च्] त्रि, (अञ्चति [illegible] ।) [illegible] । इत्यमरः । [illegible] इति भाषा । [illegible] ।

अवाक्पुष्पी, स्त्री, (अवाक् अधोमुखं पुष्पमस्याः ।) शतपुष्पा । शुलुफा इति ख्याता । [illegible] । इत्यमरटीकायां ४ मौरी इति भाषा । [illegible] । [illegible] इति ख्याता । तत्पर्य्यायः । अधःपुष्पी ३ [illegible] ४ अमराद्रिका ५ । इति रत्नमाला ।

अवाक्शिरः, [स्] पुं, (अवाक् अवनतं शिरो यस्य ।) अधोमुखः । यथा,—
"अवाक्शिरास्तमस्यन्धे किल्विषी नरकं व्रजेत् ।
यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्म्मनिश्चये" ।
इति मानवे ८ अध्याये ९४ श्लोकः ।
("इति ब्रुवन्ति रामेण लक्ष्मणोऽवाक्शिरा स्थितः"
इति रामायणम् ।)

अवाग्रं, त्रि, (अवनतमग्रमस्य ।) नम्रं । आनतं । इत्यमरः ।

अवाच्, [ञ्च्] त्रि, (अव + अञ्च् + क्विन् ।) नीचस्थः । तत्पर्य्यायः । अधोमुखः २ अवाङ्मुखः ३ अवाचीनः ४ । इत्यमरभरतौ ।
("ताही वृन्दपुनामृतं [illegible] ।
अवाङ् भरतमर्हति पिव स्तनौ च पीयते" ।
इति मनुः ।)

अवाङ्मुखं, त्रि, (अवाङ्मुखमस्य ।) अधोवदनं । यथा,
"तत् श्रुत्वा स नप श्रेष्ठ वर्णं दुःख-पराभवं ।
अवाङ्मुखः प्राञ्जलिको तामुवाचाथमङ्गलं" ।
इति कथासरित्सागरे अधःस्तनीलम्बके ९१ तरङ्गः ।

अवाची, स्त्री, (अव + अञ्च् + क्विप् + ङीप् ।) दक्षिणदिक् । इति वैद्यकशास्त्रम् । अधोदिक् । इति व्याडिः । अधोमुखी ।

अवाचीनं, त्रि, (अवाची भवं । अवाची + ख ।) दक्षिणदिग्भवादि । अधोमुखः । इति स्वामि जटाधरौ ।

अवाच्यं, क्ली, (न + वच + ण्यत् ।) दुर्व्वाक्यं । तत्पर्य्यायः । अनक्षरं २ । इत्यमरः । वचनानर्हं । अनक्षरं गालि प्रभृति इति मधुः । निन्दितान्यक्षराणि अत्र अनक्षरं अव्ययानामनेकार्थत्वात् नञ् निन्दायां । एवमवाच्यं वाच्चमयोग्यं वक्तुमपि अशक्यत्वादिति अयं मुनवचेति कनिषेधः । इति भरतः ।
("वाच्यावाच्ये हि कुपितो न विजानाति कर्हिचित्" ।
इति भारते ।
"अवाच्यं वदतो जिह्वा कथं न पतिता तव" ।
इति रामायणे ।)

अवाच्य, त्रि, (अवाच् + भवार्थे यत् ।) अनिन्दितः । इति स्मृतिः । अवाक्यः । वचनानर्हः । यथा,—
"अनक्षरमवाच्यन्तु वचनार्हं न यद्भवेत् ।
एष बन्ध्यासुतो याति खपुष्पकृतशेखरः ।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्द्धरः" ।

इति [illegible] । [illegible] ।

अवा[illegible], पुं, (अवा[illegible] ।) [illegible] ।

अवा[illegible], [illegible] ।) [illegible] । [illegible] ।

अवा[illegible], त्रि, (अनिन्दि [illegible] ।) [illegible] । [illegible] ।

अवा[illegible], त्रि, [illegible] । [illegible] ।

अवाप्त, त्रि, (अव + आप् + क्त ।) इति शब्दरत्नावली ।
("[illegible]"
इति भारते ।)

अवान्तर, त्रि, (अवान्तरम् [illegible] ।) [illegible] । [illegible] । यथा,—
"[illegible] ।
[illegible] ।
[illegible] ।
[illegible]"
इति [illegible] ।

अवापितधान्य, त्रि, ([illegible] ।) [illegible] । [illegible] । तत् वापितधान्यादिरुत इति रामकमल ।

अवार, क्ली, (अव + वृ + घञ् ।) नद्यादेः पूर्व्वतीरं । इत्यमरः ।

अवारपार, पुं, (अवार अर्व्वाक् तीरं पारं च यस्य ।) समुद्रः । इति

अवारपारीण, त्रि, (अवारपारं + ख ।) पारगः । [illegible] इति पाणिनि ।

अवारिका, स्त्री, ([illegible] + टाप् ।) धन्याक । [illegible] । अवारिका च पाठ । इति रत्न ।

अवारितं, त्रि, (न वारितं । [illegible]) । अनिवारित । यथा,—
"अवारितद्वारतया [illegible]
[illegible] पुरे तस्य [illegible]
गतेषु [illegible]
[illegible]" ।
इति नैषधे २ सर्गे ४२ श्लोक ।

अवारीय, त्रि, (अवार [illegible] ।) [illegible] । नदीपारगतः । इति [illegible]

अवार्य्यं, त्रि, (न वार्य्यं । [illegible]

ं । अवास्तवं । वासनायोग्यं । यथा,—
नित्यविलसद्दैत्यजनकनिकेतन ।
येनद्रूपं विष्णोर्येत् प्रणमाम्यहं" ॥
खण्डे २७ अध्यायः ॥

[न्] त्रि, (नास्ति वासो यस्य ।) वस्त्र-
नग्नः । इत्यमरः ॥

, अयथार्थे । मिथ्या । न वास्तवं अवास्त-
नञ्समासनिष्पन्नं ॥

, परिरक्षकः । अवपूर्व्वकात्रधातोरल्-
निष्पन्नः ॥

अव + इन् ।) सूर्य्यः । पर्व्वतः । मेषः ।
॥ [इति मनुः ।)
रखरोष्ट्राणां गोऽजाविमृगपक्षिणां" ।
हस्तिकरभमहिषीखरवाजिनां ।
ं स्त्रियां पुंसां मूत्रवर्गं उदाहृतः" ॥
करसेन्द्रसारसंग्रहे ॥)
मूषिककम्बलः । इति मेदिनी ॥ प्राचीरं
इति दण्डी ॥

, ऋतुमती । इत्यमरः ॥

, (अवीनां मेषाणाम् संघातः । अवि +
) मेषसमूहः । इति संक्षिप्तसारपरि-
मेड़ारपाल इति भाषा ।

त्रि, अविशालः । अकरालः । अविस्तारः ।
ः अविकटः इति नञ्समासनिष्पन्नः ॥

ी, (अवि + क ।) हीरकं । इति राज-
॥ (हीरकशब्देऽस्य गुणादयो ज्ञातव्याः ॥

[न्] त्रि, (न विकारी + नञ्तत्पुरुषः ।)
जनकः । यथा बृहस्पतिः ।
लफलैः पुष्पैः शस्तैः सुखरसन्तु यत् ।
दि भवेन्मेध्यमभक्ष्यं तद्विकारवत्" ॥
कायाकतत्त्वं ॥

ा, स्त्री, (अवेर्म्मेषस्य गन्ध इव गन्धो-
ततः स्वार्थे कन् ।) अजगन्धावृक्षः । इति
घंटः ॥

त्रि, (न विनीतम् । नञ्तत्पुरुषः ।)
तं । यथा । "नापि मद्गुर्नं श्रमममविनीत-
मारविषयत्वाद्ध्वंवत्" । इति मद्गुवाद-
नहिः ॥

, (न विघ्नः । नञ्तत्पुरुषः ।) करमर्दक-
इत्यमरः ॥ पानिआमला इति ख्यातः ।
गारसुन्दरी ॥

, पुं, (नास्ति विचारो यस्मिन्निति ।) अन्यायः ।
चारः । विचाररहिते त्रि । (विचाराभावः ।)
—
चारेण कर्म्माभिरसुदैन्तु तत् पुनः ।
रोणाकाराणामेतद्देर्विदो विदुः" ॥
मत्स्यपुराणं ॥

रितः, त्रि, (न विचारितः । नञ्तत्पुरुषः ।)
विचारः । अविवेचितः । अविचारकरणादि-
देन निष्पन्नः ॥ ("अतः सर्व्वथाऽविचारितं
न कर्त्तव्यम्" । इति पञ्चतन्त्रम् । अवि-
तं सम्यग्विवेचनं विना । यथा,—

"स किं भृत्यः स किं मन्त्री य आदावेव भूपतिम् ।
युद्धोद्योगं स्वभूत्यागं निर्दिशत्यविचारितम्" ॥
इति हितोपदेशः ।)

अविच्छिन्नं, क्ली, (न विच्छिन्नं, नञ्तत् ।) विच्छेदा-
भाववत् । अनिष्पत्तिमत् । यथा,—
"अविच्छिन्ने कथम्भावे यत् प्रधानस्य भव्यते ।
अविज्ञातफलं कर्म्म तस्य प्रकरणाद्गता" ॥
इति मलमासतत्त्वम् ॥

अविज्ञः, त्रि, (न विज्ञः । नञ्तत्पुरुषः ।) अप्रवीणः ।
अनिपुणः । अनभिज्ञः । अशिक्षितः । अकृती ।
यथा,—
एते सर्व्वे गुणाः कान्त सन्ति कान्ते त्वयि ध्रुवं ।
त्वां न वाञ्छन्ति याः कान्तास्ता अविज्ञाश्च वञ्चिताः"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः ॥

अविज्ञेयं, त्रि, (न विज्ञेयं । नञ्तत्पुरुषः ।) दुर्ज्ञेयं ।
यथा,—
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणं ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः" ॥
इति मानवे १ अध्यायः ॥

अविडीनं, क्ली, (न विडीनम् । नञ्तत्पुरुषः ।)
पक्षिणां आभिमुख्याभिगमनं । इति महाभारतं ॥

अवितं, त्रि, (अव + क्त ।) पातं । रक्षितं । इत्यमरः ॥

अवितथं, क्ली, (न वितथम् । नञ्तत्पुरुषः ।)
सत्यं । ("अवितथमाह प्रियंवदा" । इति शाकु-
न्तले ।) तद्विशिष्टे त्रि । इति रत्नावली ॥
(सार्थकं । यथा,—"वत्स ! अवितथैषा तव
भारती भवतु" । इति नागानन्दे ।)

अवित्यजः, पुं, क्ली, (न विशेषेण त्यज्यते रसायना-
दिषु इति । न + वि + त्यज + क ।) पारदः ।
इति राजनिर्घण्टः ॥

अविदूसं, क्ली, (अवेर्म्मेषस्य दुग्धम् । अवेः दुग्धे
सोढ़दूसमरीसचः, इति दूसप्रत्ययः ।) मेषदुग्धं ।
इति हेमचन्द्रः ॥ (मेषदुग्धविवरणेऽस्य विशेषो
ज्ञेयः ॥)

अविद्धकर्णी, स्त्री, अम्बष्ठा । आकनादि इति
ख्याता । इति भट्टराजः । इत्यमरटीकायां भरतः ॥

अविद्धकर्णी, स्त्री, (न विद्धः पर्णरूपः कर्णो यस्याः ।)
विद्धकर्णीलता । इति भरतः ॥ (माचिकाशब्दे-
ऽम्बष्ठकीशब्दे चास्या गुणादयो ज्ञातव्याः ॥)

अविद्यः, त्रि, (नास्ति विद्या यस्य सः ।) विद्यारहितः ।
अविद्वान् । विद्याहीनः । यथा,—
"अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः" ।
अपि च । कात्यायनः ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्" ॥
इति दायतत्त्वं ॥ अन्यच्च ।
"अविद्यानान्तु सर्व्वेषामीहातश्चेद्धनं भवेत् ।
समस्तत्र विभागः स्यादपित्र्य इति धारणा" ॥
इति मानवे ९ अध्याये २०५ श्लोकः ॥

अविद्यमानः, त्रि, (न विद्यमानः । नञ्तत्पुरुषः ।)
असंस्थितः । सत्तारहितः । अभावः । यथा
नारदः,—
"अविद्यमाने पितर्य्यंशे भ्रातृपुत्त्रस्य वा हरः ।

अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः" ॥
इति दायतत्त्वं ॥

अविद्या, स्त्री, (न विद्या । नञ्तत्पुरुषः ।) अ-
ज्ञानं । इत्यमरः ॥ माया । इति वेदान्तः ॥ (अह-
ङ्कारहेतुकमज्ञानं, मिथ्याज्ञानं, विद्याविरोधिनी,
अयथार्थबुद्धिः । यदुक्तम्,—
"अविद्याया अविद्यात्वमिदमेव तु लक्षणम् ।
यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत्" ॥
अन्यच्च,
"सेयं भ्रान्तिर्निरालम्बा सर्व्वन्यायविरोधिनी ।
सहते न विचारं सा तमो यद्वद्दिवाकरम्" ।
अव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मबुद्धिः ।
यथा,—"शरीरे मनुष्योऽहमित्यादि" । इयञ्च
सर्व्वक्लेशमूलभूता तम इत्युच्यते ।
"अविरोधितया कर्म्म नाऽविद्यां विनिवर्त्तयेत् ।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत्" ॥
इति आत्मबोधः ।)

अविधिः, पुं, (न विधिः । नञ्तत्पुरुषः ।) अवि-
धानं । शास्त्राविहितं । यथा,—
"येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकं" ॥
इति श्रीभगवद्गीतायां ९ अध्याये २३ श्लोकः ॥
अपि च याज्ञवल्क्यः ।
"वसेत् स नरके घोरे दिनानि पशुरोमभिः ।
सम्मितानि दुराचारो यो हन्त्यविधिना पशून्" ॥
इत्याह्निकतत्त्वं ॥

अविनः, पुं, (अव + इनच् ।) यष्टा । यागकर्त्ता ।
इत्युणादिकोषः ॥

अविनयः, पुं, (न विनयः । नञ्तत्पुरुषः ।) विनया-
भावः । यथा,—
"बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥
वेणो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः ।
सुदासो यवनश्चैव सुमुखो निमिरेव च" ॥
इति मानवे ७ अध्याये ४०।४१ श्लोकौ ॥ (अशि-
ष्टाचारः । यथा,—
"अयमाचारप्रविनयं मुग्धासु तपस्विकन्यकासु" ।
इति शाकुन्तले ।) अविनीते त्रि ॥

अविनाभाव', पुं, (विना व्यापकं विना न भावः
स्थितिः ।) व्याप्तिः । व्याप्यनिष्ठव्यापकनिरूपित-
धर्म्मः । यथा,—"वह्निमान् धूमात्" इत्यादौ
धूमनिष्ठा वह्निनिरूपिता व्याप्तिः ॥ इति न्याय-
मीमांसयोर्मतं ॥ तत्पदार्थे तत्पदार्थाभावप्रति-
योगिताभावः । यथा । वेदनाशङ्का न तावदविना-
भावः । शीर्णं स्यात्स्मिन्नादौ तदभावात् । विमर्श
जलं यदाः वक्षे मध्यिप इत्थ अन्यिलक्षदा
अविनाभावात् सक्षे शाकाङ्क्षामन्येष । इत्या-
काङ्क्षाविच्छिन्नादिः । अविनाभाव इति । तत्पदा-
र्थेन विना यो भावः सत्त्वं तदभाव इत्यर्थः ।
तत्पदार्थे तत्पदार्थाभावप्रतियोगिताभावस्तत्पदार्थे
तत्पदार्थाकाङ्क्षा इति भावः । इति शब्दशक्ति-
प्रकाशिका ।

अविनीत, त्रि, (न विनीतः । नञ्तत्पुरुषः ।) विनयरहितः । तत्पर्य्यायः । समुद्धतः २ । उद्धतः । (यथा,—
"न चापि प्रतिकूलेन नाविनीतेन राघव !।
गाढं धारयितुं शक्यं राज्ञा तीक्ष्णेन वा पुनः" ।
इति रामायणे । अविदमितः । यथा,—
"नाविनीतैर्व्रजेद्धुर्य्यैर्न च क्षुद्व्याधिपीडितैः" ।
इति मनुः ।)

अविनीता, स्त्री, (न विनीता । नञ्तत्पुरुषः ।) कुलटा । असती । इति हेमचन्द्रः ॥

अविपटः, पुं, (अवि + पटच् ।) अवीनां विस्तारः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । कम्बलादिः ।

अविप्रिय, पुं, (अवि + प्री + क ।) ग्रामाकर्णकः । इति शब्दचन्द्रिका । (यथा न विप्रिय इत्येवं स्यात् [illegible])

अविमरीसं, स्त्री, (अवीनां मेषाणां प्रिया ।) श्वेतापर्णा । इति शब्दचन्द्रिका ॥

अविरूढ, त्रि, (न विरूढ । नञ्तत्पुरुषः ।) अप्ररूढ़ । यथा कुमारसम्भवे ।
"[illegible] अविरूढा वा [illegible] ।
[illegible]" ।
इति [illegible] ॥

अविभक्त, त्रि, (न विभक्तम् । नञ्तत्पुरुषः ।) विभागरहितं । यथ विभक्तविभाजने । तत्र [illegible] ।
"[illegible] विभक्तं [illegible] ।
[illegible] न [illegible]" ॥
[illegible] ।
"[illegible] विद्या [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible]" ॥
[illegible]

परं निर्जित्य यल्लब्धं । तत्सर्व्वमविभाज्यमितरैः । तत्साधया कयाचिद्विद्यया लब्धमज्ञकस्यैव तन्नेतरेषामिति । प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः ॥ * ॥ नारदः ।
"कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्" ॥
बिभृयादित्येकवचननिर्देशान्न बहवः । यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्यार्जितधने तस्याधिकारः । अश्रुतो मूर्खः । कल्पतरुमिताक्षरादीपकलिकास्तु । कात्यायनः ।
"परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या ।
तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते" ॥
अन्यतः पितृमातृकुलव्यतिरिक्तात् ॥ * ॥ अत्र विशेषयति स एव ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित् ।
समविद्याधिकानान्तु देयं वैद्येन तद्धनं" ॥
तत्रोपरिस्थविद्यापदमुभाभ्यां सम्बध्यते तेन समविद्याधिकविद्यानां भागो न तु न्यूनविद्ययोः । वैद्येन विदुषा ॥ * ॥ पुनर्विशेषयति ।
"कुले विनीतविद्यानां भ्रातृणां पितृतोऽपि वा ।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः" ॥
कुले स्वकुले पितामहपितृव्यादिभ्यः । पितृत एव वा । शिक्षितविद्यानां भ्रातृणां । यद्विद्याशौर्य्यप्राप्तं धनं तद्विभजनीयमिति कल्पतरुरत्नाकरौ । पुनः कात्यायनः ।
"शंभवशोऽर्द्धहरो वा पुत्रवित्तार्ज्जनात् पिता" ।
पुत्रवित्तार्ज्जनात् । तदभिहितभावो द्रव्यवत् प्रकाशते इति न्यायात् पुत्रार्ज्जितवित्तात् पितुर्द्व्यंशित्वं पितृधनानुपघातविषयं भ्रातृधनोपघातविषयम् । अर्द्धांशत्वन्तु द्व्यंशित्वं भ्रातृधनोपघाते तु तेषामप्येकांशित्वं वक्ष्यमाणव्यासवचनात् । पितुरर्द्धहरत्वन्तु पितृद्रव्योपघाताद्गुणवत्त्वादिति दायभागः । अनुपघाते पिता द्व्यंशहरः अर्ज्जकत्वात् अयमपि द्व्यंशहरः इतरेषामनंशित्वं । भ्रातृद्रव्योपघाते तु तस्याप्येकांश इति द्व्यंशहरयोर्निर्द्धारणं ॥ * ॥ पुनः कात्यायनः ।
"[illegible] यथा च वस्त्रं यथाङ्गयोजितं ।
प्रयोज्यं न विभज्येत विभ्यार्थन्तु बृहस्पतिः" ॥
प्रयोज्यं [illegible] पुस्तकादि न तत्पुत्रादिभिः सह [illegible] विभजनीयं [illegible] दायभागमतपरिशिष्टानुसारः । याज्ञवल्क्यः ।
"पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितं ।
मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत्" ।
[illegible] ॥ नारदः ।
"शौर्य्यभार्य्याधने चोभे यच्च विद्याधनं भवेत् ।
[illegible] प्रसादो यश्च पैतृकः" ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

शौर्य्ययुक्तस्त्रीवाससामपां [illegible]
इति प्रजापतिरिति । [illegible]
द्यानादिकं [illegible]
येन तदा येन यत् [illegible]
[illegible] ॥ * ॥ साधारणधनार्ज्जितेऽपि
व्यासः ।
"साधारणं समाश्रित्य [illegible]
शौर्य्यादिनाप्नोति [illegible]
तस्य भागद्वयं देयं [illegible]
अत्र भ्रातर [illegible]
[illegible] । तस्यांशस्य ।
तोऽल्पस्याल्पस्य महतो वा [illegible]
नुसारेण भागकल्पना कार्य्येति ।
याज्ञवल्क्यः ।
"क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत्
दायादेभ्यो न तद्दद्यात् [illegible]
पितृपितामहागतं [illegible]
मनुज्ञया उद्धरति [illegible]
भूमौ तु विशेषयति शङ्खः ।
"पूर्व्वनष्टान्तु यो भूमिमेकः [illegible]
यथाभागं भजन्त्यन्ये दत्त्वांशन्तु तुरीयकं [illegible]
[illegible]
व्यलिखनादयुक्तमेवेति रत्नाकर । [illegible]
मिताक्षराप्रभृतिभिर्न्तत्वात् । [illegible]

अविमरीसं, स्त्री, (अवि + मरीस [illegible] मरीसच्प्रत्ययः ।) मेषदुग्धं । [illegible]
("[illegible]
इति शार्ङ्गधरः ।)

अविमुक्तं, स्त्री, (वि + मुच + क । नञ्तत्पुरुषः ।) वाराणसीक्षेत्रं । [illegible]
"मुने प्रलयकालेऽपि न [illegible]
विमुक्तं न शिवाभ्यां यदविमुक्तं [illegible]
अविमुक्तं तदारभ्य क्षेत्रमेतदुदीरितं
अस्यानन्दवनं नाम पुराऽकारि [illegible]
क्षेत्रस्यानन्दहेतुत्वादविमुक्तमनन्तरं ।
आनन्दकन्दबीजानामङ्कुराणि [illegible]
क्षेयानि सर्व्वलिङ्गानि तस्मिन्नानन्दकानने
अविमुक्तमिति ख्यातमासीदित्थं [illegible]
इति काशीखण्डे २६ अध्याय ।
नामस्थाने च । यथा,—
"अथ योऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते [illegible]
इति । "आमनन्ति चैनमस्मिन् [illegible]
विमुक्तकाशीनिरूपणे" । इति च श्रुतिः ।

अविमुक्त, पुं, (न विमुक्तः । नञ्तत्पुरुषः ।) [illegible] इति काशीखण्डे । [illegible]

अविरतं, स्त्री, (न विरतम् । [illegible]) सततं । अनवरतं ।
("अविरतोज्झितवारिविपाण्डुभि-
र्विरहितैरचिरद्युतितेजसा" ।
इति किरातार्ज्जुनीये ।) [illegible]

अविरल, त्रि, (न विरलं । नञ्तत्पुरुषः ।) सान्द्रं । घनं । निविडं । [illegible]

४ निरन्तरं ५ सान्द्रं ६ नीरन्ध्रं ७
दृढं ८ गाढं १० । इति हेमचन्द्रः ॥
पुं, (न विरोधः । नञ्तत्पुरुषः ।) वि-
वः । यथा,—
श्रुतिविरोधे तु श्रुतिरेव गरीयसी ।
धे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता" ॥
ाद्धतत्त्वधृतजावालवचनं ॥ अपि च ।
र्न्तु ते भूता ये भूता भूमिपालकाः ।
नविरोधेन पूजाकर्म्म करोम्यहं" ॥
कतत्त्वं ॥
स्त्री, (न विलम्बनम् । नञ्तत्पुरुषः ।)
अविलम्बितं । इति रायमुकुटः ॥
ं, स्त्री, (वि + लवि + क्त । ततो नञ्तत्-
) विलम्बाभावः । तत्पर्य्यायः । शीघ्रं २
३ लघु ४ क्षिप्रं ५ अरं ६ द्रुतं ७ सत्वरं ८
. तूर्णं १० आशु ११ । इत्यमरः ॥
ः, त्रि, (न विलम्बितः । नञ्समासः ।)
ः । तत्पर्य्यायः । उद्घनः २ । इत्यमरः ॥
म्बितं ३ । यथा,—
लम्बितमुत्थाय केऽप्याकरवलम्बितं" ।
टाधरः ॥
स्त्री, (अव + इलच् ।) मेषी । भेड़ी । इति
दः ॥ (नास्ति विलं यत्रेत्यर्थे, त्रि ॥)
, पुं, (न विवादः । नञ्तत्पुरुषः ।)
भावः । यथा,—
वैवस्वतो देवो यस्तवैष हृदि स्थितः ।
दविवादस्ते मा गङ्गां मा कुरून् गमः" ॥
ानवे ८ अध्याये ९२ श्लोकः ॥
, [न्] त्रि, (न विवादी । नञ्तत्पुरुषः ।)
रहितः । निर्व्विवादी । नञ्पूर्व्वविवाद-
दिन्प्रत्ययेन निष्पन्नः ॥
हतः, पुं, स्त्री, (न विवाहितः । नञ्तत्-
।) अनूढः । अकृतोद्वाहः । अकृतोपयमः ।
णीतः । अकृतपाणिग्रहः । आइवड़ इति
। नञ्पूर्व्वविवाहशब्दादितप्रत्ययेन निष्पन्नः ॥
ा, स्त्री, (न विवाह्या । नञ्तत्पुरुषः ।)
हानर्हा । यथा । सुमन्तुः । "मातृपितृ-
ा आसप्तमादविवाह्याः कन्या भवन्ति" ।
ञ्चमादन्येषां मतं । नारदोऽपि ।
प्तमात् पञ्चमाच्च बन्धुभ्यः पितृमातृतः ।
वाह्या सगोत्रा च समानप्रवरा तथा ॥
। पञ्चमे वापि येषां वैवाहिकी क्रिया ।
सन्तानिनः सर्व्वे पतिताः शूद्रतां गताः" ॥
ः पितृपत्न्यो मातरस्तद्भ्रातरो मातुलास्तद्-
तरो भगिन्यस्तदपत्यानि भागिनेयानि ता-
विवाह्याः अन्यथा सङ्करकारिणस्तथाध्याप-
रैतदेवेति । तत्र यथा । पितृपितामहा-
। सप्तानां सन्ततिः सप्तमीपर्य्यन्ता नोद्वाह्या ।
पितृबन्धुप्रभृतिसम्बन्धघटकानां सप्तानां स-
ः सप्तमीपर्य्यन्ता नोद्वाह्या । एवं मातामह-
तामहादीनां पञ्चानां सन्ततिः पञ्चमीप-
ा नोद्वाह्या । एवं मातृबन्धुप्रभृतिसम्बन्ध-

घटकानां पञ्चानां सन्ततिः पञ्चमीपर्य्यन्ता नो-
द्वाह्या । बन्धुत्वमात्रेरसत्वेऽपि पितृमातामह-
मातृमातामहप्रभृत्युपरितनानां पञ्चानां त्रयाणां
सप्तमीपञ्चमीपर्य्यन्ता नोद्वाह्येति । एवञ्च पितु-
र्म्मातुश्च मातामहकन्यान्तरसत्वे तामादाय सप्त-
मीपञ्चमीपर्य्यन्तायाः परीहारः । एवं बन्ध्वन्तरे-
ऽप्यूह्यं । बन्ध्वपेक्षया त्रिगोत्रगणनं परतः सर्व्वत्र ।
पूर्व्वतस्तु पितुर्म्मातुश्च मातुलपुत्ररूपबन्धोरपि
सापेक्षया अन्येषां बन्धूनां मातामहगोत्रापेक्षया
त्रिगोत्रगणनं सर्व्वसामञ्जस्यं स्यात् । अन्यथा
पितुः पितामहदौहित्रीकन्यायाः पितामहभगि-
नीपुत्त्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः
प्रसज्येत स चायुक्तः । पितृगोत्रापेक्षया तस्यास्त्रि-
गोत्रमध्यवर्त्तित्वात् । एवं पितुः प्रमातामहदौ-
हित्रीकन्यायाः पितामहीभगिनीपुत्त्रबन्ध्वपेक्षया
त्रिगोत्रात् पराया विवाहः प्रसज्येत स चाप्य-
युक्तः । पितामहीभ्रातृपुत्त्रबन्ध्वपेक्षया तस्यास्त्रि-
गोत्रमध्यवर्त्तित्वात् । एवं मातुः प्रपिता-
महदौहित्रीकन्याया मातामहभगिनीपुत्त्रबन्ध्वपे-
क्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स
चायुक्तः । वरस्य मातामहापेक्षया तस्यास्त्रिगोत्र-
मध्यवर्त्तित्वात् । एवं मातुः प्रमातामहदौहित्री-
कन्याया मातामहीभगिनीपुत्त्रबन्ध्वपेक्षया त्रि-
गोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः ।
मातामहीभ्रातृपुत्त्रबन्ध्वपेक्षया तस्या स्त्रिगोत्र-
मध्यवर्त्तित्वात् । इति । एवं मातृसपत्नीभ्रातृ-
सन्ततिः पितृमातृसगोत्रादयोऽप्यविवाह्याः ॥ * ॥
असवर्णाया अविवाह्यत्वं यथा । कलौ त्वस-
वर्णाया अविवाह्यत्वमाह वृहन्नारदीयं ।
"समुद्रयात्रास्वीकारः कमण्डलुविधारणं ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा" ॥
इत्यादि । इत्युद्वाहतत्त्वं ॥

अविवेकः, पुं, (न विवेकः । नञ्तत्पुरुषः । नास्ति विवेको यस्य इति समासे वाच्यलिङ्गः ।) सद-सद्विवेचनाराहित्यं । यथा । "देहात्मनोरविवेका-दस्यैवं शोको भवतीति तद्विवेकप्रदर्शनार्थं श्री-भगवानुवाच अशोच्यानित्यादि" । इति श्रीभग-वद्गीता २ अध्यायस्य ११ श्लोकटीका ॥ तद्वति त्रि ॥ अविमृश्यकारी । यथा,—("सहसा विदधीत न क्रियामविवेकः परमापदाम्पदम्" ॥ इति किरातार्ज्जुनीये ॥ सदसद्विवेकरहितः । यथा,— "उत्तमोत्तममप्राप्यमविवेकोऽभिवाञ्छसि" । इति विष्णुपुराणं ।)

अविवेकी, [न्] त्रि, (न विवेकी । नञ्तत्पुरुषः ।) विवेकशून्यः । अविवेचकः । यथा । "तस्माद-विवेकिनः सुखमात्रलिप्सवो नात्राधिकारिणः") इति मुक्तिवादस्य गादाधरी टीका । अपि च ।
"अस्मिन् प्रगल्भे देवेन्द्रे परमं धाम लभ्यते ।
मयाविवेकिना तस्य हृदये भणिता यथा ॥
सर्व्वपापहरो विष्णुः स मया अर्च्चितः कृतः" ।
इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥

अविवेचकः, त्रि, (न विवेचकः । नञ्तत्पुरुषः ।) विवेचनारहितः । अविवेकी । न विवेचकः अवि-वेचकः इति नञ्समासनिष्पन्नः ॥

अविशेषः, त्रि, (न विशेषः । नञ्तत्पुरुषः ।) विशेषरहितः । अभेदः । तुल्यः । विशेषाभावे, पुं ॥ विशेषाभावः । यथा,—
"पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवं ।
अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत्" ॥
इति श्राद्धतत्त्वं ॥ ("सांख्यादिमतसिद्धानि तन्मात्राख्यानि सूक्ष्मभूतानि, तानि च इदमेतदेवं-गुणकमिति व्यावृत्ततया नानुभूयन्ते इत्यविशेषाः सूक्ष्माख्योच्यन्ते" । तथा च विष्णुपुराणे,—
"तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता ।
न शान्ता नापि घोरास्ते न मूढ़ाश्चाविशेषिणः" ॥
इति ।)

अविश्रान्तः, त्रि, विश्रामरहितः । विश्रान्तिशून्यः । अनवरते, क्ली । विपूर्व्वश्रमधातोः क्तप्रत्ययानन्तरं नञ्समासनिष्पन्नः ॥ ("अविश्रान्तं पत्युर्गुणगण-कथाम्रेड़नजड़ा" ॥ इति आनन्दलहर्य्याम् ॥)

अविश्रामं, क्ली, (नास्ति विश्रामो यस्मिन् इति ।) विश्रामराहित्यं । यथा,—
"अविश्रामं वहेत् भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात्" ॥
इति चाणक्यं ॥

अविश्वस्तः, त्रि, (न विश्वस्तः । नञ्तत्पुरुषः ।) विश्वासानर्हः । अजातविश्वासः । प्रत्ययायोग्यः । यथा,—
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासात् भयमुत्पन्नं मूलान्यपि निकृन्तति" ॥
इति चाणक्यं ॥
("विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम्" ।
इति भारते ॥)

अविश्वासा, स्त्री, (नास्ति विश्वासो यस्याम् सा ।) चिरप्रसूता गौः । कैथेनगाइ इति भाषा । इति शब्दचन्द्रिका ॥

अविषः, पुं, (अव + टिषच् ।) समुद्रः । इति कात-न्त्रीयोणादिवृत्तिः । (राजा । पृथिवी । स्वर्गः । रक्षकमात्रे त्रि ।) विषशून्ये त्रि ॥ (यथा,— "इत्येता अविषा व्याख्याताः" ॥ इति सुश्रुते ॥)

अविषा, स्त्री, (नास्ति विषं यस्याम् ।) निर्व्विषाख्यं । इति राजनिर्घण्टः ॥

अविषी, स्त्री, (अविष + ङीप् ।) नदी । इत्युणादि-वृत्तावुज्ज्वलदत्तः ॥

अविसोढ़ं, क्ली, (अवेर्दुग्धम् । अवि + सोढ़च् ।) मेषदुग्धं । इति हेमचन्द्रः ॥

अविस्पष्टं, क्ली, (वि + स्पश + क्त । ततो नञ्-समासः ।) अस्पष्टवाक्यं । तत्पर्य्यायः । म्लिष्टं २ । इत्यमरः ॥
("नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ" ॥
इति मनुः ॥ —
"विश्वं [illegible] साध्यमवश्या-
दविस्पष्टं [illegible] पुनर्वाप्यवलिङ्गैः" ॥
इति [illegible]

अवी, स्त्री, (अवनमवनं रक्षणम् । अव + ई ।) ऋतुमती । इति हेमचन्द्रः ॥

अवीचि, पुं, (नास्ति वीचिः ... सुखं वा यत्र ।) नरकविशेषः । इति शब्दरत्नावली ॥

("अवीचिमन्धतामिस्रं कुम्भीपाकं तथैव च ।

असिपत्रवनं चैव तपनञ्चैव किंशुकम्" ॥

इति ... ।) ... ॥

अवीचि, पुं, (नास्ति वीचिः सुखं यस्मिन्) } अवीचिमत्, स्त्री, (अवीचि + मतुप् ।) } नरकवि-

शेषः । [illegible]

[illegible]

अवीर, त्रि, [illegible] ॥

अवीरा, स्त्री, (नास्ति वीरः पुत्रः पतिर्वा यस्याः ।) ... ॥ [illegible]

[illegible]

स्त्र्यान्तस्य द्व्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः" ।

तथा विष्णुः । अपुत्रस्य धनं पत्न्यभिगामि तद-भावे दुहितृगामि । इत्यादि । तेन प्रपौत्र-पर्य्यन्तानामभावे पत्नी धनाधिकारिणी । यथा कात्यायनः ।

"भर्त्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतः ।

विद्यमाने तु संरक्षेत् क्षपयेत् तत्कुलेऽन्यथा ॥

अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।

पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत च" ॥

यथेष्टत इति धर्म्मार्थे । तथा च व्यासः ।

"लोकान्तरस्थं भर्त्तारमात्मानञ्च वरानने ।

तारयत्युभयं नारी नित्यं धर्म्मपरायणा" ॥

मदनपारिजातधृता स्मृतिः ।

"यद्यद्दिष्टतमं लोके यच्चास्य दयितं गृहे ।

तत्तद्गुणवते देयं पतिप्रीणनकाम्यया" ॥

भर्त्तुः शयनं पालयन्ती तत्प्राप्यगामिनी । अतएव वृहस्पतिः ...

"...

... तथा शुभे" ॥

तथा वृहस्पतिः,—

"अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।

पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत च" ॥

... तदाहेन भर्त्तुः ... भर्त्तुः कृत्स्नधनं यावज्जीवं हरेत् न तु ... । इति दायतत्त्वं ॥ ० ॥ अस्याः ... यथा । पुत्रपौत्रप्रपौत्राभावे पत्नी । तथा च शङ्खः ।

"स्विन् पुत्रेण कर्त्तव्या पितृदानोदकक्रिया ।

तदभावे तु पत्नी स्यात् तदभावे सहोदरः ॥

... भार्य्या तथैव च ।

... तदभावे हि भोजकः" ॥

इत्यादि ।

"अपुत्रा स्त्री यथा पुत्रः पुत्रवत्यपि भर्त्तरि ।

... पृथिवी" ॥

इति ... । इति ॥ ० ॥ ... यथा स्मृतिः ।

"... भर्त्तुः ... ।

... ॥

... । इति ॥ ० ॥ ... ।

... ।

... तत्र ।

"... ।

... " ॥

इति ... ।

"... ।

... " ॥

इति छन्दोगपरिशिष्टेन ... तत्परीहारोऽशक्त्वाच । ... सतश्च स्त्रियौ पुत्रे ... पतितस्त्वेऽपि ... नास्त्रोत्पुत्रं । इति च शुद्धितत्त्वं ।

अवेद्य, पुं, (विद + ण्यत् । अवेद्य इति ... मासः ।) गोवत्सः । इति ... इतिभाषा । अज्ञेये त्रि । (यथाह "अभिचारेषु सर्व्वेषु कर्त्तव्यो द्विशतो दमः । ... " इति मनुः ।)

अवेल, पुं, (नास्ति वेला यस्य सः ।) ... । इति मेदिनी ॥

अवेला, स्त्री, पूगचर्व्वितं । इति मेदिनी, गुया इति भाषा । अपराह्णः । वेलाशून्ये त्रि ॥

अवेक्षणं, क्ली, (अव + ईक्ष + ल्युट् ।) दर्शनं । यथा । ... अवेक्षणस्य कर्त्तव्यत्वात्" । इति ... (तथाच ।

"दूरादवेक्षणं ह्रासः ...

परोक्षेऽपि गुणश्लाघा ...

इति हितोपदेशे ।) अवधानम् । अनुसन्धानम् । यथा,—

"नियम्य ...

वर्णाश्रमावेक्षणजागरूकः"

इति रघुवंशे ।)

अवेक्षा, स्त्री, (अव + ईक्ष + अ ...) वेक्षणं । प्रयत्नवृद्धिः । तत्पर्य्यायः । गरः २ । इत्यमरः । (अवधानम् । यथा,—

"...

... वर्द्धयेत् ... "

इति मनुः ।

("यदि रामस्य ...

इति रामायणे ।)

अवेक्षितं, त्रि, (अव + ईक्ष + क्त) । मनुः ।

"...

... ।" (... रघुवंशे । "...")

अवेध, त्रि, (न वेधं विधि ...) ...

("...

इति ...)

अवेद्य, त्रि, (अव + ...) ... ।

अवेध, त्रि, (...) ... ।

अवेक्षणं, क्ली, (अव + ...) ... ।

...कामादि वार्य्यान्... रूपनामानः स च" ।
...प्प ध्योप्प इति भरताः । मध्यवर्ज्जमान-
...
...मुदाहतम् ।
...मित्युक्तं प्रोक्तं लिङ्गाविचारं सुरम्" ॥
...कृत्तिवासम् ॥)
पुं, (अव+दम् । बीजादित्वात्...) वसाः ।
...मुक्ता । इति शब्दरत्नावली भागसुन्दरी च ॥
...प्रयोगो यथा,—
...विश्वमन्देयोदीषद्वतरैः ।
...दीप्तिमाद्यमनं विशेषाव्ययमाद्यम्" ॥
...वैद्यकचक्रपाणिदत्तः ।)
..., पुं, (वि+अत्र+क्त । ततो नञ्समासः ।)
...। शिवः । कन्दर्पः । इति मेदिनी । मूर्खे इति
...। अस्फुटे त्रि ।)
..., क्ली, प्रकृतिः । आत्मा । इति हेमचन्द्रः ।
...दादि । परमात्मा । इति मेदिनी ॥
...योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ।
...सर्व्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ" ॥
इति मानवे ॥
...मतादौ अज्ञातराज्यादिः । अव्ययः । सांख्यमते
...कारणं रूपादिहीनतया चक्षुरादगोचरं
...धानं महदादि ।
"महतः परमव्यक्तमव्यक्तात् पुरुषः परः" ।
इति कठोपनिषद् ॥
...दान्तमते सूक्ष्मशरीरं सुषुप्त्यवस्थायां शब्द-
...वृत्तिनिमित्तैर्जातिगुणक्रियासम्बन्धैर्व्वर्ज्जितं नि-
...र्व्विकारं निराकारं ब्रह्म । परमात्मा, मायोपा-
...धिकं ब्रह्म, सूक्ष्ममतीन्द्रियं लिङ्गग्राह्यं परब्रह्म ।
...दुक्तम्,—
"अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम्" ।
...रूपादिविहीनत्वेन चक्षुराद्यगोचरो योगाभ्या-
...सावसेयो भावः ।
"नाद्यं सदः कारणमात्मवायो
बुद्धेरिवाव्यक्तमुदाहरन्ति" । इति रघुवंशे ॥
...प्रकृतिः । तथा हि,—"यत् सर्व्वस्य जगतो
...बीजभूतमव्याकृतमनामरूपमतत्त्वं सर्व्वकार्य्यकार-
...णशक्तिसमाहाररूपं अव्यक्ताव्याकृताकाशादिना-
...वाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वट-
...कणिकायामिव वटवृक्षशक्तिः । सत्त्वादिरूपेण
...निरूप्यमाणे व्यक्तिरस्य नास्तीत्यव्यक्तम्" ।
...दुक्तम् । "हेतुमदनित्यमव्यापि सक्रियमनेक-
...माश्रितं लिङ्गम् । सावयवं परतन्त्रं व्यक्तं विप-
...रीतमव्यक्तम्" ॥ ० ॥ सर्व्वभूतानां कारणमकारणं
...सत्त्वरजस्तमोलक्षणमरूपमखिलस्य जगतः स-
...म्भवहेतुरव्यक्तं नाम । तदेकं बहूनां क्षेत्रज्ञाना-
...मधिष्ठानं समुद्र इवोदकानां भावानां" ॥ इति
...सुश्रुतः ॥
"अनादिः पुरुषो नित्यो विपरीतस्तु हेतुजः ।
...सदकारणवन्नित्यं दृष्टं हेतुमदन्यथा ॥
तदेव भावादग्राह्यं नित्यत्वान्न कुतश्चन ।
...भावाञ्ज्ञेयं तदव्यक्तमचिन्त्यं व्यक्तमन्यथा" ॥ इति ॥

"अव्यक्ताव्यक्ता चेतनाः प्रावृतो विभुरव्ययः" ।
इति च ॥
"यतोऽव्यक्त पुरुषाख्यां लिङ्गग्राह्यमतीन्द्रियं" ।
इति च ॥
"अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः" ।
इति च चरकः ॥)
अव्यक्तरागः, पुं, (न व्यक्तोऽस्पष्टो रागो रक्तिमा ।)
ईषल्लोहितवर्णः । तत्पर्य्यायः । अरुणः २ । इत्य-
मरः ॥ ताम्रः ३ गौरः ४ । इति जटाधरः ॥
अव्यङ्गः, त्रि, (न सन्ति व्यङ्गानि यस्य ।) व्यङ्ग-
रहितः । अविकलाङ्गः । यथा,—
"तत आहाय धर्म्मज्ञं ब्राह्मणं वेदपारगं ।
अव्यङ्गावयवं पूज्य गन्धधूपार्घ्यमालादिभिः" ॥
इति मत्स्यपुराणे ६६ अध्यायः ॥
अव्यङ्गा, स्त्री, (अवेर्म्मेषस्य अङ्गं अङ्गमिव अङ्गं
यस्याः ।) शूकशिम्बी । इति केचित् ॥ अमर-
कोषे अव्यण्डा इति तट्टीकायां अव्यङ्गा इति
च पाठः ॥ व्यङ्गरहिते अविकलाङ्गे च त्रि ॥
अव्यङ्ग्यं, क्ली, (नास्ति व्यङ्ग्यमर्थो यस्मिन् ।) व्यङ्ग्या-
र्थरहितकाव्यं । यथा,—
"अव्यङ्ग्यमुत्तमं काव्यमव्यङ्ग्यमधमं स्मृतं ।
विविधव्यङ्ग्यमव्यङ्ग्यं मध्यमं परिकीर्त्तितं" ॥
इति काव्यचन्द्रिका ॥
अव्यञ्जनः, पुं, (नास्ति व्यञ्जनं शुभलक्षणं शृङ्गं, यस्य ।)
शृङ्गहीनपशुः । इति हलायुधः ॥ अस्फुटे त्रि ।
(अनुद्भिन्नरजस्तनादिचिह्ना कन्या । यथा,—
"असंप्राप्तरजा गौरी प्राप्ते रजसि रोहिणी ।
अव्यञ्जना भवेत् कन्या कुचहीना च नग्निका" ॥
इति पद्मतन्त्रे ।)
अव्यण्डा, स्त्री, (न विगतमण्डं वीजमस्याः ।) अव्यण्डा
इति कुत्रचिदमरकोषे पाठः ॥ आलकुशीति
भाषा ।
अव्यथः, त्रि, (नास्ति व्यथा यस्य सः ।) पीडारहितः ।
व्यथाशून्यः । सर्पे पुं । इति मेदिनी ॥
अव्यथा, स्त्री, (न व्यथा । नञ्तत्पुरुषः ।) हरी-
तकी ॥ पद्मचारिणी । इत्यमरः ॥
अव्यथिः, पुं, अश्वः । सङ्ग्रामे न विभ्यतीति अव्यथिः ।
व्यथ भयसञ्चलनयोः सर्व्वधातुभ्य इति इन्प्रत्ययः
ततो नञ्समासः । वेदप्रयोगोऽयं ॥
अव्यथिषः, पुं, (न+व्यथ+टिषच् ।) समुद्रः । सूर्य्यः ।
इति सिद्धान्तकौमुद्या उणादिवृत्तिः ॥
अव्यथिषी, स्त्री, (अव्यथिष+ङीप् ।) पृथिवी ।
अर्द्धरात्रं । इति सिद्धान्तकौमुदी ॥
अव्यथ्यः, त्रि, (न+व्यथ+यत् ।) व्यथाशून्यः ।
इति पाणिनिः ॥
अव्ययं, क्ली, पुं, (न+वि+इन्+अच् ।) शब्द-
विशेषः । तत्परे विभक्तिर्न तिष्ठति अतएव लि-
ङ्गत्रयाविकृतं । तथाच कातन्त्रे,—
"सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु ।
वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययम्" ॥
(क्ली, अनाद्यन्तं विकारशून्यं परब्रह्म । यथा,—
"अनणवस्थूलमह्रस्वमदीर्घमजमव्ययम् ।

यस्य प्रसादात्मगिरं तदक्षरमेवधारयेत्" ॥
इति व्यासयोगे ॥)
अव्ययः, पुं, (नास्ति व्ययो यस्य ।) विष्णुः ।
("नमस्तुभ्य सुरेशाय विष्णवे प्रभविष्णवे ।
पुरुषायाप्रमेयाय शाश्वतायाव्ययाय च" ॥
इति मार्कण्डेयपुराणे ।) व्ययरहिते, त्रि । इति
मेदिनी ॥ (अविनाशी । नित्यपुरुषः । यथा,—
"तमसः परमापदव्ययं पुरुषं योगसमाधिना
रघुः" । इति रघुवंशे ।
"सूक्ष्माभ्यो मूर्त्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम्" ।
इति मानवे ॥)
अव्यर्थं, त्रि, (न व्यर्थः । नञ्तत्पुरुषः ।) अमोघः ।
सफलः । यथा,—
"दुर्निवार्य्यञ्च दुर्द्धर्षमव्यर्थं वैरिघातकम् ।
तेजसा चक्रतुल्यञ्च सर्व्वशस्त्रास्त्रघातकम्" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥
अव्यवसायवान्, [त्] त्रि, (अव्यवसाय+मतुप् ।
मस्य वः ।) व्यवसायरहितः । अव्यवसायी ।
तत्पर्य्यायः । शिथिलः २ । इति त्रिकाण्डशेषः ॥
(अनुशीलनरहितः ।)
अव्यवस्था, स्त्री, (वि+अव+स्था+अङ् । ततो
नञ्समासः ।) अवसिद्धान्तः । अविधिः । शास्त्र-
विरुद्धव्यवस्था । इति नञ्समासनिष्पन्ना ॥
(चपले । यथा, कुमारे,
"स्थलारविन्दश्रियमव्यवस्थां" ॥)
अव्यवस्थितः, त्रि, (न व्यवस्थितः । नञ्समासः ।)
नीतिशास्त्रादिव्यवस्थानभिज्ञः । सिद्धान्तरहितः ।
यथा,—
"क्षणिदृष्टः क्षणिकस्तुष्टो रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः" ॥
इति हितोपदेशः ॥
अव्यवहार्य्यं, त्रि, (वि+अव+हृ+ण्यत् । ततो नञ्-
समासः ।) व्यवहारायोग्यं । अव्यवहरणीयं ।
यथा । अज्ञानतश्चाण्डालान्त्यस्त्रीगमने तत्तुल्यतया
द्विगुणव्रताचरणे कृतेऽपि न व्यवहार्य्यः । यथा
याज्ञवल्क्यः ।
"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतोऽव्यवहार्य्यस्तु वचनादिह जायते" ॥
मामान्तरेष्वव्यवहार्य्यत्वं याज्ञवल्क्येनोक्तम् ।
"शरणागतबालस्त्रीहिंसकान् संवसेन्न तु ।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्" ॥
"अत्र च कामतो महापातकादिकृत्वापकर्तु-
रव्यवहार्य्यत्वदर्शनात् कामतो बहुतरगुणयुक्त-
शरणागतादिहन्तॄणामव्यवहार्य्यत्वं न तु हीनतर-
हन्तॄणां अन्यथा विषमशिष्टतापत्तिः स्यात्" ।
इति प्रायश्चित्ततत्त्वम् ॥
अव्यवहितं, त्रि, (वि+अव+धा+क्त । ततो नञ्-
तत्पुरुषः ।) व्यवधानशून्यं । तत्पर्य्यायः । संसक्तं २
अपटान्तरं ३ अपदान्तरं ४ । इत्यमरः ॥ तट्टीका
च ॥ लग्नं ५ । इति शब्दरत्नावली ॥ ("सिसा-
"पार्व्वतीशिवयोर्देवैः सुरतं कुर्व्वतोः किल।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नः कृतः पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभ्रंशखाक्षमाना तदा यथा" ॥
पार्व्वत्युवाच।
"कृमिकीटादयोऽप्येते जानन्ति सुरतेः सुखं।
तस्मान्मम सुखभ्रंशात् यूयं वृक्षत्वमाप्स्यथ" ॥
सूत उवाच।
"एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥
तस्मादिमौ विष्णुमहेश्वरावुभौ
बभूवतुर्बोधिवटौ मुनीश्वराः।
बोधिस्त्वयं चार्किदिनं विनैव
न संस्पृशेद्दर्कजवारयोगात्" ॥
इति पाद्मे उत्तरखण्डे १६० अध्यायः ॥ * ॥
ऋषय ऊचुः।
"अस्पृश्यत्वं कथं जातं सूत बोधितरोः स्वयं।
स्पृश्यत्वञ्च कथं प्राप्तमथार्य शनिवासरे" ॥
सूत उवाच।
"समुद्रमथनाद्यानि रत्नान्यायुः सुरोत्तमाः।
श्रियञ्च कौस्तुभं तेन विष्णवे प्रददुः सुराः ॥
यावदङ्गीचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः।
तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनं" ॥
लक्ष्मीरुवाच।
"असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते।
तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन ॥
विवाह्योद्वाहमां पश्चात् एष धर्म्मः सनातनः।
तस्मात् धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन ॥
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय मुनये सुदीर्घतपसे तदा ॥
आमवाक्यानुरोधेन तामलक्ष्मीं ददौ किल।
स्थूलोष्ठीं शुक्लवदनां विरूपां बिभ्रतीं तनुं ॥
खरदारुणनयनां रूक्षपिङ्गशिरोरुहां।

स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य समाश्रमं ॥
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्।
होमधूमसुगन्धाढ्यं वेदघोषेण नादितं ॥
आश्रमं तं विलोक्याथ ज्यष्ठा मावदीदिदं।"
ज्येष्ठोवाच।
"नहि वासानुरूपोऽयं वेदध्वनियुतो मम ॥
नागमिष्ये भो ब्रह्मन् नयस्वान्यत्र मां ध्रुवं"।
उद्दालक उवाच।
"कथं नायासि किञ्चात्र वर्त्तते समतं तव।
तव योग्या च वसतिः का भवेत्तद्वदस्व मां" ॥
ज्येष्ठोवाच।
"वेदध्वनिर्भवेद्यस्मिन् अतिथीनाञ्च पूजनं।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहं ॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहं ॥
द्यूतशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्म्मम ॥
वृद्धसज्जनविप्राणां यत्र स्यादवमाननं।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहं" ॥
सूत उवाच।
"इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह" ॥
उद्दालक उवाच।
"अश्वत्थवृक्षमूलेऽस्मिन् अलक्ष्मीः श्रूयतां त्वयं।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः" ॥
सूत उवाच।
"इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा न तं ददर्श सा ॥
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता।
तत्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् ॥
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा"।
लक्ष्मीरुवाच।
"स्वामिन् मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो यद्यहं प्रिया" ॥
सूत उवाच।
"लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्" ॥
विष्णुरुवाच।
"अश्वत्थवृक्षमासाद्य सदालक्ष्मीः स्थिरा भव।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः ॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
अस्पृश्योऽसौ भवेत्तस्मात् मन्दवारं विना किल" ॥
इति पाद्मे उत्तरखण्डे १६१ अध्यायः ॥ * ॥
वैशाखमासे तस्य सेचनफलं यथा,—
"वैशाखे सिञ्चयेन्नित्यं विष्णुमश्वत्थरूपिणं।
चतुर्वर्गफलावाप्तिहेतवे वैष्णवो जनः ॥
गण्डूषमात्रतोयेन कुर्य्याद्योऽश्वत्थसेचनं।
सोऽपि याति परं स्थानं विमुक्तः पापकोटिभिः ॥
अश्वत्थमूलं वि[illegible] [illegible]रति शिलादिभिः।
[illegible]र्ं तस्मै न [illegible] [illegible] ॥
[illegible]ग्रामं कु[illegible]
आ[illegible] [illegible]न्ते [illegible]

यथाश्वत्थतले विप्र धर्म्मकर्म्म विधीयते ।
न्यूनातिरिक्तता न स्यात्तस्मिन् कर्म्मणि जैमिने ॥
तत्र तीर्थानि सर्व्वाणि त्रिस्रोतादीनि जैमिने ।
यत्राश्वत्थतरुस्तिष्ठेत् एकोऽपि शाखिनां वरः ॥
अश्वत्थपूजको यस्तु स एव हरिपूजकः ।
अश्वत्थमूर्त्तिर्भगवान् स्वयमेव यतो द्विज ॥
तस्मान्नाद्विजश्रेष्ठ योऽश्वत्थं हन्ति मूढधीः ।
संसारे नास्ति तत्कर्म्म यत् कृत्वा स च शुध्यति ॥
अश्वत्थो वृक्षराजोऽयं हरिमूर्त्तिः प्रकीर्त्तितः ।
तस्मादश्वत्थहन्तृणां त्राता कोऽपि न विद्यते ॥
अश्वत्थं पश्यतो विप्र स्पृशतः स्मरतस्तथा ।
देहस्थं पातकं तस्य हरेत् प्रणमतो हरिः ॥
विलोक्याश्वत्थहन्तारं यः शक्तो न निवारयेत् ।
तमेनयुग्मं वडिशैर्दमेनोत्पाद्यते स्वयं ॥
अश्वत्थच्छेदनं मूढ मा कुर्व्विति वदेन्न यः ।
तस्य जिह्वां छुरिकया स्वयं छिनत्ति भास्करिः ॥
अश्वत्थशाखामेकां यः स्वल्पामपि निहन्ति यः ।
स कोटिब्रह्महत्यानां फलं प्राप्नोति मानवः ॥
यत्पापं ब्रह्महत्यायां गुरुस्त्रीगमने च यत् ।
सुरापाने तथा स्तेये न्यासापहरणे तथा ॥
यत्पापं भ्रूणहत्यायां गोहत्यायां द्विजोत्तम ।
स्त्रीहत्यायाञ्च यत्पापं परस्त्रीगमने तथा ॥
शरणागतहत्यायां हत्यायां सुहृदां तथा ।
विश्वासघातकरणे परहिंसाविधौ च यत् ॥
यत् पापं परनिन्दायां हरिवासरभोजने ।
अश्वत्थच्छेदनाद्घोरं तत् पापं प्राप्यते जनैः ॥
विष्णुमूर्त्त्यंशो मोहादश्वत्थस्य निहन्ता यः ।
तत्तुल्यः पातकी कोऽपि न भूतः क्षितिमण्डले ॥
वराश्वत्थमाहात्म्यं सर्व्वपापप्रणाशनं ।
साक्षादेव स्वयं विष्णुरश्वत्थोऽखिलविश्वराट् ॥
तद्भक्तिं कुर्व्वतः पुंसो विद्यते नाशुभं क्वचित् ।
अश्वत्थं सेवते यस्तु विष्णुबुद्ध्या नरोत्तम ॥
तस्य प्रसन्नो भगवान् ददाति परमं पदं" ।
इति पाद्मे क्रियायोगसारे अश्वत्थसेवनं नाम
११ अध्यायः ॥
(बन्धिरूपः संसारवृक्षः । यथा, गीतायाम् ।
"ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्" ॥
विस्तरस्तु गीतायाः पञ्चदशेऽध्याये द्रष्टव्यः ॥)
[अश्व]त्थभेद, पुं, (अश्वत्थस्य भेदो विभिन्नता यस्मिन् ।)
[इ]न्द्रलोहितः । इति राजनिर्घण्टः ॥
[अश्व]त्था, स्त्री, पूर्णिमातिथिः । इति मेदिनी ॥
[अश्व]त्थामा, [न्] पुं, (अश्वस्येव स्थाम बलं यस्य ।
... तस्य तः । यद्वा अश्व इव
... + स्था + मनिन् ।) द्रोणा-
[चार्य]पुत्रः । स तु चिरजीवी महारथी च ।
... । अपीतनः २ द्रौणायन ३ । इति
... । द्रौणि ४ । इति ...
... ५ । (अश्वं हन् ...
... अश्वत्थामेति नाम । यथा च
... ।

स जातमात्रो व्यनदत् यथैवोच्चैःश्रवा हयः ॥
तच्छ्रुत्वान्तर्हितं भूतमन्तरीक्षस्थमब्रवीत् ।
अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम् ॥
अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भविष्यति" ।)
अश्वत्थी, स्त्री, (क्षुद्रोऽश्वत्थः । अश्वत्थ + अल्पार्थे
ङीप् ।) वृक्षविशेषः । पिप्पली इति लोके ।
तत्पर्य्यायः । लघुपत्री २ पवित्रा ३ ह्रस्वपत्रिका
४ पिप्पलीका ५ वनस्था ६ अश्वत्थिका ७ । अस्या
गुणाः । मधुरत्वं । कषायत्वं । अस्रपित्तनाशित्वं ।
विषदाहप्रशमनकारित्वं । गुर्व्विण्या हितकारि-
त्वञ्च ॥ इति राजनिर्घण्टः ॥
अश्वदंष्ट्रा, स्त्री, (अश्वस्य दंष्ट्रा इव आकृत्या ।) गो-
क्षुरवृक्षः । इत्यमरः ॥
अश्वन्तं, क्ली, (अशू-(श)-नामन्तो यस्मिन् ।) अशुभं ।
दैन्यं । चुल्ली । अनवधि । मृतं । इति हेमचन्द्रः ॥
अश्वपाल, पुं, (अश्वान् पालयतीति, अश्व +
पाल + कर्म्मणि उपपदे अण् प्रत्ययः ।) घोटक-
रक्षकः । इति अश्वपालिकशब्दटीकायां दुर्गा-
दासः ॥ सहस् इति भारतीभाषा । ("दत्ता-
तङ्कोऽङ्गनानामनुसृतसरणिः संभ्रमादश्वपालैः प्र-
भ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दु-
रायाः" इति रत्नावल्याम् ।)
अश्वपुच्छी, स्त्री, (अश्वस्य पुच्छमिव केशरोऽस्याः ।)
माषपर्णीवृक्षः । इति राजनिर्घण्टः ॥
अश्ववाल, पुं, (अश्वस्य वाल इव । काशस्य पुष्पं
अश्ववालवत् विभाति ।) काशः । केशया इति
भाषा । इति त्रिकाण्डशेषः ॥
अश्वमहिषिका, स्त्री, (अश्वमहिषयोर्वैरम् । द्वन्द्वा-
द्वुन् वैरमैथुनिकयोरिति अश्वमहिष + वुन् ।)
अश्वमहिषयोर्नित्यवैरं । इति शब्दरत्नावली ॥
अश्वमारः } पुं, (अश्वं मारयति । अश्व + मृ +
अश्वमारकः } णिच् + अण् ।) करवीरवृक्षः । इति
शब्दरत्नावली ॥ ("लाक्षारेवतकुटजाऽश्वमार-
कटफलहरिद्राद्वयनिम्बसप्तच्छदमालत्यस्त्रायमाणा
चेति" । इति सुश्रुते ॥
"करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः" ।
इति भावप्रकाशः ॥
"तत्र सौतश्वाश्वमारगुञ्जेत्यादि ।
समुत्थस्य कल्पस्थानेऽभिहितं ।")
अश्वमुख, पुं, (अश्वस्य मुखमिव मुखं यस्य । किन्नरः ।
इति हलायुधः । (स्त्री, किन्नरी । किम्पुरुषस्त्री ।
यथा कुमारे ।
"न दुर्व्वहश्रोणिपयोधरार्त्ता
भिन्दन्ति मन्दां गतिमश्वमुख्यः" ।)
अश्वमेध, पुं, (अश्वः मेध्यते हिंस्यते यत्र । मेध-
हिंसने + घञ् ।) यज्ञविशेषः । इति जटाधरः ॥
... शास्त्रविधिनाश्वमश्वं संमोच्य कपाले
जयपत्रं बद्धा भ्रमेत् तद्रक्षार्थं पुरुषविशेषं नियो
जयेत् संवत्सरान्ते अश्वे आगते सति अथवा
केनापि संबद्धे युद्धं कृत्वा तमानीय यथाविधि
वधं कृत्वा तद्वपया होमः कार्य्यः । कामनानु
सारेण तत्फलं । मोक्षः ब्रह्महत्यापापक्षयः स्वर्गश्च ।

यथा । आपस्तम्बः ।
"राजा सार्व्वभौमः अश्वमे...
भौमः" । इति ॥ प्रायश्चि...
विष्णुः ।
"अनुपातकिनस्त्वेते महापात...
अश्वमेधेन शुध्यन्ति तीर्थानु...
अपि च ।
"अश्वमेधेन शुध्यन्ति महापातकि...
इति विष्णूक्ताश्वमेधस्य प्रायश्चि...
सर्व्वाभयसाधकस्य तु तस्यापि न...
इति प्रायश्चित्ततत्त्वम् ॥ • ॥ कलौ...
यथा वृहन्नारदीये ।
"दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधौ...
महाप्रस्थानगमनं गोमेधञ्च तथा मखं...
इमान् धर्म्मान् कलियुगे वर्ज्यानाहु...
इत्युद्वाहतत्त्वम् ॥ अन्यच्च । ब्रह्मपुराण...
"नराश्वमेधौ मद्यञ्च कलौ वर्ज्या...
इति तिथ्यादितत्त्वम् ॥ • ॥
यथा,—
"वैशाखे मासि यः कुर्य्यात् प्रा...
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मा...
इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥
अपि च ब्रह्माण्डे ॥
"स्नानन्तु भक्त्या गङ्गायां कर्त्तुकाम...
पदे पदेऽश्वमेधस्य फलं भवेत्स्य न...
इति प्रायश्चित्ततत्त्वम् ॥
अश्वमेधिक, पुं, (अश्वमेधाय हितः ।
ठक्, ठञ् वा ।) अश्वमेधाय...
इति जटाधरः ॥ (श्रीवेदव्यासप्रणीत...
भारतान्तर्गतं चतुर्द्दशपर्व्व । यथा,—
"ततोऽश्वमेधिकं पर्व्व सर्व्वपा...
"ततोऽश्वमेधिकं पर्व्व प्रोक्तं त...
अश्वमेधीय, पुं, (अश्वमेधाय हि...
छ ।) अश्वमेधयज्ञीयाश्वः । त...
इत्यमरः ॥ तस्य लक्षणम् ।
"कालाम्भोधरसन्निभः सकलकु...
यस्य पार्श्वविभावर्द्धचन्द्राकारौ ...
पुच्छं विद्युत्प्रतीकाशमुदरं कुन्दस...
पादाश्चैव हरिद्वर्णाः कर्णौ सिन्दूर...
ज्वलदग्निनिभा जिह्वा चक्षुषी ...
विराजितो रोमराज्या सानुलोम...
विचित्रैर्विविधैर्वर्णैश्चित्रो रत्नविर्दि...
यो वेगे वायुतुल्यः स्याद्दुर्वेदैश्चा...
यस्य गात्रोद्भवो गन्धो गन्धर्व्वान...
एवं लक्षणसंयुक्तो यज्ञीयः परिकीर्त्तितः ।
अश्वस्य मालकाद्यातिबलवान् ...
पुंस्तुल्यः सुहृदापि ...
इति वाशिष्ठरामायणम् ॥
अश्वयुक्, [ज्] स्त्री, (अश्वं युनक्ति ...
अश्व + युज् + क्विप् ।) अश्विनीनक्ष...
अश्वयुज[ज्] } पुं, (अश्वेन नक्षत्रेण युक्ता ...
अश्वयुज. } मासी अश्वयुक्...

इत्यमरमालायाम्। ("अश्वमुरं एतत्पदेन तु … कुर्यादिति स्मृतिः" । आश्वपश्चमुरः। अर्याः मुखनः।)

…रः, पुं, (अश्वान् रक्षतीति। अश्व + रक्ष + …।) घोटकरक्षकः। अश्वपालः। इति जटा-धरः॥

…घ्नः, पुं, (अश्वान् हन्ति। अश्व + हन् + …।) करवीरवृक्षः। इति राजनिर्घण्टः॥

…ला, स्त्री, (अश्वस्य लालेवाकृतिर्यस्य।) सर्प-…षः। तत्पर्य्यायः। गन्धाहिः २ गन्धसर्पः ३। …विशेषः।

…, पुं, (अश्वस्य वर्णमिव वर्णो यस्य।) विभ्रमः। … शब्दरत्नमाला॥

…वं, स्त्री, अश्ववडवानां समाहारः। अश्ववड-…द्वन्द्वे अश्ववडवौ। अश्ववडवानां द्वन्द्वे अश्व-…वाः। इत्यमरटीकायां भरतः सारसुन्दरी च। …दा घुड़ीर समाहारद्वन्द्वसमासे स्त्रीवल्लिङ्गेर …वचन एव इतरेतरद्वन्द्वे पुंलिङ्गेर द्विवचन बहु-…न एव इति भाषा॥

…हः, पुं, (अश्वेन उह्यते यः सः। अश्व + वह + …।) अश्ववाहकः। इति जटाधरः। घोड़-…सोयार इति भाषा॥

…रः, पुं, (अश्वं वारयतीति। अश्व + वृ + …।) सादी। इति हेमचन्द्रः। घोड़सओयार …र भाषा॥

("परस्परोत्पीड़ितजानुभागा
दुःखेन निश्चक्रमुरश्ववाराः"।
… माघे।)

…रणः, पुं, (अश्वं वारयति + अश्व + वृ + णिच् …ल्यु।) गलकम्बलरहितगोसदृशपशुविशेषः। …पर्य्यायः। गवयः २ वनगवः ३ गोसदृक्षः ४। … हेमचन्द्रः॥

…वित्, [द्] पुं, (अश्वं अश्वविद्यां वेत्तीति। … + विद् + क्विप्।) नलराजः। इति त्रि-…ण्डशेषः॥ (नलस्य राज्ञोऽश्वविद्याज्ञता वर्णिता …रते। यथा।

…ऊकस्तमुवाचाथ देहि विद्यामिमां मम।
…ऽपि चाश्वहृदयं गृहाण पुरुषर्षभ!।
…पर्णं ततो राजा बाहुकं कार्य्यगौरवात्।
…ज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वचः॥
…र्षं त्वं गृहाणेदमक्षाणां हृदयं परं।
…क्षेपो मेऽश्वहृदयं त्वयि तिष्ठतु बाहुक"॥
…हुको बाहुकवेशधारी नलः।)

…द्यः, पुं, घोटकचिकित्सकः। सालोतरी इति …न्दिभाषा। अश्वस्य वैद्यः इति षष्ठीतत्पुरुष-…समासनिष्पन्नः॥

…ला, स्त्री, घोटकगृहं। घोड़ार साहशाल। …स्तवल् इति भाषा। यथा वाजिशाला तु …दूरा। इत्यमरः॥ द्वे अश्वावस्थानगृहे। वाजिनो …स्य शाला गृहं वाजिशाला। अश्वशालादि च। … तट्टीकायां भरतः॥ ("कोषागारमायुधा-…रमश्वशालां हस्तिशालाश्च"। इति भारते।)

अश्वसादिरा स्त्री, (अश्वसादयतीति … इति सुन्। अश्वसादयो-वेगम्। इति शब्दरत्नावली॥

अश्वषड्गवं, क्ली, (अश्व + षड्गवच्।) अश्वषट्कं। षड्श्वाः। इति पाणिनिः॥

अश्वसेनसुतनन्दनः, पुं, (अश्वसेनो नृपस्तस्य नन्दनः।) शान्तिकुमारः। इति हेमचन्द्रः॥

अश्वा, स्त्री, (अश्व + टाप्।) घोटकी। घुड़ी इति भाषा। तत्पर्य्यायः। वामी २ वड़वा ३। इत्यमरः॥

अश्वारिः, पुं, (अश्वानामरिः।) महिषः। इति जटाधरः॥

अश्वारूढ़ः, पुं, (अश्व आरूढ़ो येन।) अश्वारोहः। घोटकोपरि कृतारोहणः। यथा। "अश्वारोहान् सादिनः"। इत्यमरः॥ द्वे अश्वारूढ़े। अश्वमारो-हन्ति अश्वारोहाः टात् यञ्। सादयन्ति ग्रम-यन्ति अश्वान् सादिनः ग्रहादित्वात् णिन्। इति तट्टीकायां भरतः॥

अश्वारोहः, त्रि, (अश्वमारोहतीति। अश्व + आ + रुह + अण्।) अश्वपृष्ठस्थितयोद्धा। घोड़सोयार इति भाषा। तत्पर्य्यायः। सादी२ इत्यमरः॥ अश्ववहः ३। इति जटाधरः॥ अश्ववारः ४ तुरगी ५। इति हेमचन्द्रः॥

अश्वारोहा, स्त्री, अश्वगन्धावृक्षः। अश्ववाहके त्रि। इति मेदिनी॥ (अश्वगन्धाशब्देऽस्याः गुणा व्याख्याताः।)

अश्वारोही, [न्] त्रि, अश्वारोहणविशिष्टः। अश्वा-रूढ़ः। अश्वारोहणकर्त्ता। अश्वारोहणशीलः॥ घोड़सोयार इति भाषा। अश्वमारोढुं शील-मस्येत्यर्थे णिन्प्रत्ययेन निष्पन्नः॥

अश्वावरोहकः,पुं, अश्वगन्धावृक्षः। इति रत्नमाला।

अश्वाक्षः, (अश्वस्याक्षीव।) देवसर्षपवृक्षः। इति राजनिर्घण्टः॥

अश्विनी, स्त्री, (अश्वः अश्वरूपं विद्यते यस्याः। अश्व + इन् + ङीप्।) सप्तविंशतिनक्षत्रान्तर्गतप्रथम-नक्षत्रं। अश्विन्यादयो रेवत्यन्ताः सप्तविंशति-तारा दक्षस्यापत्यत्वात् दाक्षायण्य उच्यन्ते। तत्प-र्य्यायः। अश्वयुक् २ दाक्षायणी ३। इत्यमरः॥ सा चन्द्रस्य भार्य्या। नवपादात्मकमेषराशेरादि-चतुष्पादरूपा च॥ अस्या रूपं। घोटकमुखा-कृतितारात्रयात्मकं। अस्या अधिष्ठात्री देवता अश्वारूढ़पुरुषः। इति ज्योतिःशास्त्रं। तस्यां जातफलं। "सदैव देवाभ्युदितो विनीतः सत्त्वा-न्वितः प्राप्तसमस्तसम्पत्। योषाविभूषात्मज-भूरितोषः स्यादश्विनीजन्मनि मानवस्य"। इति कोष्ठीप्रदीपः॥ तस्य मस्तकोपरि उदये कर्कट-लग्नस्य १।३० त्रिंशत्पलाधिकदण्डैको गतो भ-वति। यथा। "तन्वि घोटकमुखाकृतौ त्रिभे मस्तकोर्द्धपथभाजि वाजिनि। चारुचन्द्रमुखि कर्कटोदयात् निर्गता गगनरन्ध्रलिप्तिका"॥ इति श्रीकालिदासकृतराशिलग्ननिर्णयः॥

अश्विनीकुमारौ, पुं, (अश्विन्या अश्वीभूतसंज्ञानाम-सूर्य्यपत्न्याः यमजौ कुमारौ।) अश्विनीसुतौ। अश्वीभूतसंज्ञानामसूर्य्यपत्न्याः यमजपुत्रौ। तौ देवचिकित्सकौ। (यथा हरिवंशे।
"विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यामरिन्दम!।
तस्य भार्य्याभवत्संज्ञा त्वाष्ट्री देवी विवस्वतः"॥
"देवौ तस्यामजायेतामश्विनौ भिषजां वरौ"।)
नित्यद्विवचनान्तश्चायं।

अश्विनीपुत्रौ, पुं, (अश्विन्याः पुत्रौ।) स्वर्वैद्यौ। इति हेमचन्द्रः॥

अश्विनीसुतौ, पुं, (अश्विन्याः सुतौ।) अश्विनीपुत्रौ। तयोः पर्य्यायः। स्वर्वैद्यौ २ अश्विनौ ३ दस्रौ ४ नासत्यौ ५ आश्विनेयौ ६। इत्यमरः। नासिक्यौ ७ गदागदौ ८। इति जटाधरः॥ पुष्करस्रजौ ९। इति शब्दरत्नावली॥

अश्विनौ, पुं, (प्रशस्ता अश्वाः सन्ति ययोः। इनिः। यद्वा, अश्विन्याम् जातौ। तन्निवेलेत्यतो नक्ष-त्रेभ्यो बहुलमिति लुकि लुक्तद्धितलुकीति ङीपो लुक्।) अश्विनीकुमारौ। इत्यमरः॥
("त्वाष्ट्री तु सवितुर्भार्य्या वड़वारूपधारिणी।
असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ"॥
इति महाभारते।
"किमश्विनौ सोमरसं पिपासू"।
इति भट्टौ।)
("अश्विनौ देवभिषजौ यज्ञवाहाविति स्मृतौ।
दक्षस्य हि शिरश्छिन्नं पुनस्ताभ्यां समाहितं॥
प्रशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च।
वज्रिणश्च भुजस्तम्भस्ताभ्यामेव चिकित्सितः॥
चिकित्सितश्च शीतांशुर्गृहीतो राजयक्ष्मणा।
सोमाद्विपतितश्चन्द्रः कृतस्ताभ्यां पुनः सुखी॥
भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः।
वीतवर्णस्वरोपेतः कृतस्ताभ्यां पुनर्युवा॥
एतैश्चान्यैश्च बहुभिः कर्म्मभिर्भिषगुत्तमौ।
बभूवतुर्भृशं पूज्याविन्द्रादीनां महात्मनां॥
ग्रहाः स्तोत्राणि मन्त्राणि तथान्यानि हवींषि च।
धूम्राश्च पशवस्ताभ्यां प्रकल्प्यन्ते द्विजातिभिः॥
प्रातश्च सवने सोमं शक्रोऽश्विभ्यां सहाश्नुते।
सौत्रामण्याञ्च भगवानश्विभ्यां सह मोदते॥
इन्द्राग्नी चाश्विनौ चैव स्तूयन्ते प्रायशो द्विजैः।
स्तूयन्ते वेदवाक्येषु न तथान्या हि देवताः॥
अजरैरमरैस्तावद्विबुधैः साधिपैर्ध्रुवैः।
पूज्येते प्रयतैरेवमश्विनौ भिषजाविति॥"
इति चरकः॥
"श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति ततो देवा अश्विनावभिगम्योचुः। भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः। भवद्भ्यां यज्ञस्य शिरः सन्धातव्यं। तावूचतुरेवमस्त्विति। अथ तयोरर्थे देवा इन्द्रं यज्ञभागेन प्रासादयन्। ताभ्यां यज्ञस्य शिरः संहितमिति"॥ इति सुश्रुतः॥)

अश्वीनः, त्रि, एकाश्वकरणकदिनैकगम्यस्थानादिः। आश्विन इत्यमरः॥ हृस्वाभावपक्षे अश्विनः॥

अश्वीयं, क्ली, (अश्वानां समूहः। अश्व + छ।) अश्व-वृन्दं। अश्वसमूहः। तत्पर्य्यायः। आश्वं२। इत्य-मरः॥

अश्वीयः, त्रि, (अश्वाय हितः । अश्व + छ ।) अश्वहितकारी । इति मेदिनी । अश्वसम्बन्धीयः ।

अष भृ (भ्वादि-उभं-सकं-सेट् ।) दीप्तौ । ग्रहणे । गतौ । इति कविकल्पद्रुमः । भृ अषति अषते । इति दुर्गादासः ।

अषड्क्षीणः, त्रि, (अविद्यमानानि षड्क्षीणि यत्र । अषड्क्षाशितङ्ग्वलङ्कर्म्मेति सार्थे खः । अक्षिशब्दोऽत्र श्रोत्रेन्द्रिये वर्त्तते । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् ।) यो मन्त्रादिर्द्वाभ्यां क्रियते न तृतीयादीनां गोचरः । इत्यमरः । दुइजने करा मन्त्रणा इति भाषा ।

अषाढः, पुं, (अषाढया युक्ता पौर्णमासी आषाढी, सा यत्र मासे अण् वा कृत्सः । आषाढी पूर्णिमा प्रयोजनमस्य । प्रयोजनार्थे अण् ।) आषाढमासः । व्रते पालाशदण्डः । इत्यमरटीकायां त्रिकाण्डशेषः ।

अषाढकः, पुं, (अषाढ + सार्थे कन् ।) आषाढमासः । इति शब्दमाला ।

अष्ट, [न्] त्रि, (अश्नुते अश् व्याप्तौ कन् ।) सप्तश्चाष्टौ तुट् चेति कनिन् ।) संख्याविशेषः । ८ आट इति भाषा । नित्यबहुवचनान्तशब्दोऽयं । इति व्याकरणं । अष्टावाचकशब्दाः । योगाङ्गं १ वसुः २ शिवमूर्त्तिः ३ दिग्गजः ४ सिद्धिः ५ ब्रह्मश्रुतिः ६ व्याकरणं ७ दिक्पालः ८ अहिः ९ कुलाद्रिः १० ऐश्वर्यं ११ । इति कविकल्पलता ।

अष्टकः, त्रि, (अष्टावध्यायाः परिमाणमस्य । अष्टन् + कन् ।) अष्टसंख्या । अष्ट एवाष्टकः सार्थे कप्रत्ययः । अष्टसंख्याविशिष्टं यथा,—"गङ्गाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं सुखदं मनुष्य" । इति वाल्मीकीयगङ्गाष्टकं । अपि च ।

"अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनं ।
हंसं नारायणञ्चैव एतन्नामाष्टकं शुभं" ।

इति ब्रह्मपुराणे श्रीविष्णुनामाष्टकं स्तोत्रं ।

अष्टकर्णः, पुं, (अष्टौ कर्णा यस्य ।) ब्रह्मा । इति शब्दरत्नावली ।

अष्टका, स्त्री, (अश्नन्ति पितरोऽस्याम् । अश् + तकन् ।) श्राद्धविशेषः । तिथिभेदः । तद्यथा । पौषमाघफाल्गुनमासीयकृष्णाष्टमी । आश्विनकृष्णाष्टमी च । एतासु श्राद्धमावश्यकं । यथा । आग्रहायण्या ऊर्द्ध्वं तिस्रष्कृष्णाष्टमीषु श्राद्धानि विधानि । यथा गोभिलः ।

"अष्टका रौद्र्यमाग्रहायण्यामिक्षाष्टमी" ।

इति । ब्रह्मपुराणे ।

"त्रिस्रस्त्वाद्र्र मूले स्युरष्टकाश्च एव च ।
सर्वस्वे वरिष्ठा हि पूर्वा चैषो विभाव्यते ।
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी ।
आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्सदा ।
शाकैः कार्य्या तृतीया स्यादेव द्रव्यगतो विधिः" ।
... कृष्णाष्टम्यां समासाद्या अमावास्या हि ... आश्वयुजस्य कृष्णाष्टमी । ... वैश्वदेविकी च । मांसैः पशोः । तथा च गोभिलः ।

"यद्युवाल्पतरसम्भारः स्यात्तदापि पशुनैव कुर्य्यात्" इति । यद्युवेति निपातसमुदायो यद्यर्थे पशुरपि छाग एव । छागोऽनादेशे पशुः । इति गौतमात् । न च तैष्या ऊर्द्ध्वमष्टम्यां गौः । इति गोभिलसूत्रेण गवोपदेशात् कथमनुपदिष्टत्वमिति वाच्यं । तदसम्भवे पशुरित्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुपदिष्टत्वात् । तैषी पौषी । वस्तुतस्तु हरिवंशे मृगोऽपि विहितः । यथा,—

"इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय श्राद्धाय मृगं हत्वा महाबलः" ।

इति । क्रिया बधाभावमाह स एव ।

"अवध्यांश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपि" ।

एतदर्द्धं ब्रह्मपुराणेऽपि । आरण्यग्राम्यगम्य- प्रोक्षितत्वं वक्ष्यते । पश्वभावे स्थालीपाकेन । यथा गोभिलः । "अपि वा स्थालीपाकं कुर्व्वीत" । इति । तद्विधानन्तु ।

"स्थालीपाकं पशुस्थाने कुर्य्याद्यद्यानुकल्पिकं ।
श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु" ।

इति छन्दोगपरिशिष्टोक्तं ग्राह्यं । अन्विति चोदनयोः पश्चात् । अतएव शातातपः ।

"नवोदके नवान्ने च गृहप्रच्छादने तथा ।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ।
तस्माद्दद्यात् सदा दुक्तो विद्वत्सु ब्राह्मणेषु च" ।

तस्मादिदं प्रधानं । पूपादिकन्तूपकरणत्वेन शाकाग- मावश्यकं उभयत्र सदेति श्रवणात् । तथा च ।

"नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् ।
उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात् ।
पलाण्डुतेर्व्वीप्सया च तन्नित्यमिति कीर्त्तितं" ।

इति तिथ्यादितत्त्वम् ।

गौणचान्द्रपौषस्य कृष्णाष्टमी पूपाष्टका । गौणचान्द्रमाघस्य कृष्णाष्टमी मांसाष्टका । गौणचान्द्रफाल्गुनस्य कृष्णाष्टमी शाकाष्टका । केषाञ्चिन्मते गौणचान्द्राश्विनस्य कृष्णाष्टमी अष्टकापदवाच्या । तासु क्रमात् पूपमांसशाकैः षाट्पौरुषिकं श्राद्धं कर्त्तव्यं । इति ब्रह्मवायुविष्णुधर्म्मोत्तरपुराणानि ।

अष्टकाङ्गं, स्त्री, (अष्टकमङ्गमस्य ।) नयपीठी । इति त्रिकाण्डशेषः । पाशार छक् इति भाषा ।

अष्टपात्, [द्], पुं, (अष्टौ पादा यस्य ।) लूता । माकड़सा । इति भाषा । शरभः । इति हेमचन्द्रः ।

अष्टपादः, पुं, (अष्टौ पादा यस्य ।) ऊर्णनाभविशेषः । तत्पर्य्यायः । त्रिमतुः २ । इति त्रिकाण्डशेषः ।

अष्टपादिका, स्त्री, (अष्टसु दिक्षु पादा यस्याः । ङीपि पद्भावे संज्ञायां कन् ह्रस्वः ।) लताविशेषः । इति रत्नमाला । श्यामरमाली इति भाषा ।

अष्टम, त्रि, अष्टानां पूरणः । इति व्याकरणं । (तस्य पूरणे डट् । नान्तादसंख्यादेर्मट् ।) यथा । काशीखण्डे ।

"अष्टमेऽह्नि चतुर्दश्याः क्षीणो भवति चन्द्रमाः ।

अमावास्याष्टमीषु च ...
इति आह्निकतत्त्वं । ...
"सावर्णिः सूर्य्यतनयो ...
निशामय तदुत्पत्तिं वि...
इति देवीमाहात्म्यं ।

अष्टमङ्गलं, क्ली, (अष्टप्रकारं मङ्गलद्रव्यं । तद्यथा,—
"मृगराजो वृषो नागः क...
वैजयन्ती तथा भेरी दीप इ...
इति वृहन्नन्दिकेश्वरपुराणोक्त...
"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्म...
हिरण्यं सर्पिरादित्य आपो रा...
इति शुद्धितत्त्वं ।

अष्टमङ्गलः, पुं, (अष्टौ मङ्गलानि यस्मिन् ।) श्वेतवर्णमुखचरणं... टकः । इति हेमचन्द्रः ।

अष्टमङ्गलघृतं, क्ली, (अष्टाभिः ... द्रव्यैः ।) अष्टौषधयुक्तपक्वघृतं । तद्...
"वचा कुष्ठं तथा ब्राह्मी सिद्धार्थक...
सारिवा सैन्धवञ्चैव पिप्पली घृतम...
सिद्धं घृतमिदं मेध्यं पिबेद् ...
दृढस्मृतिः कुमाराणां पिबतामष्ट..."
इति भावप्रकाशः ।

अष्टमानं, क्ली, (अष्टौ मुष्टयः परिमाणम... परिमाणं । शरावं । इति ...
("प्रसृतिभ्यामञ्जलिः स्यात् कुडवो...
अष्टमानञ्च स ज्ञेयः", इति शार्ङ्गधरः ।)

अष्टमिका, स्त्री, (अष्टम + कन् + ...) शुक्तिपरिमाणं । चतुस्तोलकं । इति भाषाया ।
("स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमि...
इति शार्ङ्गधरः ।)

अष्टमी, स्त्री, (अष्टानां पूरणी । ...) क्षीरकाकोली । इति शब्दच...
विशेषः । सा चन्द्रस्याष्टमकलाक्रि...
परिच्छिन्नकालरूपा च । सा च ...
युता ग्राह्या युग्मात् । यथा च ...
यथा निगमे ।
"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे च...
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न ...
उपवासादिकार्य्येषु एष धर्म्मः स...
भविष्यपुराणे ।
"चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्ल...
योऽब्दमेकं न भुञ्जीत शिवार्च्चन...
यत् पुण्यमक्षयं प्रोक्तं सततं सर्व्व...
तत्पुण्यं सकलं तस्य शिवलोके ...
ततश्च सततं सम्यग्...
लोकगतिश्च फलं । फाल्गुन...
रारभ्य वर्षं यावत् प्रत्यष्टमी...
व्रतं ॥ ० ॥ कालिकापुराणे
"एषा ललितकान्ताख्या देवी...
वरदाभयहस्ता च द्विभुजा गौरदेहि..."

अष्टपत्रासनस्था च मुकुटकुण्डलमण्डिता ।
हस्तैर्धृतवरा तु त्रिनेत्रा सुभानना ॥
सर्वाङ्गसुन्दरी चार्व्वङ्गी ललितप्रभा ।
उमया भाषितं मन्त्रं यत् पूर्व्वं शिवसन्निधौ ।
मन्त्रमष्टाक्षरं तद्धि तेन देवीं प्रपूजयेत्" ।
एकभक्तं प्रतिपद्यरूपं ।
'तथाष्टम्यां नवम्यां च पूजा कार्य्या विशुद्धये ।
पटेषु प्रतिमायां वा घटे मङ्गलचण्डिकां ॥
ः पूजयेद्भौमवारे सुमैर्दूर्व्वाक्षतैः शिवां ।
सततं साधकः सोऽपि काममिष्टमवाप्नुयात्" ॥०॥
ज्योतिषे। शनैश्चरस्य वारेण वारेणाङ्गारकस्य च।
'कृष्णाष्टमी चतुर्द्दश्यौ पुण्यात् पुण्यतरे स्मृते" ॥
यथा—
'सोमवारेऽप्यमावास्या आदित्याहे तु सप्तमी ।
चतुर्थ्यङ्गारवारे च अष्टमी च बृहस्पतौ ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः ।
षष्टिजन्मसहस्राणि प्रतिजन्म तदक्षयं" ॥
इति तिथ्यादितत्त्वं ॥०॥ श्रीकृष्णजन्माष्टमीव्रतं
कृष्णाष्टमीशब्दे भीष्माष्टमीत्यपि तत्तच्छब्दे द्रष्टव्यं ॥
महाष्टमीत्यपि महाष्टमीशब्दे द्रष्टव्यं॥ तत्र
जातफलं ।

"भूपालतः प्राप्तधनः कृशाङ्गः
सुखी कृपालुर्युवतिप्रियश्च ।
चतुष्पदाढ्यो धनधान्ययुक्तः
स्यादष्टमीजो मनुजः सुधीरः ॥"

इति कोष्ठीप्रदीपः ॥

अष्टमूर्त्तिः, पुं, (अष्टौ मूर्त्तयो यस्य ।) शिवः । इति हेमचन्द्रः ॥ तस्याष्टमूर्त्तिनामानि । क्षितिमूर्त्तिः सर्व्वः १ जलमूर्त्तिर्भवः २ अग्निमूर्त्तिः रुद्रः ३ वायुमूर्त्तिरुग्रः ४ आकाशमूर्त्तिर्भीमः ५ यजमानमूर्त्तिः पशुपतिः ६ चन्द्रमूर्त्तिर्म्महादेवः ७ सूर्य्यमूर्त्तिरीशानः ८। इति तन्त्रशास्त्रं ॥ एताः शरभरूपिशिवस्याष्टपादाः इति कालिकापुराणं ॥ यथा ।
'अष्टमूर्त्तिनिधीशस्य ज्ञानचक्षुस्तमोमयः" ।
इति वटुकभैरवस्तोत्रं ॥ तस्याष्टमूर्त्तयो यथा ।
'पयोऽग्निः रविरिन्दुश्च भूमिरापः प्रभञ्जनः ।
यजमानः खमष्टौ च महादेवस्य मूर्त्तयः" ॥
इति शब्दमाला ॥

("अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम्" ॥

इति रघुवंशे ॥ तथा कुमारे च ।

"तथाग्निमाधाय समित्समिद्धं
स्वमेव मूर्त्त्यन्तरमष्टमूर्त्तिः" ॥)

अष्टलौहकं, क्ली, अष्टधातुविशेषः । तद्यथा ।
१ रजतं २ ताम्रं ३ रङ्गं ४ सीसं ५ कान्त- ६ मुण्डलौहं ७ तीक्ष्णलौहं ८। इति राजनिर्घण्टः ॥

अष्टवर्गः, पुं, (अष्टानां औषधविशेषाणां रविप्रभृतीनां वा वर्गः ।) औषधविशेषाष्टकं । तद्यथा ।
ऋषभः १ जीवकः २ मेदः ३ महामेदः ४ ऋद्धिः ५ वृद्धिः ६ काकोली ७ क्षीरकाकोली ८। इति वैद्यकपरिभाषा । एतेषामष्टौषधगुणाः । रक्तपित्तप्रशमवायुपित्तनाशित्वं । इति राजवल्लभः ॥

("जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके ।
अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः ॥
अष्टवर्गो हिमः स्वादुर्ब्बृंहणो शुक्रलो गुरुः ।
भग्नसन्धानकृत् कामबलासबलवर्द्धनः ॥
वातपित्तास्रतृट्दाहज्वरमेहक्षयप्रणुत्" ।
इति भावप्रकाशः ॥)

ज्योतिषशास्त्रोक्तगोचरविशेषः। तद्यथा। आदौ रव्यादिसप्तग्रहाणां राहोश्च अष्टमासकोष्ठं कृत्वा प्रत्येकमासकोष्ठे जन्मकालीनग्रहाधिष्ठितराशयधिकाहिमकृच्छ्रमद इत्यादि दीपिकोक्तवचनानुसारतस्तत्रापि रेखां विन्यसेत् तत्र रवेर्द्वादशकोष्ठे ४८ चन्द्रस्य ४९ कुजस्य ३९ बुधस्य ५५ गुरोः ५६ भृगोः ५२ शनेः ३९ राहोः ३९ एतत्संख्यका रेखा देयाः। ततः प्रत्येकग्रहस्यरेखाः द्विगुणीकृत्य अष्टाधिकायेत् अष्टभिः शोधयेत्। शेषा रेखाः शुभाः ख्याताः। अष्टोनाश्चेत्तदा बिन्दुभिस्तासां पूरणं कार्य्यं। तत्र बिन्दवोऽशुभाः ख्याताः। अष्टौ चेत् तदा बिन्दुरेखयोरभावस्तत्र समं परिकीर्त्तितं ॥ तस्य नामगुणाः ।

"जीवकर्षभकौ मेदे काकोल्यौ वृद्धिऋद्धिके ।
अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः ॥
अष्टवर्गो हिमः स्वादुर्ब्बृंहणः शुक्रलो गुरुः ।
भग्नसन्धानकृत् बल्यः शरीरबलवर्द्धनः ॥
वातपित्तास्रतृट्दाहज्वरमेहक्षयप्रणुत्" ।

इति भावप्रकाशः ॥०। ज्योतिःशास्त्रोक्तगणनया रेखाबिन्दुभ्यां शुभाशुभफलसूचकजन्मकालीनाष्टग्रहसमुदायः । यथा । अथाष्टवर्गः ।
"जन्मकालग्रहस्थित्या फलं वक्ष्ये शुभाशुभं" ।
स्वाद्दिनकृत् शुभदः क्षितिपक्षसमुद्रनगादिकपञ्चगतो १। २। ४। ७। ८। ९। १०। ११। अथ विभावरिभर्त्तुस्त्र्यङ्गदशेषगतो ३। ६। १०। ११। अथ कुजाद्रविवत् १। २। ४। ७। ८। ९। १०। ११। अथ सोमसुतात्त्रिशरर्त्तुनवादिषु यातः। ३। ५। ६। ९। १०। ११। १२। देवगुरोर्विषयर्त्तुनवेशगतो ५। ६। ९। ११। अथ सुरारिगुरोः समयाचलभास्करयातः। ६। ७। १२। तीक्ष्णमरीचिसुतादपि भास्करवत्। १। २। ४। ७। ८। ९। १०। ११। अथ लग्नगृहात् त्रिकृताङ्गदशादिषु यातः ३। ४। ६। १०। ११। १२। रविरेखाः। ४८। भुजङ्गविलासाभिधानमालादण्डकेनादित्याष्टवर्गः ॥०॥ चन्द्रः शुभोऽर्कात्त्रिकालाद्रिदन्तावलाशाशिवस्थ। ३। ६। ७। ८। १०। ११। स्वतः स्वात् कुरामर्त्तुगाशाशिवस्थः। १। ३। ६। ७। १०। ११। अथाजाद्द्विवह्नीषुषड्गोदिगीशेष्व। २। ३। ५। ६। ९। १०। ११। च ज्ञात् कुरामाब्धिबाणागदन्ताबलाशाशिवस्थः १। ३। ४। ५। ७। ८। १०। ११। जीवात् कुदृग्वेदशैलेभकाष्ठाशिवस्थो १। २। ४। ७। ८। १०। ११। अथ शुक्रात्त्रिवेदेषुशैलर्त्ताशाशिवस्थः ३। ४। ५। ७। ९। १०। ११। तीक्ष्णांशुदेहोद्भवाद्रामबाणर्त्तुशम्भुस्थितो ३। ५। ६। ११। अथोदयाद्ध्यवाहर्त्तुकाष्ठाशिवस्थः। ३। ६। १०। ११। चन्द्ररेखाः। ४९। कामबाणाभिधानमालादण्डकेन चन्द्राष्टवर्गः ॥०॥ कुजोऽर्काच्छुभो वह्निबाणर्त्तुदिक्शम्भुगो ३। ५। ६। १०। ११। अथेन्दुतो रामकालेशग ३। ६। ११। स्वतः स्वात् कुदृग्वेदशैलाष्टदिक्शम्भुगः स्यात् १। २। ४। ७। ८। १०। ११। निशानाथपुत्राद्गुणेष्वङ्गरुद्रोपयातः। ३। ५। ६। ११। ततो जीवतः काष्ठकाष्ठाशिवार्कोपयातो ६। १०। ११। १२। अथ देवारिपूज्यादनेहो गजेशार्कसंस्थः। ६। ८। ११। १२। ततः सूर्य्यपुत्रात् कुवेदागनागग्रहाशाशिवस्थो १। ४। ७। ८। ९। १०। ११। अथ लग्नात् कुरामाङ्गदिक्शम्भुयातः। १। ३। ६। १०। ११। कुजरेखाः ३९। सिंहविलासाभिधानमालादण्डकेन भौमाष्टवर्गः ॥०॥ ज्ञः शुभोऽर्कतः शरर्त्तुगोशिवार्कगो ५। ६। ९। ११। १२। अथ चन्द्रतो द्विवेदकालनागदिङ्महेश्वरेषु। २। ४। ६। ८। १०। ११। भूमिजात् कुदृक्कृतागनागगोदशेशगः। १। २। ४। ७। ८। ९। १०। ११। ततः स्वतः कुवह्निपञ्चपञ्चवादिकेषु। १। ३। ५। ६। ९। १०। ११। १२। वाक्पतेरथाष्टशम्भुसूर्य्यगो ६। ८। ११। १२। अथ शुक्रतः कुभाङ्कवह्निवेदपञ्चनागगोशिवेषु। १। २। ३। ४। ५। ८। ९। ११ पङ्गुतः कुदृक्कृतागनागपञ्चकस्थितो अथ। १। २। ४। ७। ८। ९। १०। ११। १२। लग्नतः क्षितिद्विवेदकालनागदिक्शिवेषु। १। २। ४। ६। ८। १०। ११। बुधरेखाः। ५५। अशोकमञ्जरीसंज्ञकमालादण्डकेन बुधाष्टवर्गः ॥०॥ सुरराजगुरुः शुभदो रवितः कुयमानलवेदनगादिकपञ्चगतो १। २। ३। ४। ७। ८। ९। १०। ११। अथ विधोर्द्विशराचलगोशिवगो २। ५। ७। ९। ११। वसुधातनयात् कुयमाब्धिनगाष्टदशेशगतो १। २। ४। ७। ८। १०। ११। अथ बुधात् क्षितियुग्मकृतेषुरसग्रहदिग्गिरिशोपगत १। २। ४। ५। ६। ९। १०। ११। तदनु स्वत एकयमानलवारिधिपर्व्वतनागदशेशगतो १। २। ३। ४। ७। ८। १०। ११। अथ सितादयमपञ्चरसग्रहदिक्शिवगो २। ५। ६। ९। १०। ११। रविनन्दनतो दहनेषुरसार्कगत ३। ५। ६। १२। त्वथ लग्नगृहात् कुयमाब्धिशरर्त्तुनगग्रहदिग्गिरिशोपगतः १। २। ४। ५। ६। ७। ९। १०। ११
गुरुरेखाः ५६। कुसुमस्तवकाभिधानमालादण्डकेन बृहस्पतेरष्टवर्गः ॥०॥ भृगुः शुभो रवेर्गलेशसूर्य्यगो। ८। ११। १२। अथ चन्द्रतः क्ष्मादिपञ्चकाष्टगोशिवार्कगः। १। २। ३। ४। ५। ८। ९। ११। १२। कुजात् त्रिवेदकालगोशिवार्कगो ३। ४। ६। ९। ११। १२। अथ बोधनात् त्रिबाणकालरन्ध्ररुद्रसंस्थितः। ३। ५। ६। ९। ११। गुरोः शराष्टरन्ध्रदिङ्महेशग। ५। ८। ९। १०।

मत्रिगोऽपि विपचैव हानिर्मृत्युमेवाथा ।
हादिरेखा हादिविन्दोः फलान्येतान्यनुक्रमात् ॥
रेखायां वत्सरो ज्ञेयः सार्द्धमासदिनं समे ।
अष्टवर्गदशादु स्यात् दिनं चतुर्थं विन्दुषु" ॥
इत्यादुक्तिः । इत्यष्टवर्गः ॥ ० ॥ नन्दी ।
"अष्टवर्गशुभे धीमान् कर्म्म कुर्य्यामभचरैः ।
गोचरस्तैरन्नप्रासौ नरप्रासौ च वेधगे ॥
व्रतारम्भे विवाहे च यात्रायां छरकर्म्मणि ।
अविरुद्धाष्टवर्गस्य समस्ता निष्फलाः क्रियाः ॥
"सततं दिशति नराणां
राशौ मध्येऽष्टवर्गफलं निखिलं ।
मासफलं प्रथमार्द्धे
दुहितमान्यत्र्यंशुकेषु" ॥
इत्यष्टवर्गविचारणम् । इति ज्योतिस्तत्त्वम् ॥

अष्टभा, [स्] पुं, (अष्टौ भाति यस्य । अनु-
मुक्तस्य भवनः प्रतिमुखं दिकान्तया तथात्वम् ।)
मत्ता । इति त्रिकाण्डशेषः ॥

अष्टाकपाल, पुं, (अष्टसु कपालेषु संस्कृतः । संस्कृतं
भक्ष इत्यर्थोऽस्मिन्नणपर्थे इति सुक् । अष्टनः
कपाले हविषीत्यात्वम् ।) यज्ञविशेषः । यत्र
अष्टसु कपालेषु पुरोडाशः पक्वा हूयते । इति
श्रुतिः ॥

अष्टाङ्गार्घ्यं, पुं, (अष्टौ अङ्गानि उपकरणानि यस्य
तादृशोऽर्घः ।) अष्टद्रव्यघटितपूजोपकरणवि-
शेषः । यथा,—
"आपः क्षीरं कुशाग्राणि दधि सर्पिः सतण्डुलाः ।
यवाः सिद्धार्थकाश्चैव अष्टाङ्गार्घ्यः प्रकीर्त्तितः" ॥
इति स्मृतिः ॥
"आपः क्षीरं कुशाग्राणि घृतं मधु तथा दधि ।
रक्तानि करवीराणि तथा रक्तञ्च चन्दनम् ॥
अष्टाङ्ग एव अर्घो वै भानवे परिकीर्त्तितः" ।
इति काशीखण्डम् ॥

अष्टादश [न्] त्रि, (अष्टाधिका दश ।) अष्टाधिक-
दशसंख्या । १८ आठार इति भाषा । विभक्त-
व्यवस्थानाद्धोऽर्थे । इति सिद्धान्तकौमुदी ॥
(यथा मनुः ।
"अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्" ।)
अष्टादश... ... दश । दीपः १ शिखा २
... ३ ... ४ धर्म्मं ५ । इति कविकल्पलता ॥
("अष्टादशाद्रष्टदशा निशीथदा
...")
इति नैषधे ।
"अष्टादश पुराणानि कृत्वा सत्यवतीसुतः" ।
इति ... ॥)

"भूनिम्बदारु...
तिक्तेन्द्रवीजघनि...
गन्धाप्रकाशकस...
श्वासादिदुर्गमपि...
"दावानेन्वा शठी श्रृङ्गी...
नागरं कटुका पाठा भूनि...
उशीरं पद्मकं धान्यं वाल...
पुष्करं पिचुमर्द्दश्च क्षारं...
कासं श्वासश्च विषमं ज्वरं...
अष्टादशाङ्गमुदितमेतत् स्या...
मुस्तपर्पटकोशीरदेवदारुम...
त्रिफला धन्वयासश्च नीली...
किराततिक्तकं पाठा बलाकु...
मधुकं पिप्पलीमूलं मुस्ताद्यो...
अष्टादशाङ्गमुदितमेतद्वा सन्नि...
पित्तोत्तरे सन्निपाते हितदोषे...
मन्याहनुभउरोघाते उरःपार्श्व...
इति शब्दबोधः ॥

अष्टापदं, पुं,क्ली, (अष्टसु धातुषु ...
पदौ पदौ अष्टौ पदानि ...
संज्ञायामिति दीर्घः ।) स्वर्णं । ...
फलकः । इत्यमरमेदिनीकरौ । ...
इति भाषा । यथा "धुनुते ...
मदहर्षणात् । अष्टापदमयस्य ...
("आवर्जिताष्टापदकुम्भतोयैः"
इति कुमारसम्भवे ॥
"स रामकरमुक्तेन निहतो ...
अष्टापदेन बलवान् रामा ...
इति हरिवंशे ॥)

अष्टापदः, पुं, (अष्टौ पदानि ...
मर्कटः । इति मेदिनी ॥ ...
क्रिमिः । ... इति ...
शरभः । इति धरणिः ॥

अष्टापदी, स्त्री, (अष्टौ पादा ...
...

: । अट्ट इति भाषा ।
..ल भावे । (अदां-परं-अकं-सेट् ।) भावः
..ा । सा चेह विद्यमानतैव । न अस्ति विष्णुः ।
..ते दुर्गादासः ॥ (वि+अति) । अतिक्रमे ।
..भवे । "अन्यो व्यतिस्ते तु ममापि धर्म्मः"
..इ भट्टौ । (अभि) भागसत्तायाम् । "यदत्र
..ाभिस्यात् दीयताम्" । इति पाणिनिः ।
..विस्) आविर्भावे ।
आमाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम्" ।
..े कुमारे । (प्रादुस्) प्रादुर्भावे । उद्भवे ।
..ाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः" ।
..इ मनुः ।)
..र् य उ क्षेपे । (दिवां-परं-सकं-सेट् ।) इति
..कल्पद्रुमः ॥ य अस्यति । उ असित्वा अस्त्वा ।
.. आस्थत् आसीत् । अस्यमानं महागदा
..। भट्टौ ताच्छील्ये शतुः शानः । इति दुर्गा-
..ः ॥
..ास्त्रमास्यदिषीकास्त्रं रामो रामावबोधितः" ।
..। रघुवंशे । (अति) अतिक्रमे । पराभवे ।
..इमिषैकमत्यस्यन्नेकेन च बहून् जनान्" ।
..। रामायणे । (वि+अति) उत्ताने ।
..त्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः" ।
..। मनुः । (अप) दूरनिक्षेपे ।
.. चौरानपास्यज्ज्वलनस्य कन्या
.. नेयं प्रतिज्ञा मम दत्तपूर्व्वा" ।
..इ रामायणे । (अभि) अभ्यासे ।
..भ्यस्यन्ति तटाघातं निर्जितैरावता गजाः" ।
..। कुमारे । (नि) निक्षेपे । "न मद्विधो न्यस्यति
..सुयम्" । इति भट्टौ । (उप+नि) प्रस्तावे ।
..तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म
..। इति किराते । (सं+उप+नि) प्रमा-
..दिना दृढ़ीकरणे ।
..या च मया समुपन्यस्तेष्वपि मन्त्रेष्ववज्ञानं
..पारुष्यञ्च कृतम्" । इति हितोपदेशे । (प्रति
..नि) स्थापने ।
..धैवायुधजालानि माहेन्द्रं कवचानि च ।
..ापस्यं प्रतिन्यस्य सधर्म्म कठिनं च यत्" ॥
.. रामायणे । (निर्) दूरीकरणे । पराभवे ।
..ांसि सर्व्वेषुभृतां निरास्थत्" ।
..निर्द्दिदरडादीय निरास्थच्च तलाहतान्" ॥
..। च भट्टौ । (परि) विस्तृतौ । "पर्य्यस्यन्निह
..यः सहस्रसंख्या" । किराते ॥ "ताम्रोष्ठ-
..स्तरुचः कितस्य" । इति कुमारे ॥ पातने च ।
..ाधीघटममां मूर्द्ध्नि पर्य्यस्येत् प्रेतवत् सदा" ।
..इ मानवे ॥ (सम्) संयोगे । एकत्र संक्षेपे ।
..ा,—
"सर्व्वोऽप्यवयवोऽङ्गः समस्यते ।"
"अव्ययं समर्थेन सह समस्यते ।"
..इ च पाणिनिः ॥ इत्यादिः ॥
..। अपार्थे । (भ्वादिं-उभं-सकं-सेट् ।) अपार्थौ
..नियस्वगतयः ॥ "वासुदेवं परित्यज्य योऽन्य-
..मुपासते" । उपगच्छतीत्यर्थः । लावण्य उत्पाद्य-

इवास यत्र इत्यादिसिद्धौ अनेकाच्त्वात् सत्ता-
र्थोऽप्यमपीति रमानाथः । अनुप्रयोगादन्यत्रापि
परोक्षायामस्तेर्भूभावं केचिन्नेच्छन्तीति धातुप्रदी-
पः । इति दुर्गादासः ॥

असंख्यः, त्रि, असंख्यनीयः । संख्यारहितः । अपरि-
मितः । न विद्यते संख्या यस्येति बहुव्रीहिः ।
अगणनीयः । यथा,—
"असंख्यं द्विपरार्द्धादि पुद्गलात्मात्यनन्तकं" ।
इति हेमचन्द्रः ॥ अपि च ।
"शतयोजनविस्तीर्णैः शतस्कन्धसमन्वितैः ।
असंख्यशाखानिकरैरसंख्यफलसंयुतैः" ॥
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४१ अध्यायः ॥

असंख्यातं, त्रि, संख्यारहितं । यथा । मदनपारिजाते ।
"अकृत्यशेन यज्जातं यज्जप्तं मेखलाहितं ।
असंख्यातञ्च यज्जप्तं तत्सर्व्वं निष्फलं भवेत्" ॥
इत्याह्निकाचारतत्त्वं ॥

असंस्कृतः, त्रि, (न संस्कृतः । नञ्समासः ।) संस्कार-
रहितः । यथा । आपस्तम्बः ।
"असंस्कृतः सुतः श्रेष्ठो नापरो वेदपारगः" ।
इति शुद्धितत्त्वं ॥ अन्यच्च ।
"असंस्कृतप्रमीतस्य पिता न श्राद्धमाचरेत् ।
यदि स्नेहाचरेच्छ्राद्धं सपिण्डीकरणं विना" ॥
इति ।
"असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पौत्रप्रपौत्रकैः ।
पितरं तत्र संस्कुर्य्यादिति धर्म्मो व्यवस्थितः" ॥
इति च श्राद्धतत्त्वं ॥

असंस्कृतवाक्यं, क्ली, (असंस्कृतं संस्कृतेतरं वाक्यम् ।)
संस्कृतेतरभाषा । तत्पर्य्यायः । अपभ्रंशः २ अप-
शब्दः ३ । इत्यमरटीका ॥

असंस्थानं, क्ली, असंस्थितिः संस्थानाभावः । न सं-
स्थानमसंस्थानमिति नञ्समासनिष्पन्नं ॥

असंहतः, पुं, (न संहन्यते येन । न+सम्+हन्
+करणे क्त ।) व्यूहविशेषः । स तु सेनानां
पृथग्वृत्तिः । इति रायमुकुटादयः ॥ (दण्डः ।
भोगः । मण्डलः ।) असमूहिते अहते च त्रि ॥

असंहतः, त्रि, असंलग्नः । संहतो लग्नः न संहतः
असंहतः इति नञ्समासनिष्पन्नः ॥

असकृत्, व्य, (न सकृत् । नञ्समासः ।) पुनः
पुनः । वारं वारं । इत्यमरः ॥
("अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा" ।
इति साहित्यदर्पणे ।
"अन्नाद्येनासकृच्चैतान् गुणैश्च परिचोदयेत्" ।
इति मानवे ।)

असङ्कल्पितः, त्रि, (न सङ्कल्पितः । नञ्समासः ।)
सङ्कल्पाविषयः । यथा । विष्णुपुराणे ।
"कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिन् लयं ते त्वमलाः प्रयान्ति" ॥
इति मलमासतत्त्वं ॥

असङ्कुलः, पुं, (न सङ्कुलः ।) विस्तृतः पन्थाः । इति
हेमचन्द्रः ॥

असङ्ख्यः, त्रि, सङ्ख्यारहितः । अगणनीयः । स तु
द्विपरार्द्धादिः । इति हेमचन्द्रः ॥

असङ्कृतः, त्रि, (न सङ्कृतः । नञ्तत्पुरुषः ।)
सङ्कृतिरहितः । नासङ्कृतं प्रयुञ्जीतेति प्रसिद्धिः ॥
यथा । वस्तुतस्तु जिज्ञासुमेकपुरुषं प्रति सङ्कृत-
मपि अतादृशमन्यं प्रति असङ्कृतमिति यं प्रति-
पादयितुमानन्तर्य्याभिधानं तादृशाभिधानप्रयो-
जकतत्पुरुषीयजिज्ञासाजनकज्ञानविषयोऽयं तं
प्रति सङ्कृतिरिति पुरुषविशेषनियन्त्रितं सङ्कृति-
त्वं वाच्यं । इत्यनुमितिपत्रीयगदाधरी ॥ अयुक्तः ।
यथा देवीपुराणं ।
"असदये जन्मतिथिर्यदि स्यात्
पूज्या तदा जन्मसंयुता च ।
असङ्कृता मेन दिनद्वयेऽपि
पूज्या परा या भवतीह यत्नात्" ॥
इति तिथ्यादितत्त्वं ॥ (असभ्यः । अशिक्षितः ।
यथा हितोपदेशे ।
"आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसङ्कृतं वा" ॥)

असती, स्त्री, (न सती साध्वी । नञ्समासः ।)
भ्रष्टा । व्यभिचारिणी तत्पर्य्यायः । पुंश्चली २
धर्षिणी ३ बन्धकी ४ कुलटा ५ इत्वरी ६ स्वैरिणी
७ पांशुला ८ । इत्यमरः ॥ दृष्टा ९ दुष्टा १०
धर्षिता ११ । इति शब्दरत्नावली ॥ लघ्वी १२
निशाचरी १३ अपारवश्या १४ । इति जटाधरः ॥
("आबाल्यादसती सती सरपुरीं कुन्ती समा-
रोहयत्" । इति धर्म्मविवेके ।)

असतीसुतः, पुं, स्त्री, (असत्याः सुतः ।) व्यभि-
चारिणीपुत्रः । तत्पर्य्यायः । बान्धकिनेयः २ बन्धुलः
३ कौलटेरः ४ कौलटेयः ५ । इत्यमरः ॥
"बन्धुलः कौलटेरश्च कौलटेयोऽसतीसुतः ।
तथा बान्धकिनेयस्तु स्यात् कौलकेय इत्यपि ।
अथ सत्यान्तु भिक्षुक्यां पुत्रो भवति यः पुनः ।
तत्र कौलटिनेयः स्यात्कौलटेयोऽपि स स्मृतः" ॥
इति शब्दरत्नावली ॥ अपि च । असतीसूनुः कौ-
लटेरश्च बन्धुलः ।
"अपि बान्धकिनेयः स्यात्कौलटेयोऽतिभिक्षुकी ।
कुलटापि सती सा चेत् कौलटेयस्तदात्मजः ॥
अपि कौलटिनेयः स्यात्" । इति जटाधरः ॥

असतीसूनुः, पुं, (असत्याः सूनुः ।) कुलटापुत्रः ।
इति जटाधरः ॥

असत्, त्रि, (अस्+शतृ ततो नञ्समासः ।)
अविद्यमानं । असाधुः । मूर्खः । ब्रह्मभिन्नवस्तु ।
इति वेदान्तः ॥ जड़वर्गः । यथा,—
"यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्व्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा" ॥
इति देवीमाहात्म्ये १ अध्यायः ॥ सत् चेतनवर्गः ।
असत् जड़वर्गः ।
"तस्य सर्व्वस्य या शक्तिः सा यदा त्वं तदा कथं" ।
स्तव्येत्यर्थः । इति तट्टीकायां नागोजीभट्टः ॥ • ॥
निष्फलं । यथा,—
"अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।

…सदुच्यते पार्थ न च तत्प्रेत्य नो इह"।
इति श्रीमद्भगवद्गीतायां १७ अध्याये २८ श्लोकः ।")
निन्दितः। यथा,—
"असत्कुलप्रसूता या कान्तं विघातुमक्षमा"।
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डं।" अनित्यं। यथा।
"अज्ञानन्तु सदसद्भ्यामनिर्व्वचनीयं"। इत्यादि
वेदान्तसारः॥

असत्पथः, पुं, (न सन् पन्थाः।) मन्दपथः। तत्पर्य्यायः। कुपथः २ कापथः ३ अध्वः ४ दुरध्वः ५ अपथः ६ कदध्वा ७ विपथः ८ कुत्सितवर्त्म ९। इति शब्दरत्नावली॥

असदध्येता, (ऋ) त्रि, (असत् निषिद्धशास्त्रमधीते इति। असत्+अधि+इङ्+तृच्।) असदध्ययनशाली। तत्पर्य्यायः। अजपः २। इति हेमचन्द्रः॥

असदृशः, त्रि, (न सदृशः। नञ्तत्पुरुषः।) अतुल्यः। अनुपमेयः। यद्यसदृशी स्तुतिरिति पुष्पदन्तः॥ यथा। ब्रह्मवैवर्त्ते।
"विसग्राकमकुर्व्वाणः सम्यक्फलमवाप्नुयात्।
कुर्व्वाणो विसग्राद्यन्तु लभते ऽसदृशं फलम्"।
इति तिथ्यादितत्त्वं॥

असद्ग्रहः,पुं, (असति अप्राप्ये वस्तुनि ग्रहः आग्रहः।) अखट्टिः। इति त्रिकाण्डशेषः॥ बालकादीनां खोट आवदार इत्यादिभाषा।

असनं, क्ली, (अस्यते इति। अस+ल्युट्।) क्षेपणं। इति मेदिनी॥ ("द्रव्यनिरसने विनियोगः"। इति भवदेवः।)

असनः, पुं, वृक्षविशेषः। पियाशाल इति ख्यातः। तत्पर्य्यायः। महासर्ज्जः २ सौरिः ३ बन्धूकपुष्पः ४ प्रियकः ५ बीजवृक्षः ६ नीलकः प्रियसालकः ८। ("प्रियविमानितमानवतीरुषां
निरसनैरसनैरवृथार्थता"।
इति शिशुपाले।) अस्य गुणाः। कटुत्वं। उष्णत्वं। तिक्तत्वं। वातात्तिंदोषगलदोषरक्तमण्डलनाशित्वं। सारकत्वञ्च। इति राजनिर्घण्टः॥ वृक्षभेदः। …पासन इयि ख्यातः। तत्पर्य्यायः। अजकर्णः २ …नेसर्ज्जः ३ महासर्ज्जः ४। इति रत्नमाला॥ …स्य गुणाः। कफपित्तनाशित्वं। इति राज…भः।
…तिलकः पीतसारश्च पीतशालक इत्यपि।
…कपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः॥
…कः कुष्ठवीसर्पश्वित्रमेहगुदक्रिमीन्।
…श्लेष्मास्रपित्तञ्च त्वच्यः केश्यो रसायनः"॥
…भावप्रकाशेऽस्य पर्य्यायगुणौ कथितौ॥)
…, स्त्री, (असनस्य पर्णमिव पर्णमस्याः।) …विशेषः। तत्पर्य्यायः। वातकः २ शीतलः ३ …तः ४ अपराजिता ५ शणपर्णी ६। …॥ शीतः ७ शीतकः ८ सनपर्णी ९। …शब्दरत्नावली॥ मारटी इति भरतः॥
…ति सारसुन्दरी॥
…पुं, इन्द्रः। इति त्रिकाण्डशेषः॥
…, (न सन्तुष्टः। नञ्समासः।)

सम्यक् तुष्टिरहितः। सन्तोषशून्यः। यथा,—
"असन्तुष्टाः द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः"।
इति चाणक्यं॥

असन्नद्धः, त्रि, (न सम्यक् नद्धः नद्धार्ण्डाम्।) समुद्धृतः। पण्डिताभिमानी। दर्पितः। इति जटाधरः॥ अज्ञतत्त्वादृः॥

असन्मार्गः, पुं, मार्गहानिः। अमर्य्यादा। अनादरः। असाधुमार्गः। असंश्च सन् मार्गश्चेति कर्म्मधारयसमासनिष्पन्नं॥

असभ्यः, त्रि, असमाजत्। समानुपदृष्टः। असामाजिकः॥ न सभ्यः असभ्य इति नञ्समासनिष्पन्नः। खलः। यथा,—
"यद्यस्यसभ्यस्य मम नो मते
शुश्रावयामि सदृभीन् सुरेश्वर।
स तेऽपवादं शुचिभिः समर्पितं
शुश्राधुनैवाभिमरस्युदायुधः"॥
इति श्रीभागवते १० स्कन्धे १ अध्याये १० श्लोकः॥ असभ्यः खलः। समर्पितं कथितं। इति श्रीधरस्वामी॥

असमः, पुं, (नास्ति समो यस्य।) बुद्धः। इति शब्दरत्नावली॥

असमः, त्रि, विषमः। अतुल्यः। यथा। "इयमेवा सहकारिशक्तिरसमा माया दुरुन्नीतितो मूलत्वात् प्रकृतिः प्रबोधमयतोऽविद्येति यस्योदिता"।)
इति कुसुमाञ्जलौ १ स्तवकः॥

असमञ्जसं,क्ली, (न समञ्जसं युक्तियुक्तम्।) असङ्गतं। अनुपयुक्तं। तत्पर्य्यायः। दुर्नीतं २ दुःसमञ्जं ३। इति त्रिकाण्डशेषः॥ ("अतिप्रणयादेतन्मयोक्तमसमञ्जसम्"। इति कथासरित्सागरे। (पुं) सगरराजज्येष्ठपुत्रः। यथा हरिवंशे।
"केशिन्यसूत सगरादसमञ्जसमात्मजम्"।)

असमयः, पुं, (अपकृष्टः समयः। नञ्समासः।) अकालः। दुःसमयः। यथा,—
"एतान् जनाम सेवेत व्याधिसङ्घश्च दुर्ज्जयः।
सर्व्वं बोध्यमसमये काले सर्व्वं प्रसिध्यति"॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १९ अध्यायः॥

असमर्थः, त्रि, (न समर्थः। नञ्समासः।) अशक्तः। दुर्ब्बलः। यथा। ब्रह्मवैवर्त्ते।
"उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत्।
तावद्धनानि वा दद्याद् यद्भुक्ताद्द्विगुणं भवेत्"।
इति तिथ्यादितत्त्वं॥

असमवायिकारणं, क्ली, (न समवायि कार्य्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं कारणम्।) समवायिकारणासन्नकारणं। प्रत्यासन्नजनकं। यथा। घटं प्रति कपालद्वयसंयोगः। एतत्कारणं गुणः कर्म्म च। समवायिकारणे प्रत्यासन्न इहया ये कारण हय। इति न्यायभाषा॥ (एतत् कारणन्तु सर्व्वत्र द्रव्ये गुणे गुणः कर्म्म च। तदुक्तं भाषापरिच्छेदे।
"गुणकर्म्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्"।)

असमानं, त्रि, (नास्ति समानो यस्य।) अतुल्यं।

…निर्व्वाणं। सम्बन्धिनिर्वृ…
"समागतेर्य्य प्रथमे प्रयोग…
असमागं द्वितीयेन धर्म्मा…
इति शुद्धितत्त्वं॥

असमाप्तं, त्रि, (न समाप्तं। …) …
अनिष्पन्नं। असम्पूर्णं। …
"असमाप्ते व्रते पूर्व्वे तु …
इति तिथ्यादितत्त्वं॥

असमीक्ष्यकारी, [न्] त्रि, (असमीक्ष्य करोतीति। असमीक्ष्य+कृ+णिनि …) विवेचनापूर्व्वककर्म्मकर्त्ता। तत्पर्य्यायः। … इत्यमरः॥ ("… कारिणः"। इति हितोपदेशे।)

असमर्द्धं, त्रि, (न समर्द्धं परस्परान्वयः समासः।) अनर्थकवाक्यं। तत्पर्य्यायः। …
इति जटाधरः॥
("असमर्द्धमनर्थं … आचारो न क्रिया…
इति मनुः। त्रिःक्रमं। अविलम्ब…
"असमर्द्धा मनाराज। तान् विसृज्य…
इति।)

असम्मतः, त्रि, (न सम्मतः। नञ्समासः।) अनभिमतः। तत्पर्य्यायः। प्रतिकूलः २। …
("असम्मतः कस्तव मुक्तिमार्गे
पुनर्भवक्लेशभयात् प्रपन्नः"।
इति कुमारे।)

असम्मानं, क्ली, अमर्य्यादा। अनादरः। अपमानः। न सम्मानं असम्मानमिति निष्पन्नं॥

असरः, पुं, (अस+अच।) …विशेष। पक्षिका। कुक्कुटोडा इति ख्यातः।

असहनः, पुं, स्त्री, (न सहनः। नञ्समासः।) … इति हेमचन्द्रः। (अधीरः। असहिष्णुः। यथा,
"जनकात् प्राप्य तिरस्क्रियामसहनो … प्रस्तुते"। इति महावीरचरिते।
"प्रिया मुखमथ स्फुटमसहना …
इति रत्नावल्यां। अमाराविक्रम्। …
दर्पणे।
"अधिक्षेपापमानादे प्रयुक्तस्य परेण यत्
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्"।
इति।)

असह्यः, त्रि, (न सह्यः। नञ्तत्पुरुषः।) …नीयः। असोढव्यः। सहनायोग्यः। यथा,
"वरं रामशराः सह्या न च वैभीषणं वचः।
असह्यं ज्ञातिदुर्व्वाक्यं मेघान्तरितभास्वत्"
इति महानाटकं॥ ज्ञातिदुर्व्वाक्यमित्यत्र घातेरिति च पाठः॥

असाधारणं, त्रि, (न साधारणं सामान्यं। नञ्समासः।) साधारणभिन्नं। … विशेषः। न्यायमते साध्यव्यापकीभूतयोगिहेतुः। यथा वह्निमान् … यथा। "यत्तु प्रयागे बहुधारे …" माघसप्तमीस्नानादावसाधारणत्वे…

…नसाधकं" इति तिथ्यादितत्त्वं । किञ्च
…धारणशरीरव्यापाराज्जितं अविद्यमानो दायु-
…द्य दद्यात्"। इति दायभागः । अतुल्यं ।
…मृतवर्गे साधारणशब्दार्थदर्शनात् ।
…त्रि. (न साध्यं साधयितुमशक्यम् ।) असा-
…। साधनायोग्यं । अशक्यं । असाधितव्यं ।
—
…शानि चिदोषाणि यानि चाभ्यन्तरा बलिं ।
…तेऽशांसि संस्पृश्य तान्यसाध्यानि निर्दिशेत्" ।
…भावप्रकाशः । अपि च ।
…दं प्रपठेन्नित्यं दुर्गानामशतात्मकं ।
…ध्यं विद्यते तस्य त्रिषु लोकेषु पार्व्वति" ।
…विश्वसारतन्त्रे दुर्गाशतनामात्मकं स्तोत्रं ।
…ध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
…प्राणानसाध्यास्तु नराणामक्रियावताम्" ।
…र्म्मोपहिते देशे शिरामन्ध्यस्थिवर्ज्जिते ।
…रो योऽनुपर्य्येति तदसाध्यस्य लक्षणं" ।
…सुश्रुतः ।)
…, स्त्री, (न साध्वी । नञ्समासः ।) अपति-
…। यथा ज्योतिस्तत्त्वम्,—
"कन्यातुलास्मिन्मिथुने च साध्वी
शेषेष्वसाध्वी धनवर्ज्जिता च ।
सिन्धेऽपि लग्ने द्विपदांश इष्टः
कन्यादिलग्नेष्वपि नान्यभागः" । इति ।
…, त्रि. (न सान्द्रं निबिडं । नञ्तत्पुरुषः ।)
…विडं । विरलं । इति जटाधरः ।
…तं, अ, (न साम्प्रतम् युक्तम् । नञ्तत्पुरुषः ।)
…क्तं । अनुचितं । तथा च कालिदासः ।
"…पवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्" ।
…। कुमारे २ । ५५ ।
"…मव्यसाम्प्रतं वसुमुखि सुपल्लवपाणिना" ।
… माघे । "अविधाय विवाहसत्क्रियामन-
…स्पृत इत्यसाम्प्रतम्" । इति रवौ ८ । ६० ।)
…, पुं, (नास्ति सारो यस्य ।) एरण्डवृक्षः । इति
…रचन्द्रिका ।
…, त्रि, (नास्ति सारो यस्य ।) सारहितवस्तु ।
…सारशून्यं । तत्पर्य्यायः । फल्गु २ । इत्य-
…रः । निस्सारं ३ निष्फलं ४ । इति शब्दरत्ना-
…ली । वार्त्तं ५ । इति जटाधरः ।
…था—मनुसंहितायां ८ । २०३ ।
…न्यदन्येन संसृष्टरूपं विक्रयमर्हति ।
…चासारं न च न्यूनं न दूरे न तिरोहितम्" ।
"…असारे खलु संसारे सारमेतच्चतुष्टयम्…"
…त छिवोपदेशे ।
"…दर्शनमसाराणां लघुवंशकरं नरः ।"
…ते माघे ।
"…हत्नानप्यसाराणां समवायो भयावहः ।"
…ति पञ्चतन्त्रे ।
"…धिगिमां देहभृतामसारताम् ।" इति रघुवंशे ।
"…तो विपरीतास्त्वसाराः ।" इति चरकः ।)
…र, क्ली, नास्ति सारो यस्य ।) अगुरु । इति रा-
…निर्घण्टः । (अगुरुशब्देऽस्य विशेषो ज्ञेयः ।)

असाक्षात्, अ, (न साक्षात् । नञ्तत्पुरुषः ।)
अप्रत्यक्षं । अदर्शनं । अगोचरं । अतुल्यं । इति
साक्षात् शब्दार्थदर्शनात् ।

असिः, स्त्री, (अस्यते अवगाहनेन पापानि दूरी-
करोति या । अस + इन् ।) नदीविशेषः । सा
च काशीदक्षिणदिक्स्थिता । यथा ।
"तस्मात् विश्वेश्वरेणैव काशीवासेऽत्र कारणं ।
असिश्च वरणा यत्र क्षेत्ररक्षाकृतौ कृते ॥
वाराणसीति विख्याता तदारभ्य महामुने ।
असेश्च वरणायाश्च सङ्गमं प्राप्य काशिका ॥
वाराणसीह करुणामयदिव्यमूर्त्ति-
रुत्सृज्य यत्र तु तनुं तनुभृत् सुखेन ।
विश्वेशदृक्पथमसि यत् सहसा प्रविश्य
रूपेण तां वितनुता परवीं दधाति ॥
जातो मृतो बहुषु तीर्थवरेषु ये त्वं
भक्तोर्न जातु भवशान्तिरभून्निमन्य ।
वाराणसीति यदतीह मृतोऽन्तरत्वं
प्राप्याधुना मम बलात् खरशासनः स्यात्" ।
इति काशीखण्डे ३० अध्यायः ।

असिः, पुं, (अस्यतीति । अस दीप्तौ इनि ।) अस्त्र-
भेदः । खाँड़ा तरवार इत्यादि भाषा । तत्प-
र्य्यायः । खड्गः २ निस्त्रिंशः ३ चन्द्रहासः ४
रिष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करपालः
८ कृपाणः ९ इत्यमरः । प्रबालकः १० महात्मजः
११ रिष्टः १२ ऋष्टिः १३ धाराविषः १४ कौक्षेयः
१५ तरवारिः १६ तरवारः १७ कृपाणकः १८
करवालः १९ कृपाणी २० शस्त्रः २१ । इति
शब्दरत्नावली । विशसनः २२ । इति त्रिकाण्ड-
शेषः ।
("पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत्" ।
इति रघुवंशे १२ । ४० ।
"स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले ।"
इति मनौ ७ । १९२ ।) तस्य स्तुतिर्यथा ।
"असिर्व्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्म्मपालो नमोऽस्तु ते ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ।
नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ॥
हिरण्यञ्च शरीरन्ते धाता देवो जनार्द्दनः ।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः ।
भावशुद्धोऽमर्षणश्च अतितेजास्तथैव च ॥
इयं येन धृता क्षौणी हतश्च महिषासुरः ।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः" ।
इति वृहन्नन्दिकेश्वरपुराणीयदुर्गोत्सवपद्धतिधृत-
वाराहीतन्त्रं ।

असिक्नं, क्ली, (असति दीप्यते यत् । अस् +
इकन् ।) अधरचिबुकयोर्म्मध्यभागः । इति
हेमचन्द्रः ।

असिक्निका, स्त्री, असिक्नी । दासी । इति जटाधरः ।
("अतीतामस्मृत्यमसिक्निकानां" । इति माल्लिनाथः ।

असिक्नी, स्त्री, (न सिता शुक्लकेशा । छन्दसि क्न-
मेके इति तस्य क्नः नान्तत्वात् ङीप् च ।) अवृ-
द्धान्तःपुरचारिणी प्रेष्या । इत्यमरः । नदी वि-
शेषः । इति मेदिनी । (दक्षपत्नी वीरणसुता ।
यथा हरिवंशे । "असिक्नीमावहत्पत्नीं वीरणस्य
प्रजापतेः । सुतां सुतपसा युक्ताम्" इति ।)

असिगण्डः, पुं, (अस्यते क्षिप्यते इति असिः क्षिप्त
इत्यर्थः । असिः गण्डो यस्मिन् ।) क्षुद्रोपधानं ।
इति जटाधरः । छोटबालिश इति भाषा ।

असितः, पुं, (न सितः शुक्लः । नञ्समासः ।) कृष्ण-
वर्णः । तद्विशिष्टे त्रि । (यथा पुष्पदन्ते ।
"असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रम्" ।
"चकाशे विनिविष्टेन स सन्ध्येव निशाऽसिता" ।
इति रामायणे ।) इत्यमरः । शनिग्रहः । कृष्ण-
पक्षः । इति हलायुधः । (स्वनामख्यातः सूर्य्य-
वंशोद्भवो भरतपुत्रो राजा । यथा, रामायणे—
"भरतात् तु महातेजा असितो समजायत" ।
स्वनामख्यातः कश्चित् व्यासशिष्यो मुनिः । यथा
हरिवंशे ।
"असितस्यैकपर्णा तु देवलस्य महात्मनः" ।
पर्व्वतभेदः । यथा भारते,—
"तत्र पुण्यहृदः ख्यातो मैनाकश्चैव पर्व्वतः ।
बहुमूलफलोपेतस्त्वसितो नाम पर्व्वतः" ।)

असिता, स्त्री, (न सिता । असित पलितयोः प्रति-
षेधात् वर्णादनुदात्तादिति ङीप् तकारस्य क्नका-
रादेशश्च न ।) नीलीवृक्षः । इति राजनिर्घण्टः ।
या अवृद्धा महादेवीभिः प्रेष्यते अन्तःपुरे च पुनः
पुन श्चरति सा । इत्यमरटीकायां भरतः । या
अवृद्धा युवती कृष्णकेशा प्रेष्या दासी अन्तःपुरे
चरति सा इति सारसुन्दरी । (स्वनामख्याता
स्वर्वेश्या । यथा हरिवंशे ।
"असिता च सुबाहुश्च सुवृत्ता सुमुखी तथा" ।)

असिताम्बुशेखरः, पुं, (असितः कृष्णवर्णः अम्बो मेघ
इव शेखरो यस्य ।) बुद्धविशेषः । इति त्रिकाण्ड-
शेषः ।

असितार्च्चिः [स्] पुं, (असिता कृष्णा अर्च्चिः शिखा
यस्य ।) अग्निः । इति त्रिकाण्डशेषः ।

असितालुः, पुं, (असितः आलुः ।) नीलालुः । इति
राजनिर्घण्टः ।

असितोत्पलं, क्ली, (असितमुत्पलम् ।) नीलोत्पलं ।
इति राजनिर्घण्टः । (यथा चरकः ।
"उत्पलानि कषायाणि पित्तरक्तहराणि च" ।)

असिदंष्ट्रः, पुं, (असिरिव तीक्ष्णा दंष्ट्रा यस्य ।) जल-
जन्तुविशेषः । मकर इति ख्यातः । इति शब्द-
रत्नावली ।

असिदंष्ट्रकः, पुं, (असिदंष्ट्र + स्वार्थे कन् ।) असि-
दंष्ट्रः । मकरः । इति त्रिकाण्डशेषः ।

असिद्धं, त्रि, (न सिद्धम् । नञ्समासः ।) अपक्वं ।
अनिष्पन्नं । इति रत्नमाला । सिद्धिरहितं ।
("स्वयमसिद्धः कथं परान् साधयेत्" इति न्यायः ।
न्यायमते, आश्रयासिद्ध्यादिभिर्दोषैर्दुष्टो हेतुः ।
यथा, भाषापरिच्छेदे ।

सप्तां त्रीणि शतानि पूर्य्यन्ते ।
एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्च-
दश । तलकूर्च्चगुल्फसंश्रितानि दश । पार्ष्ण्यामेकं ।
जङ्घायां द्वे । जान्वेकं । एकमूराविति । त्रिंशदेव-
मेकस्मिन् सक्थ्नि भवन्ति । एतेनेतर सक्थि-
बाहू च व्याख्यातौ । श्रोण्यां पञ्च तेषां गुदभग-
नितम्बेषु चत्वारि । त्रिकसंश्रितमेकं । पार्श्वे
षट्त्रिंशदेवमेकस्मिन् द्वितीयेऽप्येवं । पृष्ठे त्रिं-
शत् । अष्टावुरसि । द्वे अक्षकसंज्ञे । ग्रीवायां
नवकं । कण्ठनाड्यां चत्वारि । द्वे हन्वोः । दन्ता
द्वात्रिंशत् । नासायां त्रीणि । एकं तालुनि । गण्ड-
कर्णशङ्खेष्वेकैकं । षट् शिरसि । एतानि पञ्च-
विधानि भवन्ति । तद्यथा ।
कपाल-रुचक-तरुण-वलय-नलकसंज्ञानि । तेषां
जानुनितम्बांसगण्डतालुशङ्खशिरस्सु कपालानि ।
दशनास्तु रुचकानि । घ्राणकर्णग्रीवाक्षिकोषेषु
तरुणानि । पाणिपादपार्श्वपृष्ठोदरोरस्सु वल-
यानि । शेषाणि नलकसंज्ञानि ॥
"मांसान्यत्र निबद्धानि सिराभिः स्नायुभिस्तथा ।
अस्थीन्यालम्बनं कृत्वा न शीर्य्यन्ते पतन्ति वा" ॥
इति च सुश्रुतः ।) वीजं । इति रायमुकुटः वैद्य-
कञ्च ॥ आँटी इति भाषा ।

अस्थिकुण्डं, क्ली, (अस्थ्नां कुण्डम् ।) अस्थिपूर्णनरक-
कुण्डविशेषः । यथा,—
"पितॄणां यो विष्णुपदे पिण्डं नैव ददाति च ।
स च तिष्ठत्यस्थिकुण्डे स्वलोमाब्दं महेश्वरि" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

अस्थिकृत्, पुं, (अस्थि करोति यः । अस्थि + कृ +
क्विप् ।) शरीरस्थमेदो धातुः । इति हेमचन्द्रः ॥
(मेदसोऽस्थि । इति सुश्रुतः ।)

अस्थिजः, पुं, (अस्थ्नो जायते इति । अस्थि + जन +
ड ।) मज्जा । इति राजनिर्घण्टः ॥
(मज्जशब्देऽस्य गुणादयो ज्ञातव्याः ।)

अस्थितुण्डः, पु, स्त्री, (अस्थीव दारुणं तुण्डं यस्य ।)
पक्षी । शब्दमाला ॥ [इति हेमचन्द्रः ॥

अस्थिधन्वा, [न्] पु, (अस्थिमयं धनुर्यस्य ।) शिवः ।

अस्थिपञ्जरः, पुं, (अस्थि पञ्जर इव ।) शरीरास्थि-
समूहः । तत्पर्य्यायः । करङ्कः २ कङ्कालं ३ । इति
हेमचन्द्रः ॥

अस्थिभक्षः, पुं, स्त्री, (अस्थि भक्षयति । अस्थि +
भक्ष + अण् ।) कुक्कुरः । इति हारावली । (पक्षि-
विशेषः । हाडगिला इति भाषा ।)

अस्थिभुक्, [ज्] पुं,स्त्री, (अस्थि भुङ्क्ते इति । अस्थि +
भुज् + क्विप् ।) कुक्कुरः । इति हेमचन्द्रः ॥

अस्थिमाली, [न्], पुं, (अस्थिमाला विद्यते यस्य
अस्थिमाला + इन्) शिवः । इति हेमचन्द्रः ।
("गजचर्म्मास्थिमाली" इति शिवशतके ।)

अस्थिरः, त्रि, (न स्थिरः । नञ्तत्पुरुषः ।) चञ्चल-
प्रकृतिः । तत्पर्य्यायः । चञ्चलः २ । इत्यमरः ।
दर्शितश्च । इति स्वामी ॥
"लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः" ॥
इति हितोपदेशे ।)

अस्थिरमतिः, त्रि, (अस्थिरा मतिर्यस्य ।) चञ्चल-
बुद्धिः । यथा । "विज्ञानां ... स्थिरमति
विशेषाद् माद्रिराः" । इति ज्योतिषागमे द्विराज-
योगफलं ॥

अस्थिरविभूतिः, स्त्री, (अस्थिरा विभूतिः ।) चञ्चल
श्रीः । यथा । "अस्थिरविभूतिमेवं चलमटनं
स्वदुनितनियममपि चरमे" । इति ज्योतिषागमे
... फलं ॥

अस्थिविग्रहः, पुं, (अस्थिमात्रो विग्रहो यस्य ।)
भृङ्गिनामकशिवगणेश्वरः । इति हेमचन्द्रः ॥

अस्थिशृङ्खला, स्त्री, (अस्थ्नां शृङ्खला योजनकारकाम् ।)
ग्रन्थिमान् वृक्षः । इति राजनिर्घण्टः ॥ (हाड-
योड़ा इति भाषा । यथा भावप्रकाशे ।
"काण्डं त्वग्विरहितं मस्थिशृङ्खलाया
माषार्द्धं द्विदलमकञ्चुकं तदर्द्धम् ।
संपिष्टं घृततु, तत्तिलस्य तैले
संपक्वं वटकमतीव वातहारि" ।)

अस्थिसंहारः, पु, (अस्थीनि संहरति योजयति ।
अस्थि + सं + हृ + अण् ।) वृक्षविशेषः । हाड़च
हाडजोड़ा इति भाषा । तत्पर्य्यायः । वज्रवल्ली
२ ग्रन्थिमान् ३ कुलिशं ४ असुरः ५ । इति
रत्नमाला ॥ वल्लिग्रन्थी ६ वज्राङ्गिका ७ । इति
हारावली । अस्य गुणाः । वज्रास्थिसर्व्वहित
कारित्वं । वातघ्नरोषत्वञ्च । इति राजवल्लभः ॥
यथा,—
"ग्रन्थिमानस्थिसंहारी वज्राङ्गी चास्थिशृङ्खला ।
अस्थिसंहारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् ॥
उष्णः सरः क्रिमिघ्नश्च दुर्नामघ्नोऽक्षिरोगजित् ।
रूक्षः स्वादुर्लघुर्वृष्यः पाचनः पित्तलः स्मृतः ॥
काण्डं त्वग्विरहितमस्थिशृङ्खलाया
माषार्द्धं द्विदलमकञ्चुकं तदर्द्धं ।
संपिष्टं घृततु ततस्तिलस्य तैले
संपक्वं वटकमतीव वातहारि" ॥
अपचयविवक्षायां आढ़किकेत्यपि स्यात्। इत्य-
मरटीकासारसुन्दरी॥ आढ़िका। इति भरतः॥
आढ़किकः, त्रि, (आढ़क+ठञ्।) आढ़कपरिमित-
बीजवपनादियोग्यक्षेत्रादिः। इत्यमरः॥
आढ़की, स्त्री, शमीधान्यविशेषः। अरहर इति
भाषा। तत्पर्य्यायः। तुवरी २ वर्य्या ३ कर
वीरभुजा ४ वृत्तबीजा ५ पीतपुष्पा ६। अस्याः
गुणाः। कषायत्वं। मधुरत्वं। कफपित्तनाशि-
त्वञ्च। तद्विदलगुणाः। ईषद्वातरुचिकारित्वं।
गुरुत्वं। ग्राहित्वञ्च। पीता रक्ता सिता त्रिविधेयं।
श्वेता दीपदा। लोहिता पथ्या बल्या पित्तता-
पादिहन्त्री च। पीता दीपनी पित्तदाहध्वंसिनी
च॥ तद्युषं बल्यं। इति राजनिर्घण्टः॥ अमर-
मते तत्पर्य्यायः। काक्षी २ मृतस्ना ३ तुवरिका ४
मृतालकं ५ सुराष्ट्रजं ६। भरतमल्लिकमते एतत्
षट्कं अरहरस्य। सारसुन्दरीमते तुवरिकाख्य-
गन्धद्रव्यस्य। केषाञ्चिन्मते सुगन्धिमृत्तिकायाः॥
(अस्याः पर्य्यायगुणावाह।
"आढ़की तुवरी चापि सा प्रोक्ता शणपुष्पिका॥
आढ़की तुवरा रूक्षा मधुरा शीतला लघुः।
ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्"॥
इति भावप्रकाशः॥
"मृदुः कषाया च सरक्तपित्तं
निहन्ति कासानलवातला स्यात्।
गुल्मज्वरारोचककासकर्द्दि-
हृद्रोगदुर्नामहराढ़की स्यात्"॥
इति हारीतः॥
"आढ़की कफपित्तघ्नी वातला,"। इति चरकः॥
"आढ़की कफपित्तघ्नी नातिवातप्रकोपनी"।
इति सुश्रुतः॥)

आढकीनः, त्रि, (आढक+ख।) आढकिकः। इत्यमरटीका॥

आढ्यः, त्रि, (आढौकते ढौकृ गतौ बाहुलकात् क्यः।) धनवान्। इत्यमरः॥ युक्तः। विशिष्टः। अन्वितः। यथा, धनाढ्यः गुणाढ्य इत्यादिः॥(यथा मनुः ८।१६९।
"चत्वारस्तूपचीयन्ते विप्र आढ्यो वणिङ्नृपः"।
यथा भगवद्गीतायां,—
"आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया"॥)

आणकः, त्रि, (अणक एव स्वार्थे अण्।) अणकः। अधमः। इति रायमुकुटः॥

आणवीनं, त्रि, (अणु+खञ्।) अणव्यं। अणुधान्योद्भवोचितक्षेत्रं। इत्यमरटीकायां रायमुकुटः।

आणिः, पुं, स्त्री, (अण+इन्।) अक्षाग्रकीलकः॥ अश्रिः। सीमा। इति मेदिनी॥

आतङ्कः, पुं, (आङ्+तकि+घञ्।) रोगः। (यथा, याज्ञवल्क्यः,—
"दृष्ट्वा पथि निरातङ्कं कृत्वा वा ब्रह्महा शुचिः"॥)
सन्तापः। शङ्का। (यथा, महावीरचरिते,—
"आतङ्कश्रमसाद्गसथतिकरोत्कम्पःद्यर्णसङ्घाता"।)
मुरजध्वनिः। इति मेदिनीकरहेमचन्द्रौ॥ ज्वरः। इति राजनिर्घण्टः॥
("नानातन्त्रविहीनानां भिषजामल्पमेधसां।
सुखं विज्ञातुमातङ्कमयमेव भविष्यति"।
इति माधवकरः॥
रोगार्थे उदाहरणं यथा सुश्रुते।
"प्रश्नेन च विजानीयात् देशं कालं जातिं सात्म्यमातङ्कसमुत्पत्तिं वेदनासमुच्छ्रायं बलमित्यादि"॥
ज्वरार्थे पर्य्यायानाह।
"ज्वरो विकारो रोगश्च व्याधिरातङ्क एव च।
एकार्थंनामपर्य्यायैर्विविधैरभिधीयते"॥
इति चरकः॥)

आतञ्चनं, क्ली, (आङ्+तञ्च्+ल्युट्।) प्रतिवापः। गलितस्य सतोदिदृक्ष्यान्तरेणात्रचूर्णनं। इति स्वामी॥ निक्षेपणं। इति सुभूतिः॥ उपद्रवः। इति रायमुकुटः॥ द्रवद्रव्यप्रक्षेपणोचितचूर्णं। इति सारसुन्दरी॥ जवनं। वेगः। आप्यायनं। तर्पणं। इत्यमरमेदिन्यौ॥

आततायी, [न्] त्रि, (आतत+अय+णिन्।) वधोद्यतः। इत्यमरः॥
"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षडेते आततायिनः॥
आततायिनमायान्तं हन्यादेवाविचारयन्।
नाततायिवधे दोषो हन्तुर्भवति कश्चन"॥
इति मनवर्थमुक्तावलीटीकायां क्षीरस्वामी॥

आतपः, पुं, (आङ्+तप+अच्।) रौद्रं। तत्पर्य्यायः। प्रकाशः २ द्योतः ३। इत्यमरः॥ दिनज्योतिः ४ सूर्य्यालोकः ५ दिनप्रभा ६ रविप्रकाशः ७ प्रद्योतः ८ तमारिः ९ तापनः १० द्युतिः ११। अस्य गुणाः। कटुत्वं। रूक्षत्वं। स्वेदमूर्च्छातृष्णादाहवैवर्ण्यकारकत्वं। नेत्ररोगप्रकोपकत्वञ्च। इति राजनिर्घण्टः॥
("आतपः कटुको रूक्षः स्वेदकृच्छ्राद्यमाबहः।
दाहवैवर्ण्यजननो नेत्ररोगप्रकोपनः"॥
"आतपः पित्ततृष्णाग्निस्वेदमूर्च्छाभ्रमास्रकृत्।
दाहवैवर्ण्यकारी च" इति सुश्रुतः॥
यथा शाकुन्तले,—
"कथमातपे गमिष्यसि परिबाधाकोमलैरङ्गैः"॥
यथा ऋतुसंहारे, ११।—
"मृगाः प्रचण्डातपतापिता भृशम्"॥)

आतपत्रं, क्ली, (आतप+त्रै+कः) छत्रं। इत्यमरः॥ (यथा शाकुन्तले,—
"राज्यं स्वहस्तधृतदण्डमिवातपत्रं"।
यथा रामायणे,—
"पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्द्धनि"॥
"छत्रशब्देऽस्य गुणादयो ज्ञातव्याः"।)

आतपत्रकं, क्ली, छत्रं। इति शब्दरत्नावली॥

आतपवारणं, क्ली, (आतप+वारि+ल्युट्।) छत्रं। इति हेमचन्द्रः॥ (यथा रघुवंशे, ३।७०।
"नृपतिककुदं दत्वा यूने सितातपवारणं"।
"अनुदितान्यसितातपवारणः"॥)

आतपाभावः, पुं, (आतपस्य अभावः। षष्ठीतत्पुरुषः।) छाया। इति राजनिर्घण्टः॥

आतरः, पुं, (आङ्+तॄ+अप्। आतरत्यनेन, पुंसि संज्ञायामिति घः) नद्यादितरणाय देयकपर्द्दकादिः। तत्पर्य्यायः। तरपण्यं २। इत्यमरः॥ पाराणिकडि नौकाभाड़ा इति भाषा॥

आतर्पणं, क्ली, (आङ्+तृप्+ल्युट्।) प्रीणनं। तृप्तिः। मङ्गलालेपनं। आलिपना इति भाषा। इति मेदिनी॥ (यथा मेदिनी।
"आतर्पणं प्रीणने स्यात् मङ्गल्यालेपनेऽपि च"॥)

आतापी, [न्] पुं, (आङ्+तापि+णिन्।) आतायी। चिल्लः। इत्यमरटीकायां स्वामी॥ (असुरभेदः। चिल इति ख्यातः पक्षिभेदः॥)

आतायी, [न्] पु, (आङ्+ताय+णिन्।) चिल्लः। चिल इति भाषा। इत्यमरः॥

आतारः, पुं, (आङ्+तॄ+घञ्।) आतरः। तरपण्यं। इति शब्दरत्नावली॥

आतिः, पुं, (अत+इण्।) पक्षी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

आतिथेयः, त्रि, (अतिथि+ढञ्। अतिथौ साधुः।) अतिथिसेवाकारकः। इत्यमरः॥ (यथा रघुवंशे, ५।२
"प्रत्युज्जगामातिथिमातिथेयः॥
यथा कुमारसम्भवे, ५।३१।
"तमातिथेयी बहुमानपूर्व्वया सपर्य्यया"।
यथा मनुः, ३।१८।
"दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु"।

आतिथ्यं, त्रि, (अतिथि+ञ्य।)
अतिथ्यर्थम्। अतिथिप्रदानादिद्रव्यं इत्यमरः॥ अतिथिसेवा च॥ ("यथा हितोपदेशे।
"अराव्युचितं कार्य्यमातिथ्यं गृहमागते"॥)

आतिथ्यः, पुं, अतिथिः। इति मेदिनी॥

आतुः, पुं, (आङ्+तॄ+डुः।) भेलकः। भेला माड़ इत्यादि भाषा। इति शब्दमाला॥

आतुरः, त्रि, (आङ्+तुर+क)
आमयावी २ विकृतः ३ व्याधितः
अभ्यमितः ६ अभ्यन्तः ७। इत्यमरः॥(
पदेशे। वैद्यानामातुरः श्रेयान्। यथा मनु
"न स्नानमाचरेद्भुक्त्वा नातुरो न
आतुरावस्थास्वपि कार्य्याकार्य्य प्रति
संज्ञा।
कालोऽकालः पुनरस्येति। एतदपि
विशेषेण तस्मादातुरावस्थास्वपि हि
संज्ञा। तस्य परीक्षा
वस्थाविशेषावेक्षणं
ह्यतिपतितकालमप्राप्तकालं वा
मानं यौगिकं भवति। कालोहि
पर्य्यायमभिनिर्व्वर्त्तयति॥ इति चरक।
आतुरमुपक्रममाणेन भिषजादुरेवा
इति सुश्रुतः॥)

आत्मण्यं, क्ली, (आङ्+तप्+क्यप्।)
आता इति भाषा। अस्य गुणाः।
रक्तवर्द्धकत्वं। स्वादुत्वं। शीतलत्वं।
कारित्वं। हृद्यत्वं।
इति द्रव्यगुणः॥

आतोद्यं, क्ली, (आङ्+तुद+ण्यत्।)
तुर्विधं। वीणादिवाद्यं ततं १
२ वंशादिवाद्यं शुषिरं ३
४ इत्यमरः॥ (यथा रघुवंशे।
रोनिवेशिता।
"आतोद्यं ग्राहयामास

आत्तगन्धः, त्रि, (आत्तः
यस्य सः बहुव्रीहिः।)
र्य्यायः। अभिभूतः २।
गन्धः॥ (यथा रघुवंशे १३।१७।
"पक्षच्छिदा गोत्रभिदात्तगन्धा
शरण्यमेनं शतशो महीध्राः"॥)

आत्तगर्व्वः, त्रि, (आत्तः अरिणा गृहीत
सः बहुव्रीहिः।) अरिणा
भूताहङ्कारः। अभिभूतः। इत्यमरः॥

आत्मगुप्ता, स्त्री, (आत्मना गुप्ता।)
लताविशेषः। आलकुशी इति भाषा।
मर्कटी २ कण्डुरा ३ अव्यण्डा
जटा ६ जड़ा ७ शूकशिम्बा ८
ऋषभी १० कपिकच्छुरा ११।
("माषैः समानं फलमात्मगुप्तं"।
विशेषोऽस्याः कपिकच्छुशब्दे

आत्मयाजी, [न्] त्रि, (
आत्मम्भरिः। स्वार्थी॥

आत्मघाती, [न्] त्रि, (आत्मन्+
आत्महन्ता। यथा कूर्म्मपुराणे।
"आघातयेद्यथात्मानं स्वयं
विहितं तस्य नाशौचं
आत्महननकर्त्ता।
प्रायश्चित्तं यथा,—
"इन्द्रियैरपरित्यक्ता ये च मूढा विर

[illegible]

[illegible]

दिवं । अत्रन्याद्विराः ।

"कश्चित् प्रमादेन म्रियेताग्न्युदकादिभिः ।

शौचं विधातव्यं कर्त्तव्या चोदकक्रिया" ॥

[illegible]

[illegible]

[illegible] परिवदेत् आत्मनां चानुमयेत् ।

[illegible] तु दशदशी दशमाने कथायते" ॥

[illegible] अविहितमार्गेण मृतः । तथा,—

[illegible] पतितानां तथा क्रिया ।

[illegible] च महापातकीदि संख्यायने मतं" ॥

[illegible] ॥ ० ॥ एवं पूर्व्वात्-

[illegible] मृतानां [illegible]

[illegible] प्रायश्चित्तमाचारं ।

[illegible] स्नानं स्पर्शनं वहनं तथा ।

[illegible] सान्तपनेन शुध्यति" ॥ इति ।

॥ बुद्धिपूर्व्वे पश्चात्तापादिकार्ये ॥

[illegible] तु संवर्त्तः ।

[illegible] प्रेतं यो वहेत दहेत वा ।

[illegible] कृत्वा कृच्छ्रं सान्तपनं चरेत्" ॥

[illegible]

[illegible] यानिदिष्टं तदशास्त्रे देशाचारापेक्षानुसारेण योजनीयं ॥*॥

[illegible]

[illegible]

"[illegible]

[illegible]" ।

[illegible]

[illegible] कार्य्यं । यद्भविष्यपुराणे ।

"[illegible] च ।

[illegible] शाम्बदेवौर्द्ध्वदेहिकं" ॥*॥

[illegible] ॥

"[illegible] यदि ।

[illegible] ॥

[illegible] ।

[illegible] ॥

[illegible] पुनर्दहेत्" ॥*॥

[illegible] विष्ण्वादि-

प्रायश्चित्तं विधाय नारायणबलिं कृत्वा और्द्ध्व-

दैहिकं कार्य्यं । आग्नेयोऽग्निसंस्कारेऽपि [illegible]

[illegible] । तत्र नारायण-

बलिं कृत्वा । तथा च [illegible] ।

"नारायणबलिः कार्य्यो [illegible] ।

तथा तेषां भवेत् शौचं नान्यथेत्यब्रवीद्यमः" ॥

नारायणबलौ कृते औद्धर्वदैहिकमाचरेदिति [illegible]

[illegible] ॥*॥ सर्पहते तु विशेषः । संवत्सरं यावत्

पञ्चम्यां नागपूजां विधाय तदनन्तरं नारायण-

बलिं कृत्वा [illegible] नागं ब्राह्मणाय दत्त्वा और्द्ध्वदैहिकं कुर्य्यात् ॥०॥

नारायणबलिस्वरूपञ्च विष्णुनाभिहितं ।

"एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिं ।

विष्णुं समर्चयेद्देवं यमं वैवस्वतं तथा ॥

दशपिण्डान् घृताभ्यक्तान् दर्भेषु मधुसंयुतान् ।

तिलमिश्रान् प्रदद्याद्वै संयतो दक्षिणामुखः ॥

विष्णुं बुद्धौ समासाद्य नद्यम्भसि ततः क्षिपेत् ।

नामगोत्रग्रहं कृत्वा पुष्पैरभ्यर्च्चनं ततः ॥

धूपदीपप्रदानञ्च भक्ष्यभोज्यं तथापरं ।

विद्यातपःसमृद्धान् वै कुलोत्पन्नान् समाहितान् ॥

निमन्त्रयेत विप्रान् वै पञ्च सप्त नवापि वा ।

अपरेऽहनि सम्प्राप्ते मध्याह्ने समुपोषितः ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] क्षुत्प्रभावैः [illegible] वन्तीति ।

[illegible]

[illegible] न्यदुर्वि [illegible]

[illegible]

"[illegible] ।

[illegible]" ॥

इति ब्रह्मवैवर्त्ते [illegible] ॥

आत्मघोष, पुं, (आत्मानं घोषयतीति । आत्मन् + घुष + अच् ।) काकः । इत्यमरः ॥ कुक्कुटः । इति शब्दचन्द्रिका ॥

आत्मज, पुं, (आत्मन् + जन् + डः । आत्मा वै जायते पुत्र इति श्रुतेः ।) पुत्रः । इत्यमरः ॥ मनुः, १०।१४।

"[illegible] धर्मात्मजं" ।

यथा रामायणे,—

"[illegible]" ॥)

आत्मजन्मा [न्] पुं, (आत्मनः जन्म यस्य सः बहुव्रीहिः ।) पुत्रः । इति शब्दरत्नावली ॥

यथा कुमारसम्भवे, ६ । २८ ।

"अत आहर्त्तुमिच्छामि पार्व्वतीमात्मजन्मने" ।

यथा रघुवंशे, १ । ३३ ।

"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" ॥)

आत्मजा, स्त्री, (आत्मन् + जन् + ड + टाप् ।) कन्या । इत्यमरः ॥ बुद्धिः । इति शब्दरत्नावली ॥

आत्मतत्त्वं, क्ली, (आत्मनः तत्त्वं स्वरूपम् ।) तत्त्वज्ञापकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्वं । पुत्रादिभासकं नित्यशुद्धत्वादिस्वरूपमेवात्मवस्त्विति यावत् । एतद्विवरणं यथा । "इदानीं प्रत्यगात्मनि इदमिदमयमयमारोपयतीति विशेष उच्यते । तथाच । अतिप्राकृतस्तु आत्मा वै जायते पुत्र इत्यादि श्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टेऽहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति ॥ १ ॥ चार्व्वाकस्तु स वा एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहं इत्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ॥ २ ॥ अपरश्चार्व्वाकः तेऽप्राणाः प्रजापतिं समेत्य ब्रूयु

[illegible]

यथात्मकः । विदूषकः । इति मेदिनी ॥

आत्मभूः, पुं, (आत्मन् + भू + क्विप् ।) ब्रह्मा । कामदेवः । इत्यमरः ॥ विष्णुः । शिवः । इति शब्दरत्नावली ॥

(यथा रघुवंशे १० । २० ।

"सर्व्वज्ञस्त्वमविज्ञातः सर्व्वयोनिस्त्वमात्मभूः" ।)

आत्ममूली, स्त्री, (आत्मन् + मूल + ङीप् ।) दुरालभावृक्षः । इति शब्दमाला ॥ (दुरालभाशब्देऽस्या विशेषोऽज्ञेयः ।)

आत्मम्भरिः त्रि, (आत्मानं बिभर्त्तीति, आत्मन् + भृ + इन् + मुम् ।) आत्मोदरमात्रभरणकर्त्ता । तत्पर्य्यायः । कुक्षिम्भरिः २ स्वोदरपूरकः ३ । इत्यमरः ॥ (आद्यून, परार्थवैमुख्येन स्वार्थसाधनपरः । यथा भट्टिकाव्ये । "आत्मम्भरिस्त्वं पिशितैर्नराणां" । यथा हितोपदेशे ।

"क्षुद्रैरर्थपतिश्चैव उभयं हतनाशकः ।

भज्यते किं पुनर्नित्यं चलात्मात्मम्भरिर्नरः" ।)

आत्मयोनिः, पुं, (आत्मैव योनिरुपादानकारणमस्य बहुव्रीहिः ।) ब्रह्मा । विष्णुः । शिवः । कामदेवः । इति मेदिनीशब्दरत्नावल्यौ (यथा कुमारे ३ । ७० ।

"स्मरं प्रतीक्षामभवाप्यदर्पं

प्रसन्नमभ्युद्गतमात्मयोनिं" ।)

आत्मरक्षा, स्त्री, महेन्द्रवारुणीलता । इति राजनिर्घण्टः ॥ (आत्मनो रक्षणम् ।)

आत्मवल्ला, स्त्री, ज्योतिष्मती । इति राजनिर्घण्टः ॥

आत्मश्लाघा, स्त्री, (आत्मनः श्लाघा ।) आत्मगर्व्वः । आत्मप्रशंसा ॥

आत्मवधा, स्त्री, (आत्मनः वधः ।) आत्मघातः । आत्मवधः ॥

आत्महा, [न्] पुं, (आत्मन् + हन् + क्विप् ।) देवलः । इति शब्दरत्नावली । आत्मघाती । "नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं । मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा" । इति श्रीभागवतम् । (अपरञ्च यथा,

[illegible]

"स सर्व्वगः सर्व्वशरीरगश्च,

स विश्वकर्म्मा स च विश्वरूपः ।

स चेतनाधातुरतीन्द्रियश्च,

स नित्ययुक् सानुशयः स एव ।

रसात्ममातापितृसम्भवानि,

भूतानि विद्याद्दश षट् च देहे ।

चत्वारि तत्रात्मनि संश्रितानि,

स्थितस्तथात्मा च चतुर्षु तेषु ।

भूतानि मातापितृसम्भवानि,

रजश्च शुक्रञ्च वदन्ति गर्भे ।

आप्याय्यते शुक्रमसृक्समुत्थैः

यैस्तानि भूतानि रसोद्भवानि ।

भूतानि चत्वारि तु कर्म्मजानि,

यान्यात्मलीनानि विशन्ति गर्भं ।

सबीजधर्म्माण्यपरापराणि,

देहान्तराण्यात्मनि यानि यानि ।

रूपाद्धि रूपप्रभवः प्रसिद्धः,

कर्म्मात्मकानां मनसो मनस्तः ।

भवन्ति येऽत्याकृतिबुद्धिभेदा

रजस्तमस्तत्र च कर्म्महेतुः ।

अतीन्द्रियैस्तैरतिसूक्ष्मरूपै

रात्मा कदाचिन्न वियुज्यते ।

न कर्म्मणा नैव मनोमतिभ्यां

न चाप्यहङ्कारविकारदोषैः" ।

इति चरकः ॥

"यदा यदात्मा क्षतिमानयं सौ

तदा मनस्त्वधितिष्ठतीन्द्रियं ।

ततो मनोऽधिष्ठितमिन्द्रियं वै

प्रवर्त्तते संशयबुद्धिमन्तरे" ।

इति वैद्यकशास्त्रार्थदर्पणं ।)

आत्माधीनः, पुं, (आत्मनोऽधीनः ।) पुत्रः । धात्रः । श्यालकः । विदूषकः । इति मेदिनी ॥

आत्माशी, [न्] पुं, (आत्मन् + अश + णिनि ।) मत्स्यः । इति त्रिकाण्डशेषः ॥

[illegible]

मेदिनी ॥ शरीरस्थरसधातुः । इति [illegible]चन्द्रः ॥

[illegible]केका, स्त्री, (अग्नि + ढक् + कन् + टाप् ।) [illegible]मती । इति हलायुधः ॥

[illegible], स्त्री, (अग्नि + ढक् + ङीप् ।) पुष्पवती स्त्री । [illegible] अङ्गिराः,—

[illegible]हिताग्निर्ब्राह्मणस्य हत्वा पत्नीमनिन्दिताम् । [illegible]हत्यावृतं कुर्य्यात् आत्रेयीघ्नस्तथैव च" ।)

[illegible]विशेषः । इति मेदिनी ॥ (अग्निमुनिपत्नी ।) [illegible] भारते,—

[illegible]रयूर्वारवत्या च लाङ्गली च सरिद्वरा । [illegible]तोया तथात्रेयी लौहित्यश्च महानदः" ।)

[illegible]र्वणं, स्त्री, (अथर्व्वन् + अण् ।) अथर्व्वणां [illegible]गुरुः । अथर्व्वनाम्ना मुनिना प्रोक्तो वेदः [illegible]मन्त्रा तेषां समूहः । इत्यमरः ॥ शान्तिस्वर्ह्ण । [illegible]हेमचन्द्रः ॥ (यथा महावीरचरिते । [illegible]माथर्व्वणस्तेव इवाभिचारः" ।)

[illegible]वेदः, पुं, (अथर्व्व वेत्तीति । अथर्व्वन् + अण् ।) [illegible]हितः । अथर्व्ववेदज्ञब्राह्मणः । इति हेमचन्द्रः ॥

[illegible], पुं, (आङ् + दृ + अप् ।) आरम्भः । इति [illegible]काण्डशेषः ॥ समादरः । सम्मानः ॥ (यथा [illegible]रातार्ज्जुनीये ५ । १६ ।

"स जगदे वचनं प्रियमादरात् मुखरतावसरे हि विराजते" ।

[illegible]मारसम्भवे ६ । १३ ।

[illegible]र्शनादभूत् शम्भोर्भूयान् दारार्थमादरः" ।

[illegible]तोदेशे ।

[illegible]न्तुष्टस्य कस्मात्मेऽप्यर्थे भवति नादरः" ।)

[illegible], त्रि, (आङ् + दृ + ल्युट् ।) आदरयोग्यः । [illegible]दरणीयः । आदरोपयुक्तः ॥

[illegible], पुं, (आङ् + दृश् + घञ् ।) दर्पणः । टीका । [illegible]तिपुस्तकं । इति मेदिनी ॥ (यथा भगवद्गीतायां । [illegible]धूमेनाव्रियते वह्निर्यथादर्शो मलेन च । [illegible]थोल्वेनावृतो गर्भस्तथा तेनेदमावृतं" ।)

[illegible]दानं, स्त्री, (आङ्दा + ल्युट् ।) ग्रहणं । अवा-[illegible]नं । इति मेदिनीहेमचन्द्रौ ॥ रोगलक्षणं । [illegible]ति राजनिर्घण्टः । (स्वीकारः प्रतिग्रहः । [illegible]था कुमारसम्भवे ५ । ११ ।

[illegible]कुसुमादानपरिक्षताङ्गुलिः" । मनुः, ७ । २०४ ।

[illegible]दानमप्रियकरं दानञ्च प्रियकारकं । [illegible]भीप्सितानामर्थानां काले युक्तं प्रशस्यते" ।)

[illegible]दानी, स्त्री, (आ + दा + ल्युट् + ङीप् ।) घोष-[illegible]लतिका । इति रत्नमाला ॥

[illegible], पुं, (आङ् + दा + कि ।) पूर्व्वः । प्रथमः । [illegible]त्यमरः ॥ प्रधानं [illegible] । यथा इत्यादि । [illegible]रम्भः । प्रावृत्ता । [illegible] । [illegible] । सामीप्यं । व्यवस्था । प्रकारः । [illegible] च [illegible] प्रयोगो भवति । [illegible],—

"[illegible] ।

[illegible]" ।

[illegible] ।

"अयमेव समस्तानादौ तासु बीजमवासृजत्" ।

कुमारे १ । ६ । "जगदादिरनादिस्त्वं" ।)

आदिकविः, पुं, (आदिः प्रथमः कविः ।) ब्रह्मा । इति श्रीभागवतं । वाल्मीकिमुनिः । इति हेमचन्द्रः ॥ ("तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः" । इति भागवते १ । १ ।)

आदिकारणं, स्त्री, (आदि आद्यं कारणम् ।) पूर्व्वनिमित्तं । मूलहेतुः । तत्पर्य्यायः । निदानं २ । इत्यमरः ॥

आदिगदाधरः, पुं, (आदिराद्यः आदौ पूजितो वा गदाधरः ।) गयास्थदेवताविशेषः । यथा,—

"गयाशिरस्कादयिता गुरुत्वादास्थिता शिला ।
कालान्तरेण यस्माच्च स्थित आदिगदाधरः ॥
तथा यस्मोऽव्यक्तरूपी आसीदादौ गदाधरः ।
आदिरादौ पूजितोऽत्र देवैर्ब्रह्मादिभिर्यतः ॥
पाद्यार्घ्यगन्धपुष्पाद्यैरत आदिगदाधरः" ॥

इति गारुडे गयामाहात्म्ये ८५ अध्यायः ॥ अपिच

"गदयादावयस्तम्भ गयासुरशिरःशिलां ।
निश्चलार्थं स्थितो यस्मात्तस्मादादिगदाधरः" ।

इति वायुपुराणीयगयामाहात्म्ये ८ अध्यायः ॥

आदितालः, पुं, (आदिराद्यस्तालः ।) तालविशेषः । यथा,—सङ्गीतदामोदरः ।

"एकएव लघुर्यत्र आदितालः स कथ्यते ।
गुरुत्वत्तु पुरतो वाद्यः प्रायेणैतन्निदर्शनं" । इति ।

आदितेयः, पुं, (अदितेरपत्यं पुमान् । अदिति + ढक् ।) अदितिपुत्रः । देवः । इत्यमरः ॥

आदित्यः, पुं, (अदितेरादित्यस्य वा अपत्यं + ण्यः ।) देवः । सूर्य्यः । इत्यमरमेदिन्यौ ॥ द्वादशादित्या यथा तत्पर्य्यायः । इत्यमरः । तत्प्रभेदनामानि । विवस्वान् १ अर्य्यमा २ पूषा ३ त्वष्टा ४ सविता ५ भगः ६ धाता ७ विधाता ८ वरुणः ९ मित्रः १० शक्रः ११ उरुक्रमः १२ । एते काश्यपात् अदितिभार्य्यायां जाताः । कल्पान्तरे त्वष्टृकन्या संज्ञा आदित्यपत्नी आदित्यस्य तेजः सोढुमसमर्था [illegible] द्वादशादित्याः । तेषां द्वादशमासेष्वेकैकस्योदयः । इति पुराणं ॥ अर्कवृक्षः । इत्यमरः ॥ आकन्द इति भाषा । ("आदित्यमण्डलस्थितो हिरण्मयो [illegible]" । यथा शान्तिशतके । ४ । २४ । "आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं" । भारते ।

"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च" ।

[illegible] द्वादशादित्यवत् यथा ।

"[illegible] ।
[illegible] ।
अर्य्यमा चैव धाता च त्वष्टा पूषा च भारत ।
[illegible] ।
[illegible]" ।

[illegible]

[illegible]

स्वयमसंवत्सरयुगप्रविभागं करोति ॥ इति सुश्रुतः ।)

आदित्यपत्रः, पुं, (आदित्यवृक्षस्य पत्रमिव पत्रमस्य ।) क्षुपविशेषः । तत्पर्य्यायः । अर्कपत्रः २ अर्कदलः ३ सूर्य्यपत्रः ४ तमनच्छदः ५ कुठारिः ६ विटपः ७ सुपत्रः ८ रविप्रियः ९ रश्मिपतिः १० रुदः ११ । अस्य गुणाः । कटुत्वं । उष्णवीर्य्यत्वं । कफवातरोगजठरगुल्मारोचकनाशित्वं । अग्निसन्दीपनत्वञ्च । इति राजनिर्घण्टः ॥

आदित्यपुष्पिका, स्त्री, (आदित्यवत् लोहितं पुष्पमस्याः ।) लोहितार्कवृक्षः । इति रत्नमाला ॥ राङ्गा आकन्द इति भाषा ।

आदित्यभक्ता, स्त्री, (आदित्यस्य भक्ता ।) ओषधीविशेषः । हुड़हुड़िया इति भाषा । तत्पर्य्यायः । वरदा २ अर्कभक्ता ३ सुवर्च्चला ४ सूर्य्यलता ५ सूर्य्यावर्त्ता ६ अर्ककान्ता ७ मण्डूकपर्णी ८ सुरसम्भवा ९ सौरी १० सुतेजाः ११ अर्कहिता १२ वरिष्ठा १३ मण्डूकी १४ सम्भवा १५ देवी १६ मार्त्तण्डवल्लभा १७ विकान्ता १८ भास्करेष्टा १९ । अस्या गुणाः । हिमत्वं । तिक्तत्वं । कटुत्वं । उग्रत्वं । कफवातदोषकण्डूमयकुष्ठभूतग्रहोग्रपीनसज्वरनाशित्वञ्च । अन्यच्च । मादुपाकसारत्वं । गुरुत्वं । अपित्तवर्द्धकत्वं । क्षारत्वं । विट्श्लेष्मवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

आदित्यसूनुः, पुं, (अदितेरपत्यं पुमान् आदित्यः सूर्य्यः तस्य सूनुः षष्ठीतत्पुरुषः ।) सुग्रीववानरः । इति हेमचन्द्रः ॥ यमः । शनैश्चरः । सावर्णिमनुः । वैवस्वतमनुः । इति पुराणं ॥ (कर्णः ।)

आदिदेवः, पुं, (आदिः कारणं स च देवश्चेति कर्मधारयः ।) नारायणः । इति त्रिकाण्डशेषः ॥ (जगत्सु आदावादिभूतत्वात् वासुदेवः विष्णुः महादेवः, ब्रह्मा च यथा, भगवद्गीतायां, १० । १२ ।

"परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं" ॥
त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानं" ।

यथा, महाभारते,—[illegible] मानभेदेन परिकीर्त्तितो नामभेदः ।

"[illegible]" ।)

आदिमं, त्रि, (आदौ भवं अथादित्वात् डिमच् । [illegible]) आद्यं । प्रथमभवम् । इत्यमरटीका [illegible] । (यथाह भारतस्य [illegible],—

"[illegible]" ।
"[illegible]" ।)

आदिराजः, पुं, (आदिः प्रथमः राजा इति कर्मधारयः ।) पृथुराजः । इति हेमचन्द्रः । (मनुः । [illegible] ।

"[illegible]" ।

[illegible] ।

"[illegible] ।
[illegible]" ।)

आदिवराहः, पुं, (आदिः कारणं स च वराहश्चेति कर्म्मधारयः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ आदिशूकरः । आद्यकोलः ।

आदिष्टं, क्ली, (आङ्+दिश्+क्तः ।) उच्छिष्टं । इति मेदिनी ॥

आदिष्टः, त्रि, (आङ्+दिश्+क्त ।) आदेशितः । आज्ञप्तः इति मेदिनी । (नियोजितः, उपदिष्टः, अनुशासितः, अभिहितः ।)

आदीनवः, पुं, (दीङ्क्षये भावे क्तः । स्वादय ओदितः, ओदितश्चेति नत्वं । आदीनस्य वा नम् । षन्यर्थे क इति बाऊलकात् वातेः कः) क्लेशः । इत्यमरः ॥ दोषः । दुरन्तः । इति मेदिनी ॥ (यथा, शिशुपालवधे २ । २२ ।
"यद्वासुदेवेनादीनमनादीनवमीरितं" ।)

आदीपनं, क्ली, (आदीप्यते आङ्+दीप्+भावे ल्युट् ।) आलिम्पना । इति त्रिकाण्डशेषः ॥ आलिपना इति भाषा ।

आदृतः, त्रि, (आङ्+दृङ्+आद्रियते यः कर्म्मणि क्त ।) कृतादरः । सादरः । अर्च्चितः । पूजितः । इत्यमरः ॥ (सावधानः, अवहितः, अप्रमत्तः । यथा, पञ्चतन्त्रे,
"आत्मागमादृतो रक्षेत्प्रमादाद्धि विनश्यति" ।)

आदृत्यः, त्रि, (आङ्+दृ+क्यप् ।) आदरणीयः । आदरयोग्यः ॥

आदेशः, पुं, (आङ्+दिश्+भावे घञ् ।) आज्ञा । इति हेमचन्द्रः ॥ ज्योतिःशास्त्रफलं । इति सिद्धान्तशिरोमणिः ॥ वर्णस्य वर्णान्तरोत्पत्तिः । प्रकृतिप्रत्ययोपघातिकार्य्यं । इति व्याकरणं ॥ (अनुमतिः, शासनं, उपदेशः, शास्त्राचार्य्योपदेशगम्यो वार्त्ताव्यापारः, कार्य्यभेदः, यथा मुग्धबोधे "स्थानिवदादेशः" । यथा, मनुः, ९ । २५८ ।
"मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह" ।)

आदेशी, [न्] पुं, (आङ्+दिश्+णिनि ।) दैवज्ञः । गणकः । इति हेमचन्द्रः ॥ (त्रि, आदेशकर्त्ता, उपदेष्टा, यथा, रघुवंशे, ४ । ६८ ।
"कपोलपाटलादेशि बभूव रघुचेष्टितं" ।)

आदेष्टा, [ऋ] पुं, (आदिशति ऋत्विगादीन् यागादिकर्म्मसम्पादनाय प्रेरयति । आङ्+दिश अतिसर्ज्जने+तृच् ।) यागविषये ममेदंसम्पादनाय यथार्थं कर्म्म कुर्व्वित ऋत्विगामादेशकः । तत्पर्य्यायः व्रती २ यष्टा ३ यजमानः ४ । इत्यमरः ॥ अध्यादेष्टा ५ दाक्षः ६ । इति हेमचन्द्रः ॥ आदेशकर्त्ता ॥

आद्यं, क्ली, (अद्यते यत् अद् कर्म्मणि ण्यत् ।) धान्यं । इति शब्दचन्द्रिका ॥ अदनीयद्रव्ये त्रि ॥ (यथा— मनुः, ५ । २४ ।
"तद्भुक्तवतमद्याद्यं हविः शेषञ्च यद्भवेत् ।
चिरस्थितमपि त्वाद्यं"—इत्यादि ।)

आद्यः, त्रि, (आदौ भवः दिगादिभ्यो यत् यद्वा अद्यते अद् कर्म्मणि ण्यत् ।) प्रथमः । इत्यमरः ॥ (यथा महाभारते,—
"दर्शयिष्ये तवाद्येह सदेहादेव कर्म्मणा" । रघुवंशे, १ । ११ ।
"आसीत् महीक्षितामाद्यः प्रणवश्छन्दसामिव" ।) भक्ष्यः । यथा मनुः ५ । २६ ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः" ।

आद्यकविः, पुं, (आद्यश्च कविश्चेति कर्म्मधारयः ।) वाल्मीकिमुनिः । इति भूरिप्रयोगः ॥ (पुराणकविः ब्रह्मा) ।

आद्यमाषकः, पु, (आद्य+मष्+हलश्चेति घञ्+कः ।) माषकपरिमाणं । पञ्चरत्तिकाः । इत्यमरः ॥ यथाह भास्कराचार्य्यः,—
"दशार्द्धगुञ्जं प्रवदन्ति माषं" ।)

आद्यवीजं, क्ली, (आद्यं मुख्यं वीजं कारणं ।) आदिकारणं । इति जटाधरः ॥

आद्या, स्त्री, (आदौ भवा दिगादित्वात् यत् टाप् ।) दुर्गा । इति शब्दरत्नावली । काली । तारा । त्रिपुरसुन्दरी । भुवनेश्वरी । इति तन्त्रसारनीलतन्त्रयोगिनीतन्त्राणि । प्रधाना शक्तिः । महाविद्या । यथा, मुण्डमालातन्त्रे १० पटलः ॥
"सत्ये तु सुन्दरी आद्या त्रेतायां भुवनेश्वरी ।
द्वापरे तारिणी आद्या कलौ काली प्रकीर्त्तिता ॥
नामभेदं प्रवक्ष्यामि रूपभेदं वरानने ।
न भेदः कालिकायाश्च तारायाः जगदम्बिके ॥
षोड़शी भुवनायाश्च भैरव्यास्त्रिपुरेश्वरि ।
छिन्नायाश्चैव धूमाया भीमायाः परमेश्वरि ॥
ततश्च वगलामुख्या मातङ्ग्याश्च सुरेश्वरि ।
न च भेदो महेशानि विद्याया वरवर्णिनि" ॥
आदिभूते त्रि ॥

आद्यूनः, त्रि, (आङ् पूर्व्वात् दीव्यतेरकर्म्मकत्वात् क्तः । दिवोविजिगीषायामिति निष्ठातस्य नत्वं यस्य विभाषेति नेट्, च्छ्वोरित्यूट् ।) औदरिकः । इत्यमरः ॥ पेटुक इति भाषा । (यदुक्तं, अमरे ।
"आद्यूनः स्यादौदरिके विजिगीषाविवर्ज्जिते" ।
"आद्यूनः सदष्टश्रिण्णेन प्रायोपच्यावलम्बितः" ॥ इति किराते ११ । ५ ।) आदिष्टीनः ॥

आद्योपान्तं, क्ली, (आद्यञ्च उपान्तञ्च द्वन्द्वः ।) पूर्व्वापरं । इस्तकनागादि इति भाषा ॥

आधमनं, क्ली, (आधीयते आङ्+धा+कमनन् ।) बन्धकं । इति स्मृतिः । (आधिः । यथा मनुः,—
"योगाधमनविक्रीतं योगदानप्रतिग्रहं ।
यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्" ।

आधानं, क्ली, (आधीयते आङ्+धा+भावे ल्युट् यद्वा आधीयते स्थाप्यते यत् कर्म्मणि ल्युट् ।) गर्भाधानं । अग्न्याधानं । स्थापितद्रव्यं । इति स्मृतिः ॥ (ग्रहणं, धारणं । अधिगमः, करणं । सम्पादनं । श्रौताग्नेः स्मार्त्ताग्नेर्वा ग्रहणं, ग्रहणानां प्रतिदिनकर्त्तव्यतया विहितवह्निस्थापनपूर्व्वकहोमादिक्रिया, यजनं, होमः । यथा रघुवंशे, १ । २४ ।
"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः" ॥
यथा मनुः, ५ । १६८ ।
"भार्य्यायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि ।
पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च" ॥
यथा महाभारते,—
"नर्व्वेषां पुनराधानं विधिदृष्टेन कर्म्म
यथा मेघदूते, पूर्व्वमेघे । ३ ।
"तस्य स्थित्वा कथमपि पुरः को

आधानिकं, क्ली, (आधानं गर्भाधानं प्रयोजनमिति ठक् ।) गर्भाधान त्रिकाण्डशेषः ॥

आधारः, पुं, (आध्रियन्ते अस्मिन् इ अध्यायन्यायेति सूत्रे नादधिकरणे घञ् । व्याकरणे कारकं, तल्लक्षणं यथा सिद्धान्तकौ रोऽधिकरणं कर्तृकर्म्मद्वारा धारः कारकमधिकरणसंज्ञं स्यात् । व्याश्लेषविषयव्याप्तिभेदाच्चतुर्विधं । त कौमुद्यां, औपश्लेषिकोवैषयिको धारस्त्रिधा यथा—कटे आस्ते । मोक्षे सर्व्वस्मिन्नात्मास्ति ।) अधि वालं । अम्बुधारणं । इति मेदिनी सेकार्थं सेतुना बद्धजलं जलं विश स आधारः बद्धकन्दरादिः । बोध इत्यमरटीकायां भरतः ॥ इत्याल माधारः । इति वैकुण्ठः ॥ देवालि धारस्थानमाधार इति मधु ॥ (यथा
"आधारबन्धप्रमुखैः प्रयत्नैः
संवर्द्धितानां सुतनिर्व्विशेषं ।
कच्चिन्न वाय्वादिरुपप्लवो वः
श्रमच्छिदामाश्रमपादपानाम्" ॥
याज्ञवल्क्यः ।
"तथात्मकोऽप्यनेकस्तु

आधार्म्मिकः, त्रि, (अधर्म्म+ठञ् ।) इति त्रिकाण्डशेषः ॥ (यथा मनुः ।
"नाधार्म्मिके वसेद्ग्रामे" ॥)

आधिः, पु, (आङ्+धा+किः ।) व्याघ्रः । बन्धकं । व्यसनं । अधि मेदिनी ॥
(यथा, हितोपदेशे ।
"आधिव्याधिपरीताय अद्य श्वो वा कोऽपि नाम शरीराय धर्म्मापेतं
तथा च वैराग्यशतके ।
"आधिव्याधिशतैर्जनस्य
विविधैरारोग्यमुन्मूल्यते" ॥)

आधिक्यं, क्ली, (अधिक+ष्यञ् ।) अधि अधिकत्वं । अतिशयता । यथा ।
"युग्मायामपि रात्रौ चेत् शोणितं
कन्या च पुंवत् भवति शुक्राधिक्ये पुम
इति ज्योतिस्तत्त्वम् ॥ (श्रेष्ठता । उ
ल्यम् । यथा साहित्यदर्पणे । १० प
"आधिक्यमुपमेयस्योपमानात् न्यून
यथा, मनुः ७ । १६६ ।
"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्म
आधिक्यं नाम यदायुर्वेदे माध्यम
मौग्मलस्य अन्यदा प्रतिसमवाय

तिसम्बद्धमपि द्विरभिधीयते तत् पुनरुक्त-
कं तच्च पुनरुक्तं द्विविधं, अर्थपुनरुक्तं
रुक्तञ्च। तत्रार्थपुनरुक्तं नाम यथा,—
मौषधं साधनम्" इति, शब्दपुनरुक्तं
यजं भेषजम्" इति चरकः ॥)
त्रि, (आधि+धा+क।) बद्धः। अ-
इत्यजयपालः ॥
कं, त्रि, (अधि+देव+ठञ्। अनु-
दीनां च इत्युभयपदवृद्धिः।) दुःखविशेषः।
ा,। "आधिदैविकं यक्षराक्षसविनायकग्र-
वेशनिबन्धनं"। इति साङ्ख्यतत्त्वकौमुदी ॥
मधिकृत्य,प्रवृत्तं,दाहशीतादिजनितं दुःखं।
तादिवृष्ट्यादिहेतुकं दुःखं। देवतामधि-
वृत्तं शास्त्रम्। यथा मनुः ६। ८३।
यज्ञं ब्रह्म जपेदाधिदैविकमेव च।
त्मिकञ्च सततं वेदान्ताभिहितञ्च यत्" ॥
सप्तविधे व्याधावुपनिपतति" इति सुश्रुतः।)
यं, क्ली, (अधिपति+ष्यञ्।) अधिपते-
। स्वामित्वं। प्रभुत्वं। ऐश्वर्य्यं। यथा,
"नहि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणां।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यं" ॥
श्रीभगवद्गीतायां २ अध्यायः ८ ॥
। मनुः १२।१००।
वैस्यौकाधिपत्यञ्च वेदशास्त्रविदर्हति"।)
ोगः, पुं, (आधेर्बन्धकस्य भोगः।) बन्धक-
स्य भोगः ॥
ौतिकं, त्रि, (अधिभूत+ठञ्। अनुशति-
ानां चेत्युभयपदवृद्धिः।) दुःखविशेषः। यथा।
ह्योपायसाध्यं दुःखं द्वेधा। आधिभौतिकं आ-
दैविकञ्च। तत्राधिभौतिकं मानुषपशुमृगप-
सरीसृपस्थावरनिमित्तं"। इति साङ्ख्यतत्त्व-
मुदी ॥ ("तत्तु सप्तविधे व्याधावुपनिपतति"।
। सुश्रुतः ॥)
न्यवः, पुं, (आधि+मन्यु+अच्।) ज्वरादिः।
। शब्दावली ॥
ेदनिकं, त्रि, (अधि+विद्+ल्युट्। ततः
धिवेदन+ठञ्।) द्वितीयविवाहार्थं प्रथमस्त्रियै
धनादि। यथा,—
धिविन्नस्त्रियै देयमाधिवेदनिकं समं।
त्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितं" ॥
याज्ञवल्क्यः ॥
, त्रि, (आङ्+धू+क्तः।) आधूतः।
म्पितः। इत्यमरटीकायां रायमुकुटः ॥
कः, त्रि, (अधुना+ठञ्।) अधुनातनः।
ः ॥
, त्रि, (आङ+धृ+क्त।) कम्पितः। इत्य-
ः। (विचलितः, अभिभूतः, व्याकुलितः।
ेलितः, चालितः। यथा, रघुवंशे, १। १८।
परेषूलिरैर्ववाधूतवनराजिभिः"।)
, त्रि, (आङ्+धा+यत्।) आधारस्थित-

वस्तु। यथा। शाब्दबोधे चैकपदार्थे अपरपदार्थ-
संसर्गः संसर्गमर्यादया भासते। स च क्वचिद्भेदः
क्वचिदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिवि-
षयविषयिभावादिः। इति गदाधरभट्टाचार्य्यकृत-
प्रथमव्युत्पत्तिवादः ॥ उत्पाद्यः। यथा,—
"सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः" ॥
इति वोपदेवकृतमुग्धबोधीयकारिका ॥ आधेय
उत्पाद्यः। यथा पक्वमृण्मयपात्रेषु रक्ततागुणः स
वह्निसंयोगादिना निष्पाद्यते। इति तट्टीकायां
दुर्गादासः ॥
आधोरणः, पुं, (आधोरयति धोरंगतिचातुर्य्ये
कर्त्तरि ल्यु।) हस्तिपकः। माहुत इति भाषा।
("आधोरणा हस्तिपका हस्त्यारोहा निषा-
दिनः"। अमरः। यथा,—रघुवंशे ७। ४६।
"आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितैः क्षुराग्रैः" ॥)
आध्मातः, पुं, (आङ्+ध्मा+क्तः।) शब्दितः। दग्धः।
वातरोगविशेषः। संयतः। इति मेदिनी ॥ (स्फीतः
दर्पादिना उद्धतः, विवर्द्धितः। यदुक्तं। "ततो
मानाध्मातः स पतति यदा शोकगहने"। हितो-
पदेशे। "ततोऽसौ दर्पाध्मातस्तस्योपरि आत्मानं
निक्षिप्य पञ्चत्वं गतः"। उत्तरचरिते। "ज्यानि-
र्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन्"।)
आध्मानं, क्ली, (आङ्+ध्मा+ल्युट्।) वातव्याधि-
विशेषः। तस्य रूपं।
"साटोपमत्युग्ररुजमाध्मातमुदरं भृशं।
आध्मानमिति जानीयाद्घोरं वातनिरोधजं" ॥
इति निदानं। पेटफाँपा इति भाषा।
तस्य चिकित्सा यथा,—
"आध्माने लङ्घनं पूर्व्वं दीपनं पाचनं ततः।
फलवर्त्तिक्रियां कुर्य्यात् वस्तिकर्म्म च शोधनं ॥
कर्षमात्रा भवेत् कृष्णा त्रिवृता स्यात् पलोन्मिता।
खण्डादपि पलं ग्राह्यं चूर्णमेकत्र कारयेत् ॥
मधुनाक्षमितं लिह्यात् चूर्णमाध्माननाशनं" ॥
नाराचचूर्णं ॥ १ ॥
"दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः।
लिम्पेत् कोष्णैरम्लपिष्टैः शूलाध्मानयुतोदरं ॥
हैमवती वचा। दारुषट्कलेपः ॥ २ ॥
"अभयारग्वधो धात्री दन्ती तिक्ता गुडूची त्रिवृत्।
तुम्बा प्रत्येकमेतानि ग्राह्याणि पलमात्रया ॥
तानि संचूर्य सर्व्वाणि जलाढ़कयुगे पचेत्।
तत्र तोयेऽष्टमं भागं कषायमवशेषयेत् ॥
निम्बतुर्जैपालबीजानि कर्षाणि पलमात्रया।
तनुवस्त्रकृतान्येव तस्मिन् क्वाथे शनैः पचेत् ॥
ज्वालयेदनलं मन्दं यावत् क्वाथो घनो भवेत्।
ततः खल्ले क्षिपेत् भागानष्टौ जैपालबीजतः ॥
भागांस्त्रीन् नागराद्दौ च मरिचात् द्वौ च मागधात्।
गन्धकात् द्वौ च तानीह यावद्यामं विमर्द्दयेत् ॥
रसो नाराचनामायं मरिचौ गुञ्जिकामितः।
भवेद्द्विगुणितैरेव रोगानेतान् विनाशयेत् ॥
आध्मानं गुल्मनाहं च क्ष्वाहं तथैव च।

उदावर्त्तं तथागुल्ममुदराणि च रक्तशौ ॥
वेगे शान्ते च भुञ्जीत शर्करासहितं दधि।
ततस्तु सैन्धवेनापि ततो दध्योदनं मनाक्" ॥
महानाराचो रसः ॥ ३ ॥ इति भावप्रकाशः ॥
(वायुना सवेदनमुदरपरिपूर्णत्वमाध्मानत्वं। इति
रक्षितनिघण्टव्याख्याने हेमचन्द्ररचितः।)
आध्मानी, स्त्री, (आङ्+ध्मा+ल्युट्+ङीप्।)
नलिकानामगन्धद्रव्यं। इति राजनिर्घण्टः ॥
आध्या, स्त्री, (आङ्+ध्यै+अङ्+टाप्।) चिन्ता।
स्मृतिः। इति शब्दरत्नावली ॥
आध्यात्मिकं, त्रि, (आत्मानमधिकृत्य भवं अधि+
आत्मन्+ठञ्।) दुःखविशेषः। यथा। दुःखानां
त्रयं दुःखत्रयं तत् खल्वाध्यात्मिकं चाधिभौतिकं
चाधिदैविकञ्च। तत्राध्यात्मिकं द्विविधं शारीरं
मानसञ्च। शारीरं वातपित्तश्लेष्मणां निमित्तं।
मानसं कामक्रोधलोभमोहेर्ष्याविषादविशेषादर्श-
ननिबन्धनं। सर्व्वं चैतदान्तरोपायसाध्यत्वात् आ-
ध्यात्मिकं दुःखं। इति साङ्ख्यतत्त्वकौमुदी ॥
(आत्मतत्त्वविषयकं। यथा, मनुः २। ११७।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्" ॥
आध्यानं, क्ली, (आङ्+ध्यै+ल्युट्।) ध्यानं। चिन्ता।
इत्यमरः ॥
आध्यापकः, पुं, (आ सम्यक् अध्यापयति यः इति
अध्यापकः। स एव स्वार्थे अण्।) अध्यापकः। इति
शब्दरत्नावली ॥
आनः, पुं, (अन्+घञ्) उच्छ्वासः। बहिर्मुखश्वासः।
इति हेमचन्द्रः ॥ (अन्तःस्थितस्य प्राणवायोर्नासि-
कयोच्छ्वासः।)
आनकः, पुं, (आङ्+अन्+ण्वुल्) पटहः। भेरी।
मृदङ्गः। शब्दयुक्तमेघः। इति मेदिनी ॥
(यथा, भगवद्गीतायां १। १३।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः"।)
आनकदुन्दुभिः,पुं,(आनकाः दुन्दुभयो देववाद्यविशेषाः
यस्य जन्मनि। वसुदेवजन्मनि देवा दुन्दुभिध्व-
निचक्रुः।) वसुदेवः। इत्यमरः ॥ (कृष्णपिता।
यथा—हरिवंशे ॥
"वसुदेवो महाबाहुः पूर्व्वमानकदुन्दुभिः।
जज्ञे यस्य प्रसूतस्य दुन्दुभ्यः प्राणदन् दिवि ॥
आनकानां च संह्रादः सुमहानभवद्दिवि"।)
आनकदुन्दुभिः, पुं स्त्री, (आनकः शोभाढ्यो दुन्दु-
भिः।) बृहड्ढक्का। इत्यमरटीकायां भरतः ॥
आनतः, त्रि, (आङ्+नम्+क्तः।) नतः। तत्-
पर्य्यायः। प्रणतः २ अवनतः ३। इत्यमरः ॥
(अधोमुखः, विनतः, प्रणतः, विनयवान्। यथा,
हरिवंशे ॥
"शिरसा चैव पादौ ते वन्दनमनुपागतौ"।
महाभारते।
"न कदाचित् स्त्री विद्या वानेशानतपर्व्वणा"।
मनुः।
"यस्मानानतपर्वं माङ्गीयं देयमाददीत"।)
आनर्त्तः, ... नृति+ह+अक।) वाणिनी-

श्रितः। यथा। प्रायश्चित्तोपदेशाय वस्त्रादिना ब्राह्मणस्तोषणीयः। यथा मिताक्षरायां पराशरः।
"पापं प्रख्यापयेत् पापी धेनुं दत्त्वा तथा वृषं"।
इत्यत्रोपलक्षणं।
"प्रख्याप्य पापं वक्तृभ्यः किञ्चिद्दत्त्वा व्रतं चरेत्।"
इति स्मृतेः।
देवलवचने "तोषयित्वा द्विजोत्तमान् इति"। अत्र तोषयित्वा इति श्रवणात् आनतिकरणेन तदग्रहणाददोषः। इति प्रायश्चित्ततत्त्वं।

आनद्धं, क्ली, (आनह्यते चर्म्मणा बध्यते इति। आङ्+नह+क्तः।) चर्म्मबद्धमुखवाद्यमात्रं। तत्तु मुरजादि। इत्यमरः॥ वस्त्रमात्रं। तत्तु वेशभूषादि। इत्यजयपालः॥

आनद्धः, त्रि, (आङ्+नह्+कर्म्मणि+क्तः।) सन्धितः। बद्धः। इति मेदिनी॥ (यथा सुश्रुते।
"कृष्णतुषारैः सविता हिमानद्धा जलाशयाः"।)

आननं, क्ली, (आनिति अनेन। आङ्+अन्+ल्युट्) मुखं। इत्यमरः॥ ("तदाननं मृत्सुरभि क्षितीश्वरः"
इति रघुः। ३। ३।)

आनन्दः, पुं, (आङ्+नन्द+घञ्) आह्लादः। तत्पर्य्यायः। आनन्दथुः २ शर्म्म ३ सातं ४ सुख ५ मुत् ६ प्रीतिः ७ प्रमोदः ८ हर्षः ९ प्रमदः १० आमोदः ११ संमदः १२। इत्यमरः॥
(यथा, उत्तरचरिते।
"यत्रानन्दाश्च मोदाश्च यत्र क्लिष्टाश्च सम्पदः"।
मनुः।
"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन"।)
वासुदेवस्य बलविशेषः। इति हेमचन्द्रः॥

आनन्दः, त्रि, (आनन्द+अर्श आदित्वात् अच्।) आनन्दविशिष्टः। हर्षयुक्तः। सुखी। इत्यमरटीका॥
("गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति"।
इत्यमरोक्तेः अत्र गुणिलिङ्गः।)

आनन्दथुः, पुं, (आङ्+नन्द+अथुच्।) आनन्दः। हर्षः। इत्यमरः॥ तद्युक्ते त्रि॥

आनन्दनं, क्ली, (आङ्+नदि+ल्युट्) गमनागमनसमये सुहृदादेरालिङ्गनारोग्यस्वागतादिप्रश्नादिद्वारा आनन्दोत्पादनं। तत्पर्य्यायः। सभाजनः २ समाजनः ३ सुभाजनः ४ आप्रच्छः ५ आमन्त्रणं ६। इत्यमरः सटीका च॥ (आनन्दजननं, हर्षोत्पादनं। प्रमोदकरः, सुखजनकः। यदुक्तं।
"मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः"।
इति हितोपदेशे।)

आनन्दपटं, क्ली, (आनन्दाय पटम्।) नवोढ़ावस्त्रं। इति हारावली॥

आनन्दप्रभवं, क्ली, (आनन्दः प्रभवोऽस्य तत्।) रेतः। वीर्य्यं। इति हेमचन्द्रः॥
("शय्याकामार्त्तिनिर्भरे कौशिये जायतेऽस्मिन्।
तेन वर्द्धते तत्तद्वत् मदात् कुम्भादिवोदकं॥
चोरोभिः स्पन्दते देहात् समन्तात् सुखवाहिभिः।
हर्षोदीरितं रागात् जघ्न्याच्च मनोभवात्॥
दृष्टौ संश्रय निर्याति स्पर्शाद्विमादिवोदकं।"
इति चरकः॥)

"शब्देनाश्रितं शुक्रं प्रसन्नमनसामया।
स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् संप्रवर्त्तते॥"
इति सुश्रुतः॥)

आनन्दमयकोषः, पुं, (आनन्दमयस्य परमात्मनः कोष इवावरकः।) सत्त्वप्रधानाज्ञानं। तत्पर्य्यायः। कारणशरीरं २ सुषुप्तिः ३। इति वेदान्ताः॥

आनन्दा, स्त्री, (आनन्दयति या। आङ्+नन्द+णिच्+अच्+टाप्) विजया। आरामशीतला। इति राजनिर्घण्टः॥ [इति शब्दमाला॥

आनन्दिः, पुं, (आङ्+नन्द+क्तिः।) आनन्दः। हर्षः।

आनन्दितः, त्रि, (आङ्+नन्द+क्त। यद्वा आनन्दः सञ्जातोऽस्य। आनन्द+इतच्।) आनन्दयुक्तः। हृष्टः। आह्लादितः॥ (यथा महाभारते।
"पुनरानन्दिताः सर्व्वे मथुरायां वसामहे।")

आनन्दी, [न्] त्रि, (आनन्द+इनि।) आनन्दविशिष्टः॥

आनन्दी, स्त्री, वृक्षविशेषः। आकन्दपाता इति ख्याता। इति शब्दचन्द्रिका॥

आनयः, पुं, (आनीयते वेदाध्ययनायात्र। आङ्+नीङ+अच्) उपनयनं। इति हेमचन्द्रः॥

आनयनं, क्ली, (आङ्+नी+ल्युट्।) स्थानान्तरनयनं। आना इति भाषा॥ (यथा रामायणे।
"आदिशत्पुरुषांस्तत्र राज्ञामानयने बहून्"।)

आनर्त्तः, पुं, (आङ्+नृत्+घञ्।) देशविशेषः। द्वारका इति ख्याता। नृत्यस्थानं। युद्धं। इत्यमरः॥ जलं। इति मेदिनी॥ आनर्त्तदेशवासी लोकः। इत्यमरटीका॥ (यथा हरिवंशे। "आनर्त्तान् कालकूटांश्च कुलिन्दांश्च विजित्य सः"॥
स्वनामख्यातो राजा।
"शर्य्यातेर्मिथुनं त्वासीदानर्त्तो नाम विश्रुतः।
"आनर्त्तस्य तु दायादो रेवो नाम महाद्युतिः"॥
"आनर्त्तविषयश्चासीत् पुरी चास्य कुशस्थली"।
"आनर्त्तस्त विभोः पुत्रः सुकुमारस्ततोऽभवत्"।)

आनायः, पुं, (आङ्+णीञ्+घञ्।) जालं। इत्यमरः।

आनाय्यः, पुं, (आनाय्यते गार्हपत्यादानीय संस्क्रियतेऽसौ आङ्+नी+ण्यत्।) दक्षिणाग्निः। इत्यमरः॥ गार्हपत्यादग्नेरानीय यो दक्षिणाग्निरारोप्यते। तत्र। इति भरतः॥ होम करिवार निमित्ते घर हइते आनिया दक्षिणदिके राखा आगुन् इति भाषा॥

आनाहः, पुं, (आङ्+नह्+घञ्।) मूत्रपुरीषरोधकरोगः। तत्पर्य्यायः। विबन्धः २। इत्यमरः॥ विष्टम्भः ३ मलरोधनः ४। इति राजनिर्घण्टः॥
("आनाहार्त्तं ततो दृष्ट्वा तत्सैन्यमसुखार्द्दितम्"।
इति महाभारते।) तस्य सम्प्राप्तिरूपे। यथा,
"आमं शकृद्वा निचितं क्रमेण
भूयो विबद्धं विगुणानिलेन।
प्रवर्त्तमानं न यथास्वमेनं
विकारमानाहमुदाहरन्ति"॥ इति निदानं॥
("यस्य वातः प्रकुपितः कुक्षिमाश्रित्य तिष्ठति।
नाधो व्रजति नाप्यूर्द्ध्वमानाहस्तस्य जायते"॥
इति चरकः॥)

अस्य चिकित्सामाह।
[illegible]
आनाहेषु च कुर्व्वीत
[illegible]
गुडेन तुल्या गुटिका [illegible]
वर्त्तिस्त्रिकटुसैन्धव
सर्षपगृहधूमकुष्ठमदनैः।
मधुनि गुडे वा पक्वे-
र्विहिता [illegible]
वर्त्तिरियं दृष्टफला
शनैः प्रणिहिता गुदे हन्त्या
आनाहमुदरवर्त्तिं
शमयति जठरं तथा
इति त्रिकटुकाद्यावर्त्तिः॥
पक्वामाशयदुष्टे तु चिकित्सा [illegible]
"उदावर्त्तक्रियानाहे
"दिवतरा शिग्रुवचा कुष्ठ
सुवर्च्चिका चेति विडङ्गं।
सुखाम्बुनानाहविसूचिकार्त्ति
हृद्रोगगुल्मोर्द्ध्वसमीरणघ्नम्॥
वचाभयाचित्रकदारुबिल्व
सपिप्पलीकातिविषान् [illegible]
उष्णाम्बुनानाहविमूढवातान्
पीत्वा जयेदाशु
त्रिवृद्धरीतकीश्यामा
वटिका
राठ-धूम विडव्योष-गुड
गुदेऽङ्गुलसमावर्त्तिर्निधेयानाहशूलनुत्
मूलकं शुष्कमापच्च वर्षाभूसूचकान्
आरेवतफलच्चापि पक्त्वा तेन पचेत्
तत् पीतमात्रं शमयेदुदावर्त्तं [illegible]
शुष्कमूलकाद्यं घृतम्॥) इति [illegible]

आनिलि, पुं, (अनिलस्य वायोरपत्यं इञ्।) हनूमान्। इति त्रिकाण्डशेषः॥

आनिली, स्त्री, (अनिल+अण्+ङीप्) नक्षत्रं। इति हेमचन्द्रः॥

आनील, पुं, नीलघोटकः। इति (असितः। ईषन्नीलः। यथा
"आनीलाभैर्विरचितपरभागा रत्नैः"॥

आनुकूल्यं, क्ली, (अनुकूल+ष्यञ्।) (साम्मुख्यं। प्रसादः।
"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र [illegible]
यथा,—रामायणे।
"रमतश्चानुकूल्येन यथः संवत्सरा [illegible]

आनुगत्यं, क्ली, (अनुगतस्य भावः ष्यञ्।) अनुगतत्वं।
आप्रत्ययेन निष्पन्नम्॥

आनुपूर्व्वी, स्त्री,क्ली, (अनुपूर्व्व+ष्यञ्।) अनुक्रमः। इत्यमरः॥ (यथा मनु ९।
"षड्ानुपूर्व्व्या विप्रस्य
यथा रामायणे।
"आनुपूर्व्व्या स धर्म्मज्ञ प्रपच्छ

निकः, त्रि, (अनुमानाय हितः । अनुमान
क् । युक्तिसिद्धः । सांख्यमते प्रधानं प्रकृतिः ।)
नानसम्बन्धीयः । अनुमानविषयीभूतः ॥
क्तः, स्त्री, (आ + अनु + रन्ज + क्ति ।) अनु-
। (आसक्तिः । अनुरक्तिः ॥)
धित्सा, स्त्री, (आ + अनु + वि + धा + सन्
अङ् + टाप् ।) उपकृतेरप्रत्युपकारेच्छा । इति
नम् ॥
पुं, (अनूप + अण् ।) अनूपदेशस्यजन्तु-
। तच्च खड्गिमहिषवराहादि । एषां मांस-
ः। गुरुत्वं । उष्णत्वं । मधुरत्वं । स्निग्धत्वं ।
कारित्वं । वायुनाशित्वञ्च । इति राजवल्लभः ॥
प्रदेशजलगुणाः । घनत्वं । गुरुत्वं । पिच्छि-
। मधुरत्वं । श्लेष्मजनकत्वं । स्निग्धत्वं । अमि-
हत्वं । प्रमेहश्लीपदच्छर्द्दिगलगण्डादिरोग-
रत्वञ्च । इति राजनिर्घण्टः ॥ अनूपदेशस्य-
र्लक्षणं तन्मांसस्य गुणाश्च ।
चराः प्लवाश्चापि कोशस्थाः पादिनस्तथा ।
। एते समाख्याताः पञ्चधानूपजातयः ॥
पा मधुराः स्निग्धा गुरवो वह्निमर्द्दनाः ।
लाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशं ॥
भिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः स्मृताः" ॥
भावप्रकाशः ॥
मरश्चमरः खड्गो महिषो गवयो गजः ।
वराहश्चानूपा मृगाः सर्व्वे रुरुस्तथा" ॥
ह्यो मधुरो नातिधान्वानूपनिषेवणात्" ।
चरकः ॥ तथाच हारीतः ॥
नूपास्तेषु विज्ञेयाः श्लेष्मना वातकोपनाः" ।
पवर्गस्तु पञ्चविधः । यथा । "कूलचराः प्लवाः
शस्थाः पादिनो मत्स्याश्चेति" इति सुश्रुतः ॥
जलयुक्ते, त्रि ।)
स्यं, क्ली, (अन्टशंसस्य भावः । अन्टशंस +
।) अनिष्ठुरता ॥ (अक्रौर्य्यं । अहिंसत्वं । का-
। यथा मनुः ३ । १०१, ३ । ५४, ३ । ११२ ।
न्टशंस्यात् ब्राह्मणस्य भुञ्जते हीतरे जनाः" ।
शं तत्कुमारीणामान्टशंस्यं च केवलम्" ॥
नयेत् सह भृत्यैस्तावान्टशंस्यं प्रयोजनम्" ॥)
क्षं, क्ली, (अन्तरीक्ष + अण् ।) अन्तरीक्षं ।
। इति द्विरूपकोषः ॥ (यथा महाभारते ।
पातांस्त्रिविधान् प्राप्नुर्नारदो भगवानृषिः ।
चैवान्तरीक्षांश्च पार्थिवांश्च पितामह" ॥)
रीक्षभववस्तुनि त्रि ॥ (यथा रामायणे ।
ि तेऽस्त्वान्तरीक्षेभ्यः पार्थिवेभ्यः पुनः पुनः" ॥)
का, स्त्री, (अन्तिक + अण् + टाप् ।) अन्तिका ।
ा भगिनी ॥ इति द्विरूपकोषः ॥
कः, त्रि, (अन्त + ठक् ।) अन्ते भवः । अन्त-
न्धीयः ॥
न्द ल् ख् दोलने । (अदन्तचुरा०-उभ०-अक०
।) इति कविकल्पद्रुमः ॥ आन्दुदोलत् । इति
दासः ॥
लनं, क्ली, (आन्दोल + ल्युट् ।) चलनं ।
पनं ॥ ("किन्त्वाधामरविन्दसुन्दरदृशां माश-
आमरान्दोलनादुद्वेलद्भुजवल्लिकङ्कणझणत्कारः
क्षणं वार्य्यताम्" । इति कालिदासः । पुनः पुन-
रभ्यासः । मुहुरालोचनम् ।)

आन्दोलितं, त्रि, (आन्दोल + क्त ।) कृतान्दोलनं ।
तत्पर्य्यायः । चलितं २ कम्पितं ३ धूतं ४ वेल्लित
५ । इति हेमचन्द्रः ॥

आन्धसिकः, त्रि, (अन्धस् + ठक् ।) पाचकः । सूप-
कारः । इत्यमरः ॥

आन्वयिकः, त्रि, (अन्वय + ठक् ।) प्रशस्तकुलजः ।
सत्कुलोद्भवः । तत्पर्य्यायः । कौलः २ । इति त्रि-
काण्डशेषः । अन्वयसम्बन्धी ॥ (कुलीनः । दिव्य-
भावरतः । कुलाचारी । साधकः । "औद्भिखोत-
सिकः शैवः कौल आन्वयिकः स्मृतः" । इति
त्रिकाण्डशेषः ।)

आन्वीक्षिकी, स्त्री, (श्रवणादनु ईक्षा पर्य्यालोचना
प्रयोजनमस्याः । अनु + ईक्षा + ठञ् + ङीप् ।)
तर्कविद्या । न्यायविद्या । इत्यमरः ॥ दुर्गा । यथा,
"आत्मवेदनशीलत्वादन्वीक्षणपराथवा ।
अन्वीक्षां कुरुते यस्मात्तस्मादान्वीक्षिकी स्मृता" ॥
इति देवीपुराणे ४५ अध्यायः ॥ (अध्यात्मविद्या,
प्रत्यक्षपरोक्षाभ्यामीक्षितस्य अर्थस्यानु पश्चात्
ईक्षणं अन्वीक्षा सा प्रयोजनं यस्याः सा आन्वी-
क्षिकी अनुमानविद्या न्यायदर्शनवैशेषिका-
दिका । इयं हि त्रयीवार्त्तादिविद्याचतुष्टयान्त-
र्गता आत्मविज्ञानहेतुका धर्म्मार्थसंसाधिका रा-
जभिरवश्यं रक्षणीया सती विद्येति कथ्यते ॥
यथा, कामन्दकीयनीतिसारे ।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती ।
विद्याश्चतस्र एवैता लोकसंस्थितिहेतवः" ॥
"आन्वीक्षिक्यात्मविज्ञानं धर्म्माधर्म्मौ त्रयोस्थितौ ।
अर्थानर्थौ च वार्त्तायां दण्डनीतौ नयानयौ" ॥
इति ।)

आप ऌ ङ ञौ कि व्याप्तौ । (चुरा० पक्षे भ्वादि०-
स्वादि० वा-उभ०-पर०-सक०-सेट् ।) इति कवि-
कल्पद्रुमः ॥ ऌ आपत् । ङ आप्नोति कीर्त्ति-
र्ब्रह्माण्डं । ञौ आप्ता । कि आपयति आपति ।
स्वराज्यं प्राप्स्यते भवान् । इति गणकृतानित्य-
त्वात् । इति दुर्गादासः ॥ (पालने ।
"स सोऽन्तरे सर्व्वमिदमुत्पाद्यापुश्चराचरम्" ।
इति मनुः । (अभि) अभिलाषे ।
"नान्यदत्तमभीप्सामि स्थानमम्ब ! स्वकर्म्मणा ।
इच्छामि तदहं स्थानं यन्न प्राप पिता मम" ॥
इति विष्णुपुराणम् । (प्रति + अव) प्रतिग्रहणे ।
"तां प्रत्यवापुरविलम्बितमुत्तरन्तो
धौताङ्गलग्नघननीलपयोजपत्रैः" । इति ।
शिशुपालवधे । (प्र) उपगमने ।
"ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः" ।
इति रघुवंशे १० । ६ । इत्यादि ।)

आपः, पुं, (आप् + घञ् ।) अष्टवसुमध्ये वसुविशेषः ।
इति जटाधरः ॥

आपः [स्] क्ली, (आप् + असुन् ।) जलं । पापं ।
इत्युणादिकोषः ॥

आपक्वं, त्रि, (आङ् + पच् + क्त ।) ईषत्पक्वकला-
यादि । तत्पर्य्यायः । पौलिः २ अभ्यूषः ३ । इत्य-
मरः ॥ रुटी इति केचित् ॥ (यथा ऋतुसंहारे ।।
"आपक्वशालिललितानतगात्रयष्टिः
प्राप्ता शरन्नववधूरिव रम्यरूपा" ॥ १ ॥)

आपगा, स्त्री, (अपां समूहः आपं । तस्य समूहे
इत्यण् । तत आपेन जलसमूहेन गच्छति प्रचल-
तीति । आप् + गम् + ड + टाप् ।) नदी ।
इत्यमरः । (यथा रामायणे ।
"आपगाः कृतपुण्यास्ताः पद्मिन्यश्च सरांसि च" ॥
"आपगाश्च महानूपाः सानुमन्तश्च पर्व्वताः" ॥
तथाच माघे २ । १०० ।
"सम्भूयाम्भोधिमभ्येति महानद्या नगापगा" ॥)

आपणः, पुं, (आङ् + पण + घञ् ।) पण्यविक्रय-
शाला । दोकान इति भाषा । तत्पर्य्यायः । निषद्या
२ विपणिः ३ पण्यवीथिका ४ । इत्यमरः ॥ चतुष्कं
हट्टे इत्यन्ये । आपणादिद्वयं हट्टे विपण्यादिद्वयं
हट्टमार्गे इति केचित् । इत्यमरटीकायां भरतः ।
(यथा रामायणे ।
"माल्यापणेषु राजन्ते नाद्य पण्यानि वै तथा" ।
तथा महाभारते ।
"मत्यमाल्यापणानाञ्च ददृशुः श्रियमुत्तमां" ॥)

आपणिकः, पुं, (आङ् + पण् + इकन् । अथवा आ-
पण + ठक् ।) वणिकः । इत्युणादिकोषः ॥ दोकानि
मुदि व्यवसायी इत्यादि भाषा । (पण्यानां क्रयवि-
क्रयादिविषयके, त्रि ॥)

आपतिकः, पुं, (आङ् + पत् + इकन् ।) श्येनपक्षी ।
बाज इति भाषा । दैवायत्ते त्रि । इत्युणादिकोषः ॥

आपत्, [द्] स्त्री, (आङ् + पद् + क्विप् ।) विपत् ।
विपत्तिः । इत्यमरः ॥ यथा ।
"आपत्सु मूढो द्युतिमान् यः सम्यक् प्रतिपद्यते ।
कर्म्माण्यवश्यकार्य्याणि तमाहुः पुरुषं बुधाः" ॥
इति वह्निपुराणम् ॥ ० ॥ किञ्च ।
"आपदि किं शरणीयं शरणीयं चरणयुगलम-
म्बायाः । तच्छरणं किं कुरुते ब्रह्मादीनपि किङ्क-
रान् कुरुते" ॥ इत्युद्भटः ॥ ० ॥ मनुः ११ । २९-३० ।
"विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः ।
आपत्सु मरणाद्भीतैर्व्विधेः प्रतिनिधिः कृतः" ।
"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते ।
न साम्परायिकं तस्य दुर्म्मतेर्व्विद्यते फलम्" ॥
इत्येकादशीतत्त्वम् ॥
"आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि ।
मनस्तापेन शुद्ध्येत्तु द्रुपदां वा शतं जपेत्" ।
इति प्रायश्चित्ततत्त्वम् ॥ ० ॥
"आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि ।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि" । इति ।
"जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे ।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये" ॥
इति च चाणक्यम् ॥ ७८ । २१ ॥

आपत्तिः, स्त्री, (आङ् + पद् + क्तिन् ।) दोषः ।
इति हेमचन्द्रः ॥ प्रापणं । आपत् । इति मेदिनी ॥

आपत्प्राप्तः, त्रि, (आपदं प्राप्तः । श्दा तत्पुरुषः ।)

विपद्युक्तः। तत्पर्य्यायः। आपन्नः २। इत्यमरः॥

आपद्, स्त्री, (आङ्+पद्+क्विप्।) विपत्तिः। इत्यमरः॥ (यथा हितोपदेशे।
"आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्"॥)

आपदा, स्त्री, (आ+पद्+अङ्+टाप्।) विपत्तिः। इति रायमुकुटः॥

आपनं, क्ली, (आप्+ल्युट्।) प्रापणम्॥ मरीचं। इति शब्दचन्द्रिका।

आपनिकः, पुं, (आङ्+पन्+इकन्।) इन्द्रनीलमणिः। किरातः। इत्युणादिकोषः॥

आपन्नः, त्रि, (आङ्+पद्+क्तः।) आपद्युक्तः। तत्पर्य्यायः। आपत्प्राप्तः २। इत्यमरः॥ प्राप्तः। इति मेदिनी॥ (यथा भागवते,—
"आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्।
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं"॥
यथा हितोपदेशे,—
"बलीयसाभियुक्तस्तु नृपोऽनन्यप्रतिक्रियः।
आपन्नः सन्धिमन्विच्छेत्कुर्व्वाणः कालयापनं"॥)

आपन्नसत्त्वा, स्त्री, (आपन्नं प्राप्तं सत्त्वं गर्भरूपेण जन्तुर्यया।) गर्भवती। इत्यमरः॥
("समामापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः",
इति रघुः १०। ५०।
"नार्य्यापन्नसत्त्वायास्तथातिद्रुतमश्नतः"॥
इति सुश्रुतः॥)

आपमित्यकं, क्ली, (मेङ् प्रतिदाने उदीचां माङो व्यतीहारे इति क्त्वा। कुगतीति समासः। समासेऽनञ्पूर्व्वे इति ल्यबादेशः। मयतेरिदन्यतरस्यामितीत्वं अपमित्य निर्वृत्तं। अपमित्ययाचिताभ्यां कक्कनाविति कक्।) विनिमयात् प्राप्तं। इत्यमरः॥ बदल करिया लओया द्रव्य इति भाषा।

आपवः, पुं, (आपोऽवं रक्षणमस्यापवं पुमान्। आपु+अप-वादेँ अच्।) वशिष्ठमुनिः। इति महाभारतं॥
("तस्य शापात् विनिर्मुक्ता आपवस्य महात्मनः",
इति महाभारते। तथा च हरिवंशे,—
"यं लेभे वरुणः पुत्रं पुरा भास्करसमुद्भवम्।
वशिष्ठं नाम स मुनिः ख्यात आपव इत्युत"॥)

आपस्तम्बः, पुं, धर्म्मशास्त्रप्रयोजकमुनिविशेषः।
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः"॥
इति याज्ञवल्क्यवचनं॥

आपस्तम्बिनी, स्त्री, (आपः अश्नोति। आपस्+अम+णिनि।) [illegible]। इति राजनिर्घण्टः॥

[illegible]पाक, पुं, (आङ्+पच्+घञ्।) कुम्भकारस्य [illegible]भाण्डपचनस्थानं। इति जटाधरः शोणाकृ इति भाषा।

[illegible]पात, पुं, (आङ्+पत्+घञ्।) पतनं। तत्काल। इति मेदिनी॥ प्रथमं। इति शब्दचन्द्रिका॥ यथा हितोपदेशे।
"[illegible] संयोगाभा त्रिदिवे सखा"।

"आपातरम्या विषयाः पर्य्यन्तपरितापिनः"।
तथा च मनुः ११। ८।
"मध्वापातो विषास्वादः सधर्म्मप्रतिरूपकः"॥)

आपानं, क्ली, (आपीयते अस्मिन्। आङ्+पा+अधि+ल्युट्।) मद्यपानार्थसभा। तत्पर्य्यायः। पानगोष्ठिका २। इत्यमरः॥ मद खावार घर इति भाषा॥ (यथा महाभारते, वनपर्व्वणि २८० अध्याये।
"गन्धर्व्वाप्सरसो भद्रे! मामापानगतं सदा"।
११। तत्रैव २ अध्याये।
"आपाने पानकलिता दैवेनाभिप्रणोदिताः"।
"ददर्श यदुवीराणामापाने वैशसं महत्"॥)

आपालिः, पुं, (आङ्+पल्+इन्।) केशकीटः। इति जटाधरः। उकुन इति भाषा।

आपिञ्जरं, क्ली, (ईषत् पिञ्जरम्।) स्वर्णं। इति राजनिर्घण्टः॥
("आपिञ्जरा बद्धरजःकणत्वा-
न्मञ्जर्य्युदारा शुशुभेऽर्ज्जुनस्य"॥
इति रघुः १६। ५१। सर्व्वशब्देऽस्य गुणादयो वक्तव्याः॥)

आपीडः, पुं, (आङ्+पीड्+पचाद्यच्।) शिरःस्थितमाल्यं। तत्पर्य्यायः। शेखरः २। इत्यमरः॥
(यथा रघुवंशे १८। २८।
"तस्मिन् कुशापीडकुलोद्भवे निपीड़
सम्यक् मही शासति शासनाङ्कां"॥)

आपीतं, क्ली, (आङ्+पा+क्त।) माक्षिकधातुः। इति राजनिर्घण्टः॥ (यथा रामायणे।
"आपीतवर्णवदनं प्रशममिव भूमिपं"॥)

आपीनं, क्ली, (ओ प्यायी वृद्धौ। आङ्+प्याय+क्त। प्यायः पी निष्ठायां सोपसर्गस्य नः।) ऊधः। गवादि पालान्। इति भाषा। इत्यमरः॥ (यथा रघुवंशे २। १८।
"आपीनभारोद्वहनप्रयत्नात्
गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः"॥)

आपीनः, त्रि, (आङ्+प्याय+क्त।) ईषत्स्थूलः। सम्यक्स्थूलः॥

आपीनः, पुं, कूपः। इति वोपदेवः॥

आपूपिकं, क्ली, (अपूपानां समूहः। अपूप+ठक्।) अपूपसमूहः। बडापिष्टकं। इत्यमरः॥

आपूपिकः, त्रि, (अपूपाः पण्यमस्य। अपूप+ठक्।) पिष्टकजीवी। पिष्टकविक्रयकर्त्ता। तत्पर्य्यायः। कान्दविकः २ भक्ष्यकारः ३। इत्यमरः॥ मयरा शामुककार वटियोयाला। इत्यादि भाषा॥

आपूप्यः, पुं, (अपूप+यत्।) शक्तुः। चूर्णकः। इति त्रिकाण्डशेषः॥ छातु मयदा वेसन इत्यादि भाषा।

आपूर्त्तिः, स्त्री, (आङ्+पॄ+क्तिः।) ईषत्पूरणं। सम्यक्पूरणं॥

आपृक्तं, क्ली, (आ+पृच् वृद्धौ+करणे घञ्।) रङ्गं। इति राजनिर्घण्टः॥ रां इति भाषा॥ (रङ्गशब्देऽस्य गुणादयो ज्ञातव्याः॥)

आपृच्छा, स्त्री, (आङ्+प्रच्छ+अङ्+तन्तः टाप्।)

आमायनं। आमायः
आप्तोमिकं, क्ली, गमात्
इति ज्योतिःशास्त्रं॥

आप्तः, त्रि, (आप+क्त।
इत्यमरः॥ (यथा माघे
"सांवत्सरिकमाप्तैश्च राज्ञ
प्राप्तः। लब्धः। (तिष्ठ क्षिप्त
दासः।) सत्यं। इति हेमचन्द्र
"कुमारभृत्याकुशलैरनुष्ठि
भिषग्भिराप्तैरथ गर्भभर्म्मणि
इति रघुवंशे ३। १२। वशिष्ठ
"आप्तपिण्डं द्विजं प्रेतं विप्रो विप्
विशुध्यति त्रिरात्रेण मातुराप्ता
इति मनुः ५। १२। "आप्तान् स-
दशमान्धर्मविद्यादीन्" इति तत्
अधिकः। यथा मनुः।
"यजेत राजा क्रतुभिर्विविधैराप्त
"राजा नानाप्रकारान् बहुदक्षिण
दियज्ञान् कुर्य्यात्"।

आप्तः, पुं, (आप्+क्त।)
पाटवरूपदोषचतुष्टय
इति स्मृतिः। आप्ताना
"रजस्तमोभ्यां निर्मुक्ता
येषां त्रैकालममलं ज्ञानम
आप्ताः शिष्टा विबुद्धास्ते ते
सत्यं वक्ष्यन्ति ते कस्मादसत्यं
इति चरकः॥)

आप्तगर्व्वं, त्रि, (आप्तः प्राप्तः
प्राप्ताहङ्कारः॥

आप्ता, स्त्री, जटा। इति हारावली

आप्तिः, स्त्री, (आप्+क्ति।) स
लाभः। प्राप्तिः। इति हेमचन्द्रः।

आप्तोक्तिः, स्त्री, (आप्तस्य भ्रमप्रम
उक्तिः।) सिद्धान्तवाक्य। तदर्थं
सिद्धकृतं १ अभ्यतः ४ समय
इति हेमचन्द्रः॥

आप्यं, त्रि, (अपां विकारः तन्द्
स्वार्थे ष्यञ्।) जलविकारजं। पेयादि
अम्मयं २। इत्यमरः॥ (यथा हरिवं
"आप्याः प्रभूना स्त्रमर एकाद
लेखा नाम महाराज पद देवता"॥
"तस्मादाप्यो रसः परस्परसंसर्गात्
पश्चात् परस्परानुप्रवेशाच
मिथ्यमन्यत्वभोपकर्षात् प्र

आप्यं, क्ली, वाप्यकठो। इत्यमरः
कुड इति भाषा॥

आप्यायनं, क्ली, (आङ्+प्याय+
प्रीणनं। तृप्तिः। इति राजनि
महाभारते,—
"पितृप्रसादमिच्छेय तव चान्दन
यथा मनुः, ३।२११, ३।२०२
"लोकस्याप्यायने युक्तान् मात्रेदेवान्

...ताद्दिनातीनां पितृणां विधीयते ।
...हि पितृणांतत् पूर्णमाप्यायनं स्मृतं" ।)
...तः, त्रि, (आङ्+प्याय्+णिच्+क्तः ।)
...। प्रीतः । वर्द्धितः । यथा,—
...। सर्वस्य कीर्त्तिर् भोग आप्यायिता तनुः ।
...मागां च दृष्टेन मन्दूरां दिवसक्रमात्" ॥
...र्मिमे ४० अध्यायः ॥ आनन्दितः । इति
...प्रसिद्धं ॥ (यथा हितोपदेशे ।
...आप्यायितोऽहं भवतामनेन वचनामृतेन" ।)
...नं,क्ली, (आङ्+प्याय्+ल्युट् ।) गमनागम-
...देशसमये सुहृदादेरागमनेनौत्सुक्यप्रकाशनता-
...नन्दनं । इत्यमरः ।
...प्रं, क्ली, (आङ्+प्र+पद्+क्त ।) आप्र-
...। तत्पर्य्यायः । आनन्दनं २ सभाजनं ३ ।
...। हेमचन्द्रः ॥ [प्रपर्य्यन्तो ॥
...ः, क्ली, (प्रपदं पादाग्रं । तत्पर्य्यन्तो ।) पादा-
...दीनं, त्रि, (आप्रपदं पदाग्रान्तं आप्नोतीति ।
...ङ्+प्र+पद+ख ।) पादाग्रपर्य्यन्तापतित-
...ादि । इत्यमरः ॥ ("आप्रपदीनां कण्ठे यम-
...लसिव शुभकुसुममालामालम्ब्य" । इति
...चरिते ५म उच्छासः ।)
...ः, पुं, (आङ्+प्लु+अप् ।) स्नानं । इत्यमरः ॥
...व्रती, [न्] पुं, (आप्लवते प्लुङ्+अप्, आप्लव-
...सौ व्रती च । आप्लवः स्नानं तत्र व्रती नित्यस्ना-
...ते मुकुटः ।) आप्लुतव्रती । स्नातकब्राह्मणः ।
...मरटीकायां भरतः ॥
...ः, पुं, (आङ्+प्लुङ्+घञ् । जलप्रक्षेपः, जल-
...नं, जलमध्ये सम्यगवगाहनं, जलप्लावनं, ज-
...ां सर्व्वतः समुच्छलनं ।) स्नानं । इत्यमरः ॥
...,पुं, (आङ्+प्लुङ्+क्तः ।) आप्लुतव्रती । स्ना-
...ः । इति मेदिनी ॥
...,त्रि, (आङ्+प्लु+क्त ।) स्नातः । कृतस्नानः ।
...ति मेदिनी ॥ (आप्लुतः सर्व्वपापेभ्यः स गङ्गायां
...मुच्यते । इति भारते ।) स्नाने क्ली इति हेम-
...द्रः ॥ (आर्द्रीकृतः । सिक्तः । पञ्चतन्त्रे,—
...न्धे जर्ज्जरितकलेवरा रुधिराप्लुताः" । इति)
...व्रती, [न्] पुं, (आप्लुतस्य स्नातकस्य व्रत-
...माप्नोतीति । आप्लुतव्रत+इनि ।) समाप्तवेदा-
...यनस्नानशीलः । ब्रह्मचर्य्यं त्यक्ता यो गृहाश्रमं
...ः सः । समाप्तवेदाध्ययनो यः स्नानशील आ-
...मान्तरं न गतः सोऽपि । आप्लुतं स्नानं तत्र
...ी नित्यस्नायी इति व्युत्पत्तिः । इत्यमरटीकायां
...रतः ॥
..., [न्] पुं, (आप्+वन् ।) वायुः । इति सिद्धा-
...कौमुद्यामुणादिवृत्तिः ॥
...कं, क्ली, अफेनं । इति वैद्यकं ॥ आफिं इति
...षा । (अस्य गुणानाह । भावप्रकाशे ॥
...आफूकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलं" ।)
...द्धः, पुं, (आङ्+बन्ध+क्तः ।) दृढ़बन्धनं । प्रेम ।
...अलङ्कारः । इति विश्वमेदिन्यौ ॥ (यथा मेघदूते ९ ।
...गर्भाधानक्षणपरिचयान्नूनमाबद्धमाला" ॥)
...रिलं । इति मेदिनी ॥

आबन्धः, पुं, (आबध्यतेऽनेन आङ्+बन्ध+घञ् ।) योत्रं । इत्यमरहेमचन्द्रौ ॥ योतृदड़ी इति भाषा । भूषणं । प्रेम । बन्धनं । इति हेमचन्द्रः ॥ (यथा अमरुशतके । ३८ ॥
"गते प्रेमाबन्धे प्रणयबहुमाने विगलिते" ।)

आबलिः,क्ली, आलिः । श्रेणी । इत्यमरः ॥ (समूहः, आवली ।)

आबिद्धः, त्रि, (आङ्+व्यध्+क्तः ।) वक्रः । क्षिप्तः । इत्यमरः । पराहतः । इति मेदिनी ॥ मूर्खः । इति शब्दरत्नावली ॥

आबिधः, पुं, वेधनास्त्रं । इत्यमरः ॥ भोमर तुरपन इत्यादि भाषा ।

आबिलः, त्रि, (आ+बिल+क ।) कलुषः । अनिर्म्मलः । इत्यमरः ॥

आबिलकन्दः, पुं, मालाकन्दः । इति राजनिर्घण्टः ॥

आबुत्तः, पुं, (आप्+क्विप्+आपमुत्तनोति । अन्येभ्योऽपीति ड ।) नाट्योक्तौ भगिनीपतिः । इत्यमरः ॥

आभरणं,क्ली, (आभ्रियतेऽनेन । भृञ भरणे । ल्युट् ।) भूषणं । अलङ्कारः । इत्यमरः ॥ (तच्चतुर्व्विधं, आवेध्यं बन्धनीयं, क्षेप्यं, आरोप्यं चेति । तत्र आवेध्यं कुण्डलादि, बन्धनीयं कुसुमादिकं, क्षेप्यं नूपुरादिकं, आरोप्यं हारादि । यदुक्तं,—
"स्याद्भूषणं त्वाभरणं चतुर्धा परिकीर्त्तितं ।
आवेध्यं बन्धनीयञ्च क्षेप्यमारोप्यमेव तत्" ॥
(यथा मनुः, ७।२२२ ।
"वाहनानि च सर्व्वाणि शास्त्राण्याभरणानि च" ।
यथा कुमारसम्भवे । ५ । ४४ ।
"किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्द्धकशोभि वल्कलं" ।)

आभा, स्त्री, (आङ्+भा+अङ्+टाप् ।) शोभा कान्तिः । इति हेमचन्द्रः ॥ दीप्तिः । ज्योतिः ॥ (वातरोगभेदः । वकुले । यथा भावप्रकाशे वातव्याधौ त्रिकशूलचिकित्सा,—
"आभा बकुलपर्य्यायः कथितः कोविदैरिह" ।)

आभातिः, स्त्री, (आङ्+भा+क्तिन् दीप्तिः, ज्योतिः ।) छाया । इति राजनिर्घण्टः ॥

आभाषणं, क्ली, (आङ्+भाष्+ल्युट् ।) आलापः । कथनं । इत्यमरः ॥ (यथा रघुवंशे । २ । ५८ ॥
"सम्बन्धमाभाषणपूर्व्वमाहुः" ।)

आभासः, पुं, (आङ्+भास्+पचाद्यच् ।) सदृशः । प्रतिबिम्बं । इति वेदान्तः ॥ दीप्तिः । अभिप्रायः ॥ (प्रतिबिम्बादिवदवास्तवस्वरूपमविद्याकार्य्यं, मृषाबुद्धिः । यथा अध्यात्मरामायणे,—
"आभासस्तु मृषाबुद्धिरविद्याकार्य्यमुच्यते ।
अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पतः ॥
आभासत्वपरं बिम्बभूतमेवं त्रिधा चितिः ।
साभासबुद्धेः कर्त्तृत्वमविच्छिन्ने विकारिणि" ॥
तथा च पञ्चदशी ६—७ ।
"चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः ।
पृथक् पृथक् चिदाभासश्चैतन्याध्यस्तदेहिनां ॥
कल्प्यन्ते जीवनामानो बहुधा संसरन्त्यमी ।
वस्त्राभासे स्थितान् वर्णान् यद्वदाधारवस्त्रगान्" ।)

आभास्वरः,पुं, (आङ्+भास्+वरच् ।) चतुःषष्टिगणदेवताविशेषः । इत्यमरः ॥ (यदुक्तं, आभास्वराश्चतुःषष्टिः । यथा,—
"आत्मा ज्ञाता दमो दान्तः शान्तिर्ज्ञानं शमस्तपः ।
कामः क्रोधो मदो मोहो द्वादशाभास्वरा इमे" ।)

आभिजनः,पुं, (अभिजनादागतः । अभिजन+अण् ।) अभिजनस्य भावः । कुलसम्बन्धीयः । गाँइ पदवी इत्यादि भाषा ॥ (यथा कुमारसम्भवे, १।२६ ।
"तां पार्व्वतीत्याभिजनेन नाम्ना
बन्धुप्रियां बन्धुजनो जुहाव" ।)

आभिजात्यं,क्ली, (अभिजात+ष्यञ् ।) अभिजातस्य भावः । कौलिन्यं । पाण्डित्यं ॥ (महावंशजननजनितमर्य्यादा । यथा रामायणे,—
"आभिजात्यं हि ते मन्ये यथा मातुस्तथैव च" ।)

आभिधा,स्त्री, (अभि+धा+अङ्+टाप् ।) शब्दः । इति शब्दरत्नावली ॥

आभिधातकं,क्ली, (अभिधा+तक्+अण् ।) शब्दः । इति शब्दरत्नावली ॥

आभिरूप्यं, क्ली, (अभिरूप+ष्यञ् ।) अभिरूपस्य भावः । यथा,—
"अर्चकस्य तपोयोगादर्चनस्यातिशायनात् ।
आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति" ॥
इति तिथ्यादितत्त्वधृतहयशीर्षपञ्चरात्रीयवचनं ॥

आभीरः, पुं, (आ समन्तात् भियं राति । रा दाने आत इति कः ।) गोपः । इत्यमरः ॥ आहिर इति भाषा । स च ब्राह्मणादम्बष्ठायां जातः । इति मनुः ॥

आभीरपल्लिः, स्त्री, (आभीराणां पल्लिः ।) गोपपल्ली । इत्यमरटीकायां रायमुकुटः ॥ गोयालापाड़ा इति भाषा ॥

आभीरपल्ली, स्त्री, (आभीराणां पल्ली ।) गोपगृहसमूहः । गोपग्रामः । गोपगृहं । गोपस्थानं । तत्पर्य्यायः । घोषः २ । इत्यमरः ॥

आभीरी, स्त्री, (आभीरपुंयोगादितिजातेरिति च ङीष् ।) गोपस्त्रीजातिः । गोपपत्नी । तत्पर्य्यायः । महाशूद्री २ । इत्यमरः ॥ आहिरिणी इति भाषा ॥

आभीलं, क्ली, (आ समन्तात् भियं लाति जनयति । आङ्+भी+ला+क ।) कष्टं । कृच्छ्रं । इत्यमरः ॥ (भयावहः, भीतिजनकः । यथा मेदिनी,—
"आभीलं न द्वयोः कृच्छ्रे वाच्यलिङ्गं भयानके" ॥
यथा महाभारते,—
"रात्रौ निशीथे स्वाभीले गतेऽर्द्धसमये नृप ।
प्रचारे पुरुषादानां रक्षसां घोरकर्म्मणाम्" ।)

आभीलः, त्रि, (आङ्+भी+ला+क ।) कष्टयुक्तः । इत्यमरः ॥ भयानकः । इति मेदिनी ॥

आभीक्ष्ण्यं, क्ली, (अभीक्ष्ण+ष्यञ् ।) अत्यर्थं । नित्यं । तद्युक्तक्रियायां त्रि । इति शब्दरत्नावली ॥

आभेरी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥

आभोगः, पुं, (आङ्+भुज+घञ् ।) परिपूर्णता । इत्यमरः ॥ (यथा मेघदूते, उत्तरमेघे २९ ।
"गाढाभोगात्कठिनविषमामेकवेणीं करेण" ।

यथा प्राकृतपिङ्गले । "अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्य" ॥)
वक्त्रस्य क्लृप्तं । यत्नः । इति मेदिनी ॥ कविनाम-युक्तगानसमापककविता । भणिता इति भाषा । यथा,—
"यत्रैव कविनाम स्यात् स आभोग इतीरितः",
इति सङ्गीतदामोदरः ॥

आभ्युदयिकं, त्रि, (अभ्युदयः प्रयोजनम् अस्य । अभ्युदय + ठक् ।) अभ्युदयनिमित्तश्राद्धादि । यथा । अथाभ्युदयिकश्राद्धं । तत्र गोभिलः । आभ्युदयिके श्राद्धे युग्मान् आशयेत् प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थः । सम्पन्नमिति तृप्तिप्रश्नः । दधिवदराक्षतमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तां न स्वधाञ्च प्रयुञ्जीत इति । अभ्युदयो विवाहादिस्तन्निमित्तके । अभ्युदयः इष्टलाभः । स च भूतभविष्यद्भेदेन द्विविधः । तत्र भूतं पुत्रजन्मादि भविष्यत् विवाहादि । एवञ्च श्राद्धविवेकादौ श्राद्धमेदगणने वृद्धिश्राद्धत्वेन कर्म्माङ्गत्वेन च यदुभयत्रमुक्तं तदुभयमेवाभ्युदयिकत्वेनोपपन्नं तेनाभिलापे आभ्युदयिकश्राद्धमिति प्रयोज्यं । अत्र यवैस्तिलार्थं इत्यनेन पार्व्वणश्राद्धप्राप्ततिलस्थाने यवविधानात् आभ्युदयिकस्यापि पार्व्वणप्रकृतिकत्वं प्रतीयते । अन्यथा तिलार्थं इत्युपादानं व्यर्थं स्यात् । ततश्च पार्व्वणप्रकृतिकत्वेन पित्र्ययुग्मब्राह्मणप्राप्तौ तन्निरासाय पितृपक्षे ब्राह्मणयुग्मत्वोपदेशः दैवे युग्मत्वस्य पार्व्वणप्राप्तत्वात्तदयोपदेशः ।
"अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणं" ।
इति दायभाग्यकारधनेन देवकर्म्मानन्तरं पितृकर्म्मकरणे प्राप्तत्वामोपचारनिरासाय प्रदक्षिणमुपचारः तेन देवपितृकर्म्मकरणाय दक्षिणावर्त्तेन गमनार्थं । द्विगुणभुग्नत्वनिरासाय ऋजवो दर्भाः इति अनुवादोपदेशः । दर्भाः स्युः इत्यनेन तृप्तिप्रश्ने [illegible] इति वक्तव्यं । दोषत्वात् सुसम्पन्नमिति सम्पन्नमित्युत्तरं । एतद्भ्रमप्रमादयमप्येयाधिकारार्थं । दधिवदराक्षतमिश्रा इत्यनेन दध्यादिमिश्रणमावश्यकं । अपसव्य एव ।
[illegible] मधुरापरादकृत्वात् । अतएव वृत्समावृत्त्योपरिशिष्टवचने [illegible] अधिकरिति विन्यन्दिमुक्तं । स्वधावाचनप्र- [illegible] नान्दीमुखाः पितरः प्रीयन्तामित्युप- । तत्र स्वधां वाचयिष्ये इति पितृपक्षस्य [illegible] दैव इति कारौ देवपक्षे [illegible] पितरः प्रीयन्तामिति प्रश्नः । उत्तरञ्च [illegible] स्वधावाचनस्थाने- [illegible] इति वचनान्तरेण

च स्वधोच्यतामितिवत् प्रत्येकमेव प्रीयन्तामिति पृच्छेत् प्रत्युत्तरञ्च अस्तु स्वधा इतिवत् तन्मेवैव प्रीयन्तामिति । अत्र नान्दीमुखाः पितर इत्यादि नान्दीमुखेभ्यः पितृभ्य इति निर्देशेन च नान्दीमुखं पितृगणमिति विष्णुपुराणेन च मातामहेभ्यश्च तथा नान्दीमुखेभ्य एव च इति मत्स्यपुराणेन च नान्दीमुखपदश्रुतेस्तद्विशेषणविशिष्टस्यैवाभ्युदयिके देवतात्वं तत्रश्चातापि प्रीयन्तामितिवमान्दीमुखेभ्यः पितामहेभ्य इति वाच्यं । न तु नान्दीमुखविशेषणशून्यं पितामहेभ्यः प्रीयन्तामिति पितृदयितोक्तं युक्तम् । नान्दीमुखेभ्यः पितृभ्य प्रीयन्तामित्यनान्वितस्य नान्दीमुखेभ्य इत्यस्य पितामहेभ्य इत्यादावनन्वयित्वेन प्रागुक्तयुक्त्या प्राप्तस्य नान्दीमुखविशेषणस्य पितामहेभ्य इत्यादावपि प्राप्तेः । एतेनात्र मैथिलोक्तं तन्त्रताविधानमपि निरस्तं । पार्व्वणवत् स्वधाः प्राप्तेः तन्निरासाय न स्वधां प्रयुञ्जीतेति अत्र विशेषादभिलापे मन्त्रे च स्वधापदनिवृत्तिः । अभिलापे नम इति ब्रूयात् । "अमुकामुकगोत्रैतत् तुभ्यमन्नं स्वधा नमः" । इति मत्स्यपुराणे श्राद्धे स्वधा नमः पदयोस्त्यागबोधकत्वेन विकल्पादनाभ्युदयिके स्वधानिषेधात्तन्न एवान्वेति । पितृगणश्च देववदित्यनेनापि पार्व्वणोक्तविश्वदेवपक्षीयनम एव प्रतीयते न तु मैथिलोक्तं साक्षेति । श्राद्धे तथा प्रयोगे प्रमाणाभावात् । एवमाश्वलायनगृह्ये यवोऽसीति मन्त्रे तु पुष्ट्या इति श्रुतेर्मन्त्रमात्रे स्वधापदस्थाने पुष्टिपदप्रयोगः । इति श्राद्धतत्त्वं । अन्यत् नान्दीमुखशब्दे द्रष्टव्यं ॥

आमं, त्रि, (आम्यते ईषत्पच्यते । आ + अम + कर्म्मणि घञ् ।) पाकरहितं । काँचा इति भाषा । तत्पर्य्यायः । अपक्वं २ असिद्धं ३ अपक्तं ४ । इति रत्नमाला ॥
("आमपक्वक्रमं हित्वा नातिसारे क्रिया यतः" । इति वैद्यकचक्रपाणिसंग्रहः ॥
"मज्जत्यामा गुरुत्वाद्विट् पक्वात्तूत्प्लवते जले ।
परीक्ष्यैवं पुरा साम निरामं वा सदोषिणां ।
शिथिलोपाचरेत्सम्यक् पाचनेनेतरेण वा" ॥
चिकित्सा यथा,—
"चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च ।
व्योषं हिङ्गुमजमोदाञ्च चव्यञ्चैकत्र चूर्णयेत् ॥
गुडिका मातुलुङ्गस्य दाडिमस्य रसेन वा ।
कृता विपाचयत्यामन्दीपयत्याशु चानलं" ॥
इति चित्रकाद्या गुडिका । इति चरकः ।)

आमं, क्ली, अष्टप्रकाराजीर्णरोगमध्ये रोगविशेषः । तस्य कारणरूपे ।
"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः ।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥
अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च ।
वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरं ॥
तत्रामे गुरुतोत्क्लेदः शोथो गण्डाक्षिकूटगः ।
उद्गारश्च यथाभुक्तमविदग्धः प्रवर्त्तते" ॥

इति नि[illegible]
युक्तमन्ना[illegible]
गतमामा[illegible]
अन्नमन्नरसं[illegible]
प्रथमां दोष[illegible]
अपक्वं । यथा[illegible]
"प्रत्यं श्लेष्म[illegible]
आमं विदुर्म[illegible]
इति श्राद्धतत्त्व[illegible]
तस्य चयादि अ[illegible]
("उष्मणोऽल्पबल[illegible]
दुष्टमामाशयगतं[illegible]
आमेन तेन संपृक्ता[illegible]
सामा इत्युपदिश्यन्ते[illegible]
स्रोतोरोधबलभ्रंश[illegible]
आलस्यापक्तिनिष्ठीवन[illegible]
लिङ्गं मलानां सामानां[illegible]
इति चरकः ॥
"आमेऽजीर्णे तु बन्धयेत्[illegible]
पुष्पकासीसमिश्रं वा क्षी[illegible]
सदाडिमरसं सर्पिः पिबेद[illegible]
इति च चरकः ॥)

आमः, पु, (अम + घञ् ।) रोगम[illegible]
मेदिनी ॥ मलवैषम्यरोग । इ[illegible]
("पिबेत् स परिक्षामे मदे
विड्रेन लवणं पिष्टं बिल्वं पिबत[illegible]
इति चरकः ।)

आमगन्धि, क्ली, (आमस्यापक्वस्य [illegible]
यत्र ।) चिताधूमादिगन्धयुक्तं ।
गन्धविशिष्टं । तत्पर्य्यायः । विस्रं [illegible]
इत्यमरः ॥

आमण्डः, पुं, (आमण्डयतीति । आ + मण्डि + [illegible]
घञ् ।) एरण्डवृक्षः । इति राज[illegible]
बल्यौ ॥ (एरण्डशब्देऽस्य गुणादयो[illegible]

आमनस्यं, क्ली, (अमनसो भावः ।
ष्यञ् ।) पीड़ा । दुःखं । इत्यम[illegible]

आमन्त्रण, क्ली, (आ + मन्त्र + भा[illegible]
धनं । इति हेमचन्द्रः ॥ आमन्त्र[illegible]
धरः ॥ निमन्त्रणं । इति स्मृति[illegible]
विशेषः । यदकरणे प्रत्यवायो नाभि[illegible]
श्यीत भवान्" । इति मुग्धबोधटीका[illegible]

आमयं, क्ली, (आमं रोगं यापयति । [illegible]
ड ।) कुष्ठनामौषधि । इतिराजनि[illegible]
इति भाषा ।

आमयः, पुं, (अम रोगे + भावे + अच् [illegible]
हिंसायां करणे अच् वा ।) रोग । इत्य[illegible]
("तद्दुःखं विविधैर्योगैर्निहन्यादामयः
इति सुश्रुत ॥
"तत्र व्याधिरामयो गद आतङ्को
विकारो रोग इत्यनर्थान्तरं" । इति [illegible]

आमयावी, [न्] त्रि, (आमयोऽस्त्यस्य [illegible]
संस्थानं इति दीर्घश्चेति विनि । रोगी

...ज्ञसमासः । अन्येषा-
...त्यमरटीकायां भरतः॥
...र्थिमरिनन्दन" ।

...+ क्कुन् शिल्पिसंज्ञयोः ।
...गिति विकारावयवप्रत्य-
...वृक्षविशेषः । काठ आमला-
... । काष्ठधात्रीफलं २ क्षुद्रा-
... ४ । अस्य गुणाः । कषा-
... । पित्तास्रदोषनाशित्वञ्च ।

...स्लं पित्तकफापहं" ।

...र्व्वान् रसान् लवणवर्ज्जितान् ।
... पित्तरोगविनाशनं" ॥

... + मल + क्कुन् ।) वासकवृक्षः ।
...ता ॥ (यथा मार्कण्डेयपुराणे ।
...लकांस्तिन्दुकांश्च महाफलान्" ।)
... (आङ् + मल + क्कुन् + ङीष्) + जातेरिति
...रख्यातफलवृक्षविशेषः । आमला
...तत्पर्य्यायः । तिष्यफला २ अमृता ३
...ः ख्या ५ कायस्था ६ । इत्यमरः ।
... श्रीफला ७ धात्रिका ८ शिवा ९
...धात्री ११ अमृतफला १२ वृष्या १३
... १४ रोचनी १५ । इति राजनिर्घण्टः ॥
... १६ तिष्या १७ इति रत्नमाला ॥
...गाः । हरीतकीगुणवद्गुणत्वं । विशे-
...तारित्वं । शीतवीर्य्यत्वं । अम्लत्वात् वायु-
...त्वमाधुर्य्यात् पित्तनाशित्वं । कषाय-
...त् कफनाशित्वं । सर्व्वफलाधिकगुणत्वं ।
... । निरत्ययत्वं । दोष-
...मध्यान्ते प्राशस्त्यं । तृष्णाच्छर्दिकफ-
... । अस्य मज्जगुणाः । बलकारित्वञ्च ।
...शित्वं । लघुत्वं । कषायत्वं । बलकारित्वञ्च ।
...लघुत्वं । दाहवमि-
...शित्वं । रसायनत्वं । कटुत्वं । रुचि-
... । ...श्रमविबन्धाध्मान-
... । अस्य मज्जा
... इति राजनिर्घण्टः ।
...शीतवम्मज्जगुणाश्च ।
...स्या नामानि गुणाश्च ।
...धात्री तिष्यफलामृता ।
...विन्तु विशेषतः ॥
...परं रसायनम् ।
...पित्तं माधुर्य्यशैत्यतः ।
...फलं धात्र्यादिदोषजित् ।
...अं भवति यादृशं ।
...[illegible] निर्द्दिशेत्" ।
...ति भावप्रकाशः ॥
...[illegible] विदारामलकेऽर्पि ।
...[illegible] शीतञ्च गु [illegible]" ।
...ति चरकः ।)

स्वादुमधुरतया पाके पित्तनाशित्वञ्च । इति राज-
वल्लभः ॥ तस्या उत्पत्तिर्यथा । सख्यावूचतुः ।
"उक्तास्त्वया महेशानि तुलसीविल्वसम्भवः ।
अनयोस्तुल्य एकः कः शिवविष्णुप्रियस्तरुः ॥
तदावां श्रोतुमिच्छावः शिवसुन्दरि कथ्यतां" ।

देव्युवाच ।

"अस्ति विल्वतुलसीतरुतुल्यः
पुण्य एक उत विष्णुशिवार्हः ।
नामतोऽमलक इत्यपि सख्यौ
रोपितः कमलयाथ मयापि ॥
कदाचित् देवयात्रायां प्रभासे पुण्यतीर्थके ।
सर्व्वे देवाः समायाता दिने पुण्ये च कुत्रचित् ॥
तत्राहञ्च स्वयं लक्ष्मीरेकस्थाने समागते ।
तत्रावयोर्मतिर्जाता शिवविष्णुप्रपूजने ॥
अहं श्रियमवोचञ्च सामुद्रि शृणु मे मतिं ।
स्वकल्पितेन द्रव्येण पूजयेऽहं हरिं प्रभुं ॥
मामुवाच ततो लक्ष्मीर्गङ्गदाक्षरभाषिणी ॥
ममाप्येवं मतिर्जाता त्वमवोचः स्वयं यथा ।
स्वकल्पितेन द्रव्येण पूजयेऽहं त्रिलोचनं" ॥

देव्युवाच ।

"सजये विजये देवि ! नावेवम्भूतयोस्तदा ।
नयनेषु सुजातानि अमलाश्रुजलानि च ॥
तानि नौ नयनेभ्यश्च निपेतुर्भुवि हे सखि ! ।
ततो जाता द्रुमाः पृथ्व्यां अत्वारो विमलप्रभाः ॥
ख्याता आमलकी नाम्ना जाता कादमलादतः ।
आमलच्छदवृन्दाक्ते कर्व्वूरस्कन्धमूलकाः ॥
शिराग्रथितपत्राली पत्रमालाकपत्रका ।
विल्वस्य च तुलस्याश्च ये गुणाः कथिताः सखि ॥
ते ते गुणाः सर्व्वएव आमलक्यां समाश्रिताः ।
पत्रमालादलैरस्याः शिवविष्णू सुरेश्वरौ ॥
सर्व्वथा पूजितौ स्यातां सख्यौ नात्यत्र संशयः ।
माघे मासि सितायां तामेकादश्यां समुद्भवां ॥
शुभामामलकीं दृष्ट्वा समेताः सर्व्वदेवताः ।
नत्ययन्ते शशिर्ण्यास्य हर्षमापुः परं तदा ॥
शिवाच्युतसरूपाश्च ददृशुस्तुष्टुवुस्तदा" ॥ ० ॥
अस्या नमस्कारमन्त्रादिः ।
"नमामामलकीं देवीं पत्रमालाद्यलङ्कृतां ।
शिवविष्णुप्रियां दिव्यां श्रीमतीं सुन्दरप्रभां ॥
एतेन खलु मन्त्रेण सर्व्वां अस्याः क्रिया मताः ।
एतामुद्दिश्य तीर्थानि चीर्ण्णानि मनीषिभिः ॥
विश्वरूपवरदेवेह पृथिव्यां कर्म्मणां स्मृते ।
सिद्धिदामामलकीं सर्व्वतीर्थजलैर्द्विजः ॥
अथ सर्व्वपुराणाच मुनीनाञ्च तदायतः ।
सदा संपूजितः [illegible] श्रीव [illegible] ॥
सदा [illegible] बभूव क्षितिमण्डले ।
[illegible] सुप्तहर्षिश्च [illegible] ॥
[illegible] देवी दधात्यनन्तफलं ।
[illegible] धात्रीति नामापि [illegible] ॥
[illegible] ता देवा [illegible] ।
[illegible] ॥
जाता [illegible] देवी [illegible] ।
[illegible]" ॥

इति वृहद्धर्म्मपुराणे आमलकीप्रादुर्भावः १२
अध्यायः ॥ * ॥ एकादश्यां तत्र विष्णुप्रीतिर्यथा ।
"तुष्यत्यामलकैर्विष्णुरेकादश्यां विशेषतः ।
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः" ॥
इति गारुडे २१५ अध्यायः ॥

आमवातः, पुं, (आमोऽपाकहेतुः वातः ।) स्वनामख्यात-
रोगविशेषः । तस्य निदानपूर्व्विकां संप्राप्तिमाह ।
"विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च ।
स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्व्वतस्तथा ॥
वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति ।
तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते ॥
वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः ।
स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः ॥
जनयत्यग्निदौर्ब्बल्यं हृदयस्य च गौरवं ।
व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः ॥
विरुद्धाहारचेष्टस्य विरुद्धाहारः क्षीरमत्स्यादि ।
विरुद्धा चेष्टा भुक्त्वा व्यायामादि । तद्युक्तस्य ।
निश्चलस्य निर्व्व्यापारस्य । "स्निग्धं भुक्तवतो ह्यन्नं
व्यायामं कुर्व्वतः" इति मिलितो हेतुः । श्लेष्म-
स्थानं आमाशयसन्ध्यादि । तेन श्लेष्मस्थानगतेन
अत्यर्थं अपक्वः । पित्तस्थानगमने तु पक्वोऽम-
विष्यदित्यभिप्रायः । असौ आमः धमनीभिः
प्रपद्यते धमनीमार्गैश्चलति । भूयो दूषितः अति-
प्रयेन दूषितः । सोऽन्नजो रसः । आमः स्रो-
तांसि अभिष्यन्दयति संस्तभ्य रसवहशिराव-
रोधं कृत्वा स्रोतांसि गुरूणि करोति । नानावर्णः
वातादिजनितवर्णभेदान्नानावर्णः ॥ * ॥ आमस्य
लक्षणमाह ।
"अजीर्णात् यो रसो जातः सञ्चितो हि क्रमेण तु ।
आमसंज्ञां स लभते शिरोगात्ररुजाकरः" ॥
अजीर्णात् भुक्तादजीर्णात् ॥ * ॥ आमवातस्य सा-
मान्यलक्षणमाह ।
"युगपत् कुपितावेतौ त्रिकसन्धिप्रवेशकौ ।
स्तब्धञ्च कुरुते गात्रमामवातः स उच्यते" ॥
स्तब्धञ्च कुरुते गात्रमामवातः स उच्यते इति
एतौ वातकफौ । त्रिकसन्धिप्रवेशकौ वेदनेति
बोद्धव्यौ ॥ * ॥ तस्यान्तरे तस्य लक्षणान्तरमाह ।
"अङ्गमर्दोऽरुचिस्तृष्णा ह्यालस्यं गौरवं ज्वरः ।
अपाकः शूनताङ्गानां आमवातस्य लक्षणम्" ॥ * ॥
अस्यैवातिवृद्धस्य लक्षणमाह ।
"स कष्टः सर्व्वरोगाणां यदा प्रकुपितो भवेत् ।
हस्तपादशिरोगुल्फत्रिकजानूरुसन्धिषु ॥
करोति सरुजं शोथं यत्र दोषः प्रपद्यते ।
स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः ॥
जनयेत् सोऽग्निदौर्ब्बल्यं प्रसेकारुचिगौरवम् ।
उत्साहहानिं वैरस्यं दाहञ्च बहुमूत्रतां ।
कुक्षौ कठिनतां शूलं तथा निद्राविपर्य्ययं ।
तृट्छर्दिभ्रममूर्च्छाश्च हृद्ग्रहं विड्विबद्धतां ।
जाड्यान्त्रकूजनानाहं [illegible] ।
यदा प्रकुपितो भवेत् प्रबलं कुपितः [illegible]
[illegible] करोति । [illegible]
[illegible] आमः प्रददते [illegible] ।
[illegible] । [illegible]

।*। तस्यैव विशिष्टानि लक्षणान्याह।
"पित्तात् दाहं सरागञ्च सशूलं पवनात्मकं।
स्तिमितं गुरुकण्डूकं कफदुष्टं तमादिशेत्"॥
गुरुकण्डूकं बहुकण्डूकम्।*। तस्यासाध्यत्वादिकमाह।
"एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते।
सर्व्वदेहचरः शोथः स कष्टः सान्निपातिकः"।*।
अथ आमवातस्य चिकित्सा।
"लङ्घनं स्वेदनं तिक्तं दीपनानि कटूनि च।
रेचनं स्नेहनमपि वस्तयश्चाममारुते॥
रूक्षस्वेदो विधातव्यो वालुकापुटकैरिह।
उपनाहाश्च कर्त्तव्यास्तेऽपि स्नेहविवर्जिताः।*।
वास्तूकमत्र वृन्ताकं पटोलं कारवेल्लकं।
कोरदूषा यवाः पथ्याः षष्टिकाः शालयोऽनवाः"॥
अनवाः पुराणाः।
"जाङ्गलानां तथा मांसं हितं तक्रेण संस्कृतं।
हितश्च यूषः कौलत्थः कलायश्चणकस्य च"।*।
"चित्रकं कटुका पाठा नागरातिविषामृताः।
चूर्णिताः कोष्णतोयेन पिबेदामानिलापहाः।१।
शटी शुण्ठी शिवासोया देवाह्वातिविषामृताः।
क्वथिताः प्रपिबेदामवाती रूक्षञ्च भोजयेत्॥
देवाह्वा देवदारु।२।
आमवातगजेन्द्रस्य शरीरवनचारिणः।
एक एव निहन्ताऽयमेरण्डस्नेहकेशरी।३।
एरण्डस्नेहयुक्तां हरीतकीं भक्षयेद्विधिवत्।
आमानिलार्त्तियुक्तो युक्तो वृद्ध्या च गृध्रस्या।४।
एवं पुनर्नवामूलं तेन तैलं प्रसाधयेत्।
आमवातरुजं हन्ति पानाभ्यञ्जनमर्द्दनात्।५।
आरग्वधस्य पत्राणि भृष्टानि कटुतैलतः।
आमवातप्रशान्त्यर्थं खादेद्भक्तेन तानि च।६।
शुण्ठीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः।
आमवाते कटीशूले पाचनं रुक्प्रणाशनं।७।
कटीशूले पिबेत्तैलं एरण्डजमथान्नवं।
कल्कीभूतरसोनञ्च क्षारं मागधिकायुतं।
विशोध्यैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत्।
तत्पायसं कटीशूले प्रशस्तं परमौषधं।८।
रास्ना वातारिमूलञ्च वासकः सदुरालभः।
शटीदारुवचामुस्तनागरातिविषाभयाः।
नरेन्द्राद्याधिमालञ्च मिसिधान्यं पुनर्नवा।
अश्वगन्धामृता कृष्णा वृद्धदारः शतावरी।
वचा वङ्कचरश्चैव चविका वृहतीद्वयं।
समभागानि सर्व्वाणि रास्नाच द्विगुणा मता।
पिबेत् क्वाथमेतेषामामवातप्रभेदिनं।
शिवानागरचूर्णेन प्रलेपोऽथ यदामलं।
सर्व्वेषु वातरोगेषु वातेषु तु विशेषतः।
वलवानेऽर्दिते कम्पे कुब्जे सन्धिगतेऽनिले।
जानुजङ्घार्त्तिवीरासु गृध्रस्याञ्च चतुर्व्विधे।
उरुस्तम्भे वातरक्ते विश्वाच्यां क्रोष्टुशीर्षके।
स्वरामये च दृष्टानि योनिशूलामयेषु च।
हनौ वेष्टने वाते क्लीवत्वे वन्ध्यामये तथा।
योनिना मर्द्दं मूत्रं शस्यतम् परमौषधं।
महारास्नादिरित्युक्तो ब्रह्मणा विनिर्म्मितः"॥

महारास्नादिक्वाथः।९। "अजमोदामरिच-पिप्पलीविडङ्गसुरदारुचित्रकशताह्वाः। सैन्धव-मागधिमूलं भागा नवकस्य पलिकाः स्युः॥ शुण्ठी दशपलिका स्यात् पलानि तावन्ति वृद्धदारस्य। अभया पलानि पञ्च स्युः चूर्णं विधापयेदेषां॥ समगुडवटकानदनञ्चूर्णं वा कोष्णवारिणा पिबतः। नश्यन्त्यामानिलजाः सर्व्वे रोगाः सुदारुणाः शीघ्रं। आनाहशूलतूणी प्रतितूणी गृध्रसी गुल्मः। कटिपृष्ठपरिस्फुटनं स्फुटनं चैवास्थिजङ्घयोस्तीव्रं॥ श्वयथुश्चाङ्गसन्धिषु ये चान्येऽप्यामवातजा रोगाः सर्व्वे प्रयान्ति शान्तिं तमइव सूर्य्यांशुविध्वस्तं॥ अजमोदादिचूर्णमोदकः।१०।
"आमवाते हितोऽतीव पथ्यादिर्गुग्गुलुर्मतः"।
तथैव योगराजाख्यश्चरकादिचिकित्सकैः।११।
नागरस्य पलान्यष्टौ घृतस्य कुडवं तथा।
क्षीराढकसमायुक्तं खण्डस्यार्द्धशतं पलं॥
व्योषत्रिजातकद्रव्यात् प्रत्येकञ्च पलं पलं।
निःक्षिपेच्चूर्णितं तत्र खादेदग्निबलं यथा॥
आमवातप्रशमनं धातुपुष्टिकरं परं।
बल्यमायुष्यमोजस्यं वलीपलितनाशनं"॥
शुण्ठीखण्डः।१२।
"मेथिकायाः पलान्यष्टौ शुण्ठ्या अष्ट पलानि च।
तयोश्चूर्णं पटे पूतं दुग्धे स्वल्पाग्निना पचेत्॥
दुग्धाढकयुगे गव्यं घृतमष्टपलं क्षिपेत्।
तत्तावत्सुपचेत् यावत् भवेदतिघनं पयः॥
पुनः पचेत् शनैस्तत्र दत्त्वाढकमितां सितां।
ततः पाके सुविज्ञाते ज्वलनादवतारयेत्॥
मरिचं पिप्पली शुण्ठी कणामूलं सचित्रकं।
यवानी जीरको धान्यं कारवी शतपुष्पिका॥
जातीफलं शटीत्वक् च पत्रकं भद्रमुस्तकं।
गृह्णीयात् पलमेतेषां सर्व्वेषाञ्च पृथक् पृथक्॥
षडक्षं नागरं तत्र मरिचं च षडक्षकं।
एषां चूर्णं परिक्षिप्य सर्व्वं संमिश्र्य रक्षयेत्॥
एतत्तु भेषजं प्रोक्तं मेथिकापाकसंज्ञकं।
भक्षयेत् पलमात्रं तत् यथा चाग्निबलं तथा॥
आमवातं निहन्त्येतत् सर्व्वांश्च पवनामयान्।
ज्वरांश्च विषमान् हन्ति पाण्डुरोगं सकामलं॥
उन्मादमपस्मारं प्रमेहान् वातशोणितं।
अम्लपित्तं शीतपित्तं शिरःपीड़ां दृगामयं॥
प्रदरं सूतिकारोगं हन्यादेतन्न संशयः।
वपुषः पुष्टिदञ्चैव वीर्य्यवृद्धिकरं परं"॥
मेथिकापाकः।१३।
"रसो रसोनस्य पिचुप्रमाणः
क्षिपेच्च तत्रार्द्धमितं घृतं गोः।
पिबेदुमे तेन दहत्यवश्यं
शिरोगशूलं हि महामवातं"॥
सामान्यवातव्याधिचिकित्सायां हि लिखितं रसोनाष्टकमामवाते अतिशुभदं।१४।
"सैन्धवं वेदसी रास्ना शतपुष्पा यवानिका।
सर्जिका मरिचं कुष्ठं शुण्ठी सौवर्च्चलं विडं॥
वचाजमोदा मधुकः पौष्करं मधुरं कणा।
एतान्यर्द्धपलांशानि सूक्ष्मचूर्णानि कारयेत्॥

प्रस्थमेरण्डतैलस्य प्रस्थौ द्वौ शुक्तं
काञ्जिकं द्विगुणं दत्त्वा मन्द ...
एतत् संभृत्य संभारं ...
सिद्धमेतत् प्रयोक्तव्यमामवातहरं परं।
पाने चाभ्यञ्जने बस्तौ कुरुतेऽग्निं
वातार्त्ते संज्ञये शूले कटीशूरुर्ज्जो।
तथा कुक्षिपार्श्वजे शूले ...
अन्यांश्चानिलजान् रोगान् ...
रास्नासैन्धवाद्यं तैलं।१५।
"दधिमत्स्यगुड़क्षीरपोतकीमाषपिष्टकं
वर्जयेदामवातार्त्तो गुडमांसमनूपजं"।
इत्यामवाताधिकारः। इति भावप्र
(आत्रेयउवाच।
"लक्षणं शृणु पुत्र! त्वं ...
गुर्व्वन्नाहारपुष्टेन मन्दाग्नेश्च वर्त्तते।
तर्पितैः ...
श्लेष्मस्थाने प्रपच्येत जायते बहुरोग।
आमातिसारो वर्त्तेत ...
जड़त्वञ्चैव गात्राणां वलक्षयकरं तु तत्।
पृष्ठमन्यात्रिकेजानुवेदनाऽपि ...
अङ्गं वैकल्यमायाति आमवाते निराम
चिकित्सा यथा।*।
"तस्य नो लेहनं कार्य्यं पाचनं
आमं संपच्यते प्रायैः चतुर्धा भेदतः
विष्टम्भामलक्षणं यथा।*।
"विष्टम्भी गुल्मकृन्मेही आम ...
सर्व्वाङ्गगो ...
विष्टम्भो गुरु चाध्मानं ...
तस्यापि पाचनं कार्य्यं ...
गुल्मग्रस्तामलक्षणं यथा।*।
"जठरं गर्ज्जति यस्य ...
कटीदेशे जड़त्वञ्च आमगुल्मादि
तस्यादौ लङ्घनानि स्युर्ज्ञाता दो
पाचनं नैव कर्त्तव्यं गुल्मपक्वे वि
पाचिते चापि गुल्मामे तदा तु म
स्नेहामलक्षणं यथा।*।
"यस्य च स्निग्धता गात्रे गात्रं
स्नेहामो विज्ञेयो यस्य स्नेहोऽप्यम
तस्य नो स्नेहनं कार्य्यं शोषणाय
पाचनञ्चैव कर्त्तव्यमामस्यैवातिक
आमस्य लक्षणं यथा।*।
"यस्य शोथागमं गात्रे तथा चैव
अपक्वामातिसारश्च सचाप्यायी
प्रत्यास्त्या क्रिया कार्य्या ...
पाचनं पाचितं ज्ञात्वा तस्मादूर्ध्वं
चिकित्सा यथा।*।
"आमवाते कषायं तद्दशमूलीजं
गुडूची नागरं पथ्या चूर्णमेतद्गुड़
धान्यनागरराजाम्रदेवदारुवचाकट
पाचनश्चामवाते च श्रेष्ठमेतत्कुल
आमातीसारः, पु, (आमरोगेण अ
षट्प्रकारातीसारमध्ये रोगवि

निरूपे ।
नाभीर्ताात् प्रसृताः क्षोभयन्तः
गेऽं दोषा धातुसंघान् मलांश्च ।
ामावर्णां नैकशः सारयन्ति
लोपेतं पण्डितेनं वदन्ति ॥
ममेभिर्दोषैस्तु न्यस्तमग्न्यवसीदति ।
ं भृशदुर्गन्धि पिच्छिलं चामसंज्ञितं" ॥
निदानं ॥
कित्सा यथा,—
तु संग्रहणं दद्यात् पूर्व्वमामातीसारिणे ।
ाष्ठादौ वध्यमाना जनयन्त्यामयान् बहून् ॥
ापाण्डुामयप्लीहकुष्ठगुल्मोदरज्वरान् ।
ालसकाध्मानग्रहण्यर्शोगदांस्तथा ॥
धातुमलार्त्तस्य बहुदोषोऽति निस्रुतः ।
ोऽपि स्तम्भनीयः स्यात् पाचनान्मरणं भवेत्"
. वैद्यकचक्रपाणिसंग्रहः ॥*॥
मया मस्तुना पिष्टा मधुशर्करयान्विता ।
ातीसारं शमयेद् गुडामलकमेव च ॥
ं जीरके द्वे च दध्ना पिष्टन्तु दापयेत् ।
ातिसारशमनं वस्तिशूलं नियच्छति" ॥
हारीतः ॥*॥ "तस्य रूपाणि विज्जल-
विप्लुतमवसादितं । रूक्षं द्रवं सशब्दमशब्दं
विबद्धमूत्रवातमतिसार्य्यते पुरीषं वायुश्चान्तः-
ुस्य सशब्दमूलः तिर्य्यक् चरति विबद्ध इत्या-
तसारः" ।
मि परिणते यस्तु विबद्धमतिसार्य्यते ।
सपिच्छमल्पाल्पं बहुशः सप्रवाहिकं ॥
ूलकानां यूषेण बदराणामथापि वा ।
ोदकायाः क्षीरिण्या यवान्या वास्तुकस्य वा ॥
ंबलायास्तथोर्व्वां शाकेनावल्गुजस्य वा ।
ाः कर्कारुकायां वा जीवन्त्याश्चिर्भटस्य वा ॥
ीकायाः सपाठाया शुष्कशाकेन वा पुनः ।
दाडिमसिद्धेन बहुस्नेहेन भोजयेत्" ॥
ि चरकः ।)
ा:, त्रि, (अमात्य एव स्वार्थे अण् ।) अमात्यः ।
ी । इति द्विरूपकोषः ॥ बलाध्यक्षः ।
स्यं, क्ली, (न प्रशस्तं मानसं यस्य सः अमा-
स्तस्य भावः । अमानस + ष्यञ् ।) आमनस्यं ।
ा । दुःखं । इति शब्दरत्नावली ॥
ं, क्ली, (आमञ्च तत् अन्नञ्चेति कर्मधारयः ।)
कान्नं । काँचाचाउल इति भाषा । तद्दानमन्त्रो
ा,—
ामान्नं ते प्रयच्छामि फलताम्बूलसंयुतं ।
तं परमं दिव्यं मया भक्त्या निवेदितं" ॥
ि बृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः ॥*॥
ात् चाण्डालादिस्वामिकापक्वान्नभोजनप्राय-
ं यथा । चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत्
ं भुक्त्वा पराकः । इति बलाद्भोजनविषयं ।
ि प्रायश्चित्तविवेकः ॥ त्रिरात्रमामान्नविषयं ।
व सिद्धमित्युक्तेः । पराकमाह मनुः ।
तात्मनोऽप्रमत्तस्य द्वादशाहमभोजनं ।
ाको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः" ॥

"तेनाचामान्ने सिद्धान्नप्रायश्चित्ततुरीयभागविधा-
नादन्नाभावेऽपि तत्तुरीयकल्पना इति" । इति
प्रायश्चित्ततत्त्वं ॥*॥ आमान्नद्वारा कर्त्तव्यश्राद्धानि ।
यथा,—
"आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा ।
आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव हि" ॥
इति श्राद्धतत्त्वधृतप्रचेतोवचनं ॥ अपि च ।
योगिनीतन्त्रे ।
"निरग्नेरामश्राद्धे तु अन्नं न छादयेत् क्वचित् ।
वृद्धौ च छादयेदन्नं संक्रमे ग्रहणेषु च" ॥
इति तिथ्यादितत्त्वम् ॥*॥

आमाशयः, पुं, (आमस्य आशयः षष्ठीतत्पुरुषः ।) अपक्वस्थानं । तत्तु नाभिस्तनयोर्मध्यभागः । इति शब्दचन्द्रिका ॥ (यथा महाभारते,—
"पक्वाशयस्त्वधोनाभ्यामूर्द्ध्वमामाशयः स्थितः" ।
यथा च सुश्रुते,—
"पक्वामाशययोर्मध्ये शिराप्रभवा नाभिर्नाम" ॥*॥
"नाभिस्तनान्तरं जन्तोराहुरामाशयं बुधाः" ।
"आमाशयस्तु तदधः" इति भावप्रकाशः ॥
"तत्रामाशयः पित्ताशयस्योपरिष्टात् तत्प्रत्यनी-
कत्वादूर्द्ध्वगतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतु-
र्व्विधस्याहारस्याधारः" । "आमाशयः श्लेष्मणः" ।
इति सुश्रुतः ॥)

आमिक्षा, स्त्री, (आमिष्यते मिषु सेचने बाहुलकात् सक् ।) शृतोष्णदुग्धे दधियोगसम्भवा या । छीरसा इति ख्याता । छाना इति केचित् । इत्यमरः ॥ तत्पर्य्यायः । दधिकूर्च्चिका २ पयस्या ३ क्षीर-सन्तानिका ४ । इति राजवल्लभादयः ॥
("याहिक्षी वातला रूक्षा दुर्ज्जरा तक्रकूर्च्चिका" ।
इति सुश्रुतः अत्र हि तक्रकूर्च्चिका शब्देनामि-
क्षोच्यते इति पर्य्यायान्तरदृष्टत्वात् ।)

आमिषं, क्ली, पुं, (आमिष्यते भुज्यते मिष् स्पर्द्धे घञ् संज्ञापूर्व्वकत्वान्न गुणः ।) मांसं । इत्यमरः ॥ भोग्यवस्तु । संभोगः । उत्कोचः । इति मेदिनी ॥ सुन्दराकाररूपादि । लोभसत्त्वः । इति हेम-चन्द्रः ॥ लाभः । कामगुणः । रूपं । भोजनं । इति हारावली ॥

आमिषप्रियः, पुं, (आमिषं प्रियं यस्य सः ।) कङ्कपक्षी । इति राजनिर्घण्टः ॥ मांसाभि-लाषिणि त्रि ॥

आमिषाशी, न्, त्रि, (आमिषं अश्नाति आमिष + अश् + णिनि ।) मत्स्यमांसभोजनशीलः । तत्प-र्य्यायः । शौष्कलः २ । इत्यमरः ॥

आमिषी, स्त्री, (आमिषवदाकारोऽस्त्यस्या जटाया-मिति अर्श आदित्वादच् गौरादीत्वात् ङीष् च ।) मिषी । जटामांसी । इति केचित् । इत्यमर-टीकायां भरतः ॥

आमीक्षा, स्त्री, (आमिष्यते, मिषु सेचने बाहु-लकात् सक् ।) आमिक्षा । आवर्त्तिते तप्ते क्षीरे दधियोगात् या वटिकाकारा विकृतिर्जायते सा । इति पुरुषोत्तमः ॥

आमुक्तः, त्रि, (आङ् + मुच् + क्तः ।) पिनद्धः । परि-हितवस्त्रादिः । इत्यमरः ॥ परिहितकवचय्यक्तिः ॥

आमुपः, पुं, (आम + वप् + क ।) कण्टकयुक्तवंश-विशेषः । इति शब्दचन्द्रिका ॥ बेउड़बाँश । इति ख्यातः ।

आमुष्यायणः, त्रि, (अमुष्य अपत्यम् + फक् । अलुक् ।) ख्यातवंशोद्भवः । सत्कुलजातः । इति त्रिकाण्डशेषः ॥

आमूलं, क्ली, (मूलपर्य्यन्तं आमूलं । अव्ययीभावः ।) मूलपर्य्यन्तं । (प्रारम्भावधि । यथा, शाकुन्तले ।)
"आमूलश्रुद्धसन्तति कुलमेतत् पौरवं प्रभावन्त्ये" ।)

आमोदः, पुं, (आङ् + मुद् + घञ् ।) अतिदूरगामि-गन्धः । इत्यमरः ॥ गन्धः । हर्षः । इति मेदिनी ॥ सुमहद्गन्धः । इति शब्दरत्नावली ।
(यथा रघुवंशे । १।४३ ।
"आमोदमुपजिघ्रन्तौ स्वनिश्वासानुकारिणम्" ।)

आमोदनं, क्ली, (आङ् + मुद् + ल्युट् ।) आमोद-करणं । हर्षणं ॥ प्रीणनं । आनन्दनं ।

आमोदितः, त्रि, (आ + मुद् + णिच् + क्त । यद्वा आमोदः सञ्जातोऽस्य तारकादित्वादितच् ।) आ-नन्दितः । सुगन्धितः । सद्गन्धयुक्तः । यथा,—
"पारिजातप्रसूनोत्थगन्धामोदितदिङ्मुखे" ।
इति शिवरात्रिव्रतकथा ॥ आनन्दितः । आमोद-शब्दादितप्रत्ययेन निष्पन्नः ॥

आमोदी, [न्] त्रि, (आमोद + णिनि ।) मुखवासनः । इत्यमरः ॥ कर्पूरादिवटिकाकृतमुखगन्धः । इति सारसुन्दरी ॥ मुखवासनवटिकादिः । आमोद-युक्तः कर्पूरादिरामोदी । इति भरतः ॥ नानाद्रव्य-रचित एकैकश एव वा कर्पूरादिर्मुखोपयोग्य-मुखवासनवटिकादिः । इति सर्व्वस्वं । गन्धयुक्तः । हर्षविशिष्टः ॥ (यथा भर्तृहरिः ।
"नवकुटजकदम्बामोदिनो गन्धवाहाः" ।)

आम्नायः, पुं, (आङ् + म्ना + घञ् + युक् ।) श्रुतिः । वेदः । (यथा महावीरचरिते ।
"तृतीयो ह्येष मेध्योऽभिराम्नायः पञ्चमोऽथवा" ।
उत्तरचरिते ।
"समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः" ।)
संप्रदायः । गुरुपरम्पराप्राप्तोपदेश इति यावत् ॥ इत्यमरः ॥ निगमः । उपदेशः । इति मेदिनी ॥ कुलं । आगमः । इति हेमचन्द्रः ॥ कुलक्रमः । इति शब्दरत्नावली ॥ (उपदेशः, शिक्षादानं, तन्त्र-शास्त्रं, अभ्यासः, आम्रेडनं, आलोचनं ।)

आम्बिकेयः, पुं, (अम्बिकाया अपत्यं स्त्रीभ्यो ढक् ।) धृतराष्ट्रो राजा । इति त्रिकाण्डशेषः ॥ (यथा महाभारते ।
"परं श्रेयः पाण्डवेया मयोक्तं
न मे तच्च श्रुतवानाम्बिकेयः" ।)
कार्त्तिकेयः ।

आम्रः, पुं, (अम्यते अम गत्यादौ अमितम्योर्दीर्घश्चेति रक् दीर्घश्च ।) फलवृक्षविशेषः । आम आँव इति भाषा । तत्पर्य्यायः । चूतः २ रसालः ३ । अति-सौरभश्चेत् सहकारः ४ । इत्यमरः ॥ कामशरः । कामवल्लभः ६ कामाङ्गः ७ कीरेष्टः ८ माधवद्रुमः ९ भृङ्गाभीष्टः १० [illegible]द्रुमः ११ मधूली १२

कोकिलोत्सवः १३ वसन्तदूतः १४ अम्लफलः १५ मोदाख्यः १६ मन्मथालयः १७ मध्वावासः १८ सुमदनः १९ पिकरागः २० नृपप्रियः २१ प्रियाम्बुः २२ कोकिलावासः २३ । इति राजनिर्घण्टः। माकन्दः २४ षट्पदातिथिः २५ मधुव्रतः २६ वसन्तद्रुः २७ पिकप्रियः २८ स्त्रीप्रियः २९ गन्धबन्धुः ३० अलिप्रियः ३१ । इति शब्दरत्नावली । मदिरासखः ३२ । इति जटाधरः । बालाम्रफलगुणाः । वायुरक्तपित्तकारित्वं । इति राजवल्लभः । अपिच । कषायत्वं । अम्लरसत्वं । सुगन्धित्वं । कफामयनाशित्वं । ग्राहकत्वं । पित्तप्रकोपवायुरक्तदोषपटुत्वादित्वप्रदत्वञ्च । तच्च बद्धास्थिताङ्कुरम् । इति राजनिर्घण्टः ॥ * ॥ मध्याम्रगुणाः । पित्तकारित्वं ॥ * ॥ पक्वाम्रगुणाः । वर्णरुचिमांसशुक्रबलकारित्वं । पित्ताविरोधित्वं । वायुनाशित्वं । हृद्यत्वं । गुरुत्वं । अनुलोमनत्वं । इति राजवल्लभः । अपिच । त्रिदोषशमताकारित्वं । स्वादुत्वं । पुष्टिजनकत्वं । अधिकधातुप्रचयकारित्वं । हर्षकान्तिकारित्वं । तृष्णाश्रमशमनत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ मधुयुक्ताम्रगुणाः । क्षयरोगशोषवातश्लेष्मरोगनाशित्वं ॥ * ॥ घृतयुक्ताम्रगुणाः । वातपित्तनाशित्वं । अग्निबलवर्णकारित्वञ्च ॥ * ॥ दुग्धयुक्ताम्रगुणाः । शीतलत्वं । स्वादुत्वं । गुरुत्वं । स्निग्धत्वं । भेदकत्वं । वातपित्तहारित्वं । शुक्रबलवर्द्धकत्वञ्च ॥ * ॥ तत्फलास्थिगुणाः । तृष्णाच्छर्दिमेहातीसारनाशित्वं । इति राजवल्लभः ॥ * ॥ तत्त्वग्गुणः । कषायत्वं ॥ * ॥ तन्मूलगुणाः । सुगन्धित्वं । कषायत्वं । रुचिकारित्वं । संग्राहित्वं । शीतलत्वञ्च ॥ * ॥ तत्पुष्पगुणौ । रुचिकारित्वं । अग्निदीपनत्वञ्च ॥ * ॥ आम्रपेशीगुणाः । कषायत्वं । अम्लत्वं । भेदकत्वं । कफवातनाशित्वञ्च ॥ * ॥ कृत्रिमपक्वाम्रगुणः । अम्लरसहानेर्मधुरत्वाच्च पित्तनाशित्वं ॥ * ॥ दुग्धिताम्रगुणाः । परमरुचिबलवीर्यकारित्वं । लघुत्वं । शीतलत्वं । शीघ्रपाकित्वं । वातपित्तहारित्वं । सारकत्वञ्च ॥ * ॥ तद्गालितरसगुणाः । बलकारित्वं । गुरुत्वं । वातहरत्वं । सारकत्वं । हृद्यत्वं । तृप्तिजनकत्वं । अतिवृंहणत्वं । कफवर्द्धकत्वञ्च ॥ * ॥ तत्खण्डगुणाः । गुरुत्वं । रोचकत्वं । गुरुपाकित्वं । मधुरत्वं । वृंहणत्वं । बलकारित्वं । शीतलत्वं । वातनाशित्वञ्च ॥ * ॥ अतिशयाम्रभक्षणगुणाः । मन्दाग्निविषमज्वररक्तामयबद्धगुदोदरनयनामयकारित्वं । “एतदम्लाम्रविषयं न तु मधुराम्रपरं । मधुरस्य परं नेत्रहितत्वादिगुणत्वात् । यद्यतिभक्षणात्तत् करोति तदा शुण्ठीमम्बुपानं । अथवा सौवर्चलेन सह जीरं प्रयोक्तव्यं” ॥ * ॥ तत्पल्लवगुणाः । रुचिकारित्वं । कफपित्तनाशित्वञ्च ॥ * ॥ तथा च राजनिर्घण्टः ।

“आम्रमम्लं वर्णं लिङ्गं मर्द्दितं पुण्ड्रादिकम् ।
मिष्टादौ …… मधुरमपि वायिनं ।
…… खेदं …… विक्लिन्नं ।
…… रुचिकरं वर्ण्यं …… ” ।

(तथाहारावाम्रस्य नामानि गुणाश्च ।
“आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥ * ॥
आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् ।
असृग्दुष्टिहरं शीतं रुचिकृद्ग्राहि वातलम् ॥
आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तकृत् ।
तरुणन्तु तदत्यम्लं रूक्षं दोषत्रयास्रकृत् ॥
आममामं लघाहीनमातपेऽतिविशोषितम् ॥
अम्लं स्वादुकषायं स्याद्भेदनं कफवातजित् ॥ * ॥
पक्वन्तु मधुरं रुच्यं स्निग्धं बलसुखप्रदम् ॥
गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम् ।
कषायानुरसं वह्नि-श्लेष्म-शुक्र-विवर्द्धनम् ॥ * ॥
तदेव वृक्षसम्पक्वं गुरुवातहरं परम् ।
मधुराम्लरसं किञ्चित् भवेत् पित्तप्रकोपनम् ॥ * ॥
आम्रं कृत्रिमपक्वञ्च तद्भवेत् पित्तनाशनम् ॥ * ॥
रसस्याम्लस्य हीनत्वात् माधुर्य्याच्च विशेषतः ॥
चूषितं तत्परं रुच्यं बल्यं वीर्य्यकरं लघु ॥
शीतलं शीतपाकि स्याद्वातपित्तहरं सरम् ॥ * ॥
तद्रसो गालितो बल्यो गुरुर्वातहरः सरः ।
अहृद्यस्तर्पणोऽतीव वृंहणः कफवर्द्धनः ॥ * ॥
तस्य खण्डं गुरुपरं रोचनं चिरपाकि च ।
मधुरं वृंहणं बल्यं शीतलं वातनाशनम् ॥
वातपित्तहरं रुच्यं वृंहणं बलवर्द्धनम् ॥ * ॥
रुच्यं वर्णकरं स्वादु दुग्धाम्रं गुरु शीतलम् ॥ * ॥
मन्दानलत्वं विषमज्वरञ्च
रक्तामयं बद्धगुदोदरञ्च ।
आम्रातियोगो नयनामयं वा
करोति तस्मादति तानि नाद्यात् ॥
एतदम्लाम्रविषयं मधुराम्लपरं न तु ।
मधुरस्य परं नेत्रहितत्वाद्या गुणा यतः ॥
शुण्ठ्यम्भसोऽनुपानं स्यादाम्राणामतिभक्षणे ।
जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च” ॥ * ॥

आम्रबीजस्य गुणाः ।

“आम्रबीजं कषायं स्याच्छर्द्यतीसारनाशनम् ।
ईषदम्लञ्च मधुरं तथा हृदयदाहनुत्” ॥ * ॥

आम्रनवपल्लवस्य गुणाः ।

“आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम्” ॥ * ॥
इति भावप्रकाशः ।

“अपक्वमाम्रं फलमेव शस्तं
संग्राहि पित्तादिजि कोपनञ्च ।
तथा विपक्वं मधुरन्तु चाल्पं,
मेदं सपित्तामयनाशनञ्च” ॥
इति हारीतः ।

“वातपित्ताम्लकृद्बालं बद्धास्थिकफपित्तकृत् ।
गुर्व्वाम्रं वातजित् साम्लं कफशुक्रकृत्” ।
इति वाग्भटः ।

“रक्तपित्तकरं बालमापूर्णं पित्तवर्द्धनम् ।
पक्वमाम्रं जयेद्वायुं मांसशुक्रबलप्रदम्” ॥ * ॥
“आम्राम्रातकलिकुचाश्च वृंहणा बलवर्द्धनाः ।
रोचनास्तर्पणाश्चोक्ताः स्नेहमाधुर्य्यगौरवात्” ।
इति चरकः ।

“पित्तानिलकरं बालं पित्तलं बद्धकेशरम् ।
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम् ।
कषायानुरसं स्वादु वातघ्नं वृंहणं गुरु ।
पित्ताविरोधि सम्पक्वमाम्रं ……
वृंहणं मधुरं बल्यं गुरु विष्ट ……
इति सुश्रुतः ।)

आम्रगन्धकः, पुं, (आम्रगन्ध + क) …… वृक्षः । इति राजनिर्घण्टः ।

आम्रपेशी, स्त्री, (आम्रस्य पेशी) । आमसी इति भाषा । अस्या गु…। कषायत्वं । उष्णत्वं । …… इति राजवल्लभः ।

आम्रातः, पुं, (आम्र + अत् + अण्), …… इति शब्दमाला । (अस्य गुणाः ।
“आम्रातमम्लं वातघ्नं ……
पक्वन्तु तुवरं स्वादुरसपाकं ……
तर्पणं श्लेष्मलं स्निग्धं रुच्यं ……
गुरु बल्यं ……
“राजाम्रकः आम्रातः ……
राजाम्लन्तुवरं स्वादु ……
ग्राहि रूक्षं विबन्धाध्मवातहृत् ।
इति भावप्रकाशः । तथा च चरके ।
“मधुरं वृंहणं बल्यमाम्रातं तर्पणं गु…
सस्नेहं ……

आम्रातकः, पुं, (आम्रं तद्वत् आ… भाति । अत आतश्चानुपसर्गे क…) वृक्षविशेषः । आमड़ा इति भाषा । … पीतनः २ कपीतनः ३ । … इति रत्नमाला । पीतनकः … वाटिकः ७ शृङ्गीफलः ८ … कपिप्रियः ११ अम्बरातकः १… कपिचूड़ः १४ । इति जटाधरः । … कषायत्वं । अम्लत्वं । … फलगुणाः । मधुराम्लत्वं । स्निग्धत्वं । … नाशित्वञ्च । इति … बलविष्टम्भाजीर्णकारित्वम् । गुरुत्वं । … वल्लभः । आम्रावर्त्तः । इति राजनि… मार्कण्डेयपुराणे ।

“आम्रानाम्रातकान् भव्यान्
नारिकेलान् सतिन्दुकान्” । …
अस्य पर्य्यायो गुणाश्च ।
“आम्रातकः पीतनश्च ……
आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकारकम् ।
पक्वन्तु तुवरं स्वादु रसे पाके हिमं … ।
तर्पणं श्लेष्मलं स्निग्धं रुच्यं विष्टम्भि … ।
गुरु बल्यमरुत्पित्तक्षतदाहक्षयापहम्” ।
इति भावप्रकाशः ।
“आम्रातकफलं रुच्यं सस्नेहं श्लेष्मलं …”
इति सुश्रुतः ।)

आम्रावर्त्तः, पुं, (आम्रस्य आवर्त्तः ।) शुष्कारसः । तत्पर्य्यायः । आमसत्त्व इति भाषा । अस्य गुणाः । तृष्णा… हरत्वम् । सारकत्वम् । रुचिकारित्व…

त् लघुत्वञ्च। "पक्वस्य सहकारस्य-
हितो रसः। धर्म्मशुष्को गुरुर्दस्त
इति स्मृतः" ॥ इति राजनिर्घण्टः ॥

र्ष्णतृषाच्छर्द्दिवातपित्तहरः सरः।
ह्रांशुभिः पाकात्मधुश्च स हि कीर्त्तितः"।)
स्त्री, (आङ् + म्रेडि + क्तः।) द्विस्त्रि-
इत्यमरः ॥ दुइ तिन् वार वला इति
(उन्मत्तेन यथा कथितस्य पुनः पुनः कथनं
एवं कथितस्य द्विस्त्रिवारकथनम्।)
सः, पुं, (आम्लोऽम्लरसयुक्तो वेतसः।)
तसवृक्षः। इति राजनिर्घण्टः ॥
वेतसशब्देऽस्य विशेषो ज्ञेयः।)
त्रि, (आ सम्यक् अम्ला अम्लरसयुक्ता।)
ड़ीवृक्षः। इति शब्दरत्नावली ॥ श्रीवल्ली।
राजनिर्घण्टः ॥
, स्त्री, (आम्ला + कन्।) तिन्तिड़ीवृक्षः।
रटीकायां रायमुकुटः ॥ अम्लोद्गारः। इति
ाला ॥ (यथा चरके।
लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः"॥)
, स्त्री, (अम्ल + ठक्।) तिन्तिड़ीवृक्षः।
रटीका ॥
(आङ् + या + ड।) धनागमः। प्राप्तिः।
(यथा मनुः। ८। ४१९।
न्यहन्यवेक्षेत कर्म्मान्तान् वाहनानि च।
ययौ च नियतावाकरान् कोषमेव च" ॥)
ाररचक्रः। इति हलायुधः ॥ (ज्योतिष-
हमेकादशभवनम्।)
लिकः, त्रि, (अयःशूलेन अर्थानन्विच्छति।
शूलदण्डाजिनाभ्यां ठकठञाविति ठक्।)
ाकर्म्मा। क्षिप्रकारी। इति भूरिप्रयोगः ॥
मम्।
ोपायेन योऽन्विच्छेत्स आयःशूलिको जनः"।)
, त्रि, (आङ् + यम् + क्तः।) दीर्घः। इत्यमरः ॥
। भाषा। (विस्तृतः। विशालः। आ-
ाथा पञ्चतन्त्रे।
ऽप्यायता नित्यं तन्तवो बहुलाः समाः"।)
, स्त्री, (आयताः छदा यस्याः सा।)
वृक्षः। इति त्रिकाण्डशेषः ॥
स्त्री, (आङ् + यत + ल्युट्।) यज्ञस्थानं। देव-
। तत्पर्य्यायः। चैत्यं २। इत्यमरः ॥
रामायणे,—
ः प्रणमसे पुत्त्र ! चैत्येष्वायतनेषु च"।
मित्युपपविघाणि वेदस्यायतनानि च।
हुलानि च विप्राणां शैला वृक्षा ह्रदाः क्षुपाः"॥
मयः, विश्रामस्थानं। यथा चाणक्यः।
समीक्ष्य परं स्थानं पूर्व्वमायतनं त्यजेत्" ॥
ारसम्भवे, ७। ५।
हसदेकायतनं जगाम"।
सन भिटा इत्यादिख्यातो वास्तुदेशः।
[व्याधिनिदानम्।)
प्रवक्ष्याः,—
ारामायतनग्रामनिपानोद्यानवेश्मसु"।)

आयतिः, स्त्री, (आङ् + यम् + क्तिन्।) उत्तरकालः।
भविष्यत्कालः।
(यथा मनुः, ७। १६९, ७। १७८।
"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीड़ां तदा सन्धिं समाश्रयेत्"।
"आयतिं सर्व्वकार्य्याणां तदात्वञ्च विचारयेत्" ॥)
दैर्घ्यं। प्रभावः। कोषदण्डजं तेजः। इत्यमरः ॥ दैर्घ्यं।
प्रभावः। कोषदण्डजं तेजः। इत्यमरः ॥ प्रापणं। इति
सङ्गः। इति विश्वहेमचन्द्रौ ॥ प्रापणं। इति
धरणी ॥ (राजतरङ्गिणी।
"प्रतापमायतिं शोभां हेमन्ताहस्य वारिदः।
स्मृतिशेषां करोत्येव लोमस्य पृथिवीभुजां" ॥)
आयत्तः, त्रि, (आङ् + यम् + क्तः।) अधीनः। वशी-
भूतः। इत्यमरः ॥ (यथा पञ्चतन्त्रे,—
"तत् भद्र ! स्वयत्नायत्तो ह्यात्मा सर्व्वस्य"।)
आयत्तिः स्त्री, (आङ् + यत् + क्तिन्।) दिनं। स्नेहः।
वशित्वं। सामर्थ्यं। सीमा। इति विश्वः हेम-
चन्द्रश्च ॥ शयनं। दैर्घ्यं। प्रभावः। भविष्यत्कालः।
इति धरणी ॥ (न्यायपथावलम्बिता। अधीनता।)
आयल्लकं, स्त्री, उत्कण्ठा। इति हेमचन्द्रः ॥
आयसं, क्ली, (अयस् + अण्।) लौहं। इति
भरतः राजनिर्घण्टश्च ॥ अयोनिर्म्मितादौ, त्रि ॥
(यथा महाभारते,—
"आयसं हृदयं मन्ये तस्य दुष्कृतकर्म्मणः"।
यथा मनुः, ८। ३१५।
"शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा"।
रघुवंशे, १७। ६३।
"स चकर्ष परस्मात् तदयस्कान्त इवायसम्"।
(अयोजनितार्थे यथा,—
"विपाके कटु शीतञ्च सर्व्वश्रेष्ठं तदायसम्" ॥
इति वैद्यकचक्रपाणिसंग्रहे ॥)
आयसी, स्त्री, (अयसा निर्म्मिता। अयस् + अण् +
ङीप्।) लौहमयकवचः। तत्पर्य्यायः। अङ्गरक्षिणी
२ जालिका ३ जालप्राया ४। इति हेमचन्द्रः ॥
आयस्तः, त्रि, (आङ् + यस् + कर्त्तरि क्तः।) तेजितः।
क्षिप्तः। क्लेशितः। कुपितः। हतः। इति मेदिनी ॥
(प्रयत्नशीलः, कार्य्योत्सुकः, यत्नसिद्धः, कष्टसिद्धः।)
आयातं, त्रि, (आङ् + या + क्तः।) आगतं। यथा,
"हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते" ॥
इति मार्कण्डेये देवीमाहात्म्यम् ॥
आयानं, क्ली, (आङ् + या + ल्युट्।) स्वभावः। इति
जटाधरः ॥ आगमनं ॥ (यथा महाभारते,—
"आयाने वासि विदिता रामस्य विदितात्मनः"।
आयामः, पुं, (आङ् + यम् + घञ्।) दैर्घ्यं। इत्यमरः ॥
(यथा रामायणे,—
"योजनायमविस्तारमेकैका धरणीतलम्"।
मेघदूते, पूर्व्वमेघे। ५८।
"तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी"।)
आयासः, पुं, (आङ् + यस् + घञ्।) श्रान्तिः। तत्-
पर्य्यायः। श्रमः २ क्लमः ३ क्लेशः ४ परिश्रमः ५
प्रयासः ६ व्यायामः ७। इति हेमचन्द्रः ॥ (अति-
यत्नः। प्रयत्नः। यथा साहित्यदर्पणे,—

"रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा"।
महाभारते,—
"शोकहर्षौ तथायासः सर्व्वं स्नेहात् प्रवर्त्तते"।
रामायणे,—
"नैवायासं क्वचित् भद्रे प्राप्स्यसे न च विप्रियं"।)
आयुः, पुं, स्त्री, (एति इण् गतौ छन्दसीण इत्युण्।)
जीवितव्याप्यकालः। इति जटाधरः ॥ (जीवनं,
प्राणाः। यथा महाभारते,—
"अहं केशरिणः क्षेत्रे वायुना जगदायुना।
जातः कमलपत्राक्षो हनूमान्नाम वानरः"।
नहुषस्य पिता। यथा महाभारते,—
स्वनामख्यातचन्द्रवंशीयो राजा, स च नहुषस्य
पिता। यथा महाभारते,—
"नहुषो नाम राजर्षिर्व्यक्तं ते श्रोत्रमागतः।
तत्रैव पूर्व्वपूर्व्वेषामायोर्वंशधरः सुतः"।
पुरूरवसः पुत्त्रः स्वनामख्यातो राजा।
यथा हरिवंशे,—
"बुधस्य तु महाराज विद्वान् पुत्त्रः पुरूरवाः"।
"तस्य पुत्त्रा बभूवुस्ते सप्त देवसुतोपमाः।
दिवि जाता महात्मान आयुर्धीमानमावसुः"।
ह्रदस्य पुत्त्रः स्वनामख्यातोऽसुरः।
यथा हरिवंशे,—
"ह्रदस्य पुत्त्रो ह्यायुर्वै शिविः कालस्तथैव च"।)
आयुः, [स्] क्ली, (एति गच्छतीति इण् + उसि +
णिच्।) जीवितकालः। परमायुः। इत्यमरः ॥ तत्-
पर्य्यायः। चिरजीवितं २ नित्यगः ३ अनुबन्धः ४।
"पुरुषाः सर्व्वसिद्धाश्च चतुर्व्वर्षशतायुषः।
कृते त्रेतादिकेऽप्येवं पादशो ह्रसति क्रमात्"॥
इति वैद्यकं ॥
"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः" ॥
इति मनुः १। ८३ ॥ घृतं। इति राजनिर्घण्टः ॥
("नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरं।
कण्ठाद्बहिर्विनिर्यात पातुं विष्णुपदामृतं ॥
पीत्वा चाम्बरपीयूषं पुनरायाति वेगतः।
प्रीणयन् देहमखिलं जीवयन् जठरानलम् ॥
शरीरप्राणयोरेवं संयोगादायुरुच्यते"।
इति शार्ङ्गधरः ॥
"शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितं।
नित्यगश्चानुबन्धश्च पर्य्यायैरायुरुच्यते" ॥ इति।
"वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले। स
पुनरधिकोनवर्षशतजीविनो मनुष्याः।
विकृतिवर्ज्यैः प्रकृत्यादिबलविशेषैरायुषो
एतच्च प्रमाणमुपलभ्य वयसस्त्रित्वं विभजे
"सन्तेष तत्रायुषां स्वलक्षणतो यथाव
तत्र शरीरमानसाभ्यां रोगाभ्यामनभि
विशेषेण यौवनवतः समन्वागतबलवीर्य
पराक्रमस्य ज्ञानविज्ञानेन्द्रियेन्द्रियार्थबल
वर्त्तमानस्य परमर्द्धिरुचिरविविधोपभो
मृद्धसर्व्वारम्भस्य यथेष्टविचारिणात्
सुखते"। इति च।
"आयुष्मती ।७५ ... पद्मः
अपरस्मादुपरतस्य ... प्रमा

स्वशारीरयोऽप्रमत्तस्य त्रिवर्गं परस्परेणानुपहत-मुपसेवमानस्य पूजार्हसम्पूजकस्य ज्ञानविज्ञानोप-शमशीलस्य वृद्धोपसेविनः सुनियतरागरोषेर्ष्या-मदमानवेगस्य सततं विविधप्रदानपरस्य तपो-ज्ञानप्रशमनित्यस्याध्यात्मविदस्तत्परस्य लोकमि-मञ्चामुञ्चापेक्षमाणस्य स्मृतिमतो हितमायु-रुच्यते"। इति च।

"अहितमतो विपर्य्ययेण प्रमाणमायुषस्त्वर्थेन्द्रिय-मनोबुद्धिचेष्टादीनां विकृतिलक्षणैरुपलभ्यते अ-निमित्तैरिदमस्मात् क्षणान्मुहूर्त्ताद्दिवसात्त्रिपञ्च-दश-सप्तदश-द्वादशाहात् पक्षान्मासात् षण्मा-सात् संवत्सराद्वा स्वभावमापत्स्यते इति। तत्र स्वभावः प्रवृत्तेरुपरमो मरणमनित्यता निरोध-इत्येकोऽर्थः। इत्यायुषः प्रमाणमतो विपरीतम-प्रमाणम्"। इति च।

"वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले तस्य नि-मित्तं प्रकृतिगुणात्मसम्पत् सात्म्योपसेवनञ्चेति"। इति च चरकः।)

आयुक्तः, त्रि, (आङ्+युज्+क्तः।) कर्म्माध्यक्षः। तत्पर्य्यायः। नियोगी २ कर्म्मसचिवः ३ व्यापृतः ४। इति हेमचन्द्रः।

आयुध, पुं, (आयुध्यते अनेनेति। आङ्+युध्+क।) अस्त्रं। इत्यमरः। (आयुधानां त्रयो भेदाः। प्रहर-णानि, पाणिमुक्तानि, यन्त्रमुक्तानि चेति। तत्र प्रहरणानि खड्गादीनि, पाणिमुक्तानि चक्रादीनि, यन्त्रमुक्तानि शरादीनि। "धृतायुधो यावदहं तावदन्यैः किमायुधैः"। "किं वत्सत्वयमेवमद्य विमुखं मामुद्यतेऽप्यायुधे"। इति उत्तरचरिते।)

आयुधधर्म्मिणी, स्त्री, (आयुधस्येव धर्म्मो विद्यते यस्याः। आयुधधर्म्म+इन्+ङीप्।) जयन्ती-वृक्षः। इति शब्दचन्द्रिका।

आयुधागारं, क्ली, (आयुधानां आगारं। षष्ठीतत्।) अस्त्रगृहं। सेलाखाना इति ख्यातं। इति महा-भारते राजधर्म्मे। तत्र नियुक्तस्य लक्षणं यथा,—

"आयव्ययविचक्षणः सततं प्रतिजाग्रता।

राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः"।

इति मात्स्ये १८९ अध्यायः। (यथा मनुः ९। २८०।

"कोष्ठागारायुधागारदेवतागारभेदकान्।

हस्त्यश्वरथहर्त्तॄंश्च हन्यादेवाविचारयन्"।)

आयुधिकः, पुं, (आयुधेन जीवति, आयुध+ठक्।) शस्त्रजीवी। तत्पर्य्यायः। शस्त्राजीवः २ काण्ड-स्पृष्टः ३ आयुधीयः ४। इत्यमरः। (यथा महा-भारते १९। ७। १९।

"न तादृशैः संयुक्ताः नासन्नायुधिका युधि"।

आयुधीय, पुं, (आयुध+छ।) आयुधिकः। इत्य-मरः। (टीका। यथा मनुः ७। १२२।

"पुरजनश्च सम्यक्स्यादायुधीयं दर्शनं"।

उत्तरचरिते ६। "तत्सर्द्दनात् विस्फुरितप्रभा-सुमताम्बर्द्धनदेवः"।) [रत्नमाला।

आयुर्द्रव्यं, क्लीं, (आयुषो द्रव्यम्।) औषधं। इति

आयुर्वेद, पुं, (आयुरनेन विन्दति वेत्ति वेत्ति वेत्याद्युर्वेदः। आयुस्+विद्+करणे घञ्।) ऋग्वेदोपवेदा-

न्तर्गतधन्वन्तरिप्रणीतविद्याविशेषः। वैद्यकशास्त्रं। चिकित्साशास्त्रं। तत्तु अथर्व्ववेदान्तर्गतं। यथा,

"विधाताथर्व्वसर्व्वस्वमायुर्व्वेदं प्रकाशयन्।

स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुं"।

इति भावप्रकाशः।

चरणव्यूहमते ऋग्वेदस्योपवेदः आयुर्व्वेदः। अथ-र्व्ववेदस्य शस्त्रशास्त्राण्युपवेदः। *। अथायुर्व्वेदस्य विवरणम्।

"ऋग्यजुःसामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः।

विचिन्त्य तेषामर्थं चैवायुर्व्वेदं चकार सः।

कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः।

स्वतन्त्रसंहितां तस्मात् भास्करश्च चकार सः।

भास्करश्च स्वशिष्येभ्य आयुर्व्वेदं स्वसंहितां।

प्रददौ पाठयामास ते चक्रुः संहितास्ततः।

तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च।

व्याधिप्रणाशवीजानि साध्वि मत्तो निशामय।

धन्वन्तरिर्द्दिवोदासः काशीराजोऽश्विनीसुतौ।

नकुलः सहदेवोऽर्किश्च्यवनो जनको बुधः।

जावालो जाजलिः पैलः करथोऽगस्त्य एव च।

एते वेदाङ्गवेदज्ञाः षोडश व्याधिनाशकाः।

चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम्।

धन्वन्तरिश्च भगवान् चकार प्रथमे सति।

चिकित्सादर्पणं नाम दिवोदासश्चकार सः।

चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः।

चिकित्सासारतन्त्रञ्च भ्रमघ्नं चाश्विनीसुतौ।

तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च चकार सः।

चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनं।

ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः।

च्यवनो जीवदानञ्च चकार भगवानृषिः।

चकार जनको योगी वैद्यसन्देहभञ्जनं।

सर्व्वसारं चन्द्रसुतो जावालस्तन्त्रसारकं।

वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः।

पैलो निदानं करथस्तन्त्रं सर्व्वधरं परं।

द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः।

चिकित्साशास्त्रवीजानि तन्त्राण्येतानि षोडश।

व्याधिप्रणाशवीजानि बलाधानकराणि च।

मथित्वा ज्ञानमन्थानैरायुर्व्वेदपयोनिधिं।

ततस्तन्मध्यतः स्वर्णं नवनीतानि कोविदाः।

एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहितां।

आयुर्व्वेदं सर्व्ववीजं सर्व्वं जानामि सुन्दरि।

व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः।

एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः।

आयुर्व्वेदस्य विज्ञाता चिकित्सासु यथार्थवित्।

धर्म्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्त्तितः"।

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः। *।

तस्य लक्षणम् यथा,—

"आयुर्हिताहितं व्याधिनिदानं शमनं तथा।

विद्यते यत्र विद्वद्भिः स आयुर्व्वेद उच्यते"।

तस्य निरुक्तिर्यथा,—

"अनेन पुरुषो यस्मात् आयुर्व्विन्दति वेत्ति च।

तस्मान्मुनिवरैरेष आयुर्व्वेद इति स्मृतः"।

इति भावप्रकाशः। *। अन्यत् रोगशब्दे वैद्य-

शब्दे वैद्यशब्दे च द्रष्टव्यम्।

("हिताहितं ...

मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते"।

"तस्यायुषः पुण्यतमो ...

वक्ष्यते ...

"किमायुः कस्मादायुर्व्वेदः ...

ऽध्यायन इति। कानि ...

तयोः क्रमयश्चेति"।

"तत्र भिषजा ...

वेदानामात्मनोऽथर्व्ववेदे ...

पर्य्ययः ...

कित्सा चायुषो हितायोपदिश्य

ष्यायुर्वाच्यं

धारि चेत्येकोऽर्थः,

मुच्यते स्वलक्षणतः

प्रमाणाप्रमाणतश्च

गुणकर्म्माणि ...

चनायुष्याणि च द्रव्यगुणकर्म्माणि

देशयन्ति"।

"तानिन्द्रः ...

ब्रह्मविदा ...

ग्लानिरप्रभावत्वं वैवर्ण्यं ...

मसुखमसुखानुबन्धं च। ग्राम्यो

मशस्तानां सत्कृतं ...

स्वशरीरमरहिभिः

ब्रह्मर्षीणामात्मनः ...

मश्विनौ मह्यं प्रयच्छतां

प्रजापतये ब्रह्मा

बहुलमसुखमसुखानुबन्धं

नियमदानाध्ययनसञ्चयं मत्वा

प्रकाशकरं जराव्याधिप्रशमनं

शिवं शरण्यमुदात्तं भवन्तो ...

धारयितुं प्रकाशयितुञ्च

च मैत्रीं कारुण्यमात्मनश्चानुत्त-

माश्रमद्यं कर्म्मेति"। इति चर।

"तानुवाच भगवान् ...

मीमांस्य अध्याप्याश्च भवन्तो ...

खल्वायुर्व्वेदो नाम यदुपाङ्गमथर्व्व-

प्रजाः ...

यम्भूः। ...

भूयोऽष्टधा प्रणीतवान्। तद्यथा।

कायचिकित्सा भूतविद्या ...

रसायनतन्त्रं वाजीकरणतन्त्रमिति"।

"वत्स! सुश्रुत! इह खल्वायु-

ध्युपसृष्टानां व्याधिपरिमोक्षः स्व-

आयुरस्मिन् विद्यतेऽनेन वा ...

र्वेदः। तस्याङ्गवरमाद्यमागमप्रत्यक्षानु-

रविरुद्धमुच्यमानमुपधारय। ...

प्राणाभिघातत्वात् ...

"तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यं

करमिति"।

…ाच ततः प्रजापतिरधिजगे तस्मा-
…भ्यामिन्द्र इन्द्रादहं मया लिह प्रदेय-
…जाद्धितहेतोः" ॥ इति सुश्रुतः ॥)
…न्] त्रि, (आयुर्व्वेदो ज्ञातव्यत्वेन विद्यते
…ायुर्व्वेद + इनि।) आयुर्व्वेदज्ञः। चिकित्-
…विदः। इति हेमचन्द्रः राजनिर्घण्टश्च ॥
…, पुं, (आयुषो जीवितकालस्य योगो
…ज्ञात्।) औषधं। इति राजनिर्घण्टः।
…, [त्] त्रि, (आयुस् + मतुप्।) चिरजीवी।
…युः। तत्पर्य्यायः। जैवातृकः २। इत्यमरः ॥
…ा मनुः, २। १२५, ३। २६३।
…युष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने"।
…युष्मन्तं सुतं सूते यशोमेधासमन्वितं" इति च ॥)
…ान्, पुं, विष्कुम्भादिसप्तविंशतियोगान्तर्गत-
…योगः। तत्र जातफलं। "यस्यायुष्मान् जन्म-
…ै धनुष्मान् याने यानं तस्य देशेषु कार्य्यं।
…ामूलं क्रीड़नं पुष्पवाट्यां दासैर्व्वासैरन्वितो
…तस्य" ॥ इति दीपिका ॥
…ायुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि"
…। सुश्रुतः ॥)
…, त्रि, (आयुस् + यत्।) पथ्यं। इति राज-
…ण्टः ॥ आयुर्हितकारकं ॥ (मनुः। ४।१०६।
…ं यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनं"।
…व २। ५१।
…ायुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखम्"।
…ायुष्यं भोजनं जीर्णे वेगानाञ्चाविधारणं।
…पथ्यमहिंसा च साहसानाञ्च वर्ज्जनं" ॥
…ति सुश्रुतः ॥
…ायुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी"।
…ति हारीतः।)
…ख्यां, क्ली, (आयुष्यञ्च तत्सूक्तञ्चेति। कर्म्म-
…रयः।) नान्दीश्राद्धादौ वसुधारासम्पातनाम-
…प्राद्यो वैदिकमन्त्रविशेषः।
…मगानां तन्मन्त्रो यथा,—
…। आयुर्विश्वायुर्विश्वं विश्वमायुरसिमहि। प्रजा-
…एरधिनिधेहास्मे शतं जीवेम शरदो वयन्ते।
…युषे मे पवस्व वर्च्चसे मे पवस्व विदुः पृथिव्या
…ो ऽनिल्या प्रजामृतत्वामोधःक्षरन्ती सोमो
…दाय ममायुषे मम ब्रह्मवर्च्चसाय यजमान-
…ाय अमुष्य राज्याय। अमुष्य स्थाने यदर्थं वृद्धि-
…स्य षष्ठ्यन्तनाम प्रयोज्यं। इति रघुनन्दनभट्टा-
…र्य्यकृतश्राद्धप्रयोगतत्त्वं ॥ • ॥
…जुर्वेदी तन्मन्त्रो यथा,—
…ं आयुष्यं वर्च्चसं रायस्पोषमौद्भिदं इदं हिरण्यं
…त्रस जैत्रायाविशतादुमां। न तद्रक्षांसि न
…शाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत्।
…विभर्त्ति दाक्षायणं हिरण्यं स देवेषु
…णुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः।
…दा बध्नन् दाक्षायणा हिरण्यं शतानीकाय
…सुमनस्यमानाः। तन्म आबध्नामि शतशारदा
…यायुष्मान् जरदष्टिर्यथासं"। इति तत्तत्यजुर्वेदि-
…श्राद्धप्रयोगतत्त्वं।

आयुस्करः, त्रि, (आयुस् + कृ + क।) परमायुर्ज-
नकः ॥ (आयुर्वृद्धिजनकः।
"सह्यामलकशुक्तिभिर्दधिसरेण तैलेन वा
गुड़ेन पयसा घृतेन यवशक्तुभिर्वा सह।
तिलेन सहमाक्षिकेण पललेन सूपेन वा
वपुस्करमरुस्करं परममेध्यमायुस्करं" ॥
इति वाभटः ॥)

आयोगः, पुं, (आङ् + युज् + घञ्।) गन्धमाल्यो-
पहारः। व्यापारः। रोधः। इति हेमचन्द्रः ॥
(यथा रामायणे,—
"सरलैः कर्णिकारैश्च किंशुकैश्च सुपुष्पितैः।
स देशो भ्रमरायोगः प्रदीप्त इव लक्ष्यते" ॥)

आयोगवः, पुं, (अयोगव एव स्वार्थे अण्।) शूद्रा-
द्वैश्यायां जातो जातिविशेषः। इति हेमचन्द्रः ॥
तस्य कर्म्म काष्ठतक्षणं। (यथा मनुः १०।१२,
१०। १६।
"शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणां।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" ॥
"आयोगवोऽयं क्षत्ता च चाण्डालश्चाधमो नृणां।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः" ॥)

आयोजनं, क्ली, (आङ् + युज् + ल्युट्।) उद्योगः।
आहरणं। द्रव्यासादनं। यथा,—
"कुत्रचित् तण्डुलाः सन्ति क्व च स्थाली क्व चेन्धनं।
तेषामायोजनं कुर्व्वन् मुख्यः कर्त्तामिधीयते" ॥
इति गोपीचन्द्रधृतकारिका ॥

आयोधनं, क्ली, (आङ् + युध + ल्युट्।) युद्धं। वधः।
इति मेदिनी ॥ (रघुवंशे, ६।४२।
"आयोधने कृष्णगतिं सहाय-
मवाप्य यः क्षत्रियकालरात्रिं"।
भट्टिः, "आयोधने स्यायुकमस्त्रजातम्"।
रघुः, ५। ७१। "आयोधनाग्रसरतां त्वयि वीर!
याते।)

आरं, क्ली, (आङ् + ऋ + भावे घञ्।) मुण्डायसं।
मुण्डलोहं। इति राजनिर्घण्टः। पित्तलं। इत्य-
मरटीका ॥ कोणः। प्रान्तभागः। इत्यानन्दलह-
रीटीका। (चक्राङ्गकाष्ठभेदः। यथा महाभारते,
"आरान्तरेणावपतन् संक्षिप्याङ्गं धनेन च"।
"यस्मिन्षष्टिशतारणं वेदार्थं स परः कविः" ॥)

आरः, पुं, (आङ् + ऋ + कर्त्तरि संज्ञायां घञ्।)
मङ्गलग्रहः। शनिः। पित्तलं। इति हेमचन्द्रः ॥
वृक्षभेदः। तत्पर्य्यायः। मधुराम्लफलः २। इति
रत्नमाला। देपक इति ख्यातः ॥

आरकूटः, पुं क्ली, (आरं कूटयति कृष्णीकरोति
[illegible]।) पित्तलं। इत्यमरः ॥ (यथा नैषधे।
"चकाशे वासकादिकाङ्के हिमारकूटाभर-
[illegible] न छिदः" ॥)

आरक्तं, त्रि, (आरज्यतीति। आङ् + रञ्ज + क्त।)
ईषद्रक्तं। इति शब्दरत्नावली। रक्तवर्णं। इति
विश्वः ॥

आरक्षः, पुं, (आङ् + रक्ष + घञ्।) कुम्भसन्धिः।
इति त्रिकाण्डशेषः ॥

आरग्वधः, पुं, (आ + रुजि [illegible]) …
रोगशङ्कामपि हन्ति अच् वधादेशश्च।) वृक्ष-
विशेषः। सोनालु सोंदालि इति ख्यातः। तत्-
पर्य्यायः। राजवृक्षः २ सम्पाकः ३ चतुरङ्गुलः ४
आरेवतः ५ व्याधिघातः ६ कृतमालः ७ सुव-
र्णकः ८। इत्यमरः ॥ मन्थानः ९ रोचनः १० दीर्घ-
फलः ११ नृपद्रुमः १२ हेमपुष्पः १३ राजतरुः १४
कण्डुघ्नः १५ ज्वरान्तकः १६ अरुजः १७ स्वर्ण-
पुष्पः १८ स्वर्णद्रुः १९ कुष्ठसूदनः २० कर्णा-
भरणकः २१ महाराजद्रुमः २२ कर्णिकारः २३
स्वर्णाङ्गः २४। इति राजनिर्घण्टः ॥ प्रग्रहः २५।
इति रत्नमाला ॥ अस्य गुणाः। अतिमधुरत्वं।
शीतलत्वं। शूलज्वरकण्डुकुष्ठमेहकफविष्टम्भना-
शित्वञ्च। इति राजनिर्घण्टः ॥ अपि च। ज्वर-
हृद्रोगवातरक्तोदावर्त्तरोगे अतिशयपथ्यत्वं। मृदु-
त्वञ्च। अस्य फलगुणाः। मधुरत्वं। शुक्रकारित्वं।
वातपित्तहारित्वञ्च। इति राजवल्लभः ॥ आमल-
तास इति हिन्दीभाषा।
"आरग्वधो राजवृक्षः सम्पाकश्चतुरङ्गुलः।
आरेवतव्याधिघातकृतमालसुवर्णकाः ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः।
आरग्वधो गुरुः स्वादुः शीतलः स्रंसनोत्तमः ॥
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत्।
तत्फलं स्रंसनं रुच्यं कुष्ठपित्तकफापहं ॥
ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं परं"।
इति भावप्रकाशः ॥
(व्यवहारो यथा,—
"बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे।
योन्योम्दलपायित्वादिशेषाच्चतुरङ्गुलः"। • ॥
ग्रहणप्रणाली यथा ॥ • ॥
"फलकाले फलन्तस्य ग्राह्यं परिणतञ्च यत्।
तेषां गुणवतां भारं सिकतासु निधापयेत् ॥
सप्तरात्रात् समुद्धृत्य शोषयेदातपे भिषक्।
ततो मज्जानमुद्धृत्य शुचौ भाण्डे निधापयेत्"। • ॥
संयोगविशेषे गुणा यथा ॥ • ॥
"द्राक्षारसयुतो देयो दाहोदावर्त्तपीड़िते। • ॥
चतुर्व्वर्षसुखं बाले यावद्द्वादशवार्षिके। • ॥
चतुरङ्गुलमज्जानु प्रयतं वायवाञ्जलिं।
सुरामण्डेन संयुक्तमथवा कोलसीधुना ॥
दधिमण्डेन वा युक्तं रसेनामलकस्य वा।
कृत्वा शीतकषायं सं पिबेत् सौवीरकेण वा" ॥
इति चरकः ॥)

आरट्टः, पुं, (आङ् + रट + टच्।) देशविशे-
[illegible] त्रिकाण्डशेषे क्षत्रियवर्गे आरट्टकशब्ददर्श-
नात् आरट्टोऽपि पाठः ॥ (यथा भारते,—
तत्र आरट्टोऽपि पाठः ॥ (यथा भारते,—
"पञ्चनद्यो वहन्त्येता यत्र पीलुवनान्युत।
शतद्रुश्च विपाशा च तृतीयैरावती तथा ॥
चन्द्रभागा वितस्ता च सिन्धुषष्ठा वहिर्गिरेः ।
आरट्टा नाम ते देशा नष्टधर्मा न तान् [illegible]
"पञ्च नद्यो वहन्त्येता यत्र [illegible]
आरट्टा नाम वाहीका न [illegible]
आरट्टजः, पुं, (आरट्टे जायते आरट्ट [illegible]
डः।) आरट्टदेशोद्भवघोटकः। इति [illegible]

विष्कम्भादिप्रभृतियोगो च। (आकृष्टेशोत्पन्ने, त्रि। यथा महाभारते,—

"भीष्मः दानं [illegible]
[illegible]।
देवा धर्म्मान् प्रति [illegible]-
[illegible]" ।)

आरङ्कि, पुं, (आङ्+ऋ+[illegible]।) [illegible]। [illegible]। इति [illegible]। [illegible] भाषा।

आरग्वधः, पुं, (आरं रोगं। [illegible]+वध्+अ [illegible]।) [illegible]। [illegible] १ [illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७। इति [illegible]।

आरग्वधा, स्त्री, [illegible]। [illegible]। इति [illegible]। इति [illegible]।

[illegible]

"भीतादित्यो रविर्यस्मिन्नारम्भप्रथमक्षणे।
मनेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः" ॥

आरम्भप्रथमक्षणे आद्यकृत्यारम्भसमये। इति मलमासतत्त्वम्। पारिभाषिकारम्भो यथा,—

"आरम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयोः।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिष्क्रिया" ॥

इति तिथ्यादितत्त्वम्। (यथा मेघदूते। ३७।—
"नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छाम्"।
साहित्यदर्पणे। प्रथमपरिच्छेदे।
"ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति"। रघुवंशे। १।१५।
"आगमैः सदृशारम्भ आरम्भसदृशोदयः"।)

आरवः, पुं, (आङ्+रु+अप्।) शब्दः। इत्यमरः॥ (यथा रामायणे। "वानराणां तु रावः"।)

आरवी, स्त्री, आरवनामकम्लेच्छदेशीयभाषा। यथा,

"ज्येष्ठादित्या मघा पूर्वा रेवती भरणीद्वये।
विशाखार्द्रोत्तराषाढश्रवणे पापवासरे॥
जपे स्थिरे सपक्षे च पारसीमारवीं पठेत्"।

इति मलमासतिमुहूर्त्तः॥

आरा, स्त्री, (आङ्+ऋ+अच्+टाप्।) चर्म्मभेदकास्त्रं। तत्पर्य्यायः। चर्म्मप्रभेदिका २। इत्यमरः॥ "उद्यतारामप्रकार्योऽस्थिनस्य"। इति भावः।)

आरात्रं, क्ली, (आरायाः अग्रं गृह्णातीति।) चर्म्मचल्कसमूहं।

"चर्म्मवल्कप्रारिधारात्रं मुखमुच्यते"।
"आरात्रम्तु मुखं तेषां पुष्पपत्रादिभेदतः" ॥ इति [illegible]॥

आरात्, अ, (आ राति। रा दाने [illegible]।) दूरं। निकटः। इत्यमरः॥ (यथा, उत्तरचरिते।
"मेघमालेव यश्चायमारादपि विभाव्यते"। इति "तमकर्म्मारादभिवर्त्तमानम्"। इति रघौ २।१०।

आरातिः, पुं, (आङ्+रा+क्तिन्।) अरातिः। शत्रुः। इति भरतः द्विरूपकोषः।

आरात्रिकं, क्ली, (आङ्+रात्रि+कन्।) नीराजनविधिप्रदीपः। [illegible]। नीराजनपात्रञ्च। [illegible] इति भाषा। तथाच हरिभक्तिविलासे।

"ततश्च मूलमन्त्रेण दत्त्वा पुष्पाञ्जलित्रयं।
महानीराजनं कुर्य्यात् महावाद्यजयस्वनैः।
प्रज्वालयेत्तदर्थञ्च कर्पूरेण घृतेन वा।
आरात्रिकं शुभे पात्रे विषमानेकवर्त्तिकं"॥

अन्यच्च।

"आदौ चतुष्पादतले च विष्णो-
[illegible] मुखमण्डलैकं।
सर्व्वेषु चाङ्गेषु च सप्तवारा-
नारात्रिकं भक्तजनस्तु कुर्य्यात्"॥

आराधनं, क्ली, (आङ्+राध्+ल्युट्।) [illegible]। [illegible]। इत्यमरः॥ पचनं। इति मेदिनी। (यथा रघुवंशे। [illegible]।
[illegible]

उत्तरचरिते। प्रथमाङ्के।
"स्नेहं दयाञ्च सौख्यञ्च यदि
आराधनाय लोकानां मुञ्चतो [illegible]
कुमारसम्भवे १।५९।
"आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम्"।)

आराधना, स्त्री, (आङ्+राध्+णिच्+युच्। स्त्रीत्वात् टाप्।) साधना। तत्पर्य्यायः। भक्तिः २ परिचर्य्या ३ प्रसादः [illegible] उपासितः ७ वरिवस्या ८ [illegible] १०। इति हेमचन्द्रः॥

आरामः, पुं, (आरमन्तेऽत्र, आङ्+रम्+घञ्।) उपवनं। इत्यमरः॥ (यथा, मनुः,—८।२६२। ८।१९।)
"छिन्नकूपतडागानामारामस्य [illegible]
"स्वं तडागमारामं [illegible]

आरामशीतला, स्त्री, [illegible] सुगन्धिपत्रिविशेषः। [illegible] तत्पर्य्यायः। आनन्दी २ शीतला ३ [illegible] रामा ५ महानन्दा ६ [illegible] ८। अस्या गुणाः। तिक्तत्वं। शैत्यं हारित्वं। दाहशोषप्रशमनत्वं। [illegible] इति राजनिर्घण्टः। (यथा
"आरामशीतला तिक्ता [illegible]

आरालिकः, त्रि, (अरालं कुटिलं [illegible] सूपकारः। पाचकः। इत्यमरः॥

आरावः, पुं, (आङ्+रु+घञ्।) शब्दः। (यथा महाभारते।
"आरावं माद्रवर्गस्य श्रुत्वा [illegible]
"आराव- समवाप्नोत्"।)

आरः, पुं, (ऋ+उण्।) [illegible]। [illegible] इति मेदिनी॥

आरुः, पुं, (ऋच्छति गच्छति वा। [illegible]) पिङ्गलवर्णः। तद्गुणे त्रि। [illegible]

आरुकं, क्ली, (आरु+कन्।) ओषधिविशेषः। आरु इति भाषा। वीरसेनं २ वीरं ३ वीरावर्त्तं ४ [illegible] मेरुतः चतुर्भाति। तेषां गुणाः। [illegible] मलं। [illegible] राजनिर्घण्टः॥ (यथा चरके।
"आरुकं मधुरं [illegible]

आरूढः, त्रि, (आङ्+रुह्+क्तः।) रोहकः। [illegible] भाषा। यथा,—
"राम रामेति रामेति [illegible]
आरूढकविताशाखां वन्दे [illegible]
इति रामायणरामस्य पूर्व्वार्द्धे।
(यथा श्रुतिः।
"आरूढो नैष्ठिकं धर्म्मं [illegible]
प्रायश्चित्तं न पश्यामि येन शुध्येत् [illegible]
[illegible]
"[illegible]

, स्त्री, (आरेवयति निवारयति मलं सार-त्। रेव गवगतौ। णिच् + विच्। अवति। -अच्। तत आरेव् चासौ अवश्चेति।) वतरुच्छफलं। इति राजनिर्घण्टः॥
त्कं गुल्मनावश्चर्यामुः पत्रमूलकं।
वतपक्वांमु पथा तेन एतं पचेत्" ॥
सुश्रुतः वैद्यकचक्रपाणिसंग्रहश्च॥)
, पुं, (आरेवयति रेचयति मलं सारकत्वात् +रेव्+णिच्+विच्+अतच्।) आरग्वध-। इत्यमरः॥
, स्त्री, (अरोगस्य भावः। ष्यञ्।) आप्यभावः। र्यायः। अगामयं २। इत्यमरः॥ पाटवं ३ र्वं ४ वार्त्तं ५। इति राजनिर्घण्टः॥ ("आ-तत् सुखावहं"। इति शार्ङ्गधरः॥
र्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्"।
संचकमारोग्यम्,"
ध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः।
वेशप्रवेशे तु विद्यादारोग्यलक्षणम्॥"
चरकः॥
समार्थं समासेन सद्वृत्तस्येतदीरितं।
ग्यमायुरथो वा नाश्नुद्भिः प्राप्यते नृभिः"॥
सुश्रुतः॥)
शाला, स्त्री, (आरोग्यार्था शाला। मध्यपद-कर्म्मधारयः।) आरोग्यदानगृहं। चिकित्-यः। यथा,—
र्मार्थकाममोक्षाणामारोग्यं साधनं यतः।
आरोग्यदाता च नरो भवति सर्व्वदः॥
ग्यशालां कुर्व्वीत महौषधपरिच्छदां।
वैद्यसंयुक्तां बहुद्रव्यसमन्वितां॥
तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रमः।
धीमूलतत्त्वज्ञः समुद्धरणकालवित्॥
र्व्याविभागज्ञः प्राणिमांसौषधीगणे।
गवदेहिनां तददनुकूलः प्रियंवदः"॥
वैद्यार्कं॥
, पुं, (आङ्+रुह्+णिच्+घञ्।) मिथ्या-। यथा। "असर्पभूते रज्जौ सर्पारोपवत् अवस्त्वारोपः अध्यारोपः"। इति वेदान्त-॥ मिथ्याविज्ञरणं। यथा। "असूया तु रोपो गुणेष्वपि"। इत्यमरः॥
साहित्यदर्पणे। १०म परिच्छेदे।
रोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा"।
पितं रोपितारोपो विषये निरपह्नवे"॥
कस्यचिदारोपः परारोपणकारणं"।)
णं, स्त्री, (आङ्+रुह्+णिच्+ल्युट्।) णः। संस्थापनं। (धनुरादीनां रोपणं। घरा-दौ व्यादीनां संयोजनं, उत्पादनं, समुत्थापनं, साहित्यदर्पणे। १०म परिच्छेदे।
कस्यचिदारोपः परारोपणकारणम्"।
रायणे। आदिकाण्डे।
धस्य धनुषो रामः कुर्य्यादारोपणं मुने"।)
पितं,त्रि, (आङ्+रुह्+णिच्+क्तः।) स्थापि-तं। निहितं। न्यस्तं। इति हलायुधः॥

कल्पितं॥ (यथा कुमारसम्भवे ३। ४५।
"तं देशमारोपितपुष्पचापे"। काव्यप्रकाशे।
"समस्तवस्तुविषयं श्रौता आरोपिता यदा"।)
आरोहः, पुं, (आङ्+रुह्+घञ्।) दैर्घ्यं। वरस्त्रि-याः श्रोणिः। इत्यमरः॥ (यथा माघे "आरोहै-र्निविडवृहत्नितम्बबिम्बैः"।) अवरोहः। आरो-हणं। गजारोहः। समुच्छ्रयः। इति मेदिनी॥ ("आरोहमिव रत्नानां प्रतिष्ठानमिव श्रियः"। इति रामायणे।) परिमाणविशेषः। नितम्बः। इति हेमचन्द्रः॥ (आरोहति यः। आङ्+रुह्+अच्। निषादी। यथा, हरिवंशे,—
"अश्वाश्च पर्य्यधावन्त हतारोहा दिशो दश"।)
आरोहकः, त्रि,(आङ्+रुह्+ण्वुल्।) आरोहण-कर्त्ता॥
आरोहणं, क्ली, (आरुह्यतेऽनेन। आङ्+रुह्+ल्युट्।) सोपानं। सिड़ि इति भाषा। (भावे ल्युट्।) समारोहः। नीचादूर्द्ध्वगमनमिति यावत्। (यथा कुमारसम्भवे १। ३९।
"आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम्"।)
प्ररोहणं। अङ्कुरादिजननमिति यावत्। इति मेदिनी॥
आर्क्किः, पुं, (अर्कस्यापत्यं। अर्क+इञ्।) अर्कपुत्रः। शनैश्चरः। इति ज्योतिःशास्त्रं। (वैवस्वतमनुः, सुग्रीवः, कर्णश्च।)
आर्गलः, पुंस्त्री, (अर्गल एव स्वार्थे अण्।) अर्गलः। इति त्रिकाण्डशेषः॥ खिल इति भाषा।
आरग्वधः, पुं, आरग्वधवृक्षः। इति शब्दचन्द्रिका॥ ("आरग्वधशब्देऽस्य गुणादयो ज्ञातव्याः"।)
आर्घा,स्त्री, (आङ्+अर्घ्+अच्।) पीता दीर्घतुण्डा षट्पदसन्निभा मक्षिका। इति राजनिर्घण्टः॥
आर्घ्यं, क्ली, (आर्घया मक्षिकया निर्वृत्तम्। आर्घा +यत्।) आर्घानाममक्षिकोत्पन्नमधु। तस्य गुणाः। अतिशयचक्षुर्हितकारित्वं। कफपित्तास्र-दोषनाशित्वञ्च। इति राजनिर्घण्टः॥ (यदुक्तं,—
"मधूकवृक्षनिर्यासं जरत्काष्ठेऽश्मेऽद्भवाः।
स्रवन्त्यार्घ्यं तदाख्यातं श्वेतकं मालवे पुनः॥
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः।
आर्घास्तास्तत्कृतं यत् तदार्घ्यमित्यपरे जगुः"॥
यथा सुश्रुते,—
"आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परं।
कषायं कटु पाके च बल्यं तिक्तमवातकृत्"॥
इदं हि षड्विधमधुजातिमध्ये परिगणितम्।
"पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च।
आर्घ्यमौद्दालिकं दालमित्यष्टौ मधुजातयः"॥)
आर्त्तः,त्रि, (आङ्+ऋ+क्तः।) पीड़ितः। अस्वस्थः। यथा,—
"आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः"॥
इति प्रायश्चित्ततत्त्वं॥ (दुःखितः, कातरः, शोका-भिभूतः, उद्वेजितः, विरक्तः, अपकृतः, उत्पी-ड़ितः। यथा शाकुन्तले, प्रथमाङ्के।

"आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि"।
"द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्"।
इति रघौ। १। २८। (तथा च चरके॥
"नाश्विनावार्त्तं भैषज्येनोपपादयेतां"। इति॥
आर्त्तगलः, पुं, (आर्त्तं इव गलति पचाद्यच्।) नील-झिण्टी। तत्पर्य्यायः। बाणः २ बाणा ३ दासी ४ आर्त्तगलः ५। इत्यमरस्तट्टीका च॥
("दासे चार्त्तगलस्य सः"। इति भावप्रकाशः॥)
आर्त्तवं, क्ली, (ऋतुरस्य प्राप्तः, अण् यद्वा ऋतुरेव। प्रज्ञादिभ्यश्चेत्यण्।) स्त्रीरजः। इत्यमरः॥ पुष्पं। इति मेदिनी॥ (यथा मनुः, ३। ४८।
"तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियं"।
"नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने"॥
अथार्त्तवस्य स्वरूपमाह।
स्त्रीणां रस एव मासेनार्त्तवं भवतीत्युक्ता पुन-राह सुश्रुत एव।
"मासेनोपचितं काले धमनीभ्यां तदार्त्तवं।
ईषत्कृष्णं विगन्धञ्च वायुर्योनिमुखं नयेत्"॥
गर्भग्रहणयोग्यस्यार्त्तवस्य लक्षणमाह।
"शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत्"॥
आर्त्तवस्य वर्णद्वयाभिधानं। वातादिप्रकृतिभेदेन वर्णभेदात्। यद्वासो न विरञ्जयेत्। यद्वासो अपं प्रक्षालितं तदासन्यजति न तु विकृततरां कुर्य्यात्"।
इति भावप्रकाशः॥
"मासान्निष्पिच्छदाहार्त्ति पञ्चरात्रानुबन्धि च।
नैवातिबहुलात्यल्पमार्त्तवं शुद्धमादिशेत्॥
शशासृक्प्रतिमं यच्च पद्मालक्तकसन्निभं।
इन्द्रगोपकसङ्काशमार्त्तवं शुद्धमेव तत्"॥
इति चरकः,—
"शशासृक्प्रतिमं यत्तु यद्वा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत्॥
विधिमुत्तरवक्ष्यन्तं कुर्य्यादार्त्तवशुद्धये॥
स्त्रीणां स्नेहादियुक्तानां चतसृष्वार्त्तवादिषु।
कुर्य्यात् कल्कान् पिचूंश्चापि पथ्यान्याचमनानि च॥
ग्रन्थिभूते पिबेत् पाठां भूषणं वृक्षकाणि च।
दुर्गन्धे पूयसङ्काशे मज्जतुल्ये तथार्त्तवे॥
भिषग्भद्रश्रियः क्वाथचन्दनक्वाथमेव च"।
"आर्त्तवं शोणितन्त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पाञ्चभौतिकञ्चापरे जीवरक्तमाकाशाद्याः"।
"एवं मासेन रसः शुक्रीभवति स्त्रीणाञ्चार्त्तव-मिति"॥ इति सुश्रुतः॥)
आर्त्तवः, त्रि, (ऋतुः प्राप्तोऽस्य। अण्।) ऋतुद्भवः। इति मेदिनीकरहेमचन्द्रौ। यथा रामायणे,—
"आर्त्तवान्युपभुञ्जाना पुष्पाणि च फलानि च"।
रघौ ८। ३६।
"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम्"।)
आर्त्तवी, स्त्री, वाजिनी। घोटकी। इति राज-निर्घण्टः॥
आर्त्तिः, स्त्री, (आङ्+ऋ+क्तिन्।) पीड़ा। धनु-ष्कोटिः। इत्यमरटीकायां भरतः॥ मेघः। इति

राजनिर्घण्टः ॥ (यथा मेघदूते, पूर्व्वमेघे । ५४ ।
"आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्" ।
सुश्रुते,—
"दाहातिसारपित्तास्रृङ्मूर्च्छामद्यविषार्त्तिषु" ।)
आर्द्रं, त्रि, (अर्द्द + रक् दीर्घश्च ।) सजलवस्तु । भिजा इति भाषा । तत्पर्य्यायः । आर्द्रं २ क्लिन्नं ३ स्तिमितं ४ तिमितं ५ समुन्नं ६ उत्तं ७ । इत्यमरः ॥
(तच्च द्विविधं यदुक्तं,—
"आर्द्रं मद्यं द्विधा प्रोक्तं सरसं नीरसं तथा ।
सदुग्धं शुभरसकं द्विधा नीरसमुच्यते ॥
वास्तूकं सार्षपं शाकं निर्गुण्डीरण्डमार्षकम् ।
मुस्तूराद्यमिदं सर्व्वमार्द्रं सरसमुच्यते ॥
वटाश्वत्थकरीराद्यमार्द्रमद्यं तु नीरसं ।
सदुग्धं तु द्विधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात् ।
मालती पनसीऊण्डसौरिण्याद्यास्तु तीक्ष्णकाः ।
दुग्धिकार्कस्नौरिण्याद्या मृदुदुग्धाः प्रकीर्त्तिताः" ॥
यथा रघुवंशे, "आर्द्रांक्षतारोपणमन्वभूताम्" ।
मेघदूते उत्तरमेघे २५ ।
"तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्" ।)
आर्द्रकं, क्ली, (अर्द्दयति कफं आर्द्रं । ततः कन् । यद्वा आर्द्रयति जिह्वायां । क्वुन् ।) कटुमूलविशेषः । आदा इति भाषा । तत्पर्य्यायः । शृङ्गवेरं २ इत्यमरः ॥ कटुभद्रं ३ कटूत्कटं ४ । इति केचित् । गुल्ममूलं ५ मूलजं ६ कन्दरं ७ वरं ८ महौषध ९ सेकतेष्टं १० अनूपजं ११ अपाकशाकं १२ चान्द्राख्यं १३ राहुच्छत्रं १४ सशाककं १५ शार्ङ्गं १६ आर्द्रशाकं १७ सच्छाकं १८ । इति राजनिर्घण्टः ॥ अस्य गुणाः । कफवातविबन्धानाहशूलघ्नत्वं । रुचिपुष्टिकारित्वञ्च । इति राजवल्लभः ॥ अपिच । उष्णत्वं । कटुत्वं । विपाके शीतलत्वं । लघुत्वं । अग्निदीपनत्वं । शोफकण्ठामयनाशित्वञ्च । इति राजनिर्घण्टः ॥ अन्यआर्द्रकगुणाः । भोजनाग्रे पथ्यत्वं । जिह्वाकण्ठविशोधनत्वं । अग्निसन्दीपनत्वं । हृद्यत्वं,—
"वातपित्तकफेमाणां शरीरवनचारिणां ।
स्त्रव एव निहन्तास्ति नवार्द्रककेशरी" ॥
इति मदगुणः,—
"आर्द्रकं शृङ्गवेरं स्यात् कटुभद्रं तथार्द्रिका ।
आर्द्रिका भेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी तथा ।
कटुका मधुरा पाके रूक्षवातकफापहा ।
ये गुणाः कथिताः शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः ।
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनं ॥
कुष्ठे पाण्ड्वामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे ।
दाहे निदाघशरदोर्नैव पूजितमार्द्रकं" ॥
इति भावप्रकाशः ॥
(वस्त्रार्द्रकमेतच्च, इति वाभटः ॥
"रोचनं दीपनं वृष्यमार्द्रकं विश्वभेषजं ।
वातश्लेष्मविबन्धेषु रसस्योपदिश्यते" ॥
इति चरकः ॥
"अजाविस्तारं सर्व्वं विस्मारनाशनमुत् ।
रूक्षं रोचनं वृष्यं हृद्यमेवार्द्रकं स्मृतम्" ॥

इति सुश्रुतः ।)
आर्द्रपटी, [न्] पुं, (आर्द्रपट + इनि ।) आर्द्रगजचर्म्मा-वृतकर्त्तृकशत्रुनाशफलकाभिचारकर्म्मविशेषः ।
यथा । "अथार्द्रपटी । प्रयोगे इत्थं भगवति चा-मुण्डे रक्तवाससे अप्रतिहतरूपपराक्रमे अमुक-वधाय विचेतसे वज्रिवक्रमा । आर्द्रगजपटेनावृतः समुद्रगामिनीनदीतटे ऊषरभूमौ वा दक्षिणा-मुख ऊर्द्धबाहुर्ज्जपेत् यावत् पटः शुष्यति तावत् मायाः शुष्यन्ति शत्रोः" । इति तन्त्रसारः ॥
आर्द्रपटविशिष्टे, त्रि ॥
आर्द्रमाषा, स्त्री, माषपर्णी । इति राजनिर्घण्टः ॥ माषाणी इति भाषा ।
आर्द्रशाकं, क्ली, (आर्द्रं शाकमस्य ।) आर्द्रकं । इति राजनिर्घण्टः ॥
आर्द्रा, स्त्री, (आर्द्र + टाप् ।) अश्विन्यादिसप्तविंशति-नक्षत्रान्तर्गतषष्ठनक्षत्रं । अस्य रूपं । मण्यालङ्कार-ज्वलैकतारकामयं । अस्या अधिष्ठात्री देवता शिवः । इति कालिदासः ॥ मणितुल्यैकताराकं । इति केचित् ॥ तत्र जातफलं ।
"क्षुधाधिको वक्रशरीरकान्तिः
कलिप्रियः कोपयुतोऽविनीतः ।
प्रसूतिकाले च भवेत् किलार्द्रा
नचार्द्रचेताः शरणागतेऽपि" ।
इति कोष्ठीप्रदीपः ॥
आर्द्रालुब्धकः, पुं, (आर्द्रायां तन्नाम्ना प्रसिद्धनक्षत्रे लुब्धक इव ।) केतुग्रहः । इति हलायुधः ॥
आर्द्रिका, स्त्री, (आर्द्रक + टाप् ।) आर्द्रकं । इति भावप्रकाशः ॥
("आर्द्रिका तिक्तमधुरा मूत्रला न च पित्तहृत्" ॥
इति वाभटः ॥)
आर्य्यः, त्रि, (अर्त्तुं प्राप्तमाचरितुं योग्यः । अर्य्यते वा । ऋ + ण्यत् ।) सत्कुलोद्भवः । इत्यमरः । पूज्यः । श्रेष्ठः । वृद्धः । इति शब्दरत्नावली ॥ सङ्गतः । इत्यजयः ॥ (मान्यः, उदारचरितः, शा-न्तचित्तः । यथा, रामायणे, २ काण्डे ।
"योऽहमार्य्येण परवान् भ्रात्रा ज्येष्ठेन भाविनि" ।
न्यायपथावलम्बी, प्रशस्ताचारशीलः, सततकर्त्तव्य-कर्म्मानुष्ठाता । यदुक्तं,
"कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् ।
तिष्ठति प्राकृताचारे स तु आर्य्य इति स्मृतः" ॥
धार्म्मिकः । धर्म्मशीलः । यथा, मनुः, १० । ५७ ।
"आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत्" ।
उचितः । यथा, रामायणे,—
"मार्गमार्य्यं प्रपन्नस्य नानुमन्येत कः पुमान्" ॥
नाट्योक्तौ सम्मानसूचकमिदं नाम प्रायेण मान्य-जनाह्वाने व्यवह्रियते । यथा, साहित्यदर्पणे, षष्ठ-परिच्छेदे ।
"सेव्यया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः" ।
"वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परं" ॥)
आर्य्यः, पुं, (अर्त्तुं सदाचरितुं योग्यः । ऋ + ण्यत् ।) स्वामी । वृद्धः । इति हेमचन्द्रः ॥ सुहृत् । इत्यजयः ॥ (श्रेष्ठवर्णः । म्लेच्छेतरजातिः । यदुक्तं महाभारते ।

"म्लेच्छावाचो ...
आर्य्याश्च ...
मात्रम्मनोः ...
"बहींर्ज्यावर्त्ते ...
परियात्रयोः ...
सार्य्यावर्त्त मनोः ...
आर्य्यकं, क्ली, पितृ...
कावरोधः ॥
आर्य्यकः, पुं, (आर्य्य + ...
तामहः । इति शब्द...
"अथ ते ...
"आर्य्यकस्ते तु कुमरी ...
महाभारते,—
"आर्य्यकेण च दृष्टः स ...
तदा ...
पूज्यश्लिमानम् ।
यथा महाभारते,—
"आर्य्यकश्चोपकश्चैव ...
आर्य्यका, स्त्री, (आर्य्यक + टाप् । ...
पक्षे ह्रस्वाभावः ।) श्रेष्ठा स्त्री ।
आर्य्यपुत्रः, पुं, (आर्य्यस्य पुत्रः, ...
स्वामी । इति हेमचन्द्रः ॥ (...
"आर्य्यपुत्र । पिता माता ...
सानि पुण्यानि मुञ्चतां ...
गुरुपुत्रः । मान्यस्य पुत्रः ।
आर्य्यमिश्रः, त्रि, (आर्य्यः श्रेष्ठो मिश्रः ...
इति त्रिकाण्डशेषः ॥ (मान ...
रामायणे, २ काण्डे ।
"समग्रमार्य्यमिश्राणां
उत्तरचरिते, प्रस्तावनायां ।
"अद्य खलु भगवतः कालप्रिय
मार्य्यमिश्रान् विज्ञापयामि" ।)
आर्य्या, स्त्री, (ऋ + ण्यत् + स्त्रियां ...
इति त्रिकाण्डशेषः । ...
"यस्याः ...
अष्टादश द्वितीये चतुर्थके पञ्चद-
इति श्रुतबोधः ॥ अपिच ।
"लक्ष्मैतत्सप्तगणा गोपेता ...
षष्ठो जश्च न लघुर्वा प्रथमे ...
चरमेऽर्द्धे पञ्चमके तस्मादिह ...
सा नवधा ।
"पथ्या विपुला चपला मुखचप...
गीत्युपगीत्युद्गीतय ...
इति छन्दोमञ्जरी ॥ श्रेष्ठा स्त्री ।
आर्य्यावर्त्तः, पुं, (आर्य्या आवर्त्तन्ते ...
आ + वृत् + आधारे घञ् ।) ...
योर्मध्यदेशः । तत्पर्य्यायः । पुण्य...
मरः ॥ यथा,—
"आसमुद्रात्तु वै पूर्व्वादासमुद्रात्तु ...
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुः ...
इति मनुः ...

विन्ध्यहिमागयोः" ।
...ार्थे वान् + अत इत्वं ।)
...ः ॥
...ऋषि + अण् ।) विवाह-
...तोहयं गृहीत्वा तेनैव सह
...अवल्काः,—
...पार्षं आदाय गोयुगं ।
...ायुत्तरजस्य पट्" ॥
...ः ।
...वा वरादादाय धर्म्मतः ।
...वदार्षो धर्म्मः स उच्यते" ।)
... (यथा मनुः १२।१०६ ।
...ञ्च वेदशास्त्रविरोधिना ।
...ते स धर्म्मं वेद नेतरः" ॥
...ऋषभस्यापत्यम् । ऋषभ + इञ् ।)
... स तु भरतराजचक्रवर्त्ती । इति

(ऋषभस्य वृषस्य प्रिया । ऋषभ +
...।) कपिकच्छुवृक्षः । इति राजनि-

...र्षे नक्षत्रविशेषाणां संज्ञाविशेषः । यथा,
...चापि फल्गुन्यौ मघा चैवार्षभी मता" ।
...शब्दोऽस्या गुणादयो ज्ञातव्याः ॥)
...पुं, (ऋषभस्य प्रकृतिः । ऋषभ + अण् ।)
...युक्तवृषः । तत्पर्य्यायः । षण्डतायोग्यः २ ।
...रः ॥ षाँड़ेर उपयुक्त एँड़े इति भाषा ॥
..., पुं, (अर्हन् जिन एव । अर्हत् + अण् ।)
...विशेषः । तत्पर्य्यायः । वादवादी २ । इति
...मचन्द्रः ॥
... स्त्री, (आलयति भूषयतीति । आ + अल् +
...ध् ।) हरितालं । इत्यमरः ॥ अनल्पे त्रि । इति
...मचन्द्रः ॥ (यथा वैद्यकरसेन्द्रसारसंग्रहे ॥)
...हरितालं तालमालमालं शैलूषभूषणम् ।
...ह्नकं रोमहरणं तालकं पीतमित्यपि" ॥)
...र्द्दः, पुं, (अलगर्द्द एव । स्वार्थे अण् ।) अलगर्द्दः ।
...लसर्पः ।
...म्बः, पुं, (आङ् + लवि + घञ् ।) अवलम्बः ।
...श्रयः ॥ (शरणं । गतिः । "इह हि पततां
...स्त्यालम्बो न चापि निवर्त्तनम्" । इति शान्ति-
...तके ३ । २ ।) अधोलम्बनम् । यथा, रामायणे,—
...शोभते किञ्चिदालम्बैः शालयः कनकप्रभाः" ॥)
...म्बनं, क्ली, (आङ् + लम्ब + ल्युट् ।) अवलम्बनं ।
...भावविशेषः । यथा,—
...आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।
...आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात्" ॥
...इति साहित्यदर्पणे ३य परिच्छेदः ।
...म्भः, पुं, (आङ् + लभि + घञ् ।) मारणं ।
...धः । इत्यमरः ॥ (यथा स्मृतिः, "अश्वालम्भं
...गालम्भं" । मेघदूते पूर्व्वमेघे । ४६ ।
..."आलम्भेथाः सुरभितनयालम्भजां मानयिष्यन्" ।
...स्पर्शनम् । कर्त्तनम् । मनुः ११ । १४४ ।
..."फलदानामोषधीनां जातानां च स्वयं वने ।

वृथालम्भेऽनुगच्छेत् गां दिनमेकं पयोव्रतः" ॥
स्पर्शः । आलिङ्गनम् । यथा मनुः २ । १७९ ।
"द्यूतञ्च जनवादञ्च परिवादं तथाऽनृतं ।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च" ॥)

आलम्भा, स्त्री, (आङ् + लभि + ण्वुल् ।) वधार्हा ।
घ्ननीया । इति वोपदेवः ॥

आलयः, पुं, (आलीयतेऽस्मिन् । आ + ली + आधारे
अच् ।) गृहं । इत्यमरः ॥ (यथा कुमारे १ । १ ।)
"हिमालयो नाम नगाधिराजः" नैषधे, "तत्रा-
गारालयमरालमरालकेशी" । रामायणे ३ काण्डे ।
"न हि दुष्टात्मनामार्य्या निवसन्त्यालये चिरं" ।
लयपर्य्यन्ते, क्ली । भागवते १ अध्याये ५ । "पिवत
भागवतं रसमालयम्") ॥

आलवालं, क्ली, (आ समन्तात् जलस्य लवमालाति
आ + लव + ला + क ।) तरुमूलसेचनार्थं स्वल्प-
जलाधारः । चारमादा इति भाषा । तत्पर्य्यायः ।
आवालं २ आवापः ३ । इत्यमरः ॥ (रघुवंशे
१ । ५१ ।
"विश्वासाय विहङ्गानामालवालाम्बुपायिनाम्" ।
माघे । "विपुलालवालभृतवारिदर्पणाः" ।)

आलसः, त्रि, (अलस + स्वार्थे अण् ।) अलसः ।
आलस्ययुक्तः । इति द्विरूपकोषः ॥

आलस्यं, क्ली, (अलस + ष्यञ् ।) अलसस्य भावः ।
अलसता । तत्पर्य्यायः । तन्द्रा २ कौसीदं ३ । इति
हेमचन्द्रः ॥ मन्दता ४ मान्द्यं ५ कार्य्यद्वेषः ६ ।
इति राजनिर्घण्टः ॥ (यदुक्तं । "आलस्यं श्रमग-
र्भाद्यैर्जाड्यं जृम्भासितादिकृत्" इत्युक्तलक्षणो
व्यभिचारिभावभेदः । सुश्रुते ।
"सुखस्पर्शप्रसङ्गित्वं दुःखद्वेषणलोलता ।
शक्तस्य चाप्यनुत्साहः कर्म्मण्यालस्यमुच्यते" ॥)

आलस्यः, त्रि, (अलस एव । अलस + स्वार्थे ष्यञ् ।)
अलसयुक्तः । तत्पर्य्यायः । मन्दः २ तुन्दपरिमृजः ३
शीतकः ४ अलसः ५ अनुष्णः ६ । इत्यमरः ॥

आलातं, क्ली, (अलातमेव । अलात + स्वार्थे अण् ।)
अलातं । अङ्गारः ॥

आलानं, क्ली, (आलीयतेऽत्र । आङ् + ली + ल्युट् ।
विभाषा लीयतेरित्यात्त्वम् ।) गजबन्धनस्तम्भः ।
इत्यमरः ॥ गजबन्धनरज्जुः । इति नीलकण्ठः ॥
(रघुवंशे १ । ७१ ।
"अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः" ।
कादम्बरी । "इभमदमलिनमालानस्तम्भयुगलमुप-
हसन्तमिवोरुदण्डद्वयेन" ।
रघुवंशे ४ । ६९, ४ । ८१ ।
"गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमानताः" ।
"तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः" ॥)
"तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः" ॥)
बन्धनं । इति रायमुकुटः ॥ रज्जुः । इति मेदिनी ॥

आलापः, पुं, (आङ् + लप् + घञ् ।) कथोपकथनं ।
सम्भाषणं । तत्पर्य्यायः । आभाषणं २ । इत्यमरः ।
(साहित्यदर्पणे, प्रथमपरिच्छेदः ।
"काव्यालापाश्च ये केचित् गीतकान्यखिलानि च" ।)

आलाप्यः, त्रि, (आङ् + लप् + कर्म्मणि ण्यत् ।)
आलापयोग्यः । आभाषणीयः ॥

आलावर्त्तं, क्ली, (आलमत्यर्थमावर्त्तते । ... इति
आ + वृत् + अच् ।) वस्त्रनिर्म्मितव्यजनं । इति
हेमचन्द्रः ॥ कापड़ेर पाखा इति भाषा ।

आलावुः, स्त्री, अलावुः । इति शब्दरत्नावली ॥ लाउ
इति भाषा । (अलावुशब्देऽस्या विशेषो ज्ञेयः ॥

आलावूः, स्त्री, अलावुः । इति शब्दरत्नावली ॥

आलास्यः, पुं, (आलं पर्य्याप्तं आस्यं मुखं यस्य सः ।)
कुम्भीरः । इति हेमचन्द्रः ॥

आलिः, स्त्री, (आलयति भूषयति । आ + अल भूषणे ।
अच इः ।) वयस्या । (यथा कुमारसम्भवे । ५।८२ ।
("निवार्य्यतामालि किमप्ययं वटुः,
पुनर्विवक्षुः स्फुरितोत्तराधरः" ।)
(आलति निवारयति जलं । अल वारणे । सर्व्वध
तुभ्य इन् ।) सेतुः । (अल्यतेऽनया । अल् + इञ्
पंक्तिः । इति मेदिनी अमरश्च ॥ सन्ततिः । इ
शब्दरत्नावली ॥

आलिः, पुं, (आलति दंशने समर्थो भवति । अ
अल् + बाहुलकात् इण् ।) वृश्चिकः । भ्रम
इति हारावली अमरटीका च ॥

आलिः, त्रि, (आङ् + अल् + इण् ।) विशद
निर्म्मलान्तःकरणः । इति मेदिनी ॥ अनर्थः ।
हेमचन्द्रः ॥

आलिङ्गनं, क्ली, (आङ् + लिङ्ग + ल्युट् ।) प्रीतिपूर्व्वक-
परस्पराश्लेषः । कोलाकोली इति भाषा । तत्-
पर्य्यायः । अङ्कपालिः २ परिरम्भः ३ परीरम्भः ४ परिष्वङ्गः ५ संश्लेषः ६
... इति त्रिकाण्ड-
शेषः ॥ परिरम्भः ४ परीरम्भः ५ परिष्वङ्गः ६
संश्लेषः ७ उपगूहनं ८ । इत्यमरः ॥ तत्सप्तधा
यथा । आमोदालिङ्गनं १ मुदितालिङ्गनं २ प्रेमा-
लिङ्गनं ३ आनन्दालिङ्गनं ४ रत्यालिङ्गनं ५ मदना-
लिङ्गनं ६ विनोदालिङ्गनं ७ । इति कामशास्त्रम् ॥
("आलिङ्गनान्यधिकृताः स्फुटमापुरेव" ।
इति माघः ॥ यथा मेघदूते उत्तरमेघे ९ ।
"यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानां" ।)

आलिङ्गी, [न्] पुं, (आ + लिङ्ग + इनि ।) आलिङ्ग्यः ।
मृदङ्गविशेषः । इत्यमरटीकायां स्वामी शब्द-
रत्नावली च ॥

आलिङ्ग्यः, पुं, (आ + लिङ्ग + ण्यत् ।) यवाकृतिमृदङ्गः ।
इत्यमरः ॥ मादोल इति भाषा । यथा शब्दार्णवे ।
"हरीतकीसमो मध्ये ... चैकाङ्गुलेन यः ।
"चतुरङ्गुलहीनोऽङ्काम्मुखे चैकाङ्गुलेन यः ।
यवाकृतिः स आलिङ्ग्य आलिङ्ग्य स हि वाद्यते" ।

आलिञ्जरः, पुं, (अलिञ्जर + अण् ।) अलिञ्जरः । इ
त्रिकाण्डशेषः ॥ जाला इति भाषा ।

आलिन्दः, पुं, (अलिन्द + अण् ।) अलिन्दः । व
द्वारप्रकोष्ठः । गृहान्तरगमनार्थवेदिका ।
रायमुकुटः शब्दरत्नावली च ॥ गृहैकदेशः ।
मत्तवारणः ॥

आलिन्दकः, पुं, (आलिन्द एव स्वार्थे कः ।) आलि
इति शब्दरत्नावली ॥

आलिम्पनं, क्ली, (आङ् + लिम्प + ल्युट् ।) मङ्गला-
लेपनं । आलिपना इति भाषा । तत्पर्य्यायः । आत-
पनं २ आदीपनं ३ मण्डोदरं ४ । इति त्रिकाण्ड-
शेषः ॥

आली, स्त्री, (आलि + ङीष् ।) सखी। पङ्क्तिः। वृश्चिकः। इत्यमरटीकायां भरतादयः॥ सेतुः। इति शब्दरत्नावली॥ (श्रेण्यर्थे यथा कुमारे ६।४९।
"तोयान्तर्भास्करालीव रेजे मुनिपरम्परा" ।)

आलीढ़ं,क्ली, (आङ् + लिह् + क्त ।) धन्विनां दक्षिणजङ्घाप्रसारवामपादसंकोचरूपावस्थानं। इत्यमरः। (यथा, रघौ ३ । ५२ ।
"अतिष्ठदालीढ़विशेषशोभिना
वपुःप्रकर्षेण विडम्बितेश्वरः" ।
(तल्लक्षणं यथा, चिन्तामणिधृतम् ।
"नमिता पूर्व्वजङ्घा च पश्चिमा प्रगुणा भवेत् ।
अयमो मध्यकायश्च स्यादालीढस्य लक्षणम्" ॥)

आलीढं,त्रि, (आङ् + लिह् + क्त।) भक्षितं। भुक्तं। इति मेदिनी॥ (क्षतः, रघुवंशे, २।३७।
"शेनान्यमालीढमिवासराश्रैः" ।)

आलीढ़कं, क्ली, (आलीढ एव स्वार्थे कः।) तर्णकानां अणीषु क्रीडनं। इति हारावली॥ वाकुरेर खेला इति भाषा। आटीककमिति क्वचित् पाठः॥

आलीनकं, क्ली, (आलीन + कन् ।) रङ्गं। इति हेमचन्द्रः॥ रां इति भाषा।

आलु,स्त्री,(आङ् + लु + डु।) भेलकः। सुगामस्थातमूलविशेषः। इति मेदिनी॥ अस्य गुणाः। रक्तपित्तनाशित्वं। गुरुत्वं। स्वादुत्वं। शीतलत्वं। स्तन्यदुग्धशुक्रकारित्वञ्च। इति राजनिर्घण्टः॥

आलुः, स्त्री, (आलाति । आङ् + ला + डु ।) स्वल्पवारिधानिका। घटीभारी इत्यादि भाषा। तत्पर्य्यायः। कर्करी २ गलन्तिका ३। इत्यमरः॥

आलुः, पुं, पेचकः। इति शब्दरत्नावली॥ काष्ठालुः। इति राजनिर्घण्टः॥

आलुकं, क्ली, (आलु + स्वार्थे कन् ।) मूलविशेषः। आलु इति भाषा। इति राजवल्लभः॥ एतच्चालुकं। इति राजनिर्घण्टः॥ तद्विवरणं यथा,—
"आलुकमप्यालुकं तत् कथितं वीरसेनस्य।
काष्ठालुकशङ्खालुकहस्त्यालुकानि कथ्यन्ते॥
पिण्डालुकमध्वालुकरक्तालुकानि यानानि"।
काष्ठालुकं काठिमदुन्दुर्कटार। शङ्खालुकं श्वेतालु। हस्त्यालुकं दीर्घतादुग्धमहाशरीरं। ...आलुकं सर्पच्छपर्णी। मध्वालुकं मधुरतायुक्त... आन्विलरोमवक्षणी। रक्तालुकं रक्ताङ्ग तरथा च। एषां गुणाः।
...लुकं शीतलं सर्व्वं विष्टम्भि मधुरं गुरु।
...सृष्टमूत्रमलं रूक्षं दुर्ज्जरं रक्तपित्तनुत्।
...बलकरं वृष्यं स्तन्यविवर्द्धनम्"।
...प्रकाशः॥
...कानि च सर्व्वाणि तथा युष्यानि चान्दर्यं।
...कीर्त्तिरसं येशाद्यं नातिरोचकम्"॥
...टः॥
...स्वदतारसीविसवदावप्रशाटकवादेर-
...मध्वालुकहस्त्यालुकशङ्खालुकाद्य-
...रिसोमरोलवन्नमसौवि"।
...राह्वाः शीतानि मधुराणि च।
...वाणि सन्दरदिशराणि च"॥

इति सुश्रुतः॥)

आलुकः, पुं, (आलाति पृथ्वीं कामरोगं वा आङ् + ला + डु + संज्ञायां कन् ।) काकालुः। इति राजनिर्घण्टः॥ शेषनागः। इति हेमचन्द्रः॥

आलुकी, स्त्री, दीर्घाकारसूक्ष्मरक्तालुः। अथई इति नाम। यथा, भावप्रकाशे॥
"रक्तालुभेदो या दीर्घा तन्वी च प्रथितालुकी।
आलुकी बलकृत् स्निग्धा गुर्व्वी हृत्कफनाशिनी।
विष्टम्भकारिणी तैसे तत्रितातिरुचिप्रदा"॥

आलेख्यं, क्ली, (आङ् + लिख् + ण्यत् ।) चित्रं। इति हेमचन्द्रः॥ (यथा माघे, २।६०।
"इति संरम्भिणो वाणीर्बलस्यालेख्यदेवताः"।
"निशीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिता इव" । रघुवंशे ३।१५।)

आलेख्यशेषः, त्रि, (आलेख्यं चित्रमेव शेषो यस्य सः।) मृतः। इति हेमचन्द्रः॥ (यथा रघुवंशे, १४।१५।
"वाष्पायमाणौ बलिमन्निकेत-
मालेख्यशेषस्य पितुर्व्विविशतुः" ।)

आलोकः, पुं, (आङ् + लुक् + घञ् ।) दर्शनं। देखा इति भाषा। द्योतः। आलो इति भाषा। शान्तिशतके, ४ । ६ ।
"आलोकाय निशासु चन्द्रकिरणाः सख्यं कुरङ्गैः सह" । मेघदूते पूर्व्वमेघे ३८ ।
"वद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः" ।
यथा शकुन्तले, प्रथमाङ्के ।
"यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां" ।
(यथा, रामायणे ४काण्डे । ५० । २४ ।
"आलोकं ददृशुर्धीरा नीरासा जीविते यदा" ।
वन्दिभाषणं। स्तुतिरिति यावत्। इति मेदिनी॥ (रघुवंशे । २ । ९ ।
"उदीरयामासुरिवोन्मदाना-
मालोकशब्दं वयसा विरावैः" ॥)

आलोकनं, क्ली, (आङ् + लोक् + ल्युट् ।) दर्शनं। इत्यमरः॥ (रघुवंशे, ७ । ५ । "ततस्तदालोकनतत्पराणां," कुमारसम्भवे । २ । ४५ ।
"भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते", माघे, ११ । ९३ ।
"व्रजति हि सफलत्वं वल्लभालोकनेन" ।)

आलोचनं, क्ली, (आङ् + लुच् + ल्युट् ।) दर्शनं। विवेचनं॥ (यथा हेमचन्द्रः, "रहस्यालोचनं मन्त्रः"। वास्तमते निर्विकल्पकं ज्ञानं निर्द्धर्म्मकं शुद्धवस्तुविषयकं प्राथमिकं ज्ञानं। यदुक्तं ।
"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥
ततःपरं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यया" ।
"बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन सम्मता"।
"एकादिषु पदानामालोचनमात्रमिष्यते व-
त्ति" ॥ सांख्यकारिका ।)

आवनेदः, पुं, (अवन्या अपत्यं आवनी + ढक् ।) मङ्गलग्रहः। इति ज्योतिःशास्त्रं॥ (यथा काशीखण्डे। १० अध्याये ।
"उत्पत्तिं चास्य वक्ष्यामो भूस्ततोऽयं यथाभवत्।

पुरा तपस्यतः शम्भोर्दाक्षाय...
भाग्यस्रुतात्प्रपातैकः स्वेदबिन्दु...
ततः कुमारः संजज्ञे लोहिता...
स्नेहसम्बर्द्धितः सोऽपि धात्र्या
माहेय इत्यतः ख्यातिं परामवाप..."

आवपनं, क्ली, (आोप्यते आप्यतेऽत्र आधारे ल्युट् ।) इत्यमरः॥ सम्यक्क्षुरिकर्म्म। (यथा महाभारते, आदिपर्व्वणि।
"प्रभुरग्निः प्रतपने भूमिरावपने प्र...
प्रभुः सूर्य्यः प्रकाशित्वे सतां
"अभिर्विभिश्च भैक्ष्यं भूमिरावपनं मह...")

आवरणं, क्ली, (आङ् + वृ + ल्युट् ।) वस्त्रं। इति हेमचन्द्रः॥ ढाल इति भाषा। आच्छादनं। इति भाषा॥ (यथा महाभारते,
"विविधानि च वासांसि
"सूर्य्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा",
५ । १३ । मनुः । ३ । १६१ ।
"सोतसां भेदको यश्च तेषाञ्चावरणे रतः"।

आवरणशक्तिः, स्त्री, (आवरणे शक्तिः।) ...शक्तिः। यथा। "अल्पोऽपि मेघो ... विस्तीर्णमादित्यमण्डलं पिधायकतयाच्छादयतीव तथैवाज्ञानं परिच्छिन्नमपि ... अवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यं" ॥ इति वेदान्तः॥

आवर्त्तं, क्ली, (आङ् + वृत् + घञ्।) ... इति राजनिर्घण्टः॥ (आव... भ्रमणं।)

आवर्त्तः,पुं, (आङ् + वृत् + घञ् ।) ... इत्यमरः॥ घूर्णा इति भाषा। (रघुवंशे ...
"रूपं तमावर्त्तमनोज्ञनाभिः" ।) चिन्ता। आवर्त्तनं। इति मेदिनी॥ चतुर्दशान्तर्गतमेघाधिपविशेषः। इति ज्योतिषम्। (यथा मेघदूते पूर्व्वमेघे ६ ।
"जातं वंशे भुवनविदिते पुष्करावर्त्तकानाम्")। राजावर्त्तनामोपरत्नं। इति राजनिर्घण्टः॥

आवर्त्तकी, स्त्री, (आवर्त्त इव आचरति । आवर्त्त + क्विप् + क + ङीष् ।) लताविशेषः। तवक्षी इति लोकाख्ये प्रसिद्धा। तत्पर्य्यायः। ... किणी २ विभाण्डी ३ विषाणिका ॥ ... मनोज्ञा ६ रक्तपुष्पी ७ भवताकी ... चर्म्मरङ्गा १० । अस्या गुणाः। अम्लत्वम् । शीतवीर्य्यकारित्वम् । मददन्तिकादस्रः। इति राजनिर्घण्टः॥

आवर्त्तनं, क्ली, (आङ् + वृत् + ल्युट् ।) आलोडनं। आघोटान इति भाषा। द्रवीकरणं। इत्यमरटीका॥ ... सूर्य्यस्य पश्चिमदिगवस्थितच्छायाद्यारम्भकालः। "आवर्त्तनात्तु पूर्व्वाह्णः ... ततःपरं" इति स्मृतिः॥

(आङ्+वृत्+ल्युट्+ङीप्।) [illegible]। मुछी इति भाषा। [illegible] तैजसावर्त्तनी २ मूषा ३ मूषः ४। [illegible]ावली ॥
[illegible] पुं, (आवर्त्तनाकारो मणिः।) राजा-[illegible]लं। इति राजनिर्घण्टः ॥
[illegible]ी, (आवर्त्त+इनि+ङीप्।) अज-[illegible]। इति रत्नमाला ॥
[illegible]त्रि, (आङ्+वृह्+क्तः।) उन्मूलितः। [illegible]। इति हेमचन्द्रः।
[illegible]ली, (आङ्+वल+इन्।) श्रेणी। पंक्तिः। [illegible]ः ॥
[illegible] स्त्री, (आङ्+वल्+इन्+ङीप्।) आ-[illegible]। इत्यमरः ॥ (यथा अमरुशतके ३। "आ-[illegible]ामलकावलीं विगलितां विभ्रचलत्कुण्डलं"। [illegible]ृगावलीव्याजनिशाकरांशुभिः"। इति माघे [illegible]। २५।)
[illegible]ल्यं, क्ली, (धवल+ष्यञ्।) धवलस्य भावः [illegible]धैर्ल्यं ॥
[illegible]श्यकं, त्रि, (अवश्य+मनोज्ञादित्वाद्वुञ्। अव्य-[illegible]नां समास इति टिलोपः।) अवश्यकर्त्तव्यं। [illegible]यिकं। उचितं। यथा। "अणोरावश्यके। [illegible]वर्णान्तादावश्यकेऽर्थे अण् स्यात्"। इति मुग्ध-[illegible]ध्याकरणं ॥ किञ्च। आवश्यकपर्व्वादिक्रियमा-[illegible]स्य नित्यनैमित्तिकत्वं। इति तिथ्यादितत्त्वं। [illegible]था साहित्यदर्पणे,। "आवश्यकानां कार्य्याणां [illegible]विरोधादिविनिर्म्मितः"।)
[illegible]थं, क्ली, (आवसन्ति आगत्य वसन्ति अस्मिन्। [illegible]ाङ्+वस+अथच्।) गृहं। इति हेमचन्द्रः ॥ [illegible]र्तिस्थानं। विश्रामस्थानं। अधिष्ठानं। अधि-[illegible]ष्ठानं।
[illegible]वंशे, ८। १४ "[illegible] [illegible] [illegible]"। [illegible]। ५। १०७।
[illegible]

आवहमानं, त्रि, (आङ्+वह्+शानच्।) क्रमागतं ॥ (परम्परागतं, धारावाहि।)
आवाधा, स्त्री, (आ सम्यक् वाधा।) दुःखं। पीड़ा। इति शब्दरत्नावली। भूखण्डं। त्रिकोणक्षेत्रमध्यरज्जुनिक्षेपेण यत् खण्डद्वयं जायते तत्। इति लीलावती ॥
आवापः, पुं, (आ वपन्ति सलिलमत्र। आङ्+वप्+घञ्।) आलवालं। इत्यमरः ॥ वलयः। (यथा महाभारते १४ पर्व्वणि।
"मोहात् पपात गाण्डीवमावापञ्च करादपि"।) शत्रुचिन्तनं। (परराष्ट्रचिन्तनम्। यथा, माघे। २।८८।
"तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता"।) पानभेदः। इति हेमचन्द्रः ॥ भाण्डवपनं। परिक्षेपः। इति मेदिनी ॥ निम्नोन्नतभूमिः। इत्यजयः ॥ पात्रं। इति शब्दरत्नावली ॥ प्रधानहोमः। इति स्मृतिः ॥
आवापकः, पुं। (आ उप्यते इति। आङ्+वप्+कर्म्मणि घञ्+संज्ञायां कन् वा।) वलयः। इत्यमरः ॥
आवापनं, क्ली, (आवाप्यतेऽनेनेति आङ्+वप्+णिच्+करणे ल्युट्।) सूत्रयन्त्रं। इति शब्दमाला ॥ तांत् इति भाषा।
आवारि, स्त्री, (आङ्+वृ+इ।) घट्टवेश्म। इत्यादिकोषः ॥ दोकान हाट्चालि इत्यादि भाषा।
आवालं, क्ली, (आङ्+वल्+घञ्।) आलवालं। इत्यमरः ॥ (वालकमभिव्याप्य इत्यर्थे।) वालकपर्य्यन्तम् ॥
आवाल्यं, क्ली, (वाल्यात् आ आवाल्यं पर्य्यन्तार्थेऽव्ययीभावः।) वाल्यावस्थापर्य्यन्तं ॥ (यथा धर्म्मविवेके,—"आवाल्यादसती गती सुरपुरीं कुन्ती समारोपयत्"।)
आवासः, पुं, (आ वसन्ति अत्र इति। आङ्+वस्+अधिकरणे घञ्।) गृहं इति हेमचन्द्रः ॥ (यथा गीतगोविन्दे। ४।१०।
"आवासो विपिनायते प्रियसखीमालापि जालायते"।)
आवाहनं, क्ली, (आङ+वह्+णिच्+ल्युट्।) आह्वानं। निमन्त्रणं। यथा,—
"प्रतिमास्थानेष्वपुष्पेषु नावाहनविसर्ज्जने"।
इति। [illegible]
मत्स्यपुराणं।
"[illegible] तथा दुर्गा वायुमाकाशमेव च।
[illegible]"।
[illegible]
इति च तिथ्यादितत्त्वं। [illegible]
[illegible]

आविकः, पुं, (अविना मेषलोम्ना कृतम् इति अवि+ठक्।) कम्बलं। इति हलायुधः ॥ (त्रि, मेषलोम्ना निर्म्मितं,। २।४१
"वस्त्रेऽस्मानुपूर्व्व्येण शाणक्षौमाविकानि च"।
मेड़ीदुग्धं। यथा वैद्यके,—
"आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रणुत्।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम् ॥
गुरु कासेऽनिलोद्भूते केवले चानिले वरम्"।
इति।)
आविग्नः, पुं, (आङ्+विज्+क्तः।) अविघ्नः। करमर्द्दकः। इति शब्दरत्नावली ॥ पानि आमला इति ख्यातः। इत्यमरटीकासारसुन्दरी ॥ (उद्विग्नः उत्कण्ठितः।)
आविर्भावः, पुं, (आविस्+भू+घञ्।) प्रकाशः। देवावतरणं। प्रादुर्भावः। यथा,—
"तदा मे मनसा ध्यातो दयासिन्धुर्जनार्दनः।
भक्तानामनुकम्पार्थं यथाविर्भावमिच्छति" ॥
इति जैमिनिभारते आश्वमेधिके पर्व्वणि २ अध्यायः ॥
आविर्भूतः, त्रि, (आविस्+भू+क्त।) प्रकाशितः। अधिष्ठितः। जन्मयुक्तः। अवतीर्णः। प्रादुर्भूतः। आविर्भावविशिष्टः। यथा,—
"उषस्ये यद्यपक्षे सुरगुरौ सेन्दौ नवम्यां तिथौ।
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते पूषणि।
निर्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्यारणेराविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः" ॥
"तत्राष्टम्यां महाकाली दक्षयज्ञविनाशिनी।
आविर्भूता महाघोरा योगिनीकोटिभिः सह" ॥
इति च तिथ्यादितत्त्वम् ॥
आविष्कारः, पुं, (आविस्+कृ+घञ्।) प्रकाशः ॥ (यथा साहित्यदर्पणे, २ परिच्छेदे।
"आविष्कारातिशयमभिधेयतत्स्फुटं प्रतीयते"।)
आविष्कृतः, त्रि, (आविस्+कृ+क्तः।) प्रकाशितः। तत्पर्य्यायः। प्रकटितः २। इति हेमचन्द्रः। (यथा उत्तरचरिते, प्रथमाङ्के। "आविष्कृतं कथाप्राणीतं वहेन"।)
आविष्टः, त्रि, (आ+विश्+क्तः।) प्रेतादिना आविष्टः। भूतादियुक्तः। इति [illegible] ॥ [illegible]। निविष्टः ॥ (उपहतः। यथा [illegible],
"आविष्टइव दुःखेन [illegible]"।)
आवीसूत्रं, क्ली, (आवीतमेव सूत्रम्।) यज्ञ-[illegible] पाशु इति खकुमाषा। [illegible]
यथा,—
"[illegible]"।
[illegible]

[illegible]

"अमन्त्रिका तु कार्य्येयं स्त्रीणामावृदशेषतः" ।)

आवृतः, त्रि, (आङ्+वृ+क्तः ।) कृतावरणः । तत्पर्य्यायः । वेष्टितम् २ वलयितम् ३ संवीतम् ४ रुद्धम् ५ । इत्यमरः । (आच्छादितं, प्रावृतं, आकीर्णं । वर्णभेदः, स च ब्राह्मणाच्छूद्रजातीयायां जातः ।)

आवृत्तः, त्रि, (आङ्+वृत्+क्तः ।) कृतावरणः । आवृतः । इत्यमरटीका ॥ (अभ्यस्तः, क्रमवैपरीत्येन स्थापितः, प्रतिनिवृत्तः, पलायितः, उद्वर्त्तितः, परिवर्त्तितः । यथा उत्तरचरिते,
"स कल्प एव सन्दर्भोऽस्माकमावृत्तः" ।)

आवेगः, पुं, (आङ्+विज्+घञ् ।) त्वरा । इति हेमचन्द्रः ॥ (यथा दशरूपके,—
"आवेगः सम्भ्रमोऽस्मिन्नभिसरजनिते शस्त्रनागादियोगो वातात् पांशूपदिग्धस्त्वरितपदगतिर्वर्षणे पिण्डिताङ्गः" । यथा अमरुशतके ८, १ ।
"आवेगादवधीरितः प्रियतमस्तूर्णीं स्थितस्तत्क्षणात्" ।)

आवेगी, स्त्री, (आङ्+विज्+घञ्+ङीप् ।) वृद्धदारकवृक्षः । इत्यमरः राजनिर्घण्टश्च ।
(अस्या गुणादयो वृद्धदारकशब्दे द्रष्टव्याः ॥)

आवेदनं, क्ली, (आङ्+विद्+ल्युट् ।) निवेदनं ।
(विज्ञापनम् ।)

आवेशः, पुं, (आङ्+विश्+घञ् ।) अहङ्कारविशेषः । तत्पर्य्यायः । संरम्भः २ आटोपः ३ । अपस्माररोगः । इति हेमचन्द्रः ॥ भूतादिना रोगः । तत्पर्य्यायः । भूतग्रहः २ भूतक्रान्तिः ३ ग्रहामयः ४ । इति राजनिर्घण्टः ॥ आसक्तिः । अभिनिवेशः । (यथा रघुवंशे, ५।१८ ।
"तस्मै सभ्याविशद्विवर्ज्जिताय" ।)

आवेशनं, क्ली, (आविशत्यस्मिन् । आङ्+विश्+ल्युट् ।) शिल्पशाला । इत्यमरः ॥ (मनुः, ९।२६५ ।
"शौण्डिकागारपण्यानि कारुकावेशनानि च" ।
(भावे ल्युट् ।) भूतावेशः । (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः" ।)
प्रवेशः । इति मेदिनी ॥ कोपः । इति धरणी ॥ परिवेशः । इति हेमचन्द्रः ॥

आवेशिकः, त्रि, (आवेशं संरम्भं प्राप्तः । आवेश+ठञ् ।) आगन्तुः । अतिथिः । इत्यमरः । स्वीयं । असाधारणं । तत्पर्य्यायः । अन्यासाधारणं २ प्रातिस्विकं ३ । इति त्रिकाण्डशेषः ॥

आवेष्टकः, पुं, (आङ्+वेष्ट+ण्वुल् ।) प्राचीरादिः । इति हलायुधः ॥ पाँचिल बेडा इत्यादि भाषा ॥

आव्यधनं, क्ली, (आङ्+व्यध्+ल्युट् ।) ज्ञानम् । बुद्धिः ॥

आशंसा, स्त्री, (आङ्+शन्स+अङ्+टाप् ।) इच्छा । आकाङ्क्षा । इति हेमचन्द्रः ॥
(रघुवंशे, १२।४४ ।
"विदधे विजयाशंसां चापे सीताञ्च लक्ष्मणे" ।)

आशंसिता, [ऋ] त्रि, (आङ्+शन्स+तृच् ।) आशंसावान् । आकाङ्क्षाशीलः । इत्यमरः ॥

आशंसुः, त्रि, (आङ्+शन्स+उः ।) आशंसिता । इच्छुः । इत्यमरः ॥

आशक्तः, त्रि, (आङ्+शक्+क्तः ।) सम्यक्शक्तिविशिष्टः ॥

आशङ्का, स्त्री, (आङ्+शकि+अ+टाप् ।) भयं । त्रासः । इति हेमचन्द्रः ॥ (संशयः, वितर्कः ।) शाकुन्तले, प्रथमाङ्के ।
"गताशङ्का हरिणशिशवो मन्दमन्दं चरन्ति" ।
कथासरित्सागरे, १० तरङ्गे ।
"तत् श्रुत्वा विगताशङ्कस्तामवादीद्वणिक्सुताम्" ।)

आशनः, पुं, (असन+स्वार्थे अण् ।) असनवृक्षः । इति भरतः द्विरूपकोषश्च ॥

आशयः, पुं, (आङ्+शीङ्+अच् ।) अभिप्रायः । पनसवृक्षः । आधारः । इति विश्वमेदिन्यौ ॥ विभवः । विश्रामस्थानम् । चेतः । अजीर्णं । कोष्ठागारं । इत्यजयपालः । धर्म्माधर्म्मौ । अदृष्टं । इति कुसुमाञ्जलिः ॥ (अभिप्रायार्थे यथा, कथासरित्सागरे, १२ तरङ्गे ।
"तथालोक्याशयं बुद्ध्वा तस्य सोऽपि वसन्तकः" ।
चित्तार्थे यथा, भगवद्गीतायां, १०।२० ।
"अहमात्मा गुडाकेश सर्व्वभूताशये स्थितः" ।
"आशयाः सप्त" । "आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम" इति । सुश्रुत ॥)

आशयाशः, पुं, (आशेरतेऽस्मिन्नित्याशयः । अश्नाति । कर्म्मण्यण् ।) आश्रयाशः । अग्निः । इत्यमरटीकायां स्वामी ।

आशरः, पुं, (आ समन्तात् शृ हिंसायां+पचाद्यच् ।) अग्निः । राक्षसः । इति मेदिनी ॥

आशा, स्त्री, (आ समन्तात् अश्नुते व्याप्नोतीति । आङ्+अश्+पचाद्यच्+टाप् ।) दीर्घाकाङ्क्षा । आयता तृष्णा । (यथा, शान्तिशतके, ४।२६ ।
"आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला" ।)
दिक् । इत्यमरः ।
आसशाशामुखे भाति इन्दुश्चन्दनबिन्दुवत्" ॥
इति साहित्यदर्पणे १० परिच्छेदे । सत्यामस्याता दक्षप्रजापतिकन्या । यथा, हरिवंशे,—
"श्रीर्कीर्त्तिस्तथा कीर्त्तिराशा मेधा च सुव्रता")

आशाढ़ः, पुं, आषाढ़मासः । व्रतिनां पलाशदण्डः । इत्यमरटीका द्विरूपकोषश्च ॥

आशाढ़ा, स्त्री, पूर्व्वाषाढ़ानक्षत्रं । उत्तराषाढ़ा च ॥

आशाढ़ोद्भवः, पुं, (आषाढ़ात् सम्भवो यस्य ।) भूमिजम्बुकः । इति राजनिर्घण्टः ॥

आशाबन्धः, पुं, (आशाया बन्धः । षष्ठीतत् ।) समाश्वासः । (मेघदूते,—
"आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां ।
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि" ॥)
मर्कटवासः । मर्कटजालकं । माकड़शार जाल इति भाषा । इति मेदिनी ॥

आशितं, त्रि, (आङ्+अश्+क्तः ।) अशितं । भुक्तं इति जटाधरः ॥

आशितङ्गवीनं, त्रि, (आशिता भोजिता गावो यत्र पूर्व्वं तत् ।) अशितम्भवं, गवादि-पूर्ववत् गम् ।) आशितङ्गवीनं । ... पूर्व । इत्यमरः ॥ (यथा भट्टिकाव्ये
"हिमाशीनाङ्गवीनानि ...
पूर्व्वं मे स्थाने गव अविदे ... ।

आशितम्भवं, क्ली, (आशित ... भवम् ।) अन्नादि । तृप्तिः । इति मेदिनी । आशेन अतिथ्यादिः भोजितं अन्नादिकम् । यथा, भट्टिकाव्ये
"हिमाशितङ्गवीनानि ...

आशिता, [ऋ] त्रि, (आ अश्नातीति । तृच् ।) बहुभोजनशीलः । हेमचन्द्रः ॥

आशिरः, पुं, (आ+अश+किरच् ।) अग्निः । इति ... (सूर्य्यः ।)

आशीः, [स्] स्त्री, (आङ्+शास्+क्विप् । शास इत्वम्) आशीर्व्वादः । वृद्धिनामौषधिः । इति ... प्रार्थनं, अभीष्टवृद्धिप्रार्थनं । इष्टं-
"वात्सल्यात् यत्र मान्येन ... इष्टावधारकं वाक्यमाशीः सा ... यथा, कुमारे ७।४७ ।
"तस्मै जयाशीः ससृजे पुरस्तात्" ।)

आशी, स्त्री, (आङ्+अश्+अच्+ङीष् ।) दंशनं । अहिदंष्ट्रा । सर्पविषं । ... वली ।
"आशी तालुगता दंष्ट्रा तया दष्टो ...

आशीर्व्वादः, पुं, (आशिषो वादः षष्ठीतत्पुरुषः । ... वचनं । मङ्गलप्रार्थना । (यथा, मनु ।२।...
"मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्" ।)

आशीविषः, पुं, (आशिषि दंष्ट्रायां विषं यस्य । पृषोदरादित्वात् साधुः ।) सर्पः । रघुवंशे,—१।५७ ।
"गरुत्मदाशीविषभीमदर्शनैः" ।)

आशुः, पुं, क्ली, (अश्+उण् ।) ... धान्यं । आउश इति भाषा । तत्पर्य्यायः । ... २ पाटलः ३ । अस्य गुणाः । मधुरत्वम् । अम्लत्वम् । पित्तकारित्वम् । गुरुत्वम् इति राजवल्लभः ॥

आशु, क्ली, (अश्नुते इति । अश+उण्) शीघ्रम् । द्रुतम् । (यथा शाकुन्तले (... ("तदाशु कृतसन्धानं प्रतिसंहर सायकम् ।) त्वरयामि चेत् त्रि । इत्यमरः ।

आशुगः, पुं, (आशु शीघ्रं गच्छतीति । +ड ।) वायुः । बाणः । (रघुवंशे, ११।...
"राघवस्यापि रामास्त्रैः ...
शीघ्रगामिनि, त्रि । इत्यमरः ॥ मनुः ...
("निमीलितु नयेशिरयमाशुबीजकर्षकः ...

आशुपत्री, स्त्री, शल्लकीलता । इति ...

आशुव्रीहिः, पुं, (आशुः व्रीहिः ।) इत्यमरटीकायां भरतमुकुटौ ॥

शुशुचणिः, पुं, (आ समन्तात् शोषुमिच्छति । आङ्+शुष्+सन्+अनि ।) अग्निः । इत्यमरः ॥ यथा कादम्बर्य्यां,—"मन्त्रपूतानि हवींषि प्रति-

... आशुशुक्षणिः" ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आश्रकूटी, [न्] पुं, पर्व्वतः । इति शब्दमाला ॥

आश्चर्य्यं, क्ली, (आङ्+चर्+ण्यत्+सुट् निपातनात् ।) अपूर्व्वं । तत्पर्य्यायः । विस्मयः २ अद्भुतं ३ चित्रं ४ । इत्यमरः ॥ (यथा, रघौ १६।८७ । "गन्धोदयं तदनु ववृषुः पुष्पमासर्ग्गमेघाः" ।)

आश्मनः, पुं, (अश्मन् + अण् ।) अरुणः । सूर्य्यसारथिः । इति त्रिकाण्डशेषः ॥ (अश्मनि प्रस्तरे भवमित्यर्थे अश्मन् + अण् । शिलामयवस्तुनि त्र । यथा भट्टौ ४ । २६ ।

"यथापमाश्मनप्रख्यं वेषुं धत्तेऽन्यदुर्व्वहम्" ।)

आश्रमः, पुं,क्ली, (आङ्+श्रम+घञ् ।) शास्त्रोक्तधर्म्मविशेषः । आश्राम्यन्ति स्वं स्वं तपश्चरन्त्यत्र । स चतुर्विधः । ब्रह्मचर्य्यं १ गार्हस्थ्यं २ वानप्रस्थं ३ सन्न्यासः ४ । इति स्मृतिः ॥ ब्रह्मचारी । गृही । वानप्रस्थः । भिक्षुः । इत्यमरः ॥ मुनीनां वासस्थानं । वनं । मठः । इति मेदिनी ॥ (कलियुगे ब्रह्मचर्य्यवानप्रस्थौ न स्तः केवलं गृहस्थभिक्षुकाश्रमावेव, यदुक्तं । महानिर्व्वाणतन्त्रे ।

"गार्हस्थ्यो भैक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" ।

रघुवंशे, १।४८ ।

"स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः" ।)

आश्रमिकः, त्रि, (आश्रम + ठक् ।) आश्रमयुक्तः । इति शब्दरत्नावली ॥

आश्रयः, पुं, (आङ् + श्रि + अच् ।) राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषः । इत्यमरः ॥ अपाश्रयः । (यथा, मनुः ७।११ ।

... योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः" ।

... सामीप्यः । आधारः । इति जटाधरः ॥ (यथा, ... शान्तिशतके ४।६ । "वासो वल्कलमाश्रयो गिरि- ...

... शय्या लतावल्लरी" ।)

... गृहं । इति हेमचन्द्रः ॥ संश्रयणं । अवलम्बनं ।

यथा, मनुः ७।७२ ।

"... त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्त्ताश्रयाप्सराः" ।)

... राज्ञां तन्निर्णयो यथा,—

... आश्रितौ यदि कल्याणं भवेत् संश्रयणं तथा ।

... वति श्रेयसे राज्ञां विपरीतं न कर्हिचित् ॥

... उच्छिद्यमानो बलिना आश्रयेत् बलवत्तरं ।

... विनीतवत्तत्र कालं नयेदिति मतिर्ध्रुवा ॥

... दद्यात् वः वा कोषं वा भूमिं वा भूतिसम्भवां ।

... आश्रयेदभियोक्तारं समाश्रयगुणान्वितं ॥

... नित्यव्यसनसम्भ्रान्तं महोत्साहं महामतिं ।

... विशन्ति महाराजमपांपतिमिवापगाः ॥

... व्यवसायविनिर्मुक्तं दैवपरं साहसाच्च परिहीनं ।

... रमेव वृद्धपतिं नेच्छन्त्युपगूहितुं कामिनी ॥

... उत्साहात् श्रियमाप्नोति उत्साहाच्च महद्यशः ।

... उत्साहात् सर्व्वोपधाशुद्धमुत्साहं नित्यमाचरेत् ।

... रक्षात् सर्व्वापधाशुद्धमुत्साहं नित्यमाचरेत् ।

... तत्सर्व्वैव शौर्य्यस्य शीघ्रकारित्वमेव च ।

तत्कीर्त्तिं प्रवा... ... ... मतः ॥

व्यसनस्यागमदारमनुत्साहो महीपतेः ।

सामदानदण्डभेदा इत्युपायचतुष्टयं ।

सामसिद्धं प्रशंसन्ति सर्व्वतस्य विपश्चितः ॥

सुवश्चिवाम्लतं वाचा सामोपायं समाचरेत् ।

लुब्धं चौर्य्यं प्रदानेन सत्कृत्य वशमानयेत् ।

भेदं कुर्व्वीत यत्नेन मन्त्रामात्यपुरोधसां ॥

यथावलं प्रकुर्व्वीत दुष्टदण्डनिपातनं" ॥

इति युक्तिकल्पतरौ १ अध्यायः ॥

आश्रयाशः, पुं, (आश्रयमाधारमपि अश्नाति यः आश्रय + अश् + कर्म्मणि उपपदे अण् ।) अग्निः । (यथा, हितोपदेशे । २ ।

"दुर्वृत्तः क्रियते धूर्त्तैः श्रीमानात्मविवृद्धये ।

किं नाम खलसंसर्गः कुरुते नाश्रयाशवत्" ।)

चित्रकवृक्षः । इत्यमरः ॥

आश्रयाशः,त्रि, (आश्रयं स्वालम्बनस्थानमपि अश्नाति यः । आश्रय + अश् + अण् ।) आश्रयनाशकः । आश्रयध्वंसी । इति मेदिनी ॥

आश्रवं, त्रि, (आ सम्यक् शृणोति वाक्यं यः । आङ् + श्रु + पचाद्यच् ।) वचनस्थितः । इति मेदिनी ॥ कथार बाध्य इति भाषा ।

("दृष्टदोषमपि तन्न सोऽत्यजत्

सङ्गवस्तु भिषजामनाश्रवः" ।)

इति रघुवंशम् । १६।४६ ।)

आश्रवः, पुं, (आङ् । श्रु + अच् ।) अङ्गीकारः । क्लेशः । इति मेदिनी ॥ दोषः । इति हेमचन्द्रः ॥

आश्रिः, स्त्री, (अश्रिरेव । अश्रि + इन् ।) अश्रिः । कोणः ॥

आश्रितः, त्रि, (आङ् + श्रि + क्तः ।) आश्रयप्राप्तः । शरणागतः । न्यायमते परमाण्वाकाशादिनित्यद्रव्यभिन्नसर्व्वद्रव्याणां आश्रितत्वं साधर्म्म्यं ॥ (अवलम्बितः, अनुरतः, आधेयः, अधीनः, वशवर्त्ती ।)

आश्रुतः, त्रि, (आङ् + श्रु + क्तः ।) अङ्गीकृतः । स्वीकृतः । इत्यमरः ॥ आकर्णितः । कर्णश्रवणः ॥

आश्लेषः, पुं, (आङ् + श्लिष् + घञ् ।) आलिङ्गनं । इति हलायुधः ॥ (मेघदूते, पूर्व्वमेघे ३ ।

"कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे" ।)

एकदेशसम्बन्धः । यथा । कानने रेमे । इति व्याकरणं ॥ (अश्लेषा एव । अश्लेषा + अण् । स्त्रियां टाप् ।) अश्लेषा । अश्लेषानक्षत्रसम्बन्धिनि, त्रि । (यथा, तैत्तिरीयसंहितायां ।४।४।१०।१ ।

"अश्लेषानक्षत्रं सर्पा देवताः" ।)

आश्वं, क्ली, (अश्वानां समूहः । अश्व + अण् ।) अश्ववृन्दं । घोटकसमूहः । इत्यमरः ॥ (अश्वस्य भावः कर्म्म वा ।)

आश्वत्थं, क्ली, (अश्वत्थस्य इदम् । अश्वत्थ + अण् ।) अश्वत्थवृक्षफलं । इत्यमरः ॥

आश्वपालिकः, पु, (अश्वपालस्यापत्यम् । अश्वपाल + ठक् ।) अश्वपालस्य पुत्रः । इति व्याकरणं ॥

आश्वयुजः, पु, (आश्वयुजी पूर्णिमा विद्यतेऽस्य । आश्वयुजी + अण् ।) आश्विनमासः । इत्यमरः ॥ आश्विनसम्बन्धिनि त्रि ॥ (मनुः, ६।१५ ।

"त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्व्वसञ्चितम् ।

जीर्णानि चैव वासांसि शाकमूलफलानि च" ॥)

आश्वयुजी, स्त्री, (अश्वयुजा युक्ता पौर्णमासी । अश्वयुज् + अण् + ङीप् ।) आश्विनी पूर्णिमा । इति शब्दरत्नावली ॥

आश्वासः, पुं, (आङ् + श्वस् + घञ् ।) निर्वृतिः । आख्यायिकापरिच्छेदः । इति मेदिनी ॥ आशाप्रदानं ॥ (आश्रयदानं, भीतस्य भयनिवारणार्थं सान्त्वनं । उत्तरचरिते, षष्ठाङ्के ।

"आश्वासस्नेहभक्तीनामेकमालम्बनं महत्" ।)

आश्विनः, पुं, (अश्विनीनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । अश्विनी + अण् ।) वैशाखादिद्वादश... मासान्तर्गतषष्ठमासः । रवेः कन्याराशिस्थि... कालः । तत्पर्य्यायः । इषः २ आश्वयुजः ३ । ... मरः ॥ शारदः ४ । इति राजनिर्घण्टः ॥ ... जातफलं ।

"राज्ञां प्रियः काव्यकलाविदग्धः

स्याद्धर्म्मगर्म्मायसतोद्यतबुद्धिः ।

सुखी वदान्यो बहुमानशाली

भक्तो भवेदाश्विनमासजन्मा" ॥

इति कोष्ठीप्रदीपः ॥

आश्विनेयौ,पुं, (अश्विन्या अपत्ये । अश्विनी ...) अश्विनीकुमारौ । इत्यमरः ॥ (पाण्डुपुत्र... सहदेवनामानौ, अश्विनीकुमारजातत्... स्तथात्वम् ।)

आश्वीनं, त्रि, (अश्वेनैकाहेनातिक्रम्यते । ... इति खञ् ।) यदध्वं एकेन ... दिनेन गम्यते तत् । इत्यमरः ॥ एक ... दिने यावार पथ इति भाषा ।

आषाढः, पुं, (आषाढ्या नक्षत्रेण यु... यस्मिन् । आषाढा + नक्षत्रेण युक्त... अण् । पलाशदण्डपक्षे आषाढः ... इति विशाखाषाढादण् मन्त्र... वैशाखादिद्वादशमासान्तर्गततृती... मिथुनराशिस्थितिकालः । पूर्व्वा... नक्षत्रयुक्ता पौर्णमासी यत्र मा... शुचिः २ । इत्यमरः ॥ तत्र जा...

"अनल्पजल्पो प्रमदाभि...

प्रमादशीलो गुरुवत्सल...

बह्वव्ययो मन्दकृताग...

दाषाढमासप्रभवो म...

इति कोष्ठीप्रदीपः ॥ व्रतिन...

("यथाजिनाषाढध...

ज्वलन्निव ब्रह्ममये...

इति कुमारे । ५।३० ।)

मलयपर्व्वतः । इति मेदि...

आषाढकः, पुं, (आषाढ...

क ।) आषाढमासः

आषाढभवः, पुं, ...

अथ...

आषा...

आषाढ़ाभूः, पुं, (आषाढ़ा + भू + क्विप्।) मङ्गलग्रहः। इति हेमचन्द्रः॥

आषाढ़ी, स्त्री, (आषाढ़स्य इयं। आषाढ़ + अण् + ङीप्।) आषाढ़मासस्य पूर्णिमा। इति मेदिनी॥

आष्टं, क्ली, (अश्नुते व्याप्नोतीति अश् + त्रन् इत्ययं ।) आकाशं। इत्युणादिकोषः॥

आस, ञि ङ ल उपवेशने। (अदा०-आत्म०-अक०-सेट्।) इति कविकल्पद्रुमः॥ विद्यमानतायां। इति तट्टीका॥ ("आसने भगवानास्ते सर्वैर्भिर्मुनिपुङ्गवैः"। इति रामायणे १ काण्डे) ञि आसितोऽस्ति। ल ङ आस्ते सिंहासने नृपः। विद्यमानतायामप्ययं। आकाशमास्ते। इति दुर्गादासः॥ (सम् + अधि) सम्यगुपवेशने। व्याप्तौ। यथा रघुवंशे, १६।५२।

"वीरासनैर्ध्यानजुषामृषीणा-
ममी समध्यासितवेदिमध्याः"।

(अनु) पश्चादुपवेशने। यथा रघौ, २।२४।

"तामन्तिकन्यस्तबलिप्रदीपा-
मन्वास्य गोप्ता गृहिणीसहायः"। इति।

उपासनायां। यथा रामायणे,—
"ततश्चीरोत्तरासङ्गः सन्ध्यामन्वास्य पश्चिमाम्"। इति।

(अभि) अभ्यासे। (उत्) उपेक्षायां। यथा माघे। २।४२।
"विधाय वैरं सामर्षे नरोऽरौ य उदासते"। इति।

(उप) समीपोपवेशने। यथा मनुः, ४।१५४।
"कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात्"। इति।
बद्धाञ्जलिश्च गुरुसमीपमासीत इति तट्टीका॥
उपासनायां। यथा,—
"मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते"। इति गीतायां १२।२। सेवने। यथा,—
"उपासते ये गृहस्थाः परपाकमबुद्धयः"। इति मनुः ३।१०४। परपाकमुपासते सेवन्ते इति तट्टीका। (निर्) निरासे। अपसारणे। (प्रति + सम्) प्रतिद्वन्द्वितयावस्थाने। "कोऽन्यः प्रति-समासेत कालान्तकयमादृते"। इति भारतम्। इत्यादि।)

आस[१], पुं, (अस्यन्ते शरा अनेनेति। अस् + करणे घञ्।) धनु। इति हेमचन्द्रः॥

आसक्त[१], त्रि, (आङ् + सञ्ज + क्तः।) आसक्तिविशिष्टः। तत्पर्य्यायः। तत्परः २ प्रसितः ३। इत्यमरः॥ (विषयान्तरपरिहारेण सर्वदा निविष्टः। यथा, किराते।११।२३।
"अवश्याभ्यासमी मूढ़ा वामशीला हि जन्तवः"।)

आसक्तं, क्ली, (आङ् + सञ्ज + क्त।) नित्यं। सततं। अविरतं। इति जटाधरः॥

आसक्तिः, स्त्री, (आङ् + सञ्ज + क्तिन्।) अनुरक्तिः। आसङ्गः॥

आसङ्गं, क्ली, (आङ् + सञ्ज + घञ्।) अनवरतं। नित्यं। सततं। तद्युक्ते त्रि। इति जटाधरः॥

(यथा, कुमारे।५।८।
"न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते"।)।
तुवरी। सौराष्ट्रमृत्तिका इति यावत्। इति राजनिर्घण्टः॥ आसक्तिः॥ (यथा, गीतायां ४।२०।
"त्यक्त्वा कर्म्मफलासङ्गभित्यतृप्तो निराश्रयः"।)

आसङ्गिनी, स्त्री, (आसङ्ग + इनि + ङीप्।) चक्रवातः। वातभ्रमः। इति त्रिकाण्डशेषः॥ घूर्णिया वातास इति भाषा।

आसत्तिः, स्त्री, (आङ् + सद् + क्तिन्।) सङ्गमः। लाभः। इति मेदिनी॥ (अविच्छेदः। निरन्तरं। यथा, साहित्यदर्पणे २य परिच्छेदे।
"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"। आसत्तिर्बुद्ध्यविच्छेदः" इति तट्टीका।)
न्यायमते पदसन्निधानकारणं। यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थिति-कारणं। इति सिद्धान्तमुक्तावली॥

आसनं, क्ली, (आस्यते उपविश्यतेऽस्मिन्। आस् + अधिकरणे + ल्युट्।) पीठ। पिंड़ि चौकि इत्यादि भाषा। हस्तिस्कन्धदेशः। यत्र महामात्रो निवसति। विजिगीषोर्दुर्गादीनवर्द्धयतः स्थितिः। इत्यमरः॥ यात्रानिवर्त्तनं। इति मेदिनी॥ अष्टाङ्गयोगस्य तृतीययोगाङ्गं। तत्तु पद्मप्रकारकरचरणादिसंस्थानविशेषः। यथा,—
"पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा।
वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम्"॥
तेषां क्रमः।
"ऊर्व्वोरुपरि विन्यस्य सम्यक् पादतले उभे।
अङ्गुष्ठौ च निबध्नीयात् हस्ताभ्यां व्युत्क्रमात्तथा॥
पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम्॥ १॥
जानूर्व्वोरन्तरे सम्यक् कृत्वा पादतले उभे।
ऋजुकायो विशेन्मन्त्री स्वस्तिकं तत् प्रचक्षते॥२॥
सीमन्याः पार्श्वयोर्न्यस्येद्गुल्फयुग्मं सुनिश्चलम्।
वृषणाधःपादपार्ष्णी पाणिभ्यां परिबन्धयेत्॥
भद्रासनं समुद्दिष्टं योगिभिः पारकल्पितम्॥ ३॥
ऊर्व्वोः पादौ क्रमान्न्यस्य कृत्वा प्रत्यङ्मुखाङ्गुली।
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम्॥ ४॥
एकपादमधः कृत्वा विन्यस्योरौ तथेतरम्।
ऋजुकायो विशेन्मन्त्री वीरासनमितीरितम्"॥५॥
इति तन्त्रसारः॥ अन्यच्च।
"आसनानि तु तावन्ति यावन्त्यो जीवजन्तवः।
चतुरशीतिलक्षाणि चैकैकं समुदाहृतम्॥
आसनेभ्यः समस्तेभ्यः साम्प्रतं इदमुच्यते।
एकं सिद्धासनं नाम द्वितीयं कमलासनम्"॥
इति विश्वसारतन्त्रम्॥
शृङ्गारासनानि बन्धशब्दे द्रष्टव्यानि॥
उपवेशनाधारः। पीठादि। यथा।
श्रीभैरवानुवाच।
"उपचारान् प्रवक्ष्यामि शृणु षोड़श भैरव।
यैः सम्यक् तुष्यते देवी देवोऽप्यन्यो हि भक्तितः॥
आसनं प्रथमं दद्यात् सौम्यं दारुजमेव वा।
वास्त्रं वा चार्म्मजं कौशं मण्डलस्योत्तरे सृजेत्॥

सौम्यासनं यदि दिव्यं दद्यात् तदपि
निवेदयेत्तत्र मध्ये रिपुं हन्ति
सौम्यं पुष्पौघरचितं
अतिप्रीतिकरं [illegible]
पञ्चराजमयुक्तमासनं सकलं शुभम्।
नेपालायं भाति विस्तीर्णमासनं [illegible]
[illegible]
मकरटकं [illegible]
चैत्यप्रग्रामसंभूतं वर्जयित्वा [illegible]
वाल्कलं कौषजं चार्म्मं वस्त्रजेनकं
रोमजं कम्बलञ्चैव तद्वेन चतुर्दश।
अनेन रचितं दद्यादासनं देवपूजने।
सिंहव्याघ्रनरस्य च
गजानां तुरगाणाञ्च [illegible]
वृषभस्याथ रामस्य मृगाणां
चर्म्मभि [illegible]
वास्त्रेण कम्बलं कृष्णमासनं देवपूजने।
राङ्कवं चार्म्मजं श्रेष्ठं दारवं [illegible]
यद्वासनं कुशमयं [illegible]
सर्व्वेषामपि [illegible]
योगपीठस्य सदृशमासनं [illegible]
आसनस्य प्रदानेन सौभाग्यं [illegible]
वृषभो रोहितो न्यङ्कुः [illegible]
ग्रीवाहरिणाश्चेति
हरिणाचापि विप्रेन्द्र पञ्चभेदोऽत्र
कृष्णः खड्गो वत्सैव एवतत्
एते बलिप्रदानेषु [illegible]
सर्व्वेषां [illegible]
आयसं वर्ज्जयित्वा तु कांस्यं
शिलामयं मणिमयं तथा
आसनं देवताभ्यस्तु मुक्तै [illegible]
अथैव साधकानाञ्च आसनं
यत्रासीनः पूजकस्तु
ऐणञ्च चार्म्मजं वास्त्रं तैजसञ्च
आसनं साधकानाञ्च
पूर्व्वोक्तं यच्च देवेभ्य आसनं
तत्सर्व्वमासनं शस्तं पूजाकर्म्मणि
न यद्देहासनो भूयात् [illegible]
काष्ठादिकासनं [illegible]
चतुर्व्विंशत्यङ्गुलेन [illegible]
[illegible]
षड़ङ्गुलं वा कुर्य्यात्
पूर्व्वोक्तं वर्ज्जयेदन्यमासनं
वास्त्रं द्विहस्तान्तो
न यद्गुलाल्पयोच्छ्रायं पूजाकर्म्मणि
यथेष्टं चार्म्मजं कुर्य्यात् पूर्व्वोक्तं
षड़ङ्गुलाधिकं कुर्य्यान्न
काम्बलं चार्म्मजं चैल [illegible]
प्रशस्तमासनं प्रोक्तं
त्रिपुरायाश्च सततं विष्णोश्चापि
वज्रदीर्घं बहुच्छ्रायं तथैव
दारुभुमिसमं प्रोक्तमथापि

पृथक् कल्पयेच्च शोभनं तादृशासनम् ।
समासनं कुर्य्यात् कदाचिदपि पूजने ॥
...शृङ्गसमुद्भूतमस्थिजं द्विरदाहृते ।
...दन्तसञ्जातमासनं कामिके चरेत् ॥
पूर्व्वोदितं ग्राह्यं तथा गन्धस्पृशस्य च ॥
...ते यदि कुर्व्वीत देवतानां प्रपूजनम् ।
...प्यासनमासीनो नोत्थितस्तु समाचरेत् ।
... शिलामयं कुर्य्यादासनं कौशमेव वा ॥
...ं तैजसं वापि नान्यदासनमाचरेत् ।
...नारोपसंस्थानं स्थानाभावे तु पूजकः ॥
...नं कल्पयित्वा तु मनसा पूजयेज्जले ॥
...सनस्य संस्थानं तोयमध्ये न विद्यते ॥
...त्र वा तदा स्थित्वा देवपूजां समाचरेत् ।
...तत् कथितं पुत्र पूज्यपूजकसङ्गतम् ।
...नं पाद्यमधुना शृणु वेतालभैरव" ॥
...) कालिकापुराणे ६७ अध्यायः ॥

...) पुं, (असु क्षेपणे + ल्युः + प्रज्ञाद्यण् ।) जीव-
...कः । इति मेदिनी ॥ (जीवकशब्देऽस्य
...णो ज्ञेयः ।)

..., स्त्री, (आस्यतेऽस्याम् । आस + ल्यासश्रन्थो
...) स्थितिः । इत्यमरः ॥

..., स्त्री, (आस्यतेऽस्मिन् । आस + अधिकरणे
...+ स्त्रियां ङीप् ।) विपणिः । (आस + भावे +
...+ ङीप्) स्थितिः । इति मेदिनी ॥

..., पुं, (आसं ददातीति । आस + द ।) वासु-
...। इति मेदिनी ॥

..., स्त्री, (आस्यतेऽस्यां । आस् । अन्दादय-
... साधुः ।) खट्वा । इति मेदिनी । (यथा,
...पथब्राह्मणे ५।४।४।२। "तस्मादेषा आसन्दी-
...रन्ति सैषा खादिरी विततृण्णा भवति देवं
...ता भरतानाम्" ।)

..., त्रि, (आङ् + सद् + क्तः ।) निकटः । इत्य-
... (समीपवर्त्ती, कुमारसम्भवे, ३।४४। "आ-
...सन्नशैलविपातः" । आसन्नाभिमुखः शूर्पः ।)

..., पुं, (आस् + सुञ् + अप् ।) मद्यविशेषः ।
...र्व्वः । मैरेयं २ शीधुः ३ । इत्यमरः ।
...धुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।
...दं भावतो विप्रकृष्टाच्च संहितम्" ॥
... माधवेन भेदः एतत्त्वयापि शुद्धमत्तादृष्टे
...नम् । इति भरत ॥ मद्यमात्रम् । इति
...निर्घण्टः ॥ (यथा मनुः ११।९५।
...यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् ।
...तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः" ।)
[illegible] न पिबेद् मद्यं न चासवं ।
... [illegible] । यथा [illegible] ।
[illegible] ।)
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।

"रोचनो दीपनो हृद्यः शोषशोफार्शसंहितः ।
स्नेहश्लेष्मविकारघ्नो वर्ण्यः पक्वरसो मतः" ॥
"मधो भिन्नशकृद्वातो गौडस्तर्पणदीपनः ।
छेदी मध्वासवस्तीक्ष्णो मैरेयो मधुरो गुरुः" ॥
इति चरकः ॥ तथा च सुश्रुते ॥
"तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत् ।
मुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशनः ।
लघुर्मध्वासवश्छेदी मेहकुष्ठविषापहः ॥
तिक्तः कषायः शोफघ्नस्तीक्ष्णः स्वादुरवातकृत् ।
तीक्ष्णः कषायो मदकृद्दुर्नामकफगुल्मकृत् ॥
कृमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः ।
बल्यः पित्तहरो वर्ण्यो मृद्वीकेक्षुरसासवः" ॥)

आसवद्रुः, पुं, (आसवस्य द्रुः ।) तालवृक्षः । इति
राजनिर्घण्टः ॥

आसादितः, त्रि, (आङ् + सद् + णिच् + क्तः ।)
प्राप्तः । लब्धः । इत्यमरः ॥ (सन्निधापितः, आ-
योजितः, सम्पादितः ।)

आसारः, पुं, (आङ् + सृ + घञ् ।) धारासंपातः ।
वेगवृष्टिः । (मेघदूते, "त्वामासारप्रशमितवनोप-
प्लवं साधु मूर्द्ध्ना" । प्रसरणम् । सैन्यानां सर्व्वतो
व्याप्तिः । इत्यमरः ॥ (यथा पञ्चतन्त्रे ।३।४९।
"तस्मात् दुर्गं दृढं कृत्वा सुभटासारसंयुतं" ।)
सुहृद्बलम् । इति मेदिनी ॥ (यथा पञ्चतन्त्रे ३।२९।
"अज्ञातवीर्य्यासारतोयशत्रो भजेत् यः" ।)

आसीनः, त्रि, (आस् + शानच् ।) उपविष्टः । इति
जटाधरः ॥ बसा लोक इत्यादि भाषा ।

आसीनप्रचलायितं, क्ली, (आसीनेन उपविष्टेन प्र-
चलवदाचरितम् ।) उपविश्य निद्रावशेन दोलनम् ।
इति राजवल्लभः ॥ ढोला इति भाषा ।

आसुतिः, पुं, (आसूयते + आङ् + सुञ् + क्तिन् ।)
मद्यसन्धानम् । इति हेमचन्द्रः ॥ मद चोयान
इति भाषा ।

आसुतीवलः, पुं, (आसुतिरस्यास्ति वलच् आसुति-
परिचर्य्या वलच् । वलेति दीर्घः ।) यज्वा । शौ-
ण्डिकः । इति हेमचन्द्रः ॥ (कन्यापालः, सूतजाति-
विशेषः ।)

आसुरः, पुं, (असुर + प्रज्ञादण् ।) असुरः । इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
"[illegible]विवाहविशेषः ।
"आसुरो द्रविणादानात्" । इति याज्ञवल्क्यः ॥
"ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म्म उच्यते" ॥
इति मनुः ३।३१ ।

आसुरं, क्ली, विड्लवणम् । इति राजनिर्घण्टः ॥
असुरस्य भावः । (यथा गीतायां ७।१५।
"न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः" ।)
[illegible] त्रि [illegible] ॥

आसुरं, त्रि, (असुरस्येदम् । असुर + अण् ।) असुर-
सम्बन्धि । यथा —
"[illegible] ।
[illegible]" ॥

इति श्राद्धतत्त्वे ऋग्वेदीयश्राद्धपरिशिष्टम् ॥
अपि च ।
"स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत्" ॥
इति श्राद्धतत्त्वधृतयमवचनम् ॥ * ॥ आसुरसर्गो
यथा ।
"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥
प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥
असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्म्माणः क्षयाय जगतोऽहिताः ॥
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहात् गृहीत्वा सद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः ॥
चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥
आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नाम यज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥
अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥
तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्" ॥
इति श्रीभगवद्गीतायां १६ अध्यायः ॥

आसुरी, स्त्री, (असुरस्य इयं । असुर + [illegible]
ततः ङीप् ।) राजिका । राइ सर्षा इति भाषा ।
इति राजनिर्घण्टः ॥ [illegible]
[illegible] ।
इति हैमः शब्दचन्द्रिका च ॥

आसेचनं, त्रि, [illegible]
[illegible]
[illegible] ।
[illegible]
[illegible]
[illegible] ।)

आसेचनं, त्रि, [illegible])
[illegible]
[illegible]
[illegible] ।)

आस्कन्दनं, त्रि, (आङ्+स्कन्द+भावे ल्युट् ।) तिरस्कारः । रणः । शोषणं । इति मेदिनी ॥ (यथा, किराते ६।१५ । "परयास्कन्दननामिताचलेन्द्रः" ।)

आस्कन्दितं, क्ली, (आङ्+स्कन्द+भावे+क्त ।) अश्वगतिविशेषः । स च सम्यग्गतिः । इत्यमरः ॥

आस्कन्दितकं, क्ली, (आस्कन्दितमेव स्वार्थे कन् ।) आस्कन्दितं । अश्वानां पञ्चमगतिः । तत्पर्य्यायः । उत्तेरितं २ उपकण्ठं ३ । इति हेमचन्द्रः ॥ ("उत्तेरितमुपकण्ठमास्कन्दितकमित्यपि । उत्प्लुत्योत्प्लुत्य गमनं कोपादिवाखिलैः पदैः" । हेमचन्द्रः ।)

आस्तरः, पुं, (आस्तीर्य्यतेऽसौ । आङ्+स्तॄ+अप् ।) करिकम्बलं । इति हेमचन्द्रः ॥ वस्त्राद्यास्तरणं ॥ (यथा शान्तिशतके, ३।१९ । "वासो वल्कलमास्तरः किशलयान्योकस्तरूणां तलम्" ॥)

आस्तरणं, क्ली, (आस्तीर्य्यते यत् येन वा आङ्+स्तॄ+कर्म्मणि करणे वा ल्युट् ।) हस्तिपृष्ठस्थितचित्रकम्बलं । झुल इति भाषा । तत्पर्य्यायः । प्रवेणी २ वर्णः ३ परिस्तोमः ४ कुथा ५ कुथः ६ । इत्यमरः ॥ प्रवेणिः ७ परिस्तोमः ८ कुथं ९ । इत्यमरटीका ॥ (शय्या, कुशासनं । यथा रामायणे, २ काण्डे ।
"राघवास्तरणे पूर्व्वमयोध्यायामिवासने" ।
महाभारते, आदिपर्व्वणि ।
"दर्भास्तरणमास्तीर्य्य निश्चयात् हृतराज्ञकः" ॥)

आस्तिकः, पुं, (अस्तीत्यस्य । अस्ति+ठक् ।) मुनिविशेषः । स तु जरत्कारुमुनिपुत्रः । तत्पिता गर्भस्थं तं ज्ञात्वास्तीत्युक्त्वा गत इत्यस्मादास्तिकः । (यथा,—
"अस्तीत्युक्त्वा गतो यस्मात् पिता गर्भस्थमेव तम् । वनं तस्मादिदं तस्य नामास्तिकेति विश्रुतम्" ॥)
इति महाभारतम् ॥
("आस्तिकस्य मुनेर्माता भगिनी वासुकेस्तथा" । इति मनसाप्रणाममन्त्रः ।)

आस्तिकः, त्रि, (अस्ति ईश्वर इति मतिर्यस्य । अस्ति+ठक् ।) नास्तिकभिन्नः । ईश्वरोऽस्तीतिवादी । वेदप्रामाण्यवादी । तत्पर्य्यायः । श्रद्धालुः २ श्राद्धः ३ । इति हेमचन्द्रः ॥
("सत्यधर्म्मच्युतात् पुंसः क्रुद्धादाशीविषादिव । अनास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः" । इति महाभारते आदिपर्व्वणि ॥)

आस्तिकायनः, पुं, (आस्तिकस्य मुनेरयं सर्पयज्ञात् निवृत्तिरूपप्रयोजनं ददाति यः । जनमेजयो राजा आस्तिकमुनिवचनात् सर्पयज्ञात् विरराम इति पौराणिकी कथा ।) जनमेजयो राजा । इति शब्दरत्नावली ॥

आस्तीकः, पुं, आस्तिकमुनिः । इति त्रिकाण्डशेषः ।

आस्तीकजननी, स्त्री, (आस्तीकस्य जननी माता, षष्ठीतत्पुरुषः ।) आस्तिकमाता । मनसा देवी । इति शब्दरत्नावली ।

आस्था, स्त्री, (आङ्+स्था+अङ्+टाप् ।) यत्नः । आलम्बनं । आस्थानं । अपेक्षा । इति मेदिनीकारहेमचन्द्रौ । (श्रद्धा । आदरः । प्रतिष्ठा । यथा, रघौ १०।७३ ।
"दैवात् सर्गादवध्यत्वं मर्त्त्येष्वास्थापराङ्मुखः" ।
"विनश्वरे विहायास्थां यशः पालय मित्र मे" ।
इति हितोपदेशः ॥)

आस्थानं, क्ली, (आस्थीयतेऽस्मिन् इति । आङ्+स्था+ल्युट् ।) सभा । इत्यमरः । (यथा, किराते १ । १६ । "अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम्" ।) यत्नः । इत्यजयः ॥ (आश्रयः । स्थानम् ।)

आस्थानी, स्त्री, (आस्थान+ङीप् ।) सभा । इत्यमरः ॥ ("आस्थानीं समये समं नृपजनः सायन्तने सम्पतन्" । इति रत्नावली ।)

आस्पदं, क्ली, (आपद्यतेऽस्मिन् इति । आस्पदं प्रतिष्ठायामिति निपातनात् सुट् ।) प्रतिष्ठा । कर्म्म । इत्यमरः ॥ प्रभुत्वं । इति धरणी । स्थानं । इति हेमचन्द्रः ॥ ("रामस्यास्पदमित्यवैमि न हि मे ध्वंसीति न प्रत्ययः" । इति नागानन्दे । तथा च रघौ ३।३६ ।
"नरेन्द्रमूलायतनादनन्तरं
तदास्पदं श्रीर्युवराजसंज्ञितम्" ।)

आस्पन्दनं, क्ली, (आङ्+स्पन्द+ल्युट् ।) स्पन्दनं । कम्पनम् ॥

आस्फालः, पुं, (आङ्+स्फुल्+घञ् ।) हस्तिकर्णास्फालनं । हातिर काण नाडा इति भाषा । तत्पर्य्यायः । झणज्झणा । इति हारावली-त्रिकाण्डशेषौ ॥ (आस्फालनं । सञ्चालनं ।)

आस्फालनं, क्ली, (आङ्+स्फल्+णिच्+ल्युट् ।) आटोपः । प्रागल्भ्यम् ॥ (यथा रघौ ६।७३ ।
"ऐरावतास्फालनविश्लथं यः
संघट्टयन्नङ्गदमङ्गदेन" ।)

आस्फुजित्, पुं, (आस्फु+जि+क्विप् ।) शुक्राचार्य्यः । इति त्रिकाण्डशेषः ॥

आस्फोटः, पुं, (आङ्+स्फुट्+घञ् ।) आस्फोतवृक्षः । इति शब्दरत्नावली ॥ आकन्द इति भाषा । भूरादेर्बाह्वादिशब्दः । इति श्रीभागवतम् ॥ ("चक्रुः कक्षां विधुन्वानावास्फोटं तत्र चक्रतुः" । इति महाभारते सभापर्व्वणि ।)

आस्फोटकः, पुं, (आङ्+स्फुट्+ण्वुल् ।) पर्व्वतजपीलुवृक्षः । इति शब्दमाला ॥ आखरोट इति भाषा ।

आस्फोटनं, क्ली, (आङ्+स्फुट्+ल्युट् ।) विकाशः । भुजयोः । इति धरणी ॥ बाह्वादिशब्दः । ताल ठोका इत्यादि भाषा ॥ (यथा रामायणे ५ काण्डे । "आस्फोटननिनादांश्च बालानां तत्र खेलताम्" ॥ धान्यादेस्तुषविश्लेषकरणम् ।)

आस्फोटनी, स्त्री, (आस्फुट्यतेऽनया । स्फुट्+करणे ल्युट्+ङीप् ।) वेधनिका । इत्यमरः ॥ तुरपन भ्रमर इत्यादि भाषा ।

आस्फोटा, स्त्री, (आस्फोटयतीति । आङ्+स्फुट्+अच्+टाप् ।) नवमल्ली । वनमल्ली । इति शब्दरत्नावली ॥ [illegible]

आस्फोतः, पुं, (आस्फोटयतीति । अच्+पृषोदरादित्वात् [illegible] ।) कोविदारवृक्षः । [illegible] इति शब्दचन्द्रिका । (यथा, [illegible]
("मूर्व [illegible]
[illegible]
वीर्ये कारस्करं [illegible]
[illegible]"।

आस्फोतकः, पुं, (आस्फोत इव [illegible]) वृक्षः । इति राजनिर्घण्टः ॥

आस्फोता, स्त्री, (आस्फोत+टाप् ।) वनमल्लिका । इति मेदिनी । [illegible] राजनिर्घण्टः । वस्त्रविशेष [illegible] स्याता । अस्या गुणौ । [illegible] इति राजवल्लभः ॥

आस्यं, क्ली, (अस्यते ग्रासोऽस्मिन् [illegible] ण्यत्स्युट इति ण्यत् । [illegible] प्रस्रवति इति स्यन्दू प्रस्रवणे+ड [illegible] मध्यम् । (यथा, मनुः १।९२ ।) ("यस्यास्येन [illegible] (आस्ये भवमास्यं ।) मुखभवे त्रि । [illegible]

आस्यपत्रं, क्ली, (आस्यमिव [illegible] इति शब्दचन्द्रिका ।

आस्यलाङ्गलः, पुं, (आस्यं लाङ्गलमिव यस्य ।) शूकरः । इति हेमचन्द्रः ।

आस्यलोम, [न्] क्ली, (आस्यस्य लोम [illegible]) इति हेमचन्द्रः ॥

आस्या, स्त्री, (आस्+ण्यत् [illegible]) मेदिनी च ॥ (आसनं, इति विनिश्चयसंग्रहे । यथा,—
"आस्यासुखं स्वप्नसुखं दधीनि [illegible]
सन्ततेऽस्या गुणा यथा,
"आस्या वर्णकफस्थौल्यसौकुमार्य्यकर [illegible]

आस्यासवः, पुं, (आस्यस्य मुखस्य [illegible] लाला । इति हेमचन्द्रः ॥ [illegible]

आस्रपः, पुं, (आस्रं पिबतीति । [illegible]) मूलानक्षत्रं । इति हेमचन्द्रः । [illegible]

आस्रवः, पुं, (आङ्+स्रु+अप् [illegible]) इत्यमरः ॥

आह, अव्य, (उवाच इत्यर्थे वाक्यारम्भे) क्षेपः । नियोगः । इति मेदिनी ॥ इति शब्दरत्नावली ॥

आहकज्वरः, पुं, (आहको [illegible] नासारोगविशेषः । नासाज्वर इ [illegible] तस्य लक्षणम् ।
"तनुना रक्तघोषेण युक्तो नासाऽऽहको [illegible]
नासमूलज्वरकरः शीघ्रमा [illegible]"
इति वैद्यकम् ॥
तद्यथा, आहकज्वरस्य लक्षणम् ।
"घोषः सरक्तो नासाया कफाद्वै [illegible]
वातश्लेष्मादशुत्पत्र आहनाख्यं [illegible]"

चिकित्सा यथा, वैद्यकचिकित्साग्रन्थे ।
ाचयं वर्गं माषकुलत्थौ वंशपत्रिका ।
ाम्भवौ कार्म्मीरटाम्लरमज्जरी ॥
पञ्चमूलानि साध्याष्टगुणेऽम्भसि ।
शेषिते तैलं तुल्यं कृत्वा विपाचयेत् ।
प्रतिमर्षेण आहवातं व्यपं जयेत्" ॥
[०] दूर्व्वाद्यं तैलं [०])
स्त्री, (आ + हन् + क्त ।) पुरातनवस्त्रं । नूतन-
। इति मेदिनी । मृषार्थकवाक्यं । इत्यमरः ॥
त्रि, (आ + हन् + क्तः ।) गुम्फितः । ता-
। इति मेदिनी ॥ ("प्रति दिवसं याति लयं
ावातादिव शिशिरश्रीः"। इति पञ्चतन्त्रम् ।
: । मिथ्योक्तः । इत्यजयः ॥ निहतः । "घृणा विं-
राहताश्वौहिणीनाम्"। इति महाभारतम् ।)
, पुं, (आहन्यते यः + आङ् + हन् + कर्म्मणि
ञ् ।) आनकः । ढक्का । इति मेदिनी ॥
लक्षणः, त्रि, (आहतं आभ्यस्तं लक्षणं यस्य ।)
प्रतीतः । गुणेन ख्यातः । तत्पर्य्यायः । ख्यात-
णः २ । इत्यमरः ॥
, पुं, (आङ् + हृ + घञ् ।) उच्छ्वासः ।
ामुखश्वासः ॥ इति हेमचन्द्रः ॥ (आहरण-
ि वाच्यलिङ्ग एव । यथा, रघौ १।४९ ।
ान्तरादुपावृत्तैः समित्कुशफलाहरैः" ।)
णं, स्त्री, (आङ् + हृ + भावे ल्युट् ।) द्रव्या-
ायनं । आसादनम् । यथा । देवीपुराणं ।
ादाहरणसंघट्टप्रतिष्ठाज्ञानमेव च ।
ं पूजनञ्चैव विसर्जनमतःपरं" ॥
त तिथ्यादितत्त्वम् ॥
, पुं, (आह्वयते अरिर्यस्मिन् । आङ् + ह्वे +
्।) युद्धं ।
("यदाश्रौषं भीष्ममत्यन्तशूरम्
हतं पार्थेनाहवेष्वप्रधृष्यम्" ॥
त महाभारते आदिपर्व्वणि १।१८२ ।
ह्वयते आज्यादिकं यत्र । आङ् + हु + अप ।)
: । इति शब्दरत्नावली ॥
नीयः, पुं, (आहूयते आज्यादिरस्मिन् । आङ्
हु + अनीयर् ।) यज्ञाग्निविशेषः । इत्यमरः ।
र्हपत्यादुद्धृत्य होमार्थं यः संस्क्रियते सः । इति
तः ॥ (यथा, मनौ २।२३१ ।
ुरुराहवनीयस्तु साग्निस्त्रेता गरीयसी" ।)
रः, पुं, (आङ् + हृ + घञ् ।) द्रव्यगलाधः-
रणं । तत्पर्य्यायः । जग्धिः २ भोजनं ३ जेमनं ४
: ५ निघसः ६ न्यादः ७ । इत्यमरः ॥ जमनं ८
घसः ९ इति तट्टीका ॥ प्रत्यवसानं १० भक्षणं
 अशनं १२ ॥ इति रत्नमाला ॥ अभ्यवहारः
 खदनं १४ निगरः १५ । इति राजनिर्घण्टः ॥
स्य गुणाः । सद्यस्तृप्तिजनकत्वं । बलकारित्वं ।
हधारकत्वञ्च । इति राजवल्लभः ॥
तमुवाच भगवानात्रेयः । हिताहारोपयोग एक-
व पुरुषस्याभिवृद्धिकरो भवति । अहिताहारो-
योगः पुनर्व्याधिनिमित्तमिति" ।
तमुवाच भगवानात्रेयः । यदाहारजातमग्नि-

वेश ! समांश्चैव शरीरधातून् प्रकृतौ स्थापयति,
विषमांश्च समीकरोतीत्येतद्धितं विद्धि तद्धितं
विपरीतं त्वहितमित्येतद्धिताहितलक्षणमनपवादम्भवति
एवं वादिनञ्च भगवन्तमात्रेयमग्निवेश उवाच ।
भगवन्नन्येतदेवमुपदिष्टं भूयिष्ठकल्पाः सर्व्वभिषजो
विज्ञास्यन्ति । तमुवाच भगवानात्रेयः । येषां
विदितमाहारतत्त्वमग्निवेश ! गुणतो द्रव्यतः
कर्म्मतः सर्व्वावयवतो मात्रादयो भावास्तत्र तदेव-
मुपदिष्टं विज्ञातुमुत्सहेरन् यथा तु खल्वेतदुप-
दिष्टं भूयिष्ठकल्पाः सर्व्वभिषजो विज्ञास्यन्ति
तथैतदुपदेक्ष्यामः । मात्रादीन् भावानुदाहरन्त-
स्तेषां हि बहुविधविकल्पा भवन्ति । आहारविधि-
विशेषांस्तु खलु लक्षणतश्चावयवतश्चानुव्याख्या-
स्यामः । तद्यथा, आहारत्वमाहारस्यैकविधमर्था-
भेदात् । स पुनर्द्वियोनिः स्थावरजङ्गमात्मकत्वात् ।
द्विविधः प्रभावो हिताहितोदर्कविशेषात् । चतु-
र्विधोपयोगः पानाशनभक्ष्यलेह्योपयोगात् । षड़ा-
स्वादो रसभेदतः षड्विधत्वात्" । इति चरकः ॥
"यदाहारगुणैः पानं विपरीतं तदिष्यते ।
अन्नानुपानं धातूनां दृष्टं यन्न विरोधि च" ॥
इति च चरकः ॥
"प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च षट्सु
रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयाः" ॥
"स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसङ्घातः
सुखकरश्च भवति" ।
"आहारः प्रीणनः सद्यो बलकृद्देहधारकः ।
आयुस्तेजःसमुत्साहस्मृत्योजोऽग्निविवर्द्धनः" ।
इति सुश्रुतः ॥) स त्रिविधः । सात्त्विकः १ राज-
सिकः २ तामसिकः ३ । सात्त्विकाहारो यथा,—
८ श्लोकः ।
"आयुः-सत्त्व-बलारोग्य-सुख-प्रीति-विवर्द्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विक-
प्रियाः" । राजसिकाहारो यथा, ९ श्लोकः ।
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः" ॥
तामसिकाहारो यथा, १० श्लोकः ।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" ॥
इति श्रीभगवद्गीता १७ अध्यायः ॥ आहरणं ।
इति मेदिनी ॥
("स पुनर्देवयान्योक्तः पुष्पाहारो यदृच्छया" ।
इति महाभारतम् । आदिपर्व्वणि ७६ । सम्भव-
पर्व्वणि ७६।३५ ।)
आहारसम्भवः, पुं, (आहारात् सम्भवो यस्य ।)
शरीरस्थरसधातुः । इति हेमचन्द्रः ॥
आहार्य्यं, त्रि, (आङ् + हृ + ण्यत् ।) आगन्तुकं ।
इति त्रिकाण्डशेषः ॥
("आहार्य्यैर्नीयमानं हि चलं दुःखेन धार्य्यताम्"
इति कामन्दकः ।) आहरणीयं ॥ (यथा, मनुः
८।२०२ । "अथ मूल्यमनाहार्य्यं प्रकाशक्रयशो-
धितः" ।) (शस्त्रकर्म्मभेदः । यथा सुश्रुते "तच्च
शस्त्रकर्म्माष्टविधं, तद्यथा ;—छेद्यं भेद्यं, लेख्यं

वेध्यं एष्यम्, आहार्य्यं, विस्राव्यं, सीव्यमिति" ।
"आहार्य्याशर्करास्त्विमौ दन्तकर्णमलाश्मरी" ।)
आहार्य्यः पुं, नाट्योक्तो व्यञ्जकविशेषः । स तु भूषा-
दिना रचितः । इति हेमचन्द्रः ॥ (यथा सा-
हित्यदर्पणे । षष्ठाङ्के ।
"भवेदभिनयोऽवस्थानुकारः स चतुर्व्विधः ।
आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा" ॥)
आहार्य्यशोभा, स्त्री, (आहार्य्यात् या शोभा ।)
कृत्रिमशोभा । चित्रभूषादिना कृतद्युतिः । इति
जटाधरः ॥ (यथा, भट्टिकाव्ये २य सर्गे,—
"आहार्य्यशोभारहितैरमायैः
ऐक्षिष्ट पुंभिः प्रचितान् स गोष्ठान्" ।)
आहावः, पुं, (आङ् + ह्वे + अप् ॥ निपातनात् वृद्धिः ।)
कूपसमीपे पश्वादिजलपानार्थकृतस्वल्पजलाशयः ।
इत्यमरः ॥ चौवाचा इति भाषा । (आहूयतेऽरि-
रत्र इति व्युत्पत्त्या ।) युद्धं । आह्वानं । इति धरणिः ॥
(आहूयतेऽत्र इति आ + हु + अधिकरणे घञ् ।)
अग्निः ।)
आहिकः, पुं, (अहिरिव आकृतिर्यस्य । अहि +
ठक् ।) पाणिनिमुनिः । इति त्रिकाण्डशेषः ॥ केतु-
ग्रहः । इति हेमचन्द्रः ॥
आहितः, त्रि, (आङ् + धा + क्त ।) न्यस्तः ।
अर्पितः । स्थापितः । इति हलायुधः ॥
(यथा, किराते ।
"व्यावर्त्तनैरहिपतेरयमाहिताङ्कः" ।)
आहितलक्षणः, त्रि, (आहितं लक्षणं यस्य ।) आह-
तलक्षणः । इत्यमरटीकायां रमानाथः ॥ गुणादि-
द्वारा ख्यातः ।
आहिताग्निः, पुं, (आहितः स्थापितोऽग्निर्येन ।)
साग्निकः । अग्निहोत्री इति स्मृतिः ॥
("न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः" ।
इति मनुः ३।२८२ । तथा च रघौ २ ४४ ॥
"गुरोरपीदं धनमाहिताग्नेः" ।)
आहितुण्डिकः, पुं, (अहितुण्डेन दीव्यति । अहितुण्ड
+ ठक् ।) व्यालग्राही । सापुड़िया इति भाषा ।
इत्यमरः शब्दरत्नावली च ॥ (यथा पञ्चतन्त्रम् ।
"वैद्यसांवत्सराचार्य्याः स्वपक्षेऽधिकृताश्चराः ।
यथाहितुण्डिकोन्मत्ताः सर्व्वं जानन्ति चक्षुषु" ।)
आहुतं, स्त्री, (आङ् + हु + क्त ।) गृहस्थानां पञ्च-
महायज्ञान्तर्गतयज्ञविशेषः । स तु नृयज्ञः । इति
जटाधरः ॥
आहुतिः, स्त्री, (आ + हु + क्तिन् ।) देवोद्देशे मन्त्रो-
च्चारणपूर्व्वकोऽग्नौ हविर्निक्षेपः । तत्पर्य्यायः ।
देवयज्ञः २ होमः ३ हौत्रं ४ वषट्कारः ५ । इति
हेमचन्द्रः ॥ (यथा, रघौ १।५३ ।
"पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः" ;
धर्म्मात् मरुद्वत्यां जातः स्वनामख्यातो मरुद्देवः ।
यथा हरिवंशे,—
"मरुद्वती मरुत्वन्तो
नक्षत्रं चाहुतिं
आहुल्यं, स्त्री, (
तरवट इति
मः
र्य्यायः

हलदारयं २ नगरं ३ तरवटं ४ शिम्बीफलं ५ सुपुष्पं ६ पीतपुष्पं ७ काञ्चनपुष्पकं ८ कुमुमा-कुल्यकं ९ शरत्पुष्पं १० । तस्य गुणाः । तिक्तत्वं । शीतलत्वं । चक्षुर्हितत्वम् । पित्तदाहमुखरोग-कुष्ठकण्डूतिजन्तुशूलव्रणनाशित्वञ्च । इति राज-निर्घण्टः ॥

आह्नत, क्ली, (आ + ह्वे + क्त ।) प्रलयपर्य्यन्तं । यथा,—

"कदम्बानि पटोलानि वृन्ताकसहितानि च ।
न त्यजेत् कार्त्तिके मासि यावदाह्नतनारकी" ॥
"आह्नतानि आभूतानि प्रलयपर्य्यन्तानीति या-वत्" । इति तिथ्यादितत्त्वम् ॥

आह्नतः, त्रि. (आङ् + ह्वे + क्त ।) कृताह्वानः । यथा,—

"प्रगायतः स्ववीर्य्याणि तीर्थपादः प्रियश्रवाः ।
आहूत इव मे शीघ्रं दर्शनं याति चेतसि" ॥
इति श्रीभागवते १ स्कन्धे ६ । ३४ ॥

आह्नतिः, स्त्री, (आङ् + ह्वे + क्तिन् ।) आह्वानं । इति शब्दरत्नावली ॥

आहेयं, त्रि, (अहौ भवं । अहि + ढञ् ।) अहि-सम्बन्धि । तद्विषचर्म्मादि । इत्यमरः ॥

आहो, अ, (आ हन्तीति । आङ + हन् + डो ।) विकल्पः । इत्यमरः ॥ प्रश्नः । (यथा शाकुन्तले पञ्चमाङ्के ।

"दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांशुलः" ।)
विचारः । इति मेदिनीकरहेमचन्द्रौ ॥
("आहो निवत्स्यति समं हरिणाङ्गनाभिः" ।
इति शाकुन्तले प्रथमाङ्के ।)

आहोपुरुषिका, स्त्री, (अहो अहमेव पुरुषः । मयूर-व्यंसकादित्वात् समासः । अहोपुरुषस्य भावः । अहोपुरुष + वुञ् + स्त्रीत्वात् टाप् ।) दर्पात् दाम्भिकानि वस्त्रावना सा । इत्यमरः ॥ अधिकार्य-वचनेन शक्तेरप्रतिघाताविष्करणं । आत्मविषय-कार्य्यविहितमत्प्रज्ञाविष्करणं । इति भरतः ॥ (यथा, भट्टौ ५।२७ ।

"आहोपुरुषिका पश्य मम सद्गत्रकान्तिभिः" ।)

आहोस्वित्, अ, (आहो च स्वित् ।) आहो । वि-कल्प । इत्यमरटीका ॥

आह्नः, पुं, (अह्नां समूहः ।) दिनसमूहः । इति व्याकरणम् ॥

आह्निकं, त्रि, (अह्ना निर्वृत्तं । अहन् + ठञ् ।) दिननिर्वृत्तं । दिनसाध्यं । इति मेदिनी ॥ दिन-सम्बन्धी ॥

आह्निकं, क्ली, (अह्ना निर्वृत्तं । अहन् + ठञ् ।) भोजनं । [illegible]समूहः । [illegible]भागः । नित्यक्रिया । इति मेदिनीकरहेमचन्द्रौ ॥

अथ [illegible] आह्निकाचारतत्त्वोक्त-कर्म्माणि संक्षेपेण लिख्यन्ते ॥

तत्र प्रथमयामार्द्धकृत्यम् ।

"ब्राह्मे मुहूर्त्ते [illegible] [illegible] कृत्वा [illegible] [illegible] हरिस्मरणं [illegible] चिन्तयेत् ॥

तत [illegible] [illegible] नमस्कृत्य दक्षिणचरणं भूमौ विन्यस्य कर्कोट-कनागदमयन्तीनलऋतुपर्णराजकार्त्तवीर्य्यार्जुनान् स्मृत्वा नेत्रमुखे प्रक्षाल्य द्विराचामेत् ॥

ततः नैर्ऋत्यां दक्षिणस्यां वा दिशि मूत्रपुरीषोत्-सर्गं जलमृत्तिकाशौचञ्च कृत्वा द्विराचम्य हरिं स्मृत्वा दिवा सूर्य्यं रात्रौ चन्द्रं तारां वा तदसम्भवे अग्निं पश्येत् ॥

ततो दन्तधावनं । दन्तकाष्ठाभावे निषिद्धदिने च द्वादशगण्डूषजलैः मन्त्रैर्वा मुखं शोधयित्वा द्विराचामेत् ।

ततः प्रातःस्नानं तिलकं सन्ध्यातर्पणञ्च कृत्वा सूर्य्योदयपर्य्यन्तं गायत्रीं जपेत् ॥ स्नानाशक्तौ आर्द्रवस्त्रेण गात्रमार्ज्जनं मन्त्रस्नानञ्च कृत्वा सन्ध्योपासनं कुर्य्यात् ॥

तत आदर्शादिदर्शनं दधिदूर्व्वादिमङ्गलद्रव्यस्पर्श-नञ्च कुर्य्यात् इति ॥ * ॥

अथ द्वितीययामार्द्धकृत्यम् ।

वेदविद्याद्यभ्यासः । समित्पुष्पाद्याहरणञ्च ॥ * ॥

अथ तृतीययामार्द्धकृत्यम् ।

गुरुदेवधार्म्मिकोपासनं । कुटुम्बभरणार्थमीश्वरो-पासनादि च ॥ *

अथ चतुर्थयामार्द्धकृत्यम् ।

मध्याह्नस्नानं । तत्र परखातोदके चेत् तदा सप्त पञ्च त्रीन् वा मृत्पिण्डान् तीरे क्षिप्त्वा नाभि-मात्रोदके कुशहस्तः सशिरस्कमज्जनं कृत्वा द्विरा-चम्य सङ्कल्प्य यथाविधि त्रिर्निमज्जेत् ॥

ततः स्नानवस्त्रपाणिव्यतिरेकेण गात्रमार्ज्जनं तिलकं तर्पणञ्च कुर्य्यात् ॥

ततः अष्टममुहूर्त्ते मध्याह्नसन्ध्यां समाप्य ब्रह्मयज्ञं विधाय देवपूजनं कृत्वा पादोदकं नैवेद्यञ्च यथा-काले उपयुञ्जीत ॥ * ॥

अथ पञ्चमयामार्द्धकृत्यम् ।

बलिवैश्वदेवकर्म्मणी काम्यबलिकर्म्म वामदेव्यगानं गानाशक्तौ तस्य त्रिः पाठः पार्व्वणश्राद्धानन्तरं बलिवैश्वदेवकर्म्मणी कर्त्तव्ये ॥

बलिकर्म्मानन्तरमतिथिलाभार्थं मुहूर्त्तं गोदोहन-कालं वा अभोजनेन प्रतीक्षेत । तल्लाभे भिक्षा-दिकं दत्त्वा तदनुव्रजेत् । तदानीमतिथ्यलाभे नि-त्यश्राद्धान्तरमतिथीन् भोजयेत् । भोजनासामर्थ्ये भिक्षां दद्यात् । अतिथ्यलाभे ब्राह्मणाय दानं तदसम्भवे अग्नौ जले वा किञ्चिदन्नं क्षिपेत् ॥

ततो नित्यश्राद्धं । वामदेव्यगानं तदशक्तौ ऋक्-त्रयं पठेत् । नित्यश्राद्धकरणासामर्थ्ये बलितर्प-णाभ्यां पितृयज्ञसिद्धिः ॥ ततो गोग्रासदानं गो-नमस्कारञ्च कुर्य्यात् ॥ ततो यथाविधि भोजनं । विष्णुपादोदकादिकं पूर्व्वमस्पृशीतस्येत् इदानीं भक्षयेत् ॥ ततः स्नानान्तरं न स्नाया अङ्घ्रिघर्षणे-र्मुखहस्तौ शोधयित्वा द्व्यादिना दन्तान्तरसद्रव्य-मपनीय जलगण्डूषैर्मुखाभ्यन्तरं संशोध्य पाणिपादौ प्रक्षालयेत् ॥

तत आसनस्थ एव भूमौ पादौ संस्थाप्य द्विरा-चम्य मुखं तुलसीपत्रादिना संशोध्य दक्षिणपादा-ङ्गुष्ठे दक्षिणहस्तेन मन्त्रेण जलं दद्यात् [illegible] ततो [illegible] [illegible] दक्षाभ्यां सिञ्चेत् ॥

ततः स्वस्य [illegible] [illegible] [illegible] पादप्रक्षालनानन्तरं [illegible] कालं शयित्वा [illegible] इति ॥ * ॥

अथ षष्ठसप्तमयामार्द्धकृत्यम् ।

इतिहासपुराणादिश्रवणम् ॥

अथाष्टमयामार्द्धकृत्यम् ।

लौकिकचिन्ताकरणम् ।

इष्टदेवतास्मरणादिकञ्च कुर्य्यात् ।

अथ रात्रिकृत्यम् ।

[illegible] नारायणस्मरणानि कुर्य्यात् । ततोऽन्नादिपाके जाते [illegible] कृत्वा अतिथिभोजनादिकं [illegible] भरणीयैः सह [illegible] [illegible]ञ्जीत । अन्नभोजनाभावे [illegible] प्रथमयामाभ्यन्तरे विद्याभ्यासं [illegible] शयनं । शुचिदेशे खट्वोपरि [illegible] देशे पूर्णकुम्भं [illegible] [illegible]लितपाणिपादो द्विराचान्तः [illegible] [illegible]शिरा वा पद्मनाभं स्मृत्वा शयीत ॥ * ॥

अथ दारोपगमनम् ।

ऋतौ निषिद्धेतरदिने दक्षिणपार्श्वेन स्वापयेत् ॥ ततः अविलम्बेन मूत्रपुरीषोत्सर्गं [illegible] लिङ्गं हस्तौ [illegible] ऋतुभिन्नगमने तु [illegible] कुर्य्यात् । स्त्रियास्तु ऋतावृतावपि [illegible] गमनानन्तरमाचमनमात्रं न स्नानं । पूर्व्वं मूत्रपुरीषोत्सर्गं न कुर्य्यात् । तस्यां रात्रौ एकशय्यायां न [illegible] यदि गर्भवत्त्वेऽपि कामुकीमुपेयात् । ऋतावभिगम्य प्रातः [illegible] [illegible]र्य्यात् ॥

ऋतुगमनं पुत्रोत्पत्तिमयं [illegible] आह्निकाचारतत्त्वोक्तकर्म्म समाप्तं ॥ * ॥

आह्लादः, पुं, (आङ् + ह्लद् + घञ् ।) [illegible] हर्षः । यथा । श्रीभागवते १० । ५ । [illegible]

"नन्दस्त्वात्मज उत्पन्ने जाताह्लादो [illegible]
आहूय विप्रान् वेदज्ञान् स्नातः [illegible]"

आह्लादितः, त्रि, आनन्दितः । [illegible] इतोऽस्य जाते इत्यनेन आह्लाद[illegible] येन निष्पन्नः ॥

आह्वयः, पुं, (आङ् + ह्वे + अप् । [illegible] प्राप्यते इति । आङ + ह्वा + घञर्थे [illegible] इत्यमरः ॥ (यथा, रामायणे, [illegible]

…यु तन्मनसोपाक्षः सार्द्धं गामायमाह्वयम्”।)
…आह्वय (व्यवहारपदान्तर्गतो व्यवहारविशेषः।
… मनुः अष्टमे। ९।४।८।७। “तेषामाद्यमृणा-
…दानमुपक्रम्य। “स्त्रीपुंधर्मो विभागश्च द्यूत-
…ह्वय एव च”।)
…वी, (आह्वानमिति। आङ्+ह्वे+घञ्।)
…। संज्ञा। इत्यमरः॥
…, स्त्री, (आङ्+ह्वे+भावे ल्युट्।) आवा-
…। डाका इति भाषा। तत्पर्य्यायः। हूतिः २
…नं ३। इत्यमरः॥ (यथा मनुः ८।१५६।
…श्रेष्ठेन चाह्वानं नक्षत्राण्यामपि स्मृतम्”।)
…ह्वयतेऽनेन। करणे ल्युट्।) नाम। इति शब्द-
…ली॥

इ

…रः। तृतीयस्वरवर्णः। अस्योच्चारणस्थानं
…। स च ह्रस्वो दीर्घः प्लुतश्च भवति।
…श्च उदात्तानुदात्तस्वरित-भेदात् त्रिविधः।
…नासिकानुनासिकभेदाच्च प्रत्येकं द्विविधः
… षड्विध एव।)
…रं परमानन्दसुगन्धकुसुमच्छविम्।
ब्रह्ममयं वर्णं सदा स्मयुतं प्रिये॥
शक्तिमयं देवि गुरुब्रह्ममयं तथा।
शिवमयं वर्णं परं ब्रह्मसमन्वितम्॥
अध्यात्ममयं वर्णं गुणत्रयसमन्वितम्।
रं परमेशानि स्वयं कुण्डली मूर्त्तिमान्”॥
 कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां।)
 लेखनप्रकारो यथा,
…र्द्धाधः कुञ्चिता मध्ये रेखा तत्कृता भवेत्।
…र्व्वाणी तथेन्द्राणी क्रमात्तास्वेव संवसेत्॥
…धःकुञ्चिता रेखा दक्षोर्द्धा कामरूपिणी।
…शक्तिः कोणयुता ध्यानमस्य प्रचक्षते”॥
… वर्णोद्धारतन्त्रम्॥ *॥ (यद्यपि सिद्धान्त-
…मुद्यां “इचुयशानाम् तालु” इति सामान्यतः
…। तथापि शब्देन्दुशेखरादिष्वस्य विवृततो
…तिकक्षा। यथा,—“तुल्यास्य प्रयत्नमिति
…क प्रशब्देन विलक्षणयत्नबोधेऽपि लोके
…प्रयत्नयोः पर्य्यायतेति ध्वनयन्नाह प्रयत्नो
… द्विधा इति क्वचित् यत्नो द्विधेत्येव पाठः।
…यां आभ्यन्तरत्वं वर्णोत्पत्तेः प्राग्भावित्वात्।
…हि नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो
…म वायुः ऊर्द्ध्वमाक्रमन् उरःप्रभृतीनि स्था-
…न्याहन्ति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वा-
…त्तिर्नोत्पत्तिः। प्राक्जिह्वायोपायमध्यमूलानि
…त्पत्तिस्थानं ताल्वादि यदा सम्यक् स्पृशन्ति
…ा स्पृष्टता ईषत्स्पर्शे ईषत्स्पृष्टता समी-
…वस्थाने संवृतता दूरावस्थाने विवृतता अतएव
…यशानां तालव्यत्वाविशेषेऽपि चवर्गे उच्चा-
…रणे जिह्वायादीनां तालुस्थानेन सम्यक् स्पर्शः
…कारे ईषत् स्पर्शः शकारेकारयोः समीपदू-
…वस्थानं। स्पृष्टं प्रयतनमिति यतेर्नपुंसके भावे
…ट्। प्रयत्नमित्यपपाठः नङन्तस्य पुंस्त्वात्।

“ईषेषाः स्पृष्टा छलप्रोक्ताः” इत्यादि। यथा,
शिक्षायां शब्देन्दुसारः। तथापि “अचोऽस्पृष्टाः
यणस्त्वीषत् नेमस्पृष्टाः शलः स्मृताः। “शेषाः
स्पृष्टाः छलप्रोक्ताः” इत्यादि। अत्र अचः
अस्पृष्टाः स्पर्शाभावरूपविवृतत्ववन्तः यणस्त्वीषत्
अस्पृष्टा इत्यनुषज्यते तेन ईषदस्पृष्टा ईषद्विवृता
इत्यर्थः। नेम इत्यर्द्धे तेन शलः ईषत् विवृताः
यणमपेक्ष्याधिकविवृतत्ववन्त इत्यर्थः। अपि च—
“अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। हो-
तारं रत्नधातमम्”। ईळे इत्येतत् समस्तमपि-
पदमनुदात्तम् “तिङ्ङतिङः” इति सूत्रेण अति-
ङन्तादग्निशब्दात् परस्य ईळे इति तिङन्तस्य
निघातविधानात् अग्निमीळे इति पदयोः सं-
हिताकाले तु धातुगतस्य ईकारस्य स्वरितत्वम्
“उदात्तानुदात्तस्वरितः” इति सूत्रेण उदात्तात्
परस्यानुदात्तस्य स्थाने स्वरितः स्यात् इत्यर्थकेनानु-
दात्तस्य ईकारस्य स्थाने स्वरितादेशात् ततःपरस्य
ळे इत्यत्र एकारस्य तिङ्प्रत्ययरूपस्य स्वरितात्
संहितायाम् पूर्व्वस्यैकारस्य नितरां उदात्तत्वम्।
अपरञ्च ताल्वादिस्थानमाभ्यन्तरप्रयत्नइति सूच्य-
ते। अत्र मूलम् पाणिनीयशिक्षायाम्। यथा,—
“कण्ठ्यावहा विचुयशास्तालव्या ओष्ठजावुपू”।
“स्वराणामूष्मणाञ्चैव विवृतं करणं मतम्”।)
तस्य नामानि यथा,—
“इः सूक्ष्मा शाल्मली विद्या चन्द्रः पूषा सुगुह्यकः।
सुमित्रः सुन्दरो वीरः कोटरः काटरः पयः॥
भ्रूमध्यो माधवस्तुष्टिर्दक्षनेत्रञ्च नासिका।
शान्तः कान्तः कामिनी च कामो विघ्नविनायकः॥
नेपालो भरणी रुद्रो नित्या क्लिन्ना च पावका”।
इति वर्णाभिधानतन्त्रम्॥ (मातृकान्यासेऽस्य
दक्षिणचक्षुषि स्थानम्। यथा, मातृकान्यास-
धृतमन्त्रः “इं नमो दक्षिणचक्षुषि ईं नमो
वामचक्षुषि”। इति।)

इ, } गतौ। (भ्वादिं-इलपक्षे अदां-परं-सकं-अनिट्।)
इल, } अयति। न एति। पृथक्पाठसामर्थ्यात् पूर्व्वो
न ञित्। शेषस्तु इण गताविति प्रसिद्धः। यिनो-
ऽध्यगावित्यादिषु ग्रहणमस्यैव। इति दुर्गादासः॥
(उत्।) उदये। समुन्नतौ। यथा,—
“उदयति यदि भानुः पश्चिमे दिग्विभागे” इति।
(अभि+उत्।) अभ्युदये। समुन्नतौ। सर्व्वे गत्यर्था
ज्ञानार्थाः प्राप्त्यर्थाश्च इत्यनेन प्राप्त्यर्थेऽप्यस्य बहुलः
प्रयोगः। यथा,—मनुः।
“ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्”।
“अयमेति मन्दं मन्दं कावेरीवारिपावनः पवनः”।
इति साहित्यदर्पणम्। (अति) अतिक्रमे। परा-
भवे। यथा, हितोपदेशे। १।
“अतीत्य हि गुणान् सर्व्वान् स्वभावो मूर्द्ध्नि वर्त्तते”।
“ततः परं ब्रह्मस्थानं कोशत्रयमतीत्य वै”।
इति रामायणे। (अनु) अनुकरणम्।
“धातुरादेशमन्वेति तद्यथा हि तदर्पणः।
नात्माधीनो मनुष्योऽयं कालं भजति कश्चन”॥
इति महाभारते। (अप) अपगमने। पलायने।
—“प्रत्यादेशव्यलीकमपैतु ते”। इति शाकुन्तले।
(सम्+आ) सम्मिलने। “देवाश्चैतान् समेत्यो-
चुर्न्याय्यं वः शिशुरुक्तवान्”। इति मनुः। २।
१५२। इत्यादयो ज्ञेयाः।)

इ, ञ, स्मृत्यां। (अदां- परं-सकं-अनिट्।) अधि-
पूर्व्वोऽयं। अधिग्रहणं अन्यपूर्व्वस्य केवलस्य च
प्रयोगनिरासार्थं। एवं सर्व्वत्र। ञ अध्येति तव
लक्ष्मणः। इक स्मरणे इति प्रसिद्धोऽयं। इन्व-
दिक इत्यत्रास्यैव ग्रहणम्। इति दुर्गादासः॥

इ ङ ल अध्ययने। (अदां०-आं०-सकं०-अनिट्।)
अधिपूर्व्वोऽयं। अध्ययनमर्थतः शब्दतश्च गुरुतो
ग्रहणं। ङ ल वेदमधीते विप्रः। इति दुर्गादासः॥
(“यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः”
इति मनुः।२।१०७।)

इ, व्य, भेदः। क्रोधोक्तिः। अपाकरणं। अनुकम्पा।
इति मेदिनी॥ खेदः। इति हेमचन्द्रः॥

इंरेजः, पुं, लण्डदेशजातम्लेच्छजातिविशेषः। यथा,—
“अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च लण्डजाश्चापि भाविनः”॥
इति मेरुतन्त्रे २३ प्रकाशः॥

इः, [स्] व्य, कोपः। सन्तापः। दुःखभावना। इति
शब्दरत्नावली॥

इः, पुं, (अस्य विष्णोः श्रीहरस्यापत्यम् पुमान्।
अ+इञ्।) कामदेवः। इति पुरुषोत्तमहला-
युधौ॥ यथा, आग्नेये एकाक्षराभिधानम्।
“इः कामे रतिलक्ष्मीगौरी उः शिवे ब्रह्मकाद्य ऊः”॥

इक्कटः, पुं, तृणविशेषः। तत्पर्य्यायः। वङ्कमूलः २।
इति त्रिकाण्डशेषः। कोशाङ्गः ३ इत्कटः ४। इति
हारावली॥ (इत्कटशब्देऽस्य विशेषो द्रष्टव्यः।)

इक्षुः, पुं, (इष्यतेऽभिलष्यतेऽसौ इति। इष्+क्सु।)
स्वनामख्याततृणं। आक् इति भाषा। तत्पर्य्यायः।
रसालः २। इत्यमरः॥ कर्कोटकः ३ वंशः ४
कान्तारः ५ सुकुमारकः ६ अधिपत्रः ७ मधुतृणः ८
वृष्यः ९ गुड़तृणः १०। इति राजनिर्घण्टः॥
मृत्युपुष्पः ११ महारसः १२ असिपत्रः १३ को-
शकारः १४ इक्षवः १५। इति शब्दरत्नावली॥
पयोधरः १६। इति जटाधरः॥ *॥ तस्य भेदाः।
वंशकः १ कान्तारः २ भीरुः ३ पौण्ड्रः ४। इति
रत्नमाला॥ सामान्येक्षुगुणाः। रक्तपित्तनाशित्वं।
बलवृष्यकफकारित्वं। पाके मधुरत्वं। स्निग्धत्वं।
गुरुत्वं। शीतलत्वं। मूत्रशुद्धिकारित्वञ्च। तस्य
मूले अतिमधुरत्वं। मध्ये मधुरत्वं। ग्रन्थिलाग्र-
प्रभागेषु लवणरसत्वञ्च। इति राजवल्लभः॥
मूलादूर्द्ध्वं मधुरत्वं। मध्ये अतिमधुरत्वं। अग्र
क्रमाल्लवणत्वं नीरसत्वञ्च॥ अभुक्ते इक्षुभक्षणगुणाः।
पित्तदाहत्वं। भुक्ते वातप्रकोपकत्वं। भुक्तिमध्ये
गुरुतरत्वञ्च॥ इति राजनिर्घण्टः॥ दन्तनिष्पी-
ड़ितेक्षुरसगुणाः। हिमत्वं। शुक्रकारित्वं। तृप्ति-
जनकत्वम्। जीवनहितकारित्वम्। वायुरक्तपित्त
नाशित्वं। स्वादुत्वं। स्निग्धत्वं। प्रीतिदातृत्वं। रक्त-
वर्द्धकत्वं। मुखप्रसादकारित्वं।
इति राजवल्लभः॥ अपि च।

कारित्वं। अल्पश्लेष्मदायित्वं। हृद्यत्वं। रुचिजनकत्वं। मूत्रशुद्धिकारित्वं। देहस्य कान्तिदायित्वं। बल-कारित्वं। पीयूषोपमत्वं। त्रिदोषशमनत्वञ्च। इति राजनिर्घण्टः॥ यन्त्रनिष्पीडितरसगुणाः। रक्तशुक्रकारित्वं। शीतलत्वं। सारकत्वं। रुचि-करत्वं। दाहजनकत्वञ्च। इति राजवल्लभः॥ अ-पि च। दन्तनिष्पीडितरसगुणवद्गुणत्वं। किञ्चित् पित्तवायुनाशित्वं। अकोमलत्वं। अस्वादुत्वं। श्लेष्मविष्टम्भदाहकारित्वञ्च। पर्य्युषितरसगुणाः। वान्तिहरत्वं। वातजनकत्वं। आशुप्रतिश्यायरोग-दायित्वं। कफवायुकारित्वञ्च। इति राजनिर्घण्टः॥ तप्तरसगुणाः। गुरुत्वं। सुतीक्ष्णत्वं। कफवात-नाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वं। अति-शयगुरुत्वं। अतिपाके विदाहित्वं। पित्तास्रदोष-कारित्वञ्च। इति राजनिर्घण्टः॥

अस्य विकाराः।

"लसीकापाचितगुडखण्डमत्स्यण्डिकासिताः।
निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम्"॥
इति राजवल्लभः। अथेक्षुवर्गः। तत्रेक्षोर्नामानि गुणाश्च।
"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः॥
इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः"॥*॥
अथेक्षुभेदाः।
"पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोषकृत्।
इत्येता जातयस्तेषां कथयामि गुणानपि"॥*॥
अथ पौण्ड्रकभीरुकयोर्गुणाः।
"वातपित्तप्रशमनो मधुरो रसपाकयोः।
सुशीतो वृंहणो बल्यः पौण्ड्रको भीरुकस्तथा"॥*॥
अथ कोषकारगुणाः।
"कोषकारो गुरुः शीतो रक्तपित्तक्षयापहः"॥*॥
अथ कान्तारेक्षुगुणाः।
"कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलो वृंहणः सरः"॥*॥
अथ दीर्घपोरवंशकयोर्गुणाः।
"दीर्घपोरः सुकठिनः सक्षारो वंशकः स्मृतः"॥*॥
अथ शतपोरकगुणाः।
"शतपर्व्वा भवेत् किञ्चित् कोषकारगुणान्वितः।
विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः"॥*॥
अथ तापसेक्षुगुणाः।
"तापसेक्षुर्भवेन्मृदुर्मधुरः श्लेष्मकोपनः।
तर्पणो रुचिकृद्वृष्यो बलकारी च"॥*॥
अथ काष्ठेक्षुसूचिपत्रगुणाः।
"काष्ठेक्षुः सर्व्वं कुर्य्यात् सूचीपत्रोऽपि तद्वत् तु।
गुणः स्यात् नीलपोरस्य नैपालस्य च तद्वत्॥
दीर्घपत्रोऽपि तद्वत् वातकोपकृत्"॥*॥
अथ मूलादिभेदेन भेदः।

"मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः।
अग्रे ग्रन्थिषु च ज्ञेयं इक्षुः पटुरसो जनैः"॥*॥
अथ दन्तपीडितेक्षुरसगुणाः।
"दन्तनिष्पीडितस्येक्षोः रसः पित्तास्रनाशनः।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः"॥*॥
अथ यन्त्रपीडितस्येक्षुरसस्य गुणाः।
"मूलाग्रजन्तुजग्ध्यादिपीडनान्मलसङ्करात्।
किञ्चित् कालं विधृत्या च विकृतिं याति यान्त्रिकः॥
तस्माद्विदाही विष्टम्भी गुरुः स्याद्यान्त्रिको रसः"॥
अथ पर्य्युषितस्येक्षुरसस्य गुणाः।
"रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः।
कफपित्तकरः शोषी भेदनश्चातिमूत्रलः"॥*॥
अथ पक्वस्येक्षुरसस्य गुणाः।
"पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत्।
गुल्मानाहप्रशमनः किञ्चित्पित्तहरः स्मृतः"॥*॥
अथेक्षुरसस्य विकाराणां गुणाः।
"इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः॥
वृष्या मोहहराः शीता वृंहणा विषहारिणः"॥
इति भावप्रकाशः॥
(अथ श्वेतेक्षुगुणाः।
"रसायनोत्तमो बल्यो रोगवारणमुत्तमः।
स्निग्धश्च तर्पणो वृष्यो वृंहणश्च सजीवनः॥
स्वादुगुणाभिवृद्धत्वाद्वातपित्तप्रशान्तिदः।
वृष्योऽप्यन्तविदाही स्याव् सितेक्षुः कफकृन्मतः"॥
अथ कृष्णेक्षुगुणाः।
"तद्वत् सुकृष्णो भवनं गुणानां
वृष्यो भवेत्तर्पणवृंहणश्च।
सञ्जीवनं स्यान्मधुरो रसेन
शोषापहन्ता श्रमशोककारी"॥*॥
अथ यन्त्रोद्भवरसगुणाः।
"यन्त्रेण पीडितरसः कथितो गुरुश्च
वृष्यः कफञ्च कुरुतेऽथ सुशीतलश्च।
पाके विदाहिबलदश्च सुशोभनश्च
संसेवितो रुधिरपित्तवशं निहन्ति"॥*॥
अथ दन्तपीडितरसगुणाः।
"दन्तेन पीडितरसो रुचिकृद्गुरुश्च
सन्तर्पणो बलकरः कफकृत्श्रमघ्नः।
विष्टम्भकोऽपि रुधिरञ्च तथैव पित्तं
शोषं निहन्ति मधुरः स हिमो सरश्च"॥*॥
अथ पक्वरसगुणाः॥*॥
"पक्वो गुरुतरः स्निग्धः सुतीक्ष्णः कफवातहा।
पित्तघ्नोऽपि विशेषेण गुल्मातिसारकासनुत्"॥*॥
इति हारीतः। तथा च वाभटः शार्ङ्गधरश्च।
"इक्षोः रसो गुरुः स्निग्धो वृंहणः कफमूत्रकृत्।
वृष्यः शीतोऽस्रपित्तघ्नः स्वादुपाकरसः सरः।
सोऽग्रे सलवणो दन्तपीडितः शर्करासमः॥
मूलाग्रजन्तुजग्धादिपीडनान्मलसङ्करात्।
किञ्चित्कालं विधृत्या च विकृतिं याति यान्त्रिकः॥
विदाही गुरुविष्टम्भी तेनासौ तत्र पौण्ड्रकः।
शैत्यप्रसादमाधुर्य्यैर्वरस्तमनुवांशिकः॥
शातपर्व्वककान्तारनैपालाद्यास्ततः क्रमात्।

सक्षाराः सकषायाश्च
"वृष्यः शीतः
श्लेष्मलो
शैत्यात्
इति चरकः॥ तथा च सुश्रुते।
"इक्षवो मधुरा विपाके गुरवः
बल्या वृष्या मूत्रला
कराश्चेति ते चानेकविधाः। तद्यथा,
"पौण्ड्रको भीरुकश्चैव वंशक
कान्तारस्तापसेक्षुश्च
नैपालो दीर्घपत्रश्च नीलपोरोऽथ
इत्येता जातयः
सुशीतो मधुरः
अविदाही गुरुर्वृष्यः
आभ्यां तुल्यगुणः
वंशवच्छतपोरस्तु किञ्चिदुष्णः
कान्तारतापसाविक्षू
एवंगुणस्तु काष्ठेक्षुः स तु वातप्रको
सूचीपत्रो नीलपोरो नैपालो
वातलाः कफपित्तघ्नाः
कोषकारो गुरुः
अतीवमधुरो मूले मध्ये मधुर एव तु।
अग्रेष्वक्षिषु विज्ञेय इक्षूणां सार
अविदाही कफकरो वातविण्मूत्र
वक्त्रप्रह्लादनो
गुरुर्विदाही
पक्वो गुरुः सरः स्निग्धः
कोकिलाक्षच्छदः। इति राजनिर्घण्टः।

इक्षुकाण्डः, पुं, (इक्षुवत्तस्य काण्ड
मुञ्जकः। शरमुञ्ज इति ख्यात
चन्द्रिका॥ (यथा, रामायणे २।११।
"अपराधोदकं शीतमिक्षुकाण्डे
काशतृणम्। इति राजनिर्घण्टः।

इक्षुगन्धः, पुं, (इक्षुवत्तस्य
काशतृणम्। इति भावप्रकाश।
इक्षुः। इति राजनिर्घण्टः।

इक्षुगन्धा, स्त्री, (इक्षुगन्ध+टाप्॥
गोक्षुरी इति भाषा।
कोकिलाक्षच्छदः। क्षुपिका
काशतृणम्। इत्यमरो मेदिनी च॥
इति भाषा।

इक्षुगन्धिका, स्त्री, (इक्षुगन्ध+कन्+टा
कुष्माण्डः। इति शब्दरत्नावली। (
शब्देऽस्या गुणादयो ज्ञेयाः॥)

इक्षुतुल्या, स्त्री, (इक्षोस्तुल्या॥) इत्यमरः।
माखु इति ख्याता। तत्पर्य्यायः।
अनिक्षुः २ इक्षुवालिका ३। इति।

इक्षुदर्भा, स्त्री, (इक्षुवत्तस्य दर्भा
यस्याः॥) तृणविशेषः। तत्पर्य्यायः।
मधुतृणः २ तृणपत्रिका ३। अस्या गु
णाः। स्निग्धत्वं। इंगल्यादायित्वं।
रुचिजनकत्वं। मधुरत्वं। इत्यादि।

राजनिर्घण्टः ॥
, स्त्री, (इक्षोर्नेत्रं ।) इक्षुमूलं । इति राज-
ण्टः ॥
, पुं, (इक्षोः पत्रमिव तीक्ष्णं पत्रं यस्य ।)
नालनामधान्यविशेषः । इति राजनिर्घण्टः ॥
ार इति भाषा ।
पुं, (इक्षुरिव पूर्य्यते । इक्षु+पृ+क ।)
ट्यं । इति राजनिर्घण्टः ॥ (शरदण्डशब्दे-
गुणादयो ज्ञातव्याः ।)
लिका, स्त्री, (इक्षोर्मालिकेव तदाकृतित्वात् ।)
तुल्या । इति रत्नमाला ॥ घागाल इति
रा । काशः । इति राजनिर्घण्टः ॥ काशिया
भाषा ।
, स्त्री, (इक्षोः मूलमिव मूलं यस्य ।) वृक्षवि-
। तत्पर्य्यायः । इक्षुनेत्रं २ मोरटकं ३ वंश-
४ वंशमूलं ५ मोरटं ६ वंशपूरकं ७ । इति
निर्घण्टः ॥ ("अतीव मधुरो मूलः" इति सुश्रुतः ।)
ः, पुं, (इक्षोर्योनिरुत्पत्तिकारणं ।) पुण्ड्रक-
। इति राजनिर्घण्टः ॥ (तत्र पौण्ड्रकः । "पौण्ड्र-
दमाधुर्य्यैर्वरः, इति वाभटः । पौण्ड्रकशब्दे
य विशेषो ज्ञेयः ॥)
पुं, (इक्षुमिक्षुवत् गन्धं राति ददातीति ।
+रा+क ।) कोकिलाक्षवृक्षः । इति रत्न-
॥ कुलिया खारा इति भाषा । इक्षुः ।
क्षुरकवृक्षः । इति शब्दरत्नावली ॥ काशः ।
राजनिर्घण्टः ॥
, पुं, (इक्षुर+स्वार्थे+क ।) कोकिलाक्ष-
। स्थूलशरः । काशट्टणं । इति राजनिर्घण्टः ।
यक्षुरकयोः पञ्चमूलं सशर्करम् ।
ण्डेन नरः पीत्वा पयसा न क्षयं व्रजेत्" ॥
सुश्रुतः ॥)
, पुं, (इक्षोरिव रसो यस्य ।) काशट्टणं ।
भावप्रकाशः ॥ (इक्षुदण्डस्य रसः । अस्य गुणाः
य यथा ; दन्तपीडितेक्षुरसगुणाः । जीवन-
कारित्वं, हिमत्वं, शुक्रकारित्वं, श्लेष्मकत्वं,
रक्तपित्तनाशित्वं, स्वादुत्वं, रक्तवर्द्धकत्वं धातु-
त्वञ्च यथा भावप्रकाशः ।
निष्पीडितस्येक्षो रसः पित्तास्रनाशनः ।
रकसमवीर्य्यः स्यादविदाही कफप्रदः" ॥
निष्पीडितरसगुणाः, मलस्तम्भकारित्वम्, शी-
त्वं, सारकत्वं, दाहजनकत्वं, किञ्चित् पित्त-
कारित्वं, शीघ्रविष्टम्भदाहकारित्वञ्च यथा,
प्रकाशे,—
[illegible]यन्त्रादिपीडनात् मलसंकरात् ।
[illegible] विरसत्वाय विकृतिं याति दाहिकः ॥
[illegible] विदाही विष्टम्भी गुरुः स्यात् दाहिको
। पर्युषितेक्षुरसगुणाः । वातिदयत्वं, वातज-
[illegible], [illegible], कफवातकारि-
। यथा भावप्रकाशे ।
रसः पर्युषितो नेष्टो रम्यो वातापहो गुरुः ।
[illegible] शोषी मेदस्त्वाभिमूत्रणः" ॥ ५ ॥
[illegible]गुणाः । गुरुत्वं । हृदीन्ततं । स्य-

वातनाशित्वं । स्निग्धत्वं । अतिपाके विदाहत्वं ।
पित्तास्रदोषशोषकारित्वञ्च । यथा भावप्रकाशे ।
"पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित् पित्तहरः स्मृतः" ॥
इक्षुरसविकारगुणाः । यथा भावप्रकाशे ।
"इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः ।
गुरवो मधुरा बल्याः स्निग्धाः वातहराः सराः ।
वृष्या मोहहराः शीता वृंहणा विषहारिणः" ॥)
इक्षुरसक्काथः, पुं, (इक्षुरसस्य क्काथः ।) गुडः । इति
हेमचन्द्रः ॥ (गुडशब्देऽस्य गुणादयो व्याख्येयाः ।)
इक्षुरसोदः, पुं, (इक्षुरसवत् उदकं यस्य उदकस्य
उदभावः ।) इक्षुसमुद्रः । इति जटाधरः ॥
इक्षुवल्लरी, स्त्री, (इक्षुरिव सुस्वादा वल्लरी ।) क्षीर-
विदारी । क्षीरकन्दः । इति राजनिर्घण्टः ॥
इक्षुवल्ली, स्त्री, (इक्षुरिव सुस्वादा वल्ली लता ।)
क्षीरविदारी । इति राजनिर्घण्टः ॥
इक्षुवाटिका, स्त्री, पुण्ड्रकः । इति राजनिर्घण्टः ।
पुड़ि आक् इति भाषा ।
इक्षुवाटी, स्त्री, (इक्षोर्वाटीव ।) पुण्ड्रकः । इति
राजनिर्घण्टः ।
इक्षुवेष्टनः, पुं (इक्षोरिव वेष्टनं यस्य ।) मञ्जमुञ्जः ।
इति राजनिर्घण्टः ॥
इक्षुशाकटं, क्ली, (इक्षोः क्षेत्रं । इक्षुशब्दात् क्षेत्रे
शकटशाकिनौ इति शाकटप्रत्ययः ।) इक्षुक्षेत्रम् ।
इति व्याकरणम् ॥ इक्षुर भूमि इति भाषा ।
इक्षुशाकिनं, क्ली, (इक्षोर्भवनं क्षेत्रं वा । इक्षु+
शाकिन ।) इक्षुक्षेत्रं । इति व्याकरणम् ॥
इक्षुसारः, पुं, (इक्षोः सारः ।) गुडः । इति राजनिर्घण्टः ॥
इक्ष्वाकुः पुं, (इक्षुमाकरोतीति । इक्षु+आङ्+कृ
+मितद्र्वादित्वात् डुः । यद्वा इक्षु इति शब्दं
अक्षतीति अक्ष गतौ बाहुलकादुः ।) वैवस्वतमनु-
पुत्रः । स तु सत्ययुगे अयोध्यायां सूर्य्यवंशीयादि-
राजः । इति पुराणम् ॥ (गीतायाम् । ४ । १ ।
"विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्" ।
इक्ष्वाकोर्गोत्रे जाताः इति व्युत्पत्त्या वाच्यलिङ्गाः ।
इक्ष्वाकुवंशोद्भवाः । यथा रघुः । १।७२ ।
"इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" ।)
इक्ष्वाकुः, स्त्री, (इक्षु+आङ्+कृ+डु ।) कटु-
तुम्बी । इत्यमरो मेदिनी च ॥ तितलाउ इति
भाषा । ("इक्ष्वाकुकुसुमचूर्णं वा पूर्ववदेव क्षीरेण
कासश्वासच्छर्द्दिकफरोगेषूपयोगः" । इति सुश्रुते ।
"सिद्धं वस्त्राम्बेक्ष्वाकुकल्कं येषां प्रशस्यते" ।
अस्याः पर्य्यायो यथा ।
"लम्बाऽथ कटुकालाबुस्तुम्बी पिण्डफला तथा ।
इक्ष्वाकुः फलिनी चैव प्रोच्यते तस्य सम्पदा" ॥
अस्या रोगविशेषे प्रयुक्तता यथा ।
"कासश्वासविषच्छर्द्दिज्वरार्त्ते कफकर्षिते ।
[illegible] नरे चैव वमनार्थं तदिष्यते" ॥
[illegible] यथा ।
"[illegible] प्रभावानां मूर्द्धि [illegible] ।
[illegible] दद्यात् [illegible] ॥
[illegible] यथा ।

योगाहरितपाण्डूनां सुरामण्डेन पश्चमः ॥
फलस्य रसभागञ्च त्रिगुणक्षीरसाधितम् ।
उरःस्थिते कफे दद्यात् स्वरभेदे सपीनसे ॥
हृतमध्येफलेजीर्णे स्थितं क्षीरं यदा दधि ।
जातं स्यात् कफजे कासे श्वासे वम्यांश्च तत्पिबेत् ॥
मस्तुना वा फलान्मध्यं पाण्डुकुष्ठविषार्द्दितः ।
तेन तक्रं विपक्वं वा सक्षौद्रलवणं पिबेत् ॥
अजाक्षीरेण बीजानि भावयेत् पाययेत च ।
विषगुल्मोदरग्रन्थिगण्डेषु श्लीपदेषु च ॥
तुम्ब्याः फलरसैः शुष्कैः सपुष्पैरवचूर्णितम् ।
छर्द्दयेन्माल्यमाघ्राय गन्धसम्पत्सुखोचितः ॥
भक्षयेत्फलमध्यं वा गुडेन पललेन च ।
इक्ष्वाकुफलतैलं वा सिद्धं वा पूर्ववद्घृतम् ॥
पञ्चाशद्शलङ्कानि कषादीनां यथोत्तरम् ।
पिबेदिमञ्च बीजानि कषायेष्वासुतं पृथक् ।
यष्ट्याह्वकोविदाराद्यैर्मुष्टिमन्तर्नखं पिबेत् ॥
कषायैः कोविदाराद्यैर्मांसाद्य फलवत् स्रुताः ।
गुल्ममेहे प्रसेके च कल्कं मांसरसैः पिबेत् ॥
नरः साधु वमत्येवं न च दौर्ब्बल्यमश्नुते" ॥
"इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचां ।
कुष्ठं किण्वामिकौ चापि पिबेत्तुल्यानि पूर्व्ववत्" ॥)
इति चरकः ॥)
इक्ष्वारिः, पुं, (इक्षुदण्डस्य अरिः ।) काशट्टणं । इति
राजनिर्घण्टः ॥ (काशशब्देऽस्य गुणादयो ज्ञा-
तव्याः ।)
इक्ष्वालिकः, पुं, (इक्षुरिव अलति व्याप्नोतीति ।)
काशट्टणं । इति भावप्रकाशः ॥
इक्ष्वालिका, स्त्री, (इक्ष्वालिक+टाप् ।) इक्षुतुल्या ।
इति रत्नमाला ॥ घागाल इति भाषा । खागड़ा
इति केचित् ॥
इख, गतौ । (भ्वादिं-परं-सकं-सेट् ।) इति कवि-
कल्पद्रुमः ॥ तृतीयस्वरादिः । एखति । इति
दुर्गादासः ॥
इखि, इ, गतौ । (भ्वादिं-परं-सकं-सेट्-इदित् ।) इति
कविकल्पद्रुमः ॥ तृतीयस्वरादिः । इ, इङ्खति । इति
दुर्गादासः ॥
इगि, इ, गतौ । (भ्वादिं-परं-सकं-सेट्,इदित् ।) इति
कविकल्पद्रुमः ॥ तृतीयस्वरादिः । इ, इङ्गति
इङ्गितं । इति दुर्गादासः ॥ (यदुक्तं भारते ।
"तदा सर्व्वमिदं विश्वं यथेङ्गं यश्च नेङ्गति" ।
इङ्गं, त्रि, (इगि+क ।) अद्भुतं । जङ्गमं । इति
मेदिनीकरहेमचन्द्रौ ॥ (यथा, भारते ।
("तदा सर्व्वमिदं विश्वं यथेङ्गं यश्च नेङ्गति" ।)
इङ्गः, पुं, (इङ्ग+घञ् ।) इङ्गितं । ज्ञानं । इति
मेदिनीकरहेमचन्द्रौ ॥
इङ्गितं, क्ली, (इगि+क्त ।) अभिप्रायानुरूपचेष्टा-
दिव्यञ्जनं । टार [illegible] इत्यादि भाषा । तत्प-
र्य्यायः । आकारः २ इङ्गः ३ । इत्यमरः ॥ इङ्गं ।
चेष्टा । इति हेमचन्द्रः ॥
("आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः" ॥
[illegible] । (यथाच रघुः १।२० ।)

"तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च"।)

इङ्गुदः, पुं (इङ्गुं गतिं चवखण्डयतीति । इङ्गु+दो+क । चस्य उत्वं ।) इङ्गुदीवृक्षः । इत्यमरभरतौ ॥

("इङ्गुदन्तिक्तमधुरं स्निग्धोष्णं कफवातजित्" । इति चरकः ॥ विशेषोऽस्येङ्गुदीशब्दे ज्ञेयः ।)

इङ्गुदी, स्त्री, (इङ्गुद+ङीष् ।) वृक्षविशेषः । इङ्गौट इति भाषा । जीयापुता इति तु वङ्गदेशीया भ्रमादेन वदन्ति तस्य तु पुत्रजीव इत्यादीनि नामानि प्रसिद्धानि । तत्पर्य्यायः । तापसतरुः २ । इत्यमरः ॥ हिङ्गुपत्रः ३ विषकण्टः ४ अनिलान्तकः ५ गौरसम् ६ तनुपत्रः ७ शूलारिः ८ तापसद्रुमः ९ तीक्ष्णकण्टः १० तैलफलः ११ पूतिगन्धः १२ तिक्तफलः १३ मौष्टुफल १४ ।

(यथा रघुः १४।८१ ।

"तामिङ्गुदीस्नेहकृतप्रदीप-
मास्तीर्णमेध्याजिनतल्पमन्तः"॥)

अस्या गुणाः । मदगन्धित्वं । कटुत्वम् । उष्णत्वम् । [illegible] । [illegible] । रसायनत्वम् । जन्तु[illegible] । इति राजनिर्घण्टः ॥

(अस्य [illegible] गुणानाह ।

"इङ्गुदी [illegible] तिक्ता [illegible] ।
[illegible] ॥
[illegible]" ।

इति भावप्रकाशः ।) ज्योतिष्मतीवृक्षः । इति रत्नमाला । [illegible] इति भाषा ।

इङ्गुल, पुं, स्त्री, इङ्गुदीवृक्षः । इति भरतो हिकमबोधश्च ।

इच्छा, स्त्री, (एषणं इच्छा । इष्+श+टाप् ।) मनोधर्म्मविशेषः । तत्पर्य्यायः । आकाङ्क्षा २ वाञ्छा ३ स्पृहा ४ ईहा ५ तृट् ६ वाञ्छा ७ लिप्सा ८ मनोरथः ९ कामः १० अभिलाषः ११ तर्षः १२ । इत्यमरः ॥ रुच् १३ रुचा १४ स्पृहा १५ इच्छा १६ रुचि १७ मति १८ दोहदं १९ छन्दः २० इट् २१ । इति जटाधरः ॥ (यथा मनौ ४।८५ "दोर्ग्दं [illegible]")॥ [illegible] । (यथा, भागवत- [illegible] । १८, १०८ ।)

"[illegible] आयते ।
इच्छा तु [illegible] ।
[illegible] तु वा भवेत् ।
[illegible]" ।

[illegible] । "[illegible] स्यात् [illegible]" । इति [illegible] १८ ।

इच्छानि, स्त्री, (इच्छा [illegible] । इच्छा+अनु । [illegible] ।) [illegible] स्त्री । तत्पर्य्यायः । [illegible] २ । इत्यमरः ।

इच्छावसुः, पुं, (इच्छया [illegible] ।) कुबेरः । इति [illegible] ।

इच्छुः, त्रि, (इच्छतीति । [illegible] ।) [illegible] । इति [illegible] । (यथा, [illegible] ॥ [illegible] ।

("शरण्यः शरणोच्छूनां पितुरादिश्यपालकः" ।)

इच्छुकः, पुं, (इच्छु+कन् ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ टाबालेबु इति ख्यातः ।

इज्जलः, पुं, (एतीति । इ+क्विप्+तुक्; इत् अस्य जलं यस्य ।) हिज्जलवृक्षः । हिजल गाछ इति भाषा । तत्पर्य्यायः । निचुलः २ अम्बुजः ३ । इत्यमरः ॥ (सपर्य्यायगुणाः यथा, भावप्रकाशे ।

"इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा ।
जलवेतसवद्वेद्यो हिज्जलोऽयं विषापहः" ॥)

इज्यः, पुं, (इज्या विद्यते यस्य । इज्या अर्श आद्यच् ।) वृहस्पतिः । इति ज्योतिषं शब्दरत्नावली च ॥ ("जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः" ।)

इज्यः, त्रि, (इज्या पूजास्त्यस्य । अर्श आद्यच् ।) गुरुः । पूज्यनीयः । इति मेदिनी ॥

इज्या, स्त्री, (यजनं इति । यज+भावे क्यप्+टाप् ।) दानं । यज्ञः । (यथा, रघु । १ । ६८ ।)

("सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः")

पूजा । सङ्गमः । इति मेदिनी ॥ (कर्म्मणि क्यप् ।) गौः । इति राजनिर्घण्टः ॥ कुट्टनी । इति त्रिकाण्डशेषः ॥

इज्याशीलः, पुं, (इज्यां यज्ञं शीलयति पुनःपुनराचरतीति । इज्या+शील+अ ।) पुनःपुनर्यज्ञकर्त्ता । तत्पर्य्यायः । यायजूकः २ । इत्यमरः ॥

इञ्चाकः, पुं, मत्स्यविशेषः । इति त्रिकाण्डशेषः ॥ इँचुका मोचाचिङ्ड़ि इति भाषा । (चिङ्गटशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इट गत्यां । (भ्वादिं-परं-सकं-सेट् ।) इति कविकल्पद्रुमः । एटति । इति दुर्गादासः ॥

इट्[ष्]स्त्री, (इष्+क्विप् ।) इच्छा । इति जटाधरः ॥

इट्चरः, पुं, (एषणमिति इट् । इष्+क्विप् । तेन चरति इति । इट्+चर्+अच् ।) षण्डः । इत्यमरः ॥ षाँड़ इति भाषा ।

इडा, स्त्री, (इल्+क+टाप् ।) बुधग्रहभार्य्या । सा इक्ष्वाकुराजकन्या । (यथा हरिवंशे,—

"तत्र दिव्याम्बरधरा दिव्याभरणभूषिता ।
दिव्यसंहनना चैव इडा जज्ञे इति श्रुतिः" ॥)

गौः । (यथा, भारते, —

"इडान्वहोमाऊतिभिर्मन्त्रशिक्षाविशारदैः" ।)

वचनं । (देवीभेदः । यथा, हरिवंशे,—

'धृतिः प्रीतिरिडाक्रान्तिः शान्तिः पुष्टिः क्रिया तथा' ।)

पृथ्वी । इति मेदिनी ॥ (यथा, महाभारते, सौप्तिकपर्व्वणि २३५।१० ।

"मर्तिभिर्महद्भिः स महद्राद्ये
प्रबोध्यते नुतमिडातस्य" ।) स्वर्गः ।

शरीरस्य वामभागस्था नाड़ी । इति हेमचन्द्रः ॥ (यथा च षट्चक्रभेदे श्लोके ।

"मेरोर्बाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे, मध्ये नाड़ी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा" ।

"मेरोर्बाह्यप्रदेशे [illegible] वह्निमांसे सव्यदक्षे [illegible] शशिमिहिरशिरे चन्द्रसूर्य्या[illegible] नाड्यौ [illegible] इड़ा[illegible]तायें । निषण्णे वर्त्तेते" ।

"इड़ा नाम सैव गङ्गा [illegible] ।
गङ्गायमुनयोर्मध्ये सुषुम्ना च सरस्वती ।
एतासां सङ्गमो [illegible]
तत्र स्नातः सदा [illegible]
इयन्तु सकामकर्म्मानुष्ठाशिशीलं
कारिणी धूममार्गा पितृयानवर्त्तिनी ।
अनयोरिड़ापिङ्गलयोर्मध्ये [illegible]
नाड़ी यस्यां नाड्यां इदं सर्व्वं विश्वं
यथा उत्तरगीतायाम् । १ अध्याये ।
"इड़ा च वामनिश्वासः
पिङ्गलायामितिश्रेया [illegible]
गुदस्य पृष्ठभागेऽस्मिन्
[illegible]
तस्यान्ते रुचिरं रम्यं [illegible]
इड़ा पिङ्गलयोर्मध्ये सुषुम्ना [illegible]
सर्व्वं प्रतिष्ठितं यस्यां सर्व्वं [illegible]
परं आत्मामिड़ादीना नाड़ीना
योगी कदाप्यात्मप्रसादं [illegible]
भगवच्छङ्कराचार्य्ययोगशास्त्रे ।
"ईप्सितानि समभ्यस्य
प्राणायामं ततो मार्गि [illegible]
मृदासने कुशान् सम्यक्
लम्बोदरश्च सम्पूज्य फलमोदकमर्दैः ।
तदासने सुखासीनः
समग्रीवशिराः सम्यक्
प्राङ्मुखोदङ्मुखोवापि
अतिमुक्तमभुक्तश्च वर्जयित्वा प्रयत्नतः ।
नाड़ीसंशोधनं कुर्य्यात् उक्तमार्गेण [illegible]
वृथा क्लेशो भवेत्तस्य तच्छोधनमकृत्वा ।
नासाग्रे [illegible]
सप्तमस्य तु वर्गस्य चतुर्थं बिन्दुसंयुतं ।
विश्वमध्यस्थमालोक्य [illegible]
इड़या पूरयेद्वायुं वाह्यं द्वादशमात्रकैः ।
ततोऽग्निं [illegible]
वरेण्यं बिन्दुसंयुक्तं शिखिमण्डलसंस्थितम् ।
ध्यायेद्विरेचयेद्वायुं मन्दं [illegible]
पुनः पिङ्गलयापूर्य्य घ्राणं दक्षिणतः [illegible]
तद्वद्विरेचयेद्वायुमिड़या तु शनैः शनैः ।
त्रिचतुर्वत्सरञ्चापि त्रिचतुर्मासमेव वा ।
गुरुणोक्तप्रकारेण रहस्येवं समभ्यसेत्" ।)

इड़ाचिका, स्त्री, (इडावत् [illegible] । [illegible] । टाप्+अत इत्वम् ।) [illegible] भाषा । इति शब्दचन्द्रिका ।

इड़िका, स्त्री, (इड़ा+स्वार्थे क, [illegible]) इति शब्दरत्नावली ।

इड़िक्कः, पुं, (इडिक्+कै+क ।) [illegible] इति हेमचन्द्रः ।

इड्वरः, पुं, (इट्+वृ+अच् ।) [illegible] इत्यमरटीकायां स्वामी ।

इत, इ बधे । (इदित्-दिवा-[illegible]) इ इत्यते । इति दुर्गादासः ।

त, (इ + क्त ।) गतः । स्मृतः । इति मेदिनी ॥
ः । ज्ञाने, क्ली ।)
स्] व्य, (अस्मादिति निपातनात् सिद्धम् ।)
मः । परामर्शः । (यथा कुमारे २ । २८ ।
भूत वत्साः किमितः प्रार्थयध्वं समागताः" ।)
गः । इति विश्वः ॥
त्रि, (इना कामेन तरतीति । इ + तॄ + अच्
इतेन ज्ञानेन त्रीयते इति बाहुलकात् अरः ।)
ः ("वामेतरस्तस्य करः प्रहर्त्तुः" । इति
। २।३१।) नीचः । इत्यमरः ॥
शेषः, पुं, (इतरस्मात् विशेषः ।) धान्यप्रभेदः ॥
रं, त्रि, अन्योऽन्यं । परस्परं । इति हेम-
ः ॥ यथा, रघुः । ७ । ५४ ।)
("यूहावुभौ तावितरेतरस्मात्
भङ्गं जयञ्चापतुरव्यवस्थम्" ।)
ः, [स्] व्य, (इतर + एद्युस् ।) इतरस्मिन्-
। अन्यदिने । इत्यमरः ॥
ः, व्य, अत्र तत्र । एखाने सेखाने इति भाषा ।
।,—
सहस्रे रथानां च गजानामयुतं रणे ।
लतो धावमानः सुरथो रथिनां वरः" ॥
। जैमिनिभारते आश्वमेधिके पर्व्वणि २०
ायः ॥ अपि च ।
ाड़िताम्तेन वीरेण फणीन्द्रास्त्रासमागताः ।
स्ततस्ते तन्मुक्ता गताः पातालमुज्ज्वलाः" ॥
। पाद्मे पातालखण्डे ४४ अध्यायः ॥
य, (इण् + क्तिच् ।) हेतुः । (यथा, रघुः ।२।२२।
"वत्सोत्सुकापि स्तिमिता सपर्य्यां,
प्रत्यग्रहीत्सेति ननन्दतुस्तौ" ।)
रणम् । (यथा, मनुः । २ । १५ ॥
"उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः" ।)
ाशः । (यथा, रघुः । १ । १२ ।
"दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव" ।)
प्तिः । समाप्तिः । इत्यमरः ॥ निदर्शनम् ।
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः" ।
ति मनुः । १।१० ।) प्रकारः । अनुकर्षः । पर-
तिः । इति मेदिनी ॥ (विवक्षानियमः । प्रत्यक्षं ।
वधारणं । परामर्शः । मानम् । इत्यमर्थः ।
ार्थः । "गुणानित्येव तान् विद्धि" । इति
ामायणे । १म काण्डे ।)
थं, त्रि, (इति इत्थं प्रकारेण कथा यस्य ।)
श्रद्धेयं । नष्टं । इति मेदिनी ॥
कथा, स्त्री, अर्थशून्यवाक्यं । इति मेदिनी ॥
ह, व्य, (इति एवं च ह किल च ।) पारम्पर्य्यो-
देशः । तत्पर्य्यायः । ऐतिह्यं २ । इत्यमरः ॥
हासः, पुं, (इतिह आस्तेऽस्मिन् । इतिह +
आस + घञ् ।) पूर्व्ववृत्तान्तः । प्राचीनकथा ।
तत्पर्य्यायः । पुरावृत्तः २ । इत्यमरः ॥
यथा, मनुः । ३ । २३२ ।
"आख्यानानीतिहासांश्च पुराणानि खिलानि च" ।)
व्यासादिप्रणीतभारतादिग्रन्थः । इति भरतः ॥

इत्कटः, पुं, (इतं समीपस्थं जनं कटति आच्छादयति फलेन इति । इत् + कट् + अच् ।) वृक्षविशेषः । घोकड़ा इति भाषा । तत्पर्य्यायः । वडमूलः २ वाटीदीर्घः ३ गन्धच्छदः ४ । इति रत्नमाला ॥ ("वीरणशालिषष्टिकेक्षुवालिकादर्भकुशकाशगुन्द्रेत्कटकत्तृणमूलानीति दर्भमानि स्तन्यजननानि भवन्ति" । इति चरकः ।)

इत्किला, स्त्री, रोचनाख्यगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

इत्थं, व्य, (इदम् + थमु । एतेतौरथोरिति इशादेशः ।) इदंप्रकारं । इति वोपदेवः ॥ एइ प्रकार इतिभाषा । (यथा रघौ । २ । २५ ।
"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः ।)

इत्यः, त्रि, (इ + क्यप् ।) गम्यः । इति व्याकरणम् ॥

इत्वरः, त्रि, (एतीति + इ + क्वरप् ।) क्रूरकर्म्मा । पथिकः । दुर्व्विधः । नीचः । इति हेमचन्द्रः ॥

इत्वरी, स्त्री, (एति परपुरुषं प्राप्नोतीति । इ + क्वरप् + ङीप् ।) असती । इत्यमरो मेदिनी च ॥ अभिसारिका । इति हेमचन्द्रः ॥

इद, इ, परमैश्वर्य्ये । (इदित् भ्वादि-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ इ इन्द्यते इन्दति इन्द्रः । इति दुर्गादासः ॥

इदं, [म्] त्रि, (एति, इण् गतौ, इणो दमुगिदि दमप्रत्ययादीर्वृत्तिः । यद्वा इन्दति, इदि परमैश्वर्य्ये, इन्देः कमिर्नलोपश्चेति दीक्षितः ।) पुरोवर्त्तिवाचकसर्व्वनाम । इति व्याकरणम् ॥ एइ इति भाषा ।

इदंकार्य्या, स्त्री, (इदम् कार्य्यं यस्याः ।) दुरालभावृक्षः । इति शब्दचन्द्रिका ॥

इदा, स्त्री, संवत्सरादिवर्षपञ्चकान्तर्गततृतीयवत्सरः । इति मलमासतत्त्वं ॥ अस्या विवरणम् वत्सरशब्दे द्रष्टव्यम् ॥

इदानीं, [न्] व्य, (इदम् + दानीं, इदम इश् ।) अस्मिन् काले । सम्प्रति । इत्यमरः ॥
("हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः" ।
इति रघुः । १ । ८० ।) वाक्यभूषणम् । इति शब्दरत्नावली ॥

इदानीन्तनं, त्रि, (इदानीं + भवार्थे ट्युः ।) इदानीम्भवं । सम्प्रतिजातं । आधुनिकं । इति व्याकरणम् ॥
"वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः" ।
इति साहित्यदर्पणे ३ परिच्छेदे ।२८।)

इदावत्सरः, पुं, (इदा इति वत्सरः ।) संवत्सरादिपञ्चान्तर्गतवत्सरविशेषः । अस्मिन् वत्सरे अन्नवस्त्रदानं महाफलम् । इति विष्णुधर्म्मोत्तरम् ॥
("संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोसीदत्सरोऽसि" । इति वाजसनेयीसंहिता ।२७।४५।)

इद्धं, क्ली, (इन्ध + क्तः ।) आतपः । दीप्तिः । इति मेदिनी ॥ आश्चर्य्यं । इति जटाधरः ॥

इद्धः, त्रि, निर्म्मलः । इति शब्दरत्नावली ॥

इद्वत्सरः, पुं, इदावत्सरः । यथा,—
"संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इद्वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ॥
पञ्चमो वत्सरस्तेषां तदेभिः पञ्चभिर्युगं ।
तेषु संवत्सरो ह्यग्निः सूर्य्यस्तु परिवत्सरः ॥
सोम इद्वत्सरस्तेषां वायुश्चैवानुवत्सरः ।
रुद्रस्तु वत्सरो ज्ञेयः पञ्चाब्दा ये युगात्मकाः" ॥
इति देवीपुराणे कालव्यवस्थानामाध्यायः ॥

इध्मं, क्ली, (इन्ध + मक् ।) अग्निसन्दीपनकाष्ठम् । इत्यमरः ॥ जालानि काठ इति भाषा ।
("तत्रेध्मानयने शुक्रो नियुक्तः काश्यपेन ह" ।
इति भारते ।)

इनः, पुं, (एतीति । इ + नक् ।) सूर्य्यः । प्रभुः । ("वसु न इनस्पतिः" । ऋग्वेदे । ४३ । २ ।) नृपभेदः । इत्युणादिकोषः ॥

इनानी, स्त्री, वटपत्रीवृक्षः । इति राजनिर्घण्टः ॥

इन्दम्बरं, क्ली, (इन्दं महार्हम् अम्बरं नीलवस्त्रमिव ।) इन्दीवरं । नीलोत्पलं । इति शब्दमाला ॥

इन्दिन्दिरः, पुं, भ्रमरः । इति हेमचन्द्रः ॥

इन्दिरा, स्त्री, (इन्द + किरच + टाप् ।) लक्ष्मीः । इति जटाधरः त्रिकाण्डशेषश्च ॥ ("मन्दं मन्दं मन्दिरादिन्दिरेव" इति भामिनीविलासे ।) शोभा । कान्तिः । यथा, "निशि निःसरदिन्दिरं कथं तुलयामः कलयापि पङ्कजम्" । इति भामिनीविलासे ।)

इन्दिरामन्दिरं, क्ली, (इन्दिरायाः मन्दिरं वासस्थानमिव ।) विष्णुः । इति राजवल्लभः ॥

इन्दिरालयं, क्ली, (इन्दिरायाः लक्ष्म्याः आलयः ।) पद्मं । इति शब्दरत्नावली । क्लीवत्वमभिधानात् ॥

इन्दिरावरं, क्ली, (इन्दिरायाः लक्ष्म्याः वरं प्रियं ।) नीलोत्पलं । इति शब्दरत्नावली ॥

इन्दिवरं, क्ली, (इन्दतीति । इदि परमैश्वर्य्ये, इगुपधात् किदिति इन् । इन्दिर्लक्ष्मीस्तस्याः वरं प्रियं ।) नीलोत्पलं । इति शब्दमाला ॥

इन्दीवरं, क्ली, (इन्दी लक्ष्मीस्तस्याः वरं प्रियं ।) नीलपद्मं । तत्पर्य्यायः । नीलाम्बुजन्म २ । इत्यमरः । कुवलयं ३ नीलाब्जं ४ नीलोत्पलं ५ । इति रत्नमाला ॥ ("इन्दीवरेण नयनं मुखमम्बुजेन" । इति कालिदासः । "इन्दीवरश्यामतनुर्न्नृपोऽसौ" । इति रघुः ।६।६५।) (नीलोत्पलशब्देऽस्य गुणादयो ज्ञेयाः ।)

इन्दीवरिणी, स्त्री, (इन्दीवर + इनि ङीप् ।) उत्पलिनी । इति राजनिर्घण्टः ॥ (नीलोत्पलसमूहः ।)

इन्दीवरी, स्त्री, (इन्दीवरमस्त्यस्याः । अर्श आद्यच गौरादित्वात् ङीष् ।) शतमूली । इति मेदिनी-राजनिर्घण्टौ ॥
("वासानिम्बपटोलकेतकिबलाकुष्माण्डकेन्दीवरी"
इति परिभाषायां ।)

इन्दीवारं, क्ली, (इन्द्या लक्ष्म्या वारो वरणं यस्मिन् ।) इन्दीवरं । इत्यमरटीकायां रायमुकुटः ॥

इन्दुः, पुं, (उनत्ति अमृतधारया भुवं क्लिन्नां करोति इति । उन्द + उ + आदेरिच ।) चन्द्रः ।
("दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव" ।
इति रघुः ।१ ।१२ ।) कर्पूरः । इत्यमरः ॥
(चन्द्रसमसंख्यः एकसंख्यायुक्तः । मृगशिरानक्षत्रम् ।
"दिवार्ककिरणैर्जुष्टं सृष्टमिन्दुकरैर्निशि" ।

इति वैद्यकद्रव्यगुणः ।)

इन्दुकः, पुं, (इन्दुरिव शुक्लत्वात् । इन्दु+कन् ।) अश्मन्तकवृक्षः । इति राजनिर्घण्टः ॥

इन्दुकमलं, क्ली, (इन्दुश्चन्द्र इव शुभ्रं कमलं ।) सितोत्पलं । इति राजनिर्घण्टः ।

इन्दुकलिका, स्त्री, (इन्दुरिव शुक्ला कलिका यस्याः ।) केतकी । इति राजनिर्घण्टः । (केतकीशब्देऽस्या विशेषो ज्ञेयः ।)

इन्दुकान्तः, पुं, (इन्दुः कान्तः प्रियो यस्य । चन्द्रोदयेऽयं निष्यन्दनोतिभावः ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥

इन्दुकान्ता, स्त्री, (इन्दुः कान्तो यस्याः ।) रात्रिः । इति हेमचन्द्रः ॥

इन्दुजनकः, पुं, (इन्दोर्जनकः ।) समुद्रः । इति त्रिकाण्डशेषः । (समुद्रात् चन्द्रोत्पत्तिकथा भारते आदिपर्व्वणि [illegible] द्रष्टव्या । यथा,—
"सोऽभिमन्त्र्य शरेषीकामीषिकास्त्रेण वीर्य्यवान् ।
काकं तमभिसन्धाय ससर्ज्ज पुरुषर्षभ" ! ॥
इति रामायणं ॥
ईषिरः, पुं, (ईष + किरच् ।) अग्निः । इति त्रिकाण्ड-शेषः ॥
ईषीका, स्त्री, (ईष + ईकन् । औणादिकप्रत्ययो-ऽयम् । पर्फरीकादित्वात् साधुः ।) तूलिका । वीरणादिशलाका इत्यन्ये । आवर्त्तितमनावर्त्तितं वा सुवर्णं ज्ञातुं यन्निःक्षिप्यते तन्नेत्यन्ये । आवर्त्तित-सुवर्णं द्रवाकारं यत्र निःक्षिप्यते तन्नेति केचित् । इत्यमरटीकायां भरतः ॥
ईष्मः, पुं, (ईष + मक् ।) कामदेवः । वसन्तकालः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
ईह ङ चेष्टे । इति कविकल्पद्रुमः ॥ (भ्वादिं-आत्मं-अकं-सेट् ।) दीर्घादिरकर्म्मकः । ङ ।
"ऐहिष्ट तं कारयितुं कृतात्मा
क्रतुं नृपः पुत्रफलं मुनीन्द्रम्" ।
इति भट्टिः । १ । ११ ॥
सकर्म्मकोऽपि । "ग्रामं भ्रमादपि नेहते" । इति जयदेवः ॥ "सर्व्वः स्वार्थं समीहते" इति माघः । २।६५ ॥ इति दुर्गादासः ॥
ईहा, स्त्री, (ईह + अ + टाप् ।) चेष्टा । उद्यमः ।
("इच्छया जायते काम ईहयार्थो विवर्द्धते ।
श्रद्धया वर्द्धते धर्म्मस्तेषां फलमिदं त्रिधा" ॥
इति रामायणे । ३ काण्डे । तथा च मनुः २।३० ।
"राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे" ।
"वैश्यस्य बहुकृष्यादिचेष्टार्थिनः" इति तट्टीकायां कुल्लूकभट्टः ।) वाञ्छा । इच्छा । इति त्रिकाण्डशेषः ॥
("धर्म्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य श्रेयो न स्पर्शनं नृणाम्" ॥
इति महाभारते । १ । २ । ४८ ।)
ईहामृगः, पुं, (ईहाप्रधानो मृगो यत्र ।) कुक्कुर-प्रमाणहरिणशरभिन्नकाङ्क्षुविशेषः । इति भरतः ॥ चौंच इति ख्यातः । तत्पर्य्यायः । कोकः २ वृकः ३ । इत्यमरः ॥

("पुलहस्य सुता राजन् शलभाश्च प्रकीर्त्तिताः ।
सिंहाः किम्पुरुषा व्याघ्रा यक्षा ईहामृगास्तथा" ॥
इति महाभारते । आदिपर्व्वणि ॥) (नायको मृग-
वदलभ्यामपि नायिकामीहते वाञ्छत्यत्र इति ।)
नाटकरूपकभेदः । इति मेदिनीकरहेमचन्द्रौ ॥
(तल्लक्षणं यथा, साहित्यदर्पणे षष्ठपरिच्छेदे ।
"ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्त्तितः ।
मुखप्रतिमुखे सन्धी तत्र निर्व्वहनं तथा ॥
नरदिव्यावनियमौ नायकप्रतिनायकौ ।
ख्यातौ धीरोद्धतावन्त्यो गूढभावादयुक्तकृत् ॥
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
शृङ्गाराभासमप्यस्य किञ्चित् किञ्चित् प्रदर्शयेत् ॥
पताका नायका दिव्या मर्त्त्या अपि दशोद्धताः ।
युद्धमानीय संरम्भं परं व्याजान्निवर्त्तयेत् ॥
महात्मानो वधप्राप्ता अपि वध्याः स्युरत्र नो ।
एकाङ्को देव एवात्र नेतेत्याहुः परे पुनः ॥
दिव्यस्त्रीहेतुकं युद्धं नायकाः षडितीतरे" ॥
"मिश्रं ख्याताख्यातम् । अन्यः प्रतिनायकः ।
पताकानायकास्तु नायकप्रतिनायकयोर्मिलिता
दश । नायको मृगवदलभ्यां नायिकामत्र ईहते
वाञ्छतीति ईहामृगः । यथा—कुसुमशेखर-
विजयादि" ।)
ईहावृक, पु, (ईहाप्रधानो वृकः ।) ईहामृगः ।
इति शब्दरत्नावली ।

उ

उ, उकारः । पञ्चमस्वरवर्णः । अस्योच्चारणस्थानं ओष्ठ ।
(यथा, शिक्षायाम् ।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू" ।
तथा च मुग्धबोधे ।
"उवर्णं पवर्गमवा ओ औष्ठाः" ।)
स च ह्रस्वो दीर्घः प्लुतश्च भवति । (एवं त्रिधापि
प्रत्येकं उदात्तानुदात्तस्वरितभेदेन नवसङ्ख्यकः
पुनः प्रत्येकं अनुनासिकाननुनासिकभेदात् अष्टा-
दशविध एव भवति । अस्य ध्यानमाह ।)
"उकारं परमेशानि अधःकुण्डलिनी स्वयम् ।
पीतचम्पकसङ्काशं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं देवि चतुर्व्वर्गप्रदायकम्" ।
इति कामधेनुतन्त्रम् । (वङ्गीयभाषाया) अस्य
लेखनप्रकारो यथा,—
"ऊर्द्ध्वाधो मध्यतः कुञ्चा रेखा वामगता शुभा ।
तिष्ठन्ति वायुब्रह्मेन्द्राः शक्तिर्मात्रा परा स्मृता" ॥
इति वर्णोद्धारतन्त्रम् । अस्य नामान्तराणि यथा,—
"उ शङ्करो वर्त्तुलाक्षो भूतः कल्याणवाचकः ।
अमरेशो दक्षकर्णः षड्वक्त्रो मोहनः शिवः ।
उग्रः प्रभुर्धृतिर्विष्णुर्विश्वकर्म्मा महेश्वरः ।
शम्भुश्चण्डिका पुष्टिः पञ्चमी वह्निवासिनी ।
कामघ्न कामना चेशो मोहिनी विघ्नहन्मही ।
उग्रः कुटिला श्रोत्रं मादकोमो दशो हरः" ।
इति तन्त्रोक्तवर्णाभिधानम् । (नाटकादावेषुस्य
दक्षिणकर्णे न्यसन् । यदुक्तं मातृकान्यासप्रकरणे

"उं नमो दक्षिणकर्णे ऊं नमो वामकर्णे" ।)
उ, ङ, शब्दे । इति कविकल्पद्रुमः । (भ्वादिं-आत्मं-
अकर्म-अनिट् ।) ङ अवते गौः । इति दुर्गादासः ॥
उ, व्य, (उ शब्दे+क्विप्+तुक् न ।) सम्बोधनम् ।
रोषोक्तिः । अनुकम्पा । नियोगः । पदपूरणं ।
पादपूरणं । इति मेदिनी ॥ प्रश्नः । अङ्गीकारः ।
इति हेमचन्द्रः । इदमेव उङ् इति ख्यातं ॥
("उमेति मात्रा तपसो निषिद्धा,
पश्चादुमाख्यां सुमुखी जगाम" ।
इति कुमारे । १ । २६ ।)
उः, पु, (अवति विश्वमयत्वात् सर्व्वं व्याप्नोतीति ।
अव्+डु ।) शिवः । इति त्रिकाण्डशेषः ।
("अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः ।
मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः" ॥
इति पुराणे ।) ब्रह्मा । इति कश्चिदेकाक्षरकोषः ।
उकनाहः, पुं, पीतरक्तवर्णाश्वः । स एव कपिश्
च्छायारक्तच्छविः । इति हेमचन्द्रः ।
उक्ता, स्त्री, (वच्+क्त ।) एकाक्षरछन्दः । इति
मेदिनी । वाक्यम् ।
उक्तः, त्रि, (उच्यते यः । वच्+कर्म्मणि क्त ।) कथितः ।
तत्पर्य्यायः । भाषितः २ उदितः ३ जल्पितः ४
आख्यातः ५ अभिहितः ६ लपितः ७ इत्यमरः ॥
गदितः ८ निगदितः ९ ईरितः १० उदीरितः ११
भणितः १२ लडितः १३ रपितः १४ रठितः १५
भटितः १६ रटितः १७ व्याहृतः १८ ॥
(यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ८६ । ९ ।
"इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः" ॥
तथा, तत्रैव ८५ । ६६ ।
"इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ" ॥)
उक्ति, स्त्री, (वच्+भावे क्तिन् ।) कथनं । तत्-
पर्य्यायः । व्याहारः २ लपितं ३ भाषितं ४ वचन
५ वचः ६ । इत्यमरः ॥ ("अतिसंक्षिप्तचिरन्तनो-
क्तिभिः" । इति मुक्तावलीरचना । तथा, चामरे ।
"एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" ॥)
उक्थं, स्त्री, (वच्+थक् ।) सामवेदः । इत्युणादि-
कोषः । (यथा, ऋग्वेदे । २ । ६४ । ७ ।
"विप्रा उक्थेभिः कवयो गृणन्ति" ।
स्तोत्रम् । यथा,
"अथ योऽसावन्तरक्षिणि पुरुषो दृश्यते सैवर्क्
तत्साम तदुक्थं तद्यजुः तत् उक्थं तद्ब्रह्म" । इति
छान्दोग्ये उपनिषदि ।) .
उक्थशाः [स्] पुं, (उक्थैरुक्थानि वा शंसति ।
मन्ते श्वेतवहोक्थशस्पुरोडाशोण्विन्नित्यत्र श्वेत-
वहादीनां डस् पदस्येति वक्तव्यम् । यत्र पदत्वं
भावि तत्र डस् । अन्यत्र णिनिः ।) यजमानः ।
इति व्याकरणं । (यथा, ऋग्वेदे । ७ । १९ । ९ ।
"नरः शंसन्त्युक्थशास उक्था" ।)
उक्था, स्त्री, (वच्+थक्+टाप् ।) छन्दोविशेषः ।
एकाक्षरवृत्तमुक्था । सा द्विविधा । श्रीः १ सर्व्व-
गुरुः । यथा श्रीस्ते सास्तां । इति छन्दोमञ्जरी ।
उ २ सर्व्वलघुः । यथा । उरवतु । इति छन्दो-
ऽर्णवः ।

उख क्षिपि । (भ्वादिं-परं-सकं-सेट् ।) ...
कल्पद्रुमः । उखति दुःखं ...
दुर्गादासः । (...
इति भट्टिकाव्ये । ३ । ४ ।)
उखः त्रि, (उख+अच् ।) ...
उखानरः, पुं, (उखान्+नरच् ।) ...
हेमचन्द्रः ।
उखा, [न्] पुं, (उख+कनिन् ।) ...
(यथा, ऋग्वेदे ८ । ३ । ९ । ...
यन्ति धेनवः" । तथा च कुमारे ...
"तथावतीर्य्याशुवरकाङ्क
शरद्गमाद्योधितिमाविशेत्" ॥
ऋषभौषधिः । इति राजनिर्घण्टः ।
उख, गतौ । इति कविकल्पद्रुमः । ...
सेट् ।) पञ्चमस्वरी । ओखति । ...
उख, इ, गतौ । इति कविकल्पद्रुमः ...
-परं-सकं-सेट् ।) पञ्चमस्वरी । ...
दुर्गादासः ।
उखर्व्वणः, पु, वृक्षविशेषः । तत्पर्य्यायः ...
भूरिपत्रः २ सुदलः ३ इर्वारिकः ...
वनदाहकत्वं । अधिकारित्वं । ...
कारित्वञ्च । इति राजनिर्घण्टः ।
उखा, स्त्री, (उख+क+टाप् ।) ...
मरः । हाँडि इति भाषा । (
"इन्द्रः स्वतेजसा वह्निरुखाकलिविरेत ...
उख्यं, त्रि, (उखायां संस्कृतं । उखा+यत् ...
पक्वमांसादि । तत्पर्य्यायः । पैठरः ...
("शूल्यमुख्यञ्च शोभनान्" । इति ...
उखायां भवः । अग्निः । यथा, ...
"उख्यान् (अग्नीन्) हन्येषु निम ...
उग्रं, त्रि, (उच्यति क्रुधा समवैति । ...
+ऋज्रेन्द्रेत्यादिना रक् । ...
उत्कटं । इत्यमरो मेदिनी च ।
("लोकेषु प्रथितं घोरं ...
इति रामायणे ।
"तामिस्रादिषु ...
इति मनुः । १२ । ७५ ।) यक्षादिघाती ।
यथा मनुः ४ । २१२ ।
"उग्रान्नं सूतिकान्नञ्च ...
उग्रं, स्त्री, वत्सनाभनामविषं । इति ...
उग्रः, पुं, (उच+रक् । ...
वायुमूर्त्तिरयं । इति कविकल्पद्रुमः ...
महाभारते । १३ । शिवसहस्रनाम ...
"उग्रो वंशकरो वंशो वंशनादो ...
रूपविशेषः । इति मार्कण्डेये । ...
क्षत्रियात् शूद्रायां जातः ...
आगुरि इति भाषा । (तथा च मनुः ...
"क्षत्रियात् शूद्रकन्यायां क्रूराचार ...
क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते" ...
अस्य कर्म्म बिलवासिनां धारिण ...
तथाच मनुः । १० । ४९ ।
"क्षत्तोग्रपुक्कसानान्तु बिल ...

गणविशेषः। स च पूर्व्वफल्गुनीपूर्व्वाषाढ़ा-
ाद्रपदमघाभरण्यात्मकः। इति ज्योतिषं
क्रूरदृक्। इति शब्दचन्द्रिका॥ केरल-
। इति हेमचन्द्रः॥ (मद्रः। उग्रोदेवः।
ख्यातो दानवविशेषः। यथा हरिवंशे।
ान् केतुमानुग्रः सोग्रव्यग्रो महासुरः"॥
ाद्रस्य शतपुत्रेषु एकः। यथा, धृतराष्ट्रपुत्र-
ाध्याये १।११७।११। महाभारते।
भीमरथौ वीरौ वीरबाहुरलोलुपः"॥
ादित्यारव्यस्य काश्मीरराजस्य स्वनामख्यातो
। यथा, राजतरङ्गिण्यां।
ानुग्रहमागुग्राभिधो यस्य गुरुर्व्यधात्"॥
ः। इति महाभारते। १३।१४८।५८॥
ोगिनीभेदः। यथा, कालिकायां। ६०अध्यायः।
ाकाल्यथ रुद्राणी उग्रा भीमा तथैव च"।)
ः, पुं, (उग्रः काण्डो यस्य।) कारवेल्लः।
ब्दनिर्घण्टः॥ करेला इति भाषा। कापयेल-
ास्य गुच्छादिकं छेद्यम्।)
, स्त्री, (उग्रो गन्धो यस्मिन्।) हिङ्गु। इति
निर्घण्टः॥
ः, पुं, (उग्रस्तीव्रः गन्धो यस्मिन्।) लशुनः।
श्लः। अर्ज्जकवृक्षः। इति राजनिर्घण्टः॥
कः। इति शब्दचन्द्रिका॥ उत्कटगन्धयुक्ते
(यथा, हारीते प्रथमस्थानेऽष्टमाध्यायः।
ग्रगन्धं पुराणं स्याद्दशवर्षोषितं घृतम्।
यथा जरां याति गुडवल्लात्तथा तथा"॥)
ा, स्त्री, (उग्रः गन्धो यस्याः।) अजमोदा।
। छिक्किकौषधी। इति मेदिनी॥ वच-
ा। यवानी। इति राजनिर्घण्टः॥ ("वचा,
नी च"। इति भावप्रकाशे पूर्व्वखण्डे अनेकार्थ-
वर्गः॥)
ा, स्त्री, (उग्रा चण्डा कोपना स्त्री।) देवी-
। यथा महिषासुरं प्रति भगवतीवाक्यम्।
ग्रचण्डेति या मूर्त्तिर्भद्रकाली ह्यहं पुनः।
। मूर्त्ता त्वां हनिष्ये सा दुर्गेति प्रकीर्त्तिता॥
ास मूर्त्तिषु सदा पादलग्नो नृणां भवान्।
ो भविष्यसि त्वं वै देवानामपि रक्षसाम्॥
ादिसर्गे उग्रचण्डामूर्त्त्या त्वं निहतः पुरा।
ीयसर्गे तु भवान् भद्रकाल्या मया हतः॥
ास्मिंश्चाधुना त्वां हनिष्यामि सहानुगम्"।
ादि॥*॥ तस्याः प्रादुर्भावो यथा।
भगवानुवाच।
ग्रचण्डा तु या मूर्त्तिस्त्वादावमुञ्जाऽभवत्।
नवम्यां पुरा कृष्णपक्षे कन्यां गते रवौ॥
द्भूता महामाया योगिनीकोटिभिः सह"।*।
था मूर्त्त्या दक्षयज्ञभङ्गः कृतः। यथा,—
ायाद्यन्य तु मन्वन्तरे यज्ञं दाक्षवार्षिकम्।
ः कर्त्तुं समारेभे कृताः सर्व्वे दिवौकसः॥
ोऽहं न कृतस्तेन दक्षेण सुमहात्मना।
ामीति सती चापि तस्मादिति च सो हता॥
ो रोषसमायुक्ता प्राणांस्तत्याज सा सती।
द्देहा सती चापि अयमूर्त्तिस्तदाभवत्॥

ततः प्रवृत्ते यज्ञे तु तस्मिन् दाक्षवार्षिके।
नवम्यां कृष्णपक्षे तु कन्यायां चण्डमूर्त्तिधृक्॥
योगनिद्रा महामाया योगिनीकोटिभिः सह।
सतीरूपं परित्यज्य यज्ञभङ्गमथाकरोत्॥
भृङ्गरस्य गणैः सर्व्वैः सहिता भृङ्गरेण च।
स्वयं बभञ्ज सा देवी महामखं महात्मनः॥
ततो देव्या महाक्रोधे व्यतीते त्रिदिवौकसः।
पूजयाञ्चक्रुरतुलां देवीं पूर्व्वोदितेन वै॥
पूर्व्वोदितविधानेन पूजामस्या दिवौकसः।
कृत्वैव परमामापुर्निर्वृतिं दुःखहानये॥
एवमन्यैरपि सदा कार्य्यं देव्याः प्रपूजनम्।
विभूतिमतुलां प्राप्तुं चतुर्व्वर्गप्रदायकम्॥
यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे।
न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव॥
क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै।
परत्र च महामायावलिर्भूत्वा स जायते॥
अष्टम्यां रुधिरैर्मांसैर्महामांसैः सुगन्धिभिः।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवां"॥
इत्यादि॥*॥ तन्मन्त्रो यथा,—
"भद्रकालीमुग्रचण्डां महामायां महोत्सवे।
नेत्रवीजन्तु सर्व्वासां पूजने परिकीर्त्तितम्।
तन्त्रं यथोग्रचण्डायाः पृथक् त्वं शृणु भैरव॥
चाद्यद्वयं नेत्रवीजं मन्त्रस्योपान्तमन्तरे।
वह्निकान्तस्वरेन्दुविन्दुभ्यां तन्त्रमीरितम्"॥
इत्यादि च कालिकापुराणे ५९। ६० अध्यायौ॥
उग्रतारा, स्त्री, (उग्रादपि भयात् भक्तान् त्राति
तारयति वा या॥ उग्र+तॄ+णिच्+अच्+
टाप्। यथा, निरुक्तौ।
"उग्रादपि भयात् त्राति यस्मात् भक्तान् सदा-
म्बिका"।) देवीविशेषः। अस्या उत्पत्त्यादि
यथा,—
"सर्व्वेषामेव देवानां यज्ञभागानपाहरत्।
स्वयं शुम्भो निशुम्भश्च दिक्पालत्वं तथा गतौ॥
सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम्।
गङ्गावतारनिकटे महामायां प्रतुष्टुवुः॥
अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः।
मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत॥
युष्माभिरमरैरत्र स्तूयते का च भाविनी।
किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति॥
एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः।
समुद्भूताब्रवीद्देवी मां स्तुवन्ति सुरा इति॥
शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान्।
तस्मात्तयोर्वधायाहं स्तूयेऽद्य सकलैः सुरैः॥
विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा।
भिन्नाञ्जननिभा कृष्णा साभूद्गौरी सदापि॥
कालिकाख्याभवत् सापि हिमाचलकृताश्रया।
तामुग्रतारामृषयो वदन्तीह मनीषिणः॥
उग्रादपि भयात्त्राति यस्माद्भक्तान् सदाम्बिका।
एतस्याः प्रथमं वीजं कथितं तन्मयैव च"॥*॥
"एकैवैकजटाव्यापारेश्चक्रात्मका त्वाधिका।
प्रहृ त्वं चिन्तनं चास्याः कल्पं देवाभैरवी॥
यथा ध्याता महादेवी महः प्राप्नोत्यभीप्सितम्।

चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम्॥
खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं तथा।
कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्॥
खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्।
मुण्डमालां धरां शीर्षे ग्रीवायामपि सर्व्वदा॥
वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम्।
कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम्॥
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्।
विन्यस्य सिंहपृष्ठे तु लेलिहानां शवं स्वयम्॥
साट्टहासमहाघोरा रावयुक्तातिभीषणा।
चिन्त्येयमुग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः"॥*॥
"एतस्याः संप्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः।
महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च।
घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी॥
भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्"।
इति कालिकापुराणे ६० अध्यायः॥*॥ अपिच
"ब्रह्मशैलस्य पूर्व्वस्यां भूमिपीठे व्यवस्थिता।
"चापविम्बं शुभावर्त्तं कामाख्यागामिमण्डलम्॥
यत्रोग्रतारारूपेण रमते परमेश्वरी।
तत्र तेनैव रूपेण पूजितव्या शुभात्मिका॥
तस्यास्तु वीजं पूर्व्वस्मिन् उत्तरे प्रतिपादितम्।
रूपं शृणु नरश्रेष्ठ येन ध्येया सदाशिवा॥
कृष्णा लम्बोदरी दीर्घा विरला रक्तदन्तिका।
चतुर्भुजा क्षामाङ्गी तु दक्षे कर्त्तृकखर्परौ॥
खड्गं चेन्दीवरं वामे शीर्षे त्वेकजटां पुनः।
वामपादं शवस्योर्व्वोर्निधायोत्थाय दक्षिणम्॥
शवस्य हृदये न्यस्य साट्टहासं प्रकुर्व्वती।
नागहारशिरोमालाभूषिता कामदा परा॥
त्रिकोणं मण्डलं चास्या ऊँकारमथवाष्टकम्।
द्वारे नानायोगिनीनां नामान्यस्यास्तु तन्त्रके॥
ज्ञेयानि नरशार्दूल तथोक्तं वाक्यगोचरे"।
इति कालिकापुराणे कामाख्याक्रमनिर्णये ८२
अध्यायः॥*॥ सा च वशिष्ठशापात् वामा
भूता। यथा,—
और्व्व उवाच।
"एतद्विप्रोक्तवचः श्रुत्वा विधिना वशिष्ठः स तु।
चकार हृदये तद्वचः साधसाधने॥
विसृज्य तान् ब्रह्मविष्णुदमान् शपथवाक्यः।
आदाय भगवान् सर्व्वान् कामरूपान्तरं ययौ॥
उग्रतारां ततो देवीं मन्त्रांश्च प्राह शङ्करः।
उत्सादयन्तु भवन्तः इमान् लोकान् सदा शुभम्॥
उग्रतारे महादेवि सदाप्युत्सादय द्रुतम्॥
ततो गणाः कामरूपाद्देवीचाप्यपराजिता।
लोकानुत्सादयामासुः पीठं कर्त्तुं रहस्यकम्॥
उत्सार्य्यमाणे लोके तु चतुर्व्वर्गैर्दिशान्तिभिः।
सन्ध्याचलो यतो विप्रो वशिष्ठः कुपितो मुनिः॥
सोऽप्युत्सार्य्यमाणो देव्या उग्रया प्रमथैस्तथा।
गणैः सह स्वनः प्राह शापं क्रुद्धेन मुद्राहस्तम्॥
यस्मादहं एवं वामे त्वयोत्सारितवान् मुनिः॥
तस्मात्त्वं वाममार्गेण पूज्या भव मनस्विनी।
मर्त्त्यलोके निखिलमुद्रा यस्मादुत्सारितं मदुद्वहः।
भवन्तु प्रमथास्तस्मात् भवता सामरूपत॥

महादेवोऽपि यस्मान्मां निःसारयितुमुद्यतः ।
तमोघ्नं मुनिं दान्तं म्लेच्छवदेदपारगम् ॥
तस्मात् म्लेच्छप्रियो भूयात् शङ्करस्त्रास्थिभस्मधृक् ।
एतत्तु कामरूपाख्यं म्लेच्छैर्गुप्तं भवद्ध्रुवं ।
स्वयं विष्णुर्न आयाति यावत् कालमिदं पुनः ।
विरलास्त्वागमाः सन्तु यत्र तत्प्रतिपादकाः ॥
विरलं यस्तु जानाति कामरूपागमं बुधः ।
स एव प्राप्तकालेऽपि पूर्णं फलमवाप्स्यति ।
एवमुक्त्वा वशिष्ठस्तु तत्रैवान्तरधीयत ।
ते तस्मा म्लेच्छतां याताः कामरूपे सुरालये ॥
वामाऽभूदुग्रतारापि शम्भुर्म्लेच्छरतोऽभवत्” ।
इति च कालिकापुराणे ८२ अध्यायः ॥

उग्रत्वं, क्ली, (उग्रस्य भावः । उग्र + त्व ।) उग्रता । उत्कटता । तत्पर्य्यायः । चण्डता २ । इति हेमचन्द्रः ।

उग्रधन्वा, [न्] पुं, (उग्रं धनुर्यस्य । धनुषश्चेत्यनङ् ।) इन्द्रः । इति हेमचन्द्रः । (“स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा सयुध इन्द्रो गणेन । संसृष्टजित् सोमपा बाहुशर्द्ध्युग्रधन्वा प्रतिहिताभिरस्ता” । इति ऋग्वेदे । १०।१०३।३ ॥ शिवः । उग्रधनुर्विशिष्टे, त्रि ।)

उग्रनासिकः, त्रि, (उग्रा दीर्घा नासिका यस्य ।) दीर्घनासिकाविशिष्टः । इति हेमचन्द्रः ।

उग्रशेखरा, स्त्री, (उग्रस्य महादेवस्य शेखरं मस्तकं वासस्थानत्वेन यस्याः ।) गङ्गा । इति शब्दरत्नावली ॥

उग्रसेनः, पुं, (उग्रा सेना यस्य ।) मथुरादेशस्य राजविशेषः । स च आहुकपुत्रः । कंसराजपिता च । परीक्षित्पुत्रः । इति श्रीभागवतम् ॥ (तथा महाभारतेऽपि “जनमेजयः पारिक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते । तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेनश्च” इति । तथा च तत्रैव १।९५।४२।
“भीमसेनोग्रसेनौ च सुवर्णा वसुवस्तथा” ।)

उग्रसेनजः, पुं, (उग्रसेनात् जायते इति । उग्रसेन + जन + ड ।) कंसनामासुरराजः । इति त्रिकाण्डशेषः ।

उग्रा, स्त्री, (उच्यति बुधा समवैति वा । उच समवाये + ऋज्रेन्द्राग्रेति रक् [illegible] । तत-टाप् ।) वचा । इति राजनिर्घण्टः ।
(“[illegible] शिवं श्रेष्ठं [illegible] सदा” ।
इति वैद्यकचक्रपाणिसंग्रहे मूत्ररोगाधिकारे ।) छिक्किकौषधी । इति हेमचन्द्रः । उग्रजातिस्त्री । (यथा मनुः १० । ९ ।
“[illegible] इति कीर्त्त्यते” ।)
कर्कशा । इति रत्नमाला । प्रखरा नारी ।

उग्रेशः, पुं, उग्रेशः । इति शब्दमाला । [illegible] इति भाषा ।

उच, इ ङ न समवाये । [illegible] । इति कविकल्पद्रुमः । ([illegible] ।) [illegible] । [illegible] । [illegible] । इति दुर्गादासः ।

[illegible], त्रि, (उच + “[illegible]”

इति क्तच् प्रत्ययः ।) विदितम् । व्यक्तम् । परिमितम् । युक्तम् । इति हेमचन्द्रः ॥ ग्राह्यम् । इति शब्दरत्नावली ॥

उच्चं, त्रि, (उच्चिनोतीति । चिञ् चयने अन्येभ्योऽपि इति डः । उच्चैस्त्वमस्ति अत्र वा । अर्श आद्यच्, अव्ययानामिति टिलोपः ।) उपरि । उँचु इति भाषा । तत्पर्य्यायः । प्रांशु २ उन्नतम् ३ उदग्रम् ४ उच्छ्रितम् ५ तुङ्गम् ६ । इत्यमरः ॥ उत्तुङ्गं ७ । इति तट्टीका ॥ (यथा, रघुः ३।१३ ।
“ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैः,
असूर्य्यगैः सूचितभाग्यसम्पदम्” ।)
(ज्योतिषोक्तं ग्रहाणामुच्चस्थानम् । यथा,
“अजवृषभमृगाङ्गनाकुलीरा
झषवणिजौ च दिवाकरादितुङ्गाः ।
दशशिखिमनुयुक्तिथीन्द्रियांशै-
स्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः” ॥
सूर्यादीनां सप्तानां ग्रहाणां मेषवृषभादयो राशयः क्रमशोऽधिकविशिष्टा उच्चस्थानानि स्वस्वतुङ्गापेक्षया सप्तमस्थानानि च नीचानि, तत्रोच्चेष्वपि दशमादयो राशिभिन्नांशाः यथाक्रमं उच्चेषु परमोच्चा नीचेषु परमनीचा भवन्तीति ।)

उच्चकैः, [स्] व्य, (उच्चैस् + अव्ययसर्व्वनाम्नां इति प्रागिवीयेषु अर्थेषु टेः प्रागकच् ।) उच्चैः । अतिशयोच्चम् । इति द्विरूपकोषः ॥ (यथा विष्णुपुराणम् ।
“वशिष्ठाद्यैर्यथासारे स्तोत्रं कुर्व्वद्भिरुच्चकैः” ।
उन्नतम् । यथा माघे १।१२।
“गिरेस्तडित्वानिव तावदुच्चकै-
र्जवेन पीठादुदतिष्ठदच्युतः” ॥)

उच्चटा, स्त्री, (उत् + चट् + अच् + टाप् ।) गुञ्जा । भूम्यामलकी ।
(“उच्चटाचूर्णमप्येवं क्षीरेणोत्तममिष्यते ।
शतावर्य्युच्चटामूलं पेयमेवं बलार्थिना” ॥
इति सुश्रुते चिकित्सितस्थाने २६ ।)
नागरमुस्ता । इति राजनिर्घण्टः ॥ दम्भः । चर्य्या । लशुनभेदः । इति हेमचन्द्रः ॥ तृणविशेषः । चिञ्चिंची इति ख्याता । चँचुया इति केचित् । इत्यमरटीकायां भरतः । तत्पर्य्यायः । चूडाला २ चक्रला ३ । इत्यमरः ॥ अम्बुधना ४ जटिला ५ मुक्ता ६ उत्तानकः ७ । इति रत्नमाला ।

उच्चण्डः, त्रि, (उत् चण्डतीति । चडि कोपे + अच् ।) त्वरान्वितः । अविलम्बितः । इत्यमरः ॥

उच्चतरुः, पुं, (उच्चः उन्नतस्तरुः ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥ (नारिकेलशब्देऽस्य विवरणं ज्ञातव्यम् ।)

उच्चतालं, क्ली, (उच्चः महान्या प्रचण्डस्तालो यत्र ।) पानगोष्ठ्या नृत्यम् । इति हेमचन्द्रः ॥

उच्चदेवः, पुं, (उच्चः सर्व्वदेवमध्यात् श्रेष्ठः देवः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥

उच्चन्दः, पुं, (उत् मन्दं [illegible] यस्मिन् ।) रात्रिशेषः । इति शब्दरत्नावली ॥

उच्चयः, पुं, (उत् + चि + अच् ।) परिधानवस्त्रग्रन्थिः ।
तत्पर्य्यायः । नीवी २ । इति हेमचन्द्रः ।
दीनामुत्तोलनम् । यथा, रघु [illegible]
[illegible]
“पुष्पोच्चयं नाटयति” [illegible]
राशिः । समष्टिः । यथा,—
“शिलोच्चयोऽपि क्षितिपालमुच्चैः” ।
“वाक्यं [illegible]
इति साहित्यदर्पणे । २ । १ ।)

उच्चर्णं, क्ली, (उच्चरतीति । उत् [illegible] मनः । इति हेमचन्द्रः ।

उच्चललाटा, स्त्री, (उच्चमुन्नतं ललाटं [illegible]) ललाटवती । इति त्रिकाण्डशेषः ।

उच्चाटनं, क्ली, (उत् + चट् + णिच् + [illegible]) स्खलनम् । उचाटन इति भाषा । [illegible] अभिचारकर्म्मविशेषः । [illegible]
[illegible] चतुर्दशी अष्टमी च । [illegible]
माला साध्यस्य [illegible]
फलम् । उच्चाटनं स्वदेशादेर्भ्रंशनं
इति शारदातिलकम् ।

उच्चारः, पुं, (उच्चार्य्यते परित्यज्यते [illegible] + णिच् + घञ् ।) विष्ठा । इत्यमरः ।
(“मूत्रोच्चारसमुत्सर्गं दिवा [illegible]
इति मनुः । ४ । ५० ।)
“यस्योच्चारं विना मूत्रं [illegible]
दीप्ताग्निर्लघुकोष्ठस्य स्थितस्तस्योदरे [illegible]
इति सुश्रुते उत्तरतन्त्रे [illegible]
उच्चारणम् ।

उच्चारणं क्ली, (उत् + चर + णिच् + ल्युट् [illegible] नम् । वाङ्निष्पत्तिकरणम् । यथा, [illegible]
उच्चारणार्थं” । इति [illegible]
संज्ञा २ । अपि च [illegible]
[illegible]
इति कविकल्पद्रुमः ।

उच्चावचः, त्रि, (उदक् च अवाक् च [illegible] दित्वात् साधुः ।) अनेकप्रकार [illegible] नैकभेदः २ । इत्यमरः । (यथा, मनुः [illegible]
(“उच्चावि [illegible]
“उच्चावचेषु भूतेषु स्थितं तं [illegible]
इति च मनुः ६ । ७३ ।)

उच्चिङ्गटः, पुं, [illegible] । [illegible]
मेदिनी ।

उच्चूलः, पुं, (उद्गता चूडा यस्य । [illegible] चन्द्रातपोर्द्ध्वमुच्छ्रूयं । [illegible]
इति भाषा । अस्य पटुका [illegible]

उच्चैः, [स्] व्य, (उच्चीयते इति । उत् [illegible]
उच्चम् । महत् । इत्यमरः । (यथा, [illegible]
“उच्चैरुच्चैःश्रवास्तेन [illegible]
“शिलोच्चयोऽपि क्षितिपालमुच्चैः”
इति रघुः २ । ३४ । (यथा, माघे १ [illegible]
“अहत्या [illegible] पादमूले [illegible]

उच्चैःश्रवाः, [स्] पुं, (उच्चैः श्रवो [illegible] उच्चैः श्रवसी यस्य । यद्वा उच्चैः [illegible]

श्रसुन्।) इन्द्रघोटकः। इत्यमरः॥ स तु समुद्रमन्थनोत्थितः। इति श्रीभागवतम्॥ ...श्रवास्तेन हयरत्नमहारि च"॥ ...रते। २। ४७॥)

...ी, (उच्चैर्घुष्यते स्म। घुष+क्त।) घोषणा।
॥

...उञ्छे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ऋकारादिः। ऋ उच्छति। उच्छन्ती। उञ्छ उद्धृतशस्यस्य ग्रहणम्। (यथा, हलायुधः।
...शस्यमुञ्छन्ति यद्देशे व्रतिनो द्विजाः"।
...कोटनमित्येके। इति दुर्गादासः॥
...बन्धे। समापने अतिक्रमे। वर्जने। इति ...द्रुमः। (तुदां-परं-सकं-सेट्।) ई उच्छः। ...ती उच्छन्ती। वत्वाद्गोऽर्थाः। समापने। उच्छति रात्रिः। "मरणं व्युष्टायामुषसि ...ास तनयम्"। व्युष्टायां समाप्तायामित्यर्थः। ...र्गादासः॥

...त्र, (उत्+छद्+क्त।) नग्नम्। इति ...वह्नीसा॥

...नी, (उत्+छद्+णिच्+ल्युट्।) उत्...न्। उद्वर्त्तनम्। गन्धद्रव्यद्वारा शरीरनिर्म...लम्॥ इत्यमरटीका॥
...शिप्रदानेन स्नापनोच्छादनेन च"।
...रामायणे। २। १११। १०॥)

...न्ध्र, स्त्री, (उत्थितं शिलीन्ध्रम्।) छत्रिका। श्रीभागवतम्॥ कोड़क छाता इति भाषा) ...कृतशिलीन्ध्रे, त्रि, "कर्त्तुं यच्च प्रभवति ...मुच्छिलीन्ध्रामवन्ध्याम्"॥ इति मेघदूते। ...ध। १८॥)

...त्रि, (उत् शिष्यते स्म। उत्+शिष+क्त।) अधिष्टम्। इति पुराणम्॥ एंटो इति ...। तद्भोजनप्रायश्चित्तं यथा (प्रायश्चित्ततत्त्व ...भोजनभक्ष्यप्रायश्चित्तप्रकरणे।) विष्णुः। ...महापातके त्रिरात्रं पयसा वर्त्तेत ... [illegible] ...च वमनं कृत्वा ... [illegible]" ...। एवं उच्छिष्टे ... [illegible] ...विष्णु ...उच्छिष्टे ... [illegible]

[illegible]

घोषापदि ह्येतम्"॥*॥ "सर्व्वैर्नोच्छिष्टे तु व्रत-द्वैगुण्यं आपद्यानमुक्तोत्तारिते मासयावकव्रतं तदशक्तौ धेनुद्वयं षट्कार्षापणा वा देयाः। तन्नो-च्छिष्टान्ने पराक इति। अभ्यासभेदे त्वाद्यन्ति-कृच्छ्रणीया"। इति प्रायश्चित्ततत्त्वम्॥ *॥ अथो-च्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम्। (तत्रैव उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तप्रकरणे द्रष्टव्यम्) आपस्तम्बः।

"भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम्॥
गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत्।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति॥
भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्।
अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा"॥
प्राजापत्यं स्नाने अर्द्धोच्छिष्टे देवाचमास्ये
निश्चितः न तु निर्णीतः। दक्षः।
"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः।
संस्पर्शं यदि गच्छेत्त शवोदक्यान्त्यजैः सह॥
दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम्।"
दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम्॥
काश्यपः।
श्वसृगालान्त्यचाण्डालमद्यभाण्डरजस्वलाः।
यद्युच्छिष्टः स्पृशेत्तच कृच्छ्रं सान्तपनं चरेत्॥
एतद्दशासाभ्यासे सान्तपने धेनुद्वयं। ब्रह्मपुराणे।
"उच्छिष्टेन तु संस्पृष्टो विप्रः स्पृष्टस्तु तादृशः।
उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा॥
उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः।
उभौ स्नानं प्रकुर्वतं सद्य एव समाहितौ"॥

अनुच्छिष्टस्पर्शे उच्छिष्टस्नानस्य मननिति प्रायश्चित्तविवेकः॥ त्यक्तं। इति हेमचन्द्रः॥ (यथा, शतपथब्राह्मणे २।४१।११। "इतोच्छिष्टमिदम्"। इति। अवशिष्टो भक्तादिः। यथा मनुः ७।५६। "नचैवात्ययनं कुर्य्यात् नचोच्छिष्टः क्वचित् व्रजेत्")।

उच्छिष्टभोजनः, पुं, (उच्छिष्टं देवनैवेद्यावशिष्टं भो-जनं यस्य।) देवनैवेद्यबलिभोजनकर्त्ता। इति हेमचन्द्रः॥

उच्छिष्टमोदनं, क्ली, सिक्थम्। इति शब्दचन्द्रिका। मोम इति भाषा॥

उच्छीर्षकं, क्ली, (उत् उर्द्धस्थापितं शीर्षं मस्तकं येन। बहुव्रीहौ कप्।) उपधानम्। इति हलायुधः। बालिस इति भाषा॥

उच्छूनं, त्रि, (उत्+श्वि+क्त। ओदितश्चेति तस्य नः। ... [illegible] ...) स्फीतम्। उन्नतम्। ... [illegible]

[illegible]

उच्छ्व...

चन्द्रः॥ (यथा, हितोपदेशे २।६७।
("अन्यदुच्छृङ्खलं सत्त्वमन्यत् शास्त्रनियन्त्रितम्"॥
"सम्मूर्च्छदुच्छृङ्खलशङ्खनिस्वनः"।
इति माघः। १२। १३॥)

उच्छ्रयः, पुं, (उत्+श्रि+अच्।) पर्व्वतवृक्षादेरुच्चता। तत्पर्य्यायः। उच्छ्रायः २ उत्सेधः ३। इत्यमरः॥ ("प्राप्ते यूपोच्छ्रये तस्मिन् षड्बैल्वाः खादिरास्त्र षट्"। इति रामायणे॥)

उच्छ्रायः, पुं, (उत्+श्रि+घञ्।) उच्छ्रयः। उच्चता। इत्यमरः॥ (यथा, याज्ञवल्क्ये।
"यथाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च"।
"शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं"॥
इति मेघदूते। ६०॥)

उच्छ्रितं, त्रि, (उत्+श्रि+क्त।) संजातं। समुन्नद्धं। उच्चं। प्रवृद्धं। इति मेदिनी॥ (यथा, महाभारते १३। दानधर्म्मकथने। ८१। २६। "सर्व्व-सर्वैर्मांस्ति शङ्खैश्चाभिरुच्छ्रितैः"।) त्यक्तं। इति हेमचन्द्रः॥

उच्छ्वसितं, त्रि, (उत्+श्वस्+क्त।) प्रफुल्लं। विकसितं। इति हेमचन्द्रः॥ (भावे+क्त। जीवितम्। स्फुरितम्। प्राणनम्। यथा, मेघदूते। १०१।
"त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव"।
"सा तन्नु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्"।
इति शाकुन्तले ३ अङ्के॥)

उच्छ्वासः, पुं, (उत्+श्वस्+घञ्।) अन्तर्मुखश्वासः। ("प्रियामुखोच्छ्वासविकम्पितं मधु"। इति ऋतुसंहारे शीतवर्णनायां ३।) तत्पर्य्यायः। आनः २ प्राणः ३। इति हेमचन्द्रः॥ ग्रन्थादिखण्डपरिच्छेदः। आश्वासः। इति मेदिनी॥ (यथा, कादम्बर्य्यां ग्रन्थादिकालवचनकथने,—
"वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम्"॥)

उज्जयनी, स्त्री, विशालानगरी। इति त्रिकाण्डशेषः॥ उजैन इति पश्चिमदेशे ख्याता। वस्तुतस्तु उज्जयनी। इयं मालवदेशस्य नगरी। मोक्षदायकपुरीमध्येऽन्यतमा। पुरा विक्रमादित्यराजधानी च बभूव। महाकालेश्वराधिष्ठिता। (यथा, मेघदूते पूर्व्वमेघे। २८।
"सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः"॥)

उज्जयन्त, पुं, रैवतपर्व्वतः। इति हेमचन्द्रः॥

उज्जयिनी, स्त्री, उज्जयनीनगरी। तत्पर्य्यायः। विशाला २ अवन्ती ३ पुष्पकरण्डिनी ४। इति हेमचन्द्रः॥

[illegible]

[illegible]

इति मेदिनी ॥ (यथा, साहित्यदर्पणे । ३ परि-च्छेदः । "अस्माकं सखि ! वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलं" ।
"विचित्रोज्ज्वलवेशा तु रणन्नूपुरनिःस्वना" ॥)

उज्ज्वलं, क्ली, (उत् + ज्वल + अच् ।) स्वर्णम् । इति राजनिर्घण्टः ॥

उज्ज्वलः, पुं, (उत् + ज्वल + अच् ।) शृङ्गाररसः । इत्यमरः ॥ (यथा, नैषधे १ । १ ।
"स राशिरासीन्महसां महोज्ज्वलः" ॥)

उज्झ श त्यागे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) ओपध इत्येके । उज्झिष्यति । औज्झीत् । श उज्झती उज्झन्ती । इति दुर्गादासः ॥ अन्यत् उद्झधातौ द्रष्टव्यम् ॥

उज्झः, पुं, (उज्झतीति । उज्झ + अच् ।) त्यागः । विसर्जनम् । (यथा, मनुः ११ । ५६ ।
"ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः" ॥)

उज्झितं, त्रि, (उज्झ + क्त ।) उत्सृष्टम् । त्यक्तम् । वर्जितं । इति हलायुधः ॥ (यथा किराते । ५ । ६ ।
"अविरतोज्झितवारिविपाण्डुभिः" ।
"उज्झितायास्त्वया नाथ । तदैव मरणं वरम्" ।
इति रामायणे ७ । ३० । २० ॥)

उञ्छं, क्ली, (उछि + घञ् ।) पतितशस्यादानवत् शस्य ग्रहणं । यथा । उपात्तशस्यात् क्षेत्रात् शेषावच यने । उञ्छेन पतितशस्यादानवद्ग्रहणेन शिल्यते सञ्चीयते उञ्छशिलं उछि उञ्छे शिल उञ्छे इत्योरिगुपधात् कः इत्युपधात् कः "उञ्छशि-लम् । संघातं विगृहीतं विपर्यस्तञ्च नाम । "ऋत्वा न चेदुञ्छशिलेन वृत्तिः । फलेन मूलेन च वारिणा च" इति । समाहारद्वन्द्वे उञ्छं शिलञ्च । उञ्छं पृथक्पृथक् परिग्रहयन्तु ऋतम् । इति निगमाभिधाने शीलम् । पुमानुञ्छऋतशिलं इति वोपालिते पुंस्युञ्छः । भवभूतिकृतशिलोञ्छे इति गोवर्द्धनः । केचिदुञ्छशिलयोर्भेदमाहुः । "प्रति-पथात् शिलं क्षेत्रतोऽप्युञ्छ. प्रशस्यते" । इति तत्र शास्त्रादेर्निपातितपरित्यक्तमञ्जरीणां आदानं शिलं । शिलं धान्यमञ्जरीसंग्रहः । इति स्वामी च । एकैकशः कपोतवद्धान्यकणोद्ग्रहणमुञ्छ. । तदुक्तं उञ्छो धान्यकणोच्चय इति । शिलं ताल-चादि दण्डादि च । धर्म्मत्वात् सत्यमिति ऋतम् । इति उञ्छशिलशब्दटीकायां भरत ॥

उञ्छः, पुं, (उछि उञ्छे + घञ् ।) उञ्छशिलम् । इति जटाधरः ॥ (यथा, रामायणे । ४ । ६४ । ९ ।
"यदि जातो दशरथात् मदनुञ्छेन वर्त्तयेत्" ॥)

उञ्छनं, क्ली, (उछि + ल्युट् ।) आपणादिपतितकणादानम् । इति श्रीभागवतम् । उञ्छन खुंटिया कणोञ्च खुंटिया कणोञ्च कुड़ाइया कणोञ्च इत्यादि भाषा ॥

उञ्छशिलं, क्ली, (उञ्छश्च शीलश्चेति द्वन्द्वः ।) उञ्छवृत्तिः । सा तु ऋतमिति शब्देनात् क्षेत्रा-त्तद्ग्रहणम् । तत्पर्य्यायः । ऋतं २ । इत्यमरः ॥ उञ्छवृत्ति ३ उञ्छः ४ उञ्छं ५ शिलं ६ । इति वर्द्धिः ॥ (यथा, मनुः । ४ । ५ ।
"ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्" ॥)

उञ्छशील, त्रि, (उञ्छः शीलं व्रतं यस्य ।) उञ्छ-जीवी । उद्धृतधान्यस्य शेषाहरणकर्त्ता । इति पुराणम् ॥ क्षिपेच इति भाषा ॥

उटः, पुं, तृणपर्णादिः । इत्यमरटीकायां भरतः ॥

उटजः, पुं, क्ली, (उटात्तृणपर्णादयस्तेभ्यो जायते इति । उट + जन + ड ।) मुनीनां पत्ररचितगृहम् । तत्पर्य्यायः । पर्णशाला २ । इत्यमरः ॥ पर्णोटजः ३ । इति शब्दरत्नावली ॥ यथा रघुः ।
("आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः" । १ । ५० ।
"मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु" । १ । ५२ ।)
स्वहमात्रम् । इत्यमरमाला ॥

उठ उपघाते । (भ्वादिं-परं-सकं-सेट् ।) इति कवि-कल्पद्रुमः ॥ रुसादिः । ओठति खलः साधुम् । इति दुर्गादासः ॥

उड संहतौ । (परं-अकं सेट् ।) सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ उडपः । इति दुर्गादासः ॥

उडु, स्त्री क्ली, (उ रोषोक्तिपूर्व्वकं डयते इति । उ + डी + डु मितद्र्वादित्वात् डु ।) नक्षत्रम् । इत्यमरः ॥ ("सदोडुराजः कुकुभः करैर्मुखम्" । इति भागवतं । १० । २९ । २ । तथा रघुवंशे । १६ । ६५ ।
"इन्दुप्रकाशान्तरितोडुतुल्याः" ।)
जले स्त्री । इत्यमरटीकायां भरतः ॥

उडुपः, पुं स्त्री, (उडुनो जलात् पाति रक्षतीति । उडु + पा + क ।) भेलकम् । भेला माड् इत्यादि भाषा । तत्पर्य्यायः । प्लवः २ कोलः ३ । इत्यमरः ॥ भेलकः ४ उडूपः ५ तरणः ६ तारणः ७ तारक. ८ । इति शब्दरत्नावली ॥
("तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" ॥
इति रघुवंशे । १ । २ ।) चन्द्रे पुं । इति मेदिनी ॥
("अपश्यत् वदनं तस्य रश्मिवन्तमिवोडुपम्" ।
इति महाभारते । वनपर्व्वणि ॥ चर्म्मावनद्धपान-पात्रं । यथा,—
"चर्म्मावनद्धमुडुपं प्लवः काष्ठं करण्डवत्" ।
इति सज्जनः ॥)

उडुपतिः, पुं, (उडूनां पतिः ।) चन्द्रः । इति पुराण-ज्योतिषे ॥ ("अयाचितोपस्थितमम्बु केवलं रसा-त्मकस्योडुपतेश्च रश्मयः" । इति कुमारे । ५ । २२ ।
"परिमुग्धतां कथमिवोडुपतेः" । इति माघे ।)

उडुपथः, पुं, (उडूनां पन्थाः ।) आकाशम् । इति हेमचन्द्रः ॥

उडुम्बरं, क्ली, (उडु' वृणोतीति । उडु + वृ + अच् ।) ताम्रम् । इति मेदिनी ॥ ("ताम्रं शुल्वमुडुम्बरम्" । इति वैद्यकरत्नमाला । कर्षार्थे यथा,—
"उडुम्बरञ्च पर्य्यायैः कर्षएव निगद्यते" ॥
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमाध्यायः ।)
कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥

उडुम्बरः, पुं, (उडु + वृ + अच् ।) उदुम्बरवृक्षः । दमडुमुर इति भाषा । तत्पर्य्यायः । जन्तुफल २ यज्ञाङ्गः ३ हेमदुग्धकः ४ । इत्यमरः ॥ ब्रह्मवृक्षः ५ । इति रत्नमाला ॥ हेमदुग्धी ६ यज्ञफलः ७ दघोडुम्बरः ८ । इति शब्दरत्नाव...

६ क्षीरवृ...
इति जटा...
श्चो गुरुः...
ग्रन्थिघ्नो...
("उडुम्बरञ्च...
संनिभेमधुना...
इति वैद्यकरत्न...
. अन्यत् उडुम्बर...
राटेर निचेर...
सकमिति यावत्...

उडुम्बरपर्णी, स्त्री, (उ...
दन्तीवृक्षः । इति...
शब्दे अस्या विशेषो...

उडूपः, पुं स्त्री, (उ...
उडुपः । भेला इति...
द्विरूपकोषः ॥

उड्डयनं, क्ली, (उत् + डी...
ओड़ा इति भाषा । यथा...
"गतो विवस्वोड्डयने निरा...
("सोऽपि तमादाय...
इति पञ्चतन्त्रे ॥)

उड्डामरं, त्रि, (उत्कृष्टः डामर...
र्य्यायः । उद्भटं २ उत्कटम् ३...
शेषः ॥ (पुं तन्त्रविशेषः ॥)

उड्डीन, क्ली, (उत् + डी + क्त ।)...
पक्षिणां ऊर्द्ध्वगमनम् । इत्यमरः ।...
("अहं...
वेद्मि" । इति पञ्चतन्त्रे ॥)

उड्डीयमानः, त्रि, (उत् + डी...
विशिष्टपक्ष्यादिः । उ...

उड्डीशः, पुं, (उत् + डी + श...
गामिनां योगिनामियं...
स्वरत्वात् ।) आगमशास्त्रविशेषः...
मेदिनी ॥

उत्, अ, प्रश्नः । वितर्कः । ...
सन्देहः । इति शब्दरत्नावली ।
...प्यर्थे ॥)

उत अ, (उ शब्दे + क्त ।)...
अयः । वितर्कः । प्रश्नः । समुच्चये...
मेदिनी ॥ (अप्यर्थे । ...
उत शान्तम्" । इति पञ्चतन्त्रे ।...
दोषः स्यात् उत यथा मे...
इति शाकुन्तले । "वीरो रस...
एषः" । इति उत्तरचरिते ॥)

उतं, त्रि, (वे + क्त । यजादित्वात्...
तन्तुसन्तानः । बोना इति...
ऊतं २ स्यूतम् ३ । इत्यमरः ।

उतथ्य, पुं, मुनिविशेषः । स च बृ...
पुराणम् ॥
("अयस्त्वङ्गिरस. पुत्रा लोके स्मृ...

...नुजः, पुं, (उतथ्यस्यानुजः ।) वृहस्पतिः । इति
...ग्रब्दशेषः ॥ (यथा माघे २।६९ ।
"...थामुतथ्यानुजवत् जगादाग्रे गदाग्रजम्" ॥)
...नुजन्मा, [न्] पुं, (उतथ्यस्य अनुजन्मा अनुजः ।)
...स्पतिः । इति भूरिप्रयोगः ॥
..., व्य, (उत च आहो च अनयोः समाहारः ।)
...प्रश्नः । विचारः । इति मेदिनी ॥ विकल्पः ।
...मरः ॥
...मा स्वित् श्रेयसी तात! उताहो तेज
...म"। यक्षी वा राक्षसी वा त्वं उताहोऽसि
...ङ्गना" ॥ इति च महाभारते ॥)
...स्वित्, व्य, उताहो । विकल्पः । इत्यमर-
...ा ॥ ("अन्यदपि विदधातीह गर्भमुताहोस्वित्
...कायेन याति" । इति महाभारते ॥)
..., त्रि, (उद्गतं मनो यस्य । उत् + कन् ।)
...नाः । अन्यमनस्कः । इत्यमरः ॥
...त् श्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः"।
... मेघदूते । ११ । तथा कुमारे । ६ । ६५ ।
"अगमयदद्रिसुतासमागमोत्कः" ॥)
..., त्रि, (उद्गतः कटः आवरणं आवरको वा
...।) तीव्रम् । मत्तम् । इति मेदिनी ॥ विषमम् ।
... शब्दरत्नावली ॥ (यथा रामायणे ५ काण्डे ।
"...शांशुनिकराभासा हाराः कासाञ्चिदुत्कटाः ।
...मध्ये सुविन्यस्ता विरेजुर्हंसपाण्डराः" ॥)
... स्त्री, गुड़त्वक् । तेजपात इति ख्यातं इति
...रत् । इत्यमरभरतौ ॥ दारुचिनि । इति
...तम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायानाह
...प्रकाशे पूर्व्वखण्डे,
...पत्रञ्च वराङ्गं स्याद् भृङ्गञ्चोदन्तमुत्कटम्"।)
..., पुं, (उद्गतमदवृत्तेः उच्छब्दात् स्वार्थे स-
...दस्येति कटच् ।) मदः । इति शब्दरत्नावली ॥
...तमदहस्ती । इति हारावली ॥ शरः ।
...क्षुः । इति राजनिर्घण्टः ॥
..., स्त्री, (उद्गतः कटो यस्याः ।) सैंहलीलता ।
... राजनिर्घण्टः ॥
..., पुं, (उद्गतः कण्ठो यस्य ।) शृङ्गारस्य
...शबन्धान्तर्गतत्रयोदशबन्धः । आसन यस्य
...ङ्किः । तस्य लक्षणम् ।
"...रोमादौ च हस्तेन धारयेद्रमके पुनः ।
...र्पितकरः कामी बन्धश्चोत्कण्ठसंज्ञकः" ।
... रतिमञ्जरी ॥
..., स्त्री, (उत् + कठि + अ + टाप् ।) उत्क-
...का । इष्टलाभे कालक्षेपासहिष्णुता । इत्यमरः ॥
...मादिजातस्मृतिः । इति भरतः ॥ उद्वाञ्छकेम
...रणम् । इति मधुः ॥ उत्केन दयितस्मरणम् ।
...स सम्भूतिः ॥ प्रियाभिलाषादुन्मनस्कत्वं । इत्यन्ये ॥
"...गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालाम्"।
...ति मेघदूते । ८३ ।
"...स्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया"।
...ति शाकुन्तले । ४ र्थ अङ्के ॥)
...ण्ठितं, त्रि, (उत्कण्ठा जातास्य । उत्कण्ठा +
...इतच् ।) उत्कण्ठायुक्तम् । तत्पर्य्यायः । उत्कं २

उत्सुकं ३ उन्मनः ४ । इति हेमचन्द्रः ॥
("साश्रेणाश्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन" ।
इति मेघदूते । १०३ ॥)

उत्कण्ठिता, स्त्री, (उत्कण्ठा सञ्जातास्याः । उत्कण्ठा + इतच् + टाप् ।) स्वीयादिनायिकाभेदः । अस्याः लक्षणम् ।

"सङ्केतस्थलं प्रति भर्त्तुरना-
गमनकारणं चिन्तयति या" ।

अस्याश्चेष्टाः । अरति-सन्ताप-जृम्भाङ्गाक्षेपि-कम्प-रुदित-श्वासावस्थाकथनादयः । इति रसमञ्जरी ॥ (इयमेव विरहोत्कण्ठिता । यदुक्तं साहित्यदर्पणे तृतीयपरिच्छेदे ।

"आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः ।
तदागमनदुःखार्त्ता विरहोत्कण्ठिता तु सा" ॥

तत्रैव । १० परिच्छेदे अपह्नुतेरुदाहरणम् । यथा,—

'उत्कण्ठितासि तरले!
नहि नहि सखि! पिच्छिलः पन्थाः'॥)

उत्कता, स्त्री, (उत्कस्य भावः । उत्क + तल् ।) गजपिप्पली । इति शब्दचन्द्रिका ॥ उत्कस्य भावः । उत्कण्ठा ॥

उत्करः, पुं, (उत्कीर्य्यते इति । उत् + कॄ + अप् ।) धान्यादिराशिः । स्तूपः । इत्यमरः ॥
("सिक्तराजपथान् रम्यान् प्रकीर्णकुसुमोत्करान्" ।
इति रामायणे ॥)

उत्कर्षः, पुं, (उत् + कृष् + घञ् ।) अतिशयः । इत्यमरः ॥ (प्राधान्यं । श्रेष्ठता । यथा, "उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले" । इति शाकुन्तले २ य अङ्के ।
"निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्" ।
इति मनुः ४।२४४ ॥ वृद्धिः । यथा,—
"पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः" ।
इति रघुः । ४ । ११ ।) अतिशययुक्ते त्रि ॥ स्वकालात् परकालकर्त्तव्यः । इति स्मृतिः ॥

उत्कलः, पुं, (उत् + कल + अच् ।) ओड्रदेशः । इति त्रिकाण्डशेषः ॥ उड़िष्या इति भाषा । व्याधः । इति शब्दमाला ॥ पाखिमारा इति भाषा ।
("उत्कलादर्शितपथः कलिङ्गाभिमुखं ययौ" ।
इति रघुवंशे ४।३८ ॥ सुद्युम्नतनयः स्वनामख्यातो राजा । यदुक्तं महाभारते ।
"सुद्युम्नस्य तु दायादास्त्रयः परमधार्म्मिकाः ।
उत्कलश्च गयश्चैव विनताश्वश्च भारत! ॥
उत्कलस्योत्कला राजन् विनताश्वस्य पश्चिमा" ।)

उत्कलं, त्रि, (उत् + कल + अच् ।) भारवाहकम् । इति शब्दमाला । मुटे इति भाषा ॥

उत्कलिका, स्त्री, (उत् + कल + वुन् + टाप् ।) उत्कण्ठा । इत्यमरः ॥
("ततोऽन्येद्युः प्रतिपदं तत्तदुत्कलिकाभृता" ।
कथासरित्सागरे । २२।१०५ ।) कलिका । इति त्रिकाण्डशेषः ॥ ("उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणात्" । इति रत्नावली ।) तरङ्गः । ("क्षमायणीरत्नविक्षाघटखप्रतिक्षणो-त्कूलितशैवलाभाः" । इति माघः । ३ । ७० ।) हेला । इति हेमचन्द्रः ॥

उत्कलितः, त्रि, (उत् + कल + क्त ।) उन्मनाः । वृद्धिमान् । इति धरणी ॥ (उत्कण्ठितः ॥)

उत्का, स्त्री, (उद्गतं मनो यस्याः । उत् + कन् + टाप् ।) उत्कण्ठिता नायिका । इति रसमञ्जरी ॥

उत्काका, स्त्री, (उत्क + अक + अच् + टाप् ।) प्रतिवर्षप्रसूता गौः । इति शब्दचन्द्रिका ॥

उत्कारः, पुं, (उत्कीर्य्यते इति । उत् + कॄ + घञ् ।) धान्योत्क्षेपणम् । तत्पर्य्यायः । निकारः २ । इत्यमरः ॥ धान सारा इति भाषा । धान्यस्य राशीकरणं वा । इति भरतः ॥

उत्कूटं, क्ली, (उत् + कूट् + क ।) उत्तानशयनम् । इति हारावली ॥ चित् हइया शोया इति भाषा ।

उत्कुणः, पुं, (उत् + कुण + क ।) केशकीटः । उकुण इति भाषा । तत्पर्य्यायः । मत्कुणः २ कोणकुणः ३ उद्दंशः ४ किटिभः ५ । इति हेमचन्द्रः ॥

उत्कूटः, पुं, (उन्नतं कूटमस्य ।) छत्रम् । इति हारावली ॥

उत्कृष्टं, त्रि, (उत् + कृष् + क्त ।) उत्कर्षविशिष्टम् । अतिशययुक्तम् । प्रकृष्टम् । प्रशस्तम् । यथा,—

"उत्कृष्टमध्यमनिकृष्टजनेषु मैत्री,
यद्वत् शिलासु सिकतासु जलेषु रेखा ।
वैरं क्रमादधममध्यमसज्जनेषु,
यद्वत् शिलासु सिकतासु जलेषु रेखा" ॥

इत्युद्भटः ॥ (कर्षणवत्क्षेत्रादिः ॥)

उत्कृष्टभूमः, पुं, (उत्कृष्टा प्रशस्ता भूमिर्यस्मिन् ।) प्रशस्तभूमिः । इति जटाधरः ॥

उत्कोचः, पुं स्त्री, (उत्कोचति अशुभं नाशयतीति । उत् + कुच + क ।) घुस् इति ख्यातः । तत्पर्य्यायः । प्राभृतं २ ढौकनं ३ लञ्चा ४ कोशलिकं ५ आमिषं ६ उपाचारः ७ प्रदा ८ आनन्दा ९ हारः १० ग्राह्यं ११ अयनं १२ । इति हेमचन्द्रः ॥ उपदानकं १३ । इति त्रिकाण्डशेषः ॥ अपप्रदानं १४ । इति भूरिप्रयोगः ॥ (यथा, याज्ञवल्क्ये । १ । ३ ॥ ३८ ।
"उत्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत्" ।)

उत्क्रमः, पुं, (उत् + क्रम + अच् ।) व्यतिक्रमः । विपरीतिः । तत्पर्य्यायः । व्युत्क्रमः २ अपक्रमः ३ । इति हेमचन्द्रः ॥

उत्क्रोशः, पुं स्त्री, (उत्क्रोशति प्रहरे प्रहरे शब्दं करोतीति । उत् + क्रुश + अच् ।) कुररपक्षी । इत्यमरः ॥

उत्क्षिप्तः, पुं, (उत् + क्षिप + क्त ।) धुस्तूरवृक्षः । इति शब्दचन्द्रिका । ऊर्द्ध्वक्षिप्ते त्रि ॥

उत्क्षिप्तिका, स्त्री, (उत् + क्षिप् + क्तिन् + कन् + टाप् ।) कर्णभूषणविशेषः । तत्पर्य्यायः । कर्णान्दुः २ । इति हेमचन्द्रः ॥

उत्क्षेपणं, क्ली, (उत् + क्षिप् + ल्युट् ।) व्यजनम् । धान्यमर्द्दनवस्त्रम् । इति मेदिनी ॥ उदञ्चनम् । ऊर्द्ध्वक्षेपणम् ।
("अतिनामनोदितस्मौ बाहू घटोत्क्षेपणात्"
इति शाकुन्तले प्रथमाङ्के ।) षोड़शपणम् । इति

हेमचन्द्रः। (न्यायमते पञ्चकर्म्ममध्यपरिगणितम्। यथा भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च"। ६।)

उत्खला, स्त्री, (उत् + खल + अच् + टाप्।) मुरानाम गन्धद्रव्यम्। तत्पर्य्यायः। तालपर्णी २ तालपर्णी ३ तालाख्या ४ खला ५। इति शब्दचन्द्रिका। (मुराशब्देऽस्या विवरणं ज्ञेयम्।)

उत्खातं, त्रि, (उत् + खन + क्त।) उन्मूलितम्। इति जटाधरः। उपड़ान इति भाषा। ("व्याजितैः पत्रमुत्खातैर्भग्नैश्च बहुधा नृपैः"। इति रघुवंशे।४।३३। विदारितः। यथा,—
"शैलादाशु त्रिनयनवृषोत्खातपङ्कान्निमग्नः"। इति मेघदूते। ११६।)

उत्तं, त्रि, (उनत्ति स्म। उन्दी क्लेदने अकर्म्मकत्वात् कर्त्तरि क्तः। श्वीदितो निष्ठायामिति इडभावः।) आर्द्रम्। इत्यमरः।

उत्तंसः, पुं, (उत्तंसयति उत्तंस्यतेऽनेन वा तसिः सौत्रो भूषार्थः। पचाद्यच् हलश्चेति घञ् वा।) कर्णपूरः। कर्णाभरणम्। शेखरः। शिरोभूषणम्। इत्यमरः। मतान्तरे शेखरलिङ्गोऽपि। ("मोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽयागसि"। इति साहित्यदर्पणे। ३य परिच्छेदे।)

उत्तप्तं, क्ली, (उत् + तप + क्तः।) शुष्कमांसम्। इत्यमरः।

उत्तप्तः, त्रि, तप्तः। सन्तप्तः। परिप्लुतः। स्नातः। इति मेदिनी।

उत्तम्भितं, त्रि, उत्तम्भितम्। इति श्रीभागवतम्।

उत्तमः, त्रि, (अतिशयेन उत्कृष्टः। उत् + तमप्। इत्यादि ... । यद्वा उत्ताम्यति तमु ... उत्तम्यते वा घञ्। नोदात्तेति न वृद्धिः।) श्रेष्ठः। उत्कृष्टः। तत्पर्य्यायः। प्रधानं २ प्रमुखः ३ प्रवेकः ४ अनुत्तमः ५ मुख्यः ६ वर्य्यः ७ वरेण्यः ८ प्रवर्हः ९ अनवरार्द्ध्यः १० पराद्ध्यः ११ अग्र्यः १२ प्राग्रहरः १३ प्राग्र्यः १४ अग्र्यः १५ अग्रीयः १६ अग्रियः १७। इत्यमरः। मुखः १८ अग्रणीः १९ तट्टीका। (उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः"। इति हितोपदेशः।
"उत्तमादेवरात् पुंसः काङ्क्षन्ते पुत्रमापदि"। इति महाभारते।)

उत्तम, पुं, ... । तस्य लक्षणम्।
"... उत्तमः"। इति रसमञ्जरी। प्रियव्रतराजपुत्रः। स च ... । ... इति श्रीभागवतम्। (उत्तम... । यथा, विष्णुपुराणे। ३। ११। २।
"... ।")

उत्तमर्णिकः, पुं, (उत्तमर्णं विद्यते यस्य। उत्तमर्ण + ठन् + ... ।) दुर्भिक्षारण्ड। इति रत्नमाला। भीराड इति भाषा।

उत्तमर्णः, पुं, (उत्तममृणमस्य। ऋणमाधमर्ण्ये इति सूत्रे आधमर्ण्यशब्देन व्यवहारविशेषो लभ्यते।) ऋणदाता। इत्यमरः। महाजन इति भाषा। तत्पर्य्यायः। ऋणदः २। इति जटाधरः।
("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः।
दापयेत् धनिकस्यार्थमधमर्णात् विभावितम्"। इति मनुः। ८। ४७।)

उत्तमसंग्रहः, पुं, (उत्तमः संग्रहो यस्मिन्।) सम्यक् संग्रहणम्। तत्तु निर्ज्जने परभार्य्यया सह केशाकेशिपरस्पराश्लिष्टनसहासनादिरूपमिथुनीभावः। इति मिताक्षरा।

उत्तमसाहसः, पुं, (उत्तमः साहसोऽस्त्यस्मिन्।) दण्डविशेषः। स तु साशीतिपणसाहस्रः। यथा।
साशीतिपणसाहस्रो दण्ड उत्तमसाहसः"। इति याज्ञवल्क्यः। सहस्रपणमितोऽपि। यथा,
"पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः।
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः"। इति मनुः।

उत्तमा, स्त्री, (अतिशयेन उत्कृष्टा। उत् + तमप् + टाप्।) उत्कृष्टा नारी। तत्पर्य्यायः। वरारोहा २ मत्तकाशिनी ३ वरवर्णिनी ४। इत्यमरः। मत्तकाषिणी ५। मत्तकासिनी ६। इति तट्टीका। दुग्धिकाक्षुपः। इति मेदिनी। स्वीयादिनायिकाभेदः। तस्या लक्षणम्। अहितकारिण्यपि प्रिये हितकारिणी। अस्याश्चेष्टा उत्तमा एव। इति रसमञ्जरी।

उत्तमाङ्गं, क्ली, (उत्तमं प्रशस्तमङ्गम्।) मस्तकं। इत्यमरः। ("कश्चित् द्विषत्खड्गहृतोत्तमाङ्गः", इति रघौ। ७। ५१। "नमौ मतङ्गस्त्रवोत्तमाङ्गे", इति कुमारे। ७। ४१। मुखम्। यथा, मानवे १। ९३।
"उत्तमाङ्गोद्भवाज्ज्यैष्ठ्यात् ब्राह्मणस्यैव धारणात्।
सर्व्वस्यैवास्य सर्गस्य धर्म्मतो ब्राह्मणः प्रभुः"।
उत्तमाङ्गं मुखं इति तट्टीका।)

उत्तमारणी, स्त्री, इन्दीवरी। इति राजनिर्घण्टः। (इन्दीवरीशब्देऽस्या गुणादिकं बोध्यम्।)

उत्तरं, क्ली, (उत् + तॄ + अप्।) प्रतिवाक्यम्। इत्यमरः। जवाब इति यावनी भाषा। (यथा, माघे २। ३२।
"वचसस्तस्य सपदि क्रिया केवलमुत्तरम्"।)
तस्य व्युत्पत्तिः।
"उत्तीर्य्यते निकीर्य्यते प्रस्तुताभियोगोऽनेन"।
तस्य लक्षणम्।
"पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम्।
अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः"।
तस्य भेदाः।
"मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा।
प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः"। इति नारदः। (अथ उत्तरं नाम साधर्म्योपदिष्टे वा हेतौ वैधर्म्यवचनं वैधर्म्योपदिष्टे वा साधर्म्यवचनं यदा हेतुमधर्म्माणोविकाराः शीतकस्य हि व्याधेर्हेतुसाधर्म्यवचनं हिमशिशिरवातसं-
स्पर्शा इति ब्रुवतः ... विकाराः यथा ... प्रपचने हेतुवैधर्म्ये ... इति। एतत् सविपर्य्ययमुत्तरम्। विमानस्थानेऽष्टमोऽध्यायः।)

उत्तरः, पुं, विराटराजपुत्रः। ... महाभारते ४। गोहरणपर्व्व ... वीक्ष्य रथोत्तमे स्थितम्"। ... अथ तदा मङ्गलम्")। (... भेदः। यथा, "दक्षिणस्योत्तरे ... रामायणे। उत्तरदिक् ... व्युत्पत्तिः। शिवः। हरिः। ... ।

उत्तरः, त्रि, (उदतिशयेन उद्गतः। ...) ऊर्द्ध्वः। उदीची। (यथा, रामायणे,
"उत्तरे जाह्नवीतीरे हिमवच्छि ...")
उत्तमः इति मेदिनी अमरश्च।
यथा, रघुः १३। ७।
"स्थपा इवोपप्लविनः परेभ्यो
धर्म्मोत्तरं मध्यममाश्रयन्ते"।
"ब्रह्मधर्म्मोत्तरे ... "
इति महाभारतम्।) अनन्तरम्।
("वित्तं बन्धुर्वयः कर्म्म ...
एतानि मान्यस्थानानि ... "
इति मनुः। २। १३६।)

उत्तरकालः, पुं, (उत्तरः कालः।) ... गौणकाल। यथा, हरिहरपद्धतिः।
"एवमागामियागीयमुख्यकालादनन्तरम्।
सकालादुत्तरो गौणः कालः"।

उत्तरकुरुः, स्त्री, (उत्तरः कुरुः।) वर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः।
("विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः"।
इति किरातार्ज्जुनीये। १। ३५।)

उत्तरकोशला, स्त्री, (उत्तरे ...) अयोध्यानगरी। इति त्रिकाण्डशेषः।
("पितुरनन्तरमुत्तरकोशलान्
समधिगम्य समाधिजितेन्द्रियः"।
इति रघुः ९। १।
"यदुपतेः क्व गता मथुरापुरी
रघुपतेः क्व गतोत्तरकोशला"।
इति उद्भटः।)

उत्तरक्रिया, स्त्री, (उत्तरा ... क्रिया।) ... सांवत्सरिकश्राद्धादिः ...
"प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु।
क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ..."
इति विष्णुपुराणम्।

उत्तरङ्गं क्ली, (उत्तर + रम् + ... ।) ... दारु। इति हेमचन्द्रः। उत्तरङ्गः ...
"प्रत्यग्रहीत् पार्थिववाहिनीं तां
भागीरथीं शोण इवोत्तरङ्गः"। इति ...

उत्तरणं, क्ली, (उत् + तॄ + ल्युट्।) ... णम्। उत्तरण इति भाषा।

[म्] अ, (उत्तर+स्वार्थे+अतसुच् ।) उत्तरदेशकालात् । इति रायमुकुटः ॥ उत्तर ति भाषा । (यथा, रामायणे ४ । ५५ ।

।

शयेषु दर्भेषु कृत्वा चोत्तरतः शिरः ।
मरिष्यन्तः सर्व्वे संविविशुर्भुवि" ॥)

स्त्री, (उत्तरसमरं तारं ।) उत्तरतीरम् । सिद्धान्तकौमुदी ॥

पुं, (उत्तरः पक्षः ।) विचारसिद्धान्तः । पक्षम् । तत्पर्य्यायः । सिद्धान्तः१ समाधिः२ ३ ४ । इति त्रिकाण्डशेषः ॥ सिद्धान्तानुपिन्यासः । इति स्मृतिः ॥ यथा माघे ।
यन् पवनव्याधेर्गिरमुत्तरपक्षतां" ।२।९५॥)

, पुं, (उत्तरः पादः ।) चतुष्पादव्यवहातद्द्वितीयपादः । (यथाह बृहस्पतिः ।
चः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः" ।)
। इति व्यवहारतत्त्वम् ॥

ुनी, स्त्री, (उत्तरा फल्गुनी ।) अश्विन्यादिशतिनक्षत्रान्तर्गतद्वादशनक्षत्रम् । अस्या । दक्षिणोत्तरमिलिततारकाद्वयम् । इति ासः ॥ पर्य्यङ्करूपं तारकाद्वयं । इति दीपिा ॥ अस्या अधिष्ठात्री देवता अर्य्यमा । मित्र्यगुणः । अस्यां जातफलम् ।

ता दयालुः स्वजने सुशीलो
ालकीर्त्तिः सुमतिः प्रधानः ।
रो नरोऽत्यन्तमृदुस्वभाव-
दुत्तराफल्गुनिकाप्रसूतिः" ॥
कोष्ठीप्रदीपः ॥

ुनी, स्त्री, (उत्तरा फाल्गुनी ।) उत्तरीनक्षत्रम् । तत्पर्य्यायः । उत्तरा २ अर्य्यम ३ । इति हेमचन्द्रः ॥

पद्, [द्] स्त्री, (उत्तरा भाद्रपत् ।) उत्तरदानक्षत्रम् । इति ज्योतिषम् ॥

दपदा, स्त्री, (उत्तरा भाद्रपदा ।) अश्विन्याविंशतिनक्षत्रान्तर्गतषड्विंशनक्षत्रं । तत्यः । प्रौष्ठपदा २ अहिर्बुध्नदेवता ३ । इति न्द्रः ॥ अस्या रूपम् ।

उत्तरे सुमुखि तारमूर्त्तिभृत्तमाङ्कमिलितद्वितारके ।
ेखामरकचे न्टसुमतो
ैचराचलकलाः पलायिताः" ॥
कालिदासः ॥ पर्य्यङ्करूपमष्टताराात्मकं । इति काटीका ॥ अस्यां जातफलम् ।
'धनी कुलीनः कुशलः क्रियादौ
प्रापमान्यो बलवान् महौजाः ।
सत्कर्म्मकर्त्ता निजबन्धुभक्तो
च्चुत्तराभाद्रपदाप्रसूतः" ॥
कोष्ठीप्रदीपः ॥

दी, [न्] त्रि, (उत्तरं वदति यः । उत्तर+ +णिन् ।) उत्तरवक्ता । इति व्यवहारतत्त्वम् ॥ वामी इति भाषा । यथा याज्ञवल्क्यः २ । १७ ।
पूर्व्वपक्षेऽधरीभूते भवत्युत्तरवादिनः" ।)

उत्तरसाक्षी, [न्] त्रि, स्वपक्षसम्बन्धिसाक्ष्यं परिभाषतां साक्षिणां यः स्वयं शृणोति अर्थिना श्राव्यते वा सः । तथाच नारदः ।
"साक्षिणामपि यः साक्ष्यं स्वपक्षं परिभाषताम् ।
श्रवणात् श्रावणाद्वापि स साक्ष्युत्तरसंज्ञकः" ॥
इति व्यवहारतत्त्वम् । परसाक्षी इति भाषा ॥

उत्तरसाधकः त्रि, (उत्तरः साधकः ।) साधकसहायः । सहकारी ॥

उत्तरा, स्त्री, (उत्तर+टाप् ।) विराटराजकन्या । साभिमन्युपत्नी । इति मेदिनी ॥ (यथा महाभारते ३ । गोहरणपर्व्वणि ३१ । २३ ।
"स तत्र नर्म्मसंयुक्तमकरोत् पाण्डवो बहु ।
उत्तरायाः प्रमुखतः सर्व्वं जानन्नरिन्दमः" ॥)
उत्तरा दिक् । तत्पर्य्यायः । कौवेरी २ देवी ३ उदीची ४ । इति राजनिर्घण्टः ॥ (यथा महाभारते २ । दिग्विजयपर्व्वणि २८ । १७ ।
"एवं स पुरुषव्याघ्रो विजिग्ये दिशमुत्तराम्" ।)
अस्या दिशोऽधिपतिः कुबेरः कर्कटवृश्चिकमीनराशयश्च । यथा । समयप्रदीपः ॥
"मेषसिंहधनुः प्राच्यां दक्षिणस्यान्तु तत्परे ।
प्रतीच्यां तत्परे ज्ञेया उदीच्याञ्च ततः परे" ॥

उत्तरात्, अ, (उत्तराधरदक्षिणादाति इति उत्तरादातिप्रत्ययः ।) उत्तरा दिक् । इत्यमरटीकायां रायमुकुटः ॥ (यथा, ऋग्वेदे ६ । १९ । ९ ।
"आ ते शुष्मा वृष्ण एतु पश्चादोत्तरादधरादा पुरस्तात्" ॥)

उत्तराधिकारी, [न्] त्रि, (उत्तरं पूर्व्वस्वामिकसत्त्वनाशानन्तरं अधिकरोति पूर्व्वस्वामिकधने स्वाम्यमाप्नोतीति । उत्तर+अधि+कृ+णिन् ।) प्रथमाधिकारिणः पश्चादधिकारी । दायादः । ओयारिस् इति यावनी भाषा ॥ (मृतधनोत्तराधिकारिणो दायभागशब्दे द्रष्टव्याः ॥)

उत्तराभासः, पुं, (सदुत्तरम् इव आभासते । आङ्+भास+अच् ।) दुष्टोत्तरम् । तथा च कात्यायनः ।
"प्रकृतेन त्वसम्बन्धमत्यल्पमतिभूरि च ।
पक्षैकदेशव्याप्येव तच्च नैवोत्तरं भवेत्" ॥
इति व्यवहारतत्त्वम् ॥

उत्तरायणं, क्ली, (उत्तरा उत्तरस्यां अयनं सूर्य्यादेर्गमनम् । पूर्व्वपदात्संज्ञायामिति णत्वम् ।) सूर्य्यस्य उत्तरदिग्गमनकालः । स तु माघादिषण्मासात्मकः । इति हेमचन्द्रः ॥ (यथाह सूर्य्यसिद्धान्तः ।
"भानोर्मकरसंक्रान्तेः षण्मासा उत्तरायणम् ।
कर्क्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्" ॥
"माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादितः ।
उत्तरायणमादैस्त्रिभिः स्याद्दक्षिणायनम्" ।)
देवानां दिनम् । इति स्मृतिः ॥ (मकरसंक्रान्तिः ।
"वानप्रस्थाश्रमिनिर्विप्रैः करणीयो यागभेदः" ।
यदुक्तं मनुना ६ । १० ।
"ऋक्षेष्ट्याग्रयणञ्चैव चातुर्मास्यानि चाहरेत् ।
उत्तरायणञ्च क्रमशो दाक्षस्यायनमेव च" ॥
"शिशिरश्च वसन्तोऽपि ग्रीष्मः स्यादुत्तरायणे" ।
इति हारीते प्रथमस्थाने चतुर्थोऽध्यायः ॥
"शिशिराद्यास्त्रिभिस्तैस्तु विद्यादयनमुत्तरम् ।
आदानञ्च तदा दत्ते नृणां प्रतिदिनं बलम् ॥
तस्मिन् ह्यत्यर्थतीक्ष्णोष्णरूक्षामार्गस्वभावतः ।
आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् भुवः ॥
तिक्ताः कषायः कटुको बलिनोऽत्र रसाः क्रमात् ।
तस्मादादानमाग्नेयम्" । इति सूत्रस्थाने तृतीयेऽध्याये वाग्भटेनोक्तं ॥
"तत्र ते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च" ।
"उत्तरञ्च शिशिरवसन्तग्रीष्मास्तेषु भगवानाप्यायतेऽर्कस्तिक्तकषायकटुकाश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमपहीयते" ॥
इति सूत्रस्थाने षष्ठेऽध्याये सुश्रुतेनोक्तम् ॥)

उत्तराशाढ़ा, स्त्री, (उत्तरा आशाढ़ा ।) उत्तराषाढ़ानक्षत्रम् । इति भरतो द्विरूपकोषश्च ॥

उत्तराशापतिः, पुं, (उत्तराशायाः उत्तरदिशः अधिपतिः अधिष्ठाता ।) कुबेरः । इति हलायुधः ॥

उत्तराषाढ़ा, स्त्री, (उत्तरा आषाढ़ा ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकविंशनक्षत्रम् । अस्या रूपम् । सूर्पाकृतिताराचतुष्टयात्मकम् । अस्या अधिदेवता विश्वः । इति कालिदासः ॥ गजदन्तवदष्टतारामयम् । इति दीपिकाटीका ॥
तत्र जातफलम् । यथा कोष्ठीप्रदीपे ।
"दाता दयावान् विजयी विनीतः
सत्कर्म्मचेता विभवैः समेतः ।
कान्तासुतावाप्तसुखो नितान्तं
वैश्वे सुवेशः पुरुषो मनीषी" ॥)

उत्तरासङ्गः, पुं, (उत्तरे ऊर्द्ध्वभागे आसज्यते । उत्तर+आ+सञ्ज+घञ् ।) उत्तरीयवस्त्रं । इत्यमरः ॥
("कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम्" ।
इति कुमारे ५ । १६ ॥ तथा, रामायणे २ । ५० । ४८ ।
"ततश्चीरोत्तरासङ्गः सन्ध्यामन्वास्य पश्चिमाम्" ॥)

उत्तरीयं, क्ली, (उत्तरस्मिन् ऊर्द्ध्वदेहभागे भवम् । उत्तर+छ ।) उत्तरीयवस्त्रम् । दोव्‌ट् दोळा इत्यादि भाषा । तत्पर्य्यायः । प्रावारः २ उत्तरासङ्गः ३ बृहतिका ४ संव्यानम् ५ । इत्यमरः ॥ कक्षा ६ । इति जटाधरः ।
("अथास्य रत्नग्रथितोत्तरीयमेकान्तपाण्डुस्तनलम्बिहारम्" ।
इति रघुः १६ । ४३ । यथा रामायणे २ । ८८ । १४ ।
"उत्तरीयमिवासक्तं सुव्यक्तं सीतया तदा" ॥)

उत्तरेण, अ, (उत्तर+एनप् ।) उत्तरदिग्देशकालः । इत्यमरटीकायां रायमुकुटः ॥ यथा मेघदूते १६ । ७५ ।
("किञ्चित्पश्चात् व्रज लघुगतिर्भूय एवोत्तरेण" ।
"तत्रागारं धनपतिगृहानुत्तरेणास्मदीयम्" ॥)

उत्तरेद्युः, [स्] अ, (उत्तरस्मिन्नहनि इत्यर्थे सद्यःपरुदिति उत्तरशब्दादेद्युस् प्रत्ययो निपातितः ।) उत्तरस्मिन्नहनि । आगामिदिने । इति शब्दरत्नावली ॥

उत्तानं, त्रि, (उद्गतस्तानो विस्तारो यस्मात् ।) अगम्भीरम् । ऊर्द्ध्वमुखशयितम् । इति मेदिनी ॥ चित्

इति भाषा। (ऊर्द्धतलम्। यथा,
"उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये"।
इति कुमारे ३।४५। तथा, याज्ञवल्क्यः।
"पिष्टपात्रं तदुत्तानं कृत्वा विप्रान् विसर्ज्जयेत्"।
"उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः।
विरेकास्थापनैः स्नेहपानैर्गम्भीरमाचरेत्"।
इति चिकित्सास्थाने द्वाविंशेऽध्याये वाभटेनोक्तं॥
"उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम्।
नाभौ निधाय धाराम्बु शीतदाहनिवारणम्"॥
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्यायः॥)

उत्तानकः, पुं, (उत्+तन+ण्वुल्।) उच्चटावृक्षम्। इति रत्नमाला। (उच्चटाशब्देऽस्य विशेष उक्तः॥)

उत्तानपत्रकः, पु, (उत्तानं ऊर्द्धमुखं पत्रं यस्य। बहुव्रीहौ कन्।) रक्तैरण्डवृक्षः। इति राजनिर्घण्टः॥

उत्तानपादः, पुं, (उत्तानः उन्नतः पादः पदं यस्य।) राजविशेषः। स तु स्वायम्भुवमनुपुत्रः इति पुराणम्। (यथा, विष्णुपुराणे १।११॥
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।
द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव"।)

उत्तानपादजः, पुं, (उत्तानपादात् जायते यः। उत्तानपाद+जन्+ड।) उत्तानपादराजपुत्रः। तत्पर्य्यायः। ज्योतीरथः २ ग्रहाधारः ३ ध्रुवः ४। इति हारावली॥ (उत्तमः। यथा, विष्णुपुराणे १।११॥
"तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः।
अभीष्टायामभूद्ब्रह्मन्! पितुरत्यन्तवल्लभः॥२॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज!
स नातिप्रीतिमांस्तस्यां तस्याश्चाभूद्ध्रुवः सुतः॥३॥)

उत्तानशयः, त्रि, (उत्तानः शेते। शीङ् शयने पार्श्वादिषूपसंख्यानमिति अच्।) अत्यन्तशिशुः। तत्पर्य्यायः। डिम्भा २ स्तनपा ३ स्तनन्धयी ४। इत्यमरः॥ उत्तानसुप्तः॥

उत्तापः, पुं, (उत्+तप्+घञ्।) तेजः। उष्मा। सन्तापः॥ (यथा, हितोपदेशे।
"प्रयत्नः सर्व्वसिद्धीनामुत्तापः प्रथमः किल"।)

उत्तारः, त्रि, (उत्+तॄ+घञ्।) महान्। तत्पर्य्यायः। उदीर्णः २ उद्भटः ३ उदारः ४ उत्तमः ५। इति जटाधरः॥ (यथा प्रबोधचन्द्रोदये।
"संसारसागरोत्तारतरणिः"।) वमनम्। इति शब्दचिन्तामणिः॥

उत्तारी, [न्] त्रि, (उत्+तॄ+णिनि।) चपलः। इति भूरिप्रयोगः॥

उत्तालः, त्रि, (उत्+तल्+घञ्।) उत्कटः। श्रेष्ठः। त्वरायुक्तः। वरद्रुमः। इति मेदिनी॥
("स्फुरदुत्तालवेतालताण्डवं निर्विघ्नं सत्।
उत्तालं ... ..."।
इति कथासरित्सागरे ५१। १३८।
"... ...
... ..."।
इति उत्तरचरिते। ५ म अङ्के।) त्वरितः। इति हेमचन्द्रः॥

उत्तीर्णं, त्रि, (उत्+तॄ+क्त।) मुक्तम्। पारगतम्॥
("गुणोत्तीर्णस्यापि प्रकटितहताशेषतमसो
रवेस्तादृक्तेजो न हि भवति कन्यां गतवतः"।
इति पद्मसंग्रहे १८॥)

उत्तुङ्गः, त्रि, (उत् अतिशयेन तुङ्गः।) उच्चः। इति जटाधरः॥
("उत्तुङ्गशैलशिखरस्थितपादपाग्रे
काकः कृशोऽपि फलमाप्नुते सपक्षः"।
इति उद्भटः। उन्नतः। "पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति"। इति भर्तृहरिः १।७२॥)

उत्तुषः, पुं, (उद्गतस्तुषो धान्यत्वक् यस्मात्।) भ्रष्टधान्यम्। तत्पर्य्यायः। खाजिकः २ लाजाः ३। इति हारावली। खइ इति भाषा॥

उत्तेजना, स्त्री, (उत्+तिज्+णिच्+युच्।) प्रेरणा। व्यग्रकरणम्॥ (तीक्ष्णीकरणम्। यथा,
"व्याघट्टनोत्तेजनया मणीनाम्"। इति माघे।)

उत्तेजितं, स्त्री, (उत्+तिज्+णिच्+क्त।) अश्वचतुर्थगतिः। सा च मध्यवेगेन या गतिः। तत्पर्य्यायः। रेचितम् २। इति हेमचन्द्रः॥ प्रेरिते त्रि॥

उत्तेरितं, स्त्री, (उत्+तॄ+इतच्।) अश्वपञ्चमगतिः। तत्पर्य्यायः। उपकण्ठं २ आस्कन्दितकम् ३। इति हेमचन्द्रः॥ (तथा चोक्तं,—
"उत्तेरितोऽतिवेगान्धो न शृणोति न पश्यति"॥)

उत्तोलनं, स्त्री, (उत्+तुल्+ल्युट्।) ऊर्द्धनयनम्। तोला। इति भाषा॥

उत्त्यक्तः, त्रि, (उत्+त्यज्+क्त।) परित्यक्तः। ऊर्द्धक्षिप्तः। विरक्तः॥

उत्त्रासः, पु, (उत्+त्रस्+घञ्।) भयम्। इति शब्दरत्नावली॥

उत्थानं, स्त्री, (उत्+स्था+ल्युट्।) सैन्यम्। युद्धम्। पौरुषम्। पुस्तकम्। उद्यमः। (यथा रामायणे ५।
"मम धर्म्मार्थमुत्थानं न कामक्रोधसंश्रितम्"।)
उद्गमः। (अभ्युदयः। यथा रघुवंशे। ६।३१।
"निदर्शयामास विशेषदृश्य-
मिन्दुं नवोत्थानमिवेन्दुमत्यै"॥)
हर्षः। वास्तन्तः। अङ्गनम्। चैत्यः। (धनार्ज्जननिमित्ता चेष्टा। यथा मनुः ९।२१५॥
"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह।
न पुत्रभागं विषमं पिता दद्यात् कथञ्चन"॥)
मलोत्सर्गः। इति हेमचन्द्रः॥ तन्त्रम्। तन्तु खमण्डनम्। सैन्यं चिन्ता च। सन्निविष्टः। उपविष्टः। इत्यमरभरतौ॥ गात्रोत्तोलनम्। उठन इति भाषा। (यथा शाकुन्तले २ य अङ्के। "मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः"।) यथा च,
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्।
अन्यत्र मासयोगेऽपि द्वादश्यामेव कारयेत्"॥
इति तिथ्यादितत्त्वम्॥ (पुनर्व्विषम्। मरणानन्तरं पुनर्ज्जीवलाभः। यथा महाभारते।
"स चापि वरयामास पितुरुत्थानमात्मनः"॥)

उत्थानैकादशी, स्त्री, (उत्थानाय हरेः प्रबोधनाय या एकादशी। अस्यां भगवान् ... नारायणः योगनिद्रां ... ... उत्थानैकादशी। अथ विष्णु दिवसे रेवत्यन्तद्वादश्यां ... ... त्यन्तपादयोगे तु ... ... द्वादश्याम्। द्वादश्यामलाभे ... ... मात्रे केवलायां द्वादश्यां सन्ध्या ...
ॐ "महेन्द्ररुद्रैरभिपूज्यमानो
भवानृषिवन्दितवन्दनीय।
प्राप्ता तवेयं किल कौमुदाख्या
जागृष्व जागृष्व च लोकनाथ।
मेघा गता निर्म्मल एव चन्द्र
शारद्यपुष्पाणि च लोकनाथ।
अहं ददानीति च पुण्यहेतो-
र्जागृष्व जागृष्व च लोकनाथ"।
ततश्च।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज ...
त्वया चोत्थीयमानेन ... ...
इति पठेत्। इति कृत्यतत्त्वम्।

उत्थापनं, स्त्री, (उत्+स्था+णिच्+ल्युट्।) ... लनम्। उपस्थितीकरणम्।
("किन्नु मे सुकृतं भूयात् भर्त्तुरुत्था...
इति महाभारते १। आस्तीकपर्व्वणि ...

उत्थितं, त्रि, (उत्+स्था+क्त।) वृद्धि... उत्पन्नम्। इत्यमरमेदिनीकरौ।
"अर्द्धाचिता सत्वरमुत्थितायाः"।
इति कुमारे, ७।६१। रघुवंशे च ९।...
"शापान्तो मे ... ...
इति मेघदूते। ११२। "... ...
दुत्थितौ"। इति माघे। १।१२।)

उत्थिताङ्गुलिः, पु, (उत्थिता अङ्गुलयो य... विस्तृताङ्गुलिकरतलम्। ...
पड् इति भाषा॥

उत्पतः, पु, (उत् ऊर्द्ध्वं पतति गच्छति। ... अच्।) पक्षी। इति त्रिकाण्डशेषः॥

उत्पतनं, स्त्री, (उत्+पत्+ल्युट्।) ... गमनम्। इति मेदिनी॥
("अथोत्पतनमन्त्र सा ...
इति कथासरित्सागरे। विंशतौ ...

उत्पतिता, [ऋ] त्रि, (उत्+पत्+तृ...) गमनशीलः। उपरिगमनकर्त्ता इत्य...

उत्पतिष्णुः, त्रि, (उत्+पत्+इष्णुच्।) इ... शीलः। तत्पर्य्यायः। उत्पतिता २। (...
("ससङ्गरश्चक्षुसानामेकानामुत्पतिष्णु...
इति रघुः। ४।४७। तथा च रघौ ...
"मृगपतिरपि कोपात् सङ्कुचद्... ...

उत्पत्तिः, स्त्री, (उत्+पद्+क्तिन्।) उ... तत्पर्य्यायः। जनुः २ जननं ३ ज... उद्भवः ६। इत्यमरः॥ ... जातिः ९। इति जटाधरः॥ ... सम्भवः १२ जनुः १३। इति शब्दर...

या मनुः । २।६८ ।

उत्पत्तिप्रयुक्तः पुण्यः कर्मयोगं निबोधत" ।)

ह्यादिमतो याविर्भावः। यथा, मृत्पिण्डे विद्य-
मानस्य घटस्याविर्भाव एव उत्पत्तिर्यथा तथैव
रणात्मना विद्यमानानां तत्त्वानां आविर्भाव
त्पत्तिर्विवक्षिता ।)

:, त्रि, (उत् + पद् + क्त ।) उत्पत्तिविशिष्टः ।
तः । उद्भूतः ॥

, क्ली, (उत्पलतीति । पल गतौ पचाद्यच् ।)
जकमलम् । कुष्ठौषधिः । इति विश्वः ॥ पुष्पम् ।
ति मेदिनी ॥ जलजपुष्पमात्रम् । तच्च पद्मकुमु-
दि । तत्पर्य्यायः । कुवलयम् २ । इत्यमरः ॥ कुव-
म् ३ । इति जटाधरः ॥ कुवेलम् ४ । इति शब्द-
वली ॥ (यथा रघौ ३।३६ । "नवावतारं
मलादिवोत्पलम्" ।) तस्य गुणाः । कषायत्वम् ।
रत्वम् । शीतलत्वम् । पित्तकफरक्तनाशित्वञ्च ।
ति राजवल्लभः ॥ जलपुष्पविशेषः । कोंि इति
न्दी भाषा । तत्पर्य्यायः । अनुष्णम् २ रात्रि
र्मम् ३ जलाक्रयम् ४ हिमाजम् ५ निशापुष्पम्
अस्य गुणाः । शीतलत्वम् । स्वादुत्वम् । पित्त-
र्त्तिदोषनाशित्वम् । दाहश्रमवमिभ्रान्तिकृमि-
ज्वरहरत्वञ्च । इति राजनिर्घण्टः ॥
उत्पलानि कषायाणि पित्तरक्तहराणि च" ।
ति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम् ॥
स्मादम्लान्तरगुणे विद्यात् कुवलयोत्पले" ।
ति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमोऽध्यायः ॥)

, त्रि, (उद्गतं पलं मांसं यस्मात् सः ।) मांस-
ः । इति विश्वः हेमचन्द्रश्च ॥

गन्धिकं, क्ली, (उत्पलस्य गन्धइव गन्धो यस्य । स-
ञायां इत् संज्ञायां कन् ।) चन्दनविशेषः । तत्पर्य्यायः ।
ताक्षम् २ गोशीर्षम् ३ । इति शब्दमाला ॥

पत्रं, क्ली, (उत्पलस्य पत्रम् । नखक्षतपक्षे पत्र-
व ।) कुवलयदलम् । (यथा विष्णुपुराणे १।४।२६ ।
ततः समुत्क्षिप्य धरां स्वदंष्ट्रया
महावराहः स्फुटपद्मलोचनः ।
रसातलादुत्पलपत्रसन्निभः
समुत्थितो नील इवाचलो महान् ॥)
नखक्षतम् । इति हेमचन्द्रः ॥ तिलकम् । इति
र्णी ॥

शारिवा, स्त्री, (उत्पलमस्त्यस्याः उत्पलाकार-
पत्रत्वात् । अर्श आद्यच् । यद्वा उद्गतं पलमनया ।
ः उत्पला चासौ शारिवा चेति ।) श्यामलता ।
मरः ।(श्यामलताशब्देऽस्या गुणादिकं ज्ञेयम् ॥)

नी, स्त्री, (उत्पलानि सन्ति अस्यां तेषां
मूहो वा । उत्पल + इनि + ङीप् ।) पद्म-
मूहः । इति शब्दरत्नावली ॥ जलपुष्पविशेषः ।
टी कोंि इति हिन्दी भाषा । तत्पर्य्यायः ।
रविणी २ कुमुद्वती ३ कुमुदिनी ४ चन्द्रेष्टा ५
वलयिनी ६ इन्दीवरिणी ७ नीलोत्पलिनी ८ ।
था महाभारते तीर्थयात्रापर्व्वणि ३।८६।१५।
वह्वथ सा महाराज बिभर्त्ति रूपमुत्तमम् ।
मुष्विवोत्पलिनी शीघ्रमानेव शिवा शुभा" ।)

अस्या गुणाः । हिमत्वम् । तिक्तत्वम् । रक्तामय-
पित्तनाशित्वम् । वातकफकासतृष्णाश्रमवमिभ्रम-
नाशकारित्वञ्च । तस्या बीजगुणाः । स्वादुत्वम् । रूक्ष-
त्वम् । हिमत्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

उत्पली, स्त्री, तुषपर्पटी । इति मेदिनी । तुंसेर
चापड़ा इति भाषा ॥

उत्पवनं, क्ली, (उत् + पू + ल्युट् ।) कुशपिण्डिकायां पवि-
त्रमध्येन जलादेरुत्क्षेपणम् । तत्र क्रमः । "पवित्र-
द्वयमग्रे वामहस्तानामिकाङ्गुष्ठाभ्यां मूले दक्षिण-
हस्तानामिकाङ्गुष्ठाभ्यां उत्तानहस्ताभ्यां गृहीत्वा
आज्ये प्रक्षिप्य तयोर्मध्येनाज्यस्योत्क्षेपणम्" ।
इति कालेसिः ॥ "पवित्रद्वयमग्रे दक्षिणहस्ता-
नामिकाङ्गुष्ठाभ्यां मूले वामहस्तानामिकाङ्गुष्ठाभ्यां
गृहीत्वा दक्षिणहस्तोपरिभावेन अधोमुखो य-
त्नपाणिः पवित्रमध्येन प्रोक्षणीजलस्य किञ्चि-
दुत्तोलनम्" । इति पशुपतिः ॥ "पशुपत्युक्तक्रमेण
सामगानां मन्त्रोच्चारणपूर्व्वकं पवित्रद्वयमध्येनाज्या-
वाज्योत्क्षेपणं ॥ इति भवदेवभट्टः ॥

उत्पश्यः, त्रि, (उर्द्ध्वं पश्यतीति + उत् + दृश् + श ।)
उन्मुखः । ऊर्द्ध्वदृष्टिविशिष्टः । इति हेमचन्द्रः ॥

उत्पाटनं, क्ली, (उत् + पट + णिच् + ल्युट् ।) उत्ख-
नम् । मूल उपड़ान इति भाषा ॥ (यथा सुश्रुते ।
"निखातोत्पाटनं भङ्गः पतनं निर्गमस्तथा" ॥)

उत्पाटितं, त्रि, (उत् + पट + णिच् + क्त ।) कृतोत्-
पाटनं । तत्पर्य्यायः । उन्मूलितम् २ उत्खातम् ३ ।
इति जटाधरः ॥ आवर्हितम् ४ उद्धृतम् ५ । इति
हेमचन्द्रः ॥

उत्पातः, पुं, (उत् + पत् + घञ् ।) उत्पतति अक-
स्मादायाति यः । प्राणिनां शुभाशुभसूचकमहा-
भूतविकारभूकम्पादिः । इत्यमरटीकायां भरतः ॥
तत्पर्य्यायः । अजन्यम् २ उपसर्गः ३ । इत्यमरः ॥
स त्रिविधः । दिव्यः १ यथा अपर्व्वणि चन्द्रादित्य-
ग्रासादिः । आन्तरीक्ष्यः २ यथा, उल्कापात-
निर्घातादिः । भौमः ३ यथा भूकम्पादिः । इति
दीपिकाचण्डीटीके ॥ (उत्पातानां लक्षणादिकं
भरतो स्वभावप्रमवात् अदोषत्वञ्चोक्तं दृहत्संहि-
तायां ४६ अध्याये । यथा,—
"नरपतिदेशविनाशे केतोरुदयेऽथवा ग्रहेऽर्केन्द्वोः ।
उत्पातानां प्रभवः स्वर्त्तुभवश्चाप्यदोषाय ॥ ८२ ॥
येऽथ न दोषान् जनयन्त्युत्पातास्तानृतुस्वभावकृतान् ।
ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः ॥ ८३ ॥
वज्राशनिमहीकम्पसन्ध्यानिर्घातनिःस्वनाः ।
परिवेशरजोधूमरक्तार्कास्तमनोदयाः ॥ ८४ ॥
द्रुमेभ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः ।
गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥ ८५ ॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम् ।
अनग्निज्वलनस्फोटधूमरेण्वनिलाहतम् ॥ ८६ ॥
रक्तपद्मारुणं सान्ध्यं नभः क्षुब्धार्णवोपमम् ।
सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥ ८७ ॥
शक्रायुधपरीवेषविद्युच्छुष्कविरोहणम् ।
कम्पोद्वर्त्तनवैकृत्यं रसनं दरणं क्षितेः ॥ ८८ ॥
सरोनद्युदपानानां वृद्ध्यूर्द्ध्वतरणप्लवाः ।
सरणं चाद्रिगेहानां वर्षासु न भयावहम् ॥ ८९ ॥
दिव्यस्त्रीभूतगन्धर्व्वविमानाद्भुतदर्शनम् ।
ग्रहनक्षत्रताराणां दर्शनं च दिवाम्बरे ॥ ९० ॥
गीतवादित्रनिर्घोषा वनपर्व्वतसानुषु ।
शस्यवृद्धिरपां हानिरपापाः शरदि स्मृताः ॥ ९१ ॥
शीतानिलतुषारत्वं नर्दनं मृगपक्षिणाम् ।
रक्षोयक्षादिसत्वानां दर्शनं वागमानुषी ॥ ९२ ॥
दिशो धूमान्धकाराश्च सनभोवनपर्व्वताः ।
उच्चैः सूर्य्योदयास्तौ च हेमन्ते शोभनाः स्मृताः ॥ ९३ ॥
हिमपातानिलोत्पातविरूपाद्भुतदर्शनम् ।
कृष्णाञ्जननिभाकाशं तारोल्कापातपिञ्जरम् ॥ ९४ ॥
चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु ।
पत्राङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः ॥ ९५ ॥
ऋतुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभप्रदाः ।
ऋतोरन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः ॥ ९६ ॥
उन्मत्तानाञ्च या गाथाः शिशूनां भाषितञ्च यत् ।
स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः ॥ ९७ ॥
पूर्व्वं चरति देवेषु पश्चात् गच्छति मानुषान् ।
नचोदिता वाग्वदति सत्या ह्येषा सरस्वती ॥ ९८ ॥
उत्पातान् गणितविवर्जितोऽपि बुद्ध्वा
विख्यातो भवति नरेन्द्रवल्लभश्च ।
एतत्तन्मुनिवचनं रहस्यमुक्तं
यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी" ॥ ९९ ॥
उत्पतनं । उल्लम्फः । यथा, रामायणे ५।९८।२३ ।
"एकोत्पातेन ते लङ्कामेष्यन्ति हरिपुङ्गवाः" ।
उन्नतिः । वृद्धिः । यथा, हितोपदेशे ।
"करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणां" ।
उत्पत्तिः । यथा, महाभारते, वनपर्व्वणि ।
"बुद्धिरात्मानुगातीव उत्पातेन विधीयते ।
तदाश्रिता हि सा ज्ञेया बुद्धिस्तस्यैषिणी भवेत्" ॥)

उत्पादकः, पुं, (उत् + पद + णिच् + ण्वुल् ।) पशु-
विशेषः । तत्पर्य्यायः । शरभः २ कुञ्जरारातिः ३
अष्टपादः ४ । इति हेमचन्द्रः ॥

उत्पादकः, त्रि, (उत्पादयतीति । उत् + पद + णिच्
+ ण्वुल् ।) उत्पादयिता । जनकः । यथा मनुः ।
"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता" ।
२ । १४६ ॥

उत्पादनं, क्ली, (उत् + पद + णिच् + ल्युट् ।) जननम् ।
उत्पन्नकरणम् । इति व्याकरणम् ॥ (यथा मनुः ।९।२७ ।)
"उत्पादनमपत्यस्य जातस्य परिपालनम्" ।

उत्पादशयनः, पुं स्त्री, (उत्पाद ऊर्द्ध्वपादः सन् शेते
यः सः । उत्पाद + शी + ल्यु ।) टिट्टिभपक्षी । इति
हेमचन्द्रः ॥

उत्पादिका, स्त्री, (उत् + पद + णिच् + ण्वुल् +
टाप् ।) देहिकानामकीटः । इति त्रिकाण्डशेषः ॥
हिलमोचिका इति शब्दचन्द्रिका ॥ पूतिका ।
इति भरतो द्विरूपकोषश्च ॥

उत्पाली, स्त्री, (उत् + पल + घञ् + ङीप् ।) आ-
रोग्यम् । इति शब्दचन्द्रिका ॥

उत्पिञ्जलः, त्रि, (उत्कटः पिञ्जलो यस्य यस्मात् ।) भृश-
माकुलः । अतिशयव्याकुलः । तत्पर्य्यायः । समु-
त्पिञ्जः २ पिञ्जलः ३ । इति हेमचन्द्रः ॥

उत्प्रेक्षा, स्त्री, (उत्प्रेक्ष्यते इति उत् + प्र + ईक्ष + अ + टाप् ।) अनवधानम् । इति मेदिनी ॥ काव्यालङ्कारविशेषः । तस्य लक्षणम् ।

"सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्" ।

"अस्यार्थः । प्रकृतस्य उपमेयस्य समेन उपमानेन यत् सम्भावनं मिथ्यात्वेन वर्णनम्" । इति काव्यप्रकाशः ॥ (अस्या भेदा बहवः । यदुक्तं साहित्यदर्पणे, दशमपरिच्छेदे । ५६—६१ ॥

"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि ॥
तदष्टधापि प्रत्येकं भावाभावाभिमानतः ।
गुणक्रियास्वरूपत्वात् निमित्तस्य पुनश्च ताः ॥
द्वात्रिंशद्विधतां यान्ति तत्र वाच्याभिदाः पुनः ।
विना द्रव्यं त्रिधा सर्व्वाः स्वरूपफलहेतुगाः ॥
उक्तानुक्तोर्निमित्तस्य द्विधा तत्र स्वरूपगाः ।
प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः ॥
उक्त्यनुक्त्योः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा ।
अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं वहेत् ॥
मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः" ॥
विवृतिस्तु अलङ्कारशब्दे द्रष्टव्या ॥)

उत्प्लवनं, क्ली, (उत् + प्लु + ल्युट् ।) उल्लम्फनम् । लाफान इति भाषा । (यथा, मनुः । ५।११५ ॥

"द्रव्याणां चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम्" ॥)

उत्प्लवा, स्त्री, (उत् + प्लु + अच् + टाप् ।) नौका । इति शब्दरत्नावली ॥

उत्फालः, पुं, (उत् + फल् + घञ् ।) लम्फः ॥ ("तत्प्राप्य स कृतोत्फालः शक्तिदेवोऽथ साध्वसात्" । इति कथासरित्सागरे । १६ तरङ्गे ॥)

उत्फुल्लः, त्रि, (उत्फलतीति । उत् + फल् + क्त । आदितश्चेतीड्भावः उत्फुल्लसंफुल्लयोरुपसंख्यानमिति निष्ठातस्य लः ।) प्रफुल्लः । विकसितः । इत्यमरः । (यथा, किराते ।

("उत्फुल्लकमलकेसरपरागगन्धा-
दुद्धूतः सरसिजसम्भवः परागः" ।

स्फीतः । वर्द्धितः । (यथा, विष्णुपुराणे ।१।९।१३ ॥

"हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता" ।

आनन्दादिना विस्फारितः । यथा, रामायणे ॥

"अरक्षितैः समीपस्थैस्तावदुत्फुल्ललोचनैः" ।)

स्त्रीणां करणम् । उत्तानम् । इति मेदिनी ॥

उत्सः, पुं, (उनत्ति क्लेदयति । उन्द + उन्दिगुधिकुषिभ्यः किदिति सः । किदित्वदुक्तेर्न लोपः ।) प्रस्रवणम् । इत्यमरः ॥ उनइ इति भाषा । यत्र स्थाने मृत्ता जलं प्रसर्पति तत्र । इति भरतः ॥ स्वामी तु पर्व्वतादेरधःस्थानं यत्र स्थाने पतति निर्गच्छ च तद्वर्त्मभवति तत्रोदाहृ । तथा माघेऽप्युक्तम् ।

"दिरेचयति निर्झरादिप्रस्रवणमुत्स" ।

"उत्सः स्रवोऽम्बु यत्र स्यात् । इति कोष्ठकः" ॥

उत्सङ्गः, पुं, (उत्सज्यते मिलति दव । उत् + सञ्ज + घञ् ।) क्रोडम् । इति जटाधरः ॥ ("उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणाम्" ।

इति मेघदूते ८६ । तथा, विष्णुपुराणम् ।१।१२।५ ॥

"प्रययौ नगरं पुत्रम् उत्सङ्गारोहणोत्सुकम्" ॥

पर्व्वतादीनां शिखरदेशः । सानु ॥ यथा, रघुः ।

"शिलाविभङ्गैर्मृगराजशावस्-
तुङ्गं नगोत्सङ्गमिवारुरोह" ॥ ६ । ३ ॥

सौधादीनामुपरिभागः । छाद इति भाषा ॥

"सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः" । इति मेघदूते । २९ । अभ्यन्तरभागः ।

"वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः" ।

इति कुमारे । १ । १० । ऊर्द्ध्वतलः । वहिर्भागः ।

"हयदो वासितोत्सङ्गा निषण्णमृगनाभिभिः" ।

इति रघुवंशे । ४ । ७४ । सङ्गमः ॥ आलिङ्गनम् । विवाहः ॥ अधोभागः । गोंच इति भाषा ॥ यथा सुश्रुते । सूत्रस्थाने ।

"अभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति" । गर्भः । यथा, महाभारते परीक्षिज्जन्मनि । १४ । ६८ । १८ । १६ ॥

"आसीन्मम मतिः कृष्ण ! पूर्णोत्सङ्गा जनार्दन" ॥)

उत्सर्गः, पुं, (उत् + सृज् + घञ् ।) त्यागः । दानम् । वर्ज्जनम् । (यथा, कुमारे । ७ । ३५ ॥

"ओष्ठगुणोत्सर्गविनीतवेषाः" ।

"तयोत्सर्गद्भुततरगतिस्तत्परं वर्त्म तीर्णः" ।

इति मेघदूते । २० ॥ यथा, मनुः । ११ । १९३ ।

"तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च" ॥)

सामान्यविधिः । इति हेमचन्द्रः ॥ (यथा, कुमारे । २ । २७ ।

"अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः" ॥)

सामिककर्त्तव्यक्रियाविशेषः । इति तिथ्यादितत्त्वम् । अथ वैधोत्सर्गविधिः । स्नानसन्ध्याचमनानि कृत्वा नारायणनवग्रहगुरून् संपूज्य देयद्रव्यं वामहस्तेन धृत्वा दक्षिणहस्तेन त्रिरभ्युक्ष्य तद्द्रव्याधिपतिदेवतां सम्प्रदानञ्च अर्च्चयित्वा संकल्प्य कुशतिलजलत्यागपूर्व्वकदानम् । इति स्मृतिः ॥ (अपानवायोर्व्यापारः । मलमूत्रादिवर्ज्जनम् ॥ उत्सृज्यते विण्मूत्रमनेनेति व्युत्पत्त्या पायिन्द्रियम् । यथा,—यथा, मनुः । १२ । १२१ ।

"मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् ।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्" ॥)

उत्सर्जनं, क्ली, (उत् + सृज् + ल्युट् ।) उत्सर्गः । तत्पर्य्यायः । त्यागः १ विहापितं २ दानं ३ विसर्ज्जनं ४ विश्राणनं ५ वितरणं ६ स्पर्शनं ७ प्रतिपादनं ८ प्रादेशनं ९ निर्व्वपणं १० अपवर्जनं ११ अंहतिः १२ । इत्यमरः ॥ (सामिककर्त्तव्यक्रियाविशेषः । (यथा, मनु । ४ । ९६ ।

"पुष्ये तु छन्दसां कुर्य्याद्वहिरुत्सर्ज्जनं द्विजः ।
माघशुक्लस्य वा प्राप्ते पूर्व्वाह्णे प्रथमेऽहनि" ॥)

उत्सर्पिणी, स्त्री, (उत् + सृप् + णिनि + ङीष् । उत्सर्पतीति अर्थे वाचलिङ्ग एव ।) जिनानां कालविशेषः । यथा,—हेमचन्द्रः ।

"कालो द्विविधोऽवसर्पिण्युत्सर्पिणीविभेदतः ।
सागरकोटिकोटीनां विंशत्या स समाप्यते ॥

अवसर्पिण्यां षड्भरा उत्सर्पिण्यां त एव विपरीताः । एवं द्वादशभिररैर्विवर्त्तते ... (उद्गमनशीला । यथा, प्राकृते ।

"उत्सर्पिणी अपि महतां प्रार्थना" ...

उत्सर्प्यां, स्त्री, (उत् + सृ + ण्यत् ।) गौः । इति जटाधरः । ... गाइ इति भाषा ।

उत्सवः, पुं, (उत् + सू + अप् ।) आमोदः । तत्पर्य्यायः । क्षणः २ ... ४ महः ५ । इत्यमरः । (यथा, ...

"तस्मादेताः सदा पूज्या
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवे...

उत्सेकः । इच्छाप्रसरः । कोपः । ... (उन्नतिः । अभ्युदयः ।

"उत्सवे ...

इति हितोपदेशे । १ । ...

उत्सादनं, क्ली, (उत् + सद ... क्षेपः । उद्वाहनम् । उद्वर्त्तनम् ।

("उत्सादनञ्च गात्राणां
इति मनुः । २ । २०९ । विनाशः ।

"पूर्व्वं छात्रवधं कृत्वा ...
छात्रस्योत्सादनं भूयो न ...
इति रामायणम् । १ । ७४ । ...

द्विगा क्षतस्य संशोधनम् । यथा,—

"अपामार्गोऽश्वगन्धा च
उत्सादने प्रशस्यन्ते
"उत्सादनात् भवेत् स्त्रीणां
प्रहर्षसौभाग्यमृजावर्णादिगुण...
इति चिकित्सितस्थाने २४

उत्सादितं, त्रि, (उत् + सद + णिच् ... सादनम् । उद्वर्त्तितम् । ...
(यथा, महाभारते ७।८८।१० ...

"उत्सादितः कषायेण बलवद्भिः सु...
आप्लुतः साधिवासेन ...

उत्सारकः, पुं, (उत्सार्य्यते ...
उत् + सृ + णिच् + ण्वुल् ।)
हेमचन्द्रः । उत्सारकर्त्ता ॥

उत्सारणं, क्ली, (उत् + सृ + णिच् + ...
करणम् । चालनम् । स्थानान्तर...

उत्साहः, पुं, (उत् + सह् + घञ् ।) ...
पर्य्यायः । अध्यवसाय २ । इत्य...
इति मेदिनी ॥ कल्याणम् । ...
शब्दरत्नावली ॥ ...

"रतिर्हासश्च शोकश्च ...
जुगुप्सा विस्मयश्चेत्यष्टौ प्रोक्ताः ...
भावकविशेषः । तल्लक्षणं यथा,—

"उत्साहः स्यात् रसे हास्ये ...
वंशवृद्धिकरः पादैर्मयीरप्रसिद्धः ...
इति सङ्गीतदामोदरः ॥

उत्साहवर्द्धनं, क्ली, (उत्साहं वर्द्धयति ...
+ वृध + ल्युट् ।) उत्साहवृद्धिः । इत्य...
मरः ॥

उत्+सिच्+क्त।) उद्धतः। इति
॥ गर्व्वितः। वर्द्धितः। उच्छ्रितः।
ततम्॥ (यथा, मनुः ८। ७१।
गाञ्च साक्ष्येषु वदतां मृषा।
तां वाचमुत्सिक्तमनसां तथा"।
ष्टि तौ पापौ कालपाशवशङ्गतौ"।
१म काण्डे॥)
, (उत्+सिच्+शानच्।) उद्दिच्य-
मान्। इति श्रीभागवतम्॥
त् उद्योगं सुवति सौति सुनोति वा।
शेः। विचिसंज्ञापूर्व्वकत्वात् गुणा-
पे आगमशास्त्रस्यानित्यत्वात्तुगभावो
ंज्ञायां कन्॥ यद्वा उत् सुवति।
मेतङ्गादित्वात् डुः। सत्स्विति क्विप्
॥ इति क्रमः॥ उत्+सु+क्विप्+
न्धतकर्म्मोद्यतः। तत्पर्य्यायः। इष्टा-
२। इत्यमरः॥ उत्कण्ठितः। इति
(यथा, रामायणे आदिकाण्डे।
ति राजा तु कुशलार्थं तवानघे।
त्यशः पुत्रि मोत्सुका भूः कदाचन"॥
तापि स्तिमिता समर्य्याम्"।
णे २।२२॥)
दूरं सूर्य्यमतिक्रान्तः।) दिनावसानम्।
न्द्रः॥
(उत्+सृज्+क्त।) त्यक्तोत्सर्गः।तत्-
त्यक्तः २ हीनः ३ विधुतः ४ समुज्-
झितः ६। इत्यमरः॥ (यथा, याज्ञवल्क्यः।
त्पष्टप्रभवः सूतिकागन्तुकादयः"॥)
(उत्+सिच्+ल्युट्।) ऊर्द्धसेकः।
उपचन इत्यादि भाषा।
उत्+सिध्+घञ्।) पर्व्वतवृक्षादीनां

त्रयोजनोत्सेधो दशयोजनमण्डलः"॥
भारते गजकूर्म्मयुद्धे। २९। ३१।)
(यथा, कुमारे ५। ८।
ोत्सेधविशीर्णसंहति"॥
ः। यथा, कुमारे ५।२४।
ोत्सेधनिपातचूर्णिताः"।)
। इत्यमरः॥ संहननम्। इति हेमचन्द्रः॥
धमुच्चार्य्यशिरस्तनुत्वम्"।
प्रकाशे शोथाधिकारे॥
संहतं शोफं तमाङ्गर्निचयादतः"।
दानस्थाने त्रयोदशाध्याये वाभटेनोक्तम्॥)
+क्विप्+तुक्। पृषोदरादित्वात् साधुः।)
सर्गान्तर्गत उपसर्गविशेषः। अस्यार्थः।
उत्कर्षः। प्राकट्यम्। नैकट्यम्। इति
ः॥ प्रकाशः। विभागः। प्राबल्यम्।
म्। शक्तिः। प्राधान्यम्। बन्धनम्।
मोक्षः। लाभः। ऊर्द्धकर्म्म। इति
॥
उद्+अच्।) जलम्। इति शब्दरत्नावली।
गत्यान्तोदधिसंप्लवोदे

नारायणस्योदरनाभिनालात्"।
इति श्रीभागवते। तथा च गीतायाम्।२।४६।
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके"॥)

उदक्, [च्] त्र, (उद्+अञ्च्+क्विन्।) उत्तर-
दिग्देशकालाः। इति मेदिनी॥

उदकं, क्ली, (उनत्तीति। उन्दी क्लेदने+ण्वुल्। उद-
कमिति २।३९। उणादिसूत्रेण साधु।) जलम्।
इत्यमरः॥
("आनीत्वा पङ्गतां धूलिमुदकं नावतिष्ठति"।
इति माघः २।३४॥ तथा श्रीभगवद्गीता। २।४६॥
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके"।
"उदकस्योदः एकहलादौ। पाणिनिः।६।३।५९।
इति विकल्पः। उदकुम्भः। उदककुम्भः। यथा,
भट्टिः। २। २०। "तपःकृशाः शान्त्युदकुम्भ-
हस्ताः"॥ उदशब्दोऽप्युदकपर्य्याय इति माघ-
टीका। उदकस्योदः संज्ञायामिति रक्षितः।
यथा, कुमारे ५।२६। "सहस्यरात्रीरुदवास-
तत्परा"॥ इति उज्ज्वलदत्तः।
वारिशब्देऽस्य विवरणं ज्ञेयम्॥)

उदकपरीक्षा, स्त्री, (उदकस्य उदकेन वा परीक्षा।)
दिव्यविशेषः। यथा। अथोदकपरीक्षा।

पितामहः।

"तोयस्याथ प्रवक्ष्यामि विधिं धर्म्मं सनातनम्।
मण्डलं पुष्पधूपाभ्यां कारयेत् सुविचक्षणः॥
शरान् संपूजयेद्भक्त्या वेणवश्च धनुस्तथा"।
तत्र प्रथमतो वरुणं पूजयेत्। यथा नारदः।
"गन्धमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः।
वरुणाय प्रकुर्व्वीत पूजामादौ समाहितः"॥
ततो धर्म्मावाहनादिसकलदेवतापूजाहोमसम-
न्त्रकप्रतिज्ञापत्रशिरोनिवेशान्तं कर्म्म कुर्य्यात्।

कात्यायनः।

"शरांस्त्वनायसाग्रांस्तु प्रकुर्व्वीत विशुद्धये।
वेणुकाष्ठमयांश्चैव क्षेप्ता च सुदृढं क्षिपेत्"॥

पितामहः।

"क्षेप्ता च क्षत्रियः कार्य्यस्तद्वृत्तिर्ब्राह्मणोऽथवा॥
अक्रूरहृदयः शान्तः सोपवासस्तथा शुचिः॥
इषून् प्रक्षिपेद्धीमान् मारुते वाति वा भृशम्।
विषमे भूप्रदेशे च वृक्षस्थाणुसमाकुले"॥*॥

नारदः।

"क्रूरं धनुः सप्तशतं मध्यमं षट्शतं मतम्।
मन्दं पञ्चशतं प्रोक्तमेष ज्ञेयो धनुर्विधिः"॥
अङ्गुलीनां सप्ताधिकं शतं यस्य धनुषः परिमाणं
तत् सप्तशतम्। एवं षट्शतादिकम्॥*॥

पितामहः।

"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम्।
हस्तानान्तु शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः॥
तेषाञ्च प्रेषितानान्तु शराणां शास्त्रदर्शनात्।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा॥
शराणां पतनं ग्राह्यं सर्पणं परिवर्ज्जयेत्।
सर्पन् सर्पन् शरो याति दूराद्दूरतरं यतः"॥
पतनं ग्राह्यमिति शरपतनस्थानपर्य्यन्तं गच्छेदि-
त्यर्थः। तेन प्रसरणमत्येऽपि पतनस्थानकपर-

ग्रहणं तत्र प्रथमतः पुरुषान्तरेण तत्स्थाने शरः
आनेतव्यः॥*॥ नारदः।
"नदीषु नातिवेगासु तडागेषु सरःसु च।
ह्रदेषु स्थिरतोयेषु कुर्य्यात् पुंसां निमज्जनम्"॥
नातिवेगासु स्थितिविरोधिवेगशून्यासु॥*॥
विष्णुः। पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्ज्जिते
तस्य नाभिमात्रजले ममस्यारागद्वेषिणः पुरुष-
स्यान्यस्योरू गृहीत्वा अभिमन्त्रिताम्भः प्रविशेत्।
तत्समकालञ्च नातिक्रूरमृदुना धनुषा पुरुषो-
ऽपरः शरमोक्षं कुर्य्यादिति तस्य शोध्यस्येत्यर्थः।
अन्यथा तस्येति व्यर्थ स्यात्॥*॥
अन्यपुरुषस्य स्तम्भधारणमाह स्मृतिः।
"उदके प्राङ्मुखस्तिष्ठेद्धर्म्मस्थूणां प्रगृह्य च"॥*॥
प्राड्विवाककर्त्तृकजलाभिमन्त्रणमाह पितामहः।
तोय त्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्।
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे"॥*॥
शोध्यकर्त्तृकाभिमन्त्रणमाह याज्ञवल्क्यः।
"सत्येन माभिरक्षस्व वरुणेत्यभिशाप्य कम्।
नाभिमात्रोदकस्थस्य गृहीत्वोरू जलं विशेत्"॥
मा मां। अभिशाप्य शपथं कारयित्वा। कं
जलम्। विशेत् निमज्जेत्॥*॥ तोरणञ्च निम-
ज्जनसमीपे समे स्थाने शोध्यकर्णप्रमाणोच्छ्रितं
कार्य्यम्। यथा नारदः।
"गत्वा तु तज्जलस्थानं तटे तोरणमुच्छ्रितम्।
कुर्व्वीत कर्णमात्रन्तु भूमिभागे समे शुचौ"॥*॥
शरमोक्षे विशेषमाहतुर्नारदबृहस्पती।
"शरप्रक्षेपणस्थानाद्युवा जवसमन्वितः।
गच्छेत् परमया शक्त्या यत्रासौ मध्यमः शरः॥
मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः।
प्रत्यागच्छेत्तु वेगेन यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्ज्जलगतं सम्यक् तदा शुद्धिं विनिर्द्दिशेत्॥
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात्।
स्थानाद्वान्यत्र गमनाद्यस्मिन् पूर्व्वं निवेशयेत्"॥*॥
जविनौ विशेषयति नारदः।
"पञ्चाशतो धावकानां यौ स्यातामधिकौ जवे।
तौ च तत्र नियोक्तव्यौ शरानयनकर्म्मणि"॥
एकाङ्गस्य दर्शनादिति कर्णाद्यभिप्रायेण।
"शिरोमात्रन्तु दृश्येत न कर्णौ नापि नासिके।
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्द्दिशेत्"॥
इति विशेषाभिधानात्। कात्यायनः।
"निमज्योत्प्लवते यस्तु दृश्येत् प्राणिना नरः।
पुनस्तत्र निमज्जेत दंशचिह्नविभावितः"॥
जलान्तर्गतमत्स्यजलौकादिना दष्टः समुत्प्लवते यदि
तदा दष्टे दृष्टे पुनर्निमज्जनीय इत्यर्थः॥*॥

पितामहः।

"गन्तुश्चापि च कर्त्तुश्च समं गमनमज्जनम्।
गच्छेत् तोरणमूलात्तु शरस्थानं जवी नरः॥
तस्मिन् गते द्वितीयोऽपि वेगादादाय शायकम्।
गच्छेत्तोरणमूलन्तु यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।

अन्तर्ज्जलगतं सम्यक् ततः शुद्धिं विनिर्द्दिशेत्”। अत्र मज्जनसमकालगमनाभिधानात् शरमोक्षसमकालं गमनं शूलपाण्युक्तमदुक्तम्। मज्जनसमकालक्षिप्तं मध्यमं शरमादायेत्यपरमुक्तमपि प्रमाणशून्यम्। ततश्च त्रिषु शरेषु मुक्तेषु एको वेगवान् मध्यमशरपतनस्थानं गत्वा तमादाय तत्रैव तिष्ठति। अन्यस्तु पुरुषो वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति एवं स्थितयोस्तृतीयाया करतालिकायां प्राड्विवाकदत्तायां शोध्यो निमज्जति तत्समकालमेव तोरणमूलस्थितोऽपि द्रुततरं मध्यमशरपतनस्थानं गच्छति शरग्राही च तस्मिन् प्राप्ते द्रुततरं तोरणमूलं प्राप्यान्तर्ज्जलगतं यदि न पश्यति तदा शुद्धो भवतीति वस्तुलार्थः। *। *। तत्र प्रयोगः। उक्तलक्षणजलाशयनिकटे तथा तोरणं विधाय उक्तदेशे लक्ष्यं कृत्वा तोरणसमीपे सशरं धनुः संपूज्य जलाशये वरुणमावाह्य पूजयित्वा तत्तीरे धर्म्मादींश्च देवान् हवनान्तमिष्ट्वा दक्षिणां कृत्वा शोध्यस्य शिरसि प्रतिज्ञापत्रं बद्धा प्राड्विवाको जलमभिमन्त्रयेत्। वक्ष्यमाणमन्त्रेण।

ॐ “तोय त्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्।
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे”। इति॥

शोध्यस्तु ॐ “सत्येन माभिरक्षस्व वरुण” इत्यनेन जलमभिमन्त्र्य गृहीतस्थूणस्य शोध्यनाभिमात्रोदकावस्थितस्य बलीयसः प्राङ्मुखस्य पुरुषस्य समीपं जलमध्ये गच्छेत्। ततः शरेषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने मध्यमशरं गृहीत्वा जविन्येकस्मिन् पुरुषे स्थिते अन्यस्मिंश्च तोरणमूलस्थिते प्राड्विवाकेन तालत्रये दत्ते शोध्यो गृहीतस्थूणप्राङ्मुखपुरुषस्योरू गृहीत्वा निमज्जति तत्समकालमेव तोरणमूलस्थोऽपि मध्यमशरस्थानं द्रुतं गच्छति। ततः शरग्राही च तस्मिन् प्राप्ते द्रुतं तोरणमूलं प्राप्य जलान्तस्थं यदि न पश्यति तदा शुद्धः। कर्णाद्यङ्गं विना शिरोमात्रदर्शनेऽपि शुद्धः। मज्जनस्थानादन्यत्रगमनेऽप्यशुद्धः। ततो दक्षिणादिकं दद्यात्”। इति दिव्यतत्त्वम्।

उदकोर्द्दः, पु, (उदेन जलेन कोर्द्दः व्याप्तः।) महाकरञ्जः। इति राजनिर्घण्टः॥

उदकीर्य्यः, पुं, (उदेन कीर्य्यः।) करञ्जविशेषः। इति रत्नमाला। हालकरञ्जा डहरकरञ्ज इत्यादि भाषा। (अस्योक्तपर्य्यायो भावप्रकाशे।
“उदकीर्य्यस्तु षड्ग्रन्था हस्तिवारुणी।
मर्कटी वायसी चापि करञ्जी करभञ्जिका”॥
तुल्या अस्य करञ्जशब्दे ज्ञातव्याः।)

उदन्या, स्त्री, (उदकं जलं शुद्धियायामैषतीति। उदक+संज्ञायामिति दत्।) रजस्वला। ऋतुमती। इत्यमरः। (यथा, मनुः। ४।५७।
“नोदक्यामभिभाषेत यज्ञं गच्छेदनावृतः”॥)

उदगद्रिः, पुं, (उदगुत्तरे दोऽद्रिः।) हिमालयपर्व्वतः। इति हेमचन्द्रः॥

उदगयनं, क्ली, (उदक् उत्तरस्यामयनं गमनम्।)

उत्तरायणम्। इति स्मृतिः। (यथा, मनुः। १।६७।
“दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः।
अहस्तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्”॥
“तदादित्यस्योदगयनमादानञ्च चीन्मृतून् शिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्”। इति सूत्रस्थाने षष्ठेऽध्याये चरकेणोक्तम्। विस्तरश्चास्योत्तरायणशब्दे ज्ञेयः॥)

उदग्भूमः, पुं, (उदगुत्तरदिग्वत् प्रशस्ता भूमिर्यत्र। समासे+अच्।) सद्भूमिः। उत्कृष्टस्थानम्। इति जटाधरः॥

उदग्रं, त्रि, (उद्गतमग्रं यस्य।) उच्छ्रितम्। उच्चम्। इत्यमरः। (विशालम्। महत्। दीर्घम्। भीमम्।
“नयन् मधुलिहः श्वैत्यमुदग्रदशनांशुभिः”॥
इति माघः। २।२१। तथा, रघुः। २।५३।
“क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः”। “अवन्तिनाथोऽयमुदग्रबाहुः”। इति च रघुः। ६।३२॥)

उदग्रदन्, [त्] पु, (उदग्रौ दन्तौ यस्य। अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्चेति दन्तस्य दतृ॥) उच्चदन्तहस्ती। उच्चदन्तयुक्ते, त्रि। इति हेमचन्द्रः॥

उदजः, पुं, (उत्+अज्+समुदोरज पशुष्विति अप्। अघञपोरिति पर्य्युदासात् वीभावो न।) पशुप्रेरणम्। इत्यमरः॥

उदञ्चनं, क्ली, (उत्+अञ्च+ल्युट्।) पिधानपात्रम्। इति हेमचन्द्रः॥ ढाकुनि इति भाषा। (यथा, शतपथब्राह्मणे। ४।२।५। “प्रतिप्रस्थाता संस्रवावानयत्युन्नेता चमसेन वोदञ्चनेन वा”।) ऊर्द्ध्वक्षेपणम्॥

उदञ्चितं, त्रि, (उत्+अञ्च+क्त।) ऊर्द्ध्वक्षिप्तम्। इति हेमचन्द्रः॥ (“उदञ्चिताक्षोऽञ्चितदक्षिणोरुः”। इति भट्टिः। (पूजितम्॥)

उदण्डपालः, पुं, (उदण्डस्य उद्भिन्नाण्डस्य पालो गमनं पलायनं यत्र। मत्स्यसर्पविशेषाणामण्डं उद्भिन्नं सत्पलायते इति प्रसिद्धिः।) मत्स्यविशेषः। सर्पभेदः। इति मेदिनी॥

उदधिः, पु, (उदानि उदकानि वा धीयन्तेऽस्मिन्। उद+वा उदक+धा+कि।) समुद्रः। इत्यमरः॥ (“उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित्”। इति रघुः ८।८॥ मेघः। घटः॥)

उदधिक्राः, पुं, (उदधि+क्रम+विट्।) समुद्राक्रमणकर्त्ता। इति व्याकरणम्॥

उदधिमलः, पु, (उदधेः समुद्रस्य मल इव॥) समुद्रफेनः। अस्य गुणाः। शीतलत्वम्। कषायत्वम्। अतिदाग्निकारित्वञ्च। इति राजवल्लभः॥

उदधिमेखला, स्त्री, (उदधिर्मेखलेव यस्याः॥) पृथिवी। इति महाभारतम्॥ (“चतुरुदधिमालामेखलाया भुवो भर्त्ता”। इति कादम्बरीकथामुखे।)

उदन्तः, पुं, (उद्गतो निर्गतः अन्तो यस्य।) वार्त्ता। (“वार्त्तोदन्तः सुहृदुपगतः सङ्गमात्किञ्चिदूनः”। इति मेघदूते १०१। तथा, रघुः। १२। ६६।
“श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः”) साधुः। इति मेदिनी। रुषियाजनम्। इति शब्दरत्नावली॥ (प्राकरणात् ... शतपथब्राह्मणे। “... तर्हि जुहुयात् तद्धैषोदन्तं ... यद्यदन्तं कुर्य्यादप्रच्छि वै ... दन्तं कुर्य्यात्”॥)

उदन्तकः, पुं, (उदन्त+स्वार्थे कन्।) ... इति शब्दरत्नावली॥

उदन्तिका, स्त्री, (उत्+अन्त ... टाप्।) तृप्तिः। इति शब्दर...

उदन्या, स्त्री, (उदन्यति ... आत्मनः क्यच्। ... उद ... पिपासा। इत्यमरः। (यथा, ... ६।८।५। “अथ यत्रैतत्पुरु... तेज एव तत्पीतं ... पुरुषनायः इत्येवं तत्तेज...

उदन्वान्, [त्] पु, (... मतुप्। उदन्वानुदधौ ... निपातितः मतुपि।) समुद्रः। ... रघुः ४। ५२॥
“अगस्त्यविक्रम सह्यं ...” ऋषिविशेषः। इति पाणिनिः।

उदप आघाते। सौत्रधातुरयम्। इति ... इसः। (पर-सक-सेट्) ... इति दुर्गादासः। पातुवय... वशात् उदपेति लिखितः।

उदपानं, क्ली, पु, (उदकं ... पा+अधिकरणे+ल्युट्, ... इत्यमरः॥
(“तड़ागान्युदपानानि वाप्य... इति मनुः ३।४८। तथा,
“निर्ज्जलेषु च देशेषु ... उदपानान् बहुविधान् ...” भावे ल्युट्। जलपानम्।
“यावानर्थ उदपाने ...

उदयः, पु, (उदयन्ति यस्मा... अच्।) पूर्व्वपर्व्वतः। उदयाचल... समुन्नतिः। इति मेदिनी। ... इति शब्दरत्नावली। सूर्य्यस्योदयविवरणं यथा, ... अध्यायः। *।
“उदयास्तमने चैव ... दिशास्त्वशेषासु तथा मैत्रेय ... दैवैश्च दृश्यते भास्वान् ... तिरोभावश्च यत्रैति तत्रैवास्तम... नैवास्तमनमर्कस्य नोदयः ... उदयास्तमनाख्यञ्च दर्शनादर्शनं ... शक्रादीनां पुरे तिष्ठन् ... विकर्णौ द्वौ विकर्णस्थस्त्रीन् ... उदितो वर्द्धमानाभिरामध्याह्न... ततः परं ह्रसन्तीभिर्गोभिरस्तं ... उदयास्तमनाभ्याञ्च स्मृते पूर्वा...

पुरस्तात्तपति तावत् एषोऽथ पार्श्वयोः॥१८॥
रगिरेर्मेरोरपरि प्रचरणः गभाम् ।
द्वीपयोऽर्कस्य प्रयान्ति प्ररमणः समाम्॥१९॥
मेरस्तात्तद्रश्मा प्रतीममुपयान्ति वै ।
ह्यस्त्तारस्यां वै दिवारात्रिः सदैव हि ।
ने द्वीपवर्षाणां मेरुरुत्तरतो यतः" ॥२०॥
स्तमने च सर्व्वकालं भवतः । ते च परस्परं
समानसूत्रस्थे भवतः । तत्र हेतुमाह ।
से । रवेरुदयास्तमयौ सर्व्वकालं मध्याह्न एव
स्य न स्त एव अतो रवेरुदयास्तमयत्वं
र्शनमात्रमेव ॥ दर्शनादर्शनयोरवधिमाह ।
नामिति । इन्द्रादान्यतमस्य पुरे मध्याह्ने
दिकं पुरं अभितः पुरद्वयं चेत्येवं पुर-
दन्तरालस्थौ द्वौ च विकर्णौ कोणौ उद-
श्याभिः स्पृशति रश्मिभिर्भासयति । तथा
स्यः अन्याद्यन्यतमकोणे मध्याह्ने स्थितस्तं
अभितः स्थितं कोणद्वयं चेत्येवं त्रीन् को-
न्मध्यवर्त्तिद्वे च पुरे तथैवोदयाद्यवस्थाभिः
। भूवलयस्यार्द्धे प्रतपन् दृश्यते ताव-
अर्द्धे तु न दृश्यते तावद्रात्रिरित्यर्थः ।
इ ऐन्द्रे पुरे मध्याह्ने यदा तिष्ठति तदा
रस्थानामस्तमयः । ऐशकोणस्थानां तृतीयो
अग्निकोणस्थानां प्रथमः । याम्ये स्थिता-
यः । एवं यदा याम्ये मध्याह्ने तिष्ठति तदा
अस्तमयः । अग्निकोणे तृतीयो यामः ।
कोणे प्रथमो यामः । वारुणे उदयः । यदा
णे मध्याह्नः तदा याम्ये अस्तमयः । नैर्ऋति-
तृतीयो यामः । वायव्ये प्रथमः । सौम्ये
। यदा सौम्ये मध्याह्नस्तदा वारुणे अस्त-
वायव्ये तृतीयो यामः । ऐशकोणे प्रथमः ।
उदयः । एवं अग्निकोणे यदा मध्याह्नस्तदा
णे अस्तमयः । इन्द्रपुरे तृतीयो यामः ।
प्रथमः । नैर्ऋतिकोणे उदयः । इत्यादि
। एवं मेरोः सर्व्वतः परिभ्रमन् सू-
भूवलयं प्रकाशयन् दर्शनादर्शनापेक्षया
त्रव्यवस्थाकारणमुक्तं भवति ॥ सन्नि-
विधानकृतमेव रश्मीनां वृद्धिह्रासतीव्रत्व-
दिकमपीत्याह । उदित इति गोभिः र-
॥ दिग्विभागोऽप्युदयास्तमयनिमित्तएवे-
उदयेति । यत्र यस्योदेति सा तस्य पूर्व्वा
यत्रास्तमेति सा अपरा प्रतीची । तथा
"तस्मादसावादित्यः सर्व्वाः प्रजाः प्रत्य-
। तस्मात् सर्व्वा एवान्यतः प्रत्युदगादिति"॥
दुद्यन्तं सूर्य्यं पश्यतश्च दक्षिण-वाम-पार्श्व-
दक्षिणोत्तरे दिशाविति दर्शयन् रश्मि-
रावधिमाह । यावदिति । चतुर्दिक्षु लोका-
चलपर्य्यन्तं तपतीत्यर्थः ॥ मेरौ तु विशेष-
। अहते इति । ब्रह्मसभावर्जं मेरोरुपर्य्यपि
तपति न तु ब्रह्मसभां भासयति । तत्र
ह । ये ये मरीचय इति ॥ मेरोः सर्व्वतोऽपि
रतान्तरमाह । तस्मादिति । यतो यस्मात्
णां द्वीपानां वर्षाणाञ्च मेरुरुत्तरत एव स्थितः।

तस्मान्मेरोरुत्तरस्यां दिशि सदा दिवापि अन्येषां
दिनेऽपि नित्यं रात्रिरेव । अयं भावः । मेरुं प्रद-
क्षिणीकुर्व्वन्तं सूर्य्यं ये यत्र पश्यन्ति सैव तेषां
प्राची । तेषाञ्च वामभाग एव मेरुः । अतः सर्व्वेषां
सर्व्वदा मेरुरुत्तरत एव । दक्षिणभागे च लोका-
लोकाचलः । तस्मादुत्तरस्यां दिशि सदा रात्रिः ।
दक्षिणस्याञ्च दिशि सदा दिनमिति । यद्वा ।
भारतादिवर्षस्थानां सम्मुखे सूर्य्यमुद्यन्तं पश्यता-
मुत्तरस्यां दिशि वामभागे मेरोरेकतः सदा
दिनम् । अन्यतश्च सदा रात्रिः । दक्षिणभागे तु
सदा दिनमेवेत्यर्थादुक्तं भवति" ॥ इति तट्टीकायां
श्रीधरस्वामी ॥

उदयनं, क्ली (उत् + इ + ल्युट् ।) उदयः । इति मे-
दिनी ॥ (यथा ऋग्वेदे १।४८।७।
"एषा युक्त परावतः सूर्य्यस्योदयनादधि" ॥)

उदयनः, पुं, अगस्त्यमुनिः । वत्सराजः । इति मेदिनी॥
("प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्"।
इति मेघदूते।३१।) उदयनाचार्य्यः । स च कुसुमा-
ञ्जलिग्रन्थकर्त्ता ॥

उदरं, क्ली, (उत् ऋणातीति । "उदिदृणातेरजलौ
पूर्व्वपदान्त्यलोपश्च" । उत् + दॄ + अच् । अन्त्य-
लोपश्च ।) नाभिस्तनयोर्मध्यभागः । पेट इति
भाषा । तत्पर्य्यायः । पिचिण्डः २ कुक्षी ३ जठरः ४
तुन्दम् ५ । इत्यमरः ॥ युद्धम् । इति मेदिनी ॥
("उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्" ।
इति मनुः । ८ । १२५ ॥)

उदरः, पुं, (उदरं अस्त्यत्वेनास्त्यस्य । अर्श आदित्वा
दच् ।) उदरस्थरोगविशेषः । उदरी इति भाषा ।
यथा । अथोदराधिकारः । तत्रोदरस्य निमित्त-
माह ।
"रोगाः सर्व्वेऽपि मन्देऽग्नौ सुतरामुदराणि च ।
अजीर्णान्मलिनैश्चान्यर्जायन्ते मलसञ्चयात्" ॥
अग्नौ मन्दे सर्व्वे रोगा जायन्ते किन्तु सुतरा-
मतिशयेन उदराणि जायन्ते । अपरानपि हेतू-
नाह । अजीर्णान्मलिनैश्चान्यैः अत्यन्तदोषजनकैः
मलसञ्चयात् मलानां दोषाणां पुरीषस्य चाति-
वृद्धेः । अत्रोदरशब्देनोदरस्थो रोग उच्यते । यत
आह ।
"तात्स्थ्यात्तद्धर्म्मताभ्याञ्च तत्समीपतयापि च ।
तत्साहचर्य्यात् शब्दानां वृत्तिरुक्ता चतुर्व्विधा" ॥०॥
संप्राप्तिमाह ।
"रुद्धाः स्वदाम्बुवाहीनि दोषाः स्रोतांसि सञ्चिताः।
प्राणाग्न्यपानान् संदूष्य जनयन्त्युदरं नृणाम् ॥ * ॥
सामान्यरूपमाह ।
"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता ।
शोथः सदनमङ्गानां सङ्गो वातपुरीषयोः ।
दाहस्तन्द्रा च सर्व्वेषु जठरेषु भवन्ति हि ॥ * ॥
सन्निकृष्टनिदानपूर्व्विकां संख्यामाह ।
"पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ।
सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु ॥ * ॥
वातोदरस्य लक्षणमाह ।
"तत्र वातोदरे शोथः पाणिपान्नाभिकुक्षिषु ।

कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्व्वभेदनम् ॥
शुष्ककासोऽङ्गमर्द्दश्च गुरुता मलसंग्रहः ।
श्यावारुणत्वगादित्वमकस्मान्मांसवृद्धिमत् ॥
सतोदभेदमुदरं तनुकृष्णशिराततम् ।
आध्मानादतिवच्छब्दमाहतं प्रकरोति च ॥
वायुश्चात्र सरुक् शब्दो विचरेत् सर्व्वतोगतिः" ॥
पाणिपादित्यत्र अङ्गनान्तः पाच्छब्द आर्षत्वात् ।
कुक्षिपार्श्वोदरेत्यत्र कुक्षिशब्द उदरस्य वाम-
दक्षिणभागद्वयवाची । सर्व्वतोगतिः सकलकोष्ठे
सञ्चरन् ॥ * ॥ पैत्तिकमाह ।
"पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता ।
भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित् ॥
पीतताम्रशिरानद्धं सस्वेदं सोष्म दह्यते ।
धूमायते मृदुस्पर्शं क्षिप्रपाकं प्रदूयते" ॥
हरित् शाकवर्णम् । सोष्म अन्तस्तापयुक्तम् । दह्यते
वह्निदाहयुक्तम् । धूमायते धूममिवोद्वमति ।
क्षिप्रपाकं क्षिप्रपाकात् जलोदरतां याति । प्रदू-
यते व्यथते ॥ * ॥ कफोदरमाह ।
"श्लेष्मोदरेऽङ्गसदनं स्वापश्वयथुगौरवम् ।
तन्द्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता ॥
उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत् ।
चिराभिवृद्धिकठिनं शीतस्पर्शं गुरु स्थिरम्" ॥
स्वापः स्पर्शाज्ञता । गौरवमङ्गानाम् । तन्द्रा निद्रा-
वाकुल्यम् । उत्क्लेशो हृल्लासः । शुक्लराजीततं
शुक्लशिराव्याप्तम् ॥ * ॥ सन्निपातोदरमाह ।

"स्त्रियोऽन्नपानं नखलोममूत्र-
विडार्त्तवैर्युक्तमसाधुवृत्ताः ।
यस्मै प्रयच्छन्त्यरयो गरांश्च
दुष्टाम्बुदूषीविषसेवनाच्च ॥
तेनाशु रक्तं कुपिताश्च दोषाः
कुर्य्युः सुघोरं जठरं त्रिलिङ्गम् ।
तच्छीतवाते भृशदुर्द्दिने च
विशेषतः कुप्यति दह्यते च ॥
स चातुरो मूर्च्छति हि प्रसक्तं
पाण्डुः कृशः शुष्यति तृष्णया च ।
दूष्योदरं कीर्त्तितमेतदेव
प्लीहोदरं कीर्त्तयतो निबोध" ॥

स्त्रिय इत्यविवेकिसन्निहितजनोपलक्षणम् । ताश्च
स्वसौभाग्यमिच्छन्त्यः । विट् मार्ज्जारादीनाम् ।
आर्त्तवं रजः । अरयो वा । गरान् संयोगजानि
विषाणि । दुष्टाम्बु सविषमत्स्यतृणपर्णादियुतं
शटितञ्च ॥ दूषीविषं विषमेवामदाद्युपघातेन स्वल्प-
प्रभावम् । यत उक्तम् ।

"जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितञ्च ।
स्वभावतो वा गुणविप्रयुक्तं
विषं हि दूषीविषतामुपैति" ॥

गुणविप्रयुक्तं गुणवियुक्तं तत् । उदरं शीततादिषु
कुप्यति । दूषीविषस्य कोपात् । मूर्च्छातिविषयो-
गात् । प्रसक्तं निरन्तरं एतदेव सन्निपातोदरम् ।
तन्त्रान्तरे दूष्योदरं कीर्त्तितम् । अथवा परस्परं
दूषयन्तीति दोषा एव दूष्याः तैः कृतमुदरं दूष्यो-

रम् ॥*॥ प्लीहोदरमाह।
"वर्द्धते प्लीहस्त्वा यद्विधात् प्लीहोदरं हि तत्।
तद्वामे वर्द्धते पार्श्वे निमित्तं तस्य तत्र यत्॥
प्लीहप्लीहलिङ्गानि यान्युक्तानि भिषग्वरैः।
प्लीहोदरेऽपि दृश्यन्ते तानि सर्व्वाणि देहिनाम्"।
प्लीहोदरस्यैव भेदो यकृद्दाल्युदरं न पुनरधिक-
मित्याह। "सव्यान्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं यकृ-
द्दाल्युदरं तदेव"। यकृद्दालयति दोषैर्भेदयतीति
यकृद्दाल्युदरं तदेव उदरमेव ॥*॥ बद्धगुदमाह।
"यस्यान्नमन्नैरुपलेपिभिर्व्वा,
बालाश्मभिर्व्वा पिहितं यथावत्।
सञ्चीयते यस्य मलः सदोषः,
शनैः शनैः सङ्करवच्च नाड्याम्॥
निरुध्यते यस्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम्।
हृन्नाभिमध्ये परिवृद्धिमेति
तस्योदरं बद्धगुदं वदन्ति"॥
उपलेपिभिः पिच्छिलैरन्नैः शाकशालुकादिभिः।
बालाश्मभिः बालुकाभिः कर्क्करैर्व्वा बालैः केशैः
अश्मभिः पाषाणैर्व्वा। यथावत् यस्य यत् सम्भवति।
मलः पुरीषम्। सङ्करवत् संमार्ज्जनीच्छिन्नतृण-
धूल्यादिवत्। "सङ्करोऽवकरः पुमान्" इत्यमरः।
सङ्करो घूय इति लोके। नाड्यां अन्त्रनाड्याम्।
हृन्नाभिमध्ये हृन्नाभ्योर्मध्ये ॥*॥ छतोदरमाह।
"शल्यं यथान्नोपहृतं यदन्नं
भुक्तं भिनत्त्यागतमन्यथा वा।
तस्मात् च्युतोऽन्त्रात् सलिलप्रकाशः
स्रावः स्रवेद्वै गुदतस्तु भूयः॥
नाभेरधश्चोदरमेति वृद्धिं
निस्तुद्यते दाल्यति चातिमात्रम्।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध"॥
शल्यं कर्क्करादि। अन्नोपहृतं अन्ननिहितम्। भुक्तं
यदन्नं भिनत्ति। तथा अन्यथा आगतं भोजनं
विना आगतं शरादि। तदपि यदन्त्रं भिनत्ति
एतदुपलक्षणम्। जृम्भणमत्यशनं वा यदन्त्रं
भिनत्ति। यत उक्तं चरके।
"शर्कराहृणकाष्ठास्थिकण्टकैरन्नसंयुतः।
भिद्येतान्त्रं यदा भुक्तैर्जृम्भयात्यशनेन वा"। इति।
तस्मात् भिन्नादन्त्रात्। गुदतस्तु भूयः अन्त्रात्
संस्रुत्य पुनर्गुदतः स्रवेदित्यर्थः। दाल्यति विदी-
र्य्यत इव। मर्म्मच्छिद्रावर्त्तत्वात्। एतत् छतोदरं
तन्त्रान्तरे परिस्राव्युदरं प्रदिष्टम् ॥*॥
उदकोदरमाह।
"यः स्नेहपीतोऽप्यनुवासितो वा,
वान्तो विरिक्तोऽप्यथवा निरूढः।
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि॥
स्नेहोपलिप्तेष्वथवापि तेषु
दकोदरं पूर्व्ववदभ्युपैति।
स्निग्धं महत्तत् परिवृत्तनाभि
समाततं पूर्णमिवाम्बुना च।
यथा दृतिः क्षुभ्यति कम्पते च
शब्दायते चापि दकोदरं तत्"॥
स्नेहपीतः पीतइत्यत्राध्यवसितादित्वात् कर्त्तरि
क्तः पश्चात् स्नेहं पीतः स्नेहपीत इति तत्पुरुषः।
तेन स्नेहं पीतवानित्यर्थः। अनुवासितो वा दत्ता-
नुवासनवस्तिः। वान्तः अत्रापि पूर्व्ववत् कर्त्तरि
क्तः तेन वान्तवानित्यर्थः। एवं विरिक्तः विरिक्त-
वान्। तथा निरूढः गृहीतनिरूहवस्तिः। स
चेदाशु शीतलं जलं पिबेत्। तस्य तद्वहानि जल-
वहानि स्रोतांसि दुष्यन्ति स्वकर्म्मदुष्टानि भवन्ति
जलवहेषु स्रोतःसु दुष्टेषु सत्सु अम्बरसे उपस्ने-
हन्यायेन बहिर्भूते दकोदरमायाति। अथवा
तेषु उदकवहेषु स्रोतःसु स्नेहोपलिप्तेषु पूर्व्ववत्
यथापूर्व्वम्। अम्बरसे उपस्नेहन्यायेन बहिर्निःसृते
दकोदरमायाति। तथा जलेऽपि बहिर्निःसृते
दकोदरमायाति। तत् उदरम्। परिवृत्तनाभि
गम्भीरनाभि। समाततं स्तब्धम्। यथा दृतिः
चर्म्ममयं जलाहरणपात्रम्। क्षुभ्यति अन्तर्जला-
न्दोलनेन सञ्चलति कम्पते बहिः शब्दायते कम्प-
मानं सत् शब्दं करोति ॥*॥

साध्यासाध्यलक्षणमाह।
"जन्मनैवोदरं सर्व्वं प्रायः कृच्छ्रतमं मतम्।
बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम्"॥
बलिनः अजाताम्बु नवोत्थितञ्च यत्नसाध्यमित्यन्वयः।
"पक्षाद्बद्धगुदं तूर्द्ध्वं सर्व्वं जातोदकं तथा।
प्रायो भवत्यभावाय छिद्रान्त्रञ्च दकोदरम्"॥
छिद्रान्त्रं शरादिना छिद्रमन्त्रं यस्य तदुदरं अभा-
वाय भवति ॥*॥
जातोदकस्योदरस्य लक्षणमाह। चरकः।
"पयःपूर्णा दृतिरिव क्षोभे शब्दकरं मृदु।
अप्रथक्त्वशिरःशूलं नितान्तमुदरं महत्॥
आलस्यमास्यवैरस्यं मूत्रं बहु सकृच्छ्रतः।
जातोदकस्य लिङ्गं स्यान्मन्दोऽग्निः पाण्डुतापि च॥
शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचम्।
बलशोणितमांसाग्निपरिक्षीणञ्च वर्ज्जयेत्"॥
शूनाक्षस्थाने शूनाक्षमिति च पाठः। कुटिलोपस्थं
वक्रमेहनम्। उपक्लिन्नतनुत्वचं। उपरि आर्द्रा तन्वी
त्वग्यस्य। तं उदरिणम्।
"पार्श्वभङ्गान्नविद्वेषशोफातीसारपीड़ितम्।
विरिक्तं चाप्युदरिणं पूर्य्यमाणं विवर्ज्जयेत्"॥
विरिक्तमपि पूर्य्यमाणं पूर्य्यमाणोदरं उदरिणं
विवर्ज्जयेत् ॥*॥

अथोदरस्य चिकित्सा।
"एरण्डतैलं दशमूलमिश्रं
गोमूत्रयुक्तस्त्रिफलारसो वा।
निहन्ति वातोदरशोथशूलान्
क्वाथः समूत्रो दशमूलजश्च॥
कुष्ठं दन्ती यवक्षारः पाठा त्रिकटुकं वचा।
शुण्ठी चोष्णाम्बुना पीता वातोदरविनाशना"॥
कुष्ठादिचूर्णम् ॥*॥
"स्नुगुनमस्य(?) गुड़ामेकां जलद्रोणे विपाचयेत्।
त्रिकटु त्रिफला दन्ती हिङ्गु सैन्धवचित्रकम्॥
...रदारु वचा कुष्ठं मधु शिग्रु पुनर्नवा
सौवर्च्चलं विड़ङ्गानि दीप्यको गजपिप्पली।
एतेषां पलिकान् भागान् त्रिवृत्
पिष्ट्वा कषायैस्तैस्तैलं महदित्यग्नि...
तत्पिबेत् प्रातरुत्थाय यथाग्निबलम...
निहन्ति सकलान् रोगान् ...
मूत्रकृच्छ्रमुदावर्त्तमन्त्रवृद्धिगुदग्रहे
पार्श्वकुक्षिभवं शूलमानाहमूत्रकर्कश(?)
... ...
मारुतमानेव नाशयन्ति
इति रसोनतैलम् ॥*॥
"पित्तोदरेषु बलिनं पूर्व्वमेव विरेचयेत्
दुर्ब्बलं त्वनुवास्यादौ ...
संजातबलकायाग्निं पुनः ...
पयसा च त्रिवृत्कल्कैरुरुबूकस्य ...
पिप्पल्यादिगणेनाक्तं पाचितं ...
घृतं पयश्च पानं नित्यं कफोदरविनाशनम्।
"नागरत्रिफलाकल्कैर्धन्वमुपरि...
पाचितं तैलमाज्यञ्च पिबेत् ...
इति नागरादितैलं घृतञ्च ॥*॥
"शालिषष्टिकगोधूमयवनीवारकोद्रव
निरूहो रेचनं श्रेष्ठं सर्व्वेषु जठरेषु
आनूपमोदनं मांसं ...
व्यायामञ्च दिवास्वप्नयानमध्वानि वर्ज्जये
तथोष्णलवणोष्णानि विदाहीनि गुरूणि
नाद्यादन्नानि जठरे ...
उदराणां मलाढ्यत्वाद्बलवत्... शोधनं।
क्षीरैश्चैरण्डतैलं वा ...
"वातोदरी पिबेत्तक्रं ...
शर्करामरिचोपेतं स्वादु पित्तोदरी...
यवानीसैन्धवाजाजीव्योषयुक्तं कफोदरी
सन्निपातोदरी युक्तं त्रिकटुक्षारसैन्धवैः।
यवानी हपुषा धान्यं ...
कारवी पिप्पलीमूलमजगन्धा शटी वचा
शताह्वा जीरको व्योषं ...
द्वौ क्षारौ पौष्करं ...
विड़ङ्गञ्च समांशानि दन्त्या
त्रिवृद्विशाले द्विगुणे सातला स्याच्चतुर्गुणा।
एष नारायणो नाम चूर्णो रोगगणा...
एनं प्राप्य निवर्त्तन्ते रोगा विष्णुमिवासुराः।
तक्रेणोदरिभिः पेयो गुल्मिभिर्बदराम्बुना।
आनद्धवाते सुरया वातरोगे प्रसन्नया।
दधिमण्डेन विड़्बन्धे दाड़िमाम्बुभिरर्शसैः।
परिकर्त्तेषु वृक्षाम्लैरुष्णाम्बुभिरजीर्णके।
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे
हृद्रोगे ग्रहणीरोगे कुष्ठे मन्देऽनले ज्वरे
दंष्ट्राविषे मूलविषे गरे कृत्रिमे विषे
यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम्।
उपकुञ्चिका कारवी च हपुषा...
हैला नाम इति लोके। तस्य भवति ...
वक्रे। स्वर्णक्षीरी चोक इति लोके,
इन्द्रवारुणी। सातला शीकाभेदः।

। परिकर्त्तो गुदे परिकर्त्तनवत् पीड़ा
ायणचूर्णम् ॥ * ॥
"पुनर्नवारक्तपुनर्नवा त्रिफला विडङ्ग-
सिंहीनिशाश्चित्रकरुग्ध्यकाग्नेः ।
हृतं विपक्वं कुडवप्रमाणं
तोयेन तस्याद्यसमेन कार्य्यम् ॥
शीतोष्णमम्भोऽनुपिबेद्विरेके
पेयं रसं वा प्रपिबेद्विधिज्ञः ।
दाराघमेनं जठरामयाना-
मुक्तं प्रयुक्तं प्रवदन्ति सन्तः" ॥
ाराघघृतम् ॥ * ॥
डशाः कर्षमात्रायाः कल्कं दध्यादिवेष्टितम् ।
दारिणा नित्यमुदरव्याधिशान्तये" ॥
ो शूरणपत्रो मानभेदः । वल्लाण्डी इति
। ॥
"पुनर्नवादारुनिशासविश्वा-
पटोलपथ्याः पिचुमर्द्ददारु ।
समागरच्छिन्नरुहेति सर्व्वैः
कृतः कषायो विधिना विधिज्ञैः ॥
गोमूत्रयुक् गुग्गुलुना च युक्तः
पीतः प्रभाते नियतं नराणाम् ।
सर्व्वाङ्गशोथोदरपार्श्वशूल-
श्वासान्वितं पाण्डुगदं निहन्ति" ॥
ादिक्वाथः । इत्युदराधिकारः । इति भाव-
ः ॥ ("उदरं स्तिमितं गुरु" इति वैद्यक-
करधृतरुग्विनिश्चयग्रन्थः । अस्य शब्दस्य
विशेषवाच्यत्वेऽन्याविशेषवाच्यविवक्षितउदररो-
रे ज्ञातव्या ॥)
थः, पुं, (उदरस्य ग्रन्थिरिव ।) गुल्मरोगः ।
हेमचन्द्रः ॥
णं, स्त्री, (उदरस्य त्राणं यस्मात् ।) उदरबन्ध-
दि । तत्पर्य्यायः । नागोदं २ । इति हेम-
॥
ः, पुं, (उदृच्छति उदर्य्यते वा । उत्+ऋ+
र्त्तिचिदिति णचिन् ।) समुद्रः । सूर्य्यः । इति
चन्द्रः ॥
शाचः, त्रि, (उदराय तत्पूरणाय पिशाच
।) सर्व्वान्नखादकः । तत्पर्य्यायः । सर्व्वान्नीनः २
ान्नभक्षकः ३ । इति हेमचन्द्रः ॥
रिः, त्रि, (उदरं बिभर्त्तीति । उदर+भृ+
+मुम् च । निपातसिद्धः ।) स्वोदरमात्र-
कः । तत्पर्य्यायः । कुक्षिम्भरिः २ आत्मम्भरिः
इति हेमचन्द्रः ॥
ाधिः, पुं, (उदरस्य व्याधिः ।) उदररोग-
यः । यथा,—गारुड़े १९४ अध्यायः ॥
दलीयवक्षारन्तु पानीयेन प्रसाधितम् ।
ास्वादनान्नश्यन्ति उदरव्याधयोऽखिलाः" ॥
ोगः, पुं, (उदरस्य रोगः ।) जठरव्याधि-
ेषः । उदरी इति भाषा ॥
सिद्धविद्याधराकीर्णे कैलासे नन्दनोपमे ।
मानं तपस्तीव्रं साक्षाद्धर्म्ममिव स्थितम् ॥
युर्व्वेदविदां श्रेष्ठं भिषग्विद्याप्रवर्त्तकम् ।

गुरुर्व्वशं जितात्मानमग्निवेशोऽब्रवीद्वचः ॥
भगवन्नुदरैर्दुःखैर्दृश्यन्ते दुःखिता नराः ।
शुष्कवक्त्राः कृशैर्गात्रैराध्मातोदरकुक्षयः ॥
प्रनष्टाग्निबलाहाराः सर्व्वचेष्टास्वनीश्वराः ।
दीनाः प्रतिक्रियाभावाज्जहतोऽसूननाथवत् ॥
तेषामायतनं सङ्ख्यां प्रागुपाशान्तिभेषजान् ।
यथावज्ज्ञातुमिच्छामि गुरुणा सम्यगीरितम् ॥
सर्व्वभूतहितार्थर्षिः शिष्येणैवं प्रचोदितः ।
सर्व्वभूतहितं वाक्यं व्याहर्त्तुमुपचक्रमे" ॥
अस्य सनिदानं सम्प्राप्तिकलक्षणं यथा,—
"अग्निदोषान्मनुष्याणां रोगसङ्घाः पृथग्विधाः ।
मलवृद्ध्या प्रवर्त्तन्ते विशेषेणोदराणि तु ॥
मन्देऽग्नौ मलिनैर्भुक्तैरपाकाद्दोषसञ्चयः ।
प्राणाग्न्यपानान् सन्दूष्य मार्गान् बद्ध्वोत्तरोत्तरान् ॥
त्वङ्मांसान्तरमागम्य कुक्षिमाध्मापयन् भृशम् ।
जनयत्युदरं तस्य हेतुं शृणु सलक्षणम्" ॥
सामान्यहेतवो यथा,—
"अत्युष्णलवणक्षारविदाह्यम्लरसाशनात् ।
मिथ्यासंसर्ज्जनाद्रूक्षविरुद्धाशुचिभोजनात् ॥
प्लीहार्शोग्रहणीदोषकर्षणात् कर्म्मविभ्रमात् ।
क्लिष्टानामप्रतीकाराद्रौक्ष्याद्वेगविधारणात् ॥
स्रोतसां दूषणादामात् संक्षोभादतिपूरणात् ।
अर्शोवातशकृद्रोधादन्त्रस्फुटनभेदनात् ॥
अतिसञ्चितदोषाणां पापं कर्म्म च कुर्व्वताम् ।
उदराण्युपजायन्ते मन्दाग्नीनां विशेषतः" ॥
प्राग्रूपं यथा,—
"क्षुन्नाशः स्वाद्वतिस्निग्धगुर्व्वन्नं पच्यतेऽचिरात् ।
भुक्तं विदह्यते सर्व्वं जीर्णाजीर्णं न वेत्ति च ॥
सहते नातिसौहित्यमीषच्छोफश्च पादयोः ।
शश्वद्बलक्षयोऽल्पेऽपि व्यायामे श्वासमृच्छति ॥
पुरीषनिचयो वृद्धिरुदावर्त्तकता च रुक् ।
वस्तिसन्धौ रुगाध्मानं वर्द्धते पाट्यतेऽपि च ॥
आतन्यते च जठरमपि लघ्वल्पभोजनात् ।
राजीजन्म वलीनाश इति लिङ्गं भविष्यताम्" ॥
सम्प्राप्तिर्यथा,—
"रुद्ध्वा स्वेदाम्बुवाहानि दोषाः स्रोतांसि सञ्चिताः ।
प्राणाग्न्यपानान् हि सन्दूष्य जनयन्त्युदरं नृणाम्" ॥
सामान्यलक्षणं यथा,—
"कुक्षेराध्मानमाटोपः शोफः पादकरस्य च ।
मन्दोऽग्निः श्लक्ष्णगण्डत्वं कार्श्यञ्चोदरलक्षणम्" ॥
वातजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—
"रूक्षाल्पभोजनायासवेगोदावर्त्तकर्षणैः ।
वायुः प्रकुपितः कुक्षिहृद्वस्तिगुदमार्गगः ॥
हत्वाग्निं कफमुद्धूय तेन रुद्धगतिस्तथा ।
आचिनोत्युदरं जन्तोस्त्वङ्मांसान्तरमाश्रितः" ॥
अस्य रूपाणि ।
"कुक्षि-पाणि-पाद-वृषण-श्वयथुदर-विपाटनम् अ-
नियतौ च वृद्धिह्रासौ कुक्षि-पार्श्वशूलोदावर्त्ताङ्ग-
मर्द्द-पर्व्वभेद-शुष्ककास-कार्श्य-दौर्ब्बल्यारोचक-वि-
पाका अधोगुरुत्वं वातवर्च्चोमूत्रसङ्गः श्यावारुणत्वं
नखनयनवदनत्वङ्मूत्रवर्च्चसामपि चोदरं तनु-
असितराजीशिरासन्ततमाहतमाध्मातदृतिशब्दवद्ध्व-
नति । वायुश्चोर्द्ध्वमधस्तिर्य्यक् च सशूलशब्दश्चरत्ये-
तद्वातोदरं विद्यात्" ॥
पित्तजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—
"कट्वम्ललवणात्युष्णतीक्ष्णाग्न्यातपसेवनैः ।
विदाह्यध्यशनाजीर्णैश्चाशु पित्तं समाचितम् ॥
प्राप्यानिलकफौ रुद्ध्वा मार्गमुन्मार्गमास्थितम् ।
निहन्त्यामाशये वह्निं जनयत्युदरं ततः" ॥
अस्य रूपाणि ।
"दाहज्वर-तृष्णा-मूर्च्छातिसार-भ्रमाः कटुकास्य-
त्वं हरितहारिद्रत्वं नख-नयन-वदन-त्वङ्-मूत्र-वर्च्च-
सामपि चोदरं नील-पीत-हारिद्र-हरित-ताम्र-
राजीशिरावनद्धं दह्यात् दूयते धूप्यते ऊष्मायते
स्विद्यते क्लिद्यते मृदुस्पर्शं क्षिप्रपाकञ्च भवत्येतत्
पित्तोदरं विद्यात्" ॥
श्लेष्मजनितस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—
"अव्यायामदिवास्वप्नस्वाद्वतिस्निग्धपिच्छिलैः ।
दधिदुग्धोदकानूपमांसैश्चाप्युपसेवितैः ॥
क्रुद्धेन श्लेष्मणा स्रोतःस्वाहतेष्वावृतोऽनिलः ।
तमेव पीड़यन् कुर्य्यादुदरं वहिरन्तगः" ॥
अस्य रूपाणि ।
"गौरवारोचकाविपाकाङ्गमर्द्द-सक्थि-पाणि-पाद-
मुष्कोरुशोफोत्क्लेश-निद्रा-श्वास-कासाः शुक्लत्वञ्च
नख-नयन-वदन-त्वङ्मूत्रवर्च्चसामपि चोदरं शुक्ल-
राजीशिरासन्ततं गुरुस्तिमितस्थिरं कठिनञ्च
भवत्येतत् श्लेष्मोदरं विद्यात्" ॥
त्रिदोषजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,
"दुर्ब्बलाग्नेरपथ्यामविरोधिगुरुभोजनात् ।
स्त्रीदत्तैश्च रजोरोम-विण्मूत्रास्थिनखादिभिः ॥
विषैश्च मन्दैर्वाताद्याः कुपिताः सञ्चितास्त्रयः ।
शनैः कोष्ठे प्रकुर्व्वन्तो जनयन्त्युदरं नृणाम्" ॥
अस्य रूपाणि ।
"सर्व्वेषामेव दोषाणां समस्तानि लिङ्गान्युपलभ्यन्ते
वर्णाश्च नखादिषूदरमपि नानावर्णराजीशिरा-
सन्ततं भवत्येतत् सन्निपातोदरं विद्यात्" ॥
यकृत्प्लीहसमुद्भवस्य सनिदानसम्प्राप्तिकं
लक्षणं यथा,—
"असितस्यातिसङ्क्षोभाद्यानयानाभिचेष्टितैः ।
अतिव्यवायभाराध्ववमनव्याधिकर्षणैः ॥
वामपार्श्वाश्रितः प्लीहाच्युतः स्थानात् प्रवर्द्धते ।
शोणितं वा रसादिभ्यो विवृद्धन्तं विवर्द्धयेत्" ॥
इति तस्य प्लीहाकठिनोऽष्ठिलेवादौ वर्द्धमान-
कच्छपसंस्थान उपलभ्यते सचोपेक्षितः क्रमेण
कुक्षिं जठरमग्न्यधिष्ठानञ्च परिक्षिपन्नुदरमभि-
निवर्त्तयति" ॥
अस्य रूपाणि यथा,—
"दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रग्रहतमःपिपा-
साङ्गमर्द्द-च्छर्द्दि-मूर्च्छाङ्गसाद-कास-श्वास-मृदुज्व-
रानाहाग्निनाशकार्श्यास्यवैरस्य-पर्व्वभेद-कोष्ठ-वा-
तशूलान्यपि चोदरमरुणवर्णं विवर्णं वा नील-
हरित-हारिद्र-राजिमद्भवत्येवमेव यकृदपि दक्षिण-
पार्श्वस्थं कुर्य्यात्तुल्यहेतुलिङ्गौषधत्वात्तस्य प्लीहजठ-
रेणैवावरोध इत्येतत् यकृत्प्लीहोदरं विद्यात्" ॥

बद्धगुदोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,

"पक्ष्मवालैः सहान्नेन भुक्तैर्बद्धायने गुदे।
उदावर्त्तैस्तथार्शोभिरान्त्रसंमूर्च्छनेन वा॥
अपानो मार्गसंरोधाद्धत्वाग्निं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्ध्वा जनयत्युदरं ततः"॥

अस्य रूपाणि।

"तृष्णा-दाह-ज्वर-मुख-तालु-शोषोरुसाद-कास-श्वास-दौर्ब्बल्यारोचकाविपाक-वर्च्चोमूत्र-सङ्गाध्मान-च्छर्द्दि-क्षवथु-शिरोहृन्नाभि-गुदशूलान्यपि चोदरं मूढवातं स्थिरमरुणं नीलराजिशिरावनद्धं अराजिकं वा प्रायो नाभ्युपरि गोपुच्छवदभिनिर्वर्त्तत इत्येतद्बद्धगुदोदरं विद्यात्"॥

छिद्रोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,

"शर्करा-तृणकाष्ठास्थि-कण्टकैरन्नसंयुतैः।
भिद्येतान्त्रं यदा भुक्तैर्जृम्भयात्यशनेन वा।
स्रवात् पाकरसस्तेभ्यश्छिद्रेभ्यः प्रस्रवद्बहिः।
पूरयन् गुदमन्त्रश्च जनयत्युदरं ततः"॥

अस्य रूपाणि।

"इति तदधोनाभ्याः प्रायोऽभिनिवर्त्तमानमुदकोदरस्य च यथाबलञ्च दोषाणां रूपाणि दर्शयत्यपि चातुरः सलोहित-नील-पीत-पिच्छिल-कुणप-गन्धामवर्च्चं उपवेश्यते हिक्का-श्वास-कास-तृष्णा-प्रमेहा-रोचकाविपाक-दौर्ब्बल्यपरीतश्च भवत्येतत् छिद्रोदरं विद्यात्"॥

जलोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,—

"स्नेहपीतस्य मन्दाग्नेः क्षीणस्यातिकृशस्य वा।
अत्यम्बुपानान्नष्टेऽग्नौ मारुतः क्लोम्नि संस्थितः॥
स्रोतःसु रुद्धमार्गेषु कफश्चोदकमूर्च्छितः।
वर्द्धयेतां तदेवाम्बु स्वस्थानादुदराय तौ"॥

अस्य रूपाणि।

"तस्य रूपाण्यनन्नकाङ्क्षापिपासा-गुदस्राव-शूल-श्वास-कास-दौर्ब्बल्याण्यपि चोदरं नानावर्णराजिभिरासन्ततमुदकपूर्णदृतिक्षोभसंस्पर्शं भवत्येतदुदकोदरं विद्यात्"॥

एषां साध्यत्वासाध्यत्वादिलक्षणं यथा,—

"तत्राचिरोत्पन्नमनुपद्रवमनुदकप्राप्तमुदरं त्वरमाणश्चिकित्सेदुपेक्षितानां ह्येषां दोषाः स्वस्थानदपक्रान्ता अपरिपाकाद्द्रवीभूताः सन्धीन् स्रोतांसि चोपक्लेदयन् स्वेदश्च बाह्येषु स्रोतःसु प्रतिहतगतिस्तिर्य्यगवतिष्ठमानस्तदेवोदकमाप्याययति"।

तत्र पिच्छोत्पत्तौ मण्डलमुदरं गुरुस्तिमितमाकोचितमशब्दं मृदुस्पर्शमपगतराजीकमाक्रान्तं नाभ्या सर्पतीति। ततोऽनन्तरं उदकप्रादुर्भावः॥

तस्य रूपाणि कुक्षेरतिमात्रवृद्धिः शिरान्तर्धानगमनमुदकपूर्णदृतिक्षमक्षोभसंस्पर्शत्वञ्च।

तदातुरमुपद्रवाः स्पृशन्ति छर्द्दतीसार-तमक-तृष्णा-श्वास-कास-हिक्का-दौर्ब्बल्य-पार्श्वशूलारुचि-स्वरभेद-मूत्रसङ्गादयस्तथाविधमचिकित्स्यं विद्यादिति॥ भवति चात्र,—

"वातात् पित्तात् कफात् प्लीह्नः सन्निपातात्तथोदकात्।
परस्परं कष्टतरमुदरं भिषगादिशेत्॥
पक्षाद्बद्धगुदन्तूर्द्ध्वं सर्व्वं जातोदकन्तथा।
प्रायो भवत्यभावाय छिद्रान्त्रञ्चोदरं नृणाम्"॥
"शोथः मर्म्ममर्म्मोत्थः श्वासो हिक्कारुचिः ज्वरः।
मूर्च्छाच्छर्द्दतिसारश्च निहन्त्युदरिणं नरम्"॥

अन्यच्चाप्याह।

"जातोदरमयाभासं शशाङ्के नातिमात्रिकम्।
सदा गुडगुडायाश्च शिरानालसमाचितम्॥
नाभिं विष्टभ्य पायौ तु वेगं कृत्वा प्रणश्यति।
हृन्नाभिवङ्क्षणकटीगुदप्रत्येकशूलिनः॥
कर्कशं सृजतो वातं नातिमन्दे च पावके॥
मूत्रेऽल्पे संहते दोषे लालया विरसे मुखे।
जातोदकमित्येतैर्लिङ्गैर्विद्यात् तज्ज्ञकः"॥

अतःपरं वातादिभेदेन चिकित्साविधानं यथा,

"उपक्रमेद्विषगृदोषबलकालविशेषवित्।
वातोदरे बलवतः पूर्व्वं स्नेहैरुपाचरेत्॥
स्निग्धाय स्वेदिताङ्गाय दद्यात् स्नेहविरेचनम्॥
हृते दोषे परिम्लानं वेष्टयेद्वाससोदरम्।
तथास्यानवकाशत्वाद्वायुर्नाध्मापयेत् पुनः।
दोषातिमात्रोपचयात् स्रोतसां सन्निरोधनात्।
सम्भवन्त्युदराण्येवं तस्मान्नित्यं विशोधयेत्।
शुद्धं संसृज्य च क्षीरं बलार्थं पाययेत्तु तम्॥
प्रागुत्क्लेशान्निवर्त्तेत बले लब्धे क्रमात् पयः।
यूषैरसैश्चा मन्दाम्ललवणैः रोधितानलम्॥
सोदावर्त्तं पुनः स्निग्धं स्विन्नमास्थापयेन्नरम्।
स्फुरणाक्षेपसन्ध्यस्थिपार्श्वपृष्ठत्रिकार्त्तिषु।
दीप्ताग्निबद्धविड्वातं रूक्षमप्यनुवासयेत्।
तीक्ष्णाधोभागयुक्ताः स्यान्निरूहो दाशमूलिकः।
वातघ्नाम्लशृतैरण्डतिलतैलानुवासनः॥
अविरेच्यन्तु यं विद्याद्दुर्ब्बलं स्थविरं शिशुम्।
सुकुमारं प्रकृत्याल्पदोषं वाथोल्बणानिलम्॥
तं भिषक्शमनैः सर्पिर्यूषमांसरसौदनैः।
वस्त्यभ्यङ्गानुवासैश्च क्षीरैश्चोपाचरेद्बुधः॥१॥
पित्तोदरे तु बलिनं पूर्व्वमेव विरेचयेत्।
दुर्ब्बलन्त्वनुवास्यादौ शोधयेत् क्षीरवस्तिना॥
सञ्जातबलकायाग्निं पुनः स्निग्धं विरेचयेत्।
पयसा सत्रिवृत्कल्केनोरुबूकशृतेन वा॥
सातलात्रायमाणाभ्यां शृतेनारग्वधेन वा।
सकफे वा समूत्रेण सवाते तिक्तसर्पिषा॥
पुनः क्षीरप्रयोगञ्च वस्तिकर्म्मविरेचनम्।
क्रमेण ध्रुवमातिष्ठन् युक्तः पित्तोदरं जयेत्॥
स्निग्धं स्विन्नं विशुद्धन्तु कफोदरिणमातुरम्।
संसर्ज्जयेत् कटुक्षारयुक्तैरन्नैः कफापहैः॥
गोमूत्रारिष्टपानैश्च चूर्णायस्कृतिभिस्तथा।
सक्षारैस्तैलपानैश्च शमयेत्तु कफोदरम्॥
सन्निपातोदरे सर्व्वा यथोक्ताः कारयेत् क्रियाः।
सोपद्रवन्तु निर्वृत्तं प्रत्याख्येयं विजानता॥
उदावर्त्तरुजानाहैर्दाहमोहतृषाज्वरैः।
गौरवारुचिकाठिन्यैश्चानिलादीन् यथाक्रमम्॥
लिङ्गैः प्लीहोदरान् दृष्ट्वा रक्तं वापि स्वलक्षणैः।
चिकित्सां संप्रकुर्व्वीत यथादोषं यथाबलम्॥
स्नेहं स्वेदं विरेकञ्च निरूहमनुवासनम्।
समीक्ष्य कारयेद्बाहौ वामे वा व्यधयेत्सिराम्॥
षट्पलं वा पिबेत्सर्पिः पिप्पलीर्वा प्रयोजयेत्।

[illegible]
[illegible]
[illegible]
[illegible]
तद्वच्च [illegible]
[illegible] च कुर्व्वीत [illegible]
[illegible]
[illegible]
[illegible] चापि [illegible]
[illegible]
निहन्याय बद्धोदरिणि [illegible]
[illegible]
[illegible]
उदावर्त्तहरं कर्म्म कार्य्यं [illegible]
छिद्रोदरमृते स्वेदात् श्लेष्मोदरवदाचरेत्।
जातं जातं जलं स्राव्यमेवं [illegible]

अरिष्टमप्यत्र यथा।

"तृष्णाकासज्वरार्त्तन्तु [illegible]
वर्ज्जयेत् श्वासिनं तद्वत् [illegible]
"हन्त्यभ्यासोदकादिभ्यो [illegible]
सर्व्वमेवोदरं प्रायो दोषसङ्घातजं [illegible]
तस्मात्त्रिदोषशमनीं क्रिया [illegible]

पथ्यनियमो यथा।

"दोषैः कुक्षौ हि [illegible]
तस्माद्भोज्यानि योज्यानि [illegible]
रक्तशालीन् यवान् मुद्गान् [illegible]
पयोमूत्रासवारिष्टमधुसीधुसुरा [illegible]
यवागूमोदनं वापि यूषैरद्यादरोचकी।
मन्दाम्लस्नेहकटुभिर्यवैश्च मूलकैरपि।

अपथ्यानि यथा।

"औदकानूपजं मांसं शाकं पिष्टकृतं [illegible]
व्यायामाध्वदिवास्वप्नं यानयानं [illegible]
तथोष्णलवणाम्लानि विदाहीनि [illegible]
रोदित्यकस्मान् म्रियते तद्गुणान् बहु मन्यते ।
शोकक्लिष्टमना ध्यायन् जागरूको विचेष्टते ॥ ५ ॥
विषेण श्यावबदनो नष्टच्छायाबलेन्द्रियः ।
वेगान्तरेऽपि संभ्रान्तो रक्ताक्षस्तं विवर्जयेत्" ॥ ६ ॥

चिकित्सा यथा ॥

"अथानिलज उन्मादे स्नेहपानं प्रयोजयेत् ।
पूर्व्वमावृतमार्गे तु सस्नेहं मृदुशोधनम् ॥
कफपित्तभवेऽप्यादौ वमनं सविरेचनम् ।
तथास्य शुद्धदेहस्य प्रसादं लभते मनः ॥
इत्यमप्यनुवृत्तौ तु तीक्ष्णं नावनमञ्जनम् ।
हर्षणाश्वासनोत्त्रासभयताडनतर्ज्जनम् ॥
अभ्यङ्गोद्वर्त्तनालेपधूमान् पानञ्च सर्पिषः ।
युञ्ज्यात्तानि हि शुद्धस्य नयन्ति प्रकृतिं मनः" ॥ * ॥
"द्वौ प्रस्थौ स्वरसाद्ब्राह्म्या घृतप्रस्थञ्च साधितम् ॥
व्योषश्यामात्रिवृद्दन्तीशङ्खपुष्पीन्टपद्रुमैः ।
ससप्तलाक्रिमिघ्नैश्च कल्कितैरक्षसम्मितैः ॥
पलवृद्ध्या प्रयुञ्जीत परं मात्राचतुष्पलम् ।
उन्मादकुष्ठापस्मारघ्नं वन्ध्यासुतप्रदम् ॥
वाक्स्वरस्मृतिमेधाकृद्धन्यं ब्राह्मीघृतं स्मृतम्" ॥

इति ब्राह्मीघृतम् ॥ * ॥

"वरा विशाला भद्रैला देवदार्व्वेलवालुकैः ।
द्विसारिवा द्विरजनी द्विस्थिरा फलिनी नतैः ॥
बृहतीकुष्ठमञ्जिष्ठानागकेशरदाडिमैः ।
वेल्लतालीशपत्रैलामालतीमुकुलोत्पलैः ॥
सदन्तीपद्मकहिमैः कर्षांशैः सर्पिषः पचेत् ।
प्रस्थं भूतग्रहोन्मादकासापस्मारपाप्मसु ॥
पाण्डुकण्डूविषे शोषे मोहे मेहे गरे ज्वरे ।
अरेतस्यप्रजसि वा दैवोपहतचेतसि ॥
अमेधसि स्खलद्वाचि स्मृतिकामेऽल्पपावके ।
बल्यं मङ्गल्यमायुष्यं कान्तिसौभाग्यपुष्टिदम् ॥
कल्याणकमिदं सर्पिः श्रेष्ठं पुंसवनेषु च" ॥

इति कल्याणघृतम् ॥ * ॥

"एभ्यो द्विसारिवादीनि जले पक्त्वाष्टभिस्त्यजेत् ।
रसे तस्मिन् पचेत्सर्पिर्गृष्टिक्षीरं चतुर्गुणम् ॥
वीरादिमेदाकाकोलीकपिकच्छूविषाणिभिः ।
खर्ज्जूरमधुकैश्चैतन्महाकल्याणकं परम् ॥
वृंहणं सन्निपातघ्नं पूर्व्वस्मादधिकं गुणैः" ॥

इति महाकल्याणं घृतम् ॥ * ॥

"जटिला पूतना केशी चारटी मर्कटी वचा ॥
त्रायमाणा जया वीरा चोरकः कटुरोहिणी ।
कायस्था शूकरी छत्रा अतिच्छत्रा पलङ्कषा ।

महापुरुषदन्ता च वयस्था नाकुलीद्वयम् ।
कटम्भरा वृश्चिकाली शालिपर्णी च तैर्घृतम् ॥
सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम् ।
महापैशाचकं नाम घृतमेतद्यथामृतम् ॥
बुद्धिमेधास्मृतिकरं बालानाञ्चाङ्गवर्द्धनम्" ॥

इति महापैशाचकं घृतम् ॥ * ॥

"यथपीडाश्च विविधाः सर्षपाः स्नेहसंयुताः ।
कटुतैलेन चाभ्यङ्गो ध्मापयेच्चास्य तद्रजः ॥
सहिङ्गुस्तीक्ष्णधूमश्च सूत्रस्थानोदितो हितः ॥ * ॥
शृगालशल्यकोलूकजलूकाव्यवसाजैः ॥
मूत्रपित्तशकृल्लोमनखचर्म्मभिराचरेत् ।
धूपधूमाञ्जनाभ्यङ्गप्रदेहपरिषेचनम् ॥
धूपयेत् सततञ्चैनं श्वगोमत्स्यैश्च पूतिभिः ।
वातश्लेष्मात्मके प्रायः पैत्तिके तु प्रशस्यते ॥
तिक्तकं जीवनीयञ्च सर्पिः स्नेहश्च मिश्रकः ।
शिशिराण्यन्नपानानि मधुराणि लघूनि च ॥
विध्येच्छिरां यथोक्तां वा दृष्टं मेध्यामिषस्य वा ।
निवाते शाययेदेवं मुच्यते मतिविभ्रमात्" ॥

"भूतानुबन्धमीक्षेत प्रोक्ताल्लिङ्गाधिकाकृतिम् ॥
यद्युन्मादे ततः कुर्य्याद्भूतनिर्दिष्टमौषधम् ।
बलिञ्च दद्यात् पललं यावकं सक्तुपिण्डिकाम् ॥
स्निग्धं मधुरमाहारं तण्डुलान् रुधिरोक्षितान् ।
पक्वामकानि मांसानि सुरामैरेयमासवम् ॥
अतिमुक्तस्य पुष्पाणि जात्या सहचरस्य च ।
चतुष्पथे गवां तीर्थे नदीनां सङ्गमेषु च ॥
निवृत्तामिषमद्यो यो हिताशी प्रयतः शुचिः ।
निजागन्तुभिरुन्मादैः सत्त्ववान्न स युज्यते ॥
प्रसादं इन्द्रियार्थानां बुद्ध्यात्ममनसान्तथा ।
धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम्" ॥ * ॥

इति वाभटे उत्तरस्थाने सप्तमोऽध्यायः ॥
अस्य सनिदानसंप्राप्तिर्यथा ।

"इह खलु पञ्चोन्मादा भवन्ति । तद्यथा,— वातपित्तकफसन्निपातागन्तुनिमित्तास्तत्र दोषनिमित्ताश्चत्वारः ।
पुरुषाणामेवंविधानां क्षिप्रमभिनिर्वर्त्तन्ते तद्यथा,
"भीरूणामुपक्लिष्टसत्त्वानामुत्सन्नदोषाणाञ्च मलविकृतोपहितानि अनुचितान्याहारजातानि वैषम्ययुक्तेनोपयोगविधिनोपयुञ्जानानां तन्त्रप्रयोगं वा विषममाचरतामन्यां वा चेष्टां विषमां समाचरतामत्युपक्षीणदेहानाञ्च व्याधिवेगसमुद्भ्रमितानामुपहतमनसां वा काम-क्रोध-लोभ-हर्ष-भय-शोक-चिन्तोद्वेगादिभिः पुनरभिघाताभ्याहतानां वा मनस्युपहते बुद्धौ च प्रचलितायामभ्युदीर्णाः दोषाः प्रकुपिता हृदयमुपसृत्य मनोवहानि स्रोतांस्यावृत्य जनयन्त्युन्मादम् । उन्मादं पुनर्मनोबुद्धि-संज्ञा-ज्ञान-स्मृति-भक्ति-शील-चेष्टाचार-विभ्रमं विद्यात्" ॥

तस्येमानि पूर्व्वरूपाणि । तद्यथा,—
"शिरसः शून्यभावः चक्षुषोः व्याकुलता स्वनः कर्णयोः … … …
… … … … … … …

उन्मत्तमिवतमुद्दिंतत्समहिंताहतिकरयघ्याधेः स्वप्ने च दर्शनमभीक्ष्णं मान्तचलितानवस्थिता-नरस्थितानाञ्च रूपाणामप्रशस्तानाञ्च तिलपी-ड्कयन्त्राधिरोहणं वातकुण्डलिकाभिश्चोन्मथनं निमज्जनं कलुषाणामम्भसामावर्त्तेषु चक्षुषोश्चा-पसर्पणमिति दोषनिमित्तानामुन्मादानां पूर्व्व-रूपाणि"।

अथ वातादिभिर्दोषैरस्य लक्षणानि यथा,—

"ततोऽनन्तरमुन्मादाभिर्निर्वृत्तिस्तेनेदमुन्माद-विज्ञानं भवति। तद्यथा,—परिसर्पणमक्षिभ्रुवा-मोष्ठांस हनु हस्त-पादविक्षेपणमकस्मादनियता-ञ्च ननर्तिंहास्मृतः फेनागमनमास्यात् स्मित-हसित नृत्य गीत-वादित-प्रयोगाश्चास्थाने वीणा-[illegible]

[illegible]

२४८

उन्मा

तमात्मनो हितमुपलभन्तो देवादयः कुर्व्वन्त्युन्मत्तम्"।

आगन्तूनमादस्य पूर्व्वरूपाणि यथा।

"तत्र देवादिप्रकोपनिमित्तेनागन्तूमादेन पुर-स्कृतस्येमानि पूर्व्वरूपाणि। तद्यथा—देव-गो-ब्राह्मण-तपस्विनां हिंसारुचित्वं कोपनत्वं नृशं-साभिप्रायता अरतिरोजो-वर्णच्छाया-बल-वपुषा-ञ्चोपतप्तिः स्वप्ने च देवादिभिरभिभर्त्सनं प्रवर्त्त-नञ्चेति ततोऽनन्तरमुन्मादाभिनिर्वृत्तिः।

तत्रायमुन्मादकराणां भूतानामुन्मादयिष्यता-मारम्भविशेषो भवति। तद्यथा। अवलोकयन्तो देवा जनयन्त्युन्मादं गुरुवृद्धसिद्धर्षयोऽभिशपन्त पितरो धर्षयन्तः स्पृशन्तो गन्धर्व्वाः समाविशन्तो यक्षराक्षसास्त्वात्मगन्धमाघ्रापयन्तः पिशाचाः पुन-रारुह्य वाहयन्तः।

तस्येमानि रूपाणि भवन्ति। तद्यथा। अमर्त्त्यबल-वीर्य्य-पौरुष-पराक्रम-ग्रहण-धारण स्मरण-वचन-ज्ञान-विज्ञानान्यनियतश्चोन्मादकालः।

उन्मादयिष्यतामपि खलु देवर्षि-पितृ-गन्धर्व्व-यक्ष-राक्षस-पिशाचानां गुरुवृद्धसिद्धानां वा एष्व-न्तरेष्वभिगमनीयाः पुरुषा भवन्ति। तद्यथा— पापस्य कर्म्मणः समारम्भे पूर्व्वकृतस्य वा कर्म्मणः परिणामकाले एकस्य वा शून्यगृहवासे चतु-ष्पथाधिष्ठाने वा सन्ध्यावेलायामप्रयतभावे वा पर्व्वसन्धिषु वा मिथुनीभावे रजस्वलाभिगमने वा विगुणे वाऽध्ययन-बलि-मङ्गल-होम-प्रयोगे नियमव्रतब्रह्मचर्य्ये वा महाहवे वा देव-कुल-पुर-विनाशे वा महाग्रहोपगमने वा स्त्रिया प्रजनन-काले विविधभूताशुचिसंस्पर्शने वा वमनविरेचन-रुधिर-स्रावाशुचेरप्रयतस्य चैत्य-देवायतनाभिगमने वा मांस मधु तिल-गुड़-मद्योच्छिष्टे वा दिग्वाससि वा निशि नगर-निगम-चतुष्पथे पवनश्मशानाभि-गमने वा द्विज-गुरु-सुर-यति-पूज्याभिधर्षणे वा धर्म्माख्यानव्यतिक्रमे वा न्यस्यकर्म्मणोऽप्रशस्तस्या-रम्भे वा इत्याघातकालाः व्याख्याता भवन्ति।

त्रिविधन्तु खलून्मादकराणां भूतानामुन्मादने प्रयोजनम्भवति। तद्यथा। हिंसारतिरभ्यर्च्चन-ञ्चेति। तेषां तत्प्रयोजनविशेषमुन्मत्ताचारविशेष-लक्षणैर्विद्यात्। तत्र हिंसार्थमुन्माद्यमानोऽग्निं प्रविशत्यप्सु वा निमज्जति स्थलात् श्वभ्रे निपतति शस्त्र-कशा-काष्ठ-लोष्ट मुष्टिभिर्हन्त्यात्मानमन्यच्च प्राणवधार्थमारभते। तमसाध्यं विद्यात्। साध्यौ पुनर्द्वावितरौ। तयोः साधनानि। मन्त्रौषधि-मणि-मङ्गल-बल्युपहार-होम नियम-प्रायश्चित्तोपवास-स्वस्त्ययन-प्रणिपात-गमनादीनि एवमेते यथोन्मादा-[illegible] भवन्ति"।

"नैव देवा न गन्धर्व्वा न पिशाचा न राक्षसाः। न चान्ये स्वयमक्लिष्टमुपक्लिश्नन्ति मानवम्। ये त्वेनमनुवर्त्तन्ते क्लिश्यमानं स्वकर्म्मणा। न तन्निमित्तः क्लेशोऽसौ न ह्यस्ति कृतकृत्यता"। इति चात्र [illegible] समुपोद्धरन्ति ॥ * ॥

[illegible]

[illegible]

[illegible]

ल-रूप-गर्व्व-शौर्य्य-युक्तं माल्यानुलेपनं हा-
नतिवाक्करणं प्रायः शुक्लैकादश्यां सम-
न्वाः,स्वाध्याय-तपोनियमोपवासब्रतचर्य्या-
-गुरु-पूजारतिं भ्रष्टशौचं ब्राह्मणमब्राह्मणं
प्रवादिनं स्मरमानिनं देवतागार-सलिल-
रतिं प्रायः शुक्लपञ्चम्यां पूर्णचन्द्रदर्शने च
शसाः, रक्षःपिशाचास्तु हीनसत्त्व-पिशुन-
र्भं प्रायो द्वितीयातृतीयाष्टमीषु पुरुषं छि-
ाभिधर्षयन्तीत्यपरिसंख्येयानां ग्रहाणा-
ृततमा ह्यष्टावेते व्याख्याताः" ॥
ये असाध्यास्तेषां लक्षणानि यथा।
र्व्वेष्वपि तु खल्वेष यो हस्तावुद्यम्य रोष-सं-
नेःसंभ्रमन्येष्वात्मनि वा पातयेत् सह्यसाध्यो
ा साश्रुनेत्रो मेढ्रप्रवृत्तरक्तः क्षतजिह्वः
सिकश्छिद्यमानमर्म्मा प्रतिहन्यमानपाणिः
विकूजन् दुर्व्वर्णस्तृषार्त्तः पूतिगन्धिश्च हिं-
उन्मत्तो ज्ञेयस्तं परिवर्जयेत्। रत्यर्चना-
ादिनौ तु भिषगभिप्रायाचाराभ्यां बुद्धा
ाहारबलिश्रमेण मन्त्रभैषज्यविधिनोप
॥

अस्य चिकित्सा यथा।
नां शतं त्रिंशदभयाप्यूषणात्पलम्।
मिमसी प्रस्थो ह्याढ़कं चीरमूत्रयोः॥
र्पिषः प्रस्थमेभिः सिद्धं प्रयोजयेत्।
र्ण पलं शीते दत्त्वा च मधुमाक्षिकाम्॥
गन्तुसम्भूतानुन्मादान् विषमज्वरान्।
रांश्च हन्त्याशु पानाभ्यञ्जनावनैः" ॥
लशुनाद्यं घृतम् ॥ * ॥
रतः पुराणश्च घृतं तं पाययेद्भिषक्।
ग्रं पवित्रत्वाद्विशेषाद्ग्रहमोक्षणम्॥
ाधिकं स्यानादास्वादात् कटुतिक्तकम्।
र्ष पुराणं स्याद्दशवर्षस्थितं घृतम्॥
रसन्निभं शीतं तद्धि सर्व्वग्रहापहम्।
ारेभ्योऽयो प्रपुराणमतः परम्॥
र्व नाम तस्यास्ति यत्स्यात् वर्षशतं स्थितम्।
ृष्टमथाघ्रातं तद्धि सर्व्वग्रहापहम्॥
ारग्रहोन्मादवतां शस्तं विशेषतः" ॥
ाभिधर्व्वाणं विधेयत्वं स गच्छति।
ाारसालेपाञ्जनावनादीश्च योजयेत्॥
ाी मधुकं हिङ्गु लशुनं तगरं वचाम्।
ावस्तमूत्रेण पिष्टं स्यान्नावनाञ्जनम्" ॥
इति नस्याञ्जनम् ॥ * ॥
ा पीनसे गन्धैर्धूमवर्त्तिं कृताम्पिबेत्।
ाकधूमोशीरैः श्वेताद्यैर्व्वासहिङ्गुभिः" ॥
इति धूमपानम् ॥ * ॥ [शिराम्।
के शान्तसन्धौ वा मोक्षयेच्छो भिषक्
ै विषमे चैव ज्वरेऽपस्मार एव च" ॥
शोकभयक्रोधहर्षेर्ष्यालोभसम्भवान्।
ाप्रतिद्वन्द्वैरेभिरेव शमं नयेत्" ॥
ावैपिशाचगन्धर्व्वैरन्यस्य तु बुद्धिमान्।
ादञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च॥
ाशमादि तस्येह मृदुभैषज्यमाचरेत्।

पूजां बल्युपहारांश्च मन्त्राञ्जनविधींस्तथा॥
शान्तिकर्म्मेष्टिहोमांश्च जपस्वस्त्ययनानि च।
वेदोक्तान् नियमांश्चापि प्रायश्चित्तानि चाचरेत्॥
भूतानामधिपं देवमीश्वरं जगतः प्रभुम्।
पूजयन् प्रयतो नित्यं जयत्युन्मादजं भयम्॥
रुद्रस्य प्रमथा नाम गणा लोके चरन्ति ये।
तेषां पूजाञ्च कुर्व्वाण उन्मादेभ्यो विमुच्यते" ॥
इति च चरके चिकित्सास्थाने चतुर्द्दशोऽध्यायः॥

अस्य विशिष्टपूर्व्वरूपं यथा।
"मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम्।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम्॥
वायुनोन्मथनञ्चापि भ्रमश्च क्रमतस्तथा।
यस्य स्यादचिरेणैवमुन्मादं सोऽधिगच्छति" ॥

वातजादिभेदेन रूपाणि यथा॥
"रूक्षच्छविःपरुषवाक् धमनीततो वा
श्वासातुरः कृशतनुः स्फुरिताङ्गसन्धिः।
आस्फोटयन् पठति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात्॥ १॥
तृट्स्वेददाहबहुलो बहुभुग्विनिद्र-
श्छायाहिमानिलजलान्तविहारसेवी।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्ताद्दिवा नभसि पश्यति तारकाश्च॥ २॥
छर्द्यग्निसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रचारः।
निद्रापरोऽल्पकथनोऽल्पभुगुष्णसेवी
रात्रौ भृशं भवति चापि कफप्रकोपात्॥ ३॥
सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि
रूपाणि वातकफपित्तकृतानि विद्यात्।
सम्पूर्णलक्षणमसाध्यमुदाहरन्ति
सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यम्" ॥ ४ ॥
अपरयोर्लक्षणानि प्रथमतोऽस्योक्तानि।

अस्य चिकित्सा यथा।
"स्निग्धं स्विन्नन्तु मनुजमुन्मादार्त्तं विशोधयेत्।
तीक्ष्णैरुभयतो भागैः शिरसश्च विरेचनैः॥
विविधैरवपीडैश्च सर्षपस्नेहसंयुतैः।
योजयित्वा च तच्चूर्णं घ्राणे नस्यन्तु योजयेत्॥
सततं धूपयेच्चैनं श्वगोमांसैः सुपूतिभिः।
सर्षपाणाञ्च तैलेन नस्याभ्यङ्गौ हितौ सदा॥
दर्शयेदद्भुतान्यस्य वदेन्नाशं प्रियस्य च।
भीमाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्व्विषैः॥
भीषयेत् सततं पाशैः कशाभिर्वाथ ताडयेत्।
यन्त्रयित्वा सुयत्नं वा त्रासयेत्तं तृणाग्निना॥
प्रतुदेद्वारयेच्चैनं मर्म्माघातं विवर्जयेत्।
सापिधाने जरत्कूपे सततं वा निवासयेत्" ॥
"वर्हिष्ठकुष्ठमञ्जिष्ठाकटुकैलानिशाह्वयैः।
तेनेदं त्रिफलाहिङ्गुवाजिगन्धानरस्कैः॥
वचाजमोदाकाकोलीमेदामधुरपल्लवैः।
सशर्करं हितं सर्पिः पक्वं क्षीरचतुर्गुणम्॥
बालानां परिशुष्काणां पुंसां दुष्टाल्पमेधसाम्।
स्त्रीणां मन्दघ्नं स्त्रीणां बन्ध्यानाराञ्च गर्भदम्" ॥
इति पञ्चघृतम्। * ॥
"उरोऽपाङ्गललाटेषु शिराश्चास्य विमोक्षयेत्।

अपस्मारक्रियाश्चापि ग्रहोद्दिष्टाश्च कारयेत्।
शान्तदोषं विशुद्धञ्च स्नेहवस्तिभिराचरेत्॥
शोकशल्यं व्यपनयेदुन्मादे पञ्चमे भिषक्।
उन्मादेषु च सर्व्वेषु कुर्य्याच्चित्तप्रसादनम्॥
मृदुपूर्व्वं मदेऽप्येवं क्रियां विद्वान् प्रयोजयेत्।
विषजे मृदुपूर्व्वाञ्च विषघ्नीं कारयेत् क्रियाम्" ॥
इति सुश्रुते उत्तरतन्त्रे द्विषष्टितमोऽध्यायः॥ * ॥

"तपांसि तीव्राणि तथैव दानं
व्रतानि धर्म्मो नियमश्च सत्यम्।
गुणास्तथाष्टावपि तेषु नित्याः
व्यस्ताः समस्ताश्च यथाप्रभावम्॥
न ते मनुष्यैः सह संविशन्ति
न वा मनुष्यान् क्वचिदाविशन्ति।
ये वा विशन्तीति वदन्ति मोहात्
ते भूतविद्याविषयादपोह्याः॥
तेषां ग्रहाणां परिचारका ये
कोटीसहस्रायुतपद्मसङ्ख्याः।
असृग्वसामांसभुजः सुभीमाः
निशाविहाराश्च तमाविशन्ति" ॥

"निशाचराणां तेषां हि ये देवगणसंश्रिताः।
ते तु तत्सत्त्वसंसर्गाद्विज्ञेयास्तु तदञ्जनाः॥
देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये।
देववञ्च नमस्यन्ते प्रार्थ्यन्ते च देववत्॥
स्वामिशीलक्रियाचाराः क्रमश्च सुरादिषु।
नैर्ऋतेया दुहितरस्तासां स प्रसवः स्मृतः॥
सत्यत्वादपरत्तेषु वृत्तिस्तेषां गणैः कृताः।
हिंसाविहारा ये केचिद्दिव्यं भावमुपाश्रिताः॥
भूतानीति कृता संज्ञा तेषां संज्ञाप्रवक्तृभिः।
ग्रहसंज्ञानि भूतानि यस्मादेतदनया भिषक्॥
विद्यया भूतविद्यात्वमतएव निरुच्यते।
तेषां शान्त्यर्थमन्विच्छन् वैद्यस्तु सुसमाहितः॥
जप्यैः सनियमैर्होमैरारभेत चिकित्सितम्।
रक्तानि गन्धमाल्यानि बीजानि मधुसर्पिषाम्॥
भक्ष्याश्च सर्व्वे सर्व्वेषां सामान्यो विधिरुच्यते।
वस्त्राणि मद्यमांसानि क्षीराणि रुधिराणि च॥
यानि तेषां यथेष्टानि तानि तेभ्यः प्रदापयेत्।
हिनस्ति मनुजान् येषु प्रायशो दिवसेषु च॥
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये।
देवग्रहे देवगृहे कृत्वाग्निं प्राशयेद्बलिम्॥
कुशस्वस्तिकपूपाज्यच्छत्रपायससम्भृतम्।
असुराय यथाकालं विदध्याच्चत्वरादिषु॥
चतुष्पथे राक्षसस्य भीमेषु गहनेषु वा।
शून्यागारे पिशाचस्य तीव्रं बलिमुपाहरेत्॥
पूर्व्वमाचरितैर्मन्त्रैर्भूतविद्यादिदर्शितैः।
न शक्या बलिभिर्जेतुं योगैस्तान् समुपाचरेत्" ॥
"नक्तमालफलं व्योषं मूलं श्रीनाकबिल्वयोः।
हरिद्रे च कृतावर्त्तिः पूर्व्ववन्नयनाञ्जनम्" ॥
"न चापहं प्रयुञ्जीत प्रयोगं देवताग्रहे।
ऋते पिशाचादन्येषु प्रतिकूलं न चाचरेत्॥
वैद्यातुरौ निहन्युस्ते ध्रुवं क्रुद्धा महौजसः।
हिताहितविधानश्च नित्यमेव समाचरेत्॥
ततः प्राप्नोति सिद्धिञ्च यशश्च विपुलं भिषक्" ॥

... इति राजनिर्घण्टः॥ सेवा। ("कमे चिरायामवर्जितोपचाराम्"। इति रघौ, १। ९०।) व्यवहारः। ("प्रयुक्तपाणिग्रहणोपचारौ"। इति कुमारे ७। ८६।) उत्कोचः। इति हेमचन्द्रः॥ यस्य रसनायां यसकमायकम्। यथा, कुमारे ८। ६। "उपचारमरं मचेदिदं त्वमनङ्गः कथमक्षता रतिः"॥ "उपचारपरा दासः" इति चरके सूत्रस्थाने नवमेऽध्याये॥)

उपचारः, पुं, (उप + चर + ल्युट्।) चिकित्सा। इति हेमचन्द्रः॥

उपचित, त्रि, (उपचीयते स्म। उप + चि + क्त।) दिग्धः। समृद्धः। इति विश्वमेदिन्यौ॥ (यथा रघौ ९ म—सर्गे,। "मदनदोमदयोपचितं वनम्"।) स्मार्त्तिक। इति विश्व-हेमचन्द्रयोः॥ निदिग्धः। ... इत्यमरः॥ ("यदाह ... "...पमाम्यतीति"॥)

... स्त्री, (... निवाम्।) मूषिकपर्णी। इत्यमरः॥ ... इति भाषा। ... इति राजनिर्घण्टः॥ (तस्याः पर्य्याया यथा,—

... इति ...)

[illegible]

प्रकाश्यतेऽसावुपजिह्विकेति"॥ इति निदानस्थाने षोड़शेऽध्याये सुश्रुतेनोक्तम्॥ अस्य चिकित्सा यथा।

"उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्।
शिरोविरेकगण्डूषधूमैश्चैनमुपाचरेत्।
जिह्वागतानां कर्म्माणि तालव्यानां प्रवक्ष्यते"।

इति सुश्रुते चिकित्सितस्थाने २२ अध्याय.॥)

उपजीविका, स्त्री, (उपजीव्यतेऽनया। उप + जीव + गुरोश्चेत्यः। संज्ञायां कन् कुन् वा।) उपजीव्यम्। जीवनोपायः॥

उपजोषम्, अ, (उपजोषणम्। उप + जुष + अम्।) आनन्दः। इत्यमरः॥ (यथा, महाभारते १। "यथोपजोषं सर्व्वत्र जगविक्रीड़ भारत"। सुखं। यथा, रामायणे २। ८६। ७२।

"आश्वासयित्वा च चमूं महात्मा
निवेशयित्वा च यथोपजोषम्"॥)

उपज्ञा, स्त्री, (उपज्ञायते। ज्ञा अवबोधने। आतोपसर्गे इति कर्म्मणि अङ्।) आद्यज्ञानम्। इत्यमरः॥ तत्तु विनोपदेशेन प्रथमज्ञानम्। यथा वाल्मीकेः श्लोकनिर्म्माणे ज्ञानम्॥ ("अथ प्राचेतसोपज्ञं रामायणमितस्ततः"॥ इति रघुः १५। ६३॥ "लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः" इति मल्लिनाथटीका-मुखम्॥)

उपढौकनं, क्ली, (उप + ढौक + ल्युट्।) पारितोषिकद्रव्यम्। भेट डाला इत्यादि भाषा। तत्पर्य्यायः। प्राभृतम् १ प्रदेशनम् २ उपायनम् ३ उपग्राह्यः ४ उपहार ५ उपदा ६। इत्यमरः॥

उपतप्ता, [ऋ] पुं, (उप + तप + तृच्।) उपतापकम्। तत्पर्य्यायः। स्पर्शः २ स्पृष्टा ३। इत्यमरः॥ स्पर्शः ४ स्पष्टा ५। इति तट्टीका॥ रोगाः इत्यन्ये। इति भरतः॥

उपतापः, पुं, (उप + तप + घञ्।) त्वरा। उत्तापः। रोगः। इति मेदिनी॥ अशुभम्। पीड़ा। इति शब्दरत्नावली॥ (यथा, शाकुन्तले। "निर्व्वाणसि ... उपतापं जनयति"। पीडाहारके बाधनिकः। यथा, कौशिकसूत्रे। ११४। "यो ... उपतापो बभूव"॥)

उपत्यका, स्त्री, (उप समीपे आसन्ना भूमिः। उप + ...) "उपत्यका ..."। इति ... पर्व्वतनिकटभूमिः। इत्यमरः॥ (यथा, ...)

[illegible]

[illegible]

... माह।

... योनि... यथोप... इत्यादि... नखदन्तघातज... घाते ... "शास्त्रस्य ... रतिधर्मे प्रवृत्तेषु॥ कलहे दुष्टस्त्रीणां ... उत्क्षिप्तौ स्त्रिया ... मेहने नखदन्तज। ... योनिशोणितयोगात्। ... वातादिजनाद्या योनेः ...

... वातिक ... आगन्तुजयेति। ... लक्षणमाह।

"सतोदभेदस्फुरण ...
स्फोटैश्चर्मपिटकैः ...
पीतैर्मण्डलैः ...
पित्तेन ...

[illegible]

मेढ्रमध्ये शिरां विध्येत् पातयेद्वा जलौकसः ।
ऊर्द्ध्वं चाधश्च दोषघ्नं शरीरे शोधनं हितम् ॥
शिरोविरेके वमने च शोधने च भिषक् क्रमात् ।
वटप्ररोहार्ज्जुनजम्बुरोध्र-
पटोलनिम्बार्पितः प्रलेपः ।
पक्वं तथा शोधनरोपणीति
सर्व्वोपदंशेषु ततो हितोऽयम् ॥
उपदंशेषु सर्व्वेषु क्षालनं हितम् ।
त्रिफलायाः कषायेण भृङ्गराजरसेन वा ॥
लौहचूर्णं मधुयुतं पद्मं सौगन्धिकं तथा ।
पञ्च चूर्णं धुत्तूरकं प्रलेपनाय शस्यते ॥
पूगदग्धचूर्णेन रजसा दाडिमत्वचः ।
व्रणं तद्रसे कुर्य्याल्लेपं पूगफलेन वा ॥
दहेत् कटाहे त्रिफलां तन्मसी मधुसंयुता ।
सर्व्वोपदंशस्य व्रणं सद्यः प्ररोहयेत् ॥
पटोलनिम्बत्रिफलाकिरात-
क्वाथं पिबेद्वा खदिराम्बुनाम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशापहरः प्रयोगः" ॥ * ॥
"भूनिम्बनिम्बत्रिफलापटोल-
करञ्जधात्रीखदिरासनानाम् ।
कषायकल्कैः घृतमाशु पाच्यं
सर्व्वोपदंशापहरं प्रदिष्टम्" ॥
भूनिम्बादिघृतम् ॥ * ॥
एतानि यानि प्रोक्तानि कुष्ठे नाडीव्रणे व्रणे ।
उपदंशे प्रयोज्यानि सेकाभ्यञ्जनभोजने ॥
तारसूत्रेण संछिद्य लिङ्गवर्त्तिमशेषतः ।
शेषे तां ततस्ताभ्यां चिकित्सां प्रयत्नचरेत्" ॥
उपदंशाधिकारः । इति भावप्रकाशः ॥ * ॥
अपि च ।
"पटोलनिम्बत्रिफलागुडूचीक्वाथमापिबेत् ।
गुग्गुलुं सखदिरमुपदंशो विनश्यति" ॥
पुस्तकान्तरे प्रथमार्द्धे "पटोलनिम्बगुडूचीमरिच-
क्वाथमापिबेत्" । इति च पाठः ॥
दहेत् कटाहे त्रिफलां सा मसी मधुसंयुता ।
उपदंशे प्रलेपोऽयं सद्यो रोपयते व्रणम्" ॥ * ॥
त्रिफलानिम्बभूनिम्बकरञ्जखदिरादिभिः ।
कल्कैः क्वाथैर्घृतं पक्वमुपदंशहरं परम्" ॥
इति गारुडे १७५ अध्यायः ॥
अन्यच्चास्य सनिदानसम्प्राप्तिकं लक्षणमाह । यथा,
"स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा ।
दोषाध्युषितसंकीर्णमलिनानुरजःपथाम् ॥
अन्ययोनिमनिच्छन्तीमगम्यां नवसूतिकाम् ।
दूषितं स्पृशतस्तोयं रतान्तेष्वपि नैव वा ॥
विवर्द्धयिषया तीक्ष्णान् प्रलेपादीन् प्रयच्छतः ।
मुष्टिदन्तनखोत्पीडाविषवच्छूकपातनैः ॥
वेगनिग्रहदीर्घातिखरस्पर्शविघट्टनैः ।
दोषा दुष्टा गता गुह्यं त्रयोविंशतिमामयान् ॥
जनयन्त्युपदंशादीन् उपदंशोऽत्र पञ्चधा ।
पृथक्दोषैः सरुधिरैः समस्तैश्चात्र मारुतात् ॥
मेढ्रशोफे रुजश्चित्राः स्तम्भत्वक् परिस्फोटनम् ॥१॥
पक्वोदुम्बरसंकाशः पित्तेन श्वयथुर्ज्वरः ॥ २ ॥
श्लेष्मणा कठिनः स्निग्धः कण्डूमान् शीतलो गुरुः ॥३॥
शोणितेनासितस्फोटसम्भवोऽस्रगतिर्ज्वरः ॥ ४ ॥
सर्व्वजे सर्व्वलिङ्गत्वं श्वयथुर्मुष्कयोरपि" ॥ ५ ॥
असाध्यलक्षणं यथा ।
"तीव्रा रुगाशुपचनं दरणं क्रिमिसम्भवः ।
याप्यो मांसोद्भवस्तेषां मरणं सन्निपातजः" ॥
इति वाभटे उत्तरस्थाने ३३ अध्याये ।
अस्य चिकित्सा च यथा ॥
"मेढ्रमध्ये शिरां विध्येदुपदंशे नवोत्थिते ।
शीतां कुर्य्यात् क्रियां शुद्धिं विरेकेण विशेषतः ॥
तिलकल्कघृतक्षौद्रैर्लेपः पक्वे तु पाटिते ।
जम्ब्वाम्रसुमनोनीपश्वेतकाम्बोजिकाङ्कुरान् ॥
शल्लकीबदरीबिम्बपलाशतिनिशोद्भवाः ।
त्वचः क्षीरिद्रुमाणाञ्च त्रिफलाञ्च जले पचेत् ॥
सक्वाथः क्षालनं तेन पक्वतैलञ्च रोपणम् ।
तुत्थगैरिकलोध्रैलामनोह्वालरसाञ्जनैः ॥
हरेणुपुष्पकासीससौराष्ट्रीलवणोत्तमैः ।
लेपः क्षौद्रयुतैः सूक्ष्मैरुपदंशव्रणापहः ॥
कपाले त्रिफला दग्धा सघृता रोपणं परम् ।
सामान्यं साधनमिदं प्रतिदोषन्तु शोफवत् ॥
न च याति यथा पाकं प्रयतेत तथा भृशम् ।
पक्वैः स्नायुशिरामांसैः प्रायो नश्यति हि ध्वजः" ॥
इति वाभटे उत्तरस्थाने ३४ अध्यायः ॥

तत्रातिमैथुनादतिब्रह्मचर्य्याद्वा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढरोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्षसलिलप्रक्षालितयोनिमक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करज-दशन-विष-शूकनिपातनादर्द्दनाद्धस्ताभिघाताच्चतुष्पदीगमनादचौक्षसलिलप्रक्षालनादवपीडनाच्छुक्रमूत्रवेगविधारणान्मैथुनान्ते वाऽप्रक्षालनादिभिर्मेढ्रमागम्य प्रकुपिता दोषाः क्षतेऽक्षते वा श्वयथुमुपजनयन्ति तमुपदंशमित्याचक्षते ॥

स पञ्चविधस्त्रिभिर्दोषैः पृथक् समस्तैरसृजा चैकः ॥

तत्र वातिके पारुष्यं त्वक्परिपुटनं स्तब्धमेढ्रता परुषशोफता विविधाश्च वातवेदनाः ॥ १ ॥

पैत्तिके ज्वरः श्वयथुः पक्वोडुम्बरसङ्काशस्तीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च ॥ २ ॥

श्लैष्मिके श्वयथुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनाश्च ॥ ३ ॥

रक्तजे कृष्णस्फोटप्रादुर्भावोऽत्यर्थमसृक्प्रवृत्तिः पित्तलिङ्गान्यत्यर्थं ज्वरदाहौ शोषश्च याप्यस्त्वेव कदाचित् ॥ ४ ॥

सर्व्वजे सर्व्वलिङ्गदर्शनमवदरणं शेफसः क्रिमिप्रादुर्भावो मरणञ्चेति ॥ ५ ॥
इति सुश्रुते निदानस्थाने १२ अध्यायः ॥
चिकित्साविशेषो यथा ।
"यदि वा दुर्ब्बलो जन्तुर्न वा प्राप्तं विरेचनम् ।
निरूहेण हरेत् तस्य दोषानत्यर्थमुच्छ्रितान् ।
प्रपौण्डरीकयष्ट्याह्वयष्टीभिः-कुष्ठदारुभिः ॥
सरलागुरुरास्नाभिर्वातजं संप्रलेपयेत् ।
निचुलैरण्डबीजानि यवगोधूमशालयः ॥
एतैश्च वातजं स्निग्धैः सुखोष्णैः संप्रलेपयेत् ।
प्रपौण्डरीकपूर्व्वैश्च द्रव्यैः सेकः प्रशस्यते ॥
गैरिकाञ्जनयष्ट्याह्वसारिवोशीरपद्मकैः ।
सचन्दनोत्पलैः स्निग्धैः पैत्तिकं संप्रलेपयेत् ॥
पद्मोत्पलमृणालैश्च ससर्ज्जार्ज्जुनवेतसैः ।
सर्पिःस्निग्धैः समधुकैः पैत्तिकं सम्प्रलेपयेत् ॥
सेचयेच्च घृतक्षीरशर्करेक्षुमधूदकैः ।
अथ वापि सुशीतेन कषायेण वटादिना ॥
शालाश्वकर्णाजकर्णधवत्वग्भिः कफोत्थितम् ।
सुरापिष्टाभिरेताभिः सतताभिः प्रलेपयेत् ॥
रजन्यतिविषामुस्तसरलासुरदारुभिः ।
सपत्रपाठापत्तूरैश्च वा सम्प्रलेपयेत् ॥
करवीरस्य पत्राणि जात्यारग्वधयोस्तथा ।
प्रक्षालने प्रयोज्यानि वैजयन्त्यर्कयोरपि ॥
नीलिविडङ्गयष्टीभिः सर्व्वगन्धैश्च संयुतम् ।
एतत् सर्व्वोपदंशेषु श्रेष्ठं रोपणमिष्यते ॥
सर्ज्जिकातुत्यकासीसं शैलेयञ्च रसाञ्जनम् ।
मनःशिलासमैश्चूर्णं सौवीरसमनाशनम् ॥
गृहाद्दग्ध्वा कृतं भस्म हरितालं मनःशिला ।
उपदंशविसर्पाणामेतच्छान्तिकरं परम् ॥
मार्कवस्त्रिफलादन्तीताम्रचूर्णमयो रजः ।
उपदंशं निहन्त्येव वज्रमिन्द्राशनिर्यथा ॥
उपदंशद्वयेऽप्येतां प्रत्याख्यायाचरेत् क्रियाम् ।
तयोरेव च या योग्या वीक्ष्य दोषबलाबलम् ॥
उपदंशे विशेषेण पक्वे भूयस्त्रिदोषजे ।
दुष्टव्रणविधिं कुर्य्यात् कुथितं मेहनं त्यजेत् ॥
जाम्बौष्ठेनाग्निवर्णेन पश्चाच्छेषं दहेद्भिषक् ।
सम्यग्दग्धस्य विज्ञाय मधुसर्पिः प्रयोजयेत् ॥
शुद्धे च रोपणं दद्यात् कल्कं तैलं हितञ्च यत्" ।
इति च सुश्रुते चिकित्सितस्थाने १९ अध्याये ॥
"लवङ्गं मरिचं शुण्ठी विडङ्गञ्च वचा तथा ।
गन्धकं श्वेतखदिरं जातीकोषफले तथा ।
समभागकृतं सर्व्वं मधुना कारयेद्वटीम् ॥
शाणमात्रान्तु मतिमान् योजयेदविकल्पितः ।
अनुपानं दुग्धसारं लतताम्बूलभक्षणम्" ॥
इति उपदंशारी रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उपदंशाधिकारः ॥*॥
अत्र पथ्यानि यथा ॥
छर्द्दिर्विरेको ध्वजमध्यनाडी-
वेधो जलौकःपरिपातनञ्च ।
सेकः प्रलेपो यवशालयश्च
धन्वामिषं मुद्गरसो घृतानि ॥ १ ॥
कठिल्लकं शिग्रुफलं पटोलं
शालिञ्चशाकं नवमूलकञ्च ।
तिक्तं कषायं मधुकूपवारि
तैलञ्च हन्यादुपदंशरोगम् ॥ २ ॥
अपथ्य[illegible]था ॥
"दिवानिद्रां मू[illegible] मैथुनं गुडम् ।
आयासमम्लं[illegible] दुपदंशवान् ॥ १ ॥

... तदुक्तपथ्यापथ्यविधिः ।) समष्ठिलच्छः । भिगुरच्छः । इति राजनिर्घण्टः । (भवे घञ् ।) दंशनम् ॥

उपदर्शकः, पुं, (उपदर्शयतीति । उप + दृश् + णिच् + ण्वुल् ।) द्वारपालः । इत्यमरटीकासारसुन्दरी ॥ (दर्शयितरि, त्रि ॥)

उपदा, स्त्री, (उपदीयते इति । उप + दा + आतश्चोपसर्गे इत्यङ् ।) उपढौकनम् । इत्यमरः ॥ ("उपदा विविशुः शश्वत् नोत्सेकाः कोशलेश्वरम्" । इति रघुः । ४ । १० ।) "प्रथमं पृथामुपदाच्छलेन" । इति रघुः । ७ । ३० ।)

उपदानकं, स्त्री, (उपदान + स्वार्थे कन् ।) उत्कोचः । इति त्रिकाण्डशेषः ॥

उपदिष्टः, त्रि, (उप + दिश् + क्त ।) उपदेशप्राप्तः । यथा । "ननु शूद्रस्यापि सगोत्रा कथं न निषिध्यते इति चेदत्र उपदिष्टातिदिष्टगोत्रस्यैव निषेधो न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेरिति" । इत्युद्वाहतत्त्वम् ॥

उपदी, स्त्री, (उपेत्य दीयते छिद्यते इति उप + दो + क + ङीप् ।) वन्दाकः । इति राजनिर्घण्टः ॥ परगाछा इति भाषा ॥

उपदेवता, स्त्री, (उपगता मादृश्येन देवताम् ।) यक्ष-भूतादिः ॥ (उपदेवाश्च दश । यथाह अमरः । "विद्याधरोऽप्सरो यक्षो रक्षो गन्धर्व्वकिन्नरौ । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" ॥)

उपदेशः, पुं, (उप + दिश् + घञ् ।) मन्त्रकथनम् । तत्पर्य्यायः । दीक्षा २ । यथा । "चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये । मन्त्रमात्रप्रकथनमुपदेशः स उच्यते" ॥ इति रामार्च्चनचन्द्रिका ॥ कलात्वादिदीक्षाया-स्त्वसामर्थ्ये संक्षेपो यथा । "तत्राप्यशक्तः कश्चिच्चेद्रजमध्यां सान्वतम् । तन्मुखाभिमुखाष्टारं मूलेन केकरम् । [विधारा]ष्टौ चरेत् तत्र उपदेशे स्वयं विधि." । इति [शि]वसारतन्त्रम् ॥ हितकथनम् । [यथा], हितोपदेशे विग्रहे उक्तम् । "[उप]देशो हि मूर्खाणां प्रकोपाय न शान्तये" ॥) ... [कथ]नम् । (यथा, मनुः ८ । २७२ । "धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वत." ।) ...[उप]देष्टा । यथा । तथा च वाग्भटात् ... दिवाखप्न वर्ज्जयेदनेन कारणेनोपदेशः । ...र्ज्जयते मधुरेण दोषाभिवर्द्धनं इति" । ...सूत्र उत्तरतन्त्रे ६१ अध्याये ।)

...[न्] त्रि, (उपदिशति यः । उप + दिश् + तृच् ।) उपदेष्टा । (यथा हितोपदेशे मित्र-... "...ष्टो लोके कुट्टनीमुपदेष्टिकाम् । ...को धर्म्मे यथा ... हितम्" ।)

...] त्रि, (उपदिश्यते स्म । उप + दिश् + ...) उपदेशः । यथा । "...वर्णिव ... सर्वो ... । ... जौ ... विना" ॥

इति तिथ्यादितत्त्वम् ॥ वृहस्पतिः । "उपदेष्टानुमन्ता च लोके तुल्यफलौ स्मृतौ" । इत्याह्निकतत्त्वञ्च ॥

उपदेहिका, स्त्री, (उपदेहो विद्यते यस्याः । उपदेह + ठन् ।) कीटविशेषः । तत्पर्य्यायः । उपजिह्वा २ वम्री ३ उपदीका ४ । इति हेमचन्द्रः ॥

उपद्रवः, पुं, (उप + द्रु + अप् ।) उत्पातः । इति हलायुधः ॥ रोगारम्भकदोषप्रकोपजन्योऽन्यो विकारः । (तल्लक्षणमुक्तं वैद्यके । यथा,— "यो व्याधिस्तस्य यो हेतुर्दोषस्तस्य प्रकोपतः । योऽन्यो विकारो भवति स उपद्रव उच्यते" ॥ "व्याधेरुपरि यो व्याधिः उपद्रव उदाहृतः । सोपद्रवा न जीवन्ति जीवन्ति निरुपद्रवाः" ॥ इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये । "तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकाल-जातो व्याधिरुपसृजति स तन्मूलएवोपद्रव-संज्ञः" । इति सुश्रुते सूत्रस्थाने ३५ अध्याये ।)

उपद्रष्टा, [ष्टृ] त्रि, (उप + दृश + बाहुलकात् तृच् ।) उपदर्शकः । उदासीनबोधरूपत्वेन गुणप्रचार-दर्शी । इति गीताटीका ॥ ("उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः" । इति गीतायां १३ । २२ ।) साक्षी पुरुषः । यथा, "ऋत्विग्यजमानेषु यजनकर्म्मव्यापृतेषु तत्स-मीपस्थोऽन्यः स्वयमव्यापृतो यज्ञविद्याकुशलत्वात् ऋत्विग्यजमानव्यापारगुणदोषाणां ईक्षिता तद्वत् कार्य्यकारणव्यापारेषु स्वयमव्यापृतो विलक्षणस्तेषां कार्य्यकारणानां सव्यापाराणां समीपस्थो द्रष्टा उपद्रष्टा साक्षी पुरुषः" ॥)

उपधर्म्मः, पुं, (उपहीनो धर्म्मः ।) पाषण्डः । इति श्रीभागवतम् ॥ (यथा मनुः २ । २३७ । "एष धर्म्मः परः साक्षात् उपधर्म्मोऽन्य उच्यते" ॥)

उपधा, स्त्री, (उपधीयते शुद्धिज्ञानमत्र । उप + धा + आतश्चोपसर्गे इत्यङ् + टाप् ।) राज्ञां धर्म्मा-कामार्थभयैरमात्यादेर्यत् परीक्षणम् । धर्म्मार्थकाममोक्षद्वारा परीक्षा । यथा । "धर्म्मार्थकाममोक्षैश्च प्रत्येकं परिशोधनैः । उपेत्य धीयते यस्मादुपधा परिकीर्त्तिता ॥ अर्थकामोपधाभ्यान्तु भार्य्याः पुत्रांश्च शोधयेत् । धर्म्मोपधाभिर्व्विप्रांस्तु सर्व्वाभिः सचिवान् पुन" ॥ इति कालिकापुराणे ८५ अध्यायः ॥ ("भूयोभूय-श्चोपधाभिर्विशोध्य तं मे मतिसहायमकरवम्" । इति दशकुमारचरिते विश्रुतचरिते ।) पदानामु-पान्त्यवर्णः । इति व्याकरणम् ॥

उपधातुः, पुं, (उप सादृश्ये । धातुसदृशो धातुः ।) धातुप्रधानधातुसदृशधातुः । स तु सप्तधा यथा । माक्षिकम् १ तुत्थकम् २ अभ्रम् ३ नीलाञ्जनम् ४ मनःशिला ५ हरितालम् ६ रसाञ्जनम् ७ । शरीरस्थधातुस्थोपधातुः सप्तधा यथा । रसात् स्तन्यम् १ रक्तात् रजः २ मांसात् वसा ३ मेदसो स्वेदः ४ अस्थ्नो दन्ताः ५ मज्ज्ञः केशाः ६ शुक्रात् ओजः ७ । इति वैद्यकम् ॥ ("मन्यं रजश्च नारीणां काले भवति गच्छति ।

शुद्धमांसभवः स्नेहः सा वसा ... स्वेदो दन्तास्तथा केशास्तथैवौ... इति धातुभवा ज्ञेया एते सप्तो... इति शार्ङ्गधरेण पूर्व्वखण्डे पञ्च... "सप्तोपधातवः स्वर्णमाक्षिक... तुत्थं कांस्यं च रीतिश्च सिन्दूरश्च..." इति भावप्रकाशस्य पूर्व्वखण्डे प्रथम...

उपधानं, क्ली, (उपधीयते शिरोऽ... उप + धा + अधिकरणे ल्युट् ।) ... वालिश इति भाषा । तत्पर्य्यायः । ... इत्यमरः । गण्डु ३ । इति शब्दरत्ना... ("सोपधानां धियं धीराः स्थेयसीं ..." इति माघः २ । ७७ । " ... ...भागेन" । इति कादम्बरी ।) विनयः ... इति मेदिनी । व्रतम् । इति हेमचन्द्रः ।

उपधानीयं, क्ली, (उपधीयते दक्षि... अनीयर् ।) उपधानम् । इति ...

उपधिः, पुं, (उपधीयते धार्य्यतेऽनेन । ... + किः ।) कपटः । इत्यमरः । (यथा, म... "योगाधमनविक्रीतं योगदानप्रतिग्रहम् । यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्" ... "अरिषु हि विजय... विरमति सोपधि ... इति किराते ॥ १ । ४५ ।) ...

उपधूपितः, त्रि, (उप + धूप् ...) परिधूपितः । इति मेदिनी ।

उपधृतिः, स्त्री, (उप + धृ + क्तिन् ...) हेमचन्द्रः ॥

उपनतः, त्रि, (उप + नम् + क्त ।) ... हेमचन्द्रः ॥ ("अचिरोपनतां स ... रघुः ८ । ७ ।) नम्रः । यथा, माघे । "शौरे प्रतापोपनतैरितस्त... समागतैः प्रश्रयनम्रमूर्त्तिभिः" ।)

उपनदं, } क्ली, नद्याः समीपम् । इ...
उपनदि, } व्याकरणम् ॥ (तथा च भट्टिः ... "नदीपौर्णमास्याग्रहायणीभ्यः" । ... इत्यनेन सिद्धम् ॥)

उपनयः, पुं, (उप समीपे नीयते येन कर्म्मणा । उप + नी + अच् ।) उपनयनम् । इ... ("गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः । बालो वेदाय तद्योगात् बालस्योपनयं विदुः" ।) इति स्मृतिः । भावे + अच् ...

उप...

वेदाय तद्योगाद्बाल्योपनयं विदुः" ॥१॥
नयः। मट्टुबन्धनम् २। इति निरुक्तशेषः ॥
दः ३ उपनयः ४ ध्यानयः ५। इति पेम-
॥ तस्य कालः।
एमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्।
मेकादशे गेके विशामेके यथाकुलम्।
शराध्वागस्य वार्षं विप्रस्य पञ्चमे" ॥
तस्य गर्भावधिषोड़शवर्षपर्यन्तम् ॥ तत्र-
ष्टमवर्षो मुख्यः। क्षत्रियस्य द्वाविंशतिवर्ष-
तम्। तत्रैकादशवर्षो मुख्यः। वैश्यस्य चतु-
तिवर्षपर्यन्तम्। तत्र द्वादशवर्षो मुख्यः।
स्मृतिः ॥ वैश्ये द्वादशे। तन्नाशक्तौ प्रायश्चित्तं
। तदुत्तरे कार्य्यम्।
तोपकर्म्मतदा येन समीपं नीयते गुरोः।
। वेदाय तद्योगाद्बाल्योपनयं विदुः ॥
पापे तथा शकच्छते पाठनिषेधनात्।
यनं न तत्र स्यात् इति मन्वादिसम्मतम्" ॥
चिन्तामणौ।
"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा।
तेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्यां ॥
ग्रस्तं गते दैत्यगुरौ गुरौ वा
ग्रच्चेऽपि वा पापयुतेऽप्यनुष्णे।
व्रतोपनीतो दिवसे प्रणाशं
प्रयाति देवैरपि रक्षितो यः" ॥
ये लग्ने। व्रतेन उपनयनेन। भृगवलभीमक्षत्य-
क्तामण्योः।
तीशक्रधनाश्विमित्रकरभे पौष्णेज्यचित्राहरि-
न्द्रौ तोयपतौ भगे दितिसुते भाद्रद्वये सागरे।
दस्ये भृगुजेऽङ्गिरःशशिसुते चन्द्रे च तारे शुभे
थं व्रतकर्म्म मङ्गलतिथौ वाराः सितार्केज्यकाः" ॥
यपतिः शतभिषा। अदितिसुतउत्तरफल्गुनी।
गरः पूर्व्वाषाढ़ा। दीपिकायाम्।
वार्केन्दूद्भूमुद्धौ हरिशयनवह्निभास्करे चोत्तरस्थे,
पाये वेदवर्णाधिपदृढस्मुभदे चौरिभे नादितौच।
तार्केज्यर्च्चलग्ने रविमदनतिथिं प्रोह्य यष्ठाष्टमेन्दुं,
जीवास्तातिचारेऽर्कसितगुरुदिने कालशुद्धौ
व्रतं स्यात्" ॥
वेमदनतिथिं सप्तमीं त्रयोदशीम् ॥ * ॥
यचिन्तामणौ।
माघे द्रविणशीलाढ्यः फाल्गुने च दृढ़व्रतः।
मे भवति मेधावी वैशाखे कोविदो भवेत्॥
ठे गहननीतिज्ञ आषाढ़े क्रतुभाजनः।
ष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम्" ॥
तमार्त्तण्डे।
निर्व्यसौ कृतो विप्रः पुनःसंस्कारमर्हति"।
हगर्गः।
"उत्तियुक्ताननध्यायान् सप्तमीञ्च त्रयोदशीम्।
त्रयोमाघमासस्य द्वितीयां परिवर्जयेत्" ॥
"चतुर्थ्यतृतीया आषाढ़शुक्लादशमी मन्वन्तरा-
त्वेन निषिद्धा वैशाखशुक्लतृतीया युगादित्वेन

निषिद्धेति। पञ्चाममुखिगार्य्यो शिशुस्तु बङ्-
दोषभाक्। शुक्लपक्ष एव विहितः प्राक्शाखव-
चनात् ॥ * ॥ सामगानां कृष्णपक्षेऽप्युप-
नयनं श्रीपतिरत्नमालाज्योतिश्चिन्तामणिहृतवाक्य-
वचनात्। यथा।
"शाखाधिपे बलिनि केन्द्रगतेऽथ वास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम्।
नीचस्थितेऽरिगृहगेऽथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्म्महीनः" ॥
अस्य शाखाधिपस्य ॥ दीपिकायां।
"ऋग्वेदाधिपतिर्गुरुर्यजुर्वेदाधिपः सितः।
सामवेदाधिपो भौमः शशिजोऽथर्व्ववेदराट्" ॥
वेदाधिपकथनम् ॥ * ॥
"ब्राह्मणे गुरुवागीशौ क्षत्रिये भौमभास्करौ।
चन्द्रो वैश्ये बुधः शूद्रे पतिर्मन्दोऽन्त्यजे जने" ॥
वर्णाधिपकथनम् ॥ * ॥ पराजयलक्षणं वक्ष्ये
यात्रायाम्।
अत्रापि विवाहवद्दशयोगभङ्गवर्ज्जनम्।
विष्णुधर्म्मोत्तरे।
"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिवर्त्तेत अत ऊर्द्ध्वं निवर्त्तते" ॥
अत्र षोड़शवर्षस्य उपनयनाङ्गता प्रतीयते ॥
"पतिता यस्य सावित्री दशवर्षाणि पञ्च च।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः ॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः" ॥
इति यमवचने तदनङ्गता प्रतीयते। अनयोर्गर्भ-
जन्मप्रभृतिगणनाभ्यामविरुद्धार्थता। तथाच मा-
ठव्यः। "व्रतबन्धविवाहे च वत्सरपरिकल्पन-
माङ्गराचार्य्याः। आधानपूर्व्वमेके प्रसूतिपूर्व्वं
सदान्ये तु" ॥ * ॥ यत्तु द्विजानुपक्रम्य पैठिनसि-
वचनं द्वादशषोड़शविंशतिश्चेदतीता अवरुद्ध-
काला भवन्ति इति द्वादशवर्षाद्युपरि ब्राह्मणा-
दीनां महाव्याहृतिहोमप्रायश्चित्तार्थम्। षोड़-
शोपरि तु व्रात्यहोमादिगुरुप्रायश्चित्तार्थमिति।
इत्युपनयनम्। इति ज्योतिस्तत्त्वम् ॥

अथ उपनयनस्यानुष्ठानक्रमः।

तत्र प्रथमं प्रातः कृतस्नानः कृतवृद्धिश्राद्धः पिता
कृतवृद्धिश्राद्धेन पित्रान्यएवाचार्य्यो वृतस्तद-
सम्भवे माणवकस्ततो वा समुद्भवनामानमग्निं सं-
स्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य
माणवकं प्रातर्भोजयित्वा अग्न्युत्तरतो नीत्वा
शिखया सह मुण्डितं स्नापितं कुण्डलाद्यलङ्कृतं
क्षौमवस्त्रावृतं तदसम्भवे शुक्लाहतकार्पासैक-
वस्त्रावृतं माणवकं दक्षिणे पूर्व्वाभिमुखं निधाय
प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं
तूष्णीमग्नौ हुत्वा तत्तन्मन्त्रैर्व्यस्तसमस्तमहाव्याहृ-
तिहोमं कुर्य्यात्। तत आचार्य्यः पञ्चभिर्म्मन्त्रैः
पञ्चाहुतीर्जुहुयात्। तत आचार्य्यः उदगग्रेषु
कुशेषु कृताञ्जलिः प्राङ्मुख ऊर्द्ध्वस्तिष्ठेत्। अग्न्या-
चार्य्ययोर्म्मध्ये माणवकोऽपि कृताञ्जलिराचार्य्या-
भिमुख उदगग्रेषु कुशेषु ऊर्द्ध्वस्तिष्ठेत्। माणव-

कस्य दक्षिणतः स्थितो मन्त्रवान् ब्राह्मणो माण-
वकस्य अञ्जलिमुदकेन पूरयति पश्चात् आ-
चार्य्यस्यापि। ततो गृहीतजलाञ्जलिराचार्य्यो
गृहीतजलाञ्जलिं माणवकं पश्यन् मन्त्रं
जपति। तत आचार्य्यो माणवकं मन्त्रं पाठ-
यति। ततो माणवकस्याभिवादनार्थं देवता-
श्रयं नक्षत्राश्रयं गोत्राश्रयं वा माणवकनाम
कल्पयित्वा आचार्य्यो माणवकं कथयति। तत-
आचार्य्यो माणवकं मन्त्रेण नामधेयं पृच्छति।
माणवकः पूर्व्वाचार्य्यकल्पितं नाम मन्त्रेण कथ-
यति। तत आचार्य्यमाणवकौ पूर्व्वगृहीतजला-
ञ्जली त्यजेताम्। आचार्य्यस्तु दक्षिणेन पाणिना
माणवकस्य साङ्गुष्ठं दक्षिणं पाणिं मन्त्रेण गृह्णाति।
ततो गृहीतमाणवकहस्तो मन्त्रं जपत्याचार्य्यः।
ततो माणवकमाचार्य्यो मन्त्रेण प्रदक्षिणेन भ्राम-
यित्वा प्राङ्मुखं करोति। ततो माणवकस्य दक्षिण-
स्कन्धं स्पृष्ट्वा अवतीर्णेन दक्षिणपाणिना अव्यव-
हितं नाभिदेशं आचार्य्यो मन्त्रेण स्पृशति। ततो
माणवकस्य नाभेरुपरिदेशं मन्त्रेण आचार्य्यः
स्पृशति। ततो माणवकहृदयदेशं मन्त्रेणाचार्य्यः
स्पृशति। ततो दक्षिणे पाणिना आचार्य्यो
माणवकस्य दक्षिणस्कन्धं स्पृशन् मन्त्रं जपति।
ततो वामेन पाणिना माणवकस्य वामस्कन्धं
स्पृशन्नाचार्य्यो मन्त्रं जपति। अथाचार्य्यो माण-
वकं मन्त्रेण सम्बोधयति। अथ सम्बोधितं माण-
वकं आचार्य्यो मन्त्रेण प्रेषयति। ब्रह्मचारी तु
सर्व्वत्र वाढ़मिति ब्रूयात्। ततोऽग्नेरुत्तरभागे
गत्वा आचार्य्य उदगग्रेषु कुशेषु प्राङ्मुख उप-
विशति। तत आचार्य्याभिमुखो माणवकः मातृ-
तद्दक्षिणजानुः उदगग्रेषु कुशेषु उपविशति।
ततः प्रवरसंख्यया पञ्च वा त्रयो वा मेखला-
यज्ञोपवीतरूपग्रन्थयः कर्त्तव्याः। अथैनं माण-
वकमाचार्य्यस्त्रिःप्रदक्षिणं कारयित्वा त्रिवृतां
मुञ्जमेखलां परिधापयन् मन्त्रद्वयं वाचयति।
ततो यज्ञोपवीतं कृष्णसाराजिनान्वितं आचार्य्यो
माणवकं मन्त्रेण परिधापयेत्। ततो माणवक-
आचार्य्यस्य उपसन्नो भवति। ततस्तमुपसन्नमाण-
वकं आचार्य्यः प्रथमं पादं पादं ततोऽर्द्धमर्द्धं ततः
कृत्स्नां सावित्रीं अध्यापयेत्। तत आचार्य्यो
माणवकं महाव्याहृतीः पृथक् पृथक् कृत्वा
प्रणवपूर्व्विका अध्यापयेत्। ततो वैल्वं पालाशं
वा माणवकपरिमाणदण्डं माणवकाय प्रयच्छन्
आचार्य्यो माणवकं मन्त्रं वाचयति। अथ गृहीत-
दण्डो ब्रह्मचारी प्रथमं मातरं भिक्षां प्रार्थयति।
ततो मातृबन्धून् ततः पितरं ततः पितृबन्धून्
ततोऽन्यांश्च प्रार्थयेत्। ततः सर्व्वं लब्धभैक्षं आचा-
र्य्याय निवेदयेत्। ततः पूर्व्ववदाचार्य्यो व्यस्तसमस्त-
महाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां घृताक्तां
समिधं तूष्णीमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य
उदीच्यं शाट्यायनहोमादिवामदेव्यगानान्तं कर्म्म
निर्व्वर्त्तयेत्। ततः यदि पितैवाचार्य्यस्तदा कर्म्म-
कारयितृब्राह्मणाय दक्षिणां दद्यात्। अथान्य-

एवाचार्य्यो हतः सदा येन हतः स तस्मै दक्षिणां दद्यात्। ब्रह्मचारी तु तत्रैव स्थाने दिनान्तं यावत् वाग्यतस्तिष्ठेत्। ततः प्रातायां सन्ध्यायां सन्ध्यामुपास्य कुशण्डिकोक्तविधानेन समुद्भवनामानमग्निं संस्थाप्य मन्त्रं जप्त्वा दक्षिणं जानु भूमौ निधाय दक्षिणपश्चिमोत्तरक्रमेण उदकाञ्जलिसेकमग्निपर्य्युक्षणञ्च कृत्वा समिद्धोमं कुर्य्यात्। ततः प्रादेशप्रमाणघृताक्तसमित्त्रयं गृहीत्वा आघारयोस्तूष्णीं मध्ये समन्त्रकं अग्नौ जुहुयात्। ततः कर्म्मशेषोक्तविधिना पुनरपि अग्निपर्य्युक्षणोपक्रमं दक्षिणपश्चिमोत्तरक्रमेण उदकाञ्जलिसेकं कुर्य्यात्। ततः ब्रह्मचारी अग्निमभिवाद्य गत्वेऽग्निं विसृज्य अतीतायां सन्ध्यायां भिक्षान्नमन्नं क्षारलवणवर्जितं सघृतमुदकेनाभ्युक्ष्य भक्षणप्रकरणोक्तविधिना भुञ्जीत। एतद्यामिकर्म्म समावर्त्तनपर्य्यन्तं प्रत्यहं सायं प्रातः कर्त्तव्यम्। इत्युपनयनकर्म्म समाप्तम्। इति भवदेवभट्टः।

(ब्राह्मण-क्षत्रिय-वैश्यानामन्यतममन्वय-वयःशील-शौर्य्य-शौचाचार-विनय-शक्ति-बल-मेधा-धृति-स्मृति-मति-प्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्ताग्रम्-शुक्लाक्षिनासं प्रसन्नचित्त-वाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत्। अतो विपरीतगुणं नोपनयेत्।

उपनयनीयस्तु ब्राह्मणः प्रशस्तेषु तिथिकरण-मुहूर्त्तनक्षत्रेषु प्रशस्तायां दिशि शुचौ समे देशे चतुर्हस्तं चतुरस्रं स्थण्डिलमुपलिप्य गोमयेन दर्भैः संस्तीर्य्य पुष्पैर्लाजभक्तैः रत्नैश्च देवताः पूजयित्वा विप्रान् भिषजश्च तत्रोल्लिख्याभ्युक्ष्य च दक्षिणतो ब्राह्मणं स्थापयित्वाग्निमुपसमाधाय खदिर-पलाश-देवदारु-बिल्वानां समिद्भिश्चतुर्णां वा क्षीरवृक्षाणां न्यग्रोधोदुम्बराश्वत्थमधूकानां दधि-मधु-घृताक्ताभिर्दार्व्वीहौमिकेन विधिना-स्रुवेणाज्याहुतीर्जुहुयात्। सप्रणवाभिर्महाव्याहृतिभिस्ततः प्रतिदैवतमृषींश्च स्वाहाकारञ्च कुर्य्यात् शिष्यमपि कारयेत्। ब्राह्मणस्त्रयाणां वर्णानामुपनयनं कर्त्तुमर्हति राजन्यो द्वयस्य वैश्यो वैश्यस्यैवेति। शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्ज्जमनुपनीतमध्यापयेदित्येके। ततोऽग्निं त्रिः परिणीयाग्निसाक्षिकं शिष्यं ब्रूयात्। काम-क्रोध-लोभ-मोह-मानाहङ्कारेर्ष्यापारुष्य-पैशुन्यानृतालस्याय-शस्यानि हित्वा नीच-नख-रोम्णा शुचिना कषाय-वाससा सत्यव्रतब्रह्मचर्य्याभिवादनतत्परेणावश्यं मदनुमतस्थान-गमन-शयनासन-भोजनाध्ययन-परेण भूत्वा मत्प्रियहितेषु वर्त्तितव्यमतोऽन्यथा ते वर्त्तमानस्याधर्म्मो भवत्यफला च विद्या न च प्राकाश्यं प्राप्नोति। अहं वा त्वयि सम्यग्वर्त्तमाने यद्यन्यथादर्शी स्यामेनोभाक् भवेयमफलविद्यश्च। द्विज-गुरु-दरिद्र-मित्र-प्रव्रजितोपनताऽनाथाभ्युपगतानां चात्मबान्धवानामिव स्वभेषजैः प्रतिकर्त्तव्यमेवं साधु भवति। व्याधशाकुनिक-पतित-पापकारिणां न च प्रतिकर्त्तव्यमेवं विद्या प्रकाशते मित्रयशो धर्म्मार्थकामांश्च प्राप्नोति।

मानयाच।

"कृष्णेऽष्टमी तन्निधनेऽहनी द्वे
कृष्णेतरेऽप्येवमहर्द्दिनञ्च।
अकालविद्युत्-स्तनयित्नुघोषे
स्वतन्त्रराष्ट्रक्षितिपव्यथासु।
श्मशानयानायतनाहवेषु
महोत्सवौत्पातिकदर्शनेषु।
नाध्येयमन्येषु च येषु विप्रा
नाधीयते नाशुचिना च नित्यम्"।
इति सुश्रुते सूत्रस्थाने द्वितीयोऽध्यायः।)

उपनायः, पुं, (उपनीयते आचार्य्यसमीपमिति। उप + नी + घञ्।) उपनयनम्। इति हेमचन्द्रः।

उपनायकः, पुं, (उपमितो नायकेन।) नायकगुणोत्कर्षकथकः। यथा,—
"नायकस्य गुणोत्कर्षकथका उपनायकाः"।
इति सङ्गीतदामोदरः। *। उपपतिश्च। (उपनयतीति। उप + नी + ण्वुल्। प्रापके, त्रि।)

उपनाहः, पुं, (उपनह्यते ऽस्मिन्। उप + नह + घञ्।) वीणादितन्त्रबन्धनस्थानम्। तत्पर्य्यायः। निबन्धनम् २। इत्यमरः। व्रणालेपपिण्डः। इति मेदिनी। प्रलेप इति भाषा। (यथाह सुश्रुतः।
"आदौ विम्लापनं कुर्य्यात् द्वितीयमवसेचनम्।
तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रियाम्"।)

उपनिधिः, पुं, (उपनिधीयते इति। उप + नि + धा + कि।) उपन्यस्तवस्तु। स्थाप्यद्रव्यम्। तत्पर्य्यायः। न्यासः २। इत्यमरः।
("वासनस्थमनाख्याय हस्ते न्यस्य यदर्पितम्।
द्रव्यमुपनिधिः प्रोक्तः स्मृतिषु स्मृतिवेदिभिः"।
वासुदेवपुत्र। इति विष्णुपुराणम्।)

उपनिषत्, [द्] स्त्री, (उपनिषद्यते प्राप्यते ब्रह्मविद्या अनया इति। उप + नि + सद् + क्विप्।) धर्म्मः। वेदान्तशास्त्रम्। निर्जनस्थानम्। इति मेदिनी। (वेदशिरोभागः। तत्र चतुर्णां वेदानां अशीतिसहितशताधिकसहस्रसंख्यका उपनिषदः। तथाहि। ऋच एकविंशतिः। यजुषो नवाधिकशतम्। साम्नः सहस्रम्। पञ्चाशदुपनिषदोऽथर्व्वणस्य। ब्रह्मविद्या।) समीपसदनम्। इति त्रिकाण्डशेषः। तत्त्वम्। इत्यमरटीकायां भरतः। (द्विजातिकर्त्तव्यो व्रतभेदः। यथा, आश्वलायनगृह्यकारिका।
"प्रथमं स्यात् महानाम्नी द्वितीयञ्च महाव्रतम्।
तृतीयं स्यादुपनिषद् गोदानञ्च ततः परम्"।)
(मुक्तिकोपनिषदि अष्टाधिकशतोपनिषद्भेदाः प्रदर्शिताः। यथा,—
"ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरि ।७।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं तथा ।१०।
ब्रह्म कैवल्य-जाबाल श्वेताश्वा हंस आरुणिः ।१६।
गर्भो नारायणो हंसो बिन्दुर्नाद-शिरः-शिखा ।२३।
मैत्रायणी कौषितकी बृहज्जाबाल-तापनी ।२७।
कालाग्निरुद्र-मैत्रेयी सुबाल-क्षुरि-मन्त्रिकाः ।३२।

सर्व्वसारं निरालम्ब …
तेजोनाद-ध्यान …
परिव्राट्-त्रिशिखी सीता
दक्षिणामूर्त्तिं …
रहस्यं रामतपनं वासुदेव …
शाण्डिल्यं पैङ्गलं भिक्षु
तुरीयातीत-संन्यास …
अध्यात्मं तारसारं मुक्ति …
सावित्र्यात्मा …
त्रिपुरातपनं देवी त्रिपुरा …
हृदयं कुण्डली भस्म …
तारसार-महावाक्य …
गोपालतापनं कृष्णं दात्रात्रं …
शाट्यायनी हयग्रीवं दत्तात्रेयं …
कलि …
१ हंसः परमहंसः। २ …
३ नादोऽमृतनादः। ४ शिरोऽथर्व्व-शिखा। ६ तापनी नृसिंहतापनी …
सुकरहस्यम्। ८ तेजः तेजोबिन्दुः …
बिन्दुः। १० ध्यानं ध्यानबिन्दुः। ११ …
विद्या। १२ परिव्राट् नारदपरिव्राट् …
खी त्रिशिखीब्राह्मणं। …
१५ मण्डल मण्डलब्राह्मणं। १६ …
मूर्त्तिः। १७ अद्वय तारकं। …
रहस्यम्। १८ महत् महोपनिषत्। …
योगशिखा। २१ परिव्राज …
२२ पूर्णाऽमपूर्णा। २३ कठः कठरुद्र…
कुण्डी योगकुण्डली। २५ …
गणः गणपति। २७ दर्शनं …
अग्निहोत्रञ्च प्राणाग्निहोत्रम्। …
सन्तरणम्। ३० रहस्य …
आसां मध्ये या …
प्रदर्शिता। यथा,—
सामवेदान्तर्गता षोड़शसंख्या
अव्यक्तम् १ आरुणि २ …
छान्दोग्यम् ५ (जा)बालदर्शनम् …
महत् ८ मैत्रायणी ९ मैत्रेयी १० …
११ वज्रसूचिकम् १२ वज्रसूचिकम् …
१४ संन्यासम् १५ सावित्री १६ …
शुक्लयजुर्व्वेदान्तर्गता ऊनविंश…
उपनिषद् यथा,—
अतीताध्यात्मम् १ ईशावास्यम् २ …

[illegible] पुष्पवृष्टि[illegible] [illegible] ११ [illegible] १२ [illegible] १३ [illegible] १४ [illegible] १५ [illegible] १६ [illegible]

[illegible] उपनिषदः यथा,—

[illegible] १७ [illegible] १८ [illegible] १९ [illegible] २० [illegible] २१ [illegible] २२ [illegible] २३ [illegible] २४ [illegible] २५ [illegible] २६ [illegible] २७ [illegible] २८ [illegible] २९ [illegible] ३० [illegible] ३१ [illegible]

[illegible] उपनिषदः यथा,—

[illegible] नारायण[illegible] [illegible] [illegible] १० [illegible]

[illegible] उपनिषद्, [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible] १० [illegible] ११ [illegible] १२ [illegible] १३ [illegible] १४ परमहंसः १५ [illegible] १६ [illegible] १७ [illegible] १८ [illegible] १९ [illegible] २० [illegible] २१ [illegible] २२ [illegible] २३ [illegible] २४ [illegible] २५ [illegible] २६ [illegible] २७ [illegible] २८ [illegible] २९ [illegible] ३० [illegible] ३१ [illegible])

[illegible], क्ली, (उपनिष्क्रामन्ति सैन्यान्यत्र। उप + [illegible] + घ। [illegible]) [illegible]। राजपथः। इति हेमचन्द्रः॥

[illegible] क्ली, (उपनिष्क्रामन्त्यनेन उप + निस् + क्रम + ल्युट्।) राजपथः। इति हेमचन्द्रः।

[illegible]संस्कारः।

[illegible], पुं, (उप + नी + [illegible]) [illegible]। इति [illegible]। ("यथोपनीतं विधिवद् विपश्चितः"। रघुः। ३। २९।) [illegible]

[illegible], पुं, (उप + नि + [illegible] + घञ्।) [illegible]। तत्पर्य्यायः। [illegible] २। [illegible]। ("तस्मात् [illegible]"। [illegible]। ८८। ७। विचारः। यथा, [illegible]

"[illegible]मिमं [illegible] निबोधत"॥
"[illegible] विचारं [illegible]"।
[illegible] तट्टीका।

[illegible] इति मेदिनी।)

उपपत्ति, स्त्री, (उप + पद् + क्तिन्।) [illegible]। युक्तिः। [illegible] ("[illegible]"। वराहमिहिरः) [illegible]।

[illegible]
"[illegible]"।

(यथा, मनुः ३। १५५।
"[illegible] शाकाय[illegible]"॥)

उपपत्तिः, स्त्री, (उप + पद् + क्तिन्।) सङ्गतिः। सिद्धिः। समाधानम्। निरूपणम्। [illegible] [illegible] इति हेमचन्द्रः। ("उपपत्तिमदूर्ज्जिताश्रयम्"। इति भारविः। २। १।) हेतुः। यथा,—
"[illegible]"।
इत्यत्र उपपत्तिभिर्युक्तिभिर्हेतुभिरिति मल्लिनाथः। सङ्गतिः। यथा,—
"[illegible]"।
इति भाषापरिच्छेदः। (उपायः। यथा माघे। "[illegible]"। सिद्धिः। प्राप्तिः। "[illegible] प्रति दुर्व्वलाशः"। इति रघुः। ५। १९।)

उपपदं, क्ली, (उपोच्चारितं पदम्।) पदम्। इति सिद्धान्तकौमुदी। समीपोच्चारितपदम्। (यथा, रघौ १९। ४०। "तस्याः स राजोपपदं निशान्तम्"।) यथा या वाच्यार्थे प्रादिरूपादि। समभिव्याहृतसमर्थोपपदम्। यथा प्रतापादौ प्रादि। इति व्याकरणम्॥

उपपातकं, क्ली, (उपपातयति नरके यत्। उप + पत् + णिच् + ण्वुल्। यद्वा उपमितं पातकेन।) पापविशेषः। तत्तु उपपातकसंज्ञ दिर्थं यथा। गोवधः १ अयाज्ययाजनम् २ परदारगमनम् ३ आत्मविक्रयः ४ गुरुत्यागः ५ मातृत्यागः ६ पितृत्यागः ७ एषां शुश्रूषाद्यकरणं त्यागः। स्वाध्यायत्यागः ८ स तु सर्व्वदा वेदपाठत्यागः। अधीतवेदविस्मरणञ्च। अग्नित्यागः ९ स तु स्मार्त्ताग्निहोत्रत्यागः। सुतत्यागः १० स तु तस्य संस्कारभरणाद्यकरणम्। परिवित्तिता ११ सा तु कनिष्ठेन आदौ विवाहे कृते ज्येष्ठस्य। परिवेदनं १२ तत्तु ज्येष्ठतदारग्नेपेरेष्वसत्त्वे कनिष्ठस्य। तयोः कन्यादानं १३ तयोर्याजनं १४ तत्तु तयोरेव विवाहादौ पौरोहित्यम्। कन्याया दूषणं १५ तत्तु मैथुनवर्ज्जमङ्गुलीप्रक्षेपादिना क्षतम्। अकृत्वा योनिविदारणमिति यावत्। वार्द्धुष्यं १६ तत्तु निषिद्धवृद्धिजीवनम्। व्रतलोपः १७ स तु ब्रह्मचारिणो मैथुनम्। तडागविक्रयः १८ आरामविक्रयः १९ दारविक्रयः २० अपत्यविक्रयः २१ व्रात्यता २२ सा तु यथाकालमनुपनयनम्। बान्धवत्यागः २३ भृताध्यापनम् २४ तत्तु प्रतिनियतवेतनग्रहणपूर्व्वकाध्यापनम्। भृताध्ययनम् २५ तत्तु वेतनदानपूर्व्वकाध्ययनम्। अविक्रेयविक्रयः २६ स तु तिलादीनां विक्रयः। सर्व्वाकरेष्वधिकारः २७ स तु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञया अधिकारः। महायन्त्रप्रवर्त्तनं २८ तत्तु जलप्रवाहप्रतिबन्धसेत्वादि पीडादिकरणम्। इक्ष्वादिपीडनयन्त्रादि तैलादि-[illegible]च। ओषधिहिंसनं २९ तत्तु ओषधीनां यथाकामच्छेदनम्। स्त्र्याजीवः ३० स तु भार्य्यादिस्त्रीणां वेश्यात्वं कृत्वा तद्धनोपजीवनम्। अभिचारकर्म्म ३१ तत्तु श्येनादिना परेष्टमारणम्। मूलकर्म्म ३२ तत्तु मन्त्रौषधादिना वशीकरणम्। इन्धनार्थं अशुष्कद्रुमाणां छेदनं ३३ आत्मार्थं क्रियारम्भः ३४ स तु केवलात्मनः देवपित्राद्युद्देशमन्तरेण पाकादनुष्ठानम्। निन्दितान्नभक्षणम् ३५ तत्तु लशुनादेः अनाहिताग्निता ३६ सा तु समर्थस्य श्रौतस्मार्त्ताग्न्यपरिग्रहः। स्तेयं ३७ तत्तु सुवर्णव्यतिरिक्तद्रव्यापहरणम्। देवर्षिपितॄणां ऋणानां अनपाकरणम् ३८ [illegible] ३९ तत्तु [illegible] नास्तिकता ४० सा तु [illegible]। [illegible] ४१ [illegible] ४२ [illegible] ४३ [illegible] ४४ स्त्रीवधः ४५ शूद्रवधः ४६ वैश्यवधः ४७ क्षत्रियवधः ४८ नास्तिक्यम् ४९। तत्तु परलोकाभावबुद्धिः। नास्ति परलोक इति वा। इति मनुः स्मृत्यादिश्च॥ (अत्र प्रायश्चित्तादिकं प्रायश्चित्तशब्दे द्रष्टव्यम्॥)

उपपापं, क्ली, (उपमितं पापेन।) उपपातकम्। इति स्मृतिः॥

उपपुरं, क्ली, (उप समीपे पुरम्।) शाखानगरम्। इति हेमचन्द्रः॥

उपपुराणं, क्ली, (उपमितं पुराणैः।) व्यासकृताष्टादशपुराणभिन्नमुन्यादिप्रणीताष्टादशपुराणम्। यथा,—
"अन्यान्युपपुराणानि मुनिभिः कथितानि च।
आद्यं सनत्कुमारोक्तं १ नारसिंहं २ ततः परम्॥
तृतीयं वायवीयञ्च ३ कुमारेण च भाषितम्।
चतुर्थं शिवधर्म्माख्यं ४ साक्षान्नन्दीशभाषितम्॥
दुर्व्वाससोक्तमाश्चर्य्यं ५ नारदीयमतःपरम् ६।
नन्दिकेश्वरयुग्मञ्च ७ तथैवोशनसेरितम् ८॥
कापिलं ९ वारुणं १० शाम्बं ११ कालिकाह्वयमेव च १२।
माहेश्वरं १३ तथा कल्की १४ दैवं १५ सर्व्वार्थसिद्धिदम्॥
पराशरोक्तमपरम् १६ मारीचम् १७ भास्कराह्वयम् १८"
अत्र दैवं देवीपुराणम्। इति मलमासतत्त्वधृतकूर्म्मपुराणम्॥ (एषां विवरणानि तत्तच्छब्दे द्रष्टव्यानि॥)

उपपुष्पिका, स्त्री, (उपगता पुष्पमिव विकाशलम्। जृम्भणसमये मुखव्यादानात् तथात्वम्।) [illegible] [illegible] इति माथा। तत्पर्य्यायः। हा-[illegible]। इति हारावली॥

उपप्रदानं, क्ली, (उप समीपे प्रदानम् ।) उत्कोचः । इति हेमचन्द्रः ॥ घुस इति भाषा । (यथा कथा-सरित्सागरे २॥ तरङ्गे ।
"उपप्रदानं लिप्सूनामेकं ह्याकर्षणौषधम्" ॥)

उपप्लवः, पुं, (उप + प्लु + अप् ।) राहुग्रहः । विघ्नः । उत्पातः । इति मेदिनी ॥
("उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" ।) इति कुमारे । २ । ३२ ।) ग्रहणम् । यथा "उपप्लवे चन्द्रमसो रवेश्च" । इति स्मृतिः ॥ (उत्पातश्चकोऽग्निमार्दिः । यथा, "कच्चिन्न वाय्वादिरुपप्लवो वः" । इति रघुः । ५ । ६ । भीतिः । "नृपाश्रयोपप्लविनः परेभ्यः" । इति रघुः । १३ । ८ ।
"उपप्लविनो भयवन्त" । इति मल्लिनाथः ॥)

उपभूषणं, क्ली, (उपमितं भूषणेन ।) घण्टाचामरादि । यथा,—
"घण्टाचामरकुम्भादिपात्रोपकरणादिकम् ।
तद्भूषणाकरे दद्यादुक्तमादुपभूषणम्" ॥ इति ।
"प्राकाराः पादपाश्च नैवेद्यो यद्भूमेव च ।
ध्वजादि दत्तञ्च सर्व्वं तदुपभूषणम्" ।
इति च कालिकापुराणे ६८ अध्यायः ॥

उपभृत्, स्त्री, (उप + भृ + क्विप् ।) यज्ञार्थपात्रविशेषः । इत्यमरः ॥ (यथा, श्रौतसूत्रे । १ । १० । ८ ।
"दक्षिणतो जुहूं परिग्रहीष्यमाणाम् ॥")

उपभोगः, पुं, (उप + भुज + घञ् ।) भोगमात्रम् । निर्व्विशः । तत्पर्य्यायः । निर्व्वेशः । इत्यमरः ॥
("प्रदोषभोगविन्नेषु पौरोभाग्यनिवाचरन्" । इति रघुः । १९ । ४२ । तथा च स्मृतिः ।
"आदमेन्नोपभोगेन वयं माध्यमतोऽन्यथा" ।
"न जातु कामः कामानामुपभोगेन शाम्यति" ।
इति मनुः । २ । ९४ ॥)

उपमा, स्त्री, (उपमीयते इति । उप + मा + अङ् + टाप् ।) उपमानम् । सादृश्यम् । इत्यमरः ॥
("अद्योदमर्भुर्निलिलेन कृत्स्ना" । इति माघे १।८
[illegible] "। इति रघुः । १ । ३० ।) तस्य पर्य्यायः ।
[illegible]

उपमानम्, क्ली, (उपमीयते अनेन । उप + मा + ल्युट् ।) [illegible]

[illegible]

सादृश्यज्ञानम् । उपमितिकरणम् । यथा गौर्गवयश्चेतिवाक्ये । "प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्" । इति न्यायसूत्रम् । प्रसिद्धस्य पूर्व्वप्रमितस्य गवादेः साधर्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिर्यत इत्यध्याहारेण च करणलक्षणम् । अत्र च वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः । यथा च अतिदीर्घग्रीवत्वादिपश्वन्तरवैधर्म्याश्च न तु । उष्ट्रे करभपदवाच्यत्वग्रहः । एवमन्योऽपि उमानस्य विषय इति भाष्यं । तथा मुद्गपर्णीसदृशी ओषधी विषं हन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीत्युपमित्या विषयीक्रियते इत्यादि ॥)

उपमालङ्कारः, पुं, (उपमैव अलङ्कारः ।) साम्यालङ्कारः । यथा । उपमामाह ।
"साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः" ।
तद्भेदा । सा द्विविधा । पूर्णा लुप्ता च । तल्लक्षणम् । यथा,
"सा पूर्णा यदि सामान्यधर्म्म औपम्यवाचि च" ।
इयं पुनः श्रौत्यार्थी च । तल्लक्षणन्तु ।
"श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः" ॥
द्वे त्रिधा । तद्धिते समासेऽथ वाक्ये । उदाहरणम् ।
"सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले" ॥
अत्र क्रमेण त्रिविधा श्रौती ।
"मधुरः सुधावदधरः
पल्लवतुल्योऽतिपेलवः पाणिः ।
चकितमृगलोचनाभ्याम्
सदृशी चपले च लोचने तस्याः" ॥
अत्र क्रमेण त्रिविधा आर्थी । पूर्णा षड्वेव तत् ।
"लुप्ता सामान्यधर्म्मादेरेकस्य यदि वा द्वयो ।
त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्व्ववत्" ॥
इयञ्च तद्धिते श्रौता असम्भवात् पूर्णा(?)ष्टरीत्या पञ्चप्रकारा । उदाहरणम् ।
"मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये ।
वाचः सुधा इवौष्ठस्ते बिम्बतुल्यो मनोऽश्मवत्" ॥
"सा लुप्ता पञ्चधा पुनः ।
आधारकर्म्मविहिते द्विविधे च क्यचि क्यङि ।
कर्म्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः" ॥
उदाहरणम् ।
"अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरं जनं तव सदा रमणीयते श्रीः ।
दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्दु-
सञ्चारमत्र भुवि सञ्चरसि क्षितीश" ॥
अत्रैवं दशप्रकारा पुनः । सा पुनर्द्विधा । वाक्यगा समासगा च । यथा ।
"उपमानानुमानाभ्यां द्विधा वाक्यसमासयो." ।
औपम्यं निगदेन पश्चात्समासेऽपि प्रायोग्. (?) [illegible] पुनर्द्विधा ।
"[illegible] मोहे समासे द्विवि च द्विधा" ।

उदाहरणम् ।
"वदनं मृगशा[illegible]
"गद्गदमति श्रुतिप[illegible]
पुनर्धर्म्मोपमानयो[illegible]
"द्विधा समासे व[illegible]
उदाहरणम् ।
"तस्या मुखेन सदृश[illegible]
पुनर्द्विधा ।
"क्रियमाणता देशा[illegible]
उदाहरणम् । विधा[illegible]
"उपमेयस्य लोपे तु स्या[illegible]
उदाहरणम् ।
"अरातिविक्रमालोकवि[illegible]
श्रपाथोदपदोर्द्दण्डः स स[illegible]
धर्म्मोपमेयलोपेऽन्या च । उ[illegible]
प्रसरति मदः सौरोत्ति[illegible]
त्रिलोपे च समासगा । यथा
नेत्रादि ।
"तेनोपमाया भेदाः स्यु[illegible]
पूर्णा षड्विधा । लुप्ता [illegible]
लिता सप्तविंशतिप्रकारोक्ता" । इ[illegible]
दर्पणस्य १० परिच्छेदात् उक्तेः ।

उपमितिः, स्त्री, (उप + मि + क्तिन् ।) [illegible]
शब्दरत्नावली । न्यायमते
यथा "गोसदृशो गवयः" [illegible]
ज्ञानम् । अस्य करणं सादृश्य[illegible]
ज्ञानम् । अस्य व्यापारः [illegible]
नम्" । इत्युपमानखण्डम् । [illegible]
परिच्छेदे । ७९-८० ।
"ग्रामीणस्य प्रथमतः पश्यतो गवि[illegible]
सादृश्यधीर्गवादीनां या स्यात् सोऽत्र[illegible]
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्या[illegible]
गवयादिपदानान्तु शक्तिधीरुपमा[illegible]
पदज्ञानन्तु करणं शक्तिधीरुपमा[illegible]

उपमेयः, पुं, (उपमा इव अत्र ।) [illegible]
इति शब्दचन्द्रिका । [illegible]
उपमानामुपमाख्यानम् इत्यर्थः ।

उपयन्ता, [ऋ] पुं, (उप + यम + तृच् ।) [illegible]
इति जटाधरः । ("अयमेतत्[illegible]
धिना" । इति कुमारे ।
सदृशेन दृष्टाम् । इति र[illegible]

उपयमः, पुं, (उप + यम + [illegible]
इत्यमरः ।

उपयाचकः, त्रि, (उप समीपे या[illegible]
याच + ण्वुल् ।) [illegible]

उपयाचितं, त्रि, (उप + याच + [illegible]
देवाय देयं वस्तु । तत्पर्य्यायः [illegible]
इति त्रिकाण्डशेषः । [illegible]
सरित्सागरे १३ तरङ्गे ।
"तस्योपयाचितादेव [illegible]
ततस्ताभ्रिवा [illegible]

सेद्गमध्ये देवदेयम् । इति जटाधरः ॥
, कादम्बरी । "सिद्धायतनानि हतविविध-
पयाचितकानि" ॥)
, पुं, (उप + यम् + घञ् ।) विवाहः । इत्य-
(यज्ञाङ्गपात्रविशेषः । यथा यजुर्व्वेदे ७ । ४ ।
"उपयामगृहीतोऽसि" । उपयम्यतेऽनेन ।
यम + णिच् + अच् । इति व्युत्पत्त्या सि-
)
, त्रि, (उप + युज् + क्त ।) योग्यः । उचितः ॥
, पुं, (उपयुज्यते इति । उप + युज् + घञ् ।)
णम् । इति विजयरक्षितः । इष्टसिद्धार्थ-
रः । इति विष्णुमिश्रः ॥ ("अनङ्गलेखक्रिय-
योगम्" । इति कुमारे । १ । ७ ॥ भोजनम् ।
थधान्नविहाराणामुपयोगं सुखावहम्" । इति
स्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥)
ता, स्त्री (उपयोगिन् + तल् ।) उपयोगिनो
। फलसाधनता । प्रयोजनम् । आनुकूल्यम् ॥
, [न्] त्रि, (उपयोगोऽस्यास्तीति । उप-
+ इनि ।) उपयुक्तद्रव्यादिः । क्रियासाधनम् ।
क्तः ॥ ("तदुपयोगीनि शारीरकसूत्रा-
" । इति वेदान्तसारे । २ ॥ उपभोगद्रव्यम् ।
कथासरित्सागरे । २५ तरङ्गे ।
क्त कन्यारत्नं मे गृह्यतामुपयोगि चेत्" ॥)
; व्य, उपजोषम् । आनन्दः । इत्यमरटीकायां
: ॥
, पुं, (उप + रञ्ज + क्त ।) राहुग्रस्तः सूर्य-
श्च । इत्यमरः ॥ राहुः । इति हेमचन्द्रः ॥
, त्रि, (उप + रञ्ज + क्त ।) व्यसनार्त्तः । दैव-
पान्तरपीड़ायुक्तः । इत्यमरः ॥
णं, स्त्री (उपगतं रक्षणं यत्र ।) रक्षणार्थं सैन्य-
नम् । चौकी इति ख्यातम् । तत्पर्य्यायः ।
नम् २ । इत्यमरः ॥
, त्रि, (उप + रम + क्त ।) मृतः । इति
तः ॥ (यथाह नारदः ।
तुर्य्युपरते पुत्त्रा विभजेयुर्धनं पितुः" ॥)
तः ॥
स्पृहः, त्रि, (उपरता नष्टा स्पृहा धनाद्याकाङ्क्षा
…गच्छति वेत्यर्थः। अपरे तु ईयङोऽप्यनित्यत्वे
…पदमेव। आर्त्तीत् आर्त्तत् इत्यादि। इति
…दासः॥
…, (ऋ + क्त।) उञ्छशिलम्। (यथा, मनुः।
…—५॥
…ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा।
…सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥
…उञ्छशिलं ज्ञेयममृतं स्यादयाचितम्।
…तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्"॥)
…॥ (यथा, ऋग्वेदे। ७।१०१।६। "तस्म
…पातु शतशारदाय"। "ऋतमुदकम्"। इति
…म्॥) सत्यं इति मेदिनी॥ (यथा, मनुः।
…२।
…योऽनृतं वदन् पापैर्बध्यते वारुणैर्भृशम्।
…ः शतमाजातीस्तस्मात् साक्ष्यं वदेदृतम्"॥
…म्। यथा, "ऋतं पिबन्तौ सुकृतस्य लोके"।
…श्रुतिः॥ विष्णुः॥ यथा, महाभारते।१।
…५३।
…वान् वासुदेवश्च कीर्त्त्यतेऽत्र सनातनः।
…ऋतं सत्यमेव पवित्रं पुण्यमेव च।
…तं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम्"॥
…र्य्यः। यथा, …। "ब्रह्म वा
… ब्रह्म हि [illegible] ब्रह्म ऋतं ब्रह्म [illegible]"॥
…। यथा, श्रुतिः। "ऋतमेकाक्षरं ब्रह्म"॥
…। यथा, ऋग्वेदे।१।१६०। २।
…ौ [illegible]
…दि"। "[illegible]"। इति दया-
…भाष्यम्॥ यज्ञः। यथा, [illegible]
…[illegible]। "ऋतमित्यस्य [illegible]
…[illegible]
…"॥ देवभेदः। यथा, ऋग्वेदे।४।२३।८।
…ऋतस्य हि शुरुधः सन्ति पूर्व्वीर्ऋतस्य धीति-

र्वृजिनानि हन्ति"। "ऋतस्य ऋतदेवस्य"। इति
भाष्यम्॥ यज्ञः। यथा, ऋग्वेदे।१।१४५।५।
"ऋतचिद्धि सत्यम्"। "ऋतस्य यज्ञस्य जलस्य
वा चित् ज्ञाता"। इति भाष्यम्॥ चमेऋषि-
भेदः। यथा, यजुषि।१७।८२। "ऋतश्च
सत्यश्च"। इति॥)

ऋतः, त्रि, (ऋ + क्त।) दीप्तः। पूजितः। इति
मेदिनी॥

ऋतजित्, पुं, (ऋतं जयति ऋत + जि + क्विप्।)
यक्षविशेषः। यथा,—
"त्वष्टा च जमदग्निश्च कम्बलोऽथ तिलोत्तमा।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सप्तमः॥
माघमासे वसन्त्येते सप्त मैत्रेय भास्करे।
श्रूयतां चापरे सूर्य्ये फाल्गुने निवसन्ति ये"॥
इति श्रीविष्णुपुराणे २।१०।१५—१६। "त्वष्टा
सूर्य्यः। कम्बलः सर्पः। ब्रह्मापेतो राक्षसः। ऋत-
जिद्यक्षः। धृतराष्ट्रो गन्धर्व्वः। इति तट्टीकायां
श्रीधरस्वामी॥ (त्रि, यज्ञजेता। यथा, यजुषि१७।
८३। "ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च"॥)

ऋतधामा, [न्] पुं, (ऋतं सत्यं धाम भवनं यस्य।)
विष्णुः। इति त्रिकाण्डशेषः॥ (यथा यजुर्व्वेदे ५।३२।
"हव्यसूदन ऋतधामासि स्वर्ज्योतिः"॥) इन्द्रभेदः।
स तु रुद्रसावर्णिके मनौ भविता। यथा,—
भागवते।८।१३।२८।
"भविता रुद्रसावर्णी राजन्! द्वादशमो मनुः।
ऋतधामा च देवेन्द्रो देवाश्च हरितादयः"॥
यदुवंशीयो नृपतिभेदः। यथा, भागवते।
"कङ्कस्य कर्णिकायां वै ऋतधामाजयावपि"॥
अविनश्वरस्थानवति, त्रि। यथा यजुर्व्वेदे।१८।३८।
"ऋताषाडृतधामाग्निर्गन्धर्व्वस्तस्यौषधयः"॥)

ऋतिः, स्त्री, (ऋत + ऋच्छे + क्तिन्।) कल्याणम्। वर्त्म।
जुगुप्सा। स्पर्द्धा। इति मेदिनी॥ (भावे + क्तिन्।)
गमनम्। अनुभवः। इति धरणी॥ (पुरुषमेध-
यज्ञीयदेवभेदः। यथा, यजुर्व्वेदे।३०।१३।
"ऋतये स्तेन हृदयम्"। ऋती पुं, इति निरुक्तिः॥)

ऋतीया, स्त्री, (ऋत + ईयङ् + टाप्।) घृणार्थकः।
जुगुप्सा। तत्पर्य्यायः। आर्त्तनम् २ ऋतीया ३।
इत्यमरः॥

ऋतुः, पुं, (ऋ + "अर्त्तेश्च तुः"। इति उणादिसूत्रेण
१।७२। तुः चकारात् कित् च।) कालविशेषः।
स तु षड्विधः यथा। मार्गशीर्षपौषौ हिमः १ माघ-
फाल्गुनौ शिशिरः २ चैत्रवैशाखौ वसन्तः ३
ज्यैष्ठाषाढौ ग्रीष्मः ४ श्रावणभाद्रौ वर्षाः ५ आ-
श्विनकार्त्तिकौ शरत् ६। इत्यमरः॥ स त्रिविधो-
ऽपि। कार्त्तिकादिचतुर्मासात्मकः शीतः १
फाल्गुनचैत्रवैशाखज्यैष्ठाः ग्रीष्मः २ आषाढ़श्रावण-
भाद्राश्विनाः वर्षाः ३। द्विविधोऽपि। कार्त्तिका-
दिषण्मासाः शीतः १ वैशाखादिषण्मासाः ग्रीष्मः
२। इति स्मृतिः॥ * ॥
(वदुकम्।
"[illegible]", [illegible]
[illegible]

हेमन्तशिशिरयोरेकत्रीकरणं विवक्षितम्॥
"चयकोपशमा यस्मिन् दोषाणां सम्भवन्ति हि।
ऋतुषट्कं तदाख्यातं रवेः राशिषु संक्रमात्॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृड्मिथुनकर्कटौ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत्॥
धनुर्ग्राहौ च हेमन्तौ वसन्तः कुम्भमीनयोः"।
मेषवृषौ रविणा संक्रान्तौ। एवं मिथुनकर्कटा-
वित्यादि। अन्ये तु।
"शिशिरः पुष्पसमयो ग्रीष्मो वर्षाशरद्धिमाः।
माघादिमासयुग्मैः स्युर्ऋतवः षट् क्रमादमी"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।
"वर्षाः शरच्च हेमन्तः शिशिरश्च वसन्तकः।
ग्रीष्मश्चेति क्रमादेते ऋतवः षट् प्रकीर्त्तिताः॥
पृथक् पृथक् प्रवक्ष्यामि रवेर्गतिविशेषतः"।
इति प्रथमस्थाने चतुर्थेऽध्याये हारीतेनोक्तम्॥
"मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षडृतवः स्मृताः।
शिशिरोऽथ वसन्तश्च ग्रीष्मवर्षाशरद्धिमाः"॥
इति सूत्रस्थाने तृतीयेऽध्याये वाभटेनोक्तम्॥
"इह खलु संवत्सरं षडङ्गमृतुविभागेन विद्यात्"।
इति सूत्रस्थाने षष्ठोऽध्यायः।
"तत्र खलु तावत् षोढ़ा प्रविभज्य कार्य्यमुपदेक्ष्यते।
हेमन्तो ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणास्त्रयः
ऋतवो भवन्ति। तेषामन्तरेष्वितरे साधारण-
लक्षणास्त्रय ऋतवः प्रावृट्शरद्वसन्ता इति।
प्रावृडिति प्रथमः प्रवृष्टेः कालस्यानुबन्धो वर्षाः।
एवमेते संशोधनमधिकृत्य षट् विभज्यन्ते
ऋतवः"।
इति च विमानस्थानेऽष्टमेऽध्याये चरकेणोक्तम्।
"तत्र माघादयो द्वादशमासा द्विमासिकमृतुं
कृत्वा षडृतवो भवन्ति। ते शिशिर-वसन्त-ग्रीष्म-
वर्षा-शरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः।
मधुमाधवौ वसन्तः। शुचिशुक्रौ ग्रीष्मः। नभो-
नभस्यौ वर्षाः। इषोर्जौ शरत्। सहःसहस्यौ
हेमन्त इति। तत्र ते शीतोष्णवर्षलक्षणाश्च-
न्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो-
दक्षिणमुत्तरञ्च"।
"इह तु वर्षा-शरद्धेमन्त-वसन्त-ग्रीष्म-प्रावृषः षडृ-
तवो भवन्ति दोषोपचय-प्रकोपोपशम-निमित्तम्।
ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः। तद्-
यथा। भाद्रपदाश्वयुजौ वर्षाः। कार्त्तिकमार्गशीर्षौ
शरत्। पौषमाघौ हेमन्तः। फाल्गुन-चैत्रौ
वसन्तः। वैशाख-ज्यैष्ठौ ग्रीष्मः। आषाढ़-श्रावणौ
प्रावृडिति"। इति सूत्रस्थाने ६ अध्याये सुश्रुते-
नोक्तम्॥)
[illegible]कुसुमम्। इति हेमचन्द्रः। [illegible]
[illegible]
[illegible] मनुः। ३।४५-४८।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

स्नानं भूमिरमनं (?) … मि[illegible] गच्छन् । … [illegible] ॥ … [illegible] स्त्रियः । … [illegible] विपर्ययः" ॥ … [illegible] वः" ॥ इति … [illegible] ऽध्याये वाग्भटेनोक्तम् ॥ … [illegible] ॥" … [illegible]

[illegible]

मैथुनोऽस्रमं स्नानं दिवास्वप्नं प्रधावनम् ।
अत्युच्चशब्दश्रवणं हसनं बहुभाषणम् ॥
आयासं भूमिखननं प्रवातञ्च विवर्जयेत् ।
ततश्चतुर्थे दिवसे स्नाता सदसनादिभिः ।
भूषिता' सुमनाः पश्येत् भर्त्तारं समलङ्कृतम् ॥
पूर्वं पश्येत् ऋतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्रं ततः पश्येत् पतिं प्रियम्" ॥
एतदकरणे प्रत्यवायमाह ।
"अज्ञानात् वा प्रमोदाद्वा लौल्याद्वा दैवतश्च वा ।
सा चेत् कुर्य्यात् निषिद्धानि गर्भदोषांस्तदाप्नुयात् ॥
एतस्या रोदनात् गर्भो भवेद्विकृतलोचनः ।
नखच्छेदेन कुनखी कुष्ठी त्वभ्यञ्जनो भवेत् ॥
अनुलेपात् तथा स्नानात् दुःखशीलोऽञ्जनाद्दृक् ।
स्वापशीलो दिवास्वापात् चञ्चलः स्यात् प्रधावनात् ॥
अत्युच्चशब्दश्रवणात् बधिरः खलु जायते ।
तालुदन्तौष्ठजिह्वासु श्यावो हसनतो भवेत् ॥
प्रलापी भूरिकथनात् उन्मत्तस्तु परिश्रमात् ।
खल्वतिर्भूमिखननात् उन्मत्तो वातसेवनात्" ॥
इति ।
"हामप्रसन्नवदनां प्रस्फोटितपयोधराम् ।
स्त्रस्ताङ्गीकृतिपुंस्कामां विद्यादृतुमतीं स्त्रियम्" ।
इति शारीरस्थाने प्रथमेऽध्याये वाग्भटेनोक्तम् ॥
"नते पुराणे रमनि नवे चावस्थिते पुनः शुद्ध-
स्नाता स्त्रियमथापन्नयोनिशोणितगर्भाशयामृतु-
मतीमाचक्षते" ।
इति शारीरस्थाने चतुर्थेऽध्याये चरकेणोक्तम् ॥
"पीनप्रसन्नवदना प्रक्लिन्नात्ममुखद्विजाम् ।
नरकामा प्रियकथा स्रस्तकुक्ष्यक्षिमूर्द्धजाम् ॥
स्फुरद्भुजकुचश्रोणिनाभ्यूरुजघनस्फिचम् ।
हर्षौत्सुक्यपराञ्चापि विद्यादृतुमतीमिति" ॥
इति शारीरस्थाने तृतीयेऽध्याये,—
"तत्र मूढ़याता चतुर्थेऽहन्यवतनातःममनकृता
कृतमङ्गलमिताचना भर्त्तारं दर्शयेत् । तत्
कस्य हेतोः ।
पूर्वं पश्येदृतुस्नाता यादृशं नरमङ्गना ।

[illegible]

ऋतुहतिः, पुं, (ऋ[illegible]
इति त्रिकाण्डशेष[illegible]
ऋतुसन्धिः,पुं, (ऋत्वोः [illegible]
कालः । स च ऋ[illegible]
वाभटः ।

तत्र पूर्वा विधिस्तत्र[illegible]
ऋतुस्नाता, स्त्री, (ऋतौ [illegible]
चतुर्थाहकृतस्नानम् ।
गायनकरं मङ्गलकं दृष्ट[illegible]
भर्त्तारं मनसि ध्याता सू[illegible]
काशीखण्डम् ॥
("ततः पुष्पेक्षणादेव [illegible]
मङ्गलाचाररहिता दर्शनं [illegible]
धैर्यदं दारकं [illegible]
पश्चे शयाते हस्ते वा [illegible]
चतुर्थेऽह्नि ततः [illegible]
इच्छन्ती भर्त्तसदृशं [illegible]
इति शारीरस्थाने प्रथमेऽध्याये[illegible]
ऋते, अ, (ऋत + के ।) विना । [illegible]
("ऋतेऽपि मां प्रीतमते गुरुवत्"
इति रघुवंशे । १ । ६१ । [illegible]
"अंशादृते निषिक्तस्य नीलस्य"
ऋत्विक्, [ज्] पुं, (ऋतौ यजति ।
ऋत्विगादिना क्विन् निपात[illegible]
यथा,—
"अग्न्याधेयं पाकयज्ञानग्निष्टो[illegible]
य करोति वृतो यस्य स [illegible]
इति मानवे २ । १४३ । [illegible]

[illegible]

तैलीया ११, वयाङ्गी १२ मङ्गल्या १३ नीच- १ १४ श्रीवल्लेष्ठा १५ वरन्मा १६ । अस्याः । मधुरत्वम् । सुशिशिरत्वम् । अतितिक्तत्वम् । त्वम् । रक्तपित्तदाहशोषित्वम् । श्लेष्मकुष्ठकृमि- त्वञ्च । इति राजनिर्घण्टः । अस्या रूपं यथा,— ऊर्द्ध्वञ्च वन्दौ द्वौ भवतः कोषधामले । तैमान्वितः वन्दो ज्ञताज्ञानः मरञ्चुरः । । ऋद्धिर्वृद्धिश्च भेदमप्येनयोर्वदे । न्विमला ऋद्धिर्वामावर्त्तफला च सा । मु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः" । अष्टवर्गे ऋद्धिवृद्ध्यभावे वाराहीकन्दः प्र- क्षप्य देया । इति परिभाषा । ८ । सम्वृद्धिः । मेदिनी । (यथा, कुमारे २ । ५८ । ऋद्धिमभावर्द्धिन नया न च विष्णुना" ।) ऋ । इति शब्दरत्नावली । (लक्ष्मीः ।) । च न द्र वृद्धौ । इति कविकल्पद्रुमः । (, स्वां-परं-सकं-सेट् ।) ध ऋध्नोति । उ न्या ऋद्धा । न ऋध्नोति । हर आर्धत् आ- । क्वचित्तृतौ पाठम् । सोऽहं प्रात्मवतेव मनीस्वध्नोमीति भवभूतिः । अन्तर्भूतण्यर्थ- त्वं सिद्धमिति केचित् । इति दुर्गादासः । दाने । आघाताम् । हिंसायाम् । निन्दा- । यद्धे । इति कविकल्पद्रुमः । (तुदां-परं- सकं च-सेट् ।) घ ऋणति अन्नो ददाति ते हिनस्ति निन्दति यज्ञते वेत्यर्थः । आनर्च । यामप्ययमित्यन्ये । इति दुर्गादासः । पुं, (ऋ स्वर्गे देवमातुरदितेर्व्वा भवति यः । भू + डु ।) देवता । इत्यमरः । (यथा, ऋग- । ९ । २१ । ६ । नं रथं नवं दधतो केतुमादिशे" । शानपि देवः । यथा, महाभारते वनपर्व्वणि । नवो नाम तत्रान्ये देवानामपि देवताः । लोकाः परतरे यान्यजन्तीह देवताः" ।) पमन्वन्तरे देवगणभेदः । यथा,— याः प्रभृता ऋभवः ह्यूताश्च दिवौकसः" । हरिवंशे । ७ । ३२ ।) , पुं, (ऋभवो देवाः क्षियन्ति वसन्ति यत्र । + क्षि + ड ।) स्वर्गः । वज्रम् । इन्द्रः । इति । मुकुटः । (देवमात्रे । यथा ऋग्वेदे । ४ । । १ । "उपनो राजा अध्वरमृभुक्षाः" । भुक्षाः ऋभवः" । इति भाष्यम् ।) :, [न्] पुं, (ऋभुक्षः स्वर्गः वज्रं वा अस्या- ते इनिः । "पथिमथ्यृभुक्षामात्" । ७।१।८५। पोत्सर्व्वनामस्थाने" । ७।१।८६ । इत्यादिना तम् । यद्वा ऋच्छति इति व्युत्पत्तिर्भुक्षिनक् ।) इन्द्रः । इत्यमरः । (यथा, ऋग्वेदे । १० । ३ । "इन्द्रो विश्वा ऋभुक्षा वाजो ः" । इति ।) प श वधे । (तुदादि-तुदां-परं-सकं-सेट् ।) । रिच्छधातोष्टीकायां दुर्गादासः । गतिस्तुत्योः । सौत्रधातुरयम् । (परं-सकं- ।) ऋशः । इति दुर्गादासः ।

ऋश्यः, पुं स्त्री, (ऋश् + क्यप् ।) मृगविशेषः । इति शब्दरत्नावली । (यथा, ऋग्वेदे । ८ । ४ । १० । "ऋश्यो न तृष्यन्नवपानमागहि" ।) ऋष, ई ष गतौ । इति कविकल्पद्रुमः । (तुदां- परं-सकं-सेट् ।) ष्णादिः । ई ऋष्टः । ष ऋषति । इति दुर्गादासः ।

ऋषभः, पुं, (ऋष् + "ऋषिवृषिभ्यां कित्" । इति उणादिसूत्रेण ३।१२३ । अभच् । किच्च ।) वृषः । (यथा, ऋग्वेदे ६ । २८ । ८ । "उप ऋषभस्य रेतस्युपेन्द्र तव वीर्य्ये" ।) कर्णरन्ध्रम् । कुम्भीर- पुच्छः । उत्तरपदे श्रेष्ठः । इति मेदिनी । ("स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः" । इत्यमरवाक्यात् । यथा पुरुषर्षभः पुरुषश्रेष्ठः इत्यर्थः । असमस्तेऽप्ययं श्रेष्ठार्थवाचकः । यथा, भागवते २ । ४ । २२ ।

"स्वलक्ष्या प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदताम्" ।

"ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः" । इति तट्टीका ।) गणविशेषः । आकृतिगणोऽयम् । यथा पाणिनिः तत्पुरुषसमासप्रकरणे २ । १ । ५६ । "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" । व्या- घ्रादिराकृतिगणः । "व्याघ्र-सिंह-ऋक्ष-ऋषभ- चन्दन-वृक-वृष-वराह-हस्तिन्-तरु-कुञ्जर-रुरु-पृ- षत्-पुण्डरीक-पलाश-कितवाः" । इत्येते व्याघ्रा- दयः ।) पर्व्वतविशेषः । इति धरणी । वराहपुच्छः । आदिजिनः । इति हेमचन्द्रः । भगवदवतारवि- शेषः । (यथा, भागवते ५।६ ७। "तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः" ।) स तु सत्ययुगे अग्नीध्रसुतनाभिराजपुत्त्रत्वेन जातः । तस्य पुत्त्रः जड़भरतः । इति श्रीभागवतं । (तथा, मार्कण्डेये ५३ । ३८ ।

"अग्नीध्रसूनोर्नाभेस्तु ऋषभोऽभूत् सुतो द्विज ! । ऋषभाद्भरतो जज्ञे वीरः पुत्त्रशताद्वरः" ।

स्वारोचिषे मन्वन्तरे ऋषिभेदः । यथा, मार्कण्डेये ६७ । ४ ।

"ऊर्जस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा" ।

ऋषभसहस्रदक्षिण एकाहनिष्पाद्यो यागभेदः । यथाह गर्गः "पूर्व्वं ऋषभसंज्ञो राज्ञः" । स्वनाम- ख्यातः पञ्चतुरपुत्त्रो नृपभेदः । यथा, शतपथ- ब्राह्मणे १३ । ५ । ४ । १५ । "एकविंशत्यानेन ऋषभो याज्ञतुर ईजे शिक्नानां राजा तदेतद्गाथ- याऽभिगीतम्" ।) अष्टवर्गान्तर्गतौषधविशेषः । तत्पर्य्यायः । वृषः १ ऋषभकः २ वीरः ३ । इति रत्नमाला । गोपतिः ४ धीरः ५ विषाणी ६ दुर्द्धरः ७ ककुद्मान् ८ पुङ्गवः ९ वोढ़ा १० शृङ्गी ११ धूर्य्यः १२ भूपतिः १३ कामी १४ रुक्षप्रियः १५ उक्षा १६ लाङ्गूली १७ गौः १८ बन्धुरः १९ गोरक्षः २० वनवासी २१ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । रक्तपित्तविरेचनाशित्वम् । शुक्रश्लेष्मकारित्वम् । दाहक्षयज्वरहरत्वञ्च । इति राजनिर्घण्टः । ८ ।

("जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ । रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ" ।

"ऋषभो वृषशृङ्गवत्" ।

"ऋषभो वृषभो धीरो विषाणी द्राक्ष इत्यपि" ।

अनयोर्गुणा यथा ।

"जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ । मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ" ।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) ग्राम- स्वरान्तर्गतद्वितीयस्वरः । (अयं स्वरः त्रिश्रुतिः । अस्याः तिस्रः श्रुतयो यथा, (१) दयावती, (२) रञ्जनी, (३) रतिका । तिस्रश्च श्रुतिजातयो यथा, (१) करुणा, (२) मध्या, (३) मृदुः । अयञ्च ऋषि- वंशीयः, क्षत्त्रियजातिः, पिञ्जरवर्णश्च । अस्यो त्पत्तिः शाकद्वीपे । अस्य ऋषिः देवता च ब्रह्मा ; छन्दो गायत्री । यथा सङ्गीतरत्नाकरे,—

"ऋषभस्त्रिश्रुतिस्ततः ... ... । दयावती रञ्जनी च रतिका चर्षभे स्थिता । दीप्तायता मृदुर्मध्या षड्जे स्यात् ऋषभे पुनः । संस्थिता करुणा मध्या मृदुः ... ... । पञ्चमः पितृवंशस्थो रि-धावृषिकुलोद्भवौ । ऋधौ तु क्षत्त्रियौ ज्ञेयौ वैश्यजाती निगौ मतौ" ।

रि धौ ऋषभधैवतौ इत्यर्थः । इत्यादि ।) स तु गोस्वरतुल्यस्वरः । चातकस्वरतुल्यस्वर इति केचित् । नारदमते गावः ऋषभस्वरं वदन्ति यथा,—

"षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्" ।

इति नारदसंहितायाम् । दर्पणरत्नाकरादिमते तु चातकः ऋषभं वदति । यथा सङ्गीतदर्पणे,—

"स्वरमृषभं चातको ब्रूते" ।) अस्योत्पत्तिः ।

"नाभिमूलाद्यदा वायुरुत्थितः कुरुते ध्वनिम् । वृषभस्येव निर्याति हेलया ऋषभः स्मृतः" ।

इति सङ्गीतदामोदरः ।

("नाभेः समुदितो वायुः कण्ठशीर्षसमाहतः । ऋषभस्येव नादं यत् तस्मादृषभ ईरितः" ।

इति च सङ्गीतदर्पणसारे । अस्योत्पत्तिः ऋग्वे- दात् । यथा रत्नावल्याम्,—

"ऋग्वेदात् षड्ज-ऋषभौ यजुषो मध्यधैवतौ । सामवेदात् समुद्भूतौ तथा गान्धारपञ्चमौ" ।

इति ।)

ऋषभध्वजः, पुं, (ऋषभः ध्वजश्चिह्नमस्य ध्वजेऽस्य वा ।) शिवः । अर्हद्विशेषः । इति मेदिनी ।

ऋषभी, स्त्री, (ऋषभ + जातौ ङीष् ।) नराकारस्त्री । शूकशिम्बी । शिराला । विधवा । इति मेदिनी । (शूकशिम्ब्यर्थे व्यवहारो यथा ।

"जेन्दृषभ्यतिरसेत्यादिषु" ।

इति चरके सूत्रे चतुर्थेऽध्याये । अत्र हि ऋषभी शूकशिम्बी इत्यस्य शिवदासीयटीका । * ।)

ऋषिः, पुं, (ऋषति प्राप्नोति सर्व्वान् मन्त्रान् ज्ञानेन पश्यति संसारपारं वा इति । ऋष् + "इगुप- धात् कित्" ४ । ११९ । इति उणादिसूत्रेण इन् । किच्च ।) ज्ञानसंसारयोः पारगन्ता । शास्त्रदा- चार्य्यः । (यथा, ऋग्वेदे १ । १ । २ । "अग्निः

पूर्व्वैर्भिर्ऋषिभिरीड्यो नूतनैरुत स देवा एह वक्षति”॥) रिषिर्वंसादिश्च। “विद्याविदग्धमतयो रिषयः प्रसिद्धाः”। इति प्रयोगात्। इति भरतः॥ तत्पर्य्यायः। सत्यवचाः २ आपाक्षः ३। स तु सप्तविधः यथा। व्यासाद्या महर्षयः १ भेलाद्याः परमर्षयः २ कण्वादयो देवर्षयः ३ वशिष्ठाद्या ब्रह्मर्षयः ४ सुश्रुताद्याः श्रुतर्षयः ५ ऋतुपर्णादयो राजर्षयः ६ जैमिन्याद्याः काण्डर्षयः। इति त्रिकाण्डशेषः॥ तथा च रत्नकोषे।

“सप्त ब्रह्मर्षि-देवर्षि-महर्षि-परमर्षयः।
काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः॥ *॥

मन्वन्तरभेदे सप्तर्षिनामानि यथा।

१ स्वायम्भुवमन्वन्तरे मरीचिः। अत्रिः। अङ्गिराः। पुलस्त्यः। पुलहः। क्रतुः। वशिष्ठः। (यथा हरिवंशे। ७। ८।

“मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः” ॥)

२। स्वारोचिषे ऊर्ज्जस्तम्भादयः। (यथा, मार्कण्डेये ६७। ४।

“ऊर्ज्जस्तम्भस्तथा प्राणो दत्तोऽग्निर्ऋषभस्तथा।
निश्चरश्चार्व्वीरश्च तत्र सप्तर्षयोऽभवन्” ॥)

३। उत्तमे वशिष्ठसुताः प्रमदादयः। (यथा, मार्कण्डेये ७३। ११।

“सतेजसा हि तनयो वशिष्ठस्य महात्मनः।
तत्रान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन्” ॥)

४। तामसे ज्योतिर्धामादयः। (यथा मार्कण्डेये ७४। ५८।

“ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्” ॥)

५। रैवते हिरण्यरोमा वेदश्रीः ऊर्द्ध्वबाहुप्रभृतयः। (यथा मार्कण्डेये ७५। ७२-७४।

“हिरण्यरोमा वेदश्रीरूर्द्ध्वबाहुस्तथापरः।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः॥
वशिष्ठश्च महाभागो वेदवेदान्तपारगः।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः” ॥)

६। चाक्षुषे सुमेधोविरजादयः।
[illegible] उत्तमे तत्रैव ७६। ५४।
[illegible] विरजाश्चैव हविष्मानुन्नतो मधुः।
[illegible] सहिष्णुश्च सप्तासन्निति चर्षयः” ॥)

७। वैवस्वतमन्वन्तरे काश्यपः। अत्रिः। वशिष्ठः। विश्वामित्रः। गौतमः। जमदग्निः। भरद्वाजः॥ (यथा मार्कण्डेये ७९। ९-१०।
[illegible] वशिष्ठश्च काश्यपश्च महानृषिः।
[illegible] भरद्वाजो विश्वामित्रोऽथ कौशिकः॥
[illegible] भगवन्पुत्रश्च महायशाः।
[illegible] सप्तैते पूर्व्वमासंस्तदन्तरे” ॥)

८। सावर्णिके गालवः। दीप्तिमान्। परशुरामः। द्रौणिः। कृपः। ऋष्यशृङ्गः। व्यासः। (यथा मार्कण्डेये ८०। ४।
[illegible] गालवश्च दीप्तिमान् परशुराम कृपश्च।
[illegible] द्रौणिश्च व्यासः सप्तर्षयोऽभवन्” ॥
[illegible] ऋष्यशृङ्गस्तथा ॥)

९। दक्षसावर्णिके द्युतिमदाद्याः। (यथा मार्कण्डेये ९४। ८।

“मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽन्यः सवनस्तथान्यो हव्यवाहनः” ॥)

१०। ब्रह्मसावर्णिके हविष्मत्सुकृतसत्यनयमूर्त्याद्याः। (यथा मार्कण्डेये ९४। १०, १३, १४।

“ततोऽन्तु दशमस्यान्यच्छृणु मन्वन्तरं द्विज!॥
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा।
आपो मूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः” ॥)

११। धर्म्मसावर्णिके अनघाद्याः। (यथा मार्कण्डेये ९४। १९-२०।

“हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः।
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः॥
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवश्च सप्तमः” ॥)

१२। रुद्रसावर्णिके तपोमूर्त्त्यादयः। (यथा मार्कण्डेये ९४। २५।

“द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः।
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः” ॥)

१३। देवसावर्णिके निर्म्मोहतत्त्वदर्श्याद्याः। (मार्कण्डेयपुराणमते अयं त्रयोदशमनुः रौच्याख्ययाभिहितः। यथा, तत्रैव ९४। २७-३०।

“त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुतान्।
सप्तर्षींश्च रूपांश्चैव गदतो मे निशामय॥
सुधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुशर्म्माणः सुरा ह्येते समस्ता मुनिसत्तम॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यान् सप्तर्षीन् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः” ॥)

१४। इन्द्रसावर्णिके अग्निबाहुशुचिशुक्रमागधाद्याः सप्तर्षयः। (मार्कण्डेयपुराणमतेऽयं भौत्याख्यया-भिहितः। यथा तत्रैव ९९। १।

“ततः परन्तु भौत्यस्य समुत्पत्तिं निशामय।
देवांश्चर्षीं स्तथा पुत्रांस्तथैव वसुधाधिपान्” ॥

मन्वन्तरे सप्तर्षिनामान्याह तत्रैव १००। ३१।
“अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः” ॥
पुराणान्तरे मतभेदात् मन्वन्तरसप्तर्षीणां नामभेदोऽपि दृश्यते। हरिवंशे ७ अध्याये तथा विष्णुपुराणे ३ यांशे अस्य विवरणादिकं द्रष्टव्यम्॥) ॥ *॥ ज्योतिःशास्त्रमते वशिष्ठप्रभृतयः सप्तर्षयः वर्त्तमानमन्वन्तरीयसप्तर्षयो महाकाशे स्थिताः नक्षत्ररूपेण तेषामुदयो भवति। काशीखण्डमते ध्रुवलोकादूर्द्धं ध्रुवलोकात् अध तेषां स्थितिः ॥ *॥ वेदः। किरणः। इति मेदिनी॥ भरतादि-महर्षिमताः। यथा।

“भृगुर्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः।
मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश॥
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः।
परत्वेनर्षयो यस्मान्मतास्तस्मान्महर्षयः॥

ईश्वराणां सुतास्तेषाम्[illegible]
काव्यो बृहस्पतिश्चैव काश्यप[illegible]
उतथ्यो वामदेवश्च अगस्त्यः[illegible]
कौशिकस्थाने कौशिक इति [illegible]
“कर्द्दमो वालिखिल्याश्च विश्रा[illegible]
इत्येते ऋषयः प्रोक्तास्तपसा ऋषि[illegible]
इति। तस्य व्युत्पत्तिर्यथा।
“ऋषि हिंसागतौ धातुर्विद्या[illegible]
एष सन्निचयो यस्मात् ब्रह्मणश्च [illegible]
निवृत्तिसमकालन्तु बुद्धा व्यक्तिर्[illegible]
ऋषयो परमां यस्मात् परमर्षिस्[illegible]
गत्यर्थादृषतेर्धातोर्नामनिर्वृत्तिकारणम्।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता म[illegible]
इति मत्स्यपुराणे १२० अध्यायः।

ऋषिकः, } पुं, (ऋषेः पुत्रः। ऋषि + [illegible]
ऋषीकः, } टि-ऋषिपुत्रः। यथा।
“ऋषिपुत्रा ऋषीकास्तु मैथुनाद्गर्भसम्भव[illegible]
परत्वेनर्षयस्ते वै भूतादिऋषिकास्तु[illegible]
ऋषीकाणां सुता ये वै विज्ञेया ऋषिपु[illegible]
इत्येते ऋषयः प्रोक्तास्तपसा ऋषितां गताः।
तेषां पुत्रास्तपोऽर्थास्तु गर्भोत्पन्नान्निबोधत।
वत्सरो नग्नहश्चैव भरद्वाजश्च वीर्य्यवान्।
ऋषिर्दीर्घतमाश्चैव बृहदुक्थः शरद्वान्।
वाजिश्रवाः सुचित्तश्च श्यावाश्वश्च पराश[illegible]
शृङ्गी च काश्यपश्चैव राजा वै[illegible]
इत्येते ऋषिकाः सर्व्वे सत्येन [illegible]
इति मात्स्ये १२० अध्यायः॥

ऋषिकुल्या, स्त्री, (ऋषीणां कुल्या [illegible]
इव।) नदी। इति हेमचन्द्रः।
(“ऋषिकुल्यां समासाद्य नरः स्ना[illegible]
देवान् पितॄन् चार्च्चयित्वा ऋषिलो[illegible]
इति महाभारते। तीर्थयात्रापर्व्वणि[illegible]
ऋषिकुलाय हितम्। ऋषिकुल + [illegible]
कुलहिते, त्रि। यथा, भागवते ३।११[illegible]
“अथ तस्योशती देवीमृषिकुल्यां सर[illegible]
नाम्नाद्य मनुष्यपाणां तेषामाप्यायदर्[illegible]”॥

ऋषिजाङ्गलिकी, स्त्री, (ऋषिप्रिया [illegible]
ऋष्यगन्धादयः”। इति रत्नमाला।
इति ख्याता। (ऋक्षगन्धाशब्देऽस्या [illegible]

ऋषिप्रोक्ता, स्त्री, (ऋषिणा प्रोक्ता [illegible]
माषपर्णिका। इति रत्नमाला।
शब्देऽस्या गुणादिकं ज्ञेयम्॥)

ऋष्टिः, स्त्री, (ऋष् हिंसायां + क्तिन्।) [illegible]
भरः॥ (यथा, ऋग्वेदे। ५। ५७। ६।
“वाशीमन्त ऋष्टिमन्तो मनीषिणः
सुधन्वान इषुमन्तो निषङ्गिणः”।
आयुधमात्रम्। यथा ऋग्वेदे १। ११[illegible]
“अंसेषु विश्वामृष्टयानि [illegible]
[illegible] वो दाम [illegible]”।
“ऋष्टिस्थ [illegible]”। इति [illegible]
तदा तत्रैव। ५। ५२। ६।
“या वक्षःस्वधा नर [illegible]

…रायुधविशेषान्”। इति भाष्यम्।
मनुः ३। १३३।
…तो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्।
…ते ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुडान्”॥
…लतशूलर्ष्ट्याख्यायुधलोहपिण्डान्”। इति त-
…॥ दीप्तिः। यथा, ऋग्वेदे ३। ५४। १३।
“विद्युद्रथा मरुत ऋष्टिमन्तो
दिवो मर्य्या ऋतजाता अयासः”।
…ष्टिमन्तो दीप्तिमन्तः”। इति भाष्यम्॥ गमना-
…शीलः। यथा, ऋग्वेदे १। ६४। ४॥ “अंसे-
… निमिम्रक्षुर्ऋष्टयः साकं यज्ञिरे स्वधया
… नरः”। “ऋष्टयः गमनागमनशीलाः”।
दयानन्दभाष्यम्॥ पुं, धर्म्मसावर्णिके मन्व-
ऋषिभेदः। यथा, मार्कण्डेये। ९४। १९।
…विष्णश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः”॥)
पुं स्त्री, (ऋष्+यत्। निपातनात् सिद्धम्।)
विशेषः। इत्यमरः॥ (यथा महाभारते ऋष्य-
…पाख्याने। ३। ११०। २७।
…ष्यशृङ्गः कथं मृग्यामुत्पन्नः काश्यपात्मजः”।
…स्य मृगविशेषस्य शृङ्गमिव शृङ्गं यस्य स
…शृङ्गः।
…ष्यो नीलाङ्गको लोके सरोहिति कीर्त्तितः”॥
…। भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
…मिन्धातः कुरुवंशीयो देवातिथिपुत्रः। यथा,
…वते। ९। २२। ११।
…स्य क्रोधनस्तस्माद् देवातिथिरमुष्य च।
…स्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः”॥
…तुः, पुं, (ऋष्यः केतौ यस्य।) अनिरुद्धः।
… त्रिकाण्डशेषः॥ अस्य रूपान्तराणि। ऋश्य-
…। ऋष्यकेतनः। रिष्यकेतुः। विश्वकेतुः॥
…ता, स्त्री, (ऋष्येण ऋषिसमूहेन गता ख्याता।)
…शोकावृक्षः। इति शब्दरत्नावली॥
…न्धा, स्त्री, (ऋष्यस्य मृगविशेषस्य गन्ध इव
…न्धो यस्याः।) वृक्षविशेषः। ऋषिजाङ्गल इति
…तः। तत्पर्य्यायः। छागगन्धा २ ऋषिजाङ्गलिकी
… इति रत्नमाला॥
…कागदा-वृद्धि-ऋष्यगन्धा-श्वगन्धेत्यादिषु”॥
… चरके विमानस्थाने अष्टमेऽध्याये॥)
…ता, स्त्री, (ऋष्येण ऋषिसमूहेन प्रोक्ता।)
…शिम्बी। शूकशिम्बी। अतिबला। इति मेदिनी॥
…स्याः पर्य्यायो यथा॥
…तिबला महाबलाऽद्री …”।
… भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
…शव्दार्थो यथा॥
…[illegible]दिषु”।
…ते चरके सूत्रस्थाने चतुर्थेऽध्याये॥ अत्र तु
…ऋष्यप्रोक्ता माषपर्णी इति चिकित्साकलिका॥
…[illegible] च तथा …[illegible]।
…ऋष्यप्रोक्ता … [illegible]”॥
…के उत्तरस्थाने …[illegible]॥)
…[illegible], पुं, (ऋष्यो … [illegible]।) … [illegible]
…[illegible]। इति … [illegible]। स तु … [illegible]

पम्पासरोवरकूले स्थितः। यत्र वालिभयात् सुग्री-
वादयः पञ्च वानराः स्थिताः॥ इति रामायणम्॥
(“तावृष्यमूकस्य समीपचारी
चरन् ददर्शाद्भुतदर्शनीयौ”।
इति रामायणे। ४। १। १२८॥)

ऋष्यशृङ्गः, पुं, (ऋष्यस्य मृगस्य शृङ्गमिव शृङ्ग-
मस्य।) मुनिविशेषः। स तु विभाण्डकसुतः।
तस्य भार्य्या लोमपादराजकन्या शान्ता। इति
रामायणम्॥ (“शान्तो मुनिः स्वां पुरमृष्यशृङ्गः”।
इति भट्टिः। १। १०॥ अस्य जन्मनः प्रभृति
विवरणमुच्यते।

आसीत्पुरा महातेजास्तपस्विसत्तमः काश्यपो
विभाण्डको नाम ऋषिः। स च महाह्रदं समा-
साद्य दीर्घकालं तपसि स्थितः। एकदाप्सरस-
मुर्व्वशीं दृष्ट्वा चलितचित्तस्यास्य रेतः अप्सु प्रच-
स्कन्द। ततः काचित् मृगी तृषिता तोयेन सह
तत्पीत्वा गर्भिणी अभवत्। इयं हि मृगी पुरा
काचित् देवकन्यासीत् शापवशात् मृगरूप-
धारिणी वने विचरन्ती स्थिता। अथामोघत्वात्
ब्रह्मर्षितेजसस्तस्यां मृग्यामेकः पुत्त्रः समभवत्। मृ-
गीगर्भजातत्वादस्य शिरसि शृङ्गमजायत तेनास्य
ऋष्यशृङ्ग इति नाम समभवत्। अनेन हि
पितुरन्यः कोऽपि मानुषो न दृष्टपूर्व्वस्तस्माद-
स्यविषयं अस्य मनः सदा ब्रह्मचर्य्ये एवाभवत्।
एतस्मिन्नेव काले दशरथस्य बन्धुर्लोमपाद इति
ख्यातोऽङ्गानामीश्वरः समभवत्। तेन कामात्
ब्राह्मणस्य मिथ्याकृतम्। अस्मात् सर्व्वे ब्राह्मणास्तं
परितत्यजुः। पुरोहितापचारात्तस्य राज्ये न ववर्ष शत-
क्रतुः। अतः क्लिष्टचित्तः स राजा ब्राह्मणान्
सन्तोषयित्वा वृष्ट्युपायं पर्य्यपृच्छत्। तेन पृष्टास्ते
ब्राह्मणा वृष्ट्यर्थं ऋष्यशृङ्गमानेतुं उपदिदिशुः।
अथ स राजा दुष्करत्वादस्य कार्य्यस्य ऋष्य-
शृङ्गमानेतुं शापाद्भीतान्निर्वाराङ्गनाभिर्यत्नमक-
रोत्। अथ रूपयौवनसम्पन्नाः काश्चित् वारा-
ङ्गना बहूनि उपायद्रव्याणि गृहीत्वा जलपथेन
तं तपोधनम् लोभयित्वानेतुं प्रतस्थिरे। अथ ताः
काश्यपस्याश्रमं समासाद्य आश्रमात् नाति-
दूरे निवध्य तस्थुः। अथ कदाचित् तासां
काचित् कुशला ऋषेः सुतं तं दृष्ट्वा वाक्यैः
मोदयित्वा विचित्राणि माल्यानि वासांसि च
दत्त्वा पेयानि च पाययित्वा तेन सह चिक्रीड
प्रजहास च। तत्पश्चात् विविधोपायेन तं प्रल-
भित्वा कामवशगं अग्निहोत्रोपदेशं कृत्वा च
[illegible]। [illegible] तस्मात् [illegible]
[illegible]। अथ विभाण्डकस्तदाः
प्रतिनिवृत्त्य स्वसुतं तथाविधं दृष्ट्वा [illegible]।
[illegible] च तस्मिन् पुनः [illegible]
[illegible] विभाण्डकसुतं [illegible]
[illegible] लोमपादराज्यमागमत्।
अथ स राजा [illegible] विभाण्डकसुतं [illegible]
[illegible]। [illegible] च तस्मिन्
तपोधने [illegible] पूर्व्ववदाद्य[illegible]-

वत्। एवं स लोमपादः परिपूर्णकामः तपोधनाय-
गण्यात् विभाण्डकात् शापमुक्तिमिच्छन् सखिवरस्य
दशरथस्य सुतां शान्तां ऋष्यशृङ्गाय प्रददौ।
अथ विभाण्डको मुनिः तपसः प्रतिनिवृत्तः सुत-
मनवलोक्य ध्यानधिया सर्व्वमवगम्य क्रुधा ज्वल-
न्निव लोमपादराज्यं आजगाम। आगते च
तस्मिन् विभीतैः सर्व्वैः ऋष्यशृङ्गस्य राज्यमिद-
मिति आचख्ये। पूजितश्च तेन राजर्षिणा दिवि
इन्द्रमिव पुत्त्रं शचीमिव शान्तां स्नुषाञ्चावलोक्य
ग्रामांश्च घोषांश्च सुतस्य इत्यवगम्य शान्तकोपः
स्वाश्रमं प्रति प्रययौ। अथ स ऋष्यशृङ्गः शान्तया
सह तस्मिन् राज्ये सुखमतिचिरमवसत्॥

अथ गच्छति काले सूर्य्यवंशावतंसो राजा
दशरथः अनपत्यतया क्लिश्यमानहृदयो निजगुरुं
वशिष्ठदेवं पुत्त्रलाभोपायं प्रपच्छ। एवमुक्तस्तेन
ऋषिप्रवरो वशिष्ठः लोमपादराज्यात् ऋष्यशृङ्गं
तपोधनं समानीय पुत्त्रेष्टिं कर्त्तुं समादिशत्।
अथासौ राजा एवमभिहितः स्वजामातरममुं
ऋष्यशृङ्गमानेतुं यत्नमकरोत्। तत आगतेन
तेन क्रियमाणे यज्ञे देवसर्व्ववह्निमध्यादुदतिष्ठत्।
एतच्चरुभक्षणात् नारायणावतारस्वरूपा रामा-
दयश्चत्वारो दशरथस्य तनया जाताः। अयं
विभाण्डकसुतस्तु महाप्रतापवान् यज्ञनिष्ठश्चेति
प्रसिद्धः। एतत्कथा च महाभारते। ३। ११०
अध्यायस्तथा रामायणे। १। ९ अध्यायमारभ्य
द्रष्टव्या॥ * ॥ सावर्णिके मन्वन्तरे ऋषिभेदः।
यथा, मार्कण्डेये ८०। ४।
“रामो व्यासो गालवश्च दीप्तिमान् कृपएव च।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन्”॥)

ॠ

ॠ दीर्घऋकारः। स तु अष्टमस्वरवर्णः। अस्यो-
च्चारणस्थानं मूर्द्धा। (यथा, सिद्धान्तकौमुदी
“ऋटुरषाणां मूर्द्धा”। पाणिनीयशिक्षायामपि।
“स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः”॥)
स प्लुतश्च भवति। इति व्याकरणम्।
(स च उदात्तानुदात्तस्वरितभेदात् त्रिधापि पुनः
प्रत्येकमनुनासिकाननुनासिकभेदेन द्विधेति षड्-
विधः।)
ॠकारं परमेशानि स्वयं परमकुण्डली।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥
चतुर्ज्ञानमयं वर्णं पञ्चप्राणमयं सदा।
त्रिशक्तिसहितं वर्णं प्रणमामि सदा प्रिये”॥
इति कामधेनुतन्त्रम्॥
(वर्णोद्धारतन्त्रम्।) तस्य लिखनप्रकारो यथा,—
“[illegible] रेखा [illegible]।
[illegible]
[illegible] ध्यायते”।
इति [illegible]॥ * ॥ तस्य नामानि यथा।
[illegible]।
[illegible]॥
[illegible]।

ऋकारन्ताक्षयो माता ह्रस्वा मिथुनोदया ।
कोमलः श्यामला मेधी प्रतिष्ठा पतिरष्टमी ।
भक्षणमिव कीलाले पावको गन्धकर्षिणी" ॥
इति तन्त्रशास्त्रम् । वामनासिका । इति वीज-
वर्णाभिधानम् ॥ (मातृकान्यासेऽस्य वामनासिकाया
न्यस्यतया तथात्वम् । यदुक्तं मातृकान्यासमन्त्रे ।
"ॠं नमो दक्षिणघ्राणे ॠं नमो वामघ्राणे",
इति । अनुबन्धविशेषस्तेन थडाङ्कसो वा स्यात् ।
यदुक्तं कविकल्पद्रुमे । "थडाङ्कसोऽथ ॠवां ऌट्-
रड्वानिर्वाथ एः सिचि" ॥ (एतेन कगृ धातोस्वरे
लुङि कृते अचीकगत् अचकगत् इति स्यात् ॥)
ॠ गि गत्यां । इति कविकल्पद्रुमः । (क्रादि-क्र्यादिं-
परं-सकं-सेट् ।) गि ॠणाति । ईर्सः ईर्सिः ।
इति दुर्गादासः ॥

ॠ, अ, (ॠ+क्विप् ।) वाक्यारम्भः । रक्षा । इति
मेदिनी ॥ निन्दा । भयम् । इति शब्दरत्नावली ॥

ॠ, स्त्री, (ॠणातीति । ॠ+क्विप् ।) वक्तः । इति
मेदिनी ॥

ॠः, स्त्री, देवमाता । दानवमाता । (ॠ+भावे
क्विप् ।) स्मृतिः । गतिः । इति मेदिनी ॥

ॠ, पुं, (ॠणाति प्राप्नोति विश्वमिति । ॠ+क्विप् ।)
भैरवः । (यथा, "ॠनन्दराजि ! प्रमथेशसङ्गैः ।"
इत्युद्भटः ॥) दनुजः । इति मेदिनी ॥

ऌ

ऌ ऌकारः । स तु नवमस्वरवर्णः । अस्योच्चारण-
स्थानं दन्ताः । (यदुक्तम् सिद्धान्तकौमुद्याम् "ऌतु-
लसानां दन्ताः" । शिक्षायामपि यथा,—
"ऌमूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः" ।)
स ह्रस्वो दीर्घः प्लुतश्च भवति । इति व्याकरणम् ॥
(अयन्तु उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि
प्रत्येकं पुनरनुनासिकाननुनासिकभेदेन द्विधेति
षड्विध एव ॥)
"ऌकारं चञ्चलापाङ्गि कुण्डली परदेवता ।
अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये ॥
पञ्चदेवमयं वर्णं चतुर्ज्ञानमयं सदा ।
पञ्चप्राणयुतं वर्णं तथा गुणत्रयात्मकम् ॥
विन्दुत्रयात्मकं वर्णं पीतविद्युल्लता तथा" ।
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषाया) अस्य
लेखनप्रकारो यथा,—
"रेखाधःकुण्डली वक्रा दक्षिणे वामतो गता ।
ऊर्द्ध्वादधश्चागता विश्वं सन्ति च नित्यशः" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ अस्य नामानि यथा,—
"ऌ स्थाणुः श्रीधरः शुद्धो मेधा धूम्रात्मको वियत् ।
दीर्घजिह्वो मनोहराः स्वेच्छाचारी सनातनः ।
...ती दीर्घजिह्वा महेशो वासुकिः परा ।
...नी सर्व्विदो धूम्रा विरक्ता वाणरञ्जनः ।
...र्षिणा च मर्म्मो कर्णितरारावणैरवाः ।
...र्णतो वाचक धर्म्मिकुरुदन्तरी" ।
इति तन्त्रशास्त्रम् ॥ (मातृकान्यासे दक्षिणगण्डे
...दक्षिणगण्डे...न्यसनम् । यथा मातृ-
कान्यासमन्त्रे । "ऌं नमो दक्षिणगण्डे ऌं नमो
वामगण्डे" । अनुबन्धविशेषः । एतेन लुङि अङ्
स्यात् । यदुक्तम् कविकल्पद्रुमे ।
"थडाङ्कसोऽथ ऋवांऌटरड्वानिर्वाथ एः सिचि",
एतेन गम् ऌ औ गतौ इत्यस्य लुङि अगम-
दिति स्यात् ॥)

ऌ, अ, देवमाता । इति मेदिनी एकाक्षरकोषश्च ॥
भूमिः । कुम्भः । पर्व्वतः । इति मेदिनी ॥

ॡ

ॡ दीर्घं ऌकारः । स तु दशमस्वरवर्णः, अस्यो-
च्चारणस्थानं दन्ताः । (यथा मुग्धबोधे । "ऌतयं
तपरधनलसाः वो दन्त्याः" ।) स प्लुतश्च भवति ।
इति व्याकरणम् ॥ (उदात्तानुदात्तस्वरितभेदात्
त्रिविधोऽपि प्रत्येकं पुनरनुनासिकानुनासिकभे-
दात् षड्विध एव ।)
"ॡकारं परमेशानि पूर्णचन्द्रसमप्रभम् ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणात्मकं सदा ॥
गुणत्रयात्मकं वर्णं तथा विन्दुत्रयात्मकम् ।
चतुर्व्वर्गप्रदं देवि स्वयं परमकुण्डली" ॥
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायां) अस्य
लेखनप्रकारो यथा,—
"तत्कोऽङ्कतुल्यरूपा च रेखा सा वैष्णवी स्मृता ।
तासु वन्द्याः सुरेशानि दुर्गा वाणी सरस्वती" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ तन्नामानि यथा,—
"ॡकारः कामना धर्म्मा हृषीकेशो मधुव्रतः ।
सूक्ष्मा कान्तिर्व्वामगण्डो रुद्रः कामोदरी सुरा ॥
शान्तिकृत् स्वस्तिका शुक्रो मायावी लोलुपो वियत् ।
कुशमी सुस्थिरो माता नीलपीतो गजाननः ॥
कामिनी विश्वपा कालो नित्या शुद्धः शुचिः कृती ।
सूर्य्यो धैर्य्याकर्षिणी च एकाकी दनुजप्रसूः" ॥
इति तन्त्रशास्त्रम् ॥ (मातृकान्यासे वामगण्डे
न्यस्ततया तन्नामाप्यभिधानम् । मातृकान्यास-
मन्त्रो यथा ॥ "ऌं नमो दक्षिणगण्डे ॡं नमो
वामगण्डे" ॥ मुग्धबोधमते तन्त्रमते च ऌकारस्य
दीर्घत्वमस्ति पाणिनिमते तु नास्ति । अनेदं प्रा-
नयं ऌकारस्य दीर्घत्वाभावेऽपि "ऌति ऌवा"
इति वार्त्तिकोक्तेः ॡकार एव तत्र विधेयः । तेन
होतॢकार इत्यादौ ॡकारस्य व्यवहारः । मुग्ध-
बोधेऽपि एतदनुसारेण एकमात्रद्विमात्रत्रिमा-
त्रापेक्षा "ऌनयम्" इत्युक्तत्वेन न विरोधः ॥)

ॡ, अ, देवमाता । मार्य्यांका । माता । इति मेदिनी ॥

ॡः, स्त्री, दैत्यस्त्री । इत्येकाक्षरकोषः ॥ दनुजमाता ।
कामधेनुमाता । इति कश्चिदेकाक्षरकोषः ॥

ॡ, पुं, सर्प्पः । महादेवः । इति कश्चिदेकाक्षरकोषः ॥

ए

ए एकारः । स तु एकादशस्वरवर्णः । अस्योच्चारण-
स्थानं तालु कण्ठश्च । (यदुक्तं सिद्धान्तकौमुद्याम् ।
"एदैतोः कण्ठतालु" ।
"एऐ तु कण्ठतालव्यावो...
स दीर्घः प्लुतश्च भवति । इ...
...त्तानुदात्तस्वरितभेदात् त्रि...
...नुनासिकाननुनासिकभेदात्...
"एकारं परमं दिव्यं ब्रह्मविष्णु...
रक्तिनीकुसुमप्रख्यं पञ्चदेवमयं...
पञ्चप्राणात्मकं वर्णं तथा विन्दु...
चतुर्व्वर्गप्रदं देवि स्वयं परमकुण्डलि...
इति कामधेनुतन्त्रं ॥ (वङ्गीयभा...
...नप्रकारो यथा ।
"कुञ्चिता वामतो रेखा दक्षिणोर्द्ध्व...
पुनर्व्वामगता सैव तासु वर्णेश्वर...
इति वर्णोद्धारतन्त्रम् ॥ * ॥ तन्नामानि...
"एकारो वास्तवः शक्तिर्झिण्टीशो...
सूक्ष्मा भूतोऽर्द्धकेशी च ज्योत्स्ना...
भयं ज्ञानं क्षमा धीरा भद्रा दन्तुरा...
वह्निर्विष्णुर्भगवती कुण्डली मोहिनी...
योनिराधारशक्तिश्च त्रिकोणा ईशा...
सन्धिरेकादशी भद्रा पद्मनाभः...
इति तन्त्रशास्त्रम् ॥ * ॥ अन्यत्र ।
"एकारो वामगण्डान्तः शक्तिर्झिण्टी...
माधवीशश्च विजया ओष्ठ...
इति वीजवर्णाभिधानम् ॥ (...
ओष्ठस्थाने न्यस्ततया ओष्ठ...
मातृकान्यासमन्त्रो यथा,—
"एं नम ओष्ठे ऐं नमोऽधरे" ।...
बन्धविशेषः । तेन लुङि सिचि वा...
यथाह कविकल्पद्रुमे ।
"ऌटरड्वानिर्वाथ ए सिचि ।
अवृद्धिः श्वयत्यादि स्यात्" ।
एतेन कटे वर्षावरणयोरित्यस्य ...
स्यात् ॥)

ए, अ, स्मृतिः । असूया । अनुकम्पा ।
आह्वानम् । इति मेदि...

ए, पुं, (एति प्राप्नोति सर्व्वं...
"सर्व्वं विष्णुमयं जगत्"...
त्वम् ॥) विष्णुः । इत्येका...

एकं त्रि, (एतीति । इण...
प्रत्ययतिमर्षिभ्य कन्" ।...
कन् ।) मुख्यम् । अन्यत् ...
("त्वमेको ह्यस्य सर्व्वस्य विधा...
इति मनौ १ । ३ । "अथामेका...
इति श्रुति ॥ "एकातपत्रं जग...
रघुवंशे २ । ४७ । "समाज माहेश्वरी...
इति कुमारे ५ । ५८ ।) असहाय...
अप्येकशाखकानि । प्रथमकः ।...
१ गणेश्वरत्न ॥ ४ मुख्यत् ॥...
लता ॥ अपि ६ सूर्यं ७ ...
इति महाभारते वनपर्व्व । एवं
तथा च सिद्धान्तकौमुद्या "एकात्...
ष्टत्" इत्यक्षा "...

...दि-युष्मद्-अस्मद्-भवत्-किम्" इत्युक्तत्वात् । ...सामाने च अर्थे । "निन्दामेव भवता ...येत्यमिम् कर्म्मणि सहायेन भवितव्यम्" । ...कानन्तरं शेषवर्णादौ सूपतिभेदः । ...यथा, भागवते ८।१५।२।

"...तादेकदंशुमान् पुत्रः शस्यादीक्ष्य सुतं मदः ।
...स सुतएककः नयस्य तनयोऽमितः" ॥

...मेश्वरः । विष्णुः । यथा विष्णुसंहितायाम् । ...को नैकः सत्रः वः किम्" । "परमार्थतः सजा...विजातीयस्वगतभेदरहितत्वादेकः" । इति ...यम् । घटे घटान्तरात् भेदः सजातीयभेदः । ...पटात् भेदः विजातीयभेदः । घटे कपाला...दिः स्वगतभेदः ॥)

त्रि, ("एकादाकिनिचासहाये" । ५।३। ...। इत्यत्र चकारात् पक्षे कन् ।) असहायः । ...ला इति भाषा । तत्पर्य्यायः । एकः २ ...ाकी ३ । इत्यमरः ॥

"...महानप्येककी वृक्षः सर्व्वतः सुप्रतिष्ठितः ।
...ैव हि वातेन शक्यो धर्षयितुं यतः" ॥

...इति पञ्चतन्त्रे ३।५२ ।। तथा नैषधे । २ । ९६ ।

"विधिरेककचक्रचारिणम्
किमु निर्म्मित्सति मान्मथं रथम्" ॥)

...कुण्डलः पुं, (एकं कुण्डलं यस्य ।) बलरामः । ...रः । इति मेदिनी ॥

...रुः, पुं, (एको गुरुर्यस्य ।) सतीर्थः । इत्यमरः ॥ ...गुरुर शिष्य इति भाषा ॥

...क्रं, क्ली, (एकं चक्रं यस्य ।) पुरीविशेषः । तत्प...र्य्यायः । हरिगृहम् २ शुम्भपुरी ३ । इति त्रिकाण्ड...शेषः ॥ सूर्य्यरथः । त्रि, असहायचारी । यथा, ...ऋग्वेदे १ । १६४ । २ ।

"सप्त युञ्जन्ति रथमेकचक्र-
मेकोऽश्वो वहति सप्तनामा ।
त्रिनाभिचक्रमजरमनर्व्वं
यत्रेमा विश्वा भुवनाधितस्थुः" ॥

...त्र भाष्यकृता यद्व्याख्यातन्तदाह ।

"एकचक्रमेकरथाङ्गोपेतम् । यद्यपि श्रोणि...न्यपि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते ...थं रंहणस्वभावं ...यस्य सम्बन्धिनं सप्त...संख्याका अश्वा युञ्जन्ति अनुबध्नन्ति वहन्त्य...रात्रनिर्वाहाय । किं वस्तुतः सप्त नेत्याह । ...कोऽश्वः सप्तनामा । एक एव सप्ताभिधानः ...अथवा गमनप्रकारो वा एक एव वायुः सप्तरूपं ...त्वा वहतीत्यर्थः । वाय्वधीनत्वादन्तरीक्षसञ्चारस्य ...एकचक्रमित्युक्तम् । कीदृशन्तदित्यत आह । ...त्रिनाभि वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्र...त्रयोपेतम् । अजरमजरणधर्म्मकम् । अनर्व्वम...प्रतिधिनं पुनरुक्तदेव विशेष्यते । यत्र यस्मिंश्चक्रे ...इमा विश्वा भुवना इमानि प्रसिद्धानि सर्व्वाणि ...भूतजातान्यधि आश्रित्य तस्थुस्तिष्ठन्ति । यद्वा ...एकचक्रमेकचारिणमसहायेन सञ्चरन्तं रथ...मादित्यं सप्त युञ्जन्ति सर्पणस्वभावाः सप्तसंख्या ...रश्मयः सप्तप्रकारकार्य्या असाधारणाः षड्ऋतुविशेषात्मकाः षड़् ऋतवः एकः साधारण इत्येवं-रूपा । यद्वा मासद्वयात्मकाः षट्, अपरोऽधि-मासात्मक एव इत्येवं सप्तर्त्तवो युञ्जन्ति एतस्य कार्य्यं निर्व्वहन्तीत्यर्थः । स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्तरश्मीनां सप्तसङ्ख्यायितानि नमयो यस्य तादृशः । सप्तर्षि-भिः स्तूयमानो वादित्यो वहति धारयति भ्रम-तीत्यर्थः । किं भूतम् । त्रिनाभि चक्रम् । त्रयो नाभिस्थानीयाः सन्ध्यासन्धयो वा एव ऋतवो यस्य तत्तादृशम् । के ते ग्रीष्मवर्षाहेमन्ताख्याः यद्वा भूतभविष्यद्वर्त्तमानाख्यास्त्रयः कालास्त्रिना-मयः । तद्विशिष्टं चक्रं चक्रवत् पुनः पुनः परिभ्रममाणं संवत्सराख्यचक्रमजरममरणम् । न हि कदाचिदपि कालो म्रियते अनादिनिधनः कालः इति स्मृतेः । अनर्व्वमप्रतिहतम् । ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनः पुनरावर्त्तयति संवत्सरादवांचीनानां तत्रै-वान्तर्भावात् युगादीनां तदावृत्तिसाध्यात् संवत्-सरस्य चक्रत्वेन रूपणम् । पुनः कीदृशं तत् । यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि सर्व्वाणि भूतान्यधितस्थुः आश्रित्य तिष्ठन्ति कालाधी-नत्वात् सर्व्वस्याः स्थितेः । ईदृशस्य कालस्य का-रणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञान-मोक्षादरप्रशंसा च" ॥ नृपाद्ययविशिष्टम् । एक-राजविशिष्टम् । यथा, भागवते ।३।१।२०।

"इत्थं व्रजन् भारतमेव वर्षं
कालेन यावत् गतवान् प्रभासम् ।
तावच्छशास क्षितिमेकचक्रा-
मेकातपत्रामजितेन पार्थः" ॥

पुं, असुरभेदः । यथा, हरिवंशे ३ । ८४ ।

"एकचक्रो महाबाहुस्तारकश्च महाबलः" ।

अयं हि प्रतिविन्ध्य इति नाम्ना प्रसिद्धः । यथा । महाभारते १ । सम्भवपर्व्वण्यंशावतरणे ६७ । २२ ।

"एकचक्र इति ख्यात आसीद्यस्तु महासुरः ।
प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ" ॥

स्त्री, स्वनामख्याता पुरी । अत्रस्थो भीमसेनो महाबलं वकनामानमसुरं हतवान् ॥ यथा,— महाभारते । १ । अंशावतारपर्व्वणि भारतसूत्रे । ६१ । २६-२८ ।

"ते तत्र नियता कालम् कञ्चिदूषुर्नरर्षभाः ।
मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने ॥
तत्रासलाद क्षुधितं पुरुषादं वृकोदरः ।
भीमसेनो महाबाहुर्व्वकं नाम महाबलम् ॥
तस्यापि पुरुषव्याघ्रो बाहुवीर्य्येण पाण्डवः ।
निहत्य तरसा वीरो नागरान् पर्य्यसान्त्वयत्" ॥)

एकचरः, पुं, (एकश्चरति यः । चर + पचाद्यच् ।) हिंस्रपशुविशेषः । गण्डार इति भाषा । तत्प-र्य्यायः । वार्द्धनसः २ गण्डोत्साहः ३ गण्डकः ४ । इति त्रिकाण्डशेषः ॥ (सर्पादिः । यथा, मनुः । ५ । १७ ।

"न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान्" ।

"ये एकाकिनः प्रायेण चरन्ति सर्पादयस्तानेक-चरान्" । इति तट्टीकायां कुल्लूकभट्टः ॥ (त्रि, एकाकिचारी । पृथक्चरः । यथा, "अयमेकचरो-ऽभिवर्त्तते माम्" । इति किराते । १३ । ३ । "एकचरो पृथक्चरः" । इति तट्टीका ॥)

एकचारी, [न्] पुं, (एकः सन् चरतीति । चर + णिनि ।) बुद्धसहचारी । इति त्रिकाण्डशेषः ॥ (एकचारिणि, त्रि ॥)

एकजटा, स्त्री, (एका जटा यस्याः ।

"एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका" ।

इति श्रवणात् । यद्वा एका मुख्या जटा यस्याः ।

"खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्" ।

इति च श्रवणात्तथात्वम् ।) उग्रतारा । तस्या आविर्भावो यथा,—

"सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम् ।
गङ्गावतारनिकटे महामायां प्रतुष्टुवुः ॥
अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः ।
मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत ॥
युष्माभिरमरैरत्र स्तूयते का च भाविनी ।
किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति ॥
एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः ।
समुद्भूताब्रवीद्देवी मां स्तुवन्ति सुरा इति ॥
शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान् ।
तस्मात्तयोर्व्वधायाहं स्तूयेऽद्य सकलैः सुरैः ॥
विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा ।
भिन्नाञ्जननिभा कृष्णा साभूत् गौरी क्षणादपि ॥
कालिकाख्याभवत् सापि हिमाचलकृताश्रया ।
तामुग्रतारामृषयो वदन्तीह मनीषिणः ॥
उग्रादपि भयात् त्राति यस्माद्भक्तान् सदाम्बिका ।
एतस्याः प्रथमं वीजं कथितं तन्त्रमेव च ॥
एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका ।
पृथक्तं चिन्तनं चास्याः सम्यक् वेतालभैरवौ ॥
यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् ।
चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् ॥
खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः ।
कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम् ॥
खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम् ।
मुण्डमालाधरां शीर्षे ग्रीवायामपि सर्व्वदा ॥
वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् ।
कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम् ॥
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् ।
विन्यस्य सिंहपृष्ठे तु लेलिहानासवं स्वयम् ॥
साट्टहासमहाघोरा रावयुक्तातिभीषणा ।
चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः ॥ ० ॥
एतस्याः संप्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः ।
महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च ॥
घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी ।
भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्" ॥

इति कालिकापुराणे ६१ अध्यायः ॥

एकजन्मा, [न्] पुं, (एकं मुख्यं जन्म यस्य । दिक्-पालांशसम्भूतत्वादस्य तथात्वम् ।) राजा । इति त्रिकाण्डशेषः ॥ (एकं न द्वितीयं जन्म यस्य इत्यर्थे । शूद्रः । तस्य अद्विजत्वात् तथात्वम् ।)

एकतमः, त्रि, (एक+"एकाच्च प्राचाम्"। ५।३।९४। इति डतमच्।) बहूनां मध्ये एकः। इति व्याकरणम्॥ (यथा महाभारते आदिपर्व्वणि।
"धनानि वा शरीरं वा ब्राह्मणमेकतमं हरन्"॥)

एकतरः, त्रि, (एक+"एकाच्च प्राचाम्"।५।३।९४। इति डतरच्।) द्वयोर्म्मध्ये एकः। इति व्याकरणम्। भिन्नः। इत्यमरटीकायां भरतः॥ (यदाह कात्यायनः।
"यदि ह्येकतरो ह्येषां स्त्रीधनं भक्षयेद्बलात्"॥)

एकता, स्त्री, (एकस्य भावः। एक+तल्+टाप्।) एकत्वम्। ऐक्यम्। इति व्याकरणम्॥ (यथा, रामायणे ६६।१३।
"बह्वीरपि मतीर्गत्वा मन्त्रिणो मन्त्रनिर्णये।
पुनर्यत्रैकतां प्राप्ताः स मन्त्रो मध्यमः स्मृतः"॥)

एकतानः, त्रि, (एकेन भावरसेन तन्यते विस्तीर्य्यते इति। तन इण् विस्तारे। कर्म्मण्यण्।) एकाग्रः। एकविषयाकृष्टचित्तः। इत्यमरः॥ (यथा भागवते ७।८।८।
"ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः
सत्त्वैकतानमतयो वचसां प्रवाहैः।
नाराधितुं पुरुगुणैरधुनापि पिप्रुः
किं तोष्टुमर्हति स मे हरिरुग्रजातेः"॥
एकतानो विश्रान्तिरस्येति।) एकतालो पुं। इत्यमरटीकायां भानुदीक्षितः॥

एकतालः, पुं, (एकः तालो मानं यत्र।) समन्वितस्वरः। नृत्यगीतवाद्यानां साम्यं यत्र। एकताल इति ख्यातः। इत्यमरभरतौ॥ (सङ्गीत शास्त्रे तालभेदः। त्रि, एकताल-[illegible]सम्न्वितः। यथा रघौ ११।३१।
"एकतालइवोत्पातपवनप्रेरितो गिरिः"॥)

एकतीर्थी, [न्] पुं, (एकं समं तीर्थमाश्रमो यस्य।) सतीर्थः। गुरुभाइ इति भाषा। ("एकतीर्थी [illegible]" इति मिताक्षरा॥)

एकत्र, अ, (एक+त्रल्।) एकस्मिन्। इति व्याकरणम्। एकजाइ इति भाषा। (यथा "एकत्र निर्णीतः शास्त्रार्थो बाधकं विनान्यत्रापि प्रयुज्यते"। इति दुर्गादासः। यथा मनुः। २।१२९।
"एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत् क्वचित्।
[illegible]")

एकदंष्ट्रः, पुं, (एका दंष्ट्रा यस्य।) गणेशः। [illegible]

एकदन्तः, पुं, (एको दन्तो यस्य।) गणेशः। [illegible]

एकदा, अ, (एक+"सर्व्वैकान्यकिंयत्तदः काले दा"।५।३।१५। इति दा।) एकस्मिन् काले। तत्पर्य्यायः। युगपत् २। इत्यमरः॥ (यथा भागवते ६।३।२९।
"जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविन्दम्।
कृष्णाय नो नमति यच्छिर एकदापि
तानानयध्वमसतोऽकृतविष्णुकृत्यान्"॥)

एकदृक्, [श्] पुं, (एकं सर्व्वमभिन्नं पश्यति यः। एक+दृश्+क्विप्।) महादेवः। (एका दृक् यस्य। रामबाणमोक्षणेन नष्टे एकचक्षुषि काकस्य तथात्वम्।) काकः। काणे त्रि। इति हेमचन्द्रः॥ (एकमेव सर्व्वं ब्रह्मत्वेन पश्यति यः इति व्युत्पत्त्या तत्त्ववेत्ता। ब्रह्मज्ञानी। एकमेव पक्षं पश्यतीत्यर्थे एकपक्षाश्रयी॥)

एकदेहः, पुं, (एकः मुख्यो देहो यस्य। यद्वेष सौम्यत्वादस्य तथात्वम्।) बुधग्रहः। इति त्रिकाण्डशेषः॥ (एको भेदरहितादीनां साम्यात् तुल्यो देहः शरीरं यत्र। गोत्रम्। वंशः। यथा, हरिवंशे ४६ अध्याये।
"बहूनि विप्र गोत्राणि मुनीनां भावितात्मनाम्।
एकदेहानि तिष्ठन्ति विभक्तानि विना प्रजाः"॥
दम्पती। "अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमिति श्रुतेः"। तथा,—
"शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा"।
इति स्मृत्युक्तेश्च जायापत्योरेकदेहत्वम्"॥)

एकधा, अ, (एक+"एकाद्धो ध्यमुञ्"। ५।३।४४। इति धा।) एकप्रकारम्। इति व्याकरणम्॥ (यथा महाभारते अनुगीतापर्व्वणि १४।४२।६०।
"सर्व्ववित् सर्व्वभूतेषु विन्दत्यात्मानमात्मनि।
एकधा बहुधा चैव विकुर्व्वाणस्ततस्ततः"॥)

एकधुरः, त्रि, (एका धूः। "ऋक्पूरब्धूःपथामानक्षे"। ५।४।७४। इति अः समासान्तः।) एकभारवाहकशकटादिः। एकपिठा गरु इति भाषा। तत्पर्य्यायः। एकधुरीणः २ एकधुरावहः ३। इत्यमरः॥ (यथा, पाणिनिः। ४।४।७९। 'एकधुराल्लुक्'॥)

एकधुरावहः, त्रि, (वहतीति वहः। वह्+अच्। एकधुराया वहः।) एकधुरः। इत्यमरः॥

एकधुरीणः, त्रि, (एकधुरां वहति यः। "एकधुराल्लुक् च"। ४।४।७९। खप्रत्ययेन साधुः। "एकधुराल्लुक्" इत्यनेन पक्षे अप्रत्ययः। यथा एकधुरः।) इत्यमरः॥ एकस्य रथस्य भाण्डादेर्व्वा धुरं वहति यः। इत्यमरटीकायां भरतः॥

एकनटः, पुं, (एको मुख्यो नटः।) मुख्यनटः। तत्पर्य्यायः। सूत्रधारः २। इति त्रिकाण्डशेषः॥ [illegible] इति शब्दरत्नावली॥

एकपदः, त्रि, (एकः पदो यस्य।) [illegible] इति त्रिकाण्डशेषः॥ (एक पद इति विग्रहे।) [illegible] मनुः॥ यथा, रघौ १४।२४।
"स्वदेहपातावधिरेकदारात्
[illegible]"॥)

एकपदी, स्त्री, (एकोऽङ्घ्रिरोऽयः [illegible] इति

विग्रहे "नित्यं स[illegible]
मकारान्तादेरो[illegible]
प्रजा। इति [illegible]
"तावावयं दिवस[illegible]
एकः समानः पतिर्[illegible]
यथा मनुः। ९।१[illegible]
"सर्व्वासामेकपत्नीनाम्[illegible]
सर्व्वास्तास्तेन पुत्रेण प्र[illegible]

एकपत्रिका, स्त्री, (एकं पत्रं[illegible]
गन्धपत्रच्छदः। इति रा[illegible]

एकपदं, क्ली, (एकं पदं पदमा[illegible]
तत्कालः। इति मेदिनी॥ ([illegible]
इति विश्वः। यथा, रघुः [illegible]
निरासं जनमामाय्यमिमं [illegible]
तल्लक्ष्ये। स्यात् तत्त्वे [illegible]
इति तट्टीका॥ एकं प्रकृष्टं [illegible]
व्यवस्थितिनाव्यवस्थानस्थानस्थापि[illegible]
तथात्वम्। वैकुण्ठम्। [illegible]
यथा माघे २।९१।
"निष्पन्नयरीनैकपदे य उत्खातः[illegible]
एकं श्रेष्ठं पदं कोष्ठलक्ष्यपद्मलक्ष्म[illegible]
स्थानेकाकोष्ठात्मकस्थानम्। यथा, [illegible]
देवीपुराणम्।
"[illegible]

एकपदः, पुं, (एकं पदं पदविन्यासो [illegible]
बन्धविशेषः। तस्य लक्षणम्।
पादमेकं हृदि स्थाप्य द्वितीयं
स्कन्धे धृत्वा रमेत् कामी [illegible]
इति रतिमञ्जरी॥ ([illegible]
नीयो देवभेदः। यथा [illegible]
पुराणवचनम्। "[illegible]"
एक पद चरणं यस्य इति [illegible]
एकपदविशिष्टः। यथा [illegible]
"पादैर्गुर्व्व त्रोपति [illegible]
मात्मान वा [illegible]
एकेन पदा चरन् [illegible]
एव्वी वदती [illegible]
पाद मा तथा [illegible]
किम्। इति तट्टीका॥)

एकपदी, स्त्री, (एक पदो यस्य [illegible]
चेति निपातः। यदा [illegible]
तत्पर्य्यायः। पादीऽ[illegible]
चेति शेषः वा। [illegible]

एकपर्णिका, स्त्री, (एकपर्णा+कन्+टाप्।)
पार्व्वत्याः पत्रमात्रभक्षणान्[illegible]
देवीपुराणे देवीविशेषनाम॥ यथा,
"अपर्णायाः [illegible]
पाटला पाटलाद्रा [illegible]

एकपात्, [द्] पुं, (एक पादो [illegible]
[illegible]) शिवः। इति [illegible]
(रुद्रः। यथा, महाभारते

ादद्विमृधः पिनाकी च परन्तपः" ॥
यथा, विष्णुसंहितायाम् ।
ला चतुर्भागवस्तुर्वेदविदेकपात्" ॥
ते यस्य इति विग्रहे वाच्यलिङ्गः ॥)
पुं, (एकं पिङ्गं पिङ्गलवर्णं नेत्रं यस्य ।)
त्यमरः ॥ (कुवेरस्य पिङ्गनेत्रकथा उक्ता
डे । यथा,—
नयने पूर्व्वमुमानेव यलोकयत् ।
मीपे का योषिदेया सर्व्वाङ्गसुन्दरी ॥
कं तपस्तप्तं ममापि तपसोऽधिकम् ।
यमहो प्रेम सौभाग्यश्रीरहो भृशम् ।
चते यावत् पुनः पुनरिदं वदन् ।
स्फोटितं नेत्रं वामं वामविलोकनात् ॥
ब्रवीदेवं किमसौ दुष्टतापसः ।
चेनेत्रकान्त्या पुनर्मामेव पश्यति ॥
नो मे रूपं प्रेमसौभाग्यसम्पदः ।
गिरं श्रुत्वा प्रहस्य प्राह तां प्रभुः ॥
दीयपुत्रोऽयं न च क्रूरेण चक्षुषा ।
तपोलक्ष्मीं तव किन्त्वधिवर्णयन् ॥
समाभाष्य तमीशः पुनरब्रवीत् ।
मि ते वत्स! तपसानेन तोषितः ॥
मधिनाथत्वं गुह्यकानां भवेश्वरः ।
किन्नराणाञ्च राजा राज्ञाञ्च सुव्रत ! ॥
एयजनानाञ्च सर्व्वेषां धनदो भव ।
उाञ्च ते नित्यं वत्स्यामि च तवान्तिके ।
निकयामित्र ! तव प्रीतिं विवर्द्धयन् ।
पादयोरस्याः पत ते जननी त्वियम् ॥
चा वरान् देवः पुनराह शिवः शिवाम् ।
कुरु देवेशि ! तपस्विन्यङ्गजे तव ।
देव्युवाच ।
निर्म्मला भक्तिर्मेषे भवतु सर्व्वदा ।
ाङ्गो नेत्रेण वामेन स्फुटितेन च ॥
स्तु ये तुभ्यं वराः सन्तु तथैव ते ।
भव नाम्ना त्वं मम रूपेर्ष्यया सुत" ॥)
, पुं, (एकं पिङ्गलं नेत्रं यस्य ।) कुवेरः ।
टीकायां भरतः ॥ (अस्य पिङ्गलनेत्रकथा
ग्शब्दे द्रष्टव्या ॥)
ं,क्ली, (एकं भक्तं भोजनं यत्र तत् व्रतम् ।)
ोजनाभावविशिष्टदिवाभोजनम् । तथा च
राणे ।
र्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
मिति प्रोक्तं रात्रौ तन्न कदाचन" ॥
तस्य नियमफलादिकश्चोक्तं विष्णुधर्म्मो-
यथा,—
विष्णुपरो मासमेकमक्तेन यः क्षिपेत् ।
ामिष्टान्नाढ्यं गार्हस्थ्यं समवाप्नुयात् ॥
ः सर्व्वभूतेषु वासुदेवपरायणः ।
तु वासुदेवादित्यवचनाढ्यमर्तं जपेत् ॥
ास्य यज्ञस्य ततः फलमवाप्नुयात् ।
ंवत्सरं पूर्णमेकभक्तो भवेन्नरः ॥
ः सर्व्वभूतेषु वासुदेवपरायणः ।
तु वासुदेवादित्यवचनाढ्यमर्तं जपेत् ॥

पौण्डरीकस्य यज्ञस्य ततः फलमवाप्नुयात् ।
दशवर्षसहस्राणि स्वर्गलोके महीयते ॥
तस्त्वयादिह चागत्य माहात्म्यं प्रतिपद्यते" ॥ इति ॥)
एकमूला, स्त्री, (एकं मूलं यस्याः ।) शालपर्णी ।
अतसी । इति वैद्यकम् ॥ (एकमेव मूलं यस्य
इति विग्रहे एकमूलविशिष्टे, त्रि ॥)
एकयष्टिका, स्त्री, (एका यष्टिरिव ।) हारविशेषः ।
एकनरि हार इति भाषा । तत्पर्य्यायः । एका-
वली २ । इत्यमरः ॥
एकरजः,पुं, (रज्यते इति रजः । एको मुख्यो रजः ।
रञ्जनद्रव्यम् ।) भृङ्गराजवृक्षः । इति जटाधरः ॥
(भृङ्गराजशब्देऽस्य गुणादयो बोद्धव्याः ॥)
एकलः, त्रि, (एक+ला+क ।) एक की । इति
पद्यावली ॥ एकला इति भाषा । (यथा भागवते ५ ।
७।१०। "तस्मिन् वाव किल स एकलः पुल-
हाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः
कन्दमूलफलोपहारैश्च समीहमानो भगवत आ-
राधनं विविक्तउपरतविषयाभिलाष उपभृतोप-
शमः परां निर्वृतिमाप" ॥)
एकलिङ्गं, क्ली, (एकं लिङ्गं यस्य ।) स्थानविशेषः ।
तथा च आगमे ।
"पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते ।
तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा" ॥
एकलिङ्गः, पुं, (एकं लिङ्गं पिङ्गलनेत्ररूपं चिह्नं यस्य
सः ।) कुवेरः । इति शब्दरत्नावली ॥ (पिङ्गलनेत्र-
कथा एकपिङ्गशब्दे द्रष्टव्या ॥)
एकवर्णी, स्त्री, (एकमेव शब्दं वर्णयति या । एक +
वर्ण+अण् । गौरादित्वात् ङीष् ।) वाद्यभेदः ।
तत्पर्य्यायः । करताली २ कङ्कमाला ३ कागङ्या ४
इति शब्दरत्नावली ॥
एकवर्षिका, स्त्री, (एको वर्षो यस्याः । कः । इत्वम् ।)
एकहायनी गौः । इति हेमचन्द्रः ॥ एकवत्सरेर
बकना इति भाषा ॥
एकवादः, पुं, (एकोऽभिन्नस्वरो वादः वाद्यम् ।
डिण्डिम इति एकरूपवाद्यत्वादस्य तथात्वम् ।)
डिण्डिमवाद्यम् । इति शब्दरत्नावली ॥
एकविंशतिः, स्त्री, (एकाधिका विंशतिः ।) एका-
धिकविंशतिसंख्या । एकुश इति भाषा ।
यथा । मनुः ५ । ३५ ।
"नियुक्तस्तु यथान्यायं यो मांसं नात्त्यमानुषः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम्" ॥
एकवीरः पुं, वृक्षभेदः । तत्पर्य्यायः । महावीरः २
सप्तवीरः ३ सुवीरकः ४ । अस्य गुणाः । मदका-
रित्वम् । कषायत्वम् । कटुत्वम् । तोदवातशान्ति-
त्वम् । चटुलीकटिशूलादिसम्पर्काभिघातहारि-
त्वञ्च । इति राजनिर्घण्टः ॥ (त्रि, एकः अद्वितीयो
वीरः । वीरवरः । प्रशस्तवीर्य्यशाली ।
यथा भागवते ३।१।४० ।
"कच्चिद् यशांसि धियतेऽर्ज्जुनार्थे
राजर्षिवर्य्यैर्ण्टे विनापि तेन ।
दक्षेरिवीरोऽधिरथो विजिग्ये
धनुर्द्वितीयः ककुभस्तपः" ॥)

एकशृङ्गः, पुं, (एको वृक्षो यस्मिन् ।) स्थानभेदः ।
"चतुःक्रोशान्तरे यत्र न वृक्षान्तरमीक्ष्यते ।
एकवृक्षः स विज्ञेयः" । इति आगमः ॥ (एकोऽद्वि-
तीयो वृक्षः इति विग्रहे एकस्मिन् वृक्षे । यथा
सारमञ्जरी । "एकवृक्षः पक्षनौका भवति" ।
एको वृक्ष इति पाठान्तरम् ॥)
एकशफः, पुं, (एकः शफः खुरो यस्य । अखण्ड-
खुरत्वात् तथात्वम् ।) घोटकः । इति त्रिकाण्ड-
शेषः ॥ एकखुरजन्तुमात्रम् । यथा ।
"खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून्" ॥
इति श्रीभागवतम् ॥ ३ । १० । २२ ॥ (अस्य दुग्ध-
दधि-मूत्र-मांसादिगुणा अश्वशब्दे ऐकशफशब्दे
च ज्ञातव्याः ॥)
एकशृङ्गः, पुं, (एकं शृङ्गं यस्य ।) विष्णुः । इति
त्रिकाण्डशेषः ॥ (स्वायम्भुवमन्वन्तरे अकालप्रलयात्
मत्स्यरूपधरस्यास्य शृङ्गे मनोर्नौर्बद्धा । तत्कथा
यथा कालिकापुराणे ३२ अध्याये ।
"स्वायम्भुवस्तदा मत्स्यं हरिं सस्मार वै तदा ।
ततो जलानामुपरि सशृङ्ग इव पर्व्वतः ॥
उद्दीप्यैकशृङ्गेण विष्णुर्मत्स्यस्वरूपधृक् ।
आगतस्तत्र न चिरात् यत्रास्ते समनुर्हरिः" ॥
विवृतिस्तु अकालिकशब्दे द्रष्टव्या ।) एकशृङ्ग-
युक्तपशुमात्रम् ॥ (पितृगणभेदः । यथा, महा-
भारते २ । ११ । ४९-४३ ।
"पितॄणाञ्च गणान् विद्धि सप्त वै पुरुषर्षभ ! ।
मूर्त्तिमन्तो हि चत्वारस्त्रयश्चाप्यशरीरिणः ॥
वैराजाश्च महाभागा अग्निष्वात्ताश्च भारत ।
गार्हपत्या नाकचराः पितरो लोकविश्रुताः ॥
सोमपा एकशृङ्गाश्च चतुर्व्वेदाः कलास्तथा ।
एते चतुर्षु वर्णेषु पूज्यन्ते पितरो नृप" ॥)
एकषष्टिः, स्त्री, (एकाधिका षष्टिः ।) संख्यासंख्येय-
विशेषः । इत्यमरः ॥ ६१ एकषट्टि इति भाषा ।
(यथा भागवते ६ । ६ । ३० ।
"सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु" ।)
एकसर्गः, त्रि, (एकस्मिन् विषये सर्गो निरायो
यस्य ।) एकाग्रः । इत्यमरः ॥
एकसूत्रः, पुं, (एकं सूत्रं यस्य । एकसूत्रेण वादनात्
तथात्वम् ।) डमरुवाद्यम् । इति शब्दरत्नावली ॥
एकहायनी,स्त्री, (एकः हायनो यस्याः । "दामहाय-
नान्ताच्च" । ४ । १ । २७ । इति ङीप् ।) एक-
वर्षीयगवी । एकवत्सरेर बाछुर इति भाषा ।
तत्पर्य्यायः । एकाब्दा २ । इत्यमरः ॥ (पुंसि प्रमाणं
यथा, मनुः ११ । १३६ ।
"वामो दद्याद्धयं हत्वा पञ्च नीलान् वृषान् गजम् ।
अजमेषावनड्वाहं खरं हत्वैकहायनम्" ॥
"वर्त्तं हत्वा वस्तं दद्यात् हरिणं हत्वा पञ्च
नीलान् वृषभान् दद्यात् प्रत्येकं छागमेषौ हत्वा
वृषभं दद्यात् गर्दभं हत्वा एकवर्षं वत्सं दद्यात्"
इति कुल्लूकभट्टः ॥)
एका, स्त्री, (एक+टाप् ।) दुर्गा । यथा ।
"एका गुणार्था लोके तस्मादेषा न उच्यते" ।

देवी सा परमार्थेति वदन्ति भिन्नदर्शिनः ॥ इति”।
“एका सा तु पृथक्त्वेन विना सर्व्वत्र विश्रुता ।
यथा तु व्यज्यते वर्णैर्विचित्रैः स्फटिको मणिः ।
तथा गुणवशाद्देवी नानाभावेषु वर्ण्यते” ॥
इति च देवीपुराणे देवीनिरुक्तं नाम ४५ अध्यायः॥
(अद्वितीया । यथा, मार्कण्डेये ९० । ७ ।
“एकैवाहं जगत्यत्र द्वितीया का ममापरा” ।
“अजामेकां लोहितशुक्लकृष्णां” । इति श्रुतिः॥
एकैव । स्त्री । यथा भट्टिः १ । १४ ।
“प्रासोष्ट शत्रुघ्नमुदारचेष्टम्
एका सुमित्रा सह लक्ष्मणेन” ॥)

एकाकी, [न्] त्रि, (एक + “एकादाकिनिच्चास-हाये” । आकिनिच् ।) सहायरहितः । अस-हायः । एकला इति भाषा । तत्पर्य्यायः । एकः २ एकक ३ । इत्यमरः ॥ एकलः ४ । इति शब्द-रत्नावली ॥ (यथा मनुः । ४ । २५८ ।
“एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः ।
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति” ॥)

एकाक्षः, पुं, (एकमक्षि यस्य । सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।) काकः । इति शब्दचन्द्रिका ॥ (काकस्य यथा एकनेत्रत्वं जातम् । तत् पाद्मे भरतस्यायोध्या प्रतिनिवृत्त्यनन्तरमुक्तम् । तद्यथा,—
“राघवश्चित्रकूटाद्रौ सानुगोऽरमत स्त्रिया ।
कदाचिदङ्के वैदेह्या निद्राणे रघुनन्दने ॥
ऐन्द्रः काकः समागम्य जानकीं वीक्ष्य कामुकः ।
विददार नखैस्तीक्ष्णैः पीनोन्नतपयोधरम् ॥
तम् दृष्ट्वा राघवः क्रुद्धः कुशं जग्राह पाणिना ।
मूर्त्तामूर्त्तब्रह्मरूपचिन्तनं ध्यानमुच्यते ।
योगारम्भे मूर्त्तहरिममूर्त्तमथ चिन्तयेत् ॥
नाभिकन्दे स्थितं नालं दशाङ्गुलसमायुतम् ।
नाले चाष्टदलं पद्मं द्वादशाङ्गुलविस्तृतम् ॥
सकर्णिके केशराले सूर्य्यसोमाग्निमण्डलम् ।
अग्निमण्डलमध्यस्थो वासुदेवश्चतुर्भुज: ॥
शङ्खचक्रगदापद्मयुक्त: कौस्तुभसंयुत: ।
वनमाली कौस्तुभेन युतोऽहं ब्रह्ममुक्त ओम् ॥
धारणेत्युच्यते चेयं धार्य्यते यन्मनोमये ।
प्राह्णुभ्यां हृदये चात्र तृतीया च तथोरसि ॥
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणादश कीर्त्तिता: ॥
अहं ब्रह्मेत्यवस्थानं समाधिरभिधीयते ।
एकाकार: समाधि: स्याद्देशलक्षणवर्ज्जित: ॥”

इति गारुडे २३४ अध्याय: ॥ * ॥

श्रीभगवानुवाच ।

“ब्रह्मगीतां प्रवक्ष्यामि यां ज्ञात्वा मुच्यते भवात् ।
अहं ब्रह्मास्मीति वाक्यात् ज्ञानान्मोक्षो भवे-
न्नृणाम् ॥
[illegible] ।
[illegible] ॥
[illegible] ।
प्राणविद्याक्रमेणैव [illegible] ॥
[illegible] ।
[illegible] ॥
अद्वयानन्दचैतन्यं [illegible] परम् ।
प्राणविद्याक्रमाधेः सद्वितीयविभागकम् ॥
[illegible] ।
तथा ज्ञानपटेनैव प्राणविद्याक्रमेण ॥
विद्यावरोऽभागे च [illegible] ।
अद्वयानन्दचैतन्यभाग एवं विचिन्तयेत् ॥
अहंपदेन चैतन्यप्रत्यग्ब्रह्मपदेन तु ।
अद्वयानन्दचैतन्यं [illegible] च ॥
[illegible] ब्रह्मपदार्थयो: ।
अहं ब्रह्मास्मि वाक्याच्च ज्ञानभूतिफलात्मकम् ॥
एकत्वज्ञानं भवेद्दाक्यात् गुरुतो ध्रुवम् ।
अज्ञानाज्ञानकार्य्यनिवृत्तिर्मुक्त एकत: ॥”

इति गारुडे २३५ अध्याय: ॥ * ॥

श्रीभगवानुवाच ।

“समाधिरहित: [illegible]:
अम्बरापत्तत: सृष्टो प्रपञ्चीकृतभूतकम् ॥
तत: सप्तदशं लिङ्गं पञ्च कर्म्मेन्द्रियाणि च ।
वाक्पाणिपादं पायुश्च उपस्थमथ धीन्द्रियम् ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं स्यात् पञ्च वायव: ।
प्राणोऽपान: समानश्च व्यानस्तूदान एव च ॥
मनो धीरन्त:करणं स्यान्मन: संशयात्मकम् ।
बुद्धिर्निश्चयरूपा तु एतत् सूक्ष्मशरीरकम् ॥
हिरण्यगर्भमात्मीयं भूततत्कार्य्यलिङ्गकम् ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूतत: ॥
पञ्चीकृतेभ्यो भूतेभ्यो ब्रह्माण्डं समजायत ।
लोकप्रसिद्धं स्थूलाख्यं शरीरञ्चरणादिमत् ॥
पञ्चीकृतानि भूतानि तत्कार्य्यञ्चाहमेव च ।
सर्व्वं शरीरजातञ्च प्राणिनां स्थूलमीरितम् ॥
तौराट्परतमात्मान: शरीरं प्रोच्यते बुधै: ।
देहद्वयाभिमानी च त्वमथो जीव एकत: ॥
सच्छन्दवाच्यं ब्रह्मैव प्रविष्टं देहयोर्द्वयो: ।
जलार्कवद्घटखवज्जीव: प्राणादिधारणात् ॥
जाग्रत्स्वप्नसुषुप्तीनां साक्षी जीव: स च स्मृत: ।
जाग्रत्स्वप्नसुषुप्ताख्यैर्व्यतिरिक्तश्च निर्गुण: ॥
निर्गतापचयोत्सर्गो नित्यशुद्धस्वभावक: ।
परमात्मैव सञ्जायतरप्रादौ सन्निधानत: ॥
अन्त:करणरागैश्च अन्त:करणसंस्थित: ।
जाग्रत्स्वप्नसुषुप्तीश्च पश्यतोऽविकृत: सदा ॥
फलं क्रियाकारकयोर्ज्ञानं शब्दादीन् वदाम्यहम् ।
इन्द्रियैरनुविज्ञानं जाग्रत्स्थानमुदीरितम् ॥
जाग्रत्संस्कारसम्[illegible]ध्यो विषयान्वित: ।

ब्रह्मकारणरूपेण वटस्य कणिकात्मना ।
भ्रमते भ्रमतो जीवो जाग्रदादीन् स पश्यति ॥
समाध्यारम्भकाले तु पूर्व्वमेवावधारयेत् ।
सुसूक्ष्मः पश्चात् संजाते अन्तःकरणनिश्चले ॥
विलापयेत् चैतन्यासं चैतन्यं परिशेषयेत् ।
पञ्चीकृतेभ्यो भूतेभ्यः स्थूलादिव्यतिरिक्तकम् ॥
यथा मृदो घटो भिन्नो नास्ति तत्कार्य्यतत्तथा ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूततः ॥
समष्टिव्यतिरेकेण स्थितं सूक्ष्मशरीरकम् ।
अपञ्चीकृतभूतेभ्यो न लिङ्गं व्यतिरिक्तकम् ॥
पृथ्वी वारि विना नास्ति वारि नास्ति च तेजसा ।
तेजश्च वायुना नास्ति वायुः तेन विना न हि ॥
सद्ब्रह्मणा च खं नास्ति शुद्धब्रह्म विना च सत् ।
शुद्धभावात्तथा जाग्रत्स्वप्नादीनामसम्भवे ॥
जीवत्ववर्ज्जितः प्रत्यगात्मा वै तनुरूपकः ।
नित्यशुद्धबुद्धमुक्तं सत्यं ब्रह्माद्वितीयकम् ॥
सर्व्वपदार्थौ स्थितौ स्वाकारो ब्रह्मकारकः ।
उकारश्च अकारश्च मकारोऽहं हृगद्वयः ॥
ब्रह्माहमस्म्यहं ब्रह्म ज्ञानमज्ञानमर्द्दनम् ।
अयमात्मा ब्रह्मज्योतिर्विज्ञानानन्दरूपकम् ॥
सत्यज्ञानमनन्तः स तत्त्वमसि श्रुतीरितम् ।
अहं ब्रह्मास्मि ब्रह्माहं सर्व्वप्राणिषु सर्व्वगम् ॥
योऽसावादित्यपुरुषः सोऽसावहमनादिमत् ।
गीतासारोऽर्ज्जुनायोक्तो येन ब्रह्मणि वै लयः ॥"
इत्यादिमहापुराणे गारुडे गीतासारे २३६ अध्यायः ॥

गीतिः, स्त्री, (गै गाने + क्तिन् ।) गानम् । (यथा, कुमारे । १ । ४० ।
"गुणाधरोगीतिरपि अरोऽभिन्
हरः प्रसंख्यानपरो बभूव ॥")
आर्य्याच्छन्दोविशेषः । इति मेदिनी । ते १६ ।
(अस्या लक्षणं यथा छन्दोमञ्जर्य्यां मात्रावृत्ते । ७ ।
"आर्य्याप्रथमार्द्धसमं यस्याः परार्द्धमीरिता [गीतिः ॥")

गीरथः, पुं, (गीर्वाणी वाङ्मयं शास्त्रमित्यर्थः रथ इव यस्य ।) बृहस्पतिः । इति त्रिकाण्डशेषः ॥

गीर्णः, त्रि, (गीर्य्यते स्म इति । गॄ शि स्तुतौ + क्त ।) स्तुतः । इत्यमरटीकायां भरतः ॥

गीर्णिः स्त्री, (गॄ + क्तिन् । ऋल्वादिभ्यः क्तिन्निष्ठावत् तेन नत्वम् नतो रेफात् णत्वञ्च ।) गिलनम् । इत्यमरः । ३ । ४ । ११ । स्तुतिश्च । गीर्णशब्ददर्शनात् ॥

गीर्देवी, स्त्री, (गीर्वाणी तस्या देवी । वागधिष्ठातृदेवतात्वात् ।) सरस्वती । इति शब्दरत्नावली ॥

गीर्लता, स्त्री, (गीरिव तन्वी वाक्यवत् विस्तारा च लता ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥

गी(र्वा)र्व्वाणः, पुं, (गीर्वाणी बाणोऽस्त्रं यस्य । अस्य देवैरस्त्रवत् प्रयोगात् । अन्यार्थकार ... शास्त्रं यस्य ... गाङ्गेयोदयः ... इव ...) "सर्व्व- ... ।" ३ । ४ । १ । इत्यमरः । "पूर्व्वदेवात्

संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।)
देवता । इत्यमरः । १ । १ । ८ । (यथा, भागवते । ८ । १५ । ३२ ।
"एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना ।
हित्वा त्रिविष्टपं जग्मुर्गी(र्व्वा)र्व्वाणाः कामरूपिणः ॥")

गी(र्व्वा)र्व्वाणकुसुमं, क्ली, (गी(र्व्वा)र्व्वाणप्रियं कुसुमं पुष्पं यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥

गीष्पतिः, पुं, (गिरां पतिः । अहरादीनामिति वैभाषिकपक्षे "इदुदुपधस्येति ।" ८ । ३ । ४१ । इति षः । मुग्धबोधमते "स्रपि वा ।" इति सूत्रस्य भाविको विधिः ।) बृहस्पतिः । इत्यमरः । १ । १ । २४ ॥ पण्डितः । इति शब्दरत्नावली ॥ अस्य रूपान्तरे गीर्पतिः गीःपतिः । इति मुग्धबोधम् ॥

गु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) ङ, गवते । इति दुर्गादासः ॥

गु, शि ओ विष्ठोत्सर्गे । इति कविकल्पद्रुमः ॥ (तुदां-(कुटां)-परं-अकं-अनिट् ।) शि, गुवति अगुवीत् । ओ, गुनः । इति दुर्गादासः ॥

गुग्गुलः, पुं, (गोजति शब्दायतेऽनेनेति । गुज + क्विप् । गुक् रोगस्तस्मात् गुडति रक्षतीति । गुड + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । डलयोरैक्यात् डस्य लत्वम् ।) गुग्गुलुः । इत्यमरटीकायां भरतः ॥

गुग्गुलुः, पुं, (गुज्यतेऽनेनेति । गुज शब्दे + क्विप् । गुक् रोगस्तस्मात् गुडतीति । गुड रक्षणे + बाहुलकात् कुः । डलयोरैक्यात् डस्य लत्वम् ।) रक्षोभाञ्जनवृक्षः । इति शब्दचन्द्रिका ॥ स्वनामख्यातवृक्षः । स तु गोमूत्रोद्भवः । यथा,—
"गौरीघनाया मङ्गल्याः संजाताः सर्व्वकामिकाः ।
गुग्गुलुस्तु ततो जातो गोमूत्रात् शुभदर्शनः ॥"
इति वह्निपुराणे वैष्णवधर्म्मे शुद्धिरत्ननामाध्यायः ॥
अस्य निर्य्यासः सुगन्धिद्रव्यम् । तत्पर्य्यायः । कुम्भम् २ उलूखलकम् ३ कौशिकः ४ पुरः ५ । इत्यमरः । २ । ४ । १२८ ॥ कुम्भोलुः ६ खलकम् ७ कुम्भोलूखलकम् ८ गुग्गुलः ९ । इति भरतः ॥ जटायुः १० कालनिर्य्यासः ११ देवधूपः १२ सर्व्वसहः १३ महिषाक्षः १४ पलङ्कषा १५ । इति रत्नमाला ॥ यवनद्विष्टः १६ भवाभीष्टः १७ शिवाटकः १८ जटालः १९ पुटः २० भूतहरः २१ शिवः २२ शाम्भवः २३ दुर्गः २४ यातुघ्नः २५ महिषाख्यकः २६ देवेष्टः २७ मरुद्विष्टः २८ रक्षोहा २९ रूक्षगन्धकः ३० दिव्यम् ३१ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफवातकासकृमिवातोदरप्लीहशोथार्शोनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ दीपनत्वम् । सौरत्वम् । कषायत्वम् । मेदःकुष्ठनाशित्वम् । विशदाग्नित्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ शिवद्रवत्वम् । सारकत्वम् । स्वादुत्वम् । पाके कटुत्वम् । भग्नसन्धानकारित्वम् । स्वरत्वम् । सूक्ष्मत्वम् । सर्व्वत्वम् । पिच्छिलत्वम् ।

वलकारित्वम् । व्रणमेहाश्मवातामवातार्त्तिनाशित्वञ्च ॥ ० ॥
"माधुर्य्यात् शमयेद्वातं कषायत्वाच्च पित्तहा ।
तिक्तत्वात् कफजिच्चैव गुग्गुलुः सर्व्वदोषहा ।
स तु पञ्चधा यथा,—
"महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्चजातयः ।
तेषां रूपाणि यथा,—
"भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ।
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥
कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः ।
हिरण्याक्षस्तु हेमाभः पञ्चानां लिङ्गमीरितम् ॥
एषां प्राणिविशेषे प्रयोगो यथा,—
"महिषाक्षमहानीलौ गजेन्द्राणां हिताहितौ ।
हयानां कुमुदः पद्मः स्वस्त्यारोग्यकरौ मतौ ।
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ।
कदाचिन्महिषाक्षस्तु मतः कैश्चिन्नृणामपि ॥"
नूतनगुग्गुलो रूपं यथा,—
"स्निग्धकाञ्चनसङ्काशः पक्वजम्बूफलोपमः ।
नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥"
पुरातनस्य रूपं यथा ।
"शुष्को दुर्गन्धिकश्चैव त्यक्तप्रकृतवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलुर्वीर्य्यवर्ज्जितः ॥"
इति भावप्रकाशः ॥ ० ॥
अस्य स्थानविशेषे श्रेष्ठादिकथनम् । यथा,—
"जायन्ते पुरपारदासवसुविस्रोभिः केवलाः ... पीतानां शिशिरेऽपि गुग्गुलुरसं सर्व्वाणि यत्नात् ।
हेमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमं स्वच्छाभं कुमुदद्युतिश्च विधिना ग्राह्या मतैस्तैः ।
वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति
क्षिप्यन्ति कोष्णसलिले पयसः समानाः ।
ग्राह्याः शुभाः परिहरेच्चिरकालजाता-
नङ्गारवर्णसमधूपविगन्धवर्णान् ॥"
इति प्रयोगामृतम् ।
पञ्चसप्तस्य पूर्णवीर्य्यत्वं मासत्रयपर्य्यन्तं तिष्ठेत् इति परिभाषा ॥

गुच्छः, पुं, (गुध्यति परिवेष्टते इति । गुध "सुसादिभ्यश्छन् ।" इति छन् इति गौराजः । यद्वा, गुड शब्दे + क्विप् । गुडं श्यति नाशयतीति । गुड् + छो + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) स्तवकः । पुष्पादिर थलुया इति भाषा । यथा, गीतगोविन्दे । ११ । ११ । [वर्णनाम् ।")
"अद्योनिचितपद्मनं श्रवणयोस्तापिच्छगुच्छावलीम्" । हस्तादिर गोछा इति भाषा । उद्भिद्विशेषः । स तु मल्लिकादिः । यथा मनुः । १ । ४८ ।
"गुच्छगुल्मन्तु विविधं तथैव तृणजातयः ।"
"मूलत एव यत्र लताः ... न ... काण्डा ... यानि ते गुच्छा मल्लिकादयः ।" इत्यादि कुल्लूकभट्टः ॥) हारभेदः । द्वात्रिंशद्यष्टिकहारः । इत्य-

— —— ———— —

नर द्वार इति भाषा ॥ कलापः । इति मेदिनी । छे । ३ ॥ मयूरेर पाखा इति भाषा । मुक्ताहारः । इति रत्निदेवः ॥

गुच्छकं, क्ली (गुच्छ + संज्ञायां कन् ।) ग्रन्थिपर्णम् । इति भावप्रकाशः ॥

गुच्छकः, पुं, (गुच्छ + स्वार्थे कन् ।) स्तवकः । इत्यमरः । २ । ४ । ३४ ॥ तत्पर्य्यायः । गुलञ्छः २ स्तम्बः ३ कुसुमोच्चयः ४ गुच्छः ५ । इति राजनिर्घण्टः ॥ गुत्सः ६ गुत्सकः ७ । इत्यमरटीकायां भरतः ॥ रीठाकरञ्जः । इति राजनिर्घण्टः ॥ स्वार्थे कप्रत्ययात् गुच्छशब्दार्थोऽप्यत्र ॥

गुच्छकणिशः, पुं, (गुच्छवत् कणिशानि मञ्जर्य्यो यस्य ।) रागीधान्यम् । इति राजनिर्घण्टः ॥

गुच्छकरञ्जः, पुं, (गुच्छः स्तवकः करञ्जफले यस्य ।) करञ्जविशेषः । तत्पर्य्यायः । स्निग्धदलः २ गुच्छपुष्पकः ३ नन्दी ४ गुच्छी ५ सानन्दः ६ दन्तधावनः ७ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । विषवातार्शःकण्डूविचर्च्चिकाकुष्ठसर्व्वत्वग्दोषनाशित्वञ्च ।" इति राजनिर्घण्टः ॥

गुच्छदन्तिका, स्त्री, (गुच्छाः स्तवकीभूता दन्ता इव फलानि यस्याः । कप् टाप् अत इत्वञ्च ।) कदली । इति राजनिर्घण्टः ॥

गुच्छपत्रः, पुं, (गुच्छीभूतानि पत्राणि यस्य ।) तालवृक्षः । इति राजनिर्घण्टः ॥

गुच्छपुष्पः, पुं, (गुच्छीभूतानि पुष्पाणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (अशोकवृक्षः । अस्य पर्य्याया यथा,—
"हेमपुष्पस्त्वशोकश्च गुच्छपुष्पोऽङ्गनाप्रियः ॥"
इति वैद्यकरत्नमालायाम् ॥)

गुच्छपुष्पकः, पुं, (गुच्छपुष्प + संज्ञायां कन् ।) रीठाकरञ्जः । गुच्छकरञ्जः । इति राजनिर्घण्टः ॥

गुच्छपुष्पी, स्त्री,(गुच्छपुष्प + जातौ ङीष् ।) धातकी । शिग्रुडीवृक्षः । इति राजनिर्घण्टः ॥

गुच्छफलः, पुं, (गुच्छीभूतानि फलानि यस्य ।) रीठाकरञ्जः । राजादनी । कतकः । इति राजनिर्घण्टः ॥ (राजादनशब्देऽस्य गुणादयो ज्ञातव्याः ॥

गुच्छफला, स्त्री, (गुच्छीभूतानि फलानि यस्याः । स्त्रियां टाप् ।) अमिदमनी । काकमाची । निष्पावी । द्राक्षा । कदली । इति राजनिर्घण्टः ॥

गुच्छबध्ना, स्त्री, (गुच्छेन बध्यते इति । बन्ध + बाहुलकात् रक् । ततष्टाप् ।) गुन्द्रालाश्वः । इति राजनिर्घण्टः ॥

गुच्छमूलिका, स्त्री, (गुच्छाकृति मूलमस्याः । कप् स्त्रियां टाप् अत इत्वञ्च ।) गुन्द्रामिनालम् । इति राजनिर्घण्टः ॥

गुच्छार्द्धः, पुं, (गुच्छस्य द्वात्रिंशद्यष्टिकहारस्य अर्द्धः । समासार्द्धवत् समासः ।) चतुर्व्विंशति यष्टिको हारः । इत्यमरः । २ । ६ । १०५ ।

(पुंलिङ्गनिर्द्देशादेवास्य तथात्वम् । क्लीवलिङ्गे तु "गुच्छहारोऽर्द्धं समेऽंशके ।" इत्यमरोक्तेः षोडशयष्टिकहारो बोद्धव्य इति तु सुधीभिर्विभाव्यम् ॥)

गुच्छालः, पुं, (गुच्छेन अलति पर्य्याप्नोतीति । अल पर्य्याप्तौ + अच् ।) भूतृणम् । इति राजनिर्घण्टः ॥

गुच्छाह्वकन्दः, पुं, (गुच्छाह्वो गुच्छसंज्ञकः कन्दः ।) गुलञ्छकन्दः । इति राजनिर्घण्टः ॥

गुच्छी, स्त्री, (गुच्छ + जातौ ङीष् ।) गुच्छकरञ्जः । इति राजनिर्घण्टः ॥

गुज, कूजने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पञ्चमस्वरो । गोजति । कूजनमव्यक्तशब्दः । इति दुर्गादासः ॥

गुज, इ कूजने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पञ्चमस्वरी । इ, कर्म्मणि गुञ्ज्यते । कूजनमव्यक्तशब्दः । गुञ्जति भ्रमरः कुञ्जे । इति दुर्गादासः ॥

गुज, शि ध्वनौ । इति कविकल्पद्रुमः ॥ (तुदां-(कुटां)-परं-अकं-सेट् ।) शि, गुजति अगुजीत् जुगोज । इति दुर्गादासः ॥

गुज्जरी, स्त्री, (गुर्ज्जरदेशवासिनां प्रिया । गुर्ज्जर + अण् + स्त्रियां ङीप् । पृषोदरात् रलोपे इस्वाभावे च साधुः ।) रागिणीविशेषः । अस्य ध्यानं यथा, सङ्गीतदर्पणे ।
"श्यामा सुकेशी मलयद्रुमाणां
मृदूल्लसत्पल्लवतल्पयाता ।
श्रुतेः स्वराणां दधती विभागं
तन्त्रीमुखाद्दक्षिणगुज्जरीयम् ॥"
अस्याः कालनियमो यथा,—
"नाटी गौंडी वड़ारी च गुज्जरी देशिरेव च ।
पूर्व्वाह्णे गानमेतेषां निषिद्धमिति तद्विदः ॥"
इति सङ्गीतदामोदरः ॥
मतभेदेन पूर्व्वाह्णेऽपि गीयते ॥ (इयं पुनर्भैरवरागस्य वराङ्गना । हनुमन्मते तु मेघरागस्य । अस्याः स्वरूपं यथा, सङ्गीतदर्पणे ।
"षड्जांशन्यास-षड्भा सम्पूर्णा गुर्ज्जरी मता ।
पौरवी मूर्च्छना यस्यां भङ्गाल्या सह मिश्रिता ॥"
"पौरवीमूर्च्छना यस्याम् ।" इत्यत्र "मध्यमी मूर्च्छनैतस्याम् ।" इति क्वचित् पाठः । सोमेश्वरमते इयं पञ्चमहीना षाड़वा । इयञ्च केनापि कारणेन रागविकारे जाते तत्पापप्रायश्चित्तार्थं प्रायेण गीयते तथाचोक्तम्,—
"लोभात्मोहाच्च ये केचिद् गायन्ति च विरागतः ।
तस्या गुर्ज्जरी तस्य दोषं हन्तीति कथ्यते ॥")

गुञ्जः, पुं, गुञ्जन्ति भ्रमरादयो यत्र गुञ्ज + अधिकरणे घञ् ।) गुच्छः । पुष्पस्तबकः । इति शब्दरत्नावली ॥

गुञ्जकृत्, पुं, (गुञ्जं गुञ्जनं करोतीति । कृ + क्विप् तुक् च ।) भ्रमरः । इति शब्दचन्द्रिका ॥

गुञ्जनं, क्ली, (गुजि कूजने + भावे ल्युट् ।) गुनगुनध्वनिः । भ्रमरादिशब्दः ।
(किमिदं गुञ्जनं मन्दः षट्पदानां मनोहरम् ।

गुञ्जा, स्त्री, (गुञ्जतीति । गुजि + अच् । अस्याः पक्कफलगुच्छे शब्दबाहुल्यात्तथात्वम् ।) लताविशेषः ॥ कुँच इति भाषा ॥ तत्पर्य्यायः । काकचिञ्ची २ कृष्णला ३ । इत्यमरः । २।४।८८॥ साङ्कुष्ठा ४ रक्तिका ५ काकणन्तिका ६ काकादनी ७ काकतिक्ता ८ काकलङ्का ९ शिखण्डिनी १० । इति रत्नमाला ॥ चूड़ामणिः ११ सौम्या १२ शिखण्डी १३ अरुणा १४ ताम्रिका १५ पीतपाकी १६ उच्चटा १७ कृष्णचूड़िका १८ रक्ता १९ कामोजी २० भिल्लभूषणा २१ वन्या २२ श्यामलचूड़ा २३ काकचिञ्चिका २४ । अस्या वीजगुणाः । तीक्ष्णत्वम् । उष्णत्वम् । इति राजनिर्घण्टः ॥ कुष्ठव्रणनाशित्वम् । इति राजवल्लभः ॥ अस्याः शिफागुणः । वान्तिकारित्वम् । शूलविषनाशित्वञ्च । वशकर्म्मणि श्वेता प्रशस्ता । इति राजनिर्घण्टः ॥ * ॥ (इयन्तु श्वेतरक्तभेदेन द्विविधम् । यदुक्तं भावप्रकाशे ।
"श्वेतरक्तप्रभेदेन ज्ञेयं गुञ्जाद्वयं बुधैः ।
गुञ्जाद्वयन्तु केश्यं स्यात् वातपित्तज्वरापहम् ॥
मुखशोषश्रमश्वासतृष्णामदविनाशनम् ।
नेत्रामयहरं वृष्यं बल्यं कण्डूव्रणं हरेत् ॥
कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च ॥"
श्वेतगुञ्जा तु अभिचारकर्म्मणि प्रशस्ता । यथा, नवदुर्गामन्त्राभिचारे ।
"जपित्वा सितगुञ्जानां कुडवं कुलिकोदये ॥"
इत्यादि ॥
गुञ्जाफलन्तु विषप्रायत्वात् कदापि स्वस्थेन भोक्तव्यम् । अस्या विषमयत्वमुक्तं यथा, पञ्चतन्त्रे । ४ । ५८ ।
"अन्तर्व्विषमया ह्येता बहिश्चैव मनोरमाः ।
गुञ्जाफलसमाकाराः स्वभावादेव योषितः ॥")
चतुर्यवपरिमाणम् । रति इति भाषा । (यथा,—
"यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ॥"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥)
चतुर्धान्यपरिमाणम् । इति शुभङ्करः ॥ गोधूमद्वयमानम् । इति राजनिर्घण्टः ॥ (गुञ्जति शब्दायते इति । कर्त्तरि अच् ।) पटहः । (गुञ्जनमिति । गुजि + भावे अप् ।) कलध्वनिः । इति मेदिनी ॥ (गुञ्जन्ति भ्रमरादिभिर्मद्यपायिभिर्वा यत्र + अधिकरणे अप् घञ् वा ।) मदिरागृहम् । इति शब्दरत्नावली ॥ चर्चा । इति त्रिकाण्डशेषः ॥

गुञ्जिका, स्त्री, (गुञ्जा एव । स्वार्थे कन् । अत इत्वम् ।) गुञ्जा । त्रियवपरिमाणम् । इति शब्दचन्द्रिका ॥ (गुञ्जाशब्दे विवरणमस्या ज्ञातव्यम् ॥)

गुञ्जितं, क्ली, (गुञ्ज + भावे क्तः ।) गुञ्जनम् । यथा,
"न गुञ्जितं तन्न जहार यन्मनः ॥"
इति भट्टिः । ५ । १८ ॥

गुटिका, स्त्री, (गुटिरिव । गुटि + स्वार्थे कन् ।) वटिका । गुलि इति वटि इति च भाषा । यथा, "गुटिकामातादिना सद्धनम् ।" इति रायमारः ॥

गुड, इ क बेष्टे। इति कविकल्पद्रुमः। (तुदां-परं-सकं-सेट्।) इषते। इ क, गुण्डति गुण्डनं। इति दुर्गादासः।

गुड, इ क रेहे। रक्षे। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) ... इ क, गुण्डति। ... इति दुर्गादासः।

गुड, ङि रक्षे। भ्रवनते। इति कविकल्पद्रुमः। (तुदां-(कुटां) परं-सकं-सेट्।) ङि, गुडति ... इति दुर्गादासः।

गुडः, पुं (गुडति ... करोतीति। गुड + "इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः ...) ... इति मेदिनी। ... इति हेमचन्द्रः। ... इति शब्दचन्द्रिका। ... अमरः। २।४।२१। [illegible]

[illegible]

कामे क्षीणे चनक्षीणे पाण्डुरोगेऽरुचि चाये।
हितो योगेन संयुक्तो गुडः पथ्यतमो मतः॥
गुदामये कामलयोमेहे
गुल्मामये पाण्डुहलीमके च।
वाते सपित्ताऽर्त्ति रक्तरोगे
सन्निपाते रोगहरो गुडः स्यात्॥
कासे शोथे गुडो नेष्टः अन्यत्रापि हितो मतः।
योगयुक्तोऽपि सर्वत्र हितो गुडगणो नयः॥
कामक्षीणे पवनकुपिते श्वासकासातुराणां
अश्मर्यामश्मसंहृते मलकृच्छ्रासरोगाम्।
जीर्णे चामज्वरविषमगे रक्तपित्तप्रकोपे
ह्यपामादाहप्रथहरौ सर्वरोगान्निहन्ति॥"
इति गुडगुणाः।
इति हारीते प्रथमस्थानेऽष्टमोऽध्यायः॥८॥

गुडकः, पुं, (गुडेन पक्वः। गुड + बाहुलकात् कः। यद्वा, गुडेन कायतीति। कै + कः।) गुडद्वारा पक्वौषधविशेषः। अस्य पूर्णतेन, अर्धमात्र पर्यन्तं तिष्ठति। इति परिभाषा। (गुड एव। स्वार्थे कन्। गोलाकृतिः। यथा, महाभारते। ६।११।८।
"मधुगुडकाश्मगुडका सायुधा सपरश्वधा।"
"आमगुडका वर्तुलीकृताः पाषाणाः।" इति तट्टीकायां नीलकण्ठः।)

गुडकरी, स्त्री, (गुडं गुडवत्सुमिष्टं पुनिसुरकार-मिश्रं करोतीति। गुड + कृ + "कृञो हेतु-ताच्छील्यानुलोम्येषु।" ३।२।२०। इति टः स्त्रियां ङीप्।) रागिणीविशेषः। इति हलायुधः।

गुडची, स्त्री, (चि + क्विप् निपातनाद्दीर्घत्वे साधुः। गुडवत् ची चयनं ... यस्या इत्यर्थः। अमृतोद्भवत्वादिति ...) गुडूची। इत्यमरटीकायां भरतः। (अस्या उत्पत्तिकथा अमृतहरणवत् गुडूचीशब्दे द्रष्टव्यम्।)

गुडतृणं, क्ली, (गुडप्रधानं गुडकारणं वा तृणम्।) इक्षुः। इति राजनिर्घण्टः।

गुडत्वक्, क्ली, (गुडप्रधानं त्वक्। निपातनात् साधुः।) गुडत्वचम्। इक्षुः। इति शब्दरत्नावली।

गुडत्वच, [च] क्ली, (गुडवत् मधुरा त्वगस्य।) ... पर्यायः। ... १ ... २ ... ३ वरालकम् ४ ... ५ ... ७ ... ८ ... ९ ... १०। इति शब्दरत्नावली। ... ११ ... १२। इत्यमरः। २।४।१३३। ... १३ ... १४ इति ... अस्य गुणाः। ... इति राजवल्लभः। ... इति ... [illegible]

[illegible]

गुडदारु, क्ली, (गुडप्रधानं गुडकारणं वा दारु। ...) इक्षुः। इति त्रिकाण्डशेषः।

गुडधेनुः, स्त्री, (गुडनिर्मिता गुडभारादिभिः ... धेनुः।) गुडादिनिर्मिता धेनुः। यथा,—
"गुडधेनुविधानस्य यद्रूपमिह यत् फलम्।
तदिदानीं प्रवक्ष्यामि सर्वपापविनाशनम्॥
कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि।
गोमयेनानुलिप्तायां दर्भानास्तीर्य सर्वतः॥
लघ्वेणकाजिनं तद्वत् वत्सस्य परिकल्पयेत्।
उदङ्मुखीं कल्पयेद्धेनुं सदोषामथ सवत्सकाम्॥
उत्तमा गुडधेनुः स्यात् सदा भारचतुष्टयैः।
वत्सं भारेण वा कार्या भाराभ्यां मध्यमा स्मृता।
अर्द्धभारेण वत्सः स्यात् कनिष्ठा भारकेण तु।
चतुर्थांशेन वत्सः स्यात् गृहवित्तानुसारतः॥
धेनुवत्सौ तदा तौ तु सितसूक्ष्माम्बरावृतौ।
शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ॥
सितसूत्रशिरालौ तु सितकम्बलकम्बलौ।
ताम्रगुडकपृष्ठौ तु सितचामररोमकौ॥
विद्रुमभ्रूयुगलसौ नवनीतस्तनान्वितौ।
क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ॥
इत्येवं रचयित्वा तु धूपदीपैः समर्चयेत्।
सर्वासां धेनूनामेवं विधानं ज्ञेयम्।" इति म-त्स्यपुराणम्।

गुडपुष्पः, पुं, (गुड इव मधुरं पुष्पमस्य।) मधू-कवृक्षः। इत्यमरः। २।४।२७।

गुडफलः, पुं, (गुड इव मधुरं फलमस्य।) पीलु-वृक्षः। इत्यमरः। २।४।२८।

गुडबीजः, पुं, (गुडवत् मधुरं यद्वा, गुडं मधुरं हन्ति बीजं यस्य।) मसूरः। इति राज-निर्घण्टः।

गुडभा, स्त्री, (गुडवत् भाति शोभते इति। भा + कः। स्त्रियां टाप्।) यावनालशर्करा। इति राजनिर्घण्टः।

गुडमूलः, पुं, (गुडवत् सुमिष्टं मूलं यस्य।) आम्रातकवृक्षः। इति शब्दचन्द्रिका।

गुडलं, क्ली, (गुडं उत्पत्तिकारकत्वेन लातीति। ला + कः।) गौडी मदिरा। इति शब्द-चन्द्रिका।

गुडशर्करा, स्त्री, (गुडजाता शर्करा।) शर्करा-भेदः पर्यायः। सितादा ... इति त्रिकाण्डशेषः।
(यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये।—
"विदारी त्रिफला भीरु मञ्जिष्ठा गुडशर्करा")

गुडशिग्रुः, पुं (गुड इव रसवत्वात् शिग्रुः ...) ... भिन्नः। इति शब्दचन्द्रिका।

गुडा, स्त्री, (गुड + स्त्रियां टाप्।) स्नुही ... गुडिका। इति मेदिनी। ... इति रा-निर्घण्टः।

गुडाका, स्त्री, (गुडवति ...) ... [illegible]

नाशी ॥ (कफनाशक । इति आयुर्वेदप्रकाश-मतम् ॥)

गुडाकेशः, पुं, (गुडाका निद्रा तस्या ईशः जेता । ईशः ।) शिवः । (गुडा त्रिवा स्थामानः इन्द्रियाणि वा यस्य ईशः । यद्वा निद्राजयी जितेन्द्रियो वा ।) अर्ज्जुनः । इति जटाधरः ॥ (यथा, गीतायाम् । १ । २४ ।

"एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।")

गुडाम्लः, पुं, (गाढेनाम्लिरिति । आम्रो यथा आम्लः । ततो गुडमिव मधुरमम्लञ्च फलमस्य ।) आम्रोटकः । इति राजनिर्घण्टः ॥

गुडिका, स्त्री, (गुडः वर्त्तुलाकृतिः । स्वार्थे कन् । टापि अत इत्वम् ।) गुटिका । इत्यमरटीका । यथा, वैद्यकपरिभाषा ॥

"वटिका गुटिका चेति संज्ञाभाष्यैरुदीरिता: ।"

("सूर्य्यांशैर्गुडिका कार्य्या चन्द्रकान्तामणिप्रभम् ।
तालमिश्रमपोह्यैव छिद्रयन्त्रमपास्य च ॥
इति शार्ङ्गधरे मध्यखण्डे षष्ठेऽध्याये ॥)

गुडूची, स्त्री, (गुडूची + निपातनादूलोपः ।) गुडूची । इति द्विरूपकोषः ॥

गुडूची, स्त्री, लताविशेषः । गुलच इति भाषा । तत्पर्य्यायः । मधुपर्णी २ छिन्नरुहा ३ तन्त्रिका ४ अमृता ५ जीवन्तिका ६ सोमवल्ली ७ विशल्या ८ मधुपर्णी ९ । इत्यमरः ॥ गुडूची १० । इति भरतः ॥ कुण्डली ११ चक्रलक्षणा १२ । इति रत्नमाला ॥ अमृतवल्ली १३ ज्वरारिः १४ श्यामा १५ वरा १६ गुरहला १७ मधुपर्णिका १८ छिन्नोद्भवा १९ अमृतलता २० रसायनी २१ छिन्ना २२ सोमवल्लिका २३ भिषक्प्रिया २४ कुण्डलिनी २५ वयःस्था २६ नागकुमारिका २७ छिद्रिका २८ चन्द्रहासा २९ । इति राजनिर्घण्टः ॥ अमृतवल्ली ३० सुधा ३१ जीवन्ती ३२ सोमा ३३ चक्रलक्षिका ३४ वयस्था ३५ मण्डली ३६ देवनिर्मिता ३७ । अस्या गुणाः । कटुत्वम् । स्वादुपाकित्वम् । रसायनत्वम् । संग्राहित्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । बल्यत्वम् । अग्निदीपनत्वम् । दोषत्रयामतृड्दाहमेहकासपाण्डुकामलाकुष्ठवातास्रज्वरकृमिवमिनाशित्वञ्च । इति भावप्रकाशः ॥ गुरुत्वम् । वीर्य्यदाढ्यत्वम् । भ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ रक्तपित्तनाशित्वम् । इति राजवल्लभः ॥ अस्याः सत्त्वस्य गुणाः । पथ्यत्वम् । सर्व्वज्वरहरत्वम् । लघुत्वम् । कषायत्वम् । कटुत्वम् । स्वादुपाकित्वम् । रसायनत्वम् । बलकारित्वम् । उष्णत्वम् । संग्राहित्वम् । त्रिदोषतृष्णादाहप्रमेहवातासृक्कामलाकुष्ठपाण्डुनाशित्वञ्च । इति भावप्रकाशः ॥ घृतयुक्ताया वातनाशित्वम् । गुड़युक्तायाः पित्तनाशित्वम् । मधुयुक्तायाः कफनाशित्वम् । एरण्डतैलयुक्ताया उग्रवातास्रनाशित्वम् । शुण्ठीयुक्ताया आमवातनाशित्वम् । इति राजवल्लभः ॥ * ॥

अस्या उत्पत्तिर्यथा,—

"[illegible] रामेण रावणो राक्षसाधिपः ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] तस्मिन् सुरराजो [illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
ततो येषु च देशेषु कपिगात्रात् परिच्युताः ।
पीयूषबिन्दवः पेतुस्तेभ्यो जाता गुडूचिका ॥"

इति भावप्रकाशः ॥

(गुडूचीदलम् । यथा,—

"गुडूचीपत्रशाकाभ्यां मधुरं घृतमुत्तमम् ।
हन्ति वातं तथा रक्तकुष्ठं जयति दुस्तरम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे वातरक्ताधिकारे ॥)

गुडेरः, पुं, (गुडति रक्षतीति गुड रक्षायाम् + "मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य किरच् ।" उणां । १ । ५८ । इति किरच् । गुडेरः । इति उज्ज्वलदत्तः ।) ग्रासः । कवलविशेषः ॥ गुडेरः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गुडेरकः, पुं, (गुडेर + स्वार्थे कन् ।) ग्रासः । इति हेमचन्द्रः । ३ । ५८ ॥

गुडोद्भवा, स्त्री, (गुडादुद्भवो यस्याः । यद्वा, उद्भवत्यस्मादिति उद्भवः । गुड उद्भवो उत्पत्तिकारणं यस्याः ।) शर्करा । इति राजनिर्घण्टः ॥

गुण, ग क मन्त्रणे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) ह्रस्वी । गर्ह्योपधः । गुणयति । इति दुर्गादासः ॥

गुणः, पुं, (गुण्यते मन्त्र्यते मन्त्रज्ञैरभिधीयते शास्त्रैरिति वा । गुण मन्त्रणे + घञ् ।) षट्प्रकारराजनीतिविशेषः । तद्यथा । सन्धिः १ विग्रहः २ यानम् ३ आसनम् ४ द्वैधम् ५ आश्रयः ६ ॥ (यथा, मनुः । ७ । १६० ।

"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥"

एतेषु षड्गुणेषु नीतिविदा राज्ञा कदा केनोपायेन च प्रयोक्तव्यमित्यादिविस्तरणादिकन्तु तत्रैव । ७ । १६१ । श्लोकमारभ्य द्रष्टव्यम् ॥) धनुराकर्षरज्जुः । छिला इति भाषा । (यथा, रघुवंशे । ९ । ५४ ।

"अथ नभस्य इव त्रिदशायुधं
कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोषितकेशरी ॥")

तत्पर्य्यायः । मौर्व्वी २ ज्या ३ शिञ्जिनी ४ शिञ्जा ५ ज्यावा ६ पतञ्चिका ७ । इति शब्दरत्नावली ॥ जीवा ८ । इति जटाधरः ॥ रज्जुः । (यथाह कश्चित् ।

"गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि ।
सगुणोऽपि पूर्णकुम्भो यथा कूपे निमज्जति ॥")

सत्त्वम् । यथा, आर्य्यासप्तशत्याम् । ३९९ ।

"पाशीकृत इव गलितः क्षिप्तो रजसा तमो
स्फुरति ॥")

सत्त्वरजस्तमांसि । (यथा, भागवते । १ । २ । २३ ।

"सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥")

रूपरसगन्धस्पर्शादि । इत्यमरः ॥ स तु शौर्य्यादिरूपरसादिश्च । इत्यमरः । ३ । ३ । २६ ॥ तस्य लक्षणं यथा,—

"सत्त्वे निविश्यतेऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥"

इति मुग्धबोधम् ॥

(अस्यार्थमाह दुर्गादासः ।

"यः सत्त्वे द्रव्ये निविश्यते तदेकवृत्तितया वर्त्तते तस्मात् सत्त्वादपैत्यपगच्छति च । यथा श्यामता पूर्व्वमाम्रादिफलेषु वर्त्तते पश्चात् पक्वावस्थायां ततोऽपैति । पृथग्जातिषु दृश्यते भिन्नेषु पदार्थेषु दृश्यते । यथा आम्रादिफले या श्यामता दृष्टा सा कदलीफलादिषु च दृश्यते स गुणः स्यादित्यर्थः । ननु तर्हि उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्म्माणि तान्यपि सत्त्वेऽपि गुणत्वापत्तिः यदा द्रव्यं गतियं भवति तदा कर्म्म तस्मिन् निविशते यदा द्रव्यं निश्चेष्टं भवति तदा कर्म्म तस्मादपैति पृथग्जातिषु च दृश्यते यथा मनुष्येषु गमनादिक्रिया दृश्यते तथा पश्वादिषु च दृश्यते अतः कर्म्मणो गुणत्वमपाकर्त्तुमाह आधेयश्चाक्रियाजश्चेति । आधेय उत्पाद्यः यथा मृद्घटपात्रेषु रक्तत्वगुणः अपि वह्निसंयोगादिना निष्पाद्यते । अक्रियाजश्चेति । क्रियाया जायते । इति क्रियाजः । न क्रियाजोऽक्रियाजः नित्य इत्यर्थः । आकाशादिषु महत्त्वादिगुणः । ततश्च गुणस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्च इति प्रकारद्वयदर्शनतया कर्म्मणो गुणत्वं न स्यादिति ज्ञापितम् कर्म्मत्वं सर्व्वमेव उत्पाद्यमिति । एवञ्चेत्तर्हि द्रव्यमपि गुणोऽस्तु तत्रापि ह्येते धर्म्मा वर्त्तन्ते । यथा तदपि द्रव्यमारम्भके अवयवद्रव्ये निविशते ततोऽपैति च यथा शरीरमवयवि तद्धि मस्तकादिष्ववयवेषु समवेतं भवतीति तद्विनाशात् ततोऽपैति । पृथग्जातिषु पश्वादिषु च दृश्यते एवं द्रव्यस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्चास्ति अवयवि द्रव्यस्य उत्पाद्यत्वात् आकाशादेस्तु अनुत्पाद्यत्वादिति । अत आह असत्त्वप्रकृतिरिति । सत्त्वं द्रव्यं प्रकृतिःस्वभावः । सत्त्वं प्रकृतिर्यस्य स सत्त्वप्रकृतिः । न सत्त्वप्रकृतिरसत्त्वप्रकृतिः ॥") विशेषाधानहेतुः सिद्धो वस्तुधर्म्मः । शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्तीति साहित्यदर्पणम् ॥

अपि च ।

[illegible] तदर्थः
तद्यथा । रूपम् १ [illegible] स्पर्शः ४

संख्या ५ परिमाणम् ६ पृथक्त्वम् ७ संयोगः ८ विभागः ९ परत्वम् १० अपरत्वम् ११ बुद्धिः १२ सुखम् १३ दुःखम् १४ इच्छा १५ द्वेषः १६ यत्नः १७ गुरुत्वम् १८ द्रवत्वम् १९ स्नेहः २० संस्कारः २१ धर्म्मः २२ अधर्म्मः २३ शब्दः २४ । इति भाषापरिच्छेदः ॥ (सात्त्विकनायकगुणा यथा, साहित्यदर्पणे । ३ । ५८ ।
"शोभाविलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी । ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥"
एतेषां विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम् ॥) अप्रधानम् । सूदः । इन्द्रियम् । त्यागः । वटी । इति मेदिनी ॥ णे । १० ॥ भीमसेनः । तन्तुः । दोषान्यविशेषणम् । इति हेमचन्द्रः ॥ विद्यादि । इति विश्वः ॥ (अङ्गम् । यथा, मनुः । ३ । २२६ ।
"गुणांश्च सूपशाकाद्यान् पयोदधिघृतं मधु । विन्यसेत् प्रयतः सम्यक् भूमावेव समाहितः ॥"
"गुणान् व्यञ्जनानि अन्नापेक्षयाऽप्राधान्यात् गुणभूतान् वा ।" इति तट्टीकायां कुल्लूकभट्टः ॥ आवृत्तिः । यथा, महाभारते ।
"आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा । षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥")
व्याकरणोक्तसंज्ञाविशेषः । यथा । अदेङ्गुणः । अस्यार्थः । इ उ ऋ ऌ एषां स्थाने अ ए ओ अर् अल् एते गुणसंज्ञा भवन्ति । इति मुग्धबोधम् । काव्यगुणस्य लक्षणं यथा,—
ये रसस्याङ्गिनो धर्म्माः शौर्य्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥
इति काव्यप्रकाशः ॥
तस्य भेदाः ।
श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ॥
इति दण्डी ॥
माधुर्य्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश ॥
तस्य दशसंख्याभावे हेतुर्यथा —
केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥
इति भरतमुनिः । षड्गुणविशेषा उपधान-दयो द्रष्टव्याः ॥

गुणकः, पुं, (गुणयति आवर्त्तयतीति । गुण + ण्वुल् ।) पूरणाङ्कविशेषः । यथा, गुण्यान्त्यमङ्कं गुणकेन हन्यात् । इति लीलावती ॥

गुणकारः, पुं, (गुणं सूपादिकं पाकविशेषं वा करोतीति । कृ + अण् । विराटनगरे छद्मवेशेन सूपकारादिरूपेण पाकशास्त्र-ज्ञत्वेन प्रसिद्धत्वात् तथात्वम् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ (विराटनगरेऽस्य सूपकारत्व-प्रतिज्ञा यथा, महाभारते । ४ । २ । १—२ ।
भीम उवाच ।
"पौरोगवो ब्रुवाणोऽहं बल्लवो नाम नामतः । उपस्थास्यामि राजानं विराटमिति मे मतिः ॥ सूपानस्य करिष्यामि कुशलोऽस्मि महानसे ।
कृतपूर्व्वाणि यैरस्य व्यञ्जनानि सुशिक्षितैः ॥ तानप्यभिभविष्यामि प्रीतिं सञ्जनयन्नहम् । आहरिष्यामि दारूणां निचयान्महतोऽपि च ॥ तत् प्रेक्ष्य विपुलं कर्म्म राजा प्रीतो भविष्यति । अमानुषाणि कुर्व्वाणं तानि कर्म्माणि भारत ! ॥ राजकस्य परिप्रेष्या मंस्यन्ते मां यथा नृपम् । भक्ष्यान्नरसपानानां भविष्यामि तथेश्वरः ॥") पाचके गुणकारके च त्रि ।

गुणज्ञः, त्रि, (गुणं जानातीति । गुण + ज्ञा + कः ।) गुणवेत्ता । यथा,—
गुणिनि गुणज्ञो रमते नागुण-
शीलस्य गुणिनि परितोषः ।
अलिरेति वनात् कमलं
न हि भेकस्त्वेकवासोऽपि ॥
इत्युद्भटः ॥

गुणनिका, स्त्री, (गुण्यते पुनःपुनरावर्त्त्यतेति । गुण क आम्रेडने + "गत्यासक्ष्यो युच् ।" ३ । ३ । १०७ । इति युच् । संज्ञायां कन् कापि अत इत्वञ्च ।) नृत्यम् । शून्याङ्कम् । पाठनिश्चयः । इति मेदिनी । के १८५ । (शास्त्रादीनां पुनःपुनरनुशीलनम् । यथा, माघे । २ । ७५ ।
"हेतुःपरिचयस्थैर्य्ये वक्तुर्गुणनिकैव सा ॥"
माला । इत्यानन्दलहरीटीका ॥ (यथा, आनन्दलहर्य्याम् । ३ ।
"दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती ॥")

गुणनी, स्त्री, (गण्यते पुनःपुनरनुशील्यतेऽनया । गुण + ल्युट् + ङीप् ।) पाठनिश्चयः । तत्पर्य्यायः । भणिती २ शीलनम् ३ । इति त्रिकाण्डशेषः ॥

गुणनीयः, पुं (गुण्यते पुनःपुनरनुशील्यतेऽनेन इति । गुण आम्रेडने + करणे अनीयर् ।) शास्त्राद्भ्यासः । इति हारावली । १५० । (कर्म्मणि अनीयर् । गुणितव्ये त्रि ॥)

गुणभ्रंशः, पुं, (गुणस्य भ्रंशो विनाशः ।) गुणनाशः । तत्पर्य्यायः पर्य्यन्तिका २ । इति हारावली ॥ २१० ॥

गुणलयनिका, स्त्री, (गुणा गुणनिर्म्मिताः पटाः लीयन्ते अस्याम् । गुण + ली + अधिकरणे + ल्युट् । स्त्रियां ङीप् कन् टापि पूर्व्वह्रस्वश्च ।) वस्त्रनिर्म्मितगृहम् । तत्पर्य्यायः केणिका २ पटकुटी ३ । इति हेमचन्द्रः । ३ । ३४६ ॥

गुणलयनी, स्त्री, (गुणा गुणमयपटाः लीयन्ते यत्र । ली + ल्युट् + ङीप् ।) गुणलयनिका । इति हलायुधः ॥

गुणवान्, [त्] पुं, त्रि, (गुणोऽतिशयितोऽस्य । गुण + मतुप् मस्य वत्वम् ।) समर्थः । इति त्रिकाण्डशेषः ॥ गुणविशिष्टः । यथा, "दाता दयालुर्गुणवानदोषः स्यात् नरो परेषामुपकारकर्त्ता ।" इति कोष्ठीप्रदीपः ॥ (पुं, यदुवंशीय सुनाभस्य दौहित्रः । यथा, हरिवंशे । १५५ ।
"गुणवत्यपि पुत्रश्च गुणवन्तमसौजनत् ॥"
स्त्रियां ङीप् । तस्य सुनाभस्य दुहिता । तत्रैव । १५३ ।
"वज्रनाभस्य तनयः सुनाभो नाम विश्रुतः । दुहितृद्वयञ्च नृपते ! तस्य रूपगुणान्वितम् । एका चन्द्रवती नाम्ना गुणवत्यपरा ॥"
गायत्रीरूपा महादेवी । यथा, देवीभागवते १२ । ६ । १२ ।
"गुहावासा गुणवती गुणपापप्रणाशिनी ।"
गङ्गा । यथा, काशीखण्डे । २९ । ५३ ।
"गूढरूपा गुणवती गुर्व्वी गौरववर्द्धिनी ।"
अप्सरोविशेषः । यथा, तत्रैव ९ अध्याये ।
"अलम्बुषा गुणवती स्थूलकेशी कलावती ।"

गुणवृक्षकः, पुं, (गुणानां रज्जूनां वृक्ष इव । ततः स्वार्थे कन् ।) नौकागुणबन्धनार्थ मास्तुल इति भाषा । तत्पर्य्यायः । कूपकः इत्यमरः । १ । १० । १२ ।

गुणसागरः, पुं, (गुणानां सागर इव स्थानम् ।) ब्रह्मा । इति शब्दरत्नावली । विशेषः । इति त्रिकाण्डशेषः । सर्व्वगुणाधारश्च ॥

गुणा, स्त्री, (गुणाः सूक्ष्मतन्तवः सन्त्यस्याः । अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् । स्त्रियां टाप् ।) दूर्व्वा । मांसरोहिणी । राजनिर्घण्टः ॥

गुणाकरः, पुं, (गुणानामाकर इव । गुणाढ्यत्वात् तथात्वम् ।) बुद्धः । इति शब्दरत्नावली । (महादेवः । यथा, महाभारते । १३ । १७ ।
"गणहा दैत्यहा कालो लोकधाता गुणाकरः ।"
गुणयुक्ते त्रि । यथा,—
"तमश्वपतिरास्थाय तस्य पुत्रो गुणाकरः । सत्यवान् नाम देवर्षे ! मनसा सम्मतो मम ॥"
इति वनपर्व्वणि सावित्र्युपाख्याने ॥

गुणितः, त्रि, (गुण्यते स्म । गुण आम्रेडने + क्त ।) पूरितः । तत्पर्य्यायः । आहतः २ । इत्यमरः । ३ । १ । ८८ । यथा । पञ्चधा गुणिता हारसंख्या षड्भिर्भवतीत्यादि इति भरतः ॥ (गुणोऽस्य जातः । तारकादिभ्य इतच् ।) गुणि इति शब्दरत्नावली ॥

गुणी, [न्] पुं, (गुणो ज्या विद्यतेऽस्य । गुण + इनिः ।) धनुः । इति त्रिकाण्डशेषः ॥ (तु दातिगुणादयो विद्यन्तेऽस्येति ।) त्रि । यथा । गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद्यस्य । तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम ॥ इति हितोपदेशः ॥

गुणीभूतः, त्रि, (अगुणो गुणीभूतः । गुण + च्वि + भू + क्तः । अभूततद्भावे च्वि ।) अप्रधानीभूतः । यथा । कृतपूर्व्वीकटमित्यत्र समासविधिर्गुणीभूतादिशेषबोधिका द्वितीया नोक्ता । शुक्लकविराजः ॥ (यथाच महाभारते । १५ । ११ ।
"सर्व्वैरपि गुणैर्युक्तो निर्गुणस्य किं करिष्यति । गुणीभूता गुणाः सर्व्वे तिष्ठन्ति हि पराङ्मुखाः ।

भूतव्यङ्ग्यः, पुं, (गुणीभूतमप्रधानीभूतं व्यङ्ग्यं व्यञ्जना शक्तिर्यत्र ।) काव्यविशेषः । यथा,—
'अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ॥'
तस्याष्टौ भेदाः यथा ।
'अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदा मताः ॥'॥
अगूढं यथा ।
स्फुटतया वाच्यायमानमिति अपराङ्गम् । यथा अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्य अङ्गं रसादि अनुरणनरूपं वा ॥ * ॥
वाच्यसिद्ध्यङ्गं यथा ।
आपाततः प्रतीतस्य वाच्यार्थस्य प्रतिसन्धीयमानानुपपत्तिनिरासकं व्यङ्ग्यम् ॥ * ॥
अस्फुटं यथा ।
विदग्धैरपि क्लेशगम्यं सन्दिग्धप्राधान्यं यथा प्राधान्यमत्र रसादिव्यञ्जकत्वेन तथा च प्रतीतस्य रसादेर्व्यञ्जकं किं वाच्यं किंवा व्यङ्ग्यमितौ-त्तरकालिकसन्देहविषयत्वं तत्त्वम् ॥ * ॥
तुल्यप्राधान्यं यथा ।
अत्रापि रसादिव्यञ्जकत्वेनैव प्राधान्यं व्यङ्ग्यस्य निश्चितत्वेन तेन तेन साम्येन तुल्यार्थो बोध्यः ॥ * ॥
काक्वाक्षिप्तं यथा ।
आक्षिप्तमत्र प्रागेव पदार्थविधया उपस्थानम् ॥ * ॥
असुन्दरं यथा ।
"रसादिव्यञ्जने वाच्यमुखनिरीक्षकं व्यङ्ग्यम् ।"
इति काव्यप्रकाशः ॥
(इत्यत्र साहित्यदर्पणकारेण काव्यभेदमाश्रित्य यदुक्तं तद्यथा । ४ । १ ।
"काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यञ्चेति द्विधा मतम् ।
वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ॥"
तत्रैव च । ४ । १६ ।
"अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये ।
"अपरं काव्यम् । अनुत्तमत्वं न्यूनतया साम्येन च सम्भवति ॥" ततस्तत्र स्यादितराङ्गं काक्वाक्षिप्त-ञ्चेत्यादयो भेदास्तत्र इतरस्य रसादेरङ्गं रसादि-व्यङ्ग्यं यथेत्यभिधाय क्रमश इतराङ्गादेरुदाहरणानि प्रदर्शितानि । यथा,—
"अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥
अत्र शृङ्गारः करुणस्याङ्गम् ।
"मानोन्नतां प्रणयिनीमनुनेतुकाम-
स्त्वत्सैन्यसागररवोद्गतकर्णतापः ।
हा ! हा ! कथं नु भवतो रिपुराजधानी-
प्रासादसन्ततिषु तिष्ठति कामिलोकः ॥
अत्रौत्सुक्यत्रासमन्धिसंस्कृतस्य करुणस्य राजविषयरतावङ्गभावः ।
जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृता लङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥"
अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्त्यैव

रामत्वमवगम्यते । वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्व्वता तद्गोपनमपाकृतम् । तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम् । काक्वाक्षिप्तं यथा,—
मथ्नामि कौरवशतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥
अत्र 'मथ्नाम्येवेत्यादि' व्यङ्ग्यं वाच्यस्य निषेधस्य सह भावेनैव स्थितम् ।
दीपयन् रोदसीरन्ध्रमेष ज्वलति सर्व्वतः ।
प्रतापस्तव राजेन्द्र ! वैरिवंशदवानलः ॥
अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्यः । प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम् । 'हरस्तु किञ्चित् परिवृत्तधैर्य्य इत्यादौ' विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः ।
ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्म्मनायते ॥
अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।
सन्धौ सर्व्वस्वहरणं विग्रहे प्राणनिग्रहः ।
अल्लावदीननृपतौ न सन्धिर्न च विग्रहः ॥
अत्र अल्लावदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपायः व्यङ्ग्यं चुतमत्रानामपि झटिति-स्फुटम् ।
अनेन लोकगुरुणा सतां धर्म्मोपदेशिना ।
अहं व्रतवती स्वैरमुक्तेन किमतः परम् ॥
अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्य्यक् योषिति बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढम् ।
वाणीरकुडङ्गुड्डीणसउणिकोलाहलं
सुणन्तीए ।
घरकम्मवावुडाए वहूए सीअन्ति अङ्गाइं ॥"
अत्र दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्ट इति व्यङ्ग्यात् 'सीदन्त्यङ्गानि' इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरं किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव । काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् । तदुक्तं ध्वनिकृता ।
अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः ॥
यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यासः । यथा,—
दृष्ट्या केशवगोपरागहृतया किञ्चिन्न दृष्टं मया
तेनात्र स्खलितास्मि नाथ ! पतितां किं नाम
नालम्बसे ?
एकस्त्वं विषमेषु खिन्नमनसां सर्व्वाबलानां गति-
र्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम् ॥"
अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां 'सलेशमिति' पदेन स्फुटतयावभासः । सलेशमिति पदस्य परित्यागे ध्वनिरेव ।

किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः तत्र प्रधानकृत एव काव्यव्यवहारः । तदुक्तं तेनैव ।
प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्य्यालोचनया पुनरिति ॥
यत्र च ।
यत्रोन्मदानां प्रमदाजनाना-
मभ्रंलिहः शोणमणीमयूखैः ।
सन्ध्याभ्रमं प्राप्नुवता मकाण्डे-
ऽप्यनङ्गनेपथ्यविधिं व्यधत्त ॥
इत्यादौ रसादीनां नगरीवृत्तादि वस्तुमात्रेऽङ्गत्वम् । तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः । तदुक्तमस्मत्सगोत्र-कविपण्डितमुख्यश्रीचण्डिदासपादैः । काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशस्तस्यास्वादमात्रायत्तत्वादिति ॥")
गुणेश्वरः, पुं (गुणैर्हेतुभिरीश्वरः श्रेष्ठः पूज्य इत्यर्थः । विविधगुणशालिद्रव्यजातोत्पादकत्वयास्य तथात्वम् ।) चित्रकूटपर्व्वतः । इति शब्दरत्नावली ॥
गुणपतौ त्रि ॥ (गुणानां नानाविधपुरुषोपयोगिगुणानां ईश्वरः प्रभुः स्वामी वा शान्तदान्तादि गुणशाली पुरुष इत्यर्थः । गुणानां सत्त्वरजस्तमसां त्रयाणां मायागुणानामिति यावत् ईश्वरः नियन्ता । परमेश्वरः ॥)
गुणोत्कर्षः, पुं, (गुणानां उत्कर्षः उत्कर्षेण प्राधान्यमित्यर्थः ।) गुणप्राधान्यम् । (यथा, गोः रामायणे । १ । २५ । १६ ।
"स्वभावजैर्गुणैर्दिव्यैः कामजैर्वृत्तिभिर्वृतः ।
भूयस्तव गुणोत्कर्षमेते विद्धि करिष्यतः ॥")
अतिशयः । तत्पर्य्यायः । परभागः २ । इति हेमचन्द्रः । ६ । ११ ॥
गुणोत्कीर्त्तनं, क्ली, (गुणानां उत्कीर्त्तनं कथनम् ।) यद्वा गुणैर्गुणसूचकवाक्यैरुत्कीर्त्तनम् । गुणकथनम् । विरहकालीनकान्ताविषयकप्रशंसाप्रतिपादनम् । इति रसमञ्जरी ॥ कान्तापदमत्रोपलक्षणम् ॥
गुण्ठितः, त्रि, (गुठि वेष्टने + कर्म्मणि क्तः ।) गुण्ठितः । इत्यमरटीकायां रमानाथः ॥ आवृतः । रूषितः । धूल्यादिभिर्धूसरित इत्यर्थः । यथा, गोः रामायणे । ६ । ८२ । ८ ।
"तत्र युद्धेन मे कार्य्यं न प्राणैर्नापि सीतया ।
लक्ष्मणं निहतं दृष्ट्वा भ्रातरं पांसुगुण्ठितम् ॥")
गुण्डः, पुं, (गुडि वेष्टने + अच् ।) तृणभेदः । यस्य कन्दः कशेरु । तत्पर्य्यायः । काण्डगुण्डः २ दीर्घकाण्डः ३ त्रिकोणकः ४ छत्रगुच्छः ५ आमिपत्रः ६ नीलपत्रः ७ त्रिधारकः ८ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । कफपित्तातिसारदाहरक्तनाशित्वम् । अस्य मध्ये स्थूलतरोऽधिकगुणः । इति राजनिर्घण्टः ॥

[गु]ण्डक:, पुं, (गुण्ड+संज्ञायां कन् । गुड़ि+ण्वुल् वा ।) मलिनः । धूली । कलोक्तिः । स्नेहपात्रम् । इति मेदिनी । के । ८३ ।

[गु]ण्डकन्दः, पुं, (गुण्ड इत्याख्यया प्रसिद्धः कन्दः । गुण्डाणां कन्द इति केचित् ।) कशेरु । इति राजनिर्घण्टः ।

[गु]ण्डारोचनिका, स्त्री, (गुण्डाऽपि रोचना हरिद्रा इव । तत स्वार्थे कन् टाप् कापि अत इत्वञ्च ।) वृक्षविशेषः । कमलागुंड़ि इति भाषा । तत्पर्य्यायः । काम्पिल्लकः २ रक्ताङ्गः ३ । इति रत्नमाला ।

[गु]ण्डाला, स्त्री, (गुण्डाल+टाप् । यद्वा गुण्डां चूर्णं आलानि आदत्ते इति । आ+ला+कः । स्त्रियां टाप् ।) गुन्द्रतृणविशेषः । तत्पर्य्यायः । जलोद्भवा २ गुण्डरथा ३ जलाश्रया ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । शोषकत्वम्[illegible] । इति राजनिर्घण्टः ।

[गु]ण्डासिनी, स्त्री, (गुण्ड इत्याख्यया आस्ते वर्त्तते इति । आस्+णिनिः । गुण्डा गन्धी आस्ते इति वा ।) तृणभेदः । तत्पर्य्यायः । गुण्डाला २ गुड़ाला ३ गुच्छपत्रिका ४ चिपिटा ५ ह्रस्वगवी ६ यवानी ७ एधुना ८ चिरा ९ । अस्या गुणाः । कटुत्वम् । [illegible]वाहित्वम् । तिक्तत्वम् । उष्णत्वञ्च । इति राजनिर्घण्टः ।

[गु]ण्डिकः, पुं, स्त्री, (गुण्डोऽस्त्यस्येति । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) गुण्डकः । तण्डुलादिचूर्णम् । गुंड़ा इति भाषा । तद्वृत्तं यथा ।

"गुण्डिकैः [illegible]"

[गु]ण्डिचा, स्त्री, ([illegible] [illegible]) [illegible]

सप्ताहं ये प्रपश्यन्ति गुण्डिचामण्डपे स्थितम् ।
माञ्च रामं सुभद्राञ्च मम सायुज्यमाप्नुयुः ॥" * ॥
तस्या नामकरणं यथा, उत्कलखण्डम् ।
"अत ऊर्द्ध्वं प्रवक्ष्यामि महावेदीमहोत्सवम् ।
अज्ञानतिमिरान्धोऽपि येन भास्वत्पदं भजेत् ॥
सर्व्वपापरजःशान्त्या पूज्यत्वात् सर्व्वदैवतैः ।
गुण्डिचाख्यापि सा यात्रा मक्षतेजोऽवगुण्ठनात् ॥"

गुण्डितः, त्रि, (गुड़ि वेष्टने+कर्म्मणि क्तः ।) धूलिगुण्डकेनैव क्षपितः । तत्पर्य्यायः । रूषितः २ । इत्यमरः । ३ । १ । ८९ । धूर्णितश्च ।

गुत्थः, पुं, (गुत्स+पृषोदरादित्वात् साधुः ।) गवेधुका । इति रत्नमाला ।

गुत्थकं, क्ली, (गुत्थ+संज्ञायां कन् । यद्वा गुच्छ इव गुच्छेन वा कायतीति । कै+कः । पृषोदरात् साधुः ।) ग्रन्थिपर्णम् । इति रत्नमाला ।

गुत्सः, पुं, (गुध्यते स्तबकपत्रपुष्पादिभिः परिवेष्ट्यतेऽसौ, इति । गुध परिवेष्टने+"उन्दिगुधिकुषिभ्यश्च ।" उणां । ३ । ६८ । इति कर्म्मणि सः किच्च ।) स्तवकः । स्तम्बः । (कारादौ तु गुध्यते परिवेष्ट्यते कण्ठदेशःस्थलादिकमनेन ।) द्वात्रिंशद्यष्टिकाहारः । ग्रन्थिपर्णश्च । इति मेदिनी । से । २ ।

गुत्सकः, पुं, (गुत्स+स्वार्थे कन् ।) स्तवकः । इति शब्दरत्नावली । ग्रन्थपरिच्छेदः । इति त्रिकाण्डशेषः ।

गुत्सकपुष्पः, पुं, (गुत्सकानि स्तवकीभूतानि पुष्पाणि यस्य यत्र वा ।) सप्तच्छदवृक्षः । इति जटाधरः ।

गुत्सार्द्धः, पुं, (गुत्सं गुच्छं प्राप्य आश्रित्य वा अर्द्धयतीति । अर्द्ध+अण् । गुत्सं आर्द्धयति वर्द्धयति इति । अर्द्ध+णिच् अण् वा । यद्वा गुत्सस्य [illegible] ।) गुच्छार्द्धः । अनु- [illegible]

गुदग्रहः, पुं, (गुदस्य ग्रह इव गुदमाश्रित्य ग्रहवत् प्रवर्त्तते इत्यर्थः । यद्वा गुदं मलद्वारमधिकृत्य आभ्यन्तरिकस्थानं गृह्णाति धारयतीति ग्रह+अप् ।) उदावर्त्तरोगः । इति हेमचन्द्रः । ३ । १३३ ।

गुदभ्रंशः, पुं, (गुदस्य भ्रंशोऽस्मात् । गुदं भ्रंशं भ्रंशतेऽस्मादिति वा ।) मलद्वारनिर्गमरोगः । तस्य लक्षणम् ।

"प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः ।
रूक्षदुर्ब्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥"

इति माधवकरः ।

तच्चिकित्सा यथा,—

"गुदभ्रंशे गुदं स्विन्नं स्नेहेनाक्तं प्रवेशयेत् ।
प्रविष्टं रोधयेद्यत्नाद्गन्धकच्छिद्रचर्म्मणा ॥
पद्मिन्याः कोमलं पत्रं यः खादेच्छर्करान्वितम् ।
एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः ॥
मूषकाणां वसाभिर्व्वा गुदभ्रंशे प्रलेपनम् ।
सुस्विन्नमूषिकामांसेनाथवा स्वेदयेद्गुदम् ॥
इक्ष्वाख्यानलचाङ्गेरीविल्वपाठायवाग्रजम् ।
तक्रेण भोजयेत् पायुं भ्रंशार्त्तोऽनलदीपनम् ॥
मूषकान् दशमूलानि पञ्चेयादुभयं समम् ।
तयोः क्वाथेन कल्केन पचेत्तैलं यथोदितम् ॥
अभ्यङ्गात्तस्य तैलस्य गुदभ्रंशो विनश्यति ।
विनश्यति तथा तेन गुदमूलं भगन्दरः ॥"

इति मूषकतैलम् । इति भावप्रकाशः ।

(यदा गुदं निरस्येत तदा कुर्य्यात् क्रियामिमाम् ।
सहपर्ण्याम्लानाश्च रसो ग्राह्यो शतं पयः ॥
पक्वा घृतेन लेपः स्यात् तस्य वेदं प्रशस्यते ।
क्षारौपक्वकषायो माष्यं सोढ्वं सचन्दनम् ॥
प्रोतव्य वल्लिसहस्रं सहसा नरस्य
निर्गाप्य काञ्जिकमथो विदधीत तद्वत् ।
शौण्डश्च साम्यगुदरोपणकं प्रशस्तं
संवेशयमथ गुदगो बद्धबन्धनं स्यात् ॥"

इति गुदभ्रंशः ।

इति हारीते चिकित्सितस्थाने तृतीयेऽध्याये ॥ ० ॥

अथास्य चिकित्सा ।

"गुदनिःसरणे शूले पानमम्लस्य सर्पिषः ।
प्रशस्तं निरामाणां मदनाद्यनुवासनम् ॥
चाङ्गेरी कोलदध्यम्लनागरक्षारसंयुतम् ।
घृतमुत्क्वथितं पेयं गुदभ्रंशरुजापहम् ॥"

इति चाङ्गेरीघृतम् ॥ ० ॥

"सव्यतिम्ब्यमीकर्णं मधौवकिञ्चदाड़िमम् ।
पेयमम्लं घृतं युक्तं मधाम्लाजानिचित्रकम् ॥
दधनवोपलिप्तं वा यवकमनुवासनम् ।
[illegible] जिह्नैर्वा वचया चित्रकेण वा ।
[illegible] पूर्व्वं सेचयेदि प्रयोजयेत् ॥"

इति चरके चिकित्सितस्थाने दशमेऽध्याये ।)

[गुदाङ्कु]रः, पुं, (गुदे अङ्कुर इव गुदमधि- [illegible] प्ररोहवृन्दद्वन्द्वं वर्त्तितहर्षः ।) अर्शो- [illegible] । इति हेमचन्द्रः । ३ । १३२ ।

[illegible] वर्त्तिका: ।" इति वाग्भटे निदाने [illegible] दशमेऽध्याये ।)

द क कुन्द्रे। इति कविकल्पद्रुम:॥ (चुरां-परं-सं-सेट्-इदित्।) पञ्चमस्वरी। दन्त्यवर्ग तीयोपधः। कुन्द्रो मिथ्योक्तिः। इ क, गुन्द्र-ति नीचः मिथ्या वदतीत्यर्थः। गुन्द्र इत्यने-वैरसिद्धे इदनुबन्धो वेदेऽपूच्चारणभेदार्थः। इति गांदास:॥

ग वधि। इति कविकल्पद्रुम:॥ (क्र्यां-परं-सकं-सेट्।) ग, गुध्नाति। जुगोध। इति दुर्गा-सः॥

ङ क्रीडे। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं-अकं-सेट्।) ङ, गोधते। इति दुर्गादास:॥

य वेष्टे। इति कविकल्पद्रुम:॥ (दिवां-परं-सकं-सेट्।) य, गुध्यति। जुगोध। इति दुर्गा-दास:॥

ट:, त्रि, (गुध्यति सर्व्वतो वेष्टयति वेष्टनेन रच-तीत्यर्थः इति। गुधय वेष्टने "मलेरादयः।" उणां। १। ६१। इति एरक्।) रक्षकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

ल:, पुं, (गुमिति मधुरमस्फुटशब्दं कारयन् लति मर्द्दयतीऽसौ। दल+णिच्+कर्म्मणि अच्।) मर्द्दलशब्दः। इति हेमचन्द्र:। ६। ४४॥

:, पुं, (गुन्द्र+अच्।) शरवणम्। इत्यमरः। २। ४। १६२॥ तृणविशेषः। गोंदपटेर इति देशान्तरीयभाषा। तत्पर्य्यायः। पटेरकः २ अप्सः ३ सूक्ष्मैरावण्मूलकः ४। अस्य गुणाः। कषायत्वम्। मधुरत्वम्। हिमत्वम्। मित्तरक्त-मत्रकृच्छ्राश्मरीत्वम्। स्तन्यशुक्ररजोमूत्रशोधन-त्वञ्च। इति भावप्रकाशः॥

"गुन्द्रान् दग्ध्वा शतं भस्म हरितालं मनःशिला। एषदंष्ट्रविसर्पाणामेतत्सान्तिकरं परम्॥"

इति सुश्रुते चिकित्सितस्थाने १८ अध्याये॥)

द्रमूला, स्त्री, (गुन्द्रस्य मूलमिव मूलमस्य।) एरकातृणम्। इति भावप्रकाशः॥

न्द्रा, स्त्री, (गुन्द्र+टाप्।) भद्रमुस्तकः। प्रियङ्गु-वृक्षः। इत्यमरः। २। ४। १६०॥ गवेधुका। इति रत्नमाला॥ एरका। इति भावप्रकाशः॥

("देवनलैरानिकयूकदयाश्मभेद-गोवत्वर्केतकटसधावरबालकाश्चाः। इक्षादनीलकुशमुञ्जयगुच्छगुन्द्रा भल्लूकमोरटकुरण्टकरम्भपार्थाः॥"

इति वाभटे सूत्रस्थाने १५ अध्याये॥ पित्तसंशमनीयवर्गान्तर्गतौषधिविशेषः। यथा। "चन्दनकुचन्दनह्रीबेरोशीरमञ्जिष्ठा पयस्या-विदारीशतावरीगुन्द्राशैवालकह्लारकुमुदोत्पल-कदलीकन्दलीदूर्व्वामूर्व्वाप्रभृतीनि काकोल्यादि-र्न्यग्रोधादिश्च गणस्समासेन पित्त-संशमनो वर्गः॥" इति सुश्रुते सूत्रस्थाने ३८ अध्याये॥)

(गन्द्रा। यथा काशीखण्डे। ३८। ४६। "मर्म्मरोद्दामरा गुन्द्रा गदघ्नी गालवप्रिया।")

गुन्द्राल:, पुं, (गुन्द्रं मोहं निर्म्मातुं रुदादिकं आलाति आदत्ते इति। आ+ला+क।)

चीवञ्जीवपक्षी। इति हेमचन्द्र:। ४। ४०६॥ गुन्द्रालोऽपि पाठः॥

गुन्फ, श गन्थे। इति कविकल्पद्रुम:॥ (तुदां-परं-सकं-सेट्।) पञ्चमस्वरी। श, गुम्फति मालां मालिकः। जुगुम्फ। इति दुर्गादास:॥

गुप, ऊ रक्षे। इति कविकल्पद्रुम:॥ (भ्वां-परं-सकं-सेट्।) आयन्तत्वादुभयपदमिति वोपदेवः। गोपायति गोपायते। अन्ये तु आयस्याप्राप्ति-पक्षे परस्मैपदमेव। अगोपीत्। जुगोप गोरूप-धरामिवोर्व्वीमिति रघुः॥ ऊ, गोपिष्यति गोप्स्यति। इति दुर्गादास:॥

गुप, क भासि। इति कविकल्पद्रुम:॥ (चुरां-परं-अकं-सेट्।) क, गोपयति। भासि दीप्तौ। इति दुर्गादास:॥

गुप, ङ गोपनकुत्सयोः। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं-सकं-सेट्।) गोपनमपह्नवः। ङ, कङ्कणमनृतकारक किं गोपसे। अत्र त्वादयो न स्युरिति रमानाथः। कुत्सा। निन्दा। सा जुगुप्सा प्रचक्रेऽस्य न्। इति भट्टिः। इति दुर्गादास:॥

गुप, य इर् व्याकुलत्वे। इति कविकल्पद्रुम:॥ (दिवां-परं-अकं सकञ्च-सेट्।) व्याकुलत्वं व्याकुलीभावस्तत्करणञ्च। य, धीरो न गुप्यति महत्यपि कार्य्यजाते। इति हलायुधः। गुप्यति गा दृष्टिः। व्याकुलीकरोतीत्यर्थः। इति चतु-र्भुजः। इर्, अगुपत् अगोपीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादास:॥

गुपिल:, पुं, (गोपायति प्रजाजनानिति। गुप् रक्षणे +"गुपादिभ्यः कित्।" उणां। १। ५६। इति इलच् कित्।) राजा। इत्युणादिकोषः॥

गुप्त, त्रि, (गुप्यते स्म। गुप्+कर्म्मणि क्तः।) कृतरक्षणम्। तत्पर्य्यायः। त्रातम् २ त्राणम् ३ रक्षितम् ४ अवितम् ५ गोपायितम् ६। (यथा, महाभारते। १। १। १८८।

"यदाश्रौषं सूतमगैरमन्ये- भारद्वाजेनाक्षगतस्य गुप्तम्॥")

कृतगोपनम्। तत्पर्य्यायः। गूढम् २। इत्यमरः। ३। १। १०६। (यथाह मनुसिष्ठः।

"आहारनिर्हारविहारयोगाः सुसंवृता धर्म्मविदा तु कार्य्याः। वाग्बुद्धिकार्य्याणि तपस्तथैव धनायुषी गुप्ततमे तु कार्य्ये॥"

"देवो भवानमस्तवं द्विगुणितं लोकालयः सारदा-श्चत्वारो नियताश्च वह्निगुणलब्धैर्यश्च यत्र महर्षयः। तुला विक्रमयो रसेन समता गौरवसगुणा सत्र्ये दक्षकरोऽस्येव युहद् गुप्तं भवेत् सर्व्वदा॥" इति वैद्यकसिद्धान्तरसंसारे रसायनाधिकारे॥)

मन्त्रितम्। इति शब्दरत्नावली॥ वैश्यनाम्नो मर्ज्ञातिविशेषे पुं। यथा, उद्वाहतत्त्वम्॥ "गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः।"

गुप्तगति:, पुं, (गुप्ता संवृता अन्यैरलक्षिता गति-र्गमनं येषामित्यर्थः यस्य।) चरः। इति शब्द-रत्नावली॥

गुप्तचर:, पुं, (गुप्तः योगेनात्मसंवृतः सन् स्वयं विष्णु-रपि सर्व्वैश्वर्य्यमाच्छाद्य नररूपेण चरतीत्यर्थः।) बलदेवः। इति त्रिकाण्डशेषः॥ (कर्म्मधारय-समासे तु राज्ञां गूढचरः। गुप्तचरो यस्य इति विग्रहे राजानमेव योधयति॥)

गुप्तस्नेह:, पुं, (गुप्तः गूढभावेन स्थितः स्नेहः तैलादिरसो यत्र।) अङ्कोटवृक्षः। इति राज-निर्घण्टः॥

गुप्ता, स्त्री, (गुप्त+टाप्।) कपिकच्छुः। इति राजनिर्घण्टः॥ परकीयान्तर्गतनायिकाभेदः। तस्या लक्षणम्। मैथुनगोपनम्। सा च त्रिधा। वृत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वृत्तवर्त्तिष्यमाणसुरतगोपना ३। इति रसमञ्जरी॥

गुप्ति:, स्त्री, (गुप्+अधिकरणभावकरणादिषु यथायथं क्तिन्।) अवकरस्थानम्। कारा-गारम्। (यथा, माघे। ११। ६०।

"चिरमतिरसलौल्याद्बन्धनं लम्भितानां पुनरयमुदयाय प्राप्य धाम स्वमेव। दलितदलकपाटः षट्पदानां सरोजे सरभस इव गुप्तिस्फोटमर्कः करोति॥")

रक्षणम्। इति मेदिनी। ते। १६॥ (यथा, मनुः। १। ६४।

"तं हि स्वयम्भुः स्वादास्यात्तपस्तप्त्वादितोऽसृजत्। हव्यकव्याभिवाह्याय सर्व्वस्यास्य च गुप्तये॥")

भूगर्त्तः। यमः। इति हेमचन्द्र:॥ गर्त्तार्थे क्षिति-वृत्तखननम्। नौकाच्छिद्रम्। इत्यमरटीकायां भरतः। गोपनम्। इति तट्टीकायां सारसुन्दरी॥ (यथा, साहित्यदर्पणे। ३। १५५।

"भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था॥")

संरक्षणम्। यथा, कुमारे। ६। ३८।

"शुद्धम्भसि शिलासालं गुप्तावपि मनोहरम्॥")

स्तम्भयोगिनस्तु संस्कारविशेषः। यथा, तन्त्रसार-धृतगौतमीये।

"जननं जीवनं पश्चात् ताडनं बोधनं तथा। तथाभिषेको विमलीकरणाप्यायने पुनः। तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः॥")

गुफ, म श गन्थे। इति कविकल्पद्रुम:॥ (तुदां-परं-सकं-सेट्।) पञ्चमस्वरी। म श, गुम्फति मालां मालिकः। जुगोफ। इति दुर्गादास:॥

गुम्फित:, त्रि, (गुम्फ+कर्म्मणि क्तः।) गुम्फितः। ग्रथितः। इत्यमरटीका॥

गुम्फ:, पुं, (गुम्फ+घञ्।) ग्रन्थनम्। (यथा, रावणकृतशिवस्तवे। १३।

"निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरम्॥" भक्ताः आर्याष्टशत्याम्। १०९। "मनसिजमदनसुमणि ! शिञ्जितं गिरां गुम्फम्॥")

बाहोरलङ्कारः। इति मेदिनी। फे। २। श्मश्रु। इति शब्दरत्नावली। गोंफ इति भाषा॥

गुम्फित:, त्रि, (गुम्फ+कर्म्मणि क्तः।) ग्रथितः। इत्यमरटीकायां रायमुकुटः। (यथा, "प्रथमगुम्फितमालाम् वल्लरी स्मितकला।")

गुर, ई य ङ वधे । गद्याम् । इति कविकल्पद्रुमः ॥
(दिवा-आत्मं-सकं-सेट् ।)
गुर, ङ ई शि उद्यमे । इति कविकल्पद्रुमः ॥ (तुदा-
आत्मं-अकं-सेट् ।) कुसी । ङ शि, गुरते
अगुरिष्ट । ई, गूर्णः । इति दुर्गादासः ॥
गुरणं, क्ली, (गुर्+भावे ल्युट् ।) उद्यमः ।
इत्यमरः । ३ । २ । ११ ॥ अस्य रूपान्तरे गूरणं
गोरणं इति भरतः ॥
गुरुः, पुं (गृणाति उपदिशति वेदादिशास्त्राणि
इत्यादिदेवेभ्यः इति । यद्वा गीर्य्यते स्तूयते देव-
गन्धर्व्वमनुष्यादिभिः । गृ + "कृग्रोरुच ।" उणां ।
१ । २४ । इति उत् ।) बृहस्पतिः । (यथा,
देवीभागवते । १ । ११ । ४४ ।
"इत्याकर्ण्य गुरुं प्राप्तो दूतं वक्तुं विचक्षणः ॥")
पितृकादिकृत् । इत्यमरः । ३ । ३ । १६१ ॥
(यथा, मनुः । २ । १४२ ।
"निषेकादीनि कर्म्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥")
निषेको गर्भाधानं आदिना सीमन्तोन्नयनादि-
संस्कारादानादेश्च ग्रहणम् । तत्कर्त्ता पित्रादि-
र्गुरुः स्यात् । इति भरतः ॥ मन्त्रदाता । तस्य
वर्ज्जनीयत्वं यथा, कालिकापुराणे ५४ अध्याये ।
"अभिशप्तमपुत्रञ्च सन्नद्धं कितवं तथा ।
क्रियाहीनमकल्पाङ्गं वामनं गुरुनिन्दकम् ॥
सदा मत्सरसंयुक्तं गुरुं मन्त्रेषु वर्ज्जयेत् ।
गुरुर्मन्त्रस्य मूलं स्यात् मूलशुद्धौ सदा शुभम् ॥"
अपि च । [illegible]सारसमुच्चये ।
'शिवो चैव रक्तदृष्टो नेत्ररोगी च वामनः ।
कुनखो श्यावदन्तश्च कौलिनश्चाधिकाङ्गकः ॥
हीनाङ्गः कपटी रोगी बह्वाशी बहुजल्पकः ।
एतैर्दोषैर्विहीनो यः स गुरुः शिष्यसम्मतः ॥"
इति तन्त्रसारः ॥ * ॥
[illegible]यथा, —
[illegible]उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः ।
[illegible] मातुलः श्वशुरस्त्राता मातामहपितामहौ ।
[illegible] निश्चय दृष्टेन गुरवः स्मृताः ।
[illegible] मातुलानी तथा मातुश्च सोदरा ॥
[illegible] पितामही धात्री च गुरवः स्त्रीषु ।
[illegible] गुरवः प्रोक्ताः [illegible] ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

पिता माता च संप्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रः सकलं धर्मं प्राप्नुयात्तेन कर्म्मणा ।
नास्ति पितृसमो देवो नास्ति मातृसमो गुरुः ॥
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ।
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ॥
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ।
वर्ज्जयित्वा मुक्तिफलं नित्यं नैमित्तिकं तथा ॥
धर्म्मसारः समुद्दिष्टः प्रेत्यानन्त्यफलप्रदः ।
सम्यगाराध्य वक्तारं विसृष्टस्तदनुज्ञया ।
शिष्यो विद्याफलं भुङ्क्ते प्रेत्य चाप्यापतेद्दिवि ॥
यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते ।
तेन दोषेण स प्रेत्य निरयं घोरमृच्छति ॥
पुंसा वर्त्मनि तिष्ठेन पूज्यो भर्त्ता तु सर्व्वदा ।
अपि मातरि लोकेऽस्मिन्नुपकाराद्धि गौरवम् ॥
ये नरा भर्तृपिण्डार्थे स्वान् प्राणान् संत्यजन्ति हि ।
तेषामथाक्षयाँल्लोकान् प्रोवाच भगवान् मनुः ॥
मातुलांश्च पितृव्यांश्च श्वशुरांश्चर्त्विजो गुरून् ।
असावहमिति ब्रूयुः प्रत्युत्थाय यवीयसः ॥"
इति कूर्म्मपुराणे उपविभागे ११ अध्यायः ॥ * ॥
तस्य परीक्षा यथा ।
"सदाचारः कुशलधीः सर्व्वशास्त्रार्थपारगः ।
नित्यनैमित्तिकानाञ्च कार्य्याणां कारकः शुचिः ॥
अपर्व्वमैथुनपरः पितृदेवार्च्चने रतः ।
गुरुभक्तो जितक्रोधो विप्राणां हितकृत् सदा ॥
दयावान् शीलसम्पन्नः सत्कुलीनो महामतिः ।
परदारेषु विरतो दृढसङ्कल्पको द्विजः ॥
अन्यैश्च वैदिकगुणैर्युक्तः कार्य्यो गुरुर्नृपैः ।
एतैरेव गुणैर्युक्तः पुरोधाः स्यान्महीभुजाम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥
शिष्यकृतपापं गुरुं स्पृशति यथा ।
"मन्त्रिपापञ्च राजानं पतिं जायाकृतं तथा ।
तथा शिष्यकृतं पापं प्राप्नोति गुरुरपि ध्रुवम् ॥
पाप इति गुरुणा शिष्यः सम्यग्बोधितोऽपि
तदाज्ञामनादृत्य पापचेष्टामाचरति तदा तत् पापं
गुरौ न यातीति बोध्यम् ॥
सर्व्वधर्म्मा सर्व्वेषामाचारः सहनिग्रहः ।
गुरुशिष्यसमाचारं बोधयेत् कुलनायिके ॥
न यस्यति हि शिष्यश्चेत्तदा पापं गुरोर्न हि ।
इति कुलार्णववचनात् । इति शिवार्च्चनचन्द्रिका ॥
मन्त्रगुरोर्लक्षणं यथा ।
"गकारः सिद्धिदः प्रोक्तो रेफः पापस्य हारकः ।
उकारो विष्णुरव्यक्तस्त्रितयात्मा गुरुः परः ॥
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥
उद्धर्त्तुं चैव संहर्त्तुं समर्थो ब्राह्मणोत्तमः ।
तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते ॥" * ॥
देवीमतेन तस्य विशेषो यथा ।
"[illegible]
[illegible]
[illegible]

कोशलाश्च दशार्णाश्च गुरवः सन्त [illegible]
कर्णाटनर्मदारेवाकच्छतीरोद्भवाश्च [illegible]
कालिङ्गाश्च कलम्बाश्च काम्बोजाश्चा[illegible]
वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शा[illegible]
शैवः शाक्तोऽपि सर्व्वत्र दीक्षास्वामी न[illegible]
इति तन्त्रसा[illegible]
"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गु[illegible]
पतिरेको गुरुः स्त्रीणां सर्व्वत्राभ्यागतो गु[illegible]
इति चाणक्य[illegible]
कपिकच्छुः । इति राजनिर्घण्टः ॥ हिमा[illegible]
दीर्घः । इति शब्दरत्नावली ॥ (गृणाति उ[illegible]
शति वेदान् । गृ + "कृग्रोरुच ।" उणां ॥१[illegible]
इति उत् । वेदाध्यापयिताचार्य्यः । य[illegible]
मनुः । ३ । १ ।
"षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥"
गृणाति उपदिशति किञ्चिदपि यः । उपाध्याय
इत्यर्थः । यथा, मनुः । २ । १४९ ।
"अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥"
गीर्य्यते स्तूयतेऽसौ ज्ञानतपोवृद्धत्वात् । ज्ञान-
प्रभावान्वितत्वात् तपोबलप्राधान्याद्वा वृद्ध-
तमो महात्मा । यथा, मनुः । २ । १३० ।
"मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।"
"भूयिष्ठाः खलु गुरव इत्युपक्रम्य मानवद्वारा-
दृढयोरपि हारीतेन गुरुत्वकीर्त्तनात् तयो-
कनिष्ठयोरपि सम्भवात् गहियोरयं गुरुशब्दः ।"
इति टीकाकृत् कुल्लूकभट्टः । गृणाति उपनीय
सन्ध्योपासनाचारादीनि कर्म्माणि उपदिश
उपनेता सन्ध्योपासनाद्युपदेष्टा च । य
मनुः । २ । ६९ ।
"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च ॥"
पिता । यथा, रामायणे । २ । ७८ । ९ ।
"गतो दशरथः स्वर्गं यो नो गुरुतरो गुरुः ।"
राजचक्रवर्त्ती सम्राट् । यथा, रघुः २ । ६८ ।
"गुरुर्नृपाणां गुरवे निवेद्य ।"
गिरति अज्ञानमन्धकारमिति [illegible] गाढ-
धर्म्मार्थः । गीर्य्यते स्तूयते जीवनिकरैरिति वा ।
दृगृ वा उत् । विष्णुः । यथा, महाभारते ।
१३ । १४९ । ४५ ।
"आदिदेवो महादेवो देवेशो देवभृद्गुरुः ।"
शिवः । तत्रैव । [illegible] ।
"सहस्रभुजो देवेशः सर्व्वदेवमयो गुरुः ।"
महान् । माननीयः । [illegible]
हरणं यथा, कादम्बर्य्याम् । [illegible] ।
'[illegible]
[illegible]
[illegible]
महीका ।
[illegible]
"[illegible]

यथा श्रोत्रसागम् । यत्र गुरुरपि श्लोकवाच्यद्वाया-पाकुरुगार्थमभिनयाद्यनुकरणानि शिष्याय यथा-कालि गुरुकरदिवित् पदं भाषं श्लोकं वा तं च पद-भाष-टीका अथ: श्लेषानुगमनीया रस-श्लेषैकश्लो घटयेदाकर्णाकामुमर्देत् ।" तत्रैव कार्ये "श्लाकं गुरुकुलगोहोर्निमाशार्यमास्य चागतम् । य: कर्म गुरुतो वेदा: स वेदोक्ते तु तत्परा: ॥")

गुरु, त्रि, (गीर्यते स्तूयते महत्त्वात् । गॄ+ कुः "कृग्रोरुच्च" उणा० ।१।२४। इति उत्) महान् । (यथा, ऋग्वेदे ।४।५।६। "इदं मे अग्ने ! कियते पावका-मिनते गुरुं भारं न मन्म ।") दुर्ज्जरः । अलघुः । इति मेदिनी । रे ।२५। (यथा, मघवने ।१।१६६। "प्रासो दन्यतमस्यं गुरुत्वगाभाकात् त्वया मे घृतः ।" पराक्रान्तः । यथा, मघवने । ३ । २८ । "गोत्रगात्रक्षत्रियमपतो धन्याथघुं लघुर्गुरुम् ।" भारायमाणः । यथा, रघुः । १२ । १०२ । "अथ मदगुरुपक्षैर्लोकपालद्विपानाम् ।" अथ मदेन गजगदमषारसंक्रान्तेन गुरुपक्षैः भारायमाणपक्षैः अलिहन्दैः ।" इति टीका-कृन्मल्लिनाथः । अतिशयः । यथा, मेघदूते ।१।१। "कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तं गमितमहिमा वर्षभोग्येण भर्त्तुः ॥")

गुरुक्रमः, पुं, (गुरुरेव क्रमः पारम्पर्य्यं यत्र ।) इतिह । पारम्पर्य्योपदेशः । इति हलायुधः ॥

गुरुघ्नः, पुं, (गुरून् पराक्रान्तानपि यथाप्राप्त राक्षसादीन् हन्ति निराकरोतीत्यर्थः । हन्+ टक् ।) गौरसर्षपः । इति राजनिर्घण्टः । गुरुहन्तरि त्रि ॥

गुरुघण्टकः, पुं, (गुरुं दुर्भरवस्त्रादिकं घण्टति चोरयति हरतीति यावत् । गुरुं गुरुतां दुर्ज्जरतां घण्टतीत्येके घण्टस्तेये+ण्वुल् ततः पृषोदरात् ङलोपे साधुः ।) तिलमयूरः । इति त्रिकाण्ड-शेषः ॥

गुरुतल्पगः, पुं, (गुरोः पितुराचार्य्योपाध्याया-देर्वा तल्पं शय्यां पत्नीमितियावत् गच्छति इति गम्+डः ।) विमातृगन्ता । यथा,—
"गुरुतल्पगः सुरापश्च ब्रह्मस्तेयश्च विप्रहा ।
महापातकिनस्त्वेते संसर्गी चैव पञ्चमः ॥
इति प्रायश्चित्तविवेकः ॥

(यथा, मनुः । ६ । २३५ ।
"ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः ।
एते सर्व्वे पृथग्ज्ञेया महापातकिनो नराः ॥"
एतस्य नरकभोगावसाने पुनर्गृहीतमनुष्यदेहस्य फलं यथा, तत्रैव । ११ । ४९ ।
"ब्रह्महा क्षयरोगित्वं दौश्चर्म्मं गुरुतल्पगः ।")

गुरुतालः, पुं, (गुरुः अपेक्षाकृतदीर्घकालव्यापी-तालः ।) तालविशेषः । यथा,—
"एक एव गुरुर्यत्र गुरुतालः स कथ्यते ।
अपरं नियमं विना ॥" इति सङ्गीतदामोदरः ।

गुरुत्वं, क्ली, (गुरोर्भावः । "त्वतलौ" इति त्वप्रत्ययस्तः त्वान्तं क्लीवमिति क्लीवत्वम् ।) महत्त्वम् गुरुता । (यथा, भाषापरिच्छेदे ।३१। "अनाद्ययोर्द्वौ वेगस्य गुरुत्वस्य तथाम्बुनम् ।") भारत्वता । यथा,—
"यत्नीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यात् नित्ये नित्यमुदाहृतम् ॥
तदेवासमवायि स्यात् पतनाख्ये तु कर्म्मणि ।"
इति भाषापरिच्छेदः ॥

(आधिक्यम् । यथा, रघुः । ३ । १८ ।
"नदीर्गुरुत्वादवपुषी नरेन्द्रः ।" वपुषो गुरु-त्वात् आधिक्यात् इति मल्लिनाथकृतटीकायाम् । पूज्यत्वम् । यथा, तत्रैव । १० । ६३ ।
"भेजे परार्द्ध्यमाभानं गुरुत्वेन जगद्गुरोः ।")

गुरुदैवतः, पुं, (गुरुर्वृहस्पतिर्दैवतमस्येति ।) पुष्य-नक्षत्रम् । इति हेमचन्द्रः । २ । २५ ॥

गुरुपत्रं, क्ली, (गुरुपाके दुर्ज्जरं पत्रं यथाकार-फलकमस्य ।) वङ्गम् । इति हेमचन्द्रः ॥ ४ । १०८ ॥

गुरुपत्रा, स्त्री, (गुरु सेवने दुर्ज्जरं पत्रं यस्य-मस्याः ।) तिन्तिडीवृक्षः । इति शब्दरत्ना-वली ॥

गुरुमर्द्दलः, पुं, (गदः मर्द्दल इति नित्यकर्म्म-धारयः ।) डिण्डिमवाद्यम् । इति शब्दरत्ना-वली ॥

गुरुरत्नं, क्ली, (गुरु गौरवान्वितं गुरुत्वपदित्यर्थः गुरुत्वाद् गुरु वा रत्नम् गुरोः प्रियं रत्नमित्येके ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥ (मर-मिवच नवग्रहदोषशान्त्यै गुरौ मुक्तैवोक्ता) यथा, अग्निमेव शब्दकल्पद्रुमे नवरत्नशब्दे ।
"नवग्रहदोषशान्त्यै धार्य्याणि नवरत्नानि ।
पद्मार्यं धारयेत् सूर्य्ये नीलश्च व्यालाञ्छने ॥
व्यावनेऽपि माणिक्यं पद्मरागं शशाङ्क्ये ।
गुरौ मुक्ता भृगौ वज्रं शनौ नीलं विदुर्बुधाः ॥"
इति ॥

मतेरप्यस्यप्रयोगोऽचैव रत्नशब्दे दृश्यते यथा,—
"वज्रमुक्ताप्रवालानि सपद्मरागाः समरकताः
मौक्ताः ।
अपि चेन्द्रनीलवरवैदूर्य्याश्च पुष्परागाश्च ॥")

गुरुवर्च्चोघ्नः, पुं, (गुरुवर्च्चः वातपित्तादिप्रकोप-जनिताग्निमान्द्यकोष्ठरोधनादिदोषस्तं हन्ति इति हन्+टक् ।) लिम्पाकः । इति शब्दचन्द्रिका ॥ मातिलेवु । इति भाषा ॥

गुरुहा, [न्] पुं, (गुरुं हन्ति इति । हन्+क्विप् ।) गुरुघ्नः । तत्पर्य्यायः । नरकीलकः २ । इति हेमचन्द्रः । ३ । ५२२ ॥ गुरुहन्तरि त्रि ।

गुर्ज्जरः, पुं, (गुरु प्रभुकृतताडनं वधोद्यमादिकं वा उज्जरयति यो देशः । कलिङ्गाः साह-सिका इतिवद्देशस्थजने लक्षणेति ज्ञेयम् ।) गुज्जराटदेशः । इति शब्दरत्नावली ॥

गुर्ज्जरी, स्त्री, (जॄ+णिच्+अच् । गुरिति प्रभु-कृतताडनादिकं तज्जीर्य्यतेऽत्र इति अधिकरणे अच् । गुर्ज्जरः देशः तस्य प्रियेति ङीष् । यद्वा गुर्ज्जरदेशःप्रियोऽस्या इति अच् ङीष् च । गुर्ज्जरदेशवासिनी अतो गुर्ज्जरीति केचित् ।) रागिणीविशेषः । इति हलायुधः ॥ इयन्तु भैरव-रागस्य रागिणीति बोध्यम् । यथा, सङ्गीतदर्पणे रागविवेकाध्याये । १६ ।
"भैरवी गुर्ज्जरी रामकिरी गुणकिरी तथा ।
बाङ्गाली सैन्धवी चैव भैरवस्य वराङ्गनाः ॥"
अस्या गानकालनिर्णयो यथा, तत्रैव । २० ।
"देवाकली च मल्लारी वराटी सोमगुर्ज्जरी ।"
इयं हि ग्रीष्मर्त्तौ स्वस्वामिना भैरवरागेण सह गीयते । यथा, तत्रैव । २७ ।
"भैरवः सपरिवारस्तु ऋतौ ग्रीष्मे प्रगीयते ।"
इति सोमेश्वरमतम् । हनूमन्मते तु । इयमेव मेघरागस्य स्त्री । यथा, तत्रैव । ३७ ।
"मल्लारी देशकारी च भूपाली गुर्ज्जरी तथा ।
टङ्का च पञ्चमी भार्य्या मेघरागस्य योषितः ॥"
इयं पुना रागार्णवमते पञ्चमरागाश्रया रागिणी-त्यवधेयम् । यथा, तत्रैव । ४० ।
"ललिता गुर्ज्जरी देशी वराड़ी रामकृत्तथा ।
मता रागार्णवे रागाः पञ्चैते पञ्चमाश्रयाः ॥")

गुर्द्द क निकेतने । कूर्द्दे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) दीर्घिणी वक्ष्यमाणत्वा-दस्य न दीर्घः । क गुर्द्दयति । निकेतनं निवासः । इति दुर्गादासः ॥

गुर्द्द ङ कूर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) दीर्घिणी वक्ष्यमाणत्वादस्यापि न दीर्घः । ङ गुर्द्दते । कूर्द्दः क्रीड़ा । इति दुर्गादासः ॥

गुर्व्व ई उद्यमे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ईदित् । अकमित्येके । खड्गादेरुत्तो-लनार्थकस्य गुर्व्वधातोः सकर्म्मकत्वमकर्म्मकत्वम् वेतत् प्रज्ञावद्भिरेव चिन्तनीयम् ।) इ गूर्त्तः । गूः गुरौ गुरः । ई गूर्णः । गुर्व्वति मत्तिः खड्गम् । इति दुर्गादासः ॥

गुर्व्विणी, स्त्री, (गर्व्वति कुक्षौ सन्तानमपत्यमित्यर्थः प्राप्नोति धारयतीति यावत् । गर्व्वगतौ "गर्व्वे-रत उच्च ।" उणां । २ । ५४ । इति उत् इनन् च गौरादित्वात् ङीष् । गर्व्वयति सुखतीत्येके । यद्वा गुरुर्गुरुभारयुक्तो गर्भोऽस्त्यस्याः अपत्य-धारणात्तथात्वम् । गुरु+"ब्रीह्यादिभ्यश्च ।" ५। २ । ११६ । इति इनिः ।) गर्भिणी । इत्यमरः । २ । ६ । २२ ॥ (यथा, मार्कण्डेये । २७ । २० ।
"वन्यकोपद्रवशरभशूलिकागुर्व्विणीस्तनात् ।
प्रज्ञा कृपेण चाटेया तथा गोपालयोषितः ॥"
'यथाऽस्याः पथ्यापथ्यनियमः ।
यद्यत् कामयते सा च तत्तद्द्यात् भिषग्वरः ।
वर्ज्जयेद्विदलान्यानि विदाहीनि गुरूणि च ॥
अन्नानि सौम्यवीराणि गुर्व्विणीनां विवर्ज्जयेत् ।
मृत्तिका भक्षणीया न न च शूरणकन्दकाः ॥
रसोनञ्च पलाण्डुञ्च सन्त्यज्यो गुर्व्विणीस्त्रिया ।
शूरणानि प्रदेयानि गौल्यानि सरसानि च ॥
मध्ये हितानि चैतानि गुर्व्विणीनां सदा भिषक् ।
व्यायामं मैथुनं रोषं ... तथा ॥
वर्ज्जयेद्गुर्व्विणी ... खगमदः ॥"
इति हारीते ... ।

गुल्मी, स्त्री, (गुल्मोऽस्त्यस्या इति । गुल्म + ङीष् ।) मल्लिका । इति हेमचन्द्रः । ४ । २०४ ॥ ("वहिष्कृता विभाति गुल्मीभिरिव...राम् ।" इति [illegible] ।)

[illegible]

"[illegible] हास्यं सर्वा गुल्मीमाविष्कृतं महात्मने । [illegible] च तेजसा ॥"

[illegible]

"दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः ।
कुर्व्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥
तस्य पञ्चविधं स्थानं पार्श्वे हृन्नाभिवस्तयः ।
हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः ॥
वृत्तश्चयापचयवान् स गुल्म इति कीर्त्तितः ।
स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः ॥
पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥"

तस्य पूर्ब्बरूपं यथा,—
"उद्गारबाहुल्यपुरीषबन्ध-
तृप्त्यक्षमत्वान्त्रविकूजनानि ।
आटोपमाध्मानमपक्तिशक्ति-
रासन्नगुल्मस्य वदन्ति लिङ्गम् ॥"

तस्य सामान्यरूपम् ।
"अरुचिः कृच्छ्रविण्मूत्रवातताऽन्त्रविकूजनम् ।
आनाहश्चोर्द्ध्ववातश्च सर्व्वगुल्मेषु लक्षयेत् ॥"

वातिकस्य निदानं यथा,—
"रूक्षान्नपानं विषमातिमात्रं
विचेष्टनं वेगविनिग्रहश्च ।
शोकोऽभिघातोऽतिमलक्षयश्च
निरन्नता चानिलगुल्महेतुः ॥"

वातिकस्य रूपम् । यथा —
"यः स्थानसंस्थानरुजाविकल्पं
विड्वातसङ्गं गलवक्त्रशोषम् ।
श्यावारुणत्वं शिशिरज्वरञ्च
हृत्कुक्षिपार्श्वांसशिरोरुजञ्च ।
करोति जीर्णेऽभ्यधिकं प्रकोपं
भुक्ते मृदुत्वं समुपैति यश्च ।
वातान्न गुल्मो न च तत्र रूक्षं
कषायतिक्तं कटु चोपशान्त्यै ॥"

पैत्तिकस्य निदानं यथा —
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्यार्कहुताशसेवा ।
आमाभिघातो रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥"

पैत्तिकस्य रूपं यथा,—
"ज्वरः पिपासा वदनाङ्गरागः
शूलं महज्जीर्य्यति भोजने च ।
स्वेदो विदाहो व्रणवच्च गुल्मः
स्पर्शासहः पैत्तिकगुल्मरूपम् ॥"

श्लैष्मिकस्य निदानम् ।
"शीतं गुरु स्निग्धमचेष्टनञ्च
सम्पूरणं प्रस्वपनं दिवा च ।
गुल्मस्य हेतुः कफसम्भवस्य
सर्व्वस्तु दृष्टो निचयात्मकस्य ॥"

श्लैष्मिकस्य रूपम् ।
"स्तैमित्यशीतज्वरगात्रसाद-
हृल्लासकासारुचिगौरवाणि ।
शैत्यं रुजाल्पा कठिनोन्नतत्वं
गुल्मस्य रूपाणि कफात्मकस्य ॥"

द्वन्द्वजस्य रूपं यथा,—
"निमित्तलिङ्गान्युपलभ्य गुल्मे
द्विदोषजे दोषबलाबलञ्च ।

व्यामिश्रलिङ्गानपर[illegible]
क्षीणादिशेषोदीयमाना[illegible]

त्रिदोषजस्य रूपं यथा,—
"महारुजं दाहपरी[illegible]
घनोन्नतं शीघ्रविदाहि[illegible]
मनःशरीराग्निबलापह[illegible]
त्रिदोषजं गुल्ममसाध्य[illegible]

अथ स्त्रीणां रक्तजगुल्मनिदानं[illegible]
"नवप्रसूताऽहितभोजना [illegible]
या चामगर्भं विसृजेदृतौ [illegible]
वायुर्हि तस्याः परिगृह्य र[illegible]
करोति गुल्मं सरुजं सदाह[illegible]

स्त्रीणां रक्तजगुल्मलक्षणं यथा,—
"पैत्तस्य लिङ्गेन समानलिङ्गं
विशेषमप्यपरं निबोध ।
यः स्पन्दते पिण्डित एव नाङ्गै-
श्चिरात् सशूलः समगर्भलिङ्गः ॥
स रौधिरः स्त्रीभव एव गुल्मो
मासे व्यतीते दशमे चिकित्स्यः ।
स्त्रीणामार्त्तवजो गुल्मो न पुंसामुपजायते ।
अन्यस्त्वसृग्भवो गुल्मः स्त्रीणां पुंसाञ्च जा[illegible]

असाध्यलक्षणं यथा,—
सञ्चितः क्रमशो गुल्मो महावास्तुपरिग्रहः ।
कृतमूलः शिरानद्धो यदा कूर्म्म इवोन्नतः ।
दौर्ब्बल्यारुचिहृल्लासकासच्छर्द्यरतिज्वरैः ।
तृष्णातन्द्राप्रतिश्यायैर्युज्यते न स सिध्यति ॥
गृहीत्वा सज्वरं श्वासच्छर्द्यतीसारपीडितम् ।
हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनम् ॥
श्वासः शूलं पिपासान्नविद्वेषो ग्रन्थिमूढता ।
जायते दुर्ब्बलत्वञ्च गुल्मिनो मरणाय वै ॥

इति माधवकरः ।

तच्चिकित्सा यथा, —
"वातादिकेन यथोदितेन
पथ्यागमेनेन विशेषतो हि ।
संस्वेदनं स्निग्धमतिप्रवर्त्तं
[illegible]
[illegible] प्रायः [illegible]
पीतम्भोजन [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति [illegible] ।
[illegible]

व्याधानगरोदराश्मरियुतांश्च नीद्वयारोच-
कान् ।
उच्छ्रमभतिभ्रमश्च मनसो बाधिर्य्यमष्ठीलिकां
प्रत्यष्ठीलिकया सहामयहरते प्राक्पीतमुष्णा-
म्भुना ॥

हृत्कुक्षिवंक्षणकटीजठरान्तरेषु
वस्तिस्तनांशफलकेषु च पार्श्वयोश्च ।
शूलानि नाशयति वातबलामजानि
हिङ्ग्वाद्यमाद्यमिदमाश्विनसंहितोक्तम् ॥"
हिङ्ग्वादिचूर्णम् ॥ * ॥
"क्षीमाशुपचरेद्गुल्मं प्रत्येकञ्च त्रिदोषजम् ।
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ॥
क्षारपुष्कस्य लवणं पथ्याचूर्णं समं द्वयम् ।
शाणप्रमाणमश्नीयाच्चूर्णं गुल्मगदापहम् ॥
सर्ज्जिका शाणमाना स्यात्तावदेव गुडं भवेत् ।
उभयोर्वटिकां खादेद्गुल्मामयविनाशिनीम् ॥*
पलाशवज्रीशिखरिचिञ्चार्कतिलनालजाः ।
यवजः स्वर्ज्जिका चेति क्षारा अष्टौ प्रकीर्त्तिताः ॥
गुल्मशूलहराः क्षारा अजीर्णस्य च पाचनाः ।"
क्षाराष्टकम् ॥ * ॥
"सामुद्रं सैन्धवं काचं यवक्षारः सुवर्चलम् ।
टङ्कणं स्वर्ज्जिकाक्षारं तुल्यं चूर्णं प्रकल्पयेत् ॥
पञ्चक्षीरैरविक्षीरैरातपे भावयेत् त्र्यहम् ।
वेष्टयेदर्कपत्रेण दग्ध्वा भाण्डपुटे पचेत् ॥
तत्क्षारं चूर्णयेत् पश्चात् त्र्यूषणं त्रिफलां
तथा ।
यवानी जीरकौ वह्निचूर्णमेषाञ्च कारयेत् ॥
सर्व्वचूर्णसमं क्षारं सर्व्वमेकत्र कारयेत् ।
तच्चूर्णं टङ्कयुगलं सलिलेन प्रयोजयेत् ॥
गुल्मे शूले तथाजीर्णे शोथे सर्व्वोदरेषु च ।
मन्दे चाप्युदावर्त्ते प्लीह्नि चापि परं हितम् ॥
वातेऽधिके घृतैः कोष्णैर्हितं पित्तेऽधिके घृतैः ।
गोमूत्रेण कफाधिक्ये काञ्जिकेन त्रिदोषजे ॥
वज्रक्षार इति ख्यातः प्रोक्तः पूर्व्वं स्वयम्भुवा ।
सेवितो हरतेऽजीर्णं तथाजीर्णभवान् गदान् ॥"
वज्रक्षारः ॥ * ॥
"सुवर्चिका टङ्कमिता शाणमानार्द्रिकापि च ।
उभे भुञ्जीत युगपद्गुल्मामयनिवृत्तये ॥"
सुवर्चिका सोरा इति लोके ।
"शुक्तिकाचूर्णगुटिकां टङ्कमात्रां सुपेषयेत् ।
गुडेन शाणमानेन तान्निखेत् गुल्मरोगवान् ॥
गुल्मी कुमारिकामांसं कर्षार्द्धं गोघृतान्वितम् ।
निखेत् घोषाभयासिन्धुसंयुक्तं गोविधूलितम् ॥
कुमारिका घिउकुंयारी इति लोके ॥ * ॥
"वल्लूरं मत्स्यकं मत्स्यं शुष्कशाकानि वैदलम् ।
न खादेदालुकं गुल्मी मधुराणि फलानि च ॥
वैदलानां निषेधेऽपि माषकुलत्थयोर्नाविनिषेधः ।
इति सुश्रुतटीका । इति गुल्माधिकारः ॥ इति
भावप्रकाशः ॥
अथ गुल्मचिकित्सा ।
चाग्नेय उवाच ।
"कफपूत्योपचारेषु दोषैः संकुपितोऽनिलः ।

मन्दाग्निना हि जठरे जायते गुल्मरुङ् नृणाम् ॥
उदरं गर्ज्जते यस्य विषमाग्निश्च दृश्यते ।
तोदो वपुषि शूलञ्च वातगुल्मं विनिर्द्दिशेत् ॥
शोषोऽरतिः सपीतत्वं मन्दज्वरनिपीड़ितम् ।
तमोभ्रमपिपासार्त्तं गुल्मं तत् पित्तसम्भवम् ॥
शोफो जाड्यञ्च हृल्लासं तन्द्रालस्यं सशीतकम् ।
मन्दाग्निर्विड्विबन्धश्च गुल्मं तत् श्लेष्मसम्भवम् ॥
मोहो विभ्रमता जाड्यमरतिक्षुत्पिपासकम् ।
आलस्यं निद्रया चैवं गुल्मं तत् कफपैत्तिकम् ॥
निद्रालस्यञ्च दाहश्च शोषात् शूलञ्च सज्वरम् ।
वैवर्ण्यमरतिर्जाड्यं विड्बन्धो विकलाङ्गता ॥
तथातीसारमूर्च्छा च तृषाहृल्लासवेपथु ।
श्वासोऽरुचिरजीर्णत्वं गुल्मं तत्सान्निपातिकम् ॥
साध्यं केवलदोषोत्थं द्वन्द्वं कष्टेन सिध्यति ।
असाध्यं सन्निपातोत्थं वक्ष्यामस्तत्प्रतिक्रियाम् ॥
यकृत्चिकित्सितञ्चैव कथितञ्चोपचारणम् ।
तद्वत्प्लीह्ना समाख्यातो न चात्र कथितं पुनः ॥
चिकित्सोदरगुल्मस्य वक्ष्यते शृणु साम्प्रतम् ।
स्नेहनं रुचनञ्चैव पाचनं शोधनानि च ॥
संशमनं विरेकश्च वस्ति-स्नेह-निरूहणम् ।
चये पानञ्च चूर्णानि गुल्मोपचरणक्रिया ॥
शुण्ठीमूर्व्वा पञ्चमूलं लघुराला च दारु च ।
क्वाथोऽस्य चावशेषः स्यात् तत्समं क्षीरमेव च ॥
दधितत्सममेवन्तु पाचयेत्तत्समाग्निना ।
घृतं यावत् प्रपश्येच्च सिद्धसुत्तार्य्यते ततः ॥
तत्कृतं पानकेऽभ्यङ्गे भोजने च प्रदापयेत् ।
स्नेहं सप्तदिनं यावत् तथाच रुचणं हितम् ॥
दिनत्रयञ्च कर्त्तव्यं कथयाम्यत्र कोविद ! ।
शुण्ठी सौवर्चलं जीरे द्वे वा हिङ्गुसमन्वितम् ॥
काञ्जिकं पानमेतेषां रुचणं गुल्मशान्तये ।
गुल्मचिकित्सिते क्षारपाकोऽत्र प्रतिशुष्यते ॥
क्षारं पलाशार्ज्जुनशूरणस्य
क्षारं तथा वै सहयावशूकम् ।
सौवर्चलं सिन्धुभवोद्भिदञ्च
सामुद्रजं चापि विमिश्रयेच्च ॥
तोयं परिस्राव्य विधानतोऽपि
शुक्तं तथैतानि महौषधानि ।
पथ्याग्निशुण्ठी रजनीसुराह्वं
कुष्ठं विशाला च यमानिका च ॥
तथाजमोदा सहजीरके द्वे
षड्ग्रन्थिका हिङ्गुयुतञ्च चूर्णम् ।
क्षारोदकं मार्जविमिश्रमाणं
निहन्ति सर्व्वाण्यपि कोष्ठजानि ॥
गुल्मानि सर्व्वाणि विसूचिकानां
मन्दाग्निशूलानि भगन्दराणाम् ।
प्लीहोदराणाहमथो विबन्धं
निनाशनो रोगचयं नराणाम् ॥"
इति निरूहणम् ॥ * ॥
अथ विरेचनानि उच्यन्ते ॥ * ॥
"नागरं त्रिवृताचूर्णं पथ्या त्रिवृता त्रिगुणागुणम् ।
चूर्णं गुड़ान्वितं देयं वातगुल्मविरेचनम् ॥
दन्ती च भागमेकन्तु द्वौ भागौ च हरीतकी ।

त्रिवृतायास्त्रिभागः स्यात् शुण्ठ्याश्चत्वार एव च ॥
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुड़ेन तु ।
वटकं भक्षयेत् प्रातस्तस्योपरि जलं पिबेत् ॥
कथितश्च विरेकश्च वातगुल्मोपशान्तये ।"
इति वातगुल्मविरेचनम् ॥ * ॥
"पिबेदेरण्डतैलञ्च सर्कराक्षीरसंयुतम् ।
पित्तगुल्मविरेकाय श्रेष्ठमेतत् सुखावहम् ॥
आरग्वधं प्रवालानि तथैवारग्वधानि च ।
विभाव्यैरण्डतैलेन तत्पत्रैश्चैव वेष्टयेत् ॥
कर्द्दमेन प्रलिप्याथ अङ्गारेषु निधापयेत् ।
सुस्विन्नभर्ज्जितां ताञ्च भक्षयेत् शर्करान्विताम् ॥
विरेकं पैत्तिके गुल्मे हितं शुद्धविरेचनम् ।"
इति पित्तगुल्मविरेचनम् ॥ * ॥
"त्रिफला सुरसा शुण्ठी चूर्णं कृत्वा विभावयेत् ।
स्नुहीक्षीरेण वारैकं गुड़ेन सह मिश्रितम् ॥
विरेकः श्लेष्मगुल्मे च सर्व्वोदरविनाशनम् ।
शुण्ठी सौवर्चलं पथ्या विड़ङ्गञ्च पुनर्नवा ॥
चूर्णोऽपामार्गबीजानां स्नुहीक्षीरेण भावितः ।
गुड़ेन संयुतं खादेत् पश्चात् सोष्णं जलं पिबेत् ॥
विरेकः सर्व्वगुल्मेषु प्रशस्तो हितकारकः ॥
इति विरेचनम् । [कोकिला
क्षुक्षारनिशाविशालकदली स्यात् शूरणं
पालाशं दहनार्ज्जुनं शठिजयाऽपामार्गकुष्मा-
ण्डकम् ।
दग्ध्वा क्षारविपाचितं परिस्रुतं हिङ्गुत्रिकट्वन्वितं
गुल्मानाहविबन्धशूलहरणं सर्व्वोदराणां हितम् ॥
इति क्षारपानम् ॥ * ॥
"अजमोदा शठी दन्ती विड़ङ्गं शुण्ठितुम्बुरु ।
त्रिफला चित्रकश्चैव शुण्ठी कर्कटशृङ्गिका ॥
त्रिवृता च सुराह्वा च पुष्करं वृद्धदारकम् ।
तथाम्लवेतसश्चैव तिन्तिड़ीकश्च चित्रिलिः ॥
समन्तु मातुलुङ्गेन विभाव्यमेकतः कृतम् ।
त्रिभागहिङ्गुसंयुक्तं घृतेन चूर्णितं हितम् ॥
निहन्ति वातगुल्मञ्च सशूलमुदरन्तथा ।"
इत्यजमोदादि ॥ * ॥
हिङ्गुफलत्रिकजीरकयुग्मं
चित्रकभागिकक्रुष्ठविड़ङ्गम् ।
तुम्बुरुपुष्कर-विश्वसुराह्वं
क्षारयुगं लवणानि च पञ्च ॥
वातिकगुल्मविनाशनहेतुः
शूलकणञ्च नरस्य निहन्ति ॥"
इति वातगुल्मचिकित्सा ॥ * ॥
"विदारी क्षीरशुक्ला च पथ्या त्रिवृताच मधु ।
पेयः पित्तात्मके गुल्मे हितः शोषविनाशनः ॥
यष्टिकं त्रिफलक्वाथ तथा धात्रीफलं सिता ।
चूर्णं शम्भावयेत्कृष्ण पित्तगुल्मविनाशनम् ॥"
इति पित्तगुल्मचिकित्सा ॥
"त्रिकटुत्रिफला [illegible]
चूर्णं मर्द्दन वा क्षीरं [illegible] तम् ॥
श्लेष्मगुल्मविनाशाय [illegible] नमप्र
गोमूत्र कटुरसं [illegible]
क्षारं हि [illegible]

श्लेष्मगुल्मविनाशाय गुल्मोदरविनाशनम् ।
उत्तमा च मरिचं नागपुष्पंसमन्वितम् ।
निशोत्तृचेन संयुक्तं श्लेष्मगुल्मविनाशनम् ।”
इति श्लेष्मगुल्मचिकित्सा । ● ।
“गुडूची मीरपर्णं भार्गी चतुष्कं नागपुष्पकम् ।
क्षीरं हे नाटकंच च यवानी हिङ्गुसैन्धवम् ।
क्षारद्वयेन संयुक्तं चूर्णं मस्तुमेव च ।
वातश्लेष्मोद्भवे गुल्मे शूलमाशुप्रपद्यते ।
उत्तमा चर्म्मर्कं देवदारुपुनर्नवा ।
त्रिवृन्मोचरसेनैव नारीदुग्धसमन्वितम् ।
पीतं वातकफे गुल्मे शूलहारि परं मतम् ।”
इति वातश्लेष्मगुल्मचिकित्सा । ● ।
इति हारीते चिकित्सितस्थाने चतुर्थोऽध्याये ।

[illegible]

निवृत्तशार्त्तवं योन्यां प्रतिमासमवस्थितम् ।
कुक्षिं करोति तद्गर्भ-लिङ्गमाविष्करोति च ।
हृल्लासदौर्हृदस्तन्य-दर्शनं क्षामतादिकम् ।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत् ।
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ।
रुक्संभरदाहातिसारतृड्ज्वरादीनुपद्रवान् ।
गर्भाशये च सुतरां शूलंदुष्टासृगाश्रये ।
अन्याच्च स्यावरोगंस्थतोदस्पन्दनवेदनाः ।
न चाङ्गैर्गर्भवद् गुल्मः स्फुरत्यपि तु शूलवान् ।
पिण्डीभूतः स एवास्याः कदाचित् स्पन्दते चिरात् ।
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते ।
स दोषसंश्रयो गुल्मः सर्व्वो भवति तेन सः ।”
इति वाभटे निदानस्थाने पञ्चमेऽध्याये ।
“रूक्षान्नपानैरतिसेवनैर्वा
शोकेन मिथ्या प्रतिकर्म्मणा वा ।
विचेष्टितैर्वा विषमातिमात्रै:
कोष्ठे प्रकोपं समुपैति वायुः ।
कफञ्च पित्तञ्च स दूषयित्वा
प्रोद्धूय मार्गान् विनिबध्य ताभ्याम् ।
हृन्नाभिपार्श्वोदरवस्तिशूलं
करोत्यधो याति न बद्धमार्गः ।
पक्वाशये पित्तकफाशये वा
स्थितः स्वतः परसंश्रयो वा ।
स्पर्शोपलभ्यः परिपिण्डितत्वात्
गुल्मो यथा दोषमुपैति नाम ।
वस्ती हि नाभ्यां हृदि पार्श्वयोर्वा
स्थानानि गुल्मस्य भवन्ति पञ्च ।
पञ्चात्मकस्य प्रभवन्तु तस्य
वक्ष्यामि लिङ्गानि चिकित्सितञ्च ।
क्रियाक्रमतः सिद्धं गुल्मिनां गुल्मनाशनम् ।
प्रयत्नान्न चाप्य योगात् गुल्मनिबर्हणात् ।
रूक्षायामञ्च गुल्मं वातिकं तीव्रवेदनम् ।
बद्धविट् मारुतं स्नेहैरादितः समुपाचरेत् ।
भोजनाभ्यञ्जनैः पानैर्निरूहैः सानुवासनैः ।
स्निग्धस्य भिषजा स्वेदः कर्त्तव्यो गुल्मशान्तये ।
स्रोतसां मार्द्दवं कृत्वा जित्वा मारुतमुल्वणम् ।
भित्त्वा विबन्धं स्निग्धस्य स्वेदो गुल्ममपोहति ।
स्नेहपानं मतं गुल्मे विशेषेणोर्द्ध्वनाभिजे ।
हपुषाद्यं घृतम् ।
हपुषा चैव दध्नीका चव्यचित्रकमेव च ।
कषायैर्त्रिफलामिश्रैर्त्रिकटुकैर्विपाचितम् ।
मातुलुङ्गरसक्षीरैः ... ।
... ।
... ।
... ।
... ।”
इति हपुषाद्यं घृतम् । ● ।
“तैलं प्रसन्ना गोमूत्रमारनालं यवाग्रजः ।
गुल्मं जठरमानाहं पीतमेकत्र साधयेत् ।”
इति तैलपञ्चकम् । ● ।
“... ।
... गुल्मे ... ।
... ।

कुपितानिलमूलत्वाद्गूढमूलोदयादपि
गुल्मवद्वा विशालत्वाद् गुल्म इत्यभि...
स यस्मादात्मनिचयं गच्छत्यपृन्वित गुल्...
अन्तः सरति यस्माच्च न पाकमुपयाति ...
सदनं मन्दता वह्नेराटोपोऽन्त्रविकूजन...
विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा
द्वेषोऽन्ने वायुरूर्द्धंञ्च पूर्व्वरूपेषु गुल्मिनाम्
हृत्कुक्षिशूलं मुखकण्ठशोषो
वायोर्निरोधो विषमाग्निता च ।
ते ते विकाराः पवनात्मकाश्च
भवन्ति गुल्मेऽनिलसम्भवे तु ।
स्वेदज्वराहारविदाहदाह-
तृष्णाङ्गरागाः कटुवक्त्रता च ।
पित्तस्य लिङ्गान्यखिलानि यानि
पित्तात्मके तानि भवन्ति गुल्मे ।
स्तैमित्यमन्नेऽरुचिरङ्गसाद
च्छर्द्दिः प्रसेको मधुरास्यता च ।
कफस्य लिङ्गानि च यानि तानि
भवन्ति गुल्मे कफसम्भवे तु ।
सर्व्वात्मकः सर्व्वविकारयुक्तः
सोऽसाध्य उक्तः पतनञ्च वक्ष्ये ।
“न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम्
तं गर्भकालातिगमे चिकित्स्य
मसृग्भवं गुल्ममुशन्ति तज्ज्ञाः ।”
चिकित्सा यथा ।
“वातगुल्मार्द्दितं स्निग्धं युक्तं स्नेहविरे...
उपाचरेत् यथाकालं निरूहैः सानुवास...
पित्तगुल्मार्द्दितं स्निग्धं काकोल्यादिघृतेन ...
विरिक्तं मधुरैर्योगैर्निरूहैः समुपाचरेत् ।
श्लेष्मगुल्मार्द्दितं स्निग्धं पिप्पल्यादिघृतेन तु
तीक्ष्णैर्विरिक्तं तद्रूपैर्निरूहैः समुपाचरेत् ।
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः
पित्तवद्रक्तगुल्मिन्या नार्य्याः कार्य्यः क्रियाविधि...
विशेषमपरञ्चास्याः शृणु रक्तविभेदनम् ।
पलाशक्षारतोयेन सिद्धं सर्पिः प्रयोजयेत् ।
दद्याद्गुरवत्सिश्च पिप्पल्यादिघृतेन तु ।
उष्णैर्वा भेदयेद्भिन्ने विधिरासृग्दरोदितः ।
व्यापद्यदिक्रमश्चाग्नो वमातोञ्च घृतं दधि ।
विपक्वेक्षतः शस्तं वातगुल्मेऽनुवासनम् ।
चाङ्गेरीकपित्थानां वसा सर्पिश्च पैत्तिके ।
तैलं च्याङ्गलमाद्यान्तं तं गुल्मे कफोत्थिते ।
धात्रीफलानां स्वरसं बहुं त्रिफलाद्रवम् ।
प्रकीर्णा सैन्धवेनेति मद्धितं वातगुल्मिने ।
त्रिवृतयोषमिश्रं तु दद्याच्च पक्वदाडिमी ।
दीप्यकर्षञ्च मात्रान्तां ... ।
... ।
... ।
... ।
... ।
... ।
... ।

रसोनमस्ते मधि: मधसत्यस्मोन्वितम् ।
सुराप्लोन्दध्न-मस्तमसै: सह ।
दीप-दाडिमवृक्षाम्लपथानीद्यमैन्वैः ।
पिटूमदैनमाषाणोदीमवैष समांशिकैः ।
सिद्धघृतमस्कलार्थ:सागोमादमवन्नान् ।
कास्यवनास्वन्दापि-नीडमूलानिलान् भवेत् ।
रसमपमयागे तु पौधनोपै: भवेद्धतम् ।
स्यसोधानिलां सानि सकि वायुवृमर्दिवं ।
दशविणोलिनं हन्ति द्रगान्धिमान्धमंशमम् ।
आयमयादौ विर्मदेविमौपधुनं भ्रमम् ।
न्यायमां पदेधास्य पदेन्नृभासोरमम् ।
हन्ति गुल्मं यमोदनं द्रगान्धिमान्धमंशयम् ।
यथा दोदीपयन्यपि विविमृतमुसदिमानि-
वम् ।
मूलं हिङ्गादिकं वापि चूर्णं वा मोदकाश्रयम् ।
पिदद्गुल्मापर्दं वापि सर्पिश्चैव मदैव वा ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
गुल्मं सान्निपातिक चारोग्यं कृच्छ्रसाध्यम् ।"
"पोतं सुरासदा वापि सर्पिश्च । गुल्मनाशनम् ।
[illegible]
[illegible]

[illegible]

विरेचिरमासरं वा मधुरां वा हरीतकीम् ।
गुग्गुलुं त्रिवृतां दन्तीं द्रवन्तीं सैन्धवं वचाम् ।
मधुमद्य-पयोऽमाला-रसैर्वीजय वपनावनम् ।
एवं दोषात्मि निहालि विधेत् कल्पसानि तु ।
पिप्पलीपिप्पलीमूलचव्यचित्रकसैन्धवैः ।
चूर्णं हन्ति सुरागुल्मं शीघ्रं काले प्रयोजिता ।
वह्निर्विकासनो गुल्मी भजेन्न वत्सा भवात् ।
कुल्मापान् वा वहुलै धान् भक्षयेन्मलतोभवान् ।"
इत्युपरतन्त्रे हाव्यानं समसोऽध्याये गुल्मचिकित्-
सम् ।) सैन्यांगन्यासविशेषः । (यथा, महाभारते ।
१।२।१९-२० ।
"रथो रथौ गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ।
पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ।")
[illegible],—
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

गुल्मी, स्त्री, (गुल्माकारो विद्यतेऽस्या इति । "अतो
ऽनादिभ्योऽच् ।" ५ । २ । १२० । इत्यच् ततो
ङीष् ।) आमलकी । इला । वनी । वस्त्रदेश्म ।
इति मेदिनीकरादयो हेमचन्द्रश्च । गुल्म-
[illegible]
[illegible]
[illegible]
[illegible]
प्रकाशः ।
"[illegible] गुल्मिभिर्[illegible]")
गुल्फः, पुं, (गलतीव [illegible] । गल+
फन् । ततो कुन्द [illegible] ।) [illegible] ।
इति हेमचन्द्रः । ३ । २९ ।
गुवाकः, पुं, ([illegible]
[illegible] ।" [illegible] । इति
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

मनाशग्निहान्नीयमार्थे गङ्गादर्शनवत्प्रमाय-
श्चित्तमप्युक्तम् । यथा,—
"ताम्बूलं न सुते दत्त्वा गुवाकं भक्षयेद् यदि ।
तावच्चाण्डालतां याति यावद्गङ्गानदर्शनम् ॥")

गुह, ऊ न संवृतौ । इति कविकल्पद्रुमः । (भ्वा-उभं-सकं-सेट् ।) ह्रस्वी । ऊ, अगूहीत् अघुक्षत् । न, गूहति गूहते । गुहो गोऽपदेति दीर्घः । इति दुर्गादासः ॥

गुहः, पुं, (गूहति रक्षति पालयतीत्यर्थः देवसेनाम् । गुह + "इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः । नामनिरुक्तौ तु गुहावासमन्तिवास्यस्तीति अच् । एतयोर्व्युत्पत्त्योरेव क्रमात्सम्बन्धोदाहरणे द्रष्टव्ये । यथा, महाभारते । ३ । २२८ अध्याये ।
"हस्तवृद्धं नमः प्राहुर्गुहं [illegible] ।"
[illegible] ।
"[illegible] देवसेनापतिः [illegible] ।
[illegible] ।"
[illegible] कार्त्तिकेयः सेनापतिर्देवैः [illegible] । तस्य नामनिरुक्तिः । यथा, महाभारते । १३ । ८६ । ८०—८१ ।
"[illegible] ।
[illegible] ।
[illegible] ॥")
कार्त्तिकेयः । इत्यमरः । १ । १ । ४१ । षडाननः । इति हलायुधः । [illegible] । स तु [illegible] विष्णुसहस्रनामसु पठितः ।(यथा, रामायणे । ४ । १० । ३१ ।
"[illegible] ।
[illegible] ।"
[illegible] इति गुहः ।) विष्णुः । (यथा, महाभारते । १३ । १४९ । ६३ ।
"[illegible] गुहः ।"
महादेवः । यथा, महाभारते । १३ । १७ । ८० ।
"[illegible] ।")
[illegible] । (यथा, [illegible] ।
"[illegible] महान्
[illegible] ।")

गुहवक्त्री, स्त्री, (गुहस्य कार्त्तिकेयस्य [illegible] वा [illegible] ।) [illegible] । यथा, [illegible] ।
"[illegible] ।
[illegible] ।"
[illegible] । इति [illegible] ॥

गुहा, स्त्री, (गुह + कः । टाप् च ।) [illegible] । इति मेदिनी ।
[illegible] । (यथा, [illegible] । १ । १ । ८० ।
"[illegible] ।"
[illegible] । [illegible] । [illegible] ।

स्थातम् ४ गह्वरम् ५ । शालपर्णीविशेषः ६ । इति राजनिर्घण्टः । (हृदयम् । यथा, शतपथब्राह्मणे । ११ । २ । ६ । ५ ।
"तस्मादिदं गुहाहृदयम् ।" गूढा आच्छादिताः प्रियपदार्थाः यस्यां गूहतेऽस्यामात्मा इति वा । गुह + भिदादित्वादधिकरणे अङ् टाप् च । बुद्धिः । यथा, श्वेताश्वतरोपनिषदि ।
"अणोरणीयान् महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः ।")

गुहाशयः, पुं, (गुहासु गिरिगह्वरादिषु शेते अवतिष्ठते इति । शीङ् ल शयने + "अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् ।) व्याघ्रः । इति राजनिर्घण्टः । (गुहाशायित्वादेवास्य तथात्वम् । यथा, भावप्रकाशे ।
"सिंहव्याघ्रतरक्षुक्षतरक्षुद्वीपिनस्तथा ।
बभ्रुजम्बुकमार्ज्जारा इत्याद्याः स्युर्गुहाशयाः ॥"
गुहायां हृदये बुद्धौ वा शेते विराजते इत्यर्थः ।) विष्णुः । (यथा, श्वेताश्वतरोपनिषदि । "सर्व्वभूतगुहाशयः ।" यथा च । [शयः ।
"तावत् स भगवान् साक्षाद्योगाधीशो गुहाशयः ।
अवतीर्णः कविः सद्यो यथेदानीमनिन्दिता ॥"
इति श्रीभागवतम् ॥
(मायाः । यथा, मुण्डकोपनिषदि । २ । १ । ८ ।
"सप्त इमे लोका येषु चरन्ति प्राणा
गुहाशया निहिताः सप्त सप्त ।"
गुहाशायिनि त्रि ॥)

गुहिनं, क्ली, (गूहते इन्द्रादिभिराच्छन्नं भवतीति । गूहत्यनेनेति वा । गुह + बाहुलकात् इनन् ।) वनम् । इति शब्दरत्नावली ॥

गुहिनं, क्ली, (गूहते मारुतादिभिराच्छन्नं भवतीति । गुह + "गुधादिभ्यः किन् ।" उणां । १ । ५६ । इति इनच् । गुणनिषेधार्थं किच्च ।) वनम् । इत्युणादिकोषः ॥

गुहेरः, पुं, (गूहते लोहादिमंशादिकं विलोपयन् [illegible] । धातूनामनेकार्थत्वात्तथात्वमित्यवधेयम् । गुह + "मूलेरादयः ।" उणां । १ । ६१ । इति निपातनादेरक्प्रत्ययः ।) लौहकारः । इत्युणादिकोषः ॥ (गूहते रक्षतीति ।) गोप्ता । इति संक्षिप्तसारे उणादिवृत्तिः ॥

गुह्यं, क्ली, (गुहां गोपनं अर्हति वस्त्रादिभिराच्छादनमर्हतीति यावत् । गुहा + "तदर्हति ।" ५ । १ । ६३ । इति यत् । गुह + कर्म्मणि क्यप् इति केचित् ।) उपस्थः । स तु भगं शिश्नश्च । (यथा, मनुः ।
"कामार्तः पृथवीं तत्र गुमयेद् गुह्यमात्मनः ।")
तद्वति त्रि । इत्यमरः । ३ । ३ । १९३ । मैथुनम् । तत्पर्य्यायः । रहस्यम् १ उपांशु २ रहः ३ विविक्तः ४ निर्जनः ५ छन्नः ६ निःशलाकः ७ गूढम् ८ उपह्वरम् ९ । इति जटाधरः । (यथा, मार्कण्डेये । ६ । १ ।
"[illegible] ।"

यथा च, देवीभागवते । १ । ३ । ३७ ।
"पुराणगुह्यं सकलं समेतं
गुरोः प्रसादात् करुणानिधेश्च ।")

गुह्यः, पुं, (गुह्यो मत्स्यादेर्गोपनमर्हतीति [illegible]
"दण्डादिभ्यो यत् ।" ५ । १ । ६६ । इति [illegible]
कमठः । दम्भः । इति मेदिनी । ये, [illegible]
(गूहितुमर्हति योग्यो भवति उपनिषद् [illegible]
त्वात् यद्वा गुहायां बुद्धौ हृदयाकाशे [illegible]
मर्हति ध्यानायार्हतीति यावत् ।) वि[illegible]
इति तस्य सहस्रनाममध्ये पठितः । ([illegible]
महाभारते । १३ । १४९ । ७१ ।
"गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ।"
महादेवः । यथा, महाभारते । १३ । १७ । [illegible]
"यज्ञः पारसुतो गुह्यः प्रकाशो जङ्गमस्त[illegible]
गुह्यानि गूहति गुह्यान् प्रकटीकरोतीति । [illegible]
शालिप्रभावान्वितजीवविशेषः । यथा, [illegible]
७ । १०३ । ८ ।
"अध्वर्य्यवो घर्म्मिणः सिष्विदाना
आविर्भवन्ति गुह्या न केचित् ।"
उपदेवताविशेषः । यथा, महाभारते । [illegible]
२ । ४२ ।
"गुह्याः पितृगणाः सप्त ये दिव्या ये च मानुषा[illegible]
स्त्रियां टाप् । गायत्रीस्वरूपा देवी । [illegible]
देवीभागवते । १२ । ६ । ४२ ।
"गुर्व्वी गुणवती गुह्या गोप्तव्या गुणदायिनी[illegible]
गोपनीये त्रि । यथा, मनुः । ११ । २६५ ।
"सगुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् [illegible]
"प्रणवाख्यो गुह्यो गोपनीयः ।" इति [illegible]
भट्टः ।)

गुह्यकः, पुं, (गूहति निधिं धनविशेषं रक्षति [illegible]
गुह् + ण्वुल् । पृषोदरादित्वाद्यगागमे [illegible]
देवयोनिविशेषः । स तु कुबेरानुचरः [illegible]
रक्षको माणिभद्रादियक्षभेदः । इत्यमरभरत [illegible]
(कार्य्यानुपपत्त्यादिभिर्देवैस्तु बहुधोरा[illegible]
तथाच शाङ्करीयम् ।
"निधिं रक्षन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञका[illegible]
गुह्यं कुत्सितं कायति शब्दायते प्रका[illegible]
वा । कै + कः । यद्वा गुह्यं गोप्यं कं सुखं [illegible]
"शंसिदुहिगुहिभ्योऽस्ति" काशिकोक्तेः [illegible]
यद्वा गुह्यात् स्पर्शं विकीर्णाः परमजनाः [illegible]
गुह्यदेशात् कायति आविर्भवतीति । [illegible]
महर्षयो महस्यले । ५ । ६० ।
"आविर्भ्भूय तस्मात् गुह्यदेशात्तु परम्
निष्क्रम्य पुमानेकः पिङ्गलेक्षणः [illegible] ।
आविर्भूता यतो गुह्यात् तेन ते गुह्यका [illegible]
यथा, महाभारते । ३ । ३ । १० ।
"तत दिव्यं रथं दाशनमुयानि [illegible]
[illegible] ।"
[illegible] ।
[illegible] ।
"[illegible] ।
[illegible] ।

लोकैरध्युषितं लोकं स्वामनाम्नैव लोमशैः ।
गर्गो कथयसे तेरसौ को लोकः पुण्यतः स्तः ॥
गार्ग्यउवाच ।
गुह्यकानामयं लोकात्तेते ये गुह्यकाः स्मृताः ।
न्यायेनोपार्ज्य वित्तानि गूहयन्ति च ये शुचि ॥
स्वमार्गगा धनाढ्याश्च शूद्रप्रायाः कुटुम्बिनः ।
संविभज्य च भोक्तारः क्रोधासूयाविवर्ज्जिताः ॥
न तिर्थ्ये नैव वास्य संक्रान्त्यादि न पर्व च ।
नाधर्मश्च न धर्मश्च विदन्त्येते महामुग्धाः ॥
एकमेव हि जानन्ति कुलपूज्यो हि यो द्विजः ।
तस्मै गाः संप्रयच्छन्ति मन्यन्ते तद्वचः स्फुटम् ॥
मन्त्रद्विभागो यत्रापि तेन पुण्येन गुह्यकाः ।
भुञ्जते स्वर्गसौख्यानि देवत्वमकुतोभयाः ॥”
इति काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादः ॥ (मक्कानविशेषः । तस्य पाकप्रकारो यथा, शब्दार्थचिन्तामणिधृतपाकशास्त्रे ।
“समितां सर्पिषा भृष्टां सितायाचादिमभृताम् ।
एला लवङ्गकर्पूरमरीचपरिवासिताम् ॥
सितान्वमसितालम्बपट्टे पेश्यां घृते पचेत् ।
ततः खण्डे न्यसेत् पक्वे गुह्यकोऽयमुदाहृतः ॥”
अस्य गुणास्त्वेवं । यथा,—
“गुह्यको दृंहणो वृष्यो रुच्यः पित्तानिलापहः ।
मधुरोऽतिगुरुः पाके किञ्चित् सन्धानकृत् मरः ॥”)
गुह्यकेश्वरः, पुं, (गुह्यकानामीश्वरः प्रभुरधिपतिरित्यर्थः ।) कुवेरः । इत्यमरः । १ । १ । ७१ ॥ (यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे । ५ । ६१ ।
“यः पुमान् स कुवेरश्च धनेशो गुह्यकेश्वरः ॥”)
गुह्यगुरुः, पुं, (गुह्यः गोप्यः हृदयाभ्यन्तर्वर्त्ती अन्तर्यामिस्वरूपो गुरुः ।) शिवः । इति त्रिकाण्डशेषः ॥
गुह्यदीपकः, पुं, (गुह्येन गुह्यस्यज्योतिषा दीपयति प्रकाशयतीति । स्वयं गुह्यः सन् दीपयतीत्यके । दीप्+ण्वुल् ।) खद्योतः । इति शब्दचन्द्रिका ॥
गुह्यनिष्यन्दः, पुं, (गुह्यात् गुह्यदेशात् उपस्थच्छिद्रादित्यर्थः निष्यन्दते निर्गम्यते इति ।) मूत्रम् । इति राजनिर्घण्टः ॥
गुह्यपुष्पः, पुं, (गुह्यानि अदृश्यानि पुष्पाणि यस्य इति ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥
गुह्यबीजः, पुं, (गुह्यमदृश्यं बीजमस्य ।) भूतृणम् । इति राजनिर्घण्टः ॥
गुह्यभाषितं, क्ली, (गुह्यं रहस्यं भाषितम् ।) मन्त्रः । इति जटाधरः ॥ गुप्तवाक्यञ्च ॥
गू, ओ शि विट्सर्गे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) ओ, गूनः । शि, गुवति अगुवीत् । विट्सर्गे निर्हदनम् । इति दुर्गादासः ॥
गूः, पुं, गुः । विष्ठा । गूधातोः कर्म्मणि क्विप्प्रत्ययेन निष्पन्नः ॥ (गच्छत्यपानेन देहात् । गम्+कुः । मलोप इत्येके ॥)
गूढं, क्ली, (गुह+भावे क्तः ।) रहः । गुह्यम् । इति मेदिनी । ढे । १ ॥

गूढः, त्रि, (गुह+कर्म्मणि क्तः ।) संवृतः । गुप्तः । इत्यमरमेदिनीकरौ ॥ (यथा, पञ्चदश्याम् ।३।३८।
“शक्तिरस्त्यैश्वरी काचित् सर्व्ववस्तुनियामिका ।
आनन्दमयमारभ्य गूढा सर्व्वेषु वस्तुषु ॥”)
गूढजः, पुं, (गूढात् गुप्तभावादित्यर्थः गूढे गुप्तस्थाने वा जायते इति । गूढः सन् जायते इत्येके । गूढ+जन्+डः।) गूढोत्पन्नपुत्त्रः । इति मिताक्षरा ॥ (यथा, याज्ञवल्क्यः । २ । १३२ ।
“गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतो मतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥”)
गूढनीडः, पुं, (गूढः गोपनस्थलस्यः गूढे गुप्तस्थाने वा नीडः कुलायोऽस्य ।) खञ्जनपक्षी । इति शब्दमाला ॥
गूढपत्त्रः, पुं, (गूढः समाच्छन्नः पत्त्रेण योऽसौ । गूढं पत्त्रमस्येति केचित् ।) करीरवृक्षः । अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥
गूढपथः, पुं, (गूढः पन्था गतिर्यस्य समासनिष्पन्नत्वादच् ।) अन्तःकरणम् । इति हेमचन्द्रः ।६।५॥ गुप्तपथश्च ॥
गूढपात्, [द्] पुं, (गूढं पादयति । पद गतौ+णिजन्तात् क्विप् । यद्वा गूढाः पादा अस्य पृषोदरादित्वादलोपे साधुः ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥
गूढपादः, पुं, (गूढाः संवृताः पादा अस्य ।) सर्पः । इति शब्दरत्नावली ॥
(“पादानामपि विज्ञेये द्वे शते द्वे च विंशती ।”
इत्यागमः ।
आच्छादितपादे त्रि । यथा, महाभारते ।
“सन्तोषाग्रतलच्छन्नस्य विश्वैश्वर्य्यं करस्थितम् ।
उपानद्गूढपादस्य सर्व्वा चर्म्मावृतेव भूः ॥”)
गूढपुरुषः, पुं (गूढः गुप्तः पुरुषः छद्मवेशी राजप्रेरितो जनः इत्यर्थः ।) चरः । इत्यमरः ।२।८।१३॥
गूढपुष्पकः, पुं, (गूढः समावृत इव पुष्पैर्योऽसौ इवार्थे कन् । गूढानि संवृतानि पुष्पाण्यस्य इत्येके ।) वकुलवृक्षः । इति राजनिर्घण्टः ॥
गूढफलः, पुं, (गूढः संवृतप्रायः फलेनासौ । गूढं यथा स्यात् तथा फलतीत्येके ।) वदरः । इति राजनिर्घण्टः ॥
गूढमार्गः, पुं, (गूढः प्रच्छन्नः मार्गः ।) भूवोऽन्तरमार्गः । सुड्ङ्ग इति भाषा ॥ तत्पर्य्यायः । सुरङ्गा २ सन्धिला ३ । इति हेमचन्द्रः । ४।५२॥
गूढमैथुनः, पुं, (गूढं अन्यैरदृश्यं मैथुनं यस्य ।) काकः । इति त्रिकाण्डशेषः ॥
गूढवर्चाः, [स्] पुं, (गूढं वर्चोऽस्य ।) भेकः । इति त्रिकाण्डशेषः ॥
गूढवल्लिका, क्ली, (गूढा वल्लिका वल्ली यस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥
गूढसाक्षी, [न्] त्रि, (गूढः प्रच्छन्नः सन् यः अर्थिना प्रत्यर्थिवाक्यं श्रावितः तादृशः साक्षी ।) योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः सः । फरियादी गोपने राखिया आसामीर कथा याहाके शुनाइयाछे सेइ साक्षी इति भाषा ॥ तथा च नारदः ।
“अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् ।
यः श्राव्यते तदा गूढो गूढसाक्षी स उच्यते ॥”
इति व्यवहारतत्त्वम् ॥
गूढाङ्गः, पुं, (गूढानि अङ्गानि यस्य इच्छामात्रेणैवाङ्गानि अन्तःप्रवेशयति इति यावत् पर्य्यायः ।) कच्छपः । इति राजनिर्घण्टः ॥
गूढाङ्घ्रिः, पुं, (गूढः संवृतः शल्केनावृतोऽङ्घ्रिश्चरणोऽस्य ।) सर्पः । इति राजनिर्घण्टः ॥
गूढोत्पन्नः, पुं, (गूढं अन्यैरविज्ञातं यथा स्यात् तथा उत्पन्नो जातः ।) द्वादशविधपुत्त्रमध्ये पुत्त्रविशेषः । यथा, मनुः । ९ । १७० ।
“उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥”
अस्यार्थः । “यस्य गृहेऽवस्थितायां भार्य्यायां पुत्त्र उत्पद्यते सजातीयोऽयं भवतीति ज्ञानेऽपि कस्मात् पुरुषविशेषाज्जातोऽसाविति न ज्ञायते स गृहे अप्रकाशमुत्पन्नस्तस्य पुत्त्रः स्यात् यदीयायां भार्य्यायां जातः ।” इति कुल्लूकभट्टः ॥ (अयं हि बन्धुदायहारी । यथाह मनुः । ९।१५९ ।
“औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥”)
गूथं, क्ली पुं, (गवते शब्दायते गुवति पुरीषमुत्सृजतीति वा । गुङ शब्दे गुशि विष्ठोत्सर्गे वा +“तिथपृष्ठ गूथ यूथ प्रोथाः ।” उणां । २।१२। इति थक् दीर्घश्च ।) विष्ठा । इत्यमरः । २ । ६ । ६८ ॥ गु इति भाषा । (शरीरादिमलेऽपि कर्णगूथादिशब्ददर्शनात् ॥)
गूथलक्तः, पुं, (गूथे विष्ठायां रक्तः अनुरक्त आसक्त इत्यर्थः । ततो रस्य लत्वम् ।) पक्षिविशेषः । गुये शालिक इति भाषा । तत्पर्य्यायः । शरमखः २ चुलचूडः ३ सालिकः ४ । इति शब्दचन्द्रिका ॥
गूनः, त्रि, (गूयते पुरीषमुत्सृज्यते स्म इति । गु शि विष्ठोत्सर्गे+क्तः । “दुग्वोदीर्घश्चेति ।” नत्वं दीर्घश्च ।) कृतपुरीषोत्सर्गः । तत्पर्य्यायः । हन्नः २ । इत्यमरः । ३ । १ । ९६ ॥
गूर, ङ क उद्यमे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) दीर्घी । ङ क, भयेषु नो गूरयते मद्दीरगः । इति दुर्गादासः ॥ (तथा च कविरहस्ये । ५१ ।
“भयेषु नोद्गूरयतेऽसमाधवे-
ऽप्युक्तोऽपि यो नोद्गुरते स्वधर्म्मवित् ॥”)
गूर, ई य ङ वधे । गत्याम् । इति कविकल्पद्रुमः । (दिवां-आत्मं-सकं-सेट् ।) दीर्घी । तथा च ।
“दीपिपूरिजनिगारिधूरयः
काशिपाशिपदिशूरितूरयः ।
घूरिभूरिसिदिविद्यतिः क्लिशि-
चूरिडीयतिमनी दिवादिषु ॥
इति रघोद्धतायां चन्द्रेश्वरः ।” इति दुर्गादासः ।
गूरणं, क्ली, (गूर क ङ उद्यमे+भावे ल्युट् ।) उद्यमः । इत्यमरटीकायां रायमुकुटः ।३।२।११।

गृर्द, क निकेतने। कूर्दे। इति कविकल्पद्रुमः॥ (चुरा-परं-अकं-सेट्।) क, गूर्दयति। इति दुर्गादासः॥

गृर्द, ङ कूर्दे। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-अकं-सेट्।) ङ, गूर्दते। इति दुर्गादासः॥

गृञ्जकः, पुं, (गुदति पुरीषसुत्सृजत्यनेन यद्वा गुदति बहुलभक्षणेन सुखविवरात् पुरीषवद्वत्सृजतीति। गुध विष्ठोत्सर्गे + "पिनाकादयश्च।" उणां। ४। १५। इति आकः। कुटादित्वाद्गुणाभावः। निपातनात् दीर्घत्वम्।) गुवाकः। इति शब्दरत्नावली॥

गृधुरा, स्त्री, (भूषयतीति। निपातनात् भकारस्य गत्वम्।) मयूरचन्द्रकः। मयूरपिच्छचक्रम्। इति शब्दचन्द्रिका॥

गृ, सेके। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) गरति तरुं मेघः। इति दुर्गादासः॥

गृज, ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) अगर्जीत् गर्जति। इति दुर्गादासः॥ (यथा, पूर्व्वचातकाष्टके। ४।

"गर्जसि मेघ! न यच्छसि तोयं
चातकपक्षी व्याकुलितोऽहम्।
दैवादिह यदि दक्षिणवातः
क त्वं क्वाहं क्व च जलपातः॥")

गृज, इ ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) अगृञ्जी। इ, गृञ्जते। इति दुर्गादासः॥ (अयमिह कथनमिति मत्वा केचित् सकर्म्मकमपि वदन्ति॥)

गृञ्जनं, क्ली, (गृञ्जते अभक्ष्यत्वेन कथ्यते प्रायश्चित्तकत्वादिति। गृजि ध्वनौ + कर्म्मणि ल्युट्।) विषदिग्धपशोर्म्मांसम्। इति मेदिनी। ने। ५८। (गृञ्जते रोगनाशकतया भक्ष्यत्वेन कथ्यते इति।) मूलविशेषः। सलगम इति ख्यातः। तत्पर्य्यायः। शिखिमूलम् २ यवनेष्टम् ३ वर्त्तुलम् ४ ग्रन्थिमूलम् ५ शिखाकन्दम् ६ कन्दम् ७ डिण्डीरमोदकम् ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातरोगगुल्मनाशित्वम्। रुच्यत्वम्। दीपनत्वम्। हृद्यत्वम्। दुर्गन्धत्वञ्च। इति राजनिर्घण्टः॥

गृञ्जनः, पुं, (गृञ्जते अभक्ष्यत्वेन कथ्यते इति। गृजि + ल्युट्।) रसोनकः। रसुन इति भाषा। इति मेदिनी। ने। ५८। रक्तलशुनः। इति राजनिर्घण्टः॥ (अस्य अभक्षणीयत्वमुक्तं यथा, मनौ। ५। १९—२०।

"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः॥
अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनञ्चरेत्।
यतिचान्द्रायणं वापि शेषेषूपवसेदहः॥")

गृञ्जिरः, पुं, … । … इति भाषा। तत्पर्य्यायः। … २। इति हेमचन्द्रः। ३। ३१०। (… पाठः॥)

गृधः, पुं, (गृध्यति … । गृधु अभिकाङ्क्षायाम् + "… च।" उणां। ३। १६। इति सः; स च कित् इकारान्तादेशश्च।) कन्दर्पः। इत्युणादिकोषः॥ (त्रि, लुब्धः। यथा, ऋग्वेदे। ७। ८१। ५।

"गृत्समो राजा वरुणश्चक्र एतं दिविप्रेङ्खम्।"
"गृत्समः लुब्धः।" इति भाष्यम्॥)

गृध, इर् य उ लिप्सि। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट् क्त्वावेट्।) इर्, अगृधत् अगर्धीत्। असमात् पुषादित्वात् नित्यं ङ इत्यन्ये। य, गृध्यति धनं लुब्धः। उ, गर्द्धित्वा गृद्धा। इति दुर्गादासः॥

गृधुः, पुं, (गृध्यत्यनेनासमाद्वा इति। गृधु इर् लिप्सायाम् + "पृभिदिव्यधिगृधिधृषिहृषिभ्यः।" उणां। १। २३। इति कुः।) कामदेवः। इत्युणादिकोषः॥ (गृध्यति अभिलषतीति निरुक्तेः वाच्यलिङ्गत्वात्।) अभिलाषुकः। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृधूः, पुं, (गृध् + बाहुलकात् कूः।) गुह्यः। अपानम्। कुत्सितम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृध्नुः, त्रि, (गृध्यति कामयते लिप्सति वा धनमिति शेषः। गृध् + "त्रसिगृधिधृषिक्षिपेः क्नुः।" ३। २। १४०। इति क्नुः।) लुब्धः। इत्यमरः। ३। १। २१॥ (यथा, भागवते। ३। १४। २०।

"न वयं प्रभवस्त्वामनुकर्त्तुं गृहेश्वरि।
अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः॥"
क्वचित् गृध्नोऽपि पाठः॥)

गृध्नुता, स्त्री, (गृध्नोर्भावः इति तल्।) लुब्धता। तत्पर्य्यायः। रागः २ सङ्गः ३। इति त्रिकाण्डशेषः॥

गृध्रः, पुं, (गृध्यति अभिकाङ्क्षति मांसानीति। "सुसूधाञ्गृधिभ्यः क्रन्।" उणां। २। २४। इति क्रन्।) पक्षिविशेषः। शकुनी गृध्रिनी इति च भाषा। तत्पर्य्यायः। दाक्षाय्यः २ चक्राङ्गः ३ दूरदर्शनः ४। इति राजनिर्घण्टः॥ (यथा, महाभारते। ६। ३। ३१।

"गृध्रः संपतते शीर्षे जनयन् भयमुत्तमम्।"
इह लोके लोभवशात् यस्तु देवब्राह्मणस्वं हरति स पापात्मा परत्र गृध्रोच्छिष्टेनोपजीवति। यथाह मनुः। ११। २६।

"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥")

गृध्रनखी, स्त्री, (गृध्रस्य नख इवाकारोऽस्त्यस्याः इति। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। ततो ङीष्।) कुलिकवृक्षः। इति रत्नमाला। कालियाकड़ा इति भाषा। (यथा, सुश्रुते सूत्रस्थाने। ३८ अध्याये।

"करमर्द्दविकङ्कतकरीरकगृध्रनख्यश्च इति कण्टकसंज्ञः॥") कोलिवृक्षः। इति त्रिकाण्डशेषः॥

गृध्रपत्रा, स्त्री, (गृध्रस्य पत्रमिव पत्रमस्याः। गृध्र इव धूम्रवर्णं पत्रमस्या इत्येके।) धूम्रपत्राक्षुपः। इति राजनिर्घण्टः॥

गृध्रराजः, पुं, (गृध्रः राजा इवेत्युपमितसमासः। … गृध्रः, राजेति वा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) … यथा,—

"अथः कनकपुरम्पे … …
… …"
इति रामायणे।

गृध्रसी, स्त्री, (गृध्यति मांसमभिकाङ्क्षति भक्ष्यं गृध् + क्रन्। गृध्री मांसलोलुपी … पीडयति नाशयति वा। सो + कः। ङीष्।) वातरोगविशेषः। तल्लक्षणं यथा,—

"स्फिक्पूर्व्वा कटिपृष्ठोरुजानुजङ्घापदं क्रमात्
गृध्रसी स्तम्भरुक् तोदैर्गृह्णाति स्पन्दते मुहुः।
वाताद्वातकफात्तन्द्रा गौरवारोचकान्विता।
… … … …
… … … …
… … … …
गृध्रसीवातात् केवलात् स्फिगादिपर्य्यन्तं तोदैर्गृह्णाति। क्रमात् इति क्रमात्। तेन यथा वर्द्धते तथा तथा … नात्र सर्व्वत्र निर्द्दिष्टक्रमनियमः। तथा हि स्पन्दते स्फिगादिषु शिराकम्पं करोतीत्यर्थः।"

अथ तस्याश्चिकित्सा।

"गृध्रस्यार्त्तं नरं सम्यक् रेचनेन वमनेन च।
ज्ञात्वा निरामं दीप्ताग्निं वस्तिभिः समुपाचरेत्।
नाड़ी वस्तिविधिं कुर्य्यादूर्द्ध्वमङ्गुष्ठ कर्म्मणः।
… निरुद्धेकः स स्याद्भक्ष्येव दुग्धेन च।
तैलमेरण्डजं प्रातर्गोमूत्रेण पिबेन्नरः।
मासमेकं प्रयोगोऽयं गृध्रस्यारु प्रणाशनः॥

तैलं घृतं वार्द्रकमातुलुङ्ग-
रसं सचुक्रं सगुड़ं पिबेद्वा।
कट्यूरुपृष्ठत्रिकशूलगुल्म-
गृध्रस्युदावर्त्तहरः प्रयोगः॥ २॥
निर्गुण्ड्याः श्वेतशेफालि पिष्ट्वा क्षीरे विपाचयेत्।
तत्पायसं कटीमूले गृध्रस्याः परमौषधम्॥ ३॥
एरण्डमूलं बिल्वञ्च बृहती कण्टकारिका।
कषायो रुचकोपेतः पीतो दुग्धवस्तिकम्।
गृध्रसीं हरते शूलं चिरकालानुबन्धि च॥"
रुचकं सौवर्चलम्॥ ४॥
"गोमूत्रेरण्डतैलाभ्यां कृष्णाचूर्णं पिबेन्नरः।
दीर्घकालोत्थितां हन्ति गृध्रसीं कफवातजाम्॥

सिंहास्यदन्तीकृतमालकानां
पिबेत् कषायं बहु-तैलमिश्रम्।
यो गृध्रसीभग्नगतिः प्रसुप्तः
स शीघ्रगः स्याद्धि किमत्र चित्रम्॥ ६॥
इङ्गुदिमूलत्वचः सारो वारिणा परिपेषितः।
स पीतो नाशयेत् क्षिप्रमसाध्यामपि गृध्रसीम्॥
शेफालिकादलैः क्वाथो मृद्वग्निपरिपाचितः।
दुर्व्वारं गृध्रसीरोगं पीतमात्रः प्रणाशयेत्॥"
शेफालिकानिर्गुण्डी॥ ८॥
"रास्नायास्तु पलञ्चैकं पञ्च कर्षाणि गुग्गुलोः।
सर्पिषा वटिकां कृत्वा भक्षयेद् गृध्रसीहरीम्॥"

इति रास्नागुग्गुलुः ॥ ९ ॥
"रास्नाऽमृतारग्वधदेवदारु-
त्रिकण्टकैरण्डपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं
जङ्घोरुपृष्ठत्रिकपार्श्वशूली ॥"
इति रास्नापञ्चकक्वाथः ॥ १० ॥
"पथ्याविभीतामलकीफलानां
पलं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तस्य पलङ्कषायां
द्रोणे जले संस्थितमेकरात्रम् ॥
अर्द्धावशेषं क्वथितं कषायं
भाण्डे पचेत् तत् पुनरेव लौहे ।
अस्मिन् घनत्वं समुपागते च दद्यात्
प्रशाणि संचूर्ण्य पलार्द्धकानि ॥
विड़ङ्गदन्तीत्रिफलागुडूची-
कृष्णात्रिवृन्नागरकोषणानि ।
यथेष्टचेष्टस्य नरस्य प्रोक्तं
हिमाम्बुपानानि च भोजनानि ॥
निषेव्यमाणो विनिहन्ति रोगान्
स गृध्रसीं नूतनसञ्जाताश्च ।
प्लीहोदरासृग्जठराणि गुल्मं
पाण्डुत्वकण्डूवमिवातरक्तम् ॥
पथ्यादिको गुग्गुलुरेष नाम्ना
ख्यातः क्षितावप्रमितप्रभावः ।
बलेन नागेन समं मनुष्यं
जवेन कुर्य्यात्तुरगेण तुल्यम् ॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विशेषः ।
वातस्य सन्तानकरो विशेषा-
द्रोगेषु शस्तः सकलेषु तज्ज्ञैः ॥"
इति पथ्यादिगुग्गुलुः ॥ ११ ॥
इति भावप्रकाशः ॥
(तथा च ।
"रक्तवातसमुद्भूतान् दोषान् कृत्वा महामते ! ।
कट्युरुजानुमध्ये तु जायते बहुवेदना ।
गृध्रसीति विजानीयात् तेन नोक्तस्य लक्षणम् ॥"
"शतावरी बला द्वे च पिप्पली पुष्कराह्वयम् ।
चूर्णमेरण्डतैलेन गृध्रसीमपकर्षति ॥
अजमोदादिकं चूर्णमामवाते प्रकीर्त्तितम् ।
तदत्र योजनीयञ्च गृध्रसीनां निवारणम् ॥"
इति हारीते चिकित्सितस्थाने त्रयोविंशेऽध्याये ॥
"पार्ष्णिं प्रत्यङ्गुलीनां या कण्डरा मारुतार्द्दिता ।
सक्थ्युत्क्षेपं निगृह्णाति गृध्रसीं तां प्रचक्षते ॥"
इति वाभटे निदानस्थाने पञ्चदशेऽध्याये ॥
"पार्ष्णी प्रत्यङ्गुलीनान्तु कण्डरा यानिलार्द्दिता ।
सक्थ्नः क्षेपं निगृह्णीयाद् गृध्रसीति हि सा स्मृता ॥"
इति सुश्रुते निदानस्थाने प्रथमेऽध्याये ॥
चिकित्सास्या यथा,—
"गृध्रसीविश्वाचीक्रोष्टुकशिरःखञ्जपङ्गुलवातकण्टक-
पाददाहपादहर्षाववाहुकबाधिर्य्यधमनीगतवात-
रोगेषु यथोक्तं यथोद्देशञ्च शिराव्यधं कुर्य्या-
दन्यत्रावबाहुकाद्धातव्याधिचिकित्सितशास्त्रे-
क्षेत ॥" इति च सुश्रुते चिकित्सितस्थाने ५मे
अध्याये ॥)

गृध्राणी, स्त्री, (गृध्र इव धूम्रवर्णेन आनिति प्राणि-
तीति । अन् + पचाद्यच् । गौरादित्वात् ङीष् ।
संज्ञायां णत्वम् ।) धूम्रपत्राक्षुपः । इति राज-
निर्घण्टः ॥

गृष्टिः, स्त्री, (गृह्णाति सकृद्गर्भमिति । ग्रह च उपा-
दाने + कर्त्तरि क्तिच् पृषोदरादित्वात् साधुः ।)
एकवारप्रसूता गौः । तत्पर्य्यायः । सकृत्प्रसू-
तिका २ । इति हेमचन्द्रः ॥ (यथा, महा-
भारते । १३ । ९३ । ३३ ।
"प्रष्ठौहीनां पीवराणाञ्च तावदग्र्या गृष्टी धेनवः
सुव्रताश्च ॥"
यथा च ।
"गृष्ट्य एव शिरादीनि जले पक्वैकविंशतिम् ।
दत्ते तस्मिन् पचेत् सर्पिर्गृष्टिक्षीरं चतुर्गुणम् ॥
वीराहिमाषकाकोली स्वयं गुप्तर्षभर्द्धिभिः ॥
मेदया च समैः कल्कैस्तत् स्यात् कल्याणकं महत् ।
बृंहणीयं विशेषेण सन्निपातहरं परम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे उन्मादाधिकारे ॥
सकृत्प्रसूतस्त्रीमात्रम् । इति शब्दार्थचिन्ता-
मणिः ॥) वराहक्रान्ता । इत्यमरः ।२।४।१३५ ॥
बदरभेदः । इति मेदिनी । टे । १२ ॥ काश्मरी ।
इति राजनिर्घण्टः ॥

गृह, त् क ङ ग्रहे । इति कविकल्पद्रुमः ॥ (अदन्त-
चुरां-आत्मं-सकं-सेट् ।) सप्तमस्वरी । क ङ,
गृहयते । गृहो गृहणम् । इति दुर्गादासः ॥

गृहं, क्ली, (गृह्णाति धान्यादिकं जीवनार्थं यस्मि-
न्निति । ग्रह + "गेहे कः ।" ३।१।१४४ । इति
कः ।) इष्टकादिरचितवासस्थानम् । घर इति
भाषा ॥ (यथा, मनुः । २ । ३४ ।
"चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात् ॥"
अर्द्धर्चादित्वादेवायं शब्दो विभाषया पुंसि च
वर्त्तते । तत्र बहुवचनान्त एव । यथा,—
"गृहाः पुंसि च भूम्न्येव ।" इत्यमरः ॥ अत-
एव मनौ । ४ । २५० ।
"शय्यां गृहान् कुशान् गन्धानपः पुष्पं मणीन्
दधि ॥")
तत्पर्य्यायः । गेहम् २ उदवसितम् ३ वेश्म ४
सद्म ५ निकेतनम् ६ निशान्तम् ७ वस्त्यम् ८
सदनम् ९ भवनम् १० अगारम् ११ मन्दिरम् १२
गृहाः १३ निकाय्यः १४ निलयः १५ आलयः १६
वासः १७ कुटः १८ शाला १९ सभा २० । इत्य-
मरः । २ । २ । ४-५ ॥ पस्त्यम् २१ सादनम् २२
आगारम् २३ कुटिः २४ कुटी २५ गेहः २६
निकेतः २७ साला २८ मन्दिरा २९ ओकः ३० ।
इति भरतः ॥ निवासः ३१ संवासः ३२
आवासः ३३ अधिवासः ३४ निवसतिः ३५
वसतिः ३६ केतनम् ३७ । इति शब्दरत्नावली ॥
गयः ३८ कृदरः ३९ गर्त्तः ४० हर्म्म्यम् ४१
अस्तम् ४२ दुरोणे ४३ नीलम् ४४ दुर्य्याः ४५
स्वसराणि ४६ अमा ४७ दमे ४८ कृत्तिः ४९
योनिः ५० शरणम् ५१ वरूथम् ५२ छर्द्दिः ५३
छदिः ५४ छाया ५५ शर्म्म ५६ अजम ५७ ।
इति वेदनिघण्टौ ३ अध्यायः ॥ * ॥
अथ गृहारम्भकालः ।
"वैशाखश्रावणाषाढमार्गफाल्गुनकार्त्तिकाः ।
सुप्रशस्ता गृहारम्भे पत्नीपुत्त्रसम्वृद्धिदाः ॥
शुक्लपक्षे भवेत् सौख्यं कृष्णपक्षे भवेद्भयम् ।
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ॥
पूर्णिमाद्यष्टमीं यावत् पूर्व्वास्यं वर्जयेद् गृहम् ।
उत्तरास्यं न कुर्व्वीत नवम्यादिचतुर्द्दशीम् ॥
अमावस्याष्टमीं यावत् पश्चिमास्यं विवर्जयेत् ।
नवम्यादि तथा याम्यां यावत्कृष्णचतुर्द्दशीम् ॥
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ।
विष्कुम्भगण्डयोश्चैव गृहारम्भं न कारयेत् ॥
आदित्यद्वयरोहिणी मृगशिरो ज्येष्ठा धनिष्ठो-
त्तरा
रेवत्याश्च मघानुराधहरिभिः शुद्धैः स्वभावा-
दिभिः ।
सौम्यानां दिवसेऽथ गण्डरहिते योगे विरिक्ते
तिथौ
विष्टिव्यक्तदिने वदन्ति मुनयो वेश्मादिकार्य्यं
शुभम् ॥
त्रिभिस्त्रिभिर्वेश्मनि कृत्तिकाद्ये-
रुक्तेषु पुत्त्राभिधनानि प्रोक्ताः ।
शत्रोर्भयं राजभयञ्च मृत्युः
सुखं प्रवासश्च नव प्रभेदाः ॥
नाशं दिशन्ति मकरालिकुलीरलग्ने
मेषे घटे धनुषि कार्म्मसुदीर्घसत्त्वम् ।
कन्याझषे मिथुनके ध्रुवमर्थलाभो
ज्योतिर्व्विदः कलससिंहवृषेषु वृद्धिम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥
तत्र प्रवेशकालः ।
"ज्येष्ठापुनर्व्वसुवर्जं गृहारम्भोदितञ्च यत् ।
तत् सर्व्वं चिन्तयेद्वेश्मप्रवेशे दैवचिन्तकः ॥
हस्तापुष्यपुनर्व्वसुशतभिषाज्येष्ठाश्विनी रोहिणी-
रेवत्युत्तरविष्णुवातशशभृन्मूलाधनिष्ठासु च ।
कन्याकुम्भवृषालिसिंहमिथुनस्वर्च्चोदयेऽर्के शुभे-
शुक्लेन्द्वङ्गपतीतरश्मिदिवसे वेश्मप्रवेशः शुभः ॥
कृत्वाग्रतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनञ्च तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयं निलयं विशेत्तु ॥"
इति समयप्रदीपः ॥ * ॥
(गृहकरणे समयशुद्धिरुक्ता विश्वकर्म्मप्रकाशे
द्वितीयाध्याये यथा,—
"चैत्रे व्याधिमवाप्नोति यो नवं कारयेद्गृहम् ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभन्तु हानिं भाद्रपदे तथा ॥
युद्धञ्चैवाश्विने मासि कार्त्तिके धनधान्यकम् ।
धनवृद्धिं मार्गशीर्षे पौषे तस्करतो भयम् ॥

मासे चाश्विनके विद्यात् कार्त्तिके च फाल्गुने ।"
गृहसंस्थाने मेषादिराशिगतशुभाशुभं यथा
तत्रैव, द्वितीयाध्याये ।
"गृहसंस्थापनं सूर्य्ये मेषस्थे शुभदं भवेत् ।
वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं भवेत् ॥
कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्द्धनम् ।
कन्या रोगं तुला सौख्यं वृश्चिके धनधान्यकम् ।
कार्म्मुके च महाहानिर्मकरे स्याद्धनागमः ।
कुम्भे तु रत्नलाभः स्यात् मीने सद्मभयावहम् ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

सुनाथैरा सर्वापुरक सुरैश्वादिकुवत्रा महो ।"
अश्वाद्वितरगन्तु तथैव विस्तरशो महयम् ॥*॥
गृहकर्म्मणि वर्ज्यकाष्ठान्याह यथा, ज्योतिस्तत्त्वे ।
"सीरिश्चचोद्भवं दारु गृहेषु न निवेशयेत् ।
दग्धाधिवासं विहगैरनिलानलपीडितम् ॥
गजैर्विभग्नञ्च तथा विद्युन्निर्घातपीडितम् ।
चैत्यदेवालयोत्पन्नं नद्यम्भः सङ्गमजम् ॥
देवाद्यधिष्ठितं दारु गोपनिमज्जिभीतकान् ।
कण्टकिनोऽसारतरून् वर्जयेद् गृहकर्म्मणि ॥
वटाश्वत्थौ च निर्गुण्डी कोविदारास्तथैव च ।
प्लक्षं शाल्मलीश्चैव पलाशञ्च विवर्जयेत् ॥"*॥
गृहाणि गिहिंष्यतेऽनेन इति ।) नाम । (गृह्यते
क्रियते धर्म्माचरणमाणी इति ।) कलत्रम् ।
इति शब्दरत्नावली । तथा च स्मृतिः ।
"न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते ॥"

गृहकच्छपः, पुं, (गृहस्थितः कच्छप इव । हस्त-
पादादिरहितत्वाद्देशान्तरितहितकरचरणकच्छप-
वत् प्रतीयमानत्वादस्य तथात्वम् ।) पेषणशिला ।
तत्पर्य्यायः । पेषणिः२ पेषणीपट्टः३ गृहाश्मा४
इति शब्दरत्नावली ॥

गृहकन्या, स्त्री, (गृहस्थिता कन्येव । गृहपालित-
तया कन्याया इव रोगादिषु हितकारितया
चास्यास्तथात्वम् ।) घृतकुमारी । इति राज-
निर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"कुमारी गृहकन्या च कन्या घृतकुमारिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गृहकपोतकः, पुं, (गृहस्थितः गृहपालितो वा
कपोतः । ततः स्वार्थे संज्ञायां वा कन् ।) पक्षि-
विशेषः । पायरा इति भाषा ॥ तत्पर्य्यायः ।
प्रासादकुक्कुटः २ भिन्नीकण्ठः ३ पारावतः ४ ।
इति त्रिकाण्डशेषः ॥ (पारावतशब्देऽस्य विवृति-
र्ज्ञातव्या ॥)

गृहकर्त्ता, पुं, (गृहं वासार्थं तृणादिरचितनीडम्
करोतीति । गृह + कृ + तृच् ।) धूसरोऽति-
कण्ठकः । तत्पर्य्यायः । धान्यभक्षकः २
[illegible] ३ भीरुः ४ [illegible] ५ कलप्रियः ६ ।
इति राजनिर्घण्टः ॥ (गृहकारके, त्रि ॥)

गृहकारकः, पुं (गृहं करोतीति । गृह + कृ +
ण्वुल् ।) वर्णसङ्करजातिविशेषः । घरामी इति
भाषा । यथा, पराशरपद्धतौ ।
"[illegible] [illegible] च ।
[illegible] गृहकारकः ॥"

गृहकारी [न्] (गृहं करोतीति । गृह + कृ +
णिनि ।) कीटविशेषः । कुमरिपोका इति
भाषा । इति मेदिनी ॥ (यथा, मनुः । १२ । ६६ ।
"[illegible] गृहकारी [illegible] ॥")

गृहगोधा, स्त्री, ([illegible] ।) [illegible] ।
[illegible] इति च भाषा । तत्पर्य्यायः ।
[illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible]
[illegible] ६ [illegible] ७ गृहगोधिका ८ । इति
[illegible] । गृहगोधिका ९ [illegible] १० ।

भित्तिका ११ गृहालिका १२ । इति
चन्द्रः । ४ । ३६३ ॥

गृहगोधिका, स्त्री, (क्षुद्रा गोधा अल्पार्थे कः ।
ततः इत्वं टाप् च । गृहस्य गोधिका [illegible]
ज्येष्ठी । इत्यमरः । २ । ५ । १२ ॥ (
सुश्रुतसंहितायाम् । ८६ । ३७ ।
"श्विता श्यामा रक्ता कृष्णः [illegible]
शूकरी परपुष्टा च पुत्रामाता वामनः ।"
यथा च सुश्रुते कल्पस्थाने तृतीयेऽध्याये ।
[illegible]
भ्रमूकप्रचलाकगृहगोधिकाचतुष्पादकीट-
कायान्यै रंसुर नखविषाः ।")

गृहगोलिका, स्त्री, (गृहे गृहस्था वा [illegible]
निपातनात् साधुः ।) ज्येष्ठी । [illegible]
४ । ३५३ ॥

गृहणी, स्त्री, (गृहे नीयते क्रियते इति । नी-
संज्ञायां णत्वम् ।) काञ्जिकम् । इति [illegible]
घोषः ॥ (विवरणमस्याः काञ्जिकशब्दे ज्ञेयम्

गृहतटी, स्त्री, (गृहस्य गृहे वा गृहमध्ये
तटीव ।) वीथी । इति हारावली । ११
पिंड़ा दावोया इति च भाषा ॥

गृहद्रुमः, पुं, (गृहमिव द्रुमः ।) मेढ़शृङ्गी
इति रत्नमाला ॥

गृहनाशनः, पुं, (गृहं नाशयति प्रवेशेन
नश + णिच् + ल्युः ।) कपोतः । इति [illegible]
निर्घण्टः ॥ (कपोतोऽत्र वनकपोतः तत्कर्तृ
प्रवेशेनैव गृहनाशित्वात् । घुघु इति यस्य भाषा

गृहनीडः, पुं, (गृहे नीडं कुलायोऽस्य ।) चटक
इति हारावली । ८८ ॥

गृहपतिः, पुं, (गृहस्य पतिः ।) गृहस्थः । (य
अथर्व्ववेदे । १४ । १ । ५१ ।
"भगस्त्वा हस्तमग्रहीत् सविता हस्तमग्रहीत्
पत्नीत्वमसि धर्म्मणाहं गृहपतिस्तव ।")
मन्त्री । इति मेदिनी । ति । १८५ । धर्म्मः ।
शब्दरत्नावली ॥ (अग्निः । यथा, ऋग्वेदे । (
१२ । ६ ।
"अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ।"
स्त्री, गृहस्य पतिः "विभाषा सपूर्व्वस्य ।"
३४ । इति वा नान्तादेशे गृहपत्नी गृहपति
रूपद्वयम् । गृहस्वामिनी ।)

गृहपोतकः, पुं, (गृहं पोतः शिशुरिव यस्य
सः ।) वास्तुः । वाटी । इति शब्दरत्नावली ।

गृहबलिप्रियः, पुं, (गृहबलिः प्रियोऽस्य । [illegible]
बलिर्यस्य प्रिय इत्यर्थः ।) बककपोती । इति श
रत्नावली ॥ (काकादयोऽपि ॥)

गृहबलिभुक्, [ज्] पुं, (गृहे दत्तं बलिं भक्ष-
णार्थम् भुङ्क्ते इति । भुज + क्विप् । चटकः
इति हेमचन्द्रः । ४ । ४८३ ॥ बकः । काकः
इति वैद्यकम् ॥

गृहभूमिः, स्त्री, (गृहयोग्या भूमिः । [illegible]
[illegible] । इति हलायुधः । [illegible]
[illegible] गृहवर्त्म इत्यादयः ।

गृहमणिः, पुं, (गृहे मणिरिव ।) प्रदीपः । इति हेमचन्द्रः । ३ । ३५१ ॥

गृहमाचिका, स्त्री, (गृहे मचते शठति शुभभावेन तिष्ठतीति । मच + "ण्वुल् तृचौ" ।३।१।१३३ । इति ण्वुल् । ततष्टाप् । कापि अत इत्वञ्च ।) चर्म्मचटी । इति त्रिकाण्डशेषः ॥ चामचिका इति भाषा ॥

गृहमृगः, पुं, (गृहे मृग इव । यद्वा, गृहस्थितो मृगः पशुः ।) कुक्कुरः । इति हेमचन्द्रः ।४।३४५॥

गृहमेधी, [न्] पुं, (गृहैर्दारैर्मेधते सङ्गच्छते इति । गृह + मेध सङ्गमे + "सुप्यजातौ णिनि ।" ३ । २ । ७८ । इति णिनिः ।) गृहस्थः । इति हेमचन्द्रः । ३ । ४७२ ॥ (यथा, मनुः । ४ । ३१ ।

"वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः । पूजयेद्धव्यकव्येन विपरीतांश्च वर्ज्जयेत् ॥ ")

गृहमेधिनी,स्त्री (गृहं मेधते पुनाति शास्त्रोक्तदान-दयादाक्षिण्यादिना सङ्गच्छते इत्यर्थः। गृह + मेध + णिनिः । ततो ङीप् ।) मालिकी बुद्धिः । इति महाभारतम् ॥ (गृहमेधिन् + स्त्रियां ङीप् ।) गृहस्थपत्नीच ॥

गृहयाय्यः, पुं, (गृह ग्रहणे । गृहयति इति । गृह + "श्रुदक्षिस्पृहिगृहिभ्य आय्यः ।" उणां । ३ । ९६ । इति आय्यः । ततः "अयामन्तेति ।" ६।४। ५५ । इति णेरयादेशः ।) गृहस्थः । इत्युणादि-कोषः ॥

गृहयालुः, पुं, (गृहयते गृह्णातीति । गृह + "स्पृहि-गृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ।" ३ । २ । १५८ । इति आलुच् । "अयामन्तेति ।" ६ । ४ । ५५ । इति णेरयादेशः ।) ग्रहीता । ग्रहणशीलः । इत्यमरः । ३ । १ । ३० ॥

गृहवाटिका, स्त्री, (गृहसमीपस्था वाटिका आरामः ।) गृहसमीपवनम् । इति हारावली । १६८ ॥

गृहस्थः, पुं, ("न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।" अतएव गृहेषु दारेषु तिष्ठति अभिरमते इति । गृह + स्था + "सुपि स्थः ।"३।२।४। इति कः ।) गृही । द्वितीयाश्रमी । तत्पर्य्यायः । ज्येष्ठाश्रमी २ गृहमेधी ३ स्नातकः ४ गृही ५ । इति हेमचन्द्रः । ३ । ४७१ ॥ गृहपतिः ६ गेही ७ । इत्यमरः । ३ । ८ । १४ ॥ गृहाश्रमी ८ । [illegible] । इति हलायुधः ॥ कुटुम्बी १० । इति जटाधरः ॥ [illegible] ११ । इति शब्दरत्नावली ॥ * ॥ तस्य धर्म्मो यथा,—

"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः । [illegible]

यज्ञमिष्टं महायज्ञैः श्रद्दधानो यजेदिह ॥
देवतातिथिशिष्टाशी निरतो वेदकर्म्मसु ।
इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ॥
न पाणिपादचपलो न नेत्रचपलो मुनिः ।
न च वागङ्गचपल इति शिष्टस्य गोचरः ॥
नित्यं यज्ञोपवीती स्यात् शुक्लवासाः शुचिव्रतः ।
नियतो दमदानाभ्यां सदा शिष्टैश्च संविशेत् ॥
जितशिश्नोदरो मैत्रः शिष्टाचारसमन्वितः ।
वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥
अधीत्याध्यापनं कुर्य्यात् तथा यजनयाजने ।
दानं प्रतिग्रहञ्चापि षड्गुणां वृत्तिमाचरेत् ॥
त्रीणि कर्म्माणि यानीह ब्राह्मणानान्तु जीविका ।
याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः ॥
अथ शेषाणि चान्यानि त्रीणि कर्म्माणि यानि तु ।
दानमध्ययनं यज्ञो धर्म्मयुक्तानि तानि तु ॥
तेष्वप्रमादं कुर्व्वीत त्रिषु कर्म्मसु धर्म्मवित् ।
दान्तो मैत्रः क्षमायुक्तः सर्व्वभूतसमो मुनिः ॥
सर्व्वमेतद्यथाशक्ति विप्रो निर्व्वर्त्तयन् शुचिः ।
एवं युक्तो जयेत् स्वर्गं गृहस्थः संशितव्रतः ॥"
इत्याश्वमेधिकपर्व्व ॥

"सर्व्वेषामाश्रमाणान्तु द्वैविध्यन्तु चतुर्व्विधम् ।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्च्चनम् ।
गृहस्थस्य समासेन धर्म्मोऽयं द्विजसत्तमाः ॥
उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥
ऋणानि त्रीण्यपाकृत्य त्यक्ता भार्य्याधनादिकम् ।
एकाकी विचरेद्यस्तु उदासीनः स मौक्षिकः ॥"
इति गारुडे ४९ अध्यायः ॥

बाहुल्यन्तु तत्रैव।५०।५१।अध्यायद्वये द्रष्टव्यम् ॥*॥
गृहस्थस्याहारधर्म्मो यथा,—

"चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयम् ॥
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥"
इत्यादि मानवे ४ अध्यायः ॥

गृहस्थूणं, क्ली, ([illegible]) [illegible] ॥

गृहाः, [illegible] ॥

"गृह्यां गृहान् कृशान् गन्धानपः पुष्पं मणीन् दधि ।
धाना मत्स्यान् पयो मांसं शाकञ्चैव न निर्णुदेत् ॥"
गृह्यन्ते धर्म्माचरणाय इति । ग्रह + कः ।) दाराः । इत्यमरः । २ । ६ । ५ ॥ नित्यबहुवचनान्तोऽयं शब्दः ॥

गृहागतः, पुं, (गृहमागतः । आ + गम् + कर्त्तरि क्तः ।) अतिथिः । इत्यमरः । २ । ७ । ३४ ॥ (गृहमागते, त्रि । यथा, हितोपदेशे । "नाहं गृहागतं हन्मि ।")

गृहाधिपः, पुं, (गृहस्य अधिपः ।) गृहस्थः । इति हलायुधः ॥

गृहाम्लं, क्ली, (गृहे पर्य्युषितान्नादिना प्रस्तुतीकृतमम्लम् ।) काञ्जिकम् । इति त्रिकाण्डशेषः ॥

गृहायनिकः, पुं, (गृहरूपमयनं विद्यतेऽस्य इति ठन् ।) गृहस्थः । इति शब्दरत्नावली ॥

गृहारामः, पुं, (गृहस्य गृहे गृहसमीपस्थो वा आरामः ।) गृहसमीपे रचितमुपवनम् । तत्पर्य्यायः । निष्कुटः २ । इत्यमरः । २ । ४ । १ ॥

गृहालिका, स्त्री, (गृहे आलिरिव कायति प्रकाशते इति । गृहालि + कै + कः । ततष्टाप् ।) ज्येष्ठी । इति हारावली । १९४ ॥

गृहावग्रहणी, स्त्री, (गृहमवगृह्णातीऽनया इति । अव + ग्रह् + करणे ल्युट् । ततो ङीप् ।) देहली । इत्यमरः । २ । २ । १६ । [illegible] इति च भाषा ॥

गृहाश्रया, स्त्री, ([illegible] इति । आ + श्री + अच् । ततः स्त्रियां टाप् ।) ताम्बूली । इति शब्दचन्द्रिका ॥ पानेर गाछ इति भाषा ॥

गृहाश्मा, [न्] पुं, ([illegible]) [illegible] । इति शब्दरत्नावली । [illegible] इति भाषा ॥

गृहिणी, स्त्री, (गृहस्वामित्वमस्त्यस्याः । इति इनिः ङीप् च ।) भार्य्या । इति हेमचन्द्रः । ३ । १७७ ॥ (यथा, रघौ । ८ । ६७ ।

"गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम् ॥"

गृहं गृहकार्य्यं साधनत्वेनास्त्यस्या इति इनिः ङीप् च । गृहस्थकुटुम्बिनी । यथा, कुमारसम्भवे ६ ।

"[illegible]"

गृही, [न्] पुं, [illegible] । गृहस्थः । इत्यमरः । [illegible]

"[illegible]"

तत्र लक्ष्म्या वासो यथा, लक्ष्मीं प्रति गवां वाक्यम् ।
"अवश्यं मानना कार्य्या तवास्माभिर्यशस्विनि ! ।
शकृन्मूत्रे निवस त्वं पुण्यमेतद्धि नः शुभे ! ॥"
श्रीरुवाच ।
"दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः ।
एवं भवतु भद्रं वः पूजितास्मि सुखप्रदाः ॥"
इति महाभारते दानधर्म्मः ॥
(कृच्छ्रसान्तपने अस्य भक्षणविधिर्यथा, मनुः । ११ । २१२ ।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥"
"अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः ।
रोगार्त्तायाः प्रसूताया न गोर्गोमयमाहरेत् ॥"
इति चिन्तामणिधृतस्मृतिवचनम् ॥
गां सर्व्वतीर्थमयीं परिकल्प्य एतस्या गोमयं यमुनानदीतया परिकल्पयन्ति वृद्धाः । यदुक्तम्,—
"गोमयं यमुना साक्षात् गोमूत्रं नर्म्मदा शुभा ।
गङ्गा क्षीरन्तु यासां वै किं पवित्रमतःपरम् ॥"* ॥)
गवात्मके क्ली ॥

गोमयच्छत्त्रं, क्ली, (गोमयात् जातं छत्त्रं छत्त्राकारं शिलीन्ध्रमित्यर्थः ।) करकम् । इति त्रिकाण्डशेषः ॥ कोँड़कछाता इति भाषा ॥

गोमयच्छत्त्रिका, स्त्री, (गोमये गोमयप्रचुरे स्थाने जाता छत्त्रिका शिलीन्ध्रमित्यर्थः ।) गोमयच्छत्त्रम् । तत्पर्य्यायः । दिलीरम् २ शिलीन्ध्रकम् ३ । इति हारावली ॥ उच्छिलीन्ध्रम् ४ । यथा, "उच्छिलीन्ध्रमिवार्भकाः ॥" इति श्रीभागवतम् ॥

गोमयप्रियं, क्ली, (गोमयं प्रियं उत्पत्तिकारणत्वेन यस्य ।) भूतृणम् । इति रत्नमाला ॥ गन्धखड़ इति भाषा ॥

गोमयोत्था, स्त्री, (गोमयादुत्तिष्ठतीति । उत् + स्था + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । ततः स्त्रियां टाप् ।) गोमयजातकीटविशेषः । तत्पर्य्यायः । गर्द्दभी २ । इति हेमचन्द्रः । ४ । २७४ ॥

गोमयोद्भवः, पुं, (उद्भवत्यस्मादिति उद्भवः गोमय उद्भवः कारणं यस्य । यद्वा गोमयादुद्भव उत्पत्तिर्यस्य ।) आरग्वधः । इति शब्दचन्द्रिका ॥ सोनालु इति भाषा ॥

गोमांसं, क्ली, (गवां मांसम् ।) गवां पिशितम् । तद्भक्षणप्रायश्चित्तं यथा । "सुमन्तुः । गोमांसभक्षणे प्राजापत्यञ्चरेत् । इदमज्ञानतः सकृद्भक्षणविषयम् । यथाह पराशरः ।
अगम्यागमने चैव मद्यगोमांसभक्षणे ।
शुद्ध्यै चान्द्रायणं कुर्य्यान्नदीं गत्वा समुद्रगाम् ॥
चान्द्रायणे ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम् ।
अनडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम् ॥
इदं ज्ञानतोऽभ्यासे । शङ्खः ।
गामश्वं कुञ्जरोष्ट्रौ च सर्व्वं पञ्चनखं तथा ।
क्रव्यादं कुक्कुटं ग्राम्यं कुर्य्यात् संवत्सरं व्रतम् ॥
एतच्चिरकालाभ्यासे । संवत्सरकृच्छ्रव्रते पञ्चदशधेनवः । पुनरुपनयनञ्च । यथा, विष्णुः । विड्वराहग्रामकुक्कुटनरगोमांसभक्षणे सर्व्वेष्वेव द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्य्यात् ।" इति प्रायश्चित्तविवेकः ॥ (अस्य गुणा यथा,—
"गव्यं केवलवातेषु पीनसे विषमज्वरे ।
शुष्ककासश्रमात्यग्निमांसक्षयहितञ्च यत् ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥
"श्वासकासप्रतिश्यायविषमज्वरनाशनम् ।
श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
अन्यत् गोशब्दे 'गौः इत्यत्र' द्रष्टव्यम् ॥ * ॥
हठयोगमतेनास्य पारिभाषिकोऽर्थो यथा, हठयोगप्रदीपिकायाम् । ३ । ४७—४८ ।
"गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम् ।
कुलीनं तमहं मन्ये इतरे कुलघातकाः ॥
गोशब्देनोच्यते जिह्वा तत्प्रवेशो हि तालुनि ।
गोमांसभक्षणं तत्तु महापातकनाशनम् ॥")

गोमान्, [त्] त्रि, (बहवो गावोऽस्यास्मिन् वा सन्तीति । "तदस्यास्तीति ।" ५।२।९४। मतुप् ।) बहूनां गवां स्वामी । तत्पर्य्यायः । गवीश्वरः २ गोमी ३ । इत्यमरः । २ । ९ । ५८ ॥ (यथा, अथर्व्ववेदे । ६ । ६८ । ३ ।
"येनावपत् सविता क्षुरेण
सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्रह्माणो वपतेदमस्य
गोमानश्ववानयमस्तु प्रजावान् ॥")

गोमायुः, पुं, (गां विकृतां वाचं मिनोतीति । डुमि ञ + कृवापेत्युण् ।) शृगालः । इत्यमरः । २ । ५ । ५ ॥ (यथा, महाभारते । २ । ६७ । २३ ।
"ततो राज्ञो धृतराष्ट्रस्य गेहे
गोमायुरुच्चैर्व्याहरदग्निहोत्रे ॥"
अस्य ध्वनौ शुभाशुभफलं शृगालशब्दे द्रष्टव्यम् ॥) गन्धर्व्वविशेषः । इति जटाधरः ॥ गोमित्ति सान्तक्लीवोऽयम् ॥

गोमी, [न्] त्रि, (गौरस्त्यस्य । "ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्निति ।" ५ । २ । ११४ । इति मिनिः ।) गोमान् । इत्यमरः । २।९।५८ ॥ (यथा, मनुः । ९ । ५० ।
"यद्वन्यगोषु वृषभो वत्सानां जनयेच्छतम् ।
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ॥"
गौर्व्वीजमन्त्रवाक्यं अस्यास्तीति ।) उपासकः । इति मेदिनी । ने । ६० ॥

गोमी, [न्] पुं, (गौः कठोरध्वनिरस्यस्येति । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति मिनिः ।) शृगालः । इति मेदिनी । ने । ६० ॥ बुद्धभिक्षुशिष्यः । इति त्रिकाण्डशेषः ॥

गोमीनः, पुं, (गौरिव स्थूलो मीनः ।) मत्स्यविशेषः । यथा, मत्स्यसूक्ते ।
"शृणु देवि ! प्रवक्ष्यामि मांसभेदान् निबोध मे ।
न दद्यात् तिक्तकमठं पञ्चशृङ्गिणमेव च ॥
गोमीनं चक्रशकुलं वड़ालं राघवन्तथा ॥"

गोमुखं, क्ली, (गोर्मुखमिव मुखं प्रवेशद्वारमस्य ।) कुटिलागारम् । (गोर्मुखमिव आकृतिरस्य ।) वाद्यभाण्डम् । (एतदर्थे पुंलिङ्गोऽपि दृश्यते । यथा, गीतायाम् । १ । १३ ।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥"
तथा च महाभारते । ९ । ४६ । ५७ ।
"आड़म्बरान् गोमुखांश्च डिण्डिमांश्च महास्वनान् ॥")
लेपनम् । इति मेदिनी । खे । ८ ॥ (यथा, माघे । ३ । ४८ ।
"शुकाङ्गनीलोपलनिर्म्मितानां
लिप्तेषु भासा गृहदेहलीनाम् ।
यस्यामलिन्देषु न चक्रुरेव
मुग्धाङ्गना गोमयगोमुखानि ॥")
चौरक्रियमाणसुरङ्गाभेदः । सिँधविशेष इति भाषा ॥ इति त्रिकाण्डशेषः ॥ (आसनविशेषः । तल्लक्षणं यथा, हठयोगप्रदीपिकायाम् ।१।२० ।
"सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखाकृति ॥")
जपमालागोपनार्थं वस्त्रनिर्म्मितयन्त्रं यथा,—
"चतुर्व्विंशाङ्गुलमितं पट्टवस्त्रादिसम्भवम् ।
निर्म्मायाष्टाङ्गुलिमुखं ग्रीवां तत् षड्दशाङ्गुलम् ॥
ज्ञेयं गोमुखयन्त्रञ्च सर्व्वतन्त्रेषु गोपितम् ।
तन्मुखे स्थापयेन्मालां ग्रीवामध्यगतः करः ॥
प्रजपेद्विधिना गुह्यं वर्णमालाधिकं प्रिये ॥"
इति मुण्डमालातन्त्रम् ॥
अपि च मायातन्त्रे ।
"गोमुखादौ ततो मालां गोपयेन्मातृजारवत् ॥"

गोमुखः, पुं, (गोर्मुखमिव मुखं यस्य ।) नक्रः । यक्षविशेषः । इति हेमचन्द्रः । ४ । ४१५ ॥ (मातलिपुत्त्रः । यथा, महाभारते ।५।१००।८ ।
"बहुशो मातले ! त्वञ्च तव पुत्त्रश्च गोमुखः ॥"
वत्सराजमन्त्रिपुत्त्रविशेषः । स पुनः वत्सराजसुतस्य मन्त्रिणामन्यतमः । यथा, कथासरित्सागरे । २३ । ५७ ।
"ततो नित्योदिताख्यस्य प्रतीहाराधिकारिणः ।
इत्यकापरसंज्ञस्य पुत्त्रोऽजायत गोमुखः ॥")

गोमुखी, स्त्री, (गोर्मुखमिव आकृतिरस्याः । स्त्रियां ङीष् ।) हिमालयाद्गङ्गापतने गोमुखाकारगुहा । इति लोकप्रसिद्धिः ॥ राढ़देशस्थनदीविशेषः । गोमुड़ इति ख्याता ॥

गोमूत्रं, क्ली, (गोर्मूत्रम् ।) गोप्रस्रावः । चोना इति भाषा ॥ तत्पर्य्यायः । गोजलम् २ गोऽम्भः ३ गोनिष्यन्दः ४ गोद्रवः ५ । (कृच्छ्रसान्तपने गोमूत्रभक्षणविधिर्यथा, मनुः । ११ । २१२ ।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं [illegible]न्तपनं स्मृतम् ॥")
अस्य गुणाः । [illegible]म्

मधुरम्। कफवातलत्वदोषनाशित्वम्। पित्तकारित्वम्। दीपनत्वम्। मेध्यत्वम्। मतिप्रदत्वञ्च। इति राजनिर्घण्टः॥ शीतलत्वम्। मार-कत्वम्। कषायत्वम्। गुल्मगुल्मोदरनाशकत्वम्। कृमिमुखरोग(क्षयकासश्वासमहोत्पत्तिकुष्ठकामलाश्वास-शोथपाण्डुनाशित्वञ्च)। सारकत्वम्। प्रमेहरक्तपित्त-शोथदकफपित्तनाशित्वम्। पूरकात् कर्णशूल-नाशित्वम्। सर्वथा गुणाधिकत्वञ्च। इति भावप्रकाशः॥

("गोमूत्रं तीक्ष्णं क्षारमेतं कषायं
मेध्यं हृद्यं दीपनं पाचनञ्च।
मलाकृष्टं रक्तपित्तप्रमेह
शूलाढ्यकृष्टोदररोगमुष्ण॥
कर्णव्याधिनाशनं शूलकृमिरोगान्
गुल्मानाह-मलदोषक्षय-कफरोगान्।
कासं श्वासं सर्वोदरशिरोरोगान्
गोमूत्रं हन्ति चापि पाण्डुरोगान्॥"

इति प्रथमखण्डे वातादिव्याधौ हारीतेनोक्तम्।
"गोमूत्रं कटुतीक्ष्णोष्णं सक्षारत्वान्न वातलम्।
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित्॥
शूलगुल्मोदरानाह[illegible]
[illegible] प्रयोजयेत्॥"
इति सुश्रुते सूत्रस्थाने [illegible]।
[illegible]
[illegible]। मधुरम्।
"[illegible]
[illegible]।")

गोमूत्रिका, स्त्री, (गोमूत्रस्य आकार इव आकारो यस्याः। "[illegible]" [illegible]) [illegible]। [illegible]। [illegible]। मधुरम्। [illegible]। इति राजनिर्घण्टः॥ ([illegible]) चित्रकाव्यविशेषः। यथा,—
"[illegible]
[illegible]॥"
[illegible]। इति [illegible]। (उदाहरणं यथा, [illegible]। ११। १९।
"[illegible]
[illegible]॥"
"[illegible]
[illegible]॥"
इति [illegible]।
[illegible]
[illegible]॥"
इति [illegible]।)

[illegible]। इति राजनिर्घण्टः॥ [illegible], यथा,—

"रत्नं मारक्तं पुष्पं रागो माणिक्यमेव च।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्यमित्यपि॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव।"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥ अस्य परीक्षागुणादिकञ्च गोमेदकशब्दे द्रष्टव्यम्॥ कक्कोलः। इति हारावली। २६१॥ द्वीपविशेषः। तन्नामनिरुक्तिर्यथा,—

"गोमेदे गोपतिर्नाम राजाभूद्धीमतोऽग्रतः।
यास्योऽभूद्द्विकल्याणामीतथ्याभो मनोः कुले॥
स तेषु हरियज्ञाय प्रस्तेषु भ्रगून् गुरून्।
वव्रे सं गौतमः कोपादभ्रमत् सोऽगमत् क्षयम्॥
यज्ञवाटेऽस्य हर गावो दग्धाः कोपाग्निना मुनेः।
तन्मेदसा मही हन्त गोमेदः स ततोऽभवत्॥"

इति चिन्तामणिधृतवचनानि॥

प्लक्षद्वीपस्थवर्षाचलभेदः। यथा, विष्णुपुराणे। २। ४। ६—७।

"मर्यादाकारकास्तेषां तथान्ये वर्षपर्वताः।
सप्तैव तेषां नामानि शृणुष्व मुनिसत्तमाः॥
गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा।
सोमकः सुमनाश्चैव वैभ्राजश्चैव सप्तमः॥")

गोमेदकं, क्ली, (गोमेद + स्वार्थे कन्।) पीतमणिः। काकोलम्। पत्रकम् इति मेदिनी। के। १८६॥

गोमेदकः, पुं, (गोमेद + स्वार्थे कन्।) स्वनामख्यातमणिः। तत्पर्यायः। गोमेदः २ राहुरत्नम् ३ तमोमणिः ४ स्वर्भानवः ५ पिङ्गस्फटिकः ६। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातकोपविकारनाशित्वम्। दीपनत्वम्। पाचनत्वम्। धारणे पापनाशित्वञ्च। इति राजनिर्घण्टः॥ तस्य परीक्षा यथा,—

"हिमालये वा सिन्धौ वा गोमेदमणिसम्भवः।
स्वच्छकान्तिर्गुरुः स्निग्धो वर्णाढ्यो दीप्तिमानपि॥
अमलः पिङ्गरो धन्यो गोमेद इति कीर्तितः।
चतुर्धा जातिभेदस्तु गोमेदेऽपि प्रकाश्यते॥
ब्राह्मणः शुक्लवर्णः स्यात् क्षत्रियो रक्त उच्यते।
वाचीनां वैश्यजातिस्तु शूद्रास्तु नील उच्यते॥
छाया चतुर्विधा श्वेता रक्ता पीतासिता तथा॥
दुग्धधाराः सिताभावाः
स्निग्धो मधुर्याप्तिमधुरासः।
स्वच्छस्तु गोमेदमणिर्धृतोऽयं
करोति लक्ष्मीं धनधान्यवृद्धिम्॥
मधुविकारोऽतिसरोऽश्मभावः
संशोधितो वा स्वितः कदोऽपि।
करोति गोमेदमणिर्विनाशं
सर्वाभिसौभाग्यधनादिकानां॥
दि दोषा यदि वै विप्राः गोमेदमणावपि।
[illegible]॥
[illegible] गोमेदमणिधारिणम्॥
[illegible] गोमेदमणिस्तु सत्यं
[illegible]।
[illegible] विद्रुमपुष्पराग
[illegible]॥

चतुर्विधानामेषान्तु धारणं परिस्मरन
इति भे.[illegible]
(कनक-गोमेदक-विषमणि-श्री
सुक्तामणिश्चेति।" इति सुश्रुते सूत्र
अध्याये॥)

गोमेदसन्निभः, पुं, (गोमेदस्य सन्निभः) दुग्धपाषाणः। इति राजनिर्घण्टः॥

गोमेधः, पुं, (मेधहिंसायम् + भावे घञ्। हिंसा यत्र।) यज्ञविशेषः। तत्र [illegible] मन्त्रेषु स्त्रीलिङ्गपाठात्। तस्य [illegible]
[illegible]
दीर्घरात्रित्वम्। तस्य प्रयोगः [illegible] चतुर्थ। यज्ञमानस्य स्वर्गः फलं गोम प्राप्तिः। तस्य च कलौ निषेधो यथा,—
"अश्वालम्भो गवालम्भः संन्यासः पलपैतृकम्।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्॥"
इत्यादितत्त्वादिकल्पसत्त्वपुर[illegible]

गोरक्षः, पुं, (गां रक्षतीति। रक्ष + "कर्मण्यण्"। ३। २। १। इत्यण्।) अश्वभनामौषध[illegible] हेमचन्द्रः। नागरङ्गः। गोरक्षके त्रि। मेदिनी। पे। ३६॥ (यथा, मनुः। ८
(गोरक्षकान् वाणिजिकांस्तथा
लवान्॥" स्वनामख्यातो योगिविशेषः। हठविद्यया मत्स्येन्द्रः सिद्धपुरुषः। यथा योगप्रदीपिकायाम्। १। ५।
"श्री-आदिनाथमत्स्येन्द्रशाबरानन्दभैरव
चौरङ्गीमीनगोरक्षविरूपाक्षबिलेशयाः
एतत्प्रदिष्टयोगप्रकरणानि गोरक्ष
वर्तन्ते। तत्र आसनप्राणसंरोधप्रत्याहार
ध्यानसमाधयः षट् योगाङ्गानि उक्ता
शिवोपासकानां 'कण् फट्' इत्यादि
गुरुर्शिवनाथ एव धर्मप्रयोजकः। अ
योगिनः एवं शिवावतारं गुरुं मन्य
प्रवर्तितहठयोगमभ्यस्यन्ति। गोर
आदिनाथस्य पौत्रो मत्स्येन्द्रनाथस्य पु
दिति तद्देशीयैर्गाथायां भण्यते॥)

गोरक्षकर्कटी, स्त्री, (गोरक्षा गोर कर्कटी।) चिर्भिटा। इति भावप्रकाश

गोरक्षजम्बूः, स्त्री, (गोरक्षा जम्बूः।) गोरक्षतण्डुला। इति त्रिकः॥ गोध इति जटाधरः॥

गोरक्षतण्डुला, स्त्री, (गोरक्षा तण्डुला। लताविशेषः। गोरक्षचाउलिया इति तत्पर्यायः। गाङ्गेरुकी २ नागबला ३ ह्रस्वगवेधुका ५ ह्रस्वफलिका। [illegible] इति रत्नमाला॥

गोरक्षतुम्बी, स्त्री, (गां अलं रक्ष[illegible] अत्र। गोरक्षः तुम्बः। तद्वत् तुम्बाकार गोरक्षेति नामिका तुम्बी वा।) [illegible] इति राजनिर्घण्टः॥

गोरक्षदुग्धा स्त्री, (गोरक्षं गोनाशकं दु[illegible] यस्याः।) शुद्रक्षुपविशेष। [illegible]

णी ६ तामदुग्धा ३ रसायनी ४ बहुपर्णी ५ ता ६ वीरा ७ अन्नगन्धीयनी ८ । स्या गुणाः । मधुरत्वम् । रुच्यत्वम् । गंग्राहि- । हिमत्वम् । मन्दीपत्वकारित्वम् । रस- दुग्धप्रदत्वञ्च । इति राजनिर्घण्ट: ॥

ी, स्त्री, (गां रक्षति पालयति इति । "कर्म- ण् ।" ३ । २ । १ । इति अण् । ततो ङीप् ।) क्षुपविशेषः । सा तु मालवे प्रसिद्धा । तत्- यः । गर्पदन्ती २ दीर्घदन्ती ३ सुदन्तिका४ फला ५ गन्धबहुला ६ गोपाली ७ पञ्च- णिका ८ । अस्या गुणाः । मधुरत्वम् । तिक्त- । शिशिरत्वम् । दाहपित्तविस्फोटवातपती- रत्वरदोषनाशित्वञ्च । गोरक्षदुग्धा । कुमा- री । इति राजनिर्घण्टः ॥

:, पुं, (गवा वाचा रक्षुर्मृगविशेष इव ।) भेदः । सप्तकः । वन्दी । इति मेदिनी । १ ८५ ॥ क्वचित् पुस्तके सप्तकस्थाने नप्तकोऽपि ठः ॥

, पुं, (गवि इन्द्रिये रटतीति । रट्+अच् ।) त्वदिरः । इति राजनिर्घण्टः ॥

ा, स्त्री, (गुर्+भावे ल्युट् ।) गुरणम् । र्यते गम्यते फलमनेनेति । गुर+करणे ल्युट् ।) दामः । इत्यमरटीका ॥

:, पुं. (गवां रसः ।) दुग्धम् । दधि । तक्रम् । ति हेमचन्द्रः । ३ । ७२ ॥ (यथा, गोः रामा- णे । ३ । २२ । ७ ।

प्राप्तकामा जनपदाः सम्पन्नघनगोरसाः ।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥"
विपदा गुरवो रूक्षा ग्राहिणस्तक्रपिण्डकाः ।
गोरसानामयं वर्गो नवमः परिकीर्त्तितः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

सजं, क्ली, (गोरसात् जायते इति । गोरस+जन् +"अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति ड: ।) तक्रम् । इति राजनिर्घण्टः ॥

ाटी, स्त्री, (गां मनुष्यवद्वाचं रटतीति । रट्+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ततो ङीप् ।) शारिकापक्षी । इति हेम- चन्द्रः । ४ । ४०२ ॥

राटिका, स्त्री, (गोराटी+स्वार्थे कन् । टाप् पूर्व्वह्रस्वश्च । ततो निपातनात् साधुः । गोरा- टिका इत्यपि दृश्यते ।) शारिकापक्षी । इति राजनिर्घण्टः ॥

रिका, स्त्री, (गोराटिका+पृषोदरात् साधुः ।) शारिकापक्षी । इति राजनिर्घण्टः ॥

रुतं, क्ली, (गो रुतं रवः श्रूयते यावता पर्य्येति प्रेषः । गोशब्दः श्रुतिगोचरत्वेन व्यस्यस्य इत्यच् इत्येके वस्तुतस्तु पारिभाषिकोऽयं शब्दः ।) क्रोशद्वयम् । इति हेमचन्द्रः । ३ । ५५१ ॥ (गवां रुतं रवः इति तत्पुरुषसमासे तु गवां शब्दमात्रे । तत्तु कालादिभेदेन स्वामिनर- पतिप्रभृतीनां शुभाशुभकरं स्यात् । यथा, हंहत्संहितायाम् । ६२ । १—३ ।

"गावो दीनाः पार्थिवस्याशिवाय
पादैर्भूमिं कुट्टयन्त्यश्च रोगान् ।
मृत्युं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
पत्युर्भीतास्तस्कराणां रुवन्त्यः ॥
अकारणे क्रोशति चेदनर्थो
भयाय रात्रौ वृषभः शिवाय ।
भृशं निरुद्धा यदि मक्षिकाभि-
स्तदाशु वृष्टिं सरमात्मजैर्वा ॥
आगच्छन्त्यो वेश्म बम्भारवेण
संसेवन्त्यो गोष्ठवृद्धै गवां गाः ।
आर्द्राङ्ग्यो वा हृष्टरोमृग्यः प्रहृष्टा
धन्या गावः स्युर्महिष्योऽपि चैवम् ॥")

गोरोचं, क्ली, (गोभिः तेजोभिरुच्यते दीप्यते इति । रुच्+अच् । गा इन्द्रियाणि इन्द्रियोपलक्षि- तानि शरीरादीनि रोचयति दीपयति औष- धादियोगेनेत्यर्थः । रुच्+णिच्+अच् ।) हरि- तालम् । इति राजनिर्घण्टः ॥

गोरोचना, स्त्री, (गोर्जाता रोचना हरिद्रा इव ।) स्वनामख्यातपीतवर्णद्रव्यम् । तत्तु गोमस्तकस्य- शुष्कपित्तम् । यथा, माधवकरे ।

"पित्तेपयेद्वस्तिगतं सशुक्रं
मूत्रं सपित्तं पवनः कफं वा ।
यदा तदाश्मर्य्युपजायते च
क्रमेण पित्तेष्विव रोचना गोः ॥"

तत्पर्य्यायः । रुचिः २ शोभा ३ रुचिरा ४ शोभना ५ शुभा ६ गौरी ७ रोचनी ८ पिङ्गा९ मङ्गल्या १० मङ्गला ११ शिवा १२ पीता १३ गौतमी १४ गया १५ वन्दनीया १६ काञ्चनी १७ मेध्या १८ मनोरमा १९ श्यामा २० रामा २१ । इति राजनिर्घण्टः ॥ वन्द्या २२ रोचना २३ । अस्या गुणाः । हिमत्वम् । तिक्तत्वम् । वश्य- मङ्गलकान्तिकारित्वम् । विषालक्ष्मीग्रहोन्माद- गर्भस्रावक्षतासननाशित्वञ्च । इति भावप्रकाशः ॥ रुच्यत्वम् । पवित्रताश्रृङ्गारहितकारित्वम् । कृमिकुष्ठनाशित्वम् । भूतोपशमनत्वम् । जन- मोहनत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, कुमारे । ७ । १५ ।

"विन्यस्तशुक्लागुरु चक्रुरङ्गं
गोरोचनापत्रविभक्तमस्याः ।"
"क्रमेण पित्तेष्विव रोचना गोः ।"

इति माधवकृतरुग्विनिश्चयस्याश्मर्य्यधिकारे ॥)

गोर्दं, क्ली, (गुर्+"वन्दादयश्च ।" उणां ।४।९८। इति दन्प्रत्ययेन निपातनात् साधुः ।) मस्ति- ष्कम् । मस्तकस्थघृतम् । इत्यमरः । २।६।६५ ॥ (मस्तिष्कशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

गोलं, क्ली, (गुड्+भावे घञ् डस्य लत्वं च ।) मण्डलम् । इति मेदिनी । ले । २५ ॥ (यथा, भागवते । ३ । २३ । ४३ ।

"प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसं- [स्थया ॥")

गोलः, पुं, (गुड्+भावे घञ् अजित्येके । डस्य लत्वम् ।) सर्व्ववर्त्तुलः । इति हेमचन्द्रः ॥ मदन- वृक्षः । इति रत्नमाला ॥ जारात् विधवाया: सुतः । इति धरणी ॥ (यथा, याज्ञवल्क्यः । १ । २२२ ।

"अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः ॥")
बोलः । इति जटाधरः ॥ भूगोलः खगोलश्च । (यथा, भागवते । ५ । २० । ४३ ।
"सूर्य्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्च
विंशतिः ॥")

यथा, सिद्धान्तशिरोमणौ ।
"गोलं श्रोतुं यदि तव मतिर्भास्करीयं श्रृणु [त्वम् ॥"

एकराशौ षड्ग्रहयोगः । यथा, प्रश्नकौमुद्याम् ।
"षड्ग्रहाणामेकस्मिन् यदि भवति मर्त्यो नियमति- स्तदा गोलो योगः प्रलयपदमिन्द्रोऽपि लभते । भयेनोको रघः परिहरति पुत्रञ्च जननी नृपाणां नाशः स्यात् ज्वलति वसुधा शुष्यति नदी ॥"

एकराशौ सप्तग्रहयोगश्च । यथा, मयूरचित्रके ।
"सप्तग्रहा यदैकस्था गोलयोगस्तदा भवेत् ।
दुर्भिक्षं राष्ट्रपीड़ा च तस्मिन् काले क्षयश्च च ॥"

अपि च । [संख्याख्याः ।
"एकादिगृहोपेतैरुक्तान् योगान् विहाय
गोलयुकशूलकेदारपाशदामाख्यवीनाः स्युः ॥
दुःखितदरिद्रघातुकशठविकरदुःशीलपशुप-
निपुणानाम् ॥
जन्मक्रमेण दुःखितः परभाग्यैः सर्व्व एवैते ॥"
इति दीपिका ॥

गोलकं, क्ली, (गुड्+घञ् । स्वार्थे कन् च । ण्वुल् इत्येके ।) गोलोकम् । यथा, तन्त्रे ।
"यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके ॥"

गोलकः, पुं, (गुड्+घञ् । ततः स्वार्थे कन् । डस्य लत्वं च । ण्वुल् इत्येके ।) मृते भर्त्तरि जारजः । इत्यमरः ॥ रांड़ेर छेले इति भाषा ॥ (यथा, मनुः । ३ । १५६ ।
"शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥")
अलिञ्जरः । गुड़ः । पिण्डः । इति हेमचन्द्रः ॥ गन्धरसः । इति रत्नमाला ॥ कलायः । इति शब्दचन्द्रिका ॥ मटर इति ख्यातः ॥

गोला, स्त्री, (गां पृथ्वीं सर्व्वं जगदित्यर्थः स्वशक्ति- व्यापकतया लाति प्रलयकाले स्वस्मिन् लाति गृह्णाति इति वा ।) दुर्गा । (गां बहुयोजनपथं जलरूपशरीरव्यापकतया लाति ।) गोदावरी । (गां वाचं लाति । ला+क्विप् ।) सखी । कुनटी । पत्राञ्जनम् । मण्डलम् । अलिञ्जरः । बालक्रीड़नकाष्ठम् । इति मेदिनी । ले । २५ ॥

गोलाङ्गूलः, पुं, (गौर्लाङ्गूलवल्लाङ्गूलमस्य ।) वानरः । (यथा, रामायणे । ६ । १०५ । ८ ।
"निरुजो निर्व्रणांश्चैव सम्पन्नबलपौरुषान् ।
गोलाङ्गूलांस्तथैवर्क्षान् द्रष्टुमिच्छामि मानद ! ॥"
तत्पर्य्यायः । कपिलास्यः २ दधिशोणः ३ नगाटनः ४ । इति त्रिकाण्डशेषः ॥ कृष्णवानरः । इति राजनिर्घण्टः ॥

गोलासः, पुं, (गां पृथ्वीं भूमिमित्यर्थः लासयति उल्लासयति विभूषयति इति यावत् ।) गोमय- च्छत्रिका । शिलीन्ध्रम् । इति हारावली ।२५॥

समर्पयस्व भद्रं ते ततः कर्म्म प्रहास्यसि ।
शुभाशुभपरित्यागी क्षीणे निःशेषकर्म्मणि ।
लयमाप्स्यसि गोविन्दं तद्ब्रह्म परमं महत् ॥"
तन्नाममाहात्म्यं यथा,—
"ये तिष्ठन्तः स्वपन्तश्च गच्छन्तश्चलिते क्षुते ।
संकीर्त्तयन्ति गोविन्दं ते वसुधाया: सुदूरतः ॥"
इति च वह्निपुराणे यमानुशासननामाध्यायः ॥
(अस्य ध्यानं यथा,—
"फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्च्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥")
गोविन्दद्वादशी, स्त्री, (गोविन्दप्रीतये या द्वादशी गोविन्दाख्या द्वादशी वा । गोविन्दप्रिया द्वादशीत्येके ।) फाल्गुनशुक्लद्वादशी । यथा,—
"फाल्गुने द्वादशी शुक्ला या पुष्येणैव संयुता ।
गोविन्दद्वादशी नाम सा स्याद् गोविन्दभक्तिदा ॥
तस्यामुपोष्य विधिना भगवन्तं प्रपूजयेत् ।
लिखितः पापनाशिन्यां विधिर्योऽत्रापि स स्मृतः ॥"
तन्माहात्म्यञ्च ब्रह्मपुराणे श्रीवशिष्ठमान्धातृ-संवादे ।
"फाल्गुनाऽमलपक्षे तु पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥
तस्यामुपोष्य विधिवन्नरः संक्षीणकल्मषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति ॥
आमर्द्दकी द्वादशीति लोके ख्यातैषमेव हि ।
यत्र आमर्द्दकीपूजा व्रतमस्यां विशेषतः ॥"
तदुक्तं ब्राह्मे तत्रैव पापनाशिनीमाहात्म्य-प्रसङ्गे ।
"फाल्गुने तु विशेषेण विशेषः कथितो नृप ।
आमर्द्दक्या व्रतं पुण्यं विष्णुलोकप्रदं शुभम् ॥"
प्रभासखण्डे च । श्रीदेवीमहेशसंवादे ।
"फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः ।
स्नात्वा नद्यां तड़ागे वा वाप्यां कूपे गृहेऽपि वा ॥
गत्वा गिरौ वने वापि यत्र सा प्राप्यते शिवा ।
क्षीरोदे मथ्यमाने तु यदा वृक्षः समुत्थितः ॥
आमर्द्दादिवदेव्यास्तेन सामर्द्दकी स्मृता ।
शिवा लक्ष्मीः स्मृतो वृक्षः सेव्यते सुरसत्तमैः ॥
देवैर्ब्रह्मादिभिः सर्व्वैर्धात्री वैष्णवः स्मृतः ।
तत्र गत्वा हरिः पूज्यो वृक्षमूलेऽथवा शिवा ॥
पूज्या पुष्पैः शुभे रात्रौ कार्य्यं जागरणं हरेः ।
करकं जलपूर्णन्तु कर्त्तव्यं पात्रसंयुतम् ॥
हविष्यान्नन्तु कर्त्तव्यं दीपः कार्य्यो विधानतः ।
एव जागरणं कार्य्यं कथाश्रवणतत्परैः ॥
उपवासे देहिनः पापैः कायिकैः कायसम्भवैः ।
मुच्यन्ते च नराः सर्व्वे पूज्यन्ते हरिमन्दिरे ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥
[...]ष्ठा, स्त्री, (गवां विष्ठा मलम् ।) गोमयम् । इति राजनिर्घण्टः ॥
[...]ट्, स्त्री, (गवां इन्द्रं महः ।) गोसमहः । [...] रूपायुधः ॥

गोवृन्दारकः, पुं, (गौर्व्विन्दारक इव पूज्य इति शेषः । "वृन्दारकनागकुञ्जरैः पूज्यमानम् ।" २।१।६२ । इत्यनेन सूत्रेणोपमितसमासे याश्रादेराकृति-गणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनमिति वार्त्तिकम् ।) श्रेष्ठगौः । इति कलापव्याकरणम् ।
गोवृषः, पुं, (गोषु स्त्रीगोष्वित्यर्थः वर्षति सिञ्चति रेतः । वृष + "इगुपधेति ।" ३ । १ । १३५ । इति कः ।) वृषः । इति शब्दरत्नावली ॥ (यथा, मनु. । ८ । १५० ।
"कौशाधो गोवृषो यानमलङ्कारश्च वेश्म च ।"
"कौशाधः कर्षकः गवां सेक्ता वृषो यानमश्वादि ।"
इति कुल्लूकभट्टः ॥)
गोशकृत्, क्ली, (गवां शकृत् विष्ठा ।) गोमयम् । इति जटाधरः ॥ (यथा, मनुः । ५ । १०२ ।
"उदकुम्भं सुमनसो गोशकृन्मृत्तिका कुशान् ।"
पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"गोमयं जगलं गोविट् गोवर्म्मं तच्च गोशकृत् ॥")
गोशालं, क्ली स्त्री, (गवां शाला "विभाषा सेनेति ।" २ । ४ । २५ । इति विभाषया क्लीवत्वम् ।) गोगृहम् । इति लिङ्गादिसंग्रहे अमरः ॥ गोयालि इति भाषा ॥ (गोशालायां जातः । "स्थानान्तगोशालखरशालाच्च ।" ४।३।३५ । जातार्थप्रत्ययस्य लुक् । ततो विभाषासेनेति नपुंसकत्वे ह्रस्वत्वम् । गोशालजाते त्रि ॥)
गोशीर्षं, क्ली, (गोः शीर्षं शीर्षदेशाकारो विद्यते ऽस्य कर्षमपर्वतैकदेशजातानां चन्दनभेदानां शीर्षभागस्य तद्रूपतया तथात्वम् ।) चन्दनम् । इति राजनिर्घण्टः ॥ हरिचन्दनम् । इत्यमरः ॥
"गोः शीर्षं गोशीर्षं तदाकारे मलयैकदेशे जातं कालताम्रयामिश्रवर्णमुत्पलगन्धि अतिसुरभि शीतलतया सदैव सर्पैर्वेष्टितम् ।" इति भरतः ॥
(यथा, गोः रामायणे । ४ । ४१ । ५८ ।
"गोशीर्षचन्दनं यत्र पद्मकाग्निसमप्रभम् ॥"
यवक्षियते यस्मिंश्चिद्यथा,—
"सोत्सर्गो यरणादूयस्य स्वेदः प्रच्यवते भृशम् ।
लेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम् ॥"
इति चरके इन्द्रियस्थानेऽष्टमेऽध्याये ॥)
गवां मस्तकञ्च ॥
गोशीर्षकः, पुं, (गोशीर्षमिव कायति प्रकाशते इति । कै + कः ।) द्रोणपुष्पीवृक्षः । इति रत्न-माला ॥ (स्वार्थे कन् । चन्दनविशेषः ॥)
गोशृङ्गः, पुं, (गोः शृङ्गमिव शृङ्गं शीर्षभागो-ऽस्य । स्वनामप्रसिद्धः पर्व्वतविशेषः । यथा, महाभारते । २ । ३१ । ५ ।
"निषादभूमिं गोशृङ्गं पर्व्वतप्रवरन्तथा ।"
अत्रैव पर्व्वते चरन्निमाना मन्देहा नाम राक्षसा निवसन्ति । ते हि देवराजमहेन्द्रेणाभिशप्ताः सन्तः सूर्य्योदये जले पतन्ति रजन्यां पुनरुत्-पतन्ति । एतद्विवरणं यथा, रामायणे । ४ । ४० । ४२—४४ ।
"त्वत्पयासुखदं दिव्यं गोशृङ्गं नाम पर्व्वतम् ।
तस्य शृङ्गसहस्रेषु मन्देहा नाम राक्षसाः ॥

[...]परिक्रमाना [...] गोष्ठः [...] अभिगम्य [...] वनैश्चरः । इति [...] माली स्त्री ॥
गोषड्गवं, क्ली, (गवां षड्गवम् । "[...] षड्गवे गोऽश्वगोयुगषड्गवम् ।" [...] इत्यात् ।) गोषट्कम् । इति [...] रणम् ॥
गोष्ट, इ संघाते । इति कविकल्पद्रुमः ॥ (भ्वां- पर्रा-सेट् ।) महाणो रास्री [...] इ, गोष्टते याम्यं लोकः । इति दुर्गादासः ॥
गोष्ठं, क्ली, (गावस्तिष्ठन्त्यत्र इति । स्था [...] स्थः ।" ३ । २ । ४ । इति कः । [...] इत्येके ।) गोस्थानम् । गोठ । इति [...] इत्यमरः ॥ (यथा, रामायणे । ३ । ३१ । [...]
"भिंदैव निहतं गोष्ठे गौः सशृङ्गैर्गोष्ठे [...]
दृष्ट्वा संग्रामपथेन रामबाणमहाहतः ।"
प्रश्रयविशेषः । स तु व्याकार्ये [...] यस्मिन्नो भवति । यथा । गोगोष्ठं सोष्टे [...] इत्यादि । इति भरतः ॥ (गोष्ठेश्वाः ॥ [...] मनुः । ३ । २५४ ।
"पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु [...]
सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि ॥"
"गोष्ठे गोष्ठीश्राद्धे ।" इति कुल्लूकभट्टः ।
गोष्ठश्वः, त्रि, (गोष्ठे श्वा । "अपत्रास्त्रिसु [...] ५ । ४ । १० । समासे अच् । [...] समासे तु गोष्ठश्वा इत्येव स्यात् ।) [...] द्विष्टो यः परान् द्वेष्टि सः । इति जटाधरः ।
गोष्ठाष्टमी, स्त्री, (गोष्ठोपचारिता [...] गोष्ठे विहिता अष्टमी वा । एतस्यां [...] भगवतो बालकपिशो नन्दनन्दनस्य [...] पुरःसरं वत्सपालं विहाय गोपालत्वं तथात्वम् ।) गोपाष्टमी । सा च कार्त्तिक [...] ष्टमी । यदा पाद्मे कूर्म्मपुराणे च ।
"शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ।
तत्र कुर्य्याद्गवां पूजां गोग्रासं गोप्रदक्षिणम्
गवानुगमनं कुर्य्यात् सर्व्वान् कामानवाप्नुयात् ॥"
इति श्रीहरिभक्तिविलासे १६ [...]
"भौमपराक्रमे कार्त्तिके शुक्लपक्षमधि [...]
गोष्ठाष्टम्यां गवां पूजा गोग्रास गो [...]
गवानुगमनं कुर्य्यात् सर्व्वपाप [...]
इति [...]
गोष्ठी, स्त्री (गावः वहु [...] गो + स्था + कः । स्त्रियां ङीष् [...] सभाविशेषः ।
"एकाङ्गा कथिता गोष्ठी [...]
सम्भोगरसषट् पञ्च सप्त [...]
प्राकृतैर्मन्त्रिभिः पुंभिर्ग्राम[...]
[...]

वाद्यादैरन्विता नैव कर्त्तव्यं विचक्षणैः ॥"

इति सङ्गीतदामोदरः ॥

(गावोऽनेका वाचस्तिष्ठन्ति यत्र । गो+स्था+घञर्थे कः । ततः "अम्बाम्बगोभूमीति ।" ८ । ३ । ९७ । इति षत्वम् ।) संलापः । इति मेदिनी । ठे । ४ ॥ (यथा, पञ्चतन्त्रे । १ । ४०० । "एवमनुष्ठिते चत्वारोऽपि ते एकस्थाने विहारिणः परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति ॥") योग्यवर्गः । यथा, चाणक्ये ।

"विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ॥"

(यथा च राजेन्द्रकर्णपूरे । ४७ ।

"कृत्वा वेलापुलिनलवलीपल्लवग्रामगोष्ठी-
र्दिङ्मातङ्गाः समसमधरिन्नाघपाथः पिबन्ति ॥")

गोष्ठीपतिः, पुं, (पातीति पतिः । गोष्ठ्याः योग्यवर्गस्य सभाया वा पतिः ।) योग्यवर्गपालकः । सभापतिः ।

अथ ब्राह्मणगोष्ठीपतिलक्षणं यथा — [दिता

"नानाशास्त्रविशारदै रसिकता सत्कायसम्मोनिर्दोषैः कुलभूषणैः परिमिता पूर्णा कुलज्ञैरपि ।
श्रीमद्भागवतादिकारकथानुरूपयानन्दिता
गत्वाभीष्टमुपैति यद्गुणिजनो गोष्ठी हि सा प्रोच्यते ॥"

एवम्भूता गोष्ठी तस्याः पतिः । अपि च ।

"कुलीनाः श्रोत्रियाः सर्व्वे यस्यान्नं भुञ्जते मुहुः ।
कुलीनाय सुतां दत्त्वा स गोष्ठीपतिरुच्यते ॥"

तद्यथा । गाङ्गवंशे लक्ष्मीकान्तमजुमदारः १ मुखवंशे मदनभट्टाचार्य्यः २ तद्वंशे गन्धर्व्वरायः ३ वन्द्यवंशे शुभरावखानवंशः ४ चट्टवंशे अनन्तभट्टाचार्य्यः ५ एते प्राचीनाः आधुनिका बहवः सन्ति ॥ * ॥

कायस्थगोष्ठीपतिलक्षणं यथा,—

"नीतिज्ञः कुलकर्म्मठः स्थिरमतो मान्योऽपि धर्म्मान्वितः
कार्य्याकार्य्यविलोकनैः कुलभृतां सम्मानदानोद्यतः ।
पोष्टा यः कुलसंविदां कुलसुधीः सम्मौलिकानां तथा
सद्वंशप्रभवः स्थितौ सुविदितो दाता स गोष्ठीपतिः ॥"

अथ कायस्थगोष्ठीपतिगणना ।

"आदौ द्वादशपर्य्यये समभवद्दानेन गोष्ठीपतिः
सत्कीर्त्तिश्च गुहप्रियाननतयः श्रीमन्तरायः कृती । १ ।
संख्यानस्तदनन्तरं गुहधरा गण्ये च पर्य्यायके
मैत्रालो हि पुरन्दरः कुलभवः खानः सदा दानतः ॥ २ ॥
पर्य्याये च चतुर्द्दशे समभवत् पौरन्दरः केशवः
खानः सन्ततदानतो हि विलसत्कीर्त्तिध्वजाम्बरः ॥ ३ ॥
सामाजिकविसर्जनेन जनितप्रोत्तुङ्गसत्कीर्त्तिः स्थिता-
प्यासीत् सप्तदशे सदाकमलरो मैत्रेयविन्यासम् ॥ ४ ॥

ततः षोड़शे पर्य्यये दानजालः
कुलीनालिमालो दयारामपालः ॥ ५ ॥
ततस्तत्सुतः पर्य्यये सूर्य्यवाजि-
क्षपानाथसंख्येऽभवत् पुण्यराजिः ॥ ६ ॥
ततः पर्य्ययेऽष्टादशे तत्तनूजः
समाहूय भूयोऽर्च्चितार्य्यव्रजो यः ।
सदा सत्कथालापसंलापतोषः
कुलीनौघपूजापरोऽयं सुभावः ॥ ७ ॥
आसीत् किङ्करसेनगामसुकृती यो मौलिकैकाग्रणीः
पर्य्याये परिपूजितार्य्यनिचये चैकोनविंशे हि सः ।
सद्गोष्ठीपतिपालवंशतनयापाणिग्रहेणात्मनो
दानेनापि च मेलिकाटिरपरो गोष्ठीपतिः प्राथमः ॥ ८ ॥
दानेनातिवदान्यतादिगुणतो निःसीमपुण्यैश्च यो
गोपीसिंहचतुर्धुरीयसुकृती विंशे हि पर्य्यायके ।
यत्नात् किङ्करसेनवंशतनयापाणिग्रहादागतः
सोऽप्यासीद्भुवि मेलिकाटिरपरो गोष्ठीपतिः सत्स्तुतिः ॥ ९ ॥
पर्य्याये पुनरेकविंशक इह ख्यातः समासच्छले
गोपीसिंहचतुर्धुरीयकुलजो यो रामकान्तः कृती ।
धन्यो गण्यसुपुण्यजन्यजनुषा गोष्ठीपतेरग्रणी-
र्दानैः कर्णं इवातिधैर्य्यमयशाः रत्नाकरश्चापरः ॥ १० ॥
द्वाविंशे किल पर्य्ययेऽतिनियतेस्तस्यात्मजासंग्रहात्
स्वस्यैवास्य सुपुण्यदत्तकतनूजस्य च श्रीमतः ।
गोपीमोहनसंज्ञकस्य तनयद्वारा च गोष्ठीपतिः
सम्भूतो नवकृष्णभूपतिवरः सन्मौलिकाटिः स्थितौ ॥ ११ ॥
तावन्मुख्यकनिष्ठमध्यमकुलोद्भूतां स्तृतीयोद्भवान्
षड्भातृनपि तावतोऽत्र गणना वह्निक्रमानादरात् ।
सद्गोष्ठीपतिकारकाननितताधीनान् कुलीनान् समाहूयात्र प्रकृतांस्तथात्र सहजान् पूर्व्वांस्तथा कोमलान् ॥
वित्तैर्वागमृतैर्नुतिप्रणतिभिश्चान्नैश्चयोर्विंशके
पर्य्यायेऽतितरां प्रपूज्य परमाह्लादान्वितः श्रीयुतः ।
गोपीमोहनदेववंशतिलको गोष्ठीपतिः ख्यातिमान् सम्प्रति भूमिदेवघटकानाथाचनादत्युतिः ॥" १२ ॥

इति दक्षिणराढ़ीयकायस्थकुलाचार्य्यकारिका ॥

अथ वैद्यानां गोष्ठीपतिर्यथा,—

"विप्रेभ्यः प्रियसौम्यवस्तुवसनं छत्रासनं भूषणं
माला भूमितुरङ्गमा गजगणाः स्वर्णानि रत्नानि च ।
गावो नाम उदारमन्दिरवरो दानस्य दत्ताः सदा
साधुद्वारनिरुद्धदुःखसहुगतः संवर्द्धिता येन च ।
गौड़क्ष्मापतिना य एव भिषजां श्रेष्ठोऽभिषिक्तः कृती
नानाशास्त्रविशारदः शुभमतिर्वाग्मी चिकित्सापटुः ।
तस्मात् प्राप गजं तुरङ्गकनकच्छत्रञ्च रत्नं धनं
सोऽभूत् सेनविनायको बहुगुणैरग्र्यगोष्ठीपतिः ॥
वैनायनेषु सर्व्वेषु भास्करः श्रेष्ठ ईरितः ।
गोष्ठीपतितया ख्यातः स वैद्यैः पूजितोऽग्रतः ॥"

इति भरतमल्लिककृतकुलपञ्जिका ॥

गोष्पदं, क्ली, (गोः पदम् । यद्वा, गावः पद्यन्ते गच्छन्ति यस्मिन् देशे । "गोष्पदं सेवितासेवितप्रमाणेषु ।" ६ । १ । १४५ । इति सुट् सस्य षत्वञ्च ।) गोसेवितस्थानम् । गोखुरप्रमाणम् । इत्यमरः । ३ । ३ । ८३ ॥ (यथा, महाभारते । ६ । ७ । ३७ ।

"भीष्मद्रोणार्णवं तीर्त्त्वा कर्णपातालसम्भवम् ।
मा निमज्जस्व सगणः शल्यमासाद्य गोष्पदम् ॥")

तथा विश्वो मेदिनी च ।

"गोष्पदं गोपदश्वभ्रे गवाञ्च गतिगोचरे ॥"

(गवासेवितारण्यादि । इति सिद्धान्तकौमुदी ॥)

गोसः, पुं, (गां जलं स्यति नाशयतीति । सो य नाशने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) बोलः । उषःकालः । इति मेदिनी । से । ३ ॥

गोसङ्ख्यः, पुं, (गाः सञ्चष्टे इति । चक्षिङ् उक्तौ + "चक्षिङः ख्याञ् ।" २ । ४ । ५४ । इति ख्याञ् ततः "समिख्यः ।" ३ । २ । ७ । इति कः । यद्वा, गवां संख्या बहवो गाव इत्यर्थः विद्यते यस्य । समासे पुंवद्भावः ।) गोपः । इत्यमरः । २ । ९ । ५७ ॥

गोसङ्गः, पुं, (गोभिः सङ्गो मिलनं यस्मिन् काले । प्रत्यूषकाले हि गावो गोष्ठगमनाय निर्गच्छन्तीति प्रसिद्धिः । यद्वा गौः सूर्य्यकिरणं तेन सङ्गो यस्मिन् ।) प्रत्यूषः । इति भूरिप्रयोगः ॥

गोसदृक्षः, पुं, (गोः सदृक्षस्तुल्यः । गोसदृशाकारत्वादस्य तथात्वम् ।) गवयः । इति हेमचन्द्रः ॥

गोसन्दायः पुं, (गां सन्ददातीति । सम्+दा+अण् ।) गोदानकर्त्ता । इति व्याकरणम् ॥

गोसम्भवा, स्त्री, (गोरिव सम्भवो लोमादिरूपा कृतिर्यस्याः ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥ (सम्भवत्यस्याः इति सम्भवा उत्पत्तिकारणम् । गौः सम्भवा यस्याः ।) गोजाते त्रि ॥

गोसर्गः, पुं, (गवां सर्गो वनगमनाय मोचनं यद्वा गवां सूर्य्यकिरणानां सर्गो विसर्गः यस्मिन् ।) प्रभातम् । इति शब्दरत्नावली । १९९ ॥ (यथा, हनुमन्नाटके ४ अध्याये ।

"गोसर्गे चाद्दरात्रे च तथा सन्ध्यादिकेषु च ।")

गोसवः, पुं, (गौः सूयते पीड्यते हिंस्यते यत्र । सु ञ् पीड़ायाम् + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) गोमेधयज्ञः । इति जटाधरः ॥ (यथा, मनुः । ११ । ७४ ।

"यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा ।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा ॥")

गोसस्यः, पुं, (गोम एव शस्यः शस्यतुल्यः इति गोबलीवर्द्दन्यायेन सिद्धः ।) बोलः । इत्यमरटीकायां रायमुकुटः ॥

गोसहस्री, स्त्री, (गवां सहस्रं तद्दानफलं विद्यते यत्र । अर्श आदित्वादच् गौरादित्वात् ङीष् ।) मङ्गलवारयुक्तामावास्या । तत्र गङ्गास्नाने सहस्रगोदानफलम् । यथा, व्यासः ।
"अमावास्या भवेद्वारे यदि भूमिसुतस्य च ।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
सोमवारयुक्तामावास्या । तत्र अरुणोदयकालमारभ्य स्नानकालपर्य्यन्तं मौनीभूत्वा स्नानात् गोसहस्रदानफलम् । यथा व्यासः ।
"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम् ॥"
इति च तिथ्यादितत्त्वम् ॥

गोस्तनः, पुं, (गोः स्तन इव गुच्छो यस्य ।) हारभेदः । इत्यमरः । २ । ६ । १०५ ॥ स तु चतुर्यष्टिकः । चतुस्त्रिंशद्यष्टिक इति केचित् । इति भरतः ॥ (गवां स्तनः ।) गवां कुचश्च ॥ (यथा, सुश्रुते उत्तरतन्त्रे १ मे अध्याये ।
"सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम् ॥")

गोस्तना, स्त्री, (गोः स्तन इव फलमस्याः । ङीपभावपक्षे टाप् ।) गोस्तनी । इत्यमरटीका ॥

गोस्तनी, स्त्री, (गोः स्तन इव फलमस्याः । "स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधात् ।" ४ । १ । ५४ । इति ङीष् ।) द्राक्षा । इत्यमरः । २ । ४ । १०७ ॥ कपिलद्राक्षा । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायाः ।
"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि कीर्त्तिता ॥"
वृष्या स्वाद्वी गोस्तनी द्राक्षा गुर्व्वी च कफपित्तनुत् ।
गोस्तनी सुनक्षा इति ।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गोः स्तना इव स्तना यस्याः । कुमारानुचारिणी मातृगणानामन्यतमा । यथा, महाभारते । ९ । ४६ । ३ ।
"प्रभावती विशालाक्षी पलिता गोस्तनी तथा ।"
गोनसीति पाठोऽपि वर्त्तते ॥)

गोस्थानं, क्ली, (गवां स्थानम् ।) गोष्ठम् । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ६० । २७ ।
"शालेन्द्वारगोवाटं मध्ये गोस्थानसङ्कुलम् ॥")

गोस्थानकं, क्ली, (गोस्थान + स्वार्थे कन् ।) गोष्ठम् । इत्यमरः । २ । १ । १३ ॥

गोस्वामी, [न्] त्रि, (गवां स्वामी ।) गोपतिः । इति हलायुधः ॥ (यथा, मनुः । ८ । २३१ ।
"गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः ॥")
गवामिव भूमी वा प्रभुः । (यद्वा, गवां इन्द्रियाणां स्वामी । जितेन्द्रियतया एव तथात्वम् ।) यथा । "श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी ।" इत्यगस्त्यसंहिता ॥ .

गोहत्या, स्त्री, (गवां हत्या हननम् ।) गोवधः । तत्प्रायश्चित्तादि प्रायश्चित्तशब्दे द्रष्टव्यम् ॥ * ॥ पारिभाषिकगोहत्या यथा,—
सावित्र्युवाच ।
"विप्रहत्या च गोहत्या किंविधा मातिदेशिकी ।
का वा नृणामगम्या वा को वा सन्ध्याविहीनकः ॥
एतेषां लक्षणं सर्व्वं वद वेदविदां वर ! ॥
यम उवाच ।
गवामाहारं प्रकुर्व्वन्तं पिबन्तं यो निवारयेत् ।
याति गोविप्रयोर्मध्ये गोहत्याञ्च लभेत्तु सः ॥
दण्डैर्गाम्ताडयन् मूढो यो विप्रो वृषवाहकः ।
दिने दिने गवां हत्यां लभते नात्र संशयः ॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम् ।
भोजयेद्वृषवाहान्नं स गोहत्यां लभेद्ध्रुवम् ॥
वृषलीपतिं याजयेद्यो भुङ्क्तेऽन्नं तस्य यो नरः ।
गोहत्याशतकं सोऽपि लभते नात्र संशयः ॥
पादं ददाति वह्नौ यो गाञ्च पादेन ताडयेत् ।
गृहं विशेदधौताङ्घ्रिः स्नात्वा गोवधमालभेत् ॥
यो भुङ्क्तेऽस्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च ।
सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेद्ध्रुवम् ॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद्ध्रुवम् ॥
पितॄंश्च पर्व्वकाले च तिथिकाले च देवताः ।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद्ध्रुवम् ॥
स्वभर्त्तरि च कृष्णे वा भेदबुद्धिं करोति या ।
कटूक्त्या ताडयेत् कान्तं सा गोहत्यां लभेद्ध्रुवम् ॥
गोमार्गं खननं कृत्वा ददाति शस्यमेव च ।
तडागे च तदूर्द्ध्वे वा स गोहत्यां लभेद्ध्रुवम् ॥
प्रायश्चित्तं गोवधस्य यः करोति व्यतिक्रमम् ।
अर्थलोभादथाज्ञानात् स गोहत्यां लभेद्ध्रुवम् ॥
राजके दैवके यत्नात् गोस्वामी गां न पालयेत् ।
दुःखं ददाति यो मूढो गोहत्यां लभते ध्रुवम् ॥
प्राणिनं लङ्घयेद्यो हि देवार्च्चामनलं जलम् ।
नैवेद्यं पुष्पमन्नञ्च स गोहत्यां लभेद्ध्रुवम् ॥
शश्वन्नास्तीति वादी यो मिथ्यावादी प्रतारकः ।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् ॥
देवताप्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं प्रति ।
न सम्भ्रमान्नमेद्यो हि स गोहत्यां लभेद्ध्रुवम् ॥
न ददात्याशिषं कोपात् प्रणताय च यो द्विजः ।
विद्यार्थिने च विद्याञ्च स गोहत्यां लभेद्ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

गोहनं, क्ली, (हद विष्ठात्यागे + क्तः । हन्नम् । गोर्हन्नं विष्ठा ।) गोमयम् । इति रत्नमाला ॥

गोहरीतकी, स्त्री, (गवां हरीतकीव हितकारित्वात् ।) पिलुवृक्षः । इति शब्दरत्नावली ॥

गोहालिया, स्त्री, लताविशेषः । गोयालिया इति भाषा ॥ यथा, गारुडे १९० अध्याये ।
"पीतं गोहालियामूलं तिलदध्यान्यसंयुतम् ।
निबद्धमूत्रं रुधिरं प्रवर्त्तयति शङ्कर ! ॥"

गोहिलः, पुं, (गोषु हिलः ।) गोरक्षकः । इति शब्दचन्द्रिका ॥ गवां हितकारके त्रि । (गोर्भूमेर्भारावतरणेन मोक्षया प्रीतिं कुर्व्वन् गोहिलः, यद्वा गवां रक्षार्थं गोलं श्रयतीति गोहिलः । विष्णुः । यथा, महाभारते । १३ । १४९ । ७१ ।
"गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ।"

गोहिरं, क्ली, (गुह + बाहुलकादिरच् ।) पादमूलम् । इति हेमचन्द्रः । ३ । २८० ॥

गोह्यं, त्रि, (गुह ण् संवरणे + "शंसिदुहिगुहिभ्यो वा ।" इति कात्यायनोक्त्या भावकर्मणि ण्यत् ।) गुह्यम् । गोपनीयम् । इति मार्कण्डेयपुराणम् ॥

गौः, [गो] पुं स्त्री, (गच्छतीति । गम् + "गमेर्डोः ।" उणां । २ । ६७ । इति डोः । यद्वा गच्छत्यनेनेति करणे डोः । वृषस्य यानसाधनत्वात् स्त्रीगव्या दानेन स्वर्गगमनसाधनत्वात् उभयोरपि दानेन स्वर्गगमनत्वाद्वा तथात्वम्) वस्तुतस्त्वयं रूढ एव शब्दः । यदुक्तम् ।
"रूढा गवादयः प्रोक्ता यौगिकाः पाचकादयः योगरूढाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः ।"
स्वनामख्यातपशुः । गरु इति भाषा । पुंसि पर्य्यायः अनड्वान् इति शब्दे द्रष्टव्यः ॥ स्त्री पर्य्यायः । माहेयी २ सौरभेयी ३ उस्रा ४ माता ५ शृङ्गिणी ६ अर्ज्जुनी ७ अघ्न्या ८ रोहिणी ९ । इत्यमरः ॥ माहेन्द्री १० इज्या ११ धेनुः १२ अघ्ना १३ दोग्ध्री १४ भद्रा १५ भूमही १६ अनडुही १७ कल्याणी १८ पावनी १९ गौरी २० सुरभिः २१ मद्रा २२ निलिम्पिका २३ सुरभी २४ अनड्वाही २५ द्विहा २६ अघ्मा २७ । इति शब्दरत्नावली ॥ बहुला २८ मही २९ सरस्वती ३० । इति जटाधरः ॥ उस्रिया ३१ अही ३२ अदितिः ३३ इला ३४ जगती ३५ शर्करी ३६ । इति वेदनिघण्टौ २ अध्यायः ॥ * ॥ (गवां लक्षणादिकं यथा बृहत्संहितायां ६१ अध्याये ।
"पराशरः प्राह बृहद्रथाय
गोलक्षणं यत् क्रियते ततोऽयम् ।
मया समासः शुभलक्षणास्ताः
सर्व्वास्तथाप्यागमतोऽभिधास्ये ॥
साश्राविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः ।
प्रचलचिपिटविषाणाः करटाः खरसदृशवर्णाश्च ॥
दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डानना विनतपृष्ठाः ।
ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च ।
श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिबृहद्भिर्वा ।
अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च ॥
वृषभोऽप्येवं स्थूलातिलम्बवृषणः शिरातताक्रोडः ।
स्थूलशिराचितगण्डस्त्रिस्थानं मेहते यश्च ।
मार्ज्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्येष्टः ।

[illegible] शुभदो भवन् पालयन् ।
[illegible] स्निग्धः [illegible]
[illegible] सततं सर्वदा [illegible] नृपः ॥
[illegible] भावकर्मणोः विद्या-
[illegible]
[illegible] करोति [illegible] परिकीर्त्तितः ।
[illegible] सौम्याः ।
[illegible] न भवन्ति ॥
[illegible] शुभं [illegible]
[illegible]
[illegible] तुलसी [illegible] सुपुत्राः ॥
[illegible] विशोधना सर्वो-
पाङ्गाः ।
[illegible] पूजिता सुभगाः ॥
वामावर्त्तावामे दक्षिणपार्श्वे च दक्षिणावर्त्ताः ।
शुभदा भवन्त्यनुष्णौ गजाभिर्नीरदनिभाभिः ॥
पेचूकमालिका बुद्बुदेशगाः स्पन्दमग्नाः ।
याग्निभिरस्फुटिताभिः प्रशस्ताः सर्व्वेऽपि भार-
पदाः ॥
घ्राणोद्देशे गवनिर्माणाररुसः मितच दचि-
णतः ।
कामनोनृपनगालाभः सुधान्धियाग्निगुल्फपः ॥
सर्वैर्नृपर्तैर्योदरस्य गाग्निभद्गुणाक्रोडः ।
श्रेयो भाराध्वगयोः श्वेतस्तनुलाघ प्रशस्तः ॥
सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महा-
वक्त्रः ।
हंसो नाम शुभफलो यूथस्य विवर्द्धनः प्रोक्तः ॥
भूस्पृग्वालधिराताम्रवङ्क्षणो रक्तदृक् ककुद्मी च ।
कल्माषश्च स्वामिनमचिरात्कुरुते पतिं लक्ष्म्याः ॥
यो वा सितैकचरणो यथेष्टवर्णश्च सोऽपि प्रशस्त-
फलः ।
मिश्रफलोऽपि ग्राह्यो यदि नैकान्तप्रशस्तो-
ऽस्ति ॥” * ॥
गोरीङ्गितभेदेन शुभाशुभमुक्तं यथा, तत्रैव
६२ अध्याये,—

> “गावो दीनाः पार्थिवस्याशिवाय
> पादैर्भूमिं कुट्टयन्त्यश्च रोगान् ।
> मृत्युं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
> पत्युर्भीतास्तस्करानारुवन्त्यः ॥
> अकारणे क्रोशति चेदनर्थो
> भयाय रात्रौ वृषभः शिवाय ।
> भृशं निरुद्धा यदि मक्षिकाभि-
> स्तदाशु वृष्टिं सरमात्मजैर्वा ॥
> आगच्छन्त्यो वेश्म वम्भारवेण
> संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः ।
> आर्द्राङ्ग्यो वा हृष्टरोमाण्यः प्रहृष्टा
> धन्या गावः स्युर्महिष्योऽपि चैवम् ॥” * ॥)

गोमङ्गलत्वादि यथा, देवलः ।
“शोकोऽभिमान् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
एतानि सततं पश्येन्नमस्येदर्चयेच्च यः ।
प्रदक्षिणञ्च कुर्वीत तथा ह्यायुर्न हीयते ॥”
अभिप्रेतार्थसिद्ध्यर्थं मङ्गल्यया आमन्त्र-
यति ॥ * ॥ गोप्रणामे तन्त्रपुराणम् ।
“नमो गावः प्रपन्यास्तु कल्मषाणि नश्यन्तु पार्थिव ! ।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।
कल्पयन्तु काव्यमादेव गोदानफलमाप्नुयात् ॥”
भविष्ये ।
“गामालभ्य नमस्कृत्य कृत्वा चैव प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥
गवामस्थि न लङ्घेत मृतां गन्धैर्न वर्णयेत् ।
यावदाप्नाति सहस्रं तावत्स्वर्गे तु मोदते ॥”
विष्णुः ।
“गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना ।
षडङ्गमेतत्परमं पवित्रं सर्व्वदा गवाम् ॥”
षडङ्गं षडवयवम् । इति शुद्धितत्त्वम् ॥ * ॥
तन्मांसगुणाः । सुस्निग्धत्वम् । पित्तश्लेष्मविवर्द्धन-
त्वम् । बृंहणत्वम् । बलकारित्वम् । पीनसप्रदर-
नाशित्वञ्च । इति भावप्रकाशः ॥ अपूतत्वम् ।
गुरुत्वम् । वातकफापहत्वञ्च ॥ * ॥ तद्दुग्धगुणाः ।
पथ्यत्वम् । अत्यन्तरुच्यत्वम् । स्वादुत्वम् । स्निग्ध-
त्वम् । पित्तवातामयनाशित्वम् । मेध्यत्वम् ।
कान्तिप्रज्ञाऽङ्गपुष्टिवीर्यवृद्धिकारित्वञ्च ॥ (यथा
च हारीते प्रथमस्थानेऽष्टमाध्याये ।

> “गव्यं पवित्रञ्च रसायनञ्च
> पथ्यञ्च हृद्यं बलपुष्टिदं स्यात् ।
> आयुःप्रदं रक्तविकारपित्त-
> त्रिदोषहृद्रोगविषापहं स्यात् ॥” * ॥)

तद्दधिगुणाः । अतिपवित्रत्वम् । शीतत्वम् ।
स्निग्धत्वम् । दीपनत्वम् । बलकारित्वम् । मधुर-
त्वम् । अरोचकवातामयनाशित्वम् । ग्राहित्वञ्च ॥
(यथा च हारीते प्रथमस्थानेऽष्टमेऽध्याये ।
“गव्यस्वादुरसं ग्राहि गुरूष्णं वातरोगजित् ।
मेदः-शुक्र-बल-श्लेष्म-रक्तपित्ताग्नि-शोफकृत् ॥
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ।
वातापहं पवित्रञ्च दधि गव्यं गुणप्रदम् ॥” * ॥
तद्दुग्धफेनगुणाः ।
“गवान्तु क्षीरफेनं वा तक्रेण सहितन्तथा ।
पक्वान्नं भक्षयेद्वापि ग्रहणी तस्य नश्यति ॥”)
तन्नवनीतगुणाः । शीतत्वम् । वर्णबलशुक्रकफ-
रुचिसुखकान्तिपुष्टिकारित्वम् । सुमधुरत्वम् ।
संग्राहकत्वम् । चक्षुर्हितत्वम् । वातसर्व्वाङ्गशूल-
कासश्रमसर्व्वदोषनाशित्वञ्च ॥ * ॥
तद्घृतगुणाः । हृद्यत्वम् । धीकान्तिस्मृतिबल-
मेधापुष्टग्निवृद्धिशुक्रवपुःस्थैर्य्यकारित्वम् । वात-
श्लेष्मश्रमपित्तनाशित्वम् । विपाके मधुरत्वम् ।
हृद्यतमत्वम् । बहुगुणत्वञ्च ॥ (तथा च ।
“विपाके मधुरं हृद्यं वातपित्तकफापहम् ।
चक्षुष्यं बलकृन्मेध्यं गव्यं सर्पिर्गुणोत्तमम् ॥”
इति हारीते प्रथमस्थाने अष्टमेऽध्याये ॥ * ॥)
“गवां प्रकृत्या क्षीरं यत् विद्धि दुर्ज्जरम् ।
तस्मादष्टदिनं स्थं यामं यामार्द्धमेव वा ॥
तत्पश्चात् मध्ये माहं तत् पथ्यं दीपनं लघु ।
त्रिवत्सप्रसवात्यूनानां पयो दोषकरं स्मृतम् ॥
शस्तं वत्समेकवर्णाया धवलीकृष्णयोरपि ।
दग्धाया लाम्यवर्णाया उद्धृतमात्रं च या भवेत् ॥
नाम्नो गवां घृतं क्षीरं तथा वाटकमेव वा ।
गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् ।
श्लेष्मघ्नं रक्तवर्णानां यौनं हन्ति कपिलापयः ॥”
इति राजनिर्घण्टः ॥

गौः, [गो] पुं, (गम्यते कर्म्मभिः यज्ञदान-
परोपकारादिधर्म्मफलकर्मभूतैर्यस्मिन् । गम्
+“गमेर्डोः ।” उणां । २ । ६३ । इति कर्म-
करणे डोः ।) स्वर्गः । (गम्यन्ते ज्ञायन्ते
विषया येन यद्वा गच्छति शीघ्रमिति करणे
कर्त्तरि वा डोः । किरणसम्पर्केण विना चाक्षुष-
ज्ञानाभावात् किरणस्य ज्ञानप्रकाशधर्म्मकत्वात्
शीघ्रगामित्वाच्च तथात्वम् ।) रश्मिः । (यथा,
महाभारते । ३ । ३ । ५२ ।
“त्वयोद्यद्दीपवर्ती गोभिर्भासयसे महीम् ।
त्वयागामपि लोकानां हितायैकः प्रवर्त्तसे ॥” * ॥)
वज्रः । इति मेदिनी । गे । १ ॥ (गम्यते पुण्यवद्भि-
र्यस्मिन् । अधिकरणे डोः । इष्टापूर्त्तादिसकाम-
कर्म्मभिः पुण्यवतामिन्द्रलोकगमनात् तथा-
त्वम् ।) चन्द्रः । इति विश्वः ॥ (गच्छति प्राप्नोति
विश्वं प्रकाशकालेन व्याप्नोतीति जानाति
सर्व्वमिति वा । कर्त्तरि डोः ।) सूर्य्यः । गोमेध-
यज्ञः । इत्यमरटीकायां भानुदीक्षितः ॥ ऋषभ-
नामौषधम् । इति राजनिर्घण्टः ॥

गौः, [गो] स्त्री, (गम्यते विषयज्ञानं यया । गम्
+“गमेर्डोः ।” उणां । २ । ६३ । इति करणे
डोः ।) चक्षुः । (गच्छति शीघ्रमिति कर्त्तरि
डोः ।) वाणः । दिक् । (गम्यते ज्ञायते चित्ताभि-
प्रायो यया । करणे डोः ।) वाक् । (यथा,
रघुः । ५ । १२ ।

> “इत्यर्घ्यपात्रानुमितव्ययस्य
> रघोरुदारामपि गां निशम्य ॥” * ॥

गम्यते गम्यतेऽस्यामिति । अधिकरणे डोः ।)
भूः । (यथा, रघुः । १ । २६ ।
“दुदोह गां स यज्ञाय शस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥” * ॥
जले बहुवचनान्तोऽयम् । इति मेदिनी । गे । १ ॥
जले एकवचनान्तोऽपि इति केचित् । इति
भरतः ॥ (यथा, वृन्दावनयमके । २ ।

> “स्वमिव सुखं गवि शीर्षं
> मुपधाय स्वपिति यो सुजङ्गविशेषम् ।
> नव पुष्करसमकरया
> श्रीयोर्म्मिपंक्त्या च सेवितः समकरया ॥”)

माता । इत्येकाक्षरकोषः ॥ (स्वनामख्याता
शुकदौहित्रस्य ब्रह्मदत्तस्य भार्य्या । यथा, भाग-
वते । ९ । २१ । २५ ।
“स कीर्त्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ।

स योगी गवि भार्य्यायां विष्वक्सेनसखात् सुतम्।"
"गवि सरस्वत्यां भार्य्यायाम्।" इति कश्चित्
व्याचष्टे।)

गौः, [गो] पुं, स्त्री, (गम्यते ज्ञायते स्पर्शसुख-
मनेन। गम् + "गमेर्डोः।" उणां। २। ६३।
इति करणे डोः। त्वचि कातत्वादेवास्य तथा-
त्वम्।) लोम। (गच्छति निम्नदेशमिति।
कर्त्तरि डोः। निम्नप्रवणादेवास्य तथात्वम्।)
जलम्। इत्यमरटीकायां भानुदीक्षितः॥

गौञ्जिकः, पुं, (गुञ्जा परिमाणविशेषस्तद्ग्रहीतुं
शीलमस्य। यद्वा, गुञ्जा गुञ्जाफलं तस्य परि-
माणार्थं ग्रहणं विद्यते यस्य। गुञ्जा + ठक्।)
स्वर्णकारः। इति त्रिकाण्डशेषः॥

गौडः, पुं, स्वनामख्यातदेशः। (यथा, प्रबोध-
चन्द्रोदये। २। ७।
"गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा
पुरी।
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः
पिता।")
तद्देशस्थे पुंभूम्नि। इति जटाधरः॥ तद्देश-
श्रीमा यथा, शक्तिसङ्गमतन्त्रे सप्तमपटले।
"वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे!।
गौड़देशः समाख्यातः सर्व्वविद्याविशारदः॥"
(देशोऽयं हयवृन्दिकायां कूर्म्मविभागे पूर्व्वस्या-
मुक्तः। यथा, तत्रैव। १४। ५, ७।
"अथ पूर्व्वस्याम्।" इत्युक्त्वा
"उदयगिरि भद्रगौड़क-
पौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः॥"
इत्युक्तवान्।)
पञ्च गौड़ा यथा, स्कन्दपुराणे।
"सारस्वताः कान्यकुब्जा गौड़मैथिलिकोत्कलाः।
पञ्च गौड़ा इति ख्याता विन्ध्यस्योत्तरवासिनः॥"
(गुड़स्य विकारः। गुड़ + अण्। गुड़जाते
आसवे गौ च। अस्य गुणा यथा,—
"हृद्यमद्यतद्भ्रामां गौड़स्तर्पण-दीपनः॥"
इति सूत्रस्थाने पञ्चमेऽध्याये वाभटेनोक्तम्।
"यथाभूतोऽयं गौड़ः निपलीपर्णवद्भ्रैः।
निर्दिष्टोः विष-क्रम-शोषमाण्डूरापहः॥"
इति च चरके सूत्रस्थाने द्वादशेऽध्याये।)

गौड़मालवः, पुं, (गौड़े गौड़देशे जातः गौड़देश-
वासिप्रियो वा मालवः रागविशेषः।) सङ्की-
र्णरागः। इति राजनिर्घण्टः॥ (विशेषोऽस्य
मालव शब्दे ज्ञेयः।)

गौड़िकं, क्ली, (गौड़े गुड़विकारस्तत् कारणमस्या-
ख्यस्य। "अत इनिठनौ।" ५। २। ११५।
इति ठन्।) मद्यविशेषः। यथा,"पैष्टिकगौड़िक-
माध्वीकानां मद्यं सुरापाने वरुणम्।" इति
प्रायश्चित्तविवेके देवलः। गुड़विकारमये त्रि।
(पुं, इक्षुः। "गुड़ादिभ्यष्ठञ्।" ४।४।१०३।
इति ठञ्। इक्षुः। इति सिद्धान्तकौमुदी।)

गौड़ी, स्त्री, (गुड़स्य विकारः गुड़विकारेण
सन्धानेन कृतमित्यर्थः। गुड़ + अण्। स्त्रियां
ङीप्।) गुड़ादिकृता सुरा। गुड़ेर मद इति
भाषा॥ (यथा, मनुः। ११। ९४।
"गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा
सुरा।")
तत्पर्य्यायः। वाल्कली २। इति त्रिकाण्डशेषः॥
अस्या गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। मधु-
रत्वम्। वातनाशित्वम्। पित्तबलकान्तिदृष्टि-
कारित्वम्। दीपनत्वम्। पथ्यत्वञ्च। इति राज-
निर्घण्टः॥ (यथा च हारीते प्रथमे स्थाने
११ अध्याये।
"गौड़ी कषाया मधुराम्लशीता
सन्दीपनी शूलबलापहन्त्री।
हृद्या त्रिदोषं प्रशमय्यजीर्णं
माक्षामयार्शःश्वयनं निहन्ति॥")
रागिणीविशेषः। सा तु मेघरागस्य पत्नी। इति
सङ्गीतदामोदरः॥ (गौड़ानां गौड़देशवासिनां
प्रिया।) काव्यरीतिविशेषः। यथा,—
"ओजःप्रसादमाधुर्य्य गुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः॥"
इति काव्यचन्द्रिका॥
(यथा च साहित्यदर्पणे। ९। ४।
"ओजःप्रकाशकैर्वर्णैर्बन्ध आड़म्बरः पुनः।
समासबहुला गौड़ी——————॥"
उदाहरणं यथा, तत्रैव धृतो वेणीसंहारश्लोकः।
"चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
पुरुषोत्तमस्त्वाह।
बहुतरसमासयुक्ता सुमहाप्रायाक्षरा च
गौड़ीया।
रीतिरनुप्रासमहिमपरतन्त्रास्तोभवाक्या च॥")

गौणः, पुं, (गुणादागता गौणी। तस्या आगतः
प्रतिबोधितः। गौणी + अण्।) गौणीप्रति-
बोधितः। यथा,"शक्यस्य साहचर्यकः सम्बन्धो
गुणः तद्योगा या लक्षणा सा गौणी तद्योगात्
गौणः।" इति दायभागटीकायां श्रीकृष्णतर्का-
लङ्कारः॥ (अप्रधाने त्रि। यथा, महाभारते।
१२। ३३१। ८।
"बहूनि मम नामानि कीर्त्तितानि महर्षिभिः।
गौणानि तत्र नामानि कर्म्मजानि च कानि-
चित्॥")

गौणकालः, पुं, (गौणोऽमुख्यः कालः।) मुख्य-
कालकर्त्तव्यकर्म्मकरणयोग्यकालान्तरः। यथा,—
"यद्गमनादिक्रियामुख्यकालस्यात्ययकालवत्।
गौणकालमिच्छन्ति केचित् प्रातःकर्म्मणि॥
यद्वैति पञ्चाग्नरं प्रातःकार्य्ये मध्यकालवत्
आयामिक्रियाया मुख्यकालस्यापि गौणकाल-
त्वम्। गैन धार्म्मं सन्ध्याया रात्रिः प्रातः सन्ध्या-
कालश्च गौणकाल इत्यर्थः।" इति मलमास-
तत्त्वम्॥

गौणचान्द्रः, पुं, (गौणोऽप्रधानश्चान्द्रः चन्द्रसम्बन्धि-
मासः।) कृष्णप्रतिपदादिपौर्णमास्यन्तमासः।
यथा, मलमासे गौणकरणे निर्धारितमस्ति।

"गौणचान्द्रेण मासेन मुख्यच
अपि च शब्दशक्तिप्रकाशिकायाम्।
"सान्तोऽपि द्विविधः प्रोक्तो मु
गौणः कृष्णप्रतिपदादिपौर्णमास
गौणी, स्त्री, (गुणं सादृश्यमधि
गुण + अण् + स्त्रियां ङीप्।)
लक्षणान्तर्गतलक्षणाविशेषः। य
"सादृश्येतरसम्बन्धाः शुद्धास्ताः
सादृश्यात्तु मता गौणस्तेन षोड़
("ताः पूर्व्वोक्ता अष्टादशभेदा ल
श्वेतरसम्बन्धाः कार्य्यकारणभावा
शुद्धानां 'घृतं आयुः' इत्यादौ
शेयानि। रूढ़ाद्युपादानलक्षणा सा
यथा 'एतानि तैलानि हेमन्ते सु
तैलशब्दस्तिलभवत्वेऽपि सुखा
सार्षपादिस्नेहेषु वर्त्तते। प्रयोजने
कुमारेषु तत्सदृशेषु गच्छन्तु 'इतो र
गच्छन्ति।' रूढ़ानुपादानलक्षणा स
गौणी यथा, 'तैलानि हेमन्ते सुखानि
जने यथा, 'राजकुमारा गच्छन्ति
लक्षणलक्षणा सारोपा गौणी यथा,
गौडेन्द्रः कण्टकं शोधयति।' प्रयोजने
'गौर्वाहीकः।' रूढ़ौ लक्षणा साध्य
गौणी यथा, 'राजा कण्टकं शोधयति।'
जने यथा, 'गौर्जल्पति।'
अत्र केचिदाहुः गोशब्दवाच्यो गुणा
मान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य
कार्य्याभिधाने निमित्तीभवन्ति। यदुक्तं,
शब्दस्याग्रहीतसङ्केतं वाहीकार्थमभिधा
सामर्थ्यात् गोशब्दार्थमात्रबोधनाच्च।
धाया विरतत्वात् विरतायाश्च पुनरुत्था
भावात्। अन्ये पुनर्गोशब्देन वाहीका
नाभिधीयते किन्तु स्वार्थसहचारिगुणसाजा
वाहीकार्थगता गुणा एव लक्ष्यन्ते। तदुक्तं
मन्यन्ते। तथाह्यत्र गोशब्दाद्वाहीकार्थः प्र
यते न वा। आद्येऽपि गोशब्दादेव वा
ताद्वा गुणात्। अविनाभावद्वारा तत्र
प्रथमः। वाहीकार्थेऽस्यासङ्केतितत्वात्।
द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्दे
ऽन्वये प्रवेशासम्भवात्। शाब्दी ह्याकाङ्क्षा
नैव प्रपूर्य्यते। न द्वितीयः। यदि हि गोशब्द
द्वाहीकार्थो न प्रतीयते तदास्य वाहीक
सामानाधिकरण्यमसमञ्जसं स्यात्। तस्मात्
गोशब्दो लक्षणया स्वार्थसहचारिगुणाद्वाहीकशब्देन सहान्वय
मलभमानो जाड्यादिमान्द्यसम्बन्धाद्वाहीकं
लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्र
योजनम्। इयञ्च गुणयोगात् गौणी इत्युच्यते।
पूर्व्वा तु उपचारामिश्रणात् शुद्धा। उपचारो
हि नामात्यन्तं विशकलितयोः सादृश्यातिशय
महिम्ना भेदप्रतीतिस्थगनमात्रम्। इद
अग्निमाणवकयोः शुक्लपटयोस्तु नात्यन्तं
प्रतीतिः। तस्मादेवमादिषु शुद्धैव लक्षणा।'

[illegible]

[illegible]

[illegible]

भिद्यते शुद्ध्यन्त्यचिराद्गर्भाशयाः ॥")
न्थिलम् । ग्रन्थिपर्णवृक्षः । (यथा, चरके
त्रस्थाने तृतीयेऽध्याये ।
"मनःशिला त्वक्कुटजान् सकुष्ठः
सलोमशः सैडगजः करञ्जः ।
ग्रन्थिश्च भौर्ज्जः करवीरमूलं
चूर्णानि साध्यानि तुषोदकेन ॥")
थनम् । रोगभेदः । इति मेदिनी । थे । ६ ॥
स्य निदानसम्प्राप्ती यथाह माधवकरः ।
"वातादयो मांसमसृक्प्रदुष्टाः
सन्दूष्य मेदश्च तथा शिराश्च ।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥"
स्य वातिकरूपं यथा,—
"आयम्यते वृश्च्यति तुद्यते च
प्रत्यस्यते मथ्यति भिद्यते च ।
कृष्णो मृदुर्व्वस्तिरिवाततश्च
भिन्नः स्रवेच्चानिलजोऽस्रमच्छम् ॥"
त्तिकरूपं यथा,—
"दंदह्यते धूप्यति चूष्यते च
पापच्यते प्रज्वलतीव चापि ।
रक्तः सपीतोऽप्यथवापि पित्तात्
भिन्नः स्रवेदुष्णमतीव चास्रम् ॥"
श्लैष्मिकरूपं यथा,—
"शीतो विवर्णोऽल्परुजोऽतिकण्डूः
पाषाणवत्संहननोपपन्नः ।
चिराभिवृद्धिश्च कफप्रकोपा-
द्भिन्नः स्रवेच्छुक्लघनञ्च पूयम् ॥"
(अथास्य सम्प्राप्तिलक्षणं यथा,—
"कफप्रधानाः कुर्व्वन्ति मेदोमांसासृगामलाः ।
वृत्तोन्नतं यं श्वयथुं स ग्रन्थिर्ग्रथनात् स्मृतः ॥
दोषास्रमांसमेदोऽस्थिशिराव्रणभवा नव ।
ते तत्र वातादायामतोदभेदान्वितोऽसितः ॥
स्थानात् स्थानान्तरगतिरकस्माद्धानिवृद्धिमान् ।
मृदुर्व्वस्तिरिवानद्धो विभिन्नोऽच्छं स्रवत्यसृक् ॥
पित्तात् सदाहः पीताभो रक्तो वा पच्यते द्रुतम् ।
भिन्नोऽस्रमुष्णं स्रवति श्लेष्मणा नीरुजो घनः ॥
शीतः सवर्णः कण्डूमान् पक्वः पूयं स्रवेद्घनम् ।
दोषैर्दुष्टेऽसृजि ग्रन्थिर्भवेन्मूर्च्छत्सु जन्तुषु ॥
शिरामांसञ्च संश्रित्य सस्वापः पित्तलक्षणः ।
मांसलैर्दूषितं मांसमाहारैर्ग्रन्थिमावहेत् ॥
स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम् ।
प्रवृद्धं मेदुरैर्मेदो नीतं मांसेऽथवा त्वचि ॥
वायुना कुरुते ग्रन्थिं भृशं स्निग्धं मृदुं चलम् ।
श्लेष्मतुल्याकृतिं देहक्षयवृद्धिक्षयोदयम् ॥
स विभिन्नो घनं मेदस्ताम्रासितसितं स्रवेत् ।
अस्थिभङ्गाभिघाताभ्यामुन्नतावनतन्तु यत् ॥
सोऽस्थिग्रन्थिः पदान्ते च सहसाम्भोऽवगाहनात् ।
व्यायामाद्वा प्रतान्तस्य शिराजालं सशोणितम् ॥
वायुः सम्पीड्य सङ्कोच्य वक्रीकृत्य विशोष्य च ।
निष्फुरं नीरुजं ग्रन्थिं कुरुते स शिराह्वयः ॥
अरूढे रूढमात्रे वा व्रणे सर्व्वरसाशिनः ।
सार्द्रे वा बन्धरहिते गात्रेऽश्माभिहतेऽथवा ।
वातोऽसृगसृतं दुष्टं संशोष्य ग्रथितं व्रणम् ।
कुर्य्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः ॥
साध्या दोषास्रमेदोजा न तु स्थूलखराश्चलाः ।
मर्म्मकण्ठोदरस्थाश्च————————॥"
इति वाभटेनोत्तरस्थाने २९ अध्याये उक्तम् ॥)
तस्य चिकित्सा यथा,—
"मर्त्तिकाम्लकक्षारः शङ्खचूर्णसमन्वितः ।
एतेन विहितो योगो हन्ति ग्रन्थिं तथार्ब्बुदम् ॥
ग्रन्थिं न यो नश्यति भेषजेन
निष्काश्य तं शस्त्रचिकित्सकेन ।
क्षाराग्निपक्केन घृतेन वैद्यो
व्रणेन चान्येन च सच्चिकित्सेत् ॥'
ग्रन्थावुद्धृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत् ।
शिराग्रन्थिं विहायान्ये शेषे शस्त्रं प्रयुञ्जते ॥
ग्रन्थे आचार्य्याः ।" इति भावप्रकाशः ॥
("ग्रन्थिष्वामेषु कर्त्तव्या यथास्वं शोफवत् क्रिया ।
बृहतीचित्रकव्याघ्रीकणासिद्धेन सर्पिषा ॥
स्नेहयेच्छुद्धिकामञ्च तीक्ष्णैः शुद्धस्य लेपनम् ।
संस्वेद्य बहुशो ग्रन्थिं विमृद्नीयात् पुनः पुनः ॥
एष वाते विशेषेण क्रमः पित्तास्रजे पुनः ।
जलौकसो हिमं सर्व्वं कफजे वातिको विधिः ॥
तथाप्यपक्वं छित्त्वैनं स्थिते रक्तेऽग्निना दहेत् ।
साध्यशेषं सशेषो हि पुनराप्यायते ध्रुवम् ॥
मांसव्रणोद्भवौ ग्रन्थी पाटयेदेवमेव च ।
कार्य्यं मेदोभवेऽप्येतत्तप्तैः फालादिभिश्च तम् ॥
प्रमृद्यात्तिलदिग्धेन छन्नं द्विगुणवाससा ।
शस्त्रेण पाटयित्वा वा दहेन्मेदसि सदृते ॥
शिराग्रन्थौ नवे पेयं तैलं साहचरन्तथा ।
उपनाहोऽनिलहरैर्वस्तिकर्म्म शिराव्यधः ॥
अङ्गैकदेशेष्वनिलादिभिः स्यात्
स्वरूपधारी स्फुरतः शिराभिः ।
ग्रन्थिर्मदाम्मांसभवस्तथापि
मेदोभवः स्निग्धतमश्चलश्च ॥
तं शोधितं स्वेदितमश्मकाष्ठैः
साङ्गुष्ठदण्डैर्विनयेदपक्वम् ।
विपाट्य चोद्धृत्य भिषक् सकोषं
शस्त्रेण दग्ध्वा व्रणवच्चिकित्सेत् ॥
अदग्ध ईषत् परिशोधितश्च
प्रयाति भूयोऽपि शनैर्विवृद्धिम् ।
तस्मादशेषः कुशलैः समन्ता-
च्छेद्यो भवेद्दोष शरीरदेशात् ॥
शोधे क्षते माक्षिकेण शोधयेत्
ततः स्रवोत्थः प्रशरैर्हृदयैः ।
उपद्रवं तं प्रतिवारयेज्ज्ञः
सैर्भेषजैः पूर्व्वतरैर्यथोक्तैः ॥
ततः क्रमेणास्य यथाविधानं
द्रव्यं व्रणघ्नं त्वरया चिकित्सेत् ॥"
इति चरके चिकित्सास्थाने १० अध्यायः ।
अपरा चिकित्सा च यथा,—
"ग्रन्थिष्वथामेषु भिषग्विदध्या-
च्छोफक्रियायां विहितं विधिज्ञः ।
स्वेदैस्तथापि नरस्य नित्यं
तदर्जितं व्याधिबलं निहन्ति ॥
तैलं पिबेत् सर्पिरथो द्वयं वा
दत्त्वा वसां वा त्रिवृतं विदध्यात् ।
सर्व्वेऽपि वातादिषु मूर्त्तमिष्टं
वैद्यश्चतुःस्नेहमयं द्वयं वा ॥
हिंस्रा च रोहिण्यमृता च भार्गी
श्योनाकबिल्वागुरुकृष्णगन्धाः ।
गोजी च बिम्बी सह तालपत्र्या
ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥
स्वेदोपनाहान् विविधांश्च कुर्य्या-
च्छाया प्रसिद्धानसकृच्च लेपान् ।
विदार्य्य वा पक्वमपोह्य पूयं
प्रक्षाल्य बिल्वार्कनरेन्द्रतोयैः ॥
तिलैः सपञ्चाङ्गुलपत्रमिश्रैः
संशोधयेत् सैन्धवसंप्रयुक्तैः ।
शुद्धं व्रणं चाप्युपरोपयेत्तु
तैलेन रास्नासरलान्वितेन ॥
विडङ्गयष्टीमधुकामृताभिः
सिद्धेन चाशीरसमन्वितेन ।
जलौकसः पित्तकृते हितास्तु
क्षीरोदकाभ्यां परिषेचनञ्च ॥
काकोलिवर्गस्य च शीतलानि
पिबेत् कषायाणि सशर्कराणि ।
द्राक्षारसेनेक्षुरसेन वापि
चूर्णं पिबेच्चापि हरीतकीनाम् ॥
मधूकजम्ब्वर्ज्जुनवेतसानां
त्वग्भिः प्रदेहानवचारयेत ।
सशर्करैर्वा त्वथ नूत्नकन्दै-
र्दिह्यादभीक्ष्णं मधुचन्दनैर्वा ॥
विदार्य्य वा पक्वमपोह्य पूयं
धावेत् कषायेण वनस्पतीनाम् ।
तिलैः सयष्टीमधुकैर्विशोध्य
सर्पिः प्रयोज्यं मधुरैर्विपक्वम् ॥
कृतेषु दोषेषु यथानुपूर्व्व्या
ग्रन्थौ भिषक् श्लेष्मसमुत्थिते तु ।
स्विन्नस्य विम्लापनमेव कुर्य्या-
दङ्गुष्ठलोहोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकदन्ती
काकादनी तापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गी-
करञ्जकालामदनैश्च विद्वान् ॥
अपक्वजातं प्रसभप्रयात-
मपक्वमेनापहरेद्विदार्य्य ।
दहेत् स्थिते वास्रजि सिद्धकर्म्मा
सद्यः क्षतोक्तञ्च विधिं विदध्यात् ॥
या मांसवन्ध्यः कठिना ह्यरुक्-
स्तास्वेव योज्यश्च विधिर्विदग्धैः ।
शस्त्रेण चापाद्य तु मेदमाशु
प्रक्षालयेत् सप्तलैः कषायैः ॥
संशोधनैश्च विशोधयेत्तु
क्षारोदकैः सौरसगाढैः ।

[illegible]

[illegible]

[illegible]

काकपुष्पम् २० नीलपुष्पम् २१ सुगन्धम् २२ तैलपर्णकम् २३ । अस्य गुणाः । तिक्तत्वम् । तीक्ष्णत्वम् । कटुत्वम् । उष्णत्वम् । दीपनत्वम् । लघुत्वम् । कफवातविषश्वासकण्डूदौर्गन्ध्यनाशित्वञ्च । इति भावप्रकाशः ॥ अस्य शेषगुणः । रूक्षतालक्ष्मीरोगघ्नज्वरनाशित्वम् । इति राजवल्लभः ॥

ग्रन्थिपर्णः, पुं, (ग्रन्थिः पर्वं तद्युक्तानि पर्णान्यस्य ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ (चोरकशब्देऽस्य गुणादयो ज्ञेयाः ॥)

ग्रन्थिपर्णा, स्त्री, (ग्रन्थिपर्ण + टाप् ।) गतुकालता । इति राजनिर्घण्टः ॥

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण + गौरादित्वात् ङीष् ।) गण्डदूर्वा । इति राजनिर्घण्टः ॥

ग्रन्थिफलः, पुं, (ग्रन्थियुक्तं फलमस्य ।) प्राकृतकण्टकः । कपित्थवृक्षः । मदनवृक्षः । इति राजनिर्घण्टः ॥

ग्रन्थिमत्फलः, पुं, (ग्रन्थिरस्त्यस्येति मतुप् । ग्रन्थिमत् पर्वविशिष्टं फलं यस्य ।) लकुचः । इति राजनिर्घण्टः ॥

ग्रन्थिमान्, [त्] पुं, (ग्रन्थिरस्त्यस्यासौ वा । ग्रन्थि + मतुप् ।) अस्थिसंहारकवृक्षः । हाड्भाङ्गा इति हाडजोडा इति च भाषा । तत्पर्यायः । अस्थिसंहारी १ वज्राङ्गी २ अस्थिश्रृङ्खला ३ । अस्य गुणाः । वातश्लेष्मनिबर्हणकारित्वम् । अस्थियोजकत्वम् । उष्णत्वम् । सारकत्वम् । अर्शोघ्नकृमिनाशित्वम् । रूक्षत्वम् । स्वादुत्वम् । लघुत्वम् । वृष्यत्वम् । पाचनत्वञ्च । इति भावप्रकाशः ॥ रक्तमाणोलपर्याया राजवल्लभग्रन्थिमानस्थिसंहारकद्र दष्टव्याः ॥ (ग्रन्थियुक्ते, त्रि । यथा, कुमारे । १ । ३६ ।
"कण्ठप्रभासङ्गविशेषनीलां
कृष्णत्वचं ग्रन्थिमतीं दधानम् ॥")

ग्रन्थिमूलं, क्ली, (ग्रन्थिर्मूले यस्य ।) गृञ्जनम् । इति राजनिर्घण्टः ॥

ग्रन्थिमूला, स्त्री, (ग्रन्थियुक्तं मूलं यस्याः । शाकपार्थिवादित्वात् समासः ।) मालादूर्वा । इति राजनिर्घण्टः ॥

ग्रन्थिलं, क्ली, (ग्रन्थिरस्त्यस्य । ग्रन्थि + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) पिप्पलीमूलम् । इति राजनिर्घण्टः ॥ आर्द्रकम् । इति शब्दचन्द्रिका ॥

ग्रन्थिलः, पुं, (ग्रन्थिरस्त्यस्येति । "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) विकङ्कतवृक्षः । [illegible] इति भाषा । (पर्य्यायोऽस्य यथा,—
"विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
करीरवृक्षः । इति [illegible] । [illegible] तालमूली । [illegible] । इति राजनिर्घण्टः । ग्रन्थियुक्ते, त्रि । इति मेदिनी । ले । [illegible]

(यथा, आर्य्यासप्तशत्याम् । ४०० ।
"रोषेणैव मया सखि ! बद्धोऽपि ग्रन्थिलोऽपि कठिनोऽपि ।
ऋजुतामनीयतायं सदा स्नेहेन वंश इव ॥")

ग्रन्थिला, स्त्री, (ग्रन्थिल + टाप् ।) भद्रमुस्ता । (भद्रमुस्ता शब्देऽस्या गुणादिकं ज्ञातव्यम् ।) मालादूर्वा । गण्डदूर्वा । इति राजनिर्घण्टः ॥

ग्रन्थिवर्हा, [न्] पुं, (ग्रन्थिभिर्वर्हते इति वर्हते इव वर्हा + णिनिः ।) ग्रन्थिपर्णवृक्षः । इति शब्दचन्द्रिका ॥

ग्रन्थिहरः, पुं, (ग्रन्थिं कौटिल्यं हरति याथा कुटिलतां कार्य्यजटिलतां वा विभेदयतीत्यर्थः । ग्रन्थि + हृ + अच् ।) अमात्यः । मन्त्री । इति त्रिकाण्डशेषः ॥

ग्रन्थीकं, क्ली, (ग्रन्थिभिः कायतीति । ग्रन्थि + कै + कः । निपातनात् दीर्घत्वम् ।) ग्रन्थिकम् । पिप्पलीमूलम् । इति हेमचन्द्रकोषः ॥

ग्रस, उ ङ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट् ।) रेफयुक्तः । उ, ग्रसित्वा ग्रस्त्वा । ङ, ग्रसते । भिन्नांशुमाल ग्रसते इति माघः । इति दुर्गादासः ॥

ग्रस, कि ग्रासे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वा-परं-सकं-सेट् ।) रेफयुक्तः । कि, ग्रासयति ग्रसति फलं लोकः । ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय । इमं ग्रसति पठति केचित् इति दुर्गादासः ॥

ग्रस्तं, त्रि, (ग्रस्यते स्म इति । ग्रस + क्तः । "रुषामत्वर-" इत्यादि "विभाषा ।" ७ । २ । १५ । इति इडभावः ।) लुप्तवर्णपदम् । असम्पूर्णवाक्यम् । इत्यमरः ॥ (यथा, रामायणे । २ । ८२ । १२ ।
"राघो नालिनवर्षे रूपं ग्रस्तस्तु मनो यथा ।")
खादितम् । इत्यमरः । ३ । १ । १०० ॥ (भक्षितम् । यथा, याज्ञवल्क्ये । १ । २८१ ।
"दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा ॥")

ग्रह, श श ग्रहणे । इति कविकल्पद्रुमः ॥ (क्र्यां-उभं-सकं-सेट् ।) श श, गृह्णाति गृह्णीते । इति दुर्गादासः ॥

ग्रह ङ कि आदाने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वा-परं-सकं-सेट् ।) ङ, ग्रहते । कि, ग्राहयति ग्रहति । [illegible] ग्रहति सद्यस्तामनेयते इव । इति दुर्गादासः ॥

ग्रहः, पुं, (गृह्णाति गतिविशेषानिति । गृह्णाति फलदातृत्वेन आत्मानमिति । ग्रह + "विभाषा ग्रहः ।" ३ । १ । १४३ । इति णः ।) सूर्य्यादिः । यथा, [illegible]
"[illegible]
[illegible] ॥"
[illegible]

(अथ ग्रहपूर्णाधिकारो यथा,—

"नागापदानामरमोर्त्सं स्यातां पुरुषमागमौ ।
ममागमः प्रमादेन सुर्विनामसमं मह ॥
प्रोक्ते मन्त्राधिकोऽनेन संयोगो भविताम्यथा ।
कुर्वत प्रागवाविर्योरेवं वक्तिकोपु विवर्धयात् ॥
प्रागवाधिर्वाधिकोऽनीनो वक्त्रियाः समागमः ।
गतात्मारम्भाः सम्पूर्णाविनामसमागमाः ।
भूमन्तरेण विभेदरगणोर्भिमियोर्मयोः ॥
ग्रहोऽतिक्रान्तदेर्वाधिन् भक्तियोगेन भावयेत् ॥
तदं विनादिनं प्रोक्तं तत्र देवं भविष्यति ।
[illegible]
[illegible]

यथा,—

"मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाभृतोः ।
बुधः कन्यामिथुनयोः प्रोक्तः कर्कस्य चन्द्रमाः ॥
स्याज्जीवधन्विमीनेशः शनिर्मकरकुम्भयोः ।
सिंहस्याधिपतिः सूर्यः कथितो गणकोत्तमैः ॥"

अथ ग्रहाणामुच्चनीचत्वकथनं तत्रैव यथा,—

"रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्कौ च कन्यामीनौ बुधस्य तु ॥
जीवस्य कर्कमकरौ मीनकन्ये सितस्य च ।
तुलामेषौ च मन्दस्य उच्चनीचाबुदाहृतौ ॥"

अथ ग्रहाणामन्योन्यं मित्रशात्रवमाह तत्रैव ।

"रवीन्दुभौमगुरवो मत्तुक्रशनिराहवः ।
यस्मिन् मित्राणि चत्वारि परस्मिन् शत्रवः स्मृताः ॥
राहुरव्योः मतं वैरं गुरुभार्गवयोरपि ।
भौमबुधयोर्वैरं विवस्वन्मन्दयोरपि ॥"

अथ ग्रहाणां प्रभातादिकालमानमाह तत्रैव,

"प्रभातमिन्दुगुरुक् मध्याह्नं रविभूमिजौ ।
अपराह्णं भार्गवेन्दू सन्ध्या मन्दभुजङ्गमौ ॥"

अथ ग्रहाणां दृष्टिकथनं तत्रैव यथा,—

"त्रिकोणदृष्टौ बुधमित्रौ भौमार्कौ व्योमदर्शिनौ ।
जीवेन्दू समदृष्टौ च शनिराहू अधोदृशौ ॥"

अथ ग्रहाणां विचरणस्थानानि तत्रैव यथा,—

"भार्गवेन्दू जलचरौ शनीरौ ग्रामचारिणौ ।
राहुर्निःसमन्दाश्चापि भुवनेऽरण्यचारिणः ॥"

अथ ग्रहाणां पित्रादिभावमाह तत्रैव,

"पिता प्रभाकरस्त्वार्यो क्षेमा भार्गवशीतगू ।
इद्ध्र समयाद् च पत्नौ राहुमन्दगौ ॥"

अथ ग्रहाणां रसज्ञानमाह तत्रैव ।

"कृष्णार्कौ कटुकौ जीवो मधुरस्तुवरो बुधः ।
नाराची चन्द्रभृगुतौ भौमौ मन्दौ सर्पाकाम्लगौ ॥"

अथ ग्रहाणां धातुमूलादिविभागज्ञानमाह ।

"मन्देन्दुसभौमः स्युर्धातुः भविष्टभार्गवौ ।
मूलं जीवश्च भौमश्च जीवं राहुर्मदाधिपः ॥"

अथ ग्रहाणां वस्त्रज्ञानमाह तत्रैव ।

"[illegible] भार्गवेन्द्र भृगुनार्को चतुष्पदौ ।
पक्षिणौ गुरुसौरी च चन्द्रराहू सरीसृपौ ॥"

अथ ग्रहाणां जातिनिर्णयमाह ।

"विप्रौ गुरुशुक्रौ भौमौ कृष्णार्कौ नृप [illegible] ।
[illegible] शूद्रौ [illegible] संहितम् [illegible] ॥"

अथ ग्रहाणां देहादीनां [illegible]माह ।

"[illegible] सितः [illegible] गुरुर्भौमो [illegible] ।
[illegible] ॥"

अथ ग्रहाणां [illegible]माह तत्रैव ।

"[illegible] ॥"

[illegible]

धातोर्विनिश्चये प्राते विशेषः स्व[illegible]
शुक्रे चन्द्रे जलाधारो दैवतावस[illegible]
रवौ चतुष्पदास्थानमिष्टकानिचयो[illegible]
भृगौ स्यात् कुजे प्रोक्तं शनिराहू [illegible]
धमीभिर्हि बुधस्थाने गर्तभूमिं वि[illegible]

अथ ग्रहाणां लिङ्गज्ञानमाह तत्रैव [illegible]

"जीवमङ्गलमार्तण्डाः पुरुषाः [illegible]
सोमसौम्यजमन्दा हि भृगुपुत्रास्तु यो[illegible]

अथ ग्रहाणां वयोज्ञानमाह तत्रैव ।

"युवा कुजः शिशुः सौम्यः प्रौढशुक्रौ च [illegible]
मन्दमार्तण्डदैवेज्यफणिनः स्थविरा ग्रहा[illegible]

अथ ग्रहाणां प्रकृतिस्वरूपमाह [illegible]

"भौममन्दार्कभोगीन्द्राः [illegible]
गुरुश्वेतकिरणशुक्राः स[illegible]

अथ ग्रहाणां राशिभोग[illegible]
ज्योतिषे ।

"रविर्मासं निशानाथः स[illegible]
पक्षत्रयं भूमिपुत्रो बुधोऽष्टा[illegible]
वर्षमेकं सुराचार्यश्चाष्टाविंश[illegible]
शनिः सार्द्धद्वयं वर्षं स्वर्भानुः [illegible]

ग्रहाणां स्तुत्यादिकन्तु नवग्रह[illegible]
तेषां दशा तत्फलादि च द[illegible]
पुराणे ६० अध्याये च द्रष्टव्यम् [illegible]

अथ नवग्रहयागविधानादि यथा

याज्ञवल्क्य उवाच ।

"श्रीकामः शान्तिकामो वा ग्रहयज्ञ[illegible]
ग्रहयज्ञं समं कुर्यात् ग्रहास्तेते [illegible]
सूर्यः सोमो मङ्गलश्च बुधश्चैव बृहस्[illegible]
शुक्रः शनैश्चरो राहुः केतुः कुर्यात् [illegible]
ताम्रकात् स्फटिकाद्रक्तचन्दनात् सुवर्[illegible]
रजतादयसः सीसात् कांस्यात् [illegible]
रक्तः शुक्लस्तथा रक्तः पीतः पीतः [illegible]
[illegible]
[illegible]

अथ वेदभेदे ग्रहादीनां मन्त्रभेदाः क्रमशः प्रदर्श्यन्ते ।

ऋग्वेदिनाम्	यजुर्वेदिनाम्	सामवेदिनाम्	अथर्ववेदिनाम्
आ कृष्णेन रजसा ।१।३५।२	आ कृष्णेन रजसा । वा: ३३।४३	उदु त्यं जातवेदसम् १।१।१।३।११*	विषासहिं सहमानम् १७।१।१
आ प्यायस्व समेतु ते १।९१।१६	इमं देवा असपत्नम् । वा: ९।४०	मन्ते मर्यासि । वा: १२।११३†	शक्रधूमं नक्षत्राणि ६।१२८।१
अग्निर्मूर्द्धा दिवः ८।४४।१६	अग्निर्मूर्द्धा दिवः । वा: १५।२०	अग्निर्मूर्द्धा दिवः १।१।१।३।७	त्वया मन्यो सरथम् ४।३१।१
अग्ने विवस्वत् १।४४।१	उद्बुध्यस्वाग्ने । वा: १५।५४	अग्ने विवस्वत् १।१।१।१।६	यद्राजानो विभजन्त: ३।२९।१
बृहस्पते परि दीया १०।१०३।४	बृहस्पते अतियदर्य: । वा: २६।३	बृहस्पते परि दीया २।९।३।२।१‡	बृहस्पतिर्न: परिपातु ७।५१।१
शुक्रं ते अन्यत् ६।५८।१	अन्नात् परिस्रुत: । वा: १९।७५	शुक्रं ते अन्यत् १।१।२।३।३	हिरण्यवर्णा: शुचय: १।३३।१
शन्नोदेवीरभीष्टये १०।९।४	शन्नो देवीरभीष्टये । वा: ३६।१२	शन्नो देवीरभीष्टये १।१।१।३।१३	सहस्रबाहु: पुरुष: १९।६।१
कया नश्चित्र: ४।३१।१	काण्डात् काण्डात् । वा: १३।२०	कया नश्चित्र: १।२।२।३।५	दिवं चित्रमृतुथा:
केतुं कृण्वन्नकेतवे १।६।३	केतुं कृण्वन्नकेतवे । वा: २९।३७	केतुं कृण्वन्नकेतवे २।६।३।१२।३	यस्ते पृथु: स्तनयित्नु: ७।११।१
आ वो राजानम् ४।३।१	त्र्यम्बकं यजामहे । वा: ३।६०	आ वो राजानम् १।१।२।२।७	मानो विदन् विव्याधिन:१।१९।१
गौरीर्मिमाय १।१६४।४१	श्रीश्च ते लक्ष्मीश्च । वा: ३१।२२	आपो हि ष्ठा २।९।२।१०।१	आपो हि ष्ठा १।५।१
कुमारं माता ५।२।१	यदक्रन्द: प्रथमम् । वा: २९।१२	स्योना पृथिवि । वा: ३५।२१	अग्निरिव मन्यो त्विषित:४।३१।२
इदं विष्णुर्विचक्रमे १।२२।१७	विष्णोरराटमसि । वा: ५।२१	इदं विष्णुर्विचक्रमे १।३।१।३।९	प्र तद्विष्णु: स्तवते ७।२६।२
त्वमित् सप्रथा: ८।६०।५	आ ब्रह्मन् ब्राह्मण: । वा: २२।२२	त्वमित् सप्रथा: १।१।१।४।८	ब्रह्म जज्ञानम् ४।१।१
इन्द्रं वो विश्वत: १।७।१०	सजोषा इन्द्र: । वा: ७।३७	इन्द्रमित् देवतातये १।३।२।१।७	इन्द्रेमं प्रतरम् ६।५।२
यमाय सोमं सुनुत १०।१४।१३	यमाय त्वाङ्गिरस्वते । वा: ३८।९	आयं गौ: पृश्नि: २।६।१।१।१	य: प्रथमं प्रवतमाससाद६।२८।३
ब्रह्म जज्ञानम् । वा: ।१३।३	कार्षिरसि समुद्रस्य । वा: ६।२८	ब्रह्म जज्ञानम् । १।४।१।३।९	रोहित: काल: १३।२।३९
उभो वाजं हि १।४८।११	चित्रावसो स्वस्ति । वा: ३।१८	चित्र इच्छिशो: १।१।२।२।२।	आम्नातं यदनाम्नातम्
अग्निं दूतं वृणीमहे १।१२।१	अग्निं दूतं पुरोदधे । वा: २२।१७	अग्निं दूतं वृणीमहे १।१।१।१।३	समाख्यामे ऋतव: २।६।१
अप्सु मे सोम: १।२३।२०	आपो हि ष्ठा । वा: ११।५०	उदुत्तमं वरुण पाशम् । वा:१२।१२	शन्नो देवीरभीष्टये । वा: ३६।१२
स्योना पृथिवि १।२२।१५	स्योना पृथिवि । वा: ३५।२१	पृथिव्यन्तरीक्षम् । तै: आ:७।७।३	भूमे मातर्निधेहि १२।१।६३
सहस्रशीर्षा पुरुष: १०।९०।१	इदं विष्णुर्विचक्रमे । वा: ५।१५	सहस्रशीर्षा पुरुष: । वा: ३१।१	इदं विष्णुर्विचक्रमे ७।२६।४
इन्द्रायेन्दो मरुत्वते ९।६४।२२	इन्द्र आसां नेता । वा: १७।४०	इन्द्रायेन्दो १।५।२।४।६	इन्द्र जुषस्व प्र वहा २।५।१
उत्तानपर्णे सुभगे १०।१४५।२	अदित्यै रास्नासि । वा: १।३०	एकाष्टका तपसा । अ: ३।१०।१२	प्रेतं पादौ १।२७।४
प्रजापते न त्वद् १०।१२१।१०	प्रजापते न त्वद् । वा: १०।२०	प्रजापते न त्वद् । वा: १०।२०	नर्हि जातास्योषधे १।२३।१
आयं गौ: पृश्नि: १०।१८९।१	नमोऽस्तु सर्पेभ्य: । वा: १३।६	तदेन्द्रिनायमम् १।३।२।३।८	घोरभक्ष घोरभ २।२४।१
ब्रह्म जज्ञानम् । वा: १३।३	ब्रह्म जज्ञानम् । वा: १३।३	एष ब्रह्मा य ऋत्विय: १।५।२।१।२	ये दिशामन्तर्देशेभ्य:[illegible]

पाठान्तराणि प्रदर्श्यन्ते,—

* वरुणप्राशसि १।३।२।४।४ † सोमं राजानम् १।१।२।५।१ ‡ इन्द्रमो हि ।१।[illegible]

(गृह्यते अनुगृह्यते अभ्युपपद्यते इति । ग्रह + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) अनुग्रहः । निर्बन्धः । (यथा, आर्य्यासप्तशत्याम् । ४४५ ।

"गृहिणि त्वयैव निहितः कुसुमं बहु दत्तमर्षितो बहुधः ।

चक्रधरमपि शनैश्चर इव सखि ! दुष्टग्रहो दयितः ॥"

"दुष्टो ग्रह आग्रहो यस्य पक्षे दुष्टश्चासौ ग्रहश्चेति विग्रहः ।" इति तट्टीका ॥) ग्रहणम् । (यथा, भागवते । ३ । १५ । ३५ ।

"मन्दोदरेरदुपरायुत विश्वशुक्लमास्यद्यावमतनामतिकालरेव ।")

रणोद्यमः । पूतनादयः । ते तु बालग्रहाः । (एतेषां नामानि विवरणञ्च बालग्रहशब्दे द्रष्टव्यानि ॥) सैंहिकेयः । (यथा, रघुः । १२ । २८ ।

"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः । अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥")

उपरागः । स तु चन्द्रसूर्य्ययोर्मण्डलम् । इति मेदिनी । दे । ३ ॥ (यदुक्तं तिथितत्त्वे ।

"अभिचारान्तरे राहोः केतोर्मा संस्थितो रविः । षण्मासान्तरे चन्द्रस्तदा समायाति ग्रहः ॥"

ग्रहाश्च नवसंख्याकेन ग्रहशब्देनापि नवसंख्या उच्यते । यथा, देवीभागवते । १ । ३ । ३ ।

"चतुर्द्दशसहस्रञ्च सागृत्यमाद्यं प्रकीर्त्तितम् । तथा ग्रहसहस्रञ्च मार्कण्डेयं महाद्भुतम् ॥"

ग्रहादेवः । यथा, महाभारते । १३ । १० । १० ।

"चन्द्रः सूर्य्यः शनिः केतुर्भौमो ग्रहपतिर्गुरुः ।")

ग्रहकल्लोलः, पुं, (ग्रहाणां चन्द्रसूर्य्यादेः कल्लोल इव ।) राहुः । इति त्रिकाण्डशेषः ॥

ग्रहणं, क्ली, (ग्रहणं इति । ग्रह + भावे ल्युट् ।) स्वीकारः । (यथा, रामायणे । १ । ६१ । १८ ।

"सर्व्वेषां तस्य धनुषस्तोलनेऽपि वा ।"

आदरः । करः । उपलब्धिः । (यथा, रघुः । ३ । ४८ ।

"स इत्यमुक्तमनाहवचकैः समाश्रयैः सर्व्वाभिरन्वितः । निरैक्षदादृत्यरिव वाहनं कीर्त्तिमूर्त्तिरिव समुन्नतारिदम ।")

शब्दः । उपरागः । इति मेदिनी । णे ४१ । (गृह्यन्ते विषयाः एभिः । ग्रह + करणे ल्युट् ।) इन्द्रियम् । इति शब्दचन्द्रिका । ग्रहणम् । इति । अथ सूर्य्यचन्द्रग्रहणकारणं यथा,—

"अभिचारान्तरे राहोः केतोर्मा संस्थितो रविः । षण्मासान्तरे चन्द्रस्तदा समायाति ग्रहः ॥ [illegible] राहुणा चन्द्रे इष्टो । [illegible] राहुणा ग्रस्यते इष्टो । [illegible] राहुणा ग्रस्यते रविः ॥"

[illegible] तु विरमं दानमाचरेत् ।

सुरुचौरिनवाशे तु मलिनं सुभवर्षणम् । गुरोरेशकमासाद्य दृश्यते सकलार्थकः । अग्निशुक्रनवांशे तु प्रावृट्काले महज्जलम् । अन्यचाथक्षभूतौ तौ दृश्येते क्षुद्रिताम्बरौ ।"

राहोर्वर्णविशेषे शुभाशुभं यथा, (बृहत् संहितायाम् । ५ । ५३-५८ ।)

"श्वेते क्षेमसुभिक्षं ब्राह्मणपीडाश्च निर्द्दिशेद्राहौ । अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनाम् ॥ हरिते रोगोल्बणता शस्यानामीतिभिश्च विध्वंसः । कपिले शीघ्रगसत्त्वम्लेच्छविध्वंसोऽथ दुर्भिक्षम् ॥ अरुणकिरणानुरूपे दुर्भिक्षं वृष्टयो विहगपीडा । धूम्राभे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिञ्च ॥ कापोतारुणकपिले श्यामाभे क्षुद्भयं विनिर्द्दिशेत् । कापोतः शूद्राणां व्याधिकरः कृष्णवर्णश्च ॥ विमलकमलपीताभो वैश्यध्वंसी भवेत् सुभिक्षाय । सार्चिष्मत्यग्निभयं गैरिकरूपे च युद्धानि ॥ दूर्व्वाकाण्डश्यामे हारिद्रे चापि निर्द्दिशेन्मरकम् । अशनिभयसम्प्रदायी पाटलकुसुमोपमो राहुः ॥"

तद्दर्शननिषेधो यथा,—

"सप्ताष्टजन्मर्क्षेषु चतुर्थे दशमे तथा । नवमे च तथा चन्द्रे न कुर्य्याद्राहुदर्शनम् ॥ जन्मभे जन्मराशौ च षष्ठाष्टमगते तयोः । चतुर्थे द्वादशे चन्द्रे न कुर्य्याद्राहुदर्शनम् ॥ यावद्दर्शनमात्रेण चार्थहानिर्महद्भयम् । जायते नात्र सन्देहस्तस्मात्तत्परिवर्ज्जयेत् ॥

निपतत्करप्रयरिसंश्रितेषु वैनाशिकर्क्षेषु कृतं हि कर्म्म । सर्व्वं वृथा निष्फलमेव यस्मात् क्लेशोऽपि तत्रास्ति शुभं न किञ्चित् ॥"

तत्र कर्त्तव्यं कर्म्म यथा,—

"एकरात्रमुपोष्यैव राहुं दृष्ट्वा चरं नरः । पुण्यमाप्नोति स्नात्वा च स्नानं श्राद्धं विधानतः ॥ आदित्यकिरणैः पूतं पुनः पूतश्च वह्निना । अन्नं व्याध्यातुरः स्नायात् ग्रहणेऽप्युष्णवारिणा ॥ सर्व्वं भूमिसमं दानं सर्व्वे व्याससमा द्विजाः । सर्व्वं गङ्गासमं तोयं ग्रहणे नात्र संशयः ॥ सर्व्वेनैवापि कर्त्तव्यं श्राद्धं वै राहुदर्शने । अकुर्व्वाणस्तु तत् श्राद्धं पङ्के गौरिव सीदति ॥ यावदन्ततो तीर्थे च चन्द्रसूर्य्यग्रहे तथा । आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव हि ॥ चन्द्रसूर्य्यग्रहे स्नानं श्राद्धदानजपादिकम् । कार्य्याणि सम्मार्गेऽपि नित्यं नैमित्तिकं तथा ॥ सत्योऽस्त्वैविगुप्तानि तन्मुदामवश्यवैधः । सकरीणां प्रकृतीतो मासमार्द्देनू न शोधयेत् ॥ चन्द्रग्रहणमारे स्नर्वे सूर्य्यग्रहणतथा । तुलादानमिदं शीतकालमन्त्रमपनं रक्षणम् ॥ अन्यमाद्रत्नदान कोटिगुणञ्च फलं लभेत् । यवनामन्त्राणेन पुरश्चर्य्याविधाने ॥ ग्रहणेऽस्य सन्दीप्ता शुचिः पूर्व्वमुपोषितः । एवं समुद्रमनिम्ना नाभिमात्रोदके स्थितः ।

यद्वा गुरुपोदके स्नात्वा शुचिः पूर्व्वेर ग्रहणादिविमोक्षान्तं जपेन्मन्त्रं सम अनन्तरं दशांशेन क्रमाद्धोमादिकं तदन्ते महतीं पूजां कुर्य्याद्धनाक्षत्र ततो मन्त्रप्रसिद्ध्यर्थं गुरुं संपूज्य तोष एवञ्च मन्त्रसिद्धिः स्याद्देवता च प्रसीद सूतके मृतके चैव न दोषो राहुदर्शने । स्नानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्ज्जितम् नक्षत्रविशेषे ग्रहणे नराणां यथा,—

"यस्मिन् जन्मनक्षत्रे ग्रस्येते शशिभास्करौ तज्जातानां भवेत् पीडा ये नराः शान्तिवर्ज्जिताः ॥ ग्रहणग्रहपरिपीडितनाडीनक्षत्रदोषगः सह शतपुष्पैः स्नायात् पलिनीपलपद्मदर्भैः । नाडीनक्षत्राणि च । नयोर्विंशपञ्चविंशतयः ॥ "ताम्रपात्रं तिलैः पूर्णं पूर्णं वा गव्यसर्पिषा भास्करग्रहणे दद्यान्नाडीदोषोपपीडितः । घृतकुम्भोपरि निहितं शङ्खं नवनीत नाड्यादिदोषशान्त्यै द्विजाय दोषाकर

तत्र भोजनादिनिषेधो यथा,—

"चन्द्रस्य यदि वा भानोर्यस्मिन्नहनि भा ग्रहणन्तु भवेत्तत्र तत्पूर्व्वं भोजनक्रिया नाचरेत् सग्रहे चैव तथैवास्तमुपागते । यावत् स्यान्मोदयस्तस्य नाश्नीयात्तावदेव मुक्तिं दृष्ट्वा तु भुञ्जीत स्नानं कृत्वा ततः सूर्य्यग्रहे तु नाश्नीयात् पूर्व्वं यामचतुष्टयम् चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना नाहं न कीर्त्तयेद्गवस राशौ राशेश्च तत्रशौचं यथा,—

"सर्व्वेषामेव वर्णानां सूतकं राहुदर्शने । स्नात्वा कर्म्माणि कुर्व्वीत शृतमन्नं विवर्ज्जयेत् ग्रहणे श्रावमाशौचं विमुक्तौ सौतिकं तयोः सम्पत्तिमात्रेण उपस्पृश्य क्रियाचरेत् ॥

इति तिथ्यादितत्त्वम् ॥

अथ ज्योतिर्म्मते ग्रहणस्वरूपं यथा । पृथिवीच्छायां समाश्रित्य चन्द्रं रविं यदाच्छादयति तत् ग्रहणम् । रविचन्द्रयोर्न गतिरोधकस्वरूपो ग्रहः ॥ अथ ग्रहणसम्भावना । समये यदि रविस्फुटराश्यादि स्फुटराश्यादिभिस्तुल्यः किंवा भवति तदा सूर्य्यग्रहणम् । पू यदि चन्द्रस्फुटराश्यादि, राहुकेत्वा दिभिस्तुल्यः किंवा षष्ठोद्द्शभागान्तरे तदा चन्द्रग्रहणं स्यात् ॥ * ॥ तस्य प्रकारो यथा । अमावस्या पूर्णिमा वसाने च सूर्य्यसिद्धान्तोक्तमवनाम

नवांशादिकौ रविचन्द्रौ भवेतां । अथ भास्कराचार्यमतेन स्फुटशरानयनमाह रविचन्द्र । अस्मिन् शरानयने यदि राशिषट्कादधिकं भवति तदा चक्रशुद्धं कृत्वा शेषं ग्राह्यम् । यदि तन्न कार्यं तदा षड्भाधिकं भवति तदा शरः दक्षिणः । अन्यथा उत्तरः स्यात् । तथा च दशांशाभ्यां गुणितात् स्पष्टशरः भवति । तात्कालिके शरे सति दशादिकं तिथ्यादिकं भवति स्वदेशीयलग्नात् । गौरवांशाः शुद्धाः तुल्यादिषट्के याम्यशरः स्यात् ॥ १ ॥ चन्द्रशरानयनम् । मध्यबिम्बाद्यधिकतमपूर्णमासान्तमितमध्यचन्द्रभुक्तिः ८१० । ३५ । सा च स्फुटवशतः किञ्चित् कलादिभिर्न्यूनाधिका वा भवति । तस्याः स्फुटेन्दुभुक्तेः नवांशात् द्वात्रिंशदधिकशतेन १३२ भक्ताल्लब्धं चन्द्रस्य मानं स्यात् । चतुर्गुणितचन्द्रमानात् त्र्यंशोनं राहुमानं भवति ॥ ० ॥

अथ चन्द्रग्रहणम् ।

राहुचन्द्रयोर्मानं मिलितं शरेण हीनकरणात् तदर्धं तत् ग्रासो भवेत् शरे न्यूने सति राहुचन्द्रयोर्मिलितं मानद्वयं ग्रासो भवेत् । शरेऽधिके ग्रासो न स्यात् ॥ ० ॥

चन्द्रग्रहणस्य स्थित्यादिकालज्ञानं यथा । षड्गुणितग्रासाङ्कात् चतुर्भिश्छिन्नग्रासाङ्केन लब्धं दण्डादिकं स्थितिदण्डार्द्धं भवति । तत् पौर्णमास्यन्तदण्डादिषु हीनं सत् स्पर्शकालः । युक्तं तु मुक्तिकालः द्विगुणितं तत् स्थितिदण्डादिकालः स्यात् ॥ ० ॥

चन्द्रमण्डलस्य स्पर्शादिदिग्ज्ञानम् ।

व्यक्तिशरे याम्ये सति आकाशे चन्द्रमण्डलस्य अग्निकोणे स्पर्शो नैरृतकोणे मुक्तिश्च स्यात् । शरे सौम्ये सति ईशानकोणे स्पर्शः वायुकोणे मोक्षः । इति चन्द्रग्रहणम् ॥ ० ॥

सूर्यग्रहणे अर्को यथा । स्वदेशविषुवच्छाया ह्यः स्थाप्या । एकस्याः षड्गुणितान्या युक्ता सती भागादिर्लम्बाक्षः स्यात् ॥ ० ॥ सूर्यग्रहणोपयोगिनतमाह । दिनार्द्धामावस्ययोर्दण्डादीनां यदन्तरं तत् अंशादिकं नतनामकं स्यात् ॥ ० ॥ सूर्यग्रहणोपयोगि लम्बनं यथा । द्विगुणनतसमकलाकरणो ग्राह्यः खण्डान्तरगुणितशेषात् षष्टिलब्धयुक्तः सन् स्फुटलम्बनं अंशादिकं भवति ॥ ० ॥ सूर्यग्रहणे फलं यथा । दिनपूर्व्वपरार्द्धक्रमेण षड्गुणितनतयुक्तलम्बनसहितस्फुटरवौ षट्राश्यधिके षड्राशीन् त्यक्त्वा त्रिंशता गुणितौ यदि नवत्या अधिको भवति तदा अशीत्युत्तरशतात् हीनः कार्यः । त्रिगुणितदशलब्धैः खण्डो ग्राह्यः खण्डान्तरगुणितशेषात् दशलब्धयुक्तः सन् फलं भवति ॥ ० ॥ सूर्यग्रहणे नतिर्यथा । अक्षफलयोर्योगो नतिः स्यात् षड्राश्यून्ने अक्षफलान्तरनतिः सा फले अधिके सति सौम्या अक्षे अधिके सति याम्या भवति ॥ ० ॥ सूर्यग्रहणे शरो यथा । मध्यराहुभोगः स्फुटरविर्द्विगुणितलम्बनलग्नाग्रभुक्तिभिर्दिनपूर्व्वार्द्धे रहितः दिनशेषार्द्धे सहितः कार्यः तस्मात् शरानयनप्रकारेण षड्राश्यधिके षड्राशीन् त्यक्त्वा शरः आनीय तस्मादादि चन्द्रशरानयनवत् शरः कार्यः । तथ स्फुटशरः उभयोः शरनत्योर्दिक्तुल्यतायां तयोः योगः भिन्नदिक्त्वे अन्तरं कार्यं सति यदधिकं तस्य दिशा शरस्य दिक् ज्ञातव्या ॥ ० ॥ सूर्यमानं यथा । दशगुणमध्यरविमानाधिकोनत्रिंशत् कलाभिरवरविमध्यभुक्तिः । ५८ । ८ । १० सा च स्फुटवशात् किञ्चित् कलादिभिर्न्यूनाधिका वा भवति । तस्याश्चिगुणितस्फुटरविभुक्तेर्द्वात्रिंशता लब्धं रविमानं स्यात् ॥ ० ॥

अथ सूर्यग्रहणम् ।

पूर्व्वोक्तचन्द्रमानं रविमानं मिलितं शरेण हीनं सत् ग्रासो भवेत् ॥ ० ॥ सूर्यग्रहणस्य स्पर्शादिकालज्ञानम् । चतुर्गुणितग्रासाङ्कात् द्विगुणग्रासाङ्केन लब्धं दण्डादिकं स्थितिनाडिकार्द्धं भवति । तदमावस्यायाः दण्डादिषु हीनं स्पर्शकालः युक्तं मुक्तिकालः स्यात् ॥ ० ॥ स्पर्शादिदिग्ज्ञानम् । शरे याम्ये सति अर्कमण्डलस्य नैरृतकोणे स्पर्शो अग्निकोणे मोक्षः स्यात् । सौम्ये शरे सति वायुकोणे स्पर्शः ईशानकोणे मुक्तिर्भवेत् द्विगुणितं तत् स्थितिदण्डादि स्यात् ॥ ० ॥ दिवारात्र्योः परार्द्धे यदि ग्रहणं भवति तदा अमावस्यापौर्णमास्योर्दण्डादिः स्फुटलम्बनयुक्तः कार्यः ॥ गणितागतकालात् हीनातिरिक्ते काले यदि ग्रहणं स्यात् तत् औत्पातिकं भवेत् ॥ ० ॥ ग्रहणे मण्डलस्य सामान्यवर्णो यथा । बिम्बस्य वैवर्ण्यं अंशुहानिस्तमोवृत्तिः खण्डनमण्डलता वा शुक्लारक्तश्यामलपीतचित्रैः पटादैः रोध इव वेष्टनं वा भवति ॥ ० ॥ अपर्व्वणि ग्रहणं दुर्भिक्षदर्शनादिकारि स्यात् तदा दिशश्च विरूपाः स्युः ॥ ० ॥ ग्रासाङ्गुलिमानज्ञानम् । दशगुणितग्रासाङ्कात् मानद्वयार्द्धेन लब्धं चन्द्रसूर्ययोर्ग्रासस्य गताङ्गुलाद्यं भवति । सूर्यस्य अङ्गुलमपि ग्रासोऽदृश्यो भवति । चन्द्रस्य षोडशाङ्गुलः सुदर्शः यदि षोड़शाङ्गुलाधिको भवति तदा सर्व्वग्रासः ॥ ० ॥ ग्रहणे मण्डलवर्णो यथा । अल्पे ग्रहणे धूम्राभं समग्रे कपिलं अर्द्धे कृष्णाभम् । इति सूर्यग्रहणम् ॥ इति सिद्धान्तमञ्जरीसम्मतम् ॥

(अधुना सूर्यसिद्धान्तमतमुच्यते तत्र चन्द्रग्रहणाधिकारो यथा,—

"सार्द्धानि षट्सहस्राणि योजनानि विवस्वतः ।
विष्कम्भो मण्डलस्येन्दोः सहाशीत्या चतुःशतम् ॥
स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ ।
रवेः स्वभगणाभ्यस्तः शशाङ्कभगणोद्धृतः ॥
शशाङ्ककक्षागुणितो भाजितो वार्ककक्षया ।
विष्कम्भश्चन्द्रकक्षायां तिथ्याप्ता मानलिप्तिका ॥
स्फुटेन्दुभुक्तिर्भूव्यासगुणिता मध्ययोद्धृता ।
लब्धं सूची महीव्यासस्फुटार्कश्रवणान्तरम् ॥
मध्येन्दुव्यासगुणितं मध्यार्कव्यासभाजितम् ।
विशोध्य लब्धं सूच्या तु तमो लिप्तास्तु पूर्व्ववत् ॥
भानोर्भार्द्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा ।
शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके ॥
तुल्यौ राश्यादिभिः स्यातामावास्यान्तकालिकौ ।
सूर्येन्दू पौर्णमास्यन्ते भार्द्धे भागादिकौ समौ ॥
गतैष्यपर्व्वनाडीनां स्वफलेनोनसंयुतौ ।
समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा ॥
छादको भास्करस्येन्दुरधःस्थो घनवद्भवेत् ।
भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ ॥
तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयोः ।
योगार्द्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते ॥
यद्ग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा ।
योगार्द्धादधिके न स्याद्विक्षेपे ग्राससम्भवः ॥
ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक् ।
विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यामुभे पदे ॥
षष्ट्या संगुण्य सूर्येन्द्वोर्भुक्त्यन्तरविभाजिते ।
स्यातां स्थितिविमर्द्दार्द्धे नाडिकादिफले तयोः ॥
स्थित्यर्द्धनाडिकाभ्यस्ता गतयः षष्टिभाजिताः ।
लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः ॥
तद्विक्षेपैः स्थितिदलं विमर्द्दार्द्धं तथासकृत् ।
संसाध्यमन्यथा याते तस्मिन्नादिफलं स्वकम् ॥
स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत् ।
स्थित्यर्द्धनाड़िकाहीने ग्रासो मोक्षस्तु संयुते ॥
तद्वदेव विमर्द्दार्द्धनाड़िकाहीनसंयुते ।
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे ॥
इष्टनाड़ीविहीनेन स्थित्यर्द्धेनार्कचन्द्रयोः ।
भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः ॥
भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्द्धसङ्गुणाः ।
स्फुटस्थित्यर्द्धसम्भक्ताः स्फुटाः कोटिकलाः स्मृताः ॥
क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत् ।
मानयोगार्द्धतः प्रोज्झ्य ग्रासस्तात्कालिको भवेत् ॥
मध्यग्रहणतश्चोर्द्ध्वमिष्टनाड़ीर्विशोधयेत् ।
स्थित्यर्द्धान्मौक्षिकाच्छेषं प्राग्वच्छेषं तु मौक्षिके ॥
ग्राह्यग्राहकयोगार्द्धाच्छोध्याः स्वच्छन्नलिप्तिकाः ।
तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य कृतिम्पदम् ॥
कोटिलिप्ता रवेः स्पष्टस्थित्यर्द्धेनाहता हृताः ।
मध्येन निशास्तन्नाद्यः स्थितिवद् ग्रासनाड़िकाः ॥
नतज्यात्र्यक्षज्याभ्यस्ता त्रिज्याप्ता तस्य कार्मुकम् ।
वलनांशाः सौम्ययाम्याः पूर्व्वापरकपालयोः ॥
राशित्रययुताद् ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युताः ।
भेदेऽन्तराज्ज्या वलना सप्तत्यङ्गुलभाजिता ॥
सोन्नतं दिनमध्यार्द्धं दिनार्द्धाप्तं फलेन तु ।
छिन्द्याद्विक्षेपमानानि तान्येषामङ्गुलानि तु ॥

इति सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारः ॥

अथ सूर्यग्रहणाधिकारः ।

"मध्यलग्नसमे भानौ हरिजस्य न सम्भवः ।
अक्षोदङ्मध्यभक्रान्तिसाम्ये नावनतेरपि ॥
देशकालविशेषेण यथावनतिसम्भवः ।
लम्बनस्यापि पूर्व्वान्यदिग्वशाच्च तथोच्यते ॥
लग्नं पर्व्वान्तनाड़ीनां कुर्य्यात् स्वैरुदयासुभिः ।
तज्ज्यान्त्यापक्रमज्याघ्नी लम्बज्याप्तोदयाभिधा ॥

तदा लम्बोदयैर्लग्नं मध्यसंज्ञं यथोदितम् ।
तत्क्रान्त्यक्षांशसंयोगो दिक्साम्येऽन्तरमन्यथा ॥
शेषं नतांशास्तन्मौर्व्वी मध्यज्या साभिधीयते ।
मध्योदयज्ययाभ्यस्ता त्रिज्याप्ता वर्गितं फलम् ॥
मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदम् ।
तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः ॥
नतांशबाहुकोटिभ्यां स्फुटे दृक्क्षेपदृग्गती ।
एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया ॥
मध्यलग्नार्कविश्लेषज्या छेदेन विभाजिता ।
रवीन्द्वोर्लम्बनं ज्ञेयं प्राक्पश्चाद्घटिकादिकम् ॥
मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत् ।
धनमूनेऽसकृत् कर्म्म यावत् सर्व्वं स्थिरीभवेत् ॥
दृक्क्षेपः शीततिग्मांश्वोर्मध्यभुक्त्यन्तराहतः ।
तिथिघ्नत्रिज्यया भक्तो लब्धं सावनतिर्भवेत् ॥
दृक्क्षेपात् सप्ततिहृताद्भवेद्वावनतिः फलम् ।
अथवा त्रिज्यया भक्तात् सप्तसप्तकसङ्गुणात् ॥
मध्यज्या दिग्वशात् सा च विज्ञेया दक्षिणोत्तरा ।
सेन्दुविक्षेपदिक्साम्ये युक्ता विश्लेषितान्यथा ॥
तया स्थितिविमर्द्दार्द्धग्रासाद्यं तु यथोदितम् ।
प्रमाणं वलनाभीष्टग्रासादि हिमरश्मिवत् ॥
स्थित्यर्द्धोनाधिकात् प्राग्वत् तिथ्यन्ताल्लम्बनं पुनः ।
ग्रासमोक्षोद्भवं साध्यं तन्मध्यहरिजान्तरम् ॥
प्राक्कपालेऽधिकं मध्याद्भवेत् प्राग् ग्रहणं यदि ।
मौक्षिकं लम्बनं हीनं पश्चार्द्धे तु विपर्य्ययः ॥
तदा मोक्षस्थितिदले देयं प्रग्रहणे तथा ।
हरिजान्तरकं शोध्यं यत्रैतत् स्याद्विपर्य्ययः ॥
एतदुक्तं कपालैक्ये तद्भेदे लम्बनैकता ।
स्वे स्वे स्थितिदले योज्या विमर्द्दार्द्धेऽपि चोक्तवत् ॥"

इति सूर्य्यसिद्धान्ते सूर्य्यग्रहणाधिकारः ॥)

ग्रहणिः, स्त्री, (गृह्णाति आक्रमते उदरभङ्गादि-रूपेण नाडीविशेषावच्छिन्नं शरीरमिति । ग्रह उपादाने + "ग्रहेरनिः ।" उणा० । ५ । ६७ । इति अनिः णत्वं च ।) ग्रहणीरोगः । इत्यमर-टीकायां रायमुकुटः ॥

ग्रहणी, स्त्री, (ग्रहणि + "कृदिकारादक्तिनः ।" इति ङीष् ।) अग्न्यधिष्ठाननाडी । तदाश्रितरोगः । तस्य निदानसम्प्राप्ती यथा,—
"अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।
भूयः सन्दूषितो वह्निर्ग्रहणीमपि दूषयेत् ॥
एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥
पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्व्वेदविदो जनाः ॥"*॥
तस्य पूर्व्वरूपं यथा,—
"पूर्व्वरूपन्तु तस्येदं तृष्णालस्यं बलक्षयः ।
विदाहोऽन्नस्य पाकश्च चिरात् कायस्य गौरवम् ॥"
तत्र वातिकस्य निदानरूपे ।
"कटुतिक्तकषायातिरूक्षसन्दुष्टभोजनैः ।
प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः ॥
मारुतः कुपितो वह्निं संछाद्य कुरुते गदान् ।
तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ॥
कण्ठास्यशोषः क्षुत् तृष्णा तिमिरं कर्णयोः स्वनः ।
पार्श्वोरुवङ्क्षणग्रीवारुजाभीक्ष्णं विषूचिका ॥
हृत्पीडा कार्श्यदौर्ब्बल्यं वैरस्यं परिकर्त्तिका ।
गृद्धिः सर्व्वरसानाञ्च मनसः सदनं तथा ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च ।
स वातगुल्महृद्रोगप्लीहाशङ्की च मानवः ॥
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुनः पुनः सृजेद्वर्च्चः श्वासकासार्दितोऽनिलात् ॥"
पैत्तिकस्य तस्य निदानरूपे ।
"कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्वणम् ।
आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम् ॥
सोऽजीर्णं नीलपीताभं पीताभः सार्य्यते द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्द्दितः ॥"
श्लैष्मिकस्य तस्य निदानरूपे ।
"गुर्व्वतिस्निग्धशीतादिभोजनादतिभोजनात् ।
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपितः कफः ॥
तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचकाः ।
आस्योपदेहमाधुर्य्यकासष्ठीवनपीनसाः ॥
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु ।
दुष्टो मधुर उद्गारः सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्चःप्रवर्त्तनम् ।
अकृशस्यापि दौर्ब्बल्यमालस्यञ्च कफात्मके ॥
पृथग्वातादिनिर्द्दिष्टहेतुलिङ्गसमागमे ।
त्रिदोषं निर्द्दिशेदेवं तेषां वक्ष्यामि भेषजम् ॥"
तस्यासाध्यस्य लक्षणं यथा,—
"लिङ्गैरसाध्यो ग्रहणीविकारो
यैस्तैरतीसाररोगो न सिध्येत् ।
वृद्धस्य नूनं ग्रहणीविकारो
हत्वा तनुं नो विनिवर्त्तते च ॥"

इति माधवकरः ॥

तस्य चिकित्सा यथा, गारुडे १७४ अध्याये ।
"चिकित्साथ ग्रहण्यास्तु ग्रहणी चाग्निनाशिनी ।
चित्रकक्वाथकल्काभ्यां ग्रहणीघ्नं घृतं हविः ।"*॥
हरिरुवाच ।
"मरीचं शृङ्गवेरञ्च कुटजत्वचमेव च ।
पानाच्च ग्रहणी नश्येत् शशाङ्कशतशेखर ! ॥"
इति तत्रैव १८७ अध्यायः ॥
"अङ्कोटमूलकर्षार्द्धं पिष्टं तण्डुलवारिणा ।
सर्व्वातीसारग्रहणीं पीतं हरति भूतप ! ॥
मरीचशुण्ठीकुटजत्वक्चूर्णन्तु गुडान्वितम् ।
क्रमात् द्विगुणं पीतं ग्रहणीव्याधिनाशनम् ॥"
इति तत्रैव १८९ अध्यायः ॥ * ॥
अथ सामान्यग्रहणीरोगस्य चिकित्सा ।
"ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत् ।
लङ्घनैर्दीपनीयैश्च सदातीसारभेषजैः ॥
दोषं सामं निरामञ्च विद्यादत्रातिसारवत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
पेयादिपटुलघ्वन्नं पञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक् ॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता ।
यवागूः पाचयत्यामं शकृत् संवर्त्तयत्यपि ॥"
संवर्त्तयति घनीकरोति ॥ * ॥
अथ तक्रम् । तत्र गोदधिगुणाः ।
"गव्यं दध्युत्तमं बल्यं पाके ...
पवित्रं दीपनं स्निग्धं पुष्टि...
उक्तं दध्नामशेषाणां मध्ये ग...
अथ महिषीदधिगुणाः ।
"माहिषं दधि सुस्निग्धं श्ले...
स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्व...
अथ छागीदधिगुणाः ।
"छागं दध्युत्तमं ग्राहि लघु दो...
शस्यते श्वासकासार्शःक्षयका...
उत्तमं गाव्यजा मध्ये शेषं दध्य...
अथ तक्रस्य भेदाः ।
"तक्रन्तु घोलमथितोदश्विन्नक्रमे...
ससाराद्यैर्निर्द्दिष्टैश्चतुर्द्धा परिकीर्त्ति...
ससरं निर्जलं घोलं मथितं त्वसरोद...
तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिक...
वातपित्तहरं घोलं मथितं कफपित्तह...
उदश्वित् कफदं बल्यं श्रमघ्नं परमं म...
अथ तक्रस्य गुणाः ।
"तक्रं ग्राहि कषायाम्लं मधुरं दीपनं ल...
वीर्य्योष्णं वमनं हृद्यं प्रीणनं वातनाशन...
यात्युष्णापि द्रयोन्नष्टी तद्वत् तक्रमाहितम् ।
ग्रहण्यादिमतां तक्रं पथ्यं संग्राहि लाघवात् ।
वातप्रशमनं साम्लत्वात् मदकं त्वविदाहि च ।
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपणम् ।
कषायोष्णविकाशित्वाद्रौक्ष्याच्चैव कफे हितम् ।'
अथोद्धृतस्तोकोद्धृतानुद्धृतस्नेहतक्रगुणाः ।
"समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः ।
स्तोकोद्धृतघृतं तस्माद्गुरु वृष्यं कफापहम् ।
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम् ।"
अथ दोषविशेषे तक्रविशेषाः ।
"वातेऽम्लसैन्धवोपेतं पित्ते स्वादु सशर्करम् ।
पिबेत्तक्रं कफे चापि क्षारत्रिकटुसंयुतम् ।
हिङ्गुजीरयुतं घोलं सैन्धवेनावचूर्णितम् ।
ग्रहण्यर्शोऽतिसारघ्नं भवेद्वातहरं परम् ।
रोचनं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ।"
अथामपक्वतक्रगुणाः ।
"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ।
पीनसश्वासकासादौ पक्वमेव विशिष्यते ।"*।
अथ तक्रस्य निषेधः ।
"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्ब्बले ।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ।"॥
अथ तक्रस्य गुणोत्कर्षः ।
"न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः ।"*॥
"तक्रयुक्तं रसं तक्रं धान्यजीरकसंयुतम् ।
सैन्धवेनान्वितं दद्यात् षड्यवानीस...
रसं लघु ग्राहि मांसभवरसम् । इति षड्रसम् ।
"कर्षं गन्धमर्द्दयेत्तारयसमं कुर्य्यात् ...
मरिचं चूर्णतश्च पञ्चलवणं साकञ्च कर्षं ...
सर्द्धं हिङ्गु च जीरकद्वययुतं ...

...दिहृद्रुमिदं प्रशमितमदवातगुल्मं विनिहन्ति च ।"
इति मधुरार्द्रकम् ॥ * ॥
चित्रकं त्रिफला चैव त्रिकटुं जीरकद्वयम् ।
मागधं यमानी च हिङ्गु लवणपञ्चकम् ॥
हबुषमप्याद्रकं रसगन्धकसमन्वितम् ।
...जयाजमोदा च चित्रकं गजपिप्पली ॥
...ला मोदकं पाठा मधूकं शालिमञ्जरम् ।
समभागानमेषां चूर्णं कृत्वा विनिर्मितम् ॥
...ग्रानसय चूर्णस्य चतुर्गुणं प्रदापयेत् ॥
...न्दादिकापदग्धांसम्भौदमात्रक चिन्वरान् ।
...गभं संयदं शूलं पन्थाग्नानाग्निमान्द्यजित् ॥
...मस्वालापदं बल्यं रुचिकारीयनाशनम् ।
...र्णं नीयं मासमन्नं पानं पिशितभोजनम् ॥
...द्यं काञ्जिकमथापि दधि तक्रमथापि वा ।
...एकार्द्रकपूर्ण मिदं गार्द्रभावितमुत्तमम् ॥"
इति हृद्यार्द्रकम् ॥ * ॥
"जातीफललवङ्गैलापत्रत्वग्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीशपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविडङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्वाणि दद्याद्भङ्गां च तावतीम् ।
सर्व्वचूर्णसमा देया शुभ्रा शर्करा ॥
कर्षमात्रमिदं खादेन्मधुनाप्लावितं जनः ।
नाशयेत् ग्रहणीं कासं श्वासमरोचकम् ॥"
इति जातीफलादिचूर्णम् ॥ * ॥
"चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम् ।
व्योषं हिङ्ग्वजमोदाञ्च चव्यं चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्व्वा दाडिमस्य वा ।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥"
क्षारौ सर्ज्जिका यवक्षारश्च । लवणपञ्चकमिति
सैन्धवं रुचकं चैव विड़ं सामुद्रिकं गड़मिति ।
व्योषं शुण्ठीपिप्पलीमरिचानि । अजमोदात्र
यमानिका । मातुलुङ्गं बीजपूरकम् । इति
चित्रकादिवटिका ॥ * ॥ [सगुड़ः ।
"श्रीफलशलाटुः कल्को नागरचूर्णेन मिश्रितः
ग्रहणीगदमत्युग्रं तक्रभुजा शीलितो जयति ॥"
श्रीफलशलाटुः विल्वस्यामं फलम् । गुड़स्यात्र
भागद्वयम् । इति विल्वकल्कः ॥ * ॥
"चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम् ।
वार्त्ताकोः कुड़वश्चार्कमूलादष्टपले तथानलात् ॥
दग्धा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम् ।
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम् ॥
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम् ॥"
इति वार्त्ताकुगुटिका ॥ * ॥
"मुस्तकातिविषाविल्वकौटजं सूक्ष्मचूर्णितम् ।
मधुना च समालीढं ग्रहणीं सर्व्वजां जयेत् ॥"
कौटजं इन्द्रयवः । इति मुस्तकादिचूर्णम् ॥ * ॥
"श्वेतो वा यदि वा रक्तः सुपक्को ग्रहणीगदः ।
गुड़ेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति ॥"
सर्ज्जः राल इति लोके । इति सर्ज्जरसचूर्णम् ॥ * ॥
"विल्वाब्दशक्रयववालकमोचसिद्ध-
माजं पयः पिबति यो ...
...ग्रानिमद्वातिरक्तग्रहणीविकारं
मासं मतोऽनिलमथाध्वमपि निरौति ॥"
मोची मोचरसः । निरौति हन्ति ।
"प्रस्थत्रये त्वामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुड़स्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषेभकृष्णाहपुषाजमोदैः ॥
विड़ङ्गसिन्धुत्रिफलायमानी-
पाठाग्निधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चायं चिरमन्तरग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणाञ्च वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः ॥
तैले मनाक् त्रिवृद्भृष्टा त्रिसुगन्धि पलं पलम् ।
सिद्धे निधेयमत्रैव गुड़े कल्याणपूर्व्वके ॥"
इति कल्याणगुड़ः ॥ * ॥
"पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
त्रिफला चाजमोदा च नलिनी जीरकद्वयम् ।
सैन्धवं रोमकञ्चापि सामुद्रं रुचकं विड़म् ॥
व्याघ्रनखश्च त्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका ।
शुण्ठीशक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥
हरीतक्याः पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुड़स्याद्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृद्वग्निना पचेत् ॥
औदुम्बरं चामलकं बादरं वा यथाबलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद् वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम् ।
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं
स्वरम् ।
विषुपाटान्यथाहन्ति रक्तपित्तञ्च त्रिगदम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः ।
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुड़ः ॥"
इति महाकल्याणकगुड़ः ॥ * ॥
"कुष्माण्डानां सुपक्कानां स्विन्नानां निष्कुल-
त्वचाम् ।
सर्पिः प्रस्थे पलशतं ताम्रपात्रे शनैः भृजेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विड़ङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पलं चैकं त्रिवृतोऽष्टौ पलानि च ॥
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु ।
आमलक्या रसस्यात्र प्रस्थत्रयमुदीरितम् ॥
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक् ।
औदुम्बरं चामलकं बादरं वा यथाबलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ।
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ॥
वातशोणितवीसर्पदद्रुचर्म्मदलीमकान् ।
वातपित्तकफान् सर्व्वान् द्वन्द्वान् शुद्धान् समा-
चरेत् ॥
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः ।
तेभ्यो हितो गुड़ोऽयं स्यात् वन्ध्यानामपि पुत्रदः ॥
वृष्यो वल्यो बृंहणश्च वयसः स्थापनः परः ॥"
इति कुष्माण्डकल्याणकगुड़ः ॥ * ॥
अतीसाराधिकारनिर्दिष्टं विल्वतैलं चात्र
हितम् । इति ग्रहणीरोगाधिकारः । इति
भावप्रकाशः ॥ (सनिदानलक्षणादिकं चिकित्-
सितञ्चास्य यथा,—
"सामं शाकृन्निराममं जीर्णे यत्तन्नु नैव वा ।
अकस्माद्वा मुहुर्बद्धमकस्माच्छिथिलं मुहुः ॥
चिरकृद्ग्रहणीदोषः सञ्चयाच्चोपवेशयेत् ।
स चतुर्धा पृथक् दोषैः सन्निपाताच्च जायते ॥
प्राग्रूपं तस्य सदनं चिरात् पचनमम्लकः ।
प्रसेको वक्त्रवैरस्यं मनश्चित्तदृट्क्लमो भ्रमः ॥
आनद्धोदरता छर्द्दिः कर्णक्ष्वेडोऽन्त्रकूजनम् ।
सामान्यं लक्षणं कार्श्यं धूमकस्तमको ज्वरः ॥
मूर्च्छा शिरोरुगिष्टम्भः श्वयथुः करपादयोः ।
तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः ॥
पार्श्वोरुवङ्क्षणग्रीवारुजाभीक्ष्णं विसूचिका ।
रसेषु गृद्धिः सर्व्वेषु तृष्णा परिकर्तिका ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यं समश्नुते ।
वातहृद्रोगगुल्मार्शःप्लीहपाण्डुत्वशङ्कितः ॥
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुनः पुनः सृजेद्वर्च्चः पायुरुक् श्वासकासवान् ॥
पित्तेन नीलं पीताभं पीताभः सृजति द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्द्दितः ॥
श्लेष्मणा पच्यते दुःखमन्नं छर्द्दिररोचकः ।
आस्योपदेहनिष्ठीवकासहृल्लासपीनसाः ॥
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु ।
उद्गारो दुष्टमधुरः सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्चःप्रवर्त्तनम् ।
अकृशस्यापि दौर्ब्बल्यं सर्व्वजे सर्व्वसङ्करः ॥
विभागेऽङ्गस्य ये चोक्ता विषमाद्याश्च योऽग्नयः ।
तेऽपि स्युर्ग्रहणीदोषाः समस्तु स्वास्थ्यकारणम् ॥
वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः ॥"
इति वाभटे निदानस्थानेऽष्टमेऽध्याये ॥
चिकित्सास्य यथा,—
"ग्रहणीमा... ...विदुपाचरेत् ।
... ...लिङ्ग विपाचयेत् ॥
... ...कोलादिभिर्युतम् ।
...नयोगांश्च ...

दद्यात् मातिविषां पेयामामे साम्लां सनागराम्।
पाने ऽनिमारविहितं वारितक्रं सुरादि च ॥
ग्रहणीदोषिणां तक्रं दीपनग्राहि लाघवात् ।
पथ्यं मधुरपाकित्वान्न च पित्तप्रदूषणम् ॥
कषायोष्णविकाशित्वाद्रूक्षत्वाच्च कफे हितम् ।
वाते स्वाद्वम्लसान्द्रत्वात् सद्यस्कमविदाहि तत् ॥"
"स्रोतसामग्रदीपस्य दीपनं स्नेहसंयुतम् ।
दीपनं बहुपित्तस्य तिक्तैर्मधुरकैर्युतम् ॥
स्नेहोऽस्नन्नवर्द्धितो बहुवातस्य शस्यते ।
स्नेहमेव परं विद्याद्दुर्बलानलदीपनम् ॥
नालं स्नेहसमिद्धस्य शमायान्नं सुगुर्व्वपि ।
योऽल्पाग्नित्वात् कफे क्षीणे वर्च्चः पक्वमपि श्लथम् ॥
सुचेद्रूक्षौषधयुतं स पिबेदल्पशो घृतम् ।
तेन स्वमार्गमानीतः स्वकर्म्मणि नियोजितः ॥
समानो दीपयत्यग्निमग्नेः सन्धुक्षको हि सः ।
पुरीषं यश्च कृच्छ्रेण कठिनत्वाद्विमुञ्चति ॥
स घृतं लवणैर्युक्तं नरोऽन्नावग्रहं पिबेत् ।
रौक्ष्यान्मन्देऽनले सर्पिस्तैलं वा दीपनैः पिबेत् ॥
क्षारचूर्णासवारिष्टान् मन्दे स्नेहातिपानतः ।
उदावर्त्तात् प्रयोक्तव्या निरूहस्नेहवस्तयः ॥
दोषातिवृद्ध्या मन्देऽग्नौ संशुद्धोऽन्नविधिं चरेत् ।
व्याधिमुक्तस्य मन्देऽग्नौ सर्पिरेव तु दीपनम् ॥
अध्वोपवासक्षामत्वे यवाग्वा पाययेद्घृतम् ।
अन्नावपीडितं बल्यं दीपनं बृंहणञ्च तत् ॥
दीर्घकालप्रसङ्गात्तु क्षामक्षीणकृशान्नरान् ।
प्रसहानां रसैः साम्लैर्भोजयेत् पिशिताशिनाम् ॥
लघूष्णकटुशोधित्वाद्दीपयन्त्याशु तेऽनलम् ।
मांसोपचितमांसत्वात् परञ्च बलवर्द्धनम् ॥
स्नेहासवसुरारिष्टचूर्णक्वाथहितासनैः ।
सम्यक्प्रयुक्तैर्देहस्य बलमग्नेश्च वर्द्धते ॥
दीप्तो यथैव स्थाणुश्च बाह्योऽग्निः सारदारुभिः ।
सस्नेहैर्जायते तद्वदाहारैः कोष्ठगोऽनलः ॥
न भोजनेन कायाग्निर्दीप्यते नातिभोजनात् ।
यथा निरिन्धनो वह्निरल्पो वातीन्धनान्वितः ॥
यदा क्षीणे कफे पित्तं स्वस्थाने पवनानुगम् ।
प्रवृद्धं वर्द्धयत्यग्निं तदासौ सानिलोऽनलः ॥"
इति वाभटे चिकित्सितस्थाने दशमेऽध्याये ॥
अपरं सुश्रुतोक्तलक्षणचिकित्सितं यथा,—
"[illegible] ग्रहणी [illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

प्रसेकमुखवैरस्य तमकारुचिपीड़ितः ।
वाताच्छूलाधिकैः पायुहृत्पार्श्वोदरमस्तकैः ॥
पित्तात् सदाहैर्गुरुभिः कफाच्चिभिश्चलक्षणैः ।
दोषवर्णनखैस्तद्वद्विण्मूत्रनयनाननैः ॥
हृत्पाण्डूदरगुल्मार्शःप्लीहाशङ्की च मानवः ।
यथा दोषोच्छ्रयन्तस्य विशुद्धस्य यथाक्रमम् ॥
पेयादिं वितरेत् सम्यग् दीपनीयोपसंस्कृतम् ।
ततः पाचनसंग्राहि दीपनीयगणत्रयम् ॥
पिबेत् प्रातः सुरारिष्टस्नेहमूत्रसुखाम्बुभिः ।
तक्रेण वाथ तक्रं वा केवलं हितमुच्यते ॥
कृमिगुल्मोदरार्शोघ्नीः क्रियाश्चात्रावचारयेत् ।
चूर्णं हिङ्ग्वादिकञ्चात्र घृतं वा श्रीहनाशनम् ॥
कल्केन मगधादेश्च चाङ्गेरीस्वरसेन वा ।
चतुर्गुणेन दध्ना च घृतं सिद्धं हितं भवेत् ॥
सर्व्वथा दीपनं सर्व्वं ग्रहणीरोगिणां हितम् ।
ज्वरादीनविरोधाच्च साधयेत्स्वैश्चिकित्सितैः ॥"
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये ॥)

ग्रहणीरुक्, [ज्] स्त्री, (ग्रहण्येव रुक् ।) ग्रहणी-रोगः । तत्पर्य्यायः । प्रवाहिका २ । इत्य-मरः । २।६।५५ ॥ ग्रहिणी ३ । इति तट्टीका ॥

ग्रहणीहरं, क्ली, (ग्रहणीं हरतीति । हृ + अच् ।) लवङ्गम् । इति शब्दचन्द्रिका ॥ (ग्रहणी-हारके त्रि ॥)

ग्रहद्रुमः, पुं, (ग्रहाख्यो द्रुमः वृक्षविशेषः ।) शाक-वृक्षः । इति राजनिर्घण्टः ॥

ग्रहनायकः, पुं, (नयतीति । नी + ण्वुल् । ततो ग्रहाणां नायकः ।) शनिः । इति शब्दरत्ना-वली ॥ सूर्य्यश्च ॥

ग्रहनाशः, पुं, (ग्रह्णाति वध्नाति मलमिति शेषः । कोष्ठरोधकवायुविशेषः रोगविशेषो वा तं नाश-यति । नश् + णिच् + अण् ।) वृक्षविशेषः । इति शब्दरत्नावली ॥ छातियान इति भाषा ॥

ग्रहनाशनः, पुं, (ग्रहं रोगविशेषं नाशयतीति । नश् + णिच् + ल्युः ।) ग्रहनाशवृक्षः । इति शब्दरत्नावली रत्नमाला च ॥

ग्रहनेमिः, पुं, (ग्रहाणां ग्रहकक्षायां मध्ये वा नेमि-रिव । ग्रहकक्षाधःस्थितत्वादस्य नेमित्वमस्ती-ति बोध्यम् ।) चन्द्रः । इति शब्दरत्नावली ॥

ग्रहपतिः, पुं, (ग्रहाणां पतिः ।) सूर्य्यः । (यथा, महाभारते । १४।१६८।२५ । [illegible] [रिव ॥"]
"तस्य विस्तीर्य्यते राज्यं ज्योत्स्ना ग्रहपते-श्चकैरव ।" इत्यमरः । १ । ३ । ३० ॥ (शिवः । यथा, महाभारते । १३ । १० । १० ।
"चन्द्रः सूर्य्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ॥"
अर्कवृक्षः । यथा, महाभारते । १३।८५।११० ।
"मम मर्म्मेदं दिव्यं ग्राहं ग्रहपतिस्तथा ।
चौर्य्येण पूर्व्वाण्यपरवर्त्तानि मम नास्ति न संशयः ॥")

ग्रहपुष्पः, पुं, (ग्रहान् अश्वान् मत्वान् पुष्पाणि [illegible] ।) सूर्य्यः । इति हेमचन्द्रः ॥

ग्रहभीतिजित्, [द्] पुं, (ग्रहभीतिं जयतीति । जि + क्विप् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

ग्रहयागः, पुं, (ग्रहाणां [illegible] ग्रहाणां यज्ञः । तस्य शान्तिकर्म्मे [illegible] वपि कर्त्तव्यत्वं पौष्टिकत्वे तु शुद्धकाले । प्रयोगो यथा । यजमानः [illegible] पलिप्ते देशे कुशासने [illegible] ब्राह्मणान् स्वस्तिवाच्य संकल्प्य [illegible] श्वेतसर्षपेण विघ्नकरानुत्साद्य [illegible] कृत्वा स्वयं करणासामर्थ्ये ब्राह्मणान् ततो मण्डपोत्तरपूर्व्वभागे [illegible] वितस्त्युच्छ्रितायां उदक्प्रवणायां वेद्यां चन्दनादिना मध्ये वर्त्तुलं सूर्य्यं आग्नेय्यां अर्द्धचन्द्राकारं सोमं दक्षिणस्यां [illegible] मङ्गलं ऐशान्यां पीतं धनुराकारं [illegible] पीतं पद्माकारं गुरुं [illegible] शुक्लं प्रतीच्यां श्यामं धर्म्माकारं [illegible] श्यामं मकराकारं राहुं वायव्यां खड्गाकारान् केतून् [illegible] ऽभिस्थापनादिग्रहस्थापनपर्य्यन्तं कर्म्म ग्रहशब्दे लिखितक्रमानेन [illegible] वाह्य तेषां [illegible] गन्धे विशेषः सूर्य्याय रक्तचन्दनं सोमाय चन्दनं मङ्गलाय कुङ्कुमं बुधाय [illegible] समभागेन मिश्रितानि रक्तचन्दन-कुङ्कुमसरलानि शुक्राय श्वेतचन्दनं [illegible] कस्तूरीं राहवे पद्मकाष्ठं केतुभ्यश्च दद्यात् । धूपे विशेषः । रवये गुग्गुलुं सरलं मङ्गलाय देवदारु बुधाय [illegible] देवदारु बृहस्पतये दशाङ्गं शुक्रायागु-[illegible] चराय कालागुरुं राहवे गुड़त्वचं मधुमिश्रितगुड़त्वचं दद्यात् । ततोऽ-[illegible] प्रत्यधिदेवताः पूजयेत् । ततो बलिं सूर्य्याय गुड़ौदनं सोमाय घृतपायसं मङ्गलाय [illegible]त्मकं यावकं बुधाय क्षीर-दध्योदनं शुक्राय घृतौदनं शनैश्चराय तण्डुलात्मकं कृशरं राहवे छागमांसं अजाक्षीरसाधिताजकर्णरक्तमिश्रितं [illegible] तण्डुलरूपं चित्रौदनम् । ततश्च [illegible] ततः कुशकण्डिकां समाप्य रव्यादीनां [illegible] कुर्य्यात् । ततो यथाशक्ति एकैकस्याष्टो-त्तरशतमष्टोत्तरसहस्रं वा मधुत्रयाक्ता-भिः सूर्य्यादीनां तत्तत्समिद्भिर्होमं [illegible] समिधस्तु ।
"अर्कः पलाशः खदिरस्त्वपामार्गोऽथ [illegible] उडुम्बरः शमी दूर्व्वा कुशाश्च समिधः [illegible]
तत उदीच्यं कर्म्म समाप्य दक्षिणां दद्यात् [illegible] दक्षिणास्तु ।
"धेनुः शङ्खस्तथानड्वान् हेम वासो [illegible] कृष्णागौरायसश्छाग एता वै दक्षिणाः [illegible]"
(अस्य यागस्य प्रयोजनं यथा, महाभिन-[illegible]
"शान्तौ पुष्टौ महेशानि! तथा [illegible] ग्रहयागं प्रकुर्व्वाणो वाञ्छितार्थमवाप्नु-[illegible]

पिकायाश्च । यथा,—
शुभग्रहार्कवारेषु रुद्रक्षिप्रध्रुवेषु च ।
भराशिविलग्नेषु शुभं शान्तिकपौष्टिकम् ॥
मृदुगणः चित्रानुराधामृगशिरोरेवत्यः । क्षिप्र-
गणो लघुगणः पुष्याश्विहस्ताः । ध्रुवगणः
रोहिण्युत्तरात्रयम् ॥)
गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः ।
अयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥"
इति ग्रहयागतत्त्वम् ॥
मात्स्योक्तम् । यथा,—
श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन् पुनः ॥
न ब्रह्मन् ! विधानेन तन्मे निगदतः शृणु ।
र्व्वशास्त्राण्यनुक्रम्य सङ्क्षिप्य ग्रन्थविस्तरम् ॥
ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिनोदिताम् ।
गयेऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥
ग्रहान् ग्रहादिदेवांश्च स्थाप्य होमं समारभेत् ।
ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ।
प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम् ।
तृतीयः कोटिहोमस्तु सर्व्वकामफलप्रदः ॥
अयुतेनाहुतीनाञ्च नवग्रहमखः स्मृतः ।
तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम् ॥"
ग्रहवेदिनियमः । यथा,—
"गर्त्तस्योत्तरपूर्व्वेण वितस्तिद्वयविस्तृताम् ।
वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रयसम्मिताम् ॥
संस्थापनाय देवानां चतुरस्रामुदङ्मुखाम् ।
अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् ॥
देवतानां ततः स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः ॥
राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः ॥"
मण्डले स्थानम् । यथा,—
"मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ।
उत्तरेण गुरुं विद्याद् बुधं पूर्व्वोत्तरेण तु ॥
पूर्व्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्व्वके ।
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ॥
पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतण्डुलैः ॥"
अधिदेवताः । यथा,—
"भास्करस्येश्वरं विद्यात् उमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् ॥
ब्रह्माणञ्च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम् ।
शनैश्चरस्य तु यमं राहोः कालन्तथैव च ।
केतोर्वै चित्रगुप्तञ्च सर्व्वेषामधिदेवताः ॥"
प्रत्यधिदेवताः । यथा,—
"अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवताः ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवता ॥"
पञ्च लोकपालाः । यथा,—
"विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥"
ग्रहवर्णः । यथा,—
"संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ।
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदुः ॥"
"ग्रहवर्णानि देयानि वासांसि कुसुमानि च ।
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ॥
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ॥"
अन्यद्विवरणन्तु ग्रहयागतत्त्वे द्रष्टव्यम् ॥)

ग्रहराजः, पुं, (ग्रहाणां राजा इति । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) सूर्य्यः । चन्द्रः । इति मेदिनी । जे । ३२ ॥ बृह-स्पतिः । इति शब्दरत्नावली ॥

ग्रहाधारः, पुं, (ग्रहाणां आधारः आश्रयः । मेधीव-दृढतमध्रुवमाश्रित्य स्वस्वगत्यनुसारेण ग्रहाणां परिभ्रमणात्तथात्वम् ।) ध्रुवनक्षत्रम् । इति शब्दरत्नावली ॥

ग्रहामयः, पुं, (ग्रहः उपदेवविशेषस्तज्जन्य आमयः रोगभेदः ।) आवेशः । स तु भूतादिना जात-रोगः । इति राजनिर्घण्टः ॥

ग्रहाशी, [न्] पुं, (ग्रहं ग्रहजन्यदोषं अश्नाति दूरीकरोतीति । अश् + णिनिः । स्कन्दग्रह-दोषमश्नातीत्यन्ये ।) ग्रहनाशवृक्षः । इति शब्द-रत्नावली ॥

ग्रहाह्वयः, पुं, (ग्रहाणामुपदेवानामाह्वयः आह्वा संज्ञा यस्य । ग्रहान् आह्वयति आकारयति तज्जनितदोषनाशायेति भावः । आ + ह्वे + शः । इत्यन्ये ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥

ग्रहीता, [ऋ] त्रि, (गृह्णातीति । ग्रह + तृच् ।) ग्रहणकर्त्ता । तत्पर्य्यायः । गृहयालुः २ । इत्य-मरः । ३ । १ । २७ ॥ (यथा, श्वेताश्वतरोप-निषदि ।
"अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।"
तथा च मनुः । ८ । १६६ ।
"ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतो व्ययः ॥")

ग्रामः, पुं, (ग्रस् + "ग्रसेरात् ।" उणां । १।१४२ । इति मन् धातोराकारान्तादेशश्च ।) विप्रादि-वर्णप्राया प्राकारपरिखादिरहिता बहुजन-वसतिः । इति भरतः ॥ तत्पर्य्यायः । संवसथः २ । इत्यमरः । २ । ३ । १९ ॥ हट्टादिशून्यवसतिः । इति श्रीधरस्वामी ॥ यथा, मार्कण्डेयपुराणे ।
"तथा शूद्रजनप्राया सुसमृद्धकृषीवला ।
क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥"
(तथा च मनुः । १० । ५४ ।
"अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥")
शब्दादिपूर्व्वकश्चेत् समूहार्थः । इति विश्वः ॥ यथा शब्दग्रामः भूतग्रामः गुणग्रामः । इत्यादि ॥ (यथा, मनुः । २ । २१५ ।
"बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥"
शिवः । यथा, महाभारते । १३ । १७ । ११३ ।
"गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरिः ॥")
स्वरभेदः । यथा,—
"षड्जमध्यमगान्धारास्त्रयो ग्रामा मता इह ।
षड्जग्रामो भवेदत्र मध्यमग्राम एव च ।
सुरलोके च गान्धारो ग्रामः प्रचरति स्फुटम् ॥"
इदानीं षड्जग्रामस्य मूर्च्छनाः कथ्यन्ते । मूर्च्छना प्रस्तार इत्यर्थः । स ऋ ग म प ध नि च । इति षड्जस्य । म-पौ ध-नी स ऋ च गः । इति मध्यमस्य । ऋ-गौ म-पौ ध नी सोऽन्ते । इति गान्धारस्य मूर्च्छनाः । स ऋ ग म प ध नि च । नि-सौ ऋ-ग-म-पाश्च धः । ध नि स ऋ ग म पोऽन्ते । प-धौ नि-सौ ऋ-गौ च मः । म-पौ ध-नी च स ऋ ग । ग म प ध नि सश्च ऋः । ऋ-गौ म-पौ ध-नी सोऽन्ते । मूर्च्छनाः सप्त षड्जाः ॥
"आदि द्वित्रिचतुःपञ्चषट्सप्तस्वपि सप्त मताः ।
मध्यमो मो यदा तेषु मध्यमग्राममूर्च्छना ॥
आदौ गकारो यत्रास्ति गान्धारग्राममूर्च्छना ॥"
तत्र षड्जग्रामप्रस्तारस्यायं क्रमः ।
"षड्जान्निषधान्तं नैषधान्तं धात् पान्तमिष्यते ।
पान्मान्तं मध्यमाद्गान्तं गाद्दृषभान्तमिष्यते ॥
ऋषभात् षान्तमित्याहुः षड्जग्रामस्य मूर्च्छनाः ।
मध्यमग्रामजास्त्वेवं मूर्च्छनाः परिकीर्त्तिताः ॥
मकारादिक्रमेणैव गकारान्तास्तु ता मताः ।
तारो मन्द्रश्च आद्यश्च इति ग्रामनिरूपणाः ॥
षड्जग्राममूर्च्छनायाः सप्त कोष्ठानि ।
ब्रह्मविष्णुशिवैरुक्तास्त्रयो ग्रामा मनोहराः ॥"
इति सङ्गीतदामोदरः ॥

ग्रामकूटः, पुं, (ग्रामे ग्रामस्थो ग्रामस्य वा कूट इव तमःप्राधान्यात्तथात्वम् ।) शूद्रः । इति त्रिकाण्ड-शेषः ॥

ग्रामजनिष्पावी, स्त्री, (ग्रामे ग्रामसन्निकर्षे वा जायते इति । जन + डः । ग्रामजा निष्पावीति कर्म्मधारयः ।) नखनिष्पावी । इति राज-निर्घण्टः ॥

ग्रामणीः, पुं, (ग्रामाः जीवसमूहाः नीयते चनन्द-दानेन परिचाल्यतेऽनेन । यद्वा ग्रामान् जीव-समूहान् नयति प्रापयति चेतयतीत्यर्थः । नी + क्विप् ततो णत्वम् ।) विष्णुः । यथा, महा-भारते । १३ । १४९ । ३७ ।
"अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ॥"
यक्षः । यथा, विष्णुपुराणे २ । १० । ७ ।
"स रथाधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥"
"देवैरादित्यैः आदित्या एव देवास्तैः । ग्रामण्यो यक्षाः ।" इति तट्टीका ॥ नापितः । इत्यमरः । ३ । ३ । ४९ ॥

ग्रामणीः, त्रि, (ग्रामं संघातं समूहं वा जनान् नयति दोषगुणविचारादिभिः परिचालयति प्रेरयति वा क्विप् ।) प्रधानः । अधिपतिः । इति मेदिनी । णे । २५ ॥ (यथा, ऋग्वेदे । १० । १०७ । ५ ।
"दक्षिणावान् प्रथमो हूत एति
दक्षिणावान् ग्रामणीरग्रमेति ॥"
तथा च महाभारतसौप्तिकपर्व्वणि । ८ ।
"दातारोऽविर्निवोदत्ता ... ।
... नरकाः ॥"

...प्रापयतीति वा ।) भौशिकः । इति हेमचन्द्रः ॥

ग्रामणीः, स्त्री, (ग्रामेण जनसमूहेनेत्यर्थः नीयते गृह्यते यद्वा ग्रामेण ग्राम्यधर्म्मेण केवलं मैथुनादिना नयति कालं यापयतीति । नी + क्विप् ।) वेश्या । ग्रामेया । नीलिका । इति हेमचन्द्रः ॥

ग्रामतक्षः, पुं, (ग्रामस्य ग्रामपरतन्त्रो वा तक्षा । "ग्रामकौटाभ्यां च तक्ष्णः ।" ५ । ४ । ९५ । इति टच् ।) ग्रामाधीनः काष्ठतट् । ग्रामतक्षा । इत्यमरः । २ । १० । ९ ॥ गेँये कुतार इति भाषा ॥

ग्रामता, स्त्री, (ग्रामाणां समूहः । "ग्रामजनबन्धुभ्यस्तल् ।" ४ । २ । ४३ । इति तल् ।) ग्राम-समूहः । इत्यमरः । ३ । २ । ४३ ॥ (ग्रामस्य भावः । "तस्य भावस्त्वतलौ ।" ५।१।११९ । इति तल् ।) ग्रामत्वञ्च ॥

ग्रामभृतः, पुं, (ग्रामे ग्रामस्य वा भृतः भरणीयः ग्रामावस्थितजनैरिति शेषः ।) ग्रामप्रेष्यः । स तु ब्राह्मणश्चेत् पञ्चमोऽब्राह्मणः । इत्याह्निकतत्त्वम् ॥ (यथाह शातातपः ।

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना ।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी ॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः ।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ॥
अनादित्यान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम् ।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥")

ग्राममद्गुरिका, स्त्री, (ग्रामस्य मत्स्यस्थ.मेव वा मद्गुरिकेव । क्षुद्रमद्गुर इत्यर्थः ।) शृङ्गी-मत्स्यः । ग्रामयुद्धम् । इति मेदिनी । के ।२३४॥

ग्राममुखः, पुं, (ग्रामस्य मुखमिव यो स्थितः । यद्वा, ग्रामो ग्रामवासिजनो मुखत्वेन प्रधानकारणत्वेन यस्य । ग्रामस्थजनसाध्यत्वादेवास्य तथात्वम् ।) हट्टः । इति शब्दरत्नावली ॥

ग्राममृगः, पुं, (ग्रामस्य मृग इव । यद्वा, ग्रामे-स्थितो मृगः पशुः ।) कुक्कुरः । इति शब्दरत्ना-वली ॥

ग्रामयाजकः, पुं, (ग्रामस्य याजको यागकर्त्ता ।) ग्रामस्थनानाजनानां पुरोहितः । स तु चतुर्थो-ऽब्राह्मणः । यथाह, शातातपः ।

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना ।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी ॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः ।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ॥
अनादित्यान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम् ।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥"

...स्मै प्रदत्तं दानादिकं निष्फलं भवति । ...कं महाभारते । ३ । १९९ । ७ ।

"...नु पतिते दानं ब्राह्मणे तस्करे तथा ।
...वार्द्धिके याते हुतञ्च ग्रामयाजके ॥")

...त्रि, ग्रामवासी । ग्रामे निर्द्धनि च इत्यर्थे ...॥

ग्रामशासकः, पुं, (ग्रामान् ग्रामवासिनः अनुरागयसस्मृद्धान् वा शासयतीति । शस् + णिच् + ण्वुल् ।) भगिनीपतिः । इति शब्दरत्नावली ॥

ग्रामाधानं, क्ली, (आधीयते उपजीविका यत्र तत् । आ + धा + ल्युट् । ततो ग्रामस्य मृगयुसमूहस्य आधानं पोषणकम् ।) मृगया । इति हलायुधः ॥

ग्रामान्तं, क्ली, (ग्रामस्य अन्तं समीपम् ।) ग्राम-समीपम् । तत्पर्य्यायः । उपशल्यम् २ । इत्यमरः । २ । २ । २० ॥ ग्रामान्तिकम् ३ । इति शब्दरत्नावली ॥ (?)

ग्रामिणी, स्त्री, (ग्राम उत्पत्तिस्थानत्वेन अस्ति अस्याः । अत इनिः स्त्रियां ङीप् ।) नीली-वृक्षः । इति जटाधरः ॥

ग्रामी, [न्] त्रि, (ग्रामः अधिकारित्वेनास्त्यस्य । अत इनिः ।) ग्रामविशिष्टः । गाँइ इति भाषा ॥ यथा, ब्राह्मणकुलाचार्य्यकारिकायाम् ।

"रामो गड्गड्ग्रामी निपः केश्वरकोलिनः ।
केश्वरकोलीति ख्यातो ग्रामी ग्रामचतामरः ॥"

(ग्रामो ग्राम्यधर्म्मो मैथुनं अस्त्यस्येति । ग्राम्य-धर्म्मविशिष्टः । यथा, भागवते । ४ । २९ । १४ ।

"आसुरी मेढ्रमर्व्वाग्द्वार्य्यवायो ग्रामिणां रतिः ।
उपस्थो दुर्म्मदः प्रोक्तो निरृतिर्गुद उच्यते ॥")

ग्रामीणः, पुं, (ग्रामे भवः । ग्राम + "ग्रामाद्य-खञौ ।" ४ । २ । ९४ । इति खञ् ।) ग्राम्य-शूकरः । इति राजनिर्घण्टः ॥ कुक्कुरः । काकः । ग्रामोत्पन्ने त्रि । इति मेदिनी । णे । ४६ ॥ (यथा, भाषापरिच्छेदे । ७९ ।

"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥")

ग्रामीणा, स्त्री, (ग्रामीण + स्त्रियां टाप् ।) नीलीवृक्षः । इति मेदिनी ॥ (अस्याः पर्य्याया यथा,

"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाश्चास्या नीलिनीशब्दे ज्ञातव्याः ॥) पालङ्क्य-शाकम् । इति राजनिर्घण्टः ॥

ग्रामेयकः, त्रि, (ग्रामे भवः । ग्राम + "कत्त्र्यादिभ्यो-ढकञ् ।" ४ । २ । ९५ । इति ढकञ् ।) ग्राम्यः । इति हेमचन्द्रः । ३ । १९५ ॥

ग्रामेया, स्त्री, (ग्रामे भवा । ग्राम + ढक् ।) ग्राम्य-नारी । इति ग्रामणीशब्दार्थे हेमचन्द्रः ॥

ग्रामेशः, त्रि, (ग्रामस्य ईशः ।) ग्रामेश्वरः । ग्रामाधिपतिः । यथा, शान्तिशतके । ११ ।

"यं कश्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥"

ग्राम्यः, त्रि, (ग्रामे भवः । ग्राम + "ग्रामात् यखञौ ।" ४ । २ । ९४ । इति यः ।) ग्रामोत्पन्नः । तत्पर्य्यायः । ग्रामेयकः २ ग्रामीणः ३ । इति हेमचन्द्रः । ३ । १९५ ॥ (यथा, मनुः । ११ । १९९ ।

"श्वसृगालखरैर्द्दष्टो ग्राम्यैः क्रव्याद्भिरेव च ॥"

तथा, माघे । १० । १८ ।

"ग्राम्यतामगमत् कवि..."

...मूढः । प्राकृतः । यथा, मनौ ...

"ग्राम्यभारमभ्रात्तुमि...
योगमार्गपतितेन चेतसा..."

भक्तादिवचनम् ।" ...

ग्रामे भवं ग्राम्यम् ।" इति भरत...

अश्लीलम् २ । इत्यमरः । १।६।१...

दोषविशेषः । स च शब्दगतः ...

शब्दगतो यथा, साहित्यदर्पणे । ७ ...

"दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयु...
ग्राम्याऽप्रतीतसन्दिग्धनेयार्थनिहतार्थ..."

अस्य उदाहरणं यथा तत्रैव । ...

मनः । अत्र कटिशब्दो ग्राम्यः ।"

यथा, तत्रैव । ७ । ५ ।

"अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः ।"

उदाहरणं यथा तत्रैव । "स्वपिहि मं...
स्वपिह्येवाधुना प्रिय !॥ अत्रार्थो ग्राम्यः ।

ग्राम्यकन्दः, पुं, (ग्राम्यो ग्रामभवः कन्द ...) ग्राम्यौलः । बनयोल इति भाषा । ... स्थूलकन्दः २ । इति रत्नमाला । इति राजवल्लभः ॥

ग्राम्यकर्कटी, स्त्री, (ग्राम्या ग्रामजा ...) कुष्माण्डः । इति शिकाण्डशेषः ॥

ग्राम्यकुङ्कुमं, क्ली, (ग्राम्यं ग्रामसम्भूतं ...) कुसुम्भम् । इति त्रिकाण्डशेषः ॥

ग्राम्यधर्म्मः, पुं, (ग्राम्यस्य इतरादेर्धर्म्मः ...) नम् । इत्यमरः । २ । ७ । ५७ ॥ (यथा, ... भारते । ३ । ४८ । ४ ।

"प्रमत्तो ग्राम्यधर्म्मेषु मन्दात्मा मामकाः ...
मम पुत्रः सुदुर्बुद्धिः पृथिवीं घातयिष्यति ॥"

ग्राम्यपशुः, पुं, (ग्राम्यो ग्रामजातः पशुः ।) ... जातपशुः । (यथा, भागवते ...

"तस्माद् युवां ग्राम्यपशोर्मम ...
अन्ध तमसि मयस्य ग्रामदीप ...")

स तु सप्तविधो यथा । गौः १ ... मनुष्यः ४ अश्वः ५ अश्वतरः ६ ... इति तिथ्यादितत्त्वम् ॥ (यथाह ...

"ग्राम्यारण्याश्चतुर्द्दश । गौरजा...
खरो गर्द्दभो मनुष्यश्चेति ग्राम्याः पशव...
वानर-ऋक्षसरीसृपरुरुपृषन्मृगाश्चेति ...
रण्याः ॥" सुश्रुतमते उष्ट्रादयोऽपि ...
यदुक्तं तत्रैव सूत्रस्थाने ४६ अध्याये ।

"अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छ...
तयो ग्राम्याः ॥")

ग्राम्यमद्गुरिका, स्त्री, (ग्राम्या ग्रामोद्भवा मद्गु...) शृङ्गीमत्स्यः । इति हारावली ॥

ग्राम्यमृगः, पुं, (ग्राम्यो ग्रामभवो मृगो हरिणा... मृगः पशुर्वा इत्येके ।) कुक्कुरः । इति जटाधर...

ग्राम्यराशिः, पुं, (ग्राम्यो राशिः ।) मिथुन... कन्या । तुला । वृश्चिकः । धनुः । कुम्भः । ... मेषः वृषश्च । इति ज्योतिषम् ॥

ग्राम्यवल्लभा, स्त्री, (ग्राम्याणां ग्रामस्थजनानां वल्लभा प्रिया । ग्रामस्थजनप्रियत्वादेवास्यास्तथात्वम् ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥ (ग्राम्यं अश्लीलं वल्लभं प्रियं यस्याः इति विग्रहे वेश्या । इति दुर्गसिंहस्योद्घः ॥)

ग्राम्यशूकरः, पुं, स्त्री, (ग्राम्यः शूकरः ।) ग्रामोत्पन्नवराहः । तत्पर्य्यायः । विड्वराहः २ ग्रामीणः ३ ग्रामक्रोड़ः ४ ग्रामकोलः ५ विष्करः ६ दारकः ७ । तस्य मांसस्य गुणाः । वनवराहमांसाद्गुरुत्वम् । मेदोबलवीर्य्यवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

ग्राम्या, स्त्री, (ग्रामे भवा । ग्राम + "ग्रामात् यखञौ ।" ४ । २ । ९४ । इति यः । स्त्रियां टाप् ।) नीली । निष्पावी । इति राजनिर्घण्टः ॥ (तुलसी । इति चिन्तामणिः ॥)

ग्राम्याश्वः, पुं, (ग्राम्यः ग्रामजातोऽश्वः ।) गर्द्दभः । इति त्रिकाण्डशेषः ॥

ग्रावा, [न्] पुं, (ग्रसते इति ग्रः । ग्रस् + अन्येभ्योऽपीति डः । आवनति शब्दायते इति । आ + वन शब्दे + विच् । ततो ग्रश्चासौ आवा चेति ।) प्रस्तरः । (यथा, भागवते । ४ । ५ । १८ ।

"सर्व्वे एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः । तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाऽद्रवन् ॥")

पर्व्वतः । इत्यमरः । २ । ३ । १ ॥ (यथा,—

"पृथ्वी तावत् त्रिकोणा विपिननदनदीग्रावषड्ं तदन्तम् ॥"

इत्युद्भटः ॥)

मेघः । इति विश्वः ॥ दृढ़े त्रि । इति शब्दरत्नावली ॥

ग्रासः, पुं, (ग्रस्यते अद्यते इति । ग्रस् + कर्म्मणि घञ् ।) कुक्कुटाण्डपरिमाणान्नादि । यथा,—

"कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम् । एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम् ॥"

इति प्रायश्चित्तप्रकरणे पराशरः ॥

(तथा च मनुः । ११ । २१३ ।

"एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्व्ववत् ॥")

तत्पर्य्यायः । कवलः २ । इत्यमरः । २।९।५४ ॥ गुड़ेरकः ३ पिण्डः ४ गडोलः ५ कवकः ६ गुरः ७ । इति हेमचन्द्रः । ३ । ८८ ॥ (दशौषधकालान्तर्गतकालविशेषः । "तत्र निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुः ग्रासं ग्रासान्तरञ्चेति दशौषधकालाः ॥" इत्युत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥)

ग्राहः, पुं, (गृह्यते इति । ग्रह च उपादाने + भावे घञ् ।) ग्रहणम् । (गृह्णातीति । ग्रह + "विभाषा ग्रहः ।" ३ । १ । १४३ । इति व्यवस्थापितविभाषया णः ।) जलजन्तुविशेषः । हाङ्गर इति भाषा ॥ जलहस्ती इति केचित् ॥ तत्पर्य्यायः । अवहारः २ । इत्यमरभरतौ ॥ (यथा, महाभारते । १ । २१ । ५ ।

"भीषणैर्विकृतैरन्यैर्घोरैर्जलचरैस्तथा । उग्रैर्नित्यमनाधृष्यं कूर्म्मग्राहसमाकुलम् ॥")

निश्चयः । इति राजनिर्घण्टः ॥ (आग्रहः । यथा, गीतायाम् । १७ । १९ ।

"मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः ॥"

"मूढ़ग्राहेणाविवेककृतेन दुराग्रहेण ।" इति श्रीधरस्वामी ॥)

ग्राहकः, पुं, (गृह्णातीति । ग्रह + ण्वुल् ।) मितावरशाकम् । इति राजनिर्घण्टः ॥ हिंसपक्षी । व्यालग्राही । ग्रहीतरि त्रि । इति शब्दरत्नावली ॥ (ग्रह + णिच् + ण्वुल् । ज्ञापकः । यथा, महाभारते । ३ । २१० । १३ ।

"यथास्वं ग्राहकाण्येषां शब्दादीनामिमानि तु ॥")

ग्राहिणी, स्त्री, (गृह्णाति अशेषगुणानिति । ग्रह उपादाने + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनिः ङीप् ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥ ताम्रमूलाक्षुपः । इति रत्नमाला ॥ छिरइ इति भाषा ॥

ग्राहिफलः, पुं, (ग्राहि धारकं मलबन्धकमित्यर्थः फलं यस्य ।) कपित्थवृक्षः । इति राजनिर्घण्टः ॥

ग्राही, [न्] पुं, (गृह्णातीति । ग्रह + णिनिः ।) कपित्थः । इति शब्दचन्द्रिका ॥

ग्राही, [न्] त्रि, (गृह्णातीति । ग्रह + णिनिः ।) मलबन्धकः । धारकः । इति वैद्यकम् ॥ (यथा, भावप्रकाशे ।

"काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत् ॥")

ग्रहणकर्त्ता । इति व्याकरणम् ॥ (यथा, कथासरित्सागरे । ७५ । ९९ ।

"तत्र तस्यैव कैवर्त्तपतेः सत्यव्रतस्य सः । शफरग्राहिभिर्भृत्यैः प्राप्य दैवादगृह्यत ॥"

प्रतिकूलः । यथा, भट्टिः । ५ । ९३ ।

"मास्म भूर्ग्राहिणी भीरु ! गन्तुमुत्साहिनी भव ॥"

"हे भीरु ! मास्म भूर्ग्राहिणी प्रतिकूला मा भूः ।" इति जयमङ्गलः ॥)

ग्रीवा, स्त्री, (गीर्य्यतेऽनया । गॄ निगरणे + "शेवायह्वजिह्वाग्रीवाप्वामीवाः ।" उणां । १ । १५४ । इति वन्प्रत्ययेन निपातनात् साधुः ।) गलघाटादिसमुदिता । इति भरतः ॥ (यथा, शकुन्तलायां १ मे अङ्के । [दृष्टिः ॥")

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्त-

सा तु गर्भे मासमात्रेण भवति । इति सुखबोधः ॥ तत्पर्य्यायः । शिरोधिः २ कन्धरा ३ । इत्यमरः । २ । ६ । ८८ ॥ कन्धिः ४ शिरोधरा ५ । इति राजनिर्घण्टः ॥ कन्धराशिरा । इति मेदिनी । वे । ६ ॥

ग्रीवी, [न्] पुं स्त्री, (ग्रीवा विद्यते यस्य । ग्रीवा + इनिः । दीर्घग्रीवावत्तया एव अस्य तथात्वम् ।) उष्ट्रः । इति जटाधरः ॥ प्रशस्तग्रीवायुक्ते त्रि ॥

ग्रीष्मः, पुं, (ग्रसते रसान् इति । ग्रस अदने + "ग्रीष्मः ।" उणां । १ । १४९ । इति मक् ग्रीभावश्च धातोः सुगागमश्च निपात्यते ।) ऋतुविशेषः । (यथा, मनुः । ६ । २३ ।

"ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः ॥")

स तु ज्यैष्ठाषाढ़ौ । तत्पर्य्यायः । उष्णकः २ निदाघः ३ उष्णोपगमः ४ उष्णः ५ उष्मागमः ६ तपः ७ । इत्यमरः । १ । ४ । १९ ॥ घर्म्मः ८ तापनः ९ उष्णागमः १० उष्णकालः ११ ।

"ग्रैष्मिकस्त्वनभिष्यन्दि चालमित्येव निश्चयः ॥"

इति राजनिर्घण्टः ॥

("दीर्घवासरकं तीक्ष्णं ज्वालामालाकुलं जगत् । दिशि ग्रीष्मे मृगतृष्णाः स्विन्नाः स्युर्मृगवाजिनः ॥ नैरृतो मारुतो रूक्षः शीर्णपर्णा महीरुहाः । दग्धं तृणाकुलारण्यं दावामिव दिशो दश ॥ एवं लक्षणके ग्रीष्मे पित्तरक्तमुदीर्य्यते । तस्मात् क्रिया प्रतीकारं कुर्य्यात् संशमनं भिषक् ॥ जलक्रीड़ा दिवानिद्रा सेवनं सुखसाधनम् । ध्यामारामारतं शक्तं कुङ्कुमकिञ्जल्कशीतलम् ॥ नीलनालदलोपेतः श्रमघ्नो व्यजनानिलः । कृत्वया मोदकुसुमचन्दनोशीरशीतलैः ॥ लेपनं शीतलं सम्यक् धारागाराश्रयः पुनः । एवं क्रिया समाप्तेऽग्रीष्मे च सुखसङ्गमः ॥"

इति ग्रीष्मोपचारः ॥

इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥

"तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत् । प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्द्धते ॥ अतोऽस्मिन् पटुकट्वम्लव्यायामार्ककरांस्त्यजेत् । भजेन्मधुरमेवान्नं लघुस्निग्धं हिमं द्रवम् ॥ सुशीततोयसिक्ताङ्गो लिह्यान् शक्तून् सशर्करान् । मद्यं न पेयं पेयं वा स्वल्पं सुबहु वारि वा ॥ अन्यथा शोफशैथिल्यदाहमोहान् करोति तत् । कुन्देन्दुधवलं शालिमश्नीयाज्जाङ्गलैः पलैः ॥ पिबेद्रसं नातिघनं रसालां रागखाण्डवौ । पानकं पञ्चसारं वा नवमृद्भाजनस्थितम् ॥ मोचचोचदलैर्युक्तं साम्लं मृण्मयशुक्तिभिः । पाटलावासिताम्भः सकर्पूरं सुशीतलम् ॥ शशाङ्ककिरणान् भक्ष्यान् रजन्यां भक्षयन् पिबेत् । ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम् ॥ अभ्रङ्कषमहाशालतालरुद्धोष्णरश्मिषु । वनेषु माधवीश्लिष्टद्राक्षास्तवकशालिषु ॥ सुगन्धिहिमपानीयसिच्यमानपटालिके । कायमाने चिते चूतप्रवालफललम्बिभिः ॥ कदलीदलकह्लार-मृणालकमलोत्पलैः । कल्पिते कोमलैस्तल्पे हसत्कुसुमपल्लवे ॥ मध्यन्दिनेऽर्कतापार्त्तः स्वप्याद्धारागृहेऽथवा । पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि ॥ निशाकरकराकीर्णे सौधपृष्ठे निशासु च । आसनास्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः ॥ निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः । जलार्द्रास्तालवृन्तानि विस्तृताः पद्मिनीपुटाः ॥ उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः । कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः ॥ मनोहरकलालापाः शिशवः सारिकाः शुकाः । मृणालवलयाः कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः ॥ जङ्गमा इव पद्मिन्यो हरन्ति दयिताः क्लमम् ॥"

इति वाभटे सूत्रस्थाने तृतीयेऽध्याये ॥

...पित्वात् शरीरमनुस्नोपपन्नं भवति। उष्णवातातपभातमतिशिथिलमत्यन्तप्रविलीनदोषं भेषजं पुनः संशोधनार्दनमात्तयोः संयोगे संशोधनमतियोगायोपपद्यते शरीरं पिपासोपद्रवाय।” इति चरके विमानस्थानेऽष्टमेऽध्याये ॥

“मयूखैर्जगतः सारं ग्रीष्मे पेपीयते रविः।
स्वादुशीतं द्रवं स्निग्धमन्नपानं तदा हितम् ॥
शीतं सशर्करं मन्थं जाङ्गलान्मृगपक्षिणः।
घृतं पयः स शाल्यन्नं भजन् ग्रीष्मे न सीदति ॥
मद्यमल्पं न वा पेयमथवा सुबहूदकम्।
लवणाम्लकटूष्णानि व्यायामञ्च वर्जयेत् ॥
दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतलम्।
भजेच्चन्दनदिग्धाङ्गः प्रवाते हर्म्यमस्तके ॥
व्यजनैः पाणिसंस्पर्शैश्चन्दनोदकशीतलैः।
सेव्यमानो भजेदास्यां मुक्तामणिविभूषितः ॥
काननानि च शीतानि जलानि कुसुमानि च।
ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः ॥”
इति च सूत्रस्थाने षष्ठेऽध्याये चरकेणोक्तम् ॥)

तत्र जातफलं यथा, कोष्ठीप्रदीपे।
“ग्रीष्मोद्भवो भोगभवातुरक्तो
वक्ता सुशीलो जलकेलिशीलः।
विद्याधनैश्वर्ययशोमनोज्ञो
धन्वी सुवेशः परदाररक्तः ॥”

उष्णः। इति मेदिनी। मे। १० ॥ गरमि इति भाषा ॥ तद्वति त्रि ॥

ग्रीष्मजा, स्त्री, (ग्रीष्मात् ग्रीष्मभावात् ग्रीष्मे ग्रीष्मकाले वा जायते या इति। जन्+डः। ततष्टाप् च।) नवमल्ली। इति शब्दचन्द्रिका ॥ लोया इति भाषा ॥ (ग्रीष्मजातमात्रे, त्रि ॥)

ग्रीष्मपुष्पी, स्त्री, (ग्रीष्मे ग्रीष्मकाले पुष्पं यस्याः। जातौ संज्ञायां वा ङीप्।) कदलीपुष्पवृक्षः। इति राजनिर्घण्टः ॥

ग्रीष्मभवा, स्त्री, (ग्रीष्मे ग्रीष्मसमये ग्रीष्मारम्भे इत्यर्थः भवति उत्पद्यते या। भू+अच्। टाप्।) नवमल्लिका। इति रत्नमाला ॥
(“कुमारिका ग्रीष्मभवा सुगन्धा।”
इति वैद्यकरत्नमालायाम्।)

ग्रीष्मसुन्दरकः, पुं, (ग्रीष्मे सुन्दर इव कायते शोभते इति। कै+कः। ग्रीष्मसुन्दर+स्वार्थे कन् वा।) शाकविशेषः। गिमा इति भाषा ॥ अस्य गुणाः। तिक्तत्वम्। लघुत्वम्। कफपित्तज्वरापहत्वम्। वह्निकारित्वञ्च। इति राजनिर्घण्टः ॥

...हासः, स्त्री, (ग्रीष्मे ग्रीष्मसमये हासः प्रकाशः ...र्तिकाद्यौषधैः यस्य।) इक्षुतृणकम्। ...विशेषः। भुरोर खता। इति भाषा ॥

...ष्मी, (ग्रीष्मः ग्रीष्मसमयः उत्पत्तिकालोऽस्याः। “अर्श आदिभ्योऽच्।” ५।२।१२७।) ...तो ङीष्।) नवमल्लिका। इति राज...टः ॥

ग्रीष्मोद्भवा, स्त्री, (उद्भवतीति। उद्+भू+अच्। ग्रीष्मे उद्भवो यस्याः ग्रीष्मे उद्भवतीति वा।) नवमल्लिका। इति राजनिर्घण्टः ॥

ग्रुच, इर् उ चौर्य्ये। गतौ। इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट्-उदित्वात् क्त्वा वेट्।) रेफयुक्तः। पञ्चमस्वरी। इर्, अग्रुचत् अग्रोचीत्। उ, ग्रोचित्वा ग्रुक्त्वा। इति दुर्गादासः ॥

ग्रैवं, क्ली, (ग्रीवायां भवम्। “ग्रीवाभ्योऽण् च।” ४।३।५७। इति अण्।) ग्रीवाभूषणम्। इति शब्दरत्नावली ॥ (यथा, रघुः। ४।४८ ॥
“भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम्।
नाससत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि ॥”)

ग्रैवेयं, क्ली, (ग्रीवायां भवम्। “ग्रीवाभ्योऽण् च।” ४।३।५७। इत्यस्य सूत्रस्य वार्त्तिकोक्त्या चकारात् ढञ्।) कण्ठभूषणम्। इति शब्दरत्नावली ॥ (यथा, महाभारते। ७।३५।३४।
“पुनर्द्विपान् द्विपारोहान् वैजयन्त्यङ्कुशध्वजान्।
तूणवर्म्माण्यथो कक्षान् ग्रैवेयाण्यथ कम्बलान् ॥”)

ग्रैवेयकं, क्ली, (ग्रीवायां भवमिति। “कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु।” ४।२।९६। इति ढकञ्।) कण्ठभूषा। इत्यमरः।२।६।१०४। (यथा, मार्कण्डेयपुराणे। ८२। २५।
“नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥”)

ग्रैष्मी, स्त्री, (ग्रीष्मे भवेति। “सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।”४।३।१६। इति अण् ततो ङीप्। “पचे अत्वण् ङीप्।” इति चाभिधेये।) नवमल्लिका। इति त्रिकाण्डशेषः ॥ ग्रीष्मसम्बन्धिनि त्रि नामाद्य ॥

ग्लस, उ ङ भक्षणे। इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट्-उदित्वात् क्त्वा वेट्।) अन्तःस्थतृतीययुक्तः। उ, ग्लसित्वा ग्लस्त्वा। ङ, ग्लसते। इति दुर्गादासः ॥

ग्लस्तः, त्रि, (ग्लस्+कर्म्मणि क्तः।) भक्षितः। इत्यमरः। ३। २। ११२ ॥

ग्लह, ऊ कि आदाने। इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वा-परं-सकं-वेट्।) अन्तःस्थतृतीययुक्तः। ऊ, अग्लहीत् अग्लाक्षीत्। कि, ग्लाहयति ग्लहति। द्यूतः कैश्चित् मन्यते इति दुर्गादासः ॥ (यथा, महाभारते। २।६७।१९।
“इमां चेत् पूर्व्वं कितवोऽग्लहीष्यसौबलोऽभविष्यदपराजितात्मा ॥”)

ग्लहः, पुं, (ग्लह+“अक्षेषु ग्लहः।” ३।३।७०। अक्षमन्येन देवनं लक्ष्यते तत्र अप् प्रत्ययेन ग्राह्यं तत्र ग्लह इति निपात्यते। इति वार्त्तिकोक्त्या च निपातनात् तथात्वम्।) अक्षक्रीडायां पणः। इत्यमरः। २। १०। ४५ ॥ दाउ इति वाजि इति च भाषा ॥ (यथा, महाभारते। २। ६०। ६।
“मायामयान् द्यूतस्यानभवाहिमो
समाभध्ये यो यदेवोद् ग्लहेषु ॥”)

ग्लाना, [न्] त्रि, (ग्लायति ग्लाति रीति। ग्लै+इन्।) ग्लानियुक्तः... मम्।

ग्लानः, त्रि, (ग्लै+कर्त्तरि क्तः।) रोगपर्य्यायः। ग्लानुः। २। ६। ५८ ॥ रोगी। इति राजनि...

ग्लानिः, स्त्री, (ग्लायति अनेनानिन्...
“वहिद्दिप्युपुत्रग्लायाम्लानिस्त्री नित्।”
४। ५१। इति निः।) वयसीना। ... चन्द्रः। ७। २३३ ॥ (यथा, गीतायाम्।
“यदा यदा हि धर्म्मस्य ग्लानिर्भवति भा...”
रोगः। इति राजनिर्घण्टः ॥ (दश... वने। ५। ७४। १३। “देहवे ... क्लमस्थानिरिति यथोऽवस्याश्च मर्म्म।”)

ग्लास्नुः, त्रि, (ग्लायतीति। ग्लै+“ग्लाजिस्थश्च ग्स्नुः।” ३। २। १३९। इति ग्स्नुः।) ग्ला... इत्यमरः। २। ६। ५८ ॥ (यथा, मनुः
“वसन् मात्यवति ग्लास्नू रामो विक्रुशन्...”)

ग्लुच, इर् उ चौर्य्ये गतौ। इति कविक... (भ्वा-परं-सकं-सेट्। उदित्वात् क्त्वा...) अन्तःस्थतृतीययुक्तः। पञ्चमस्वरी। इर्, ...चत् अग्लोचीत्। उ, ग्लोचित्वा ग्लु... दुर्गादासः ॥

ग्लुञ्च, उ इर् गतौ। इति कविकल्पद्रुमः॥ (... परं-सकं-सेट्।) उदित्वात् क्त्वावेट्। ... अन्तःस्थतृतीययुक्तादिः। पञ्चमस्वरी। उ, ... ग्लुक्त्वा। इर्, अग्लुचत् अग्लोचीत्। दुर्गादासः ॥

ग्लेप, ऋ ङ दैन्ये। गतौ। पाते। इति कवि... द्रुमः। (भ्वा-आत्मं-अकं-सकं च-से...) अन्तःस्थतृतीययुक्तः। ङ, ग्लेपते निर्धनः ... अजिग्लेपत्। इति दुर्गादासः ॥

ग्लेयः, त्रि, (ग्लानिमर्हतीति। ग्लै+य...) योग्यः। इति व्याकरणम् ॥

ग्लेव, ऋ ङ सेवे। इति कविकल्पद्रुमः ... आत्मं-सकं-सेट्।) अन्तःस्थतृतीययु... अजिग्लेवत्। ङ, ग्लेवते। इति दुर्गा...

ग्लेष, ऋ ङ अन्वेषे। इति कविकल्पद्रुमः। (... आत्मं-सकं-सेट्।) अन्तःस्थतृतीययुक्तः ... अजिग्लेषत्। ङ, ग्लेषते जिगीषुः। ... सन्धानम्। ग्लेषते यः सदा मार्गेण ... युधः। इति दुर्गादासः ॥

ग्लै, क्षये। इति कविकल्पद्रुमः। (भ्वा-परं-... अनिट्।) अन्तःस्थतृतीययुक्तः। ... क्षयः। ग्लायति लोकः शोकात्। ... लौ ग्लम ग्लम ग्लम इत्यादिना वा ... ग्लपयति ग्लापयति। कोपमानस्य नु ... यति। इति दुर्गादासः ॥ (यथा मनुः।
“श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥”)

ग्लौः, पुं, (ग्लायति ग्लानि प्राप्नोति ... इति भाषः। ग्लै+“ग्लानुदभ्यां डौः।”...

।१। इति सौः।) पञ्चः। (यथा, अथर्व-
धिनतयाम्। ८।५३।३।
रितः प्र मलिष्यति न मनुर्मा नशिष्यति॥")
:। इत्यमरः। १।६।१४॥

घ

नरः। म तु महानचतुर्दशः। व्यञ्जो-
नाम्यानं वर्णः। इति शावरलम्॥ (अस्य
बोधनलम्। यथा, "ल्व या ह क र म ग
ः कण्ठाः।" पाणिनीये च एव कण्ठो
नाम्नीयस्य। यथा, "अथ घवितर्जनीयानां
:॥" इत्युक्ता पुनः शिक्षायाम्।
नासन्ते तु झः घोषो दन्त्योष्ठो वः स्मृतो
बुधैः॥")
र स्वरूपं यथा, कामधेनुतन्त्रे।
सारं चपलापाङ्गि! चतुष्कोणात्मकं सदा।
देवमयं पञ्चप्राणादिसमन्वितम्॥
नं त्रिगुणोपेतं सदा त्रिगुणसंयुतम्।
नं सर्वदं शान्तं घकारं प्रणमाम्यहम्॥"
योत्पत्तिर्वर्णोद्धारे द्रष्टव्या॥ वर्णोद्धारतन्त्र
नप्रकारादिर्यथा,—
शिखण्डा वामदेवा किञ्चिदाकुञ्चिता तथा।
उर्ध्वरूपमाख्याय ततोऽधोगत्य दक्षतः॥
ा रूर्ध्वं गता रेखा ब्रह्मविष्णुशिवात्मिका।
स्वरूपिणी देवि! मात्राशक्तिः प्रकीर्त्तिता॥"
स्य ध्यानं यथा,—
मालतीपुष्पवर्णाभां षट्भुजां रक्तलोचनाम्।
शामरपरीधानां मुक्तामाल्यविभूषिताम्॥
ता सिद्धिदां रम्यां लोचनत्रयराजिताम्।
ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत्॥"
ब्रह्मणमन्तो यथा, वर्णोद्धारतन्त्रे।
नन्दं त्रिगुणोपेतं सदा त्रिशीलसंयुतम्।
षेणं सर्वदा शान्तं घकारं प्रणमाम्यहम्॥"
स नामानि यथा, नानातन्त्रेषु।
घः खड्गी घुर्घुरो वटो घण्टोशस्त्रिपुरान्तकः।
गुः शिवोत्तमः मला किङ्किणी घोरनायकः॥
घोषी कण्ठो मेघा कालरूपी च दाम्भिकः।
घोदरा ज्वालमलं नन्दीशो घनर्नं ध्वनिः॥
गौर्व्यविद्या संहर्त्ता कामाख्यनरपामयः॥"
पुं, (घटयति शब्देन शोभते घटयति घर्ष-
ादिशब्दं वा। घटि दुत्तौ घट चेष्टायां च
+बाहुलकात् डः।) घण्टा। घर्घरशब्दः। इति
दिनी। घे। १॥
घ, हनने। इति कविकल्पद्रुमः॥ (भ्वा-परं-
अर्क-सेट्।) कण्ठवर्गतृतीयोपधः। घघति।
इति दुर्गादासः॥
, क हिंसे। संघाते। दुत्तौ। इति कविकल्प-
द्रुमः॥ (चुरा-परं-सकं-अकंच-सेट्।) क, घाट-
यति कवाटं द्वारि जनः संयोजयतीत्यर्थः।
इति दुर्गादासः॥

घट, इ कि दुत्तौ। इति कविकल्पद्रुमः॥ (चुरां-
पक्षे भ्वां-परं-अकं-सेट्।) इ, भावे घण्ट्यते।
कि, घण्टयति घण्टति। दुतिर्दीप्तिः। दुत्यर्थेन
भाषिकधातुष्विव सिद्धे कि करणमर्थान्तरेऽपि
भाषिकधुरादित्वार्थम्। तथाच,—
"क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः॥"
इति वोपदेवः॥
प्रसिद्धार्थं कथयितुं धातूनां प्रसिद्धोऽर्थः प्रद-
र्शितः। किन्तु महाकविप्रयोगं दृष्ट्वान्येऽप्यर्था
मन्तव्याः हि यस्मात् धातवोऽनेकार्था भवन्ती-
त्यर्थः। तेन हिंसायामुत्पो पठितस्यापि शंसतेः
कथनार्थेऽपि न मे ह्रिया शंसति किञ्चिदीप्सित-
मिति रघौ कथयतीत्यर्थः। एवं दीप्तिमपठित-
स्यापि तर्कधातोर्दीप्तिकर्थपरत्वे तर्कयत्यगुरुं
मुर्धीरित्यादिः। इति दुर्गादासः॥
घट, घ ङ म चेष्टे। इति कविकल्पद्रुमः॥ (भ्वां-
आत्म-अकं-सेट्।) घ, घटा। ङ, घटते
मठितुं शिष्यः। म, घटयति। घटतीति घटो
घोषो गाघटन् घटतामित्यादिरिति तु घटते घटः
पचादित्वादच्। ततो घट इवाचरतीति क्वौ
साध्यम्। इति दुर्गादासः॥ (यथा, भट्टिः।
१२।२६।
"घटेत सन्ध्यादिषु यो गुणेषु
लक्ष्मीर्न तं मुञ्चति चञ्चलापि॥")
घटः, पुं, (घटते ग्न्दादिसङ्घातैः जलादिग्रहणाय
इत्यर्थः। घट्+पचाद्यच्।) कलसः। इत्यमरः।
२।९।३२॥ (यथा, मनुः। ८।३१९।
"यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम्।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत्॥")
तस्य परिमाणं कलसशब्दे द्रष्टव्यम्॥ समाधि-
भेदः। (घटस्यवारिवत् निश्चलत्वात्तथात्वम्।)
स तु कुम्भकम्। इभशिरः। (कार्यतिसादृश्या-
त्तथात्वम्।) कूटकूटः। इति मेदिनी। टे। ७॥
कुम्भराशिः। यथा,— [लभेत्।"
"सिंहे वा यदि गोघटे गतनरः सर्व्वार्थसिद्धिं
इति समयप्रदीपः॥ द्रोणपरिमाणम्। इति
वैद्यकपरिभाषा॥ (अस्य पर्य्याया यथा,—
"चतुर्भिराढकैर्द्रोणः कलशोनल्वणोऽर्म्मणः।
उन्मानश्च घटो राशिर्द्रोणपर्यायसंज्ञितः॥"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये॥
"कंसश्चतुर्गुणो द्रोणः अर्म्मणोनल्वणश्च सः।
स एव कलशः ख्यातो घट उन्मान मेवच॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये॥)
कुम्भपरिमाणम्। यथा,—
"दशद्रोणो भवेत् खारी कुम्भस्तु द्रोणविंशतिः।"
इति प्रायश्चित्ततत्त्वे कात्यायनः॥
(योगावस्थाभेदः। यथा, हठयोगप्रदीपिकायाम्।
४।६९।
"आरम्भश्च घटश्चैव तथा परिचयोऽपि च।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम्॥"
एतदवस्थायां किं स्यात्तदाह तत्रैव।४।७२-७३।

"द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः।
अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भवेत्॥")
घटकः, पुं, (घटयति परस्परमसम्बन्धादिकमिति।
घट्+णिच्+ण्वुल्।) कुलाचार्य्यः। तत्प-
र्य्यायः। यथा,—
"परं चाण्डालमंसर्गं कुर्य्यात् साधकोत्तमः।
तथाप्यनुग्रहात्मकं सर्व्वदा तं परित्यजेत्॥
दूषिताः कलिकालेषु भारते विविधाः प्रजाः।
अतएव महेशानि! सर्व्वे संसर्गदूषिताः॥
घटकं ब्राह्मणं देवि! संसर्गे यत्नतस्त्यजेत्॥"
इति प्राणतोषिण्यां योड्शोल्लासे मत्स्य-
महेशीतन्त्रवचनम्॥ योजकः। तत्पर्य्यायः।
वाचरः २। इति त्रिकाण्डशेषः॥ तस्य लक्षणं
यथा, कुलदीपिकायाम्।
"धावको भावकश्चैव योजकः स्वांशकस्तथा।
दूषकस्तावकश्चैव षडेते घटकाः स्मृताः॥"
अन्यच।
"ये नो विदन्ति पुरुषाः पुरुषानुपूर्व्वी-
मुर्व्वीतले कुलभृतां परिवर्त्तनं वा।
अत्यल्पमल्पमपि ये कुलतारतम्यं
जानन्ति ते हि घटका न तु योजकाद्याः॥"
वनस्पतिः। पुष्पेण विना यः फलति सः। इति
भूरिप्रयोगः॥ (घटयति योजयति परार्थहिता-
दिकं साधयतीत्यर्थः। योजके, त्रि। यथाह
भर्तृहरिः। २।६६।
"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य
बाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन
ये।
ते वै मानुषराक्षसाः परहितं यैः स्वार्थतो हन्यते
ये च घ्नन्ति निरर्थकं परहितं ते के न जानी-
महे॥")
घटदासी, स्त्री, (घटार्थं घटनार्थं नियोजिता
दासीव या। घटयति योजयति नायकनायिके
इति घटा योजिका सा दासीव इति वा।)
कुट्टनी। तत्पर्य्यायः। कुट्टिनी २ इभ्या ३ रङ्ग-
ताली ४ गणेरुका ५। इति त्रिकाण्डशेषः॥
घटना, स्त्री, (घट+णिच्+युच् टाप् च।) संघात-
करणम्। समष्टीकरणम्। यथा, "करिणां घटना
घटा।" इत्यमरः। २।८।१०७॥ योजना।
मेलनम्। यथा, "अघटनघटनापटीयसी
माया।" इति मायालक्षणम्॥ (यथा, राज-
तरङ्गिण्याम्।४।३६५।
"शक्तिः कार्य्यपरीक्षितास्ति महतां स्वैरं
इविडाध्वदो
यन्नाघातान्तरेण यान्ति घटनां कार्य्याणि
निर्य्यन्त्रणम्॥")
घटयोनिः, पुं, (घटः कुम्भः योनिः कारणं उत्-
पत्तिस्थानम् यस्य।) अगस्त्यमुनिः। इति
हलायुधः॥

घटराजः, पुं, (घटेषु राजते इति । यद्वा घटेन स्नानादिसङ्घटनेन राजते शोभते इत्यर्थः ।) कुम्भः । इति हारावली ॥

घटा, स्त्री, (घट+भावे भिदादित्वात् अङ् ततष्टाप् च ।) कारिणां घटना । हस्तिनां युद्धाराद्येकत्र संघाती-करणम् । इत्यमरः । २ । ८ । १०७ ॥ (यथा, कथासरित्सागरे । १८ । १०८ ।

"तुरुष्कतुरगव्राताः क्षुब्धस्याब्धेरिवोर्म्मयः ।
तद्गजेन्द्रघटा वेलावनेषु ददृशो ययुः ॥")

घटनम् । गोष्ठी । सभा । इति मेदिनी । टे । १३ ॥ समूहः । यथाह श्रीहर्षः ।

"यद्गारघटाट्टकुट्टिमभवद्दिन्दूपलतुन्दिलापथा ॥"

घटाभाङ्गः, स्त्री, (घटाकारा भलाङ्गः ।) कुम्भ-तुम्बी । इति राजनिर्घण्टः ॥

घटिकं, क्ली, (घटेन साहाय्यं विद्यतेऽस्य इति ठन् ।) नितम्बः । इति शब्दचन्द्रिका ॥ (घटेन तर-तीति । "नौद्व्यचष्ठन् ।" ४ । ४ । ७ । इति ठन् । घटेन तरणशीले त्रि । पुंसि तु । घटिं वादयति घटीवादनेन समयं ज्ञापयतीति । कै+कः पूर्व्वह्रस्वश्च । घटीवादकः ॥)

घटिका, स्त्री, (पादस्याधस्था ग्रन्थिघटः घटना विद्यतेऽस्य इति । घट+ठन् ।) पादग्रन्थिः । इति शब्दरत्नावली ॥ (घटयति निर्दिशति निरूपयति वा कालांशविशेषं लोकयात्रासम्पादनाय । घट+णिच्+ण्वुल्+टापि अत इत्वञ्च ।) मुहूर्त्तः । इति जटाधरः ॥ यथा, ज्योतिर्विदाभरणे ।

"गुर्व्वक्षरायासहितं च षष्टा
पलं पलानां घटिका त्रिलैका ।"

यथा, तिथितत्त्वे रघुनन्दनः । "अत्र घटिका मुहूर्त्तं आद्ययोग्यकालानुरोधात् ।") दण्डः । घडी इति भाषा । यथा,—

"वनसो घटिकाः प्रातरुदयोदय उच्यते ।"
इति तिथ्यादितत्त्वम् ॥

(घट+स्वार्थे कन् टापि अत इत्वञ्च । क्षुद्र-घटः । यथा, पञ्चतन्त्रे । १ । २०२ ।

"एता हसन्ति च रुदन्ति च कार्य्यहेतो-
र्विश्वासयन्ति च परं न च विश्वसन्ति ।
तस्मान्नरेण कुलशीलवता सदैव
नार्य्यः श्मशानघटिका इव वर्ज्जनीयाः ॥")

घटी, स्त्री, (घटते इति घटः । घट+अच् । ततः संज्ञायां जातौ वा ङीष् । यद्वा, घटः काल-मापकः क्षुद्रः कुम्भः अस्त्यस्याः इत्यर्थे अर्श आद्यच् ततो गौरादित्वात् ङीष् ।) दण्डः । इति भूरिप्रयोगः । घडी इति भाषा ॥ (यथा, सिद्धान्तशिरोमणौ ।

"गुर्व्वक्षरैः खेन्दुमितैरसुस्तैः
षड्भिः पलं स्यात् घटिका खषड्भिः
स्याद् वा घटी षष्टिरहः खरामैः ॥"

स्वार्थे ङीष् ।) क्षुद्रघटः । इति शब्द-रत्नावली ॥ (यथा, मार्कण्डेये । १२ । २२ ।

"तोयमेष वैतरणी वहतीदं वटा घटी ॥")

घटीकारः, पुं, (घटीं करोतीति । कृ+"कर्म-ण्यण् ।" ३ । २ । १ । इत्यण् ।) यद्वा, अपटं घटं करोति यः । कुलालः । इति मुग्धबोधम् ॥

घटीयन्त्रं, क्ली, (घट्याः यन्त्रम् ।) कूपाज्जलो-त्तोलनार्थरज्जुसहितघटः । जलतोला कल इति भाषा । तत्पर्य्यायः । उद्घाटनम् २ । इत्यमरः । २ । १० । २७ ॥ (यथा, मार्कण्डेयपुराणे । १० । ७० ।

"तान्येव तत्र यन्त्राणि घटीयन्त्राणि चान्यतः ॥"

घटी सूक्ष्मघटस्तदधस्तनार्द्धाकारं यन्त्रम् । यद्वा घट्याः दण्डरूपकालस्य ज्ञापकं यन्त्रम् । काल-परिमाणज्ञापको यन्त्रविशेषः । घडी इति ख्यातः ॥ सूर्य्यसिद्धान्ते कालमानज्ञापकयन्त्राणि बहुविधान्युक्तानि । तत्र शङ्कुयष्ट्यादिकं दिवा-कालमानज्ञापकमुक्तवान् । घटीयन्त्रादिकन्तु अहर्निशं कालमानसाधनमिति घटीयन्त्रादिकं सूर्य्यसिद्धान्ते रङ्गनाथेन विस्तीर्य्य प्रदर्शितम् । यथा,—

"अथ घटीयन्त्रादिभिश्चमनत्कारियन्त्रैर्वा सर्व्वोप-जीव्यं कालं सूक्ष्मं साधयेदिति कालसाधन-मुपसंहरति ॥"

"तोययन्त्रकपालाद्यैर्म्मयूरनरवानरैः ।
ससूत्ररेणुगर्भैश्च सम्यक् कालं प्रसाधयेत् ॥"
इति सूर्य्यसिद्धान्तः ॥

अत्र रङ्गनाथकृतटीका यथा,—

"जलयन्त्रञ्च तत् कपालञ्च कपालाख्यं जलयन्त्रं वक्ष्यमाणं तदाद्यं प्रथमं तेषां तैर्यन्त्रैर्वालुका-यन्त्रप्रभृतिभिः सार्द्धं घटीयन्त्रैर्म्मयूरनरवानरैः । मयूराख्यं स्वयंवहयन्त्रं निरपेक्षं नरयन्त्रं शङ्कु-कारं छायायन्त्रं पूर्व्वोद्दिष्टं वानरयन्त्रं स्वयं वहं निरपेक्षमेतैः ससूत्ररेणुगर्भैः सूत्रसहिता रेणवो धूलयो गर्भे मध्ये येषां तैः सूत्रप्रोताः षष्टिसंख्यका स्फटिका मयूरोदरस्था सुस्नात् घटिकान्तरेण स्रुत एव निःसरन्तीति लोक-प्रसिद्धा नाडीयन्त्रैरित्यर्थः । यद्वा सूक्ष्मा-कारेण रेणवः सिकतांशा गर्भे उदरे यस्य-तादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम् । तेन सहितै-र्मयूरादियन्त्रैर्मयूराद्युक्तयन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः । चकारस्तोययन्त्रकपालादैरित्यनेन समुच्चयार्थकः । कालं दिनगतादिरूपं सम्यक् सूक्ष्मं प्रसाधयेत् । प्रकर्षेण सूक्ष्मत्वेनातिसूक्ष्मत्वेने-त्यर्थः । जानीयादित्यर्थः ॥ * ॥ ननु मयूरादि-स्वयंवहयन्त्राणि कथं साध्यानीत्यतस्तत्साधन-प्रकारा बहवो दुर्गमाश्च सन्तीत्याह ॥"

"पारदारामुसूत्राणि शुल्वतैलजलानि च ।
बीजानि पांशवस्तेषु प्रयोगास्तेऽपि दुर्लभाः ॥"

अत्र रङ्गनाथकृतटीका यथा,—

"तेषु मयूरादियन्त्रेषु स्वयंवहार्थमेते प्रयोगाः सर्व्वथैव योज्याः । प्रकर्षेण यावदभिमतसिद्धिः । एते च इत्यत आह । पारदारामुसूत्राणीति पारदयुक्ता आराः । यथा सिद्धान्तशिरोमणौ । लघु काष्ठजसमचक्रे समतुलिताराः समान्तरा नेम्याम् ।

तिर्य्यग्विवरा योज्याः रसपूर्णं नमकं इत्याद्य... अत्र जलस्य प्रयोगः । प्रयोगः । शुल्वं मिश्रं... तैलयुक्तजलस्य प्रयोगः । प्रयोगोऽपि । यथा च सि... उत्कीर्य्यनेमिमयतां मसृ... तदुपरि तालदलाद्यं कृत्वा...

यावदर्द्धैकपार्श्वे निमग्नं ना... पिहितच्छिद्रं तदरुद्धं भ्रमति... ताम्रादिमयस्याङ्कुशरूपनलस्य... एकं कुण्डजलान्तर्द्वितीयमपं... युगपन्मुक्तं चेत् कं नलेन कुण्डा... नेम्यां बद्धा घटिकाश्चक्रं जलवश...

नलकमपुरातसलिलं पतति यथा तद्व... भ्रमति ततस्तत् सततं पूर्णघटीभिः "... पञ्चयुतं तद्वदकं कुण्डे याति प्रणालिका... बीजानि केवलं गुप्तत्वेन प्रयोगः । ... प्रयोगास्तेयुक्ताः प्रयोगाः । अतिदुर्ग... गेषु सुगमतरा इत्यर्थः । दुर्लभा इत्यत... मनुष्यैः कर्त्तुमशक्या इत्यर्थः । अत एव... स्वयंवहानां प्राचुर्य्यायत्तेः । इयं... समुद्रान्तर्निवासिजनैः चिरजाते... भ्यस्तेति । कूपकविद्यालादत्र... इति संक्षेपः ॥*॥ अथ कपालाख्यजलयन्त्र...

"ताम्रपात्रमधश्छिद्रं न्यस्तं कुण्डेऽमल... षष्टिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम् ॥"

अत्र रङ्गनाथकृतटीका यथा,—

"यत् ताम्रघटितं पात्रमधश्छिद्रं अधोऽभ्यं यस्य तत् । अमलाम्भसि निर्म्मले जले यस्मिन् तादृशे कुण्डे हृदभाण्डे न्यस्तं सत् अहोरात्रे नाक्षत्राहोरात्रे षष्टि-मेव न न्यूनाधिकं मज्जति । अधश्छिद्र-जलागमनेन जलपूर्णतया निमग्नं — कपालकं कपालमेव कपालकं कपालपदवाच्यत्वात् घटाधस्तनार्द्ध-घटीयन्त्रं स्फुटं सूक्ष्मम् । तद्घटनम् ।

शुल्वस्य दिग्भिर्विहितं पलैर्यत्
षडङ्गुलोच्चं द्विगुणायतास्यम् ।
तदम्भसा षष्टिपलैः प्रपूर्य्यं
पात्रं घटार्द्धप्रतिमं घटी स्यात् ।
सत्र्यंशमाषत्रयनिर्म्मिता या
हेम्नः शलाका चतुरङ्गुला स्यात् ।
विद्धं तया प्राक्तनमत्र पात्रं
प्रपूर्य्यते नाडिकयाम्बुभिस्तत् ।

तथाच सिद्धान्तशिरोमणौ,—

"घटदलरूपा घटिता घटिका ताम्री तले पृथुच्छिद्रे ...

द्युनिशनिमज्जनमित्या भक्तं द्युनिशं घटी ...

"अत्र दशभिः शुल्वस्य पलैर्विहितं यत् ...

नं वैचित्र्यत्वं महत्वमित्यन्यं दुर्घटं घेलेतद्-
नम्। इत्याममाणाकारमुपरि पाषं घटो-
मन्नीत्तमम्। दुग्धितनिमग्नगणाया यदि
पंश्यमानानि पामोपयमानि नाथन्ते नदे-
निमज्जनेन क्रिमिभि चेराषिकम्।" इति
ायनम्॥ अन्यानि कालमानयकानि तु
ानि द्रष्टव्यानि॥)
ाचः, पुं, (घट इव उन्नतःकचोऽस्य।)
ाक्षसविशेषः। स तु हिडिम्बाराक्षसीगर्भे
मसेनाज्जातः॥ इति महाभारतम्॥ (अस्य
ानिकथा सह जन्मादिविवरणं यथा, महा-
रते। १। १५६। २१—६३।
पेति तत् प्रतिमुच्य हिडिम्बा राक्षसी तदा।
मसेनमुपादाय सोर्द्धमाचक्रमे ततः॥
ाद्रिशृङ्गेषु रम्येषु देवतायतनेषु च।
ृगपक्षिविघुष्टेषु रमणीयेषु सर्व्वदा॥
ा च रूपं परमं सर्व्वाभरणभूषिता।
ञ्जल्पन्ती सुमधुरं रमयामास पाण्डवम्॥
ेव वनदुर्गेषु पुष्पितद्रुमसानुषु।
ःसु रमणीयेषु पद्मोत्पलयुतेषु च॥
ीद्वीपप्रदेशेषु वैदूर्य्यसिकतासु च।
ीर्थवनतोयासु तथा गिरिनदीषु च॥
ाननेषु विचित्रेषु पुष्पितद्रुमवल्लिषु।
मवद्गिरिकुञ्जेषु गुहासु विविधासु च॥
ुल्लशतपत्रेषु सरःस्वमलवारिषु।
ागरस्य प्रदेशेषु मणिहेमचितेषु च॥
ननेषु च रम्येषु तथैवोपवनेषु च।
वारण्येषु पुण्येषु तथा पर्व्वतसानुषु॥
ह्यकानां निवासेषु तापसायतनेषु च।
र्व्वर्त्तुफलपुष्पेषु मानसेषु सरःसु च॥
भ्रमन्ती परमं रूपं रमयामास पाण्डवम्।
मयन्ती तथा भीमं तत्र तत्र मनोजवा॥
ज्ञे राक्षसीपुत्त्रं भीमसेनात् महाबलम्।
ररूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम्॥
ीमनादं सुताम्रौष्ठं तीक्ष्णदंष्ट्रं महारवम्।
हेष्वासं महावीर्य्यं महासत्त्वं महाभुजम्॥
हाजवं महाकायं महामायमरिन्दमम्।
ीर्घघोणं महोरस्कं विकटोद्वद्धपिण्डिकम्॥
अमानुषं मानुषजं भीमवेगं महाबलम्।
यः पिशाचानतीवान्यान् बभूवातीव राक्षसान्॥
बालोऽपि यौवनं प्राप्तो मानुषेषु विशाम्पते!।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद् बली॥
सद्यो हि गर्भान् राक्षस्यो लभन्ते प्रसवन्ति च।
कामरूपधराश्चैव भवन्ति बहुरूपिकाः॥
प्रणम्य विकचः पादावगृह्णात् स पितुस्तदा।
मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः॥
घटो हास्योत्कच इति माता तं प्रत्यभाषत।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह॥"
कर्णो हि कुरुक्षेत्रयुद्धे कर्णनिचितैकपुरुष-
घातिन्या वासवदत्तया शक्त्या आहतो
ऽस्तत्र। यथा, महाभारते। ७। १७७।
४८—६३।

"ततोऽब्रुवन् कुरवः सर्व एव
कर्णं दृष्ट्वा घोररूपाञ्च मायाम्।
शक्त्या रक्षो जहि कर्णाद्य तूर्णं
नश्यन्त्येते कुरवो धार्त्तराष्ट्राः॥
करिष्यतः किञ्च नो भीमपार्थौ
तपन्तमेनं जहि पापं निशीथे।
यो नः संग्रामाद् घोररूपाद्विमुच्येत्
स नः पार्थान् समरान् योधयेत॥
तस्मादेनं राक्षसं घोररूपं
जहि शक्त्या वै दत्तया वासवेन।
मा कौरवाः सर्व्व एवेन्द्रकल्पा
रात्रियुद्धे कर्ण! नेशुः सयोधाः॥
स वध्यमानो रक्षसा वै निशीथे
दृष्ट्वा राजंस्त्रास्यमानं बलञ्च।
महच्च श्रुत्वा निनदं कौरवाणां
मतिं दध्रे शक्तिमोक्षाय कर्णः॥
स वै क्रुद्धः सिंह इवात्यमर्षी
नामर्षयत् प्रतिघातं रणे तम्।
शक्तिं श्रेष्ठां वैजयन्तीमसह्यां
समाददे तस्य वधं चिकीर्षन्॥
याऽसौ राजन्! निहिता वर्षपूगान्
वधायाजौ सत्कृता फाल्गुनस्य।
यां वै प्रादात् सूतपुत्त्राय शक्रः
शक्तिं श्रेष्ठां कुण्डलाभ्यां निमाय॥
तां वै शक्तिं लेलिहानां प्रदीप्तां
पाशैर्युक्तामन्तकस्येव रात्रिम्।
मृत्योः स्वसारं ज्वलितामिवोल्कां
वैकर्त्तनः प्राहिणोद्राक्षसाय॥
तामुत्तमां परकायावभेत्त्रीं
दृष्ट्वा सौतेर्बाहुसंस्थां ज्वलन्तीम्।
भीतं रक्षो विप्रदुद्राव राजन्!
कृत्वात्मानं विन्ध्यतुल्यप्रमाणम्॥
दृष्ट्वा शक्तिं कर्णबाह्वन्तरस्थां
नेदुर्भूतान्यन्तरीक्षे नरेन्द्र!।
ववुर्वातास्तुमुलाश्चापि राजन्!
सनिर्घाता चाशनिर्गां जगाम॥
सा तां मायां भस्म कृत्वा ज्वलन्ती
भित्त्वा गाढं हृदयं राक्षसस्य।
ऊर्द्ध्वं ययौ दीप्यमाना निशायां
नक्षत्राणामन्तराण्याविशन्ती॥
युद्ध्वा चित्रैर्विविधैः शस्त्रपूगै-
र्दिव्यैर्वीरो मानुषै राक्षसैश्च।
नदन्नादान् विविधान् भैरवांश्च
प्राणानिष्टांस्त्याजितः शक्रशक्त्या॥
इदञ्चान्यच्चित्रमाश्चर्य्यरूपं
चकाराशौ कर्म्म शत्रुक्षयाय।
तस्मिन् काले शक्तिनिर्भिन्नमर्म्मा
बभौ राजन्! शैलमेघप्रकाशः॥
ततोऽन्तरीक्षादपतद्गतासुः
स राक्षसेन्द्रो भुवि भिन्नदेहः।
अवाक् शिरास्तब्धगात्रो विजिह्वो
घटोत्कचो महदास्थाय रूपम्॥

स तद्रूपं भैरवं भीमकर्म्मा
भीमं कृत्वा भैमसेनिः पपात।
हतोऽप्येवं तव सैन्यैकदेश-
मपोथयत् स्वेन देहेन राजन्!॥
ततो मिश्राः प्राणदन् सिंहनादै-
र्भेर्य्यश्च शङ्खा मुरजाश्चानकाश्च।
दग्धां मायां निहतं राक्षसञ्च
दृष्ट्वा हृष्टाः प्राणदन् कौरवेयाः॥
ततः कर्णः कुरुभिः पूज्यमानो
यथा शक्रो वृत्रवधे मरुद्भिः।
अन्वारूढ़स्तव पुत्त्रं रथस्थं
हृष्टश्चापि प्राविशत् स्वं स्वसैन्यम्॥")

घटोत्कचान्तकः, पुं, (घटोत्कचस्य अन्तकः
संहारकः।) कर्णराजः। इति त्रिकाण्डशेषः॥

घटोद्भवः, पुं, (उद्भवतीति उद्भवः घटः कलसः
उद्भवः उत्पत्तिस्थानं यस्य। यद्वा घटात्
उद्भवतीति। उत्+भू+अच्।) अगस्त्यमुनिः।
इति हेमचन्द्रः। २। ३६॥

घट्ट, क चाले। इति कविकल्पद्रुमः॥ (चुरां-
परं-अकं क्वचित् सकञ्च-सेट्।) ट्टयान्तः।
चालश्चलनम्। क, घट्टयति मेघो वायुना। इति
दुर्गादासः॥

घट्ट, ङ चाले। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-
अकं क्वचित् सकञ्च-सेट्।) ट्टयान्तः। ङ,
घट्टते। इति दुर्गादासः॥

घट्टः, पुं, (घट्टतेऽस्मिन् इति। घट्ट+"हलश्च।"
३। ३। १२१। इति घञ्।) नद्यादौ स्नाना-
दर्थं प्रवेशस्थानम्। इति लिङ्गादिसंग्रहे अमर-
भरतौ॥ घाट इति यस्य प्रसिद्धिः। जगात इति
ख्यातो वा। तत्पर्य्यायः। तीर्थः २। अव-
तारः ३। इति हेमचन्द्रः। ४। १५३॥

घट्टगा, स्त्री, (घट्टेति नाम्ना गीयते उदाह्रियते
इति। घट्ट+गै+कः टाप् च।) नदीभेदः।
यथा,—

"मलापहा भीमरथी च घट्टगा
यथा च कृष्णा जलसाम्यतागुणैः।
मलापहा घट्टपयस्तथापि
पथ्यं लघु स्वादुतरं सुकान्तिदम्॥"

इति राजनिर्घण्टः॥

घट्टजीवी, [न्] पुं, (घट्टेन घट्टे देयतरपण्येन
शुल्कादिनेत्यर्थः जीवतीति। जीव+णिनिः।)
वर्णसङ्करजातिविशेषः। माटुनि इति भाषा। स
तु वैश्यायां रजकाज्जातः। इति विवादार्णव-
सेतुः॥

घट्टना, स्त्री, (घट्ट+"ण्यासश्रन्थोयुच्।" ३। ३।
१०७। इत्यस्य सूत्रस्य "घट्टिवन्दिविदिभ्यश्चेति
वाच्यम्।" इति वार्त्तिकोक्त्या युच् टाप् च।)
चलना। (आङ्पूर्व्वकघट्टनाशब्दस्य प्रयोगो
यथा, माघे। १। १०।

"रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः॥")

वृत्तिः। इति हेमचन्द्रः॥

घण, इ ञ उ दीप्तौ । इति कविकल्पद्रुमः ॥ (तना०-उभं-अकं-सेट् । उदित्वात् क्त्वावेट् ।) इ ञ, घणोति घणुते । उ, घणित्वा घत्वा । इति दुर्गादासः ॥

घण्टः, पुं, (घण् + क्तः ।) समामस्यातव्यञ्जन-विशेषः । मत्स्यघण्टगुणः । बलवपित्तकारित्वम् । वातनाशित्वञ्च । इति राजवल्लभः ॥

घण्टकः, पुं, (घण्ट + संज्ञायां कन् ।) क्षुपविशेषः । घेँटकोल इति भाषा । अस्य गुणाः । कफ-नाशित्वम् । कटुमालित्वम् । पित्तकारित्वञ्च । इति राजवल्लभः ॥ घण्टकर्णोऽपि पाठः ॥

घण्टा, स्त्री, (घण्टयति दीप्यते पूजादिकाले वादेन शोभते, घण्टयति शब्दायते वा । घटि दीप्तौ + अच् ततष्टाप् ।) कांस्यनिर्म्मितवाद्य-विशेषः । यथा, स्मृतिः ।

"सर्व्ववाद्यमयी घण्टा वाद्याभावे नियोजयेत् ॥"

"शङ्खो यस्य गृहे नास्ति घण्टा वा गरुडान्विता ।

पुरतो वासुदेवस्य न स भागवतः कलौ ॥"

इति पद्मपुराणे पातालखण्डम् ॥

अथ घण्टामाहात्म्यं तत्रैव स्कान्दे श्रीब्रह्म-नारदसंवादे यथा,—

"स्नानार्च्चनक्रियाकाले घण्टानादं करोति यः ।

पुरतो वासुदेवस्य तस्य पुण्यफलं शृणु ॥

वर्षकोटिसहस्राणि वर्षकोटिशतानि च ।

वसते देवलोके तु अप्सरोगणसेवितः ॥

सर्व्ववाद्यमयी घण्टा केशवस्य सदा प्रिया ।

वादनाल्लभते पुण्यं यज्ञकोटिसमुद्भवम् ॥

वादित्रनिनदैस्तूर्य्यगीतमङ्गलनिःस्वनैः ।

यः स्नापयति गोविन्दं जीवन्मुक्तो भवेद्धि सः ॥

वादित्राणामभावे तु पूजाकाले हि सर्व्वदा ।

घण्टाशब्दो नरैः कार्य्यः सर्व्ववाद्यमयी यतः ॥

सर्व्ववाद्यमयी घण्टा देवदेवस्य वल्लभा ।

तस्मात् सर्व्वप्रयत्नेन घण्टानादन्तु कारयेत् ॥

मन्वन्तरसहस्राणि मन्वन्तरशतानि च ।

घण्टानादेन देवेशः प्रीतो भवति केशवः ॥" *॥

तथा, विष्णुधर्म्मोत्तरे श्रीभगवत्प्रह्लादसंवादे ।

"शृणु दैत्येन्द्र! वक्ष्यामि घण्टामाहात्म्यमुत्तमम् ।

प्रह्लाद! त्वत्समो नास्ति मद्भक्तो भुवनत्रये ॥

मम नामाङ्किता घण्टा पुरतो मम तिष्ठति ।

अर्च्चिता वैष्णवगृहे तत्र मां विद्धि दैत्यज! ॥

वैनतेयाङ्कितां घण्टां सुदर्शनयुतां यदि ।

ममाग्रे स्थापयेद्यस्तु देहे तस्य वसाम्यहम् ॥

यस्तु वादयते घण्टां वैनतेयेन चिह्निताम् ।

धूपे नीराजने स्नाने पूजाकाले विलेपने ॥

नामाग्रे प्रत्यहं वत्स । प्रत्येकं लभते फलम् ।

मखायुतं गोयुतञ्च चान्द्रायणशतोद्भवम् ॥

अविधाद्धत्रता पूजा सफला जायते ध्रुवाम् ।

घण्टानादेन तुष्टोऽहं प्रयच्छामि स्वकं पदम् ॥

गारुडिचिह्निता घण्टा रथाङ्गेन समन्विता ।

यात् कुरुते नाशं अकालमृत्युभयस्य च ॥

वैनतेयाङ्कितां घण्टां दृष्ट्वाहं प्रत्यहं सदा ।

यां करोमि दैत्येन्द्र । लक्ष्मीं प्राप्य यथाधनः ॥

इत्यन्तं यथा देवाः प्रीतिं कुर्व्वन्त्यहर्निशम् ।

सुपर्णं च तथा प्रीतिं घण्टाशिखरमास्थिते ॥

चक्रेण प्रकुर्व्वन्ति घण्टानादं शुभान्विताः ।

मदीयार्च्चनकाले तु घर्म्म कोटिगुणं कली ॥"

अन्यत्र च ।

"घण्टाशिखरस्य शिखरे गरुडं स्थापयेत्तु यः ।

गरुडं वै प्रियं विष्णोः स्थापितं शुभलक्षणम् ॥

मत्पूजाकाले घण्टानादश्च मत्पूजाकाले प्रकुर्वीत यः ।

पापकोटियुतस्यापि नश्यन्ति यमकिङ्कराः ॥

सर्व्वे दोषाः प्रलीयन्ते घण्टानादे कृते सति ।

दैवतानां सुरेन्द्राणां पितॄणामुत्सवो भवेत् ॥

अभावे वैनतेयस्य चक्रस्यापि न संशयः ।

घण्टानादेन भक्तानां प्रसादं कुरुते हरिः ॥

गृहे यस्य भवेदियं घण्टा नागारिसंयुता ।

न सर्पाणां तत्र भयं नाग्निविद्युत्समुद्भवम् ॥

यस्य घण्टा गृहे नास्ति शङ्खञ्च पुरतो हरेः ।

कथं भागवतं नाम गीयते तस्य देहिनः ॥"

"अतो भगवतः प्रीत्यै घण्टा श्रीगरुडान्विता ।

संस्थाप्या वैष्णवैर्वाद्यकैर्गोविन्द भक्तितः ।

गीतं शस्त्रं पुराणादिपठनञ्च प्रशस्यते ॥"

इति श्रीहरिभक्तिविलासे ८ विलासः ॥

(घण्टयति दीप्यते कुसुमादिभिरिति । घटि + अच् । स्त्रियां टाप् ।) घण्टापाटलिवृक्षः । इति शब्दरत्नावली ॥ अतिबला । नागबला । इति राजनिर्घण्टः ॥ (अतिबलानागबलाघण्टापाटलि-शब्देष्वासां विवृतिं यथापदं ज्ञातव्या ॥)

घण्टाकः, पुं, (घण्टयति दीप्यते कुसुमैरिति । घटि + अच् टाप् । घण्टा तया घण्टेति आख्ययेत्यर्थः कायतीति । घण्टा + कै + कः ।) घण्टापाटलिवृक्षः । इति शब्दरत्नावली ॥

घण्टाकर्णः, पुं, (घण्टावत् कर्णौ यस्य ।) शिव-गणविशेषः । घेँटु इति ख्यातः । यथा,—

"घण्टाकर्णो गणः श्रीमान् शिवस्यातीववल्लभः ॥"

इति शिवपुराणम् ॥

तस्य पूजाविधिर्यथा,—

"चैत्रे मासि च संपूज्यो घण्टाकर्णो घटात्मकः ।

आरोग्याय सुखीभूतं संक्रान्त्यां तत्र कारयेत् ॥"

पूजामन्त्रो यथा,—

"घण्टाकर्ण! महावीर! सर्व्वव्याधिविनाशन ॥

विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल ॥"

इति तिथ्यादितत्त्वे रविसंक्रान्तिप्रकरणम् ॥ (काशीस्थहरविशेषः । यथा, काशीखण्डे । ३३ । १०५ ।

"इयं हि चित्रघण्टेशी घण्टाकर्णह्रदं ह्रदः ॥")

घण्टापथः, पुं, (घण्टानां उपलक्षणात् घण्टादि-वादित्राणां पन्थाः । "अक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) घण्टोपलक्षितानां हस्त्यादीनां पन्थाः । इति भरतः ॥ ग्रामादौ प्रधानमार्गः । यथा,—

"दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः ॥"

इति चाणक्यम् ।

तत्पर्य्यायः । संसरणम् २ । तत्र संसरण

[illegible] घण्टिका

वर्ण [illegible] स्यानम् । इत्यमरः । [illegible]

घण्टापाटलिः, पुं, (घण्टा + [illegible] कर्म्मधारयः ।) वृक्षविशेषः । [illegible] भाषा । तत्पर्य्यायः । मोक्षकः [illegible] मोक्षः ३ मुष्ककः ४ । इत्यमरः । [illegible] मोक्षकः ६ [illegible] ७ [illegible] पाटलिः ८ [illegible] पाटली ११ घण्टाकः १२ [illegible] शब्दरत्नावली । मोक्षः १३ [illegible] इति रत्नकोषः । मोदकः १६ [illegible] काचस्थाली १७ कालवृन्ती १८ [illegible] अस्य गुणाः । राजनिर्घण्टोक्तगुणवर्ज्जं [illegible] शब्दे द्रष्टव्यं ॥

घण्टाबीजं, क्ली, (घण्टेव बीजम् [illegible] यस्य ।) [illegible] जयपालः । इति राजनिर्घण्टः ॥

घण्टारवा, स्त्री, (घण्टारवस्य रव [illegible] यस्याः । यथा, [illegible] शण + अच् ।) क्षुपविशेषः । [illegible] शणपुष्पिका इति च भाषा । [illegible] शणपुष्पिका २ । इत्यमरः । १ । [illegible] शणपुष्पी ३ । इति भरतः ॥

घण्टाली, स्त्री, (घण्टा अस्त्य-[illegible] शब्देनेत्यर्थः । अच् प्रत्ययः + "अर्श-[illegible] ५ । २ । १ । इत्यच् स्त्रियां ङीष् ।) घण्टा [illegible] सहचरी वल्ली [illegible] तथात्वम् ।) कोषातकी । इति राजनिर्घण्टः ॥ [illegible] इति भाषा । [illegible] घण्टालिकेति च ॥

घण्टाशब्दं, क्ली, (घण्टायाः शब्द इव शब्दो यस्य ।) कांस्यम् । इति हेमचन्द्रः ॥

घण्टिका, स्त्री, (घण्टा + अल्पार्थे कन् टापि अत इत्वम् । घण्टिका क्षुद्रघण्टा [illegible] रूपत्वात् । अर्शआदित्वादच् ।) तालुमूलस्थजिह्वा । इति [illegible] च । गलरोगविशेषः । अस्य चिकित्सितं यथा, —

"तिलपिच्छिलगोक्षुरादिवनानिरस्य [illegible]

मनोद्भवेन कपालं पायस घण्टिकाम

जिह्वामूले कण्ठमध्ये [illegible]

तन्मात्र शोषा [illegible] ज्वरो मन्दश्च

शिरोव्यथा [illegible]

तन्त्रान्या कण्ठमध्ये तु [illegible]

परिमुत [illegible]

[illegible]

[illegible]

[illegible]

[illegible] घण्टिकाया [illegible]

[illegible] घण्टिकामाग [illegible]

[illegible]

इति हारीते चिकित्सितस्थाने [illegible] पञ्चमेऽध्याये ॥)

तीबीजं, क्ली, (घण्टिनीव बीजं यस्य ।)
पाल: । इति राजनिर्घण्टः ॥
, पुं, (घण्टयति दीप्यते इति । घटि दीप्तौ
"तन्वादेश्च ।" इति उणादिकोषटीकाधृत-
त्रेण उः ।) गजघण्टा । प्रताप: । इत्युणादि-
ष: ॥
र:,पुं, (घण्टानां घण्टाकर्णादिगणविशेषाणां
र: प्रभु: ।) देवताविशेष: । स तु मङ्गल-
: । व्रणदाता च । घेंटु इति भाषा ॥ यथा,
ङ्गलस्य प्रिया मेधा तस्यां घण्टेश्वरो महान् ।
दाता च तेजस्वी विष्णुतुल्यो बभूव ह ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥
पुं, (घनेति शब्दं कुर्व्वन् हयते उड्डीयते
त । इो नभोगतौ + बाहुलकात् डः ।) भ्रमर: ।
त संक्षिप्तसारे उणादिवृत्तिः ॥
क्ली, (हन्यते ताड्यते यत् इति । हन् +
र्त्तौ घनः ।" ३ । ३ । ७७ । इति अप् घना-
शश्च ।) कांस्यतालादिकं वाद्यम् । इत्य-
र: । १ । ७ । ४ ॥ कांस्यताल: करताल इति
ख्यात: आदिना काहलादय: । इति सार-
न्दरी ॥ मध्यमनृत्यम् । इति मेदिनी । ने ।३ ॥
ह: । इति हेमचन्द्र: ॥ लवम् । इति राज-
र्घण्टः ॥
पुं, (घनति दीप्यते इति । घन दीप्तौ + अच् ।)
घ: । (यथा, महाभारते । १ । १६७ । २४ ।
तत: खेदान्वितेयं दृष्ट्वा रङ्गावलोकिनम् ।
स्कारोऽभ्यनयन्नार्यं समीपोपगतान् घनान् ॥")
स्ता । ओघ: । दार्ढ्य । विस्तार: । (हन्यते
भ्यतेऽनेन । हन् + "मूर्त्तौ घन: ।" ३ । ३ ।
७ । इति अप् घनादेशश्च ।) लौहमुद्गर: ।
ति मेदिनी । ने । ३ ॥ (यथा, भारवि: ।१८।१।
"धनुरपास्य सबाणधिशृङ्गर:
प्रतिजघान घनैरिव मुष्टिभि: ॥")
शरीरम् । कफ: । अभ्रकम् । इति राज-
निर्घण्ट: ॥ सजातीयाङ्कत्रयस्य पूरणम् । यथा,
"समत्रिघातश्च घन: प्रदिष्ट:
स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्ग: ।
आदित्रिनिघ्नस्तत आदिवर्ग-
स्त्र्यन्त्याहतोऽथादिघनश्च सर्व्वे ॥"
इति लीलावती ॥
देहमाटविशेष: । यथा,—
'घटासुक्तौ विमर्दस्य घनमात्रुर्नगौघित: ॥")
:, त्रि, (हन्यते इति । हन् + अप् घना-
देशश्च ।) निविड: । तत्पर्य्याय: । निरन्तर: २
सान्द्र: ३ । इत्यमर: । ३ । १ । ६६ ॥ (यथा,
रघु: । ८ । ६१ ।
"स तपेति निरीक्षतारकतैः
प्रतिरुद्ध घनो निगमं तुहिनम् ।
तदलम्बदर्द घदि गौरघने
प्रतियातनिकामिकलस्य गुरो: ॥")
दृढ़: । इति मेदिनी । ने । ६ ॥ (यथा, रघु: ।
११ । ११८ ।

"यश्चकार विवरं शिलाघने
ताड़कोरसि स रामसायक: ॥")
पूर्ण: । (यथा, महाभारते । १ । १३६ । २८ ।
"किञ्चिदापूर्य्यते व्योम जलधारावनैर्घनै: ॥")
सम्पुट: । इति शब्दरत्नावली ॥ (निरवकाश: ।
यथा, मघतल्ले । ३ । २३६ ।
"किं गाण्डीवस्फुरद्गुरुघनास्फालनक्रूरपाणि-
र्नासौ लीलागटनविलसन् मेखली सव्यसाची ॥")
घनकफ:, पुं, (घनस्य मेघस्य कफ इव ।) करका ।
इति त्रिकाण्डशेष: ॥
घनकाल:, पुं, (घनस्य मेघस्य घनप्रधानो वा
काल: ।) वर्षा ऋतु: । इति शब्दरत्नावली ॥
घनगोलक:, पुं, (घनस्य नानावर्णमेघस्य गोल: ।
स इव कायति प्रकाशते इति । घन + कै +
"आतोऽनुपसर्गे क: ।" ३ । २ । ३ । इति क: ।
शुक्लरक्तमेघसादृश्यादस्य तथात्वम् ।) संश्लिष्ट-
रजतसुवर्णम् । इति हेमचन्द्र: । ४ । ११३ ॥
मिश्रान सोना रूपा इति भाषा ॥
घनजम्बाल:, पुं, (घन: सान्द्रो जम्बाल: इति
कर्म्मधारय: ।) चुलुक: । इति त्रिकाण्डशेष: ॥
घनज्वाला, स्त्री, (घनस्य मेघस्य ज्वाला दीप्ति:
प्रस्फुरणमित्यर्थ: ।) मेघदीप्ति: । वज्राग्नि: ।
इति शब्दरत्नावली ॥
घनताल:, पुं, (घनतायां निविड़तायां अलति
पर्य्याप्नोतीति । अल पर्य्याप्तौ + अच् ।) सारङ्ग-
पक्षी । इति जटाधर: ॥
घनतोल:, पुं, (घनं मेघं अभिलक्षीकृत्य स्वमुखं
तोलयति ऊर्द्ध्वमुखीभवतीत्यर्थ: । तुल उन्माने +
अच् ।) चातकपक्षी । इति त्रिकाण्डशेष: ॥
घनद्रुम:, पुं, (घन: कण्टकाकीर्णत्वान्निविड़ो द्रुमो
वृक्ष: ।) विकङ्कतवृक्ष: । इति राजनिर्घण्ट: ॥
घननाभि:, पुं, (घनस्य मेघस्य नाभिर्नाभ्याशयस्थान-
मिव । मेघस्य धूमयोनित्वादेव तथात्वम् ।)
धूम: । इति शब्दरत्नावली ॥
घनपत्र:, पुं, (घनानि निविड़ानि पत्राणि यस्य ।)
पुनर्नवा । इति राजनिर्घण्ट: ॥
घनपाषण्ड:, पुं, (घनेन मेघेन मेघध्वनिनेत्यर्थ: ।
पाषण्ड इव । मेघध्वनिश्रवणेन उन्मत्ततयास्य
तथात्वम् ।) मयूर: । इति शब्दमाला ॥
घनफल:, पुं, (घनानि महत्त्वपत्तत्वात् निविड़ानि
फलानि यस्य ।) विकङ्कतवृक्ष: । इति राज-
निर्घण्ट: ॥
घनफलं, क्ली, (घनस्य सजातीयाङ्कत्रयपूरणस्य
फलम् आद्यम् ।) पूर्व्वसजातीयाङ्कत्रयस्या-
द्याङ्क: । यथा । नवघनस्य मूलं त्रयं इत्यादि ॥
करदरत्नं यथा,—
"आर्द्रं घनस्याभनयाघने हि
द्रवलघाल्पात् पवनो विशोध्य ।
घनं द्वयस्थं मरनय हत्वा
त्रिशा मराटं दिनतैन घनम्नु ।
यंनां न वैघनृहितिकाल्पकिशी
क्षिर्भे न पैकनुमदनात् बम्मए ।

घनं तदाद्यात् घनमूलमेवं
पंक्ता भवेदेवमत: पुनश्च ॥"
इति लीलावती ॥
घनमूल:, पुं, (घनं दृढ़ं मूलमस्य ।) मोरट: ।
इति राजनिर्घण्ट: ॥
घनरस:, पुं, (घन: सान्द्रो रस: ।) सान्द्रनिर्यास: ।
(घनो रसो यस्य ।) मोरट: । (घनस्य मेघस्य
रस: ।) जलम् । कर्पूरम् । पीलुपर्णी । सम्यक्-
सिद्धरस: । इति मेदिनी । से । ५१ ॥ जले क्लीव-
लिङ्गोऽपि । यथा, रत्नकोषे ।
"घनरसममलं क्षीरं घृतममृतं जीवनं भुवनम् ॥"
घनवल्लिका, स्त्री, (घनस्य मेघस्य वल्लिका लता
इव ।) विद्युत् । इति हारावली । ५८ ॥
घनवल्ली, स्त्री, (घना घनरसा वल्ली लता ।)
अमृतस्रवा लता । इति राजनिर्घण्ट: ॥ (घनस्य
मेघस्य वल्लीव इति विग्रहे विद्युत् ॥)
घनवात:, पुं, (घनो निविड़ो वातो वायुर्यत्र ।)
नरकभेद: । इति हेमचन्द्र: । ५ । २ ॥
घनवास:, पुं, (घनस्तीक्ष्ण: वासो गन्धो यस्य ।)
कुष्माण्ड: । इति हारावली । ६७ ॥
घनवाहन:, पुं, (घन इव शुभ्रं वाहनं यस्य । शुभ्र-
वृषवाहनत्वादेवास्य तथात्वम् ।) शिव: । इति
हेमचन्द्र: ।२।१११ ॥ (घनो मेघ: वाहनं यस्य ।)
इन्द्र: । मेघवाहन इत्यमरदर्शनात् ॥
घनश्याम:, त्रि, (घनो मेघस्तद्वत् श्याम: श्याम-
वर्ण: ।) निविड़कृष्णवर्ण: । मेघतुल्यश्यामवर्ण: ।
योगरूढ़िरयं शब्द: श्रीरामकृष्णयोर्बोधक: ।
इति केचित् तत्र पुं । यथा, महानाटके ।
"अये राम! घनश्याम! प्रणमामि गुणार्णवम् ।
यदि जीवामि शोकेन पुनर्द्रक्ष्यामि ते मुखम् ॥"
"समानवर्गविन्यस्तस्फुरन्मकरकुण्डलम् ।
हेमाम्बरं घनश्यामं श्रीवत्सश्रीनिकेतनम् ॥"
इति श्रीभागवतम् ॥
घनसार:, पुं, (घन: शुभ्रमेघस्तद्वत् शुभ्र: सारो
यस्य ।) कर्पूरम् । (यथा, सुश्रुते उत्तरतन्त्रे
४७ अध्याये ।
"पीनस्तनोरुजघना घनसारदिग्धा-
स्ता स्वयमार्द्रवसना: सह संविशेयु: ।"
यथाच महानाटकनिर्णीते । ६ ।
"दिक्कान्ताघनसारचन्दनरसागारा: यथेन्दो
नव: ॥"
घनो निविड: सारो यस्य ।) दक्षिणावर्त्त-
पारद: । इति मेदिनी रे । ८६ ॥ वृक्षभेद: ।
(घनस्य मेघस्य सार: ।) जलम् । इति धरणी ॥
घनस्कन्ध:, पुं, (घनो दृढ़: स्कन्धो यस्य ।) कोषाम्र-
वृक्ष: । इति राजनिर्घण्ट: ॥
घनस्वन:, पुं, (घनो गुणो महत गुरु शब्देन
प्राप्नोति । स्वन घृ प्रापणे + अच् ।) तण्डु-
लीयकशाक: । इति राजनिर्घण्ट: । (घनस्य
मेघस्य स्वन: ।) मेघगर्जनम् ॥
घना, स्त्री, (घन + टाप् ।) माषपर्णी । रुद्र-
जटा । इति राजनिर्घण्ट: ॥

घनाकरः, पुं, (घनानां मेघानामाकरः ।) वर्षाकालः । इति शब्दरत्नावली ॥

घनाघनः, पुं, (हन्तीति । हन वधे + अच्-प्रत्ययः । ततः "हन्तेर्घत्वञ्च ।" ३ । १ । १३४ । इत्यस्य वार्त्ति इति द्वित्वं घत्वं आक् चाभ्यासस्य ।) इन्द्रः । घातुकमत्तहस्ती । वर्षुकमेघः । इत्यमरः । ३ । ३ । १०८ ॥ (यथा, राजतरङ्गिण्याम् । ४ । ३६५ ।
"अम्भोगानि घनाघनव्यवहितोऽप्युद्भावयत्यंशुमान् दूरस्थोऽपि पयोधरोऽतिशिशिरस्पर्शं करोत्यानमम् ॥")

अन्योन्यघट्टनं इति धरणी ॥

घनाघनः, त्रि, निरन्तरः । (हन्तीति । हन् + अच् । "हन्तेर्घत्वञ्च ।" इति द्वित्वं घत्वं आक् चाभ्यासस्य ।) घातुकः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । १० । १०३ । १ ।
"आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥")

घनाघना, स्त्री, (घनाघन + टाप् ।) काकमाची । इति शब्दचन्द्रिका ॥

घनात्ययः, पुं, (घनानां मेघानामत्ययो नाशो यस्मिन् ।) शरत्कालः । इति हेमचन्द्रः । २ । ७२ ॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये ।
"पैत्तिकानां व्याधीनामुपशमो हेमन्ते शैष्मिकाणां निदाघे वातिकानां घनात्यये स्वभावत एव ॥"
"हैमन्तिकं दोषचयं वसन्ते प्रवाहयन् ग्रैष्मिकमभ्रकाले ।
घनात्यये वार्षिकमाशु सम्यक् प्राप्नोति रोगानृतुजान जातु ॥"
इति चरके शरीरस्थाने द्वितीयेऽध्याये ॥)

घनामयः, पुं, (घनो दृढ़ः आमयो यस्मात् ।) खर्ज्जूरवृक्षः । इति त्रिकाण्डशेषः ॥

घनामलः, पुं, (घनो निविड़ः अमलश्च ।) वास्तूकशाकः । इति त्रिकाण्डशेषः ॥

घनाश्रयः, पुं, (घनानां मेघानामाश्रयः ।) आकाशम् । इति हेमचन्द्रः । २ । ७७ ॥

घनोदधिः, पुं, (घनानां लौहमुद्गराणामुदधिः समुद्र इव । लौहमुद्गरप्रचुरतया तथात्वम् ।) नरकभेदः । इति हेमचन्द्रः । ५ । २ ॥

घनोपलः, पुं, (घनस्य मेघस्य उपलः ।) करका ॥ इति हेमचन्द्रः । २ । ८० ॥ (करकाशब्देऽस्य विवरणं ज्ञातव्यम् ।)

घम्ब, गतौ । इति कविकल्पद्रुमः । (भ्वां-परं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । घम्बति । इति दुर्गादासः ॥

घरट्टः, पुं, (घरं घर्घर इति शब्देन अटति गच्छतीति । अट् + निपातनात् द्वित्वे साधुः) पेषणी । इति पुराणम् । जाँता इति भाषा । (यथा, नैषधचरिते । १ । ६३ ।
"इह किमुषसि पृच्छाशंसिकिंशब्दरूप-
प्रतिनियमितवाचा वायसेनैष पृष्टः ।
भण मदनघरट्टप्रान्तसम्पिष्टमुष्टि
र्न कथमवमहं स्यामित्यवोचद्रथाङ्गः ॥")

घर्घटः, पुं, (घर्घ इत्यस्य शब्दं घटति प्राप्नोतीति । घट + अण् । शकन्ध्वादित्वात् साधुः ।) मत्स्यविशेषः । इति शब्दरत्नावली । टाङ्गरा इति भाषा ।

घर्घरः, पुं, (घर्घेति अव्यक्तं ध्वनिविशेषं राखीति । रा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) घर्घरद्वारम् । द्वारम् । उलूकः । नदविशेषः । स्वरभेदे त्रि । इति मेदिनी । रे । १५१ ॥ ध्वनिः । (यथा, राजतरङ्गिण्याम् । ३ । १०३ ।
"घण्टैर्हेमघटितघोषैर्घर्घरैः शुशभान् ध्वनिम् ॥")
हास्यम् । इति हेमचन्द्रः । २ । २१० ॥ तुषानलः । इति भूरिप्रयोगः ॥

घर्घरकः, पुं, (घर्घर एव । स्वार्थे कन् ।) घर्घरनदः । यथा, राजनिर्घण्टे ।
"शोणे घर्घरके जलञ्च रुचिरं मन्दापहं दीपनं पथ्यं वह्निकरं तथाच बलदं क्षीणाङ्गपुष्टिप्रदम् ॥"

घर्घरा, स्त्री, (घर्घं इत्यव्यक्तशब्दं राखीति । रा + कः स्त्रियां टाप् ।) क्षुद्रघण्टिका । वीणाभेदः । इति मेदिनी । रे । १५१ ॥ (गङ्गा । यथा, काशीखण्डे । २९ । ५० ।
"घुष्टरा पिङ्गलतनुर्घर्घरा घर्घरस्वना ॥")

घर्घरिका, स्त्री, (घर्घरैव । स्वार्थे कन् । अत इत्वञ्च ।) क्षुद्रघण्टिका । भृष्टधान्यम् । नदीविशेषः । वादित्रदण्डः । इति हेमचन्द्रः ॥ वाद्यप्रभेदः । इति विश्वः ॥

घर्घुरी, स्त्री, (घुर ध्वनौ + क्विप् । घुर्घुरा ध्वनिविशेषेण गायतीति । गै + कः । निपातनात् गस्य घत्वम् ।) यमकीटः । इति रत्नमाला ॥ घुरघुरिया इति भाषा ।

घर्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) रेफोपधः । घर्ब्बति । इति दुर्गादासः ॥

घर्म्मः, पुं, (घरति क्षरति अङ्गादिति । घृ क्षरणे + "घर्म्मः ।" उणां । १ । १४८ । इति मक्प्रत्ययेन निपातनात् साधुः ।) श्रमवारि । अङ्गजलम् । घाम् इति भाषा ॥ (यथा, आर्य्यासप्तशत्याम् । २१२ ।
"दयितस्पर्शोत्कीलित-
घर्म्मजलस्खलितचरणनखलाक्षे ॥")
तत्पर्य्यायः । निदाघः २ स्वेदः ३ । इत्यमरः । १ । ३ । ३२ ॥ सिन्नः ४ । इति जटाधरः ॥ स्वेदनम् ५ । इति शब्दरत्नावली ॥ अस्य निदानं स्वेदशब्दे द्रष्टव्यम् ॥ (घरति क्षरति स्वेदः शरीरादनेन इति । घृ + करणे मक् ।) आतपः । ग्रीष्मः । उष्मा । इति हेमचन्द्रः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ६४ अध्याये ।
"सरांसि सरितो वापि वनानि रुचिराणि च ।
चन्दनानि पराद्ध्यानि स्रजः सकमलोत्पलाः ॥
तालवृन्तानिलाहारशीलधाम्शीतगृहाणि च ।
घर्म्मकाले निषेवेत वासांसि सुलघूनि च ॥")

घर्म्मदोषः, पुं, (घर्म्मस्य स्वेदस्य दोषः विकृतिः ।) स्वेदस्य विकारः । तस्यौषधं यथा,—
"[illegible]
[illegible]
[illegible] घर्म्मदोष-
इति गारुडे ११०

घर्म्मचर्च्चिका, स्त्री, (घर्म्मजाता [illegible] चर्च्चिका । [illegible] [illegible]) घर्म्मचर्च्ची । घामाचि इति भाषा । यथा, [illegible]
"स्वेदाद्वीनि [illegible]
[illegible] घर्म्मेण [illegible]
[illegible]
[illegible] स्वेदजं द्रवम् ।"

घर्म्मान्तः, पुं, (घर्म्मस्य निदाघस्य अन्तः ।) वर्षाकालः । इति राजनिर्घण्टः । मेघदूते । १०४ ।
"घर्म्मान्ते मे [illegible]
वर्षाकाल[illegible] ॥"

घर्म्मान्तकामुकी, स्त्री, (घर्म्मान्ते [illegible] कामुकी । वर्षाकाले हि बलाकाः [illegible] भवतीति प्रसिद्धिः । यद्वा, घर्म्मान्तं कामयते इति । कम् + उकञ् ।) बलाका । इति राजनिर्घण्टः ॥

घर्षणं, क्ली, (घृष् + भावे ल्युट् ।) घर्षं । इति भाषा । यथाह, माघः ।
"घर्षणादभियातात्ता [illegible]
उपाधावान्वितं [illegible] ॥"

घर्षणालः, पुं, (घर्षणे घर्षणाय वा [illegible] शीति । अल + अच् ।) शिलापुत्रः । इति त्रिकाण्डशेषः ॥ लोड़ा इति भाषा ।

घर्षणी, स्त्री, (घृष्यते इति । घृष [illegible] टित्वात् ङीप् च ।) हरिद्रा । इति [illegible] शेषः ॥ (विवृतिरस्या हरिद्राशब्दे [illegible]

घश, इ ङ क्षरे । इति कविकल्पद्रुमः । (आत्मं अकं-सेट् ।) आद्यस्वरी । इ, घंशते । अयं केचिन्न मन्यते । इति दु[illegible]

घष, इ ङ क्षरणे । इति कविकल्पद्रुमः । (आत्मं-अकं-सेट् ।) इ, घंषते । इ, अयं केचिन्न मन्यते । इति दुर्गादासः ।

घस, लृ क्षी भक्षणे । इति कविकल्पद्रुमः । (परं-सकं-अनिट् ।) लृ, अघसत् । [illegible] इति दुर्गादासः ॥

घसिः, पुं, (घस् भक्षणे + भावे इन् ।) [illegible] इति हेमचन्द्रः ॥ (तथाच, वैदिके ।
"घसिना मे मासं एकया [illegible]

घस्मरः, त्रि, (घस + "सृघस्यदः क्मरच् ।" ३ । २ । १६० । इति क्मरच् ।) अद्मरः । इत्यमरः । ३ । १ । २० ॥ (यथा, ८ । ४० । ३८ ।
"गौर्य्यो हृष्टयो निःशङ्काः मदिकाः घस्मरा मद्यशीलाश्च प्राय इत्युडुम्बराः ॥")

घस्रं, क्ली, (घस् + रक् ।) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥

, पुं, (घसति भक्षयति अन्धकारम् । घस् + क्त ।) दिनम् । हिंमे चि । इति मेदिनी ।रे।३०॥ यथा, पञ्चदशाम् । ६ । १८५ ।
रात्रिघर्मौ नुप्तिबोधायुन्मीलननिमीलने ।
...भावमगोराज्ये इव रुद्रिलयाविमौ ॥")
स्त्री (हन् + इः । हस्य घत्वम् । टाप् च ।)
रात्री । घातः । इति मेदिनी । घे । १ ॥
, पुं, घटते सङ्गच्छते शिरोऽनेन देहे इत्यर्थः । ट् + करणे घञ् ।) घाटा । इति शब्दरत्नावली ॥ (घाटा अस्यास्तीति । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् । घाटाविशिष्टे, त्र । इति व्युत्पत्तिलब्धोऽर्थः ॥)
ा, स्त्री, (घाटा विद्यतेऽस्मिन् इति घाटः ततः टाप् ।) ग्रीवापश्चाद्भागः । घाड़ इति भाषा ॥ तत्पर्य्यायः । अवटुः २ कृकाटिका ३ । इत्यमरः ॥ शिरःपश्चात्सन्धिः । इति राजनिर्घण्टः ॥ घाटः ५ कृकाटी ६ । इति शब्दरत्नावली ॥ घाटिका ७ । इति शब्दचन्द्रिका ॥
("शेषास्तु दुष्टाश्च एवमन्यां
संपीड्य घाटां सुरुचां सुतीक्ष्णाम् ॥"
इत्युत्तरतन्त्रे पञ्चविंशेऽध्याये सुश्रुतेनोक्तम् ॥)
टिका, स्त्री, (घाटा + स्वार्थे कन् । टापि अत इत्वम् ।) घाटा । इति शब्दचन्द्रिका ॥ (यथा, पञ्चतन्त्रे गङ्गदत्तप्रकरणे । ४ । २५ । "अथ कृष्णसर्पमादाय घट्टघाटिकामार्गेण सर्पेणालना स्वालयं नीतः ॥")
घण्टिकः, पुं, (घण्टया चरतीति । चरतीति ठक् ।) यो बहुभिर्मिलित्वा स्तुतिं पठति सः । यो देवताग्रे घण्टाघातेन शंसति स आवघाख्यः । इति स्वामी । इति सारसुन्दरी ॥ (यदुक्तम् । प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः ।") तत्पर्य्यायः । घाटिकः २ । इति भरतः ॥ चाक्रिकः ३ । इत्यमरः।२।८।९७॥ अन्यच्च । "मिलिता ये पठन्ति ये तु भवेयुः स्तुतिकारकाः । चाक्रिकास्ते निगदिताश्चक्रिका अपि कुत्रचित् ॥ घण्टानादकारका ये घाण्टिकाः घाटिकाश्च ते ।"
इति शब्दरत्नावली ॥
...धुस्तूरवृक्षः । इति धारावली । १०७ ॥
ातः, पुं, (हन् + करणभावादौ घञ् । "हनस्तोऽचिण्णलोः ।" ७ । ३ । ३२ । इति हन्तेस्तकारोऽन्तादेशः । "हो हन्तेर्ञ्णिन्नेषु ।" ७ । ३ । ५४ । इति कुत्वञ्च ।) आघातः । प्रहारः । इति मेदिनी । ते । १० ॥ (यथा, गोः रामायणे । ६ । ८९ । २४ ।
"मुष्टिभिः पार्ष्णिघातैश्च बाहुघातैश्च शोभने । घोरैर्जानुप्रहारैश्च मथनाघर्मपीडनैः ॥")
अङ्गपूरणम् । यथा । "स्मरविघातज घनः प्रहितः ।" इति लीलावती ॥ (वधः । यथा, पञ्चतन्त्रे । १ । ३१८ ।
"वरं प्रभुर्मपि प्राप्तं निःसलमकुतोभयम् । मौ हन्यात् तस्य पापं स्यात्पशुनाशसम्पात-
-जम् ॥"

घुण्ठनम् । यथा, मनुः । ६ । २७४ ।
"ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने ॥"
"ग्रामघाते ग्रामलुण्ठने तस्करादिभिः ।" इति कुल्लूकभट्टः ॥ क्षयात्युत्खातः हानिर्वा । यथा, याज्ञवल्क्ये । २ । १६२ ।
"मार्गाजनस्थे तु महिषी शस्यघातस्य कारिणी ॥" भङ्गः । उच्छेदादिर्वा । यथा, पञ्चतन्त्रे । १ । सञ्जीवककथायाम् । "प्रोवाच भो शेषभागे अयुक्तं मया पापेन कृतं सञ्जीवकं व्यापादयता यस्माद् विश्वासघातादन्यन्नास्ति पापतरम् ॥")
घातकः, त्रि, (हन्तीति । हन् + ण्वुल् । णिति तान्तादेशे कुत्वम् ।) हननकर्त्ता । यथा,—
"गौरीमाधवयोर्भक्ता राधिका शिवसन्निधौ । इन्दुः कुमुदहन्ता च सूर्य्यः कमलघातकः ॥"
इति विदग्धमुखमण्डनम् ॥
(तथा च मनुः । ५ । ५१ ।
"संस्कर्त्ता चोपहर्त्ता च खादकश्चेतिघातकाः ॥")
घातनं, क्ली, (हन् + णिच् + भावे ल्युट् ।) हननम् । वधः । यज्ञार्थपशुवधः । इति शब्दरत्नावली ॥ (यथा, महाभारते । २ । ४४ । ४० ।
"पशुवद्घातनं वा मे दहनं वा कटाग्निना ॥")
घातनः, त्रि, (हन्ति मारयतीति । हन् + कर्त्तरि ल्युः स्वार्थे णिच् ।) वधकर्त्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (केचित्तु एतस्य प्रामादिकत्वमुक्तम् । "हन्तेर्घुट्मानन्तयोर्घत्वतत्वे ।" ५।४२। इत्युणादिसूत्रेण हन्तेर्घुगिष्यते आद्यन्तयोर्घत्वतत्वे घतनः । इत्युक्तत्वात् । अतः सुधीभिश्चिन्त्यम् ।)
घातिः, पुं, (हन् + इञ् ।) पक्षिबन्धनम् । इत्युणादिकोषः ॥ प्रहरणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥
घातिपक्षी, [न्] पुं, (घातिः घातकः पक्षीति कर्मधारयः ।) श्येनपक्षी । इति धारावली । ५६ ॥
घातुकः, त्रि, (हन्तीति । हन् + "लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् ।" ३ । २ । १५४ । इति उकञ् ।) हिंस्रः । क्रूरः । इत्यमरः । ३ । १ । ३० ॥ (यथा, अथर्ववेदे । १२ । ४ । ७ । "ततः किशोरा म्रियन्ते वत्सांश्च घातुको वृकः ॥")
घात्यं, त्रि, (हन्तुमर्हः हन्तुमर्हो वा इत्यर्थः । हन् + ण्यत् ।) हननयोग्यम् । इति व्याकरणम् ॥ (यथा, पञ्चतन्त्रे । ३ । २२८ । "ततो मम सुखघाताः सञ्जाताः ॥") [हेमचन्द्रः ॥
घारः, पुं, (घृ सेचने + घञ् ।) सेचनम् । इति घार्त्तिकः, पुं, (घृतेन निर्वृत्तः । इति ठञ् ।) घृतपूरः । इति हेमचन्द्रः ॥ (घृतसंयुक्ते त्रि । यथा, पञ्चतन्त्रे । ५ । ६५ । "अन्यस्य घार्त्तिकभोजनं दत्तम् ।")
घासः, पुं, (घस्यते भक्ष्यते पशुभिरित्यर्थः । घस् + कर्म्मणि घञ् ।) गवादिभक्ष्यतृणविशेषः । तत्पर्य्यायः । यवसम् २ । इत्यमरः । २ । ९ । १६७ । अर्जकः ३ जवसः ४ । इति भरतः । यवसम् ५ । इति शब्दरत्नावली ॥ (यथा, पञ्चतन्त्रे । ४ । ५ ।

घासिः, पुं, (घसति भक्षयति हवींषि । घस् + "अजिघसिभ्यामिण् ।" उणां ४ । १० इति इण् ।) अग्निः । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे । १ । १६२ । १४ । [हेमचन्द्रः ॥")
"यत्र मपौ यत्र घासिं जघास सर्व्वा ता ते अपि
घिण, इ ङ ग्रहणे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) इ, घिण्णते । ङ, घिणते । चेघिण्णते । इति दुर्गादासः ॥
घु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) ङ, घवते । इति दुर्गादासः ॥
घुः, पुं, (घुङ् ध्वनौ + भावे बाहुलकात् डुः ।) ध्वनिः । इति जटाधरः ॥
घुट, ङ ऌ परिवर्त्ते । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) परिवर्त्तो गतवतः प्रत्यागमनं विनिमयो वा । ङ, घोटते नदी । ऌ, अघुटत् । इति दुर्गादासः ॥ (यथा, कविरहस्ये १४६ । "यस्य याघोटते दण्डो नाक्षतार्थः कुतश्चन ॥")
घुट, शि प्रतिघाते । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) शि, घुटति अघुटीत् शत्रुं शूरः । जुघोट । इति दुर्गादासः ॥
घुटः, पुं, (घुट् प्रतिघाते + संज्ञायां अच् ।) चरणग्रन्थिः । इति हेमचन्द्रः ॥ [कोषः ॥
घुटिः, स्त्री, (घुट + इन् ।) गुल्फः । इति त्रिकाण्ड-
घुटिकः, पुं, (घुट् + ठन् ।) गुल्फः । इति हेमचन्द्रः ॥ [मरः । २ । ६ । ७२ ॥
घुटिका, स्त्री, (घुटिक + टाप् ।) गुल्फः । इत्य-
घुटी, स्त्री, (घुट + इन् । "कृदिकारादक्तिनः ।" इति ङीष् ।) गुल्फः । इति द्विरूपकोषः ॥
घुड, शि व्याघाते । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) शि, घुडति अघुडीत् । इति दुर्गादासः ॥
घुण, ङ भ्रमणे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, घोणते । इति दुर्गादासः ॥
घुण, इ ङ ग्रहणे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) इ, घुण्णते । ङ, घुणते । जोघुण्यते । इति दुर्गादासः ॥
घुण, श भ्रमणे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट् ।) श, घुणति घोणिता । इति दुर्गादासः ॥
घुणः, पुं, (घुणति काष्ठं भक्षयन् काष्ठाभ्यन्तरे भ्राम्यतीति । घुण भ्रमणे + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) काष्ठकृमिः । (यथा, सुश्रुते सूत्रस्थाने । ८ अध्याये । "घुणोपदंशकाष्ठैरुच्चतामाणीसुधास्त्राघुरन्नीत्रिकस्य ॥") तत्पर्य्यायः । काष्ठभेदः २ । इति त्रिकाण्डशेषः । काष्ठकीटः ३ । इति भूरिप्रयोगः ॥
घुणवल्लभा, स्त्री, (घुणः वल्लभो यस्याः । घुणस्य वल्लभा वा ।) अतिविषा । इति भावप्रकाशः ॥ (अस्याः पर्य्यायो यथा तद्यथा,—
"शुक्लकन्दश्चेतलं कार्त्तिकं दुर्गा
विषस्त्वरुणोपिन——
इति भावप्रकाशे ...

कार्ये वये चापि पथ्यं पाके च तल्लघु ॥
मधु कफपित्तघ्नं गुरुपाके कषायकम् ।
पित्तप्रशमनं शीतं माहिषं घृतम् ॥
औष्ट्रं कटुरसं पाके शोषक्रिमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥
पाके लघ्वाविकं सर्पिर्न च पित्तप्रकोपणम् ।
कफेऽनिले योनिदोषे शोषे कम्पे च तद्धितम् ॥
पाके लघूष्णवीर्यञ्च कषायं कफनाशनम् ।
दीपनं बद्धमूत्रञ्च विद्यादैकशफं घृतम् ॥
चक्षुष्यमग्र्यं स्त्रीणाञ्च सर्पिः स्यादमृतोपमम् ।
वृद्धिं करोति देहाग्न्योर्लघुपाकं विषापहम् ॥
कषायं बद्धविण्मूत्रं तिक्तमग्निकरं लघु ।
हन्ति कारेणवं सर्पिः कफकुष्ठविषक्रिमीन् ॥”
क्षीरघृतं पुनः संग्राहि रक्तपित्तभ्रममूर्च्छा-
प्रशमनं नेत्ररोगहितञ्च । सर्पिर्मण्डस्तु मधुरः सरो
योनिश्रोत्राक्षिशिरसां शूलघ्नो वस्तिनस्याक्षि-
प्रपूरणेषूपदिश्यते । सर्पिः पुराणं सरं कटु-
विपाकं त्रिदोषापहं मूर्च्छामदोन्माद उदर-
ज्वरगरशोषापस्मारयोनिश्रोत्राक्षिशिरःशूलघ्नं
दीपनं वस्तिनस्याक्षिपूरणेषूपदिश्यते । भवन्ति
चात्र ।
“पुराणं तिमिरश्वासपीनसज्वरकासनुत् ।
मूर्च्छाकुष्ठविषोन्मादग्रहापस्मारनाशनम् ॥
एकादशशतञ्चैव वत्सरानुषितं घृतम् ।
रक्षोघ्नं कुम्भसर्पिः स्यात् परतस्तु महाघृतम् ॥
पेयं महाघृतं भूतैः कफघ्नं पवनाधिकैः ।
बल्यं पवित्रं मेध्यञ्च विशेषात्तिमिरापहम् ॥
सर्वभूतहरञ्चैव घृतमेतत् प्रशस्यते ॥”
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥ * ॥
स्त्री अग्निमम । इति मेदिनी । ते । १०॥)
घृतः, त्रि (घर्षति दीप्यते क्षरति सिञ्चतीति
वा । घृ + “अग्निदमिभ्यः क्तः ।” उणां । ३ ।
८९ । क्तः ।) दीप्तः । सेचकः । इति शब्दरत्ना-
वली ॥

घृतकरञ्जः, पुं, (घृतमिव करञ्जः । घृतवत्स्न
बाहुल्यादस्य तथात्वम् ।) करञ्जभेदः । घिया-
करमुचा इति भाषा । तत्पर्यायः । प्रकीर्यः २
घृतपर्णकः ३ स्निग्धपत्रः ४ तपस्वी ५ विषारिः ६
विरोचनः ७ । अस्य गुणाः । कटुत्वम् । उष्ण-
त्वम् । वातप्रशमनत्वम् । दोषविषव्रणनाशित्वञ्च ।
इति राजनिर्घण्टः ॥

घृतकुमारिका, स्त्री, (घृतेन घृतवद्रसेन
कुमारिका सुन्दरी कान्तिर्वा । यद्वा बाल्य-
तया तथात्वम् ।) घृतकुमारी । इति भाव
प्रकाशः ॥ (यथास्याः पर्यायाः ।
कुमारी गृहकन्या च कन्या घृतकुमारिका ॥”
अस्या गुणा यथा —
“कुमारी भेदनी शीता तिक्ता नेत्र्या रसायनी ।
मधुरा बृंहणी बल्या वृष्या वातविषप्रणुत् ॥
गुल्मप्लीहयकृद्वृद्धिकफज्वरहरी हरेत् ।
ग्रन्थ्यग्निदग्धविस्फोटपित्तरक्तत्वगामयान् ॥”
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

घृतकुमारी, स्त्री, (घृतेन घृतवद्रसेन कुमारी
सुन्दरी । यद्वा कुमारी कन्येव । यद्वै पालित
तया तथात्वम् ।) स्वनामख्यातगुल्मः । घिकु
मारी इति भाषा । तत्पर्यायः । कुमारी २
तरणिः ३ सहा ४ । इति शब्दरत्नावली ॥
कन्यका ५ दीर्घपत्रिका ६ स्थलेरुहा ७ मृदुः ८
कन्या ९ बहुपत्रा १० अमरा ११ अजरा १२
कण्टकप्रावृता १३ वीरा १४ भृङ्गेष्टा १५ विपु-
लस्रवा १६ ब्रह्मघ्नी १७ तरुणी १८ रामा १९
कपिला २० अम्बुधिस्रवा २१ सुकण्टका २२
स्थूलदला २३ गृहकन्या २४ । अस्या गुणाः ।
हिमत्वम् । तिक्तत्वम् । मदगन्धित्वम् । कफपित्त
कासविषश्वासकुष्ठनाशित्वम् । रसायनत्वञ्च ।
इति राजनिर्घण्टः ॥ भेदकत्वम् । नेत्रहित-
त्वम् । मधुरत्वम् । बृंहणत्वम् । शुक्रबलकारि-
त्वम् । वातगुल्मप्लीहयकृद्वृद्धिज्वरग्रन्थ्यग्निदग्ध
विस्फोटपित्तरक्तत्वग्रोगनाशित्वञ्च । इति भाव
प्रकाशः ॥ (कुमारीशब्देऽस्या विवरणमस्या ज्ञेयम् ॥)

घृततैलादिकल्पः, पुं, (घृततैलादीनां रोगविना-
शकपक्वघृततैलादीनां कल्पो विधिः ।) रोग
नाशकनानौषधिपक्वघृततैलादिवर्गः । यथा ।
धन्वन्तरिरुवाच ।
“घृततैलादि वक्ष्यामि शृणु सुश्रुत ! रोगनुत् ।
शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ॥
अभया गुडूची चैव अटरूषकवाकुची ।
एतैरक्षसमैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
कण्टकार्या रसप्रस्थक्षीरप्रस्थसमन्वितम् ।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥ १ ॥
त्रिफलाचित्रकबलानिर्गुण्डीनिम्बवासकाः ।
पुनर्नवा गुडूची च बृहती च शतावरी ॥
एतैर्घृतं यथालाभं सर्वरोगविमर्द्दनम् ॥ २ ॥
बलाशतकषाये तु तैलस्याढाढकं पचेत् ॥
कल्कैर्मधुकमञ्जिष्ठाचन्दनोत्पलपद्मकैः ।
सूक्ष्मैलापिप्पलीकुष्ठत्वगेलागुरुकेशरैः ।
गन्धामलीवनीयैश्च क्षीराढकसमान्वितम् ।
एतत्कृद्विना पक्वं स्थापयेद्राजते शुभे ॥
सर्व्ववातविकारांस्तु सम्यग्धात्वन्तराश्रयान् ।
तैलमेतत् प्रशमयेद्बलाख्यं राजवल्लभम् ॥ ३ ॥
शतावरीरसप्रस्थं क्षीरप्रस्थं तथैव च ।
शतपुष्पा देवदारु मांसी शैलेयकं बला ॥
चन्दनं तगरं कुष्ठं मांसा चांशुमती तथा ।
एतैः कर्षसमैः कल्कैस्तैलप्रस्थं विपाचयेत् ॥
कुब्जवामनपङ्गूनां बधिरव्यङ्गकुष्ठिनाम् ।
वायुना भग्नगात्राणां ये च क्षीणाश्च मैथुने ॥
जराजर्ज्जरगात्राणामामानाहप्रपीडिताम् ।
लभन्ते गर्भमपि ये नार्यः शिराबायुगताश्च ये ॥
सर्व्वान् नाशयत्याशु तैलमेव स्यादग्राह्यकम् ।
नारायणमिदं तैलं विष्णुनोक्तं ज्वरार्द्दनम् ॥ ४ ॥
दशमूलं तैलं घृतं कुर्य्यात् समक्षीरौषधैः पृथक् ।
शतावर्य्या गुडूच्या वा चित्रके दीपनायुतः ॥
निर्गुण्ड्या वा प्रसारण्याः कण्टकार्य्या रसा-
दिभिः ॥

तैलं शतावर्य्या वापि रास्ना...
माषाढ्या वैदलकैनापि...
शतावर्य्या दशमूलेन सर्षिष...
वटिका मौदकौ वापि पूर्वं...
घृतेन मधुना वापि पूर्वं मधु...
तक्तैः कटुकैर्गुणं दधानामरी...
त्रिफलकाक्षित्रिदारामलवक...
सुधा च मापाक्षिकामलकं...
योनिमणोच संभाव्य तैलं देशे
कर्णातिल्पन्ते तैलं भद्रं रक्तं...
शोधनं रोपणञ्चैव मध्यं...
पिण्डकाद्यं महातैलं मधं...
अजमोदा ममिष्ठा हरि...
चारद्वयं धनुगमार्दकं च...
इन्द्रवारुणयष्टीमार्गकरनैः...
एभिः सर्वमतं तैलमश्वमन्त्रेण...
स्मृद्धिना पचेद्देवदारुपो...
अजमोदादिकं तैलं मज्जमानां...
विदग्धस्तु पचेत् पक्वं मज्जे...
दोषघ्नं स्तुभावञ्च तैलेनैव...
अजमोदादिकं तैलं महादेव...
इत्यादिमहापुराणे गारुडे...

घृतदीधितिः, पुं, (घृतेन प्रदीप्ता दीधि...
यस्य । घृताहुत्या अग्निर्दीप्ता...
अग्निः । इति त्रिकाण्डशेषः ॥

घृतपर्णकः, पुं, (घृतमुक्तमिव पर्णं...
कप् ।) घृतकरञ्जः । इति रा...

घृतपूरः, पुं, (घृतेन पूर्य्यते इति...
पूरी + कर्म्मणि घञ् । प्रचुरघृ...
तथात्वम् ।) पिष्टकविशेषः । यथा...
“मर्द्दितां समितां क्षीरनारिकेल...
अवगाह्य घृते पक्वा घृतपूरोऽयमु...
घृतपूरो गुरुर्वृष्यः कफवर्द्धनकारी...
रक्तपित्तहरो वृष्यः स्याद्रुः पित्तहरो...
तत्पर्यायः । पिष्टपूरः २ घृतवरः ३...
इति हेमचन्द्रः । ३ । ६४ । (अस्य...
प्रकारादि यदुक्तं चिन्तामणौ ।
“क्षीरेण मर्द्दितं चूर्णं गोधूमानां
निधाय सर्पिषा पाच्य कटाहेऽथ
घृतपूरोऽयमुद्दिष्टः कविभिः सविनिता ।”
नारिकेलजो यथा,
“समिता मर्द्दिता क्षीरे नारिकेलविनि...
अवगाह्य घृते पाच्या घृतपूरपरः स्मृ...
दुग्धजो यथा,—
“पाकपिण्डीकृतं क्षीरं शर्करासमन्विते...
घृतपूरविनिर्म्माणं कारयेत् सूपकारैः...
शालिभवो यथा,—
“शाल्यालिपिष्टं दुग्धेन कथितं बलवा...
शर्करायुक्तं घृते पक्वं घृतपूरो भवेदयम् ।”
कणिकभवो यथा,—
“कणिकचूर्णं निःक्षिप्य पाकपिण्डीकृत...
निर्म्मायं घृतपूराणां ...

ञी यथा,—
ाय्य घृते गते गुणास्तस्याधिकिताः।
ोरया योज्यो घृतपूरो यथेच्छया ॥
माशं मवन्यं हि सर्वं चूर्णं ततः स्मृतम्।
ते यो विशेषोऽत्र तदाम्यम्बर्गसंज्ञितः ॥
गो गुरुर्हृद्यो वृष्यः पित्तानिलापहः।
प्राणप्रदो बल्यः तुरुच्योऽग्निप्रदीपनः ॥
दृव्यगुणानामध्येनं स्यात् घृतपूरकः।
सं वस्तुसंयोगं तद्गुणानपि चादरेत् ॥")
:, पुं, (घृतेन पूर्ण इव कायतीति। कै +
) यवश्रपणः। इति त्रिकाण्डशेषः ॥
लिका, स्त्री, (घृतस्य मण्डलं सदृशः।
निर्यासः यस्या अस्यां वा अस्तीति।
मण्डल + "अत इनिठनौ।" ५। २।
। इति ठन्।) धंगमहीरुहः। इति
निर्घण्टः ॥
ा, स्त्री, (घृतमण्डवत् निर्यासोऽस्त्यस्याः।
ं आदिभ्योऽच्।"५। २। १२७। इत्यच्।)
गोलीवृक्षः। इति शब्दचन्द्रिका ॥ माकड़-
ा इति भाषा ॥
, पुं, (घृतमेव वरं बाहुल्यात् प्रधानं यत्र।)
ूरः। इति हेमचन्द्रः। ३। ६४ ॥
ञी, (घृतवत् निर्यासोऽस्यास्याः। "अर्श
दिभ्योऽच्।" ५। २। १२७। इत्यच्।)
मज्जा। इति शब्दचन्द्रिका ॥
, स्त्री, (घृतेन अस्यतेन अञ्चति व्याप्तिं गच्छ-
त। अनुच + क्विप्। नलोपे स्त्रियां ङीप्।
या मनुष्याहारवर्जितानां देवजातीनां
तमयघृतभोजनं महाभारतपुराणादिप्रसि-
।) अप्सरोविशेषः। इति हलायुधः ॥ (यथा,
ुपुराणे। १। ९। १०१।
ताचीप्रमुखा व्रजन् नवृतुश्चाप्सरोगणाः ॥"
त्तीस्वरूपा महादेवी। यथा, देवीभाग-
। १२। ६। ४६।
नारिमण्डला पूर्णा घृताची घनवेगिनी ॥")
ोगर्भसम्भवा, स्त्री, स्थूलैला। इति राज-
ण्टः ॥
:, पुं, (घृतस्य आह्वा आख्या यस्य। यद्वा,
ान आह्वयते स्पर्द्धते स्वगन्धेन इति। आ
ह्वे + कः।) सरलद्रवः। इति त्रिकाण्डशेषः ॥
, स्त्री, (घृते इलति तद्भक्षणाय तत्र स्वपि-
ति। इल स्वप्ने + अच्। गौरादित्वात् ङीष्।)
टविशेषः। तैलपायिका इति केचित् ॥ तत्-
ाय:। पिङ्गकपिशा २। इति हेमचन्द्रः।
। २७३ ॥
:, पुं, (घृतमिव स्वादु आस्वाद्या सुभ्रं वा उदकं
स्य। उदकस्योदादेशः।) घृतसमुद्रः। यथा,
एवं सुरोदाद्बहिस्तद्द्विगुणः समानेन घृतोदेन
या पूर्व्वः कुशद्वीपः।" इति श्रीभागवते।५।२०।
उ संघर्षे। इति कविकल्पद्रुमः॥ (भ्वां परं-
कं-सेट्। उदित्वात् क्त्वावेट्।) उ, घर्षित्वा
ष्ट्वा। घर्षति चन्दनं लोकः। इति दुर्गादासः ॥

घृष्टः, त्रि, (घृष् + कर्मणि क्तः।) घर्षितः। घषा
इति भाषा ॥ यथा। घृष्टो मलयजो गन्धः।
इति शुद्धितत्त्वम् ॥ (यथाच काशीखण्डे। ९९।५६।
"धातुवत् घर्षितश्चन्ना घृष्टपानकसन्ततिः ॥")
घृष्टिः, स्त्री, (घृष्यतेऽसौ। घृष् + कर्मणि क्तिच्।)
वाराही। चामर आलु इति भाषा ॥ इत्य-
मरः। २। ४। १५१ ॥ (घृष् + भावे क्तिन्।)
घर्षणम्। स्पर्द्धा। अपराजिता। (घर्षतीति।
घृष् + कर्त्तरि क्तिच्।) सूकरे पुं,। इति
मेदिनी। टे। १३ ॥
घृष्टिला, स्त्री, (घृष्टिं घर्षणं लातीति। ला + कः।)
चित्रपर्णिका। पृश्निपर्णी। इति रत्नमाला ॥
घृष्विः, पुं स्त्री, (घर्षति इति। घृष संघर्षे +
"कृविघृष्विच्छवीति।" उणां। ४। ५६। इति
क्विन्प्रत्ययेन निपातनात् सिद्धः।) सूकरः।
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (भावे +
क्विन्। घर्षणम्। यथा, ऋग्वेदे। १। ३०। ४।
"प्रच: शक्राय घृष्वये।" "घृष्वये शत्रुघर्षण-
शक्ताय।" इति भाष्यम् ॥)
घेघुलिका, स्त्री, क्रौञ्चादनम्। इति रत्नमाला ॥
घेँघु इति भाषा ॥ (यथा, वैद्यकरत्नमालायाम्।
"क्रौञ्चादनं घेघुलिका ॥")
घोटः, पुं स्त्री, (घोटते परिवर्त्तते इति। घुट परि-
वर्त्तने + पचाद्यच्।) घोटकः। इति राज-
निर्घण्टः ॥
घोटकः, पुं स्त्री, (घोटते गत्वा प्रत्यागच्छतीति।
घुट परिवर्त्तने + ण्वुल्।) पशुविशेषः। घोड़ा
इति भाषा ॥ तत्पर्य्यायः। पीतिः २ तुरगः ३
तुरङ्गः ४ अश्वः ५ तुरङ्गमः ६ वाजी ७ वाहः ८
अर्व्वा ९ गन्धर्व्वः १० हयः ११ सैन्धवः १२
सप्तिः १३। इत्यमरः। २। ८। ४४ ॥
घोटः १४ पीती १५ पीथिः १६। इति
भरतः ॥ तार्क्ष्यः १७ हरिः १८ वीती १९।
इति हेमचन्द्रः ॥ सुद्गभोजी २० धाराटः २१
जवनः २२ जितवः २३ जवी २४ वाहनश्रेष्ठः २५
श्रीभ्राता २६ अश्मन्तकोदरः २७। सुद्गभुक् २८
शालिहोत्रः २९ लक्ष्मीपुत्त्रः ३० प्रकीर्णकः ३१।
इति जटाधरः ॥ वातायनः ३२ श्रीपुत्त्रः ३३
चामरी ३४ हेषी ३५ शालिहोत्री ३६ मरु-
द्रथः ३७ वाजस्कन्धः ३८ हरिद्राक्षः ३९ एक-
शफः ४० किन्धी ४१ ललामम् ४२ विमानकः ४३ ॥
इति शब्दरत्नावली ॥ अत्यः ४४ वह्निः ४५
दधिक्रा ४६ दधिक्रावा ४७ एतग्वः ४८ एतशः ४९
पैद्वः ५० दौर्गहः ५१ उच्चैःश्रवाः ५२ आशुः ५३
ब्रध्नः ५४ अरुषः ५५ मांश्चत्वः ५६ अव्यथयः ५७
श्येनासः ५८ सुपर्णाः ५९ पतङ्गाः ६० नरः ६१
ह्वार्य्याणाम् ६२ हंसासः ६३। इति वेद-
निघण्टौ १ अध्यायः ॥ हरी इन्द्रस्य १ रोहितः
अग्नेः २ हरितः आदित्यस्य ३ रासभौ अश्विनोः ४
अजाः पूष्णः ५ पृषत्यो मरुताम् ६ अरुण्यो
गावः उषसाम् ७ श्यावाः सवितुः ८ विश्वरूपा
बृहस्पतेः ९ नियुतो वायोः १०। इति दश-
दिष्टौपर्य्योजनानि। इति च वेदनिघण्टौ १
अध्यायः ॥ अस्य मांसगुणाः। उष्णत्वम्। वात-
नाशित्वम्। लघुगुणत्वम्। अतिसेवनात् पित्त-
दाहप्रदत्वञ्च। इति राजनिर्घण्टः ॥ अग्निकर-
बलकारित्वम्। बृंहणत्वम्। चक्षुर्हितत्वम्।
मधुरत्वञ्च। इति भावप्रकाशः ॥ * ॥

अथाश्वपरीक्षा।

"सपक्षा वाजिनः पूर्व्वं संजाता व्योमचारिणः।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्विताः ॥
इन्द्रादेशाच्छालिहोत्रस्तेषां पक्षमथाच्छिनत्।
ततः प्रभृति निष्पक्षास्तुरङ्गा धरणीं गताः ॥
उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे।
चतुर्द्धा वाजिनो भूमौ जायन्ते देशसंश्रयात् ॥
ताजिताः खुरशालाश्च तुषाराश्चोत्तमा हयाः।
गोजिकाणाश्च केकाणाः प्रौढ़ाहाराश्च मध्यमाः ॥
ताड़जा उत्तमाशाश्च वाजशूलाश्च मध्यमाः।
गल्वराः साध्यमाश्च सिन्धुदाराः कनीयसः ॥
अन्यदेशोद्भवा ये च ते वै नीचाः प्रकीर्त्तिताः।
वाजिनो ब्रह्मजाः केचिद्वह्निजातास्तथापरे ॥
समीरप्रभवाश्चान्ये तुरगा ब्रह्मजाः परे।
जलोद्भवा द्विजा ज्ञेयाः क्षत्त्रिया वह्निसम्भवाः ॥
प्रभञ्जनभवा वैश्या ब्रह्मजाः शूद्रजातयः।
पुष्पगन्धिर्भवेद्विप्रः क्षत्त्रियोऽगुरुगन्धिकः ॥
घृतगन्धो भवेद्वैश्यो मीनामोदी च शूद्रकः।
विवेकी मधुरो विप्रस्तेजस्वी क्षत्त्रियो बली ॥
कोपाभावो भवेद्वैश्यः शूद्रो निःसत्त्वको भवेत्।
विप्राद्या वाहनाः सर्व्वे जयो भूमिपतेः सदा ॥
शूद्रजातिं तुरङ्गन्तु न स्पृशन्ति नरेश्वराः ॥"
इत्युत्पत्तिः ॥ * ॥

अथाङ्गुल्याङ्गविभागः।

"सप्तविंशत्यङ्गुलिभिर्मुखमानं विधीयते।
कर्णौ षड़ङ्गुलौ प्रोक्तौ भालकं चतुरङ्गुलम् ॥
चत्वारिंशच्च सप्ताढ्या स्कन्धः संपरिकीर्त्तितः।
पृष्ठवंशश्चतुर्व्विंशः सप्तविंशा तथा कटी ॥
इति स्कन्धं तथा निम्नं प्रतिपुच्छं द्वयाधिकम्।
लिङ्गं हस्तप्रमाणन्तु तथाण्डौ चतुरङ्गुलौ ॥
मध्यस्थानं चतुर्व्विंशं हृदयं षोड़शात्मकम्।
कटिकुक्ष्यन्तरं प्रोक्तं चत्वारिंशत् प्रमाणतः ॥
मणिबन्धद्वयञ्चैव खुराश्च चतुरङ्गुलाः।
अशीत्यङ्गुलिकाः पादा दीर्घा विंशाधिका मताः ॥"
इत्यङ्गुलिविभागः ॥ * ॥

अथ वयोविभागः।

"दन्तेषु यज्ञनं यद्वत्तेन ज्ञेयो वयःक्रमः ॥"
तद्यथा,—
"कालिका हरिणी शुक्ला काचा मक्षिकया सह ॥
शङ्को मुषलकश्चैव दन्तानां चलता तथा।
इत्यष्टौ यज्ञनान्याहुरश्वेषां लक्षणं शृणु ॥
चतुर्भिर्व्वत्सरैर्दन्ताश्चत्वारः परिकीर्त्तिताः।
पञ्चभिश्च षड़ित्येवं जायन्ते तत्र कालिकाः ॥
षष्ठे संवत्सरे प्राप्ते कालिकान्या भवेत्तु हि।
तथान्या सप्तमे वर्षे चतुर्थी कालिका भवेत् ॥
अष्टमे वत्सरे प्राप्ते जायन्ते सर्व्वकालिकाः।

नवमे त्वथ ताः सर्व्वा आपीताः सम्भवन्ति च ॥
केचिद्देकादशे वर्षे यावत् पीतत्वमागताः ।
ततः श्वेताः प्रजायन्ते चतुर्द्दशसमावधि ॥
ततः काचप्रभाः सम्यक् यावत् संवत्सराष्टकम् ।
ततः समदशाद्दूर्द्ध्वं यावद्वर्षाणि विंशतिः ॥
मक्षिकाभा वदन्त्येषां यावद्वर्षत्रयं पुनः ।
शङ्खाभासाः सर्व्वदन्ता भवन्ति वाजिनां ततः ॥
त्रयोविंशात् परे वर्षे दशना सचलाः मताः ।
षड्विंशात् परतो दन्ताः स्थानात् चलनमाप्नुयुः ॥
यावद्वर्षत्रयं पश्चान्निपतन्ति समान्वये ।
द्वात्रिंशद्वत्सरे वाजी मूनं निर्व्वाणमाप्नुयात् ॥”

अथ शुभलक्षणानि ।

“दीर्घाः शुभ्रा निरामाश्च ये भवन्ति तुरङ्गमाः ।
ते प्रशस्ताः पार्थिवेन्द्रस्य यानवाहनकर्म्मणि ॥
आस्यं भुजौ चापि ककाटिका च
दीर्घं चतुष्कं तुरगस्य शस्तम् ।
तथोन्नते घ्राणपुटे ललाटे
कपश्च वाजिप्रवरस्य बोध्यः ॥
श्रोत्रे च मस्तकश्चैव पुच्छं कोष्ठं लघत्वमम् ।
पीताङ्गः श्वेतपादो यो यश्च स्यात् सितलोचनः ॥
चक्रवाकः स विज्ञेयो राजार्हः प्रियसत्तमः ।
सुरो चन्द्रकसङ्काशः पञ्चसूचमालतिः ॥
श्वेतपादः स विज्ञेयो मल्लिकाक्षः शुभुनिनः ।
सर्व्वाङ्गैर्नीलो हयो यस्तु श्यामैकश्रवणो भवेत् ।
स वाजी वाजिमेधार्हः श्यामकर्णः सुदुर्लभः ॥
यस्य पादाः सिताः सर्व्वे पुच्छो मुखो सुरं तथा ।
गण्डदेशस्तु सिता यस्य तमिन्द्रादष्टमङ्गलम् ॥
यस्य पादाः सिताः सर्व्वे चन्द्रकश्च ललाटके ।
कल्याणपञ्चकः प्रोक्तो भर्त्तुः कल्याणकारकः ॥
शिखिपक्षकण्ठाः सर्व्वे प्रशस्ता वाजिनो मताः ।
वर्णोत्कटमाशी वर्णां दर्शं यान्ति शुभैः शुभैः ॥
दारयन्ति तदा शोभां करोति स बहून् हयान् ॥”

अथावर्त्तशुभाः ।

“रोमेषु ये भ्रमिविराजितशंस्वं दृति शतशे ।
षड्विंशो दक्षिणे वामो दक्षिणस्तु शुभावहः ॥
नासिकाग्रे ललाटाग्रे शङ्खे कण्ठे च मस्तके ।
आवर्त्तो जायते येषां ते धन्यास्तु तुरङ्गमाः ॥
ललाटे यस्य चावर्त्तौ द्वितीयस्तु कुकुन्दरे ।
कण्ठे च तृतीयस्तु स विज्ञेयो हयोत्तमः ॥
[illegible] भवेद् यस्य सर्व्वतो दक्षिणाश्रयः ।
[illegible] महाशौर्य्य वाजिनः श्रियमीहितः ।
[illegible] यदावर्त्तः स्कन्धश्चे तथापरः ।
[illegible] सौ तु उद्धावै चक्रवर्त्ती ॥
[illegible] स भवेत् सुरवारकः ।
[illegible] दश्नो वा दर्षे वा यत्र ॥
[illegible] वाजी भुजाग्रभूषितः ।
[illegible] [illegible] शुभ ॥
[illegible] [illegible] ।
[illegible] [illegible] ॥”

[illegible]

[illegible]
[illegible] ॥

चत्वारो यस्य वै पादाः मस्सरत्रिवर्णकाः ।
स त्याज्यो शबली नाम्ना मुनिभिः कुलनाशनः ॥
दुर्लक्षणवाजिनं त्यक्त्वा यदीच्छेः शाश्वतीं श्रियम् ।
यस्तु वर्णविभेदेन जायते रोमसम्भवात् ॥
पुष्पाख्यः स परित्याज्यः सर्व्ववाजिभयावहः ।
यस्यावर्त्तपक्षेण छाद्यते च प्रधानतः ॥
त्रिशृङ्गं गच्छतः सोऽश्वः कुरुते क्षयसंचयम् ।
इति स्कन्धे गले चैव कटिदेशे तथैव च ॥
नाभौ कुक्षौ च पार्श्वे च मध्यमः स प्रकीर्त्तितः ।
एको वामकपोलस्थो यस्यावर्त्तः प्रदृश्यते ॥
पश्चात्तु स हयस्त्याज्यः कुरुते स्वामिनाशनम् ।
वामगण्डाश्रयावर्त्तः प्रकरोति धनक्षयम् ॥
कच्चान्ते यस्य चावर्त्तः स मृत्युं कुरुते विभोः ।
श्रोत्रं जानुगतावर्त्तः प्रवासं कुरुतेऽथवा ॥
वाजी मेढ्रगतावर्त्तो वर्ज्जनीयो महीभुजा ।
त्रिकत्रिशभावर्त्तस्त्रिवर्गस्य प्रणाशकः ॥
पृष्ठवंशे यदावर्त्त एकः संपरिलक्ष्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥
गुह्ये पुच्छे च वलौ यस्य भवन्त्यावर्त्तकास्त्रयः ।
स कृतान्तस्तु रूपेण वर्ज्जनीयस्तुरङ्गमः ॥
अधोऽपि यदा वाजी सम्पुटं न स्पृशेत् क्वचित् ।
यमदूतः स विज्ञेयो वर्ज्जनीयस्तुरङ्गमः ।
हीनदन्तोऽधिकश्चैव कराली कृष्णतालुकः ।
शृङ्गी च तथा शृङ्गी वर्त्तते घातकाः स्मृताः ॥
तथादौ विदिताख्यौ तु ग्रीवायां लक्षणं स्मृतम् ।
त्रयः पादाः सिता यस्य कृष्णश्चैकोऽभिजायते ॥
त्रयो वाप्यसिता यस्य एकः शुक्लोऽभिजायते ।
शबलो नाम पापोऽयं दूरे त्याज्यो हयाधमः ॥
विकटो विषमो यस्य दशनः स करालकः ।
कराली कुरुते नाशं भर्त्तुरत्र न संशयः ॥
कृष्णतालुहयो नाशं कुरुते नात्र संशयः ।
त्रिवर्णो भवेद्यस्तु कृष्णतालुनं दुष्यते ॥
कर्णान्ते चूलिकाश्चे च शृङ्गवल्लक्ष्यते यदि ।
स शृङ्गी कुरुते नाशं राष्ट्रस्य च कुलस्य च ॥
एकाण्डोऽजातकाण्डश्च हीनाण्डोऽप्यधिकाण्डकः ।
षण्ढी च कपली चैव वर्त्तते पापकृत्समाः ॥”

अथारिष्टम् ।

“सुमत्स्यापि च नेत्रान्ते स्यातां भीते च वाजिनः ।
तथैव तस्य जानीयाद्दिग्भङ्गुडं वाधिकौ ॥
शोभनौ च नेत्रान्ते त्रिभिर्मासैर्वपुःक्षयः ।
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते ॥
विंशाद्दूर्ध्वं वाजिनो ज्ञेयं तस्यायुः पञ्चमासिकम् ।
त्रिष्टादौ जायते त्रिस्तुरकस्माद्यदि वाजिनः ॥
मासैकं जीवितं तत्र दोषे मासद्वयमथवा ।
रक्ते वृन्दे त्वभिमासैश्चतुर्भिश्च त्रिचिन्तकैः ॥
पञ्चभिनावर्त्तौ च षड्भिर्मासैर्मृताः ।
मर्त्त्यः प्रदुष्टाकारं स्वनकाभे तथाष्टभिः ॥
वर्त्तिभश्च दृष्टिनाभे रत्नभिर्भवेदमे ।
दशानदै द्रव्यं भवेद्वत्सरं हिमवद्गौ ॥
दश मासे भवेद्रूपः शरीरं पुष्कावृत्तिम् ।
[illegible] मणिनाकारा मण्डलकं न जीवति ॥
[illegible] [illegible] यत्र मारार्त्ते च तथोदरे ।

मूत्रं करोति रक्ताभा मासषट्कं म
कर्णयोः चालनं यस्य नेत्राभ्यां वा प
वाजिनः पिशाचस्तस्य दशमासा
यस्य नेत्रे हरिताभे यस्य वागा
तस्यायुः सप्तमासीयं बहुवर्णे ता
यस्यैकं लोचनं पीतं द्वितीयं रक्त
पुटान्ते च स विज्ञेयः पीताभे मा
एतानि अरिष्टानि रक्तदोषजानि ।
“स्फुलिङ्गा यस्य दृश्यन्ते पुच्छतोऽथव
निर्गच्छन्तः प्रभोर्नाशं ते वदन्ति वि
अन्यशालां समासाद्य यदा च मधुमा
मधुजालं प्रवभन्ति तदाश्वान् प्रति ह

अथ हयक्रियाकालः ।

“सजलयगुरुपाश्वांश्रिवृ भौमार्कवारे
स्थितिपिकरयतारापन्द्रयोगोदयेषु ।
शुभमिह हयकार्य्यं कार्य्यमार्य्येण शुभा
न शनिरविकुजानां वासरे गोपतारे ।”

इति कालः ॥ ॥

अथ हयारोहणशास्त्रम् ।

“चलकिसलयपादः कर्णमध्यैकदृष्टि-
र्नैचलति कटिदेशः स्वासने संस्थितो यः ।
हयहृदयगतिज्ञः स्थानरक्षाविधाता
स खलु तुरगयाता पूज्यते पार्थिवेन्द्रैः ।
मेरुः स्थिरौ यस्य चलौ च पादौ
त्रिकोन्नतं संहतमासनञ्च ।
स वाजिवाहः प्रथितः पृथिव्यां
शेषा नरा भारकरा हयानाम्

तत्र ताड़नविधिः ।

“रक्तकोष्ठे सुरे चौष्ठे गले पुच्छे च ता
भीते वक्षःस्थलं हन्याद्धन्यात् चोत्मार्गगामि
कुपिते पुच्छसंस्थानं भ्रान्ते जानुद्वयं तद
सर्व्वस्थानप्रहरणस्य दण्डमेकं निपातयेत् ।
अस्थानदण्डपाताच्च बहुदोषः प्रजायते ।
तस्मान्निरीक्ष्य कर्त्तव्यं हये दण्डनिपातनम् ।”

अथ धावनविधिः ।

“दशैश्चतुर्विंशतिभिर्द्दुदैश्च उदाहृताः ।
अष्टाभिर्नियमान्यष्टौ मात्रा प्रोक्ता विचक्ष
मात्राषोडशकेनाश्वो यो धावति धनुःशत
तदुत्तमोत्तमं विद्याद्वाजिनं महाजवम् ।
विंशत्या मध्यमो ज्ञेयो दशोऽन्यो वाच्यः
नभस्याश्वयुजे मासि नैवाश्वान् धा
वसन्तसदृशं पित्तं कमात् कुप्यति
कार्य्येण महता चापि योज्यो मासि तु
हेमन्ते शिशिरे योगो वसन्ते च यत्न
काल इदं कथं वर्मं दत्तमेह हृद्भिः
पूर्णातिरिक्तदोषश्च गुल्मिकाख्य न गाहे

अथ रक्तमोक्षणविधिः ।

“द्वासप्तिसहस्राणि नाडीनां सम्भ
वाजिनामिह मर्म्मणामा[illegible] रक्त [illegible]
मासे निर्मोक्षणार्थाय द्वाद[illegible]
दैवानि कुर्व्वन्ति रक्तं समदेहसमुद्
कण्ठे कण्ठे [illegible]

घोटकः

घोटकः

...त्वयोश्च पार्श्वे च पार्श्वयोश्चयोरपि ॥
...हृतं शुचिर्ज्ञेयं वाजिनां शिरसृणमी: ।
...न्मे मनस्याग्नाद; गिराद्वाराणि वाजिन: ॥
...च रक्तं पूर्णं मन्त: प्रवर्त्तति तत: शुभम् ।
...त्वि मणि तथा मेढ़ू चक्राम्ने चैव प्रचक्षे ।
...दि पुस्तिच चर्म्णि च भ्रुवयो: सर्व्वगन्धिषु ।
...कषायां चाधरे चौष्टे गत्रयोरभयोरपि ॥
...र्म्मणि मर्म्मि मस्ते रुधिरं सावयेद्भिषक् ।
...शुनत्नागदलेन त्याज्यं रक्तं तुरङ्गप्रमाणम् ॥"
...दूयथा,—
"मर्गं शलं शुने त्याज्यं वाहयोर्धैवमेव च ।
...लाटे नेत्रदेशाच मेढ्रदेशात्तथैव च ॥
...गाह्रयोरूत्वयोश्चैव सावयेत् पञ्चविंशतिम् ।
...तादृश्यैव गुदं प्राहुरश्वशास्त्रविचक्षणा: ॥
...रैभिवं कालिकं विद्याद्राते विद्यात् कर्फेनिगम् ।
...मिथिन्नं श्लेष्मणं प्राहु: कषायोदकमथ यत् ॥"*

अथ ऋतुचर्य्या ।

"न प्राज्ञो वाहयेदश्वान् प्रावृट्काले कथञ्चन ।
यदीच्छेद्गतन्तस्य वाहनं दशमासिकम् ॥
कूपोदकं कटुकतैलनिपानगेहं
शस्तं पलार्द्धलवणं दिवसान्तरेण ।
तच्चान्यथा भवति शुक्रामयवीर्य्यहानि-
संश्लेषमैर्व्विरहितस्तु पयो विनश्येत् ॥
शरदि गुडूच्यं पय: प्रशस्तं
शरदि सिताष्टपलप्रमाणमच्छम् ।
मधुरमथ जलं सरोवरोत्थं
घृतयुतगोरसकुष्ठकाश्च भोज्या: ॥
हेमन्तकाले घृततैलमाषा
निर्व्वातगम्या च पयो यथेच्छम् ।
शनै: शनैर्व्वाहनकर्म कुर्य्याद्-
यवांश्च पक्वा वितरेद् विधिज्ञ: ॥
शिशिरे तैलपलाष्टकं कटिस्थं
दिनसप्तावधि पाययेत्तुरङ्गान् ।
तदनु प्रातर्भोजयेद्यवांश्च
यवयवमाश्च तथाऽप्यतस्तरूप्या: ॥
यस्य दत्ता यवा भोज्ये शिशिरे समुपस्थिते ।
अकृत्वापि क्रिया: सर्व्वा: स हय: सुखमृच्छति ॥
वसन्ते संप्राप्ते निजगुणवशाद्वाहय हयान्
घृतं तैलं भक्तं सकलविधिरुक्तोऽपि च मत: ।
पयो दद्यादस्मै सलवणमथो वाहनविधि-
र्भृशं योग्यस्तेनाप्यमपि सुखमिच्छेद्धयवर: ॥
वसन्तसमये योऽश्व: स्थाने तिष्ठति बन्धने ।
तस्योत्तमाङ्ग: प्रशमेत सालस्यं जायते वपु: ॥
ग्रीष्मे घृतं चतलमोदनगर्म्मशान्ति-
सुच्छायबन्धनविमर्द्दनशीततोयम् ।
दूर्व्वा तृणं लघु च कोमलमन्यदेव
यत्किञ्चिदेवसुमयुक्तमिदं वदन्ति ॥"* ॥
भोजे तु हयलक्षणमन्यथा,—
स्निग्धाङ्गो लघुतरलोमकस्तु पुच्छो
दीर्घास्याक्षिनयनकेशपृष्ठवंश: ।
रक्तोष्ठ: पृथुलनितम्बभारवक्षा
राजार्हो भवति तुरङ्गम: प्रशस्त: ॥

...गात्राग्रश्च हैमस्तु द्विधा पूर्व्वापरक्रमात् ।
पूर्व्वरायस्थिता रक्ता: शुभाय हयसंस्थिता: ॥
अध:काये स्थिता रक्ता अधमत्वप्रकाशका: ।
शुक्लीनां वैपरीत्येन प्रमाणफलमादिशेत् ॥"* ॥
चान्यत्तु ।
"ब्रह्मादिजातिभेदेन हयजातिश्चतुर्व्विधा ।"
तद्यथा,—
"ये शुक्ला: सुविमलपुष्पगन्धा ये वा
शुद्धात्मा: सहगमदुग्धभोजिनो वा ।
अक्रुद्धा: समरगता भृशञ्च पुष्टा-
स्ते विप्रा: क्षितिपतिवाहनेऽतियोग्या: ॥
ये रक्ता: सदगुरुगन्धयोऽपि वा
संरब्धा: बहुतरभोजिनो बलाढ्या: ।
अव्याप्ता: सकलगुणाढ्या: प्रवीणा
विज्ञेया विधिकरघातजातयस्ते ॥
ये पीता: खलु घृतगन्धयोऽपि ये वा
येऽक्रुद्धा: कथमपि रोषशालिनो ये ।
बद्धा वा बहुतरगाढघोषणा वा
विज्ञेया नृपवर ! वैश्यजातयस्ते ॥
ये कृष्णा: सरधामगन्धयोऽपि ये वा
अन्यथा बहुतरताड़नैरपीमे ।
क्षीणाङ्गा लघुतनवोऽपि येऽशहीना-
स्ते शूद्रा: क्षितिपतिना भृशं विधेया: ॥"
एतत्तु एकैकमेव लक्षणं न साम्प्रदायिकम् ॥
"लक्षणद्वयसम्बन्धात् द्विजाति: स्यात्तुरङ्गम: ।
चतुर्लक्षणयुक्तस्तु दूरे त्याज्यो हयाधम: ॥"* ॥
अन्यच्च तु ।
"सात्त्विका राजसाश्चेति तामसाश्चेति ते
हया: ॥
ये शुद्धवर्णा भृशवेगयुक्ता
अश्रान्तिभाजो बहुभोगिनश्च ।
अक्रोधशीला: समरेऽतिरुष्टा-
स्ते सात्त्विका भूप ! तुरङ्गमा: स्यु: ॥
ये रक्तवर्णा गुरुवेगरोषा:
कशाभिघातं न हि ये सहन्ते ।
येऽभी बलाढ्या: खलु दीर्घदेहा-
स्ते राजसा भूप ! तुरङ्गमा: स्यु: ॥
ये कृष्णवर्णास्तनुरोषवेगा
अल्पाशिनो लक्षणलक्षिताश्च ।
ये दुर्ब्बला: सर्व्वगुणैर्व्विहीना-
स्ते तामसा भूप ! तुरङ्गमाधमा: ॥
द्वयोर्लक्षणसम्बन्धात् द्विगुणो वाजिमध्यम: ।
त्रयाणां गुणसम्बन्धात् त्रिगुणो वाजिनिन्दित: ॥"
पराशरसंहितायान्तु ।
"पृथिव्यब्वायुतेज:खै: पञ्चभिस्तुरगाश्रितै: ।
उल्लखे: पञ्चधा भेदा: परशरमता यथा ॥
ये स्थूला: अमसहदेहरूपभाज-
श्चाक्रान्ता बहुतरभोजनाश्च दीर्घा: ।
अक्रुद्धा: समरगतास्तु रोषभाजो
भौमास्ते घनगुरुवर्धरन्वरास्तु ॥
ये शयाङ्गास्तनुबला: श्रमाक्रान्तकलेवरा: ।
अक्रोधवेगा: सखना आप्यास्ते तुरगाधमा: ॥

ये तालदेशप्रतिलोमदेशा:
शुष्का भृशं दीर्घकलेवराश्च ।
अश्रान्तिभाजो बहुदूरगाश्च
ते वायवा वाजिवरा: प्रदिष्टा: ॥
ये क्रोधशीला भृशवेगयुक्ता
मत्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तैजसा: पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥
एको यदा तैजसगर्व्वकोऽश्व:
किं कार्य्यमन्यैस्तुरगाधमैस्तु ।
युद्धं यदा हीरकसङ्गमेकं
किं कार्य्यमन्यैर्मणिभिर्व्विचित्रै: ॥
उत्प्लुत्य ये वाजिवरा व्रजन्ति
क्षुधा भृशं वेगसमन्विताश्च ।
ये लङ्घयन्त: परिखामपारां
ते गागना पुण्यतमा: प्रदिष्टा: ॥
द्वयोर्लक्षणसम्बन्धात्तुरग: स्यात् द्विभौतिक: ।
स्वजातिगुणभूतानां हयानां वाहनं शुभम् ॥
शालिहोत्रादिविज्ञानात्तद्विज्ञेयं यथोत्तरम् ।
असमये हि दुष्टाश्वं वाहयेदिति चेत्तदा ॥
तिलं सकाञ्चनं दद्यात्सवर्णं वा गुड़ान्वितम् ।
रेवन्तं पूजयेद्वापि निजं निर्मन्थयेत्तदा ॥
दद्याताम्रपलं वापि अभावे सर्व्वकर्म्मसु ॥"
एवमन्यत्रापि ।
"काञ्चनं रजतं ताम्रं लौहमेतद्यथाक्रमम् ।
जन्मादिशातिदोषाणां देयमेतत् प्रशान्तये ॥
अभावेऽपि च सर्व्वेषां ताम्रेण स्यात् प्रति-
क्रिया ।"

इति हयपरीक्षा ॥ * ॥

इति भोजराजकृतयुक्तिकल्पतरु: ॥

("येन भागवता हिमालयतरुच्छायासु
विक्रीड़ितम्
य: स्नातो हिमपुण्यवातशिशिरे गङ्गाजले पावने ।
रेमे यस्तु तुरङ्गयूथजनितैर्नानाविधैर्हेषितै:
पायाद्व: स तुरङ्गघोषतनय: श्रीशालिहोत्रो
मुनि: ॥
जयति च पाण्डवनाथो धर्म्मसनाथो युधिष्ठिरो
नृपति: ।
भीमार्ज्जुनसहदेवास्तदनु च ये वाजिशास्त्रतत्त्वज्ञा: ॥
दृष्ट्वा सम्यङ्नकुल: शास्त्रं कृतस्नं च शालि-
होत्रीयम् ।
ब्रूते शास्त्रार्थमल्पच्छास्त्रं कृत्वा समासेन ॥
प्रश्नो जातिवर्णमावर्त्तदन्ता
लक्ष्मं वेगा वाहनं धातुरसम् ।
कालो नस्यं पिण्डमाज्यं कषायं
शालां चेष्टां वाजिनामत्र वक्ष्ये ॥
सपक्षा वाजिन: सर्व्वे सञ्जाता व्योमचारिण: ।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्तत: ॥
तान् दृष्ट्वा नवसम्पन्नागसन्तान्वाहनोचितान् ।
शक्र: प्रोवाच पार्श्वस्थं शालिहोत्रं मुनीश्वरम् ॥
नाम्यसाध्यं मुने ! किञ्चिद्भवतो भुवनत्रये ।
तस्मादाशु कुरुष्व त्वं वाहनार्थान् हयोत्तमान् ॥

धन्यास्ते जयराज्यविलाससदाः संवाहका भूपतेः ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वैगवर्णनो-नाम सप्तमोऽध्यायः ॥

अथ आरोहणम् ।

अथातः संप्रवक्ष्यामि ह्यारोहणमुत्तमम् ।
येन विज्ञानमात्रेण रेवन्तेनोपमीयते ॥
चर्म्मकिसलयपादः कर्णमध्यैकदृष्टिः
न चलति कटिदेशे ह्यासने संस्थितश्च ।
हयहृदयगतिज्ञः स्थानरक्षावपाती
स खलु तुरगयोक्ता मान्यते पार्थिवेन्द्रैः ॥
यो नित्यं दृढमुष्टिहस्तलघुकः क्रोधानलैर्वर्ज्जितः
सद्वेकस्थिरबुद्धिमध्यमतनुः प्राज्ञस्तत्त्वज्ञकः ।
काले दण्डनिपातविभ्रमयुतः ताम्बूलवक्त्रान्वितः
सोऽयं लक्षणसंयुतो हयवहो राज्याधिपैः पूज्यते ॥
ऊरू स्थिरौ यस्य चलौ च पादौ
शिरोगतं संकलनामनश्च ।
स वाजिवाहः कथितः पृथिव्यां
श्रेष्ठः वरो भारवहो हयानाम् ॥
प्राज्ञः पञ्चवर्णांगुणाढ्यो दक्षः सर्व्वाङ्गसौष्ठवः ।
जितक्रोधोऽतिलोभश्च जितात्मा जितासनः ॥
हयज्ञानसमायुक्तः कामाध्ययोगवित् ।
शास्त्रोपचारमार्गज्ञो दयक्रोडाय दीपितः ॥
वाजिनां हृदयज्ञश्च स्थाने दण्डनिपातवित् ।
दुःखसहश्च दक्षः सर्व्वकर्म्मसहः शुचिः ॥
धावितवायगमनीये प्रत्यक्षावलोकने ।
विनु मेढ़ः प्रवेशे च निर्गमे कुशलोऽश्ववित् ॥
रोगं विकृतिं यस्य हन्ता वाधाविचारवित् ।
धनुःकुन्तासिखड्गविद् योऽश्ववाहः प्रकीर्त्तितः ॥
यत्र लक्ष्ये तुरौ कोटे आवि सकृद् च ताड़येत् ।
उत्थायां यदि स्रोतोऽश्वो मदः ठलति हृतेः ॥
कुचिते कृष्णसंस्थाने आस्ते चाडयं तथा ।
सर्व्वथा प्राप्तलक्ष्य दण्डमेकं निपातयेत् ॥
हृषेति स्कन्धसंहिते वालिनि ऽथकान्तरम् ।
भीते वक्षःस्थले ह्याहतवांश्चर्मगामिनम् ॥
कस्मादेवाङ्गिनो वाजी वकुन् दोषान् प्रदर्शयेत् ।
नाशयन्ति ते दोषा यावज्जीवत्यसौ हयः ॥
दण्डेनाभिमर्दनादामारोहिण्डकर्म्मिणाम् ।
दण्डो हि वाजनं नाम परं दक्षान प्रचारयेत् ।
दुष्टाश्चोत्ता वश्या वाहया ताडितव्या ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

नित्यमुद्धतदण्डस्य तस्य वाजी न धावति ।
धारा तु पञ्चमी प्रोक्ता न शृणोति न पश्यति ।
सर्व्वकर्म्मक्षमो वाजी समारोहं परिवर्जयेत् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते आरोहणं नाम अष्टमोऽध्यायः ॥

अथ ऋतुचर्य्या ।

कर्म्मचर्य्यासु नित्यानां शुद्धानां सुनिवर्त्तितम् ।
धनुरष्टाशयी योग्यं वाजिनां मण्डलं क्रमात् ॥
संख्योपचेष्टयं तावद् यावत् कार्म्मुकपञ्चकम् ।
तदूर्द्ध्वं मण्डलैर्योग्यो गोमूत्रान्तरम् ॥
चतुर्दशताष्टका च गोमूत्रा सर्व्वकर्म्मसु ।
युज्यमानानि दृश्यन्ते प्रायशो हि विचक्षणैः ॥
शालिहोत्रमुनिप्रोक्ता चर्य्या योडश वाजिनाम् ।
तासामनुपयोगित्वान्न कृतः संग्रहो मया ॥
तीक्ष्णवैकैन सहितो द्वाभ्यां भद्रस्तु धावति ।
त्रिभिर्द्दर्शसहा मन्दः क्रमात् यथाभिनाङ्गतः ॥
तीक्ष्णाश्वभद्रमन्दानां प्रधानो जव उच्यते ।
सोऽप्यनेनैव मार्गेण संविभज्यो विजानता ॥
अवाहिता विनश्यन्ति सर्व्वकर्म्मक्षमा हयाः ।
तथा व्याधिपरीताङ्गा आयासेऽत्यन्तवाहनात् ॥
वर्णं काली वयो भूमिः कालः सम्मतः क्रमात् ।
कुर्य्यादेकान्तरे योगश्चातियोगी हि दोषवान् ॥
तत्र लोकप्रसिद्धं हि बोद्धव्यं यत्नतो बुधैः ।
हयवाहनवैज्ञानी नरेन्द्रैः पूज्यते सदा ॥
धाविते ये गुणाः सर्व्वे स्वयमायातिशेष तान् ।
शालिहोत्रादिशास्त्राणां व्यायामफलसम्भवान् ॥
स्थिरमांसो भारसहो लघुगात्रः पराक्रमी ।
दीप्ताग्निश्च सुशीलश्च व्यायामेनोपजायते ॥
सवार्यो विनयी प्रीतो निर्द्दोषस्तापवर्जितः ।
वैद्यवित्सारदिभिश्च उक्तो धावति तिष्ठति ॥
सुभावर्त्तगतिच्छायावलशीलसमन्वितम् ।
सत्त्वरूपसरोनुकच्छसारपुरुषविभूषितम् ॥
एवं विधं समारुह्य दैवतार्थं हयं नृपः ।
जित्वा रिपुकुलं भुंक्ते निःशङ्कोऽथ वसुन्धराम् ॥
जवः श्रेष्ठस्तु रङ्गानामुत्तमाधममध्यमः ।
त्रिविधोऽपि तथा भिन्नो जवभेदः स उच्यते ॥
यतोऽरेरष्टकोऽङ्गुलं परिकीर्त्तितम् ।
दृश्यते नैकतुषिं च कार्म्मुकं तैश्चतुर्गुणैः ॥
सकलोनिमेषो काष्ठा अष्टमङ्गल तथा ।
मात्रा ह्येया प्रमाणेन पूर्व्वप्रोक्ता तपोधनैः ॥
मात्राशोडशकेनाश्वो यो धावति धनु शतम् ।
तमश्वमुत्तमं विद्यादायुर्वन्तं महाजवम् ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

एकान्ते विजने चैव रङ्गभूमिं हयं नयेत् ।
मान्त्रावैव सुकर्टिनां मायाणोदकगर्भिकम् ।
हयकाष्ठसमायुक्तां रङ्गभूमिं विवर्जयेत् ।
विगूढं कारयेदश्वं क्रोशक्रोशहयान्तरे ।
वारि दद्यात् यथाकामं यासं सुदिश वारि
अन्यथा दोषजातानि वक्ष्याम्येतानि तान् ।
गुरुविसर्ज्जनाच्च छिन्नदाढी च जन्ते ।
दुर्म्मेधा ऋद्धविग्रहः सर्व्वकर्म्मक्षमो हयः ।
गुल्मेट्रोमतयीवो रक्तमेहो गुरुश्रमः ।
मुखाङ्गसुष्कास्यकार्य प्राप्य विनिश्चि
तजैनै हन्यमानोऽपि विधुनोति शिरः सदा ।
सतुर्विनमते पृष्ठं पदमेकं न गच्छति ।
भाराध्वानपरिश्रान्तं शनैः संक्रामयेत्
नावतारितपर्य्याणं मार्गेऽध्वानम
सुतपुच्छायवनस्य खलीनं नावन
मर्द्दयित्वास्य गात्राणि पांशुमध्ये
स्नानपानावगाहश्च प्रतिपानं सभी
सर्व्वं क्रमेण कर्त्तव्यमन्यथा दोषसम्भ
रक्तपित्तसमीरोत्थमन्यास्तत्थोदराश्
चुदोषा वातशूलानि शीतोष्णोदकमा
रक्तपित्तहरं देयं प्रतिमानं गुड़ौदनम्
रक्तपित्तसमीरोत्थं दातव्यं शर्करोदकम्
जीवनं वातपित्तघ्नं हृद्यं वल्मनं ततः ।
सर्व्वरोगहरोऽश्वानां मधु माङ्गलको रसः
सच्छाकञ्च घृतं क्षीरं वारियुक्तं तुरङ्गः
पीत्वा हि निर्हरेद्दोषान् श्रमभाराध्वसम्भ
धर्म्मार्थकामा विजयो यशःश्री-
शोभासुखं ज्ञातिजनैश्च पूज्या ।
इमे निमित्तानि शुभावहानि
हयस्य चैव विनिवेदयन्ति ।
प्रकृयकाले च दिनं विरोच
वह्निं द्विजं पूर्णघटं कुमारीं
छत्रं ध्वजं चामरदर्पणञ्च
दृष्ट्वा तुरगं जयाय ॥
श्रुत्वा तु शङ्खमुरदेववाद्यं
पुण्याहमाङ्गल्यमिदस्य गीतम् ।
इयं निमित्तं भवति सन्नेन
ध्रुवं जयं नव इमे नराणाम् ॥
सम्यक् प्रयाणेन मही निहन्ति
ईयन्ति ये स्वामिगुणं निरास्य ।
प्रदक्षिणावर्त्तगतांयुच्छा
जयावहास्ते समरे नृपाणाम्
विच्छन्नदानसरमहता ये
अश्रुभ्रमता भिन्नपुरोपकान्ता ।
अवस्यमाना दिनशर्व्वरीभ्यां
पराजयं न कदर्य नृपै ।
[illegible]
[illegible]
[illegible]
पराभवं न कदयन्ति भर्त्तुः ।
विना निमित्तं रुदन्त्यश्रुभिः
[illegible]

धावन्ति पार्श्वे न चोद्दिते-
अत्याचाराणि समर्थे कृपाणान् ॥
[illegible] शीर्ण अर्थे [illegible] चैकादिषु ।
[illegible] सं [illegible] समालम्बयन्ति ॥
[illegible] सुधार्दितचमत्कृतैः ।
[illegible] यादृशी तेषां सम्यगिदं मया ॥
[illegible] पिताः ।
[illegible] समुद्धिताम्बिताः ॥
[illegible] प्रतुकार्याधिकारिताः ।
[illegible] ये भुषुण्डीचित्रभेदकाः ॥
दोषान्यपाश्वेऽपि युद्धगान्यसमुद्धताः ।
[illegible] राजेन्द्र ! वक्तुं शक्या न तादृशाः ॥
[illegible] प्रधानविलेशि चान्ये गतागमान्विताः ।
[illegible] तेषां लिखितं दुष्करं चिरः ॥
[illegible] दोषाहतिर्यामिप विचारान् ।
[illegible] बलात् भूयासः स्थितिदुष्कराः ॥
[illegible] यानगतिः फुलम् ।
[illegible] दीर्घं या चयनाचनम् ॥
[illegible] लक्षणं मुक्तं दापयते मुररक्षये ।
[illegible] विद्वांसो ये निर्दोषाःस्युः प्रधाविताः ॥
परीक्षस्य का चिन्ता लक्षणैः शुभनिन्दितैः ।
[illegible] न कृतोऽस्माभिर्दैवलक्षणविस्तरः ॥
यथावदनविमानं कौतुकाहितसुहृदयः ।
नायाऽन्ये गच्छन्ति परं दृष्टा हरे जनाः ॥
[illegible] यथा राजाः पालिपालप्रनोदनम् ।
[illegible] दोषो येरुपजायते ॥
[illegible] कोपाद्वयाक्षोषादपांशेव मदान्वयात् ।
[illegible] दोषाद्य दुष्यन्ते ह्यश्वा निसर्गतः ॥

श्रीयुक्तसामन्तनरेन्द्रवन्दितं
रचे हयारोहवराभिनन्दितम् ।
धर्मार्थकामादियशःप्रधान-
मित्थं कृतं वाहनशास्त्रविस्तरम् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वाहनाध्यायो नवमः ॥

अथ धातुपरीक्षा ।

अथातः संप्रवक्ष्यामि धातूनां लक्षणं परम् ।
[illegible] विज्ञानमात्रेण ज्ञायन्ते रोगसम्भवाः ॥
[illegible] शुद्धशरीरोत्थरक्तदोषानवाप्नुयात् ।
रक्तदोषात्तदा वाजी प्राप्नोत्येव महामयान् ।
तस्मात् सर्वप्रयत्नेन रक्तं ज्ञेयं विचक्षणैः ।
आषाढ़समये प्राप्ते शिरामोक्षेण तत्क्षणः ॥
तेन संशोध्यते रक्तं वाजिनां दोषसम्भवम् ।
ततः शुद्धशरीरोऽथ पिण्डाद्येश्च बलीकृतः ॥
सावशेषं शष्पमासाद्य वज्रवत् सुदृढ़ो भवेत् ।
यदि रक्ताधिको वाजी शस्यमश्नाति कर्हिचित् ॥
रक्तात् सञ्जायते पित्तं ततो नाशमवाप्नुयात् ।
रक्ताधिकश्वासपुटः संघातैः शस्यमत्ति चेत् ॥
संप्राप्य शैशमरिचाद्यो नाशमवाप्नुयात् ।
हीनरक्तो यदा शस्यं रूक्षोऽश्नाति तुरङ्गमः ॥
तदा वायुं परं प्राप्य सद्यो नाशमवाप्नुयात् ।
तवेदं लक्षणं प्रोक्तं रक्तकोपसमुद्भवम् ॥
धातूनामपि सर्वेषां ज्ञेयश्चिह्नं विचक्षणैः ।
पित्तरक्तप्रकोपेण यदा संपीड्यते हयः ॥
तदा यत्निमागाद्व वपति सकलं वपुः ।
दाघं तात्कृति पतेन विशेषेण जलाश्रयम् ॥
स्रद्धांसक्ति पानीयमाचामस्य पिबेन्नरः ।
एवं वातोत्थरक्तेन ज्ञात्वाऽक्षीहितं ततः ॥
शिरामोक्षं विधायैव दद्यात् गजदुग्धं शुभम् ।
ततः शुद्धिमवाप्नोति नीरोगः संप्रपद्यते ॥
पित्तात्रणदूषितो वाजी यदि चात्यन्तं मुञ्चति ।
नेत्राभ्यां पादरुग्मश्च सद्यो मृत्युमवाप्नुयात् ॥
नेत्रयोर्लक्षणं प्रोक्तं पित्तरक्तसमुद्भवम् ।
श्लेष्मरक्तप्रकोपेण यदा सम्पीड्यते हयः ॥
नघोदरो भवेन्नित्यं काशते च मुहुर्मुहुः ।
आहारं न च गृह्णाति नातृमार्दं कुरुते क्वचित् ॥
न जिघ्रति कशाघातं न च पार्ष्णि न चासनम् ।
नासायेन शिरश्चोर्यं बहिर्धर्मोऽस्य धावति ॥
तस्यापि शोधयित्वाऽस्य दद्याच्छुण्ठ्या युतं गुडम् ।
सर्वं रक्तं ततः शुद्धा निःशेषं समवाप्नुयात् ॥
वाजिनः श्लेष्मरक्ताभ्यां दूषितस्य यदा भवेत् ।
नेत्रान्ते बिन्दुकाकारकचूर्णस्य तयोदरे ॥
तदा मृत्युमवाप्नोति पक्षाणाभ्यन्तरे ध्रुवम् ॥

शुण्ठ्याग्निना गोक्षुरकं घनश्च
श्यामावचापिप्पलुना च यदि ।
कफघ्नशाय विनिर्मितोऽयं
पिण्डः प्रशिष्टस्य कफामयघ्नः ॥

नोवेदश्नाति शुण्ठ्याढ्यं सैन्धवं नस्यमार्गतः ।
वायुरक्तप्रकोपेण पीड़ितस्तु तुरङ्गमः ॥
कुक्षिद्वये हयस्तीव्रं मुहुः श्वासं प्रमुञ्चति ।
नैकत्र मन्यते स्थातुं दृश्यते च निरर्गलम् ।
एवं वातोद्भवं ज्ञात्वा रक्तान्देहे हयस्य च ॥
शोधयित्वाथ मन्दत्वाग्निप्राप्तमनल्पकम् ।
ततः शुद्धिमवाप्नोति परां पुष्टिं च गच्छति ॥
उत्पादं कुरुते मार्गे सर्वदोषविवर्जितः ।
वातरक्तप्रकोपेण लोचनान्ते हयस्य च ॥
यदा स्यातां सिते रक्ते कामः कण्डूस्तथानने ।
तदा तस्य भवेन्मृत्युर्यदि नाश्नाति चामिषम् ॥
अपनयाय युतन्त्वा माहिषेण निशागमे ।
सन्निपातोऽथ रक्तेन यदा सम्पीड्यते हयः ॥
यदा वेपथुमाप्नोति काशते च निरर्गलम् ।
निद्रालस्याग्निमन्दत्वं वक्त्रे मलनिबन्धनम् ॥
कर्णयोः पातनश्चैव वक्त्राल्लालाविमोचनम् ।
तत्रापि शोधयेद्रक्तं ततो लङ्घनमर्हति ॥
यावद्दोषस्य निर्णाशं स्तोकोदककृताशनः ।
क्वचिदुष्णं क्वचिच्छीतं क्वचिद्द्वयसंयुतम् ॥
प्रदेयं युक्तितत्त्वज्ञैर्वारि वार्य्यं न कुत्रचित् ।
सपथ्या चान्दना चैव कटुका च वचा तथा ॥
शमयेत्तत्क्षणादेव त्रिधातुकुपितं ज्वरम् ।
शिरीषं श्रीफलश्चैव वेतसश्चैव हिङ्गुभागः ॥
मन्दाग्नित्वं सदोषाणां कुरुते भस्मसादृदलम् ।
मधुकं मधुजालञ्च माधुर्य्यं कुलिकान्वितम् ॥
शिरीषं स्नुहकं लाक्षां क्वाथयित्वा त्रिभागतः ।
यस्यैतत् सन्निपाताय वाजिनः संप्रदीयते ॥
तस्य तन्नाशमायाति तमः सूर्य्योदये यथा ।
[illegible] पि हि नेत्रान्ते स्यातां सोऽपि च वाजिनः ॥
तथैव महाशः शोध्या तदा मृत्युर्दिनात्रिकः ।
शोणे पीतेऽथ नेत्रान्ते स्यातां पित्तानिलः क्वचित् ।
स निर्णाशमवाप्नोति त्रिभिर्मासैरसंशयम् ॥
यस्य नेत्रान्तरे रेखा पञ्चवर्णा प्रजायते ।
त्रिदोषात् सद्भेदः स्यात्तस्यायुः पाञ्चमासिकम् ॥
त्रिप्रकारं जायते बिन्दुरक्तात् यस्य वाजिनः ।
कण्डूश्च जीवते मासं स वाजी नात्र संशयः ॥
पीतो मासद्वयेनैव मृत्युं प्रयच्छति ।
त्रिभिर्मासैस्तथा रक्तश्चतुर्भिश्च विचित्रितः ॥
पञ्चभिर्नीलवर्णश्च षड्भिर्श्च श्यामाकृतिः ।
सप्तभिः पाटलाकारश्चन्द्राभश्चाष्टभिः ॥
नवभिश्च हरिद्राभो दशभिर्नीलकोपमः ।
एकादशभिर्धूम्राभो वत्सरेण हिमद्युतिः ॥
यस्य श्यामो भवेद्वक्त्रः शरीरं पुलकाङ्कितम् ।
जिह्वा हिमकराकारा मासषट्कं स जीवति ॥
ग्रीवाग्रे पिण्डिका यस्य जायते च नखाधरे ।
गन्धं करोति रक्ताढ्यं मासषट्कं स जीवति ॥
वर्णः श्वेतो यदा यस्य नेत्रयोश्च प्रजायते ॥
दशमासान् समासाद्य पित्तार्त्तो न स जीवति ।
यस्य नीलप्रभे स्यातां नेत्रे वातार्दितस्य तु ।
मासत्रयञ्च कष्टेन यः सन्निः स न जीवति ॥
श्लेष्मयुक्तस्य वा रक्ते यदि स्यातां विलोचने ।
वक्त्रगन्धः सुरातुल्यो दश मासान् स जीवति ॥
यस्य नेत्रे हरिद्राभे स्यातां पित्तार्दितस्य च ।
तस्यायुः सप्तमासाख्यं मुनिभिः परिकीर्त्तितम् ॥
बहुवर्णे घने नेत्रे स्यातां धातुसमागमे ।
तस्य सप्तभिर्मृत्युः सप्तरात्रादसंशयम् ॥
यस्यैकं लोचनं नीलं द्वितीयं रक्तसन्निभम् ।
दृश्यते स च विज्ञेयः पित्ताढ्यो मासजीवकः ॥
यस्य पित्तप्रसक्तस्य काये नीरदवर्णिनि ।
हयस्य जीवितं तावद्दिनानि दश पञ्च च ॥
एवं रक्तविकारार्त्तं ज्ञात्वा धातुं तुरङ्गमे ।
ततः प्रतिक्रिया कार्य्या उक्ता या कीर्त्तिता परा ॥
भयादपीतपानीयश्रीगविश्रीयुतस्य च ।
च्यावर्षोऽपि ताड़ितोऽव्यर्थं तिर्य्यग्गिहो यदापि वा ॥
श्रमाङ्गराघबन्धाद्वा गात्रे वा विषमस्थिते ।
क्षीणशोणितमांसस्य शिरावेधः प्रशस्यते ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते धातुपरीक्षाध्यायो दशमः ॥

अथ ऋतुचर्य्या ।

द्वासप्ततिसहस्रं हि नाड़ीनां हि भवन्ति च ।
वाजिनामिह सर्वेषां वायुरक्तं यवम्बिनम् ॥
तासां निर्मोचनार्थाय द्वाराण्यष्टौ वदाम्यहम् ।
येयानि कुनुषितं रक्तं सर्वदेहसमुद्भवम् ॥
कण्ठे वक्षसि तालौ च नासयोश्च मुखे तथा ।
अक्ष्णयोरथ पादेषु पादयोः [illegible] पि ॥
कालं वक्षश्च विज्ञा[illegible] [illegible]त्तमः ।
शिरामोक्षं [illegible] [illegible]र्यक्षितः ॥
अन्ये सप्तदश [illegible] [illegible]पि वाजिनः ।
निकारयुक्तं [illegible] [illegible]पि वर्जयेत
एवं [illegible] [illegible]र्दं तर्पं [illegible]

मत्य यद्वाञ्छितं किञ्चिद्दयानार्थं तच्च सिध्यति ॥
ततो हेमन्तमासाद्य निवाते निबधेद्धयम् ।
मासोत्थं यवसन्द्रावान् पानीयञ्च यथेच्छया ॥
घृतं वा यदि वा तैलं पाने दद्याद्विचक्षणः ।
वाहयेच्च शनैर्नित्यं सर्व्वदोषप्रशान्तये ॥
ततः शिशिरमासाद्य दद्यात्तैलं हि वाजिनाम् ।
पञ्चाष्टकप्रमाणेन यावद्दिनत्रिसप्तकम् ॥
यवोत्थं यवसन्द्रावादेकविंशत्यहानि च ।
यवाभावेऽथ चणकान् दद्यादार्द्रेतरान् सदा ॥
तदभावे मसूरांश्च शुष्कार्द्रांस्तैलसंयुतान् ।
यवसं चापि सह्यं नीरोगो जायते हयः ॥
औषधानाञ्च सर्व्वेषां कायानां नस्यकर्म्मणाम् ।
तैलानाञ्च घृतानाञ्च यवस्य यवसं परम् ॥
पर्व्वतानां यथा मेरुरायुधानाञ्च वज्रकम् ।
तथा सर्व्वोपचाराणां मणिः कौस्तुभो यथा ॥
देवानां यथा विष्णुर्ब्रह्मा वेदविदां वरः ।
नदीनाञ्च यथा गङ्गा तथा श्रेष्ठा यवा हये ॥
यथोदितः सहस्रांशुर्निःशेषं तिमिरं जयेत् ।
तथा शरीरजान् दोषान् यवाः सर्व्वैर्हरन्ति च ॥
उपचारक्रियाः सर्व्वाः पञ्चर्त्तुजनिता हये ।
हताः स्युर्यवभोज्येन सविलस्य हता नरैः ॥
यदि दत्ता यवा भोज्ये शिशिरे समुपस्थिते ।
कृतापि हता सर्व्वा पञ्चर्त्तुजनिता हये ॥
हताः स्युर्यवभोज्येन सविलस्य हता नरैः ।
नीरोगास्तुरगाः सर्व्वे शालिहोत्रमतं यथा ॥
पञ्चर्त्तुजनिता याश्च क्रिया यस्ता तुरङ्गमे ।
कथिता विशाखीयाद्यवभोज्यविवर्जिताः ॥
"चक्रिं विश्वानि चक्रये ।"

"चक्रये पुरुषार्थकरणशीलाय ॥" इति दयानन्दकृतभाष्यम् ॥)

ाक्रिका, स्त्री, (चक्रं चक्रवद्गोलाकारो विद्यते अस्यास्या वा । चक्र + ठन् टाप् च ।) जानु । इति राजनिर्घण्टः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ३७६ ।

"अथोभयधनादायि भृत्यचक्रिकया समम् ॥")

ाक्री, [न्] पुं, (चक्रं सुदर्शनाख्यं मनस्तत्त्वात्मकमिति यावत् अस्यास्तीति । चक्र + इनिः ।) विष्णुः । (यथा, महाभारते । १३।१४९।११० ।

"वरोऽङ्गः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः ॥"

चक्रं ग्रामचक्रं ग्रामसमूह इत्यर्थः अधिकारित्वेनास्त्यस्य इति इनिः ।) ग्रामजालिकः । (चक्रं चक्राकारचिह्नविशेषोऽस्त्यस्य ।) चक्रवाकः । (चक्रं घटादिनिर्म्माणकरणयन्त्रविशेषः।

गोऽस्त्यस्य इति ।) कुलालः । (चक्रं फणा अस्त्यस्य इति ।) सर्पः । सूचकः । इति विश्वमेदिन्यौ ॥ घाजः । तैलिकभेदः । इति शब्दरत्नावली ॥ चक्रवर्त्ती । इति हेमचन्द्रः ॥ चक्रमर्द्दः । तिनिशः । वासनरः । काकः । खरः । इति राजनिर्घण्टः ॥ (कुलालतैलिकराजचक्रवर्त्त्यादर्थे प्रमाणं यथा आर्य्यासप्तशत्याम् । ५९२ ।

"स्नेहमयान् पीड़यतः किं चक्रेणापि तैलकारस्य ।

चालयति पार्थिवानपि यः स कुलालः परं चक्री ॥")

चक्रविशिष्टे त्रि ॥ (चक्रयुक्तरथादियानारूढः । यथाह मनुः । २ । १३८ ।

"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः ॥"

"चक्रिणः चक्रयुक्तरथादियानारूढस्य ॥"

इति तट्टीकायां कुल्लूकभट्टः ॥")

चक्रीवान्, [त्] पुं, स्त्री, ("आसन्दीवदष्ठीवच्चक्रीवदिति ।" ८।२।१२ । चक्रशब्दस्य चक्रीभावः ततो निपातनात् साधुरिति ।) गर्द्दभः । इत्यमरः ॥ राजविशेषः । इति सिद्धान्तकौमुदी ॥

चक्रुः, पुं, (करोतीति । कृ + "कृभ्रेश्च ।" उणां १ । २२ । इति कुः ।) कर्त्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

चक्रेश्वरी, स्त्री, (चक्राणां जिनविशेषाणां ईश्वरी अधिष्ठात्री ।) जिनानां विद्यादेवीविशेषः । इति हेमचन्द्रः ॥

चक्ष, ल ङ वदे । इति कविकल्पद्रुमः ॥ (अदां-आत्मं-सकं-सेट् ।) वदः कथनम् । (दर्शने च इति केचित् ।) ल ङ, आचष्टे धर्म्मं धीरः । तृतीयस्वरानुबन्ध इति प्राचः । इकार उच्चारणार्थ इति केचित् । छन्दसि नुमागमार्थ इति केचित् । पदेयूधारणार्थं इति केचित् । अत्र वस्तु तृतीयस्वरो भ्रमकारितः किन्तु चतुर्थस्वरानुबन्धोऽयं निष्ठाया इमुनिषेधार्थः तेन वर्ज्जनार्थे ख्यानकशाणादेशयोरप्राप्तौ आचष्टं वर्ज्जनमित्याहुः । इति दुर्गादासः ॥

चक्षणं, क्ली, (चक्ष्यते कथ्यते मद्यपानाय मद्यपानेन सह वा । चक्ष + ल्युट् । यद्वा, चक्ष्यते भक्ष्यते मद्यमनेनेति । चक्ष + ल्युट् निपातनात् कान्तागमश्च ।) मद्यपानरोचकभक्ष्यद्रव्यम् । इति हेमचन्द्रः । ३।५।७१ ॥ (चक्ष + भावे ल्युट् ।) कथनम् । (दर्शनम् । यथा, ऋग्वेदे । १।१३।५ ।

"स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः ।

यत्रामृतस्य चक्षणम् ॥")

चक्षाः, [स्] पुं, वृहस्पतिः । इति त्रिकाण्डशेषः । उपाध्यायः । इत्युणादिकोषः ॥ (क्ली, दर्शनम् । यथा, ऋग्वेदे । १ । ७ । ३ ।

"इन्द्रो दीर्घाय चक्षस आ सूर्य्यं रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥")

चक्षुः, [स्] क्ली, (चष्टे पश्यत्यनेनेति । चक्ष + "चक्षेः शिच्च ।" उणां । २ । १२० । इति उसिः स च शित् । शित्वात् ख्याञादेशाभावः ।)

दर्शनेन्द्रियम् । तस्य ग्राह्यं उद्भूतरूपम् १ तद्वद्द्रव्यम् २ पृथक्त्वम् ३ संख्या ४ विभागः ५ संयोगः ६ परत्वम् ७ अपरत्वम् ८ स्नेहः ९ द्रवत्वम् १० संख्यापरिमाणम् ११ योग्यवृत्तिक्रिया १२ योग्यवृत्तिजातिः १३ योग्यवृत्तिसमवायः १४ । तस्येन्द्रियसहकारिणः आलोकः उद्भूतरूपं महत्त्वम् । इति भाषापरिच्छेदः ॥ अस्याधिष्ठात्री देवता सूर्यः । इति श्रीभागवतम् । तत्पर्य्यायः । लोचनम् २ नयनम् ३ नेत्रम् ४ ईक्षणम् ५ अक्षि ६ दृक् ७ दृष्टिः ८ । इत्यमरः । २ । ६ । ९३ ॥ अम्बकम् ९ दर्शनम् १० । इति हेमचन्द्रः ॥ तपनम् ११ । इति राजनिर्घण्टः ॥ विलोचनम् १२ दृशा १३ वीक्षणम् १४ प्रेक्षणम् १५ देवदीपः १६ देवदीपः १७ दृशिः १८ दृशी १९ । इति शब्दरत्नावली ॥ * ॥ यथा, कर्म्मलोचने ।

"पाणिभ्यां न स्पृशेच्चक्षुश्चक्षुषी नैकपाणिना ।

चक्षुः परहिताकाङ्क्षी न स्पृशेदेकपाणिना ॥"

मेषशृङ्गीवृक्षः । इति रत्नमाला ॥

चक्षुर्व्वर्द्धनं, क्ली, (चक्षुस्तज्ज्योतिर्वर्द्धयत्यनेनेति । वृध + णिच् + ल्युट् । चक्षुर्ज्योतिर्वृद्धिकारित्वादेव तथात्वम् ।) मेषशृङ्गीवृक्षः । इति रत्नमाला ॥

चक्षुःश्रवाः, [स्] पुं, (चक्षुर्नयनमेव श्रवः श्रवणं यस्य ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥ (यथा, नैषधे । १ । २८ ।

"इति स्म चक्षुःश्रवसां प्रिया नले

स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥"

अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।

"व्याड़ाशीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः ।

चक्षुःश्रवा दन्दशूको गूढ़पात् पन्नगोरगाः ॥")

चक्षुष्यं, क्ली, (चक्षुषे लोचनाय हितम् । चक्षुस् + "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ।) प्रपौण्डरीकम् । अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।

"प्रपौण्डरीकं चक्षुष्यं प्रोक्तं श्रीपुष्पपुण्डरी ॥"

सौवीराञ्जनम् । खर्परीतुत्थम् । इति राजनिर्घण्टः ॥

चक्षुष्यः, पुं, (चक्षुषे हितः । "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ।) केतकवृक्षः । पुण्डरीकवृक्षः । इति मेदिनी । ये । ८२ ॥ शोभाञ्जनवृक्षः । इति राजनिर्घण्टः ॥ रसाञ्जनम् । इति हेमचन्द्रः ॥

चक्षुष्यः, त्रि, (चक्षुषे हितः । चक्षुस् + यत् ।) प्रियदर्शनः । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४९५ ।

"धिया भाग्यानुगामिन्या चेष्टमानो न याचितम् ।

अभूत् सर्व्वस्य चक्षुष्यः स तु दुर्ल्लभदर्शनः ॥"

चक्षुर्जः । इति विश्वः । यथा, माघे । ८।५७ ।

"चक्षुष्यः खलु महतां परैरलङ्घ्यः ॥"

"चक्षुषि भवश्चक्षुष्यः प्रियोऽपि चक्ष ।" इति तट्टीकायां मल्लिनाथः ॥) चक्षुर्हितः । इति मेदिनी । ये । ८२ ॥ (यथा, सुश्रुते सूत्रस्थाने २० अध्याये ।

“इत्यिशो मारुतः श्रेष्ठश्चक्षुष्यो बलवर्द्धनः।”)

चक्षुष्या, स्त्री, (चक्षुष्य+टाप्।) कुलत्थिका। सुभगा। इति मेदिनी। ये। ८२॥ अजशृङ्गी। अरण्यकुलत्थिका। इति राजनिर्घण्टः॥

चघ, न घातने। इति कविकल्पद्रुमः॥ (स्वा-परं-सकं-सेट्।) न, चघ्नोति। इति दुर्गादासः॥

चङ्कुरं, क्ली, (चकति तृप्नोत्यनेन। चक+उरच्। इत्वागमुम्।) यानमात्रम्। तत्पर्य्यायः। घोरणम् २। इति त्रिकाण्डशेषः॥

चङ्कुरः, पुं, (चक्यते तृप्यतेऽनेन। चकि+उरच्।) इत्वागमुम्।) रथः। वृक्षः। इति मेदिनी। रे। १५३॥

चङ्क्रमणं, क्ली, (पुनःपुनरतिशयेन वा क्राम्यतीति। चङ्क्रम+भावे ल्युट्।) पुनःपुनर्भ्रमणम्। (यथा, भागवते। ३। २१। ५०।

“नूनं चङ्क्रमणं देव! सतां संरक्षणाय ते।
वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी॥”)

अतिशयभ्रमणम्। इति व्याकरणम्॥ (यथा, सुश्रुते सूत्रस्थाने १९ अध्याये।

“स्नानासनं चङ्क्रमणं यानयानाभिभाषणम्॥”)

अनतिदेहपीडाकारकचङ्क्रमणस्य गुणाः। आयु-र्बलमेधाग्नीन्द्रियशुद्धिकारित्वम्। अत्यन्तचङ्क्रमणदोषाः। अनारोग्यत्वम्। अनायुष्य-त्वम्। इन्द्रियदृष्टिनाशित्वञ्च। इति राजवल्लभः॥

चङ्गः, त्रि, शोभनः। दक्षः। इति मेदिनी। गे। ७॥ (पुं, राजमन्त्रिविशेषः। यथा, राजतरङ्गिण्याम्।

“चङ्गरम्भास्य चक्राद्या येऽभूवंस्तस्य मन्त्रिणः।
तैः क्षीरराशितनयाभ्रचक्रैः प्रख्यापितैरपि॥”)

चञ्चत्का, स्त्री, (चि+बाहुलकात् कः। चं उप-शमनं अक्षरं यस्य अस्याः ततो भिया-त्वात् साधुः।) चलनगतिविशेषः। चिञ्चिड़ा इति भाषा। तत्पर्य्यायः। वेतसकुलः २ श्वेत-राजी ३ इक्षुफलः। अस्याः गुणः। मदोष्ण-गुणात् किञ्चिद्दूषणत्वम्। विशेषात् शोधिनो हितत्वञ्च। इति मदनविनोदः॥

चञ्चत्पुटः, पुं, (चञ्चत् गुरुलघुनां लयविशेषाणां पुटं द्वयं यत्र।) तालभेदः। यथा,—

“ताले चञ्चत्पुटे प्रोक्तं गुरुद्वन्द्वं लघु प्लुतम्।”
इति सङ्गीतदामोदरः॥

चच्चत्पुटोऽपि क्वचित् पाठः॥

चञ्चरी, स्त्री, पुं, (चर्य्यते पुनः पुनरतिशयेन वा चरति आप्नोति। चर+यङ् लुक् ततो टक् टित्वात् ङीप् च।) भ्रमरी। यथा,—

“हरौ हरौ भवति नेदृश्यं चरी भवति काम्।
किरौ परौ करोति देव चञ्चुरीति चञ्चरी॥”
इत्युद्भटः॥

चञ्चरीकः, पुं, (चरति पुनःपुनरपि “चर्करीतञ्च।” उणा। ४। २०। इति यङ् लुगन्तेन साधुः।) भ्रमरः। इति त्रिकाण्डशेषः॥

चञ्चलं, त्रि, (चञ्चं गतिं लातीति। ला+कः।) चञ्चलम्। (यथा, कुमारे। ४। ७।

“हर इवात्र नयनौ शोभमानौ महाशयम्।

चपूर्व्वकौ रमणी मा किशोरीव चञ्चली॥”)

तत्पर्य्यायः। चलनम् २ कम्पनम् ३ कम्प्रम् ४ चलम् ५ लोलम् ६ चलाचलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १०। इत्यमरः। ३। १। ७५॥ चपलम् ११ चटुलम् १२। इति तट्टीका॥ वायौ पुं। इति मेदिनी। ले। ९०॥

चञ्चला, स्त्री, (चञ्चं लाति। ला+कः टाप् च। यद्वा चञ्चलं चाञ्चल्यं अस्त्यस्याः इति अच्।) लक्ष्मीः। विद्युत्। इति मेदिनी। ले। ९०॥ पिप्पली। इति शब्दचन्द्रिका॥ (वर्णवृत्त-विशेषः। यथा, शब्दार्थचिन्तामणिः।

“तूर्य्यतालपाणिराजमेघहारनायकेन।
चामरध्वजेन चापि मण्डिता सुवर्णकेन॥
वर्णितातिसुन्दरेण पन्नगेन्द्रपिङ्गलेन।
चञ्चला चकोरचारुलोचने सुमङ्गलेन॥”)

चञ्चा, स्त्री, (चञ्च+अच्+टाप्।) नलनिर्म्मिता। चाच इति भाषा। (चञ्चेव मनुष्यः। इति इवार्थे कन् ततः “लुम्मनुष्ये।” ५। ३। ९८। इति कनो लुप्।) तृणनिर्म्मितपुरुषः। इति मेदिनी। चे। ५॥

चञ्चुः, पुं, (चन्च+बाहुलकात् उः।) गोना-डीचः। स तु नाड़ीचशाकः। एरण्डवृक्षः। इति मेदिनी। चे। ५॥ मृगः। इति शब्द-रत्नावली॥ रक्तैरण्डः। सुनचञ्चुरकः। इति राजनिर्घण्टः॥

चञ्चुः, स्त्री, (चञ्चति प्राप्नोति गृह्णाति भक्ष्यमनया।) पक्षिणामोष्ठः। पाखिर ठोँट् इति भाषा। (यथा, चातकाष्टके। ६।

“आतघातक! चातकं किमपि ते सम्यङ् न [चामीमहे
यतोऽस्मिन् पतन्ति चञ्चुपुटके छिन्नाः पयो-बिन्दवः॥”)

तत्पर्य्यायः। त्रोटिः २। इत्यमरः। २। ५। ३६॥ चञ्चूः ३ त्रोटी ४ चञ्चुका ५। इति शब्दरत्ना-वली॥ सृपाटिका ६। इति हेमचन्द्रः॥ चञ्च-शाकविशेषः। तत्पर्य्यायः। विजला २ चञ्चूः ३ कलभी ४ वीरपत्त्रिका ५ चञ्चुरः ६ चञ्चुपत्त्रः ७ सुशाकः ८ क्षेत्रसम्भवः ९। अस्या गुणाः। मधु-रत्वम्। तीक्ष्णत्वम्। कषायत्वम्। मलशोधन-त्वम्। गुल्मोदरविबन्धार्शोविषघ्नीनाशित्वञ्च॥

“विबन्धचुञ्चुचञ्चू च दीर्घपत्रा सतिक्तिका।
चञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा।
धातुपुष्टिकरी बल्या मेधा पिच्छिलिका स्मृता॥”
इति भावप्रकाशः॥

तस्या बीजस्य गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मशूलोदररोगविबन्धग्रहदोषकण्डूशूलकुष्ठनाशि-त्वञ्च। इति राजनिर्घण्टः॥ (अत्रार्थेऽस्य यथा,

“कामे प्रदिग्धे यस्तु विबन्धमतिमात्रतो।
सम्पूर्णनिष्क्रमत्यास्यं बहुशः संप्रवाहिकम्॥
तं मन्दतां पुटेन घररातामपापि वा।
उपोदिकायाः चारियां यवान्या वास्तुकस्य वा।
सुवर्चलायाश्चञ्च्वा शाकेनावल्गुजस्य वा॥”
इति चरके चिकित्सितस्थाने दशमेऽध्याये॥)

चञ्चुका, स्त्री, (चञ्चु+स्वार्थे कन्।) चञ्चुः। पक्षिणामोष्ठः। इति शब्दरत्ना-वली॥

चञ्चुपत्रः, पुं, (चञ्चाकारं पत्रमस्य।) इति राजनिर्घण्टः॥

चञ्चुभृत्, पुं, स्त्री, (चञ्चुं बिभर्त्तीति। क्विप्।) पक्षी। इति त्रिकाण्डशेषः।

चञ्चुमान्, [त्] पुं, स्त्री, (चञ्चुरस्त्यर्थे। योगे मतुप्।) पक्षी। इति ...

चञ्चुरः, पुं, (चञ्चति चञ्चुरतां ... चञ्च गतौ+बाहुलकात् उरच्।) ... इति राजनिर्घण्टः॥ (रघुः। ... सर्गे। १०। ४६।

“विशालाक्षिलशाखार्यां ...
कराचिक्षिपयामास ...”)

चञ्चुसूचिः, पुं, (चञ्चुः सूचिरिव यस्य।) कलपक्षी। तत्पर्य्यायः। सूचकः २ इति त्रिकाण्डशेषः। मकरः ४ चञ्चुसूची इति हेमचन्द्रः। ४। ४०७॥

चञ्चुसूचिकः, पुं स्त्री, (चञ्चुसूचि+ ... चञ्चुः सूचिरिव यस्य इति कन्।) पक्षी। इति हेमचन्द्रः। ४। ४०७॥

चञ्चूः, स्त्री, (चञ्चु+“ऊङुतः।” ४। १। ... इत्यस्य ... संख्यानम्।” इति वार्त्तिकोक्त्या ऊङ्।) इति हेमचन्द्रः॥

चट, भेदे। इति कविकल्पद्रुमः॥ (... सेट्।) चटति। इति दुर्गादासः॥

चट, क वधे। भेदे। इति कविकल्पद्रुमः॥ (... परं-सकं-सेट्।) क, चाटयति। ... दासः॥

चटकः, पुं, (चटति भिनत्ति धान्यादिकं। चट भेदे+“नन्दिग्रहीति।” ३। १। ... इति पचादित्वादच् ततः स्वार्थे कन्।) पक्षिविशेषः। चटा इति भाषा। (यथा, भागवते। १। ४। ८।

“वीक्ष्य प्रेमातुरं तत्र बाले चटकपोत-व्याससि मातुरः कामं मनसा ...”)

तत्पर्य्यायः। कलविङ्कः २। इत्यमरः। ... चित्रपृष्ठः ३ गृहनीडः ४ ... इति हारावली॥ कामुकः ६ नीलकण्ठकः ७ कण्ठकः ८ कामचारी ९। इति कलाविङ्कः १०। इति ... गुणाः। शीतत्वम्। लघुत्वम्। ... तद्धारण्यचटकं तत् श्रेयं लघु ... इति राजनिर्घण्टः॥

(“चटकाः श्लेष्मलाः स्निग्धा वातघ्नाः ...
गुरूष्णस्निग्धमधुरा वर्गाश्चातो यथोत्तरम्॥”
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥
“चटका मधुराः स्निग्धा बलशुक्रविवर्द्धनाः।
सन्निपातप्रशमनाः शमना मारुतस्य च।”
इति चरके सूत्रस्थाने २७ अध्याये॥)

[चटि]का, स्त्री, (चटका+स्वार्थे कन्। "उदी-चामातः स्थाने यकपूर्व्वायाः।" ७।३।४६। इति सूत्रे इत्वाभावः।) चटका। इति मुग्धबोधव्याकरणम्॥

[चट]का, स्त्री, (चटक+टाप्।) चटकपक्षी। चटकस्य चटकाया वा स्त्र्यपत्यम्। चटका+ [ऐरक्]। स्त्रियामपत्ये ऐरक् प्रत्ययः। तत्र टाव-[न्ता]त् तद्धिते सुपि "लुक् तद्धितलुकि।" १।२।४९। [इ]ति टापो लुकि पुनः अजाद्यतष्टाप्। न च [जा]तिलक्षणङीषो बाधकः।) चटकस्त्र्यपत्यम्। [च]टी इति भाषा॥ इत्यमरः। २।५।१८॥ [पि]प्पलीमूलम्। इत्यमरटीकायां नारायणचक्र-[वर्त्ती]॥ श्यामापक्षी। इति राजनिर्घण्टः॥

[चट]काशिरः, [स्] क्ली, (चटकायाः शिर इव।) [पि]प्पलीमूलम्। इति हेमचन्द्रः॥

[चट]किका, स्त्री, (चटका+स्वार्थे कन्। "उदी-[चा]मातः स्थाने यकपूर्व्वायाः।" ७।३।४६। [इ]ति इत्वाभावः।) चटका। इति मुग्धबोध-[व्या]करणम्।

[च]टिका, स्त्री, (चटति भिनत्ति रोगादिकं नाश-[य]तीत्यर्थः। चट्+बाहुलकात् इकन्।) पिप्पली-[मू]लम्। (चटति भिनत्ति धान्यादिकं स्वचञ्चु-[पु]टेनेति।) चटका। इति हलायुधः॥

[च]टिकाशिरः, [स्] क्ली, (चटिकायाः चटकपक्ष्याः [म]स्तकमिव आकृतिरस्य।) पिप्पलीमूलम्। [इ]त्यमरः। २।९।११०॥

[च]टिकाशिरः, पुं, ("सर्व्वे सान्ता अदन्ताः स्युः।" [इ]त्युक्तेः पृषोदरादित्वात् सलोपः।) पिप्पली-[मू]लम्। इत्यमरटीकायां भरतः॥ (अस्य पर्य्याया [य]था, वैद्यकरत्नमालायाम्।

"[ग्र]न्थिकं पिप्पलीमूलं षड्ग्रन्थिश्चटिकाशिरः॥")

[चटु]ः, पुं, (चटति शोकसन्तापादिकं भिनत्तीति। [च]ट भेदे+"स्गयादयश्च।" उणां। १।३७। [इ]ति कुः।) प्रियवाक्यम्। (यथा, माघे। ४।६।

"छायां निजस्त्रीचटुलालसानां
मदेन किञ्चित् चटुलालसानाम्॥")

उदरम्। व्रतिनामासनभेदः। इति मेदिनी। टे। १४॥ प्रियभाषणे क्लीवलिङ्गोऽपि। इति [सं]क्षिप्तसारे उणादिवृत्तिः॥

[चटु]लः, त्रि, (चटतीति। चट्+बाहुलकादुलच्। [य]द्वा, चटु+"सिध्मादिभ्यश्च।" ५।२।९७। इति मत्वर्थे लच्।) चपलः। इति हेमचन्द्रः। ६।९१॥ (यथा, रघुः। ८।५८।

"नासातिमात्रचटुलैः स्मरतः सुनेत्रैः
प्रौढ़प्रियानयनविभ्रमचेष्टितानि॥")

सुन्दरः। इत्युणादिकोषः॥

[चटु]ला, स्त्री, (चटुल+"अजाद्यतष्टाप्।" ४।१।४। इति टाप्।) विद्युत्। इति जटाधरः॥ (गायत्रीरूपा भगवती। यथा, देवीभागवते। १२।६।४७।

"चटुला चण्डिका चित्रा चित्रमाल्यविभूषिता॥")

चटुलोलः, त्रि, (चटुलश्चासौ लोलश्च। अति-चपलत्वात्तथात्वम्। निपातनाद्दलोपे साधुः।) चाटुलोलः। सुचपलः। इति सारावली।२।१८।

चड, इ क कोपे। इति कविकल्पद्रुमः॥ (चुरा-पर-अक-सेट्।) इ क, चण्डयति। इति दुर्गादासः॥

चड, इ ङ कोपे। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-अक-सेट्।) इ, कर्म्मणि चण्ड्यते। ङ, चण्डते। इति दुर्गादासः॥

चण, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा-पर-अक-सेट्।) चणति। इति दुर्गादासः॥

चण, म दाने। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्।) म, चणयति। इति दुर्गादासः॥

चण, मि गतौ। हिंसे। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्।) मि, चणयति चाण-यति। इति दुर्गादासः॥

चणकः, पुं, (चणति वेदोच्चारणादिध्वनिना शब्दा-यते इति। चण शब्दे+क्वुन्।) मुनिविशेषः। इति शब्दरत्नावली॥ (चण्यते दीयते इति। चण दाने+क्वुन्।) शस्यविशेषः। चणा बुट छोला इति च भाषा॥ तत्पर्य्यायः। हरि-मन्थकः २। इत्यमरः। २।९।१८॥ हरि-मन्थजः ३। इति तट्टीका॥ चणः ४ हरिमन्थः ५ सुगन्धः ६ कृष्णचञ्चुकः ७ वालभोज्यः ८ वाजि-भक्ष्यः ९ कञ्चुकी १०। अस्य गुणाः। मधुरत्वम्। रूक्षत्वम्। मेहवान्तमपित्तनाशित्वम्। दीप-नत्वम्। वर्णबलरुच्याध्मानकारित्वञ्च॥*॥ आमस्य तस्य गुणाः। शीतलत्वम्। रुच्यत्वम्। सन्त-र्पणत्वम्। दाहतृष्णाश्मरीशोषनाशित्वम्। गौल्य-त्वम्। कषायत्वम्। इषत्कफवीर्य्यकारित्वञ्च॥*॥ भृष्टस्य तस्य गुणाः। रूक्षत्वम्। वातनाशित्वम्। रक्तदोषकारित्वम्। उष्णवीर्य्यत्वम्। लघुत्वम्। स्वेदशैत्यहरत्वञ्च॥*॥ तस्य यूषस्य गुणाः। मधुरत्वम्। कषायत्वम्। कफवातविकार-श्वासोद्र्दकासक्षमपीनसनाशित्वम्। बलदीपन-त्वञ्च॥*॥ प्रासस्तज्जलपानगुणाः। चन्द्रमरी-चिवत् शीतलत्वम्। पित्तरोगनाशित्वम्। पुष्टि-प्रदत्वम्। पाके नैजगुणत्वम्। सन्तर्पणत्वम्। मञ्जुलत्वम्। मधुरत्वञ्च। इति राजनिर्घण्टः॥*॥ तस्य आर्द्रभृष्टस्य गुणः। बलकारित्वम्। रोचन-त्वञ्च॥*॥ सिन्नस्य तस्य गुणः। पित्तकफ-नाशित्वम्॥*॥ तत्सूपः क्षोभकरः॥*॥ तस्य शाकस्य गुणाः। रुच्यत्वम्। दुर्ज्जरत्वम्। कफवातकारित्वम्। अम्लत्वम्। विष्टम्भजनक-त्वम्। पित्तदन्तशोथनाशित्वञ्च। इति भाव-प्रकाशः॥

चणकात्मजः, पुं, (चणकस्य मुनिविशेषस्य आत्मजः।) वात्स्यायनमुनिः। इति हेमचन्द्रः। ३।५१७॥

चणकाम्लकं, क्ली, (चणकजातमम्लम्। ततः स्वार्थे कन्।) चणकलवणम्। तस्य गुणाः। अत्यम्लत्वम्। दीपनत्वम्। दन्तहर्षणत्वम्। लवणानुरसत्वम्। रुच्यत्वम्। शूलाजीर्णविबन्धनाशित्वञ्च। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

चणकाम्बुः, [स्] क्ली, (चणकाम्भस्य चणक-तरुस्य वारि जलम्।) शिशिरदलस्वच्चणक-पत्रशिशिरवारि। इति रत्नावली॥

चणद्रुमः, पुं, (चणश्चणक इव द्रुमो वृक्षः।) चुद-गोक्षुर इति राजनिर्घण्टः॥ चणीद्रुमोऽपि पाठः॥

चणपत्री, स्त्री, (चणश्चणकस्तस्य पत्रमिव पत्रं यस्याः। स्त्रियां ङीप्।) रुदन्तीवृक्षः। इति राजनिर्घण्टः॥

चणिका, स्त्री, (चणति दुग्धवदसं ददातीति। चण दाने+क्वुन्। टाप् अत इत्वञ्च।) तृण-विशेषः। तत्पर्य्यायः। गोदुग्धा २ सुनीला ३ क्षेत्रजा ४ हिमा ५। अस्या गुणाः। बीजे-वृष्यत्वम्। बल्यत्वम्। अतिमधुरत्वञ्च। तृणैः पशुहितत्वम्। इति राजनिर्घण्टः॥

चण्ड, स्त्री, (चण्डते इति। चडि+पचाद्यच्।) तीक्ष्णम्। इति शब्दरत्नावली॥

चण्डः, पुं, (चणति चणयति वा अन्तरमं ददाती-त्यर्थः। चण+"अमम्तात् डः।" उणां।१।११४। इति डः।) तिन्तिड़ीवृक्षः। चण्डते कुप्यतीति। चडि+अच्।) यमकिङ्करः। दैत्यविशेषः। इति मेदिनी। डे। ११॥ (अयं हि शुम्भासुरसेनानीः। कदाचिदयं हिमाचलस्थां भगवतीं दृष्ट्वा शुम्भाय कथितवान्। ततः शुम्भार्थं भगवत्यानयनाय गतो-ऽसौ तल्ललाटफलकनिर्गतया चामुण्डया निहतः। एतद्विवरणं मार्कण्डेयपुराणे द्रष्टव्यम्। कार्त्ति-केयः यथा, महाभारते। ३।२३१।४।

"शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः॥")

चण्डः, त्रि, (चण्डते रुष्टो भवतीति। चडि+पचा-द्यच्।) अत्यन्तकोपनः। इत्यमरः। ३।१।३२॥ (यथा, महाभारते। ३।२३३।११।

"चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्चपलाश्च बल्गाः॥")

तीक्ष्णताविशिष्टः। इति शब्दरत्नावली॥ (यथा, महाभारते। १।३२।२३।

"दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम्॥")

चण्डता, स्त्री, (चण्डस्य भावः। चण्ड+तल्।) उग्रता। इति हेमचन्द्रः। २।२३२॥

चण्डनायिका, स्त्री, (चण्डी कोपना नायिका।) दुर्गा। इति शब्दरत्नावली॥ अष्टनायिकान्त-र्गतनायिकाविशेषः। (यथा, दुर्गाध्याने।

"उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चामुण्डा चण्डिका तथा॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम्।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम्॥")

तस्या ध्यानं यथा, देवीपुराणोक्तदुर्गोत्सवपद्धतौ।

"चण्डनायिकां नीलवर्णां षोड़शभुजाम्।
कपालं खेटकं घण्टां दर्पणञ्च धनुर्ध्वजम्।
पाशञ्च शोभनं शक्तिं वामहस्तेन बिभ्रतीम्॥
मुद्गरं शूलवज्रञ्च खड्गञ्चैव तथाङ्कुशम्।
शरं चक्रं शलाकाञ्च दक्षिणेन च बिभ्रतीम्॥"

चण्डरुद्रिका, स्त्री, (चण्डः प्रचण्डः रुद्रः अधिष्ठातृ-तयास्त्यस्याः। चण्डरुद्र+"अत इनिठनौ।"

[illegible]

मरः । २ । ६ । ११८ । पुस्काण्डे योपालित धनात् पुंलिङ्गोऽपि ।

चण्डातः, पुं, (चण्डते कुप्यतीति । चडि कोपे + "कतिचण्डिभ्यामालच् ।" उणां ।१।११६। इत्या- लच् । यद्वा, चण्डं विकटं कर्म अलङ्करोति यस्य इत्युणादिवृत्तौ ।) वर्णसङ्करजातिविशेषः । चाण्डाल इति भाषा । स तु ब्राह्मणीगर्भे शूद्रौरसाज्जातः । इति पराशरपद्धतिः ॥ तत्पर्यायः । प्लवः २ मातङ्गः ३ दिवाकीर्त्तिः ४ जनङ्गमः ५ निषादः ६ श्वपचः ७ अन्तेवासी ८ चाण्डालः ९ पुक्कसः १० इत्यमरः । २ । १० । १९ ॥ जनङ्गमः ११ निषादः १२ श्वपच् १३ पुक्कशः १४ पुक्कसः १५ इति शब्दरत्नावली ॥ म्लेच्छः १६ । इति त्रिकाण्ड- शेषः ॥ तस्याचारनिर्णयो यथा, रामायणे ।

"अथ राजा समीभाय तस्मै राजा बभूव ह ।
चण्डालरूपो राम ! मध्य एव दुरासतिः ॥
नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्द्धजः ।
चैत्यमाल्याङ्गरागश्च आयसाभरणोऽभवत् ॥"

[illegible]

"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम् ॥
वासांसि मृतचैलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥
न तैः समयमन्विच्छेत् पुरुषो धर्ममाचरन् ।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥
दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः ।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः ॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥"
(इति मनुः १०। ५१-५६ ॥)

"चण्डालश्वपचानान्तु [illegible] मनुः ।४।१२१।
[illegible]

चण्डालवल्लकी, स्त्री, [illegible]

[illegible]

चण्डिका, स्त्री, (चण्डी + स्वार्थे कन् । चडि + कन् वा ।) दुर्गा । [illegible] १ । १ । ३८ ॥ (यथा, मार्कण्डेये ।
"चण्डिका सा [illegible]
इयमेव अमरकण्टके पीठस्य [illegible]
यथा, देवीभागवते । ७ । ३० । ६३ ।
"द्वारवत्यां प्रचण्डा तु चण्डिकामरकण्टके ।"
गायत्रीरूपा देवी । यथा, देवीभागवते [illegible] ६ । ४७ ।
"चण्डुला चण्डिका चित्रा [illegible]

चण्डिलः, पुं, (चण्डते कोपयतीति । चडि कोपे + इलच् । चण्ड + अस्त्यर्थे [illegible]) नापितः ॥ वास्तूकम् । इति [illegible]

चण्डिला, स्त्री, (चण्डिल + स्त्रियां टाप् ।) नदीभेदः । इक्षुगन्धाविशेषः ।

चण्डी, स्त्री, (चडि + "षिद्गौरादिभ्यश्च ।" इति वा ङीष् ।) दुर्गा । (यथा, दुर्गादेवीकृतबोधनप्रकरणे ।
"चण्डीमावाहयेद् विद्वान् [illegible]
हिंसा । कोपना । इति मेदिनी ॥
(यथा, रघुवंशे । १२ । ५ ।
"सा किलाश्वासिता चण्डी भर्त्रा [illegible]
[illegible] । चण्डीं इत्यमरटीकायां भरतः ॥ ७ ॥
[illegible] शीलदेवीमाहात्म्यम् ।
"चण्डीं कौलिकधारी [illegible]
जपेत् सप्तशती यस्तु क्रम एव हि [illegible]
चण्डीं दुरितं हन्ति कौलिकं [illegible]
[illegible] चण्डिका [illegible]

अपि च ।
"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ।"

[illegible]

निरन्तरमहं तस्याः सन्तापमपनयाम्यहम् ॥
अन्तरमानं समभावसमन्वितम् ।
अध्यमानः सर्व्वं वै मन्त्राणं एतद्यो नृप ! ॥
नानाभाविनु सर्व्वेषु मन्त्राधं नात्र संशय ! ।
य इदं पाठयेद्भक्त्या ! स विप्रो याति उत्तमं ॥
सम्प्रसमालङ्कं काले काले विशाम्पते ।
प्रदर्शयन् सर्व्वान् सर्व्वान् पाठयेद्यापको नृप ! ॥"
तस्य फलं यथा,—
"सप्तशतीपाठफलं देवि ! शृणुष्व वदतो मम ।
कवचाद्यादिपाठानां यथावत् कथयामि ते ॥
सङ्कल्प्य पूर्व्वं सम्पूज्य न्यस्याङ्गेषु मनून् सकृत् ।
पाठादर्पणप्रदानाद्धि सिद्धिमाप्नोति मानवः ॥
उपसर्गस्य शान्त्यर्थं त्रिरावृत्तं पठेन्नरः ।
ग्रहोपशान्त्यै कर्त्तव्यं पञ्चावृत्तं वरानने ! ॥
महाभये समुत्पन्ने सप्तावृत्तं समाचरेत् ।
नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत् ॥
राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ।
अर्काहत्त्या काम्यसिद्धिर्वैरहानिश्च जायते ॥
मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्रीवश्यतामियात् ।
सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति मानवः ॥
कलावृत्त्या पुत्त्रपौत्त्रधनधान्यागमं विदुः ।
राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च ॥
कुर्य्यात् सप्तदशावृत्तं तथाष्टादशकं प्रिये ! ।
महाव्रणविमोक्षाय विंशावृत्तिं पठेत् सुधीः ॥
पञ्चविंशावर्त्तनात्तु भवेद्बन्धविमोक्षणम् ।
सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ॥
जातिध्वंसे कुलोच्छेदे आयुषो नाश आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा चैवातिपातके ।
कुर्य्याद्यत्नात् शतावृत्तिं ततः सम्पद्यते शुभम् ॥
श्रियोवृद्धिः शतावृत्त्या राज्यवृद्धिस्तथापरे ।
मनसा चिन्तितं देवि ! सिद्ध्येदष्टोत्तराच्छतात् ॥
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ! ।
सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात् ।
यथाश्वमेधः क्रतुराट् देवानाञ्च यथा हरिः ॥
स्तवानामपि सर्व्वेषां तथा सप्तशतीस्तवः ॥
अथवा बहुनोक्तेन किमेतेन वरानने ! ।
चण्ड्याः शतावृत्तपाठात् सर्व्वाः सिध्यन्ति सिद्धयः ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

अथ प्रथमचरितस्य ब्रह्मर्षिर्महाकाली देवता गायत्त्री छन्दो नन्दा शक्ती रक्तदन्तिका बीजमग्निस्तत्त्वम् । तत्र महाकाल्या ध्यानं यथा,—
"दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥
स्फुरद्दशनदंष्ट्राभा भीमरूपा भयङ्करी ।
खड्गशूलगदाबाणतोमरञ्च भुशुण्डिभृत् ॥
परिघं कार्म्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ।
मधुकैटभयोर्युद्धे ध्येया सा तामसी शिवा ॥"
मध्यमचरितस्य विष्णुर्ऋषिर्महालक्ष्मीर्देवता उष्णिक् छन्दः शाकम्भरी शक्तिर्दुर्गा बीजं सूर्य्यस्तत्त्वम् । तत्र महालक्ष्म्या ध्यानं यथा,—
"श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ।
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ॥
चित्रानुलेपना कान्ता सर्व्वसौभाग्यशालिनी ।
अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् ।
अक्षमालाञ्च मुषलं बाणासिकुलिशं गदाम् ॥
चक्रं त्रिशूलं परशुं शङ्खघण्टे च पाशकम् ।
शक्तिदण्डं चर्म्म चापं पानपात्रं कमण्डलुम् ॥
अलङ्कृतभुजा शस्त्रैरायुधैः परमेश्वरी ।
सर्व्वेषा स्तुतिकामादौ महिषासुरमर्द्दिनी ॥
इत्येषा राजसी शक्तिः सर्व्वदेवमयी मता ।
यां ध्यात्वा मानवो नित्यं लभेतेप्सितमात्मनः ॥"
उत्तरचरितस्य रुद्र ऋषिः सरस्वती देवता उष्णिक् छन्दो भीमा शक्तिर्भ्रामरी बीजं वायुस्तत्त्वम् । तत्र सरस्वत्या ध्यानं यथा,—
"गौरीदेहसमुत्पन्ना या सत्त्वैकगुणाश्रया ।
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिषूदनी ॥
दधौ चाष्टभुजा बाणं मुषलं शूलचक्रकम् ।
शङ्खघण्टालयञ्चैव कार्म्मुकञ्च तथा परम् ॥
ध्येया सा स्तुतिकालादौ वधे शुम्भनिशुम्भयोः ॥"

इति कात्यायनीतन्त्रम् ॥

(छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
"नयुगलसयुगलगैरिति चण्डी ॥")

चण्डीकुसुमः, पुं, (चण्डीप्रीतिजनकं कुसुमं यस्य ।) रक्तकरवीरवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्य करवीरशब्दे बोद्धव्या ॥)

चण्डुः, पुं, (चडि + बाहुलकात् उः ।) उन्दुरः । इति शब्दचन्द्रिका ॥

चत, ए ञ याचे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-सेट् ।) ए, अचतीत् । ञ, चतति चतते । इति दुर्गादासः ॥

चतुः, [र्] च, चतुर्व्वारम् । इति व्याकरणम् ॥

चतुःपत्री, स्त्री, (चत्वारि चत्वारि पत्राण्यस्याः ।) क्षुद्रपाषाणभेदी । इति राजनिर्घण्टः ॥

चतुःपर्णी, स्त्री, (चत्वारि चत्वारि पर्णानि यस्याः ।) क्षुद्राम्लिका । इति राजनिर्घण्टः ॥

चतुःपला, स्त्री, (चत्वारि पलानि यस्यां यस्या वा ।) नागबला । इति राजनिर्घण्टः ॥

चतुःपुण्ड्रः, पुं, (चत्वारि पुण्ड्राणीव यत्र ।) भिण्डावृक्षः । इति राजनिर्घण्टः ॥

चतुःशालं, क्ली स्त्री, (चतसृणां शालानां समाहारः ।) परस्पराभिमुखगृहचतुष्टयम् । चकमिलनबाड़ी इति भाषा ॥ इत्यमरः । २ । २ । ६ ॥ (यथा, महाभारते । १ । १४५ । ८ ।
"तत्र गत्वा चतुःशालं गृहं परमसंवृतम् ॥")

चतुःशालकं, क्ली, (चतुःशाल + स्वार्थे कन् ।) चतुःशालम् । इति शब्दरत्नावली ॥

चतुःषष्टिः, स्त्री, (चतुरधिका षष्टिः ।) चतुरधिकषष्टिसंख्या । चौषट्टि इति भाषा ॥ कलानाम्नी उपविद्या । (यदुक्तं रूपगोस्वामिकृतभगवन्नामाहात्म्ये ।
"चतुःषष्टिकलाशालिन् सिद्धानां पारदृश्वनः ।
शते कथाद्भगवतः कः क्षमो देवताद्वरः ॥")
ऋग्वेदः । इति मेदिनी । टे । ६३ ॥

चतुरः, त्रि, (चत्यते याच्यते इति । चत + "मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच् ।" उणां । १ । ३८ । इत्युरच् ।) कार्य्यक्षमः । निरालस्यः । तत्पर्य्यायः । दक्षः २ पेशलः ३ पटुः ४ सूत्थानम् ५ उष्णः ६ । इत्यमरः । ३ । १ । १९ । पेशलः ७ पेषलः ८ इति तट्टीका ॥ निपुणः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । १ । १७ । ४४ ।
"चतुरो नैव मुह्येत मग्नः सर्व्वत्र मुह्यति ॥")
तस्य लक्षणं यथा । वाक्चेष्टाव्यङ्ग्यसमागमः । तत्र वचनव्यङ्ग्यसमागमो यथा, रसमञ्जर्य्याम् ।
"तमोजटाले हरिदन्तराले
काले निशायास्तव निर्गतायाः ।
तटे नदीनां निकटे वनानां
घटेत शातोदरिकः सहायः ॥"
चेष्टाव्यङ्ग्यसमागमो यथा,—
"कान्ते कनकजम्बीरं करे कमपि कुर्व्वति ।
अगारलिखिते भानौ बिन्दुमिन्दुमुखी ददौ ॥"
(उपभोगक्षमः । यथा, रघुः । ९ । ४७ ।
"त्यजत मानमलं बत विग्रहैः
न पुनरेति गतं चतुरं वयः ॥"
"चतुरं उपभोगक्षमम् ।" इति तट्टीकायां मल्लिनाथः ॥) नेत्रगोचरः । इति हेमचन्द्रः ॥

चतुरः, पुं, (चत + उरच् ।) चक्रगण्डुः । हस्तिशाला । इति हेमचन्द्रः ॥

चतुरक्रमः, पुं, (चतुरः चातुर्य्यान्वितः क्रमः प्रणाली यत्र ।) सप्तधारूपकान्तर्गतरूपकभेदः । यथा—
"द्रुतद्वन्द्वं लुतद्वन्द्वं तथा शान्ते गुरुर्भवेत् ।
द्वाविंशत्यक्षरैर्युक्तः शृङ्गारे चतुरक्रमः ॥"

इति सङ्गीतदामोदरः ॥

चतुरङ्गं, क्ली, (चत्वारि अङ्गानि यस्य ।) हस्त्यश्वरथपदातिरूपं सैन्यम् । यथा, रामायणे ।
"चतुरङ्गं ह्यपि बलं सुमहत् प्रसहेमहि ।"
अक्षक्रीड़ाविशेषः । चौरंखेला इति भाषा ॥ यथा,—

युधिष्ठिर उवाच ।
"अष्टकोष्ठाश्च या क्रीड़ा तां मे ब्रूहि तपोधन ! ।
प्रकर्षेणैव मे नाथ चतूराजी यतो भवेत् ॥

व्यास उवाच ।
अष्टौ कोष्ठान् समालिख्य प्रदक्षिणक्रमेण तु ।
अरुणं पूर्व्वतः कृत्वा दक्षिणे हरितं बलम् ॥
पार्थ ! पश्चिमतः पीतमुत्तरे श्यामलं बलम् ।
राज्ञो वामे गजं कुर्य्यात् तस्मादश्वं ततस्तरिन् ॥
कुर्य्यात् कौन्तेय ! पुरतो युद्धे पत्तिचतुष्टयम् ।
कोणे नौका द्वितीये त्वश्वस्तृतीये तु गजो वसेत् ॥
तुरीये च वसेद्राजा वटिकाः पुरतः स्थिताः ॥
पञ्चकेन वटी राजा चतुष्केणैव कुञ्जरः ॥
त्रिकेण तु चलत्यश्वः पार्थ ! नौकाद्वयेन तु ॥
कोष्ठमेकं विलङ्घ्याथ सर्व्वतो याति भूपतिः ॥

अग्र एव वटी याति बलं हन्त्यग्रकोणगम् ।
यथेष्टं कुञ्जरो याति चतुर्द्दिक्षु महीपते ! ॥
तिर्य्यक् तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम् ।
कोष्ठकोष्ठद्वयं लङ्घ्य व्रजेन्नौका युधिष्ठिर ! ॥
सिंहासनं चतूराजी दृष्टाप्यस्तु यद्भवेत् ।
काककाष्ठं हन्त्नौका नौकाहन्त्प्रकारकम् ॥
घाताघाते वटी नौका बलं हन्ति युधिष्ठिर ! ।
राजा गजो हयश्चापि अक्षा घातं निहन्ति च ॥
अत्यन्तं सबलं रक्षेत् स्वराजा बलमुत्तमम् ।
अल्पस्यार्थाय पार्थ ! हन्तार्थं बलमुत्तमम् ॥
नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि
इत्याधिक्यमश्वस्य ॥
मतङ्गजस्य गर्व्वेण राजा क्रीडति निर्भरम् ।
तस्मात् सर्व्वबलं रक्षेत रक्ष कौन्तेय ! कुञ्जरम् ॥
सिंहासनं चतूराजी यद्यवस्थानतो भवेत् ।
सर्व्वसैन्यैरनेकैरपि रक्षितश्चो महीपतिः ॥
अन्यनाथपदं राजा यदाक्रान्तो युधिष्ठिर ! ।
तदा सिंहासनं तस्य भण्यते नृपसत्तम ! ॥
राजा च नृपतिं हत्वा कुर्य्यात् सिंहासनं यदा ।
द्विगुणं वाहयेत् पण्यमन्यथैकगुणं भवेत् ॥
द्विगुणं पण्यं दातव्यत्वेन प्रापयेत् ॥
मित्रसिंहासनं पार्थ यदारोहति भूपतिः ।
तदा सिंहासनं नाम सर्व्वं नयति तद्बलम् ॥
यदा सिंहासनं कर्त्तुं राजा षष्ठपदाश्रितः ।
तदा घातोऽपि हन्तव्यो बलेनापि सुरक्षितः ॥
विद्यमाने नृपे यत्र सखौ ये च नृपत्रयम् ।
प्राप्नोति च तदा तस्य चतूराजी यदा भवेत् ॥
नृपेणैव नृपं हत्वा चतूराजी यदा भवेत् ।
द्विगुणं वाहयेत् पण्यमन्यथैकगुणं भवेत् ॥
स्वपदस्थं यदा राजा राजानं हन्ति पार्थिव ।
चतुरङ्गे तदा भूप ! वाहयेच्च चतुर्गुणम् ॥
यदा सिंहासने काले चतूराजी सहाप्यिना ।
चतूराजी भवन्तेव न तु सिंहासनं नृप ! ॥
अर्थेदं बोधं उभयथा यथेऽपि परसिंहासनाधि-
कारात् परराजवधे शौर्य्याधिक्यनिष्कण्टकत्व-
दर्शनात् । क्रीडायामपि तथा कल्पने । * ।
राजद्वयं यदा दृष्टे चाकनो राशि संस्थिते ।
परेण संवृतश्चैको वर्त्तमानस्थावधेत ।
राजद्वयं यदा दृष्टे न स्वारम्भकरे परः ।
तदा राजा हि राजानं घातेऽपि तं हनिष्यति ।
नृपारूढे यदा राजा प्रविष्यति युधिष्ठिर ! ।
घाताघातेऽपि हन्तव्यो राजा तत्र न रक्षकः ।
शेषं राजपदं यद्वा वटिकानां यदा भवेत् ।
वटी भवेत् पदं नाम तदा कोष्ठकं च वट् ।
यदि तस्य भवेत् पार्थ, चतूराजी च वट्पदम् ।
तदापि च चतूराजी भवन्तेव न संशयः ।
यदाऽपि वट्पदे सिद्धे राजा वा हस्तिना तदा ।
वट्पदं न भवेत्तस्य कार्य्यं यद्य पार्थिव ॥
मध्ये कोष्ठे तु प्रकाटिका द्यवेव वै ।
तदावेवश्च दृष्टार्थं सुसाम दुर्ग्गमं बलम् ॥
विवर्जितमाह कौन्तेय, चतुरङ्ग करोतन ।
वट्पदं न भवेद इति गौतममातिनम् ॥

नौकैका वटिका यस्य विद्यते खेलने यदि ।
गाढ़ावटीति विख्याता पदं तस्य न दुष्यति ॥
गाढ़ावाख्यापदं राजपदं कोणपदञ्च तत् ।
हस्ते रङ्गे बलं नास्ति काककाष्ठं तदा भवेत् ॥
वदन्ति राजमाः सर्व्वे तस्य न क्वो जयाजयौ ।
प्रार्थिते पञ्चमे राशि स्ततश्चाथ वट्पदे ॥
अर्थ्यौषं स्यात्तदा राजन् ! चलिता चालितं
परम् ।
द्विराष्ट्रता गतौ तस्माद्दद्यात् परबलं जयी ॥
सिंहासनं भवत्येव काककाष्ठं न भण्यते ॥
उपविष्टश्च यत् स्थानं तस्योपरि चतुष्टये ।
नौकाचतुष्टयं यत्र क्रियते यस्य नौकया ॥
नौकाचतुष्टयं तत्र दृढनौकेति भण्यते ।
न कुर्य्यादेकदा राजन् ! गजस्याभिमुखं गजम् ॥
यदि कुर्व्वीत धर्म्मज्ञ ! पापफलो भविष्यति ।
स्थानाभावे यदा पार्थ ! हस्तिनं हस्तिसम्मुखम् ॥
करिष्यति तदा राजन्निति गौतमभाषितम् ।
प्राप्ते गजद्वये राजन् ! हन्तव्यो वामतो गजः ॥”
इति तिथ्यादितत्त्वे चतुरङ्गक्रीड़नम् ॥
चतुरङ्गा, स्त्री, (चत्वारि अङ्गानि यस्याः ।) घोटिकाद्यस्य । इति राजनिर्घण्टः ॥
चतुरङ्गिणी, स्त्री, (चत्वारि अङ्गानि हस्त्यश्वरथपदातयः सन्त्यस्यामिति । चतुरङ्ग + इनिः ।) चतुरङ्गसेना । इति रामायणम् ॥ (यथा, महाभारते । १ । ७३ । २० ।
“प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम् ॥”)
चतुरङ्गुलः, पुं, (चतस्रः अङ्गुलयः परिमाणमस्य । समासे अच् ।) आरग्वधवृक्षः । इत्यमरः । २ । ४ । २३ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
“विरेचनानि सर्व्वाणि विशेषाच्चतुरङ्गुलात् ॥”)
चतुरङ्गुलिपरिमिते त्रि ॥ (यथा, शतपथब्राह्मणे । १० । २ । २ । १ ।
“स चतुरङ्गुलमेवोभयतोऽन्तत उपगूहति ॥”)
चतुरम्लं, क्ली, (चतुर्णां अम्लानां समाहारः ।) चतुर्व्विधाम्लद्रव्यम् । यथा, भावप्रकाशे ।
“अम्लवेतसवृक्षाम्लबृहज्जम्बीरनिम्बुकैः ।
चतुरम्लं हि पञ्चाम्लं बीजपूरयुतैर्भवेत् ॥”
चतुरस्रः, त्रि, (चतस्रोऽस्रयोऽस्य । “अचतुरविचतुरसुचतुर-”इत्यादिना ।” ५ । ४ । १२० । इति अच्प्रत्ययेन निपातितः ।) चतुष्कोणः । यथा,—
“चतुरस्रं त्रिकोणं वा वर्त्तुलं चार्द्धचन्द्रकम् ।
कर्त्तव्यमानुपूर्व्व्येण ब्राह्मणादिषु मण्डलम् ॥”
इत्याह्निकतत्त्वे बौधायनः ॥
तथाचतुर्थांशमानम् । इति दीपिका ॥
चतुराननः, पुं, (चत्वारि आननानि मुखानि यस्य ।) ब्रह्मा । इत्यमरः । १ । १ । १६ ॥ तस्य चतुराननत्वे कारणं यथा,—
“तस्यां स चामीकरचारुकाया-
मनुस्मृतो लोकगुरुप्रभावः ।
परिक्रमन् दिक्षु चतुर्षु नेत्र-
चत्वारि चेमेऽदृशिरं समानि ॥”

इति श्रीभागवते । ३ । ८ । ११ । ...
“... वरेण्य-
... चतुरानन ॥
... ”
चतुरूषणं, क्ली, (चतुर्णां ऊषणानां ... पिप्पलीमूलसहितं त्रिकटु । यथा,
“त्र्यूषणं सकणामूलं कथितं चतुरूषणम् ।
व्योषस्यैव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥”
चतुर्गतिः, पुं, (चतुर्भिर्गतिरस्य ।) ... इति हेमचन्द्रः । ४ । ४१८ । (चतुर्णां वर्णानां ब्राह्मणादीनां गतिराश्रयः ।) विष्णुः । यथा, महाभारते ... १४८ । ९५ ।
“चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।”)
चतुर्थः, त्रि, चतुर्णां पूरणः । (“चतुरश्छयतावाद्यक्षरलोपश्च ।” ५ । २ । ५१ । इति डट् । ततः “षट्कतिकतिपयचतुरां थुक् ।” ५ । २ । ५१ । इति थुक् ।) चतुःसंख्यापूरणः । इति मुग्धबोधम् ।
इत्यादि भाषा ॥
चतुर्थांशः, पुं, (चतुर्थः अंशः ।) चतुर्भागः । तत्पर्य्यायः । तुरीयः २ पादः ३ । इति ... निर्घण्टः ॥ (चतुर्थः अंशो यस्य ।) ... स्वामिनि त्रि । यथा, मनुः । ८ । २१० ।
“तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च ...”
चतुर्थिका, स्त्री, पलपरिमाणम् । ... परिभाषा ॥
चतुर्थी, स्त्री, (चतुर्णां पूरणी । “... डट् ।” ५ । २ । ४८ । इति डट् । ... कतिपयचतुरां थुक् ।” ५ । २ । ५१ । इति थुक् । ततष्टित्वात् ङीप् ।) तिथिविशेषः । ... तु चन्द्रस्य चतुर्थकलाक्रियारूपा । इति ... (चतुर्थी तु पञ्चमीयुता ग्राह्या । “... ... भूतानि ।” इति युग्मवचनात् ...
“एकादश्यष्टमी षष्ठी अमावास्या चतुर्थी ...
उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः ॥”
इत्यग्निपुराणवचनं ...
भविष्ये,—
“अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया ॥”
यत्तु,—
‘चतुर्थीसंयुता कार्य्या तृतीया च चतुर्थिका ।
तृतीयया युता नैव पञ्चम्या कारयेत् ...’
इति ब्रह्मवैवर्त्तवचनं पञ्चमीयुताविशेषं ...
विनायकव्रतपरमिति शुद्धतत्त्वम् ...
निषेधकाले क्वचिदित्युपपत्तिः सन्त्रैव ...
युताया ग्रहणात् । सारस्वतादिप्रदोषकृत्ये
‘षष्ठ्योर्द्दश्याश्चतुर्थ्याश्च सप्तम्या द्वादश्यास्तथा ।
प्रदोषेऽध्ययनं धीमान् न कुर्य्यात् ...
सारस्वतो गायत्रः सौरश्च वैष्णवस्तथा ।
प्रदोषश्चन्द्रोदय प्रथमप्रहर इति ...

...षितम् इति निर्णयामृतधृत श्रीगर्गः ॥
शुक्लपक्षे चतुर्थ्यां तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तं ततः ॥'
चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य
पञ्चम्यां दर्शने तु न दोषः । यतः,—
पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥'
अज्ञान प्रमादाद्वा दर्शने तु ।
'सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः ॥"
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात्
प्रसेनवधोपाख्यानस्य श्रवणम् । माघमासस्य
शुक्लचतुर्थ्यां गौरी पूजनीया । यथा, भविष्यो-
त्तरे माघशुक्लपक्षमधिकृत्य,—
'चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"
इति तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"स्वपुत्रमित्रप्रमदाप्रमोदी,
हताभिलाषो कृपया समेतः ।
विवादशीलो विजयी विवादे
भवेच्चतुर्थीप्रभवः कठोरः ॥"
चतुर्दन्तः, पुं, (चत्वारो दन्ता यस्य ।) ऐरावत-
हस्ती । इति हेमचन्द्रः । २ । ८९ ॥ (स्वनाम-
ख्यातः चतुर्दन्तोपेतगजविशेषः । यथा, पञ्च-
तन्त्रे । ३ । ८० । "कस्मिंश्चिद्वनोद्देशे चतुर्दन्तो
नाम महागजो यूथाधिपः प्रतिवसति स्म ॥")
चतुर्दश, [न्] त्रि, चतुरधिका दश । चौद्द इति
भाषा । इति ज्योतिषम् ॥ (यथा, नैषधे । १ । ४ ।
"अधीतिबोधाचरणप्रचारणै-
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्दशत्वं कृतवान् कुतः स्वयं
न वेद्मि विद्यासु चतुर्दशस्वयम् ॥"
चतुर्दशानां पूरणः । "तस्य पूरणे डट् ।" ५ । २ ।
४८ । इति डट् ।) पूरणार्थे अकारान्तोऽयं
शब्दः ॥ (यथा, रामायणे । २ । ११२ । २५ ।
"चतुर्दशे हि सम्पूर्णे वर्षेऽहनि रघूत्तम ! ।
न द्रक्ष्यामि यदि त्वान्तु प्रवेक्ष्यामि हुताशनम् ॥")
तद्वाचकानि । विद्या १ यमः २ मनुः ३ इन्द्रः ४
भुवनम् ५ ध्रुवतारकम् ६ । इति कविकल्पलता ॥
चतुर्दशी, स्त्री, (चतुर्दश + टित्त्वात् ङीप् ।)
तिथिविशेषः । सा तु चन्द्रस्य चतुर्दशकला-
क्रियारूपा । तत्पर्य्यायः । भूता २ । इति
तिथ्यादितत्त्वम् ॥ ("सा च शुक्ला पूर्णिमायुता
ग्राह्या युग्मात् कृष्णा पूर्व्वयुता ।
"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ।
उपवासादिकार्य्येषु एष धर्म्मः सनातनः ॥'
इति निगमवचनात् अपराह्णव्यापित्वे तु शुक्ल-
चतुर्दश्यपि पूर्व्वविद्धा ग्राह्या
'चतुर्दशी तु कर्त्तव्या त्रयोदश्या युता विभो ! ।
मम भक्तैर्महाबाहो ! भवेद्या चापराह्णिकी ।
दर्शविद्धा न कर्त्तव्या राकाविद्धा तथा मुने ॥'
इति स्कन्दपुराणात् मम भक्तैरिति ईश्वरोक्तेः
शिवव्रतविषयम् । त्रयोदश्यां दिवासत्त्वशुक्ल-
चतुर्दश्यभावे तु परग्रहणम् ।
'एकादश्यष्टमी षष्ठी उभे पक्षे चतुर्दशी ।
अमावास्या तृतीया च उपोष्याः स्युः परा-
न्विताः ॥'
एतद्विषय एव ।
'शिवा घोरा तथा प्रेता सावित्री च चतुर्दशी ।
पूर्व्वयुक्तैव कर्त्तव्या कृष्णामेव हि पारणम् ॥'
इति वचनम् ।" इति च तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"विरुद्धशीलः पुरुषः सरोष-
श्चौरः कठोरः परवञ्चकश्च ।
परान्नभोक्ता परदाररक्त-
श्चतुर्दशी चेत् जननस्य काले ॥"
मासविशेषे तत्र कर्म्माणि यथा । ज्यैष्ठशुक्ल-
चतुर्दश्यां श्रीकण्ठकसावित्र्यादिदेवतापूजा
स्वामिपूजा च ॥ भाद्रशुक्लचतुर्दश्यां अनन्त-
पूजा चतुर्दशपिष्टकभक्षणं डोरकबन्धनञ्च ॥
कार्त्तिककृष्णचतुर्दश्यां चतुर्दशशाकभक्षणं चतु-
र्दशदीपदानं यमतर्पणञ्च ॥ अग्रहायणशुक्ल-
चतुर्दश्यां गौरीपूजा पाषाणाकारपिष्टकभक्ष-
णञ्च ॥ माघकृष्णपक्षे रटन्त्याख्यचतुर्दश्यां काली-
पूजारुणोदये स्नानञ्च ॥ फाल्गुनकृष्णपक्षे शिव-
रात्र्याख्यचतुर्दश्यामुपवासः शिवपूजा च ॥ चैत्र-
शुक्लपक्षे मदनचतुर्दश्यां मदनवृक्षपल्लवेन काम-
देवपूजा । इति स्मृतिः ॥
चतुर्दोलं, क्ली, पुं, (चतुर्भिर्वाहकैर्दोल्यते उत्क्षिप्य
नीयते उह्यते इति यावत् । दोलि + कर्म्मणि
घञ् । यद्वा, चतुर्भिर्दण्डैरुपलक्षितं दोलं
दोलायमानयानविशेषः ।) स्वनामख्यातयान-
विशेषः । यथा,—
"राज्ञो यदिपदं यानं विशेषाख्यमलं विदुः ।
चतुर्भिरुह्यते यत्तु चतुर्दोलं तदुच्यते ॥
भोजस्तु ।
चतुर्भिर्वाहकैर्द्दण्डैः षड्भिः कुम्भैः सुसंस्थितैः ।
स्तम्भैरष्टाभिरुदितं चतुर्दोलमनुत्तमम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्व्विधानां भूपानां चतुर्दोलाः प्रकाशिताः ॥
त्रिहस्तसम्मितायामो द्विहस्तपरिणाहवान् ।
हस्तद्वयोन्नतः प्रोक्तश्चतुर्दोलो जयाश्रया ॥
चतुर्हस्तायतो यस्तु सार्द्धहस्तस्तदन्यथा ।
चतुर्दोलः समाख्यातः कल्याणस्तावदुन्नतः ॥
पञ्चहस्तायतो यस्तु त्रिहस्तपरिणाहवान् ।
तावदेवोन्नतो वीरश्चतुर्दोल उदाहृतः ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि यः ।
चतुर्दोलो ह्ययं सिंहस्तदर्द्धेनोन्नतः शुभः ॥
सर्व्वोऽपि द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः ।
आद्यः समरयात्रासु परः केलिवनाश्रये ॥
सर्व्वेषामेव काष्ठानां दृढः स्यादवधारणः ।
चन्दनेनैव घटना सर्व्वेषामुपयुज्यते ॥
गोलकं मकरश्रेणि कनकं सर्व्वधातुषु ।
कुम्भस्य पद्मकोषस्य शिखरेति यथाक्रमम् ॥
चैद्देशानां महीन्द्राणां चतुर्दोलेषु विन्यसेत् ॥
दर्पणपार्श्वचन्द्रस्य दंशः हैमो शुभ्रो गजः ।
अश्वः सिंहश्च तन्मार्गे आदित्यादिदशोत्तरान् ॥
मणिनियमस्तु दण्डवत् ॥
रक्तः शुक्लश्च पीतश्च कृष्णश्चित्रस्तथारुणः ।
नीलः कपिलधूम्रश्च पताकानान्तु संग्रहः ॥
चतुर्दोलः सपताकः शुभयानमिति स्मृतः ॥
मुक्तास्तवकैर्द्दशभिर्युक्तः स्याद्राजेशानाम् ।
चामरदण्डैर्द्दशभिर्दिग्जयिनां चतुर्दोलः ॥
चामरपत्रस्य पुच्छदेशे तु सर्व्वोपरि परिन्यसेत् ।
यात्राशिविरयं नाम्ना चतुर्दोलो महीभुजाम् ॥
स्तम्भपादरहितो निश्छदिरुक्तश्चतुर्दोलः मानं
पूर्व्ववत् ॥
स पुनर्द्विविधः प्रोक्तः सध्वजश्चापि निर्ध्वजः ।
ध्वजान् यत्र न्यस्यन्ति षड्वर्गविजयैषिणः ॥
दीर्घा मानन्तु चत्वारः स्वामिहस्तैकसम्मिताः ।
कोणेषु पश्चादग्रे च हस्तद्वयमितौ ध्वजौ ॥
सुवर्णं रजतं युग्मं त्रिविधानां महीभुजाम् ।
मणिचामरकुम्भानां खड्गादीनां विनिश्चयः ॥
चतुर्दोलध्वजे राज्ञो विज्ञेयो नवदण्डवत् ।
निर्ध्वजे च चतुर्दोले मानमन्यतमं शृणु ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि यः ।
विजयो नाम विख्यातश्चतुर्दोलो महीभुजाम् ॥
विजयो मङ्गलो भद्रो वितस्त्येकैकवर्द्धितः ।
त्रिविधानां महीन्द्राणां यानत्रयमुदाहृतम् ॥
अष्टाभिरुह्यते यस्तु अष्टदोलमुशन्ति च ।
सोपानद्वितयश्चात्र विज्ञेयं शिल्पिनिर्म्मितम् ॥
भोजस्तु ।
अष्टाभिर्वाहकैर्द्दण्डैः षड्भिस्तु दशभिर्घटैः ।
स्तम्भैस्तु दशभिर्ज्ञेयमष्टदोलं महीभुजाम् ॥
तद्भेदाः जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्व्विधानां भूपानामष्टदोलाः प्रकाशिताः ॥
षड्भिर्हस्तैर्म्मितायामः परिणाहश्चतुर्भुजः ।
चतुर्हस्तोन्नतो राज्ञामष्टदोलं जयं विदुः ॥
आयामपरिणाहाभ्यां पञ्चहस्तमितो हि यः ।
कल्याणाख्योऽष्टदोलोऽयं चतुर्हस्तमितोन्नतिः ॥
सप्तहस्तायतः कार्य्यः प्रवरे पञ्चहस्तकः ।
पञ्चहस्तोन्नतो वीरश्चाष्टदोलो महीभुजाम् ॥
आयामपरिणाहाभ्यामष्टहस्तमितो हि यः ।
सिंहनामाष्टदोलोऽयं विज्ञेयः षड्भुजोन्नतः ॥
सर्व्वोऽपि द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः ।
काष्ठवस्त्रघटादीनां मणीनां चामरस्य च ॥
चतुर्दोलवदुन्नेयो नियमोऽन्योऽपि सूरिभिः ।
पूर्व्ववन्निश्छदेर्म्मानं ध्वजमानमिहोच्यते ॥
दशध्वजास्तेषु चाष्टौ स्वामिहस्तद्वयोन्नताः ।
पश्चादग्रे ध्वजौ राज्ञश्चतुर्हस्तमितौ मतौ ॥
मणिचामरपत्राणां निर्णयो निष्पताकवत् ।
निर्ध्वजश्चाष्टदोलो यः शिबिकेति स गद्यते ॥
मणिकुम्भमुखादीनां नियमो नवदण्डवत् ।
इत्यष्टदोलकथनम् ॥ * ॥

[illegible]

चतुर्भुजो रसो नाम महेशेन प्रकाशितः।
क्रमेण शीलितं हन्ति इत्यमित्राश्रनिर्णया॥"

इति चतुर्भुजो रसः।

इति वैद्यकरसेन्द्रसारसंग्रहे उन्मादाधिकारे॥ स्त्रियां गायत्रीरूपा महाशक्तिः। यथा, देवीभागवते। १२। ६। ४७।

"चतुर्भुजा चारुरूपा चातुरी चरितप्रदा॥"

चतुर्भुजविशिष्टे, त्रि। यथा, देवीभागवते। १। १५। ५६।

"तदा प्रादुरभूत् भगवती प्रादुरास चतुर्भुजा।
शङ्खचक्रगदापद्मवराभयधरा शिवा॥")

चतुर्मुखः, पुं, (चत्वारि मुखानि अस्य। यद्वा चत्वारो वेदाश्चत्वारि मुखानीवास्य।) ब्रह्मा। इति शब्दरत्नावली॥ (यथा, रघुः। १०। २२।

"चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात्॥"

मिति शिवः।" इति तट्टीकायां मल्लिनाथः॥ यथा, महाभारते। १३। १७। ७६।

"चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च॥")

औषधविशेषः। यथा,—

"रसगन्धकलौहाभ्रं समं सर्वं विमर्दयेत्।
[illegible] कन्यारसेनापि मर्दितम्॥
[illegible] धान्यराशौ दिनत्रयम्।
[illegible] मन उद्धृत्य सर्वरोगेषु योजयेत्॥
[illegible] त्रिफलामधुसंयुतम्।
[illegible] स्वादेत् वलीपलितनाशनम्॥
[illegible] कामं पञ्चविधमथा।
[illegible] पाण्डुरोगान् प्रमेहकान्॥
[illegible] मन्दाग्निं चाम्लपित्तकम्।
[illegible] त्रिविधमथा॥
[illegible] सर्वानपि [illegible]।
[illegible] इत्यमित्राश्रनिर्णया॥
[illegible] पुष्परसकारणम्।
[illegible] लक्ष्मीकान्तेन सूचितम्॥"

इति रसेन्द्रसारसंग्रहे चतुर्मुखरसः॥

[illegible]

चतुर्व्यूहः, पुं, (चत्वारि व्यूहानि [illegible] चत्वारो वेदा एव व्यूहाणि [illegible]) ब्रह्मा। इति हलायुधः॥

चतुर्वर्गः, पुं, (चतुर्णां धर्मार्थकाममोक्षाणां समूहः।) धर्मार्थकाममोक्षम्। [illegible] २। ७। ५८॥ (यथा, रघौ। १०। २२।

"चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः।

चतुर्विद्यः, पुं, (चतस्रो विद्याः [illegible] यद्वा। ७। ३। ३१। इत्यस्य [illegible] कोक्तं यथा, "चतुर्वेदस्तोभयपराशेः वेदानधीते चतुर्वेदः स एव चातुर्वैद्यः। [illegible] विद्यस्येति पाठान्तरम्। चतुर्विद्य। वैद्यः।") चतुर्वेदवेत्ता। अस्य [illegible] चतुर्वेदः। चातुर्वैदः। चातुर्वैद्यः। व्याकरणम्॥

चतुलः, त्रि, (चत + उलच्।) [illegible] संप्रसारे उणादिसूत्रतः॥

चतुष्कं, क्ली, (चत्वारोऽवयवा यस्य [illegible] चतुष्कं चतुरवयवम्। यथा, मनुः। [illegible]

"प्राक्प्रशा[illegible] स्त्रियश्चैव [illegible] च—
एतत् [illegible] निद्राचतुष्कं [illegible]

गृहविशेषः। यथा, कुमारे। ५। [illegible]

"चतुष्कपुष्पप्रकराविकीर्णयोः
परोऽपि को नाम तवानुमन्यते।"

यष्टिभेदः। इति शब्दरत्नावली॥

(पुंसि तु राजविशेषः। यथा, राजतरङ्गिण्याम्। ८। २८४६।

"अथ पाञ्चालहरिर्योऽभूच्चतुष्कः [illegible]

चतुष्की, स्त्री, (चतुष्क + स्त्रियां ङीप्।) [illegible] मसारि इति भाषा॥ पुष्करिणीभेदः। मेदिनी। के। ८७॥

चतुष्टयं, क्ली, केन्द्रम्। इति [illegible] (चतुःसंख्या। यथा, कुमारे। ७। ११।

"तस्मात् प्रदेशाच्च वितानवन्तं
युक्तं मणिस्तम्भचतुष्टयेन।"

[illegible]

…ः । २ । १ । १७ ॥ (यथा, मनुः । ४ । ३९ ।
…न्दरज्ञान् दैवतं विप्रं घृतं मधु चतुष्पथम् ।
…दक्षिणानि कुर्व्वीत प्रज्ञातांश्च वनस्पतीन् ॥”)
…ष्पथः, पुं, (चत्वारः पन्थानो ब्रह्मचर्य्यादय
…श्रमा यस्य । “ऋक्पूरिति ।” ५ । ४ । ७४ ।
… इति अः ।) ब्राह्मणः । इति मेदिनी ।
… २७ ॥
…ष्पदः, पुं, (चत्वारि पदानि यस्य ।) पशुः ।
(यथा, बृहत्संहितायाम् । २१ । १७ ।
“तरवश्च निरुपसृष्टाङ्कुरा नरचतुष्पदा हृष्टाः ॥”)
… करणविशेषः । इति मेदिनी । दे । ४८ ॥ तत्र
…जातस्य फलं यथा, कोष्ठीप्रदीपे ।
“चतुष्पदभवो मर्त्त्यः सदाचारविवर्ज्जितः ।
…स्वल्पवित्तः क्षीणदेहश्चतुष्पादधनान्वितः ॥”
…मेषवृषसिंहराशयः मकरपूर्व्वार्द्धं धनुःपरार्द्धञ्च ।”
इति दीपिका ॥
(चतुष्पदविशिष्टे । त्रि । यथा, महाभारते ।
… १ । ९० । ११ ।
“चतुष्पदं द्विपदञ्चापि सर्व्वमेवं भूता गर्भभूता भवन्ति ॥”
…व्याधिनिवारणोपायाः । यथा,—
“वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः ।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः ॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक् ।
व्याधिमल्पेन कालेन महान्तमपि साधयेत् ॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः ।
उद्गातृहोतृब्रह्माणो यथाध्वर्य्युं विनाध्वरे ॥
वैद्यस्तु गुणवानेकस्तारयेदातुरान् सदा ।
प्लवं प्रतितरैर्हीनं कर्णधार इवाम्भसि ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि ।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते ॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
… मनस्कान्तं गन्धवर्णरसान्वितम् ॥
…दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
…समीक्ष्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥”
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥)
चतुष्पदी, स्त्री, (चत्वारः पादा यस्याः । “संख्यासु-
पूर्व्वस्य ।” ५ । ४ । १४० । इति अन्तलोपः ।
“पादोऽन्यतरस्याम् ।” ४ । १ । ८ । इति ङीप् ।
“पादः पत् ।” ६ । ४ । १३० । इति पदादेशः ।) चौपदी इति
… इति मेदिनी । द । ४८ ॥ … पदम् । इति … १ … ।
(यथा, … ॥”)

चतुष्पाटी, स्त्री, चतुर्णां वेदानां पाठो यस्यां सा ।
छात्राध्ययनस्थानम् । चौपाटी इति भाषा ॥
इति लोके प्रसिद्धिः ॥
चतुष्पाणिः, पुं, (चत्वारः पाणयो हस्ता यस्य ।)
विष्णुः । इति हारावली । ९ ॥ (चतुर्हस्त-
विशिष्टे, त्रि ॥)
चतुःसमं, क्ली, (चतुर्णां चन्दनागुरुकस्तूरी-
कुङ्कुमानां समः समभागो यत्र । यद्वा, चतुर्भि-
श्चन्दनादिभिः समं एकत्र सहावस्थानं यत्र ।) इति
मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपम् । इति
हेमचन्द्रः । ३ । ३०३ ॥ औषधविशेषः । यथा,
सुखबोधे ।
“लवङ्गं सैन्धवं पथ्या यमानी च चतुःसमम् ।
आमशूलविबन्धघ्नं पाचनं भेदि शोथनुत् ॥”
अन्यच्च ।
“जातीफलं त्रिदशपुष्पसमन्वितञ्च
जीरञ्च टङ्कयुतं चरकेण चोक्तम् ।
चूर्णानि माक्षिकसितासहितानि लीढ़ा
आमातिसारमखिलं गुरु घ्नन्ति शूलम् ॥”
चतुस्त्रिंशत्, स्त्री, चतुरधिका त्रिंशत् । चौत्रिश्
इति भाषा ॥ इति ज्योतिषम् ॥ (यथा, ऋग्वेदे ।
१ । १६२ । १८ ।
“चतुस्त्रिंशद्वाजिनो देवबन्धो-
र्वङ्क्रीरश्वस्य स्वधितिः समेति ॥”)
चतुस्त्रिंशज्जातकज्ञः, पुं, (चतुस्त्रिंशज्जातं जानातीति ।
ज्ञा + “आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।)
बुद्धभेदः । इति हेमचन्द्रः । २ । १४७ ॥
चतूराजी, स्त्री, (चतुर्भिरङ्गैः राजते दीप्यते
इति । राज् + “कर्म्मण्यण् ।” ३ । २ । १ ।
इति अण् । स्त्रियां ङीप् ।) चतुरङ्गक्रीड़ा-
विशेषः । इति तिथ्यादितत्त्वम् ॥
चत्वरं, क्ली, (चत्यते स्वीक्रियते इति । चत + “कृ
गृ शॄ वृ चतिभ्यः ष्वरच् ।” उणां । २ । १२१ ।
इति ष्वरच् ।) स्थण्डिलम् । होमार्थपरिष्कृता
भूमिः । अङ्गनम् । इत्यमरः । २ । ७ । ८ ॥ (चतरा
…टान चाताल इति च भाषा ॥ (चतरयां
रथ्यानां सङ्गमः । इति शब्दार्थचिन्तामणिः ॥
यथा, महाभारते । ३ । १५ । २० ।
“चतुरस्रासु सर्व्वासु चत्वरेषु च कौरव ! ।
समं सम्भूत राजेन्द्र ! प्रकृष्टगजवाजिमत् ॥”
… मनोज्ञेषु … । भट
… १ । ६ । ११ ।
इति भाषा ॥ यथा, … अमर्षित-
मानाम् ।
“… ॥”)
… ॥”)
चत्वारः, त्रि, (… प्रथमानिमित्त …
… इति भाषा । … चतुःसंख्या । …
… इति भाषा । इति … । महादेवानि ।
… ॥ … … ।
… ।

चत्वारिंशत्, स्त्री, (चत्वारो दशतः परिमाण-
मस्याः । “पङ्क्तिविंशतीति ।” ५ । १ । ५९ ।
इति निपातनात् साधुः ।) संख्याविशेषः ।
इति ज्योतिषम् ॥ चल्लिश इति भाषा ॥ (यथा,
भागवते । ४ । १ । ६० ।
“तेभ्योऽग्नयः समभवन् चत्वारिंशच्च पञ्च च ॥”)
चत्वालः, पुं, (चत्यते प्रार्थ्यते स्वीक्रियते होमायेति ।
चत + “स्याचतिस्वृलिरिति ।” वालच् न वृद्धिः ।)
होमकुण्डम् । दर्भः । इति मेदिनी । ले । ८६ ॥
गर्भः । इति विश्वहेमचन्द्रौ ॥
चद, ए ञ याचे । इति कविकल्पद्रुमः ॥ (भ्वां-
उभं-द्विकं-सेट् ।) ए, अचदीत् । ञ, चदति
चदते । इति दुर्गादासः ॥
चद, इ ह्लादे । दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-
परं-अकं-सेट् ।) इ, कर्म्मणि चन्द्यते । ह्लादो
हर्षः । इति दुर्गादासः ॥
चदिरः, पुं, (चन्दति दीप्यते स्वशरीरादिना इति ।
चदि + बाहुलकात् किरच् निपातनात् नस्य
लोपः ।) हस्ती । चन्द्रः । कर्पूरम् । भुजगः ।
इति संक्षिप्तसारे उणादिवृत्तिः ॥
चन, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-
अकं-सेट् ।) चनति । इति दुर्गादासः ॥
चन, म हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-
सकं-सेट् ।) म, चनयति । इति दुर्गादासः ॥
चन, व्य असाकल्यम् । अकात् स्याम् । …
किञ्चन । इत्यमरभरतौ ॥ (“किमः …
चिच्चनौ ।” इति सूत्रेण ।) प्रत्ययोऽयं …
अस्तकिंशब्दादुत्तरे भवति । इति मुग्ध…
चनूष, उ हतौ । इति कविकल्पद्रुमः ॥ (भ्वां-…
सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, …
चाक्त । इतिरोगनिः । इति दुर्गादासः ॥
चन्दः, पुं, (चन्दयति आह्लादयति यद्वा
दीप्यते इति । चदि वा चन्द + प…
चन्द्रः । इति भरतधृतशब्दार्णवः ॥
चन्दकः, पुं, (चन्दयति आह्लादयति …
चदि ह्लादे + णिच् + “ण्वुल्तृचौ ।” …
इति ण्वुल् ।) मत्स्यविशेषः । …
भाषा ॥ तस्य गुणः । …
भिष्यन्दित्वञ्च । इति राजवल्लभः …
पाटः ॥ (…)
चन्दनः, पुं, क्ली, (चन्दयति आह्ला…
आह्लादे – णिच् + ल्युः ।) …
(यथा, गीतगोविन्दे । ४ । …
“चन्दनचर्च्चित…
तथा च …
“…
… इत्यमरः । … । १ । ६ । १३१ …
… । २ । ६ । १३१ …
… ६ …
… ८ …
… १२ …
… १४ …

नम् १८ शीतगन्धः १९ । इति राजनिर्घण्टः ॥ तैलपर्णिकः २० चन्द्रद्युतिः २१ । इति भावप्रकाशः ॥ भद्रश्रियम् २२ हितम् २३ हिमम् २४ । इति रत्नमाला ॥ पटीरः २५ वर्णकः २६ भद्राश्रयः २७ सेव्यः २८ रौहिणः २९ । इति शब्दरत्नावली ॥ याम्यः ३० मौलसारः ३१ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतलत्वम् । स्वादे कियत्कषायत्वम् । पित्तभ्रान्तिवमिज्वरक्रिमितृष्णासन्तापशान्तिकारित्वम् । हृद्यत्वम् । वक्त्ररोगनाशित्वम् । शरीरकान्तिवृद्धिकारित्वम् । लेपने कामवृद्धिकारित्वम् । अतिगौरभ्यदत्वञ्च । इति राजनिर्घण्टः ॥ रूक्षत्वम् । तिक्तत्वम् । आह्लादनत्वम् । लघुत्वम् । श्रमशोषरोगविषश्लेष्मदाहनाशित्वञ्च ॥ * ॥ श्रेष्ठचन्दनलक्षणं यथा,—

"स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् ।
ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ॥"

इति भावप्रकाशः ॥

वानरविशेषः । इति हेमचन्द्रः । ३ । ३०५ ॥

चन्दनं, क्ली, (चन्दते आह्लादते अनादनेन वा इति । चदि आह्लादे + णिच् + ल्युट् ।) भद्रकाली । इति मेदिनी । ने । ११ ॥

चन्दनगोपी, स्त्री, (चन्दनमपि गोपायति सुगन्धादिना रक्षतीति । गुप + अण् । ततो ङीप् । यद्वा, चन्दनवद् गुप्यति दीप्यते इति । अच् ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥

चन्दनधेनुः, स्त्री, (चन्दनेन अङ्किता धेनुः । मध्यपदलोपिकर्मधारयः ।) पतिपुत्रवन्मृतनार्य्युद्देश्यकोत्सृष्टचन्दनाङ्कितवत्सतरीसर्गः । तत्प्रमाणप्रयोगौ लिख्येते ।

"नत्वा शिवं चन्दनचर्चिताया
धेनोः प्रदाने सविधिप्रयोगम् ।
रत्नाकरादैर्मिलितं विलोक्य
तनोति वाचस्पतिरल्पबुद्धिः ॥

अथ चन्दनधेनुदानविधिः । तत्र रत्नाकरे देवलः ।
अविद्धकर्णी तु या नारी पुत्रिणी म्रियते यदि ।
चन्दनासाम्याङ्किता धेनुमाचार्य्याय प्रदापयेत् ॥
पतिपुत्रवती नारी म्रियते यावत्तयोः ।
वृषं न चोत्सृजेत् पुत्रः पिता यावच्च जीवति ॥
तथा कर्म्मोपदेशिन्यां ब्राह्मणसर्व्वस्वे च छन्दोगपरिशिष्टवचनानि । यथा स्मृतिः ।
पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः ।
चन्दनेनाङ्कितां धेनुं तस्याः स्वर्गाय कल्पयेत् ॥
तथा कात्यायनः ।
धेनुं चन्दनमालिप्य यो दद्यात् ब्राह्मणाय वै ।
यदि नारी स्त्री चेत् तदापि स्वर्गमाप्नुयात् ॥
तथा हारीतः ।
न कुर्य्याद्वृषोत्सर्गं यावत् पितापि जीवति ।
चन्दनेनाङ्कितां धेनुमाचार्य्याय प्रदापयेत् ॥ * ॥
सम्बन्धो भर्त्तृपुत्री च गृहस्वामी गृहमुच्यते ।
अन्यः स्त्रीभिः सर्व्वत्र वृषोत्सर्गः प्रशस्यते ।
[illegible] वृषोत्सर्गं पृथक् पृथक् ॥

अभावे चाग्निगोत्राणां यूपं कुर्य्याद्विधानतः ॥
वृषोत्सर्गे तु वृषमौलिकः ।
तरुणी रूपसम्पन्ना सुशीला च पयस्विनी ।
न्यायार्जिता गृहे जाता देया सा श्रोत्रियाय गौः ॥
नदीतीरे वने गोष्ठे देवतायतनेषु च ।
शौण्डिक्षेत्रे कुरुक्षेत्रे राजद्वारे चतुष्पथे ॥

एषु वचनेषु वृषोत्सर्गनिषेधचन्दनधेनूत्सर्गविधोर्युगपदुपसंहारदर्शनात् वृषोत्सर्गस्थाने प्रधानतया चन्दनधेनूत्सर्गः प्रतीयते । अतोऽस्य वृषोत्सर्गकार्य्यकारित्वात् तत्फलहेतुत्वं लभ्यते । एकोद्दिष्टं न कुर्व्वीत व्यामिनाश्चैव सर्व्वदा । अहन्येकादशे प्राप्ते पार्व्वणन्तु विधीयते ॥ इति श्राद्धविवेकधृतलोगाक्षिवचने चिरस्थायिनां एकोद्दिष्टनिषेधपार्व्वणविध्योर्युगपदुपसंहारात् एकोद्दिष्टस्थाने पार्व्वणमिव । यद्वा पतिपुत्रवतीरूपप्रेतविशेषाधिकारकं न चोत्सृजेदिति निषेधचन्दनधेनूत्सर्गविधिभ्यां प्रेतमात्राधिकृतसामान्यवृषोत्सर्गविधिवगतफलभावनाकरणीभूतवृषकर्म्मैकत्वागमनूद्य तत्कर्म्माभूतवृषमपहाय तत्स्थाने धेनुमात्रगुणविधिर्लाघवादवगम्यते । पशुयागे सामान्यविध्यवगताग्नीषोमीयाग्निकरणीभूतपशुस्थाने गोदोहनेन प्रणयेदिति विशेषविधिना गोदोहगुणविधिवत् । नालाभेऽपि प्रवेशिनीम् । उपोष्य द्वादशीं तत्र तयोरथान्तु पारणमित्यत्र एकादशीरूपनिमित्तस्थाने द्वादशीमात्रगुणविधिवच्च । अन्यथा धेनूत्सर्गस्य पृथक्कर्म्मत्वे फलभावना तत्करणनियोज्यानां पृथक्कल्पने गौरवं स्यात् । उक्तविधिनिषेधयोरुपसंहारवैयर्थ्यञ्च स्यात् । ततश्च करणैक्यात् फलैक्यमिति । चन्दनधेनूत्सर्गेऽपि प्रेतत्वविमुक्तिपूर्व्वकस्वर्गप्राप्तिः फलम् । एवं कपिलमन्त्रस्यापि स्वर्गप्रार्थनाया अपि तथैव तात्पर्य्यम् । तथा जातूकर्ण्यवचनस्यापि स्वर्गपदयोरपि तथैव तात्पर्य्यबोधम् । भूतार्थानां विधिशेषत्वेनैव जैमिन्युक्तप्रामाण्येन प्रकृते सिद्धे विधिशेषत्वे लाघवात् । मापितमपि शुद्धेन शुद्धं पापक्षतापि वेति कात्यायनवचनस्यापि पापस्य प्रेतत्वे एव तात्पर्य्यदर्शनाच्च । अत्र यद्यपि पतिपुत्रवतीत्वम् पतिपुत्रवत्त्वस्य विशेष्यीभूतकर्म्मान्वयिमरणान्वयित्वेन न विशेषणत्वं किन्तूपलक्षणत्वमेव तत्तच्च कात्यायनवचने देवलवचने इतिवत् कादाचित्कत्वादप्रतिपत्तेः पतिपुत्रवत्त्वेनैव प्रयोग उपपद्यते । तथापि अग्रतः पद्भ्यां भर्त्तुरग्रत इत्याभ्यां मरणकालिकौ पतिपुत्रौ अवगम्यते । गर्भे गोष्ठे इतिवत् । अथवा परार्द्धान्वयेन धेनूत्सर्गकालिकौ । भर्त्तापुत्रश्च ताता कश्चित् तथा धेनुर्विराड्ढीना । इति कपिलवचने अपुत्रवत्यः पुत्रवत्यो धेनूत्सर्गनिषेधस्य प्रसक्ततया सपत्नीपुत्रकपुत्रकधेनूत्सर्गनिषेधप्राप्तौ तद्दृष्ट्या पतिपुत्रवतीत्वस्य सपत्नीपुत्र-

पत्नीपदलं सत्वं वाच्यम् । पुत्रिणीत्वादावपि तथार्थः । अतुल्यत्वेन अविद्धकर्ण्याः पतिपुत्रवत् निवृत्तप्रकाशाधायकत्वात् गत्वा मत्वा सप्तमात् प्रतियोगित्वं तत्सम्बन्धाभावयोरपि विरोधित्वमते तु अजातव्यक्तेरहं तथात्वेऽपि तस्या धेनुर्विशेषेणापि अनुचितादेव दाननिन्दा न चन्दनधेनुदानस्तुतिपरा । यथा पौर्णमास्यां क्रियते प्रतिपद्यपि प्रमत्तापि निन्दा एकादश्यादौ पथकं देवकर्मनारायोगविशिष्टपरा । वा वैराग्ये यो गिरा गिरेति कृपावत्यपि गिरेत् प्रत्यवसानिन्दा ऐरं प्रजागिरेदिति विधेः स्तुतिपरा । यथा शाबरभाष्ये । न हि निन्दा निन्द्यं प्रवर्त्तते अपि तर्हीतरत् स्तौति । इति । शुद्धधर्म्मानुगुणदोषारोपणदोषाय । अत्र स्वैव कार्त्तिक्यादिवृषोत्सर्गस्य स्थाने विधीयते इति वाच्यम् । तथाचराणां भावात् । प्रसूत म्रियत इति संसर्ग विभक्ता वर्त्तमानसामीप्येऽविशस्थितेश्च । ये तु बहुकालेऽतीतेऽपि पुत्रिणी भवेत् । सर्व्वाकालेन पुत्रैः पतिर्व्वतीभर्त्तुरिति मनुना पुत्रवतीत्वम् । पतिपुत्रवतीत्वञ्च सपत्नीपुत्रवती स्त्री ब्रूते तेऽतीतकालाः । पुत्रवतीति तथा मतुपा पतिपदस्यान्वये तदसमावेशे ननु वृषतुल्ययोर्व्वर्त्तनं वृषः स्यादिति वृषोत्सर्गे तथा पुंसां स्त्रीणां स्त्रीसम्बन्धे इति भविष्यपुराणे हेतुदानमिदं प्रतीयते । वृषोत्सर्गे दक्षिणादानस्य विशेषत्वात् । प्रधानकर्म्मान्तरं गौरवात् । न च दक्षिणाङ्गत्वेन फलासङ्गतिः । यस्य पर्य्यवसानं भवति न स पापश्लोकं श्रुणोतीतिवत् रिति चेत् न । वृषोत्सर्गदक्षिणात्वेनाङ्कितधेनुदानस्य प्रकरणान्तराभावेन प्रकरणान्तरन्यायतः प्रधानत्वसिद्धेः । वृषोत्सर्गवत्त्वेनानुवर्त्तमानशिष्टाचारात् । धेनुदानस्य वृषोत्सर्गविधानामसङ्गत्या । कपिलादौ चन्दनधेनुदानस्यापीति कल्पनायां प्रत्यक्षदक्षिणादानविधानाच्च ॥ * ॥

यथा कपिल उवाच ।
अतः परं प्रवक्ष्यामि धेनुदानमनुत्तमम् ।
पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः ।
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत् ।
तथा ।
अविद्धकर्णी तु या नारी पुत्रिणी म्रियते यदि ।
चन्दनासाम्याङ्किता धेनुमाचार्य्याय निवेदयेत् ।
साध्वी पतिव्रता नारी म्रियते यावत्तयोः ।
वृषं नैवोत्सृजेत् पुत्रो यावत् पिता च जीवति ।

NOTICE.

SABDAKALPADRUMA.

To expedite the completion of the main work, arrangements have been made to divide the [illegible] two series, the first commencing with the initial letter is to terminate in 'ন', the second starting from [illegible] bring the work to a conclusion. The numbers of the two series will generally issue synchronically and [illegible] bers in future can expect to have numbers of the two series simultaneously.

বিজ্ঞাপন।

শ্রীমদ্দেবীভাগবত।

এই বিরল-প্রচার মহার্হ ধর্ম্মগ্রন্থখানি অতি প্রাচীন ও উপাদেয় এবং এ পর্য্যন্ত ইহা বঙ্গাক্ষরে মুদ্রিত হয় নাই। ইহার অন্তর্গত [illegible] বর্ণনা করা বড় সহজ নহে। কেবল সংক্ষেপে এইমাত্র বলিলেই বোধ করি গ্রন্থের যথেষ্ট পরিচয় দেওয়া হইবে যে, [illegible] অষ্টাদশ মহাপুরাণের অন্তর্গত পঞ্চম পুরাণ বলিয়া নির্দ্দেশ করেন ; সেইরূপ সম্প্রদায় [illegible] অষ্টাদশ মহাপুরাণের অন্তর্গত পঞ্চম পুরাণ। এ সম্বন্ধে তাঁহারা যে সকল যুক্তি প্রদর্শন করেন তাহা [illegible] এই মহাপুরাণখানিও অস্মদ্দেশপ্রচলিত শ্রীমদ্ভাগবতের ন্যায় দ্বাদশ স্কন্ধে ও ১৮০০০ অষ্টাদশ সহস্র শ্লোকে বিরচিত এবং [illegible] ইহার রচনা এরূপ প্রাঞ্জল যে অধ্যয়ন করিলেই প্রাচীন বলিয়া বোধ হয়। ইহা দেবী ভগবতীর মাহাত্ম্য ও [illegible] পরিপূর্ণ। [illegible] হয়। তাহা প্রসিদ্ধ টীকাকার নীলকণ্ঠকৃত দেবীভাগবতের মহাপুরাণত্ব সংস্থাপন সম্বন্ধীয় বিচার পাঠে সমস্ত অবগত হইতে পারিবেন।

যদিচ শব্দকল্পদ্রুমের কিয়দংশ প্রচারিত হওয়ার পর আমাদিগের অন্তঃকরণে একটী অভিনব ভাবের উদয় হইয়াছিল, অর্থাৎ [illegible] প্রচার অথচ উপাদেয় বিদ্বজ্জনীর স্পৃহণীয় পুরাণশাস্ত্র যথাসম্ভব টীকা ও অনুবাদ সহ প্রচার করিয়া উক্ত বিষয়ের অভাব মোচনের নিমিত্ত [illegible] কিন্তু, কালের কুটিলগতি দেখিয়া সহসা প্রবৃত্ত হইতে সাহস করিতে পারি নাই। পরন্তু, সেই সর্ব্বনিয়ন্তা [illegible] পরমেশ্বরের কৃপায় [illegible] ও গ্রাহক মহোদয়গণের হস্তে সমর্পণের পরই আমার অগ্রজ রায় বরদাপ্রসাদ বসু বাহাদুর এবং আর কতকগুলি দেশহিতৈষী [illegible] সহকারে অগ্রসর হইয়া পূর্ব্বসঙ্কল্পিত বিষয়ের মধ্যে প্রথমত এই অনর্ঘ্য দেবীভাগবতেরই মূল, নীলকণ্ঠ বিরচিত টীকা, [illegible] বাঙ্গালা অনুবাদ প্রচারিত হইয়া সাধারণের সুগোচর ও সুখলভ্য হওয়া আবশ্যক বিবেচনায়, আমরা ইহার মূল, টীকা ও [illegible] আমরা যথাসাধ্য বর্গীয় 'ব' ও অন্তঃস্থ 'ব' প্রভেদ করিতে যত্ন করিতেছি।

১। কার্ত্তিক মাস হইতে প্রতিমাসে রয়াল ৮ পেজি ৯ ফর্ম্মায় এক এক খণ্ড প্রকাশিত হইতেছে। কোন কোন মাসে দুই বা [illegible] হইয়া সমগ্র গ্রন্থখানি দুই বৎসরের মধ্যে সম্পূর্ণ হইবে। অনুমান ৫৬ খণ্ডে গ্রন্থখানি সম্পূর্ণ হইবে।

২। প্রতি খণ্ডের মূল্য ॥০ আনা, কিন্তু নিয়মিত গ্রাহকগণের পক্ষে ।৵০ আনা ; এবং ১২ খণ্ডের অগ্রিম মূল্য ৪৲ টাকা ; [illegible] এক কালীন অগ্রিম মূল্য ১৫৲ টাকা ; অসমর্থ পক্ষে এখন ৮৲ টাকা এবং বাকি ৭৲ টাকা আগামী আশ্বিন মাসের মধ্যে দিলেই চলিবে।

৩। যিনি এক খণ্ড দেবীভাগবত লইবেন তাঁহাকে আদ্যোপান্ত সমস্ত খণ্ডই গ্রহণ করিতে হইবে। অগ্রিম মূল্য না পাইলে কাহাকেও [illegible] হইবে না।

৪। কোন গ্রাহক স্থান পরিবর্ত্তন করিলে তাঁহার নূতন ঠিকানা পত্র দ্বারা জানাইবেন। গ্রহণাভিলাষিগণ স্ব স্ব নাম ধাম সহর জানাইয়া [illegible]

ঈশ্বরোপাসনা।

[illegible] পরিণামবিরস [illegible] বিষয় ভোগবাসনা [illegible] হইয়া মন প্রতি নিয়ত নিত্য সন্তোষস্বরূপ [illegible] মহাত্মাদিগের [illegible] নিমিত্ত [illegible] পরমার্থ [illegible] করিতে পারি তাহা হইলেও [illegible] বেদান্ত, ভগবদ্গীতা, [illegible], যোগসংহিতা, তন্ত্র ও পুরাণ প্রভৃতির [illegible] উপাসনা [illegible] করি, পরন্তু, [illegible] উহার বঙ্গভাষায় [illegible] সংস্কৃত উপাসনা [illegible] হইল। ইহাতে জ্ঞান, ভক্তি ও কর্ম্মের কি প্রভেদ, [illegible] বিশেষত [illegible] ভক্তি ও জ্ঞানপ্রদায়িনী [illegible] পরমার্থ [illegible] ইহার আদ্যোপান্ত পাঠ করিলে আপনাকে কৃতার্থম্মন্য [illegible]

এই [illegible] মাসে প্রকাশিত হইয়াছে। মূল্য ।০ চারি আনা মাত্র।

শ্রীহরিচরণ [illegible]

[illegible] কার্য্যালয়।

शब्दकल्पद्रुमः।

अर्थात्

एतद्देशस्थसमस्तकोषाभिधानशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-
सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-
तन्त्रागम-काव्यालङ्कार-छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-
स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-वाहादुरेण

विरचितः।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
ग्रन्थशेषपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

द्वितीयः काण्डः।

यअनवर्गः। चतुर्द्दश-पञ्चदश-खण्डौ।

कलिकाता-राजधान्यां

रामनारायण-यन्त्रे मुद्रितः। ७१ नं० पाथुरियाघाट-ष्ट्रीट्-स्थितभवनात् प्रकाशितश्च। शकाब्दाः १८१०

PRINTED BY K. P. BASU, RAMNARAYAN PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET. CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71. Pathuriaghata Street, Calcutta: and at the Baptist Mission Press, No. 24. Lower Circular Road Calcutta: Price for Subscribers in India, Re. 1. and Countries out of India 3s. for each number.

मृतपुत्रा च या नारी संगृहीता तु या भवेत्।
तस्या धेनुर्न दातव्या वृषोत्सर्गो विधीयते ॥
अपुष्पिता मृता काचित्तस्या धेनुर्विगर्हिता।
दद्याद्धेनुं सुतो ज्येष्ठः कनिष्ठो वृषमुत्सृजेत् ॥
द्वयोः सोदरयोरेको भवेत् ज्येष्ठः प्रधानतः।
त्रयाणां द्वौ सुतौ ज्येष्ठौ चतुर्णाञ्च त्रयः स्मृताः ॥
पञ्चानां सोदराणाञ्च त्रयो ज्येष्ठाः प्रकीर्त्तिताः।
ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः ॥
हेमशृङ्गीं खुरे रूप्यैः सुशीलां वस्त्रसंयुताम्।
कांस्योदरीं ताम्रपृष्ठां घण्टाचामरभूषिताम् ॥
प्रवालमालिकां दद्यात् कर्णयोरुभयोरपि।
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥
गवां लोकमवाप्नोति दिवि देवैश्च मोदते।
चन्दनेनाङ्कितां धेनुं दत्त्वा गच्छेत् सुरालयम् ॥
तावत्तिष्ठति स्वर्लोके यावदाभूतसंप्लवम्।
न चोत्सर्गो वृषस्यात्र वत्सवत्यन्वितस्य च ॥
वृषोत्सर्गविधानेन कर्त्तव्यं सर्व्वकर्म च।
मा नस्तोकेति मन्त्रेण दृष्टे वृषाप्यसीति च ॥
धेनोश्च सव्यदिग्देशे तु त्रिशूलाङ्कं समालिखेत्।
वामभागे विशेषोऽयं दृष्टे चक्रं समालिखेत् ॥
तत्राभ्यर्च्चयेद्विप्रानाचार्य्यस्तु विधानवित्।
ततो वै संलिखेच्चक्रं पञ्चाङ्गुलप्रमाणकम् ॥
शूलं षडङ्गुलं कार्य्यं दृष्टे वामे यथाविधि।
पूर्व्वाग्राभिमुखीं धेनुं यजमानोत्तरामुखः ॥
मस्तकादिक्रमेणैव प्रतिमन्त्रैः प्रपूजयेत् ॥” * ॥

शिरसि ओं ब्रह्मणे नमः। ललाटे ओं वृषभध्वजाय नमः। कर्णयोः ओम् अश्विनीकुमाराभ्यां नमः। चक्षुषोः ओं शशिभास्कराभ्यां नमः। जिह्वायां ओं सरस्वत्यै नमः। दन्तेषु ओं वसुभ्यो नमः। ओष्ठयोः ओं सन्ध्यायै नमः। ग्रीवायां ओं नीलकण्ठाय नमः। हृदि ओं स्कन्दाय नमः। रोमकूपेषु ओम् ऋषिभ्यो नमः। दक्षिणपार्श्वे ओं कुवेराय नमः। वामपार्श्वे ओं वरुणाय नमः। रोमाग्रेषु ओं रश्मिभ्यो नमः। ऊरुषु ओं धर्म्माय नमः। जङ्घासु ओम् अधर्म्माय नमः। श्रोणितटे ओं पितृभ्यो नमः। खुरमध्ये ओं गन्धर्व्वेभ्यो नमः। खुराग्रे ओम् अप्सरोभ्यो नमः। लाङ्गूले ओं द्वादशादित्येभ्यो नमः। गोमये ओं महालक्ष्म्यै नमः। गोमूत्रे ओं गङ्गायै नमः। पयोधरेषु ओं चतुःसागराय नमः।

एवमङ्गानि संपूज्य पठेन्मन्त्रं समाहितः।
ओम् इन्द्रस्य च शचीन्द्राणी विष्णोर्लक्ष्मीश्च या स्मृता।
रुद्रस्य गौरी या देवी सा देवी वरदास्तु मे ॥
ओं या लक्ष्मीर्लोकपालानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥
ओं देहस्था या च रुद्राणी शङ्करस्य सदा प्रिया।
धेनुरूपेण सा देवी तस्याः शान्तिं प्रयच्छतु ॥
ओं स्वर्गदेवमयी देवी सर्व्वलोकमयी तथा।
धेनुरूपेण सा देवी मम स्वर्गं प्रयच्छतु ॥

गृहीत्वार्घ्यञ्च पाद्यञ्च उत्तरीयेणालङ्कृताम्।
दीयते ब्राह्मणायैषा आचार्य्याय महात्मने ॥
सर्व्वविशिष्टां तां धेनुं दत्त्वा तर्पणमारभेत्।
पुच्छं गृहीत्वा मित्रादीन् वृषोत्सर्गविधानतः ॥
ऐशान्याञ्चालयेत् किञ्चिदाचार्य्याय च दक्षिणाम्।
वृषभञ्च ततो दद्यादाचार्य्याय गुणान्वितम् ॥
पूजयेद्ब्राह्मणांश्चैव वस्त्रमाल्यादिभिस्ततः।
कांस्यपात्रं वस्त्रयुग्मं सुवर्णञ्च विशेषतः ॥
आचार्य्याय प्रदातव्यं प्रत्यर्थे कनकं तथा।
आगतान् पूजयेद्भक्त्या यथाशक्ति विधानतः ॥
दीनार्त्तकृपणांश्च अन्नाद्यैः परितोषयेत् ॥”

इति कापिले धेनुदानप्रमाणम् ॥ * ॥

पुस्तकान्तरे पाठाधिक्यं यथा,—
“एकादशाहे प्रेतायाः षण्मासे चाब्दिके तथा।
त्रिपक्षे मासिके वापि दद्याद्गां चन्दनाङ्किताम् ॥
तथा वराहपुराणम्।
अयने विषुवे षष्ठ्यां युगाद्यापूर्णिमासु च।
दर्शे मन्वन्तरे चैव धेनुं दद्यात् सुपूजिताम् ॥

ननु आद्यश्राद्धे त्रिपक्षे वेत्यादिना आद्यश्राद्धकर्त्तव्यनित्यवृषोत्सर्गकालस्य परमरकालो गौणः। न वा सर्व्वे कालाः स्युः। तत्र नाद्यः त्रिपक्षादौ शिष्टाचारविरोधात्। नापि द्वितीयः त्रिपक्षादौ नित्यत्वबोधकाभावात्। वस्तुतः आद्यश्राद्धे वृषोत्सर्गस्य नित्यत्वं त्रिपक्षादौ काम्यत्वम्। आद्यश्राद्धपदं अशौचान्तद्वितीयदिनपरम्। अशौचान्ताद्द्वितीयेऽह्नीत्यादिवाक्यैकवाक्यत्वात्। अत्र च आद्यश्राद्धस्य विप्रपतितत्वेन एकादशाहादौ क्रियमाणत्वे वृषोत्सर्गमपि न कुर्य्यात्। आद्यश्राद्धदिने वृषोत्सर्गाकरणे त्रिपक्षाद्यन्यतमकालेऽपि वृषोत्सर्गस्यावश्यप्रेतत्वपरिहारकत्वेन तस्य पुनः संवत्सरसाध्यसकृत्कृतस्य नित्यत्वं काम्यम्। एवं धेनुदानस्यापि। अतएव पूर्व्वसंवत्सरे मलमासपातेऽपि प्रागकृतश्चेत् कार्य्य एव इति नवीना जगुः। एकवर्षकालेऽनेकवृषोत्सर्गेऽपि शिष्टाचार एकदिनेऽपि। तथा हि सर्व्वलोकागमनफलश्रुतेः काम्यत्वेन यो भूय आरभते तस्मिन् फले विशेष इति न्यायादविरोधः ॥ ननु नैमित्तिकत्वात् कथमावृत्तिः सकृत्कृते कृतः शास्त्रार्थ इति न्यायात्। न चैकत्र क्रियाद्वयमिति वचनाच्च। अत्रायं विशेषः। काम्यनैमित्तिकं फलविशेषार्थं भूयः कार्य्यं नैमित्तिकमात्रं सकृदेव। किञ्च। संक्रान्त्यादिनिमित्तकस्नानादमपि पुनः पुनः स्यात्। नैवं तत्र पितृत्वनिस्तारप्रधानफलस्य सकृदेव चरितार्थ इति ॥ * ॥ यद्दोषाणि सर्व्वाण्येतानि वचनानि निर्म्मूलाधिकरणन्यायगम्यानि। तथा हि निर्म्मूलाधिकरणे निर्म्मूलमूलाग्रपदेवताना-न्नधिकार इति शास्त्रार्थे उक्तम्। अत्र [illegible] [illegible] प्रकरणविरहात् [illegible] [illegible] [illegible]

स्वपितुः पितृकृत्येषु अधिकारो न विद्यते। इति छन्दोगपरिशिष्टे अभिधानात्तदन्तर्गतमुक्तं जीवत्पितृकश्चैतानन्यांश्चेतर इति कात्यायनसूत्रे च जीवत्पितृकस्य पितृतर्पणनिषेधात् वृषोत्सर्गे तदङ्गभूततत्पुच्छगलितोदकतर्पणविरहात् साङ्गकरणासामर्थ्ये वृषोत्सर्गानधिकारः। अतएव द्वैतनिर्णयेऽपि। अनूचितस्त्रियां करणीभूतगर्भाधेन यागवद्वृषोत्सर्गस्य बाध उक्तो वाचस्पतिमिश्रेण। धेनुदानाङ्गतर्पणे तु प्रधानाधिकारश्रुतेः जीवत्पितृकाधिकृतविशेषविधानाबाधिकार एवाभ्युदयिकश्राद्धवत् जन्मनाम्नुपनयनाङ्गस्पर्शिशिरोवपनवच्च। अयन्तु सामान्यशास्त्रोपजीवित्वेन निषेधः पर्य्युदास एव। स तु यदि पतिपुत्रवद्भिन्नाया वृषोत्सर्गं कुर्य्यादित्येव मातृसदा पुत्र इत्यादिवचनभागवैयर्थ्यं स्यात्। यदि च जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इत्येव मातृसदा पूर्व्वभागवैयर्थ्यं स्यात्। यदि वा पतिपुत्रवत्या जीवत्पितृकपुत्रभिन्नो वृषोत्सर्गं कुर्य्यादिति विशिष्टरूपस्तथापि पतिपुत्रवत्यास्तदुभयरहितायाश्च जीवत्पितृकपौत्रादिना वृषोत्सर्गः स्यात्। स चायुक्त एव प्रागुक्तवचनन्यायविरोधात्। तस्मात् समुदायवचनसार्थक्याय पतिपुत्रवद्भिन्नाया वृषोत्सर्गं कुर्य्यात्। तथा जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इति वचनन्यायसंवादाद्वाक्यद्वयमेव सिध्यति। प्रमाणवन्तीरवस्य सर्व्वाङ्गीकृतत्वात्। दर्शपौर्णमासयोः षट्प्राधान्यापूर्व्ववत्। गयवीक्तदेवलादिवचने ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानत इत्यन्तकापिलसकलवचनपर्य्यालोचनया कनिष्ठपुत्रवतीभिन्नपतिपुत्रवतीतरजनस्यकापिलप्रतिप्रसूतकनिष्ठपुत्रभिन्नजीवत्पितृकात् अन्यो जनो वृषोत्सर्गं कुर्य्यात्। इति सामान्यत एव वृषोत्सर्गविधिः। तथा पतिपुत्रवत्या ज्येष्ठपुत्र एव चन्दनाङ्कितधेनुमुत्सृजेदिति विधिश्च सिध्यति। ततश्च पतिपुत्रवत्याः कनिष्ठपुत्रसत्त्व एव तेन तदन्यजीवत्पितृकेण वा वृषोत्सर्गः कार्य्यः। कनिष्ठपुत्राभावे तु न केनापि। एवं मत्स्यादिना चन्दनधेनुदानमिति। प्रतिप्रसूतकनिष्ठान्यजीवत्पितृकेण न केनापि वृषोत्सर्गः कार्य्य इत्यपि च पर्य्यवसितम्। वस्तुतस्तु पतिपुत्रवत्या वृषोत्सर्गनिषेधे तत्पुत्रस्य जीवत्पितृकत्वेनानधिकार एव हेतुः न तु स्त्रियाः पतिमत्त्वं पुत्रवत्त्वं वा। [illegible] पतिगर्भे [illegible] वृषोत्सर्गाभावः। तत्पुत्रस्य पितुः सत्त्व एवानधिकारात् तस्याः वृषोत्सर्गाभावश्च। न वा तदुभयमत्वं निमित्तं [illegible] [illegible] [illegible]

गौरवाच्च। यस्तु जीवत्पितृकस्य वृषोत्सर्गनिषेधे प्रतिप्रसवः पृथगुपसंहारः सोऽपि तस्याः पुत्रानधिकारमात्रप्रयुक्तसिद्धवृषोत्सर्गाभावभागित्वानुवादः। पूर्व्ववाक्यावगतधेनुदानस्य वृषोत्सर्गस्थानीयत्वज्ञापनार्थ एवेति प्रागपि निरूपितम्। तत्रोक्तवचने तिर्य्यगधिकरणन्यायप्राप्तं जीवत्पितृकस्य वृषोत्सर्गकर्त्तृत्वाभावमनूद्य सपतिकाया वृषोत्सर्गस्थाने चन्दनाङ्कितधेनूत्सर्ग एव विधीयते। एतेन वृषोत्सर्गकर्त्तरि कपिलप्रतिप्रसूतसपतिकाद्वृषोत्सर्गाकृतिमत्कनिष्ठपुत्राभ्यजीवत्पितृकेतरत्वविशेषणं सपतिकाया वृषोत्सर्गस्थाने ज्येष्ठपुत्रस्यैव चन्दनाङ्कितधेनूत्सर्गाभावश्च लभ्यते। अतो जीवत्पितृकेण काम्यवृषोत्सर्गः पतिते प्रव्रजिते वा पितरि जीवति पितामहादिवृषोत्सर्गश्च न कार्य्यः। एवं सपतिकाया अपि पुत्रस्य कर्म्मयोग्यत्वे असत्त्वे वा पत्या कन्यादिना वा वृषोत्सर्गः कार्य्य एवेति स्थितम्। इदन्तु रत्नाकरहलायुधाचार्य्यचूडामणिविद्याभूषणप्रभृतिमहादेवभट्टाचार्य्यप्रभृतीनामपि सम्मतं तेषां एषक् एषक् पद्धतिरपि प्रचरति। कश्चिद्देशे वाचस्पतिभट्टाचार्य्यस्यापि सम्मतपद्धतिर्दृश्यते। अत एवाच विशेषादर्शनमाचारोऽप्याचार एव। अत्र भविष्योक्तप्रकारस्तु वैकल्पिक एव। वृत्तिग्रासे विकल्पो हि आकाङ्क्षापूरणे सतीति जैमिन्युक्तेः। तत्रत्यपूजाहोमादङ्गैव विशेषमत्तत्वोक्तेः। कापिलकल्पेन वृषोत्सर्गधर्म्मातिरेकेण विशेषोक्तनिरासाच्च॥॥ सम्प्रति विचारितकापिलकल्पप्रयोगोऽभिधीयते यथा। गोष्ठात्तरौ विनागडुक्ते प्रागुदक्प्रवणं देशं गोमयेनोपलिप्य कृतनित्यक्रिय आचान्तः कुशहस्तो द्विजाधाः प्राङ्मुखः ओं तद्विष्णोः परमं पदं इति विष्णुं स्मृत्वा नत्वा च उदङ्मुखः ओं अरिहन्ताय कृष्णतिलजलपूर्णताम्रपात्रमाराय विदिशाङ्गरेशान् तत्पचान्द्रमासोलेखेन अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रायाः प्रेतायाः अमुकायाः अद्यो- याभ्याद्वितीयेऽहि अमुकगोत्रायाः प्रेतायाः अमुकायाः प्रेतलोकविमुक्तस्वर्गलोकगमनकामः चन्दनाङ्कितधेनूत्सर्गधेनुदानकर्म्माहं करिष्यामीति संकल्पयेत्। ततस्तत्त्वमेव माध्यं सप्यमिति। ततः स्वस्तिवाचनपूर्व्वकं पठेत्। ... पदमं प्रकरणम्। तत्र उत्तराभुखं ... तमनुत्तरेण तन्त्सभीरं आचमनीय प्राङ्मुखः प्राङ्मुखे ... ओं आभरणमसि इति प्रतिवचनं ... बहुर्घिनो ब्रह्मा ततःपरं उत्सृजति। ततः ... अद्यार्थयामी भवाम इति वदेत्। ओम् ... प्रतिवचनम्। ततो ब्रह्मदक्षिणामुपदानानान्तर ... अद्यामुकमासि अमुकपक्षे अमुकतिथौ ... यायाः प्रेतायाः अमुकायाः अद्यो-

याभ्याद्वितीयेऽहि अमुकगोत्रममुकप्रवरं श्री-अमुकदेवशर्म्माणं त्वामहम् चन्दनाङ्कितधेनुदानाङ्गहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्धादिभिरभ्यर्च्याहं वृणे इति ब्रह्माणं वृणुयात्। ओं वृतोऽस्मीति प्रतिवचनम्। ओं यथाविहितं ब्रह्म कर्म्म कुरु। ओं यथाज्ञानं करवाणीति प्रतिवचनम्। स्वयं ज्ञानाशक्तौ ब्रह्मकर्म्म कारयेत्। अथ ब्रह्मादिकर्म्मकरणायेति वदेत्। होमासामर्थ्ये होतारं वृणुयात्। तत्र होतृकर्म्म कारयेति विशेषः। एवं तन्त्रधारकाचार्य्यमपि। आचार्य्यान्तराभावे ब्रह्मैवाचार्य्यत्वेनापि वरणीयः। तत्र ब्रह्माचार्य्यकर्म्मकरणायेति विशेषः। एवं प्रागुक्तवत् सदस्यवरणमपि। इच्छाहुत्यादिमानन्तु याजमानिकमेव सर्व्वम्। ततः पुण्याहस्वस्त्यृद्धिवाचनं कृत्वा चन्दनाङ्कितधेनुदाननिमित्तकहोमीयहविरग्नये सकामो भारतनामोच्चारणं कुर्य्यात्। ततो यजमानो होता वा गायत्र्या गोमूत्रं ओं गन्धद्वारेत्यादिना गोमयं ओम् आप्यायस्वेत्यादिना दुग्धं ओं दधिक्राव्ण इत्यादिना दधि ओं तेजोऽसीत्यादिना घृतं ओं देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति कुशोदकञ्च शोधयित्वा गायत्र्या सर्व्वमेकीकृत्य तेन वेदीमभ्युक्ष्य तत्र घटान् संस्थाप्य गणेशं प्रभृतीन् विष्णुञ्च संपूजयेत्। ततो हस्तप्रमाणं स्थण्डिलं शर्कराङ्गारास्थिकेशतुषादिरहितं पूर्व्वोत्तरप्रवणं समं वा गोमयेनोपलिप्य तत्र स्वगृह्योक्तविधिनाग्निं संस्थाप्य स्वस्वगृह्योक्तवृषोत्सर्गपद्धतिक्रमेण कर्म्म कृत्वा प्राङ्मुखीं धेनुमग्निसमीपं नीत्वा ओं मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नोऽश्वेषु रीरिषः। वीरान्मा नो रुद्रभामिनोऽवधीर्हविष्मन्तः सदमित्त्वा हवामहे। इति मन्त्रेण धेनोर्वामसक्थिनि षडङ्गुलं त्रिशूलं चन्दनेन कुशेन लिखेत्। वीरान्मा न इति सामगानाम्। यजुषान्तु मा नो वीरानिति मन्त्रभागे पाठः। ततः ओं इषोऽसि भागुना द्युमन्तं त्वा हवामहे यजमानः सहं यम्। इति मन्त्रेण दक्षसक्थिनि षडङ्गुलं चारुहोमं चक्रञ्च तथैवाचार्य्यो लिखेत्। अस्मिन्मध्ये अयेवतारे अवत्सधेनुमौलिके यूपमारोपयेत्। ततः स्वस्वगृह्योक्तविधिना हुत्वा वह्निं मानयेत्। ततः सितवाससा अलमनमनीय गन्धचन्दनपुष्पाक्षतसिन्दूरगोरोचनादिभिः सत्त्वं पूजयेत्। रूद्रसूक्तेन मन्त्रेण कांस्यक्रोडेन ताम्रपृष्ठेन घण्टाचामराभ्याञ्च यथायोग्यं तथा पाद्यादिभिरभ्यर्च्य स्वस्वगृह्योक्तयामक्रमात् धेनुं भूषयित्वा धारयित्वा च प्राङ्मुखीं धेनुं शुक्लवाससा यूपे बध्नीयात्। ततो यजमान उत्तराभिमुखः धेनोः संस्कारादिक्रमेण तत्तन्मन्त्रैः पूजयेद्यथा। शिरसि ओं ब्रह्मणे नमः। एवं ललाटे वृषभध्वजाय नमः। कर्णयोः अश्विनीकुमाराभ्याम्। चक्षुषोः

शशिभास्कराभ्याम्। जिह्वा... वसुभ्यः। ओष्ठयोः सन्ध्ये... कण्ठाय। हृदि स्कन्दाय। ... दक्षपार्श्वे कुबेराय। वामपार्श्वे ... रश्मिभ्यः। स्तनयोः धर्म्माय। ... श्रोणीतटे पितृभ्यः। गुरुम... खुराग्रेषु अमरेभ्यः। लाङ्गूले ... गोमये महालक्ष्म्यै। गोमूत्रे ... चतुःसागराय। एवं संपूज्य पठेत्। ओम् इन्द्रस्य च सन्निधौ विद्यो...

गन्धस्य देवी या गौरी सा देवी ...
ओं या लक्ष्मीर्लोकपालानां या च दे...
...
धेनुरूपेण सा देवी मम पापं व्यपोहतु।
ओं देवस्य या च वराकी मङ्गल ...
...
धेनुरूपेण सा देवी तस्याः शान्तिं प्रयच्छतु।
ओं सर्व्वदेवमयी दोग्ध्री सर्व्वलोकहितोद्य...
धेनुरूपेण सा देवी तस्याः सर्व्वं प्रयच्छतु।

ततः ओम् आचार्य्याय नमः इत्यनेन सम्प्रदानब्राह्मणं पाद्यादिभिः संपूज्य तं ... ब्राह्मणाय नमः इति तद्देवतां संपूज्य ओं ... ङ्कितसवत्सधेनवे नमः इत्यनेन ... नैवेद्यगन्धपुष्पैर्धेनुं संपूज्य संप्रोक्ष्य च ... हस्ते जलं दत्वा कुशतिलजलान्यादाय ... सत्द्यामुके मासि अमुके पक्षे अमुक ... गुकगोत्रायाः प्रेतायाः अमुकायाः ... द्वितीयेऽहि अमुकगोत्रायाः प्रेतायाः ... प्रेतलोकविमुक्तस्वर्गलोकगमनकामो ... सालङ्कारां चन्दनाङ्कितसवत्सधेनुं ... अमुकगोत्राय श्रीअमुकदेवशर्म्मणे ... ब्राह्मणाय तुभ्यं ददानीति ब्राह्मण... दद्यात्। ततः सम्प्रदानब्राह्मणः इदं ... ओमित्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा च ... पठेत्। ततो धेनुरियं ... यथाशक्त्यं कामस्तुतिञ्च पठेत्। ... वेदे। ओं क इदं कस्मा अदात् ... दात् कामो दाता कामः प्रति... समुद्रमाविशत् कामेन त्वा प्रति... तते। यजुर्व्वेदे तु। ओं द्यौष्ट्वा ... पृथिवी त्वा प्रतिगृह्णातु कोऽदात् ... कामः कामायादात् कामो दाता ... ग्रहीता कामैतत्ते तव कामप्रसादात् ... ऋग्वेदे तु। सामगानान्तु। ओं ... द्यौस्त्वा परिददातु पृथिवी त्वा प्र... इदमधिकम्। ततो यजमानः ओं ... सतैतत्सालङ्कारचन्दनाङ्कितसवत्सधेनु... मेधः साद्गुण्यार्थं दक्षिणामिदम् ... विष्णुदैवतं अमुकगोत्राय श्रीअमुकदेव... आचार्य्याय ब्राह्मणाय तुभ्यमहं ... चार्य्याय दद्यात्। आचार्य्यस्तु ओमित्युक्त्वा...

[illegible] । [illegible] स्वीयसञ्जीवनाङ्गेन [illegible] सर्वाणि [illegible] । [illegible] आगृह्यात् [illegible] प्रसिद्धम् [illegible] रामकीर्तिर्मता [illegible] । [illegible] तु [illegible] प्रवालमीव [illegible] । किन्तु [illegible] चन्दनम् [illegible] । [illegible] ॥" इति [illegible] पाञ्चालिकाद्यार्थविशेषितः चन्द्रमाङ्गमपद्ध-[illegible] समासः ॥

चन्दनपुष्पं, क्ली, (चन्दनमिव सुगन्धि पुष्पं यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥

चन्दनशारिवा, स्त्री, (चन्दनवर्णा शारिवा । शाकपार्थिवादिवत् समासः ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥

चन्दनसारः, पुं, (चन्दनस्येव सारो यस्य ।) यव-क्षारम् । इति राजनिर्घण्टः ॥

चन्दना, स्त्री, (चन्दयति आह्लादयति स्वगन्धा-दिनेति । चदि आह्लादे+णिच्+ल्युः । स्त्रियां टाप् ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥ नदीविशेषः । सा तु [illegible] प्रसिद्धा ॥

चन्दनाचलः, पुं, (चन्दनस्य चन्दनवृक्षाणामचलः पर्वतः । चन्दनाचलः पर्वत इत्यर्थः ।) मलय-पर्वतः । इति जटाधरः ॥

चन्दनाद्रिः, पुं, (चन्दनस्य चन्दनवृक्षाणामद्रिः पर्वतः ।) मलयपर्वतः । इति त्रिकाण्ड-शेषः ॥

चन्दनी, स्त्री, (चन्दयति आह्लादयति जलादिदर्शने-नेत्यर्थः । चन्दन+ङीप्) नदीविशेषः । इति मेदिनी । ने । ९० ॥ (यथा, गो: रामायणे । ४ । ४० । २० ।

"दधिरां कुटिलाश्चैव चन्दनीं चायगां तथा ॥")

चन्दनीया, स्त्री, (चन्द्यते दीप्यतेऽनया । चदि+कर्मणि अनीयर् ।) गोरोचना । इति राज-निर्घण्टः ॥

चन्दिरः, पुं, (चन्दन्ति दृप्यन्ति लोका येन । चदि आह्लादे+"इषिमदीति ।" उणा० । १ । ५१ । इति किरच् ।) चन्द्रः । हस्ती । इति मेदिनी । रे । १५२ ॥

चन्द्रं, क्ली, (चन्दति दीप्यते इति । चदि+"स्फायितञ्चीति ।" उणा० । २ । १३ । इति रक् ।) स्वर्णम् । शुक्रम् । इति राजनिर्घण्टः ॥ (वृत्त-विशेषः । यथा, वृत्तरत्ने ।

"द्विजवरगणयुगलपरिकलय कर-
मधनगयुगलमिह गन्धयुगमपि वितर ।
फणिनृपतिभणितमिति चन्द्रमिदमिति प्रगुत
सकलकविकुलहृदयमोदकरमयतगुत ॥")

चन्द्रः, पुं, (चन्दयति आह्लादयति चन्दति दीप्यते इति वा । चन्द+"स्फायितञ्चीति ।" उणा० । २ । १३ । इति रक् ।) देवताविशेषः । चाँद इति भाषा । तत्पर्यायः । हिमांशुः १ चन्द्रमाः २ इन्दुः ३ कुमुदबान्धवः ४ विधुः ५ सुधांशुः ६ शुभ्रांशुः ७ ओषधीशः ८ निशापतिः ९ अब्जः १० जैवातृकः ११ सोमः १२ ग्लौः १३ मृगाङ्कः १४ कलानिधिः १५ द्विजराजः १६ शशधरः १७ नक्षत्रेशः १८ क्षपाकरः १९ । इत्यमरः । १ । ३ । १३—१६ ॥ दोषाकरः २० निशीथिनी-नाथः २१ शर्वरीशः २२ एणाङ्कः २३ शीत-रश्मिः २४ । इति शब्दरत्नावली ॥ समुद्रनवनीतः २५ सारसः २६ श्वेतवाहनः २७ नक्षत्रनेमिः २८ उडुपः २९ सुधासूतिः ३० तिथिप्रणीः ३१ अमतिः ३२ चन्दिरः ३३ चित्राटीरः ३४ पक्ष-धरः ३५ ऋक्षः ३६ तमोपहः ३७ राजा ३८ रोहिणीशः ३९ अत्रिनेत्रजः ४० अब्जः ४१ सिन्धुजन्मा ४२ दशाश्वः ४३ दक्षजामाता ४४ सा: ४५ नारायणेन्दुः ४६ निशामणिः ४७ । इति जटाधरः ॥ मृगलाञ्छनः ४८ दर्शविमृत् ४९ छायामृगधरः ५० ग्रहनेमिः ५१ दाक्षायणी-पतिः ५२ लक्ष्मीसहजः ५३ सुधाकरः ५४ सुधाधारः ५५ शीतभानुः ५६ तमोहरः ५७ तुषारकिरणः ५८ हरिः ५९ हिमद्युतिः ६० द्विजपतिः ६१ विश्वप्सा ६२ अमृतदीधितिः ६३ हरिणाङ्कः ६४ रोहिणीपतिः ६५ सिन्धुनन्दनः ६६ तमोनुत् ६७ एणतिलकः ६८ कुमुदेशः ६९ क्षीरोदनन्दनः ७० कान्तः ७१ कलावान् ७२ यामिनीपतिः ७३ सिप्रः ७४ मृगपिप्लुः ७५ सुधानिधिः ७६ तुङ्गी ७७ पक्षजन्मा ७८ अब्दः ७९ अत्रिनयनसम्भवः ८० पीयूषमहाः ८१ शीतमरीचिः ८२ शीतलः ८३ । इति शब्दरत्ना-वली ॥ त्रिनेत्रचूडामणिः ८४ अत्रिनेत्रप्रभवः ८५ सुधाङ्गः ८६ परिज्ञा ८७ बलक्षगुः ८८ मुग्धो-पतिः ८९ यज्वनाम्पतिः ९० पर्वधिः ९१ क्लेदुः ९२ जयन्तः ९३ तपसः ९४ खचमसः ९५ विकसः ९६ । इति त्रिकाण्डशेषः ॥ दशवाजी ९७ श्वेत-वाजी ९८ अमृतः ९९ कौमुदीपतिः १०० कुमुदिनीपतिः १०१ भपतिः १०२ दक्षजापतिः १०३ ओषधीपतिः १०४ कलाभृत् १०५ शशभृत् १०६ एणभृत् १०७ छायाभृत् १०८ अत्रि-दृग्जः १०९ निशारत्नम् ११० निशाकरः १११ अमृतः ११२ श्वेतद्युतिः ११३ । इति हेमचन्द्रः । २ । १९ ॥ * ॥ तस्योत्पत्तिर्यथा,—

"ब्रह्मणो मानसः पुत्त्रस्त्वत्रिर्नाम महातपाः ।
सद्धकामः प्रभा पतुम ! तपस्तेपे सुदुष्करम् ॥
त्रीणि वर्षसहस्राणि दिव्यानीति न: श्रुतम् ।
ऊर्द्ध्वमाचक्रमे तस्य रेतः सोमत्वमीयिवत् ॥
नेत्राभ्यां तस्य सुस्राव दशधा द्योतयद्दिशः ।
तं गर्भं ब्रह्मणादिष्टा दश देवी दधुर्दिशः ॥
संगत्येव महाराज ! नैव ताः समशक्नुवन् ।
यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः ॥
ततस्ताभिः सहैवासौ निपपात वसुन्धराम् ।
पतितं सोममालोक्य ब्रह्मा लोकपितामहः ॥
रथमारोपयामास [illegible] हिताय [illegible] ।
स तेन रथमुख्येन सागरान्तां वसुन्धराम् ॥
त्रिःसप्तकृत्वोऽतियशाश्चकाराभिप्रदक्षिणम् ।
तस्य यद्रेचितं तेजः पृथिवीमन्वपद्यत ॥
ओषध्यस्ताः समुद्भूता याभिः सन्धार्यते जगत् ।
स लब्ध्वा महता [illegible] वर्द्धितः स्वयम् ॥"
तस्य सोमत्वप्राप्तिः [illegible] यथा,—
"[illegible] पापस्यापनोदिनम् ।
[illegible] सोमः पूर्णमाप्रोति वसुः ॥"
इत्यग्निपुराणे ज्योतिःशास्त्रम् ॥
तस्य रोहिण्यादिसप्तविंशतिभार्याकथनं यथा, वह्निपुराणे ।
"सप्तविंशतिमाद्यास्तु स्वकन्या दक्षकन्यका ददौ ।
रोहिण्यामेव सततं चक्रे मैत्रं स वासव ॥
दृष्ट्वा तदिन्दुमभ्येत्य तथा विगतस्पृहाः ।
भर्तारं चापसदलं भाषणात् तत्र रोहिणीम् ॥
स्त्रियस्त्वेत्र भजन्ते नैव तथा वयं प्रिय ! ॥
तत् श्रुत्वा चन्द्रं दक्षः सोममाह भजस्व भोः ।
स्त्रियो गच्छ समात्वं शुद्धिर्न्यैष मानद ! ॥
त्वद्धर्षं मानस्य एव सोमः सर्वेषु रोहिणीम् ।
गच्छेत्यवसानपि पुन्हा देवमुखीषु च ॥
प्रतापेन त्वं न भविता ज्यामवं यद्गंगोरतिः ।
यक्ष्मणा च परिग्रस्तो भव त्वं सोमरोगज: ॥
मायाशुक्लत्तिनिर्लज्जमानसानाम् गन्धर्वाः कन्याः स्निग्धः ।
विनयं कुरुतां प्राप्ता: सोऽयमेव नः पतिः पितः ! ।
स यदं तेन तपसो विगतः सुयनिराकृताः ॥
उवाच दक्षकाः मर्त्याः ग्रामो मे माग्यपा भवेत् ।
मासमध्ये मासमेकं महं त्वं स क्षमेत चैं ॥
क्षयं क्रमेण प्राप्नोतु पक्षमेकं च यस्य यथा ।
इतं प्रायं मध्येच द्वादशे यक्ष्मयः ॥
तथैव राजते सोमः चपत्नी दक्षदुहितुः ॥"
स च गौरवर्णः पाण्डुकीयस्रौ वैश्यजातिस्तस्य गुरु-कर्कटराशिवगशिरोनधरौ अलयवरसुक्ता-गैरिकादिधातुसर्पाणामधिपतिः । व्याह्निभूमि-चारी तपस्वी अपराह्णकाले प्रबलः श्लेष्मप्रकृतिः स्थूलो युवा शुभग्रहः शुभाश्च । इति ताजक-जातकादयः ॥ क्षीणाङ्गः शशी पापः । इति समयाङ्गतम् ॥ * ॥ कर्पूरम् । स्वर्णम् । (यथा, ऋग्वेदे । १ । १४१ । १२ । [अचन्द्ररथः ॥")
"उतनः सुद्योत्मा जीराश्वो होता मन्द्रः श्रव-णलम् । काम्पिल्यः । इति मेदिनी । रे ३१ ॥ द्वीप-विशेषः । इति शब्दमाला ॥ विसर्गः । इति तन्त्रम् ॥ कमनीयः । मेचकः । स तु वर्हचन्द्रकः । इति हेमचन्द्रः ॥ रक्तरजतम् । तत्तु-श्लोयसुक्ता-फलम् । (योगोक्तेडानाडी । यथा, हठयोग-प्रदीपिकायाम् । २ । ७ ।
"बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ॥"
"चन्द्रेण चन्द्रनाड्या ।" इति तट्टीका ॥ भूमध्य-भागस्थसोममण्डलम् । यथा [illegible] ३ । ३६ ।
"चन्द्रात् सर्वतिथः [illegible] नरवारुणी ॥"
"चन्द्रात्भ्रूमध्यरन्ध्र [illegible] सोमात् ।"
तट्टीका ॥)
[illegible] भरतपुरस्थादि: ॥

चन्द्रकं, क्ली, (चन्द्र इव चन्द्रप्रभा इव कायतीति । कै+कः । वर्णसाहश्यात्तथात्वम् ।) मितमरिचम् । इति राजनिर्घण्टः ॥

चन्द्रकः, पुं, (चन्द्र इव कायति प्रकाशते इति । कै +कः ।) वर्हनेत्रम् । मयूरपुच्छेर चाँद इति भाषा । तत्पर्य्यायः । मेचकः २ । इत्यमरः । २ । ५ । ३१ ॥ (यथा, गीतगोविन्दे । २ । ३ । "चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ॥") नखः । इति शब्दचन्द्रिका ॥ मत्स्यविशेषः । चाँदा माछ इति भाषा । अस्य गुणाः । चन्द्रनभिष्यन्दित्वम् । मधुरत्वम् । बलवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायः । चलत्पूर्णिमा २ चन्द्रचचला ३ चन्द्रिका ४ । इति शब्दरत्नावली ॥ (मण्डलम् । यथा, माघे । ५ । ४० । "यां चन्द्रकैर्मदजलस्य महानदीनां नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः ॥" "चन्द्रकैश्चन्द्राकारैर्मण्डलैर्महानदीनाम् ।" इति मल्लिनाथः ।) चन्द्रशब्दात् स्वार्थे के चन्द्रश्च ॥

चन्द्रकला, स्त्री, (चन्द्रं चन्द्राकारं हस्तभागं कलयतीति । कलि+अण् टाप् च ।) मगढवाद्यम् । वाद्यामतस्यः । इति शब्दरत्नावली ॥ (चन्द्रस्य कला ।) चन्द्रस्य षोड़शभागेषु भागः । तद्यथा,—

"पूषा यशा सुमनसा रतिः प्राप्तिस्तथा धृतिः ।
ऋद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी ।
अङ्गिरा शशिनी चेति छाया सम्पूर्णमण्डला ।
तद्वच्चैवामृता चेति कलाः सोमस्य षोडश ॥"

आसां प्रयोजनं तिथिभेदे स्त्रीणामङ्गविशेषे स्थितस्य कामस्य प्रपञ्चादिश्चविन्दुप्रत्येकस्वरयुक्तमसोऽन्तनतत्प्रत्येककलानामस्वैर्मन्त्रैश्चालनम् । इति कामशास्त्रम् ॥ * ॥ तन्त्रोक्ता कला यथा,

"अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः ।
आसां प्रयोजनं कलावर्णादिन्यासादौ पूजनम् ॥"
इति तन्त्रयामलम् ॥

[...]न्द्रः । यथा, कथासरित्सागरे । १ । ३६ ।
[...]श्च च दृष्टमस्त्येन नाधिगतो मयाम्बुका मया ।
[...]ौ जाता हिमाद्रिस्तमर्थे चन्द्रकला यथा ॥")

[...]न्तं, क्ली, (चन्द्रवत् कान्तं कान्तिः कम[...]ना यस्य ।) श्वेतरक्तचन्दनम् । कैरवम् । [...] रत्नमाला ॥

[...]न्तः, पुं, (चन्द्रः कान्तः प्रियो यस्य ।) कैरवम् । [...] इव कान्तः कान्तियुक्तः । चन्द्रः कान्तः [...]रो अधिष्ठातृदेवोऽस्येति वा ।) मणिभेदः । [...]देवी । ते । १६५ । अस्य पर्य्यायाः । चन्द्र[...]. चान्द्रः ३ चन्द्रोपलः ४ । इति हेम[...] ४ । १३२ ॥ इन्दुकान्तः ५ चन्द्रशाला ६ [...]ः ७ शीतांशुमणि ८ चन्द्रिकाद्रावः ९ [...]ः १० । (यथा, पञ्चतन्त्रे । १ । ८८ ।

"प्रदोषका यत्र न सन्ति हेहे
गार्भिक रत्नानि समुद्गतानि ।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः ॥")

अस्य गुणाः । शिशिरत्वम् । स्निग्धत्वम् । ग्रहराक्षसालक्ष्मीनाशित्वम् । शिवप्रीतिकरत्वम् । मङ्गलत्वञ्च ॥ मतान्तरे गुणाः । विमलत्वम् । सघुत्वम् । पित्तरक्तपित्तादाहकामलदाहरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥

चन्द्रकान्ता, स्त्री, (चन्द्रः कान्तः प्रियो यस्याः ।) रात्रिः । इति शब्दचन्द्रिका ॥ (चन्द्रस्य कान्ता ।) चन्द्रपत्नी च ॥

चन्द्रकालानलं, क्ली, चक्रविशेषः । यथा,—

"चन्द्रकालानलं चक्रं व्योमाकारं लिखेद्बुधः ।
चतुर्दिक्षु त्रिशूलानि मध्यभिन्नानि कारयेत् ॥
पूर्व्वत्रिशूलमध्यस्थं दिग्नक्षत्रादि लिख्यते ।
त्रिशूले च बहिर्मध्ये मध्ये बहिस्त्रिशूलके ॥
मृत्युस्त्रिशूले नामर्क्षे मध्यमं बहिरर्क्षके ।
क्षेमलाभजयप्रश्नः नामर्क्षे चन्द्रगर्भगे ॥
वर्जनीयं प्रयत्नेन प्रथमाष्टविपञ्चकम् ॥"
इति समयामृतम् ॥

चन्द्रकी, [पुं], स्त्री, (चन्द्रको विद्यतेऽस्येति इन् । चन्द्रक+ङीष् ।) मयूरः । इति त्रिकाण्डशेषः ॥

चन्द्रकुण्डः, पुं, (चन्द्रस्य कुण्डः चन्द्ररश्मिनिर्म्मितः कुण्डो वा । चन्द्राधिष्ठातृकः कुण्ड इत्यर्थः ।) कामरूपस्थसरोवरविशेषः । (यथा, कालिकापुराणे कामाख्यातन्त्रनिर्णये ८२ अध्याये ।

"चन्द्ररश्मिसमुद्भूत ! चन्द्रकुण्ड ! महोदधे ! ॥")

चन्द्रकूटः, पुं, (चन्द्राख्यः कूटः पर्व्वतः । यद्वा, चन्द्रः कूटे शृङ्गे यस्य । प्रतिदिने चन्द्रदर्शनकरणादेवास्य तथात्वम् ।) कामरूपस्थपर्व्वतभेदः । यथा,—

"पूर्व्वे चाग्निगिरेः शैलश्चन्द्रकूट इति स्मृतः ।
त्रिकोणकामपट्टाग्रस्तुङ्गे चन्द्रमण्डलम् ॥
द्वितीयवर्गस्यादग्रं विन्दुभ्यामन्त्रकृतम् ।
चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत् ॥
यदापि प्रतिदर्शे तु पर्व्वतं तं निशापतिः ।
प्रदक्षिणीकरोत्येव स्वभो रश्मिभिर्युतः ॥
तस्यैव पूर्व्वभागे तु सोमकुण्डाख्यं सरः ।
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते ॥
समारोहणतश्चन्द्रः कामाख्यासेवने यदा ।
तदा तद्रश्मिसंघातनिःसृताद्भोयराशयः ॥
तैर्नीयैर्भासतः कुण्डकरोदिन्द्रचन्द्रयोः ।
मध्ये पुण्यतमस्थानं स्वयं ब्रह्मशिलोपरि ॥
चन्द्ररश्मिसमुद्भूत ! चन्द्रकुण्ड ! महोदधे ! ।
सुधासत्त्व ! सारद्र ! त्वं चन्द्र ! कलुषं हर ॥
इत्यनेन तु मन्त्रेण स्नात्वा चन्द्रमापति ।
चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः ॥
यावद्धिमा स्नातिस्तु शक्राणां तस्य जायते ।
परत्र चन्द्रभवनं भित्वा याति परं पदम् ॥
तीरे तु चन्द्रकूटस्य चन्द्रनो नाम वै गिरिः ।
तस्मिन् वसति शक्रस्तु कामाख्यासेवने रतः ॥

[...]स्यभार्ं समाख्यात सर्वदे[...]
ह्रिदि[...] त्रिवेणीयाश्च स्नानं [...]
चन्द्रकूटस्य तु शिरःस्थस्य स[...]
प्रतिदर्शे तथा चन्द्रः प्रदक्षि[...]
चन्द्रकुण्डे स्नात्वा समाख्य[...]
धाराश्च शक्रं गौरीं महाश[...]
इति कालिकापुराणे काम[...]
८२ अध्यायः ॥

चन्द्रगुप्तः, पुं, (चन्द्रेण गुप्तः ।) [...] वराहादृशनवकन्दगुप्तनामाणपा[...] विशेषः । (यथा, मत्स्ये । १२ । १[...] "नवनन्दान् द्विजः कश्चित् प्रपत्स्य[...] तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति [...] स एव चन्द्रगुप्तं वै द्विजो राज्येऽभि[...] विष्णुगुप्तः । इति केचित् ॥

चन्द्रगोलस्थाः, पुं, (चन्द्र इव गोलः चन्द्र[...] स्थानं चन्द्रलोक इत्यर्थः । तत्र तिष्ठ[...] पितृगणाः । इति त्रिकाण्डशेषः । यथ[...] सामीप्ये सप्तमी ॥

चन्द्रगोलिका, स्त्री, (चन्द्रगोलः क[...] स्त्यस्याः । इति ठन् टाप् च ।) ज्य[...] इति हेमचन्द्रः । २ । २० ॥

चन्द्रचञ्चला, स्त्री, (चन्द्र इव चञ्चल[...] यस्याः ।) चन्द्रकमत्स्यः । इति शब्द[...] वली चटाधरश्च ॥

चन्द्रतारः, पुं (चन्द्रस्य ताराः नक्षत्राः ।) [...] अश्विन्यादीनि । इति हलायुधः । [...] नामोऽयम् ॥

चन्द्रदुग्धा, स्त्री (चन्द्र इव दुग्धरसाः ।) [...] कण्टकारी । इति राजनिर्घण्टः ॥

चन्द्रप्रभः, पुं, (चन्द्र इव प्रभा यस्य ।) [...] र्हद्विशेषः । इति हेमचन्द्रः । १ । २७ ॥ (चन्द्र- प्रभाविशिष्टे, त्रि । यथा, महाभारते । ३ । ६० । "चन्द्रप्रभं श्वेतपद्माननन्तं सौवर्णसम्भवते पोतमाड़े ॥")

चन्द्रप्रभा, स्त्री, (चन्द्रवत् प्रभा [...] बलासाः ।) बाकुची । इति राज[...] औषधविशेषः यथा, सुश्रुते ।

"हमिरिपुरहवचाचित्रकलामरदारुसद्म[...]

मागधिचूर्णं सुक्तं समतोलवचामाषिकचैव [...]
लवणत्रयविशानुगङ्कणुमृतमञ्जकदानिलि[...]
कर्षांशकान्येव समानि कुर्य्यात्
पचाष्टकं चाप्यथनोर्विदध्यात् ।
विगन्धशुद्धस्य पुरस्य धीमान्
पलद्वयं लौहरजस्तथैव ॥
शिलाजतुर्ध्वं पलमत्र वस्त्रा
निकुम्भकुम्भत्रिफलात्रिवृत्तान् ।
चन्द्रप्रभेयं गुडिका प्रयोज्या
कार्य्यांशि निर्वाहयते महेश ।
भगन्दरं पाण्डुरकामलाञ्च
शिरोवहैः कुरते च हीनिम् ।

चन्द्यामयान् मिहकरादिकीला-
माङ्गीगते सर्म्मगते मते च ।
मन्दार्बुदे विदधिराजदम्भते-
र्मेहे भगाद्धे प्रवते च योम्ना ।
तुरुपयेव चारुरम्यिरङ्घ्रि
तुम्रप्रताहिष्पुरदाम्बर्ये च ।
भातस्य पूर्वं मननं प्रयोज्या
तदाकुमारं लय मन्तुमानम् ।
कार्यो रमो आप्तमयो रमो वा
मर्योऽपरा शीतकलादुमानम् ।
बलेन मानमुरतो भवेत
हत्या सुवर्णः प्रवदे वराह: ।
कर्मोर्मिनिर्मिमुंनो हरोऽपि नरत्वाप्ति ।
न मानभीन्दि मदिहाम्बनत्सि
न मीनवानानमैथुनेन ।
प्रभुं मलयधैर हननमाद्दे-
माता गुरो चन्द्रमस: प्रसादात् ।"
("मलयमाभकं सौदं मानं पट्टे मनं ममम् ।
रणार्थे भक्ष्य चार्मोत्यपलकापा ।
मधुकं मधुपर्दी च धात्री च मलदर्पर्ण ।
कर्पूरं मार्दिकं मारं प्रमाणा वराटकारिका ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।"

इति चन्द्रप्रभाष्टकं ।

इति वैद्यकरीन्द्रसारसंग्रहे [illegible] ।)

चन्द्रभागः, पुं, (भज् + भावे घञ् । चन्द्रस्य भागो- विभागो यत्र इति ।) पर्व्वतविशेषः । यथा,—

[illegible]

"चन्द्रभागा यदा [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।"

मार्कण्डेय उवाच ।

[illegible]

इति कालिकापुराणे [illegible] अध्यायः ।

[illegible]

रघु ।" ६ । ३ । १२० । इत्यत्र तन्नामान् । चन्द्र- भागात् पर्व्वतविशेषात् जाता इति वा ।) नदीविशेषः । इत्यमरः । १ । १० । ३८ । तत्- पर्य्यायः । चन्द्रभागी २ चन्द्रिका ३ । इति शब्दरत्नावली । सा तु काश्मीरदेशे प्रसिद्धा । तस्या उत्पत्तिर्यथा,—

मार्कण्डेय उवाच ।

"यत्र देवप्रभा भूता मार्ग्गौ तस्य महागिरेः ।
तत्र जाता देवरङ्गी शीतागया चन्द्राद्रिभिः ।
धारयित्वा यदा चन्द्रं शीतांशुं [illegible] ।
चन्द्रं मधुरं [illegible] ।
तदा शीताख्यं चन्द्र[illegible] ।
भूत्वा निर्व्वाणं तस्मिन् [illegible] ।
तद्विहृदं तदा तोयं तस्मिन् सरसि [illegible] ।
[illegible] ।
[illegible] ।
चन्द्रभागेति [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] चन्द्रभागा [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
चन्द्रभागे [illegible] ।"

इति कालिकापुराणे [illegible] अध्यायः ।

[illegible] इति शब्दरत्नावली ।

चन्द्रभागी, स्त्री, (चन्द्रभागा [illegible] ।) [illegible] इति शब्दरत्नावली ।

[illegible]

चन्द्रमाः, [illegible]

[illegible]

मरः । १ । ३ । १३ । (यथा, रघुवंशे । ३ । ८
"[illegible] ।
[illegible] यथा ।")

चन्द्रमौलिः, पुं, (चन्द्रः मौलौ शिरसि यस्य ।) शिवः । इति धारावली । ८ । (यथा, कुमारे । ५ । ५८ ।

"[illegible] !
[illegible] चन्द्रमौलेः ।")

चन्द्ररेखा, स्त्री, (चन्द्रस्य रेखा इव आकृति- र्यस्याः ।) वाकुची । इति भैषज्यरत्नावली । वाकुच इति भाषा । (यथा, भैषज्यरत्नावल्यां कुष्ठाधिकारे ।

"कुष्ठी चन्द्ररेखा च शीलनात् [illegible] ।"
[illegible] ।)

चन्द्ररेणुः, पुं, (चन्द्र आह्लादको रेणुरिव ।) काव्यचौरः । इति त्रिकाण्डशेषः ।

चन्द्रलेखा, स्त्री, (चन्द्रस्य लेखा इव आकृति- र्यस्याः ।) वाकुची । इति राजनिर्घण्टः । (चन्द्रकलाविशेषः । यथा, कादम्बर्याम् । ८ । ७ ।
"[illegible] चन्द्रलेखा [illegible] ।"
छन्दोविशेषः । यथा, छन्दोमञ्जर्याम् ।
"[illegible] ।")

चन्द्रलोहकं, क्ली, (चन्द्र इव शुभ्रं लोहकं धातु- विशेषम् ।) रूप्यम् । इति राजनिर्घण्टः ।

चन्द्रवंशः, पुं, (चन्द्रस्य वंशः सन्तानः ।) चन्द्र- सन्तानः । यथा । [illegible]

[illegible]

अवम: तम: तस्य टवना: तस्य प्रितायु: तस्य सत्यकर्ण: तस्य व्यामघ: तस्य विदर्भ: तस्य क्रथ: तस्य कुन्ति: तस्य वृष्टि: तस्य निर्वृति: तस्य दशार्ह: तस्य व्योम: तस्य जीमूत: तस्य विकृति: तस्य भीमरथ: तस्य मधुरथ: तस्य शकुनि: तस्य करम्भि: तस्य देवरात: तस्य देवक्षेत्र: तस्य मधु: तस्य कुरुवश: तस्य अनुरथ: तस्य पुरुहोत्र: तस्य अंशु: तस्य सत्वत: तस्य भजि: दिव्याद्य: अन्धक: महाभोज: इति चत्वार: पुत्रा:। तेषु दृष्णिवंशे: तस्य सुमित्र: तस्य धर्ममित्र: तस्य वृष्टि: तस्य चित्रक: तस्य विदूरथ: तस्य शूर: तस्य भजमान: तस्य शिनि: तस्य भोज: तस्य हार्दिक: तस्य देवमीढ़: तस्य शूरसेन: तस्य वसुदेव: तस्य पुत्रौ भगवान् श्रीकृष्ण: ॥•॥) ययातिपुत्रस्य पुरोरतिविस्तीर्णो वंश उच्यते। पुरो: पुत्रो जनमेजय: तस्य प्रचिन्वान् तस्य प्रवीर: तस्य मनस्यु: तस्य चारुपद: तस्य सुद्यु: तस्य बहुगव: तस्य संयाति: तस्य अहंयाति: तस्य रौद्राश्व: तस्य ऋतेयु: तस्य रन्तिनार: तस्य सुमति: (तंसु:) तस्य रैभ्य: (सुरोध:) तस्य दुष्मन्तश्चक्रवर्त्ती। तस्य शकुन्तलायां भार्य्यायां भरतश्चक्रवर्त्ती आसीत्। स च राजसूयमश्वमेधान् कृतवान् महायज्ञान् शतं यज्ञान् दत्तवान् नानाविधान् महान् अकरोत् बहूनि धनकोटीनि दत्तवान् सर्वाश्च प्रजा अनुगतान् एकच्छत्रं राज्यं कृतवान्। तस्य पुत्रो वितथ: तस्य मन्यु: तस्य वृहत्क्षत्र: तस्य हस्ती येन हस्तिनापुरं निर्मितम्। तस्य अजमीढ़: तस्य ऋक्ष: तस्य संवरण: तस्य सूर्य्यकन्यायां तपत्यां कुरु: तस्य जह्नु: तस्य सुरथ: तस्य विदूरथ: तस्य सार्व्वभौम: तस्य जयत्सेन: तस्य राधिक: तस्य अयुतायु: तस्य क्रोधन: तस्य देवातिथि: तस्य ऋक्ष: तस्य भीमसेन: तस्य दिलीप: तस्य प्रतीप: तस्य देवापि: शान्तनु: [illegible] बाह्लीक इति त्रय: पुत्रा:। तत्र देवापि: कुमार-अवस्थायामेव वनं गत:। स कलौ चन्द्रवंशं पुनः [illegible] स्थापयिष्यति ॥•॥ [illegible] राजा अभवत् स चक्रवर्त्ती तस्य [illegible] पुत्रो जात: स परमधार्म्मिको [illegible] विदुरादिकन्याभिरवाप्तवाँ [illegible] स, तस्य विराट् इत्या [illegible] ओढा [illegible] शान्तनोरितिरिक्तभार्य्या द्वौ पुत्रौ चित्राङ्गदो विचित्रवीर्य्यश्च। चित्राङ्गदो [illegible] धर्म्मात्मा पाण्डुर्जातः। पुत्रश्चेव [illegible] कृष्णद्वैपायनात् जातः। [illegible] चित्रवीर्य्यस्य [illegible] पाण्डु: [illegible] [illegible] धर्म्मानुजासन [illegible] पुत्रस्त्रीर्भर्त्तृत्वं दुर्योधनो [illegible] कुन्त्यां दुर्यो धनादयः पुत्रा: [illegible] पाण्डुपुत्रा: पञ्च युधिष्ठिर-भीमार्जुन-नकुल-सहदेवा: [illegible]

यामास। युधिष्ठिरस्तु राजसूययाजी। अर्ज्जुनस्य सुभद्रायां भार्य्यायां अभिमन्युस्तस्य उत्तरायां भार्य्यायां परिक्षित्। युधिष्ठिरादनन्तरं कलियुगस्यारम्भे स राजासीत् चक्रवर्त्ती। तस्य जनमेजय: तस्य शतानीक: तस्य सहस्रानीक: तस्य अश्वमेधज: तस्य असीमकृष्ण: तस्य नेमिचक्र: स हस्तिनानगरे गङ्गाहृते कौशाम्ब्यां पुर्य्यां राजासीत्। तस्य उप्त: तस्य चित्ररथ: तस्य शुचिरथ: तस्य वृष्टिमान् तस्य सुषेण: तस्य सुनीथ: तस्य नृचक्षु: तस्य सुखीनल: तस्य परिप्लव: तस्य सुनय: तस्य मेधावी तस्य नृपञ्जय: तस्य दूर्व्व: तस्य तिमि: तस्य बृहद्रथ: तस्य सुदास: तस्य शतानीक: तस्य दुर्द्दमन: तस्य महीनर: तस्य दण्डपाणि: तस्य निमि: तस्य क्षेमक:। एतत्पर्य्यन्तमस्य वंशस्य स्थिति: एते कले: सहस्रवर्षपर्य्यन्तं स्थिता: ॥•॥ सोमवंशप्रसङ्गाान्तरे मगधदेशस्य राजान: कलौ बहुकालं स्थिता:। अतस्ते वर्ण्यन्ते। तत्र युधिष्ठिरसमकालीनो जरासन्धसुत: सहदेवो मगधेषु राजासीत्। तस्य मार्जारि: तस्य श्रुतश्रवा: तस्य अयुतायु: तस्य निरमित्र: तस्य सुनक्षत्र: तस्य बृहत्सेन: तस्य कर्म्मजित् तस्य सृतञ्जय: तस्य विप्र: तस्य शुचि: तस्य क्षेम: तस्य सुव्रत: तस्य धर्म्मसूत्र: तस्य शम: तस्य द्युमत्सेन: तस्य सुमति: तस्य सुबल: तस्य सुनीथ: तस्य सत्यजित् तस्य विश्वजित् तस्य पुरञ्जय: एते राजान: कले: सहस्रवर्षपर्य्यन्तं राज्यं कृतवन्त: ॥•॥ तत: पुरञ्जयस्य मन्त्री शुनक: पुरञ्जयं हत्वा तस्य पुत्रं प्रद्योतं राजानं कृतवान्। तदारभ्य राजानो वर्णसङ्करदोषदुष्टा जाता:। प्रद्योतपुत्र: पालक: तस्य विशाखयूप: तस्य राजक: तस्य नन्दिवर्द्धन:। एते पञ्च अष्टत्रिंशदुत्तरशतवर्षं भूमिपा आसन् ॥•॥ नन्दिवर्द्धनस्य पुत्र: शिशुनाग: तस्य काकवर्ण: तस्य क्षेमधर्म्मा तस्य क्षेत्रज्ञ: तस्य विधिसार: तस्य अजातशत्रु: तस्य दर्भक: तस्य अजय: तस्य नन्दिवर्द्धन: तस्य महानन्दि: एते दश शूद्रा: षष्ट्युत्तरशतत्रयं वसुमत्या भूमिपाला आसन् ॥•॥ महानन्दिसुतो नन्द: शूद्रायां सम्भूतस्तु राजासीत् तस्य सुमाल्यादयोऽष्टौ पुत्रा आसन्। ते शतवर्षपर्य्यन्तं राज्यं कृतवन्त:। चाणक्यनामा कश्चिद्ब्राह्मण: नन्दान् सपुत्रांश्च हत्वा मौर्य्यं चन्द्रगुप्तं राजानं कृतवान्। अन्यो वंशस्तु भविष्यत्पुराणे। इति श्रीभागवतं महाभारतञ्च।

चन्द्रकरी, स्त्री, (चन्द्रि आह्लादे + रक्। चन्द्राज्जातत्वादस्या: तथात्वम्। चन्द्रस्य कान्त्या आह्लादिका, शाकविशेष:।) चन्द्रलता इति केचित्।) सोमराजी। सौमनसा इति ख्याता। अस्याः पर्य्याय: केचित्। इत्यमरटीकायां भरत:॥ चन्द्रावती, स्त्री, (चन्द्र इव आह्लादजनिका नारी।) चन्द्रकी। माधवीलता। इति राजनिर्घण्ट:॥

सौमनसा च। (सौम [illegible] श्येया:)

चन्द्रवाला, स्त्री, (चन्द्रं कर्पूरम् [illegible] मन्दिस्त्र इति। वल संवरणे [illegible] सूक्ष्मैला। इत्यमर:। २। [illegible] अस्या यथा,—

"कृष्णा सूक्ष्मा च बहुला [illegible] भद्रैला इक्षुगन्धा च चन्द्रवाला [illegible]"

इति भावप्रकाशस्य पूर्व्वखण्डे [illegible]

चन्द्रविहङ्गम:, पुं, (चन्द्र इव शुभ्र: विहङ्गम:।) बकपक्षी। इति त्रिकाण्डशेष:।

चन्द्रव्रतं, क्ली, (चन्द्राय [illegible] यद्वा, चन्द्रस्य ह्रासवृद्धिभ्यां [illegible] चान्द्रायणम्। इति स्मृति:। (चान्द्रायणशब्दे दृश्यम्।)

चन्द्रशाला, स्त्री, (चन्द्रस्येव शालते [illegible] शाल + अच्। ततष्टाप्।) ज्योत्स्ना [illegible] त्रिकाण्डशेष:। (चन्द्र इव शालते [illegible] उच्चस्थानस्थितत्वादेव तथात्वम्।) [illegible] परिपथम्। तत्पर्य्याय:। शिरोगृहम् २। [illegible] हेमचन्द्र:। ४। ६१। चन्द्रशालिका। [illegible] कूटागारम् ५। इति त्रिकाण्डशेष:। [illegible] रघु:। १३। ४०।

"तस्यायमन्तर्हितसौधभाज:
प्रसक्तसङ्गीतमृदङ्गघोष:।
वियद्गत: पुष्पकचन्द्रशाला:
क्षणं प्रतिश्रुन्मुखरा: करोति।")

चन्द्रशालिका, स्त्री, (चन्द्र इव शालते [illegible] शाल + ण्वुल्। टापि अत इत्वम्। यद्वा, [illegible] शाला + स्वार्थे कन्।) चन्द्रभी। इति त्रि[illegible] शेष:।

चन्द्रशूरं, क्ली, फलविशेष:। हालिम् इति [illegible] तत्पर्य्याय:। चन्द्रिका २ चर्म्महन्त्री ३ [illegible] कारिका ४ नन्दनी ५ कारवी ६ [illegible] अस्य गुणा:। हिक्कावातश्लेष्मातिसार [illegible] नम्। अत्यन्तरोगदोषघ्नम्। बलपुष्टि [illegible] दंशनञ्च। इति भावप्रकाश:।

चन्द्रशेखर:, पुं, (चन्द्र: शेखरे मौलौ यस्य। [illegible] चदि आह्लादे + रक्। चन्द्र: आह्लाद: [illegible] ह्लादजनकस्वपरमात्मज्योति: शेखरे [illegible] भावो यस्य। सम्प्रदायागतानां शरीरवर्त्ति [illegible] चक्रिणानां योगीन्द्रपुङ्गवानामपि [illegible] ब्रह्मरन्ध्रात् [illegible] ज्योतिर्मण्डलस्य प्रकाशमानत्वात् [illegible] चन्द्रशेखरत्वमिति शैव। [illegible] इत्यत्र पूर्व्वसम्प्रदायसिद्धेरर्थसिद्धि:। [illegible] शङ्कराचार्य्यकृत [illegible] गुरौ भगवति महेश्वर एव चन्द्रशेखर [illegible] इत्यन्वयेनापि पुनश्चाधमाद्या। [illegible] मर: १।१।३४। (यथा, कुमार। [illegible]

"यत्र बुधै: [illegible]
न वैदृशि [illegible]"

इति स्वस्तोलिमिमितस्य सुधया
रहस्युपालभ्यत चन्द्रशेखरः ॥”
चन्द्रयुक्तः शेखरः शृङ्गं यस्य ।) पर्व्वतविशेषः ।
यथा, आगमे शिववाक्यम् ।
“विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥”
(तथा, महालिङ्गेश्वरतन्त्रे ।
“शम्भुनाथश्चन्द्रनाथश्चन्द्रशेखर पर्व्वते ॥”)
चट्टलदेशे महापीठे भैरवविशेषः । यथा,—
“चट्टले दक्षबाहुर्म्मे भैरवश्चन्द्रशेखरः ।
व्यक्तरूपा भगवती भवानी तत्र देवता ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥”
इति तन्त्रचूडामणौ ५१ पीठनिर्णयः ॥
करवीरपुरराजा । स च पौष्यराजपुत्त्रः । यथा,-
“अथ काले व्यतीते तु सर्व्वज्ञो वृषभध्वजः ।
तद्भाविकर्म्म ज्ञात्वैव मानुषो ह्यभवत् स्वयम् ॥
ब्रह्मणो दक्षिणाङ्गुष्ठाद्दक्षो ब्रह्मसुतोऽभवत् ।
अदितिस्तत्सुता जाता ततः पूषाह्वयोऽभवत् ॥
पूष्णः पुत्त्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति ॥
स पुत्त्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ।
शेषे वयसि सम्प्राप्ते भार्य्याभिस्तिसृभिः सह ॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत् ।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥
तमुवाच स राजानं किमिच्छसि वदस्व मे ।
प्रसन्नोऽस्मि नृपश्रेष्ठ ! प्रदास्यामि यथेप्सितम् ॥
यदिदं तव जायानां तत्तद्दास्यामि साम्प्रतम् ॥
पौष्य उवाच ।
हिरण्यगर्भापुत्त्रोऽहं पुत्त्रार्थी त्वामुपासहे ।
त्वयि प्रसन्ने पुत्त्रो मे भवेल्लक्षणसंयुतः ॥
एतदर्थं सभार्य्योऽहं भक्त्या त्वां समुपस्थितः ।
यथा मे जायते पुत्त्रस्तथा कुरु जगत्पते ! ॥
पुन्नाम्नो नरकात् पुत्त्रस्त्रायते पितरं प्रभुम् ।
अतस्तस्माद्भयं ब्रह्मन् ! त्वं नाशयितुमर्हसि ॥
ब्रह्मोवाच ।
शृणु पौष्य ! यथा भावी पुत्त्रस्तव कुलोद्वहः ।
तदहं ते वदाम्यद्य भार्य्याभिस्तत् समाचर ॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम ! ।
अजीर्णं बहुले काले प्राप्तेऽपि सरसं सदा ॥
फलमेतत् समादाय यावत् संवत्सरद्वयम् ।
आराधय महादेवं सुप्रसन्नो भविष्यति ॥
यथा संभाषते भर्गः फलमेतत्तथा भवान् ।
करिष्यति फलं राजन् ! भार्य्याभिस्तिसृभिः सह ॥
ततस्ते लक्षणोपेतस्तनयः कुलवर्द्धनः ।
भविष्यति च यः शास्ता चक्रवर्त्ती भविष्यति ॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भीरुभिः ।
एरं यष्टुं समारेभे भक्त्या परमया युतः ॥
निराशी संयताहारः कदाचित् फलभोजनः ।
दृषद्वतीनदीतीरे फलं संस्थाप्य चाग्रतः ॥
पुष्पार्घ्यधूपदीपाद्यैर्वृषध्वजमनर्पयत् ।
स तु वर्षद्वयेऽतीते महादेवो जगत्पतिः ॥
पौष्यस्य नृपतेः सम्यक् प्रससादार्थसिद्धये ।
प्रसन्नः प्राह नृपतिं महादेवो हसन्निव ॥
उपासते किमर्थं मां तन्मे वद ददामि ते ॥
पौष्य उवाच ।
अपुत्त्रोऽहं पुत्त्रकामः पूजयामि वृषध्वज ! ।
यथाहं पुत्त्रवान् वै स्यां वृषध्वज ! तथा कुरु ॥
इति संश्रवदद्राजा भार्य्याभिः सह हर्षितः ।
प्रणम्य स्तुतिपूर्व्वेण भक्तिनम्रात्ममानसः ॥
ततः पुत्त्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते लब्ध्वेदं तमुवाच ह ॥
ईश्वर उवाच ।
इदं फलं ब्रह्मदत्तं विभज्य नृपते त्रिधा ।
भोजयैताः स्वजायास्त्वं प्रहृष्टः सुष्यमानसः ॥
ततः प्रहृष्टो भवत एतासु ऋतुसङ्गमे ।
आधास्यन्ति च गर्भांस्तु भार्य्यास्ते युगपन्नृप ! ॥
काले प्राप्ते च युगपत् प्रसवो योषितां तव ।
भविष्यति नृपश्रेष्ठ ! ता एवं त्वं करिष्यसि ॥
एकस्या जठरे शीर्षं भार्य्यायास्ते भविष्यति ।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति ॥
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति ।
ततः खण्डत्रयं भूप ! यथास्थानं पृथक् पृथक् ॥
योजयिष्यसि यथा ते पुत्त्र एको भविष्यति ।
तस्य शीर्षे चन्द्ररेखा सहजा संभविष्यति ॥
तेनैव नाम्ना स ख्यातिं गमिष्यति च भूपते ! ।
इत्युक्त्वा स महादेवस्तासां गर्भान् स्वयं तदा ॥
संस्कर्त्तुं चाह्वयीतोयमात्मनः शिरसो न्यधात् ।
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ॥
तत्क्षणात् तत् फलं भूतं त्रिभागं स्वयमेव हि ।
पौष्यस्तत् फलमादाय मुदितः सह भार्य्यया ॥
प्रययौ मन्दिरं हृष्टो अनुज्ञाप्य वृषध्वजम् ।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् ॥
तत् फलं नृपशार्दूल ! गर्भांश्चाप्याहिताः शुभाः ।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ।
तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ॥
एकं पिण्डं चकाराशु तत्र पुत्त्रो व्यजायत ।
तस्य शीर्षे तदा राजन् सहजेन्दुकला शुभा ॥
विरराज यथा स्वच्छा शरत्काले कला विधोः ।
तं सर्व्वलक्षणोपेतं पीनोरस्कं सुनासिकम् ॥
सिंहग्रीवं विशालाक्षं दीर्घायतभुजं तदा ।
दृष्ट्वा पौष्योऽथ भार्य्याभिस्तिसृभिः सह संमुदम् ।
लेभे दरिद्रः सत्कोषं प्राप्येव विपुलं ततः ।
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः ॥
चन्द्रशेखर इत्येवं कान्त्या चन्द्रमसः समः ।
ववृधे स महाभागः प्रयत्नं चाप्यरञ्जयत ॥
कलाभिरिव तेजस्वी शरदीव निशाकरः ।
एवं तिसृणामम्बानां गर्भे जातो यतो हरः ॥
अतस्त्र्यम्बकनामाभूत् प्रथितो लोकदेवयोः ।
स राजपुत्त्रः कौमारावस्थां प्राप यदा तदा ॥
सर्व्वशास्त्रार्थतत्त्वज्ञो जिष्णोस्तुल्यो बभूव ह ।
बले वीर्य्ये प्रहरणे शास्त्रे शीले च तत्समः ॥
नान्योऽभून्नृपशार्दूल ! नो वा भूमौ भविष्यति ।
अभिषिच्याथ तं बालं कुमारं बलवत्तरम् ॥
दशपञ्चैकवर्षीयं सर्व्वराजगुणैर्युतम् ।
तिसृभिः सह भार्य्याभिर्वनं पौष्यो विवेश ह ॥
वृद्धोचितक्रियां कर्त्तुं राजा परमधार्म्मिकः ।
गते पितरि राजा स वनवासं महाबलः ॥
सर्व्वां क्षितिं वशे चक्रे मन्त्रैः स चन्द्रशेखरः ।
सार्व्वभौमो नृपो भूत्वा राजभिः परिषेवितः ॥
अमरैरिव देवेन्द्रो विजहार श्रिया युतः ।
एवं पौष्यसुतो भूत्वा त्र्यम्बकः प्राप्य निर्वृतिम् ॥
ब्रह्मावर्त्ताह्वये रम्ये करवीराह्वये पुरे ।
दृषद्वतीनदीतीरे राजा भूत्वा मुमोद ह ॥”
इति कालिकापुराणे ४६ अध्यायः ॥ *॥
(स्वनामख्यातः पण्डितविशेषः । असौ हि
सिद्धपुरुषः त्रिवेणीसन्निकर्षस्थखन्यपाड़ाख्यग्रामे
१६०० शकस्य प्रारम्भ एव वर्त्तमान आसीत् ।
अद्यापि तस्य सिद्धिस्थानं तत्रैव वर्त्तते । अयं
नानाशास्त्रवेत्ता विशेषतो ज्योतिषशास्त्रेषु
लब्धप्रतिष्ठो बभूव । एतत्संकलिता बहवो
ग्रन्था अस्मद्देशेऽद्यापि प्रचरन्ति ॥ * ॥)
षोड़शध्रुवकान्तर्गतनवमध्रुवकः । तद्विवरणं
ध्रुवकशब्दे द्रष्टव्यम् ॥ अपि च ।
“ऊनविंशतिवर्णाङ्घ्रिः सिंहिदश्चन्द्रशेखरः ।
कथितः केन्दुके ताले भवेत् शृङ्गारवीरयोः ॥”
इति सङ्गीतदामोदरः ॥
(वटिकौषधविशेषः ।
“सूतो गन्धष्टङ्कणः सोषणः स्या-
देतैस्तुल्या शर्करा मत्स्यपित्तैः ।
भूयो भूयो भावयेत्तु त्रिवारं
वल्लो देयः शृङ्गवेरस्य वारा ॥
सम्यक् तापे वारिभक्तं सतक्रं
हन्नाकाठं पथ्यमेव प्रदिष्टम् ।
अङ्गे रोगं हन्ति सामं प्रभावात्
पित्ताधिक्ये मूर्द्ध्नि वारिप्रयोगः ॥”
इति उदकमञ्जरीरसः ॥
“अत्रैव शर्करां त्यक्त्वा शिला च यदि दीयते ।
गुणैः समो भवेदस्य नाम्ना च चन्द्रशेखरः ॥”
इति चन्द्रशेखरो रसः ॥)
चन्द्रसंज्ञः, पुं, (चन्द्रस्य संज्ञा संज्ञा यस्य ।)
कर्पूरम् । इत्यमरः । २ । ६ । १३० ॥
चन्द्रसम्भवा, स्त्री, (चन्द्रः सम्भवो यस्याः ।)
क्षुद्रैला । इति शब्दचन्द्रिका ॥ (बुधे, पुं ॥)
चन्द्रहासं, क्ली, (चन्द्रस्येव शुक्लो हासः प्रभा
यस्य ।) रौप्यम् । इति राजनिर्घण्टः ॥
चन्द्रहासः, पुं, (चन्द्रस्येव शुक्लो हासो दीप्ति-
र्यस्य ।) खड्गः । रावणखड्गः । इति मेदिनी ।
से, ५२ ॥
चन्द्रहासा, स्त्री, (चन्द्रहास + टाप् ।) गुडूची ।
इति राजनिर्घण्टः ॥ (चन्द्रवद्धासकरो हासो
यस्याः इति । गायत्त्रीरूपा भगवती । यथा,
देवीभागवते । १२ । ६ । ४८ ।
“चन्द्रहासा चारुदात्री चकोरी चन्द्रहासिनी ।”
हरती । तस्याः पर्य्याया यथा,—
“क्षुद्रायां क्षुद्रभण्टाक्यां हरतीति निगद्यते ।
श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका ।

गर्भेरा चन्द्रभा चन्द्री चन्द्रपुष्पा प्रियङ्करी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चन्द्रा, स्त्री, (चन्दयति आह्लादयतीति । चदि+णिच्+रक् । स्त्रियां टाप् ।) एला । वितानम् । इति शब्दरत्नावली ॥ गुडूची । इति केचित् ॥

चन्द्रातपः, पुं, (चन्द्र इव आतपति शीतलं करोति छायादानेन । आ+तप्+अच् ।) आच्छादनविशेषः । चाँदोया इति भाषा ॥ तत्पर्य्यायः । उल्लोचः २ वितानम् ३ चन्द्रा ४ । इति शब्दरत्नावली ॥ (चन्द्रस्य आतपः रश्मिः ।) ज्योत्स्ना । इति हेमचन्द्रः । २ । २१ ॥ (यथा, कादम्बर्य्याम् । "चन्द्रातपमिव रसतासुपेतम् ॥")

चन्द्रापीडः, पुं, (चन्द्रः आपीडे शेखरे यद्वा आपीडः शिरोभूषणं यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (काश्मीरस्य राजविशेषः । यथा, राजतरङ्गिण्याम् । ४ । ४५ ।
"राजचूडामणिः श्रीमांश्चन्द्रापीडस्ततोऽभवत् ।
योऽहितेन्दुत्विषा कीर्त्त्या कलेः पीडाञ्चकार यः ॥"
कादम्बरीवर्णितनायकविशेषः । स तु राजतारापीडस्य पुत्त्रः । यथा, कादम्बर्य्याम् । १३७ ।
"अतिक्रान्ते च षष्ठीजागरे प्राप्ते दशमेऽहनि पुण्ये मुहूर्त्ते गाः सुवर्णञ्च कोटिशो ब्राह्मणसात् कृत्वा 'मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलमाविशन् दृष्टः' इति स्वप्नानुरूपमेव राजा सूनोश्चन्द्रापीड इति नाम चकार ।"
अयं हि एकदा मृगयां गच्छन् किन्नरमिथुनमनुधावन् हिमालयशिखरमधिरुह्य अच्छोदसरोवरसमीपं गतवान् । तत्रस्थच महाश्वेतां गन्धर्व्वकुमारीमवलोक्य तन्मुखात् तस्याः सर्व्ववृत्तान्तमाकर्ण्य च तया सह गन्धर्व्वलोकं गतवान् । तत्र गत एव गन्धर्व्वराजस्य चित्ररथस्य कादम्बरीं नाम कन्यां ददर्श । दृष्ट्वा च तां कन्दर्पबाणपीडितो बभूव । ततोऽतिकष्टेन तस्मात् स्थानात् प्रत्यागत्य स्वसहचरं वैशम्पायनं स्कन्धावाररक्षकत्वेन परिकल्प्य पित्राहूतः स्वभवनमाजगाम । अथ गच्छति काले वैशम्पायनानयनाय गतोऽसौ चिरमन्वेषिवैशम्पायनस्य ...मृत्युवार्त्तामाकलय्य हिमतलशिखरभूतले पतित्वा महाश्वेतासन्निकर्षे एव विदीर्णहृदयो गतासुराषीत् । ततो दैवादेशेन रक्षितशरीरोऽसौ ...नर्ज्जीविनश्च कादम्बरीं परिणीतवान् । इत्येषा ...विस्तर्य्यमनिका कथा कादम्बरीग्रन्थत एव ...शेषतो विज्ञेया ॥)

...ली, स्त्री, गोपीविशेषः । सा तु चन्द्रभानु...
...त्र ब्रजे श्रीकृष्णस्य नित्यप्रिया राधातुल्या ।
..., उज्ज्वलनीलमणौ ।
..."...चन्द्रावलीमुख्याः प्रोक्ता नित्यप्रिया ब्रजे ।
...प्रियस्त्री स्पर्द्धिवैदग्ध्यादिगुणाश्रयाः ॥"

... स्त्री, (चन्द्र आह्लादने... ...स्याः ।
...र्णिठम् ।" ५ । २ । ११५ । इति ठन् ।)
...। इत्यमरः । १ । १ । १६ ॥ (यथा,
...८ । ३८ ।

"अम्भसृक्त शरतश्चमाचरा
मेघमुक्तविशदां स चन्द्रिकाम् ॥")
स्थूलैला । चन्द्रकमत्स्यः । चन्द्रभागानदी । इति शब्दरत्नावली ॥ कर्णस्फोटा । मल्लिका । श्वेतकण्टकारी । मेथिका । सूक्ष्मैला । इति राजनिर्घण्टः ॥ चन्द्रसूरम् । इति भावप्रकाशः ॥ (पीठस्थदेवीविशेषः । सा तु हरिश्चन्द्रे विराजते । यथा, देवीभागवते । ७ । ३० । ६० ।
"सह्यादावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ।"
छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
"ननततगुरुभिश्चन्द्रिकाऽश्वर्त्तुभिः ।"
मासपुष्पा । अस्याः पर्य्याया यथा,—
"चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका ।
नन्दिनी कारवी भद्रा मासपुष्पा सुवासरा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चन्द्रिकाद्रावः, पुं (चन्द्रिकया द्रावो द्रवणं यस्य ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥

चन्द्रिकापायी, [न्] पुं स्त्री, (चन्द्रिकां ज्योत्स्नां पिबतीति । पा+णिनिः ।) चकोरपक्षी । इति राजनिर्घण्टः ॥

चन्द्रिकाम्बुजं, क्ली, (चन्द्रिका इव शुभ्रं अम्बुजम् ।) सितोत्पलम् । इति राजनिर्घण्टः ॥

चन्द्रिलः, पुं, (चन्द्रो विद्यतेऽस्य । चन्द्र+काशिलकात् अस्त्यर्थे इलच् ।) शिवः । नापितः । वास्तूकम् । इति मेदिनी । ले, ८८ ॥

चन्द्री, स्त्री, (चन्दयति आह्लादयतीति । चदि+णिच्+रक् । गौरादित्वात् ङीष् ।) वाकुची । इति राजनिर्घण्टः ॥

चन्द्रेष्टा, स्त्री, (चन्द्रः इष्टः प्रियो यस्याः । निष्ठायाः परनिपातः ।) उत्पलिनी । इति राजनिर्घण्टः ॥

चन्द्रोदयः, पुं, (चन्द्रस्य उदयः ।) आकाशे चन्द्रस्य प्रकाशः । स च यद्दिने सार्द्धप्रहरद्वयव्यापिनी या तिथिस्तत्तिथ्यनुसारेण भवति । तस्य प्रमाणं यथा, पुराणसमुच्चये ।
"गर्गो क्रौञ्चादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा यमून् हन्ति सुरभीपूज्यकोत्सदा ॥
तदुदयसम्भावनच निर्णयान्तरे निर्णीतम् ।
प्रतिपद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते । तदुक्तमग्राधानविषये दृष्टयात्रातपेन ।
द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी ।
अग्न्याधानं चतुर्दश्यां परतः सोमदर्शनादिति ॥
अपराह्णश्च पञ्चधाविभक्तस्याह्नश्चतुर्थो भागः ।
ततश्च यत्र प्रतिपदि त्रिमुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति ।" इति श्रीहरिभक्तिविलासे १६ विलासः ॥ (चन्द्रस्य वत्सरादिरचितचन्द्राकृतिरातपो यत्र ।) चन्द्रातपः । औषधविशेषः । इति हेमचन्द्रः । ३ । ३४५ ॥ स तु मकरध्वजाख्यरसविस्तृतम् । यथा,—
"पलं मृदु स्वर्णदलं रसेन्द्र
पलाष्टकं षोडश गन्धकस्य ।

...रोगैः शुक्राञ्चरम...
...गन्नं विसदृशीव शु...
...तत्कालकुसुमे दि...
...मात्समंप्रेक्ष्याद्विमन्य...
...धेन्न क्रमान्ती मिनता...
...गगो रसः मकरध्वजा...
...नियन्त्र चैनम्य पर्न...
...कमारि कर्पूरकस्तूरै...
...जातीफलं शीतमनिन्दुम...
...कर्प्पूरिकाया इव ग्राम...
...चन्द्रोदयोऽयं कथितस्तु मा...
...शक्तोऽविकलोद्यमधर्म्मा,
...मरोऽन्दनी प्रमदाप्रमा...
...गर्व्वापिकलं उपयुक्तवाहे,
...एवं धनोभुग्नमतीव दुर्भ...
...स्वतूनि मांसानि समसर्वाणि,
...मासाभिपिष्टानि भवन्ति यथा-
...व्यामन्दरायोमयवराणि यात्र । ७ ।
...चन्द्रोपचितमाद्यमलानुष्ठानं मतः...
...समस्तगदसङ्घः प्रतरोगगवाप्तः ।
...यवेषु रसराजं भवति यस्य चन्द्रोदयः
...स मन्मथमरद्दर्पितो मृगदृशां भविष्यत्कृतः ।"
इति सारकौमुदी रसकोषः ।

चन्द्रोदया, स्त्री, (चदि आह्लादे+णिच् उ... चन्द्रस्य उदयं ...नेत्ररोगस्यौषधविशेषः । यथाह चक्रपाणि...
"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला ।
सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् ।
नाशयेत्तिमिरं कण्डू पटलान्यर्ब्बुदानि च ।
अधिकानि च मांसानि यश्च रात्रौ न ...
अपि द्विवार्षिकं पुष्पं मासेनैकेन साधये...
वर्त्तिश्चन्द्रोदया नाम्ना तथा हरिणवाहो...

चन्द्रोपलः, पुं, (चन्द्रप्रभोद्भासित उपलः प्रस्त... चन्द्रकान्तमणिः । इति हेमचन्द्रः ।

चप, सान्त्वे । इति कविकल्पद्रुमः ॥ ...सकं-सेट् ।) सान्त्वः प्रियवचनं उ... चपति पुत्त्रं माता । इति दुर्गादासः ।

चप, क म कल्के । इति कविकल्पद्रुमः ॥ ...परं-सकं-सेट् ।) कल्कश्चूर्णीकरणम् । चपयति तण्डुलं शिला । इति दुर्गादासः ...

चपटः, पुं (चप+घञर्थे कः । चपः चू... चूर्णीकरणं वा तस्मै अटति गच्छतीति । ...+पचाद्यच् । ततः शकन्ध्वादित्वात् साधु... चपेटः । इत्यमरटीका ॥ चड इति भाषा...

चपलं, क्ली, (चपं सान्त्वनां लाति प्राप्नो... ला+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । ... कः ।) शीघ्रम् । इति मेदिनी । ले, ... चविकम् । इति हेमचन्द्रः ॥

चपलः, पुं, (चोपति मन्दं मन्दं गच्छतीति । ... मन्दायां गतौ+"चुपेरच्चोपधायाः ।" उणां... १ । १११ । इति कलः धातोश्चकारस्य अका...

वैद्यक ।) मारकः । (अस्य पर्य्याया यथा,—
"पारदो रसराजश्च रसेन्द्रश्च महारसः ।
चपलः शिवबीजञ्च रसः स्तः शिवाह्वयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ३)
मीनः । चोरकः । प्रस्तरविशेषः । इति मेदिनी ।
ले, ८०॥ चपः । इति राजनिर्घण्टः ॥ (रथिक-
विशेषः । यथा, सुश्रुते कल्पस्थाने ६ अध्याये ।
"पूर्व्वसूत्राः सुश्रुतेन रथिका ये समागताः ।
नामलक्षणभैषज्यैस्तान् निबोध तान् ॥"
"कृमिपृष्ठाश्चित्रकश्चैव चपलः कपिलस्तथा ॥"
एतस्य दंशनेन यल्लक्षणं भवति तदुपशमनाय
च यदौषधं तद्यथा तत्रैव,—
"चपलेन भवेच्छर्दिर्मूर्च्छा च महती तथा ।
समस्तकार्य्यं समुदीर्णं चाग्रेन त्रिफलां लिखेत् ॥")
चपलः, त्रि, (चोपति मन्दं मन्दं गच्छतीति । चुप
+कलः । धातोरुकारस्याकारादेशश्च ।) तरलः ।
चञ्चलः । इति मेदिनी । ले, ८८ ॥ (यथा,
आर्य्यासप्तशत्याम् । ५६० ।
"विचरति परितः कृष्णे राधायां रागचपल-
नयनायाम् ।
दयितविरहविकृतं विशिखं विदधाति विषमेषुः ॥")
दोषमनिश्चित्य वधबन्धनादेः कर्त्ता । तत्पर्य्यायः ।
चिकुरः २ । इत्यमरः । ३ । १ । ४६ ॥ विकलः ।
इति शब्दरत्नावली ॥
चपला, स्त्री, (चपल+टाप् ।) लक्ष्मीः । (यथा,
माघे । ८ । १६ ।
"निलयः श्रियः सततमेतदिति
प्रथितं यदेव जलजन्म तया ।
दिवसात्ययात्तदपि मुक्तमहो
चपलाजनं प्रति न चोद्यमदः ॥"
"चपला चापलवती स्त्री कमला च ॥" इति
तट्टीकायां मल्लिनाथः ॥) विद्युत् । (यथा,
आर्य्यासप्तशत्याम् । १०८ ।
"किं पुच्छि ! गच्छशैलभ्रमेण नवनीरदेषु निदाघे ।
अनुभव चपलाविलासितगर्ज्जितदेशान्तर-
भ्रान्तीः ॥")
पुंश्चली । पिप्पली । इति मेदिनी । ले, ८८ ॥
(अस्याः पर्य्याया यथा,—
"पिप्पली मागधी कृष्णा वैदेही चपला कणा ।
उपकुल्योषणा शौण्डी कोला स्यात्तीक्ष्णतण्डुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
जिह्वा । इति शब्दचन्द्रिका ॥ विजया । मदिरा ।
इति राजनिर्घण्टः ॥ (आर्य्याछन्दोविशेषः ।
तल्लक्षणं यथा, वृत्तरत्नाकरे २ अध्याये ।
"उभयार्द्धयोर्जकारौ द्वितीयतुर्य्यौ गमध्यगौ
यस्याः ।
चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन ॥")
चपेटः, पुं, (चप+चर्व्वे कः । चपः सान्त्वना
चूर्णीकरणं वा तस्मै एटति गच्छतीति । इट
गतौ+अच् ।) विस्तृताङ्गुलिपाणिः । चड़ इति
चापड़ इति च भाषा । तत्पर्य्यायः । प्रतलः २
प्रहस्तः ३ । इत्यमरः । २ । ६ । ८४ ॥

चपेटी, स्त्री, भाद्रशुक्लषष्ठी । यथा, भाद्रशुक्लषष्ठ्यां
अपत्यफलप्राप्तिकामः स्नानादिकं कुर्य्यात् ।
गन्ताकर्माभा जलसमीपे षष्ठीं पूजयेत् । षष्ठ्यै
नमः इति अरण्यषष्ठीपूजावत् । चापड़ाषष्ठी-
यम् । इति कृत्यचन्द्रिकायाम् ॥ * ॥ अन्यच्च ।
"प्रत्यहा द्वादशी मासि सम्पत्त्यापत्यवृद्धये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्द्दमी ज्ञेया श्रावणी लुण्ठनी मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजि तथा ।
नाड़ाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मासप्रशस्ता च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता ॥"
इति स्कन्दपुराणम् ॥
मन्थानषष्ठी इति केचित् ॥
चम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-
सकं-सेट् । उदित्वात् क्त्वावेट् ।) चमति । उ,
चमित्वा चान्त्वा । इति दुर्गादासः ॥
चम, न र उ भक्षे । इति कविकल्पद्रुमः ॥ (स्वां-
परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) न, चम्नोति ।
र वैदिकः । उ, चमित्वा चान्त्वा । इति दुर्गा-
दासः ॥
चमत्कारः, पुं, (चमत् करोतीति । कृ+अण् ।)
अपामार्गः । इति शब्दरत्नावली ॥ (चमत्+
कृ+भावे घञ् ।) चित्तविस्ताररूपः । तत्-
पर्य्यायः । विस्मयः २ । इति साहित्यदर्पणम् ॥
स्मयः ३ । इति त्रिकाण्डशेषः ॥ लोकातीतार्था-
कलनेन किमेतदिति ज्ञानधाराजनने चित्तस्य
दीर्घप्रायत्वं चित्तविस्तारः । दृष्टहेतुभ्योऽसम-
विलक्षणेन हेतुनान्तराद्युत्थाने मनोव्यापार एव
चित्तविस्तार इत्यपरे । इति साहित्यदर्पणटीका ॥
(यथा, कथासरित्सागरे । २२ । २५७ ।
"एवं सकलजगज्जनहृदयचमत्कारकारि-
चरितानाम् ।
स्वयमनुधावन्ति सदा कल्याणपरम्पराः पदवीम् ॥")
चमरं, क्ली, (चमरस्येदम् । चमर+अण् । अत्र
न वृद्धिः ।) चामरम् । इति मेदिनी । रे, १५२ ॥
चमरः, पुं, (चमति भक्षयतीति । चम+"चरि-
कमिभ्रमिचमीति ।" उणां । ३ । १३२ । इति
अरच् ।) चमरगौः । तत्पर्य्यायः । चमरी २
चमः ३ धेनुगः ४ वालधिप्रियः ५ । इति राज-
निर्घण्टः ॥ (यथा, हैः रामायणे । २८ । ३ ।
"चमराः सृमराश्चैव ये चान्ये वनचारिणः ॥")
चमरपुच्छः, पुं, (चमरस्य पुच्छ इव पुच्छो यस्य ।)
कोकडः । स तु विडालविशेषः । इति राज-
निर्घण्टः ॥ चामरे क्ली च ॥
चमरिकः, पुं, (चमरमिव केशरोऽस्यस्य । "अत
इनिठनौ ।" ५।२।११५ । इति ठन् ।) कोविदार-
वृक्षः । इत्यमरः । २ । ४ । २२ ॥ (पर्य्यायोऽस्य
यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुण्डलीताम्रपुष्पश्च लान्तकः स्वल्पकेसरी ॥")

चमरी, स्त्री, (चमरस्य स्त्रीजातिः । चमर+
जातेर्ङीष् ।) चमरगवी । तत्पर्य्यायः । दीर्घ-
वाला २ गिरिप्रिया ३ । इति राजनिर्घण्टः ॥
(यथा, कुमारे । १ । १३ ।
"यश्चामरैरिन्दुमरीचिगौरैः
कुर्व्वन्ति वालव्यजनैश्चमर्य्यः ॥")
मञ्जरी । इति मेदिनी । रे, १५२ ॥
चमसः, पुं, क्ली, (चम्यते भक्ष्यते पीयते इति यावत्
सोमोऽस्मिन्निति । चमु भक्षणे+"अत्यवि-
चमीति ।" उणां । ३ । ११७ । इति असच् ।)
यज्ञपात्रभेदः । इति मेदिनी । से, २१ ॥ चमच्
इति भाषा ॥ (एतल्लक्षणादिकमुक्तं यथा,—
"चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः ।
चाङ्गुलस्तु भवेत् स्कन्धो विस्तारश्चतुरङ्गुलः ॥
विकङ्कतमयाः शुक्लाग्राविलाश्चमसाः स्मृताः ।
अश्वत्थाद्वापि वा कार्य्यास्तेषां दक्षेषु लक्षणम् ॥
होतुर्मण्डल एव स्यात् ब्रह्मणश्चतुरस्रकः ।
उद्गातुश्चायतश्चासिः स्याद् याजमानः पृथुः
स्मृतः ॥
प्रशास्तुरयतः स्याद्धर्त्तोयो ब्रह्मशंसिनः ।
पोतुरग्रे विशाखी स्यान्नेष्टुः स्यादिगृहीतकः ॥
अच्छावाकस्य रासाव आग्नीध्रस्य मयूखकः ।
इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्म्मणि ।
मलाशाद्वा वटाद्वान्यद्वाह्ना चमसाः स्मृताः ॥")
चमसः, पुं, (चम्यते भक्ष्यते इति । चम+असच् ।)
पर्पटः । पिष्टभेदः । लड्डुकः । इति जयपालः ॥
(ऋषभदेवस्य पुत्राणामन्यतमः । यथा, भाग-
वते । ५ । ४ । ११ ।
"कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥
एते भागवतधर्म्मदर्शना नव महाभागवताः ॥")
चमसी, स्त्री, (चमस+गौरादित्वात् ङीष् ।)
मुद्गमषरादिपिष्टम् । काष्ठरचितं यज्ञपात्र-
मित्यन्ये । इति लिङ्गादिसंग्रहटीकायां भरतः ॥
"चूर्णे यच्छष्कमाषाणां चमसी सा विधीयते ।"
इति भावप्रकाशः ॥
चमूः, स्त्री, (चमति भक्षयति शत्रून् नाशयतीत्यर्थः ।
चम+"कृषिचमितनीति ।" उणां ।१।८०। इति
ऊः ।) सेनामात्रम् । (यथा, गीतायाम् । १ । ३ ।
"पश्यैतां पाण्डुपुत्राणामाचार्य्य ! महतीं चमूम् ॥")
सेनाविशेषः । तत्र ७२९ हस्तिनः ७२९ रथाः
२१८७ अश्वाः ३६४५ पदातयः । समुदायेन
७२९० द्विशतनवत्यधिकसप्तसहस्रम् । इत्यमर-
मेदिनीकरौ ॥
चमूरुः, पुं, स्त्री, (चमतीति । चम+"खर्जिपिञ्जा-
दिभ्य ऊरोलचौ ।" उणां ।४।६०। इति ऊरः ।
पृषोदरादित्वात् अत उत्वञ्च ।) हरिणविशेषः ।
इत्यमरः । २ । ५ । ९ ॥ (यथा, माघे ।१।८ ।
"चकासतं चारुचमूरुचर्म्मणा
कुथेन नागेन्द्रमिवेन्द्रवाहनम् ॥")
चम्पः, पुं, (चम्पतीति । चम्प+अच् ।) कोवि-
दारवृक्षः । इति शब्दमाला ॥

चर्य्या, स्त्री, (चर+"गदमदचरयमश्चानुपसर्गे ।" ३ । १ । १०० । इति यत् । स्त्रियां टाप् ।) ईर्य्यापथस्थितिः । इत्यमरः । २ । ७ । ४६ । नियमापरित्यागः । ईर्य्यते गुरोः प्राच्छोपासनया प्राप्यते ईर्य्या सा च ध्यानधारणादिः तस्याः पन्था उपायः तत्र प्रतिनो या स्थितिरवस्थानमपरित्यागः सा । इति भरतः ॥ (यथा, महाभारते । १ । २ । ३२६ ।
"चर्य्यायां हयमुत्सृष्टं पाण्डवस्यानुगच्छतः ।")
गमनम् । चरणम् । आचरणम् । इति मुग्धबोधटीकायां दुर्गादासः ॥ (यथा, मनुः । ६।३२ ।
"आस्थाय महर्षिचर्य्यां त्यक्त्वान्यतमया तनुम् ।"
सेवा । यथा, रामायणे । २ । २८ । १५ ।
"वनवासस्य शूरस्य मम चर्य्या हि रोचते ।"
त्रि, अनुष्ठेयः । आचरणीयः । यथा, मनुः ।३।१।
"षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् ।")

चर्व्व, कि भक्षे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट् ।) कि, चर्व्वयति चर्व्वति तण्डुलं बालकः । इति दुर्गादासः ॥

चर्व्वणं, क्ली, (चर्व्व+भावे ल्युट् ।) दन्तैश्चूर्णनम् । इति हेमचन्द्रः । ३ । ८८ । चिवान इति भाषा ॥ (यथा, हारीते प्रथमे स्थाने प्रथमेऽध्याये ।
"चर्व्वणं गिलनञ्चापि काथितं क्वाथितं तथा ।")

चर्व्वा, [न्] पुं, तलप्रहारः । इति हारावली । १६७ ॥

चर्व्वितं, त्रि, (चर्व्व्यते स्म इति । चर्व्व+कर्म्मणि क्तः ।) कृतचर्व्वणम् । भक्षितम् । इत्यमरः । ३।२।११० । (यथा, भागवते । ७ । ५ । ३० ।
"अदान्तगोभिर्व्विशतां तमिस्रं
पुनःपुनश्चर्व्वितचर्व्वणानाम् ।")

चर्व्वितपात्रकं, क्ली, (चर्व्वितानां ताम्बूलादीनां त्यागपात्रम् । ततः स्वार्थे कन् ।) चर्व्वितताम्बूलादित्यागपात्रम् । पीकदान इति भाषा । यथा, राधलीलायां पातालखण्डे ।
"ताम्बूलं दर्पणं पात्रं चर्व्वितपात्रकम् ।"

चर्व्व्यं, त्रि, (चर्व्व्यते दन्तैश्चूर्ण्यते इति । चर्व्व+कर्म्मणि ण्यत् ।) चर्व्वणीयम् । यथा,—
"षट्कोटिं ब्राह्मणानां भोजयामास नित्यशः ।
चूष्यचर्व्व्यलेह्यपेयैरतिहृष्टा दिने दिने ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

चर्षणिः, पुं, (कर्षतीति । कृष+"कृषेरादेश चः ।" उणां । २ । १०३ । इति अनिः आदेश चः ।) जनः । यथा, श्रीभागवते ।
"स चर्षणीनामुदगाच्छुचो मृजन्
प्रियः प्रियाया इव दीर्घदर्शनः ।"
मनुष्यजातिः । यथा,—
"चर्षणी मातृका पत्नी तयोः चर्षणयः सुताः ।
यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ।"
इति श्रीभागवते । ६ । ६ । ४१ । "चर्षणयः समानुजास्यवर्णः । यतस्तिष्वयमेव विवर्द्धराशेः । यत्र येषु कामानुष्ठानादियुक्तेव मानुषी जातिर्ब्रह्मणोपकल्पिता । तथा च श्रुतिः । पुरुषत्वे चाविस्तरामात्मेति ।" इति तट्टीकायां श्रीधरस्वामी ॥ (अत्र उणादिवृत्तिकृता उज्ज्वलदत्तेन तु "कृषेरादेश चः ।" इति पठित्वा चर्षणिर्व्वर्कीति व्याख्यातम् ॥)

चल, क भृतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, चालयति । दन्त्यवकारादिरयमिति दुर्गसिंहक्रमदीश्वरनन्दी । भृतिरिह पोषणम् । इति दुर्गादासः ॥

चल, ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ज, चालः चलः । मित्त्वे इति मस्तमार्थं न पठित्वा इममेव मानुबन्धं भ्रान्ताः पठन्ति तद्धेयम् । तेनास्य चालयति हस्तिनं यन्ता । चलमानोऽनिल इत्यत्र ताच्छील्ये शतृः प्राप्तः । मित्त्वे । पूर्व्वेणान्वयः । चलधातुः कम्पने मानुबन्धः स्यादित्यर्थः । म, चलयति लतां वायुः । चलयन् भृङ्गरुचस्तवालकानिति रघुः । चालयन् सकलां पृथ्वीमिति चन्द्रमात् चालं करोतीति णौ प्रचलनम् । इति दुर्गादासः ॥

चल, श विलासे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट् ।) श, चलती चलन्ती । विलासः क्रीडनम् । इति दुर्गादासः ॥

चलं, त्रि, (चलति गच्छतीति । चल+पचाद्यच् ।) चञ्चलम् । इत्यमरः । ३ । १ । ७४ ॥ (यथा, रघुः । ११ । १५ ।
"ताडका चलकपालकुण्डला
कालिकेव निविडा बलाकिनी ॥"
भारदः । इति हेमचन्द्रः । ४ । ११६ ॥ चतुरस्रमापरत्नभेदः । यथा, हलायुधकोषे ।
"भ्रमी नृणां भ्रमी पेचलमिदमुदितं युगैर्म्मनिभिः शरैः ॥")

चलः, पुं, (चल+पचाद्यच् ।) कम्पः । तद्युक्ते त्रि । इति मेदिनी । ले, १५ ॥ (शिवः । यथा, महाभारते । १३ । १७ । ११६ ।
"महाकेतुर्म्महाधातुर्नैकसानुचरश्चलः ।"
विष्णुः । यथा, तत्रैव । १३ । १४८ । ८२ ।
"वीरहा विषमः शून्यो घृताशीरचलश्चलः ।"
"वायुरूपेण चलः ।" इति भाष्यम् ॥)

चलचञ्चुः, पुं, (चला चञ्चला चञ्चुरस्य ।) चकोरपक्षी । इति हेमचन्द्रः । ४ । ४०५ ॥

चलत्पूर्णिमा, स्त्री, (चलन्ती पूर्णिमा तदाश्रयीभूतचन्द्र इवेति तात्पर्य्यार्थः ।) चन्द्रकमत्स्यः । इति त्रिकाण्डशेषः ॥

चलदङ्गः, पुं, (चलत् चञ्चलं अङ्गं यस्य ।) मत्स्यविशेषः । चेङ्गा इति भाषा । अस्य गुणाः । अनभिष्यन्दित्वम् । वाते हितत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥

चलदङ्गकः, पुं, (चलदङ्ग एव इति कप् ।) चलदङ्गमत्स्यः । इति जटाधरः ॥

चलदलः, पुं, (चलानि दलानि पत्राणि यस्य ।) अश्वत्थवृक्षः । इत्यमरः । २ । ४ । २० ॥ (अस्य पर्य्यायोऽस्य गुणादयो ज्ञातव्याः ।)

चलनं, क्ली, (चल+भावे ल्युट् ।) भ्रमणम् । [...] देवीभागवते १ । १० । १८ ।
"चलनञ्च विना कार्य्यं न भवेदिति मे मतिः ।"
कम्पनम् । (यथा, पञ्चतन्त्रे । २ । १७ ।
"काकुभावाविह यौ तौ विमुक्तौ चतुरङ्गौ ।
चलनौ चलनारौ द्वितीयः पादरेणवः ।")
कम्पे, त्रि । इति मेदिनी । ने, ६१ ॥

चलनः, पुं, (चल्यतेऽनेन इति । चल+करणे ल्युट् ।) पादः । इति हेमचन्द्रः ॥ हरिणः । इति श[...] धरः ॥

चलनकः, पुं, (चलन+संज्ञायां कन् ।) [...] तकम् । इति हेमचन्द्रः । ३ । ३३८ ॥

चलनी, स्त्री, (चलन+ङीष् ।) घाघरा इति बन्धनी । अल्पपर्येरी । इति हेमचन्द्रः । [...] इति भाषा ॥

चलपत्रः, पुं, (चलानि पत्राणि यस्य ।) अश्वत्थः । इति राजनिर्घण्टः ॥ (यथा, नैषधे ।
"अद्यैव केनापि विवेतुमस्य
गवेष्यते किं चलपत्रपत्रम् ।
समेधितैर्वातहितरस्यदेध-
स्तस्यास्तु कम्पस्तु कुतो भवेत ।")

चला, स्त्री (चलतीति चल+पचाद्यच् टाप् ।) नैकत्रावस्थितत्वात् तथात्वम् ।) लक्ष्मीः । इति मेदिनी । ले, १५ ॥ सिह्लकः । इति रत्न[...]

चलाचलः, त्रि, (चलतीति चल+अच् । चरिचलिपतिवदीनां वा द्वित्वमिति द्वित्वे अच्याभ्यासस्य इति वार्त्तिकसूत्रेणास्य [...] चञ्चलः । इत्यमरः । ३ । १ । ७४ ॥ (यथा, किरातार्ज्जुनीये । ११ । ३० ।
"अविनोऽस्य स्थितिं विद्वान् सन्दोलितच[...]" [...])
काके पुं, । इति राजनिर्घण्टः ॥

चलातङ्कः, पुं, (चले चलने आतङ्को भयं यस्मात् ।) वातरोगः । इति राजनिर्घण्टः ॥

चलितं, त्रि, (चल+कर्त्तरि क्तः ।) कम्पितः । इत्यमरः । ३ । १ । ८७ ॥ (यथा, राजतरङ्गिण्याम् । ५ । ३६५ ।
"तयोर्विलासवसितैश्चलितापाङ्गविभ्रमैः ।")
गतम् । चल च गताविति दर्शनात् ॥ (यथा, गोः रामायणे । ३ । ५७ । २३ ।
"अधिरूढे गजारोहे यथाक्षरचलितोऽपि ।"

चलुः, पुं, (चल+उन् ।) गण्डूषः । इति हेमचन्द्रः । ३ । २६२ ॥

चलुकः, पुं, (चलुना कायतीति । कै+कः ।) प्रसृतिः । भाण्डभेदः । इति मेदिनी । के, ५ ।

चविः, स्त्री, (चर्व्यते इति । चर्व्व+इन् । इदित्त्वात् इलोपे साधुः ।) चविका । इति शब्दरत्नावली ॥

चविकं, क्ली, (चवि+संज्ञायां कन् ।) चविका । इति भरतधृतचन्द्रः ॥

चविका, स्त्री, (चवि+स्वार्थे कन् ।) इत्यमरटीका । चइ इति भाषा । तत्पर्य्यायः । चव्यम् । इत्यमरः । २ । ४ । ९८ ॥ यथा, चविका ।

चवी ५ । इति भरतः ॥ चविः ६ । इति शब्दरत्नावली ॥ तेजोवती ७ कोला ८ नाकुली ९ उषणा १० चव्यकम् ११ वशिरः १२ गन्धनाकुली १३ वल्ली १४ कोलवल्ली १५ कोलम् १६ कुटिलचव्यकम् १७ तीक्ष्णम् १८ करिकरणावल्ली १९ क्रकरः २० । (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"सारिवाह्वयष्ट्याह्वचविकारक्तचन्दनैः ॥")
अस्या गुणाः । कटुत्वम् । उष्णत्वम् । लघुत्वम् । रोचनत्वम् । दीपनत्वम् । जन्तूदरकफश्वासशूलनाशित्वञ्च । इति राजनिर्घण्टः ॥ भेदकत्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥
२, स्त्री, (चवि+"कृदिकारादक्तिनः ।" ४ । १ । ४५ । इति ङीष् ।) चविका । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । ६ । १५१ ।
"सर्व्वकर्म्मा चवीहस्तः प्रतिज्ञां तां सुदुस्तराम् ।
पश्यन् सानुशयः सर्व्वं स्वभार्य्यायै शशंस तत् ॥")

चव्यं, स्त्री, (चर्व्व्यते इति । चर्व्व+ण्यत् । पृषोदरादित्वात् रलोपे साधुः ।) चविका । इत्यमरः । २ । ४ । ९८ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"चव्येन्द्रबीजं त्रिफला सर्पिर्म्मांसरसाम्बुभिः ॥")

चव्यकं, स्त्री, (चव्यमेव । स्वार्थे कन् ।) चविका । इति राजनिर्घण्टः ॥

चव्यजा, स्त्री, (चव्यमिव जायते इति । जन+डः ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवृतिरस्या गजपिप्पलीशब्दे ज्ञेया ॥)

चव्यफलं, स्त्री, (चव्यमिव फलं यस्य ।) गजपिप्पली । इति राजनिर्घण्टः ॥

चव्या, स्त्री, (चव्य+टाप् ।) चविका । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।
"सर्पिर्म्मधुभ्यां त्रिकटु प्रलिह्यात्
चव्याविडङ्गोपहितं यथार्त्तः ॥")
वचा । इति मेदिनी ॥ कार्पासी । इति राजनिर्घण्टः ॥

चष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) चषति । इति दुर्गादासः ॥

चष, ञ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वा-उभं-सकं-सेट् ।) ञ, चषति चषते । इति दुर्गादासः ॥

चषकः, पुं, स्त्री, (चषति भक्षयति पिबत्यनेनेत्यर्थः । चष+"कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि ।" उणां । २ । ३२ । इति क्वुन् ।) मद्यपानपात्रम् । तत्पर्य्यायः । गल्लर्कः २ सरकः ३ अनुतर्षणम् ४ । इति हेमचन्द्रः । ४ । १०२३ ॥ * ॥

अथ चषकोद्देशः ।
"यत् पानपात्रं भूपानां तदुक्तं चषकं बुधैः ।
काञ्चनं राजतञ्चैव स्फाटिकं काचमेव च ॥
इत्थं स्मरादिकोषं चतुर्द्धा पृथिवीभुजाम् ।
इत्यन्वयमतं तेषां निर्णयः पाठगम्यतः ॥
मणिकर्म्मितं रत्नैश्चतुर्भिः समन्वितम् ।
माणिक्यं वाथ पात्रं वा सर्व्वधातुमनुच्यते ।
काञ्चनं धातुजं शैलं जाङ्गलादि महीभुजाम् ।
यदन्यत्तोयपानादि पात्रं पृथ्वीभुजां भवेत् ॥"
एवं तत्रापि नियम इति भोजस्य निश्चयः । इति युक्तिकल्पतरुः ॥ * ॥ सुरापात्रम् । मधु । मद्यप्रभेदः । इति मेदिनी । के, ८६ ॥

चषतिः, पुं, (चष भक्षे वधे वा+भावे अतिः ।) भक्षणम् । वधः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

चषालः, पुं, (चष्यते बध्यतेऽस्मिन् । चष+"सानसिवर्णसीति ।" उणां । ४ । १०७ । इति आल प्रत्ययेन निपातनात् साधुः ।) यूपकटकः । इत्यमरः । २ । ७ । १८ ॥ यज्ञसमाप्तिसूचकं पशुबन्धनार्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्डमरुकाकृतिर्व्वा यः काष्ठविकारः सः । यूपमूले विहितलौहवलयश्च । इति केचित् । इति भरतः ॥ मधुस्थानम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चह, शाठ्ये । प्रतारणे इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चहति । इति दुर्गादासः ॥

चह, त क शाठ्ये । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) चहयति खलः । इति दुर्गादासः ॥

चह, क म शाठ्ये । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क म, चहयति खलः साधुं प्रतारयतीत्यर्थः । इति दुर्गादासः ॥

चाकचक्यं, स्त्री, उज्ज्वलता । चकचक इति भाषा । यथा, न हि लौकिकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव तथा हि । काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकारा चाकचक्याकारा च काचिदन्तःकरणवृत्तिरुदेति । इति वेदान्तपरिभाषा ॥

चाकचिका, स्त्री, श्वेतगुञ्जा । इति रत्नमाला ॥

चाक्रिकः, पुं, (चक्रेण सङ्घेन यन्त्रविशेषेण वा चरतीति । चक्र+"चरति ।" ४ । ४ । ८ । इति ठक् ।) बहुभिर्म्मिलित्वा यः स्तौति सः । तत्पर्य्यायः । घाण्टिकार्थकः २ । इत्यमरः । २ । ८ । १० ॥ (यथा, याज्ञवल्क्ये । १ । १६५ ।
"पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् ।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥")
तैलकारः । इति हेमचन्द्रः ॥ शाकटिकः । इति महाभारते राजधर्म्मः ॥ गाड़ोयान् इति भाषा ॥

चाक्षुषं, स्त्री, (चक्षुषा निर्वृत्तम् । चक्षुष्+"तेन निर्वृत्तम् ।" ५ । १ । ७९ । इत्यण् ।) प्रत्यक्षविशेषः । तत्तु चक्षुरिन्द्रियजन्यज्ञानम् । द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम् । द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः । द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः । इति सिद्धान्तमुक्तावली ॥ तथा च ।
"द्रव्याध्यक्षे संयोगात् संयुक्तसमवायतः ।
द्रव्येषु समवेतानां तथा तत्समवायतः ॥
तत्रापि समवेतानां शब्दस्य समवायतः ।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ॥"
इति भाषापरिच्छेदे ॥ ५९—६० ॥
(चक्षुषा गृह्यते इति । चक्षुष्+अण् । चक्षुर्ग्राह्यरूपादि । चक्षुर्ग्राह्ये, त्रि ॥)

चाक्षुषः, पुं, (चक्षुषः ब्रह्मणो लोचनात् जातः । चक्षुष्+अण् । एतन्निरुक्तिर्यथा, मार्कण्डेये । ७६ । २ ।
"अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ! ॥")
षष्ठमनुः । अस्मिन्मन्वन्तरे अजितनामको विष्णोरवतारः । मन्त्रद्रुम इन्द्रः । आप्यादयो देवाः । हविष्मद्वीरकादयः सप्तर्षयः । पुरुपुरुषसुद्युम्नादयो मनुपुत्राः । इति श्रीभागवतम् ॥ (अस्य अन्यद्विवरणं मन्वन्तरशब्दे द्रष्टव्यम् ॥)

चाङ्गः, पुं, (चीयते इति । चि+डः । चमङ्गं यस्य ।) चाङ्गेरी । इत्यमरटीकायां रायमुकुटः ॥

चाङ्गेरी, स्त्री, (चाङ्गं ईरयतीति । ईर+अण् । ततो ङीप् ।) अम्ललोणिका । इत्यमरः । २ । ४ । १४० ॥ ("ग्रहण्यर्शोविकारघ्नी साम्ला वातकफे हिता ।
उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

चाचपुटः, पुं, तालभेदः । यथा,—
"गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे ॥"
इति सङ्गीतदामोदरः ॥

चाञ्चल्यं, स्त्री, (चञ्चलस्य भावः । चञ्चल+ष्यञ् ।) चञ्चलता । चापलम् । यथा,—
"चाञ्चल्यरहिता लक्ष्मीः पुत्रपौत्रावधिस्थिरा ॥"
इति जगन्मङ्गलाख्यकवचम् ॥

चाटः, पुं, (चट्यते भिद्यते यस्मात् । चट+घञ् । यद्वा चटति भिनत्ति भित्त्यादिकम् । चट+णः ।) चौरः । इति मिताक्षरा ॥ प्रतारकः । यथा,—
"चाटतस्करदुर्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ॥
चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति । प्रच्छन्नापहारिणस्तस्कराः । दुर्वृत्ता इन्द्रजालिककितवादयः । यद्वा मन्नं बहुना बलेन हत्वं साहसं महच्च तत् साहसं महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः । आदिशब्दात् नैमित्तिककुहककण्टकादयः । एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत् । कायस्था गणका लेखकाश्च तैः पीड्यमाना विशेषतो रक्षेत् । तेषां राजवल्लभतया अतिमायाविनतया च दुर्निवारत्वात् ।" इति मिताक्षरायामाचाराध्यायः ॥

चाटकैरः, पुं, (चटकस्य चटकाया वा पुमपत्यमिति । "चटकाया ऐरक् ।" ४ । १ । १२८ । इत्यैरक्प्रत्ययः । "चटकादिति वाच्यम् । लिङ्गविशिष्टपरिभाषया सिद्धा चेति" । इति वार्त्तिकम् ।) चटकस्य पुमपत्यम् । इत्यमरः ॥ चटार छा इति भाषा ॥

चाटु, पुं, क्ली, (चटति भिनत्ति मनस्तोषामोद- ... [illegible] ... इति पुं।) प्रियवाक्यम्। ... [illegible]

[illegible]

कन्दम् ५ कौटिल्यम् ६ मत्सभवम् ७ प्रालाक- कटुकम् ८ मिश्रम् ९। अस्य गुणाः। उष्णत्वम्। कटुत्वम्। रुचिकारित्वम्। दीपनत्वम्। कफ- वातक्रिमिगुल्मनाशकत्वम्। पाचकत्वम्। गुरु- त्वञ्च। इति राजनिर्घण्टः॥

चाणूरः, पुं, कंसराजस्य मल्लविशेषः। यथा,—

"ततः क्रोधान्निताम्राक्षः कंसः परमकोपनः।
चाणूरमादिमद्युद्धे तयोस्य सुमहाबलम्॥"

इति महाभारते हरिवंशम्॥

(तथाच, भागवते। १०। ४४।

"भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः।
चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह॥")

चाणूरसूदनः, पुं, (चाणूरं सूदयतीति। सूदि + ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः॥ (एतस्या- ख्यानं चाणूरशब्दे हरिवंशे ८६ अध्याये द्रष्टव्यम्॥)

चाण्डालः, पुं, (चण्डति कुप्यति सततमिति।"चति- ... [illegible] ..." उणा १। ११०। इति ... चण्डाल + "प्रज्ञादिभ्योऽण्" ... इत्यमरः। २। १०। १९। (यथा, मनुः। ४। ७९।

"न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः॥")

... [illegible] ... यथा, महाभारते। १२। ७५।

"चाण्डालिका ... [illegible]"

चाण्डालिका, स्त्री, (चाण्डालो वादकत्वेनास्त्यस्याः। इति ठन्। चाण्डालेन निर्वृत्ता इति ठक् वा।) चाण्डालवीणा। इत्यमरः। २। १०। ३२।

... [illegible] ...

चाण्डाली, स्त्री, (चाण्डाल + जातित्वात् ङीष्।) ... [illegible] ... इति राजनिर्घण्टः।

[illegible]

चातुरकः, त्रि, (चातुर + स्वार्थे ...) इति हेमचन्द्रः॥

चातुराश्रम्यं, क्ली, (चतुर्णां ... इति। "गुणवचनब्राह्मणादिभ्यः ..." ५। १। १२४। इति ष्यञ्।) ब्राह्मणस्य भिक्षुरूपाश्रमचतुष्टय ... पुराणम्॥ (यथा, महाभारते। ...

"चातुर्विद्यं चातुर्वर्ण्यं चातुराश्रम्य ...
राजधर्मांश्च निखिलान् ...

चत्वार आश्रमा एवेति स्वार्थे ष्यञ् ... आश्रमम्॥)

चातुरिकः, पुं, (चातुरौ ... वेत्तीति ठक्।) सारथिः। इति ...

चातुरी, स्त्री, (चतुरस्येयं "तस्येदम्।" ... इत्यण्। ततो ङीप्। यद्वा चतुरस्य ... ष्यञ्। षित्वात् ङीष्। ततो यलोपः।) ... चतुरता। इति मेदिनी॥ [चातुरी]

"या लोकद्वयसाधनी तनुभृतां सा चातुरी ..."

(गायत्रीरूपा महाशक्तिः। यथा, ...। १२। ६। ४०।

"चतुर्भुजा चारुदन्ता चातुरी च ..."

चातुर्जातकं, क्ली, (चतुर्जातक एव ... ष्यञ्।) गुडत्वगेलापत्रनागकेशरसमुदायः। इति राजनिर्घण्टः॥ (अस्य लक्षणं गुणा ...

"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते।
तद्वयं रेचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत्।
लघुपित्ताग्निकृद्वर्ण्यं कफवातविषापहम्॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे।)

चातुर्थकः, पुं, (चतुर्थे चतुर्थेऽह्नि भव इति। ... + वुञ्।) प्रतिचतुर्थदिनभवज्वरः। ... तस्यौषधं यथा, ... [illegible] ...

"... चातुर्थको ज्वरो ... [illegible]"

इति भावप्र° ... [illegible]

[illegible]

लोमशोऽपि हलीमः स्याच्चतुर्थः त्रिगुणान्वितः ।
सर्व्वधातुगतो घोरो जीर्णो धातुगतश्चरः ॥
भुनक्ति भूतविद्या स्याद्यानि मनसाद्गतम् ।
नागरार्त्तीदारपथ्या नागरत्रिफला भवः ॥
मधुना संयुतः साध्यचातुर्थकनिवारणः ॥
अमालिपत्रस्य रसो निहन्ति
नस्ये च चातुर्थकरोगमुग्रम् ।
कासं भ्रमञ्चापि शिरोरुजाश्च
विनाशयत्याशु हि मानवानाम् ॥"
इति हारीते चिकित्सास्थाने द्वितीयेऽध्याये ॥)

चातुर्भद्रं, क्ली, (चतुर्भद्रमेवेति अण् ।) नागरातिविषामुस्ता गुडूचीति चतुष्टयम् । इति राजनिर्घण्टः ॥

चातुर्मास्यं, क्ली, (चतुर्षु मासेषु क्रियते इति । "चतुर्मासाण्ण्यो यज्ञे ।" ५।१।९४। इत्यस्य सूत्रस्य वार्त्तिकोक्तेः ण्यः । यागविशेषः । चातुर्मास्ययागस्य चत्वारि पर्व्वाणि । वैश्वदेवो वरुणप्रघासः शाकमेधः शुनासीरीयश्चेति शब्दार्थचिन्तामणिः ॥) आषाढशुक्लद्वादश्यादिचतुर्मासकर्त्तव्यनियमविशेषः । "यत्तु वाराहे ।
'आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्थापि हि तद्योगं चातुर्म्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेत् ॥'
मात्स्ये ।
'चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्वरो भवेन्नित्यं नरो गुड़विवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् शत्रुनाशः प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा मुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्योगगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणात्रखलोम्नाञ्च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ।
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ॥
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ।
नमो नारायणायेति जप्तानशनजं फलम् ॥
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति केशवः ॥'
सनत्कुमारः ।
'इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! यद्यपूर्णे त्वहं म्रिये ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥'
समाप्तौ च ।
'इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ! ॥'
अत्रैव यतिमधिकृत्य काठकगृह्यम् ।
'एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥'
इत्यादशक्तविषयम् । 'ऊर्द्ध्वं वार्षिकाभ्यां मासाभ्यां नैकत्रवासी' इति शङ्खोक्तेः ।" इति तिथ्यादितत्त्वम् ॥ * ॥ अन्यच्च । तत्रोपक्रमकालः सनत्कुमारेणोक्तः ।
"एकादश्यान्तु गृह्णीयात् संक्रान्तौ कर्कटस्य तु ।
आषाढ्यां वा नरो भक्त्या चातुर्म्मास्योदितं
व्रतम् ॥"
तत्र मन्त्रः ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
इमं करिष्ये नियमं निर्व्विघ्नं कुरु मेऽच्युत ! ॥"
अथ चातुर्म्मास्यनियमावश्यकता भविष्ये ।
"यो विना नियमं मर्त्त्यो व्रतं वा जप्यमेव वा ।
चातुर्म्मास्यं नयेन्मूर्खो जीवन्नपि मृतो हि सः ॥"
अथ चातुर्म्मास्यनियमाः । स्कान्दे नागरखण्डे ।
"श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके चामिषं त्यजेत् ॥"
तत्रैव श्रीब्रह्मनारदसंवादे ।
"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने ।
यो भक्षयति विप्रेन्द्र ! श्वपचादधिको हि सः ॥
कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् मुनिशार्द्दूल ! यावदाहूतनारकी ॥
कलिङ्गानि पटोलानि वृन्ताकसहितानि च ।
एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्द्दने ॥
सप्तजन्मार्ज्जितं पुण्यं हरते नात्र संशयः ॥"
किञ्च ।
"यद्यत्तत्तत्कालभ्यं फलमूलादि वर्ज्जयेत् ।
जपहोमाद्यनुष्ठानं नामसङ्कीर्त्तनन्तथा ।
स्वीकृत्य प्रार्थयेदेवं गृहीतनियमो बुधः ॥
इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! पञ्चत्वं यदि मे भवेत् ।
तदा भवतु सम्पूर्णं प्रसादात्ते जनार्द्दन ! ॥"*॥
अथ चातुर्म्मास्यव्रतनियममाहात्म्यम् । विष्णुरहस्ये ब्रह्मनारदसंवादे ।
"शृणु नारद ! कार्त्स्न्येन चातुर्म्मास्यव्रतक्रियाः ।
या निर्व्वर्त्त्य नरो भक्त्या प्रयाति परमां गतिम् ॥
व्रतानि वैष्णवानीह मनस्यपि चिकीर्षतः ।
नरस्य क्षयमाप्नोति पापं जन्मशतोद्भवम् ॥
एकभक्तो नरः शान्तो नित्यस्नायी दृढ़व्रतः ।
योऽर्च्चयेच्चतुरो मासान् हरिं स्यात्तस्य लोकभाक् ॥
यस्तु सुप्ते हृषीकेशे चितिशायी भवेन्नरः ।
वार्षिकान् चतुरो मासान् लभते वैष्णवीं गतिम् ॥
यस्तु केशवमुद्दिश्य चान्द्रायणपरायणः ।
चातुर्म्मास्यं नयेद्भक्त्या स विष्णुतनुमाविशेत् ॥"
भविष्योत्तरे भगवद्युधिष्ठिरसंवादे ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
स्त्री वा नरो वा मद्भक्तो धर्म्मार्थं सुदृढ़व्रतः ॥
गृह्णीयान्नियमानेतान् दन्तधावनपूर्व्वकम् ।
तेषां फलानि वक्ष्यामि तत्कर्त्तॄणां पृथक् पृथक् ॥
मधुरस्वरसम्पन्नो भवेल्लवणवर्ज्जनात् ।
लभते सन्ततिं दीर्घां तैलस्य परिवर्ज्जनात् ॥
अभ्यङ्गवर्ज्जनात् पार्थ ! सुन्दराङ्गः प्रजायते ।
पक्वतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् ॥
मधूकतैलत्यागेन सौभाग्यमतुलं भवेत् ।
पुष्पोपभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।
कट्वम्लतिक्तमधुरक्षारकाषायजान् रसान् ॥
यो वर्ज्जयेत् स वैरूप्यं वैगन्ध्यं नाप्नुयात् क्वचित् ।
ताम्बूलवर्ज्जनाद्भोगी अपक्वादोऽमलो भवेत् ॥
पादाभ्यङ्गशिरोऽभ्यङ्गपरित्यागाच्च पार्थिव ! ।
दीप्तिमान् दीप्तकरणो यक्षो द्रव्यपतिर्भवेत् ॥
दधिदुग्धतक्रनियमात् गोलोकं लभते नरः ।
इन्द्रातिथित्वमायाति स्थालीपाकविवर्ज्जनात् ॥
लभेच्च सन्ततिं दीर्घां तापपक्वस्य वर्ज्जनात् ।
भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ॥
सदा मुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ।
निर्व्याधिर्नीरुगोजस्वी सुरामद्यविवर्ज्जनात् ॥
एकान्तरोपवासेन ब्रह्मलोके महीयते ।
धारणात्रखलोमानां गङ्गास्नानं दिने दिने ॥
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ।
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ॥
नमो नारायणायेति जप्त्वा दानशतं फलम् ।
पादाभिवन्दनाद्विष्णोर्भवेद्गोदानजं फलम् ॥
विष्णुपादाम्बुजस्पर्शात् कृतकृत्यो भवेन्नरः ।
विष्णोर्द्देवकुले कुर्य्यादुपलेपनमार्ज्जने ॥
कल्पस्थायी भवेद्राजा स नरो नात्र संशयः ।
प्रदक्षिणत्रयं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स च विष्णुपदं व्रजेत् ।
गीतवाद्यकरो विष्णोर्गान्धर्व्वं लोकमाप्नुयात् ॥
नित्यं शास्त्रविनोदेन लोकान् यस्तु प्रबोधयेत् ।
स व्यासरूपी भगवानन्ते विष्णुपुरं व्रजेत् ॥
पुष्पमालाकुलां पूजां कृत्वा विष्णोः पुरं व्रजेत् ।
कृत्वा प्रेक्षणिकं दिव्यं स्थानमप्सरसां लभेत् ॥
तीर्थाम्भसि कृतस्नानो निर्म्मलं देहमाप्नुयात् ।
पञ्चगव्याशनात् पार्थ ! चान्द्रायणफलं लभेत् ॥
एकभक्ताशनान्नित्यमग्निहोत्रफलं लभेत् ।
नक्तभोजी समश्नन्तु तीर्थयात्राफलं लभेत् ॥
अयाचितेन चाप्नोति वापीकूपप्रपाफलम् ।
षष्ठकालेऽन्नभोजी यः स्थायी स्वर्गे नरो भवेत् ॥
नित्यस्नायी नरो यस्तु नरकं स न पश्यति ।
भाजनं वर्ज्जयेद्यस्तु स स्नानं पौष्करं लभेत् ॥
पत्रेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।
शिलायां भोजनं नित्यं भवेत् स्नानं प्रयागजम् ॥
यामद्वयजलत्यागान्न रोगैः परिभूयते ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति तोषितः ॥"
किञ्च ।
"योगनिद्रां समालम्ब्य शेषाहिशयने स्वपन् ।
क्षीरोदतोयवीचीभिर्धौतपादः समाहितः ॥
लक्ष्मीकराम्बुजैः श्लक्ष्णैर्मृज्यमानपदद्वयः ।
तस्मिन् काले च मद्भक्तो यो मासांश्चतुरः क्षिपेत् ॥
व्रतैरनेकैर्नियमैः पाण्डवश्रेष्ठ ! मानवः ।
कल्पस्थायी विष्णुलोके भवेन्नास्त्यत्र संशयः ॥

सर्व्वा व्रतसमाप्तौ च श्रीकृष्णस्य प्रसादतः ।
यद्दद्यद्दानादिकञ्च शेषं तत्तच्च कार्त्तिके ॥
सुत्वाय कृष्णमभ्यर्च्च्य प्रसाद्य च पुनः पुनः ।
प्रियं प्रक्रोदतीर्थे च स्वीकुर्य्याद्वैष्णवैः सह ॥
गीतनृत्यादिना देवं परितोष्याथ वैष्णवान् ।
संपूज्य नरयानेन देवं स्वालयमानयेत् ॥
प्रभोर्नीराजनं कृत्वा विसर्ज्य व्रत वैष्णवान् ।
निवेश्य स्वासने देवं प्रयीत सुवि तं स्मरन् ॥
एवञ्च कुर्व्वतो मासाश्चत्वारो यान्ति ते सुखम् ।
अन्यथा प्रभवेद्दुःखमनाष्टश्चि जायते ॥
तथा च भविष्ये ।
मिथुनस्थे सहस्रांशौ न स्नापयति यो हरिम् ।
वैष्णवैः सह सम्भूय स्नानाष्टमिका भवेत् ॥
किञ्च । भविष्योत्तरे ।
यो देवशयनं पार्थ ! अनुमोद्य समाचरेत् ।
उत्थानं वापि कृष्णस्य स हरेर्लोकमाप्नुयात् ॥”
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

चातुर्व्वर्ण्यं, क्ली, (चत्वारो वर्णाः । “चतुर्व्वर्णादीनां स्वार्थे उपसंख्यानम् ।” इति ष्यञ् ।) ब्राह्मण-क्षत्रियवैश्यशूद्राः । इति हेमचन्द्रः । ३।४७२॥ (यथा, मनुः । १२ । १ ।
“चातुर्व्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्म्मस्त्वयानघ ! ॥”)
चतुर्व्वर्णधर्म्मश्च ॥

चातुर्व्वैद्यः, पुं, (चतुरो वेदानधीते इति चतुर्व्वेदः । स एव । “चतुर्व्वेदस्योभयपदवृद्धिश्च ।” इति ष्यञ् ।) चातुर्व्विद्यः । चतुर्व्वेदवेत्ता । इति व्याकरणम् ॥

चात्वालं, क्ली पुं, (चतते याचते इति । चत+ “स्याचतिमृधेरालयूवालञालीयचः ।” उणां १ । ११५ । इति वालञ् ।) गर्त्तः । अग्नि-होत्रोपकरणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (यथा, तैत्तिरीयसंहितायाम् । ६ । १ । ३ । ८ ।
“योनिर्वै यज्ञस्य चात्वालम् ॥”)

चान्द्रं, क्ली, (चन्द्रस्य इदम् । चन्द्र+अण् । यद्वा, चन्द्राय चन्द्रलोकप्राप्तये इदम् ।) चान्द्रा-यणम् । इति प्रायश्चित्ततत्त्वम् ॥

चान्द्रः, पुं, (चन्द्रस्यायम् । “तस्येदम् ।” ४।३।१२० इत्यण् ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४।१३३ ॥ चान्द्रमासः । इति शब्दरत्नावली ॥

चान्द्रकं, क्ली, (चान्द्रं आर्द्रकमिव कायतीति कै+कः ।) शुण्ठी । इति राजनिर्घण्टः ॥

चान्द्रायं, क्ली, (चान्द्रमित्याख्या संज्ञा यस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

चान्द्रभागा, स्त्री, (चान्द्रः चन्द्रसम्बन्धी भागो यस्याम् ।) चन्द्रभागानदी । इति त्रिकाण्डशेषः ॥

चान्द्रमसं, क्ली, (चन्द्रमाश्चन्द्रोऽधिष्ठातृदेवता यस्य । चन्द्रमस्+अण् ।) मृगशिरोनक्षत्रम् । इति हेमचन्द्रः । २ । ३१ ॥ (चन्द्रमसश्चन्द्रस्य इदम् । चन्द्रमस्+“तस्येदम् ।” ४ । ३ । १२० । इत्यण् ।) चन्द्रमःसम्बन्धिनि त्रि ॥ (यथा, महाभारते । १३ । २५० । ३० ।
सर्व्वतः सुरसत्त्वेऽपि मुखचान्द्रमसं यथा ॥”)

चान्द्रमसायनः, पुं, (चन्द्रमसोऽपत्यं पुमान् । चन्द्र-मस्+फक् ।) बुधग्रहः । इति हलायुधः ॥ (“तिकादिभ्यः फिञ् ।” ४ । १ । १५५ । इति फिञ् ।) चान्द्रमसायनिश्च ॥

चान्द्रमासः, पुं, (चान्द्रश्चन्द्रसम्बन्धी मासः ।) चन्द्र-सम्बन्धिमासः । स तु गौणमुख्यभेदेन द्विविधः । तत्राद्यः कृष्णप्रतिपदादिपौर्णमास्यन्तः । द्वितीयः शुक्लप्रतिपदादिदर्शान्तः । सामान्यनिर्द्दिष्टतिथ्या-ब्दिकश्राद्धाद्यश्राद्धादिसपिण्डीकरणान्त्या-नि चान्द्रायणप्राणायामादिमन्नाणि दानकर्म्म-तिथिविहितकर्म्म । गौणचान्द्रे अष्टकादिमार्ग्य-श्राद्धं वारुणीस्नानं जन्मतिथिकृत्यं जन्मा-ष्टम्याद्युपवासः दुर्गोत्सवादितिथिनियमपूजा । सामान्यनिर्द्दिष्टतिथ्याद्यकमासेन मासिकादिमास-गणना । इति स्मृतिः ॥

चान्द्रायणं, क्ली, (चान्द्रस्य चन्द्रलोकस्य अयनं प्राप्तिर्यस्मात् । “धर्म्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम् ।” इति याज्ञवल्क्यवचनादेव तथात्वम् । यद्वा चन्द्रः अन्वेताऽनन्तमयनुश्चयः अयनं आश्रयोऽधिष्ठातृदेवो यस्य व्रतस्य यत्र व्रते वा ।) व्रतविशेषः । तत्पर्य्यायः । इन्दु-व्रतम् २ । इति त्रिकाण्डशेषः ॥ तत्तु चतुर्व्विधं पिपीलिकामध्यस्थम् १ यवमध्यस्थम् २ यति-चान्द्रायणम् ३ शिशुचान्द्रायणम् ४ । यथा,—
“एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥”
“एतदेव पिपीलिकामध्यस्थम् ।” इति कुल्लूक-भट्टः ॥
“एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ।
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम् ॥
अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम् ॥”
इति मनुः ॥
तद्विधानं यथा, गारुडे १०५ अध्याये ।
“तिथिपिण्डांश्चरेद्भुक्त्वा शुक्ले शिख्यण्डसंमितान् ।
एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरेत् ॥
यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम् ।
मासेनैवोपभुञ्जीत चान्द्रायणमथापरम् ॥
कुर्य्यात्त्रिषवणं स्नानं पिण्डं चान्द्रायणं चरेत् ।
पवित्राणि जपेत् पिण्डान् गायत्र्या चाभि-मन्त्रयेत् ॥
अमावास्येव सर्व्वेषु शुद्धिश्चान्द्रायणेन च ।
धर्म्मार्थी यश्चरेदेतत् चन्द्रस्यैति सलोकताम् ॥
कष्टलब्धधर्म्मकामस्तु महतीं श्रियमश्नुते ॥”
अपि च ।
“एकैकं वर्द्धयेत् पिण्डं शुक्ले कृष्णे च ह्रासयेत् ।
उपस्पृश्य त्रिषवणं विपरीताघमर्द्दनम् ॥”
इति तत्रैव २२९ अध्यायः ॥

चान्द्री, स्त्री, ज्योत्[illegible]
चन्द्र+“तस्येदम्[illegible]
स्त्रियां ङीप् ।) [illegible]
(चन्द्रसम्बन्धिनि
“गुरुजायागमी [illegible]

चापं, क्ली पुं, (चप[illegible]
“चापयते च ग्रास्यौ[illegible]
इत्यण् ।) धनुः । [illegible]
(यथा, रघुः । १२ ।
“क्रमशो पुनस्तस्य चा[illegible]
इत्यन्येषाहुः । यथा, [illegible]
“इतोऽरुणं चक्रम[illegible]
कोरकसकं मनु पू[illegible]
नवमराशिः । यथा, इन्दु[illegible]
“चापगते मन्त्रीयात् कुसुम[illegible]

चापपटः, पुं, (चापो धनुकाद[illegible]
पटः पत्रं यस्य ।) पियालद्रुमः [illegible]

चापलं, क्ली, (चपलस्य भावः कर्म[illegible]
ष्यञ् ।) अनवस्थितिः । इति [illegible]
२२९ । तस्य लक्षणं यथा, [illegible]
“मातृसर्व्वदेवरागादेवावज्ञानर[illegible]
(यथा, रघुः । १ । ९ ।
“तद्गुणैः कर्णमागत्य चापलाय प्र[illegible]

चापल्यं, क्ली, (चपलस्य भावः कर्म वा [illegible]
दित्वात् ष्यञ् ।) चपलता । चाञ्चल्[illegible]
“परदारं परद्रव्यं परीवादं परस्य च ।
परीहासं गुरोः स्थाने चापल्यञ्च विवर्[illegible]
इति चाणक्यः ।[illegible]

चामरं, क्ली पुं, (चमरी मृगविशेषस्तस्य [illegible]
चमरी+अण् ।) चमर [illegible]
व्यजनम् । चौंरी । इति भाषा । तत्पर्य्यायः
प्रकीर्णकम् २ । इत्यमरः । २ । ८ ।
चमरम् ३ चामरा ४ चामरी ५ । इति शब्द[illegible]
वालव्यजनम् ६ रोमगुच्छकम् ७ । इति [illegible]
(यथा, पञ्चतन्त्रे । ३ । २६६ ।
“गुणेषु रागो व्यसनेष्वनादरो
रतिः सुभृत्येषु च यस्य भूपतेः ।
चिरं स भुङ्क्ते चलचामरांशुकां
सितातपत्राभरणां श्रियम् ॥”)
अस्य गुणाः । ओजःकारित्वम् । [illegible]
कान्तिप्रदत्वञ्च । इति राजवल्लभः ॥
अथ चामरोद्देशः ।
“हस्तद्वयोन्नतः शुक्लः सुवर्णशलिभूषितः ।
हीरकालङ्कृतो राज्ञां भवमानसुखप्रदः ।
वसेच्चामरदण्डो वा व्यायामत्वं प्रकारि[illegible]
भयो भद्रो जयः प्रीतः सुखः सिद्धिश्च [illegible]
वितस्त्येकैकसंवृद्धा दिनद्वाविंशतिः [illegible]
सौवर्णं राजतं युग्मं चेदेषाना महीभुज[illegible]
योजयेदिति निश्चित्य वलिकल्पतरुमर्त[illegible]
स्वर्णं आगुलो राजा [illegible]
हीरश्च पद्मरागश्च वैदूर्य्यं नील एव च
मणिर्वलिषु योज्यो [illegible] यथाक्रमम् ॥”

शुक्लो रक्तोऽथ पीतश्च नानावर्णो यथाक्रमम् ।
चामरो राजकेशस्य न सामान्यस्य भूपतेः ॥
न भयमानतो न्यूनं चामरं गुणमावहेत् ॥"

अथ चामरपरीक्षा ।

स्थलजं जलजञ्चेति चामरं द्विविधं विदुः ।
मेरौ हिमालये विन्ध्ये कैलासे मलये तथा ॥
उदयेऽस्तगिरौ चैव गन्धमादनपर्व्वते ।
एवमेतेषु शैलेषु याश्चमर्य्यो भवन्ति हि ॥
तासां वालस्य चायेत चामरेत्यभिधा भुवि ॥
आपीताः कनकाद्रिजा हिमगिरेः शुभ्रायता विन्ध्यजाः
कैलासादसिताः सिता मलयजाः शुक्लास्तथा पिङ्गलाः ।
आरक्ता उदयोद्भवाश्चमरजा आनीलशुक्लत्विषः
कृष्णाः केचन गन्धमादनभवाः पाण्डुत्विषश्चामराः ॥
अन्येषु प्रायशः कृष्णाश्चामराः सम्भवन्ति हि ।
ब्रह्मक्षत्रियविट्शूद्रजातयस्ताश्चतुर्व्विधाः ॥
चमर्य्यः पर्व्वतोद्भूता यथापूर्व्वं गुणावहाः ।
दीर्घवालाः सुलघवः स्निग्धाङ्गाश्चापि कोमलाः ।
विरलास्तनुपर्व्वाणश्चमर्य्यो ब्रह्मजातयः ।
विना संस्कारमप्यासां चामरं विमलं भवेत् ॥
दीर्घवालाः सुगुरवः कर्कशाश्च भृशं घनाः ।
विज्ञेयाः स्थूलपर्व्वाणश्चमर्य्यो वैश्यजातयः ॥
संस्कारे चाप्यसंस्कारे न स्वभावं त्यजेदिदम् ।
खर्व्ववालाः सुलघवः कोमलाङ्गा भृशं घनाः ॥
चमर्य्यस्तनुपर्व्वाणो विज्ञेयाः शूद्रजातयः ।
संस्कारेणापि मलिनमासां चामरमिष्यते ॥ * ॥
दीर्घता लघुता चैव स्वच्छता घनता तथा ।
गुणाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः ॥
खर्व्वता गुरुता चैव वैवर्ण्यं मलिनाङ्गता ।
दोषाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः ॥
दीर्घे दीर्घायुराप्नोति लघौ भीतिविनाशनम् ।
स्वच्छे स्यादतुलकीर्त्तिश्च घने स्युः स्थिरसम्पदः ॥
खर्व्वे सर्व्वाङ्गरुक्दृष्टं गुरुण्युरुभयप्रदः ।
वैवर्ण्ये रोगशोकौ च मलिनं मृत्युमादिशेत् ॥"

इति स्थलजम् ॥ * ॥

अथ जलजम् ।

"लवणेक्षुसुरासर्पिर्दधितोयपयोऽब्धिषु ।
पयोधरं गुणवशाच्चमर्य्यः सप्त सप्तसु ॥
पुच्छानि तासां कृत्तानि जन्तुभिर्मकरादिभिः ।
[illegible] तत्तीरे पुण्यशालिभिः ॥
लवणाब्धिसमुद्भूतं पीतं गुरु तथा लघु ।
[illegible]
[illegible] सान्द्रं चामरं विमलं लघु ।
[illegible] चामरे ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

नारिष्टं नेतयस्तस्य यस्येदं चामरं गृहे ।
क्षीरोदसम्भवं श्वेतं दीर्घं लघु घनं महत् ॥
अस्य चामरराजस्य विज्ञेयो गुणविस्तरः ।
नाल्पेन तपसा लभ्यो देवानामपि जायते ॥
ह्रियतेऽभ्यन्तरे सिन्धोर्नागैः सम्पत्तिलोलुपैः ।
एषां पूर्व्ववद्ज्ञेयं जातिदोषगुणादिकम् ॥ * ॥
स्थलजे जलजे चैव भाव्यमेतद्विशेषणम् ।
स्थलजं सुखदत्वं हि दण्डे मिथमिथायते ॥
जलजं वह्निदुर्दश्यं मज्जान्तं धूमसङ्गिरेत् ।
चामराणां सहुद्दिष्टमित्येवं लक्षणद्वयम् ॥
एवं विमृश्य यो धत्ते स राजा सुखमश्नुते ॥ * ॥
जलजं चामरं राजा यो धत्ते जाङ्गलेश्वरः ।
तस्याचिरात् कुलं वीर्य्यं लक्ष्मीरायुश्च नश्यति ॥
अनूपाधीश्वरो राजा यो वहेत् स्थलजं तथा ।
तस्यैतानि विनश्यन्ति लक्ष्मीरायुर्यशो बलम् ॥
नालं वर्णद्वये तेषां विधेयं शिल्पिना क्रमात् ।
संस्कारो वालुकायन्त्रे मत्स्यसलिलादिभिः ।
तदुष्णसलिलक्षायात् कृत्रिमत्वं विपद्यते ॥"

इत्युपकरणयुक्तौ चामरोद्देशः । इति भोजराजकृतयुक्तिकल्पतरुः ॥

चामरपुष्पः, पुं, (चामरवत् पुष्पमस्य ।) गुवाकः । काशः । आम्रः । केतकः । इति मेदिनी । पे, ३१ ॥

चामरपुष्पकः, पुं, (चामरपुष्प + स्वार्थे कन् । चामरमिव पुष्पमस्य इति कप् वा ।) काशः । इति जटाधरः ॥ चामरपुष्पार्थोऽप्यत्र ॥

चामरा, स्त्री, (चामर + अजादित्वात् टाप् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, स्त्री, (चामर + संज्ञायां ङीप् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, [न्] पुं स्त्री, (चामर इव केशरोऽस्यास्य । इति इनिः ।) घोटकः । इति त्रिकाण्डशेषः ॥

चामीकरं, क्ली, (चमीकरः रत्नाकरविशेषः तत्र भवमित्यण् ।) स्वर्णम् । (यथा, शिवपुराणे वायुसंहितायाम् । २ । १३ ।
"ददृशुर्मुनयो देवा देवर्षिगणसेवितम् ।
शुद्धचामीकरप्रख्यं सर्व्वाभरणभूषितम् ॥")
धुस्तूरः । इत्यमरः । २ । ८ । ८५ ॥

चामुण्डा, स्त्री, (महासंग्रामे चण्डमुण्डाख्यौ द्वौ शुम्भनिशुम्भसेनाध्यक्षौ अनया प्रमथ्य निहतौ अतः परितुष्टया भगवत्या कौशिक्या चामुण्डेति संज्ञा रचिता । एतत् सर्व्वं तु देवीमाहात्म्ये द्रष्टव्यम् ।) दुर्गा । इति जटाधरः ॥ तालशान्तिः । इति शब्दरत्नावली ॥ तद्भेदाः । चर्च्चिका १ चर्म्ममुण्डा २ मार्ज्जारकर्णिका ३ कर्णमोटी ४ महागन्धा ६ भैरवी ७ कापालिनी ८ । इति हेमचन्द्रः ॥ अस्या ध्यानं यथा,—
"काली करालवदना [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥"

अस्याश्चामुण्डेति नामकारणं यथा,—
"यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि ! भविष्यसि ॥"

इति चण्डी ॥

अस्यास्तन्त्रादिकं यथा,—
"देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता ।
तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव ! ॥
समाग्निसहितो दन्त्यः प्रान्तस्तस्मात् पुरःसरः ।
षष्ठस्वरामिविन्दिन्दुसहितो मादिरेव च ॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम् ।
एतन्मूर्त्तिं प्रवक्ष्यामि वत्सैकाग्रमनाः शृणु ॥
नीलोत्पलदलश्यामा चतुर्ब्बाहुसमन्विता ।
खट्वाङ्गं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥
वामे चर्म्म कपालञ्च ऊर्द्ध्वाधोभावतः पुनः ।
दधती मुण्डमालाञ्च व्याघ्रचर्म्मधराम्बरा ॥
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ।
लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥
कबन्धवाहना पीनविस्तारश्रवणानना ।
एषा ताराह्वया देवी चामुण्डेति च कथ्यते ॥
एतस्या योगिनी चाष्टौ पूजयेद्विनादेरपि ।
त्रिपुरा भीषणा चण्डी कर्त्त्री हन्त्री विधात्रिका ॥
कराला शूलिनी चेति अष्टौ ताः परिकीर्त्तिताः ।
एषातिकामदा देवी साधकानिष्टकरी सदा ॥
एतस्याः सदृशी काचित् कामदा न हि विद्यते ॥"

इति कालिकापुराणे ६० अध्यायः ॥

चाम्पिला, स्त्री, (चपि + भावे घञ् । ततष्टाप् । चम्पैषेनि चाम्पा । ततोऽस्त्यर्थे इलच् टाप् च ।) नदी । इति त्रिकाण्डशेषः ॥

चाम्पेयः, पुं, (चम्पायां नद्यां भव इति ढक् ।) चम्पकः । इत्यमरः । २ । ४ । ६३ ॥ (यथास्य पर्य्यायाः ।
"चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नागकेशरः । (यथा,—
"नागपुष्पः स्मृतो नागः केशरो नागकेशरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
राजविशेषः । यथा, रामायणे [illegible] । ८ । ५१० ।
"चाम्पेयो नागदन्तश्च [illegible] ॥"
विश्वामित्रपुत्राणामन्यतमः । यथा, महाभारते । १३ । ४ । ५० ।
"श्यामायनिर्गालवश्च चाम्पेयोऽज्जयनौ यथा ॥"
क्ली, स्वर्णम् । यथा भागवते । ६ । ३८ ।
"[illegible] चाम्पेयदुकूल[illegible] ॥")

चाम्पेयकं, क्ली, (चाम्पेय इव कायतीति । कै + कः । स्वार्थे कन् वा ।) किञ्जल्कः । इति राजनिर्घण्टः ॥

चाम्र्म्मं, क्ली, ([illegible]) [illegible] । इति [illegible] ॥

चाय, ऋ ङ [illegible] । इति कविकल्पद्रुमः ॥ (भ्वा-उभं-सकं-सेट् ।) [illegible] ॥

चारं, क्ली, (चर्य्यते भक्ष्यते कोपद्रवेयादिवशा-दिति। चर+कर्म्मणि घञ्।) कृत्रिमविषम्। इति हेमचन्द्रः। ४। ३६८॥

चारः, पुं, पियालवृक्षः। गतिः। बन्धः। अवसर्पः। इति मेदिनी। रे, ३३॥ कारागारम्। इति हेमचन्द्रः। ४। ३६८॥ (चर एव इति स्वार्थे अण्।) गूढ़पुरुषः। चरः। तद्विवरणम्। यदुक्तं कालिकापुराणे ८५ अध्याये।

"कृषिर्दुर्गञ्च वाणिज्यं सज्ञानां करसाधनम्।
आदानं सैन्यकरयोश्चयनं गजवाजिनोः॥
गृहस्य प्रसवानाञ्च योजनं सततं जनैः।
प्रजानां चारसेतूनां बन्धनं चेति चाष्टमम्॥
एतदष्टासु वर्गेषु चारान् सम्यक् प्रयोजयेत्।
कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणाम्॥
अष्टौ चारान् नियुञ्जीयादष्टवर्गेषु पार्थिवः।
दशस्वपि युञ्जीत क्रमतः शृणु तानि मे॥
स्वामी सचिवराष्ट्राणि मित्रं कोषो बलं तथा।
दुर्गञ्च सप्तमं शेयं राज्याङ्गं गुरुभाषितम्॥
दुर्गयुक्तं चाष्टवर्गे चारं नात्मनि योजयेत्।
तस्मादिमानि प्रोक्तानि यत्र चारपदानि तु॥
गृहान्तेष्वेव पुत्रेषु सकूपादौ महानसे।
शत्रुदाम्नोर्योश्चैव बलाबलविनिश्चये॥
अष्टौ दशसु चैतेषु चारान् राजा प्रयोजयेत्।
तस्मात् प्रकार्य्यं जानीयात् तत्तु चारैर्निरूपयेत्॥
निरूप्य तत्प्रतीकारमयत्नं छिद्रतश्चरेत्।
यथानियोगमेतेषां यो यो यत्नान्यथा चरेत्॥
ज्ञात्वा तत्र शुभचारैर्दण्डयेद्वा नियोजयेत्।
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः॥
प्रदोषसमये एकं सदाभ्रमेव साधयेत्।
सपुत्रे चाप गृहान्ते ये तु चारा महानसे॥
नियुक्तांस्तान् मध्यरात्रौ एकेन यत्नापि मन्त्रिणा।
एतान् चारान् स्वयं पश्येत् नृपतिर्मन्त्रिणा विना।
यच्चोक्तं मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम्।
नैकवेशधरश्चारो नैको गोत्रसहार्च्चितः॥
संलुब्धो न हि सर्व्वत्र नातिदीर्घो न वामनः।
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान्॥
न वित्तभिन्नैर्हीनो न भार्य्यापुत्रवर्ज्जितः।
कार्य्यचारो नृपतिना गुप्ततत्त्वविनिर्णये॥
चारैरेकतराप्यन्यत्र भार्य्यासम्बन्धैनम्।
चतुर्दशप्यवोभिन्नं पराभिप्रायवेदकम्॥
इदभक्तं प्रकुर्व्वीत चारं प्रज्ञसमाधमम्।
चार्धं नद्येन् स्वयं राजा छविमाकर्षमेकधा॥
वर्णद्वयेष्व च दुर्गादौ तेषु प्रकाशियोजयेत्।
कन्याइष्टे नियुक्ताम् घोरान् दृष्टान् नियोजयेत्॥
वस्त्रान् यथान् तथा दृष्टान् स्त्रियो या बुद्धिमत्तराः।
महानसादिषु गुह्यीयान् स्त्रियो दृष्टा मनोस्थितौः॥"

यथा च हर्षचरितम्।

"तुङ्गैः विषचक्षारेण मराङ्गं रिपवः।"
(चारेण गूढ़चरेण। यथा, मनुः। ७।१८४।

"उपग्रह्यास्पदञ्चैव चारान् सम्यग् विधाय च।"
"चारांश्च कार्पटिकादीन्।" इति कुल्लूकभट्टः॥ प्रचारः। यथा, रामायणे। २। ६६। २६।

"निरुत्तचारः सहसा गतो रविः
प्रवृत्तचारा रजनी ह्युपस्थिता।"

"निरुत्तचारः निरुत्तकिरणप्रचारः प्रवृत्तचारा प्रवृत्ततमःप्रचारा।" इति तट्टीकायां रामानुजः॥ वाणिज्यादिव्यवहारः। यथा, महाभारते। ५। ३८। १२।

"भृतैर्वाणिज्यचारश्च पुत्रैः सेवेत च द्विजान्॥"

सञ्चारः। प्रवृत्तिः। यथा, देवीभागवते। १। ११। २२।

"न स्त्री दुष्यति चारेण न विप्रो वेदकर्म्मणा।"
"चारेण रजःसञ्चारेण।" इति टीकाकृन्नील-कण्ठः॥)

चारकः, पुं, (चारयति इति। चर+णिच्+ण्वुल्।) अश्वादेः पालकः। सञ्चारकः। (यथा, रामायणे। ३। ६६। १८।

"इयं स्ती भ्रातरि मे मयि वत्स्यति मैथिली।
न चाहमात्मां कुर्य्यां तं पाप! प्रच्छन्नचारक!॥")

बन्धः। इति मेदिनी॥ के, ८७। पियालद्रुमः। इति राजनिर्घण्टः॥ (चर एव स्वार्थे अण्, चारः। ततः स्वार्थे कन्। गुप्तचरः। यथा महाभारते। २।५।३८। [चारकैः॥"

"त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि
चरणप्रीतिः,नि। यथा,कथासरित्सागरे।१४।६५।

"गुप्तं विरचितां नाम मेनेऽन्तःपुरचारिकाम्॥")

चारटिका, स्त्री, (चर+णिच्+"शकादिभ्यो-ऽटन्।" ४। ८१। उणां। इति अटन् ततः संज्ञायां कन् कापि अत इत्वञ्च।) नखीनाम-गन्धद्रव्यम्। इति राजनिर्घण्टः॥

चारटी, स्त्री, (चर+णिच्+"शकादिभ्योऽटन्।" इति अटन् ततो गौरादित्वात् ङीष्।) पद्म-चारिणीवृक्षः। इत्यमरः। २। ४। १३६॥ भूम्यामलकी। इति राजनिर्घण्टः॥

चारणः, पुं, (चारयति प्रचारयति नृत्यगीतादि-विद्यां सत्कीर्त्तिं वा। चर+णिच्+ल्युः।) नटविशेषः। तत्पर्यायः। कुशीलवः। इत्यमरः। २। १०। १२॥ (यथा, मनुः। १२। ४४।

"चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः।
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः॥"
"चारणाः नटादयः।" इति कुल्लूकभट्टः॥")

गन्धर्व्वविशेषः। यथा,—

"गन्धर्व्वाणां ततो लोकः परतः शतयोजनात्।
देवानां गायकास्ते च चारणाः स्तुतिपाठकाः॥"

इति पाद्मे पातालखण्डम्॥

(देवयोनिविशेषः। यथा, भागवते। २। १। ३६।

"गन्धर्व्वविद्याधरचारणाप्सरः
स्वरःस्मृतीरसुरानीकवीर्य्यः॥"

चारपुरुषः। यथा, भागवते। ४। १६। १२।

"अन्तर्बहिश्च भूतानां पश्यन् कर्म्माणि चारणैः।
उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम्॥")

चारभटः, पुं, (चारेषु चरेषु भटः। यद्वा, बुद्धिकौशलादिप्रचारे भटः।) वीरः। हेमचन्द्रः।३।३८॥ (यथाह मर्तृहरिः। "[illegible]
चारभटचौरचेटकनटविटनिष्ठीवनसुरत।"

चारवायुः, पुं, (चारेण [illegible] यो वायुः।) निदाघजवायुः। [illegible] ग्रीष्मः॥

चारिणी, स्त्री, (चारयति सगुणमिति। च-णिच्+णिनिः ङीप् च।) [illegible] राजनिर्घण्टः॥

चारित्रं, क्ली, (चरित्रमेव इति। स्वार्थे अण्। चरित्रम्। इति हेमचन्द्रः। ३। १[illegible] रामायणे। ३। ५६। ६।

"कुलाक्रोशकरं लोके धिक्! [illegible]
मरुद्गणानामन्यतमः। यथा,हरिवंशे।[illegible]
"जयेनचाहुतिश्चैव चारित्रं बहुरक्षम्।
चरतीति। "चरेर्वृत्ते।" ४।१७२। इति णित्रम्। इत्यात्मम्॥)

चारित्रा, स्त्री, (चारित्रं व्यवहरमस्या अस्त्या इति। अच् टाप्।) तिन्[illegible] अम्लरावली॥

चारी, स्त्री, (चारः पदविक्षेपभेदः [illegible] अस्त्यस्यामिति।"अर्श्आदिभ्योऽच्।"इति इत्यच्। ततो ङीष्।) नृत्याङ्गविशेषः। [illegible]

"न हि चारीं विना नृत्ये नृत्यसाङ्गं प्रवर्त्तते।
शृङ्गारादिरसानान्तु भावोद्दीपनकारिका।
माधुर्य्योद्दीपना नित्यं चारी [illegible]"

अन्ये तु।

"एकपादप्रचारो यः सा चारी तु निगद्यते।
पादयोश्चारणं यत्र सा चारीति निगद्यते।
करणानां समायोगः खण्डकः परिकीर्त्तितः।
त्रिभिः खण्डैश्चतुर्भिर्वा मण्डलं सम्प्रदायतः।
समनखा नूपुरविद्धा तिर्य्यङ्मुखी मत्ता च।
कातरा च कुवीरा च विच्छिन्ना रथचक्रिका।
पार्ष्णिरेचितका तलदर्शिनी गजहस्तिका।
परावित्तलता चोरुताड़िताप्यर्द्धमण्डला।
सम्भ्रमीड़निका हरिणत्रासिका चोरोत्थि
तलोद्वृत्ता सञ्चरिता स्फुरिकापि तदैव च।
लड्डितजङ्घा सङ्घट्टिता स्यादथ मत्तल्ली।
उत्कुञ्चितातितिर्य्यक्कुञ्चिता चापकुञ्चिता।
षड्विंशतिर्मीमचार्य्यं व्याख्याता मनीषिभिः।"

अन्ये तु।

"समपादस्थिता वर्णा प्रकटाख्याधिकारिणी
विधाधा ताड़िता बद्धा एड़का क्रीड़िता तथा।
ऊरुद्वृत्ता छन्दिता जनितापरस्पन्दिता तथा।
स्पन्दितावनुसमतल्वी समोनुसारितमुद्भवा।
उच्छन्दिता च विज्ञेयाश्चायः षोड़श भूमिकाः।"

इति भूमिचारी॥

आकाशचारी यथा,—

"चारीश्चाकाशगा वक्ष्ये विक्षेपा लघरी तथा
अङ्घ्रिताड़िता भ्रमरी पुरःक्षेपा च दण्डिका।"

[illegible] विद्या च [illegible] ।
[illegible] च [illegible] तथा ।
[illegible]काभा भ्रमरिका इत्याद्यैरपि षोडश ॥”
[illegible]र्ष्ठं तु ।
[illegible] मार्गमालिका ।
[illegible]संपाताद्दृष्टा मृदङ्गपादिका ।
[illegible]भ्रमिता [illegible] गता च मर्दिका ।
[illegible] एकाश्रया [illegible]पादा तथैव च ।
[illegible] एताः पौरुषौत्र निरूपिताः ॥”
[illegible] भूमिचार्य्योऽर्द्धचार्य्योऽपि निबध्-
चार्य्यो ऽर्द्धचार्य्यो न्यस्तचार्य्योऽपि ता उदीरिताः ॥
“[illegible] चारीनिबन्धनः ।
[illegible] वा भिन्नदेशे वा प्रथमं ताः प्रयोजयेत् ॥
[illegible]चारीं तथाप्येव [illegible] ता न समाचरेत् ।
[illegible]पादस्य विन्यासचारी सैवाभिधीयते ॥
[illegible]रादिरभ्यासात् भवेद्दीपनकारणम् ।
माधुर्य्यं भूमसा नित्यं [illegible]लयान्विता ॥
निपतोऽङ्गविशेषाणां चारी सफलतां भवेत् ॥”
इति सङ्गीतदामोदरोक्तचारीलक्षणम् ॥

[चारु]ः, पुं, (चरति हृदेषु गुणत्वेन । चर+“दृसनिजनिचरीति ।”उणां १ । ३ । इति ञुण् ।) [वृह]स्पतिः । (चरति चित्ते इति ।) मनोज्ञे त्रि । इति मेदिनी । रे, ३३ ॥ (यथा, गीतगोविन्दे । १० । ८ ।
[मधिवचनजातम् ॥”
“इति चटुलचाटुपटुचारुमुरवैरिणो राधिका-
श्रीकृष्णस्य रुक्मिणीगर्भसम्भूतपुत्राणामन्यतमः । यथा, हरिवंशे । ११७ । ५८ ।
“चारुश्च बलिनां श्रेष्ठं सुताचारुमती तथा ॥”)

[चा]रुकः, पुं, (चारु+संज्ञायां कन् ।) शरबीजम् । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । रक्तपित्तकफापहत्वम् । शीतलत्वम् । लघुत्वम् । चक्षुष्यत्वम् । कषायत्वम् । वातकोपनत्वञ्च । इति भावप्रकाशः ॥

[चा]रुकेशरा, स्त्री, (चारूणि केशराणि यस्याः ।) नागरमुस्ता । तरणीपुष्पम् । इति राजनिर्घण्टः ॥

[चा]रुगर्भः, पुं, (चारुः मनोज्ञः गर्भः अभ्यन्तर्यन्त्रान्तःकरणमिति यावत् यस्य । यद्वा चारुगर्भं उत्पत्तिस्थानं यस्य ।) श्रीकृष्णपुत्रः । यथा, हरिवंशे । १६० । ६ ।
“चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च ॥”

चारुगुप्तः, पुं, (चारु यथा स्यात् तथा गुप्तः । यद्वा चारुणा ईश्वरेण कृष्णेन गुप्तः पालितः ।) श्रीकृष्णपुत्रः । यथा, हरिवंशे । १६० । ६ ।
“सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ॥”

चारुदेष्णः, पुं, रुक्मिण्यां श्रीकृष्णपुत्रः । यथा, हरिवंशे । १६० । ५ ।
“द्वितीयश्चारुदेष्णश्च हरिसिंहो महारथः ॥”

चारुधारा, स्त्री, (चारूणां मनोहरपदार्थानां धारा इव, त्रैलोक्यसुन्दरत्वेनास्यास्तथात्वम् । चार्व्वी धारा नीतिव्यवहारो यस्याः वा ।) शची । इति त्रिकाण्डशेषः ॥ (चारु धाम यस्याः ।) चारुधामा इत्यपि पाठः ॥

चारुनालकं, क्ली, (चारु नालं यस्य तत् ।) रक्तपद्मम् । इति पुराणम् ॥

चारुपर्णी, स्त्री, (चारु मनोज्ञं पर्णं पत्रं यस्याः ।) प्रसारणी । इति राजनिर्घण्टः ॥ गन्धभादालिया इति भाषा ॥ (प्रसारणीशब्देऽस्या गुणादिकं ज्ञेयम् ॥)

चारुफला, स्त्री, (चारु मनोहरं फलं यस्याः ।) द्राक्षा । इति राजनिर्घण्टः ॥

चारुबाहुः, पुं, (चारू बाहू यस्य ।) श्रीकृष्णपुत्रः । यथा, हरिवंशे । १६० । ६ ।
“चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥”

चारुविन्दः, पुं, (चारु चारुतां विन्दतीति । विदि+अण् ।) श्रीकृष्णपुत्रः । यथा, हरिवंशे । १६० । ६ ।
“सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ॥”

चारुमती, स्त्री, (चारु चारुता सौन्दर्य्यं अस्या अस्तीति । मतुप् ततो ङीप् ।) रुक्मिण्यां श्रीकृष्णस्य कन्या । यथा, हरिवंशे । १६० । ६ ।
“चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥”

चारुलोचनः, पुं,(चारुणी लोचने यस्य ।) हरिणः । इति त्रिकाण्डशेषः ॥ (चारुलोचनविशिष्टे त्रि ॥)

चारुवर्द्धना, स्त्री, (चारु चारुत्वं श्रियमित्यर्थः वर्द्धयति स्वगुणैरिति यावत् । वृध+णिच्+ल्युट् । कर्त्तरि ल्युर्वा ततष्टाप् ।) नारी । इति राजनिर्घण्टः ॥

चारुव्रता, स्त्री, (चारु व्रतमस्याः ।) मासोपवासिनी । इति त्रिकाण्डशेषः ॥

चारुशिला, स्त्री, (चारुश्चार्व्वी शिला इति नित्यकर्म्मधारयः ।) मणिः । इति त्रिकाण्डशेषः ॥

चार्च्चिक्यं, क्ली, (चर्च्चिकैव । स्वार्थे ष्यञ् ।) चन्दनादिना देहविलेपनविशेषः । इत्यमरः ॥ तत्पर्य्यायः । चर्च्चा २ स्थासकः ३ । इत्यमरः ॥ चर्च्चिक्यम् ४ । इति भरतः ॥ अपि च ।
“स्थासकः स्थायकश्चर्चा चार्च्चिक्यञ्च चतुष्टयम् ।
पश्चादौ कुङ्कुमादीनां छटादिषु निगद्यते ॥”
इति शब्दरत्नावली ॥

चार्म्मः, पुं, (चर्म्मणा परिवेष्टितः इति । चर्म्म+अण् ।) चर्म्माच्छादितरथः । इति भरतः ॥ चर्म्माच्छन्नरथे त्रि ॥

चार्म्मणं, क्ली, (चर्म्मणां समूहः इति । “भिक्षादिभ्योऽण् ।” ४ । २ । ३८ । इत्यण् ।) चर्म्मसमूहः । इत्यमरटीकायां भरतः ॥

चार्म्मिणं, क्ली, (चर्म्मिणां चर्म्मधारिणां समूहः । इति अण् ।) चर्म्मिसमूहः । इत्यमरटीकायां स्वामी ॥

चार्व्वाकः, पुं, (चारुः आपातमनोरमः लोकचित्ताकर्षकः इति यावत् वाकः वाक्यमस्य । ततः पृषोदरादित्वात् साधुः ।) तार्किकविशेषः । तत्पर्य्यायः । वार्हस्पत्यः २ नास्तिकः ३ लौकायतिकः ४ । इति हेमचन्द्रः ॥ स च आकाशभिन्नभूतचतुष्टयवादी । प्रत्यक्षमेकं प्रमाणमिति चार्व्वाकाः । इति न्यायसंग्रहः ॥ (यथा च सर्व्वदर्शनसंग्रहे । “अथ कथं परमेश्वरस्य निःश्रेयसप्रदत्वमभिधीयते बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्व्वाकेण दूरोत्सारितत्वात् दुरुच्छेदं हि चार्व्वाकस्य चेष्टितम् ॥”) दुर्य्योधनसखराक्षसविशेषः । (यथा, महाभारते । १२ । ३८ । २२—२५ ।
“निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः ।
राजानं ब्राह्मणच्छद्मा चार्व्वाको राक्षसोऽब्रवीत् ॥
तत्र दुर्य्योधनसखा भिक्षुरूपेण संवृतः ।
साक्षः शिखी त्रिदण्डी च धृष्टो विगतसाध्वसः ॥”)

चार्व्वी, स्त्री, (चारु+गुणवचनत्वात् ङीप् ।) कुवेरपत्नी । ज्योत्स्ना । बुद्धिः । शोभना । इति मेदिनी । वे, ६ ॥ दीप्तिः । इति शब्दरत्नावली ॥

चालः, पुं, (चालयति छादयतीति । चल+णिच्+अच् णौ वा । यद्वा चालयति आच्छादयत्यनेनेति । चल+णिच्+करणे घञ् ।) स्वनामख्यातगृहाच्छादनम् । तत्पर्य्यायः । पिटन् २ । इति त्रिकाण्डशेषः ॥ पटलम् ३ छदिः ४ । इत्यमरः । २ । २ । १४ ॥ कटलम् ५ । इति शब्दरत्नावली ॥ छादम् ६ । इति जटाधरः ॥ स्वर्णचूड़पक्षी । इति भूरिप्रयोगः ॥

चालकः, पुं, (चलति स्वेच्छयैव । चल+ण्वुल् ।) अङ्कुशदुर्द्धरहस्ती । इति त्रिकाण्डशेषः ॥

चालनं, क्ली, (चालयत्यनेनेति । चल+णिच्+करणे ल्युट् ।) चालनी । इत्यमरटीकायां भरतः ॥ (यथा, कर्म्मप्रदीपे ।
“सूक्ष्मच्छिद्रसमोपेतं चालनं तितउः स्मृतः ॥”
भावे ल्युट् । प्रेरणम् । यथा, भागवते । ३ । २६ । ३७ ।
“चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ॥”)

चालनी, स्त्री, (चालयत्यनेनेति । चल+णिच्+करणे ल्युट् ङीप् च ।) स्वनामख्यातशस्यादिचालनपात्रम् । तत्पर्य्यायः । तितउः २ । इत्यमरः ।२।९।२६ ॥ चालनम् ३ बहुच्छिद्रा ४ । इति भरतः ॥ चाचीरः ५ । इति जटाधरः ॥

चाषः,पुं,(चापयति भक्षयति कणादिकमिति । चष+स्वार्थे णिच्+अच् । यद्वा चष्यते भक्ष्यतेऽसौ मांसाशिभिरिति । चष्+कर्म्मणि घञ् ।) स्वर्णचातकः । सोणाचड़ा इति ख्यातः । नीलकण्ठ इति क्वचित् ख्यातः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । किकीदिविः २ नीलाङ्गः ३ पुण्यदर्शनः ४ । इति राजनिर्घण्टः ॥

चासः, पुं, (चाष+पृषोदरात् सत्वम् ।) चाषपक्षी । इक्षुः । इति मेदिनी । से, ३ ॥

चि, ञ चित्याम् । चयने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-अनिट् ।) ञ, चयति चयते धनं लोकः । इति दुर्गादासः ॥

चि, ञ न चित्याम् । इति कविकल्पद्रुमः ॥ (स्वां-उभं-द्विकं-अनिट् ।) चितिश्चयनं राशीकरणमिति यावत् । न ञ, चिनोति चिनुते । इति दुर्गादासः ॥

चि, क मि चित्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-द्विकं-सेट् ।) क मि, चययति चाययति । भमने तु चपयति चापयतीत्यपि । इति दुर्गादासः ॥

चिकित्सकः, पुं, (चिकित्सति रोगमपनयतीति । कित्+"गुप्तिज्किद्भ्यः सन् ।" ३।१।५ । इति स्वार्थे सन्+ण्वुल् ।) चिकित्साकर्त्ता । (यथा, मनुः । ८ । २८४ ।
"चिकित्सकानां सर्व्वेषां मिथ्या प्रचरतां दमः ।")
तत्पर्य्यायः । रोगहारी २ अगदङ्कारः ३ भिषक् ४ वैद्यः ५ । इत्यमरः । २ । ६ । ५७ ॥ तस्य लक्षणं यथा, चाणक्ये ।
"आयुर्व्वेदकृताभ्यासः सर्व्वेषां प्रियदर्शनः ।
आर्य्यशीलगुणोपेत एष वैद्यो विधीयते ॥"

चिकित्सा, स्त्री, (चिकित्सनमिति । कित् व्याधिप्रतीकारे+"गुप्तिज्किद्भ्यः सन् ।" ३ । १ । ५ । इति स्वार्थे सन् ततः अप्रत्ययः ।) रोगप्रतीकारः । तत्पर्य्यायः । रुक्प्रतिक्रिया २ । इत्यमरः । २ । ६ । ५० ॥ उपचारः ३ उपचर्य्या ४ निग्रहः ५ दिष्टानिष्टा ६ क्रिया ७ उपक्रमः ८ शमः ९ । इति राजनिर्घण्टः ॥ चिकित्सितम् १० प्रतीकारः ११ भिषग्जितम् १२ । इति रत्नमाला ॥ रोगप्रतिकारः १३ । इति शब्दरत्नावली ॥ सा त्रिधा यथा, वैद्यके ।
"आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता ।
शस्त्रैरासुरी दैवी स्यात् दिव्यौषधिकाश्रया ॥
मानुषी बहुधा ज्ञेया अश्मशोमादिसंश्रया ।
कर्म्मी चाल्पकृते लोके मानुषी तत्र पूजिता ॥"
तस्या लक्षणं यथा,—
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम् ॥
या दुरीर्णं दमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥"
चिकित्साविधुरदेशो यथा,—
"नासमापविचिकित्सः स्यान्निर्दोषोऽल्पतया
[illegible]
रोगमार्गे परीक्ष्यैव ततोऽनन्तरमौषधम् ।
[illegible] कर्म्म [illegible] समाचरेत् ॥
[illegible] केवलं कर्त्तुं दौ [illegible] न चौषधम् ।
[illegible] न चैव [illegible] राजनः ॥
[illegible] चिकित्सकः ।
[illegible] कुर्य्यात् चिकित्सितम् ।
[illegible] चोर्ध्व [illegible] ।
[illegible] कुर्य्यात् [illegible] न कार
[illegible] देत् ।
[illegible] वा न [illegible] कृता ।
[illegible] न विघ्नेन ।
[illegible] न [illegible] मतः ॥"
[illegible] यथा,—
[illegible]

कर्म्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ॥"* ॥
चिकित्साङ्गानि यथा, भावप्रकाशे ।
"रोगी दूतो भिषग्दीर्घमायुर्व्वैद्यश्च सेवकः ।
सदौषधं चिकित्सायामित्यङ्गानि बुधा जगुः ॥"

चिकित्सितं, क्ली, (कित्+स्वार्थे सन् ततो भावे क्तः ।) चिकित्सा । इति रत्नमाला ॥ (यथा, सुश्रुते सूत्रस्थाने २ अः ।
"बीजं चिकित्सितस्यैतत् समासेन प्रकीर्त्तितम् ॥"
पर्य्याया अस्य यथा, वैद्यकरत्नमालायाम् ।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम् ॥"
चिकित्स्यतेऽनेनेति । करणे क्तः । भेषजम् । अस्य पर्य्याया यथा, चरके चिकित्सास्थाने १ अः ।
"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम् ।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम् ॥
विद्याद्भेषजनामानि भेषजं द्विविधञ्च तत् ।
यद्व्याधिनिर्घातकरं वक्ष्यते तच्चिकित्सितम् ॥
चिकित्सितार्थ एतावान् विकाराणां यदौषधम् ।"
यथा, भागवते । १ । ५ । ३२ ।
"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम् ।
यदीश्वरे भगवति कर्म्म ब्रह्मणि भावितम् ॥")
कृतप्रतीकारे त्रि ॥

चिक्किनः, त्रि, (नि गता नासिकाऽस्य । "इनच्-पिटच् चिकचि च ।" ५ । २ । ३३ । इति इनच् प्रकृतेश्चिकादेशश्च ।) चिपिटनासिकः । इति केचित् ॥

चिक्किलः, पुं, (चि+बाहुलकात् इलच् कुक् च ।) पङ्कः । इति हेमचन्द्रः । ४ । १५६ ॥

चिकीर्षा, स्त्री, (कर्त्तुमिच्छा इति । "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा ।" ३ । १ । ७ । इति कृधातोः इच्छार्थकसन्प्रत्ययेन चिकीर्ष, ततः "अप्रत्ययात् ।" ३ । ३ । १०२ । इत्यः ।) कर्त्तुमिच्छा । इति मुग्धबोधम् ॥ करिबार वाञ्छा इति भाषा । (यथा, भागवते । २ । १० । २४ ।
"हृतौ बबन्धुस्तस्य नाग्रकर्म्मचिकीर्षया ॥")

चिकीर्षुः, त्रि, (चिकीर्षतीति । कृ+सन्+ "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) कर्त्तुमिच्छुः । करणेच्छाविशिष्टः । इति व्याकरणम् ॥

चिकुरः, पुं, (चि इत्यव्यक्तशब्दं कुरतीति । कुर-शब्दे+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) केशः । (यथा, राजतरङ्गिण्याम् । ८ । ३६७ ।
"चिकुरनिचये यत्र कौटिल्यं निरीक्षनयोश्च चा ॥")
अयं हि केशसमूहवाचकः शब्दः । चिकुर-चिरा । यथा, महाभारते । १ । १०१ । ८४ ।
"तस्य हि चिरा मार्गश्चिकुरो नाम नामतः ॥
न विशत् वैनतेय पन्नगपुङ्गवादिनः ॥")
पर्व्वतः । इति मेदिनी । रे, १११ ।

चिकुरः, त्रि, (चि+कुर [illegible] तु रोयमनिश्चित्य वक्ष [illegible] ३ । १ । ४६ ॥

चिकुरपक्षः, पुं, (चिकुर [illegible] समूहः ।) कचसमूहः । [illegible] मरः । २ । ६ । ९८ ॥

चिकुरपाशः, पुं, (चिकुरा [illegible] समूहः ।) केशसमूहः । इत्य[illegible]

चिकुरहस्तः, पुं, (चिकुराणां [illegible] केशसमूहः । इत्यमरः । २ । [illegible]

चिकूरः, पुं, (चिकुर+निपात[illegible] केशः । इति शब्दभेदप्रकाशः ॥

चिक्क, क व्यर्थो । इति कविकल्पद्रु[illegible] परं-सकं-सेट् ।) कोपधः । इतो[illegible] व्यर्थः पीडनम् । क, चिक्कयति [illegible] इति दुर्गादासः ॥

चिक्कः, पुं, (चिक् इत्यव्यक्तशब्देन [illegible] यते इति । चिक्+कै+कः ।) छुछु[illegible] इति त्रिकाण्डशेषः ॥ (नि गता [illegible] स्येति । "इनच्पिटच्चिकचि च ।" ५ । २ । [illegible] इत्यस्य वार्त्ति "कप्रत्ययचिकादेशौ च वक्त[illegible] इति कप्रत्ययो नेश्चिकादेशश्च । नता[illegible] त्रि । इति सिद्धान्तकौमुदी ।)

चिक्कणं, त्रि, (चिक्यते ग्रायते इति । [illegible] "चिक्केः कणः कश्च ।" उणा[illegible] इति कर्म्मणि कणः कषान्तादेशः [illegible] गुणः ।) स्निग्धमसृणादि । [illegible] गुणवद्वस्तु ।) इत्यमरः । २ । ९ । [illegible] इति भाषा ॥ (यथा, महाभार[illegible] १८४ । ३४ ।
"कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो म[illegible] दारुण[illegible]

चिक्कणः, पुं, (चिक्कणं स्निग्धगुणं विद्य[illegible] अच् ।) पूगवृक्षः । तत्फले क्ली । इति [illegible] निर्घण्टः ॥ (औषधपाकस्यावस्थाविशेषो [illegible]
"पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः [illegible] इति वाभटे कल्पस्थाने षष्ठेऽध्याये [illegible]

चिक्कणा, स्त्री, (चिक्कणं मसृणता विद्यतेऽस्याः [illegible] अर्शआदित्वादच् । ततष्टाप् ।) उत्तमा [illegible] तत्पर्य्यायः । नैचिकी २ । इति शब्दरत्नाव[illegible] पूगफलम् । इति राजनिर्घण्टः ॥

चिक्कणी, स्त्री, (चिक्कण+गौरादित्वात् ङीष् ।) पूगफलम् । इति राजनिर्घण्टः ॥

चिक्कसः, पुं, (चिक्कयति पीडयति चूर्णं [illegible] मिति । चिक्क+असच् ।) यवचूर्णम् । [illegible] हेमचन्द्रः । ३ । ६६ ॥

चिक्का, स्त्री, (चिक्कयति पीडयति भोक्तारं [illegible] चिक्क+अच् ।) पूगफलम् । इति राजनिर्घण्टः ॥

चिक्किटः, पुं, (चिक् इत्यव्यक्तशब्देन कटतीति । गतौ+अच् । प्रकृत्यादित्वात् [illegible] विशेषः । गर्त्ताचिङ्गडी इति भोजराज[illegible] इति च भाषा ॥ तत्पर्य्यायः । महाशल्क [illegible]

इति शब्दावली । १८६ । अस्य गुणाः । मुख-
रुक् । मालिन्यम् । मधुरत्वम् । मलहर्तृत्वम् ।
मेहविनाशकारित्वम् । कफत्वम् । शोधकत्वम् ।
श्वयथुनाशकारित्वम् । इति राजवल्लभः ॥ (तथा-
प्यस्य भक्षणनिषेधोऽपि यथा,—
"प्राणः प्रार्थयमानो मद्यमपि मसलितं ब्रजेनैव
गाययात् ।
तोमं चौरन्न प्रायं मसलितदलकं चिरकं
चिञ्चटञ्च ॥"
इति वैद्यक-चक्रपाणिसंग्रहे ॥)

चिञ्चटी, स्त्री, (चिञ्चट+जातौ ङीष् ।) मत्स्य-
विशेषः । चूणाचिङ्गड़ी इति भाषा ॥ अस्या
गुणाः । मधुरत्वम् । गुरुत्वम् । वातनाशित्वम् ।
मेदकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥
चिञ्चटः, पुं, (चिञ्चट+पृषोदरादित्वात् टस्य टले
साधुः ।) चिङ्गटमत्स्यः । इति शब्दमाला ॥
(विवरणमस्य चिङ्गटशब्दे ज्ञातव्यम् ॥)

चिचिण्डः, पुं, फलविशेषः । चिचिङ्गा इति चिचिङ्गा
इति च भाषा ॥ तत्पर्य्यायः । श्वेतराजिः २
सुदीर्घः ३ गृहकूलकः ४ । अस्य गुणाः । वात-
पित्तनाशित्वम् । पथ्यत्वम् । बलार्थकारित्वम् ।
शोषिणोऽतिहितत्वम् । पटोलतः किञ्चिद्गुण-
हीनत्वञ्च । इति भावप्रकाशः ॥ (यथा च चारीने
प्रथमे स्थाने दशमेऽध्याये ।
"चिचिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ।
शोषिणोऽतिहितः किञ्चिद्गुणैर्न्यूनः पटोलतः ॥")

चिञ्चा, स्त्री, (चिं चयनं चिनोतीति । चि+
अन्येभ्योऽपीति डः ।) तिन्तिड़ीवृक्षः । इत्य-
मरः । २ । ४ । ४३ ॥ (यथा,—
"चिञ्चादलवत्सघातु पथ्यं दध्योदनं हितम् ॥"
इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे गुल्माधिकारे ॥)

चिञ्ची, स्त्री, (चिञ्च+गौरादित्वात् ङीष् ।)
गुञ्जा । इति केचित् ॥

चिञ्चाम्लं, क्ली, (चिञ्चा तिन्तिड़ी तद्वत् अम्लं
यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिञ्चासारः, पुं, (चिञ्चायास्तिन्तिड्याः सार इव
सारोऽस्त्र यत्र ।) अम्लशाकः । इति राज-
निर्घण्टः ॥

चिञ्चोटकः, पुं, (चिञ्चेव अटतीति । अट+
ण्वुल् । पृषोदरात् साधुः ।) तृणविशेषः ।
चेँचुको इति चेँचुड़ा इति च भाषा ॥ तत्-
पर्य्यायः । अङ्गलोष्ठः २ । इति रत्नमाला ॥
चिञ्चाटकोऽपि पाठः ॥

चिट, ग्रेषे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-
सेट् ।) चेटति भृत्यं स्वामी । इति दुर्गादासः ॥
चिट, क ग्रेषे । इति कविकल्पद्रुमः ॥ (चुरां-परं-
सकं-सेट् ॥)

चित, ई ज्ञाने । इति कविकल्पद्रुमः ॥ (भ्वा-परं-
सकं-सेट् ।) ई, चित्तः । ज्ञानमिह जागरणम् ।
ज्ञानञ्च अविद्यानिद्रयाक्रान्ते जगत्येकः स चेत-
तीति हलायुधः । चिचेत रामस्तत् कृच्छ्रम् ।
इति दुर्गादासः ॥

चित, इ र ज्ञाने । इति कविकल्पद्रुमः ॥ (भ्वां-
परं-सकं-सेट् ।) इ क, चिन्त्यते चित्तं सुधीः ।
इति दुर्गादासः ॥

चित, क ङ ज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-
आत्मं सकं-सेट् ।) क ङ, चेतयते । रामस्य
चेतयन्ति च । इति भट्टौ तत्र ज्ञानाभिव्यक्तिमिति
रमानाथः । वस्तुतस्तु चेतयते तत्सेतं करोतीति
वा साध्यम् । इति दुर्गादासः ॥

चित्, स्त्री, (चित् संज्ञाने+सम्पदादित्वात् भावे
क्विप् ।) ज्ञानम् । इत्यमरः । १ । ५ । १ ॥
(यथा, भागवते । ३ । ७ । २ ।
"ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया चापि युज्येरन् निर्गुणस्य गुणाः
क्रियाः ॥")

चित्, व, असाकल्यम् । इत्यमरः ॥ यथा । किञ्चित्
कश्चित् इत्यादि ॥ (तत्तु प्रत्ययविशेषः । कालाद्-
निर्णये चित्प्रत्ययस्य प्रयोगो दृश्यते । "किम्:
सर्वनामाचिद्भ्यां ।" इति मुग्धबोधव्याकरणप्रणेता
पूज्यपादबोपदेवाचार्य्यः ॥)

चितः, त्रि, (चि+कर्म्मणि क्तः ।) छन्नः । इति
मेदिनी । ते, १८ ॥ (सञ्चयनः । सञ्चितः ।
"इह वै कर्म्मचितो लोकः क्षीयते एवमेवामुत्र
पुण्यचितः क्षीयते ।" इति श्रुतिः ॥)

चिता, स्त्री, (चीयते सञ्चितायामितस्यां यद्वा
चीयते उच्चीयतेऽग्नौ प्रेतस्य परलोकश्च गमेति इति ।
चि+अधिकरणे वा कर्म्मणि क्तस्ततष्टाप् ।)
शवदाहाधारचुल्ली । तत्पर्य्यायः । चित्या २ ।
इत्यमरः । २।८।११७ ॥ काष्ठमठी ३ चैत्यम् ४
चिताचूड़कम् ५ चितम् ६ । इति त्रिकाण्ड-
शेषः ॥ चितिः ७ । (यथा, महाभारते ।
१ । २१८ । १७ ।
"चितामेदृद्व्वरदमाण्यं पचाभ्यां तत् प्रवर्त्तते॥")
संहतिः । इति मेदिनी । ते, १८ ॥

चिताचूड़कं, क्ली, (चितेव चूड़कम् ।) चिता ।
इति त्रिकाण्डशेषः ॥

चितिः, स्त्री, (चीयतेऽस्यामग्निरिति । चि+अधि-
करणे क्तिः ।) चिता । (यथा, भागवते ।४।२८।५०।
"चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥")
समूहः । इति मेदिनी । ते, १८ ॥ दुर्गा । यथा,
"चितिश्चैतन्यभावाद्या चेतना वा चितिः
स्मृता ।
महान् व्याप्य स्थिता सर्व्वं महद्वा प्रकृति-
र्म्मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥ * ॥
भित्तिस्थेष्टिकादिस्तरगज्ञानार्थाङ्कविशेषः । यथा,
चितौ करणसूत्रं सार्द्धवृत्तम् ।
"उच्छ्रयेण गुणितं चितेः किल
क्षेत्रसम्भवफलं घनं भवेत् ।
इष्टिकाघनहृते घने चिते-
रिष्टिकापरिमितिश्च लभ्यते ॥
इष्टकोच्छ्रयहृदुच्छ्रितिश्चितेः
स्युः स्तराश्च दृषदां चितेरपि ॥
उदाहरणम् ।
अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः ।
उच्छ्रितिस्त्र्यङ्गुला यस्यामिष्टिकास्ताश्चितौ किल ॥
यद्विस्तृतिः पञ्चकराष्टहस्तं
दैर्घ्यञ्च यस्यां त्रिकरोच्छ्रितिश्च ।
तस्यां चितौ किं फलमिष्टिकानां
संख्या च का ब्रूहि कतिस्तराश्च ॥



इष्टिकायाः घनहस्तमानम् $\frac{3}{64}$ चितेः क्षेत्र-
फलम् ४० । उच्छ्रयेण गुणितं चितेर्घनफलम् १२० ।
तथा इष्टिकासंख्या २५६० । स्तरसंख्या २४ ।
एवं पाषाणचयेऽपि । इति लीलावती ॥ (इष्टकविशेषः । यथा, मार्क-
ण्डेये । २२ । ८ ।
"चितयज्ञ कर्कशा गान्तरिक्षगता यतः ॥")

चितिका, स्त्री, (चितिः कार्य्यभेदः सा इव काय-
तीति । कै+कः ।) कटिस्थशृङ्खला । इति हारा-
वली । २०४ ॥

चित्तं, क्ली, (चेतयनेनेति । चित्+करणे क्तः ।) अनु-
सन्धानात्मिकान्तःकरणवृत्तिः । इति वेदान्तः ॥
"यत्तत् सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् ।
यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥
स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः ।
प्रवृत्तिलक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥"
इति श्रीभागवतम् ॥
अस्यार्थः । "अधिभूतस्वरूपेण तस्यैव महा-
नितिसंज्ञा अध्यात्मस्वरूपेण चित्तं उपास्यस्वरूपेण
वासुदेवः अधिष्ठाता तु तस्य क्षेत्रज्ञः ।" इति
श्रीधरस्वामी ॥ (अनेनैव चित्तक्त्तेः प्रथमसम्बन्धः ।
अतएव भगवत्पतञ्जलिपादैरुपदिष्टं प्रथमसूत्रे
"योगश्चित्तवृत्तिनिरोधः ।" तथा च मुण्डकोप-
निषदि । ३ । १ । ९ ।
"एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन् प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्व्वमोतं प्रजानां
यस्मिन् विशुद्धे विभवत्येष आत्मा ॥")
मनः । इत्यमरः । १ । ४ । ३१ ॥

चित्तप्रसन्नता, स्त्री, (चित्तस्य प्रसन्नता प्रसादः ।)
हर्षः । इति हेमचन्द्रः । २ । २२६ ॥

चित्तविप्लवः, पुं, (चित्तस्य विप्लवो विपर्य्ययः ।)
उन्मादः । इति हेमचन्द्रः । २ । २३४ ॥

चित्तविभ्रमः, पुं, (चित्तस्य विभ्रमः भ्रान्तिः ।)
उन्मादः । इत्यमरः । १ । ७ । २६ ॥ (उन्माद-
शब्दे विवृतिरस्य ज्ञेया ॥)

चित्तसमुन्नतिः, स्त्री, (चित्तस्य समुन्नतिः समु-
न्नयनं उत्तेजनमिति यावत् ।) मानः । इत्य-
मरः । १ । ७ । २२ ॥

चित्ताभोगः, पुं, (चित्तस्य आभोगः परिपूर्णता इत्यर्थः ।) एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिः । तत्पर्य्यायः । मनस्कारः २ । इत्यमरः । १ । ५ । ७ ॥

चित्तोन्नतिः, स्त्री, (चित्तस्य उन्नतिः उन्नयनम् ।) गर्व्वः । इति हेमचन्द्रः । २ । २३१ ॥

चित्यं, क्ली, (चीयते इति । चि + "चित्याग्नि-चित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः । निपातनात्तुगागमे साधुः । यद्वा, क्यप्प्रत्ययेन विनि तुगागमः ।) चिता । इति त्रिकाण्डशेषः ॥ (तज्जाते त्रि । यथा, रामायणे । १ । ५८ । ११ । "चित्यमाल्याङ्गरागश्च आयसाभरणोऽभवत् ॥")

चित्यः, पुं, (चीयतेऽसौ इति । चि + "चित्याग्नि-चित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः ।) अग्निः । इति मुग्धबोधम् ॥

चित्या, स्त्री, (चीयतेऽस्यामिति प्रेतस्य । चि + यः निपातनात् साधुः । क्यप् वा ।) चिता । इत्यमरः । २ । ८ । ११७ ॥

चित्र, इ क चित्रिकेदृशी । शोभ्यैद्भुते । इति कवि-कल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं सेट् ।) चित्रिकेदृशं कदाचिद्दर्शनम् । चित्रयति चित्रापयति राहुं लोकः कदाचित् पश्यतीत्यर्थः । चित्रयति प्रतिमां लोकः । इति दुर्गादासः ॥

चित्रं, क्ली, (चित्रयतीति । चित्र + कर्म्मणि अप् । यद्वा, चीयते इति । "अमिचिमिशसिभ्यः क्त्रः ।" उणां ४ । १६४ । इति क्त्रः ।) तिलकम् । आलेख्यम् । (यथा, मनुस्मृत्याम् । ६ । ५ । "उत्तमाधममावेन वर्णेन पटचित्रवत् ।") अद्भुतम् । (यथा, रामायणे । १ । १० । "चित्रं संक्रीडमानास्ताः क्रीडनैर्विविधैस्तथा ।") कर्बुरवर्णः । (यथा, माघे । १ । ८ । "निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा ।") खे पुंसि च । इति मेदिनी । रे, २५ ॥ (काव्य-)[illegible] [illegible]रविशेषः । यथा,—

"तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ।" [illegible] [illegible] यत्र कृत्वा वर्णाः खड्गमुरज-[illegible] [illegible] तच्चित्रं काव्यम् ॥ [illegible] [illegible] [illegible]स्तोभेदः । तत्र-[illegible] यथा, [illegible]

"[illegible] [illegible]
उदाहरणं यथा,—
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible]")
[illegible] । इति हेमचन्द्रः । ६ । ३२ ।
[illegible], त्रि । यथा, महाभारते । १ ।
[illegible]
[illegible] [illegible] ॥")
[illegible] ([illegible] [illegible] [illegible] चित्रं
[illegible] । चित्र + [illegible] + अच् ।
[illegible] [illegible] । चि-

+ "अमिचिमिशसिभ्यः क्त्रः ।" उणां । ४ । १६४ । इति क्त्रः ।) यमविशेषः । यथा, तिथ्यादितत्त्वे ।

"वृकोदराय चित्राय चित्रगुप्ताय वै नमः ।"

कर्बुरवर्णः । इत्यमरटीकायां भरतः ॥ (सर्प-विशेषः । यथा, महाभारते । २ । ६ । ८ ।

"कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥"

धृतराष्ट्र-पुत्रभेदः । यथा, तत्रैव । १ । ११७ । ४ ।

"चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥")

एरण्डवृक्षः । अशोकवृक्षः । चित्रकवृक्षः । इति राजनिर्घण्टः ॥

चित्रकं, क्ली, (चित्र + स्वार्थे कन् । यद्वा चित्र-मिव कायति । कै + कः ।) तिलकम् । इति मेदिनी । के, ८८ ॥ (वृक्षविशेषः । यथा, गारुडे १८७ अध्याये ।

"त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी ।")

चित्रकः, पुं, (चित्रेण चित्र इव वा कायति । कै + कः ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ व्याघ्रभेदः । चितावाघ् इति भाषा । तत्-पर्य्यायः । चित्रकायः २ उपव्याघ्रः ३ मृगा-न्तकः ४ शूरः ५ क्षुद्रशार्दूलः ६ चित्रव्याघ्रः ७ । वृक्षविशेषः । चिता इति भाषा ॥ तत्पर्य्यायः । अग्निः २ शार्दूलः ३ चित्रः ४ पाठीकटुः ५ शिखी ६ सप्तांशुः ७ दहनः ८ व्यालः ९ ज्योतिष्कः १० पालकः ११ अनलः १२ दारुणः १३ वह्निः १४ पावकः १५ अमरः १६ पाठी १७ क्रोधी १८ चित्राङ्गः १९ शूरः २० । अस्य गुणाः । अग्निसमत्वम् । पाके कटुत्वम् । शोफ-कफानिलोदरार्शोग्रहणीकृमिकण्डूनाशित्वञ्च । इति राजनिर्घण्टः ॥ पाकेऽपितुल्यत्वम् । कुष्ठ-नाशित्वम् । इति राजवल्लभः ॥ (यथा, शार्ङ्गधरे-चित्रकामयिधृतवचनम् ।

"चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः ।
रूक्षोष्णो ग्रहणीकुष्ठशोथार्शःकृमिकासनुत् ॥
वातश्लेष्महरो ग्राही वातार्शःश्लेष्मपित्तहृत् ।
त्रिविधं चैत्रकं शाकं काश्ममर्हं विमर्हितम् ॥
तमनैले मताश्रीके मारिते तक्रसम्भृतम् ॥")

ओषधिविशेषः । यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये ।

"पूतिकश्चित्रकः पाठा विडङ्गैलाहरेणवः ॥")

एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ ॥ (चित्र + कन् ।) चित्रकारः । इति हेमचन्द्रः ॥ (मृगेन्द्रः । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"मृगेन्द्रः चमरश्चित्रकः प्रमितिरुक्तः ।")

चित्रकण्टः, पुं, (चित्रः विचित्रः कण्ठोऽस्य ।) कपोतः । इति जटाधरः ॥ (कपोतपक्षिविशेषः ।) [illegible] [illegible]

चित्रकम्बलः, पुं, (चित्रवर्णो कम्बलमिति ।) कम्बलविशेषः । दुलिचा गालिचा इत्यादि भाषा ॥ यथा, उणादिकोषे ।

"कुथः कोऽपि चित्रकम्बले पुंसि वर्त्तते ।"

चित्रकरः, पुं, (चित्रं करोतीति ।) वर्णसङ्करजातिविशेषः । [illegible] स तु शूद्रागर्भे विश्वकर्म्मौरसात् । इति ब्रह्म-वैवर्त्तपुराणम् ॥ तत्पर्य्यायः । [illegible] इत्यमरः । २ । १० । ७ । [illegible] [illegible] शब्दरत्नावली ॥ वर्णो ४ [illegible] कारः ६ । इति जटाधरः । [illegible] सप्तशत्याम् । ३४५ ।

"चित्रकरतूलिकेव त्वां [illegible]

चित्रकर्म्मा, [न्] पुं, (चित्रं कर्म्म [illegible] [illegible] वृक्षः । इति शब्दचन्द्रिका । [illegible] कर्म्मा चित्रकारश्च ॥

चित्रकायः, पुं, (चित्रो नानावर्णः [illegible] देहो यस्य ।) व्याघ्रः । इति [illegible] चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

चित्रकारः, पुं, (चित्रं करोतीति । [illegible] ण्यश्च ।" ३ । २ । १ । इत्यण् ।) (यथा, महाभारते । १ । १२८ । [illegible]

"संमार्जितं सौधकारैश्चित्रकारै [illegible]

अस्य उत्पत्तिविवरणं यथा, पराशरपद्धतौ ।

"स्थपतेरपि गान्धिक्यां चित्रकारो [illegible]

चित्रकूटः, पुं, (चित्राणि कूटानि [illegible]) पर्व्वतविशेषः । इति शब्दरत्नावली । रामो वनं गत्वा प्रथमे यत्र [illegible] (पर्व्वतोऽयं [illegible] [illegible] योजनद्वयेऽतीते पार्श्वगताया [illegible] स्थाया सरितो दक्षिणतो राजते । यथा, [illegible] यणे । २ । ९२ । १० — १२ ।

"भरताहं इतीयेषु योजनेष्वजने [illegible]
चित्रकूटगिरिस्तत्र रम्यनिर्दरकाननः ।
उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी [illegible]
पुष्पितद्रुमसंच्छन्ना रम्यपुष्पितकानना ।
अनन्तरं तत्सरितश्चित्रकूटश्च पर्व्वतः ।
तयोः पर्णकुटीं तात । तत्र तौ [illegible]

अधुना बुन्देलखण्डाख्यप्रदेशे [illegible] ख्यातः ॥ (अयं हि पीठस्थानेषु [illegible] अत्र च भगवती सीताख्यैव [illegible] पूतरूपेण विराजते । यथा, [illegible] ७ । ३० । ७० ।

"चित्रकूटे तथा सीता विन्ध्ये [illegible]

तथा, महालिङ्गेश्वरतन्त्रे ।

"चित्रकूटे चन्द्रचूडो योगीन्द्रो [illegible]

चित्रकृत्, पुं, (चित्रं नानावर्णं करोति [illegible] क्विप् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । [illegible] (चित्रमालेख्यं करोति [illegible] । चित्रकारः ।) [illegible] इत्यायुधः ॥

चित्रकोलः, पुं, (चित्रो [illegible] [illegible] यस्य ।) अञ्जनिका । इति त्रिका[illegible]

चित्रगर्भं, क्ली, (चित्रो विचित्र[illegible] [illegible]) हरितालम् । इति राजनिर्घण्टः ।

चित्रगुप्तः, पुं, (गुप् रक्षणे [illegible] [illegible] जीवानामपापपुण्यादि[illegible] [illegible] [illegible]

त्स्वर्गं यस्मात्। यद्वा, चित्रं विचित्रं गुप्तं धर्म्मस्य स्वर्गं यस्य।) चतुर्दशयमान्तर्गतयमः। तस्य लेखकः। इति मेदिनी। ते, १८८॥ तस्योत्पत्तिर्यथा,—

"ब्रह्मपादाग्रतः सूक्ष्मसौम्यौ द्वौ बभूवतुः।
एको मसीशः सर्व्वाख्यः सर्व्वाखीहृदयद्विजात्॥
कुलप्रदीपः स्वीयानां घातीनां पूततास्पृहः।
वगलेति महाविद्यां गृहीत्वा साधयन् सदा॥
सर्व्वाणीहृदयाख्यस्य पक्षितस्य प्रसादतः।
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं, गुरो!॥
कृपया कुरु मां नाथ! त्वमेव वगला मम।
गुरुणापि वरो दत्तो राज्यं मुक्त्वा पुनर्भवान्॥
त्रिलोकाधिपतिर्भूत्वा सदा तत्र सुखिष्यति।
गुर्व्वाज्ञया मसीशः स राज्यभोगी द्विजार्च्चनात्॥
विहाय देहं भूयश्च विधात्मजो बभूव ह।
चित्रगुप्तश्चित्रसेनश्चित्राङ्गद इति त्रयः॥
स्वर्गे मर्त्त्ये च पाताले राजते चिरसत्तमः।
चित्रगुप्तो महाविद्यां प्राप्य कृष्णाख्यविप्रतः॥
पुत्त्रान् याचितवान्नैव गुरोर्देवत्वमावहन्।
यमान्तिस्थो बभूवापि स्वर्मर्त्याद्योविवेचकः॥
चिरं शुभाशुभं कर्म्म विविच्य शमनान्तिके।
यद्वदेत् सकलानान्तु तदेवाभोजयेद्यमः॥"

इत्याचारनिर्णयतन्त्रम्॥

अस्योत्पत्त्यन्तरं कायस्थशब्दे द्रष्टव्यम्॥

चित्रजल्पः, पुं, (चित्रो मनोहरो जल्पः।) वाक्यविशेषः। तल्लक्षणादिर्यथा,—

"प्रेष्ठस्य सुहृदा लोके गूढरोषाभिजृम्भितः।
भूरिभावमयो जल्पो यत्तीव्रोत्कण्ठितान्तिमः॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितम्।
विजल्पो उज्जल्पसंजल्पाववजल्पोऽभिजल्पितम्॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः।
एष भ्रमरगीताख्यो दशमे प्रकटीकृतः॥
असत्याभावमैचित्री चमत्कृतिसुदुस्तरः।
अपि वैचित्रजल्पोऽयं मनाक् तदपि कथ्यते॥

तत्र प्रजल्पः।
असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया।
प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्त्यते॥

यथा,—
मधुप! कितवबन्धो! मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक्॥१॥

अथ परिजल्पितम्।
प्रभोर्निर्दयताशाठ्यचापलाद्युपपादनात्।
सविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम्॥

यथा,—
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक्।
परिचरति कथं तत्पादपद्मं तु पद्मा
ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः॥२॥

अथ विजल्पः।
व्यक्तयाऽसूयया गूढमानमुद्रान्तरालया।
अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः॥

यथा,—
किमिह बहु षडङ्घ्रे! गायसि त्वं यदूना-
मधिपतिमगृहाणामग्रतो नः पुराणम्।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः॥३॥

अथोज्जल्पः।
हरेः कुहकताख्यानं गर्व्वगर्भितयेर्ष्यया।
सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईर्य्यते॥

यथा,—
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः।
चरणरज उपास्ते यस्य भूतिर्व्वयं का
अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः॥४॥

अथ संजल्पः।
सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया।
तस्याकृतज्ञताद्युक्तिः संजल्पः कथितो बुधैः॥

यथा,—
विसृज शिरसि पादं वेद्म्यहं चाटुकारै-
रनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन्॥५॥

अथ अवजल्पः।
हरौ काठिन्यकामित्वधौर्त्त्यादासक्त्ययोग्यता।
यत्र सेर्ष्यं भियेवोक्ता सोऽवजल्पः सतां मतः॥

यथा,—
मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्म्मा
स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम्।
बलिमपि बलिमत्त्वाऽवेष्टयद्ध्वाङ्क्षवद्य-
स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः॥६॥

अथाभिजल्पितम्।
भङ्ग्या त्यागौचितं तस्य खगानामपि खेदनात्।
यत्र सानुशयं प्रोक्तं तद्भवेदभिजल्पितम्॥

यथा,—
यदनुचरितलीलाकर्णपीयूषविप्रुट्-
सकृददनविधूतद्वन्द्वधर्म्मा विनष्टाः।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति॥७॥

अथ आजल्पः।
जैह्म्यं तस्यार्त्तिदत्वञ्च निर्व्वेदाद्यत्र कीर्त्तितम्।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः॥

यथा,—
वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः
कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः।
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्र-
स्मररुज उपमन्त्रिन्! भण्यतामन्यवार्त्ता॥८॥

अथ प्रतिजल्पः।
दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हेत्युदीरणम्।
दूतसम्माननेनोक्तं यत्र स प्रतिजल्पकः॥

यथा,—
"प्रियसख! पुनरागाः प्रेयसा प्रेषितः किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग!।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
सततमुरसि सौम्य! श्रीर्वधूः साकमास्ते॥९॥

अथ सुजल्पः।
यत्रार्ज्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम्।
सोत्कण्ठञ्च हरिः पृष्टः स सुजल्पो निगद्यते॥

यथा,—
अपि बत! मधुपुर्य्यामार्य्यपुत्त्रोऽधुनास्ते
स्मरति स पितृगेहान्! सौम्यबन्धूंश्च गोपान्।
क्वचिदपि स कथां नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु॥"१०॥

इत्युज्ज्वलनीलमणौ स्थायिभावः॥

चित्रतण्डुलं, क्ली, (चित्रो विचित्रस्तण्डुलो यस्य।) विडङ्गम्। इति रत्नमाला॥

चित्रतण्डुला, स्त्री, (चित्रो नानावर्णस्तण्डुलो यस्याः।) विडङ्गम्। इत्यमरः।२।४।१०६॥ (यथास्याः पर्य्यायाः।

"पुंसि क्लीबे विडङ्गः स्यात् कृमिघ्नो जन्तुनाशनः।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चित्रत्वक्, [च्] पुं, (चित्रा विचित्रा त्वक् यस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः॥

चित्रदण्डकः, पुं, (चित्रो विचित्रो दण्डो यस्य। इति कप्।) ओलवृक्षः। इति रत्नमाला॥

चित्रदेवी, स्त्री, (चित्रं दीव्यतीति। दिव्+अच्। गौरादित्वात् ङीष्।) महेन्द्रवारुणी। इति राजनिर्घण्टः॥

चित्रनेत्रा, स्त्री, (चित्रे मनोज्ञे नेत्रे यस्याः।) सारिकापक्षी। इति हारावली। ८८॥

चित्रपक्षः, पुं, (चित्रौ विचित्रौ पक्षौ यस्य।) तित्तिरिपक्षी। इति जटाधरः॥

चित्रपत्रिका, स्त्री, (चित्राणि विचित्राणि पत्राणि पर्णानि यस्याः। कापि अत इत्वम्।) कपित्थपर्णीवृक्षः। इति रत्नमाला॥ द्रोणपुष्पी। इति राजनिर्घण्टः॥

चित्रपत्री, स्त्री, (चित्राणि पत्राणि यस्याः। गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः॥

चित्रपदा, स्त्री, (चित्रं पदं यस्याः।) गोधापदीलता। इति शब्दमाला॥ छन्दोभेदः। इति छन्दोमञ्जरी॥ अस्य लक्षणादि छन्दःशब्दे द्रष्टव्यम्॥ (चित्रं पदं पदन्यासो यस्य यत्र वा इति विग्रहे विचित्रपदयुक्ते त्रि। यथा, महाभारते।३।११।१।

"वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि! त्वया वचः।
उक्तं तत् श्रुतमस्माभिर्नास्तिक्यन्तु प्रभाषसे॥")

चित्रपर्णिका, स्त्री, (चित्राणि पर्णानि पर्णानि यस्याः। कापि अत इत्वम्।) चित्रपर्णीतिः। तत्पर्य्यायः। शीर्णा २ शृगालविन्ना ३ त्रिपर्णीं ४ सिंहपुच्छिका ५ दीर्घपत्रा ६ पृश्निपर्णी ७ अंशुमती ८। इति रत्नमाला॥

चित्रपर्णी, स्त्री, (चित्राणि पर्णानि यस्याः। गौरादित्वात् ङीष्।) पृश्निपर्णी। इत्यमरः।

[illegible] । वर्ण्यस्फोटानना । चर्मनिर्यासी । हेमपुष्पी । इति राजनिर्घण्टः ॥ मञ्जिष्ठा । इति रत्नमाला ॥ (अस्याः पर्य्याया: ।
"मञ्जिष्ठा [illegible] चित्राङ्गी [illegible]
[illegible] चित्रवर्णा [illegible] ॥"
इति वैद्यकरत्नमालायाम् ॥)

[illegible]

मर्य्याय: । गन्धर्व्वराजः २ अङ्गारपर्णः ३ कुबेरसखः ४ दग्धरथः ५ । (यथा, महाभारते । १ । १७१ । १०—३८ ।

गन्धर्व्व उवाच ।

"जितोऽहं पूर्व्वकं नाम सुधाम्यङ्गारपर्णताम् ।
न च श्लाघे बलेनाहं न नाम्ना जनसंसदि ॥
साधिमं लब्धवांल्लाभं योऽहं दिव्यास्त्रधारिणम् ।
गान्धर्व्या माययेच्छामि संयोजयितुमर्ज्जुनम् ॥
दग्धामिना विचित्रोऽयं रथो मे रथ उत्तमः ।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम् ॥")

[illegible] । इति महाभारते । १ । ६५ । ४३ ॥

चित्रकः, पुं, (चित्रमाश्चर्य्यं लातीति । ला+कः ।) कर्म्मरङ्गः । तद्वृति चि । इति शब्दरत्नावली ॥

चित्रलता, स्त्री, (चित्रा नानावर्णा लता ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

चित्रला, स्त्री (चित्रल+"अजाद्यतष्टाप् ।" ४ । १ । ४ । इति टाप् ।) गोरक्षीक्षुपः । इति राजनिर्घण्टः ॥

चित्रलेखा, स्त्री, (चित्रो लेखो लेखनक्रियैयस्याः । चित्रं लेखयतीति वा । लिख+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । चित्रलेखनरतत्वादस्यास्तथात्वम् ।) अप्सरोविशेषः । सा उषायाः सखी कुम्भाण्डस्य कन्या । यथा, हरिवंशे । १७४ । ७४—७५ ।

"उवाच वरनारीं तु कुम्भाण्डतनया सतीम् ।
कुमार्य्य ते [illegible] ! सर्व्वथा सन्निविष्टसि ।
अप्सरश्चित्रलेखा वै चित्रं विज्ञापयेति सखि ॥"

यथा, श्रीभागवते । १० । ६२ । १४ ।

"बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता ।
सख्यपृच्छत् सखीमुषां कौतूहलसमन्विता ॥"

(अस्याश्चित्रलेखनपटुत्वञ्च यथा हरिवंशे । १७४ । ८०—८८ ।

[illegible]

चित्रवल्लिकः, पुं, (चित्रा [illegible] इव कायतीति । कै+कः ।) [illegible] इति हेमचन्द्रः । ४ । ४११ ॥

चित्रवल्ली, स्त्री, (चित्रा [illegible] यस्याः ।) म्टगेर्व्वारुः । महे[illegible] राजनिर्घण्टः ॥

चित्रवीर्य्यः, पुं, (चित्रमाश्चर्य्यं[illegible] रक्तैरण्डः । इति राजनिर्घण्टः ॥

चित्रशिखण्डिजः, पुं, (चित्रशिखण्डि[illegible] सुनेर्जायते इति । जन+डः ।) [illegible] इत्यमरः । १ । ३ । २४ ॥

चित्रशिखण्डिप्रसूतः, पुं, (चित्रशिखण्डि[illegible] रसः प्रसूतः सन्ततिः ।) [illegible] वृहस्पतिः ॥

चित्रशिखण्डी, [न्] पुं, (चित्रः शिखण्डः अस्त्यस्य । "अत इनिठनौ ।" ५ । २ । ११५ इति इनिः ।) सप्तर्षयः । इत्यमरः । १ । ३ ।
यथाह भरतः ।

"मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः ॥"

(यथाच, महाभारते । १२ । ३३५ । २७—

"ये हि ते ऋषयः ख्याताः सप्त चित्रशिखण्डिनः ।
तैरेकमतिभिर्भूत्वा यत् प्रोक्तं शास्त्रमुत्तमम् ।
वेदैश्चतुर्भिः समितं कृतं मेरौ महागिरौ ।
आस्यैः सप्तभिरुद्गीर्णं लोकधर्म्ममनुत्तमम् ।
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठश्च महातेजास्ते हि चित्रशिखण्डिनः ॥")

चित्रसर्पः, पुं, (चित्रः नानावर्णविशिष्टः सर्पः ।) मालुधानसर्पः । इति शब्दरत्नावली ।

चित्रसेनः, पुं, [illegible] गुणादिविनयात्मगोत्रस्कन्धविशेषः । [illegible]

[illegible]

[illegible], स्त्री, ([illegible] इति वा। [illegible] ।) [illegible]। यथा, [illegible]।
[illegible]।
[illegible]।
[illegible] ॥"
[illegible] कृष्णः [illegible] पुंस्कोकिलः [illegible] पश्चात् [illegible]। [illegible] दृश्यते। [illegible] नीलः। [illegible] चित्रम्। इति मेदिनी। [illegible]। मञ्जिष्ठा। मोहनः। सुभद्रा। [illegible]। (पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
[illegible] स्यान्मञ्जिष्ठा [illegible]।
[illegible] ॥")
[illegible]। अर्च्चिमेदः। मार्गविशेषः। इति मेदिनी॥ [illegible]विशेषः। इति हेमचन्द्रः॥ [illegible]
[illegible]।
[illegible] युवतीविशेषः। यथा,—
"[illegible]
[illegible] ।"
इति कालिदासः॥
[illegible] यथा, कौमोदकीमहिमे।
"प्रसादमास्ताम्[illegible]
[illegible] चरिचयाः।
प्रसादिकाले यदि यस्य चित्रा
बुद्धिर्विचित्रा खलु तस्य शाखे॥"
[illegible]। (यथा, चरके सूत्रस्थाने। १६ अः।
"[illegible] प्रियास्ताभिमुखौ विभीतका-
[illegible]।
[illegible]
[illegible] ॥
[illegible]
[illegible] ॥")
महाद्रोणा। मुसलीभेदी। मञ्जिष्ठा। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने ८ अध्याये।
"चित्राग्रमन्थितस्यैव दत्वादाद्यविनाशनम्॥")
छन्दोविशेषः। इति छन्दोमञ्जरी॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम्॥ (गायत्रीस्वरूपा महाशक्तिः। यथा, देवीभागवते।१२।६।५२।
"चक्रवाकस्तनी चेष्टा चित्रा चारुविलासिनी॥")
चित्राक्षी, स्त्री, (चित्रे आश्चर्य्ये नेत्रे यस्याः। समासे षच् स्त्रियां ङीष्।) सारिकापक्षी। इति त्रिकाण्डशेषः॥
चित्राक्षुपः, पुं, (चित्रा नानाप्रकारा विशेषपर्णो क्षुपः ह्रस्वशाखः।) द्रोणपुष्पी। इति राजनिर्घण्टः॥
चित्राङ्गं, क्ली, (चित्रं अङ्गं यस्मात्।) हिङ्गुलम्। हरितालम्। इति राजनिर्घण्टः॥
चित्राङ्गः, पुं, (चित्रमङ्गं यस्य।) चित्रकः। रक्तचित्रकः। सर्पः। इति राजनिर्घण्टः॥ (यथास्य गुणाः।

"चित्राङ्गो [illegible]।
[illegible] ॥"
इति [illegible]॥
[illegible]। यथा, महाभारते। १। ११०। ६।
"[illegible]॥")
चित्राङ्गदः, पुं, चन्द्रवंशीयराजविशेषः। स तु शान्तनुसुतः। विचित्रवीर्य्यभ्राता। (अयम् [illegible] सार्द्धं [illegible] सर्वान् [illegible]। अथ कदाचित् गन्धर्व्वराजचित्राङ्गदः युद्धार्थमेनं समाह्वयत्। ततः कुरुक्षेत्रमध्ये प्रवृत्ते महति तयोः [illegible] मायाबलेनानेन गन्धर्व्वराजेन निहतोऽयं शान्तनवः। [illegible] महाभारते। १। १०१। अध्याये द्रष्टव्या।) गन्धर्व्वविशेषः। इति महाभारतम्॥ (यथा, देवीभागवते। १। २०। ८८।
"चित्राङ्गदस्तु गन्धर्व्वो दृष्ट्वा तं भासमं नृपम्। उत्तमाङ्गमिव [illegible]॥")
[illegible] विद्याधरविशेषः। स [illegible]। तस्याभिशापकारणं यथा,—
"अयोनिजस्य [illegible]।
[illegible] इति [illegible]॥
[illegible]।
[illegible] यथा [illegible]॥
[illegible] पूजार्थ मामंति।
[illegible]॥
[illegible]।
[illegible] सुन्दरि।॥
हे चित्राङ्गद! [illegible]।
[illegible] न हि बुध्यसे॥
[illegible] चिरं कुरु सपो सदा।"
चित्राङ्गदः श्रापं श्रुत्वा आश्रयान् तुष्टाव ततो ब्राह्मणा [illegible]।
"हे चित्राङ्गद! हे तात वत्स! त्वं गोलयः किल। दुश्चिन्तां कुरु मा तात भद्रं ते कथयाम भोः॥ [illegible] प्राप्नोत्यसंशयम्।
[illegible] विना तात! [illegible] भवितुं किल।
[illegible] प्रतिजानीहि तत्त्वतः।
[illegible] देवत्वं ब्राह्मणत्वं कदापि न॥
[illegible] विना क्वापि न शासने।
[illegible] सुखेन वगता [illegible]॥
[illegible] नागलोकेश्वरो भव।
[illegible] भविष्यसि॥
[illegible] तव।
सदा वयं तव शिवं चिन्तयामो न भीं कुरु॥
तात गच्छ सुखं [illegible] नागलोकेऽपि विस्तरात्।
तत आनन्दमनसा गतश्चित्राङ्गदस्तलम्॥"
इत्याचारनिर्णयतन्त्रम्॥
(स्त्रियां टाप्। मणिपुरेश्वरस्य चित्रवाहनस्य कन्या। यथा, महाभारते। १।२१६।१५।

"नाम्ना चित्राङ्गदा नाम दुहिता चारुदर्शना॥")
चित्राङ्गसू, स्त्री, (चित्राङ्गदं सूते प्रसूते इति। [illegible]+क्विप्।) सत्यवती। सा व्यास-माता। इति त्रिकाण्डशेषः॥
चित्राङ्गी, स्त्री, (चित्रमङ्गं यस्याः। स्त्रियां ङीष्।) मञ्जिष्ठा। कर्णजलौका। इति राजनिर्घण्टः॥
चित्राटीरः, पुं, (चित्रा नक्षत्रविशेषं अटतीति। अट गतौ + बाहुलकात् ईरन्।) चन्द्रः। (चित्रं विस्तरं अटति गच्छति प्राप्नोति बलिपत्रकाम-विशेषमिति [illegible]। अट+ईरन्।) घण्टाकर्ण-बलिपत्रकामविशेषभिरङ्कितभालः। इति मेदिनी। रे, २४३॥
चित्रायुधः, पुं, (चित्राणि विचित्राणि आयुधानि यस्य।) [illegible]भेदः। चित्रायुधः [illegible] इति भाषा॥ धृतराष्ट्रपुत्रः। इति त्रिकाण्डशेषः॥
चित्रायसं, क्ली, (चित्रमायसं लोहम्।) तीक्ष्ण-लोहम्। इति राजनिर्घण्टः॥
चित्रिकः, पुं, (चित्रा नक्षत्रविशेषः सा पौर्ण-मास्यामस्य। चित्रा+ठञ्।) चैत्रमासः। इति शब्दरत्नावली॥
चित्रिणी, स्त्री, (चित्रं विचित्रताऽस्त्यस्याः। चित्र +इनिः+ङीप्।) पद्मिन्यादिचतुर्विधस्त्री-मध्ये स्त्रीविशेषः। सा मीनगन्धा। तस्या लक्षणं यथा। रतिमञ्जर्य्याम्। ४।
"भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा तिलकुसुमसुनासा स्निग्धदेहोत्पलाक्षी। कठिनघनकुचाढ्या सुन्दरी सा सुशीला सकलगुणविचित्रा चित्रिणी चित्रवक्ता॥"
(इयं हि दृढजातीयपुरुषं लब्ध्वा सन्तुष्टा भवति। यदुक्तं तत्रैव। ८।
"शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम्। वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम्॥"
अस्याः रतिकरणप्रकारमाह तत्रैव। २८।
"श्रीत्कारं चुम्बनं पीडा गले हस्ते च चुम्बनम्। घने घने स्तने हस्तं चित्रिण्यो रतिमादिशेत्॥")
चित्रेशः, पुं, (चित्रा नक्षत्रविशेषस्तस्या ईशः पतिः।) चन्द्रः। इति शब्दचन्द्रिका॥
चित्रोक्तिः, स्त्री, (चित्रा आश्चर्य्यकरी उक्तिर्व्वाणी।) आकाशवाणी। इति त्रिकाण्डशेषः॥ आश्चर्य्य-कथनञ्च॥
चित्रौदनं, क्ली, (चित्रमोदनम्।) विचित्रान्नम्। इति अद्वयज्ञतत्त्वम्॥
चिद्रूपः, त्रि, हृदयालुः। इति भूरिप्रयोगः। (चित् ज्ञानमेव रूपं यस्य।) ज्ञानमयः। यथा। चिद्रूपे परमात्मनीति योगशास्त्रम्॥
चिन्ता, स्त्री, (चिन्तनमिति। चिति चिन्तायाम् + "चिन्तिपूजिकथिकुम्बिचर्च्चश्च।" ३। ३। १०५। इति अङ्।) चिन्तना। चिन्तनम्। तत्पर्य्यायः। स्मृतिः २ आध्यानम् ३। इत्यमरः। १। ७। २८॥ आध्या ४ ध्यानम् ५ चिन्तितिः ६। इति शब्द-रत्नावली॥ चिन्तिया ७। इति रभसः॥ (यथाह कश्चित्।

"चिता चिन्ता द्वयोर्मध्ये चिन्ता नाम गरीयसी।
चिता दहति निर्जीवं चिन्ता हि जीवितन्तथा॥")
दर्शनसम्भोगयोः प्रकारभावना। इति रस-
मञ्जरी॥ (सा च व्यभिचारिभावविशेषः। यथा,
साहित्यदर्पणे। ३। १७०।
"ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासताप-
[कृत्॥")

चिन्तामणिः, पुं, (चिन्तायां सर्व्वकामप्रदो मणि-
रिव। शाकपार्थिवादिवत् समासः। यद्वा,
चिन्तया ध्यानधारणादिना मण्यते आहूयते
इति। मण+इण्।) ब्रह्मा। इति शब्दरत्ना-
वली॥ (चिन्ता एव मणिरिव यस्य। चिन्ता-
शीलत्वादेवास्य तथात्वम्।) बुद्धविशेषः। इति
त्रिकाण्डशेषः॥ मणिविशेषः। यथा, भट्टिः।
"सामर्थ्यसम्पादितवाञ्छितार्थ-
श्चिन्तामणिः स्याम कथं हनूमान्॥"
स्पर्शमणिः। तथा च।
"यथा चिन्तामणिं स्पृष्ट्वा लौहं काञ्चनतां भजेत्॥"
इति पाद्मोत्तरखण्डम्॥
(अश्वविशेषः। यथा, नकुलकृताश्वचिकित्-
सिते। ४। १८।
"कण्ठे यस्य महावर्त्त एकोऽश्वस्य प्रजायते।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवर्द्धनः॥")

चिन्तावेश्म, [न्] क्ली, (चिन्ताया मन्त्रणादेर्वेश्म
स्थानम्।) मन्त्रणागृहम्। तत्पर्य्यायः। दार्व्व-
टम् १। इति हारावली। १६८॥

चिन्तिड़ी, स्त्री, (तिन्तिड़ी। पृषोदरादित्वात्
तस्य चत्वम्।) तिन्तिड़ी। इति द्विरूपकोषः॥
इति काचित्॥

चिन्तितं, त्रि, (चिन्ति+कर्म्मणि क्तः।) स्मृत-
चिन्तनम्। यथा,—
"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति।"
इत्युद्भटः॥
कर्त्तरि क्ते चिन्तायुक्तः। भावे क्ते चिन्ता॥

चिन्तितिः, स्त्री, (चिन्त+भावे क्तिच् इट् च।)
चिन्ता। इति शब्दरत्नावली॥

चिन्तिया, स्त्री, चिन्ता। इति त्रिकाण्डशेषः॥

चिपः, पुं, नखरोगविशेषः। इति शब्दचन्द्रिका॥
चिप्प इति भाषा॥ (चौकपर्ब्बे विवृतोऽस्य
लक्षणः॥)

चिपिटः, पुं, (चपतीति। चप+बाहुलकात्
[illegible]) अन्नद्रव्यविशेषः। चिड़ा।
इति भाषा॥ तत्पर्य्यायः। पृथुकः २। इति
[illegible]। चिपिटकः ३। इत्यमरः॥
[illegible]। इति भरतः॥ धान्यचमसः ५।
इति त्रिकाण्डशेषः॥ चिपीटकः ६। इति
[शब्द]रत्नावली॥ अस्य गुणाः। गुरुत्वम्।
[illegible] बलकारकत्वम्। वातकारित्वम्।
[illegible] इति राजवल्लभः॥
[illegible] यथा,
[illegible] सुश्रुते सूत्रस्थाने ४६ अः।

"शालयः सतुषा आर्द्रा भृष्टा अस्फुटितास्ततः।
कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि॥"
"श्राद्धेया यावनालाद्याश्चिपिटाः पुष्टिवर्द्धनाः॥"
इति राजनिर्घण्टः॥
तस्य भक्षणविधिनिषेधौ यथा,—
"द्विःसिद्धमन्नं पृथुकं शुद्धं देशविशेषजे।
नात्यन्तशस्तं विप्राणां भक्ष्ये च निवेदने॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम्॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥
(नि नता नासिका विद्यतेऽस्य। "इनच्पिटच्-
चिकचि च।" ५। २। ३३। इति पिटच्
प्रकृतेश्चिरादेशश्च। नतनासिके त्रि। यथा,
विश्वकर्म्मप्रकाशे। १३। २।
"दिग्वक्त्रं चिपिटञ्चैव यज्ञार्थं सुरजन्मना॥"
इत्यस्य फलमाह तत्रैव। ५म श्लोके।
"तुङ्गहीनञ्च चिपिटं यज्ञस्थानदर्शनम्॥"
चिपिटाकारवस्तुनि च।" यथा, काशीखण्डे।
१७। १४।
"वक्त्रो ह्रस्वश्च चिपिटः सुरसौभाग्यभञ्जकः॥"
"चिपिटः चिण्टिकाकारः।" इति तट्टीका॥)

चिपिटकः, पुं, (चिपिट+स्वार्थे कन्।) चिपिटः।
इत्यमरः। २। ९। ४७॥ (स्त्रियां टाप्। नत-
नासिका॥)

चिपिटा, स्त्री, गुण्डासिनीतृणम्। इति राज-
निर्घण्टः॥ (चिपिटा चिपिटाकारा इति।
चिपिट+टाप्। चिपिटमूर्त्तिः। यथा, काशी-
खण्डे। ६७। १६। "चिपिटाभिर्भेदेद्दासी॥")

चिपुटः, पुं, (चिपिट+पृषोदरादित्वात् साधुः।)
चिपिटकः। इति भरतधृतशब्दकोषः॥

चिप्पः, पुं, (चिकति पीड़यति अङ्गुलिमिति। चिक
+अच्। निपातनात् कस्थाने पागमे साधुः।)
नखरोगविशेषः। आङ्गुलहाड़ा इति भाषा॥
तल्लक्षणं यथा,—
"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्॥"
अथ कुनखस्य लक्षणमाह।
"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः।
भवेत्तं कुनखं विद्यात् कुलीनं वा विधानतः॥"
अथ तयोश्चिकित्सा।
"चिप्पं बधिरमोक्षेण शोधनेनाप्युपाचरेत्।
शस्त्रेणापि यथायोग्यमुष्णिदं सावयेत्ततः॥
प्रयोगेण विधानेन रोपयेत् विचक्षणः।
मरिचस्य हरिद्रायाः पाने लक्षायसेऽभयाम्॥
पुरा नखेन कल्केन लिम्पेच्चिप्पं पुनः पुनः।
आम्रस्य मसृणैः पत्रैः कोमलैः परिवेष्टितः॥
अङ्गुलीवेष्टकः पुंसां पुनमाशु प्रशाम्यति।
[illegible] कुनखं समुपाचरेत्॥
[illegible] प्रशाम्यति।
कुनखो [illegible] सक्षिके ब्रणेऽपि च॥"
इति भावप्रकाशे मध्यखण्डे ४र्थे भागः॥
(कुनखस्य लक्षणं यथा,—

"कुर्य्यात् पित्तानिलं पा[illegible]
चिप्पमक्षतरोगञ्च [illegible]
इति वाभटेनोत्तरस्था[illegible]
चिकित्सास्य यथा,—
"चिप्पं शुद्धा जितोष्मा[illegible]
इत्युत्तरस्थाने द्वात्रिंशोऽध्या[illegible]

चिमिः, पुं, (चिनोति सञ्चि[illegible]
वाक्यानीति। चि+बाहुल[illegible]
पक्षी। इति शब्दमाला॥

चिमिकः, पुं, (चिमि+स्वार्थे क[illegible]
इति शब्दरत्नावली॥

चिरं, व्य, (चि+बाहुलकात् [illegible]
कालः। तत्पर्य्यायः। चिराय [illegible]
चिरस्य ४। इत्यमरः॥ चिरेण [illegible]
चिरे ७। इति भरतः॥ चिरा[illegible]
शब्दरत्नावली॥ (यथा, मनुः। ४। [illegible]
"नैकः प्रपद्येताध्वानं न चिरं पर्व्वते [illegible]

चिरकारी, [न्] त्रि, (चिरं व्याप्य [illegible]
कृ+णिनिः।) चिरक्रियः। (यथा, [illegible]
१२। २६४। ३।
"चिरकारी हि मेधावी नापराध्यति कर्म[illegible]
गौतमस्य पुत्रभेदः। अस्य विवरणं
महाभारते। १२। २६५। ४-५।
"चिरकारी महाप्राज्ञो गौतमस्याभ[illegible]
चिरेण सर्व्वकार्य्याणि विमृश्यार्थान् प्र[illegible]
चिरं सञ्चिन्तयन्नर्थांश्चिरं जाग्रत् चिरं
चिरं कार्य्याभिपत्तिश्च चिरकारी तथो[illegible]

चिरकालः, पुं, (चिरः काल इति कर्म्मधा[illegible]
दीर्घकालः। तत्पर्य्यायः। दीर्घ[illegible]
इति त्रिकाण्डशेषः॥

चिरक्रियः, त्रि, (चिरं व्याप्य क्रिया [illegible]
चिरकालेन क्रियाकारकः। तत्पर्य्यायः
दीर्घसूत्रः। इत्यमरः। २। १। १[illegible]

चिरजीवकः, पुं, (चिरं जीवतीति। [illegible]
जीवकवृक्षः। इति जटाधरः॥

चिरजीवी, [न्] पुं, (चिरं जीवति [illegible]
णिनिः।) विष्णुः। काकः। इ[illegible]
जीवकवृक्षः। शाल्मलिवृक्षः। [illegible]
निर्घण्टः॥ मार्कण्डेयः। अश्वत्थामा[illegible]
व्यासः। हनूमान्। विभीषणः। कृ[illegible]
रामः। इति तिथ्यादितत्त्वम्॥ बहुका[illegible]
त्रि। इति जटाधरः॥ (यथा, रामा[illegible]
१। २६।
"अथ रामो बभूवैष इक्ष्वाकुस्य चिरजीवि[illegible]

चिरञ्जीवी, [न्] पुं, (चिरं जीवतीति। [illegible]
+णिनिः।) विष्णुः। काकः। इ[illegible]
चन्द्रः। ४। ३८८॥ जीवकवृक्ष[illegible]
वृक्षः। इति राजनिर्घण्टः। चिरजीवी[illegible]

चिरण्टी, स्त्री (चिरात् [illegible]
पितृगृहवासिनीति। अट+अच। [illegible]
४। १। २०। इति ङीप्। [illegible]
साधुः।) सुवासिनी। [illegible]

ग़ता कन्या। द्वितीयवयाः स्त्री। सा च
। इति भरतधृतरुद्रः हेमचन्द्रश्च ॥
;, पुं, (चिरं चिरात् वा चिरावधीत्यर्थः
।) वृक्षविशेषः। चिरता इति भाषा ॥
र्य्यायः। चिरातिक्तः २ तिक्तकः ३ अनार्य्य-
: ४ किराततिक्तः ५ भूनिम्बः ६ किरा-
७ सुतिक्तकः ८। इति शब्दरत्नावली ॥
तशब्दे विवरणमस्य ज्ञातव्यम् ॥)
त्रि, (चिर+"चिरपरुत्परारिभ्यस्त्नो
:।" ४।३।२३। सूत्रस्य वार्त्तिकोक्त्या
यः।) पुरातनः। चिरकालोत्पन्नः। इति
रः ॥
;, त्रि, (चिरं भव इति। "सायंचिर-
।"४।३।२३। इति ट्युल् तुट् च। निपा-
साधुः।) पुरातनः। इत्यमरः।३।१।७७॥
, पञ्चतन्त्रे।१।८०। "अयमस्माकं चिर-
मन्त्रिपुत्रो दमनकोऽव्याहतप्रवेशः ॥"
निविशेषः। यथा, सिद्धान्तकौमुद्याम्।४।
.०५। इत्यस्य वार्त्तिके। "आश्रमेषु पुरा-
चिरन्तनेन मुनिना ॥")
ती, [न्] पुं, (चिरेण पाकोऽस्यस्य।
+इनिः।) कपित्थः। इति राजनिर्घण्टः ॥
:, पुं, (चिराणि पुष्पाणि यस्य।) वकुल-
। इति राजनिर्घण्टः ॥
य, (चि+रक्तुक्।) चिरार्थम्। दीर्घ-
र्थम्। तत्पर्य्यायः। चिराय २ चिर-
य ३ चिरस्य ४ चिरात् ५ चिरेण ६।
हेमचन्द्रः।३।१६८॥ (यथा, रघौ।३।६२।
"तथापि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः ॥")
ी, [न्] पुं, स्त्री, (चिरेण मेहतीति। मिह
णिनिः।) गर्द्दभः। इति हेमचन्द्रः।४।३२२॥
ः, पुं, (चिरं भषति क्रोशतीति। चिरं
य+अच्।) चिल्लः। इति त्रिकाण्डशेषः ॥
त्रं, क्ली, (चिरा रात्रिरिति योगविभागात्
समासे।) दीर्घकालः। इति हलायुधः ॥
था, महाभारते।१।१६८।३।
रात्रोषिताः स्मेह आश्रमस्य निवेशने ॥")
त्राय, अ, (चिररात्रं अयते इति। अय+
"गेरण्।" ३।२।१। इत्यण्।) दीर्घकालः।
मरः।३।४।१४। (यथा, मनुः।२।२६६।
र्यैश्चिररात्राय यथानन्त्याय कल्पते।
टभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः ॥")
ल्वः, पुं, (चिरं विलति आच्छादयति पत्र-
टकादिभिरिति। विल आच्छादने+वः।)
करञ्जः। इत्यमरः।२।४।४७॥ (यथा,—
रविल्वोऽग्निको दन्ती चित्रको हयमारकः।
गोतप्रकञ्जानां पुरीषाणि च दारयम् ॥"
इति सुश्रुते सूत्रस्थाने षट्त्रिंशोऽध्याये।)
ता, स्त्री, (चिरं सूता या सा।) चिर-
ता गाभी। जैठेन् गाह इति भाषा। तत्-
र्य्यायः। वष्कयनी २। इत्यमरः।२।९।७१॥

चिरस्थायी, [न्] त्रि, (चिरं तिष्ठतीति। स्था+
णिनिः।) बहुकालस्थाता ॥
चिरस्य, अ, (चिरमस्यते इति। अस्+यत्।
शकन्ध्वादित्वात् साधुः।) दीर्घकालः। इत्य-
मरः।३।४।१॥ (यथा, हरिवंशे।१२६।२३।
"चिरस्य खलु कृष्णेन संस्मृतोऽस्मि महात्मना ॥")
चिराटिका, स्त्री, (चिरं अटतीति। अट+ण्वुल्
कापि अत इत्वञ्च।) श्वेतपुनर्नवा। इति रत्न-
माला ॥ मातारी इति भाषा ॥ यथा, वैद्यके।
"गोमूत्रशुद्धस्य पुरातनस्य
यष्ट्यायसस्तानि चिराटिकायाः ॥"
चिरात्, अ, (चिरं अततीति। अत्+क्विप्)
दीर्घकालः। इति हेमचन्द्रः। ६।१६८॥
(यथा, पञ्चतन्त्रे।४।७८। "भो भगिनीसुत!
किमतिचिराद्दृष्टोऽसि ॥")
चिरात्, पुं, (चिरं चिरेण वा अत्ति। अद्+क्विप्।)
गरुड़ः। इति त्रिकाण्डशेषः ॥
चिरातिक्तः, पुं, (चिरं आतिक्तः।) चिरतिक्तः।
इति शब्दरत्नावली ॥
चिराय, अ, (चिरं अयते। अय+अण्।) दीर्घ-
कालः। इति हेमचन्द्रः।६।१६८॥ (यथा,
महाभारते।१३।६४।१०।
"पुरा धर्म्मो वर्त्तते नेह यावत्
तावद्गच्छामः सुरलोकं चिराय ॥")
चिरायुः, [स्] पुं, (चिरमायुर्यस्य।) देवता।
इति त्रिकाण्डशेषः ॥ चिरजीविनि त्रि। यथा,
"भवति यदि मनुष्यो गुर्व्वधीनश्चिरायुः ॥"
इत्यागमः ॥
(यथा च पञ्चतन्त्रे।५।३४।
"यदि विस्तारविस्तीर्णं तद्भवेन्न चिरायुषम् ॥")
चिरि, र न हिंसे। इति कविकल्पद्रुमः ॥ (स्वां-
परं-सकं-सेट्।) रेफोपधः। र वैदिकः। न,
चिरिणोति। इति दुर्गादासः ॥
चिरिः, पुं, (चिनोति मनुष्यवद्वाक्यादिकम्।
चि+रिक्।) शुकपक्षी। इति त्रिकाण्डशेषः ॥
चिरिण्टी, स्त्री, (चिरण्टी+पृषोदरात् साधुः।)
ऊढ़ा अनूढ़ा वा पितृगृहस्थिता कन्या। तत्-
पर्य्यायः। स्ववासिनी। इत्यमरः।२।६।८॥
चिरण्टी ३ सुवासिनी ४। इति भरतः ॥
द्वितीयवयाः स्त्री। युवती। इति मेदिनी ॥
चिरिविल्वः, पुं, (चिरविल्वः। पृषोदरादित्वात्
साधुः।) चिरविल्वः। करञ्जवृक्षः। इत्य-
मरटीकायां भरतः ॥
चिरु, स्त्री, (चिञ् चयने+डिरु। चि चयनं
संघातमित्यर्थः रातीति। रा+"आतोऽनुपसर्गे" इति
कुः। बाहुसन्धिबलमाश्रित्यैव सर्व्वक्रियागम-
वात् तथात्वम्।) बाहुसन्धिः। इति शब्द-
चन्द्रिका ॥
चिरे, अ, चिरम्। इत्यमरटीकायां राय-
मुकुटः ॥
चिरेण, अ, चिरम्। इति हेमचन्द्रः। (यथा,
रघुः।५।६४।

"भावावबोधकलुषा दयितेव रात्रौ
निद्रा चिरेण नयनाभिमुखी बभूव ॥")
चिर्भटी, स्त्री, (चिरेण भटतीति। भट+अच्।
गौरादित्वात् ङीष्। पृषोदरादित्वात् साधुः।)
कर्कटी। इति हेमचन्द्रः।४।२५५॥ (यथा,
पञ्चतन्त्रे।१।१६७।"अहो अविवेकोऽस्मद्भूपतेर्यः
पुरीषोत्सर्गमाचरंश्चिर्भटीभक्षणं करोति ॥")
चिर्भिटा, स्त्री, कर्कटीभेदः। चिभिड़ा इति
बेलसेद इति च देशान्तरीयभाषा ॥ तत्-
पर्य्यायः। सुचित्रा २ चित्रफला ३ क्षेत्र-
चिर्भिटा ४ पाण्डुफला ५ पथ्या ६ रोचन-
फला ७ चिर्भिटिका ८ कर्कचिर्भिटा ९। इति
राजनिर्घण्टः ॥ चिर्भिटम् १० धेनुदुग्धम् ११
गोरक्षकर्कटी १२। अस्या गुणाः। मधुरत्वम्।
रूक्षत्वम्। गुरुत्वम्। पित्तकफापहत्वम्। अनु-
ष्णत्वम्। ग्राहित्वम्। विष्टम्भित्वञ्च ॥ पक्वाया
अस्या गुणाः। उष्णत्वम्। पित्तलत्वञ्च। इति
भावप्रकाशः ॥ गौल्यत्वम्। दीपनत्वञ्च ॥
बालाया अस्या गुणाः। तिक्तत्वम्। किञ्चिदम्ल-
त्वञ्च। शुष्कायास्तस्या गुणाः। श्लेष्मवातारुचि-
जाड्यनाशित्वम्। रोचनत्वम्। दीपनत्वञ्च। इति
राजनिर्घण्टः ॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते ॥)
चिल, श वासे। इति कविकल्पद्रुमः ॥ (तुदां-परं-
सकं-सेट्।) वासः परिधानम्। श, चिलति
वस्त्रं लोकः परिदधातीत्यर्थः। चेलिता। इति
दुर्गादासः ॥
चिलमीलिका, स्त्री, (चिरं मीलतीति। मील
सङ्कोचे+ण्वुल्। ततष्टापि अत इत्वम्। रस्य
लत्वे साधुः।) कण्ठीभेदः। खद्योतः। विद्युत्।
इति मेदिनी। के, २२८॥
चिलिचिमः, पुं, (चिरिं हिंसां चिनोतीति। चिरि
+चि+मक्। रस्य लत्वम्।) मत्स्यविशेषः।
वालियागड़क इति ख्यातः। इचाक इत्येके।
इति भरतः ॥ तत्पर्य्यायः। नलमीनः २। इत्य-
मरः।१।१०।१८॥ तलमीनः ३ चिली-
चिमिः ४ चिलीचिमः ५ चिलिचीमः ६ चेलि-
चीमः ७ चिलीमः ८ चिलिमीनकः ९ चिलि-
चीमिः ११ कवलः ११ चिलोटकः १२। इति
भरतधृतकोषान्तरम् ॥ चेङ्गो इति ख्यातो
मत्स्यः। तस्य गुणाः। लघुत्वम्। रूक्षत्वम्।
अनभिष्यन्दित्वम्। वायुकारित्वम्। कफनाशि-
त्वञ्च। इति राजवल्लभः ॥
चिल्ल, शैथिल्ये। हावकर्णे। इति कविकल्पद्रुमः ॥
(भ्वां-परं-अकं-सेट्।) हस्वी लदृयाल्तः।
चिल्लति शिथिलीभवति। इति दुर्गादासः ॥
चिल्लः, पुं, (चिल्लति हावभावेन उड्डीयते इति।
चिल्ल+अच्।) पक्षिविशेषः। चिल् इति
भाषा ॥ तत्पर्य्यायः। आतापी २। इत्यमरः।
२।५।२१॥ शकुनिः ३ आतायी ४। इति
हेमचन्द्रः ॥ खगान्तकः ५ पक्षोड़नः चिर-
भमः ७। इति त्रिकाण्डशेषः ॥ (यथा, विष्णु-
धर्म्मोत्तरे।

"श्येनः कङ्कः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च चर्मचिल्लश्च भासः भाकर एव च ॥"
क्लिन्ने चक्षुषी अस्य । "क्लिन्नस्य चिल्पिल्
लश्चास्य चक्षुषी ।" ५ । २ । ३३ । इत्यस्य वार्त्तिं
इति चिलादेशो लप्रत्ययश्च ।) क्लिन्नचक्षुः ।
क्लिन्ननेत्रयुक्ते त्रि । इति मेदिनी । ले, १६ ॥
चिल्लका, स्त्री, (चिल्ल इव कायतीति । कै+कः ।)
झिल्लिका । इति शब्दरत्नावली ॥
चिल्लभक्ष्या, स्त्री, (चिल्लस्य भक्ष्या भक्षणीया ।)
चञ्चुविलासिनी । इति शब्दचन्द्रिका ॥
चिल्लाभः, पुं, (प्रसह्य हारकत्वात् चिल्ल इव आभा-
तीति । आ+भा+कः ।) प्रसह्यचौरः । इति
त्रिकाण्डशेषः ॥ हातङ्गे चड़ इति गाँटिकाटा
इति च भाषा ॥
चिल्ली, स्त्री, (चिल्लति हावं करोति चिल्ल्यतेऽनेन
वा । चिल्ल+इन् । ततो वा ङीप् ।) लोध्रः ।
पत्रशाकभेदः । तत्पर्य्यायः । चिल्लिका २ कुली ३
श्यामोहिता ४ ऋतुपत्नी ५ चारदला ६ चार-
पत्रा ७ वास्तुकी ८ मङ्गला ९ गौरवास्तुकः १० ।
(यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"शतीनो वास्तुकञ्चूर्ण चिल्ली मत्स्यकपोतिका ।
मण्डूकपर्णी चौचम्ली प्राकर्षी प्रशस्यते ॥")
अस्य गुणाः । वास्तुकतुल्यत्वम् । चारत्वम् ।
श्लेष्मपित्तप्रमेहमूत्रकृच्छ्रनाशित्वम् । पथ्यत्वम् ।
रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥
("गौरचिल्ली तु विज्ञेया वातपित्तविकारिणाम् ॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥)
झिल्लिका । इति शब्दरत्नावली ॥
चिविः, पुं, (चीयते आहाराय मूह्यते इति । चीञ
चयने+"समिधातुभ्य इन् ।" उणां ४ । ११० ।
इति इन् । पृषोदरादित्वात् ह्रस्वः ।) चिबुकम् ।
इति जटाधरः ॥
चिविटः, पुं, (चिमिटः चिपटत्वात् यस्य च ।)
चिपिटः । इत्यमरटीका ॥
चिर्बिलिका, स्त्री, गुल्मविशेषः । तत्पर्य्यायः ।
रक्तरसा २ गुन्धर्वा ३ मधुमालपर्णिका ४ ।
अस्या गुणाः । कटुत्वम् । कषायत्वम् । चौर्य-
ज्वरे वर्णितत्वम् । रसायनत्वञ्च । इति
राजनिर्घण्टः ॥
चिबुः, पुं, (चीयते आहारादि यदनेनेऽसौ, चीञ
+"चयनात्प्रब ।" उणां । १ । १८ । इति
पृषोदरेव साधुः ।) चिबुकम् । इति भरतः ॥
चिबुकं, क्ली, (चिबु+स्वार्थे कन् । अभिधानात्
क्लीवत्वम् ।) अधराधोभागः । इत्यमरः । २ ।
६ । ९० ॥ थुँनि इति थाड़ि इति च भाषा ॥
(यथा, कुमारसम्भवे [illegible] । १ । ४६ ।
"कुम्भमन्ये चिबुकं यस्तु [illegible] मुनेः ॥")
चिबुकः, पुं, । चिबुकमिव कायतीति । कै+कः ।)
मुचुकुन्दवृक्षः । इति राजनिर्घण्टः ॥
चिव, मर्शे । [illegible]-पर-सकं-सेट् ।)
[illegible] इत्यमरटीकायां
भरतः ।

चिह्नं, क्ली, (चिह्न्यतेऽनेनेति । चिह्न लक्षणे+करणे
घञ् ।) चिह्न्यते येन तत् । चिना इति दाग इति
च भाषा ॥ तत्पर्य्यायः । कलङ्कः २ अङ्कः ३
लाञ्छनम् ४ लक्ष्म ५ लक्षणम् ६ लिङ्गम् ७ । इत्य-
मरः । १ । ३ । १७ ॥ लक्ष्मणः ८ । इति भरतः ॥
अभिज्ञानम् ९ । इति जटाधरः ॥ (यथा,
भागवते । ४ । १५ । ९ ।
"वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ।
पादयोररविन्दञ्च तं वै मेने हरेः कलाम् ॥")
पताका । इति मेदिनी । ने, ४ ॥
चिह्नकारी, [न्] त्रि, (चिह्नं करोतीति । कृ+
णिनिः ।) घोरदर्शनः । विघाती । इति विश्वः ॥
चिह्नधारिणी, स्त्री, (चिह्नं धरति धारयतीति वा ।
धृ+णिनिः स्त्रियां ङीप् ।) श्यामालता । इति
शब्दचन्द्रिका ॥
चिह्नितः, त्रि, चिह्न+कर्मणि क्तः । चिह्नयुक्तः ।
अङ्कितः । लक्षितः । (यथा, मनुः । १० । ५५ ।
"दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः ॥")
चीक, कि मर्षणे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे
भ्वां-परं-सकं-सेट् ।) कि, चीकयति चीकति ।
मर्षणं सहनम् । तथा च । चन्द्रावतीतरङ्गा-
न्दांश्चीकयन्ति च यद्वपुरिति हलायुधः । वायव:
सूक्ष्मलीव्यर्थः । भट्टमल्लस्तु मर्षण इति मूर्द्धन्य-
षमध्यं पठित्वा क्षमार्थमाह । इति दुर्गादासः ॥
चीड़ा, स्त्री, गन्धद्रव्यविशेषः । चीड़ागन्ध इति
ख्याता । तत्पर्य्यायः । दारुगन्धा २ गन्ध-
वधूः ३ गन्धमादनी ४ लतणी ५ तारा ६ भूत-
मारी ७ मङ्गल्या ८ कपटिनी ९ ग्रहभीति-
जित् १० । अस्या गुणाः । कटुत्वम् । कास-
वपनाशित्वम् । दीपनत्वम् । अत्यन्तसेवनात्
पित्तदोषभ्रमापहत्वञ्च । इति राजनिर्घण्टः ॥
चीनं, क्ली, (चिनोति कौतुकादिकमिति । चि+
बाहुलकात् नक् दीर्घश्च ।) पताका । इति
त्रिकाण्डशेषः ॥ सीसकम् । इति रत्नमाला ॥
चीनः, पुं, (चीयते सञ्चीयते दृढत्वादिदोषो
यत्र । चि+बाहुलकात् नक् दीर्घश्च ।) देश-
विशेषः । चीना इति भाषा ॥ यथा,—
"काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे ।
भोटान्तदेशो देवेशि ! मानसेशाच्च दक्षिणे ।
मानसेशाद्दक्षपूर्वे चीनदेशः प्रकीर्त्तितः ॥"
इति शक्तिसङ्गमतन्त्रम् ॥
(तद्देशवासिषु मनुष्येषु च बहुवचनान्तः । यथा,
महाभारते । २ । २६ । ९ ।
"स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषोऽभवत् ॥")
अंशुकविशेषः । (यथा, शकुन्तलायां १ माङ्के ।
"चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥")
व्रीहिभेदः । तन्तुः । मृगविशेषः । इति
मेदिनी । ने, ४ ॥
चीनकः, पुं, (चीन इव । चीन+स्वार्थे कन् ।)
धान्यविशेषः । चीना इति भाषा ॥ तत्पर्य्यायः ।
काककङ्गुः २ । इति हेमचन्द्रः ॥ (यथा, विष्णु-
पुराणे । १ । ६ । २१ ।

"प्रियङ्गवो [illegible]
अस्य गुणाः । [illegible]
पित्तश्लेष्मनाशित्व[illegible]
वल्लभः ॥ कङ्गनी[illegible]
निर्घण्टः ॥ (चीन[illegible]
यथा, महाभारते [illegible]
[illegible]
चीनकर्पूरः, पुं, (चीन[illegible]
विशेषः । चीनकर्पूर[illegible]
तत्पर्य्यायः । चीनक[illegible]
पटुः ५ मेघसारः ६ तु[illegible]
अस्य गुणाः । कटुत्वम् [illegible]
ईषच्छीतत्वम् ।
मेध्यत्वम् । पावनत्वञ्च । [illegible]
चीनजं, क्ली, (चीने चीनदे[illegible]
+डः ।) लोहम् । तत्तु [illegible]
राजनिर्घण्टः ॥
चीनपिष्टं, क्ली, (चीनस्य चीन[illegible]
पेषणं वस्तु चूर्णमित्यर्थः ।) [illegible]
हेमचन्द्रः ॥ सीसकम् । इति [illegible]
(यथा, कथासरित्सागरे । २३ [illegible]
"चीनपिष्टमयो लोकधारयेकम[illegible]
चीनवङ्गं, क्ली, (चीनभव वङ्गम् । [illegible]
इति राजनिर्घण्टः ॥
चीनाकः, पुं, (चीनं [illegible]
+अण् ।) कर्पूरविशेषः । तद्गुण[illegible]
भावप्रकाशे ।
"चीनाकसंज्ञः कर्पूरः कफक्षयकरः [illegible]
कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च [illegible]
चीनाकर्कटी, स्त्री, ([illegible]
पृषोदरात् साधुः ।) कर्कटीभेदः । [illegible]
चित्रकूटदेशे प्रसिद्धा । तत्पर्य्यायः । [illegible]
कर्कटी २ सुदीर्घा ३ राजफला ॥ [illegible]
क्षुद्रकर्कटी ६ । अस्या गुणाः । [illegible]
शिशिरत्वम् । पित्तदाहशोषनाशित्व[illegible]
रत्वम् । रुचिरत्वम् । गुरुत्वञ्च । इति [illegible]
निर्घण्टः ॥
चीभ, ऋ ङ कत्थे । इति कविक[illegible]
आत्मं-सकं-सेट् ।) कत्थः प्रशं[illegible]
चीभते । ङ, चीभते गुणिनं गु[illegible]
कारादिरयमित्येके । इति दुर्गादा[illegible]
चीय, ऋ न संहत्यादानयोः । ([illegible]
सेट् ।) चतुर्थस्वरी । क, अचि[illegible]
चीयति चीयते । इति रमानाथः ॥
चीरं, क्ली, (चिनोति आवृणोति [illegible]
दिकं वा । चि+"शुसिचिमीनां [illegible]
उणां । २ । २५ । इति क्रन् दीर्घश्च । [illegible]
त्वक् । (यथा, रामायणे । [illegible]
"प्राग्रेव तु महाभाग सौमित्रिर्भ्रातरम्[illegible]
पूर्वजस्यानुयात्रार्थे द्रुमचीरमबन्धन । [illegible]
चीर्यं वल्कलवसनम् । इति सुभा[illegible]
संग्रहटीकायां भरतः । यथा भरत[illegible]

"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥")
गोस्तनः । वस्त्रभेदः । (यथा, मनुः ।११।१०१।
"चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम् ॥")
रेखाभेदः । लेखनभेदः । इति मेदिनी ॥ चूड़ा ।
(यथा, महाभारते । ३ । ११ । ४८ ।
"सुक्ष्मवल्कजर्जरीभूता वद्धवसन मादपाः ।
चीराणीव युदस्तानि रेजुस्तत्र महावने ॥")
सीसकम् । इति हेमचन्द्रः ॥

रकः, पुं, (चीर+संज्ञायां कन् ।) विक्रिया-
लेखः । विकारलेखनम् । इति विश्वः ॥ (स्वार्थे-
कनि चीरशब्दार्थोऽप्यत्र ॥)

रपत्रिका, स्त्री, (चीरमिव पत्रमस्य । ततः
कन् टापि अत इत्वञ्च ।) चञ्चुशाकः । इति
राजनिर्घण्टः ॥

रपर्णः, पुं, (चीरमिव पर्णमस्य ।) शालवृक्षः ।
इति राजनिर्घण्टः ॥ (विवृतिरस्य शालशब्दे
विज्ञेया ॥)

रिः, स्त्री, (चि+बाहुलकात् क्रिः दीर्घश्च ।)
नेत्राशुकम् । इति शब्दरत्नावली ॥

रिका, स्त्री, (चीरीति कृत्वा कायति शब्दायते
इति । कै+कः ।) झिल्ली । इति हेमचन्द्रः ॥

रितच्छदा, स्त्री, (चीरितः चीरमिव घात-
च्छदः पत्रं यस्याः ।) पालङ्कशाकम् । इति
भावप्रकाशः ॥

री, स्त्री, (चीरि+"कृदिकारादक्तिनः ।"
वा ङीष् ।) कच्छाटिका । झिल्ली । इति हेम-
चन्द्रः ॥

रुकं, क्ली, (ची इति कृत्वा रौति । रु+क्विप् ।
चीरुर्झिल्लीपतङ्गः स इव इति इवार्थे कन् ।)
फलविशेषः । चेँ उर इतिभाषा ॥ अस्य गुणाः ।
रुचिदाहकफपित्तकारित्वम् । अम्लत्वञ्च । इति
राजवल्लभः ॥

र्णं, त्रि, (चर+नक् । पृषोदरात् साधुः ।) शीलि-
तम् । इति त्रिकाण्डशेषः ॥

र्णपर्णः, पुं, (चीर्णं विदीर्णं पर्णमस्य ।) निम्ब-
वृक्षः । खर्जूरवृक्षः । इति मेदिनी ॥

लिका, स्त्री, (चीरिका+रस्य लत्वे साधुः ।)
चीरिका । झिल्ली । इति शब्दरत्नावली ॥

ल्लिका, स्त्री, (चीलिका+पृषोदरात् साधुः ।
चीदिति शब्देन लक्ष्यते इति । लक्ष+घञ् । ततः
पृषोदरादित्वात् साधुः इति वा ।) झिल्ली ।
इति शब्दरत्नावली ॥

व, ऋ भ ग्रहणे । संवृतौ । इति कविकल्प-
द्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अचिचीवत् ।
भ, चीवति चीवते वल्कलं भिक्षुः । परिदधाति
परिदधाति देहार्थः । इति दुर्गादासः ॥

वि, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-
परं-अकं-सेट् ।) क, चीवयति । इति दुर्गा-
दासः ॥

चीवरं, क्ली, (चीयते तन्तुसन्तानैरिति । चि+
"चिरवच्छलरचीवरेति ।" उणां । ३ । १ ।
इति ष्वरच् । निपातनात् धातोर्दीर्घत्वे साधुः ।)
भिक्षुवस्त्रम् । इत्युणादिकोषः ॥ (यथा, महा-
भारते । १ । ६१ । १२ ।
"अनग्निरनिकेतश्चाप्यगोत्रचरणो मुनिः ।
कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ॥")

चीवरी, [न्] पुं, (चीवरं अस्यास्तीति । इनिः ।)
बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥

चुक, क अर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरां-
परं-सकं-सेट् ।) कोपधः पञ्चमस्वरमध्यः ।
अर्त्तिः पीड़नम् । क, चुकयति शत्रुं शूरः ।
इति दुर्गादासः ॥

चुकारः, पुं, (चुक+भावे अप् । चुकं पीड़नं
आराति सम्यक् ददातीति । सिंहनादश्रवणेन
भीरूणां भयजनकत्वात्तथात्वम् । आ+रा+
कः ।) सिंहनादः । इति त्रिकाण्डशेषः ॥

चुक्रं, क्ली, (चकते तृप्यत्यनेन इति । चक+"चकि-
रम्योरुच्चोपधायाः ।" उणां । २ । १४ । इति
रक् उपधाया उच्च ।) अम्लद्रव्यविशेषः । महादा
इति ख्यातम् । तत्पर्यायः । तिन्तिड़ीकम् २
वृक्षाम्लम् ३ । इत्यमरः । २ । ६ । ३५ ॥ चुक्र-
कम् ४ । इति शब्दरत्नावली ॥ महाम्लम् ५ ।
इति जटाधरः ॥ (अम्लवृक्षकम् ६ । इति भाव-
प्रकाशः । १ । १ ॥) पत्रशाकविशेषः । चुक इति
भाषा ॥ तत्पर्यायः । चुक्रवास्तूकम् २ लिकु-
चम् ३ अम्लवास्तुकम् ४ दलाम्लम् ५ अम्ल-
शाकाख्यम् ६ अम्लादि ७ हिमलोचिका ८ ।
अस्य गुणाः । अम्लपाचनत्वम् । लघुत्वम् । उष्ण-
त्वम् । वातगुल्मनाशित्वम् । रुच्यमीषत्पित्त-
कारित्वम् । पथ्यत्वम् । तत्पर्यायगुणाः ।
"चुक्रिया स्यात्तु पत्राम्ला रोचनी शतवेधिनी ।
चुक्रा लघ्वतरा स्वाद्वी वातघ्नी कफपित्तकृत् ॥
रुच्या लघुतरा पाके दन्ताके नातिरोचनी ॥"
इति भावप्रकाशः ॥ * ॥
("चुक्रमत्यम्लमुष्णञ्च दीपनं पाचनं परम् ।
शूलगुल्मविबन्धामवातश्लेष्महरं परम् ॥
वमिहृष्णास्यवैरस्यहृत्पीड़ावह्निमान्द्यहृत् ॥"
इति शब्दार्थचिन्तामणिधृतवैद्यकम् ॥)
काञ्जिकप्रभेदः । तत्पर्यायः । सहस्रवेधम् २
रसाम्लम् ३ चुक्रवेधकम् ४ शाकाम्लभेदनम् ५
चन्द्रम् ६ अम्लसारम् ७ चुक्रिका ८ । अस्य
गुणाः । तिक्तत्वम् । अम्लत्वम् । स्वादुत्वम् ।
कफपित्तनाशिकारोगदुर्गन्धशिरोरोगनाशित्वञ्च ।
इति राजनिर्घण्टः ॥ * ॥ सन्धानविशेषः । यथा,
"यन्मस्त्वादिशुचौ भाण्डे सगुड़क्षौद्रकाञ्जिकम् ।
धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते ॥
द्विगुणं गुड़मध्वारनालमस्तु क्रमादिह ।"
इति परिभाषा ॥
(अस्य लक्षणं यथा,—
"विनष्टं सन्धितो यत्तु तच्चुक्रमभिधीयते ।"
इति शार्ङ्गधरे मध्यखण्डे दशमेऽध्याये ॥)

चुक्रः, पुं, (चकते तृप्यतीऽनेनेति । चक+रक् उप-
धाया उच्च ।) अम्लः । अम्लरसः । इति विश्वः ॥

चुक्रकं, क्ली, (चुक्र+संज्ञायां कन् ।) शाक-
विशेषः । चुकापालङ्ग इति भाषा ॥ अस्य
गुणाः । दुर्जरत्वम् । भेदकत्वम् । वायुनाशि-
त्वम् । पित्तकारित्वम् । गुरुत्वञ्च । इति राज-
वल्लभः ॥ (चुक्रार्थे स्वार्थे कन् ॥)

चुक्रफलं, क्ली, (चुक्रमेव फलं यस्य । चुक्रं फलति
वा । फल+अच् ।) वृक्षाम्लम् । इति राज-
निघण्टः ॥ (वृक्षाम्लशब्देऽस्य विशेषो ज्ञातव्यः ॥)

चुक्रा, स्त्री, (चुक्रः अम्लत्वं विद्यतेऽस्य इत्यच्
टाप् च ।) चाङ्गेरी । इति मेदिनी । रे, ३५ ॥
आमरुल् इति भाषा ॥ (अस्या गुणा यथा,—
"चुक्रा लघ्वतरा स्वाद्वी वातघ्नी कफपित्तकृत् ।
रुच्या लघुतरा पाके दन्ताके नातिरोचनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) .
तिन्तिड़ी । इति शब्दरत्नावली ॥ (यथास्याः
पर्य्यायाः भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ।
अम्ला च चिञ्चिका चिञ्चा तिन्तिड़ीका च
तिन्तिड़ी ॥")

चुक्राम्लं, क्ली, (चुक्रमिव अम्लम् । चुक्रवदम्लोऽत्र
इति वा ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥
(वृक्षाम्लशब्दे विवृतिरस्य ज्ञेया ॥)

चुक्राम्ला, स्त्री, (चुक्रमिव अम्लः अम्लत्वं विद्यते-
ऽस्याः । अच् टाप् च ।) अम्ललोणिका ।
चिञ्चा । काञ्जिकभेदः । इति राजनिर्घण्टः ॥

चुक्रिका, स्त्री, (चुक्रो विद्यतेऽस्मिन् इति । ठन्
टाप् च ।) अम्ललोणिका । इत्यमरः । २ । ४ ।
१४० ॥ (अस्याः पर्य्याया यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ।
अश्मन्तकस्तु शफरी कुशली चाम्लपत्रकः ॥")
कुचाङ्गेरी । इति रत्नमाला ॥ चुकापालङ्ग
इति भाषा ॥ (यथास्याः पर्य्यायाः ।
"चुक्रिका स्यात्तु पत्राम्ला रोचनी शतवेधिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
तिन्तिड़ी । तत्पर्याया यथा, तत्रैव ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ॥
अम्ला च चिञ्चिका चिञ्चा तिन्तिड़ीका च
तिन्तिड़ी ॥")

चुचुकं, क्ली, (चुचु इत्यव्यक्तशब्देन कायति स्तन-
काले इति । कै+कः ।) कुचाग्रम् । तत्-
पर्य्यायः । चूचुकम् २ चूचूकम् ३ । इति शब्द-
रत्नावली ॥ कुचाननम् ४ । पुंलिङ्गोऽपि । इति
रत्नकोषः ॥ स्तनवृन्तम् ५ । इत्यमरटीकायां
भरतः ॥ (देशविशेषे तद्देशवासिषु च पुं । यथा,
महाभारते । १२ । २०७ । ४२ ।
"दक्षिणापथजन्मानः सर्व्वे नरवरान्ध्रकाः ।
गुहाः पुलिन्दाः शवराश्चुचुका मद्रकैः सह ॥")

चुचुः, पुं, शाकविशेषः । इति त्रिकाण्डशेषः ॥

चुचूकं, क्ली, (चुचु+पृषोदरादित्वात् दीर्घः ।)
चुचुकम् । इति शब्दरत्नावली ॥

चुच्य, ई अभिषवे । इति कविकल्पद्रुमः । (भ्वां-परं-
सकं-सक-सेट् ।) तालव्यवर्गादिरयं । ...

मस्वरी । इं, चुक्तः । यद्वयान्तोऽयमित्येके ।
अभिषवः स्नानं मन्थनं पीड़नं सन्धानञ्च ।
इति दुर्गादासः ॥

चुचुः, पुं, कुम्भुन्दरिः । इति हारावली । ८३ ॥
(सङ्करजातिविशेषः । यथा, मनुः । १० । ४८ ।
"मेदान्ध्रचुचुमद्गूनामारण्यपशुहिंसनम् ।"
"चुचुर्मद्गुश्च वैदेहकवन्दिस्त्रियोर्ब्राह्मणेन जातौ
बौधायनेनोक्तौ बोद्धव्यौ ।" इति तट्टीकायां
कुल्लूकभट्टः ॥ व्याकरणोक्तप्रत्ययविशेषः । स
तु प्रसिद्धार्थे भवति । यथा, विद्यया वित्तो
विद्याचुचुः । इति सिद्धान्तकौमुदी ॥ स्त्री,
उद्भिज्जविशेषः । चेञ्चुना इति लोके । नाड़ीच-
वत् । अस्या पर्य्याया गुणाश्च यथा,—
"चिञ्चा चचुश्चञ्चुकी च दीर्घपत्रा सतिक्तका ।
चुचुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा ।
धातुपुष्टिकरी बल्या मेध्यपिच्छिलका स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"सुवर्चलाया चुचोर्वा लोणिकाया रसैरपि ।"
इति वाभटे चिकित्सितस्थाने नवमेऽध्याये ॥)

चुचुरी, स्त्री, (चुचुरिव रातीति । रा + कः ।
स्त्रियां ङीप् ।) तिन्तिड़ीद्यूतम् । इति त्रिकाण्ड-
शेषः ॥ काँइबीचिर खेला इति भाषा ॥

चुचुली, स्त्री, (चुचुरी । रस्य लत्वम् ।) तिन्ति-
ड़ीकास्थिभिर्द्यूतक्रीड़ा । इति हारावली । ६२ ॥

चुट, तुच्छने । इति कविकल्पद्रुमः । (भ्वां-परं-
अकं-सेट् ।) पञ्चमस्वरी । तुच्छनमल्पीभावः ।
चोटति मरी चीर्णे । इति दुर्गादासः ॥

चुट, इ तुच्छने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
अकं-सेट् ।) पञ्चमस्वरी । तुच्छनमल्पीभावः ।
इ, चुण्ट्यते मया चीर्णे । इति दुर्गादासः ॥

चुट, इ क छेदे । इति कविकल्पद्रुमः ॥ (चुरां-
परं-सकं-सेट् ।) पञ्चमस्वरी । इ क, चुण्ट-
यति धान्यं लोकः । इति दुर्गादासः ॥

चुट, क ञि छेदे । इति कविकल्पद्रुमः । (चुरां-
तुदां-परं-सकं-सेट् ।) क, चोटयति । ञि,
चुटति अचुटीत् । इति दुर्गादासः ॥

चुड, क तुच्छने । इति कविकल्पद्रुमः ॥ (चुरां-
परं-अकं-सेट् ।) टद्वयान्तः । पञ्चमस्वरी ।
एकटकार इति रामः । तुच्छनमल्पीभावः ।
क, चुड्यति मरी चीर्णे । इति दुर्गादासः ॥

चुड, इ तौक्ष्ण्ये । इति कविकल्पद्रुमः ॥ (भ्वां-
परं-अकं सेट् ।) इ, चुण्डते । तीक्ष्णमल्पी-
भावः । इति दुर्गादासः ॥

चुड, इ क छिदि । इति कविकल्पद्रुमः ॥ (चुरां-
परं-सकं-सेट् ।) इ क, चुण्डयति । इति दुर्गा-
दासः ॥

चुड, इ क रोषे । (चुरां-परं अकं सेट् ।) इ क,
चुण्डयति । इति दुर्गादासः ॥

चुड, इ इ रोषे । (भ्वां-आत्मं-अकं-सेट् ।) इ,
चुण्डते । इ, चुण्डते । इति दुर्गादासः ॥

चुड्ड, स्तौ । हावे । इति कविकल्पद्रुमः ॥ (भ्वां-
परं-सकं-अकं च-सेट् ।) टवर्गतृतीयोपधः ।

क्विपि संयोगान्तलोपे चुड् । कातन्त्रादौ हाव-
करण इत्येकोऽर्थो दृश्यते । अमी हावाः क्रिया
शृङ्गारभावजाः । इत्यमरः । भाव एवाल्प-
संलक्ष्यविकारो हाव इष्यते । इति साहित्य-
दर्पणम् । चुड्डति कान्तायवा कान्तः । इति
दुर्गादासः ॥

चुण, ञि छिदि । इति कविकल्पद्रुमः ॥ (तुदां-
परं-सकं-सेट् ।) ञि, चुणति अचुणीत् चुचोण ।
इति दुर्गादासः ॥

चुण्टा, स्त्री, (चुण्ट्यतेऽसाविति । चुण्ट छेदे + घञ् ।
टापि कामननेन जायमानत्वात्तथात्वम् ।) कूपः ।
इति त्रिकाण्डशेषः ॥

चुण्टी, स्त्री, कूपः । इति त्रिकाण्डशेषः ॥ उपकूपम् ।
कूप समीपे स्वल्पजलाधारः । इति हेमचन्द्रः ॥

चुत, इर् चरे । इति कविकल्पद्रुमः ॥ (भ्वां-परं
सकं-सेट् । अकं-इति केचित् ।) इर्, अचुतत्
अचोतीत् । चर इह आसेचनम् । चोतति घृतं
वह्नौ यज्वा आसिञ्चतीत्यर्थः । इति दुर्गादासः ॥

चुतः, पुं, (चोतति चरति मलशोणितादिर्यस्मात् ।
चुत + घञर्थे कः ।) गुह्यद्वारम् । इति शब्द-
रत्नावली ॥

चुतिः, स्त्री, (चोतति चरति मलशोणितादि-
र्यस्याः । चुत + "सर्व्वधातुभ्य इन् ।" उणां
४।११७ । इति इन् ।) गुह्यद्वारम् । इति शब्द-
रत्नावली ॥

चुद, क चुदि । इति कविकल्पद्रुमः ॥ (चुरां-परं-
सकं-सेट् ।) चुदि प्रेरणे । क, चोदयति चार्य्यं
चापः । इति दुर्गादासः ॥

चुद्ड, स्तौ । हावे । इति कविकल्पद्रुमः ॥ (भ्वां-
परं-सकं-अक च-सेट् ।) तवर्गतृतीयोपधः ।
क्विपि संयोगान्तलोपे चुद् । कातन्त्रादौ हाव-
करण इत्येकोऽर्थो दृश्यते । अमी हावाः क्रिया
शृङ्गारभावजाः । इत्यमरः । भाव एवाल्प-
संलक्ष्यविकारो हाव इष्यते । इति साहित्य-
दर्पणम् । चुद्दति कान्तायवा कान्तः । इति
दुर्गादासः ॥

चुन्दी, स्त्री, (चोदयति प्रेरयति घटयतीत्यर्थः
नायकादीनिति । चुद + कः । निपातनात् नुमा-
गमः । ततः स्त्रियां ङीप् ।) कुट्टनी । इति
हेमचन्द्रः । ३ । १८७ ॥

चुप, शनैर्गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
सकं-सेट् ।) चोपति स्तब्धः । चोपति दुष्टं राजा ।
इति रमानाथः । इति दुर्गादासः ॥

चुम्ब, इ ञि चुम्बने । इति कविकल्पद्रुमः ॥ (चुरां-
पक्षे भ्वां परं-सकं-सेट् ।) चुम्बनं सुरतसंयोगः ।
इ, चुम्ब्यते । ञि, चुम्बयति चुम्बति कान्ताधरं
कामी । प्रियासुरतं किम्पुरुषश्चुचुम्बे । इति
धनीहारे आत्मनेपदम् । इति दुर्गादासः ॥

चुम्बं, स्त्री, (चुम्ब्यतेऽनेनात्र वा । चुवि चुम्बने
+ "अर्त्तेन्द्राग्नेति ।" उणां । २ । २८ । इति
रप्रत्ययो नकारलोपश्च ।) वदनम् । इत्यु-
णादिकोषः ॥

चुम्बकः, पुं, (चुम्बति चारत्वे
चुम्ब + ण्वुल् ।) कामनोहनेद । ...
कामपायामः २ अयस्कान्तः ।
अस्य गुणाः । लेखनत्वम् । शीतत्व ...
विषगरापहत्वञ्च । इति भावप्रकाशः ।
अस्य कामनोहनग्रस्त्रे शेयः ।)
लम्पटम् । इति मेदिनी । के, ८८ ।

चुम्बकः, त्रि, (चुम्बतीति । चुम्ब + ण्वुल् ।
परः । धूर्त्तः । बहुग्रन्थैकदेशदः । इति
के, ८६ ॥

चुम्बनं, स्त्री, (चुम्ब इ ञि चुम्बने + भावे ल्युट् ।
सुरतसंयोगः । चुमा इति भाषा ।
स्थानानि यथा, कामशास्त्रे,
"सुरे स्तने ललाटे च कण्ठे च नेत्रयोः
गण्डे च कर्णयोश्चैव कपोलमण्डले ।
चुम्बनस्थानमित्युक्तं त्रिधेयं कालकौशलः

चुर, ञि स्तेये । इति कविकल्पद्रुमः ॥ (चुरां-
भ्वां-परं-सकं-सेट् ।) ञि, चोरयति
धनं चौरः । इति दुर्गादासः ॥

चुरा, स्त्री, (चुर + बाहुलकात् कः । स्त्रियां टाप् ।
चौर्य्यम् । इति शब्दरत्नावली ॥

चुरी, स्त्री, (चुर + कः । स्त्रियां ङीप् ।)
कूपम् । कूपसमीपस्थाल्पजलाधारः ।
हेमचन्द्रः । ४ । १५८ ॥

चुलुकं, स्त्री, (चोलयतीति । चुल +
उकञ् ।) मापमज्जनजलम् । इत्य...
मज्जनजलमात्राणां समुच्चुकमिति

चुलुकः, पुं, (चोलयति उन्नतो भवति ।
उन्नतौ + बाहुलकात् उकञ् ।) प्रसृ...
त्रिकाण्डशेषः ॥ प्रसृतिः । भाण्डभेद...
हेमचन्द्रः ॥

चुलुकी, [न्] पुं, (चुलुक अञ्जलिरिति ...
चुलुक + इनिः ।) शिशुमाराकृतिजन्तुः ।
शब्दरत्नावली ॥ (यथा, वाभटे सूत्रस्थाने ।
"चुलुकी नक्रमकरशिशुमारतिमिङ्गिल-
राजीचिलिचिमाद्याश्च मांसमित्याहुः

चुलुम्प, लोपे । इति कविकल्पद्रुमः ॥ (भ्वां-
सकं-सेट् ।) अन्तःस्थतृतीयमध्यः ।
इर्यो । ओष्ठ्यवर्गशेषोपधः । चुलुम्पति ।
चुलुम्प्यते इत्यादि । न तु
पञ्चमावित्ति खरसामप्रकृतित्वे यथार्थ
इति वाच्यम् । तर्हि नोपधस्यैव
स्यात् । एवं सति अच्चादीना न प्रवृत्ति
डमध्यपाठः कथमिति चेन्न । तेनु
डमध्या एवेति ज्ञापनाय डमध्यः पठितः ।
च तर्हि इदित् पाठेऽपीष्टसिद्धिरिति
क्विपि संयोगान्तलोपे इदित्पाठे चुलुं
लोपे चुलुम् इति भेदात् । एवं सर्व्व...
दुर्गादासः ॥

चुलुम्पः, पुं, (चुलुम्प्यते इति चुलुम्पनमिति
चुलुम्प + भावे घञ् ।) बालवालनम् ।
जटाधरः ॥

…म्पा, स्त्री, (चुलुम्पति चञ्चला भवतीति। चुलुम्प+अच्। स्त्रियां टाप्।) छागी। इति त्रिकाण्डशेषः॥

…लुम्पी, [न्] पुं, (चुलुम्पो लौल्यं चञ्चलता इत्यर्थः। सोऽस्यास्तीति। इनिः।) शिशुमाराकृतिमत्स्यः। उलूपलमत्स्यः। इति कश्चित्। इति शब्दरत्नावली॥

…ल, हावकृतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी लङ्घयान्तः। एकोऽर्थः। चुलन्ति चारुनयनाश्च सह प्रियेणेति हलायुधः। इति दुर्गादासः॥

…ः, पुं, क्लिन्नचक्षुः। (क्लिन्ने चक्षुषी अस्य। "चुल् च।" ५।२।३३। इत्यस्य वार्त्तिकोक्त्या क्लिन्नस्य चुलादेशो लप्रत्ययश्च।) तद्युक्ते त्रि। इति हेमचन्द्रः। ३। १२५॥

…की, स्त्री, (चुलति हावभावेन क्रीडतीति। चुल+ण्वुल्। गौरादित्वात् ङीष्।) शिशुमारः। कुम्भीरः। कुलविशेषः। इति मेदिनी शब्दरत्नावली च॥

…लिः, स्त्री, (चुल्यते प्रज्वाल्यते अग्निरत्र। चुल+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्। यद्वा, चुड्यते प्रेर्य्यते अग्निरत्र। चुड+बाहुलकात् लिक्।) पाकार्थमग्निस्थानम्। चुला इति आखा इति च भाषा॥ तत्पर्य्यायः। अश्मन्तम् २ उद्धानम् ३ अधिश्रयणी ४ अन्तिका ५। इत्यमरः। २। ९। २९॥ अश्मान्तम् ६ उश्मानम् ७ उद्धारम् ८ चुल्ली ९ धान्तिका १०। इति तट्टीका॥ उद्धानिः ११। इति शब्दरत्नावली॥

…ली, स्त्री, (चुल्लि+"कृदिकारादक्तिनः।" ४। १। ४५। इत्यस्य वार्त्तिकोक्त्या वा ङीष्।) चिता। उद्धानम्। इति मेदिनी। ले, १०॥ (यथा, मनुः। ३। ६८।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥")

…र्णं, क्ली पुं, चुरुम्। तत्तु मांसपिण्डविशेषः॥ [illegible]। पक्वादिफलस्थाकारभागः। इति सिद्धान्तकौमुदीटीकायां भरतः॥ भोला इति ख्यातः॥

…कं, क्ली पुं, (चूष्यते पीयते इति। चूष पाने+बाहुलकात् उकः प्रत्ययः।) कुचुकम्। इत्यमरटीकायां भरतः॥ (यथा, रामायणे। ४। ६६। १६।
"[illegible]")

…ः, पुं, (चूडति [illegible]। चूड+[illegible]।) [illegible]। इति त्रिकाण्डशेषः॥

…ा, स्त्री, (चोलयति [illegible] उन्नता भवतीति। चुल उन्नतौ+[illegible]) [illegible]। [illegible]। [illegible] २। इत्यमरः। २। ६। ९६।

केशपाशी ३। चूटिका ४ चुटिका ५। यथा, शब्दरत्नावल्याम्।

"शिखा चूडा केशपाशी चूटिका चुटिकेत्यपि।
शिरोमध्यबद्धचूडे भवेदेतत्तु पञ्चकम्॥"

वडभी। बाहुभूषणम्। इति मेदिनी। डे, १३॥ अग्रम्। इति हेमचन्द्रः॥ (यथा, हितोपदेशे।
"अस्ताचलचूडावलम्बिनि भगवति चन्द्रमसि॥")
कूपः। इति त्रिकाण्डशेषः॥ दशसंस्कारान्तर्गतसंस्कारविशेषः। यथा। चूडा कार्य्या यथाकुलमिति मलमासतत्त्वम्॥ (यथाच,—

"अयुग्माब्दे तथा मासि चूडा भौमशनीतरे।
अर्केन्दुकालशुद्धौ च जन्ममासेन्दुभाहते॥
रिक्तादर्शाष्टमीषष्ठीप्रतिपद्वर्ज्जिते सिते॥"
इति संस्कारतत्त्वधृतज्योतिषवचनम्॥

अस्य विशेषविवरणं चूडाकरणशब्दे द्रष्टव्यम्॥)

चूडाकरणं, क्ली, (चूडायाः करणं कर्म्म।) दशसंस्कारान्तर्गतसंस्कारविशेषः। तस्य क्रमो यथा। कुलाचारवशात् प्रथमे तृतीये वा वर्षे चूडाकरणं कर्त्तव्यम्। तत्र प्रथमं प्रातःकृतस्नानः कृतवृद्धिश्राद्धः पिता सबालामातरमग्नेः संस्थाप्य विरूपाक्षजपान्तां कुशकण्डिकां समाप्याग्नेर्दक्षिणत एकविंशतिदर्भपिञ्जलीः सप्तसप्तभिरेकीकृत्य कुशान्तरेण वेष्टयित्वा उष्णोदकसहितं कांस्यपात्रं ताम्रनिर्म्मितक्षुरं तदभावे दर्पणं वा लौहक्षुरमाणिक्य नापितं स्थापयेत् अग्नेरुत्तरतो वृषगोमयं तिलतण्डुलमाषमिश्रवञ्च कृसरं अग्नेः पूर्व्वतो मिश्रितब्रीहियवतिलमाषपूरितपात्रत्रयं स्थापयेत्। माता शुचिना वस्त्रेण कुमारमाच्छाद्य क्रोडे निधाय अग्नेः पश्चिमतो भर्त्तुर्व्वामपार्श्वे उत्तराग्रेषु कुशेषु प्राङ्मुखी उपविशति। ततः पिता प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा व्यस्तसमस्तमहाव्याहृतिहोमं कुर्य्यात्। प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ओँ भूः स्वाहा। प्रजापतिर्ऋषिरुष्णिक् छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ओँ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः। ओँ स्वः स्वाहा। प्रजापतिर्ऋषिर्बृहती छन्दः प्रजापतिर्देवता व्यस्तसमस्तमहाव्याहृतिहोमे विनियोगः। ओँ भूर्भुवः स्वः स्वाहा। ततः पिता उत्थाय प्राङ्मुखः कुमारस्य मातुः पश्चादवस्थितः [illegible] [illegible] [illegible]। प्रजापतिर्ऋषिः [illegible] देवता चूडाकरणे विनियोगः। ओम् [illegible]। [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] चूडाकरणे विनियोगः। ओँ [illegible]। ततः [illegible] [illegible] [illegible]

स्वतः शिखास्थानादधः शिरसः कर्णाभिमुखोच्चदेश उच्यते। ततः प्रजापतिर्ऋषिरापो देवता चूडाकरणे विनियोगः। ओम् आप उदन्तु जीवसे। ततस्ताम्रक्षुरं तदभावे दर्पणं वा पश्यन् जपति। प्रजापतिर्ऋषिर्विष्णुर्देवता चूडाकरणे विनियोगः। ओँ विष्णोर्दंष्ट्रोऽसि। ततः कुशवटुसप्तदर्भपिञ्जलीर्गृहीत्वा शिरोदक्षिणकपुष्णिकादेशे अनेन मन्त्रेण ऊर्द्ध्वाग्रा निदध्यात्। प्रजापतिर्ऋषिरोषधिर्देवता चूडाकरणे विनियोगः। ओम् ओषधे त्रायस्वैनम्। ततो वामहस्तगृहीतकुशपिञ्जलीसहितकपुष्णिकादेशे स्वदक्षिणहस्तगृहीतताम्रक्षुरं दर्पणं वा अनेन मन्त्रेण निदध्यात्। प्रजापतिर्ऋषिः स्वधितिर्देवता चूडाकरणे विनियोगः। ओँ स्वधिते मैनं हिंसीः। ततः केशच्छेदो यथा न भवति तथा ताम्रक्षुरं दर्पणं वा तत्रैव कपुष्णिकादेशे अनेन मन्त्रेण प्रेरयेत्। प्रजापतिर्ऋषिः पूषा देवता चूडाकरणे विनियोगः। ओँ येन पूषा बृहस्पतेर्व्वायोरिन्द्रस्य चावपत्तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय बलाय वर्च्चसे। तूष्णीं वारद्वयम्। ततो लौहक्षुरेण दक्षिणकपुष्णिकादेशस्य केशं छित्त्वा दर्भपिञ्जलीसहितकेशस्य [illegible] पात्रस्थवृषगोमयोपरि निधानं कुर्य्यात्। ततः कपुष्णिकादेशस्य [illegible] दक्षिणहस्तग्रहणेन पूर्व्ववदेव आप उदन्तु जीवसे इत्यनेन मन्त्रेण सेचनं ओँ विष्णोर्दंष्ट्रोऽसि इत्यनेन ताम्रक्षुरस्य दर्पणस्य वा प्रेरणं ओम् ओषधे त्रायस्वैनं इत्यनेन कपुष्णिकादेशे ऊर्द्ध्वाग्रदर्भपिञ्जलीनिधानं ओँ स्वधिते मैनं हिंसीरित्यनेन ताम्रक्षुरस्य दर्पणस्य वा कपुष्णिकादेशे निधानं ओँ येन पूषा बृहस्पतेरित्यनेन पूर्व्वाभिमुखं ताम्रक्षुरप्रेरणं लौहक्षुरेण कपुष्णिकादेशस्य केशं छित्त्वा दर्भपिञ्जलीसहितकेशस्य [illegible] निधानं कुर्य्यात्। [illegible] [illegible] शिखास्थानादधःशिरसः [illegible] [illegible] [illegible] [illegible] [illegible] निधानान्तं पूर्व्ववत् सर्व्वं कुर्य्यात्। ततः कुमारस्य [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

... इर्मिर्या स्यात्। ... मानदण्डानात् ... स्यात्। इति चूडा-
करणं समाप्तम्।" इति भवदेवभट्टः॥
चूडामणि:, पुं, (चूडा शिरोभूषणं मुकुटकिरीटा-
दिकम्। तत्र स्थितो मणि:। शाकपार्थिवादिवत्
समास:।) शिरोरत्नम्। (यथा, महाभारते। ३।१६८।१८।
"...चूडामणिं विमलमद्रे ... च॥"
... इति हैमचन्द्रः। ३।८४। ...
... यथा माघे।
...
... इति ...
[illegible]

चूर्ण, क पेषे। इति कविकल्पद्रुमः॥ (चुरा-परं-
सकं-सेट्।) पञ्चमस्वरी। पेषः चूर्णीकरणम्।
क, चूर्णयति शिला। इति दुर्गादासः॥
चूर्णं, क्ली, (चूर्ण्यते पिष्यते यत्। चूर्ण+कर्मणि
घञ्।) सम्यक्पेषेण जातरज:। तस्य लक्षणं
यथा,—
"अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्।
तत् स्याच्चूर्णं रज: क्षोदस्तन्मात्रा कर्षसम्मिता॥
चूर्णे गुड: समो देय: शर्करा द्विगुणा मता।
चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत्॥
लिह्यच्चूर्णं द्रवै: सर्वैर्घृताद्यैर्द्विगुणोन्मितै:।
पिबेच्चतुर्गुणैरेव चूर्णमालोड़ितं द्रवै:॥
चूर्णावलेहगुटिका कल्कानामनुपानकम्।
पित्तवातकफातङ्के त्रिद्व्येकपलमाहरेत्॥"
इति भावप्रकाश:॥ *॥
चूर्णौषधस्य पूर्णवीर्यं मासद्वयपर्यन्तं तिष्ठति।
इति वैद्यकपरिभाषा॥
("कर्षचूर्णस्य कल्कस्य गुटिकानाञ्च सर्वश:।
द्रवशुक्ति: स लेढव्य: पातव्यश्च चतुर्द्रव:॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)
धूलि: इति ख्यातम्। (यथा, मेघदूते। ७०।
"धूलीगुच्छै: कुसुमनिकरैस्तालुभिश्च ... रत्नप्रदीपान्
... चूर्णमुष्टि:॥")
... इति ख्यातम्। इति भरत:॥ तत्-
पर्याय:। वासयोग: २। इत्यमर:। २।६।१३४॥
वासचूर्णं: ३। इति मेदिनी। णे, १२॥ तत्-
युक्ति: ४। इति भूरिप्रयोग:॥ पटवासक: ५।
इति शब्दरत्नावली॥ (कुङ्कुमादिरज:। यथा,
रघु:। ४।५४।
"... प्रतिनिधीकृत:॥")

चूर्णं:, पुं, (चूर्ण्यते सम्पिष्यते इति। चूर्ण+
कर्मणि घञ्।) सम्यक्पेषेण जातरज:। चूर
इति गुँडा इति चाक्षि इति च भाषा॥ तत्-
पर्याय:। क्षार: २। इत्यमर:। २।६।९९॥
चूर्णम्॥ रज: ३। इति भावप्रकाश:॥ (यथा,
महाभारते। ६।११८।४।
"... चूर्णैश्च ... मर्त्यस्य:।
... तत्र मत्ता ... :॥")
... इति मेदिनी। णे, १२॥
... इति भाषा॥ (यथा,—
"... चूर्णं ...
... चूर्णः ... ॥")
... चूर्ण: ... उद-
... इति राजवल्लभ:॥
चूर्णं, क्ली, (चूर्णं इव ...। चूर्ण+कै+
क:।) ... यथा,—
"... चूर्णकं ... ॥"

... चूर्णकं यथा। स हि ...
परमपुरुष: पुरुषोत्तमो ...
राज्ञीमतनिमन्नोऽत्र करवा...
मवतारयितुं रामकृष्णमहो...
अवततार।" इति छन्दोमञ्जरी। ...
इत्यपि दृश्यते॥)
चूर्णक:, पुं, (चूर्णै: कायते प्रकाशते इति।
क:।) सक्तु:। इति त्रिकाण्डशेष:॥
यथा, राघवे ... ४६ अध्याये।
...
पुष्पकमहार्घ ...
पटिका:॥") स्वार्थे कै चूर्णकमपि ...
चूर्णकार:, पुं, (चूर्णं करोतीति।
चूर्ण+कृ+"कर्मण्यण्।" ३।२।१।
वर्णसङ्करजातिविशेष:। चूर्णकार: ...
स नटकन्यायां पुण्ड्रकाज्जात:। ...
पद्धति:॥
चूर्णकुन्तल:, पुं, (चूर्णं वासयोग्यकुन्तल:।
शाकपार्थिवादिवत् समास:।) यथा,
...मर: २।६।९६॥
चूर्णखण्डं, क्ली, (चूर्णाय यत् खण्डम्।)
इति हारावली। २०८॥ काँकर ...
इति च भाषा॥
चूर्णपारद:, पुं, (चूर्ण: पारद:।
समास:। पारदभस्मतया ...
हिङ्गुलम्। इति राजनिर्घण्ट:॥
चूर्णशाकाङ्क:, पुं, (चूर्णं इव ...
सादृश्येन गच्छतीति। ...
गौरसुवर्णशाकम्। इति राजनिर्घण्ट:॥
चूर्णि:, स्त्री, (चूर्णयति सञ्चूर्णयति ...
तानी तर्कमिति। चूर्ण+"सर्वधातुभ्य
उणा। ४।११७। इति इ:। ...
एविष्यामीति।" उणा। ४।११८। ...
पामध्यमाकरणम्। महाभाष्यम्।
इति ... टीकायां भरत:।
... इति
गुणादिवृत्ति:॥
चूर्णिका, स्त्री, (...
"... ।" ...
... इति ...।
चूर्णित:, त्रि, ...
... ।) भाष्यकार:। ...
चूर्णी, स्त्री, (चूर्णि: ...
...
... इति ...
विशेष:। ...
[illegible]

। यथा। "शुक्तकेशाश्च चूलिन:।" इति
पुराणम्॥
, पुं, (चूल एव। चूल+स्वार्थे कन्।)
।। यथा, मत्स्यसूक्ते ३८ पटले।
शौतचूलको विप्रो म्लेच्छेन रजकादिना।
ापत्यद्वयं कुर्य्यात् शूद्र: कुर्य्यात्तु भागत:॥
त्रं निर्व्वपेत् कैशं घृते चान्यावसायिना।
द्वेस्तु शिखावर्ज्जं शूद्रैरष्टाङ्गुलिद्वयम्॥"
स्त्री, (चूड़ा+डस्य लत्वम्।) चन्द्रशाला।
ापरिगृहम्। इति शब्दरत्नावली॥ चूड़ा च॥
, स्त्री, (चोलयति गोधूमचूर्णं पिष्टकाका-
उन्नयति उत्पादयतीत्यर्थ:। चुल+णिच्+
्। पृषोदरात् दीर्घत्वे अत इत्वे च साधु:।)
ष्टगोधूमचूर्णम्। इति शब्दचन्द्रिका॥ लूची
भाषा॥
ा, स्त्री, (चोलयति सन्निहितचर्म्ममांस-
शं उन्नयतीति। चुल+ण्वुल्+कापि अत
ष। पृषोदरात् दीर्घत्वे साधु:।) हस्तिकर्ण-
म्। इत्यमर: ।२।८।३८॥ नाटकाङ्गविशेष:।
मेदिनी। के, ६०॥
ाने। इति कविकल्पद्रुम:॥ (भ्वां-परं-सकं-
्।) दीर्घी चूयत्याम्रं लोक:। इति दुर्गा-
स:॥
स्त्री, (चूष्यते पीयते पृष्ठमांसेनाद्ध्यता
यते इति। चूष+घञर्थे क:।) कक्षा। इत्य-
र:।२।८।४२॥ काछदड़ी इति भाषा॥
कि सन्दीपने। इति कविकल्पद्रुम:॥ (चुरां-
वे भ्वां-परं-सकं-सेट्।) कि, चर्त्तयति। इति
ादास:॥
श हिंसे। ग्रन्थे। इति कविकल्पद्रुम:॥
तुदां-परं-सकं-सेट्।) श, चृतति चर्त्तिता।
न्थो ग्रन्थनम्। इति दुर्गादास:॥
पुं, (चेटतीति। चिट् परप्रेषे+अच्।)
स:। इति हेमचन्द्र:॥ (यथा, कथासरित्-
ागरे। ६। १२७।
एतत्तस्य मुखाच्छ्रुत्वा राजचेटस्य दुर्म्मना:॥"
तु शृङ्गारसहाय:। यथा, साहित्यदर्पणे।३।४६।
ृङ्गारस्य सहाया विटचेटविदूषकाद्या: स्यु:॥")
:, पुं, (चेटति दासत्वं करोतीति। चिट+
ुल्।) दास:। इत्यमर:।२।१०।१७॥
यथा, कथासरित्सागरे। ६। १२४।
ावाभ्यां राजहंसाख्य आहूतो राजचेटक:॥")
उपपतिनायकभेद:। तस्य लक्षणं सन्धान-
चतुर:। इति रसमञ्जरी॥
का, स्त्री, (चेटी+स्वार्थे कन् टापि अत
त्वं पूर्व्वह्रस्व:। यद्वा चिट् ण्वुल् टापि अत
त्वम्।) दासी। इति द्विरूपकोष:॥ (यथा,
कथासरित्सागरे। ४। ५१।
"अङ्गीकुर्व्वन् स तम्मूढश्चेटिकाभि: प्रवेशित:॥")
ी, स्त्री, (चेट+ङीप्।) दासी। इति हेम-
चन्द्र:॥ (यथा, रामायणे। २। ६१। ६४।
"प्रेष्याश्चेटाश्च वध्वश्च समस्ताश्चापि सर्व्वश:॥")

चेड़:, पुं, (चेटति परप्रेष्यत्वं करोतीति। चिट+
अच्। टस्य ड़त्वञ्च।) दास:। इत्यमर-
टीकायां रमानाथ:॥
चेड़क:, पुं, (चेटति इति। चिट+ण्वुल्। टस्य
ड़त्वम्।) दास:। इत्यमरटीका॥
चेड़िका, स्त्री, (चेड़क+टाप्। कापि अत इत्वम्।)
दासी। इति द्विरूपकोष:॥
चेड़ी, स्त्री, (चेड़+ङीप्।) दासी। इत्यमर-
टीका॥
चेत्, व्य, (चित्+विच्।) यदि। इत्यमर:।
३।४।१२॥ (यथा, पञ्चदश्याम्। ६। ४२।
"अन्यत्ववारकं सत्वमिति चेदन्यवारणम्।
कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत्॥"
पक्षान्तरम्। असन्देहेऽपि सन्देहवचनम्। यथा,
"सत्यश्चेद्गुरुवाक्यमेव पितरो देवाश्च चेद्-
योगिनी
प्रीता चेत् परदेवता च यदि चेद्वेदा: प्रमाणं
हि चेत्।
शाक्तीयं यदि दर्शनं भवति चेदाज्ञाप्य मोघास्मि
चेत्
स्वातन्त्र्या अपि कौलिकाश्च यदि चेत् स्यान्मे
जय: सर्व्वदा॥"
इति शब्दार्थचिन्तामणिधृतश्लोक:॥)
चेत:, [स्] क्ली, (चेतत्यनेन इति। चित्+
करणेऽसुन्।) चित्तम्। इत्यमर:। १। ४। ३१॥
(यथा, पञ्चदश्याम्। १। ५४। [यत्।
"ताभ्यां निर्व्विचिकित्सेऽर्थे चेतस: स्थापितस्य
एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥")
चेतकी, स्त्री, (चेतयते उन्मीलयति ज्ञानेन्द्रिय-
बलादीनि। चित+ण्वुल्। गौरादित्वात् ङीष्।)
हरीतकी। इत्यमर: ।२।४।५८॥ हिमाचलभवा
त्रिशिरा हरीतकी। सा च सर्व्वरोगनाशिनी
गन्धयुक्तनस्यकरणे प्रशस्ता। इति वैद्यकम्॥
("चेतकी द्विविधा प्रोक्ता आकाराद्वर्णतस्तथा।
षड़ङ्गुला सिता प्रोक्ता शुक्ला चैकाङ्गुला स्मृता॥
श्रेष्ठा कृष्णा समाख्याता रेचनार्थे जिगीषुणा।
चेतकी वृक्षशाखायां यावत्तिष्ठति तां पुन:॥
भिन्दन्ति पशुपक्ष्याद्या नराणां कोष्ठञ्च विस्मय:।
चेतकीं यावद्विधृत्य हस्ते तिष्ठति मानव:॥
तावद्भिनत्ति रोगांस्तु प्रभावान्नात्र संशय:॥"
इति कल्पस्थाने प्रथमेऽध्याये हारीतेनोक्तम्॥
एतस्या उत्पत्तिगुणजात्यादिकं यथा, भावप्रकाशे
पूर्व्वखण्डे प्रथमे भागे।
"पपात बिन्दुर्मेदिन्यां शक्रस्य पिबतोऽमृतम्।
ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी॥
हरीतक्यभया पथ्या कायस्था पूतनाऽमृता।
हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा॥
वयस्था विजया चापि जीवन्ती रोहिणीति च।
विजया रोहिणी चैव पूतना चामृताऽभया॥
जीवन्ती चेतकी चेति पथ्याया: सप्त जातय:।
अलाबुवृत्ता विजया वृत्ता सा रोहिणी स्मृता॥
पूतनास्थिमती सूक्ष्मा कथिता मांसलाऽमृता।

पञ्चरेखाऽभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी॥
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृति:।
विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी॥
प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता।
अक्षिरोगेऽभया शस्ता जीवन्ती सर्व्वरोगहृत्॥
चूर्णार्थे चेतकी शस्ता यथायोगं प्रयोजयेत्।
चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णत:॥
षड़ङ्गुलायता शुक्ला कृष्णात्वेकाङ्गुला स्मृता।
काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत्॥
काचित् स्पर्शेन दृष्ट्यान्या चतुर्द्धा भेदयेच्छिवा।
चेतकी पादपच्छायामुपसर्पन्ति ये नरा:॥
भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादय:।
चेतकी तु धृता हस्ते यावत्तिष्ठति देहिन:॥
तावद्भिद्येत रोगैस्तु प्रभावान्नात्र संशय:।
न धार्य्यं सुकुमाराणां कृशानां भेषजद्विषाम्॥
चेतकी परमा शस्ता हिता सुखविरेचनी॥")
जातीपुष्पम्। इति राजनिर्घण्ट:॥
चेतन:, पुं, (चेतति जानाति सर्व्वं इति। चित्+
कर्त्तरि ल्यु:।) आत्मा। इति हेमचन्द्र:॥
(यथा, पञ्चदश्याम्। ६। ४५।
"चेतना चेतनभिदा कूटस्थात्मकृता न हि।
किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम्॥")
मनुष्य:। इति राजनिर्घण्ट:॥ प्राणी। इत्य-
मर:। १। ४। ३०॥
("रथादौ नियता चेष्टा चेतनेनाधितिष्ठिते।
न दृष्टा चेतनस्तेन प्राणादीनां प्रवर्त्तक:॥"
इति शब्दार्थचिन्तामणिधृतवचनम्॥)
चेतनं चैतन्यं विद्यतेऽस्य इति। "अर्श‌आदि-
भ्योऽच्।"५।२।१२७। इत्यच्।) प्राणयुक्ते त्रि।
इति मेदिनी। ने, ६४॥ (यथा, मेघदूते। ५।
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥")
चेतनकी, स्त्री, (चेतनं करोति बुद्धीन्द्रियादिस्फुरणं
वर्द्धयतीत्यर्थ:। कृ+ड:। ततो ङीष्।) हरी-
तकी। इति राजनिर्घण्ट:॥
चेतना, स्त्री, (चेतयतेऽनया इति। चित् संज्ञाने
"ण्यासश्रन्थेति।" युच्। टाप् च।) बुद्धि:। इत्य-
मर: ।१।५।१॥ (यथा, भागवते। ४। २१। ३४।
"प्रधानकालाशयधर्म्मसंग्रहे
शरीर एष प्रतिपद्य चेतनाम्॥"
"एष विभु: परमात्मापि शरीरे विषयकारां
बुद्धिं प्राप्य क्रियाफलत्वेन प्रतीयते।" इति
टीकाकृत्स्वामि:॥) सा गर्भस्थबालकस्य सप्तभि-
र्मासैर्भवति। इति सुखबोध:॥ (ज्ञानात्मिका
मनोवृत्ति:। यथा, भगवद्गीतायाम्। १३। ६।
"इच्छा द्वेष: सुखं दु:खं सङ्घातश्चेतना धृति:॥"
तस्यामभिव्यक्तेन्द्रियवृत्ति: तप्त इव लोहपिण्डे-
ऽग्निरात्मचैतन्याभासरसविद्धा चेतना इति
शाङ्करभाष्यम्। ज्ञानात्मिका मनोवृत्तिरिति
श्रीधरस्वामी॥ सत्त्वप्रधानवृत्तिकार्यां प्रमाणा-
भावरूपकारिकायां त्रिवृत्तौ ज्ञाना-
त्मिकायां भगवतो विभूतावपि शब्दार्थचिन्ता-
मणि:॥)

यथा:। गुरुत्वम्। विदम्भितत्वम्। मधुरत्वम्। कफवातुकारित्वञ्च। इति राजवल्लभ:॥

चेमाम:, पुं. (चेममिव स्वयं व्यालाति। व्या+ ला+ "कर्म्मण्यण्।" ३।२।१। इत्यण्।) वृक्षविशेष:। तत्पर्य्याय:। चिवफल: २ सत्याम्र: ३ राजतेमिष: ४ लतापनस: ५ गाटाम्ल: ६ सेदु: ७। इति त्रिकाण्डशेष:॥

चेलिका, स्त्री, (चिल्यते परिधीयतेऽसौ इति। चिल+इन्। स्वार्थे कन् ततष्टाप्।) पट्टवस्त्रविशेष:। चेलिकापड़ इति भाषा। यथा,—
"सेयं तव्यस्य वनिता पीतपटाटोपरिच्छदा।
रक्तचेलिकया स्वच्छा प्रासक्रमघनस्तनी॥"
इति पाद्मे पातालखण्डम्॥

चेतुक:, पुं. (चेतति बुद्धितत्वं गच्छति इति। चेत +उक:।) बुद्धभिक्षुशिष्य:। तत्पर्य्याय:। सामनेर: २ प्रव्रजित: ३ महाभासक: ४ गोमी ५। इति त्रिकाण्डशेष:॥

चेल, ऋ चाले। गती। इति कविकल्पद्रुम:॥ (भ्वां-परं सकं-सेट्।) लइयाम:। ऋ, अचिचेलत्। अस्य ऋदनुबन्ध: क्रुटति: कुटादिपाठसामर्थ्यात् चैटितार्थ्या वा। अयं केचिन्मध्यो। इति दुर्गादास:॥

चेट, ङ ईर्ष्ये। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं सकं-सेट्।) ईर्ष्यो व्यापार:। ङ, चेटते पटिनुप्रिय:। इति दुर्गादास:॥

चेटक:, पुं, (चेटति इति। चेट+ण्वुल्।) रतिकर्म्मविशेष:। यथा, सारतीत्रिकायाम्।
"पादमेकं भुवि स्थाप्य हस्तेनैव चेटयेत्।
वाम: क्रोडे स्थिता नारी कथ्योऽयं चेटको
चेटाकर्मैर ...॥ मत:॥"

चेटा, स्त्री, (चेट+भावे अङ् टाप् च।) कायिकव्यापार:। इति मुग्धबोधटीकायां दुर्गादास:॥ (यथा, मनु: ।७।१०।
"... चेटा ...
"... चेटा ... प्रयत्नात् ...।"
... चेटाख्य ...।" इति सिद्धान्तमुक्तावली। २४१।)

चेटमान:, पुं, (चेटया: ...) ... इति राजनिर्घण्ट:॥

चैतन्य:, पुं, (चैतन्य एव। स्वार्थे ष्यञ्।) अवतारविशेष:। तस्य प्रमाणं यथा,—
"श्रुत्वा तु कलिधर्म्मांस्तान् ब्रह्मा ...
सर्व्वलोकहितार्थाय प्रोवाच मधुसूदन।
भविष्यति कलौ केनोपायेन धर्म्म...
भक्तिमार्गस्थिति: कस्मात् ...॥"
श्रीभगवानुवाच।
"धन्यतीर्थे भविष्यामि कलौ ...
शचीगर्भे नवद्वीपे स्वर्धुनीपरिवारिते।
अप्रकाश्यमिदं गुह्यं न प्रकाश्यं ...
भक्तावतारं भक्ताख्यं भक्तं भक्तिप्रदं ...
मन्मायामोहिता: केचिन्न ज्ञास्यन्ति ...
...
शच्यावतारकाले या: स्त्रियो ...
कलौ तेऽवतरिष्यन्ति श्रीशचीनन्दन...।
चतु:षष्टिमहान्तास्ते गोपा द्वादश ...
धर्म्मसंस्थापनार्थाय विहरिष्यन्ति ...
काले नष्टं भक्तिपथं स्थापयिष्यन्ति ...
...
धर्म्मसंस्थापनं कार्य्ये कृष्णेन ...
शच्यावतारकाले ये महाभागवत ...
श्रीरामनामगोपालो मम रामस्य ...
अभिराम इति ख्यात: पृथिव्यां॥
...रामनामगोपाल: श्रीमान् सुन्दर...
...
...

गोस्वामी श्रीलभूगर्भ इन्दुलेखा तथा प्रिया ।
ाशिमिश्रः शशिरेखा रूपः श्रीरूपमञ्जरी ॥
श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी ।
श्रीरघुनाथदासः श्रीमद्रूपमञ्जरी मम ॥
द्वितीयो रघुनाथश्च श्रीरागमञ्जरी प्रिया ।
श्रीलगोपालभट्टः श्री-अनङ्गमञ्जरी सखी ॥
ोकनाथः प्रेमभक्तो लवङ्गमञ्जरी सखी ।
श्रीगदाधरभट्टस्तु प्रिया श्रीगुणमञ्जरी ॥
ट्टः श्रीजीवगोस्वामी योगमाया सहायिनी ।
नी कलावती प्रेष्ठा श्रीगोविन्दः प्रियो मम ॥
ती लीलावती श्रीमान् माधवः प्रीतिवर्द्धनः ।
ासुघोषाभिधो दूती ममानन्दप्रदायिनी ॥
श्रिवानन्दभार्य्या सा मत्प्रियेन्दुमती सखी ।
ीपरमानन्दपुरि प्रियो मे उद्धवः सखा ॥
ीलराघवदासस्तु धनिष्ठा मे प्रिया सखी ।
ाम्बरो ब्रह्मचारी याज्ञिको ब्राह्मणः स्मृतः ॥
ण्डितो जगदीशश्च यज्ञपत्नी मम प्रिया ।
ाचार्य्यः श्रीलभगवान् श्रीचैतन्यप्रियांशभाक् ॥
ण्डितो गरुड़ः श्रीमान् गरुड़ो मम वाहनः ।
ीलगोपीनाथसिंहोऽक्रूरो भक्तो मम प्रियः ॥
ीयः शङ्कर आख्यातो गुणसागररायकः ।
ाघवः शान्तमुनिर्विश्वकर्म्मा तु भास्करः ॥
ानमाली सुदामा च सार्व्वभौमो बृहस्पतिः ।
प्रिया इन्दुमुखी या मे मकरध्वजविश्रुतः ॥
ंहानन्दो लोकनाथः कविचन्द्रस्ततः परम् ।
ीनाथो रामनाथश्च चत्वारः सनकादयः ॥
ाशिमिश्रस्तु कुब्जा स्याद्रामानन्दोऽर्जुनः सखा ।
तापरुद्रः ख्यातोऽसाविन्द्रद्युम्नो महीपतिः ॥
ाकुरश्च कालिदासः पुलिन्दीवनचारिणी ।
स्वी च राधिका दासी सा इति ख्यातिसंयुता ॥
ाचार्य्यगोपीनाथश्च रत्नावती मम प्रिया ।
ाङ्गदासः पद्मिनी स्यात् छर्य्यो विश्वेश्वरः स्मृतः ॥
ाणुमती सत्यराजो रामानन्दः कलावती ।
यश्च विजयश्चैव गोविन्दो गरुड़स्तथा ॥
ाचार्य्यरत्नचन्द्रः स्याद्व्यासो वृन्दावनः स्मृतः ।
ाकदेवो व्यासपुत्त्रो भट्टो वल्लभ ईरितः ॥
ीयानन्दोऽग्रज इव देवानन्दश्च भार्गवः ।
ण्डितः श्रीजगन्नाथो दुर्व्वासा सुनिरुच्यते ॥
ाचार्य्यः श्री-अनन्तश्च हरिदासस्तथैव च ।
ता गोप्यो व्रजे ख्याता हृदयानन्द एव च ॥
ायाश्चतुःषष्टिरेते धर्म्मसंस्थापने कलौ ।
तेषां पुण्यनामानि ये कारन्ति दिने दिने ॥
प्राप्नुवन्ति मङ्गलं पुनन्ति भुवनत्रयम् ।
ाक्तदासा ये मर्त्या नास्ति तेषां समः क्वचित् ॥
ाना भगवतो वाक्यं ब्रह्मा हर्षमवाप्तवान् ।
ीनि तं देवदेवेशं नेदुर्दुन्दुभयस्तदा ॥
ाणुर्गन्धर्व्वप्रवरास्तुष्टुवुः प्रसुखास्तदा ॥”
इत्यनन्तसंहितायां श्रीचैतन्यजन्मखण्डे सप्त-
षष्टितमोऽध्यायः ॥ ६ ॥ अपि च ।
‘यः सव्ये सितवर्णमादधदसौ श्रीशुक्लनामाभवत्
ेतायां मखभुक् मखाख्य उचितोऽभूद्रक्तवर्ण्णं
न्त्रयं ।

यः श्यामं दधदाशु वर्णकममुं श्यामो युगे द्वापरे
सोऽयं गौरविधुर्व्विभाति कलयमामावतारं कलौ ॥
नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः ।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिवः ॥”
इति गौरगणोद्देशः ॥

(अयमेव भगवांश्चैतन्यदेवो नवीनवैष्णवसम्प्रदायविशेषस्य प्रवर्त्तकस्तत्सम्प्रदायैश्चोपास्येष्टदेवत्वेनामी परिगृहीतश्च । असौ एव वृन्दावनरमण-श्रीकृष्णस्य पूर्णावतार इति केचित्, परैस्तु प्रामाणिकग्रन्थवचनादर्शनात् तन्न मन्यते अत एवास्मिन् विषये पण्डितानां प्रायशो मतभेदो दृश्यते ।

स तु प्रसः (१४०७) सप्ताधिकचतुर्दशशतशके कुम्भस्थे सवितरि पौर्णमास्यां तिथौ शुक्रवारे प्रदोषसमये नवद्वीपाख्यनगर्य्यां प्रादुर्बभूव । तस्मिन्नेव महामहिम्नस्तस्य भगवतो जन्मसमये चन्द्रदेवं प्रति सैंहिकेयोपरागो जातः । एतदुपलक्षीकृत्य गङ्गास्नानार्थं बहवो लोका नानादिग्देशादागत्य तत्र मिलिताः । तदा ग्रस्तेऽपि राहुणा चन्द्रमसि भक्तजनकुमुदबान्धवो गौरचन्द्रः समवेतलोकानां हरिसंकीर्त्तनप्रभृतिभिर्मङ्गलाचरणैः सह शचीपूर्व्वपर्व्वतादुदियाय । भवन्ति हि शुभसूचकानि महतामाविर्भूतानि । अतस्तदापि प्रसन्ना दिक् शैत्यसौगन्ध्यमान्द्यादिगुणगणाढ्यो मलयसमीरणः प्रसन्नानि च साधु जनमनांसि समभवन् । अस्य पिता जगन्नाथमिश्रस्तु पुरा श्रीहट्टनिवासी आसीत् । कदाचित् गङ्गास्नानार्थमेव नवद्वीपमागत्य विप्रचक्रवर्त्तिकुलतिलकस्य नीलाम्बरशर्म्मणः शचीनाम्नीं कन्यां परिणीतवान् । ततो गच्छति काले अयं चैतन्यदेवः शचीगर्भे त्रयोदशमासं यावदुषित्वा जगन्नाथमिश्रस्य दशमपुत्त्रत्वेन समभवत् । अस्य पूर्व्वजो विश्वरूपो नाम जगन्नाथमिश्रस्यापरः पुत्त्र आसीत् । स तु यौवन एव ज्ञानवैराग्यविशारदो दारपरिग्रहमनङ्गीकुर्व्वन् पारिव्राज्यधर्म्मं समाश्रयत् ।

अथ चैतन्यदेवस्य जातकर्म्मादिसंस्कारं यथाकालं क्रमशो निष्पन्ने अस्य मातामहो नीलाम्बरचक्रवर्त्ती सुलक्षणादिकमवलोक्य विश्वम्भर इति नाम्नैनमाजुहाव । शचीदेवी तु पुनः पुनः पुत्त्रधनेन वञ्चिता प्रियतममेनं कनीयांसं संसारस्थितिर्दीर्घजीवनकामनया निमाइ इत्याख्यया पौरवासिनस्तु असामान्यरूपलावण्यतया परमसमादरेण गौर इत्याख्यया च आहूतवन्तः । परं धर्म्मरसिकानां भक्तानां समाजे, भावसिंहस्य बुद्धदेव इव अस्य महाप्रभुरिति चैतन्यदेव इति च आख्या प्रसिद्धा ।

अथ प्राप्ते काले चैतन्यदेवोऽयं शास्त्रसागरपारगमशेषबुधवर्गवन्दितचरणारविन्दं महामहोपाध्यायं गङ्गादासशर्म्माणमुपाध्यायत्वेनाङ्गीकृत्य स्वल्पेनैव कालेन सर्व्वशास्त्रार्थेषु ......

चैतन्यः

तदा सर्व्वे एवैनं देवांशसम्भूतममन्यन्त । अथ कदाचिदयं गङ्गास्नानार्थं गत्वा तत्र वल्लभाचार्य्यस्य लोकातीतरूपलावण्यां लक्ष्मीं नाम कन्यामवलोक्य मोहित आसीत् । वल्लभाचार्य्यस्तु एतदवगम्य स्वयमेव तां कन्यामस्मै सम्प्रददे । विवाहानन्तरमेवासौ छात्रानध्यापयितुं प्रवृत्तः । एतस्मिन्नेव समये बहवो दिग्विजयिनः पण्डिता नवद्वीपमागत्य अस्य तर्कजालैः समाच्छन्ना भग्नदर्पाश्च सन्तः प्रतिनिवृत्ताः । असावपि दिग्विजिगीषया पूर्व्वादिस्थलीं गत्वा तत्रस्थान् पण्डितान् विमोहयन् सुविमलं यशः प्राप्तवान् । एतस्मिन्नेव काले अस्य पूर्व्वपत्नी कालधर्म्मं प्राप्ता । चैतन्यदेवस्तु तस्या विरहेण व्याकुलितोऽपि मातुरनुरोधेनैव पुनः सनातनपण्डितस्य विष्णुप्रियानाम्नीं कन्यां द्वितीयपत्नीत्वेन स्वीचकार । परं सर्व्वगुणविभूषितायाः साक्षात् लक्ष्म्या इव लक्ष्म्या मरणादेवासौ संसारविरक्तः श्रीवासादिभिर्भक्तवर्गैर्मिलितो हरिभक्तिरसनिमग्न एव कालं यापयामास । अथ कदाचित् पितृलोकोद्धारवासनया गयातीर्थं गत्वा भक्तचूड़ामणेः श्रीमदीश्वरपुरिनाम्नो गोस्वामिनः सकाशात् हरिनामामृतदीक्षां लब्ध्वात्मानं कृतकृतार्थं मत्वा च स्वदेशं प्रत्यावृत्तवान् । एतस्मिन्नवसरे पापपङ्कदुराचारौ दस्युप्रवरौ जगाइ माधाइ चेति प्रसिद्धौ भ्रातरौ अन्यांश्च कुष्ठादिव्याधिपीड़ितान् महापातकिनः करुणया हरिनामदीक्षादानेन संसारसागरात् समुद्धृत्य यवनजातीयकाजिप्रभृतीन् वैष्णवद्वेषिणः स्वमहिम्ना दमयामास । ततः प्रभृत्येवासौ भक्तिरसप्रधानं वैष्णवधर्म्मं प्रचारयितुमिच्छन् नित्यानन्दाद्वैताचार्य्यादिभिर्भक्तवर्गैः सह नानाजनपदं परिभ्रमन् बहूनेव जनान् प्रेमोन्मत्तानकरोत् । अथ (१४३१) एकत्रिंशदधिकचतुर्दशशतशके उत्तरायणसंक्रान्त्यां संसारमायां परित्यज्य काटोयाग्रामे केशवभारतिसकाशात् सन्न्यासधर्म्मं समाश्रयत् । अथ नीलाचलमागत्य श्रीजगन्नाथदेवं दृष्ट्वा राज्ञः प्रतापादित्यस्य सभापण्डितं वेदान्तशास्त्रपारदर्शिनं सार्व्वभौमं विचारेण पराजित्य वैष्णवदीक्षां प्रदत्तवान् । अथ कदाचित् गोदावरीतीरे भक्तवरं रामानन्दमवलोक्य तेन निर्णयैर्धर्म्मालापैरात्मानं कृतकृत्यममन्यत । ततोऽसौ त्रिपदी-शिवकाञ्ची विष्णुकाञ्ची-त्रिमल्लप्रभृतीन् बहून् दाक्षिणात्यजनपदान् हरिप्रेमरसेन प्लावयित्वा द्वारकातीर्थदर्शनार्थं प्रस्थितः । तत्रैवासौ ‘कृष्णकर्णामृतं’ नाम सुप्रसिद्धवैष्णवग्रन्थं लब्धवान् । अतः परं पुनरेव नीलाचलमागत्य काशीश्वरनाम्नः कस्यचिद्भक्तप्रधानस्य भवने अवस्थितवान् । अत्रैवासौ श्रीजगन्नाथदेवस्य रथयात्रामहोत्सवे हरिसंकीर्त्तनादिकं विधाय प्रेमोन्मादप्रलापादिभिर्भक्तिमन्दरं ......

जिगमिषुर्वन्येनैव पथा व्रजन् स्वभावसात्त्विकेन व्याघ्रादीनपि हिंस्रजन्तून् भक्तिप्रेम्णा मादयित्वा वृन्दावनमुपतस्थे। तत्र स्वभक्तवृन्दावृत एवासौ गोपीवल्लभश्रीकृष्णस्य विहारस्थानादिकमवलोक्य मथुरामुद्दिश्य प्रस्थितः। ततोऽस्मात् स्थानात् प्रयागगमनकाले बहून् पाषण्डानपि यवनान् हरिभक्तान् विधाय वाराणसीमुपस्थितः। तत्र कियत्कालमुषित्वा स्वधर्मं प्रचार्य च पुनर्नीलाचलमाजगाम। अत्रस्थ एवासौ स्वप्रचारितवैष्णवधर्मस्य माहात्म्यं विज्ञापयितुं भक्तवृन्दाग्रगण्यान् रूपसनातनादीन् नानातीर्थस्थानेषु प्रेषयामास। अथ स्वभक्तैर्मिलितो नानाविधमहोत्सवेन हरिसंकीर्त्तनादिकं विधाय भक्तिरसस्य उत्कटकोटिमभिगम्य विरहोन्मादादिप्रगाढ़भक्तिलक्षणैरन्वित आसीत्। तत एवासौ स्वभक्तगणान् कलियुगे हरिसंकीर्त्तनस्य माहात्म्यादिकं श्रावयित्वा अष्टचत्वारिंशद्वर्षवयसि कालस्य दुरतिक्रमणीयत्वात् (१४५५) पञ्चपञ्चाशदधिकचतुर्दशशतशके मानवकायं परित्यज्य अन्तर्हितवान्॥)

चैत्यं, क्ली पुं, (चित्यस्य इदम्। "तस्येदम्।" ४। ३। १२०। इत्यण्।) आयतनम्। इत्यमरः। २। २। ७॥ यज्ञस्थानं केचित्तु सुखरहितं देवकुलसदृशं यदायतनं तच्चित्यमचित्यमपीत्याहुः। देवायतनमात्रम्। म्हटो देवकुलम्। इति भरतः॥ (यथा, महाभारते। २।३।१२।
"यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः॥")
चिता। इति त्रिकाण्डशेषः॥

चैत्यः, पुं, (चैत्ये देवायतनादिस्थाने तिष्ठतीति। चैत्य+अण्।) बुद्धः। जिनः। उद्देशवृक्षः। इति मेदिनी भरतश्च॥ शेषस्य पर्य्यायः। देवसदः २ देवावासः ३ करिभः ४ कुञ्जरः ५। इति त्रिकाण्डशेषः॥ (यथा, महाभारते।६।३।४०।
"वृक्षाः पतन्ति चैत्याश्च ग्रामेषु नगरेषु च॥"
चैत्यः पुरुषः। यथा, भागवते। ३। २६।६०।
"अहङ्कारस्तयोरमधितं चैत्यस्ततोऽभवत्॥")

चैत्यद्रुः, पुं, (चैत्य एव द्रुमः।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥ (अश्वत्थशब्देऽस्य गुणादयो ज्ञातव्याः।)

चैत्यमुखः, पुं, (चैत्यं चितिसम्पन्नं निष्कृतमित्यर्थः मुखं यस्य।) कमण्डलुः। इति त्रिकाण्डशेषः॥

चैत्यवृक्षः, पुं, (चैत्यस्तदाख्यया प्रसिद्धो वृक्षः।) अश्वत्थवृक्षः। इति रत्नमाला॥ (यथा, मनुः। ९। २६४।
"चतुष्पथांश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च॥")

चैत्रं, क्ली, (चीयन्ते चीयाः स्थानात् स्थानान्तरमनेनेति। चि+बाहुलकात् करणे त्रन्। ततः स्वार्थे अण्।) यज्ञम्। देवकुलम्। इति मेदिनी। रे, ३७॥ देउल इति भाषा॥ (यज्ञस्थानम्। यथा, महाभारते। १। १०९। १३।
"भोऽद्य धर्म्मेण राजन्! सर्व्वतः परिरक्षिते। बभूव रमणीयश्च चैत्ययूपशताङ्कितः॥")

चैत्रः, पुं, (चित्रे विचित्रे कार्य्यादौ साधुः। चित्र+अण्।) बुद्धभिक्षुकः। इति त्रिकाण्डशेषः॥ वर्षपर्व्वतविशेषः। इति मेदिनी। रे, ३७॥ (यथा, हारावल्याम्।
"हिमवान् हेमकूटश्च निषधो मेरुरेव च।
चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः॥"
चित्रायां भवः। चित्रा+अण्।) चित्रागर्भजो बुधपुत्रः। स सप्तद्वीपाधिपतिः सुरथराजपितामहः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ (चित्रानक्षत्रयुक्ता पौर्णमासी यत्र सः। चित्रा+ "विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।" ४। २। २३। इति पक्षे अण्।) मासभेदः। स तु सौरचान्द्रभेदेन द्विविधः। तत्र मीनराशिस्थरविकः सौरः। मीनस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तश्चान्द्रः। इति मलमासतत्त्वम्॥ तत्पर्य्यायः। चैत्रिकः २ मधुः ३। इत्यमरः। १।४।१५॥ चैत्री ४ कालादिकः ५। इति राजनिर्घण्टः॥ चैत्रकः ६ चित्रिकः ७। इति शब्दरत्नावली॥ *॥ तत्र जातफलम्।
"सत्कर्म्मशाली विनयी सुवेशो
भोगी सुखी स्वाद्वधुरान्नभोजी।
सत्सङ्गयुक्तो द्विजदेवभक्तो
भवेन्मनुष्यो मधुमासजन्मा॥"
इति कोष्ठीप्रदीपः॥ *॥
(चैत्रकृत्यानि तु वारुण्यशोकाष्टमी-श्रीरामनवमी-मदनत्रयोदशी-मदनचतुर्द्दशीप्रभृतीनि। एतेषां प्रकरणादिकं तत्तच्छब्दे द्रष्टव्यम्॥)
तत्र शिवव्रतं कर्त्तव्यम्। यथा,—
"चैत्रे मास्यथ माघे वा योऽर्च्चयेत् शङ्करं व्रती।
करोति नर्त्तनं भक्त्या वेत्रपाणिर्दिवानिशम्॥
मासं वाप्यर्द्धमासं वा दश सप्त दिनानि वा।
दिनमानं युगं सोऽपि शिवलोके महीयते॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥
चधुमास्य सन्यास इति गाजन् इति च भाषा॥

चैत्रकः, पुं, (चैत्र+इव। स्वार्थे कन्।) चैत्रमासः। इति शब्दरत्नावली॥

चैत्ररथं, क्ली, (चित्ररथेन गन्धर्व्वेण निर्वृत्तम्। "तेन निर्वृत्तम्।" ४। २। ६८। इत्यण्।) कुवेरस्योपवनम्। तत्तु चित्ररथगन्धर्व्वनिर्म्मितम्। इत्यमरः। १।१।७३॥ (यथा, रघुः। ५।६०।
"एको ययौ चैत्ररथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान्॥"
इदन्तु पीठस्थानानामन्यतमं। यथा, देवीभागवते। ७। ३०। ५८।
"मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे॥"
पुं, कुरुपुत्रविशेषः। यथा, महाभारते। १। ९४। ४९।
"अविक्षितमभिष्वन्तं तथा चैत्ररथं मुनिम्।
जनमेजयश्च विख्यातं पुत्रांश्चास्याष्टशुश्रुम॥")

चैत्रावली, स्त्री, (चैत्रं चैत्रमासं आ सम्यक्रूपेण परयन्मिलवतीति। आ+वर+णिच्+अच्। स्त्रियां ङीप्। रस्य लत्वम्।) चैत्री पूर्णिमा। ...तत्पर्य्यायः। मधुपूर्णिमा २ मधुरवल्ली ३ सुरवल्ली ४ वासन्ती ५ करवीरी ६। इति [illegible]

चैत्रिकः, पुं, (चित्रानक्षत्रयुक्ता [illegible] ऽस्मिन्। "विभाषा फाल्गुनी[illegible]।" इति पक्षे ठक्।) चैत्रमासः।

चैत्री, [न्] पुं, ([illegible] त्रिदशेऽस्मिन्। ग्रीष्मादित्वादिनिः।) इति राजनिर्घण्टः॥ (चित्रा+इन्। [illegible] इति च पाठः॥

चैद्यः, पुं, (चेदीनां जनपदानां राजा। [illegible] ष्यञ्।) शिशुपालः। स तु [illegible] इति जटाधरः॥ (यथा, माघे। २। [illegible]
"त्वया विप्रकृतश्चैद्यो [illegible]
चैरिराजवत्। इति पुराणम्।)
भूर्ज्ज। इति त्रिकाण्डशेषः॥

चोक्षः, त्रि, (चक्ष्यते उच्यते [illegible] चक्ष+कर्म्मणि घञ्। ततः [illegible] गीतः। शुचिः। (यथा, मनुः। १। [illegible]
"अवकाशेषु चोक्षेषु नदीतीरेषु चैव [illegible]
विविक्तेषु च तुष्यन्ति दत्तेन पितरः [illegible]
दक्षः। (यथा, महाभारते। १२। [illegible]
"अनीर्षुर्गुप्तदारः स्याच्चोक्षः [illegible]
तीक्ष्णः। मनोज्ञः। इति मेदिनी। ष, [illegible]

चोचं, क्ली, (प्रशस्तं चोचं त्वक् [illegible] "प्रशंसादिभ्योऽच्।" ५।२।१२७। गुड़त्वक्। इत्यमरः। २। ४। १३३।
[illegible]
इति वाभटे सूत्रस्थाने। १५। ४१। तेजपात इति ख्यातम्। इति वैद्य[illegible] पर्य्यायाः यथा,—
[illegible]
इति भावप्रकाशस्य पूर्व्वखण्डे उपक्षुक्तफलाविशिष्टम्। चोचा [illegible] तालफलम्। इति भरतः। [illegible] इति सारसुन्दरी॥ नारिकेलम्। वल्कलम्। चर्म्म। इति धरणी॥

चोचकं, क्ली, (चोच+स्वार्थे कन्। [illegible] त्वचा कायतीति। कै+कः।) वल्कलम्। शब्दरत्नावली॥

चोटी, स्त्री, शाटी। इति [illegible]

चोड़ः, पुं, (चुड़ति संवृणोति शरीरम्। [illegible] संवरणे+अच्।) प्रावरणम्। [illegible] इति मेदिनी। डे, १२॥

चोदना, स्त्री, (चोद्यते प्रवर्त्त्यतेऽनया [illegible] क्। चुदि+युच्। टाप् च।) विधि। [illegible] गीतायाम्। १८। १८।
"ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्म्मचोदना।" [illegible] प्रेरणा। यथा। चोदना लक्षणोऽर्थो धर्म्मः। [illegible] जैमिनिसूत्रम्॥ एकोद्दिष्टादिशब्दा[illegible] दर्शादि चोदना। इति स्मृतिः॥ [illegible]

चोदनागुड़ः, पुं, ([illegible] चिप्यते इति। गुड़+"इगुपधेति।" [illegible]

३५ । इति कः । क्रीडनयाले कन्दुकाणां छर्दुं-
प्रयप्रसिद्धसयास्य लघात्वम् ।) कन्दुकः । इति
त्रिकाण्डशेषः ॥

…, स्त्री, (चोदयति प्रेरयति चित्तं रसविशेषे
अनेनेति । चुद् + णिच् + ण्यत् ।) अद्भुतम् ।
…. । इति मेदिनी । ये, २३ ॥ (यथा, महा-
भारते । ५ । ४३ । ३४ ।
"सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च ।
अस्तेयं ब्रह्मचर्य्यञ्च तथासंग्रहमेव च ॥")

…, त्रि, (चोदयितुं प्रेरयितुं योग्यः । "अर्हे
कृत्यटचश्च ।" ३ । ३ । १६९ । इति यत् ।)
चोदनार्हः । प्रेरणयोग्यः । इति मेदिनी । ये,
२३ ॥ (यथा, महाभारते । ५ । ३८ । ७ ।
"नीवारमूलेङ्गुदशाकवृत्तिः
सुसंयता चात्मिकार्य्येषु चोद्यः ।
वने वसन्नतिथिष्वप्रमत्तो
धुरन्धरः पुण्यकृदेष तापसः ॥")

…पनं, क्ली, (चुप मन्दगमने + भावे ल्युट् ।) मन्दे-
गमनम् ॥

…रः, पुंस्त्री, (चोरयतीति । चुर + णिच् + पचा-
द्यच् ।) स्तेयकर्त्ता । तत्पर्य्यायः । चौरः २ दस्युः ३
तस्करः ४ प्रतिरोधी ५ मलिम्लुचः ६ स्तेनः ७
ऐकागारिकः ८ स्तेयः ९ प्रच्छन्नजनः १०
मोषकः ११ पाटच्चरः १२ परास्कन्दी १३
कुम्भिलः १४ खनकः १५ शङ्कितवर्णः १६
खानिकः १७ । इति शब्दरत्नावली ॥ प्रचुर-
पुरुषः १८ । इति त्रिकाण्डशेषः ॥ रूपुः १९
तक्वा २० रिभ्वा २१ रिपुः २२ रिक्वा २३
विहायाः २४ तायुः २५ वनर्गुः २६ हुरश्चित् २७
मलीवान् २८ मलिम्लुचः २९ अघशंसः ३०
वृकः ३१ । इति वेदनिघण्टौ ३ अध्यायः ॥
(यथा, देवीभागवते १ । १९ । ६ ।
"चोरेषु चौरबुद्धिस्ते साधुबुद्धिस्तु तापसे ।
स्वपरत्वं तवाप्यस्ति विदेहत्वं कथं नृप ! ॥")
…चण्डशटी । इति क्रमचन्द्रिकाधृतहड्डचन्द्रः ॥
गन्धद्रव्यविशेषः । यथा । चोरकुङ्कुमरोचनाः ।
इत्यष्टगन्धकथने आगमः ॥

चोरकः, पुं, (चोरो गन्धद्रव्यविशेषस्तद्वत् काय-
तीति । कै + कः ।) पृक्का । इति रत्न-
माला ॥ भिडिङ्ग इति भाषा । (चोर + स्वार्थे
कन् ।) सुगन्धिद्रव्यविशेषः । तत्पर्य्यायः ।
शङ्कितः २ खड्गः ३ दुष्पत्रः ४ क्षेमकः ५ रिपुः ६
चपलः ७ कितवः ८ धूर्त्तः ९ पटुः १० नीचः ११
निशाचरः १२ गणहासः १३ कोपनकः १४
चोरः १५ फलचोरकः १६ दुष्कुलः १७ ग्रन्थिलः १८
सुग्रन्थिः १९ पर्णचोरकः २० ग्रन्थिपर्णः २१
ग्रन्थिदलः २२ ग्रन्थिपत्रः २३ । (यथा, सुश्रुते
कल्पस्थाने ६ अध्याये ।
"चोरको वत्सकः कुष्ठं सर्व्वगन्धा सशर्करा ॥")
अस्य गुणाः । तीव्रगन्धत्वम् । उष्णत्वम् । तिक्त-
त्वम् । वातकफनाशासृग्व्रणाजीर्णक्रिमिदोष-
नाशित्वञ्च । इति राजनिर्घण्टः ॥

चोरपुष्पिका, स्त्री, (चोरपुष्पी + स्वार्थे संज्ञायां
वा कन् टाप् पूर्व्वह्रस्वश्च ।) चोरपुष्पी । इति
शब्दरत्नावली ॥ ("शङ्खिनी चोरपुष्पिका ।"
इति वैद्यकम् ॥)

चोरपुष्पी, स्त्री, (चोरो गन्धद्रव्यविशेषस्तद्वत् सुगन्धि
पुष्पमस्याः । "पाककर्णपर्णेति ।" ४ । १ । ६४ ।
इति ङीष् ।) वृक्षविशेषः । चोया इति चोर-
हुली इति च ख्याता इति भरतः ॥ तत्पर्य्यायः ।
शङ्खिनी २ केशिनी ३ । इत्यमरः ।२।४।१२६ ॥
चोरपुष्पिका ४ । इति शब्दरत्नावली ॥
(चोरा ५ । इति शब्दचन्द्रिका ॥)

चोरस्नायुः, स्त्री, (चोरस्य स्नायुरिव ।) काक-
नासालता । तस्करस्नायुरिति राजनिर्घण्ट-
दर्शनात् ॥

चोरा, स्त्री, (चोरो गन्धद्रव्यविशेषः तस्येव गन्धो-
ऽस्त्यस्य । अच् ततष्टाप् ।) चोरपुष्पी । इति
शब्दचन्द्रिका ॥

चोरिका, स्त्री, (चोरस्य भावः । मनोज्ञादि-
त्वात् वुञ् ।) चौरिका । चौर्य्यम् । इत्यमर-
टीकायां रायमुकुटः ॥

चोलः, पुं, (चोलयति समुच्छ्रयति स्त्रीणां वक्षः-
प्रदेशे इति । चुल उन्नतौ + अच् ।) कञ्चुलिका ।
काँचुलि इति भाषा ॥ (यथा, आनन्दलह-
र्य्याम् । ६६ । तम् ॥")
"निजां वीणां वाणी निचुलयति चोलेन निभृ-
तत्पर्य्यायः । कूर्पासकः २ । इत्यमरः ।२।६।११८॥
कञ्चुकः ३ । इति जटाधरः ॥ कञ्चुली ४ कञ्चु-
लिका ५ । इति शब्दरत्नावली ॥ स्त्रीणां निचोल
इति रमानाथः ॥ पुंस्त्र्योरपि चोला इति ख्यातौ
इति सुभूतिः ॥ गदादित्वात् चोली च । कूर्परः
कफोणिर्जांनु च तद्द्वयमस्यते क्षिप्यते अत्र
कूर्पासः घञमनीषादित्वाद्रलोपः ततः स्वार्थे
कः । इति भरतः ॥ * ॥ देशविशेषः । इति
शब्दरत्नावली । अधुना ताञ्जोर इति ख्यातः ॥
शस्त्रधारिवेदयागानधिकारिक्षत्त्रविशेषः । स तु
पूर्व्वं क्षत्त्रिय आसीत् सगरराजेनास्य धर्म्मनाशं
वैश्यान्यत्वञ्च चकार । इति हरिवंशः ॥

चोलकं, क्ली, (चोलयति आच्छादयतीति । चुल +
णिच् + अच् + स्वार्थे कन् । यद्वा चोल इव
कायति इति । कै + कः ।) वल्कलम् । इति
शब्दरत्नावली ॥

चोलकः, पुं, (चोल इव कायति इति । कै + कः ।)
वारबाणः । कवचम् । इति हारावली ।१९७॥
(देशभेदः । यथा कथासरित्सागरे । १९।९५।
"उल्लङ्घमाना कावेरी तेन संमर्द्दकारिणा ।
चोलकेश्वरकीर्त्तिश्च कालुष्यं ययतुः समम् ॥")

चोलकी, [न्] पुं, (चोलकमिवास्त्यस्य इति
इनिः ।) करीरः । नारङ्गः । किष्कुपर्व्व । इति
मेदिनी । ने, १८४ ॥

चोलण्डुकः, पुं, (चोलस्य अण्डुक इव शकन्ध्वादि-
त्वात् साधुः ।) शिरोवेष्टः । इति त्रिकाण्ड-
शेषः ॥

चोषः, पुं, (चोषते इति । चि + डः । ततः उष-
दाहे + अप् । चश्चासौ उषश्चेति ।) पार्श्व-
ज्वाला ॥ यथा,—
"हृत्कण्ठपीडनयुतं पवनेन पित्ता-
द्दृड्दाहचोषबहुलं सकफप्रसेकम् ।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजडताभिरथापरञ्च ॥
चोषः पार्श्वस्थितामिनेव सन्तापः ।" इति भाव-
प्रकाशः ॥ (यथाच, सुश्रुते । १ । ४२ ।
"यो गले चोषमुत्पादयति मुखवैशद्यं जनयति
भक्तरुचिं चापादयति हर्षञ्च स तिक्तः ॥")

चोस्कः, पुं, (चन्दयति आह्लादयति । चदि + डः ।
ततः स्कन्दति आक्रमते शत्रून् स्कुनाति आप्न-
वते वा । स्कन्दि स्कु वा + डः । ततः पृषोदरा-
दित्वे साधुः ।) सिन्धुवारदेशीयाश्वः । इति
त्रिकाण्डशेषः ॥

चौक्षं, त्रि, (चोक्ष एव इति । स्वार्थे अण् ।) मनो-
ज्ञम् । इति महाभारतम् ॥

चौरः, पुं स्त्री, (चोर एव प्रज्ञादिभ्योऽण् । यद्वा
चुरा शीलमस्य । "इति छत्रादिभ्यो णः ।" ४।४।
६२ । इति णः ।) चोरः । इत्यमरः ।२।१०।२४॥
(यथा, देवीभागवते । १ । १६ । ५९ ।
"चौरं वा तापसं वापि समानं मन्यते कथम् ॥"
असुरविशेषः । यथा, हरिवंशे । १०३ । १९ ।
"किरातीं चौरवसनां चौरसेनानमस्कृताम् ॥"
कविभेदः ।
"कविरमरः कविरमरुः कविश्चौरो मयूरकः ॥"
इत्युद्भटः ॥)
चोरपुष्पी । इति मेदिनी । रे, ३७ ॥ (चोर-
पुष्पीशब्देऽ विवरणमस्य ज्ञेयम् ॥) सुगन्धिद्रव्य-
विशेषः । इति हेमचन्द्रः ॥

चौरिका, स्त्री, (चोरस्य कार्य्यं भावो वा । "द्वन्द्व-
मनोज्ञादिभ्यश्च ।" ५ । १ । १३३ । इति वुञ् ।
टापि अत इत्वम् ।) चौर्य्यम् । इत्यमरः । २ ।
१० । २५ ॥ (यथा, मनुः । १ । ८२ ।
"चौरिकानृतमायाभिर्धर्म्मश्चापैति पादशः ॥")

चौरी, स्त्री, (चौर + ङीष् ।) चौर्य्यम् । इति
शब्दरत्नावली ॥ (गायत्त्रीरूपा महाशक्तिः ।
यथा, देवीभागवते । १२ । ६ । ४९ ।
"चन्द्रिका चन्द्रधात्री च चौरी चौरा च
चण्डिका ॥")

चौर्य्यं, क्ली, (चोरस्य कर्म्म भावो वा । "गुण-
वचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ ।
१२४ । इति ष्यञ् ।) चोरधर्म्मः । चोरी इति
चुरी इति च भाषा ॥ तत्पर्य्यायः । स्तैन्यम् २
स्तेयम् ३ चौरिका ४ । इत्यमरः । २ । १० । २५ ॥
चौरी ५ । इति शब्दरत्नावली ॥ चोरिका ६ ।
इत्यमरटीका ॥ (यथा, मनुः । ९ । २७६ ।
"सन्धिं छित्त्वा तु ये चौर्य्यं रात्रौ कुर्व्वन्ति तस्कराः ।
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत् ॥")

चौलकर्म्म, [न्] क्ली, (चूडाया इदम् । "तस्ये-
दम् ।" ४ । ३ । १२० । इत्यण् इस इत्वञ्च ,

तन्चौलमेव कर्म्म इति कर्म्मधारय: ।) चूडा-
कर्म्म । इति स्मृति: ॥

चौलुक्य:, पुं, (चुलकस्य गोत्रापत्यमिति । "गर्गा-
दिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।)
राजर्षिभेद: । इति हेमचन्द्र: । ३ । ७१२ ॥

चु, क च्यावे । सहने । इति कविकल्पद्रुम: ॥
(चुरां-परं-अकं-सकं च-सेट् ।) अन्त:स्थाद्यो-
पध: । क, च्यावयति । इति दुर्गादास: ॥

चु, ङ गत्याम् । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-
सकं-अनिट् ।) अन्त:स्थाद्योपध: । ङ, च्यवते ।
इति दुर्गादास: ॥

चुत्, इर् क्षरणे । इति कविकल्पद्रुम: ॥ (भ्वां-
परं-सकं-सेट् । क्वचित् अकं च ।) अन्त:स्थादि-
युत: । इर्, अच्युतत् अच्योतीत् । क्षर इह
आसेचनम् । च्योतति घृतं वह्नौ यज्वा । आसिच
तीत्यर्थ: । इति दुर्गादास: ॥ (यथाच, भट्टि: ।
६ । २८ ।

स्त्री, (जॄ+बाहुलकात् अड् । ततो ादित्वात् ङीष् ।) तृणविशेषः । तत्- य: । गर्म्मोटिका २ सुनाला ३ जया- । ४ । अस्या गुणाः । मधुरत्वम् । शीत- । सारकत्वम् । दाहरक्तदोषनाशित्वम् । त्वम् । पशूनां दुग्धदातृत्वञ्च । इति राज- ण्टः ॥

स्त्री, (जरयतीति । जॄष्+णिच्+लुः ।) । कृष्णजीरा । जीर्णे, त्रि । इति शब्द- ावली ॥ (श्वेतजीरकः । पर्य्याया यथा,— ाजी जरणं दीर्घं मागधी जीरकं सितम् ॥" इति वैद्यकरत्नमालायाम् ॥)

, पुं, (जरयतीति । जॄष्+णिच्+लुः ।) रकः । (यथा,— रको जरणो जाजी कणा स्याद्दीर्घजीरकः ॥" ति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) कृष्णजीरकः । सौवर्च्चललवणम् । इति शब्द- ावली ॥ कासमर्द्दः । इति राजनिर्घण्टः ॥

जरणा, स्त्री, (जरण+टाप् ।) कृष्णजीरकः । इति राजनिर्घण्टः ॥ (यथा, ऋग्वेदे ।१०।३७।६। "भद्रं जीवन्तो जरणामशीमहि ॥")

जरणद्रुमः, पुं, (जरणो जीर्णः द्रुमः ।) अश्व- कर्णवृक्षः । इति राजनिर्घण्टः ॥

जरण्डः, त्रि, (जीर्य्यतीति । जॄ+अण्डन् ।) जीर्णः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

जरत्, त्रि, (जॄ+अतृन्) वृद्धः । इत्यमरः ।२।६।४२॥ पुरातनम् । इति हेमचन्द्रः ॥

जरत्कारुः, पुं, मुनिविशेषः । तत्पर्य्यायः । यायावरः २ । इति त्रिकाण्डशेषः ॥ (एतन्निरुक्ति- र्यथा, महाभारते । १ । ४० । ३—४ ।
"जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम् ।
शरीरं कारु तस्यासीत्तत् स धीमाञ्छनैः शनैः ॥
क्षपयामास तीव्रेण तपसेत्यत उच्यते ।
जरत्कारुरिति ब्रह्मन् ! वासुकेर्भगिनी तथा ॥"
एतद्विवरणं यथा, देवीभागवते ।२।१२।८-६।
"जरत्कारुर्मुनिः शान्तो न चकार गृहाश्रमम् ।
तेन दृष्टा वने गर्त्ते लम्बमानाः स्वपूर्व्वजाः ॥
ततस्तमाहुः कुरु पुत्त्रदारान्
यथा च नः स्यात् परमा हि तृप्तिः ।
स्वर्गे प्रकामः खलु दुःखमुक्ता
वयं सदाचारयुते सुते वै ॥
स तानुवाचाथ लभे सनामा-
मयाचितां चातिवशानुगाञ्च ।
तदा गृहारम्भमहं करोमि
ब्रवीमि तथ्यं मम पूर्व्वजा वै ॥
इत्युक्ता तान् जरत्कारुर्गतस्तीर्थान् प्रति द्विजः ॥"
अथ भाचाभिशप्तो वासुकिः ब्रह्मोपदेशात् स्वभगिनीं जरत्कारुमेनमर्पयामास । तद्यथा, तत्रैव । २ । १२ । ३५—४५ ।
"वासुकिस्तु तदाकर्ण्य वचनं ब्रह्मणः शिवम् ।
वनं गत्वा सुतां तस्मै ददौ विनयपूर्व्वकम् ॥
सनामां तां मुनिर्ज्ञात्वा जरत्कारुरुवाच तम् ।
अप्रियं मे यदा कुर्य्यात्तदा तां सन्त्यजाम्यहम् ॥
वाग्बन्धं तादृशं कृत्वा मुनिर्जग्राह तां स्वयम् ।
दत्त्वा च वासुकिः कामं भवनं स्वं जगाम ह ॥
कृत्वा पर्णकुटीं शुभ्रां जरत्कारुर्महावने ।
तया सह सुखं प्राप रममाणः परन्तप ! ॥
एकदा भोजनं कृत्वा सुप्तोऽसौ मुनिसत्तमः ।
भगिनी वासुकेस्तत्र संस्थिता वरवर्णिनी ॥
न सम्बोधयितव्योऽहं त्वया कान्ते ! कथञ्चन ।
इत्युक्ता तु गतो निद्रां मुनिस्तां सुदतीं तदा ॥
रविरस्तगिरिं प्राप्तः सन्ध्याकाल उपस्थिते ।
किं करोमि न मे शान्तिस्त्यक्ष्यति बोधितः पुनः ॥
धर्म्मलोपभयाद्भीता जरत्कारुरचिन्तयत् ।
नोचेत् प्रबोधयाम्येनं सन्ध्याकालो वृथा व्रजेत् ॥
धर्म्मनाशाद्वरं त्यागस्तथापि मरणं ध्रुवम् ।
धर्म्महानिर्नराणां हि नरकाय भवेत् पुनः ॥
इति सञ्चिन्त्य सा बाला तं मुनिं प्रत्यबोधयत् ।
सन्ध्याकालोऽपि सञ्जात उत्तिष्ठोत्तिष्ठ सुव्रत ! ॥
उत्थितोऽसौ मुनिः कोपात्तामुवाच प्रभाम्यहम् ।
त्वन्तु भ्रातृगृहं याहि निद्राविच्छेदकारिणी ॥
वेपमानाब्रवीद्वाक्यमित्युक्ता मुनिना तदा ।
भ्रात्रा दत्ता यदर्थं तत् कथं स्यादमितप्रभ ! ॥
मुनिः प्राह जरत्कारुं तदस्तीति निराकुलः ॥"
अस्य पुत्त्रः आस्तीकनामा मुनिप्रवरः । योऽसौ जनमेजयं गत्वा सर्पसत्रान् निवारयामास । जरत्कारुमुनेर्विशेषविवरणन्तु महाभारते आदिपर्व्वणि ४४—४८ अध्यायेषु द्रष्टव्यम् ॥)

जरत्कारुः, स्त्री, मनसादेवी । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । २ । १२ । ४७ ।
"मुनिः प्राह जरत्कारुं तदस्तीति निराकुलः ॥")

जरत्कारुप्रिया, स्त्री, (जरत्कारोः स्वनामख्यातस्य मुनेः प्रिया ।) मनसादेवी । इति शब्दरत्नावली ॥

जरती, स्त्री, (जरत्+"उगितश्च ।"४ । १ । ६ । इति ङीप् ।) वृद्धा । इति राजनिर्घण्टः ॥

जरद्गवः, पुं, (जरंश्चासौ गौश्चेति । "गोरतद्धितलुकि ।"५ । ४ । ९२ । इति टच् ।) जीर्णवृषः । तत्पर्य्यायः । वृद्धोक्षः २ । इत्यमरः । २ । ९ । ६१ ॥ (यथा, पञ्चतन्त्रे । ४ । ८४ ।
"अकृत्य पौरुषं या श्रीः किं तयापि सुभोग्यया ।
जरद्गवः समश्नाति दैवादुपगतं तृणम् ॥"
जरन् क्षीयमाणो गौर्वृषरूपो धर्म्मः । धर्म्मरूपजीर्णवृषः । यथा, महाभारते । १३।९३।६८ ।
"नैतस्येह यथास्माकं शश्वच्छास्त्रं जरद्गवः ।
अलसः क्षुत्परो मूढस्तेन पीवाज्जुना सह ॥")
गृध्रपक्षिविशेषः । यथा,—
"अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्ज्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥"
इति हितोपदेशे मित्रलाभपरिच्छेदः ॥

जरन्, पुं, (जरतीति । जॄ+शतृ ।) वृद्धः । इति राजनिर्घण्टः ॥
("वान्तमात्रे जरत् पित्तं शूलमाशु व्यपोहति ॥"
इति माधवकृतरुग्विनिश्चये शूलाधिकारे ॥)

जरन्तः, पुं, (जीर्य्यतीति । जॄ+"तृभिशृभ्यो झच् ।"उणां ।३।१२६। इति झच् ।) महिषः । वृद्धः । इति त्रिकाण्डशेषः ॥

जरमानः, पुं, (जीर्य्यति जरायुक्तो भवतीति । जॄ वयोहानौ+"छन्दस्यसानच् शुजॄभ्याम् ।" उणां । २ । ८६ । इति असानच् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

जरा, स्त्री, (जीर्य्यत्यनया । जॄ+"षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । "ऋदृशोऽङि गुणः ।" ७ । ४ । १६ । इति गुणः ।) वयःकृतदेहधर्म्मविशेषावस्थाभेदः । वार्द्धक्यम् ।
"जीर्य्यत्यनया जरा जॄ ष वयोहानौ षित्वात् ङः ऋदृशोर्ङिति गुणः ।" इत्यमरटीकायां भरतः ॥
तत्पर्य्यायः । विस्रसा २ । २ । [illegible] ।६।४१ ॥
सा तु कालकन्या । यथा
"कालकन्या जरा [illegible]
[illegible]

एषां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः ।
मृत्युकन्यासुताश्चैव जरा तस्याश्च कन्यका ।
जरा च भ्रातृभिः सार्द्धं शश्वद्भ्रमति भूतलम् ॥
एते चोपायवेत्तारं न गच्छन्ति च संयतम् ।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः ॥
चक्षुर्जलञ्च व्यायामः पादाधस्तैलसेवनम् ।
कर्णयोर्मूर्द्ध्नि तैलञ्च जराव्याधिविनाशकम् ॥
वसन्ते भ्रमणं वह्निसेवां स्वल्पां करोति यः ।
बालाञ्च सेवते काले जरा तं नोपगच्छति ॥
स्नातशीतोदकस्नायी सेवते चन्दनद्रवम् ।
नोपयाति जरा तञ्च निदाघेऽनिलसेविनम् ॥
प्रावृड्युष्णोदकस्नायी घनतोयं न सेवते ।
समये च समाहारी जरा तं नोपगच्छति ॥
शरद्रौद्रं न गृह्णाति भ्रमणन्तत्र वर्ज्जयेत् ।
स्नानस्नायी समाहारी जरा तं नोपतिष्ठते ।
स्नातस्नायी च हेमन्ते काले वह्निं निषेवते ।
भुङ्क्ते नवान्नमुष्णञ्च जरा तं नोपगच्छति ॥
शिशिरेऽशुकवह्निञ्च नवोष्णान्नञ्च सेवते ।
य उष्णोष्णोदकस्नायी जरा तं नोपगच्छति ॥
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति ॥
भुङ्क्ते यदन्नं क्षुत्काले तृष्णायां पीयते जलम् ।
नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति ॥
दधि हैयङ्गवीनञ्च नवनीतं तथा गुडम् ।
नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति ॥
शुष्कमांसं स्त्रियं वृद्धां बालार्कं तरुणं दधि ।
संसेवन्ते जरा याति प्रहृष्टा भ्रातृभिः सह ॥
रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम् ।
तानुपैति जरा हृष्टा भ्रातृभिः सह सुन्दरि ! ॥
रजस्वला च कुलटा चावीरा जारदूतिका ।
शूद्रयाजकपत्नी या ऋतुहीना च या सति ! ॥
यो हि तासामन्नभोजी ब्रह्महत्यां लभेत्तु सः ।
तेन पापेन सार्द्धं सा जरा समुपगच्छति ।
पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम् ।
पापं व्याधिजराबीजं विघ्नबीजञ्च निश्चितम् ॥
पापेन जायते व्याधिः पापेन जायते जरा ।
पापेन जायते दैन्यं दुःखं शोको भयङ्करः ॥
तस्मात् पापं महावैरं दोषबीजममङ्गलम् ।
भारते सततं सन्तो नाचरन्ति भयातुराः ॥
स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम् ।
गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च ॥
व्रतोपवासयुक्तञ्च सदा तीर्थनिषेवकम् ।
रोगा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः ॥
इमान् जरा न सेवेत व्याधिसंघश्च दुर्ज्जयः ।
कर्म्म यो दैवमतये चापि मत्ते चरिष्यति ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे । १ । १६ । ३३—५१ ॥
जराया स्तौत्यं यथा, मार्कण्डे १८६ अध्याये ।
“श्मशानभूमेः कृष्णां प्रयान्तीमनुयान्तिनम् ।
क्रीडन्तं मातलाघं नरं कुन्दाक्षधारिणम् ॥
दृष्ट्वैव महादेव ! जरामरणवर्जितः ।
महामोहमये हृदयं नित्यनित्यं नमाम्यहम् ।
कदापि सौन्दर्यं नर ! जरा नश्यति संजल्पम् ॥”

अपिच ।
“शङ्खीकृतं भृङ्गराजस्य चूर्णं
तिलार्द्धकं चामलकार्द्धकञ्च ।
सशर्करं भक्षयते गुडेर्व्वा
न तस्य रोगो न जरा न मृत्युः ॥
अस्य प्रयोगमनरहितो मत्तमातङ्गगामी
मुक्तो वाग्मी श्रवणसहितो दूरशब्दानुसारी ।
नीरुग्दृष्टिर्भवति पलितो नीलनीलालकेशो
जीर्णा दन्ताः पुनरपि नवाः क्षीरगौरा भवन्ति ॥”
इति भैषज्यरत्नावल्यां भृङ्गराजादिचूर्णम् ॥
(“क्षैव्यं जरासम्भवं हि प्रवक्ष्याम्यथ तत् शृणु ॥
जघन्यमध्यप्रवरं वयस्त्रिविधमुच्यते ।
अथ प्रवयसां शुक्रं प्रायशः क्षीयते नृणाम् ॥
रसादीनां संक्षयाच्च तथैवावृष्यसेवनात् ।
बलवीर्य्येन्द्रियाणाञ्च क्रमेणैव परिक्षयात् ॥
परिक्षयादायुषश्चाप्यनाहारात् श्रमात् क्लमात् ।
जरासम्भवजं क्लैव्यं इत्येतैर्हेतुभिर्नृणाम् ॥
जायते तेन सोऽत्यर्थं क्षीणधातुः सुदुर्ब्बलः ।
विवर्णो विह्वलो दीनः क्षिप्रं व्याधिमवाप्नुते ॥
एतज्जरासम्भवं हि ।”
“जरासम्भवजे क्लैव्ये क्षयजे चैव कारयेत् ।
स्नेहस्वेदोपपन्नस्य सस्नेहं शोधनं हितम् ॥
क्षीरसर्पिर्व्वृष्ययोगा वस्तयश्चैव यापनाः ।
रसायनप्रयोगाश्च तयोर्भेषजमुच्यते ॥”
इति चरके चिकित्सितस्थाने त्रिंशोऽध्याये ॥*॥
“या च भार्य्या विरूपाक्षी कश्मला कलहप्रिया ।
वचनोत्तरवक्त्री च सा जरा न जरा जरा ॥”
इति चाणक्यम् ॥*॥)
क्षीरिकावृक्षः । इति शब्दचन्द्रिका ॥ राक्षसी-विशेषः । यथा, श्रीभागवते ।
“अन्यस्यामपि भार्य्यायां शकले द्वे बृहद्रथात् ।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥”
जरातुरः, त्रि, (जरया आतुरः ।) जीर्णः । जरारोगग्रस्तः । इति शब्दमाला ॥ (यथा, नैषधे । १ । १३५ ।
“मदेकपुत्त्रा जननी जरातुरा
नवप्रसूतिर्व्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्द्दय-
न्नहो विधे ! त्वां करुणा रुणद्धि न ॥”)
जरापुष्टः, पुं, (जरया राक्षस्या पुष्टः ।) जरासन्धः । इति शब्दरत्नावली ॥
जराभीरुः, पुं, (जरातो भीरुः ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥ जरामयशीले, त्रि ॥
जरायणिः, पुं, (जराया राक्षस्या अपत्यम् । जरा + बाहुलकात् फिञ् । तत्प्राणजीवकत्वात् तथात्वम् ।) जरासन्धः । इति शब्दरत्नावली ॥
जरायुः, पुं, (जरामेतीति । जरा + इण् + “किञ्जरयोः श्रिणः ।” उणा० १ । ४ । इति ञुण् ।) येन वेष्टितो गर्भः कुक्षौ तिष्ठति सः । गर्भवेष्टनचर्म्म । फुल इति भाषा । तत्पर्य्यायः । गर्भाशयः २ उल्बम् ३ कललः ४ । इत्यमरः । २ । ६ । ३८ ॥

“या तु चर्म्माकृतिः सूक्ष्मा जरायुः
इति महाभारते
व्यभिचारदृष्टः । इति राजनिर्घण्टः ।
जरायुजः, त्रि, (जरायौ जायते इति । जन + डः ।) गर्भाशयजातः । मनु ।
इत्यमरः । ३ । १ । ५० ॥
“या तु चर्म्माकृतिः सूक्ष्मा
शुक्रशोणितयोर्योगस्तस्मिन् संवर्तते
तत्र गर्भो भवेद्‌यस्मात्तेन प्रोक्तो जरा
इति महाभारते
जरासन्धः, पुं, (जरया तदाख्य-राक्षस्या कृतः सन्धो यस्य ।) चन्द्रवंशीयराजविशेषः । स तु बृहद्रथस्य पुत्त्रः । कंसश्वशुरः इन्द्रदुर्द्धर्षः । अस्य नामकरणं यथा,—
“अन्यस्यामपि भार्य्यायां शकले द्वे बृहद्रथात् ।
ते मात्रा बहिरुत्सृष्टे जरया
[illegible]
तत्पर्य्यायः । बार्हद्रथिः २ । [illegible]
(अस्य जन्मविवरणं [illegible] अध्याये तथा मृत्युविवरणं तत्रैव द्रष्टव्यम् । अयं हि [illegible] स्यावतारः । यथा, महाभारते । [illegible]
“विप्रचित्तिरिति [illegible]
जरासन्ध इति ख्यातः स आसीन्मनु-
धृतराष्ट्रपुत्त्राणामन्यतमः । यथा, १ । ११७ । ८ ।
“दृढ़सन्धो जरासन्धः सत्यसन्धः [illegible]
जरासन्धजित्, पुं, (जयतीति । जि + क्विप् । जरासन्धस्य जित् जेता ।) भीमः । इति त्रिकाण्डशेषः ॥
जरी, [न्] त्रि, (जराऽस्त्यस्येति । जरा + इनिः ।) वृद्धः । इति हेमचन्द्रः । ३ । ४ ॥
जरूथं, क्ली, (जीर्य्यतीति । जॄ + “जॄवृभ्यामूथन् ।” उणा० । २ । ६ ।) मांसम् । इति त्रिकाण्डशेषः ॥
जर्च्च, श उक्तौ । भर्त्सने । इति [illegible] (तुदां-परं-सकं-सेट् ।) श, जर्च्चति । शुधस्यानरहितानां तुदादिपठित-धातूनां चादीयोरिति नुमो विभाषा इति भेदश्च । भर्त्सनम् । इति दुर्गादासः ।
जर्च्छ, श उक्तौ । भर्त्सि । इति क[illegible] (तुदां-परं-सकं-सेट् ।) श, जर्च्छति । भर्त्सनम् । इति दुर्गादासः ।
जर्ज्ज, श वाचि । भर्त्सि । इति क[illegible] (तुदां-परं-सकं-सेट् ।) श, जर्ज्जति । भर्त्सनम् । इति दुर्गादासः ।
जर्ज्जरः, पुं, (जर्ज्जति सगुणीकायतीति । जर्ज्ज + बाहुलकात् अरः ।) इन्द्र-ध्वजः । शत्रून् तर्ज्जयतीति ।) शक्रध्वजः । भिन्द्यते इति । कर्म्मणि बहुवच-

रे, त्रि। इति मेदिनी। रे, १५७॥
। यथा, महाभारते। ३।११।६५।
गर्भरसर्वाङ्गं यावितयनामरम्।
भामयामाम वावरमेदसुवाच च॥"
र्तं। यथा, माघे। ४।२३।
ञ्त्वा पुंवत्पातमुच्चैर्भृगुभ्यो
ढि गावृत्या जर्ज्जरा निर्झरौघाः॥")
ः, त्रि, (जर्यति जीर्णो भवतीति। जर्ज्ज
कर्फरीकादयश्च।" उणां ४।२०। इति
प्रत्ययेन साधुः।) बहुच्छिद्रदयम्। जरा-
। इति मेदिनी। के, १९८॥
: भर्त्सने। उक्तौ। इति कविकल्पद्रुमः।
-परं-सकं-सेट्।) ग, जर्झति जर्झती।
वत्सर्ज्जनम्। इति दुर्गादासः॥
, (जीर्य्यति जीर्णो भवतीति। जॄ+"कृदृ-
दृभ्यनीति।" उणां ३।१०। इति नन्।)
:। दृषः। इति मेदिनी। ये, १३॥ जीर्ण,
। इति हेमचन्द्रः॥
, (जायतेऽस्मादिति। जन+बाहुलकात्
यपेन साधुः।) योनिः। इस्ती। इति
उणादिवृत्तिः॥ (अत्र जतुरित्येव
टो भवितुं युक्तः॥)
:, पुं, वनोद्भवतिलः। इति राजनिर्घण्टः
चन्द्रश्च॥ (यथा, विष्णुपुराणे। १।६।२५।
माकालश्च नीवारा जर्तिलाः सगवेधुकाः।
वेणुयवाः प्रोक्तास्तद्वत् मर्कटका मुने॥")
पुं, (जायते यस्मादिति। जन+"जनेस्तु
।" उणां ५।३६। इति तुः रेफश्चान्ता-
:।) योनिः। इस्ती। इत्युणादिकोषः॥
भर्म्मे। रवे। इति कविकल्पद्रुमः॥
-परं-सकं-सेट्।) रेफयुक्तः दन्त्यवर्गाद्यो-
। चर्त्यति। भर्म्मा भर्त्सनमुक्तिश्च। इति
दासः॥
:, पुं, अरण्यतिलः। इति राजनिर्घण्टः॥
पिधाने। इति कविकल्पद्रुमः॥ (चुरां-
-सकं-सेट्।) पिधानमाच्छादनम्। क,
लयति चन्द्रं मेघः। इति दुर्गादासः॥
धान्ये। इति कविकल्पद्रुमः॥ (भ्वां-
-सकं-सेट्। अकं इति केचित्।) घ, जालः
। धीयते अनेनेति धानं तस्य भावः धान्यं
गोपयोगिक्रिया। जलति लोकान् जलम्।
यतीयर्थः। धीयते आच्छादते अनेनेति
तस्य भावः धान्यं आच्छादनक्रिया।
ति जालेन मत्स्यान् जालिक इति वा।
न्दभट्टस्तु धनस्य भावः धान्यं सञ्चयः।
ति धनी सञ्चयः स्यादित्यर्थः इत्याह। इति
दासः॥
, गोकलनम्। ह्रीवेरम्। इति मेदिनी।
१८॥ (यथा, भावप्रकाशे पूर्वखण्डे-
रे।
लं चकाचागुरुचन्द्रककेसरम्॥" इति॥ * ॥
ति धीयति लोकान् जलति आच्छादयति

भूम्यादीनिति वा। जल+पचाद्यच्।) पानी-
यम्। पञ्चभूतान्तर्गतभूतविशेषः। अस्य धर्म्माः।
रूपं द्रवत्वं प्रत्यक्षयोगित्वञ्च। इदं गुरुरस-
विशिष्टञ्च। अस्य गुणाश्चतुर्दश। यथा,—
स्पर्शः १ संख्या २ परिमितिः ३ पृथक्त्वम् ४
संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८
वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२
रसः १३ स्नेहः १४। अस्य वर्णः शुक्लः रसो
मधुरः स्पर्शः शीतलः। स्नेहः द्रवत्वं स्वाभा-
विकगुणः। परमाणुजलं नित्यम्। सावयव-
जलं अनित्यम्। अनित्यजलं त्रिविधं यथा।
देहं अयोनिजम् १ इन्द्रियं रसनम् २ विषयः
सिन्धुहिमादिः ३। इति भाषापरिच्छेदः॥ * ॥
तस्योत्पत्तिर्यथा,—
"रूपमात्राद्विकुर्व्वाणात्तेजसो दैवचोदितात्।
रसमात्रमभूत्तस्मादम्भो जिह्वारसग्रहः॥" * ॥
तस्य लक्षणं यथा,—
"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्।
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः॥"
इति श्रीभागवतम्॥ * ॥
"यथा शैत्यं तथा क्लेदो द्रवत्वं स्नेहसौम्यता।
जिह्वाविस्यन्दनञ्चापि भौमानां श्रपणं तथा॥
चतुर्थमापो विज्ञेयं जिह्वाध्यात्मं प्रचक्षते।
अधिभूतं रसस्तत्र सोमस्तत्राधिदैवतम्॥"
इत्याश्वमेधिकपर्व्व॥ * ॥
तत्पर्य्यायः। आपः २ स्त्रीलिङ्गबहुवचनान्तो-
ऽयम्। वाः ३ वारि ४ सलिलम् ५ कमलम् ६
पयः ७ कीलालम् ८ अमृतम् ९ जीवनम् १०
भुवनम् ११ वनम् १२ कबन्धम् १३ उदकम् १४
पाथः १५ पुष्करम् १६ सर्व्वतोमुखम् १७ अम्भः
१८ अर्णः १९ तोयम् २० पानीयम् २१ नीरम् २२
क्षीरम् २३ अम्बु २४ शम्बरम् २५ मेघपुष्पम् २६
घनरसः २७। इत्यमरः।१।१०।३॥ आपः २८
सान्तस्त्रीवोऽयम्। सरिलम् २९ सलम् ३० जड़म्
३१ कम् ३२ अन्नम् ३३ कमन्धम् ३४ उदम् ३५
दकम् ३६ नारम् ३७ शम्बरम् ३८ अभ्रपुष्पम्
३९ घनरसम् ४० घृतम् ४१। इति भरतः॥
पीप्पलम् ४२ कुशम् ४३ विषम् ४४ काण्डम् ४५
सवरम् ४६ सरम् ४७ कृपीटम् ४८ चन्द्रोरसम् ४९
सदनम् ५० कर्व्वुरम् ५१ व्योम ५२ सम्बः ५३
सरः ५४ इरा ५५ वाजम् ५६ तामरम् ५७।
इति धटाधरः॥ कम्बलम् ५८ स्यन्दनम् ५९ सम-
लम् ६० जलपीथम् ६१ ऋतम् ६२ ऊर्जम् ६३
सर्व्वम् ६४ कोमलम् ६५ सोमम् ६६। इति
शब्दरत्नावली॥ * ॥ तस्य गुणाः। ईषत् कषाय-
त्वम्। मधुरत्वम्। क्लेदित्वम्। शीतलत्वम्।
तृष्णानाशित्वम्। वमनकारत्वम्। शरीरेन्द्रिय-
तर्पकत्वञ्च॥ * ॥ सुगन्धस्य तस्य गुणाः। अस्वच्छ-
रसत्वम्। सुशीतलत्वम्। तर्पनाशित्वञ्च॥ * ॥
स्वच्छस्य तस्य गुणाः। लघुत्वम्। पुष्टत्वम्।
गुणवत्त्वञ्च॥ * ॥ मर्व्वशैमालकर्दमदुष्टजल-
गुणाः। विष्टम्भित्वम्। दोषप्रदत्वम्। स्निग्ध-

त्वम्। विवर्णत्वम्। विरसत्वम्। सान्द्रत्वम्।
दुर्गन्धित्वम्। अहितकारित्वञ्च॥ * ॥ दिवा-
सूर्य्यकिरणरात्रिचन्द्रकरणिमन्दुष्टजलगुणाः। अरू-
क्षत्वम्। अनभिष्यन्दित्वम्। गगनाम्बुतुल्य-
त्वञ्च॥ * ॥ साधारणजलगुणाः। हृद्यत्वम्।
दीपनत्वम्। मधुरत्वम्। लघुत्वञ्च॥ * ॥ वर्षा-
कालीनजलगुणाः। गुरुत्वम्। अभिष्यन्दित्वम्।
मधुरत्वम्। सारकत्वञ्च॥ * ॥ शरत्कालीन-
जलगुणाः। अनभिष्यन्दित्वम्। लघुत्वञ्च॥ * ॥
हैमन्तिकजलगुणाः। स्निग्धत्वम्। बल्यत्वम्।
वृष्यत्वम्। हितकारित्वम्। गुरुत्वञ्च॥ * ॥
शैशिरजलगुणः। कफवातनाशित्वम्। हैम-
न्तिकात् किञ्चिल्लघुत्वञ्च॥ * ॥ वासन्तिक-
जलगुणाः। कषायत्वम्। मधुरत्वम्। वल्य-
त्वम्। रूक्षत्वञ्च॥ * ॥ ग्रैष्मिकजलगुणाः।
अनभिष्यन्दित्वम्॥ * ॥ शीतलजलगुणाः।
मदमूर्च्छाच्छर्द्दिपित्तज्वरश्रमक्लमभ्रमदाहमदा-
त्ययविषनाशित्वम्॥ * ॥ पवनाहतधारापात-
जलगुणाः। विष्टम्भित्वम्। दुर्जरत्वञ्च॥ * ॥
यत् अन्तर्वाष्पशीतलं तत् उष्णशीतं तस्य गुणः।
त्रिदोषनाशित्वम्॥ * ॥ जलस्य विशुद्धकरण-
प्रकारः। हेमन्ते शिशिरे पादहीनं वसन्ते
पादस्थितं ग्रीष्मशरत्कालयोरर्द्धावशेषितं वर्षा-
स्वष्टावशेषितम्। दिवासिद्धं जलं रात्रौ गुरु
रात्रिसिद्धं दिवागुरु॥ * ॥ पुष्पसुवासितशुक्ल-
वस्त्रपूतनूतनघटपात्रस्थजलगुणः। मङ्गलरुचि-
कारित्वम्॥ * ॥ अजीर्णे जलमौषधं जीर्णे
बलप्रदं आहारकाले आयुर्जनकं भुक्तान्नोपरि
रात्रौ न पेयम्॥ * ॥ रात्रिशेषे जलपानगुणाः।
कासश्वासातीसारज्वरवमथुकटीकोटकुष्ठमूत्रा-
घात-उदरार्शःश्वयथुगलशिरःकर्णनासाचक्षु-
रोगवातपित्तकफक्षयजरोगनाशित्वम्॥ * ॥
मेघशून्यरात्रिशेषे नासिकारन्ध्रेण जलपान-
गुणाः। बुद्धिकारित्वम्। चक्षुर्हितत्वम्। पली-
पलितसर्व्वरोगनाशित्वञ्च॥ * ॥
"जलञ्चतुर्व्विधं प्राहुरन्तरीक्षोद्भवं बुधाः।
धारञ्च कारकञ्चैव तौषारं हैममित्यपि॥"
इति राजनिर्घण्टः॥ * ॥
तृषिताय रोगिणेऽपि जलं देयं यथा,—
"पानीयं प्राणिनां प्राणास्तदायत्तं हि जीवनम्।
तस्मात् सर्व्वास्ववस्थासु न क्वचिद्वारि वार्य्यते॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्।
तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
तस्मात्सर्व्वावस्थासु हि दातव्यं भिषजा जलम्॥"
इति राजवल्लभः॥ * ॥
"मार्दवं घटमुत्पाद्य भाजनं पूरयेज्जलम्।
तज्जलं मदिरातुल्यं भास्करं सुरया समम्॥"
इति कर्म्मलोचनम्॥ * ॥
तस्य दानमाहात्म्यं यथा,—
"यद्गृहे दृश्यते प्रपा दशा भवन्मन।
प्राणदानाद्धि परमं न दानमिह विद्यते॥

अन्नं चापि प्रभवति पानीयात् कुरुसत्तम ।
नीरजातेन हि विना न किञ्चित् संप्रवर्त्तते ॥
नामौषध्यो महाराज ! वीरुधश्च जलोद्भवाः ।
यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते ! ॥
तस्मात् पानीयदानाद्धि न परं विद्यते क्वचित् ।
तच्च दद्यान्नरो नित्यं यदीच्छेद्भूतिमात्मनः ॥
धन्यं यशस्यमायुष्यं जलदानमिहोच्यते ।
शत्रूंश्चाप्यधि कौन्तेय ! सदा तिष्ठति तोयदः ॥
सर्व्वकामानवाप्नोति कीर्त्तिञ्चैवेह शाश्वतीम् ।
प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते ॥
तोयदो मनुजव्याघ्र ! स्वर्गं गत्वा महाद्युते ! ।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः ॥"

इति महाभारते दानधर्म्मः ॥ * ॥

"एकहस्तेधृतं तोयमभक्ष्यं सर्व्वसम्मतम् ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥ * ॥

"उद्धृतं वामहस्तेन यत्तोयं पिबति द्विजः ।
सुरापानेन तुल्यं स्यात्मनुराह प्रजापतिः ॥"

इति मनुः ॥

तस्य वेदोक्तपर्य्यायाः । अर्णः१ क्षोदः२ क्षद्म३ नभः४ अम्भः५ कबन्धम्६ सलिलम्७ वाः८ वनम्९ घृतम्१० मधु११ पुरीषम्१२ पिप्पलम्१३ क्षीरम्१४ विषम्१५ रेतः१६ कशः१७ जन्म१८ वृबूकम्१९ बुसम्२० तुग्र्या२१ बुर्बुरम्२२ सुक्षेम२३ धरुणम्२४ सुरा२५ अररिन्दानि२६ ध्वस्मन्वत्२७ जामि२८ आयुधानि२९ क्षपः३० अहिः३१ अक्षरम्३२ स्रोतः३३ तृप्तिः३४ रसः३५ उदकम्३६ पयः३७ रसः३८ भेषजम्३९ सहः४० शवः४१ यहः४२ ओजः४३ सुखम्४४ क्षत्रम्४५ आवयाः४६ शुभम्४७ यादुः४८ भूतम्४९ भुवनम्५० भविष्यत्५१ आपः५२ महत्५३ व्योम५४ यशः५५ महः५६ सर्णीकम्५७ स्वृतीकम्५८ सतीनम्५९ गहनम्६० गभीरम्६१ गम्भनम्६२ ईम्६३ अन्नम्६४ हविः६५ सद्म६६ सदनम्६७ ऋतम्६८ योनिः६९ ऋतस्ययोनिः७० सत्यम्७१ नीरम्७२ रयिः७३ सत्७४ पूर्णम्७५ सर्व्वम्७६ अक्षितम्७७ बर्हिः७८ नाम७९ सर्पिः८० अपः८१ पवित्रम्८२ अमृतम्८३ इन्दुः८४ हेम८५ स्वः८६ सर्गाः८७ शम्बरम्८८ अभ्वम्८९ वपुः९० अम्बु९१ तोयम्९२ तूयम्९३ कृपीटम्९४ शुक्रम्९५ तेजः९६ स्वधा९७ वारि९८ जलम्९९ जलाषम्१०० । इत्येकशतमुदकनामानि । इति वेदनिघण्टौ १ अध्यायः ॥ * ॥

अस्य गुणाः ।
"पानीयं श्रमनाशनं क्लमहरं मूर्च्छापिपासापहं
तन्द्राच्छर्द्दिविबन्धहृद्बलकरं निद्राहरं तर्पणम् ।
हृद्यं गुप्तरसं ह्यजीर्णशमनं नित्यं हितं शीतलं
लघ्वच्छं रसकारणं निगदितं पीयूषवज्जीवनम् ॥"
अथ जलस्य भेदाः ।
"पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ।
दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम् ।
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम् ॥"
तत्र धारस्य लक्षणं गुणाश्च ।
"धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
शिलायां वा सुधायां वा धौतायां पतितञ्च यत् ॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते ।
भाजने मृण्मये चापि स्थापितं धारमुच्यते ॥
धारनीरं त्रिदोषघ्नमनिर्द्देश्यरसं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्लादि जीवनम् ॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् ।
तृष्णां हरति तत्पथ्यं विशेषात् प्रावृषि स्मृतम् ॥"
अथ धाराजलस्य भेदौ ।
"धाराजलञ्च द्विविधं गाङ्गसामुद्रभेदतः ॥"
तत्र गाङ्गसामुद्रयोर्लक्षणं गुणाश्च ।
"आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ।
मेघैरन्तरिता वृष्टिं कुर्व्वन्तीति वचः सताम् ॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ।
सर्व्वथा तज्जलं देयं तथैव चरके वचः ॥
स्थापितं हैमजे पात्रे राजते मृण्मयेऽपि वा ।
शाल्यन्नं येन संसिक्तं भवेदक्लेदिवर्णवत् ॥
तद्गाङ्गं सर्व्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ।
तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम् ।
विस्रञ्च दोषलं तीक्ष्णं सर्व्वकर्म्मसु गर्हितम् ।
सामुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत् ॥
यतोऽगस्त्यस्य दिव्यर्क्षोदयात् सकलं जलम् ।
निर्म्मलं निर्व्विषं स्वादु शुक्रलं स्याददोषलम् ॥"
अतएवाह ।
"फुत्कारविषवातेन नागानां व्योमचारिणाम् ।
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ॥"
अथानार्त्तवजलगुणाः ।
"अनार्त्तवे प्रमुञ्चन्ति वारि वारिधरास्तु यत् ।
तत्त्रिदोषाय सर्व्वेषां देहिनां परिकीर्त्तितम् ॥"
अनार्त्तवं पौषादिमासचतुष्टयविषयम् ॥
अथ करकजलस्य लक्षणं गुणाश्च ।
"दिव्यवायग्निसंयोगात् संहताः खात् पतन्ति याः ।
पाषाणखण्डवच्चापस्ताः कारक्योऽमृतोपमाः ॥
करकाजं जलं रूक्षं विशदं गुरु च स्थिरम् ।
दारुणं शीतलं सान्द्रं पित्तहृत्कफवातकृत् ॥"
अथ तौषारजललक्षणं गुणाश्च ।
"अपि नद्याः समुद्रान्ते वह्निरापश्च सद्रवाः ।
धूमावयवनिर्म्मुक्तास्तुषाराख्यास्तु ताः स्मृताः ॥"
अपि नद्याः समुद्रान्ते वह्निः । नदीमारभ्य समुद्रपर्य्यन्तं वह्निरास्ते । सद्रवाः वह्निभवाः । धूमावयवनिर्म्मुक्ताः धूमांशरहिताः आपस्तुषाराख्याः । तुष इति लोके तुम इति च ।
"अप्रयाः प्राणिनां प्रायो भूरुहाणान्तु ता हिताः ।
तुषाराम्बु हिमं रूक्षं स्याद्वातलमपित्तलम् ॥
कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगकृत् ॥"
अथ हैमजलस्य लक्षणं गुणाश्च ।
"हिमवत्प्रमुखाद्रिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेव हिमं हैमं जलमाहुर्म्मनीषिणः ॥
हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् ॥"
हैमं जलं कुहेसजलम् । अन्ये तु ।
"शीतांशुभूमेरिन-
सम्बु समुद्रस्य यदुच्छ्रितम्।
पवनानीतसुदीर्घा
तद्धिममिति कथ्यते सुधीभिः।
हिमं कुहेस इति लोके।
हिमन्तु शीतलं रूक्षं
न तद्दूषयते वातं नच पित्तं
अथ भौमं जलं तद्भेदाश्च ।
"भौममम्भो निगदितं
जाङ्गलं परमानूपं ततः
तेषां लक्षणानि गुणाश्च ।
अल्पोदको जाङ्गलो
मद्वाम्बिहुदुरश्च वातश्लेष्मविकार
देशोऽनूप इति ख्यात आनूपं
मिश्रचिह्नस्तु यो देशः
तस्मिन् देशे यदुदकं
जाङ्गलं सलिलं रूक्षं लवणं लघु
वह्निकृत् कफहृत् पथ्यं
आनूपं वार्य्यभिष्यन्दि स्वादु
साधारणन्तु मधुरं दीपनं शीतलं
तर्पणं रोचनं तृष्णादाहत्रिदोषनुत्"
अथ भौमानामेव नादेयादीनां
गुणाश्च । तत्र नादेयस्य लक्षणं
"नद्या नदस्य वा नीरं
नादेयमुदकं रूक्षं वातलं
अनभिष्यन्दि विशदं
नद्यः शीघ्रवहा लघ्वः सर्व्वा
गुर्व्व्यः शैवालसंछन्ना
नदीसरस्तडागस्थं कूपप्रस्रवणादिषु।
उदके देशभेदेन गुणान् दोषांश्च
अथौद्भिदस्य लक्षणं गुणाश्च।
"विदार्य्य भूमिं निम्नां यन्महाधारा
तत्तोयमौद्भिदं नाम वदन्तीति क्वचित्
औद्भिदं वारि पित्तघ्नमविदाहि
प्रीणनं मधुरं बल्यमीषद्वातकरं लघु।
अथ नैर्झरस्य लक्षणं गुणाश्च।
"शैलसानुस्रवद्वारिप्रवाहो निर्झर
स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं
नैर्झरं रुचिकृद्वीरं कफघ्नं दीपनं
मधुरं कटुकं पाके वातलं
अथ सारसस्य लक्षणं गुणाश्च।
"नद्याः शैलादिरुद्धाया यत्र बद्ध
सत् सरो जलजच्छन्नं तदम्भः
सारसं सलिलं बल्यं तृष्णाघ्नं मधु
रोचनं तुवरं रूक्षं बद्धमूत्रमलं
अथ तडागस्य लक्षणं गुणाश्च।
"प्रशस्तभूमिभागस्थो बहुसंवत्सर
जलाशयस्तडागः स्यात्ताडागं
ताडागमुदकं स्वादु कषायं कटु
वातलं बद्धविण्मूत्रमसृक्पित्तकफ
अथ वाप्यस्य लक्षणं गुणाश्च।

…धारेरिष्टकाभिर्बा बद्धकूपा दृढा तथा ।
…पाना भवेद्वापी तज्जलं वाप्यमुच्यते ॥
…वारि यदि क्षारं पित्तकृत् कफवातहृत् ।
…मिष्टं कफकृत् वातपित्तहरं भवेत् ॥"
… कौपस्य लक्षणं गुणाश्च ।
…मातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः ।
…बद्धः स कूपः स्यात्तदम्भः कौप्यमुच्यते ॥
…पयो यदि स्वादु त्रिदोषघ्नं हितं लघु ।
…क्षारं कफवातघ्नं दीपनं कफकृत् परम् ॥"
… चौण्ड्यस्य लक्षणं गुणाश्च ।
…लाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम् ।
…वितानसंछन्नं चौण्ड्यमित्यभिधीयते ॥
…आदिभिरबद्धं यत्तत् चौण्ड्यमिति चापरे ।
…त्यमुदकं चौण्ड्यं मुनिभिः समुदाहृतम् ॥
…ण्ड्यं वह्निकरं नीरं रूक्षं कफहरं लघु ।
…रं पित्तकृदुष्णं पाचनं विशदं स्मृतम् ॥"
… पाल्वलस्य लक्षणं गुणाश्च ।
…ल्पं सरः पल्वलं स्यात् यत्र चन्द्रक्षये रवौ ।
…तिष्ठति जलं किञ्चित् तत्रत्यं वारि पाल्वलम् ॥
…पलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ॥"
… विकिरस्य जलस्य लक्षणं गुणाश्च ।
…आदिनिकटे भूमिर्य्या भवेद्वालुकामयी ।
…यते ततो यत्तु तज्जलं विकिरं विदुः ॥
…रं शीतलं स्वच्छं निर्दोषं लघु तत् स्मृतम् ।
… स्वादु पित्तघ्नं क्षारं तत् पित्तलं मनाक् ॥"
… कैदारस्य लक्षणं गुणाश्च ।
…शारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम् ।
…रं वार्य्यभिष्यन्दि मधुरं गुरु दोषकृत् ॥"
… दृष्टिजलस्य लक्षणं गुणाश्च ।
…धिकं तदच्छवृष्टं भूमिष्ठमहितं जलम् ।
…नत्रसुधितं तत्तु प्रसन्नमृतोपमम् ॥"
… हेमन्तादिकालविशेषे विहितो जल-
…णः ।
…मन्ते सारसं तोयं ताडागं वा हितं स्मृतम् ।
…न्ते विहितं तोयं शिशिरेऽपि प्रशस्यते ॥
…न्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं जलम् ।
…यं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ॥
…महनरश्मीभिः पत्राद्यैर्दूषितं यतः ।
…इदं वान्तरीक्षं वा कौपं वा प्रावृषि स्मृतम् ॥
… शरदि नादेयं नीरमंशूदकं परम् ।
… रविकरैर्जुष्टं निशि शीतकरांशुभिः ॥
…मंशूदकं नाम स्निग्धं दोषत्रयापहम् ।
…भिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् ॥
… रसायनं मेध्यं शीतं लघु सुधासमम् ॥"
…करैर्जुष्टमित्युक्ते दिवापदं समस्तदिनप-
…शं शीतकरांशुभिर्जुष्टमित्युक्ते निशीतिपदं
…रात्रिप्रापकम् । अन्यच्च ।
…रदि स्वच्छमुदयादगस्त्यस्यानिलं हितम् ॥"
…मुहुतस्तु ।
…धि वारि सरोजातं माघे तत्तु तडागजम् ।
…गुने कूपसम्भूतं चैत्रे चौण्ड्यं हितं मतम् ॥
…खे नैर्झरं नीरं ज्यैष्ठे शस्तं तथोद्भिदम् ।

आषाढ़े शस्यते कौपं श्रावणे दिव्यमेव च ॥
भाद्रे कौपं पयः शस्तमाश्विने चौण्ड्यमेव च ।
कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते ॥"
अथ जलस्य ग्रहणकालः ।
"भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते ।
शैत्यं निर्म्मलत्वञ्च यतस्तेषां महान् गुणः ॥"
अथ जलस्य पाने विधिः ।

"अत्यम्बुपानान्न विपच्यतेऽन्न-
मनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्म्मुहुर्व्वारि पिबेदभूरि ॥"

अथ शीतलजलपानस्य विषयाः ।
"मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
भ्रमे श्रमे विदग्धेऽन्ने तमके वमथौ तथा ।
ऊर्द्ध्वगे रक्तपित्ते च शीतमम्भः प्रशस्यते ॥"
अथ तन्निषेधः ।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ।
आध्माने स्तिमिते कोष्ठे सद्यः शुद्धौ नवज्वरे ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीताम्बु परिवर्ज्जयेत् ॥"
अथाल्पजलपानस्य विषयाः ।
"अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये ।
मुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे ।
व्रणे च मधुमेहे च पिबेत् पानीयमल्पकम् ॥"
अथ जलपानस्यावश्यकता ।
"जीवानां जीवनं जीवो जगत् सर्व्वन्तु तन्मयम् ।
अतोऽत्यन्ततया स्रष्टो न कचित् वारि वार्य्यते ॥"
हारीतश्च ।
"तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥
तृषितो मोहमायाति मोहात् प्राणान् विमु-
ञ्चति ।
अतः सर्व्वास्ववस्थासु न कचित् वारि वारयेत् ॥"
अथ प्रशस्तं जलम् ।
"अगन्धमव्यक्तरसं सुशीतं तर्षनाशनम् ।
अच्छं लघु च हृद्यञ्च तोयं गुणवदुच्यते ॥"
अथ निन्दितं जलम् ।
"पिच्छिलं कृमिलं क्लिन्नं पर्णशैवालकर्द्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम् ॥
कलुषं छन्नमम्भोजपर्णनीलीतृणादिभिः ।
दुर्द्दिनजमसंस्पृष्टं सौरचान्द्रमसांशुभिः ॥
अनार्त्तवं वार्षिकमपि प्रथमं तच्च भूमिगम् ।
व्यापन्नं परिहर्त्तव्यं सर्व्वदोषप्रकोपणम् ॥
तत् कुर्य्यात् स्नानपानाभ्यां तृष्णाध्मानोदर-
ज्वरान् ।
कासाग्निमान्द्याभिष्यन्दिकण्डूगण्डादिकांस्तथा ॥"
अथ दुष्टजलस्य निर्द्दोषीकरणोपायः ।
"निन्दितं चापि पानीयं क्वथितं सूर्य्यतापितम् ।
सुवर्णं रजतं लोहं पाषाणं सिकतां मृदम् ॥
भृशं संताप्य निर्व्वाप्य सप्तधा साधितं तथा ।
कर्पूरजातिपुन्नागपाटलादिसुवासितम् ॥
शुचिसान्द्रपटस्रावैः क्षुद्रजन्तुविवर्ज्जितम् ।

स्वच्छं कनकमुक्ताद्यैः शुद्धं स्याद्दोषवर्ज्जितम् ॥
पण्यभ्रूकविसग्रन्थिमुक्ताकनकशैवलैः ।
गोमेदेन च वस्त्रेण कुर्य्यादम्बुप्रसादनम् ॥"
अथ पीतस्य जलस्य पाकावधिः ।

"आमं जलं जीर्य्यति याममात्रं
तदर्द्धमात्रं शृतशीतलञ्च ।
तदर्द्धमात्रं तु शृतं कदुष्णं
पयःप्रपाकेऽवधिरेष उक्तः ॥"

इति भावप्रकाशे वारिवर्गः ॥

अथ जले भगवत्पूजाविधिः ।
"उत्तापेऽर्कांशुतो जाते शीतलेन सुगन्धिना ।
जलेन पूरिते पात्रे श्रीकृष्णमुपवेशयेत् ॥
नित्यार्च्चाविधिनाभ्यर्च्च्य सायं सन्ध्यामुपास्य च ।
देवं सिंहासने नीत्वा गन्धादिभिरथार्च्चयेत् ॥
नीराज्य देवं सर्व्वेभ्यो दत्त्वा तीर्थं भजेत् स्वयम् ।
द्वादश्यान्तु विशेषेण रात्रौ तोयस्थमर्च्चयेत् ॥"
तन्माहात्म्यं यथा, गारुड़े ।
"स्वर्णपात्रेऽथवा रौप्ये ताम्रे वा मृण्मयेऽपि वा ।
तोयस्थं योऽर्च्चयेद्भक्त्या शालग्रामसमुद्भवम् ॥
चक्राङ्कितं वा भूपाल ! निवृत्ते मधुमाधवे ।
प्रतिमां स महाभागस्तस्य पुण्यमनन्तकम् ॥
यावद्धराधरो लोके यावच्चन्द्रदिवाकरौ ।
तावत्तस्य कुले कश्चिन्न भवेद्भूप ! नारकी ॥
तस्माज्ज्यैष्ठे सदा भूप ! तोयस्थं पूजयेद्धरिम् ।
वीततापो नरस्तिष्ठेद्यावदाभूतसंप्लवम् ॥
कृतैः सुशीतलैस्तोयैस्तुलसीदलवासितैः ।
शुचिशुक्रगते काले येऽर्च्चयिष्यन्ति केशवम् ॥
जलस्थं विविधैः पुष्पैर्मुच्यते यमयातनात् ॥
जलस्थो यतो विष्णुर्जलशायी जलप्रियः ।
तस्माद्ग्रीष्मे विशेषेण जलस्थं पूजयेद्धरिम् ॥
नीरमध्यस्थितं कृत्वा शालग्रामसमुद्भवम् ।
योऽभ्यर्च्चयेन्महाभक्त्या स भवेत् कुलपावनः ॥
कर्किराशिगते सूर्य्ये मिथुनस्थे विशेषतः ।
येनार्च्चितो हरिर्भक्त्या जलमध्ये महीपते ! ॥
द्वादश्यान्तु विशेषेण जलस्थं जलशायिनम् ।
योऽभ्यर्च्चयेत् कृतं तेन यज्ञकोटिशतं भुवि ॥
पात्रे गन्धादिकं कृत्वा यः क्षिपेद्गरुड़ध्वजम् ।
द्वादश्यां पूजयेद्भक्त्या मुक्तिभागी भवेन्नरः ॥"
किञ्च ।
"घनागमे प्रकुर्व्वन्ति जलस्थं ये जनार्द्दनम् ।
ते नरा नृपतिश्रेष्ठ ! तेषां वै नरकं ध्रुवम् ॥"
"तथैवानुष्णसमये कालिन्द्यादौ विशेषतः ।
सम्पादयेद्भगवतो जलक्रीड़ामहोत्सवम् ॥"

इति श्रीहरिभक्तिविलासे १५ विलासः ॥

जलः, त्रि, (जलति आच्छादयति विनाशयति वा ज्ञानं बुद्धिप्रतिभां वेति । जल + अच् ।) जड़ः । इति मेदिनी । ले, १८ ॥ (यथा, काशीखण्डे । ८ । ६६ ।
"व्याधिविध्वंसनकरीं जगद्योनिर्जलाविना ॥"
"जलानां जड़ानामज्ञानामित्यर्थः । अथवैव कलुषितेन व्याप्ततेनेति वा ।" इति तट्टीका ।)
जलकण्टकः, पुं, (जले जातः कण्टकः । कण्टका-न्वितत्वादेवास्य तथात्वम् ।) शृङ्गाटः । पानी-

फल इति भाषा। (जले कण्टकः प्रचुरिव।) कुम्भीरः। इति हारावली। ७६॥

जलकपिः, पुं, (जले कपिरिव।) शिशुमारः। इति हारावली। ७७॥

जलकरङ्कः, पु, (जलपूर्णः करङ्कः। मध्यपदलोपिसमासः।) नारिकेलफलम्। (जले करङ्कः अभ्यस्तनारिकेलफलमिव इव।) पद्मम्। शङ्खः। जलजता। मेघः। इति मेदिनी। के, २२८॥

जलकल्कः, पुं, (जलस्य कल्क इव।) शैवालः। इति हारावली। २०५॥

जलकाकः, पु, (जले जलस्य वा काक इव।) पक्षिविशेषः। पानीकौडि इति भाषा। तत्पर्य्यायः। दात्यूहः २ कालकण्टकः ३। अस्य मांसगुणाः। स्निग्धं गुरु हिमं हृद्यं मांसं जलपक्षिणान्तु वातहरम्। इति राजनिर्घण्टः॥

जलकाङ्क्षः, पुं, स्त्री, (जलं काङ्क्षति अभिलषतीति। जल+काङ्क्ष+"कर्म्मण्यण्।" ३। २। १। इत्यण।) हस्ती। इति त्रिकाण्डशेषः॥

जलकाङ्क्षी, [न्] पुं स्त्री, (जलं काङ्क्षति अभिलषतीति। काङ्क्ष+णिनिः।) हस्ती। इति हारावली। १४। जलाभिलाषिणि, त्रि॥

जलकान्तारः, पुं, (जलमेव कान्तारं दुर्गमपथो यस्य यस्मात् इति वा। जलाधिष्ठातृत्वादेवास्य तथात्वम्।) वरुणः। इति हेमचन्द्रः। २।१०२॥

जलकामुकः, पुं, (जलस्य कामुकः अभिलाषुकः।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः॥ (स्त्री, अर्कपुष्पी। यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका।")

जलकिराटः, पुं, (जले किरः शूकर इव अटति गच्छतीति। अट+अच्।) ग्राहः। इति हारावली। ७७॥

जलकुक्कुटी, स्त्री, (जले कुक्कुट इव। ततः स्त्रियां जातित्वात् ङीष्।) गङ्गाचिल्ली। इति हारावली। ८६॥

जलकुक्कुभः, पुं, (जले कुक्कुभः पक्षिविशेष इव।) जलचरपक्षिविशेषः। कोड़ापाखी इति भाषा॥ तत्पर्य्यायः। कोयष्टिः २ शिखरी ३। इति हेमचन्द्रः॥

जलकुन्तलः, पु, (जलस्य कुन्तलः केश इव।) शैवालम्। इति भूरिप्रयोगः॥ (शैवालशब्देऽस्य विशेषो ज्ञेयः॥)

जलकूपी, स्त्री, (जलस्य कूपीव।) कूपगर्त्तः। पुष्करिणी। इति मेदिनी। पे, ७३॥

जलकूर्म्मः, पु, (जले कूर्म्म इव। ङ्नवसमये कूर्म्मस्येव दृश्यमानत्वात् तदात्वम्।) शिशुमारः। इति त्रिकाण्डशेषः॥

जलकेशः, पु (जलस्य केश इव।) शैवालम्। इति हारावली। १०६॥

जलक्रीडा, स्त्री, (जलेन जले वा क्रीडा।) यदाह्रो सरस्यादि॰भिः सह जलनिःसेचनादिरूपक्रीडा। तत्पर्य्यायः। जलावम् ५। यालुकी ३ करमविका ४। इति हारावली। ११६॥ (यथा, महाभारते। १। १२८। ३६।

"सहिता भ्रातरः सर्व्वे जलक्रीडामवाप्नुयुः॥")

जलगुल्मः, पुं, (जलस्य गुल्म इव।) जलावर्त्तः। कच्छपः। जलचत्वरम्। इति मेदिनी। मे, ६०॥

जलङ्गः, पुं, (जलं गच्छतीति। जल+गम्+डः। ततो मुम्।) महाकालः। लताविशेषः। इति राजनिर्घण्टः॥

जलङ्गमः, पुं, (जलं ग्रामान्तजलभूमिं गच्छतीति। जल+गम+"गमश्च।" ३। २। ४७। इति खच् मुम् च। ग्रामान्तवासित्वादेवास्य तथात्वम्।) जनङ्गमः। चाण्डालः। इत्यमरटीकायां भरतः॥

जलचारी, [न्] पुं, (जले चरतीति। चर+णिनिः।) मत्स्यः। इति शब्दचन्द्रिका॥ जलचरे, त्रि॥ (यथा, रामायणे। ३। ६५। ६।

"ददृशुः सहिता रम्यं तडागं योजनायतम्।

शरारिहंसकुररैराकीर्णं जलचारिभिः॥")

जलजं, क्ली, (जले जायते इति। जन+डः।) पद्मम्। (यथा, कुमारे। २। ३०।

"वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्॥")

शङ्खः। इति मेदिनी। जे, २४॥ (यथा, रघुः। ७। ६३।

"ततः प्रियोपात्तरसेऽधरोष्ठे

निवेश्य दध्मौ जलजं कुमारः॥")

लवणम्। इति राजनिर्घण्टः॥

जलजः, पुं, (जले जायते इति। जल+जन्+डः।) मत्स्यः। इति शब्दचन्द्रिका॥ (यथा, रामायणे। २। ६१। २२।

"स तादृशः सिंहबलो वृषभाक्षो नरर्षभः।

स्वयमेव हतः पित्रा जलजेनात्मजो यथा॥")

जले निवासात् कुम्भीरशिशुमारादयः। एषां मांसगुणाः। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वातनाशित्वम्। शुक्रवर्द्धनत्वञ्च। इति राजवल्लभः॥ हिज्जलवृक्षः। शैवलः। वानीरवृक्षः। शङ्खः। इति राजनिर्घण्टः॥ कुमीशुः। इति भावप्रकाशः॥ कर्कटमीनकुम्भराशयः मकरशेषार्द्धञ्च। इति दीपिका॥ जलजाते, त्रि॥ (यथा, हरिवंशे। ६०। ३२।

"जलजैः प्राणिभिः कीर्णां जलजैर्भूषितां शुभैः।

जलजैः कुसुमैश्चित्रां जलजैरसितोदकाम्॥")

जलजम्बुः, पुं, (जलजाता जम्बुः।) जलजम्बवी। तत्पर्य्यायः। नादेयी २। इत्यमरः। २।४।२०॥

जलजन्तुका, स्त्री, (जलजो जन्तुः। ततः संज्ञायां कन्। स्त्रियां टाप्।) जलौका। इति भरतः॥

जलजन्मा, [न्] क्ली, (जले जन्म यस्य।) पद्मम्। इति हेमचन्द्रः। ४। २२८॥ (शावरकन्दके, पुं। तद्यथा,—

"जलूका जलजन्मा च तथा शावरकन्दकम्।"

इत्युक्तामरीनामहारीप्रयाणे भावप्रकाशोक्तम्॥)

जलजमूका, स्त्री, (जलप्रधाना जम्बुः।) भूजम्बूः। इति भूँइजाम इति वनजाम इति भाषा॥

जलजिह्वः, पुं, (जड़ा ... यस्य। ... सः।) नक्रः। ...

जलडिम्बः, पुं, (जले डिम्ब इव।) इति हारावली। ११२। (... विवरणं ज्ञातव्यम्॥)

जलतापिकः, पुं, (...) इल्लीशमत्स्यः। काकचिल्लिका। रत्नावली॥

जलतापी, [न्] पुं, (जलेऽपि ... मेति। तप+णिनिः।) ... शब्दरत्नावली॥

जलताल:, पुं, (जलं ... स्येन गच्छतीति। ताल+इण्।) मत्स्यः। इति त्रिकाण्डशेषः।

जलतिक्तिका, स्त्री, (स्वल्पं तिक्तं स्वल्पार्थे कन्। जलप्रधाना ...) शल्लकीवृक्षः। इति राजनिर्घण्टः॥

जलत्वचा, स्त्री, (जलात् जायते ...) छत्रम्। इति हारावली। ११।

जलदः, पु, (जलं ददातीति। दा+कः।) (यथा, मेघदूते। १३।

"मार्गं तावत् शृणु

कथयतस्त्वत्प्रयाणानुरूपं

सन्देशं मे तदनु जलद। ...")

मुस्तकम्। इति मेदिनी। दे, २९॥

"मुस्तता-नागर-सहचर-मरीच ...

... स्तनशीतं मधुयुक्तं निवारयति॥"

इति वैद्यकचक्रपाणिसंग्रहे॥ शाकद्वीपास्यान्तर्वर्षविशेषः। यथा, महाभारते। ६। ११। २२—२३।

"वर्षाणि तेषु कौरव्य।

महाभेदर्मन्दाकाशो जलदः कुरुनन्दन।

जलधारो महाराज! सुकुमार ..."

जलदागमः, पु, (जलदानां मेघानाम् आगमनं यत्र।) वर्षाकालः। इति राजनिर्घण्टः॥ (यथाह वररुचिः।

"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे।

दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम्॥")

जलदाशनः, पु, (अश्यते भक्ष्यते ... कर्म्मणि ल्युट्। जलदानां मेघानाम् अशनं भक्ष्यम् ... इति शब्दः)। शालवृक्षः। इति शब्दचन्द्रिका॥

जलधरः, पु, (धरतीति धरः। धृ+अच्। जलस्य धरः।) मेघः। (यथा, ... १। १३५। १८।

"नभो जलधरैर्हीनं ...")

मुस्तकम्। इत्यमरः। ३।३। ... समुद्रः। इति हेमचन्द्रः। ... राजनिर्घण्टः॥ जलधारिणि, त्रि॥

धिः, पुं, (जलानि धीयन्तेऽस्मिन्निति । जल+धा+"कर्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) समुद्रः । (यथा, आर्य्यासप्तशत्याम् । ६८० ।
"या दक्षिणा त्वमस्यामदक्षिणो दक्षिणत्व-
मितरस्याम् ।
जलधिरिव मध्यसंस्थो न वेलयोः सदृशमाच-
रसि ॥")
शशङ्कुसङ्ख्या । सा तु शतलक्षकोटयः । इति लीलावती ॥

जलधिगा, स्त्री, (जलधिं समुद्रं गच्छतीति । गम+डः । स्त्रियां टाप् ।) नदी । इति हेमचन्द्रः । ४ । १४६ ॥

जलधिजा, स्त्री, (जलधौ जायते इति । जन्+"सप्तम्यां जनेर्डः ।" इति डः ।) लक्ष्मीः । इति त्रिकाण्डशेषः ॥

जलधेनुः, स्त्री, (जलकल्पिता धेनुः ।) दानार्थकृत्रिमधेनुः । यथा,—

होतोवाच ।

"जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्व्वकम् ।
गोचर्म्ममात्रं भूभागं गोमयेनोपलेपयेत् ॥
तत्र मध्ये च राजेन्द्र ! पूर्णकुम्भन्तु विन्यसेत् ।
जलपूर्णसुगन्धाढ्यं कर्पूरागुरुचन्दनैः ॥
वासितां गन्धतोयेन तां धेनुं परिकल्पयेत् ।
कुम्भं तथापरं कल्प्यं घृतेन परिपूरितम् ॥
वत्सकं महाराज ! पत्रपुष्पैः समन्वितम् ।
दूर्व्वाङ्कुरैरुपस्तीर्य्य स्रग्दामैश्च विभूषितम् ॥
पञ्चरत्नानि निःक्षिप्य तस्मिन् कुम्भे नराधिप ! ।
मांसीसुशीरं कुष्ठञ्च तथा शैलेयवालुकम् ॥
आमलासर्षपाश्चैताः सर्व्वधान्यानि पार्थिव ! ।
चतुर्दिक्ष्वपि पात्राणि चत्वार्य्येव प्रकल्पयेत् ॥
एवं घृतमयं पात्रं द्वितीयं दधिपूरितम् ।
तृतीयं मधुनश्चैव चतुर्थं शर्कराहृतम् ॥
सुवर्णं सुखचक्षूंषि शृङ्गं कृष्णागुरूण्यपि च ।
प्रशस्तपत्रश्रवणां मुक्ताफलमयेक्षणाम् ॥
ताम्रपृष्ठां कांस्यदोहां दर्भरोमसमन्विताम् ।
पुच्छं सूत्रमयं कृत्वा कण्ठाभरणघण्टिकाम् ॥
कम्बले पुष्पमालाश्च गुडास्यां शुक्तिदन्तिकाम् ।
जिह्वां शर्करया कृत्वा नवनीतेन च स्तनम् ॥
इक्षुपादान्तु राजेन्द्र ! गन्धपुष्पोपशोभिताम् ।
कृष्णाजिनोपरि स्थाप्य वस्त्रैराच्छादितान्तु ताम्॥
गन्धपुष्पैः समभ्यर्च्च्य विप्राय विनिवेदयेत् ।
एवं धेनुं तदा दत्त्वा ब्राह्मणे वेदपारगे ॥
साधुविप्राय राजेन्द्र ! श्रोत्रियायाहिताग्नये ।
तपोवृद्धे वयोवृद्धे दातव्या च कुटुम्बिने ॥
यो ददाति नरो राजन् ! यः पश्यति शृणोति च ।
प्रतिगृह्णाति यो विप्रः सर्व्वे मुच्यन्ति पातकात् ॥
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः ।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोकं स गच्छति ॥
योऽश्वमेधेन यजते समाप्तवरदक्षिणः ।
जलधेनुञ्च यो दद्यात् सममेतन्नराधिपः ॥
जलाहारस्त्वेकदिनं तिष्ठेच्च जलधेनुदः ।
अथवा दधिर्त्त्वेकदिने यः पयोव्रतमाश्रितः ॥
याश्चकोऽपि त्रिरात्रं वै तिष्ठेदेवं न संशयः ।
यत्र क्षीरवहा नद्यो मधुपायसकर्द्दमाः ॥
यत्र चाप्सरसां गीतं तत्र यान्ति जलप्रदाः ।
दाता च दापकश्चैव प्रतिग्राही च यो द्विजः ॥
ते सर्व्वे पापनिर्म्मुक्ता विष्णुलोकञ्च प्राप्नुयुः ॥"
इति वाराहे जलधेनुमाहात्म्यनामाध्यायः ॥

जलनकुलः, पुं, (जले नकुल इव ।) जलजन्तुविशेषः । धाड़िया इति उद्बिड़ाल इति च भाषा । तत्पर्य्यायः । उद्रः २ जलमार्जारः ३ जलाखुः ४ जलश्वः ५ । इति त्रिकाण्डशेषः । जलविड़ालः ६ नीराखुः ७ । इति हारावली । । ७६ ॥ पानीयनकुलः ८ वसी ९ । इति हेमचन्द्रः ॥

जलनिधिः, पुं, (जलानि निधीयन्तेऽस्मिन्निति । धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः । जलानां निधिरिति वा ।) समुद्रः । इत्यमरः । १ । १० । २० ॥ (यथा, आर्य्यासप्तशत्याम् । ६१४ ।
"सरित इव यस्य गेहे शुष्यन्ति
विशालगोत्रजा नार्य्यः ।
दारास्तेन स तृप्यति जलनिधिलहरीषु
जलद इव ॥"
चतुः संख्या समुद्रवाचित्वात् । यथा, सत्कृत्यमुक्तावल्याम् ।
"वारे शीतकरं तिथौ जलनिधिं
भेऽम्भिश्च योगे हयम् ॥" इति ॥)

जलनिर्गमः, पुं, (गम+"ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति भावे अप् । जलानां निर्गमो वहिर्गमनं यस्मात् ।) प्राकारगृहभित्त्यादिषु जलनिःसरणमार्गः । इति भरतः ॥ देवकुलप्राकारादिषु जलनिःसरणद्वारम् । इति सर्व्वानन्दः ॥ तत्पर्य्यायः । भ्रमः २ । इत्यमरः । २।१०।७ ॥ वक्रम् ३ पुटभेदः ४ । इति स्वामी ॥

जलनीली, स्त्री, (जलं नीलयतीति । नील+तत् करोतीति णिच्+ततः "कर्म्मण्यण् ।" ३।२।१ । इत्यण् । ततो ङीप् ।) शैवालम् । इत्यमरः । १ । १० । ३८ ॥ (शैवालशब्देऽस्या विवृतिर्द्रष्टव्या ॥)

जलन्धरः, पुं, (जलं ब्रह्मनेत्रच्युताश्रुजलं धरतीति । जल+धृ+वाहुलकात् खच् मुम् च ।) असुरविशेषः । तस्योत्पत्तिकारणं यथा,—
इन्द्रः शिवं द्रष्टुं शिवलोकं गत्वा एकं भयानकं पुरुषं दृष्ट्वा तं पुनःपुनः पप्रच्छ ईश्वरः क गतः । स उत्तरं न ददौ इन्द्रः क्रुद्धस्तं वज्रेण जघान । ततो वज्रस्तेनैव प्रजज्वाल । तत इन्द्रो भीतस्तं प्रणम्य तुष्टाव रुद्रस्तुष्ट इन्द्रदाहार्थोत्पन्नं भालनेत्रस्थवह्निं गृहीत्वा गङ्गासागरसङ्गमे प्राक्षिपत् ततः स बालरूपोभूत्वा रुरोद तस्य रोदनशब्देन सप्तलोका वधिरीकृतास्तच्छ्रुत्वा ब्रह्मा विस्मितस्तत्रागत्य तं बालं समुद्रक्रोडे दृष्ट्वा तं पप्रच्छ कस्यायं पुत्रः समुद्रस्तं प्रणम्योवाच मम पुत्रः अस्य जातकर्म्मादि कुरु इत्युक्ता ब्रह्मा क्रोड़े ददौ स बालकस्तस्य श्मश्रु दधार तस्य धुन्वतो ब्रह्मणो नेत्राभ्यां जलमगमत् ब्रह्मा समुद्रमुवाच यस्मादनेन मम नेत्राभ्यां निर्गतं जलं धृतं तस्मादयं जलन्धरनामा अधुनैव सर्व्वशास्त्रवेत्ता रुद्रं विना सर्व्वभूतावध्यश्च भविष्यति इत्युक्ता शुक्रमाहूय तमासुरराज्ये न्यवेशयत् स कालनेमिसुतां वृन्दामुपयेमे । इति पाद्मोत्तरखण्डम् ॥

जलपतिः, पुं, (जलस्य पतिः ।) वरुणः । इति हेमचन्द्रः । २ । १०२ ॥ (अस्य जलपतित्वकथा यथा, काशीखण्डे । १२ । ८६—९५ ।
"ततस्तं तनयः दृष्ट्वा पितरं प्रणिपत्य च ।
जगाम तूर्णं तपसे श्रीमद्वाराणसीं पुरीम् ॥
तत्र तप्त्वा तपो घोरं लिङ्गं संस्थाप्य शाम्भवम् ।
पञ्चवर्षसहस्राणि स्थितः पाषाणनिश्चलः ॥
आविरासीन्महादेवस्तुष्टस्तत्तपसा ततः ।
उवाच कार्द्दमे ! ब्रूहि कं ददामि वरोत्तमम् ॥
कार्द्दमिरुवाच ।
यदि नाथ ! प्रसन्नोऽसि भक्तानामनुकम्पक ! ।
सर्व्वासामाधिपत्यं मे देह्यपां यादसामपि ॥
इति श्रुत्वा महेशानः सर्व्वचिन्तितदः प्रभुः ।
अभ्यषिञ्चत तं तत्र वारुणे परमे पदे ॥
रत्नानामब्धिजातानामब्धीनां सरितामपि ।
सरसां पल्वलानाञ्च वाप्यम्बुस्रोतसां पुनः ॥
जलाशयानां सर्व्वेषां प्रतीच्याश्चापि वै दिशः ।
अधीश्वरः पाशपाणिर्भव सर्व्वामरप्रियः ॥")
समुद्रः । अप्पतिरित्यमरदर्शनात् ॥

जलपारावतः, पुं, (जले पारावत इव ।) पक्षिविशेषः । तत्पर्य्यायः । कोपी २ जलकपोतः ३ । इति राजनिर्घण्टः ॥

जलपित्तं, क्ली, (जलानां पित्तमिव ।) अग्निः । इति शब्दरत्नावली ॥

जलपिप्पली, स्त्री, (जलजाता पिप्पली ।) पिप्पलीविशेषः । पनिसगा इति लोके । जलपिपरी इति हिन्दी भाषा । तत्पर्य्यायः । महाराष्ट्री २ शारदी ३ तोयवल्लरी ४ मत्स्यादनी ५ मत्स्यगन्धा ६ लाङ्गली ७ शकुलादनी ८ अग्निज्वाला ९ चित्रपत्री १० प्राणदा ११ तृणशीता १२ बहुशिखा १३ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मलशोधनत्वम् । व्रणकीटादिदोषरक्षदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"जलपिप्पल्यभिहिता शारदी शकुलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता ॥
जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः ।
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ॥
कटुपाका रसा रूक्षा कषाया वह्निवर्द्धिनी ॥"
इति भावप्रकाशः ॥
("गम्भारी जलपिप्पल्यस्तुम्बुरुः शृङ्गवेरिका ।
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥)

जल इति भाषा। (जले कण्टकः शत्रु-रिव।) कुम्भीरः। इति हारावली। ७६॥

जलकपिः, पुं, (जले कपिरिव।) शिशुमारः। इति हारावली। ७७॥

जलकरङ्कः, पुं, (जलपूर्णः करङ्कः। मध्यपदलोपि-समासः।) नारिकेलफलम्। (जले करङ्कः अस्थ्यस्य नारिकेलफलास्थि इव।) पद्मम्। शङ्खः। जललता। मेघः। इति मेदिनी। के, २२८॥

जलकल्कः, पुं, (जलस्य कल्क इव।) जम्बालः। इति हारावली। २०५॥

जलकाकः, पुं, (जले जलस्य वा काक इव।) पक्षिविशेषः। पानीकौडि इति भाषा॥ तत्-पर्य्यायः। दात्यूहः २ कालकण्टकः ३। अस्य मांसगुणाः। स्निग्धं गुरु हिमं वृष्यं मांसं जलचरशिखाम्बु वातहरम्। इति राजनिर्घण्टः॥

जलकाङ्क्षः, पुं, स्त्री, (जलं काङ्क्षति अभिलषतीति। जल+काङ्क्ष+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) हस्ती। इति त्रिकाण्डशेषः॥

जलकाङ्क्षी, [न्] पुं स्त्री, (जलं काङ्क्षति अभि-लषतीति। काङ्क्ष+णिनिः।) हस्ती। इति हारावली। १४॥ जलाभिलाषिणि, त्रि॥

जलकान्तारः, पुं, (जलमेव कान्तारं दुर्गमपथो यस्य यस्मै इति वा। जलाधिष्ठातृत्वादेवास्य तथात्वम्।) वरुणः। इति हेमचन्द्रः। २।१०२॥

जलकामुकः, पुं, (जलस्य कामुकः अभिलाषुकः।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः॥ (स्त्री, अर्कपुष्पी। यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका॥")

जलकिराटः, पुं, (जले किरः शूकर इव अटति गच्छतीति। अट+अच्।) ग्राहः। इति हारावली। ७७॥

जलकुक्कुटी, स्त्री, (जले कुक्कुट इव। ततः स्त्रियां जातित्वात् ङीष्।) मज्जापिकी। इति हारा-वली। ८६॥

जलकुक्कुभः, पुं, (जले कुक्कुभः पक्षिविशेष इव।) जलचरपक्षिविशेषः। कोडानाती इति भाषा॥ तत्पर्य्यायः। कोयष्टिः २ शिखरी ३। इति हेमचन्द्रः॥

जलकुन्तलः, पुं, (जलस्य कुन्तलः केश इव।) शैवालम्। इति भूरिप्रयोगः॥ (शैवालशब्देऽस्य विवृतिर्ज्ञेया॥)

जलकूपी, स्त्री, (जलस्य कूपीव।) कूपः। पुष्करिणी। इति मेदिनी। पे, ४४॥

जलकूर्म्मः, पुं, (जले कूर्म्म इव। [illegible] तदाख्यम्।) शिशुमारः। इति त्रिकाण्डशेषः॥

जलकेशः, पुं, (जलस्य केश इव।) शैवालम्। इति हारावली। १०६॥

जलक्रीडा, स्त्री, (जलेन जले वा क्रीडा।) जलाशये जलादिभिः सह जलविन्दुदानादि-जलक्रीडा। तत्पर्य्यायः। [illegible] २ आभ्युक्षी ३ करपत्रिका ४। इति हारा-वली। ११६॥ (यथा, महाभारते। १। १२८। ३६।
"सहिता भ्रातरः सर्व्वे जलक्रीडामवाप्नुवन्॥")

जलगुल्मः, पुं, (जलस्य गुल्म इव।) जलावर्त्तः। कच्छपः। जलचत्वरम्। इति मेदिनी। मे, ६०॥

जलङ्गः, पुं, (जलं गच्छतीति। जल+गम्+डः। ततो मुम्।) महाकालः। लताविशेषः। इति राजनिर्घण्टः॥

जलङ्गमः, पुं, (जलं ग्रामान्तजलभूमिं गच्छ-तीति। जल+गम+"गमश्च।" ३। २। ४७। इति खच् मुम् च। ग्रामान्तवासित्वादेवास्य तथात्वम्।) जनङ्गमः। चाण्डालः। इत्यमर-टीकायां भरतः॥

जलचारी, [न्] पुं, (जले चरतीति। चर+णिनिः।) मत्स्यः। इति शब्दचन्द्रिका॥ जल-चरे, त्रि॥ (यथा, रामायणे। ३। १५। ६।
"ददृशुः सहिता रम्यं तडागं शोभनायतम्।
प्रशान्तहंसकुररैराकीर्णं जलचारिभिः॥")

जलजं, क्ली, (जले जायते इति। जन+डः।) पद्मम्। (यथा, कुमारे। २। ३०।
"वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्॥")
शङ्खः। इति मेदिनी। जे, २४॥ (यथा, रघुः। ७। ६३।
"ततः प्रियोपात्तरसेऽधरोष्ठे
निवेश्य दध्मौ जलजं कुमारः॥")
लोणारम्। इति राजनिर्घण्टः॥

जलजः, पुं, (जले जायते इति। जल+जन्+डः।) मत्स्यः। इति शब्दचन्द्रिका॥ (यथा, रामा-यणे। २। ६१। २२।
"स तादृशः सिंहबलो वृषभाक्षो नरर्षभः।
स्वयमेव हतः पित्रा जलजेनात्मजो यथा॥")
जले निवासात् कुम्भीरशिशुमारादयः। तथा मांसगुणाः। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वातनाशित्वम्। शुक्रवर्द्धनत्वञ्च। इति राजवल्लभः॥ हिज्जलवृक्षः। शैवलः। वानीरवृक्षः। शङ्खः। इति राजनिर्घण्टः॥ [illegible]। इति भावप्रकाशः॥ कर्कटमीन-कुम्भीराद्याः मकरशङ्खाद्याश्च। इति दीपिका॥ जलजाते, त्रि॥ (यथा, हरिवंशे। ६०। १२।
"जलजैः प्राणिभिः कीर्णां जलजैर्भूषितां शुभैः।
जलजैः कुसुमैश्चित्रां जलजैर्वरितोदकाम्॥")

जलजन्तुः, पुं, (जलजातो जन्तुः।) जलजप्राणी। तत्पर्य्यायः। यादः २। इत्यमरः। १।१०।२०॥

जलजन्तुका, स्त्री, (जलजो जन्तुः। ततः संज्ञायां कन्। स्त्रियां टाप्।) जलौका। इति भरतः॥

जलजन्मा, [न्] क्ली, (जले जन्म यस्य।) पद्मम्। इति हेमचन्द्रः। ४। २२८॥ (प्रावरकन्दे, पुं। तद्यथा,—
"जलजा जलजन्मा च तथा प्रावरकन्दकम्॥"
इत्युत्तरस्थानेऽष्टादशाध्याये वाभटेनोक्तम्॥)

जलजम्बुका, स्त्री, (जलप्रधाना जम्बुः।) भूजम्बुः। इति [illegible] भूँइजाम इति वनजाम इति [illegible]

जलजिह्वः, पुं, (जडा [illegible] यस्य। तस्य लः।) नक्रः। [illegible]

जलडिम्बः, पुं, (जले डिम्ब इव।) [illegible] इति हारावली। ११२॥ ([illegible] विवरणं ज्ञातव्यम्॥)

जलतापिकः, पुं, (जलतापिन्+[illegible]) इल्लीशमत्स्यः। काकचीमत्स्यः। इति रत्नावली॥

जलतापी, [न्] पुं, (जलेऽपि [illegible] तपतीति। तप+णिनिः।) [illegible] शब्दरत्नावली॥

जलतालः, पुं, (जलं [illegible] लेन गच्छतीति। तल+घञ्।) मत्स्यः। इति त्रिकाण्डशेषः॥

जलतिक्तिका, स्त्री, (तिक्ता तिक्तैव। स्वार्थे कन्। जलप्रधाना तिक्तिका।) शल्लकीवृक्षः। इति राजनिर्घण्टः॥

जलत्रा, स्त्री, (जलात् त्रायते इति। त्रै+[illegible]) छत्रम्। इति हारावली। ४०॥

जलदः, पुं, (जलं ददातीति। दा+कः।) मेघः। (यथा, मेघदूते। १३।
"मार्गं तावच्छृणु कथयतस्त्वत्[illegible]
सन्देशं मे तदनु जलद! श्रोष्यसि [illegible]")
मुस्तकम्। इति मेदिनी। दे, १८॥ ([illegible]
"अम्लता-नागर-सहचर-भद्रोत्कट [illegible]
शृतशीतं मधुयुक्तं निवारयति छर्दि[illegible]"
इति वैद्यकचक्रपाणिसंग्रहे छर्दि[illegible]
शाकद्वीपान्तर्गतवर्षविशेषः। यथा, महाभारते। ६। ११। २२—२३।
"वर्षाणि तेषु कौरव्य! सप्तोक्तानि मनीषि[illegible]
महाभेतमभ्राकाशो जलदः कुमुदोत्तरः।
जलधारो महाराज! सुकुमार इति [illegible]")

जलदागमः, पुं, (जलदानां मेघानां [illegible] आगमनं यत्र।) वर्षाकालः। इति राजनिर्घण्टः॥ (यथाह [illegible]कविः।
"भद्रं भसं [illegible] मौनं कोकिलैर्जलदागमे।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम्॥")

जलदाशनः, पुं, (अश्यते भक्ष्यते इति। अश+कर्म्मणि ल्युट्। जलदानां मेघानां [illegible] मेघाः आशनं भक्ष्यमिति [illegible]) वृक्षः। इति शब्दचन्द्रिका॥

जलधरः, पुं, (धरतीति धरः। [illegible] जलस्य धरः।) मेघः। (यथा, [illegible] १। ११५। १८।
"नभो जलधरैर्हीनं [illegible]")
मुस्तकम्। इत्यमरः। १।१।७,२।४।[illegible] समुद्रः। इति हेमचन्द्रः॥ तिनिशवृक्षः। इति राजनिर्घण्टः॥ जलधारिणि, त्रि॥

धिः, पुं, (जलानि धीयन्तेऽस्मिन्निति। जल+धा+"कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः।) समुद्रः। (यथा, आर्य्यासप्तशत्याम्। ४८०।
"या दक्षिणा त्वमस्यामदक्षिणो दक्षिणत्व-
मितरस्याम्।
जलधिरिव मध्यसंस्थो न वेलयोः सदृशमाच-
रसि॥")
दशशङ्खसंख्या। सा तु शतलक्षकोटयः। इति लीलावती॥

लधिगा, स्त्री, (जलधिं समुद्रं गच्छतीति। गम+डः। स्त्रियां टाप्।) नदी। इति हेमचन्द्रः। ४। १४६॥

लधिजा, स्त्री, (जलधौ जायते इति। जन्+"सप्तम्यां जनेर्डः।" इति डः।) लक्ष्मीः। इति त्रिकाण्डशेषः॥

लधेनुः, स्त्री, (जलकल्पिता धेनुः।) दानार्थ-कृत्रिमधेनुः। यथा,—
होतोवाच।
"जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्व्वकम्।
गोचर्म्ममात्रं भूभागं गोमयेनोपलेपयेत्॥
तत्र मध्ये च राजेन्द्र! पूर्णकुम्भन्तु विन्यसेत्।
जलपूर्णसुगन्धाढ्यं कर्पूरागुरुचन्दनैः॥
वासितां गन्धतोयेन तां धेनुं परिकल्पयेत्।
चतुर्थं तथापरं कुम्भं घृतेन परिपूरितम्॥
वर्द्धनीकं महाराज! पत्रपुष्पैः समन्वितम्।
दूर्व्वाङ्कुरैरुपस्तीर्य्य स्रग्दामैश्च विभूषितम्॥
पञ्चरत्नानि निःक्षिप्य तस्मिन् कुम्भे नराधिप!।
मांसीमुशीरं कुष्ठञ्च तथा शैलेयवालुकम्॥
आमलासर्षपाश्चैताः सर्व्वधान्यानि पार्थिव!।
चतुर्दिक्ष्वपि पात्राणि चत्वार्य्येव प्रकल्पयेत्॥
एवं घृतमयं पात्रं द्वितीयं दधिपूरितम्।
तृतीयं मधुनश्चैव चतुर्थं शर्करावृतम्॥
सुवर्णं सुरश्रृङ्गेऽपि शृङ्गं कृष्णागुरूण्यपि च।
प्रशस्तपत्रश्रवणां मुक्ताफलमयेक्षणाम्॥
ताम्रपृष्ठां कांस्यदोहां दर्भरोमसमन्विताम्।
पुच्छं सूत्रमयं कृत्वा कृष्णाभरणघण्टिकाम्॥
कम्बले पुष्पमालाश्च गुडास्यां शुक्तिदन्तिकाम्।
जिह्वां शर्करया कृत्वा नवनीतेन च स्तनम्॥
इक्षुपादान्तु राजेन्द्र! गन्धपुष्पोपशोभिताम्।
कृष्णाजिनोपरि स्थाप्य वस्त्रैराच्छादितान्तु ताम्॥
गन्धपुष्पैः समभ्यर्च्य विप्राय विनिवेदयेत्।
एवं धेनुं तदा दत्त्वा ब्राह्मणे वेदपारगे॥
साधुविप्राय राजेन्द्र! श्रोत्रियायाहिताग्नये।
तपोवृद्धे वयोवृद्धे दातव्या च कुटुम्बिने॥
यो ददाति नरो राजन्! यः पश्यति शृणोति च।
प्रतिगृह्णाति यो विप्रः सर्व्वे मुच्यन्ति पातकात्॥
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोकं स गच्छति॥
योऽश्वमेधेन यजते समाप्तवरदक्षिणः।
जलधेनुञ्च यो दद्यात् सममेतन्नराधिपः॥
जलाहारस्त्वेकदिनं तिष्ठेच्च जलधेनुदः।
अथवा हविस्त्वेकदिने यः पयोव्रतमास्थितः॥
ग्राहकोऽपि त्रिरात्रं वै तिष्ठेदेवं न संशयः।
यत्र क्षीरवहा नद्यो मधुपायसकर्द्दमाः॥
यत्र चाप्सरसां गीतं तत्र यान्ति जलप्रदाः।
दाता च दापकश्चैव प्रतिग्राही च यो द्विजः॥
ते सर्व्वे पापनिर्म्मुक्ता विष्णुलोकञ्च प्राप्नुयुः॥"
इति वाराहे जलधेनुमाहात्म्यनामाध्यायः॥

जलनकुलः, पुं, (जले नकुल इव।) जलजन्तुविशेषः। धाड़िया इति उद्‌विड़ाल इति च भाषा। तत्पर्य्यायः। उद्रः २ जलमार्ज्जारः ३ जलाखुः ४ जलप्लवः ५। इति त्रिकाण्डशेषः। जलविड़ालः ६ नीराखुः ७। इति हारावली। ७६॥ पानीयनकुलः ८ वसी ९। इति हेमचन्द्रः॥

जलनिधिः, पुं, (जलानि निधीयन्तेऽस्मिन्निति। धा+"कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः। जलानां निधिरिति वा।) समुद्रः। इत्यमरः। १। १०। २०॥ (यथा, आर्य्याशप्तशत्याम्। ६१४।
"सरित इव यस्य गेहे शुष्यन्ति
विशालगोत्रजा नार्य्यः।
धारास्वेव स तृष्यति जलनिधिलहरीषु
जलद इव॥"
चतुःसंख्या समुद्रवाचित्वात्। यथा, सत्कृत्यमुक्तावल्याम्।
"वारे शीतकरं तिथौ जलनिधिं
भेऽश्विञ्च योगे द्वयम्॥" इति॥)

जलनिर्गमः, पुं, (गम+"ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति भावे अप्। जलानां निर्गमो वहिर्गमनं यस्मात्।) प्राकारगृहभित्त्यादिषु जलनिःसरणमार्गः। इति भरतः॥ देवकुलप्राकारादिषु जलनिःसरणद्वारम्। इति सर्व्वानन्दः॥ तत्पर्य्यायः। श्रमः २। इत्यमरः। १।१०।७॥ वक्रम् ३ पुटभेदः ४। इति स्वामी॥

जलनीली, स्त्री, (जलं नीलयतीति। नील+तत् करोतीति णिच्+ततः "कर्म्मण्यण्।"३।२।१। इत्यण्। ततो ङीप्।) शैवालम्। इत्यमरः। १। १०। ३८॥ (शैवालशब्देऽस्या विवृतिर्द्रष्टव्या॥)

जलन्धरः, पुं, (जलं ब्रह्मनेत्रच्युताश्रुजलं धरतीति। जल+धृ+वाहुलकात् खच् मुम् च।) असुरविशेषः। तस्योत्पत्तिकारणं यथा,—
इन्द्रः शिवं द्रष्टुं शिवलोकं गत्वा एकं भयानकं पुरुषं दृष्ट्वा तं पुनःपुनः पप्रच्छ ईश्वरः क गतः। स उत्तरं न ददौ इन्द्रः क्रुद्धस्तं वज्रेण जघान। ततो रुद्रस्तेजसा प्रजज्वाल। तत इन्द्रो भीतस्तं प्रणम्य तुष्टाव रुद्रस्तुष्ट इन्द्रदाहार्थोत्पन्नं भालनेत्रस्थवह्निं गृहीत्वा गङ्गासागरसङ्गमे प्राक्षिपत् ततः स वालरूपोभूत्वा रुरोद तस्य रोदनशब्देन सप्तलोका वधिरीकृतास्तच्छ्रुत्वा ब्रह्मा विस्मितस्तत्रागत्य तं वालं समुद्रक्रोड़े दृष्ट्वा तं पप्रच्छ कस्यायं पुत्रः समुद्रस्तं प्रणम्योवाच मम पुत्रः अस्य जातकर्म्मादि कुरु इत्युक्त्वा ब्रह्मा क्रोड़े ददौ स वालस्तस्य श्मश्रु दधार श्मश्रु धुन्वतो ब्रह्मणो नेत्राभ्यां जलमगमत् ब्रह्मा समुद्रमुवाच यस्मादनेन मम नेत्राभ्यां निर्गतं जलं धृतं तस्मादयं जलन्धरनामा अधुनैव सर्व्वशास्त्रवेत्ता रुद्रं विना सर्व्वभूतावध्यश्च भविष्यति इत्युक्त्वा शुक्रमाहूय तमासुरराज्ये न्यवेशयत् स कालनेमिसुतां वृन्दामुपयेमे। इति पाद्मोत्तरखण्डम्॥

जलपतिः, पुं, (जलस्य पतिः।) वरुणः। इति हेमचन्द्रः। २। १०२॥ (अस्य जलपतित्वकथा यथा, काशीखण्डे। १२। ८९—९५।
"ततस्तं तनयः दृष्ट्वा पितरं प्रणिपत्य च।
जगाम तूर्णं तपसे श्रीमद्वाराणसीं पुरीम्॥
तत्र तप्त्वा तपो घोरं लिङ्गं संस्थाप्य शाम्भवम्।
पञ्चवर्षसहस्राणि स्थितः पाषाणनिश्चलः॥
आविरासीन्महादेवस्तुष्टस्तपसा ततः।
उवाच कार्द्दमे! ब्रूहि कं ददामि वरोत्तमम्॥
कार्द्दमिरुवाच।
यदि नाथ! प्रसन्नोऽसि भक्तानामनुकम्पक!।
सर्व्वासामाधिपत्यं मे देह्यपां यादसामपि॥
इति श्रुत्वा महेशानः सर्व्वचिन्तितदः प्रभुः।
अभ्यषिञ्चत तं तत्र वारुणे परमे पदे॥
रत्नानामब्धिजातानामब्धीनां सरितामपि।
सरसां पल्वलानाञ्च वाप्यम्बुस्रोतसां पुनः॥
जलाशयानां सर्व्वेषां प्रतीच्याश्चापि वै दिशः।
अधीश्वरः पाशपाणिर्भव सर्व्वामरप्रियः॥")
समुद्रः। अप्पतिरित्यमरदर्शनात्॥

जलपारावतः, पुं, (जले पारावत इव।) पक्षिविशेषः। तत्पर्य्यायः। कोपी २ जलकपोतः ३। इति राजनिर्घण्टः॥

जलपित्तं, क्ली, (जलानां पित्तमिव।) अग्निः। इति शब्दरत्नावली॥

जलपिप्पली, स्त्री, (जलजाता पिप्पली।) पिप्पलीविशेषः। पनिसगा इति लोके। जलपिपरी इति हिन्दी भाषा। तत्पर्य्यायः। मत्स्याक्षी २ शारदी ३ तोयवल्लरी ४ मत्स्यादनी ५ मत्स्यगन्धा ६ लाङ्गली ७ शकुलादनी ८ अग्निज्वाला ९ चित्रपत्नी १० प्राणदा ११ तृणशीता १२ बहुशिखा १३। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। कषायत्वम्। मलशोधनत्वम्। व्रणकीटादिदोषरसदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"जलपिप्पल्यभिहिता शारदी शकुलादनी।
जातीरसं, क्ली, (जात्याः रसः इव रसो यस्य ।) बोलः । इति राजनिर्घण्टः ॥

जातु, व्य, (जन + तुन् । पृषोदरात् साधुः ।) कदाचित् । इत्यमरः । ३ । ४ । ४ ॥ (यथा, मनुः । २ । ९४ ।
"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥")
सम्भावितार्थः । (यथा, महाभारते । ५ । १०८ । २२ ।
"को जातु परभार्य्यां हि नारीं व्यालीमिव स्थिताम् ।
वायवेन यदि जानन् स्त्रीणां दोषो महात्मनः ॥")
गर्हार्थः । इति शब्दरत्नावली ॥ [रम् ॥"
("जातु निन्दसि गोविन्दं जातु निन्दसि शङ्क-
इति मुग्धबोधव्याकरणम् ॥)

जातुकं, क्ली, (जातु गर्हितं निन्दितं दूषितमित्यर्थः कं जलं यस्मादिति ।) हिङ्गु । इति शब्दचन्द्रिका ॥

जातुधानः, पुं, (धीयते सन्निधीयते इति धानं सन्निधानमस्य जातु गर्हितं । धानमभिधानमस्येत्येके ।) यातुधानः । राक्षसः । इत्यमरटीकायां रमानाथः ॥ (यथा, कालिकापुराणे ।
("जातुधानाः पिशाचाश्च कुष्माण्डा भैरवादयः ॥"

जातुषं, त्रि, (जतुनो विकारः । "त्रपुजतुनोः षुक् ।" ४ । ३ । १३८ । इति अण् षुक् च ।) जतुविकारः । जतुनिर्मितम् । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । १ । १२० ।
"अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति ।
जातुषाभरणस्येव रूपेणापि हि तस्य किम् ॥")

जातोक्षः, पुं, (जातश्चासौ उक्षा चेति । जातः प्राप्तदस्यावस्थः उक्षा इत्यर्थः । "अचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) उत्पन्न उक्षा । इत्यमरः । २ । ९ । ६२ ॥ उत्पन्नो वृषदम्यभावः । प्राप्तबलीवर्द्दभाव उक्षा । इति भरतः ॥

जात्य, त्रि, (जातौ भवः इति यत् ।) कुलीनः । श्रेष्ठः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ । १९ । ८ ।
"स जात्यकार्तस्वरजामिनश्वाजीव चन्द्रमाः ॥")
कान्तः । इति जटाधरः ॥ (यथा, महाभारते । ५ । ३३ । १२२ ।
"कातीव न भायते ज्ञातिमध्ये
महामणिर्जात्य इव प्रसन्नः ॥")

जात्यन्धः, त्रि, (जात्या जन्मनैव अन्धः ।) जन्मान्धः । यथा, मनुः । ९ । २०१ ।
"अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥"

जादो, त्रि, (जाद इत्यस्य जादो इतीतत्प्रयोगस्तु प्राकृतलङ्केश्वरमतम इति बोध्यम् ।) जातः । इति प्राकृतलङ्केश्वरः ॥

जानकी, स्त्री, (जनकस्य मिथिलाधिपस्यापत्यं स्त्रीत्वम् ङीप् च ।) सीता । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । २७३ । १ ।
"प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ ।
रक्षसा जानकी तस्य हृता भार्य्या बलीयसा ॥")

जानपदः, पुं, (जानेन जन्मना पद्यते इति अण् ।) जनः । (यथा, याज्ञवल्क्ये । २ । ३७ ।
"देयं चौराहृतं द्रव्यं राज्ञा जानपदाय तु ।
ददद्धि समवाप्नोति किल्बिषं यस्य तस्य तत् ॥"
जनपद एव । स्वार्थे अण् ।) देशः । इति मेदिनी । दे, ४ । ४८ ॥ जनपदे भवः । इति "उत्सादिभ्योऽञ् । ४ । १ । ८६ इत्यञ् । देशभवे, त्रि ॥ यथा, मनुः । ८ । ४१ ।
"जातिजानपदान् धर्मान् श्रेणीधर्मांश्च
धर्मवित् ॥")

जानु, क्ली, (जायते इति । जन् "दृसनिजनिचरिचटिभ्यो ञुण् ।" उणां १ । ३ । इति ञुण् ।) ऊरुजङ्घयोर्मध्यभागः । हाँटु इति भाषा ॥ (यथा, महाभारते । ४ । ३२ । ३६ ।
"तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना ॥")
तत्पर्य्यायः । ऊरुपर्व्व २ अष्ठीवत् ३ अष्ठीवान् ४ । इत्यमरः । २ । ६ । ७२ ॥ चक्रिका ५ । इति राजनिर्घण्टः ॥

जापः, पुं, (जप + भावे घञ् ।) जपः । इति जटाधरः ॥

जापकः, त्रि, (जपतीति । जप् + ण्वुल् ।) जपकर्त्ता । (यथा, महाभारते । १२ । १९९ । ३ ।
"जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत ।
किं फलं जपतामुक्तं क्व वा तिष्ठन्ति जापकाः ॥"
जपेन कृतं पापघ्नमित्यर्थः । जप् + अण् + स्वार्थे कन् । जपसम्बन्धि, त्रि । यथा, महाभारते । १२ । १९९ । ३९ ।
"अथवा सर्व्वमेवेह मामकं जापकं फलम् ॥")

जापनं, क्ली, (जप् + स्वार्थे णिच् + भावे ल्युट् ।) निरसनम् । निर्व्वर्त्तनम् । इति धरणिः ॥ (जपः । यथा, संवर्त्तसंहितायाम् । २०९ ।
"मुच्यते सर्व्वपापेभ्यो गायत्र्याश्चैव जापनात् ॥")

जाबाल:, पुं, (जबालाया अपत्यं पुमानिति । अण् ।) अजाजीव: । इत्यमर: । २ । १० । ११ । मुनिविशेष: । (यथा, ब्रह्मवैवर्त्ते । १ । १६ । १४ ।
"जाबालो याजलि: पैल: करथोऽगस्त्य एव च ।
एते वेदाङ्गवेदज्ञा: षोडशव्याधिनाशका: ॥"
उपनिषद्विशेष: । यथा, मुक्तिकोपनिषदि ।
"ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणि: ।
इयं [illegible] । यथा, रामचन्द्रस्तवराज प्रकरणे । (यात् ॥")
"अधीत्य कूटजाबालं ग्रामांतिं योनिमानु-
जाबालि:, पुं, (जबालाया अपत्यं पुमान् इति । इञ् ।) मुनिविशेष: । यथा, रामायणम् ॥
"सुयज्ञं वामदेवञ्च जाबालिमथ काश्यपम् ।"
(तथाच ब्रह्मवैवर्त्ते । २ । ४ । ७० ।
"अष्टावक्रो भरद्वाजश्चासुरिको देवलस्तथा ।
कैगीषव्योऽथ जाबालिर्यद्धुल्ला भर्गपूजित: ॥")
जामदग्न्य:, पुं, (जमदग्नेरपत्यं पुमान् इति । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) जमदग्निपुत्र: । परशुराम: । इति हेमचन्द्र: ॥ (यथा, देवीभागवते । ५ । ४१ ।
"मित्राशया जामदग्न्येन पूर्व्वं
छिन्नं शिरो मातुरिति प्रसिद्धम् ॥")
जामाता, [ऋ] पुं, (जायां माति मिमीते मिनोति वा । "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृ-" इति ।" उणां । २ । ९६ । इति निपातनात् साधु: ।) दुहितृपति: । इत्यमर: । २ । ६ । ३१ । जामाइ इति भाषा ॥ (यथा, हरिवंशे । ११६ । २५ ।
"जामाता समवतस्य कंसस्यारिन् हतो युधि ॥")
सूर्य्यावर्त्त: । धव: । इति मेदिनी । ते, ११० ॥
जामि:, स्त्री, (जम् + इण् । इन् निपातनात् वृद्धिश्च ।) स्वसा । कुलस्त्री । इत्यमर: । ३ । ३ । १४२ ॥ (यथा, मनु: । ३ । ५७ ।
"शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ॥")
जामी, स्त्री, (जामि + वा ङीष् ।) जामि: । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । ३६ । ७ ।
"[illegible] ॥")
जामेय:, पुं, (जाम्या अपत्यमिति । "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) भागिनेय: । इति हेमचन्द्र: ॥
जाम्बवं, क्ली, (जम्ब्वा: फलम् । "जम्ब्वा वा ।" ४ । ३ । १६५ । इत्यण् तस्य विभाषया न लुक् ।) जम्बूफलम् । इत्यमर: । २ । ४ । १९ ॥ (यथा, सुश्रुते । १ । ४६ ।
"[illegible] ॥")
स्वर्णम् । इति राजनिर्घण्ट: ॥ जाम्बव:, पुं । इति शब्दरत्नम् ॥
जाम्बवती, स्त्री, (जाम्बवत: अपत्यं स्त्री । [illegible]) कृष्णपत्नी । जाम्बवत्सुता । इति हेमचन्द्र: ॥ (यथा, हरिवंशे । १६ । ३१ ।
"तेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम् ॥")
नागदमनी । इति राजनिर्घण्ट: ॥
जाम्बवान्, [त्] पुं, (जम्बोर्वर्णं जाम्बवं तदस्यास्तीति मतुप् मस्य व: । पृषोदरादित्वात् साधु: । जम्बुतुल्यश्यामत्वादस्य तथात्वम् ।) ऋक्षराज: । स ब्रह्मपुत्र: । यथा, रामायणे ।
"ऋक्षराजस्य पुत्रोऽभ्र महाप्राज्ञ: सुदुर्ज्जय: ।
पितामहसुतश्चात्र जाम्बवानिति विश्रुत: ॥")
(यथाच, हरिवंशे । ३८ । ३५ ।
"धात्रा कुमारमादाय सुतं जाम्बवतो नृप ! ॥")
जाम्बवी, स्त्री (जाम्बवस्याकारोऽस्त्यस्या: इति ।) नागदमनी । इति राजनिर्घण्ट: ॥
जाम्बुवान्, [त्] पुं, (जाम्बवान् पृषोदरात् साधु: ।) जाम्बवान् । इति भरतो द्विरूपकोषश्च ॥
जाम्बूनदं, क्ली, (जम्बूनद्यां भवमिति । अण् ।) स्वर्णम् । धुस्तूर: । इति राजनिर्घण्ट: ॥ स्वर्णविशेष: । यथा । "मेरुमन्दरमन्दरस्थजम्बूफलानामत्युच्चनिपातनविशीर्णानां अनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनामनदी इलाहृतं वहति, तस्या उभयोस्तीरयोर्मृत्तिका जम्बूरसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम स्वर्णं भवति ।" इति श्रीभागवतम् ॥
जायकं, क्ली, (जयति अपरं गन्धमिति । जि + ण्वुल् ।) कालीयकम् । कालिया इति ख्यातं पीतवर्णसुगन्धिकाष्ठम् । इत्यमर: । २।६।१२५ ॥
जाया, स्त्री, (जायते पुत्ररूपेणात्मा अस्यामिति । जन् + यक् आत्वञ्च ।) भार्य्या । इत्यमर: । २ । ६ । ६ ॥ (यथा, मनु: । ९ । ८ ।
"पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुन: ॥")
जायाजीव:, पुं, (जाया आजीव: जीवनोपायो यस्य इति । जायया जीवतीति वा । जीव + अच् । जायाया: सङ्गीतनर्त्तनादिना जीवनादस्य तथात्वम् ।) नट: । इत्यमर: । २।१०।१२ ॥
जायानुजीवी, [न्] पुं, (जायया अनुजीवतीति । अनु + जीव + णिनि: ।) नट: । बकमची । इति मेदिनी । ने, १५५ ॥ वेश्यापति: । इति शब्दरत्नावली ॥ दुस्थ: । इति हेमचन्द्र: ॥
जायापती, पुं, (जाया च पतिश्चेति तौ ।) भार्य्यापती । मागभातार इति भाषा । नित्यद्विवचनान्तोऽयं शब्द: । इत्यमर: । २ । ६ । ३८ ॥
जायी, [न्] पुं, (जै + णिनि: । यद्वा, जि + णिनि: ।) ध्रुवकभेद: । यथा,—
"जायीति भाषा ध्रुवको द्वाविंशत्यक्षरान्वित: ।
धर्म्मकामार्थदस्तासु शृङ्गारेऽभीप्सितो रसे ॥"
इति सङ्गीतदामोदर: ॥
(यथा, महाभारते । ३ । ३५ । ८ ।
"ध्रुवं वाच सम्राडहं मध्ये दुर्य्योधनादिक: ॥")
जायु:, पुं, (जयति रोगान् इति । जि + उण् ।) औषधम् । इत्यमर: । २ । ६ । ५० ॥ (जय-शीले । जयशीले, त्रि ।)
जार:, पुं, (जीर्य्यति स्त्रिया सह सौन्दर्य्यं कर्त्तरि घञ् ।) उपपति: । इत्यमर: ॥ (यथा, याज्ञवल्क्ये । २ । ३० ।
"जारं चौरेत्यभिवदन् दाप्य ...
जारयति नाशयति इति । जृ + ...
हन्ता । यथा, ऋग्वेदे । १ । ६६ ॥
"यमोह जातो यमो जनित्वं ...

जारज:, त्रि, ([illegible]
ड: ।) उपपतिजातसन्तान: । ...
६ । ३६ ॥ (यथा, मनु: । ३ ॥
कुल्लूकभट्टधृतटीकायाम् ।
"अस्मिने जारज: कुण्डो ...
जारणी, स्त्री, (जारयति परिणाम् ...
जृ + णिच् + ल्यु: । ततो ङीप् ॥ ...
इति राजनिर्घण्ट: ॥
जारी, स्त्री, (जारयति चीर्णं ...
णिच् + अच् + गौरादित्वात् ङीष् ।
विशेष: । इति मेदिनी । रे, ३९ ।
भाषा ॥
जारूथ्य:, पुं, (जरूथं मांसं ...
+ ष्यञ् ।) त्रिगुणदक्षिणाकः ...
महाभारते । ३ । २९० । ७० ।
"ततो देवर्षिसहित: चरितं ...
दशाश्वमेधानाजह्रे ...
जालं, क्ली, (जलति आच्छादयति ...
संवरणे + करणे घञ् । यद्वा, ...
इति । जल + "ग्रीवे ।" ४ । २ । १२ ...
सूत्रनिर्मितमत्स्यादिनिर्मितजालादि ...
भाय: । तत्पर्य्याय: । आनाय: २ ।
३ । ३ । १६८ ॥ जालकम् १ । इति
रत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् ।
"वंशावलम्बनं यद् यो विस्तारो गुण ...

तस्यागतस्य खलस्य च ...
गवाक्ष: । (यथा, रघु: । ६ । ३१ ।
"प्रासादजालैर्जलवेणिरम्यां
रेवां यदि प्रेक्षितुमस्ति काम: ।")
क्षारक: । स तु ...
कुड्मलश्च । दम्भ: । समूह: । इति ...
ले, १८ ॥ (यथा, रघु: । ७ । ११ ।
"तस्मै सुवर्णजालकं
एकाग्रमेव स्थिरजातजालम् ।")
पैत्तलौहादिनिर्मितजालकं ...
भट्टि: । १ । ८ ।
"जालान्तरिभुक्तमत्स्यमावी
प्रासादजालैरभिविस्मयन्त: ।")
इन्द्रजालम् । इति हेमचन्द्र: । १ । ३१ ...
जाल:, पुं, (जालयति आमान्तरं ...
कोतीति । जल संवरणे + णिच् ...
यद्वेति ।" ३ । १ । १३४ । इत्यच् ...
इति मेदिनी । ले, १८ ॥

संवरणे + भावे घञ्। जालेन
यति प्रकाशते इति। के +
स्फुटकलिका।
६८।
विनानिलेन
मालतीनाम्॥")
सारसुन्दरी॥
त्यमरः। २। ४।
लायः। व्यागायः।
(यथा, सुश्रुते।

यं पटलं गते।
नृ जालकानि च
पश्यति॥")
वली॥ (यथा, शाकु-

वदने घर्माम्भसां जालकं
यमिताः मर्व्याकुला
सर्ज्जाः॥"
जालाकृतिद्रव्यविशेषः॥ यथा,
६।
ग्य जालकं पञ्जरं तथा।
र्ां कपोतीश्च समीच ताम्॥")
जाल संवरणे + भावे घञ्।
न कायति प्रकाशते इति।
कफलम्। इति मेदिनी॥ के, ८२॥
न वंशलौहादिनिर्म्मितजाला-
न कायतीति। कै + कः।)
त हेमचन्द्रः। ४। ७८॥
(जालं करोतीति। कृ + ण्वुल्।
कौ वा।) मर्कटकः। इति हेम-
२७६॥ जालकर्त्तरि, त्रि॥
ति, (जालकं लोमगवाक्षस्तदस्यस्या
त इनिठनौ।" ५।२।११५। इति इनि-
) मेषी। इति हेमचन्द्रः। ४।३।४५॥
पुं, रोगविशेषः। तस्य लक्षणं यथा,
त् कर्षति यः शोफस्तद्रूपाकवान्।
जानकः पित्तात् स ज्ञेयो जालगर्द्दभः॥"
त्वान् स्वतनुपाकवान्। पित्तज्वरलिङ्ग कर्म्मणा
भावस्यानुक्तत्वात्। अयमपि
ः ४४ अथ विसर्पेस्थगर्द्दभिकाजाल-
मानां चिकित्सा।
...गर्द्दभी जालगर्द्दभम्।
...क्रियया भाषयेद्भिषक्।
...सर्व्वेगात्रुरोगके:॥"
इति भावप्रकाशः॥
...स्त्री, (... गौरादि ...) दंष्ट्र-
...। तत्पर्य्यायः। ...
...
इति शब्दरत्नावली॥
...पुं, ... इति हेमचन्द्रः।
...।२।२३। ...

यत्र भगवती विश्वमुखीमूर्त्त्या विराजते।
यथा, देवीभागवते। ७। ३०। ७६।
"जालन्धरे विश्वमुखी तारा किष्किन्ध्यपर्व्वते॥"
जालन्धरोऽभिजन एषामिति। अण्।) तद्-
देशवासिनि पुं भूम्नि। (दैत्यविशेषः। यथा,
काशीखण्डे। २१। १०६।
"पुरा जालन्धरं दैत्यं ममापि परिकम्पनम्।
पादाङ्गुष्ठाग्ररेखोत्थं चक्रं दृष्ट्वा हरोऽहरत्॥"
ऋषिविशेषः। इति व्याकरणम्॥)
जालपात् [द्] पुं, (जालमिव पादौ यस्य।)
हंसः। इति त्रिकाण्डशेषः॥ (यथाह सश्रुतः।
१४६।
"टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा॥")
जालप्राया, स्त्री, (जालस्य प्रायो बाहुल्यं यत्र।)
अङ्गरक्षिणी। इति हेमचन्द्रः। ३। ४३३॥
लोहार साँजोया इति भाषा॥
जालवर्व्वूरकः, पुं, (जालाकारो वर्व्वूरकः। शाक-
पार्थिवादिवत् समासः।) वर्व्वूरवृक्षविशेषः।
तत्पर्य्यायः। छत्राकः २ स्थूलकण्टकः ३ सूक्ष्म-
शाखः ४ तनुच्छायः ५ रन्ध्रकण्टः ६। अस्य
गुणाः। रुच्यत्वम्। वातामयकफनाशित्वम्।
पित्तदाहकारित्वम्। कषायत्वम्। उष्णत्वञ्च।
इति राजनिर्घण्टः॥
जालिकः, पुं, (जालेन जीवतीति। जाल + "वेतना-
दिभ्यो जीवति।" ४।४।१२। इति ठन्।
यद्वा, जालेन चरतीति। "पर्पादिभ्यः ष्ठन्।" ४।
४।१०। इति ठन्।) कैवर्त्तः। इति त्रिकाण्ड-
शेषः॥ वागुरिकः। जालेन मृगबन्धनकर्त्ता
इत्यमरः। २।१०।१४॥ मर्कटकः। इति हेम-
चन्द्रः। ४। २७७॥ (ऐन्द्रजालिकः। इति
व्याकरणम्॥)
जालिकः, त्रि, (जालेन जीवतीति। जाल + ठन्।)
ग्रामजाली। जालोपजीवी। इति मेदिनी। के, ८४॥
जालिका, स्त्री, (जालं जालवदाकृतिरस्ति
अस्याः। जाल + "अत इनिठनौ।" ५। २।
११५। इति ठन्।) वस्त्रविशेषः। गिरि-
गारः। (जलमेवेति स्वार्थे अण्। ततो जालं
सलिलं उत्पत्तिस्थानत्वेनास्त्यस्या इति ठन्।)
जलौका। विधवा। भटानामङ्गरक्षिका...
रचिणी। इति मेदिनी। के, ८४॥
जालिनी, स्त्री, (जालं चित्रकर्म्मवत्रुसादौ
विद्यतेऽस्यामिति। इनिरन्तो ङीप्।) चित्र-
...शाला। इति हेमचन्द्रः। ४। ६५॥ (जालं
...। इति ...।) कोषा-
...लतायन्त्रमस्यां ...इति।
... राजनिर्घण्टः॥ (यथाहः
... सुश्रुते ...
...
"... ..."
...
...
...

जायन्ते। तद्यथा, ...
कच्छपिका जालिनी विनता पुत्त्रिणी मसूरिका
अलजी विदारिका विद्रधिका चेति।"
"जालिनी तीव्रदाहा तु मांसजालसमावृता॥")
जाली, स्त्री, (जालं जालाकृतिरस्ति अस्याः
अच्। ततो गौरादित्वात् ङीष्।) ज्योत्स्नी।
इत्यमरः। २। ४। ११८॥ झिङ्गा। इति
ख्याता। पटोलः। इति राजनिर्घण्टः॥
जाल्मः, त्रि, (जालयति दूरीकरोति हिताहित-
ज्ञानमिति। जल + णिच् + बाहुलकात् मः।)
पामरः। (यदुक्तम्।
"स्वयं विश्राम्यतां जाल्म! स्कन्धं ते यदि बाधति।
न तथा बाधते स्कन्धं यथा बाधति बाधते॥")
क्रूरः। असमीक्ष्यकारी। इति मेदिनी। मे,
१३॥ (यथा, माघे। १५। ३३।
"त्वयि पूजनं जगति जाल्म!
कृतमिदमपाकृते गुणैः।
हासकरमघटते नितरां
शिरसीव कङ्कतमपेतमूर्द्धजे॥")
जावकं, क्ली, (जवति सुष्यति सङ्गन्धादिकमिति।
जव + ण्वुल्। पृषोदरादित्वात् सस्य वत्वम्।)
कालीयकनामगन्धद्रव्यम्। इत्यमरटीकासार-
सुन्दरी॥
जाहकः, पुं, घोंघः। घोंघ इति भाषा।
मार्ज्जारः। खट्टा। कारण्डिका। इति मेदिनी।
के, ८२॥ विलेशयजन्तुविशेषः। तत्पर्य्यायः।
गात्रसङ्कोची २ मण्डली ३ मधुकण्टकः ४ काम-
रूपी ५ विरूपी ६ चिलवागः ७। इति राज-
निर्घण्टः॥
जाह्नवी, स्त्री, (जह्नोरपत्यं स्त्री। जह्नु + अण् +
ङीप्।) गङ्गा। इति हेमचन्द्रः। ४। १४०॥
एतन्नामकारणं यथा,—
"जाह्नद्वारा पुरा दृष्ट्वा जह्नुः संपीय कोपतः।
तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता॥"
इति ब्रह्मवैवर्त्ते ...
...यथा,—
...
...
...
...
...
...
...
...
...
...
...
...
...
...
...
...
...

"चन्द्रोपरागसमये सूर्य्ये दशगुणं ततः ।
पुण्येऽप्यर्द्धोदये काले ततः शतगुणं फलम् ।
सर्व्वेषामेव सङ्कल्पं वैष्णवानां विपर्य्ययः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

जि, जये । अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सकं च-अनिट् ।) अत्र उत्कर्षः स्वीकारश्च । उत्कर्षेऽकर्म्मकः । जयन्ति मधुनाकूले रघः-केलयः । मत्तैरसङ्घैरजयत् सुरालयमिति कादम्बरी । जयति शत्रुं बली । अनभिधानादस्मात् तुवन्तो: प्रयोगाभावः । किञ्च तयोः स्थाने तिवन्तीति । किञ्च तुपः स्थाने तातङ् इष्यते । यथा, भावगम्यलयः कोऽपि जयताद्वाग्गोचरः । इति दुर्गादासः ॥

जिः, त्रि, (जयतीति । जि+बाहुलकात् डिः ।) जेता । पिशाचे, पुं । इत्येकाक्षरकोषः ॥

जिगत्नुः, पुं, (गच्छतीति । गम+"गमेः सन्वच्च ।" उणा ३ । ३१ । इति क्नुः सन्वत्कार्य्यञ्च । अनुदात्तोपदेशे इत्यादिना मलोपः ।) प्राणवायुः । इत्युणादिकोषः ॥

जिगमिषा, स्त्री, (गन्तुमिच्छा । गम+सन्+अ । ततष्टाप् ।) गमनेच्छा । इति व्याकरणम् ॥

जिगीषा, स्त्री, (जेतुमिच्छा । जि+सन्+अ । ततष्टाप् ।) जयेच्छा । (यथा, महाभारते १ । ७१ । ६ ।
"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् ॥")
व्यवसायः । प्रकर्षः । इति मेदिनी । षे,२६ ॥

जिघत्सा, स्त्री, (अत्तुमिच्छा । अद् भक्षणे+सन्+अः । "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्लृ ।) क्षुधा । इति हेमचन्द्रः ।३।५७ ॥

जिघत्सुः, त्रि, (अत्तुमिच्छुः । अद्+सन्+"लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्लादेशः । ततः "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) क्षुधितः । इत्यमरः । ३ । १ । २० ॥

जिघांसकः, त्रि, (जिघांसति हन्तुमिच्छतीति । हन+सन्+ण्वुल् ।) हननेच्छुकः । इति व्याकरणम् ॥

जिघांसा, स्त्री, (हन्तुमिच्छा । हन्+सन्+"अभ्यासाच्च ।" ७ । ३ । ५५ । इति कुत्वम् । "अज्झनगमां सनि ।" ६ । ४ । १६ । इति दीर्घः । ततः अप्रत्ययस्ततःस्त्रियां टाप् ।) हननेच्छा । इति व्याकरणम् ॥ (यथा, मनुः । ११ । २०६ ।
"जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥")

जिघांसुः, पुं, (हन्तुमिच्छुः । हन्+सन्+"सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) शत्रुः । इति हेमचन्द्रः । ३ । ३९३ । हननेच्छौ, त्रि । यथा, भट्टिः ।
"प्रयाम्यहं द्रष्टुं जिघांसुः ॥"
(यथाच, महाभारते । ३ । १५४ । १८ ।
"जिघांसवः क्रोधवशाः समन्तात् परिवव्रुः ॥")

जिघ्रः, त्रि, (जिघ्रतीति । घ्रा गन्धोपादाने+"पाघ्राध्माधेट्दृशः शः ।" ३ । १ । १३७ । इति शः ।) घ्राणकर्त्ता । यथा, शाण्डिल्यसूत्रे ।
"स्वामी निजमितोऽप्यसृजति मनोजिघ्र-
मधुव्रतः ॥"

जिङ्गिनी, स्त्री, वृक्षविशेषः । तत्पर्य्यायः । झिङ्गिनी २ झिङ्गी ३ सुनिर्य्यासा ४ प्रमोदिनी ५ । (यथा, गारुडे १८४ अध्याये ।
"जिङ्गिन्येरण्डकं सद । शूकशिम्बीगमल्लिकम् ।
शीतोदकश्च सम्प्राप्तो वाद्यत्रीवायवी हरेत् ॥"
यथाच, वाभटे सूत्रस्थाने १५ अध्याये ।
"रोध्रशावरकरोध्रपलाशा
जिङ्गिनी सरलकट्फलयुक्ताः ।
कुत्सिताम्बककदली गतशोकाः
सैलवालुपरिपेलवमोचाः ॥")
अस्या गुणाः । मधुरत्वम् । उष्णत्वम् । कषायत्वम् । योनिशोधनत्वम् । कटुत्वम् । व्रणहृद्रोगवातातीसारनाशित्वम् । पटुत्वञ्च । इति भावप्रकाशस्य पूर्व्वखण्डे १ मे भागे ॥

जिङ्गी, स्त्री, मञ्जिष्ठा । इत्यमरः । २ । ४ । ६० ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठचिकित्सायाम् ।
"व्याधु जिङ्गी मद्यातिला विशाला द्विपिमन्त्रकम् ॥")

जिज्ञासा, स्त्री, (ज्ञातुमिच्छा । ज्ञा+सन्+अः । स्त्रियां टाप् ।) ज्ञातुमिच्छा । यथा,—
"अथातो ब्रह्मजिज्ञासा ।"
इति शारीरकप्रथमसूत्रम् ॥
तत्पर्य्यायः । अनुयोगः १ प्रश्नः २ पृच्छा ३ निरूपणा ४ । इति जटाधरः ॥

जिज्ञासितः, त्रि, (जिज्ञासास्य जाता । तारकादित्वात् इतच् । यद्वा ज्ञा+सन्+कर्म्मणि क्तः ।) ज्ञातजिज्ञासः । पृष्टः । विचारितः । यथा, श्रीभागवते १ । ५ । ४ ।
"जिज्ञासितमधीतञ्च ब्रह्म यत्तत् सनातनम् ॥"
"किञ्च यत् सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं विचारितं अधीतं अधिगतं प्राप्तञ्चेत्यर्थः ।" इति श्रीधरस्वामी ॥

जिज्ञासुः, त्रि, (ज्ञातुमिच्छुः । ज्ञा+सन्+"सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) आत्मज्ञानेच्छुः । यथा, श्रीभगवद्गीतायां ७।१६ ।
"चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्ज्जुन ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥"
सामान्यबोधेच्छुकश्च ॥

जिज्ञास्यः, त्रि, (जिज्ञास्यते इति । ज्ञा+सन्+कर्म्मणि यत् ।) जिज्ञासितव्यः । जिज्ञासनीयः । (विचार्य्यम् । यथा, भागवते । २ । ९ । ३५ ।
"एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥"
"आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्य्यम् ।" इति श्रीधरस्वामी ॥)

जितः, पुं, (जितं जयमस्यास्तीति । अच् ।) अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥

जितः, त्रि, (जि+कर्म्मणि क्तः ।) जयः । तत्पर्य्यायः । पराभूतः २ अभिभूतः ३ भग्नः ४ पराजितः ५ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । १८ ।
"इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥"
"अभिजितैव जयति सर्व्वान् लोकान्"
... मनुः ॥)

जितकाशिः, पुं, (... [illegible] ... काशते इति । काश+इन् ।) [illegible] भारतटीकायां नीलकण्ठः ॥

जितकाशी [न्] त्रि, (जितेन काशते इति । काश+णिनिः ।) जयशील । पर्य्यायः । जिताहवः २ । इति ३ । ४७० ॥ (यथा, हरिवंशे । १७ ।
"अजितोऽहं रणे [illegible]
वाचं प्रोवाच संक्रुद्धो यदा [illegible]

जितनेमिः, पुं, (जिता नेमिर्येन ।) निर्म्मितदण्डः । तत्पर्य्यायः । आषाढः । इति हेमचन्द्रः । ३ । ४८० ॥

जितश्मश्रुः, पुं, (जितं श्मश्रुर्येन ।) नापितः । इति हेमचन्द्रः । ३ । ३१ [illegible] पराश्रये, त्रि ॥

जिताक्षरः, त्रि, ([illegible] राणि येन ।) ज्ञाताक्षरचयः । वर्णानुपूर्व्वीदृष्टिमात्रेणैवाक्षरबोधेन पाठचमत्कारप्रसिद्धिः ॥

जितामित्रः, पुं, (जिता अमित्रा [illegible] बाह्याभ्यन्तरशत्रवश्च येन इति ।) विष्णुः । शब्दरत्नावली ॥ (यथा, [illegible] १४९ । ६९ ।
"अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥")
जितोऽमित्रः शत्रुर्येन ।) [illegible]
(यथा, मार्कण्डेये । ३४ । ११३ ।
"अस्य प्रदाता वेदश्च ब्रोमित्रः [illegible]
जितामित्रो नृपो यत्र बलवान् [illegible]

जितारिः, पुं, (जिता अरयः कामक्रोधादयः [illegible]) बुद्धः । इति त्रिकाण्डशेषः । [illegible] इति हेमचन्द्रः । १ । ३६ ॥ (... [illegible]) विदितः पुत्राणामन्यतमः । [illegible] रते । १ । ९५ । ५० ।
"अविक्षितः परिक्षिच्च शबलाश्व [illegible]
आदिराजो विराजश्च शल्मलिश्च [illegible]
उच्चैःश्रवा भङ्गकारो जितारिश्चाष्टमः [illegible]
जितशत्रौ, त्रि ॥

जिताष्टमी, स्त्री, ([illegible]) कर्त्तव्य स्त्रिया या अष्टमी ।) शौर्णदशमी । सैव जीमूताष्टमी । यथा, [illegible] ज्ञायाष्टम्यां जीमूतवाहनपूजा । प्रदोषव्यापिनी ग्राह्या । भविष्योत्तरे ।
"इषे मासासिते पक्षे अष्टमी या तिथि [illegible]
पुत्रसौभाग्यदा स्त्रीणां ख्याता सा [illegible]
शालिवाहनराजस्य पुत्रो जीमूतवाहन [illegible]

…रीभिः पुत्रसौभाग्यलिप्सया ॥
…ः पूज्यो जीमूतवाहनः ।
…ाय प्राज्ञी चतुरमिकाम् ॥"
…सरे ।
…ा प्रदोषे यत्र चाष्टमी ।
…स्त्रीभी राजा जीमूतवाहनः ॥"
…दिने प्रदोषव्यापिनी अष्टमी तत्रैव
…ी चेत् परदिने त्रिसन्ध्यव्यापित्वात् ।
…दोषायामौ उदयगामिन्यां तदुक्तं
…विन्यौ ।
…ीव्रतं चा… दिते प्रग्राह्ये
…ष्टमी चाश्विनसागमपक्षे ।
…दिनेश-
…तपुत्त्रिका सा ॥" इति ।
…र्न भोक्तव्यम् ।
…र्यां याः स्त्रियोऽर्घं घि
भुञ्जते ।
… वैधव्यञ्च भवेद्ध्रुवम् ॥"
इति वचनात् ।
…ग्रस्ततम्तकारचिन्तामणिः ॥
…त श्राहवो युद्धं येन ।) जित-
…हेमचन्द्रः । ३ । ४००
…(जितानि वशीकृतानि इन्द्रि-
…ीनि येन ।) वशीकृतेन्द्रियः ।
…दान्तः २ शान्तः ३ । इति
…शब्दचिन्तामणिधृतवचनम् ।
…यथा, शब्दचिन्तामणिधृतवचनम् ।
…च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
…ायति वा स विज्ञेयो जितेन्द्रियः ॥")
…, पुं, (जितेन्द्रियं आह्वयते स्पर्द्धते
…गा + ह्वे + कः ।) कामशर्दिकः ।
…जनिर्घण्टः ॥
…, (चयमेषामतिशयेन जित् जयशीलः ।
…तमप् ।) जितुमः । मिथुनराशिः । इति
…यतरम् ॥ जयशीलानां मध्ये उत्तमश्च ॥
…स्त्री, (जि + "विपूर्यविनीयजित्यामुञ्ज-
…दलिषु ।" ३ । १ । ११७ । इति क्यप् ।)
…ः । इति हेमचन्द्रः । ३।५५४ ॥ (सिद्धान्त-
…गुदीमते तु पुंलिङ्गान्तोऽयं शब्दः ॥)
…ः, त्रि, (जयतीति । जि + "इण्नशजि-
…र्तिभ्यः क्वरप् ।" ३।२।१६३ । इति क्वरप् ।)
…ाः । इत्यमरः । २ । ८ । ७७ ॥ (यथा,
…ना । …
…षे । ८ । ८ ।
…परीतभूपालो भ्रातृभिर्जित्वरैर्नृपाम् ।
…परिहतभूपालो …
…

जिनयोनिः, पुं, मृगः । इति शब्दरत्नावली ॥
जिनसद्म, [न्] क्ली, (जिनानां सद्म गृहम् ।) जिनगृहम् । तत्पर्य्यायः । चैत्यः २ विहारः ३ ।
इति हेमचन्द्रः । ४ । ६० ॥
जिनेन्द्रः, पुं, (जिनानां इन्द्रः ।) बुद्धः । इति हलायुधः ॥
जिम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, जिमित्वा जिन्त्वा । इति दुर्गादासः ॥
जिरि, र न हिंसायाम् । इति कविकल्पद्रुमः ॥ जिरि, र, वैदिकः । (स्वां-परं-सकं-सेट् ।) रेफोपधः । र, न, जिरिणोति । इति दुर्गादासः ॥
जिव, इ प्रीणने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) धवर्गी । इ, जिम्वते । जिम्वति लोकः पितरम् । इति दुर्गादासः ॥
जिवाजिवः, पुं, (जीवञ्जीवः पृषोदरादित्वात् साधुः ।) जीवञ्जीवपक्षी । इति शब्दरत्नावली ॥
जिव्रिः, पुं, (जीर्यत्यनेनेति । ज्य वयोहानौ + "जीर्यतेः क्रिन् रश्च वः ।" उणां ५ । ४६ । इति क्रिन् । इत्वादिकार्य्ये रेफस्य च वः । वाहुलकात् हलि चेति न दीर्घः ।) समयः । पक्षी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (जीर्णे, त्रि । यथा, ऋग्वेदे ।१।७०।५ । [भरन्त ॥"]
"वि त्वा नरः पुरुत्रा सपर्य्यन् पितुर्न जिव्रेर्वि वेदो
जिष, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वा वेट् ।) उ, जेषित्वा सकं-सेट् । उदित्त्वात् … इति दुर्गादासः ॥
जिष्णुः, पुं, (जयतीति । जि जये + "ग्लाजिस्थश्च ग्स्नुः ।" ३ । २ । १३९ । इति ग्स्नुः ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥ (यथा, महाभारते । ५ । ७० । १३ ।
"विष्णुर्विक्रमणादेवो जयनाज्जिष्णुरुच्यते ।
शाश्वतत्वादनन्तश्च गोविन्दो वेदनाद्गवाम् ॥")
इन्द्रः । (यथा, अथर्ववेदे । ११ । ८ । १८ ।
"जयंश्च जिष्णुश्चामित्रा जयतामिन्द्रमेदिनौ ॥")
अर्ज्जुनः । (यथा, महाभारते । ४ । ४४ । २१ ।
"यद्दं दुरासो दुर्द्धर्षो दमनः पाकशासनिः ।
तेन देवमनुष्येषु जिष्णुर्नामास्मि विश्रुतः ॥"
… यथा, हरि-
…पुन्नागमध्यमः ।
…
"तद्गम्भीरमध्यं …
अभिमानी … जिष्णुः …
…

१४० । इति मनुः ।) कुटिलः । (यथा, म…
भारते । १ । १०२ । १८ ।
"सक्रोधामर्षजिह्मभ्रूकषायीकृतलोचनाः ॥")
मन्दः । इति मेदिनी । मे, १३ ॥
जिह्मगः, पुं, (जिह्मं कुटिलं वक्रमित्यर्थः यथा स्यात् तथा गच्छतीति । गम + डः ।) सर्पः । (यथा, महाभारते । १ । ८ । १६ ।
"स लब्ध्वा दुर्ल्लभां भार्य्यां पद्मकिञ्जल्कवर्चसम् ।
व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः ॥"
जिह्मं मन्दं गच्छतीति ।) मन्दगे, त्रि । इति मेदिनी । गे, २५ ॥
जिह्ममोहनः, पुं, (जिह्मं कुटिलं यथा तथा मुह्य-तीति । मुह + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति ल्युः । यद्वा, जिह्मस्य कुटिलस्य सर्पस्य मोहनः विषमोहनः । भक्ष्यत्वात् ।) भेकः । इति शब्दरत्नावली ॥
जिह्मशल्यः, पुं, (जिह्मं कुटिलं शल्यं यस्मात् ।) खदिरः । इति जटाधरः ॥
जिह्व, क्ली, (जिह्वं निपातनात् मस्य वत्वे साधुः ।) तगरमूलम् । इति रत्नमाला ॥
जिह्वः, पुं स्त्री, (हूयते आहूयतेऽनेनेति । ह्वे + बाहु-लकात् डप्रत्ययेन द्वित्वादीति साधुः ।) जिह्वा । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे । ११२ । ६५ ।
"हिमवत्सङ्गे जिह्वेन वासुकिः कथयिष्यति ॥")
जिह्वलः, त्रि, (जिह्वेन जिह्वया लाति आदत्ते परद्रव्यादीति । जिह्व + ला + कः ।) लुब्धः । लोलुपः । यथा, आहुतस्त्वे ।
"आर्त्तं हत्वा परस्यापि भुञ्जते ये च जिह्वलाः ।
पतन्ति नरके घोरे गुर्म्मपिष्टोदर क्रियाः ॥"
जिह्वा, स्त्री, (जयति रसमनयेति । जि + "शेवा-यह्वजिह्वाग्रीवाप्वामीवाः ।" उणां । १ ।१५४ । इति वन् प्रत्ययेन हुगागमे निपातनात् साधुः ।)
रसज्ञानेन्द्रियम् । जिभ् इति भाषा । तत्-पर्य्यायः । रसज्ञा २ रसना ३ …
…

"उदरे पच्यमानानामाध्मानाद्रुक्मारवत् ।
करवीरनिभमांसानां मारो जिह्वा प्रजायते ॥"

इति सुश्रुते शारीरस्थाने ४र्थे अध्याये ॥)

जिह्वानिर्लेखनं, क्ली, (जिह्वाया निर्लेखनं संस्कारः ।) जिह्वामार्जनम् । जिवछोलनाम इति भाषा । जिह्वामार्जनद्रव्यम् । जिभ्छोलना चियाडि इति भाषा । तत् दशाङ्गुलं कोमलं श्लक्ष्णं सुवर्णरूप्यताम्रशोहनिर्मितं जिह्वामलापकर्षणे प्रशस्तम् । तस्य गुणः । वक्त्रवैरस्यजिह्वाश्रित-मलनाशित्वम् । आरोग्यरुचिकारित्वञ्च । इति राजवल्लभः ॥

("जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च ।
तन्मलापहरं शस्तं मृदुश्लक्ष्णं दशाङ्गुलम् ।
मलवैरस्यदौर्गन्ध्य-शोफजाड्यहरं सुखम् ॥"

अन्यान्यपि रोगजनकता यथा,—

"जिह्वानिर्लेखनादेवं भक्ष्यभोजनादभिघातनः ।
[illegible] ॥
[illegible] ।
[illegible] ॥"

इति वाभटे सिद्धस्थाने पञ्चदशोऽध्याये ॥)

जिह्वाप, पुं, (जिह्वया पिबतीति । पा + "आतो-ऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कुक्कुरः । व्याघ्रः । बिडालः । भल्लूकः । इति हेमचन्द्रः ॥ चित्रकव्याघ्रः । इति त्रिका० ॥

जिह्वामलं, क्ली, (जिह्वाया मलम् ।) जिह्वा-मलमन्थनम् । तद्द्रव्यम् । कुङ्कुमम् २ । इति जिह्वाकर्षणे ॥

जिह्वामूलीय, पुं, (जिह्वामूले भवः । "जिह्वा-मूलाङ्गुलेश्छः ।" ४ । ३ । ६२ । इति छः ।) कवर्गादेशे । वर्णविशेषस्य सः इति संज्ञा कृता । स तु कवर्गे विसर्गस्थाने भवति । यथा [illegible] । अर्द्धविसर्गं जिह्वामूलीयम् । इति व्याकरणम् ॥

"[illegible] ।
जिह्वामूलीय इवैव [illegible] ॥"

इति सुपद्मव्याकरणटीका ॥

जिह्वारदः, पुं, (जिह्वा रद इव यस्य ।) पक्षी । इति शब्दरत्नावली । १६ ।

जिह्वारोगः, पुं, (जिह्वाया रोगः ।) मुखरोगा-न्तर्गतरोगविशेषः । तत्र जिह्वारोगाणां निदानलक्षणादि यथा ।

"[illegible] ।
[illegible] ॥"

अथ [illegible] ।
[illegible]
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible]
[illegible] ॥

अयं रोगो लोके जलीति ख्यातः । जाड़ीति वङ्गभाषा ॥ * ॥ कफजमाह ।

कफेन गुर्वी बहलाचिता च
मांसोद्गतैः शाल्मलिकण्टकाभैः ।

बहला स्थूला । मांसोद्गतैः मांसजकण्टकैः ॥ * ॥ अलासमाह ।

जिह्वातले यः श्वयथुः प्रगाढ़ः
सोऽलाससंज्ञः कफरक्तमूर्त्तिः ।
जिह्वां सतद्धां स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम् ॥

प्रगाढ़ः प्रकर्षेण गाढ़ो दारुणः । कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः । जिह्वास्तम्भेन वायुरप्यत्र बोद्धव्यः । भृशं पाकेन पित्तञ्च । अतस्त्रिदोषजोऽयम् । असाध्यश्च-चायम् ॥ * ॥ उपजिह्विकामाह ।

जिह्वाग्ररूपः श्वयथुश्च जिह्वा-
मुन्नाम्य जातः कफरक्तयोनिः ।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति ॥
जिह्वाग्ररूपः जिह्वाग्राकृतिः ॥" * ॥

अथ जिह्वारोगाणां चिकित्सा ।

"जिह्वागतविकाराणां शस्तं शोणितमोक्षणम् ।
गुडूचीपिप्पलीनिम्बकवलः कटुभिः सह ॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक्चिकित्सितम् ।
कण्टकेष्वनिलोत्थेषु तत् कार्य्यं भिषजा खलु ॥
पित्तजे परिघृष्टे तु निःसृते दुष्टशोणिते ।
प्रतिसारणगण्डूषनस्यञ्च मधुरं हितम् ॥
कण्टकेषु कफोत्थेषु लिखितेष्वसृजः क्षये ।
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे ॥
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत् ।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत् ॥
शोणिताराभयाशुण्ठीचूर्णमेतत् प्रघर्षणम् ।
उपजिह्वाप्रशान्त्यर्थमेभिस्तैलञ्च साधयेत् ॥"

इति भावप्रकाशः ॥

जिह्वालिट् [ह्] पुं, (जिह्वया लेढीति । लिह + क्विप् ।) कुक्कुरः । इति भूरिप्रयोगः ॥

जिह्वाशल्यः, पुं, (जिह्वाया शल्यमिव । अभिधानात् दुःखम् ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥

जिह्वास्वादः, पुं, (जिह्वया स्वाद आस्वादनम् ।) लेहनम् । इति हेमचन्द्रः । ३ । ८८ ॥

जीनः, त्रि, (जिनाति जीर्य्यतीति । ज्या वयो-हानौ + "गत्यर्थेति ।" क्तः । ग्रहिज्येति सम्प्र-सारणम् । हल इति दीर्घः । ल्वादिभ्य इति नत्वम् ।) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ (चर्मपुटे । यथा, मनुः । ११ । १३८ ।
"जीनकार्म्मुकवस्ताविन् पृथग् दद्यात् विशुद्धये ॥")

जीमूतः, पुं, (जयति आकाशमिति । जि + "जेर्मूट्चोदात्तः ।" उणा० ३ । ९१ । इति क्तः । [illegible] ।) मेघः । (यथा-भागवते । १० । ८५ ।
"जीमूतैः [illegible] ।
[illegible] ॥")

जीवनं जलं मूतयति बध्नातीति ।) पृषो-दरादित्वात् साधुः । इति पुरुषोत्तमः ॥ (यथा, महाभारते । ६ । ५८ । १ ।
"राजानमन्वयुः [illegible]
मुस्ता । देवताडवृक्षः । इत्यमरः ॥ इन्द्रः । भृतिकरः । घोषकलता ।
इन्द्रः ॥ (यथा, [illegible]
"धामार्गवमयेक्षाकु जीमूतं [illegible]
सूर्य्यः । यथा, महाभारते । ३ ।
स्याष्टोत्तरशतनामकीर्त्तने । ३२ ।
"वरुणः सागरोऽ [illegible]
ऋषिविशेषः । यथा, महाभारते ।
"जीमूतस्याच विप्रर्षेस्तपस्वी [illegible]
मल्लविशेषः । भीमसेनस्तु [illegible]
नियुद्धेन निहतवान् । यथा, [illegible]
४ । १२ । २२ ।
"ततस्तु तत्र सङ्ग्रामे भीमो मल्लं
जीमूतं नाम तं तत्र मल्लं [illegible]
क्षणान्मन्त्रालो दशाहस्य पौत्रः । [illegible]
वंशे । ३२ । २५ ।
"दशार्हस्य सुतो व्योमा व्योम्नो [illegible]

वपुष्मतः सुतः । स तु शाल्मलिद्वीप-विशेषः । यथा, महाभारते ११ [illegible]
"शाल्मलस्येश्वराः सप्त सुतास्ते [illegible]
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
अस्य वर्षेस्तु एतन्नामैव विख्याताः ।
तत्रैव,—
"जीमूतस्य च [illegible]
अयनचत्वारिंशदक्षरशिरोविशेषः ।
दिव्यं छन्दःप्रस्तारे द्रष्टव्यम् ।)

जीमूतकूटः, पुं, (जीमूतो मेघः कूटे शिखरे यस्य, [illegible] अत्युन्नतत्वादस्य तथात्वम् ।) पर्वतः । इति हारावली । ५१ ॥

जीमूतमूलं, क्ली, (जीमूतस्य मूलमस्य ।) शटी । इति रत्नमाला ॥

जीमूतवाहनः, पुं, (जीमूतो मेघो वाहनं यस्य ।) इन्द्रः । मेघवाहन इत्यमरटीका ॥ नामकग्रन्थनिर्माणकर्त्ता । (वंशे [illegible]
[illegible]
जीमूतवाहनपदं [illegible]
परिभद्रकुलोद्भवः श्रीमान् जीमूतवाहन [illegible]
दायभागं व्यवहारमातृकां [illegible]
शालिवाहनसूनुश्च सुतः ।
शङ्खपालस्य भार्य्यायां [illegible]
[illegible]
कौमुदीपस्य सुतः । यथा, [illegible]
९२ । ३३ ।
"अथ नवमेऽहनि राजसूय [illegible]
जीमूतवाहनं तं च ज्ञात्वा [illegible]

जीमूतवाही, [न्] पुं, (जीमूतं वहति [illegible] धूमः । इति [illegible]

नि। क्षिपजीर्णिमादित्यस्य तथात्वम्।) भूकः।
न हेमचन्द्रः॥

, पुं, (जरतीति। जॄ वयोहानौ+"जीरौ च।"
उणा० २।२३। इति रक् ईकारान्तादेशः।)
रकः। जारणः। इति मेदिनी। रे, ३९॥
णुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
रन्तरायति, त्रि। यथा, ऋग्वेदे।१।१००।१२।
कुल्हेव जीरादि प्रवतां जीरं भूतसमर्पणम्।"
जीरं क्षिप्रगमनम्।" इति दयानन्दभाष्यम्॥)
क:, पुं, (जीर+संज्ञायां कन्।) धन्यवत्-
र्णविशेषः। जीरा इति भाषा। तत्पर्य्यायः।
रणः २ अजाजी ३ कणा ४। इत्यमरः।
।९।३६॥ जीर्णः ५ जीरः ६ दीप्यः ७
रकः ८ अजाजिका ९ वह्निशिखः १०
गधः ११ दीपकः १२। इति जटाधरः॥
स्य गुणाः। कटुत्वम्। उष्णत्वम्। दीपन-
म्। वातगुल्माध्मानातीसारग्रहणीक्रिमि-
रत्नित्वञ्च। इति राजनिर्घण्टः॥ रुचिस्वर-
गाहित्वम्। गन्धयुक्तत्वम्। कफवातनाशित्वम्।
ाके कटुत्वम्। तीक्ष्णत्वम्। लघुत्वम्। पित्त-
र्दनत्वञ्च। इति राजवल्लभः॥ अपि च।
श्वेतजीरा कृष्णजीरा कालोञ्जी इति नामानि
गुणाश्च।
"जीरको जरणोऽजाजी कणा स्याद्दीर्घजीरकः।
कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः॥
कालाजाजी तु सुषवी कालिका चोपकालिका।
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका॥
उपकुञ्ची च कुञ्ची च बृहज्जीरक इत्यपि।
जीरकत्रितयं रूक्षं कटुकं दीपनं लघु॥
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्।
ज्वरघ्नं पाचनं बल्यं वृष्यं रुच्यं कफापहम्॥
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्॥"
इति भावप्रकाशः॥
रयः, पुं, (जीरकः पृषोदरादित्वात् कस्य यः।)
जीरकः। इति राजनिर्घण्टः॥
रिका, स्त्री, (जीर्य्यतीति। जॄ+बाहुलकात्
रिक्। ईकारान्तादेशः। ततः स्वार्थे कन्।)
वंशपत्रीतृणम्। इति राजनिर्घण्टः॥
र्णि, स्त्री, (जीर्य्यति सेति। जॄ ष् वयोहानौ+
गत्यर्थेति क्तः। निष्ठातस्य नत्वम्।) शैलजम्।
इति राजनिर्घण्टः॥ (वयःप्रकारविशेषः। यथा,
"तद्वयो यथा स्थूलभेदेन त्रिविधम्। बालं
मध्यं जीर्णमिति।" इति चरके विमानस्थाने-
ऽष्टमेऽध्याये॥)
र्णः, पुं, (जीर्य्यत्यनेनेति। जॄ+करणे क्तः।)
जीरकः। इति राजनिर्घण्टः॥ (वृक्षः। इति
हेमचन्द्रः।४।१८०॥)
र्णः, त्रि, (जीर्य्यतीति। जॄ+"गत्यर्थाकर्म्मक-
श्लिषेति।" ३।४।७२। इति कर्त्तरि
क्तः।) वृद्धः। इत्यमरः।२।६।४२॥ पुरा-
तनः। इति हेमचन्द्रः॥ (यथा, देवीभाग-
वते।१।२०।१७।

"तस्मात् देयं धर्म्मात्मा देवी जीर्णमिवाम्बरम्॥")
जलयुक्तनयः। ... विशिष्टः। पक्वः। पाक-
विशिष्टः॥ *॥ (यथा, भागवते।७।९।
"जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनाम्।
रणात् प्रत्यागतं शूरं शस्यञ्च गृहमागतम्॥")
अथ जीर्णद्रव्याणि।
"नारीकेलफलानि तण्डुलमथ क्षीरं रसाले हितं
जम्बीरोत्थरसो हृते मधुमिनः सर्पिस्तु मोचा-
फले।
गोधूमेषु च कर्कटी हिततमा मांसाशये काञ्जिकं
नारङ्गे गुडमब्दकस्य कथितं पिण्डारके कोद्रवः॥
पिष्टान्ने सलिलं पियालफलके पथ्या हिता माषके
गव्यं क्षीरभवं तु तक्रमुचितं कोषातु कीलमद्वे।
मत्स्ये चूतफलं लवङ्गशमनं मद्यस्तु पानात्यये
तैलं पौष्करणे कटुप्रशमनं शेषांस्तु वृष्णा
जयेत्॥
पनसे कदलं कदले च घृतं
घृतपाकविधावपि जम्बुरसः।
तदुभद्रयशान्तिकरं लवणं
लवणेषु च तण्डुलवारि परम्॥
नारिकेलफलतालबीजयोः
पाचनं च इह तण्डुलं विदुः।
ते वदन्ति सुनयोऽपि तण्डुलान्
क्षीरवारि परिपाचयत्यपि॥
दाडिमामलकतालतिन्दुकी-
बीजपूरलवलीफलान्यपि।
वाकुलेन फलेन च पाचयेत्
पाकमेति बकुलं स्वमूलतः॥
मधूक-मालूर-दमादनानां
पारूषखर्जूरकपित्थकानाम्।
पाकाय पेयं पिचुमर्द्दबीजं
घृतेऽपि तक्रं प्रवदन्ति पथ्यम्॥
गोधूममाषच्छरिमस्यसतीनमुद्ग-
माषो भवेदिति च मातुलमक्रकेण।
खर्ज्जूरिकाविषकशेरुसितासु भस्तं
शृङ्गाटके मधुफलेष्वपि भद्रमुस्तम्॥
पिष्टितपनसयोः स्वादाम्रशैलेन पाकः
क्षपरमधिपयोपिपृथीरयोः सैन्धवेन।
चिपिटपरिणतिः स्यात् पिप्पलीदीप्यकाभ्या-
मपहरति तुषाम्बो वैदलानामजीर्णम्॥
कर्पूरपूगीफलनागवल्ली-
काश्मीरजातीफलधातकीनाम्।
कस्तूरिका शिक्षकनारिकेल-
जलं पचत्याशु समुद्रफेनः॥
श्यामाकनीवारकुलत्थषष्टि-
निष्पावकङ्गुद्दधिमस्तकस्तु।
चिञ्चाफलत्वो तिलतैलयोगात्
जटामदनादस्य निहन्त्ययाम्रम्॥
कर्कोटशृङ्गाटकबालकद्री-
खर्ज्जूरखण्डा अपि नागरेण।
पलाशभस्मासु तथार्कजो वा
रसो निहन्यादतमिञ्चुलानम्॥

कर्मेण तैलायुत चोरकेन
कोष्णाम्बुना वा घृतमेति पाकम्।
निम्बादितैलान्यपि काञ्जिकेन
गर्भस्य मध्या पलमामलक्याः॥
किमत्र चित्रं बहुमांसमत्स्य-
भोगी सुखी स्यात् परिपीय तक्रम्।
इक्षुतं नैम्बलबिल्वपत्र-
मांसेन मनुष्यं परिपाकमेति॥
कपोतपारावतनीलकण्ठ-
कपिञ्जलानां पिशितानि जग्ध्वा।
कासस्य मूलं परिपेयमुष्णं
सुखीभवेन्ना बहुशो न भूतम्॥
योषे रसाना सुरभीयवन्तु-
मस्तेन कोष्णेन विपाकमेति।
शठस्य चूर्णेन हयारिनारी-
पयोदधिक्षीरमुपैति पाकम्॥
चटो वैमनाराक्षनक्रेन फेनी-
शमं पर्पटः शिग्रुबीजेन याति।
कणाश्मन्तो लड्डुका पूपकादि-
र्विपाको भवेच्छुल्वलीमक्षयोश्च॥
स्वाविद्गोधा शल्लकाचित्रतैलादृ-
यावन् क्षारात् कोलकूर्म्मादयोऽपि।
जीर्य्यन्त्येते पायसी सद्यएवात्
सामुद्रादप्यारनालं सुखाय॥
तप्तं तप्तं हेम वा तारमग्नौ
तोये क्षिप्तं सप्तकृत्वस्तदम्भः।
पीत्वाकश्चं दीर्घकालेऽमयग्न-
मम्भो पीयं शीघ्रमेवं लघाति॥
पालङ्किकाकेसुककारवल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानाम्।
उपोदकालाबुपटोलकानां
सिद्धार्थको भेषजस्य मस्ता॥
शुण्ठीसतीनस्य च नागरङ्ग-
जम्बीरयोः कोद्रवको निहन्ता।
जरामिरा गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं बहुशो न भूतम्॥
पटोलवंशाङ्कुरकारवल्ली-
फलान्यलाबूनि बहूनि जग्ध्वा।
धारोदकं शङ्खरोऽभिपीय
भोक्तुं पुनर्वाञ्छति तावदेव॥
विपच्यते शूरणको गुडेन
तथालुकं तण्डुलतोयपानात्।
समीरणेरिव निशारणोन्न
सुखेन वृष्यं परिपाकमेति॥
चञ्चुकसिद्धार्थकवास्तुकानां
गायत्रिसारकथितेन पाकः।
शाकानि सर्व्वाण्युपयान्ति पाकं
धारेव सद्यस्तिलनालकेन॥
आम्रातकोदुम्बरपिप्पलीनां
फलानि च प्लक्षवटादिकानाम्।
स्युः शामनं पर्युषितोदकेन
पियालमज्जा च कटुत्थकेन॥

स्नेहाज्जीर्णं रोगिणां मुद्गयूषं
ज्वालां सुस्तो हन्ति वैरेचकानाम् ।
माषो भूयान्निम्बमूलेन पाक-
श्विषा सुखत्वस्तो चूर्णयोगात् ॥
उष्णेन शीतं शिशिरेण चोष्ण-
मन्नेन च क्षारगणो गुणाय ।
स्नेहेन तीक्ष्णं वमनातियोगे
सिता श्रिता स्यादिति काशिराजः ॥
ताम्बूलमध्यस्थितचूर्णतेन
संदह्यते यस्य मुखं नरस्य ।
तैलेन वा क्षौमलकाञ्जिकेन
सुखाय गण्डूषमसौ विदध्यात् ॥
शीतोदकं नस्यनरोगहारि
नारीपयश्चाञ्जनरुग्निनाशि ।
शलोदकं धूमगदे प्रशस्तं
धात्रीप्रलेपोऽतिविरेचनेषु ॥
श्वास्य मांसं श्वसनोऽनुकूलं
प्रवालसुभिः सुरतावसाने ।
क्षीरोक्षणात्सैन्धवसाधितन्तु
च्छागाङ्गसुक्तं सुरतातिरेके ॥
श्रवणपूरणके तिलतैलतः
श्रवणपूरणमेव सुखं विदुः ।
कवलकेषु गदेष्वथ कारयेत्
कवलमार्द्रकणद्रवजं पुनः ॥”
इति जीर्णमञ्जरी ।

जीर्णज्वरः, पुं, (जीर्णः पुरातनो ज्वरः ।) पुरातनज्वररोगः । अथ जीर्णज्वराधिकारः । तत्र जीर्णज्वरस्य सामान्यलक्षणमाह ।
“यो द्वादशभ्यो दिवसेभ्य ऊर्द्ध्वं
दोषत्रयस्त्रिगुणेभ्य ऊर्द्ध्वम् ।
कृत्वा तनौ तिष्ठति मन्दवेगो
भिषग्भिरुक्तो ज्वर एष जीर्णः ॥” * ॥
जीर्णज्वरस्यैव विशेषं वातबलासकमाह ।
“नित्यं मन्दज्वरो रूक्षः शूनः कृच्छ्रेण सिध्यति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी ॥”
वातबलासकाख्यो ज्वरोऽस्यास्ति इति वातबलासकी । नर ईदृग्भवेत् । शूनः शोथी । श्लेष्मभूयिष्ठो बहुलश्लेष्मकः ॥ * ॥
अथ जीर्णज्वरस्य सामान्यचिकित्सा ।
“जीर्णज्वरी नरः कुर्य्यात्सोपवासं कदाचन ।
लङ्घनात् स भवेत् क्षीणो ज्वरस्तु स्याद्बली यतः ॥
पुराणेऽपि ज्वरे दोषा यद्यपेयुः पुनस्तथा ।
लङ्घयेत्तं नरं पश्चात् पूर्व्ववत् कारयेत् क्रियाम् ॥”
तथा पूर्व्ववत् ॥ * ॥
“विदारिकाकाकामरकाम्ललानां
क्वाथं [illegible]
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्द्दितपीनसेषु ।
कृष्णद्वयाद्यं [illegible] ॥”
[illegible] ॥ * ॥

अमृतायाः कषायस्तु शीतलीकृतमीरितम् ।
मधुपादयुतं पीतं जीर्णज्वरहरं परम् ॥
पिप्पलीमधुसंमिश्रं गुडूचीस्वरसं पिबेत् ।
जीर्णज्वरकफप्लीहकासारोचकनाशनम् ॥
जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुडपिप्पली ।
कासाजीर्णारुचिश्वासहृत्पाण्डुज्वररोगनुत् ॥
द्विगुणः पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मतः ।
पिप्पली मधुसंयुक्ता मेदःकफविनाशिनी ॥
श्वासकासज्वरहरी पाण्डुशोथोदरापहा ।
आमलं चित्रकं पथ्या पिप्पली सैन्धवं तथा ॥
चूर्णितोऽयं गणो ज्ञेयः सर्व्वज्वरहरः परः ।
भेदी रुचिकरः श्लेष्महर्त्ता दीपनपाचनः ॥”
इति आमलक्यादिचूर्णम् ॥ * ॥
“द्राक्षामृता शटी शृङ्गी मुस्तकं रक्तचन्दनम् ।
नागरं कटुका पाठा भूनिम्बः सदुरालभः ॥
उशीरं धान्यकं पद्मं बालकं कण्टकारिका ।
पुष्करं पिचुमर्दश्च दशाष्टाङ्गमिदं स्मृतम् ॥
जीर्णज्वरारुचिश्वासकासश्वयथुनाशनम् ॥”
इति द्राक्षाद्यष्टादशाङ्गक्वाथः ॥ * ॥
“त्रिवृद्ध्या पञ्चवृद्ध्या वा सप्तवृद्ध्याथवा कणाः ।
पयःक्षीरेण संपिष्टा पिबेद्दश दिनानि हि ॥
तथैव न्यूनयेदेता एव विंशतिवासरान् ।
पिबतां ज्वरशान्तिः स्यात् पाण्डुरोगश्च शाम्यति ॥
कासः श्वासोऽग्निमान्द्यञ्च कफाधिक्यञ्च नश्यति ।
यथादिवृद्धिर्यथाकफवृद्धिः । दुग्धवृद्धिर्यथाग्निवृद्धिः ॥
इति वर्द्धमानपिप्पली ॥ * ॥
“वातश्लेष्मज्वरोक्ता स्यात् क्रिया वातबलासके ।
जीर्णे ज्वरे कफे क्षीणे दाहतृष्णासमन्विते ॥
पयः पीयूषवत्पथ्यं तरुणे तु विषोपमम् ।
चन्दनाद्यं हितं तैलं शोषाधिकारकीर्त्तितम् ॥
तथा नारायणं तैलं जीर्णज्वरहरं परम् ॥”
इति जीर्णज्वराधिकारः । इति भावप्रकाशः ॥

जीर्णदारुः, पुं, (जीर्णमिव दारु यस्य ।) वृद्धदारकभेदः । विधाराविशेष इति लोके । तत्पर्य्यायः । जीर्णफञ्जी २ सुपुष्पिका ३ अजरा ४ सूक्ष्मपर्णी ५ । अस्य गुणाः । गौल्यत्वम् । पिच्छिलत्वम् । कफवातकासामदोषनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥

जीर्णपत्रिका, स्त्री, (जीर्णानि पत्राण्यस्याः । कप् ततष्टापि अत इत्वम् ।) वंशपत्रीतृणम् । इति राजनिर्घण्टः ॥

जीर्णपर्णः, पुं, (जीर्णानि पर्णानि यस्य ।) कदम्बः । इति राजनिर्घण्टः ॥ (जीर्णं पर्णं पत्रम् ।) पुरातनपत्र, क्ली । (जीर्णं पर्णं ताम्बूलं इति विग्रहे पुरातनताम्बूले च । यदुक्तं वैद्यके ।
“पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः ।
जीर्णपर्णं हरेदायुः शिराबुद्धिप्रणाशिनी ॥”)

जीर्णबुध्नः, पुं, (जीर्णोऽवृद्धो बुध्नो मूलमस्य ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

जीर्णबुध्नकं, क्ली, (जीर्णो बुध्नो मूलं यस्य । ततः कप् ।) पद्मकन्दम् । इति राजनिर्घण्टः ॥ केकोटमुगा इति भाषा ॥

जीर्णवज्रं, क्ली, (जीर्णं वज्रं [illegible]
वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

जीर्णवस्त्रं, क्ली, (जीर्णं पुरातनं वस्त्रम् ।) पुरातनवस्त्रम् । तत्पर्य्यायः । पटच्चरः । इत्यमरः । २ । ६ । ११५ ॥

जीर्णा, स्त्री, (जीर्य्यत्यवश्यमिति । [illegible]) स्थूलजीरकः । इति राजनिर्घण्टः ॥

जीर्णिः, स्त्री, (जॄ + क्तिन् ।) जरा । इत्यमरः । ३ । २ । ८ ॥

जीर्णोद्धारः, पुं, (जीर्णानां उद्धारः संस्कारः ।)
यथा, विष्णुधर्म्मोत्तरद्वितीयकाण्डे ।
“यस्य राष्ट्रस्तु विषये देवेश्म [illegible]
तस्य सोऽस्ति सदा स्थं देवेश्म [illegible]
कृत्वा शीर्णस्य संस्कारं तथा [illegible]
द्विगुणं फलमाप्नोति नात्र [illegible]
विष्णुरहस्ये ।
“पतितस्य च यः कर्त्ता
विष्णोरायतनस्येह [illegible]
अग्निपुराणे ।
“पतितं पतमानन्तु तथार्द्धस्फुटितं नरः ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥”
देवीपुराणे ।
“मूलाच्छतगुणं पुण्यं
तस्मात् सर्व्वप्रयत्नेन जीर्णस्योद्धारमाचरेत् ॥”
हयशीर्षपञ्चरात्रे ।
“वापीकूपतडागानां सुरधाम्नां तथैव च ।
प्रतिमानां सभानाञ्च संस्कर्त्ता यो [illegible]
पुण्यं शतगुणं तस्य भवेन्मूलात् [illegible]
प्रतिष्ठाया विधिः [illegible]
प्रायः श्रीहयशीर्षोक्तिरनुसारेण दैवतैः ।
देवालयप्रतिष्ठा च ख्याता ललितेन [illegible]
श्रीमूर्त्तिस्थापनेनैव संपूर्णा सा विधिः [illegible]
देवगृहं देवतायाः प्रतिष्ठाविधिना सह ।
संस्कार्य्यं मनुजानान्तु समुदायोक्तकर्म्म [illegible]
इति श्रीहरिभक्तिविलासे २० ।

जीर्व्विः, पुं, (जीर्य्यति छिन्नीभवत्यनेन । “जृशॄस्तृजागृभ्यः क्विन् ।” उणां ४ । ५४ । इति कर्त्तरि क्विन् ।) कुठारः । इति कौमुदीमुणादिवृत्तिः ॥ (जीर्य्यतीति । क्विन् ।) शकटम् । कायः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

जीव, ऋ प्राणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) ऋ, अजीजिवत् [illegible] प्राणः प्राणधारणम् । जीवति लोकः । इति दुर्गादासः ॥

जीवः, पुं, (जीवनमिति । जीव + “इगुपधज्ञाप्रीकिरः कः ।” ३ । १ । १३५ । इति कः ।) बृहस्पतिः । इत्यमरः । २ । ८ । ११९ । (यथा, [illegible] १०४ । ७२ ।
“त्वमेव चिन्तय सखि ! नोतर्ष इति [illegible]
स्वकार्य्ये मुह्यते लोको यथा जीवे [illegible]

"इगुपधज्ञेति ।"
प्राणी । (यथा,

ानि चतुष्पदाम् ।
जीवस्य जीवनम् ॥")
ऽव महाभिस्ड्घः ।

न्धको विषतुष्टिकः ।
र्णको जीव इत्यपि ॥"
पूर्व्वखण्डे प्रथमे भागे ॥)
नी । घे, ८ ॥ (यथा,
४ ।
र्थं जीवभूतोऽसि मे यतः ।
तं त्रिषु लोकेषु यास्यसि ॥")
॥ चैतन्यः । तत्पर्य्यायः ।
२ पुद्गलः ३ अन्तर्यामी ५
त्रकाण्डशेषः । (यथा, भग-
टीकायां श्रीधरस्वामिपादाः ।
संसारिणं जीवं वस्तुतः सर्व्व-
मेव विद्धि ॥") तस्य स्वरूपं

रूपञ्च सन्ततं तत्फलप्रदः ।
ावान् श्रीकृष्णः प्रकृतेः परः ॥
रूपञ्च कर्म्म तेन भवेत् सति ।
सं भुङ्क्ते आत्मा निर्लिप्त एव च ॥
तबिम्बञ्च देही जीवः स एव च ।
ह्मदेही स जीवः परिकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
भागवते । १२ । १८४ । १७ ।
स्वामि वृथायामचैतन्यं न विद्यते ॥")
ति घटावच्छिन्नाकाशवत् शरीरत्रित-
न्नं चैतन्यम् । केयाञ्चिन्मते दर्पणस्यसुख-
मवत् बुद्धिस्थचैतन्यप्रतिबिम्बम् ॥ (जीव-
लोकानन्तर्य्याम्यात्मकरूपेणेति । जीव+
+अच् । विष्णुः । यथा, महाभारते ।
१५९ । ६८ ।
यो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ॥"
यनविशिष्टे, त्रि । यथा, महाभारते । १२ ।
८८ । ८३ ।
इते वा त्वयि जीवे वा यदा भोक्ष्यति वै जनः ॥")
क्ली, (जीव+भावे घञ् ।) जीवितम् ।
मेदिनी । वे, ८ ॥ (यथा, भागवते ।
२ । १० ।
यस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्म्मभिः ॥"
ीवस्य जीवनस्य च पुनर्हर्म्मानुष्ठानद्वारा
नभिन्नं इह प्रसिद्धः स्वर्गादिः सोऽर्थो न
इति ।" इति तट्टीकायां श्रीधरस्वामी ॥)
कः, पुं, (जीवयति आरोग्यं करोतीति । जीव
+णिच्+ण्वुल् ।) अष्टवर्गान्तर्गतौषधविशेषः ।
तत्पर्य्यायः । कूर्च्चशीर्षः २ मधुरकः ३ ऋङ्गः ४
। २ । ४ । १२२ ॥ जीवनः

प्रियः ११ चिरञ्जीवी १२ मधुरः १३ मङ्गल्यः १४
कूर्च्चशीर्षकः १५ हृस्वाङ्गः १६ आयुष्मान् १७
जीवदः १८ बलदः १९ । अस्य गुणाः । मधु-
रत्वम् । शीतत्वम् । रक्तपित्तानिलक्षयत्व-
दाहज्वरनाशित्वम् । शुक्रश्लेष्मविवर्द्धनत्वञ्च ।
इति राजनिर्घण्टः ॥ बलकारित्वम् । कार्श्य-
वातनाशित्वम् । तस्य रूपं यथा,—
"जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ ।
रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ ॥
जीवकः कूर्च्चकाकारः ऋषभो वृषशृङ्गवत् ।
जीवकर्षभकस्थाने विदारीमूलम् ॥"
इति भावप्रकाशः ॥ * ॥
प्रापकः । पीतशालः । क्षपणः । इति मेदिनी ।
के, ६५ ॥
जीवकः, त्रि, (जीवति प्रभुसेवादृत्त्या इति । जीव
+ण्वुल् ।) सेवकः । वृद्ध्याजीवी । जीवी ॥
(यथा, महाभारते । १३ । १४१ । ६६ ।
"त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः ॥")
अहितुण्डिकः । इति मेदिनी । के, ६५ ॥
जीवजीव, पुं, (जीवेन भक्ष्यक्षुद्रकीटादिना जीव-
तीति । जीव+अच् । यद्वा, जीवञ्जीव+पृषो-
दरात् साधुः ।) जीवञ्जीवपक्षी । इति शब्द-
रत्नावली ॥
जीवञ्जीवः, पुं, (जीवं जीवयति विषदोषं नाशय-
तीति । कृत्यल्युटो बहुलमिति बाहुलकात्
खच् ।) चकोरपक्षी । इत्यमरः । २ । ५ । ३५ ॥
(अपरः पक्षिविशेषः । विषादिविकृतस्यान्नादेः
परीक्षार्थमस्यावश्यकत्वं भवति । यथा, वाभटे
सूत्रस्थाने ७ अध्याये १६ ।
"हंसः प्रस्खलति ग्लानिर्ज्जीवञ्जीवस्य जायते ।
चकोरस्याक्षिवैराग्यं क्रौञ्चस्य स्यान्मदोदयः ॥")
वृक्षविशेषः । इति मेदिनी । वे, ५९ ॥
जीवत्तोका, स्त्री, (जीवत् तोकं अपत्यं यस्याः ।)
जीवत्पुत्त्रिका । तत्पर्य्यायः । जीवसूः २ ।
इति हेमचन्द्रः ॥
जीवत्पतिः, स्त्री, (जीवन् पतिर्यस्याः ।) सधवा ।
इति हेमचन्द्रः ॥
जीवत्पितृकः, पुं, (जीवन् पिता यस्य इति कप् ।)
विद्यमानपितृकः । यथा,—
"अमावास्यां गयाश्राद्धं दक्षिणासुखभोजनम् ।
न जीवत्पितृकः कुर्य्यात् कृतेऽपि पितृहा भवेत् ॥"
इति तिथ्यादितत्त्वम् ॥
जीवथः, पुं, (जीवत्यनेनेति । जीव+"शीङ्शपि-
रुगमिवञ्चिजीवि प्राणिभ्योऽथः ।" उणां ३ ।
११३ । इति अथः ।) प्राणः । कूर्म्मः । मयूरः ।
मेघः । धार्म्मिके चिरायुषि च त्रि । इत्युणादि-
कोषः ॥
जीवदः, पुं, (जीवं जीवनं ददाति औषधादि-
प्रयोगेणेति । दा+कः ।) वैद्यः । विहिट् ।
इति मेदिनी । दे, २९ ॥ जीवनदातरि, त्रि ॥
जीवदात्री, स्त्री, (जीवं जीवनं ददातीति । दा+
तृच् ङीप् च ।) ऋद्धिः । इति राजनिर्घण्टः ॥

जीवधनं, ... इति त्रिकाण्डशेषः ...
दिकम् । इति त्रिकाण्डशेषः । जीव+करणे
जीवनं, क्ली, (जीव्यतेऽनेनेति । जीव+करणे
ल्युट् ।) वृत्तिः । (यथा, भागवते । १।१३।४४ ।
"अहस्तानि सहस्तानामपदानि चतुष्पदाम् ।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥"
"जीवनं जीविकेति ॥" तट्टीकायां श्रीधरस्वामी ॥)
जलम् । (यथा, आर्य्यासप्तशत्याम् । ४६२ ।
"यमुनाया इव तस्याः सखि ! मलिनं जीवनं
मन्ये ॥"

जीव+भावे ल्युट् ।) प्राणधारणम् । इति
मेदिनी । ने, ६६ ॥ (यथा, हठयोगप्रदी-
पिकायाम् । २ । ३ ।
"यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते ॥"
"प्राणान् हन्ति जगत्प्राणो जीवनं हन्ति
जीवनम् ।
किमाश्चर्य्यं चारभूमौ प्राणदा यमदूतिका ॥"
इत्युद्भटः ॥)
हैयङ्गवीनम् । इति शब्दचन्द्रिका ॥ मज्जा ।
इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशी-
खण्डे । २९ । ६५ ।
"जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी ॥")
जीवनः, पुं, (जीवयति सेवनादिना । जीव+
कर्त्तरि ल्युः ।) जीवकौषधम् । वातः । इति
राजनिर्घण्टः ॥ क्षुद्रफलकवृक्षः । इति शब्द-
चन्द्रिका ॥ पुत्त्रः । इति हेमचन्द्रः ॥ (सर्व्वान्
प्राणरूपेण जीवयतीति । जीव+णिच्+कर्त्तरि
ल्युः । विष्णुः । यथा, महाभारते । १३।१४९।११२ ।
"वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः ॥"
शिवः । महाभारते । १३ । १७ । १२१ ।
"निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ॥")
जीवनकं, क्ली, (जीव्यतेऽनेन । जीव+करणे ल्युट् ।
ततः स्वार्थे कन् ।) अन्नम् । इति हेमचन्द्रः ॥
जीवनयोनिः, स्त्री, (जीवनस्य योनिः कारणम् ।)
यत्नविशेषः । स तु अतीन्द्रियः शरीरे प्राण-
सञ्चारकारणम् । इति भाषापरिच्छेदः ॥
जीवनहेतुः, पुं, (जीवनस्य हेतुरुपायः ।) जीव-
नोपायः । स च दशविधः । यथा,—
"विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः ।
वृत्तिर्भैक्षं कुसीदञ्च दश जीवनहेतवः ॥"
इति गारुडे २१४ अध्यायः ॥
जीवना, स्त्री, (जीवयतीति । जीव+णिच्+युच्
ल्युः वा ततष्टाप् ।) मेदौषधम् । इति मेदिनी ।
ने, ६६ ॥
जीवनाघातं, क्ली, (जीवनं आहन्यतेऽनेनेति । आ+
हन्+करणे घञ् ।) विषम् । इति शब्द-
चन्द्रिका ॥
जीवनावासः, पुं, (आवसत्यस्मिन् । आ+वस+घञ् ।
जीवनं जलं आवासोऽस्य ।) वरुणः । इति
शब्दरत्नावली ॥ (शरीराभिमानिनि, त्रि ॥)
जीवनिका, स्त्री, (जीवन+टाप् । [illegible] । यद्वा
+ संज्ञायां कन् [illegible]) [illegible]

निर्घण्टः ॥ (हरीतकीशब्दे विवरणविशेषोऽस्याः ज्ञातव्यः ॥)

जीवनी, स्त्री, (जीवत्यनेनेति । जीव + करणे ल्युट् ङीप् च ।) जीवन्ती । (पर्य्याया यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) काकोली । डोड़ी । मेदा । महामेदा । इति राजनिर्घण्टः ॥ यूथी । इति शब्दचन्द्रिका ॥

जीवनीयं, क्ली, (जीव्यतेऽनेन अस्माद्वा । जीव + करणे अपादाने वा अनीयर् ।) जलम् । इति हेमचन्द्रः ॥ (जीवनप्रदे, त्रि । यथा, सुश्रुते । १ । ४५ ।
"गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनम् ।
जीवनीयं यथा वातपित्तघ्नं परमं स्मृतम् ॥")

जीवनीयगणः, पुं, (जीवनीयानामोषधीनां गणः ।) औषधविशेषः । यथा, वैद्यकपरिभाषायाम् ।
"अष्टवर्गश्च पर्ण्यौ जीवन्ती मधुकन्तथा ।
जीवनीयगणः प्रोक्तो जीवनस्तु पुनस्तथा ॥"
("जीवन्ती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च ।
ऋषभकजीवकमधुकं चेति गणो जीवनीयाख्यः ॥"
इति च वाभटे सूत्रस्थाने पञ्चदशेऽध्याये ॥)

जीवनीया, स्त्री, (जीवनीय + टाप् ।) जीवन्ती । इत्यमरः । २ । ४ । १४२ ॥

जीवनेत्री, स्त्री, (जीवं नयतीति । जीव + नी + तृच् + ङीप् च ।) सैंहली । इति राजनिर्घण्टः ॥

जीवनौषधं, क्ली, (जीवनस्य औषधं उपायविशेषः ।) येन म्रियमाणो जीवति तदौषधम् । जीवरक्षाकारि । जीवनोपायः । तत्पर्य्यायः । जीवातुः २ । इत्यमरः । २ । ६ । १२० ॥

जीवन्तः, पुं, (जीवयति जीव्यतेऽनेन वा । जीव + "रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ।" उणां । ३ । १२८ । इति झच् ।) औषधम् । प्राणः । आयुर्विशिष्टे, त्रि । इत्युणादिकोषः ॥ जीवशाकः । इति राजनिर्घण्टः ॥

जीवन्तिकः, पुं, (जीवान्तकः । पृषोदरात् साधुः ।) जीवान्तकः । इत्यमरटीकासारसुन्दरी ॥

जीवन्तिका, स्त्री, (जीवयतीति । जीव + झच् + कन् टाप् च । कापि अत इत्वम् ।) वन्दा । वृक्षोपरिजातवृक्षः । गुड़ूची । जीवाख्यशाकः । इति मेदिनी । के, १८० ॥ जीवन्ती हरीतकी । इति राजनिर्घण्टः ॥

जीवन्ती, स्त्री, (जीवन्त + ङीप् ।) लताविशेषः । जीवइ इति जीयाती इति च भाषा । तत्पर्य्यायः । जीवनी २ जीवनीया ३ जीवा ४ मधुः ५ । इत्यमरः । २ । ४ । १४२ ॥ जीवना ६ मधुस्रवा ७ मङ्गला ८ । इति तट्टीका ॥ पयस्विनी ९ जीया १० जीवदा ११ जीवदात्री १२ शाकश्रेष्ठा १३ जीवभद्रा १४ भद्रा १५ मङ्गल्या १६ क्षुद्रजीवा १७ यशस्या १८ शृङ्गाटी १९ जीवदत्र २० काञ्जिका २१ सुदर्शनिका २२ हरितृणा २३ । इति राजनिर्घण्टः ॥ भ्रामा २४ जीवश्रेष्ठा २५ सुरकरी २६ मृगारातिका २७ जीवपत्री २८ जीवपुष्पा २९ । इति केचित् ॥ (यथा,—
"वरा शाकेषु जीवन्ती सर्षपास्त्ववराः परम् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)
अस्या गुणाः । मधुरत्वम् । शीतत्वम् । रक्तपित्तवायुक्षयदाहज्वरनाशित्वम् । कफवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ ग्राहित्वम् । स्निग्धत्वम् । त्रिदोषनाशित्वम् । रसायनत्वम् । बलकारित्वम् । चक्षुर्हितत्वम् । ग्राहित्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥ श्वासकासधातुक्षयनाशित्वम् । स्वरकारित्वञ्च । सुराष्ट्रदेशजस्वर्णवर्णहरीतकी । सा स्वेदपाके प्रशस्ता जीर्णरोगनाशिनी । इति राजवल्लभः ॥ (अस्याः लक्षणं व्यवहारश्च यथा,—
"जीवन्ती स्वर्णवर्णिनी ॥"
"जीवन्ती सर्व्वरोगहृत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शमी । गुड़ूची । (पर्य्याया यथा,—
"गुडूची मधुपर्णी स्यादमृतामृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासा वयस्था च मण्डली देवनिर्म्मिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वन्दा । इति मेदिनी । ते, ११२ ॥ डोड़ी । इति राजनिर्घण्टः ॥ (जीव इति शाकविशेषः । शर्करावन्मधुरपुष्पा व्रततिः । अस्याः पर्य्याया यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जीवन्मुक्तः, त्रि, (जीवन्नेव मुक्तः आत्मज्ञानेन मायाबन्धरहितः ।) जीवद्दशायां मायाबन्धरहितः । (यथा, देवीभागवते । १ । १९ । ४८ ।
"जीवन्मुक्तः स राजर्षिर्ब्रह्मज्ञानमतिः शुचिः ।
तथ्यवक्तातिशान्तश्च योगी योगप्रियः सदा ॥")
तल्लक्षणं यथा । "स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्य्यसञ्चितकर्म्मसंशयविपर्य्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ।
'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥'
इत्यादिश्रुतेः ।
अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण आन्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च तत्तत्पूर्व्वपूर्व्ववासनया क्रियमाणानि कर्म्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति । यथा इन्द्रजाल-मिति ज्ञानवान् ... मिदमिति न मन्यते । ... इकर्णं इव समना ... इव इत्यादिश्रुतेः । उक्तञ्च ।
'सुषुप्तवज्जाग्रति यो न पश्यति
द्वयञ्च पश्यन्नपि चाद्वयत्वतः ।
तथापि कुर्व्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य ...'
अस्य ज्ञानात् पूर्व्वं ... विहारादीनां ... वृत्तिर्भवति । ... कम् ।
'बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां ... '
ब्रह्मवित्त्वं ... तदानीममानित्वादीनि ... दयः सद्गुणाश्चालङ्कारवदनुवर्त्तन्ते । ...
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ।
किं बहुना अयं ... परेच्छाप्रापितानि ... सन् तदवसाने प्रत्यगानन्द ... लीने सति ... विनाशात् ... प्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते । ... प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ... विमुच्यते । इत्येवमादिश्रुतेः ।" इति वेदान्तसारः ॥

जीवपुत्रकः, पुं, (जीवः प्राणवान् पुत्रः ... बहुवर्षजनकत्वात् तथात्वम् ।) इङ्गुदीवृक्षः । इति शब्दरत्नावली ॥ इत्यमरटीकायां रमानाथः ॥ ... भाषा ॥

जीवपुष्पा, स्त्री, (जीवयतीति । जीव + अच् । जीवं प्राणदं पुष्पमस्याः ।) जीवन्ती । इति राजनिर्घण्टः ॥

जीवप्रिया, स्त्री, (जीवानां प्राणिनां प्रिया हितकारित्वात् ।) हरीतकी । इति राज- निर्घण्टः ॥

जीवभद्रा, स्त्री, (जीवानां प्राणिनां भद्रं यस्याः ।) जीवन्तीलता । इति राजनिर्घण्टः ॥

जीवमन्दिरं, क्ली, (जीवस्य मन्दिरम् इव ।) शरीरम् । इति शब्दचन्द्रिका ॥

जीवला, स्त्री, (जीवं उदरस्थजन्तुं ... माश्रयतीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) सैंहली । इति राज- निर्घण्टः ॥

जीववल्ली, स्त्री, (जीवयतीति जीवा । सा चासौ वल्ली चेति ।) क्षीरकाकोली । इति राजनिर्घण्टः ॥

[illegible]

जीवितनाथ:, पुं, (जीवितस्य जीवनस्य नाथ:।) [illegible]

... इति हेमचन्द्र: ॥

जीवात्मक:, पुं, (जीवं आत्मानं आत्मनोति। आत्म+णिच्+ण्वुल्।) जीवस्यायं दति-धारक:। तत्पर्याय:। ... ॥ जीवितात्मके, त्रि॥

जीवान्तक:, पुं ...

... इति यादवकोषः ॥

जीवानु, [इ] पुं, (जीवस्य जीवनस्य याता अधिष्ठाता। यद्वा, जीवयात्रां याता इति ...।) देहः। तत्पर्याय:। पुनर्भवी २ जीवः ३ असुमान् ४ सत्त्वम् ५ देहभृत् ६

[illegible]

जीवन्तिका, स्त्री, (जीवन्तीं अयति। जीव+"तृतीये ... पदम्।") जीवन्ती। ... इति राजनिर्घण्टः ॥

जीविका, स्त्री, (जीवत्यनयेति। जीव+"गुरोश्च हल:।" ३।३।१०३। इत्यः। ततः संज्ञायां कन् टापि अत इत्वम्।) जीवनोपायः। तत्पर्यायः। आजीवः २ वार्त्ता ३ वृत्तिः ४ वर्त्तनम् ५ जीवनम् ६। इत्यमरः। २।९।१। जीवः ७। इति शब्दरत्नावली ॥ (यथा, मनुः। ४। ११।

"अजिह्मामशठां शुद्धां जीवेद्ब्राह्मण-जीविकाम् ॥")

जीवन्ती। इति मेदिनी। ते, ८४ ॥

जीवितं, क्ली, (जीव+भावे क्तः।) जीवनम्। इति हेमचन्द्रः। (यथा, उत्तररामचरिते १ अङ्के।

"त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव, शान्तमथवा किमिहोत्तरेण ॥")

कर्त्तरि क्तः।) जीवनयुक्ते, त्रि ॥ (यथा, रघुः। १२। ७५।

"कामं जीवति मे नाथ इति सा विजहौ शुचम्।
प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥")

जीवितकालः, पुं, (जीवितस्य जीवनस्य कालः।) आयुः। इत्यमरः। २।८।१२० ॥

जीवितज्ञा, स्त्री, (जीवितस्य जीवनस्य ज्ञा ज्ञानं यया। नाड़ीस्पन्दनेन हि जीवानां जीवनज्ञाना-दस्यास्तथात्वम्।) नाड़ी। इति राजनिर्घण्टः ॥

जीवितेशः, पुं, (जीवितस्य ईशः प्रभुः।) प्राणनाथः। यमः। (यथा, रघुः। ११। २०।

"राममन्मथशरेण ताड़िता
दुःसहेन हृदये निशाचरी।

[illegible]

जीवितेश्वरीमपि ...

"... ॥"

... इति शब्दरत्नावली। जीवान्तुः। इति हेमचन्द्रः। जीविनिर्दि, त्रि। इति मेदिनी। ति, ३१ ॥

जीवी, [न्] पुं, (जीवितुं शीलमस्य। जीव+णिनि।) प्राणी। यथा, ...

"जीविनो ... ॥"

जीवोषा, स्त्री, (जीवस्य जीवनस्य ... जीव+...।) ... इति राजनिर्घण्टः ॥

जु, गतौ। इति कविकल्पद्रुमः। (भ्वा-पर-सक०-अनिट्।) ... इति दुर्गादासः ॥

जु, द गत्याम्। इति कविकल्पद्रुमः ॥ (भ्वा-आत्म०-सक०-अनिट्।) द, जवते। इति दुर्गादासः ॥

जुग, इ वर्ज्जे। इति कविकल्पद्रुमः ॥ (भ्वा-पर०-सक०-सेट्।) इ, जुङ्गति जुङ्गते। इति दुर्गादासः ॥

जुगुप्सनं, क्ली, (गुप+सार्थे सन्+ल्युट्।) निन्दा। इति हेमचन्द्रः। २।१८५। (निन्दार्थीति, त्रि। यथ "जुगुप्सनश्च धर्म्मादेः।" ३।२।१४८। इति सूत्र ॥)

जुगुप्सा, स्त्री, (गुप निन्दायाम्+सन्+भावे अ-ततष्टाप्।) निन्दा। इत्यमरः। १।६।१३ ॥ (यथा, साहित्यदर्पणे। ३।१७५।

"दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा ॥")

जुङ्गः, पुं, (जुङ्ग+अच्।) वृद्धदारकः। इत्यमरः। २।४।१५० ॥ (यथास्य पर्यायाः।

"जुङ्गश्छागान्त्रघृतगन्धादिनी वृद्धदारकः ॥"

इति वैद्यकरत्नमालायाम् ॥)

जुङ्गकः, पुं, (जुङ्ग+स्वार्थे कन्।) वृद्धदारकवृक्षः। इति राजनिर्घण्टः ॥

जुङ्गा, स्त्री, (जुङ्ग+टाप्।) जुङ्गः। इत्यमर-टीकायां रमानाथः ॥

जुङ्गितः, त्रि, (जुग इ वर्ज्जे+कर्म्मणि क्तः।) त्यक्तः। इति व्याकरणम् ॥

जुटकं, क्ली, (जुट् संहतौ+"इगुपधेति।" ३। १। १३५। इति कः। ततः संज्ञायां कन्।) जटा। इति शब्दरत्नावली ॥

जुटिका, स्त्री, (जुटक+टाप्। टापि अत इत्वम्।) शिखा। इति शब्दरत्नावली ॥ जुँटी इति टिकी। इति च भाषा ॥ (यथा, आह्निकतत्त्वधृतब्रह्मपुराणवचनम्।

"जुटिकाञ्च ततो बद्धा ततः कर्म्म समारभेत् ॥")

जुड, क नोदे। इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट्।) क, जोड़यति। नोदः प्रेर-णम्। इति दुर्गादासः ॥

जुड, श गतौ। इति कविकल्पद्रुमः ॥ (तुदा-पर-सक-सेट्।) श, [illegible] इति दुर्गादासः ॥

जुड़, शि बन्धे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) शि, जुड़ति बजुड़ीत्। साड्ड्वलतापमान् श्लवेन जुड़यत्यौ। जुजोड़। इति दुर्गादासः॥

जुत, ऋ ङ दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ, अजुजोतत्। ङ, जोतते। इति दुर्गादासः॥

जुन, श गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) श, जुनति जोनिता। इति दुर्गादासः॥

जुर्व, ई वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) जुर्वी। जूः जुरौ जुरः। ई, जूर्णः। इति दुर्गादासः॥

जुल, क पिषि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, जोलयति। पिषि चूर्णीकरणे। इति दुर्गादासः॥

जुष, कि तर्के। क्षमौ। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-सकं-अकं च-सेट्।) कि, जोषयति जोषत्यगुणं सुधीः। तर्कयतीत्यर्थः। इति दुर्गादासः॥

जुष, श ङ ई ञि तुष्टि। सेवे। इति कविकल्पद्रुमः॥ (तुदां-आत्मं अकं-सकं च-सेट्।) पञ्चमस्वरी। श ङ, जुषते। ई ञि, जुष्टोऽस्ति। तुष्टि हर्षे। इति दुर्गादासः॥

जुष्कः, पु, (जुष्+कक्। ततः संज्ञायां कन्।) यूषः। इति शब्दचन्द्रिका॥

जुष्टं, क्ली, (जुष्यते स्म इति। जुष+क्तः।) उच्छिष्टम्। सेविते, त्रि। इति मेदिनी। टे, १५॥ (यथा, भट्टिः। १। ४।

"पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः॥")

जुष्यः, त्रि, (जुष्+कर्मणि क्यप्।) सेव्यः। इति मुग्धबोधम्॥

जुहुराणः, पुं, (हूयते इति। हु+कर्मणि कानच्।) कठिनहृदयः। चन्द्रः। इति संक्षिप्तसारे उणादिवृत्तिः॥

जुहूः, स्त्री, (जुहोत्यनया। इति हु+"हुवः श्लुवच्च।" उणां। २।६०। इति क्विप् निपातनात् दीर्घत्वं द्वित्वञ्च।) पलाशकाष्ठनिर्मिताऽर्द्धचन्द्राकृतियज्ञपात्रम्। जुहोत्यनया जुहूः। इत्यमरभरतौ॥ (यथा, ऋग्वेदे। १। ७६। ५।

"अग्ने! सपर्या जुह्वा यजस्व॥")

जुहूरावः, पुं, (जुहूं रवति इति। "कर्मण्यण्।" ३। २। १। इत्यण्।) वह्निः। अध्वर्युः। इति त्रिषु। चन्द्रः। इत्युणादिकोषः॥

जुहूवान्, [त्] पुं, (जुहूः मार्गं होमक्रियोदेशत्वादस्त्यस्य। जुहू+मतुप् निपातनात् मस्य वत्वम्।) वह्निः। इति शब्दरत्नावली॥

जूः, स्त्री, (जु+"क्विब्वचिप्रच्छीति।" उणां। २। ५७। क्विप् दीर्घश्च।) आकाशः। सरस्वती। पिशाची। जवनम्। इति शब्दरत्नावली॥ सरा-सनवम्। गमनम्। इति मेदिनी। जे, २॥

जूटः, पुं, (जट सङ्घाते+अच् निपातनादूत्वागमे साधुः।) शिवजटा। इत्यमरटीकायां भरतः। जटा। इति शब्दरत्नावली॥

जूटकं, क्ली, (जूट+स्वार्थे कन्।) केशबन्धः। जटा। इति भूरिप्रयोगः॥

जूतिः, स्त्री, (जु वेगे+"ऊतियूतिजूतीति।" ३।३।९७। इति क्तिन् निपातनात् दीर्घत्वञ्च।) वेगः। इत्यमरः। ३। २। १९॥ (यथा, अथर्ववेदे। १३। २। १३।

"तं समाप्नोति जूतिभिः॥")

जूतिका, स्त्री, (जूत्या कायतीति। कै+कः। तत टाप्।) कर्पूरभेदः। इति राजनिर्घण्टः॥

जूर, इ य ई ज्यानौ। वधे। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सकं-च-सेट्।) दीर्घी। इ य, जूर्यते। ई, जूर्णः। ज्यानिर्गतवयोभावः। इति दुर्गादासः॥

जूर्णाख्यः, पुं, (जूर+क्तः। जूर्णं इति आख्या यस्य।) तृणविशेषः। उलू इति भाषा॥ तत्पर्य्यायः। सच्छत्रः २ स्थूलकः ३ दर्भः ४ शरच्छदः ५। इति रत्नमाला॥ उलूकम् ६ उलपः ७। इति केचित्॥

जूर्णाह्वयः, पुं, (जूर्णं इति आह्वयः आख्या यस्य।) देवधान्यम्। इति हेमचन्द्रः॥

जूर्णिः, स्त्री, (ज्वर+"वीज्याज्वरिभ्यो निः।" उणां। ४। ४८। इति निः। "ज्वरत्वरेति।" ६। ४। २०। इत्यूट् च।) वेगः। इत्युणादिकोषः॥ व्याधिः। देहः। ब्रह्मा। ज्वरः। इति संक्षिप्तसारे उणादिवृत्तिः॥

जूर्त्तिः, स्त्री, (ज्वर्+भावे क्तिन्। "ज्वरत्वरेत्यादिना" ऊट् च।) ज्वरः। इत्यमरः। ३।२।२९॥

जूष, म वधे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) षष्ठस्वरी। म, जूषति जूषते। परस्मैपदीत्यन्ये। इति दुर्गादासः॥

जूषं, क्ली, पु, (यूष+पृषोदरात् साधुः।) यूषम्। मुद्गादिक्वाथरसः। इति सिद्धान्तसंग्रहटीकायां भरतः॥

जूषणं, क्ली, (जूष्यतेऽनेनेति। जूष+करणे ल्युट्।) तृणविशेषः। इति शब्दचन्द्रिका॥ घाइफुल इति भाषा॥

जृ, न्यक्कारे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) न्यक्कारस्तिरस्करणम्। जरति शत्रुं शूरः। इति दुर्गादासः॥

जृभ, इ ङ जृम्भे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) षष्ठस्वरी। इ, जृम्भते। ङ, जृभते। इति दुर्गादासः॥

जृम्भ, ङ ई जृम्भे। गात्रविनामस्य इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ङ, जृम्भते। ई, जृब्धः। इति दुर्गादासः॥

जृम्भः, पुं स्त्री, (जृम्भ+भावे घञ्।) मुखादिविकाशः। हाइ इति भाषा॥ तत्पर्य्यायः। जृम्भणम् २ जृम्भा ३ जृम्भिका ४। इति शब्दरत्नावली॥ जम्भा ५ जम्भका ६। इति राजनिर्घण्टः॥

(अस्य लक्षणं यथा, सुश्रुते। ३। ३।
"निद्राभिव [illegible]
[illegible]
यथाप्यनिलं सनिश्वासं स जृम्भ इति कीर्त्तितः"
"जृम्भायते समीरणात्।" [illegible]
"जुड्डुभसनजृम्भेषु [illegible]
अवरूत्रमेव [illegible]
इति कर्णेनेत्य।
विकाशः। स्फारितः। [illegible]
(यथा, प्रबोधचन्द्रोदये। ३। २८। [illegible]
सुकुमारपरमधूपावलीकण्ठकुञ्जा
भरजितमकरन्दहृदि [illegible]

जृम्भणं, क्ली, (जृम्भ+भावे ल्युट्।) [illegible] मरः। १। ७। ३५॥ (यथा, [illegible]
"इन्द्रियार्थेष्वसंप्राप्तिर्गौरवं जृम्भणं [illegible]

जृम्भा, स्त्री, (जृम्भ+भावे घञ् [illegible] जृम्भः। इति शब्दरत्नावली॥ ([illegible] भागवते। १। १५। ६१।
"तुष्टिः पुष्टिः क्षमा [illegible]

जृम्भिका, स्त्री, (जृम्भा+ [illegible] इत्वञ्च।) जृम्भः। इति [illegible]
(निद्रावेगधारणजनितरोगविशेषः। [illegible] सप्तस्थाने चतुर्थेऽध्याये।
"निद्राया [illegible]
अङ्गमर्दश्च तन्द्राः स्युः
जृम्भ+णिच्+ण्वुल्। टापि [illegible]
जृम्भणकारकोऽस्त्रविशेषः। यथा, [illegible] ५। ८। ५२।
"बद्धाञ्जलिं महास्त्रं वा जृम्भिका [illegible]

जृम्भितं, क्ली, (जृम्भि+भावे क्तः।) [illegible] चेष्टितम्। जृम्भा। स्फुटितम्। [illegible]
(यथा, कथासरित्सागरे। २६। ८। [illegible]
"अहो किं [illegible]
क्षौणी करणम्। इति मेदिनी। ते, [illegible]

जृम्भिणी, स्त्री, (जृम्भि+णिनि।) [illegible] इति शब्दचन्द्रिका॥ ([illegible] विशेषो ज्ञेयः।)

जॄ, इर् श म य ज्यानौ। इति कवि [illegible]
(दिवां-परं-अकं-अनिट्।) इर्, [illegible] रीत्। श, जरा। म, जरयति। [illegible]
ज्यानं गतवयोभावः। [illegible]

जॄ, णि कि ज्याने। इति कविकल्प [illegible]
चुरांपक्षे भ्वां-च-परं-अकं-सेट्।) णि, जीर्णः जीर्णिः। कि, जारयति [illegible] दुर्गादासः॥

जेता, [ऋ] त्रि, (जयतीति। [illegible] जयशीलः। तत्पर्य्यायः। जिष्णुः [illegible] जैत्रः ४। इत्यमरः। २। ८। ७७॥ [illegible] रघुः। १२। ८९।
"जेतारं लोकपालानां स्वमुखैरर्चित [illegible]

...णुः । यथा, महाभारते । १३ । १४९ । २६ ।
"अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥")

...कः, पुं, स्वेदविशेषः । यथा, "अथ ...न्ताकं चिकीर्षुर्भूमिं परीक्षेत पूर्व्वस्यां दिशि उत्तरस्यां वा गुणवति प्रशस्तभूमिभागे ...शे कृष्णमधुरमृत्तिके सुवर्णवर्णमृत्तिके वा ...दीपरीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे सम...विभक्तभागे देशे सप्ताष्टौ वा अरत्नीः प्रक्रम्य ...दकात् प्राङ्मुखमुदङ्मुखं वा अभिमुखतीर्थं ...टागारं कारयेत् । उत्सेधविस्तारतः परम...त्नीः षोड़शसमन्तात् संवृतं मृत्कर्म्मसम्पन्न...नेकवातायनम् । अस्य च कूटागारस्यान्तः सम...न्तो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां ...रयेत् आकवाटात् मध्ये चास्य च कूटागारस्य ...तुष्किकुमात्रं द्विपुरुषप्रमाणं मृण्मयं कन्दु...स्थानं बहुसूक्ष्मच्छिद्रं अङ्गारकोष्ठकस्तम्भं ...पिधानं कारयेत् । तच्च खादिराणामाश्व...र्णिकानां वा मेध्येन काष्ठेनापूरयित्वा प्रदी...पयेत् । स यदा जानीयात् साधु दग्धानि ...ष्ठानि गतधूमानि अथ तप्तं केवलमग्निना ...ग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति । ...त्रैनं वातहराभ्यक्ताभ्यक्तगात्रं वस्त्रावच्छन्नं ...वेशयेत् प्रवेशयंश्चैनमनुशिष्यात् सौम्य! प्रविश ...ल्याणायारोग्याय चेति प्रविश्य चैनां पिण्डिका...मधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः । ...न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डि...कैषा मोक्तव्या आप्राणोच्छ्वासात् भ्रश्यमानो ...तः पिण्डिकावकाशात् द्वारमधिगच्छन् स्वेद...मूर्च्छापरीततया सद्यः प्राणान् जह्याः तस्मात् ...ण्डिकां न कथञ्चन मुञ्चेथाः । स यदा ...जानीयाद्विगताभिष्यन्दमात्मानं सम्यक् प्रसृत...स्वेदपिच्छं सर्व्वस्रोतोविमुक्तं लघुभूतमपगत...विबन्धस्तम्भसुप्तिगौरववेदनमिति ततस्तां पिण्डि...कामनुसरन् द्वारं प्रपद्येत निष्क्रम्य च न सहसा ...चक्षुषोः परिपालनार्थं शीतमुदकं स्पृशेत् । अप...गतक्लमसन्तापस्तु मुहूर्त्तात् सुखोष्णेन वारिणा ...यथान्यायं परिषिक्तोऽश्नीयात् ।" इति चरकः ॥

...नं, क्ली, (जिमु भक्षणे + भावे ल्युट् ।) भोजनम् । ...त्यमरः । २ । ९ । ५६ ॥

...यः, त्रि, (जीयते इति । जि जये + "अचो यत् ।" ३ । १ । ९७ । इति कर्म्मणि यत् ।) ...जेतव्यमात्रकम् । इत्यमरः । ३ । १ । ७४ ॥ (यथा, मार्कण्डेये । २७ । १२ ।
"तस्मात् कामादयः पूर्व्वं जेयाः पुत्त्र ! महीभुजा । तज्जये हि जयो राज्ञः राजा नश्यति तैर्जितः ॥")

...ष, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अजिजेषत् । ङ, जेषते [illegible] । इति दुर्गादासः ॥

...ह, ङ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, जेहते जिजेहे । ऋ, अजिजेहत् । इति दुर्गादासः ॥

जै, क्षये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-अनिट् ।) जायति । इति दुर्गादासः ॥

जैत्रं, क्ली, (रोगजयात् जेत्ट । तदेव । "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इत्यण् ।) औषधम् । इति राजनिर्घण्टः ॥

जैत्रः, त्रि, (जेतैव । जेतृ + प्रज्ञादित्वादण् ।) जेता । इत्यमरः । ३ । १ । ७४ ॥ (यथा, माघे । ३ । ६१ ।
"शरीरिणा जैत्रशरेण यत्र
निःशङ्कमूषे मकरध्वजेन ॥")
पारदे, पुं । इति राजनिर्घण्टः ॥

जैत्ररथः, पुं, (जैत्रो जयशीलो रथो यस्य ।) जयशीलः । इति हलायुधः ॥

जैत्री, स्त्री, (जयति रोगादिनाशकतया सर्व्वोत्कर्षेण वर्त्तते इति । जि + तृच् । ततः स्वार्थे अण् ततः स्त्रियां ङीप् ।) जयन्तीवृक्षः । इति शब्दरत्नावली ॥

जैनः, पुं, (जिन एव । यद्वा, जिन उपास्यदेवतास्येति । जिन् + अण् ।) जिनोपासकः । बौद्धः । इति हलायुधः ॥ (धर्म्मवेत्तॄणां भारतवर्षे प्रचलितेषु विविधेषु धर्म्मेषु जिनधर्म्म एव श्रेष्ठतम इति जैनाः प्रवदन्ति । एषामुपास्यदेवता जिनः । ते तु श्वेताम्बरदिगम्बरभेदेन द्विविधाः । श्वेताम्बरास्तु प्रायश आश्रमिणः । अधुना नानाशाखासु विभक्ताः समभवन् । दिगम्बरास्तु प्रायशो निर्ग्रन्थाः । एतेषां यन्मतं तत् सर्व्वदर्शनसंग्रहात् प्रदर्श्यते । यथा,—

"ननु न कश्चित् पुरुषविशेषः सर्व्वज्ञपदवेदनीयः प्रमाणपञ्चकमध्यात् सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भात् तथाचोक्तं तौतातितैः ।

सर्व्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत् ॥
न चागमविधिः कश्चिन्नित्यसर्व्वज्ञबोधकः ।
न च तत्रार्थवादानां तात्पर्य्यमपि कल्प्यते ॥
न चान्यार्थप्रधानैस्तैस्तदस्तित्वं विधीयते ।
न चानुवदितुं शक्यः पूर्व्वमन्यैरबोधितः ॥
अनादेरागमस्यार्थो न च सर्व्वज्ञ आदिमान् ।
कृत्रिमेन त्वसत्येन स कथं प्रतिपाद्यते ॥
अथ तद्वचनेनैव सर्व्वज्ञोऽन्यैः प्रतीयते ।
प्रकल्पेत कथं सिद्धिरन्योन्याश्रययोस्तयोः ॥
सर्व्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता ।
कथं तदुभयं सिध्येत् सिद्धमूलान्तरादृते ॥
असर्व्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात् ।
सर्व्वज्ञमवगच्छन्तः स्ववाक्यात् किं न जानते ॥
सर्व्वज्ञसदृशं किञ्चिद्यदि पश्येम सम्प्रति ।
उपमानेन सर्व्वज्ञं जानीयाम ततो वयम् ॥
उपदेशोऽपि बुद्धस्य धर्म्माधर्म्मादिगोचरः ।
अन्यथा नोपपद्येत सार्व्वज्ञ्यं यदि नाभवत् ॥
इत्यादि ।

अत्र प्रतिविधीयते यदभ्यधायि सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भादिति तदयुक्तं तत्सद्भावावेदकस्यानुमानादेः सद्भावात् । तथाहि कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययत्वात् यद्यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययं तत्तत्साक्षात्कारि यथा अपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि । तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययश्च कश्चिदात्मा तस्मात् सकलपदार्थसाक्षात्कारीति । न तावदशेषार्थग्रहणस्वभावत्वमात्मनोऽसिद्धं चोदनाबलान्निखिलार्थज्ञानात् नोत्पत्त्यन्यथानुपपत्त्या सर्व्वमनेकान्तात्मकं सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थमवगमयतीत्येवंजातीयकैरध्वरमीमांसागुरुभिर्विधिप्रतिषेधविचारणानिबन्धनं सकलार्थविषयज्ञानं प्रतिपद्यमानैः सकलार्थग्रहणस्वभावकत्वमात्मनोऽभ्युपगतम् । न चाखिलार्थप्रतिबन्धकावरणप्रक्षयानुपपत्तिः सम्यग्-दर्शनादिवयलक्षणस्यावरणप्रक्षयहेतुभूतस्य सामग्रीविशेषस्य प्रतीतत्वात् अनया सुनयापि क्षुद्रोपद्रवा विद्राव्याः ।

नन्वावरणप्रक्षयवशादशेषविषयं विज्ञानं विशदं मुख्यप्रत्यक्षं प्रभवतीत्युक्तं तदयुक्तं तस्य सर्व्वज्ञस्यानादिमुक्तत्वेनावरणस्यैवासम्भवादिति चेत्तन्न अनादिमुक्तत्वस्यैवासिद्धेः सर्व्वज्ञोऽनादिमुक्तः मुक्तत्वादितरमुक्तवत् बद्धापेक्षया च मुक्तव्यपदेशः तद्रहिते चास्याप्यभावः स्यादाकाशवत् । नन्वनादेः क्षित्यादिकार्य्यपरम्परायाः कर्त्तृत्वेन तत्सिद्धिः तथाहि क्षित्यादिकं सकर्त्तृकं कार्य्यत्वाद्घटवदिति तदप्यसमीचीनं कार्य्यत्वस्यैवासिद्धेः । न च सावयवत्वेन तत्साधनमित्यभिधातव्यं यस्मादिदं विकल्पजालमवतरति सावयवत्वं किमवयवसंयोगित्वं अवयवसमवायित्वं अवयवजन्यत्वं समवेतद्रव्यत्वं सावयवबुद्धिविषयत्वं वा । न प्रथमः आकाशादावनैकान्त्यात् । न द्वितीयः सामान्यादौ व्यभिचारात् । न तृतीयः साध्याविशिष्टत्वात् । न चतुर्थः विकल्पयुगलानवग्रहणत्वात् समवायसम्बन्धमात्रवद्द्रव्यत्वं समवेतद्रव्यत्वमन्यत्र समवेतद्रव्यत्वं वा विवक्षितं हेतूक्रियते । आद्ये गगनादौ व्यभिचारः तस्यापि गुणादिसमवायवत्त्वेन द्रव्यत्वेन समवायात् । द्वितीये साध्याविशिष्टता अन्यशब्दार्थेषु समवायकारणभूतेष्ववयवेषु समवायस्य साधनीयत्वात् । अभ्युपगम्यैतदभाणि वस्तुतस्तु समवाय एव न समस्ति प्रमाणाभावात् । नापि पञ्चमः आत्मादिनानैकान्त्यात् सावयवबुद्धिविषयत्वेऽपि कार्य्यत्वाभावात् । न च निरवयवत्वेऽप्यस्य सावयवार्थसम्बन्धेन सावयवबुद्धिविषयत्वमौपचारिकमित्येष्टव्यं निरवयवत्वे व्यापित्वविरोधात् परमाणुवत् । किञ्च किमेकः कर्त्ता साधयितुं वा मतः प्रथमे प्रासादादौ व्यभिचारः स्थपत्यादीनां बहूनां

दुरवस्थायां तत्र कर्तृत्वोपन्यासेनैव सकलजग-ज्जनकत्वावेदनवैयर्थ्यं च। तदुक्तं वीतरागस्तुतौ।

कर्त्तास्ति कश्चिज्जगतः स चैकः
स सर्वगः स स्ववशः स नित्यः।
इमाः कुहेवाकविडम्बनाः स्यु-
स्तेषां न येषामनुशासकस्त्वम्॥ इति॥

अन्यत्रापि।

कर्त्ता न तावदिह कोऽपि यथेच्छया वा
दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः।
कार्यं किमत्र भवतापि च तक्षकाद्यै-
राहत्य च त्रिभुवनं पुरुषः करोतीति॥

तस्मात् प्रागुक्तकारणत्रितयसम्पादनादावरणप्रक्षये सार्वज्ञ्यं युक्तम्। न चाप्तोपदेशमन्तराभावात् सम्यग्दर्शनादीनामनुत्पत्तिरिति भणनीयं [illegible] कम। [illegible] आगमसर्वस्व [illegible] बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम्।

रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितयमर्हत्प्रवचनसंग्रहपरे परमागमसारे प्ररूपितं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति। विवृतं च योगदेवेन येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्यायं श्रद्धानं सम्यग्दर्शनं तथा च तत्त्वार्थसूत्रं तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति।

अन्यदपि।

रुचिर्जिनोक्ततत्त्वेषु सम्यक्श्रद्धानमुच्यते।
जायते तन्निसर्गेण गुरोरधिगमेन वा॥

परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः। व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः। येन स्वभावेन जीवादयः पदार्थाः व्यवस्थितास्तेन स्वभावेन मोहसंशयरहितत्वेनावगमः सम्यग्ज्ञानम्। यदुक्तम्।

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः॥

इति।

तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्यायकेवलभेदेन। तत्र मतिज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्याप्रियमाणं [illegible] मतम्। श्रुतज्ञानावरणक्षयोपशमे सति मतिजनितं स्पष्टं ज्ञानं श्रुतम्। सम्यग्दर्शनादिगुणजनितक्षयोपशमनिमित्तमवच्छिन्नविषयं ज्ञानमवधिः। ईर्ष्यान्तरायज्ञानावरणक्षयोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्यायः। तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तदन्यज्ञानासंस्पृष्टं केवलम्। तत्राद्यं परोक्षं प्रत्यक्षमन्यत्। तदुक्तम्।

विज्ञानं स्वपराभासि प्रमाणं बाधवर्जितम्।
प्रत्यक्षं च परोक्षं च द्विधा मेयविनिश्चयादिति॥

सम्यक्चारित्रभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः। संसरणकर्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकारणक्रियानिवृत्तिः सम्यक्चारित्रम्। तदेतत् सप्रपञ्चमुक्तमर्हता।

सर्वथावद्ययोगानां त्यागश्चारित्रमुच्यते।
कीर्तितं तदहिंसादिव्रतभेदेन पञ्चधा॥
अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहाः॥
न यत्प्रमादयोगेन जीवितव्यपरोपणम्।
चराणां स्थावराणां च तदहिंसाव्रतं मतम्॥
प्रियं पथ्यं वचस्तथ्यं सूनृतं व्रतमुच्यते।
तत्तथ्यमपि नो तथ्यमप्रियं चाहितं च यत्॥
अनादानमदत्तस्यास्तेयव्रतमुदीरितम्।
बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते॥
दिव्यौदारिककामानां कृतानुमतकारितैः।
मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम्॥
सर्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः।
यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः॥
भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात्।
महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति॥
भावनापञ्चकप्रपञ्चश्च प्ररूपितम्।
हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।
आलोच्यभाषणेनापि भावयेत् सूनृतं व्रतम्॥

इत्यादिना॥

एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानं श्रद्धानाचरणानि सम्भूय रसायनफलं साधयन्ति न प्रत्येकम्।

अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वे स्तः। तत्र बोधात्मको जीवः अबोधात्मकस्त्वजीवः। तदुक्तं पद्मनन्दिना।

चिदचिद्द्वे परे तत्त्वे विवेकस्तद्विवेचनम्।
उपादेयमुपादेयं हेयं हेयं च कुर्वतः॥
हेयं हि कर्तृरागादि तत्कार्यमविवेकिनः।
उपादेयं परं ज्योतिरुपयोगैकलक्षणमिति॥

सहजचिद्रूपपरिणतिं स्वीकुर्वाणे ज्ञानदर्शने उपयोगः स परस्परप्रदेशानां प्रदेशबन्धात् कर्मणैकीभूतस्य आत्मनोऽन्यत्वप्रतिपत्तिकारणं भवति। सकलजीवसाधारणं चैतन्यमुपशमक्षयक्षयोपशमवशादौपशमिकक्षायिकक्षायोपशमिकभावेन कर्मोदयवशात् कलुषाकारेण च परिणमज्जीवपर्यायजीवत्वजनितायां [illegible] भवति। यदाहुर्वाचकाचार्याः औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ चेति। अनुदयप्राप्तिरूपे कर्मण उपशमे सति जीवस्योत्पद्यमानो भाव औपशमिकः यथा पङ्के कतकादिद्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्मणः आत्यन्तिके क्षये सति आत्मनो भावः क्षायिकः यथा मोक्षः। उभयात्मा भावो मिश्रः यथा जलस्यार्धस्वच्छता। कर्मोदये सति भवन् भाव औदयिकः। कर्मोदय-

[illegible] आत्मलाभहेतुः स्वाभाविकः पारिणामिकः। तदेतत् तत्त्वं यथासम्भवं भव्यस्य वा जीवस्य तत्त्वं [illegible]

तदुक्तं स्वरूपसम्बोधने।

ज्ञानाद्भिन्नो न चाभिन्नो [illegible]
ज्ञानं पूर्वापरीभूतं [illegible]

ननु भेदाभेदयोः [illegible] इत्यतरस्यैव [illegible] चेत्तदयुक्तं बाधे प्रमाणाभावात् [illegible] बाधकं प्रमाणं न सोऽस्ति सकलो [illegible] रूपात्मकत्वस्य स्याद्वादिनो [illegible] दित्यलम्।

अपरे पुनर्जीवाजीवयोरपरं [illegible] जीवाकाश-धर्माधर्म-[illegible] एतेषु पञ्चसु तत्त्वेषु [illegible] अस्तिकाय: अनेकप्रदेशत्वेन शरीर [illegible] देशः। तत्र [illegible] भवाद् भवान्तरप्राप्तिमन्तः संसारिणः [illegible] द्विविधाः समनस्का अमनस्काश्च [illegible] समनस्काः शिक्षाक्रियालापग्रहण [illegible] तद्विधुरास्त्वमनस्काः। [illegible] त्रसस्थावरभेदात् तत्र द्वीन्द्रियादय [illegible] त्रसाः [illegible] धसयः स्थावराः। तत्र मार्गगतं [illegible] इष्टकादिः पृथिवीकायः पृथिवी [illegible] गृहीता स पृथिवीकायिकः पृथिवी [illegible] यो ग्रहीष्यति स पृथिवीजीवः। [illegible] अपि भेदचतुष्कं योज्यम्। तत्र [illegible] कायत्वेन गृहीतवन्तो गृह्णन्ति [illegible] ग्रहीष्यन्ति न पृथिव्यादिः [illegible] जीवत्वात्। ते च स्थावराः [illegible] भवान्तरप्राप्तिविधुराः मुक्ताः [illegible] सिद्धायाते एकत्वप्रतिपत्तिको [illegible] देशान्तरप्राप्तिहेतुः। तत्र [illegible] आलोकेनावच्छिन्ने नभसि [illegible] लोके सर्वत्रावस्थितिमानित्यिनुमर्याद [illegible] योऽयमकारः अतएव धर्मास्तिकाय [illegible] मेयः अधर्मास्तिकायः स्थितिहेतुः [illegible] देशमण्डलस्य वस्तुनः प्रदेश [illegible] कायत्वम्। पर्यायद्रव्याभ्यां [illegible] द्विविधाः अणवः स्कन्धाश्च। [illegible] द्व्यणुकादयः स्कन्धाः। तत्र [illegible] भेदादणवादित्युत्पत्तिः [illegible] कादिरुत्पत्तिः कचित्तु भेदसंघाताभ्याम् [illegible] अतएव पूरयन्ति गलन्ति इति [illegible] व्युत्पत्तेः प्रदेशाभावेऽपि [illegible] द्रव्यपर्यायात्मक तत्र पर्यायाः [illegible] बहुलप्रतिपत्ति। इत्यादया [illegible] जीवस्य ज्ञानस्यादि [illegible] इत्यादिराभासमभाता [illegible] काय्यो यथायथम [illegible]

[illegible]

[illegible] स आस्रवः । यथा आर्द्रं वस्त्रं समन्ताद्वाता-नीतं रेणुजातमुपादत्ते तथा कषायजलार्द्र आत्मा योगानीतं कर्म सर्वप्रदेशैर्गृह्णाति यथा वा निष्टप्तायःपिण्डो जले क्षिप्तोऽम्भः समन्ताद्गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म समन्तादादत्ते । कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः क्रोधो मानो माया लोभश्च स द्विविधः शुभाशुभभेदात् । तत्रा-हिंसादिः शुभः काययोगः सत्यमितहितभाष-णादिः शुभो वाग्योगः । [illegible]लं कायवाङ्मनःकर्मयोगः स आस्रवः शुभः पुण्यस्य अशुभः पापस्येत्यादिना [illegible] ईरयामासुः । अपरे त्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रव इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशद्रूपादिज्ञानरूपेण परिणमत इति ।

मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योग-वशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तप्र-देशानां पुद्गलानां कर्मबन्धयोग्यानामादान-मुपश्लेषणं यत् करोति स बन्धः । तदुक्तं सकषा-यत्वाज्जीवः कर्मभावयोग्यान् पुद्गलानादत्ते स बन्ध इति । तत्र कषायग्रहणं सर्वबन्धहेतूपलक्ष-णार्थम् । बन्धहेतून् पपाठ वाचकाचार्यः । मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतव इति । मिथ्यादर्शनं द्विविधं मिथ्याकर्मोदयात् परोपदेशानपेक्षं तत्त्वाश्रद्धानं नैसर्गिकमेकम् अपरं परोपदेशजम् । पृथिव्यादिषट्कायोपादा-नं षडिन्द्रियासंयमनञ्च अविरतिः । पञ्च-समितित्रिगुप्तिष्वनुत्साहः प्रमादः । कषायः क्रोधादिः । तत्र कषायान्ताः स्थित्यनुभावबन्ध-हेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः । बन्धश्चतुर्विध इत्युक्तं प्रकृतिस्थित्यनुभावप्रदे-शास्तु तद्विधय इति यथा निम्बगुडादेस्तिक्तत्व-मधुरत्वादिस्वभावः एवमावरणीयस्य ज्ञान-दर्शनावरणत्वमादित्यप्रभोच्छेदकाम्बुधरवत् म-णिप्रभातिरोधायककुम्भवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवत् दर्शन-मोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्ज्जनसङ्ग-वच्चारित्रमोहनीयस्यासंयमहेतुत्वं मद्यमद-लकवदायुषो देहबन्धकत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रिकवद्गोत्रस्योच्चनीच-कारित्वं कुम्भकारवदन्तरायस्य दानादिविघ्न-करत्वं कोशाध्यक्षवत् । सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्मावान्तरभेदमूलप्रकृति-प्रकृतिनिर्देशः । तथोक्तं ज्ञानदर्शनावरणवेदनीयमोह-नीयायुर्नामगोत्रान्तराया इति तद्भेदश्च पञ्च-नवाष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदा यथाक्रममिति । [illegible] विद्यमानत्वादिभिर्विचित्रा इति [illegible] । यथा अजागोमहिष्यादिक्षीराणां माधुर्य्य-स्वभावादप्रच्युतिः स्थितिः तथा ज्ञानावरणादीनां मूलप्रकृतीनामादित आरभ्य [illegible] स्थितिरित्युक्तं [illegible] स्वभावादप्रच्युतिरिति । यथा अजा-गोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन स्व-कार्यकरणे सामर्थ्यविशेषोऽनुभावः तथा कर्म-पुद्गलानां स्वकार्यकरणे सामर्थ्यविशेषोऽनुभावः । कर्मभावपरिणतपुद्गलस्कन्धानामनन्तानन्तप्रदे-शानामात्मप्रदेशानुप्रवेशः प्रदेशबन्धः । आस्रव-निरोधः संवरः । येनात्मनि प्रविशत् कर्म प्रति-षिध्यते स गुप्तिसमित्यादिः संवरः । संसार-कारणाद्योगादात्मनो गोपनं गुप्तिः । सा त्रिविधा कायवाङ्मनोनिग्रहभेदात् । प्राणिपीडापरि-हारेण सम्यगयनं समितिः सा ईर्याभाषादि-भेदात् पञ्चधा । प्रपञ्चितश्च हेमचन्द्राचार्यैः ।

लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ॥
आपद्य रागतः सर्व्वजनीनं मितभाषणम् ।
प्रिया वाचंयमानां सा भाषा समितिरुच्यते ॥
द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् ।
मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥
आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः ।
गृह्णीयान्निक्षिपेद्ध्यायेत् सादानसमितिः स्मृता ॥
कफमूत्रमलप्रायैर्निर्ज्जन्तु जगतीतले ।
यत्नाद्यदुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत् ॥

अत एवास्रवः स्रोतसो द्वारं संवृणोतीति संवर इति निराहुः । तदुक्तमभियुक्तैः ।

आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम् ।
इतीयमार्हती दृष्टिरन्यदस्याः प्रपञ्चनम् ॥

अर्ज्जितस्य कर्म्मणस्तपःप्रभृतिभिर्निर्ज्जरणं निर्ज्ज-राख्यं तत्त्वं चिरकालप्रवृत्तकषायकलापं पुण्यं सुखदुःखे च देहेन जरयति नाशयति केशो-ल्लुञ्चनादिकं तप उच्यते । सा निर्ज्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्ज्जरा कामाद्विपाक-जेति च जेगीयते । यत् कर्म्म तपोबलात् स्वकामनयोदयावलिं प्रवेश्य प्रपद्यते तत् कर्म्म निर्ज्जरा । यदाह ।

संसारबीजभूतानां कर्म्मणां जरणादिह ।
निर्ज्जरा संमता द्वेधा सकामा कामनिर्ज्जरा ॥
स्मृता सकामा यमिनामकामा त्वन्यदेहिना-
मिति ॥

मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः अभि-नवकर्म्माभावात् निर्ज्जराहेतुसन्निधानेनार्ज्जि-तस्य कर्म्मणो निरसनादात्यन्तिककर्म्ममोक्षणं मोक्षः । तदाह बन्धहेत्वभावनिर्ज्जराभ्यां कृत्स्नकर्म्म-विप्रमोक्षणं मोक्ष इति तदनन्तरमूर्द्ध्वं गच्छत्या-लोकान्तात् यथा हस्तदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तद्दत्तवेग-संस्कारवशात् भ्रमति तथा भवस्थेनात्मना अप-वर्ग्गप्राप्तये बहुशो यत् कृतं प्रणिधानं मुक्तस्य तदभावेऽपि पूर्व्वसंस्कारादालोकान्तं गमनमुप-पद्यते यथा वा मृत्तिकालेपकृतगौरवमलाबुद्रव्यं जले-ऽधःपतति पुनरपेतमृत्तिकाबन्धमूर्द्ध्वं गच्छति तथा कर्म्मरहित आत्मा असङ्गत्वादूर्द्ध्वं गच्छति बन्धच्छेदादेरण्डबीजवच्चोर्द्ध्वगतिस्वभावाच्चाग्नि-शिखावत् । अन्योन्यं प्रदेशानुप्रवेशे सत्यविभा-गेनावस्थानं बन्धः परस्परप्राप्तिमात्रं सङ्गः । तदुक्तं पूर्व्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथा गति-परिणामाच्चाविद्धकुलालचक्रवद्व्यपगतलेपा-लाबुवदेरण्डबीजवदग्निशिखावच्चेति । अतएव पठन्ति ।

गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्य्यादयो ग्रहाः ।
अद्यापि न निवर्त्तन्ते त्वलोकाकाशमागता-
इति ।

अन्ये तु गतसमस्तक्लेशतद्वासनस्यानावरण-ज्ञानस्य सुखैकतानस्यात्मन उपरिदेशावस्थानं मुक्तिरित्यास्थिषत । एवमुक्तानि सुखदुःखसाध-नाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाङ्गीचक्रुः । तदुक्तं सिद्धान्ते जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्ज्जरणं बन्धो मोक्षश्च नव तत्त्वानीति । संग्रहे प्रवृत्ता वय-मुपरताः स्मः ।

अत्र सर्व्वत्र सप्तभङ्गिनयाख्यं न्यायमवतार-यन्ति जैनाः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चाव-क्तव्य इति तत्सर्व्वमनन्तवीर्य्यः प्रत्यपीपदत् ।

तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत् ।
स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते ॥
क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक् ।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः ॥
आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते ।
अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ॥
समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यत इति ।

स्याच्छब्दः खल्वयं निपातः तिङन्तप्रतिरूपको-ऽनेकान्तद्योतकः । यथोक्तम् ।

वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम् ।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक इति ॥

यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा

स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात्पदात् कथञ्चिदिति अयमर्थो लभ्यत इति नानर्थकम्। तदाह।

स्याद्वादः सर्व्वथैकान्तत्यागात् किंवृत्तचिद्विधिः।
सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति॥

यदि वस्त्वेकान्ततः सर्व्वथा सर्व्वदा सर्व्वत्र सर्व्वात्मनास्तीति न उपादित्साजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वाद्धेयहानानुपपत्तेश्च। अनेकान्तपक्षे तु कथञ्चित् क्वचित् केनचित् सत्त्वेन हानोपादाने प्रेक्षावतामुपपद्येते। किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रष्टव्यो न तावदस्तित्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत्प्रयोगायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यम्। यथोक्तम्।

घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः।
नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोः॥ इत्यादि॥

तथाहि वस्तु सदसत्सदसदनिर्व्वचनीयवादभेदेन प्रतिवादिनश्चतुर्व्विधाः पुनरप्यविशेषमेवमनेकानि मतानि सदसदादिमतानीति त्रिविधाः तान् प्रति किं वस्त्वस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्व्वे निर्व्विण्णाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमङ्गीकुर्व्वन्तस्तत्र विजय इति सर्व्वमुपपन्नम्।
यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम्।

अनेकान्तात्मकं वस्तु गोचरः सर्व्वसंविदाम्।
एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः॥
न्यायानामेकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि।
सम्पूर्णार्थविनिश्चायि स्याद्वादश्रुतमुच्यत इति॥

अन्योन्यपक्षप्रतिपक्षभावाद्-
यथापरे मत्सरिणः प्रवादाः।
नयानशेषानविशेषमिच्छन्
न पक्षपाती समयस्तथार्हत इति॥

जिनदत्तसूरिणा जैनं मतमित्थमुक्तम्।
बलभोगोपभोगानामुभयोर्दानलाभयोः।
अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सनम्॥
हिंसा रत्यरती रागद्वेषावविरतिः स्मरः।
शोको मिथ्यात्वमेतेऽष्टादश दोषा न यस्य सः॥
जिनो देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः।
ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्त्तनी॥
स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च।
नित्यानित्यात्मकं सर्व्वं नव तत्त्वानि सप्त वा॥
जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च।
बन्धो निर्ज्जरणं मुक्तिरेषां व्याख्याधुनोच्यते॥
चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः।
सत्कर्म्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः॥
आस्रवः स्रोतसो द्वारं संवृणोतीति संवरः।
प्रवेशः कर्म्मणां बन्धो निर्ज्जरस्तद्वियोजनम्॥
अष्टकर्म्मक्षयान्मोक्षोऽथान्तर्भावश्च कैश्चन।
पुण्यस्य संवरे पापस्यास्रवे क्रियते पुनः।
लब्धानन्तचतुष्कस्य लोकागूढस्य चात्मनः।
क्षीणाष्टकर्म्मणो मुक्तिर्निर्व्यावृत्तिर्जिनोदिता॥
सरजोहरणा भैक्षभुजो लुञ्चितमूर्द्धजाः।
श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः॥
लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः।
ऊर्द्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः॥
भुङ्क्ते न केवली न स्त्री मोक्षमेति दिगम्बरः।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सहेति॥"

इति सर्व्वदर्शनसंग्रहे आर्हतदर्शनम्॥)

जैपालः, पुं, (जयपालः पृषोदरादित्वात् साधुः।) जयपालवृक्षः। इति द्विरूपकोषः॥

जैमिनिः, पुं, मुनिविशेषः। स वेदव्यासशिष्यः उत्तरमीमांसाकर्त्ता भारतकृत् वज्रवारकश्च। यथा, पुराणवचनम्।
"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः॥"

जैवातृकः, पुं, (जीवयति ओषधिप्रभृतीनीति। जीव + णिच् + "आतृकन् वृद्धिश्च।" उणा०। १।८१। इति आतृकन् ईकारस्य वृद्धिश्च।) चन्द्रः। कर्पूरः। इत्यमरः।१।३।१४।२।६।१३०॥ पुत्रः। इति संक्षिप्तसारे उणादिवृत्तिः॥ भेषजम्। इति हेमचन्द्रः॥

जैवातृकः, त्रि, (जीवतीति। जीव + आतृकन् वृद्धिश्च।) दीर्घायुः। (यथा, दशकुमारचरिते। "जैवातृक! नशु श्रूयते मतिरस्याः मिथिलायां प्रचारयन्मासीत्॥") कृशः। इति मेदिनी। के, १६०॥

जैह्म्यं, क्ली, (जिह्मस्य कुटिलस्य भावः। जिह्म + भावे ष्यञ्।) जिह्मता। कुटिलता। यथा, मनुः।११।६७।
"जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम्॥"

जोङ्गकं, क्ली, (जुङ्गति त्यजति सम्बन्धमिति। जुगि त्यागे + ण्वुल्। निपातनात् गुणः।) अगुरु। इत्यमरः।२।६।१२६॥

जोङ्गटः, पुं, (जुङ्गति अरोचकत्वं परित्यजत्यनेनेति। जुगि + बाहुलकात् अटन् गुणश्च।) गर्भिणीभिलाषः। इति हारावली। २१८॥ साध इति भाषा॥

जोटिङ्गः, पुं, (जूटेन इङ्गति प्रकाशते इति। अच्। पृषोदरादित्वात् साधुः।) महादेवः। महाव्रती। इति त्रिकाण्डशेषः॥

जोत्स्निका(?), स्त्री, ज्योत्स्ना। इति हेमचन्द्रः। ४।८२३। (जोमाला इति क्वचित् पाठः।)

जोषं, क्ली, (जुष प्रीतौ + भावे घञ्।) सुखम्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे।१।१२०।१।
"का राधद्धोत्राश्विना वां को वां जोष उभयोः॥"
"जोषे जोषयितव्ये आहावे।" इति दयानन्दभाष्यम्॥)

जोषम्, अ, (जुष् + बाहुलकात् अम्।) तूष्णीम्। (यथा, महाभारते।२।६८।२६।
"मैवमित्यब्रवीच्चैनं [illegible]
सुखम्। इत्यमरः।३।३।[illegible]

जोषा, स्त्री, (जुष्यते सेव्यते [illegible] जुष् + घञ्। स्त्रियां टाप्।) [illegible] शब्दरत्नावली॥

जोषिका, स्त्री, (जुष्यते सेव्यते इति। [illegible] टापि अत इत्वम्।) जालिका। [illegible] रत्नावली॥

जोषित्, स्त्री, (जुष्यते उपभुज्यते। "रुचिभुजिभ्य इतिः।" उणा०।१।[illegible] प्रत्ययः। पृषोदरादित्वात् [illegible] इति शब्दरत्नावली॥

जोषिता, स्त्री, (जोषित् + [illegible]) योषित्। इति शब्दरत्नावली॥

ज्ञः, पुं, (जानातीति। ज्ञा + [illegible] प्रीकिरः कः।" ३।१।१३५।) ब्रह्मा। बुधः। पण्डितः। (यथा, [illegible] स्थाने ३० अध्याये।
"पञ्च [illegible]
ससत्त्वं बुद्धिमासाद्य प्रकृतिं [illegible]
तद्वदज्ञो ममत्वस्य [illegible]
स्थापयत्याममात्मानमात्मा [illegible]
महीसुतः। इति धरणी॥

ज्ञप, क म ज्ञप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) क म, ज्ञपयति। [illegible]
नैनैवेष्टसिद्धौ [illegible]
फलवत्कर्त्तरि परस्मैपदार्थः। [illegible]
दीपः। वस्तुतस्तु [illegible]
तेन अनिर्द्दिष्टार्थतया [illegible]
एव प्रकृतौ [illegible]
निष्पादितेन ज्ञपधातुना [illegible]
पाद्यते। एवं ज्ञानपर्याये [illegible]
नैश्वमरः। इति दुर्गादासः॥

ज्ञपितः, त्रि, (ज्ञप्यते स्मेति। [illegible] क्तः।) ज्ञापितः। इत्यमरः।३।१।[illegible]

ज्ञप्तः, त्रि, (ज्ञप्यते स्मेति। ज्ञप + [illegible] "वा दान्तशान्त[illegible]" ७।२।२७। [illegible] साधुः।) ज्ञापितः। इत्यमरः।३।१।[illegible]

ज्ञप्तिः, स्त्री, (ज्ञप्यते ज्ञायते [illegible] भावे क्तिन्। इडभावः।) बुद्धिः। [illegible] २।५।१॥ (यथा, [illegible] २५।५७।
"मनो दीर्घमपीडाख्यं [illegible]
तज्ज्ञप्तये दाशपतेर्[illegible]

ज्ञा, क प्रेरणे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) प्रेरणमिह नियोगः। [illegible] यति भृत्यं स्वामी नियुङ्क्ते कर्म्मणि [illegible] दुर्गादासः॥

ज्ञा, घ म मारणे। आलोके। निशाने। [illegible] स्तुतौ। इति कविकल्पद्रुमः॥ ([illegible] सेट्।) घ म, ज्ञपयति अर्थं [illegible]

ज्ञापम्। आलोको दर्शनप्रेरणम्। निशानं
ह्णीकरणम्। तोषणं तुष्टीकरणम्। ज्ञप-
पशुं सूरो मारयतीत्यर्थः। ज्ञपयति रूपं
नरो चिह्नान् दर्शयतीत्यर्थः। ज्ञपयति
गं कर्मकारः शाणयतीत्यर्थः। ज्ञपयति
शिष्यस्तोषयतीत्यर्थः। स्तुतिः केचिन्न
ति। आलोको ज्ञानप्रेरणमित्यन्याम-
न्तौ। अतएव क्रमदीश्वरोऽपि ज्ञानाले-
ादित्वं विभाषया मन्यते। तेन ज्ञपयितुं
ीपयितुमित्यत्रमाणो ज्ञीप्समान इति पाणिनीय-
ो ज्ञानप्रेरणापि ह्रस्वे सनि ज्ञीप्समान इति
ुम्। एवं विज्ञप्तिरेषा मम जीवयन्ती
ादिषु च विज्ञापनमेवार्थः। इति दुर्गादासः॥
बोधे। इति कविकल्पद्रुमः॥ (क्र्यां-परं-
-अनिट्।) न, जानाति। "सन्दर्भस्तु हिं
तां जानीते जयदेव एवेत्यत्र अनुपसर्गात्
यत्कर्त्र्यात्मनेपदम्। ततोऽनुचक्रे गमनं
स्य इत्यत्रानुशब्दस्योपसर्गप्रतिरूपकत्वेना-
सर्गत्वात्॥" इति दुर्गादासः॥
ज्ञ, त्रि, (ज्ञायते विद्यते स्मेति। ज्ञा + कर्म्मणि
।) ज्ञातज्ञानम्। जाना इति भाषा। तत्-
ायः। विदितम् २ बुद्धम् ३ बुधितम् ४
मितम् ५ मतम् ६ प्रतीतम् ७ अवगतम् ८
नितम् ९ अवसितम् १०। इति जटाधरः॥
था, पञ्चतन्त्रे। १। १२३।
त्वमेव मया ज्ञातं पूर्व्वमेतद्धि मेदसा॥")
ं, त्रि, (ज्ञायते यदिति। ज्ञा + तव्य।)
नीयम्। ज्ञेयम्। वेद्यम्। अवगन्तव्यम्।
व्यम्। (यथा, महाभारते। ४। २८। ५।
राष्ट्रे परराष्ट्रे च ज्ञातव्यं बलमात्मनः॥")
तव्यम्। इति व्याकरणम्॥
सिद्धान्तः, पुं, (ज्ञातो विदितः सिद्धान्तः
शास्त्रतत्त्वार्थो येन।) शास्त्रतत्त्वज्ञः। तत्-
र्यायः। तान्त्रिकः २। इत्यमरः।२।८।१५॥
, [ऋ] त्रि, (ज्ञा + तृच्।) ज्ञानशीलः। तत्-
र्यायः। विदुरः २ विन्दुः ३। इत्यमरः।
।१।३०॥ विदितः ४ ज्ञानसमन्वितः ५।
ति शब्दरत्नावली॥
, पुं, जानाति छिद्रं कुलस्थितिञ्च ज्ञातिः
ण्णीति तिक्। इत्यमरटीकायां भरतः॥ सपि-
ादिः। तत्पर्य्यायः। सगोत्रः २ बान्धवः ३
ुः ४ स्वः ५ स्वजनः ६। इत्यमरः। २।६।३४॥
ांशकः ७ गन्धः ८ दायादः ९। इति त्रिकाण्ड-
षः॥ सकुल्यः १० समानोदकः ११। इति
टाधरः॥ स चतुर्व्विधः। सप्तमपुरुषपर्य्यन्तं
ापिण्डः। ततस्त्रिपुरुषपर्य्यन्तं सकुल्यः। तत-
चतुर्थपुरुषपर्य्यन्तं समानोदकः। जन्मनामस्मृति-
ान्तमपि समानोदकः। ततः परं गोत्रजः। इति
ाद्धितत्त्वम्॥ एषां विशेषजातचन्द्रे द्रष्टव्यः॥॥
ज्ञातिमोहे दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"यानि कानि च पापानि ब्रह्महत्यादिकानि च।
ज्ञातिमोहस्य पापस्य कलां नार्हन्ति षोडशीम्॥"

(ज्ञायते विद्यतेऽस्मादिति। ज्ञा + अपादाने
क्तिन्।) पिता। इति मेदिनी। ते, २०॥
ज्ञातेयं, क्ली, (ज्ञातेर्भावः कर्म्म वा। ज्ञाति +
"कपिज्ञात्योर्ढक्।" ५। १। १२७। इति
ढक्।) ज्ञातित्वम्। इत्यमरः। २। ६। ३५॥
ज्ञानं, क्ली, (ज्ञा + भावे ल्युट्।) विशेषेण
सामान्येन चावबोधः॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।"
इत्यमरः। १। ५। ६॥
अस्यार्थः। "मोक्षे शिल्पे शास्त्रे च या धीः
सा ज्ञानं विज्ञानञ्चोच्यते एषा विशेषप्रवृत्तिः।
अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञान-
ञ्चोच्यते एषा सामान्यप्रवृत्तिः। मोक्षे धीर्ज्ञानं
विज्ञानञ्च यथाज्ञानान्मुक्तिरिति सा याचिता
च विज्ञानं तुष्टा प्रहिं प्रयच्छति इति। अन्यत्र
यथा ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे
इति घटत्वप्रकारकज्ञानमिति ये केचित् प्राणिनो
लोके सर्व्वे विज्ञानिनो मताः इति। ब्रह्मणो
नित्यविज्ञानानन्दरूपत्वादिति एवं चित्रज्ञानं
व्याकरणज्ञानं घटपदविज्ञानमित्यादिकं प्रयु-
ज्यत एव। मोक्षनिमित्तं शिल्पशास्त्रयोर्धी-
र्ज्ञानमुच्यते तन्निमित्ततोऽन्यनिमित्तं या तयोर्धीः
सा विज्ञानमिति केचित्। मोक्षविषया मोक्ष-
फला धीर्ज्ञानं अन्यधीर्विज्ञानं क्वान्यत्र इत्याह
शिल्पशास्त्रयोरिति केचित्। अवबोध इत्य-
ध्याहृत्य मोक्षविषये अवबोधो धीः अन्यत्र
घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञान-
मिति केचित्।" इति भरतः॥ *॥ योगशास्त्र-
मते तु।
"एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वशः।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम्॥"
इति मोक्षधर्म्मः॥
"एकत्वं बुद्धिमात्रेणावस्थानं बुद्धिवृत्तिनिरोध
इति यावत्।" इति तट्टीका॥ *॥
"अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्জवम्।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥
असक्तिरनभिष्वङ्गः पुत्त्रदारगृहादिषु।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥"
सात्त्विकराजसतामसभेदेन तत्त्रिविधम्।
सात्त्विकं यथा,—
"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥"
राजसं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्वि-
धान्।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥"

तामसं यथा —
"यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्॥" ३॥
इति श्रीभगवद्गीतायाम्। १८। २०—२२॥
"सर्व्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्तेषु
परस्परं व्यावृत्तेषु अविभक्तमनुस्यूतं एकमव्ययं
निर्व्विकारं भावं परमात्मतत्त्वं येन ज्ञानेनेक्षते
आलोचयति तज्ज्ञानं सात्त्विकं विद्धि॥ १॥
सर्व्वेषु भूतेषु नानाभावान् वस्तुत एवानेकान्
क्षेत्रज्ञान् पृथग्विधान् सुखिदुःखित्वादिरूपेण
विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं
विद्धि॥ २॥
एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्-
स्नवत् परिपूर्णवत् सक्तं एतावानेव आत्मा
ईश्वरो वा इत्यभिनिवेशयुक्तं अहेतुकं निरुप-
पत्तिकं अतत्त्वार्थवत् परमार्थालम्बनशून्यं अत-
एवाल्पं तुच्छं अल्पविषयत्वात् अल्पफलत्वाच्च
यदेवम्भूतं ज्ञानं तत् तामसमुदाहृतम्॥" ३॥
इति तट्टीकायां श्रीधरस्वामी॥
न्यायमते तु।
"अप्रमा च प्रमा चैव ज्ञानं द्विविधमुच्यते।
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो देह आत्मबुद्धिः शङ्खादौ पीतिमा मतिः॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते।
किं स्विन्नरो वा स्थाणुर्व्वेत्यादि बुद्धिस्तु संशयः।
तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः॥
स संशयो भवेद्या धीरेकत्राभावभावयोः।
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्॥
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्।
पित्तदूरत्वादिरूपो दोषो नानाविधो मतः॥"
"गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा।
अथवा तत्प्रकारं यज्ज्ञानं तद्वत् विशेष्यकम्॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्व्विकल्पकम्॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्॥"
इति भाषापरिच्छेदः॥
(यथा, वायुपुराणे उत्तरभागे। ११। ३६।
"वैराग्याज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्त्तते।
योगज्ञः पतितो वापि मुच्यते नात्र संशयः॥"
विष्णुः। यथा महाभारते। १३।१४९।६१।
"सर्व्वदर्शी विशुद्धात्मा सर्व्वज्ञो ज्ञानमुत्तमम्॥"
"ज्ञानं प्रकृष्टमजन्यमनवच्छिन्नं सर्व्वस्य साधक-
मिति ज्ञानमुत्तमं 'सत्यं ज्ञानमनन्तं ब्रह्म'
इति श्रुतिः॥" इति तद्भाष्यम्॥)
ज्ञानदर्पणः, पुं, (ज्ञानं दर्पण इव यस्य।) पूर्व्व-
जिनः। इति त्रिकाण्डशेषः।
ज्ञानयोगः, पुं, (युज्यते ब्रह्मणानेनेति। युज +
करणे घञ्। ज्ञानमेव योगः।) ब्रह्मज्ञान-
प्राप्त्युपायः। यथा,—
"सर्व्वभूतेषु गोविन्दो वपुरूपो व्यवस्थितः।
इति मत्वा महाप्राज्ञः प्रतिकूलं न कारयेत्॥

शब्दादयो ये विषया विषयी चाथ पूरुषः।
आत्मीयास्तदशेषं वै स्वरूपं परमात्मनः॥
परमात्मा च भगवान् विश्वकर्म्मा जनार्द्दनः।
तद्भक्तिमान् भगवतो नाल्पपुण्योऽपि जायते॥
भागवच्छासनालम्बी भगवच्छासनप्रियः।
भगवद्भक्तिमास्थाय वत्स! भागवतो भव॥
भगवान् भूतभव्येशो भूतादिप्रभवोऽव्ययः।
भावेन तं भजस्वेशं भवभङ्गकरं हरिम्॥
भजस्व भावेन विभुं भगवन्तं भवेश्वरम्।
ततो भागवतो भूत्वा भवबन्धात् प्रमोक्ष्यसि॥
तत्र चित्तं समाधातुं न शक्नोति भवान् यदि।
तदभ्यासपरस्तस्मिन् कुरु योगं दिवानिशम्॥
तत्र यद्यसमर्थस्त्वं ज्ञानयोगे महामते!।
क्रियायोगे दिवारात्रौ तत्परः सततं भव॥"
इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानु-
शासनो नामाध्यायः। विस्तारस्तु श्रीभगवद्-
गीतायां ७ अध्याये द्रष्टव्यः॥

ज्ञानलक्षणा, स्त्री, (ज्ञानं लक्षणं स्वरूपं यस्याः।)
त्रिविधालौकिकसन्निकर्षान्तर्गतसन्निकर्षः।
तस्य लक्षणं यथा,—
"विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।"
इति भाषापरिच्छेदे। ६५॥
अस्यार्थः।"तद्विषयज्ञापकतद्विषयज्ञानम्। यथा
पूर्व्वं घटादिज्ञाने सति पश्चात् घटादिज्ञानम्।"

ज्ञानवापी, स्त्री, (ज्ञानस्य ज्ञानरूपोदकस्य
वापी दीर्घिकेव।) वाराणस्यन्तर्गततीर्थ-
विशेषः। तदुत्पत्त्यादिर्यथा,—
अगस्त्य उवाच।
"स्कन्द! ज्ञानोदतीर्थस्य माहात्म्यं वद साम्प-
तम्।
ज्ञानवापीं प्रशंसन्ति यतः स्वर्गौकसोऽप्यलम्॥
स्कन्द उवाच।
घटोद्भव! महाप्राज्ञ! शृणु पापापनोदिनीम्।
ज्ञानवाप्याः समुत्पत्तिं कथ्यमानां मयाधुना॥
अनादिसिद्धे संसारे पुरा दैवयुगे मुने!।
प्राप्तः कुतश्चिदीशानश्चरन् स्वैरमितस्ततः॥
न वर्षन्ति यदाभ्राणि न प्रावर्त्तन्त निम्नगाः।
जलाभिलाषो न यदा स्नानपानादिकर्म्मणि॥
क्षारस्वादूदयोरेव यदासीज्जलदर्शनम्।
पृथिव्यां नरसञ्चारे वर्त्तमाने क्वचित् क्वचित्॥
निर्व्वाणकमलाक्षेत्रं श्रीमदानन्दकाननम्।"
"सुखसन्तानजनकं मोक्षसाधनसिद्धिदम्।
प्रविश्य क्षेत्रमेतत् स ईशानो जटिलस्तदा।
लसत्त्रिशूलविमलरश्मिजालसमाकुलः॥
आलुलोके महालिङ्गं वैकुण्ठपरमेष्ठिनोः।
महाहमहमिकायां प्रादुरास यदादिनः॥
ज्योतिर्म्मयीभिर्म्मालाभिः परितः परिवेष्टितम्॥"
"अस्येशानस्य तल्लिङ्गं दृष्ट्वेच्छाभवत्तदा।
स्नापयामि महालिङ्गं कलसैः शीतलैर्जलैः।
चखान च त्रिशूलेन दक्षिणाशोपकण्ठतः॥
कुण्डं प्रचण्डवेगेन रुद्रो रुद्रवपुर्धरः।
पृथिव्या सह चाम्भांसि निस्तान्यासन् तदा मुने!॥
भूप्रमाणाद्दशगुणैर्येरियं वसुधावृता।
तैर्जलैः स्नापयाञ्चक्रे त्वस्पृष्टैरन्यदेहिभिः॥"
"विश्वभर्त्तुकमाप्यायं सुस्पर्शैर्ज्ञानकारिभिः।
महापापभयध्वान्तशान्तिविधायिभिः॥
मङ्गलधारैः कलसैः स ईशानो घटोद्भव!।
सहस्रकृत्वः स्नपयामास संहृष्टमानसः॥
ततः प्रसन्नो भगवान् विश्वात्मा विश्वलोचनः।
तमुवाच तदेशानं रुद्रं रुद्रवपुर्धरम्॥
तव प्रसन्नोऽस्मीशान! कर्म्मणानेन सुव्रत!।
गुरुणानन्यपूर्व्वेण ममातिप्रीतिकारिणा॥
ततस्त्वं जटिलेशान! वरं ब्रूहि तपोधन!।
अदेयं न तवास्त्यद्य महोद्यमपरायण!॥
ईशान उवाच।
यदि प्रसन्नो देवेश! वरयोग्योऽस्म्यहं यदि।
तदेतदतुलं तीर्थं तव नाम्नास्तु शङ्कर!॥
विश्वेश्वर उवाच।
त्रिलोक्यां यानि तीर्थानि भूर्भुवःस्वःस्थितान्यपि।
तेभ्योऽखिलेभ्यस्तीर्थेभ्यः शिवतीर्थमिदं परम्॥
शिवं ज्ञानमिति ब्रूयुः शिवशब्दार्थचिन्तकाः।
तच्च ज्ञानं द्रवीभूतमिह मे महिमोदयात्॥
अतो ज्ञानोदनामैतत्तीर्थं त्रैलोक्यविश्रुतम्।
अस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते॥
ज्ञानोदतीर्थसंस्पर्शादश्वमेधफलं लभेत्।
स्पर्शनाचमनाभ्याञ्च राजसूयाश्वमेधयोः॥
फल्गुतीर्थे नरः स्नात्वा सन्तर्प्य तु पितामहान्।
यत् फलं समवाप्नोति तदत्र श्राद्धकर्म्मणा॥"
"ज्ञानरूपोऽहमेवात्र द्रवमूर्त्तिं विधाय च।
जाड्यविध्वंसनं कुर्य्यां कुर्य्यां ज्ञानोपदेशनम्॥
इति दत्त्वा वरान् शम्भुस्तत्रैवान्तरधीयत।
कृतकृत्यमिवात्मानं सोऽप्यमंस्त त्रिशूलभृत्॥
ईशानो जटिलो रुद्रस्तत् प्राश्य परमोदकम्।
अवाप्तवान् परं ज्ञानं येन निर्वृतिमाप्तवान्॥"
इति स्कान्दे काशीखण्डे ३३ अध्यायः॥

ज्ञानी, [न्] पुं, (ज्ञानमस्त्यस्येति। ज्ञान+
"अत इनिठनौ।"५।२।११५। इति इनिः।)
दैवज्ञः। (सामान्यबोधयुक्तमात्रे, त्रि। यथा,
मार्कण्डेये। ८१। ३६।
"ज्ञानिनो मनुजाः सत्यं किन्तु ते नहि केवलम्।
यतो हि ज्ञानिनः सर्व्वे पशुपक्षिमृगादयः॥")
ज्ञानयुक्ते च, त्रि। इति मेदिनी। ने, ९६॥
तस्य लक्षणं यथा,—
"प्रजहाति यदा कामान् सर्व्वान् पार्थ! मनो-
गतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्म्मुनिरुच्यते॥
यः सर्व्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥
यदा संहरते चायं कूर्म्मोऽङ्गानीव सर्व्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥"
ज्ञानिनापि कर्म्म कर्त्तव्यम्। यथा,—
"सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत!।
कुर्य्याद्विद्वांस्तथासक्तश्चि[illegible]
न बुद्धिभेदं जनयेद[illegible]
जोषयेत् सर्व्व[illegible]
प्रकृतेः क्रियमाणानि गुणैः[illegible]
अहङ्कारविमूढात्मा[illegible]
तत्त्ववित्तु महाबाहो[illegible]
गुणा गुणेषु वर्त्तन्त इति[illegible]
ज्ञानित्वं मे यथा,—
"चतुर्व्विधा भजन्ते मां जना[illegible]
आर्त्तो जिज्ञासुरर्थार्थी[illegible]
तेषां ज्ञानी नित्ययुक्त[illegible]
प्रियो हि[illegible]
उदाराः सर्व्व एवैते[illegible]
आस्थितः स[illegible]
बहूनां जन्मनामन्ते ज्ञानवान्[illegible]
वासुदेवः सर्व्वमिति स महात्मा[illegible]

ज्ञानेन्द्रियं, क्ली, (ज्ञायतेऽनेनेति। ज्ञा+
ज्ञानप्रकाशकं ज्ञानसाधनं[illegible]
बुद्धीन्द्रियम्। तत् षड्विधम्। त्वक्[illegible]
श्रोत्रम् ३ घ्राणम् ४ जिह्वा ५[illegible]
श्रीभागवतम्॥

ज्ञापनं, क्ली, (ज्ञा+णिच्+भावे ल्युट्।)
इति व्याकरणम्। ज्ञापक[illegible]
राजतरङ्गिण्याम्। ३। १८।
"ज्ञितिभृद्दाक्षिणात्यानां[illegible]
पुष्पं मल्लिनिलादिं चक्रे कौबेरदि[illegible]

ज्ञाप्तिः, स्त्री, (ज्ञा+णिच्+भावे क्तिन्।)
इति मुग्धबोधम्॥

ज्ञेयं, त्रि, (ज्ञायते इति। ज्ञा+[illegible]
ज्ञानयोग्यम्। ज्ञातव्यम्। यथा,—
"ज्ञेयं यत्तत्[illegible]
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते॥
सर्व्वतः पाणिपादं तत् सर्व्वतोऽक्षिशिरो[illegible]
सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति॥
सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्जितम्।
असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च॥
बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च[illegible]
अविभक्तञ्च भूतेषु विभक्तमिव च स्थि[illegible]
भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमु[illegible]
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य[illegible]
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्त[illegible]
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते॥"
इति श्रीभगवद्गीतायां १३ अ[illegible]

ज्या, त्रि जरायाम्। इति कविकल्पद्रुमः।
(ऋदन्तं-अकं-अनिट्।) जरा वयोहानिः।
ति, जिनाति वृद्धः। जीनः। इति दुर्गादासः।

ज्या, स्त्री, (ज्या+अन्येभ्योऽपीति डः।
धनुर्गुणः। तत्पर्य्यायः। मौर्व्वी २ द्वि-
गुणः ३ इत्यमरः।२।८।८५॥ शिञ्जिनी[illegible]

का ७। इति शब्दरत्नावली ॥ यथा ८
ला:८ दुर्गा१० । इति हेमचन्द्रः ॥ (यथा,
तारते । १ । २२६ । २० ।
ए वलमाश्याय ज्यया च युयुजे धनुः ॥")
। वसुधा । इति मेदिनी । चे, २ ॥
स्त्री, (ज्या + "वीज्याज्वरिभ्यो निः ।"
४ । ४८ । इति निः ।) जीर्णता । हानिः ।
। । इति शब्दरत्नावली ॥
[स्] त्रि, (अयमनयोरतिशयेन वृद्धः
ो वा इति । वृद्ध वा प्रशस्य + ईयसुन्
शस्य ततो "ज्यादादीयसः ।" ६।४।१६०।
म् ।) वृद्धतमः । तत्पर्य्यायः । वर्षी-
२ दशमी ३ प्रशस्यः ४ । इत्यमरः । २ ।
४३ ॥ अतिवृद्धः ५ दशमीस्थः ६ । इति
रः ॥ (यथा, मनुः ।३।१३७ । [पिता ॥")
ांसमनयोर्विद्यात् यस्य स्यात्क्षेत्रिकः
त्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-
अनिट् ।) ङ, ज्यवते । इति दुर्गादासः ॥
ए दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
सेट्।) इर्, अज्युतत् अज्योतीत् जुज्योत ।
दुर्गादासः ॥
: ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-
-अकं-सेट् ।) अन्तःस्थादियुक्तः । अ,
ज्योतत् । ङ, ज्योतते चन्द्रः । इति दुर्गादासः ॥
त्रि, (अयमेषामतिशयेन वृद्धः प्रशस्यो
इति । वृद्ध वा प्रशस्य + इष्ठन् ततो
ः ।) अतिवृद्धः । श्रेष्ठः । (यथा, महा-
ते । १३ । १४३ । ७ ।
र्थं वर्णमनुप्राप्य तस्माद्रक्षेत वै द्विजः ॥"
नक्षत्रयुक्ता पौर्णमासीत्यण् इति ज्यैष्ठी
असिन् मासीति पुनरण् संज्ञापूर्व्वस्य
रनित्यत्वात् वृद्धिः ।) ज्यैष्ठमासि, पुं ।
मेदिनी । टे, ५ ॥अग्रजः । (यथा, रघुः ।
। १८ ।
भक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ॥")
अकवयाः । इति भरतः ॥
तः, पुं, (तातस्य पितुर्ज्येष्ठः । राजदन्तादि-
पूर्व्वनिपाते साधुः ।) पितुरग्रजः ।
। शब्दरत्नावली ॥ ज्येठा इति भाषा ॥
र्णः, पुं, (वर्णानां ज्येष्ठः श्रेष्ठः निर्द्धारणे तु
ष्ठ ज्येष्ठः । पूर्व्वनिपातः ।) ब्राह्मणः । इति
रत्नावली ॥
ला, स्त्री, (ज्येष्ठाख्या बला ।) महदेवी ।
राजनिर्घण्टः ॥
ः, स्त्री, (ज्येष्ठा पूज्या श्वश्रूरिव संज्ञात्वात्
ावः ।) भार्या ज्येष्ठभगिनी । बड़शाली
भाषा । तत्पर्य्यायः । कुली २ । इति
मचन्द्रः ॥
ाम, [न्] क्ली, (ज्येष्ठं साम इति नित्यकर्म-
रयः ।) सामभेदः । तदध्ययनाङ्गव्रतम् । इति
ताक्षरा ॥ (यथा, महाभारते ।१२।३४७।४६।
देष्ठं नामाभिविख्यातं ज्येष्ठसामव्रतो हरिः ॥")

ज्येष्ठा, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गता-
ष्टादशनक्षत्रम् । सा तु शूकरदन्ताकृति-
तारकात्रितयात्मिका । इति कालिदासः ॥
वलयाकृतिः । अस्या देवता इन्द्रः मिश्रगुणः ।
इति दीपिका ॥ अत्र जातस्य फलम् ।
"सत्कीर्त्तिपुत्त्रैर्विविधैः समेतो
वित्तान्वितोऽत्यन्तलसत्प्रतापः ।
श्रेष्ठप्रतिष्ठो विकलस्वभावो
ज्येष्ठा भवेद्यस्य च जन्मकाले ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
(यथा, मार्कण्डेयपुराणे । ३४ । १३ ।
"कुर्व्वन्त्यनुराधासु लभन्ते चक्रवर्त्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु कुर्य्ये चारोग्यमुत्तमम् ॥")
गृहगोधिका । इति मेदिनी । ठे, ५ ॥ मध्यमा-
ङ्गुलिः । इति हेमचन्द्रः ॥ गङ्गा । इति राज-
निर्घण्टः ॥ धीरादिनायिकाभेदः । तस्या लक्षणं
यथा । परिणीतत्वे सति भर्त्तुरधिकस्नेहा ।
इति रसमञ्जरी ॥ * ॥ अलक्ष्मीः । यथा भग-
वतीं प्रति महादेववाक्यम् ।
"मां प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम् ।
तस्मिन् प्रमथ्यमाने तु मया देवेश भाविनि ! ॥
ज्येष्ठा देवी समुत्पन्ना रक्तसर्व्वाससावृता ।
उत्पन्ना साब्रवीद्देवान् किं कर्त्तव्यं मयेति वै ॥
तामनुवंस्तदा देवीं सर्व्वे देवगणा भृशम् ।
येषां गृहान्तरे नित्यं कलहः संप्रवर्त्तते ॥
तत्ते स्थानं प्रयच्छामो वासस्तत्र शुभानने ! ।
यस्य गेहे कपालास्थिभस्मकेशादिचिह्नितम् ॥
परुषं भाषते नित्यं वदन्त्यनृतवादिनः ।
सन्ध्याकाले च ये पापाः स्वपन्ति मलचेतसः ॥
तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी ।
कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु ॥
तत्र ते सततं स्थानं भविष्यति न संशयः ।
अकृत्वा पादयोः शौचं यस्त्वाचामति दुर्म्मतिः ॥
तं भजस्व सदा देवि ! कलुषेणावृता भृशम् ।
तुषाङ्गारकपालाश्मवालुकावसचर्म्मभिः ॥
दन्तधावनकर्म्माणो भविष्यन्ति नराधमाः ।
रमस्व कलिना देवि ! तेषां वेश्मसु नित्यशः ॥
तिलपिष्टञ्च नक्तञ्च कालिङ्गशिग्रुगृञ्जनम् ।
कृताकं बिड्वराहञ्च बिल्वकोषातकीफलम् ॥
अलावुप्रौढलं ये वै खादयन्ति नराधमाः ।
तेषां गृहे तव स्थानं देवि ! दारिद्र्यदे ! सदा ॥
इत्यादिश्य सुराः सर्व्वे ते ज्येष्ठां कलिवल्लभाम् ।
पुनश्च मन्थनं चक्रुः क्षीराब्धिं सुसमाहिताः ॥"
इति पाद्मे उत्तरखण्डम् ॥
ज्येष्ठामूलीयः, पुं, (ज्येष्ठा मूला वा नक्षत्रमर्हति
पौर्णमासात्मिति छः ।) ज्यैष्ठमासः । इति
त्रिकाण्डशेषः ॥ (यथा, शब्दार्थचिन्तामणिः ।
"ज्येष्ठामूलीयमिच्छन्ति मासमाषाढ़पूर्व्वकम् ॥")
ज्येष्ठाम्बु, क्ली, (ज्येष्ठं विविधरोगविनाशकत्वात् श्रेष्ठं
अम्बु तण्डुलधौतं जलमिति । नित्यकर्म्मधारयः ।)
तण्डुलाम्बु । इति वैद्यकपरिभाषा ॥ चेङ्गनि
जल इति भाषा ॥

ज्येष्ठाश्रमी, [न्] पुं, (आश्रमोऽस्त्यस्य इति ।
आश्रम + इनिः । ज्येष्ठः श्रेष्ठ आश्रमी ।)
"ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः ॥"
"यथा वायुं समाश्रित्य वर्त्तन्ते सर्व्वजन्तवः ।
तथा गार्हस्थ्यमाश्रित्य वर्त्तन्ते सर्व्व आश्रमाः ॥"
इति वचनात् गृहस्थाश्रमस्य सर्व्वाश्रमेभ्युत्कृष्ट-
त्वात् तथात्वम् ।) गृहस्थः । इति हेमचन्द्रः ॥
ज्येष्ठी, स्त्री, गृहगोधा । चेठी इति टिक्टिकी
इति च भाषा । तत्पर्य्यायः । मुषली २ मुसली ३
कुड्यमत्स्या ४ गृहगोधिका ५ मूली ६ टुक्-
टुकी ७ शकुनज्ञा ८ गृहालिका ९ । इति
शब्दरत्नावली ॥ तस्याः पतनफलं यथा,—
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणहृदिस्था सर्व्वसौख्यं ददाति ॥"
इति ज्योतिषम् ॥
दिग्विशेषे तस्य शब्दफलम् ।
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामप्यभयं सुरद्विषि कलिर्लाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिग्यङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिक्चक्रं खञ्जने ॥
ज्येष्ठीरुते क्षुतेऽप्येवमूचुः केचिच्च कोविदाः ॥"
इति तिथ्यादितत्त्वम् ॥
ज्यैष्ठः, पुं, (ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यण् ङीप्
च । सा अस्मिन् मासे इति पुनरण् ।) मास-
विशेषः । ज्येष्ठानक्षत्रयुक्ता पौर्णमासी ज्यैष्ठी
सा यत्र मासे भवति सः । इत्यस्यरविचारत्व-
शुक्लप्रतिपदादिदर्शान्तश्चान्द्रः । वृषराशिस्थ-
रविकः सौरः । इति स्मृतिः ॥ तत्पर्य्यायः ।
शुक्रः २ । इत्यमरः ।१।४।१६॥ ज्येष्ठः ३ । इति
शब्दरत्नावली ॥ तत्र जातस्य फलं यथा,—
"विदेशशक्तिः पुरुषः सुतीव्रः
क्षमान्वितः स्यात् खलु दीर्घसूत्रः ।
विचित्रबुद्धिर्विदुषां वरिष्ठो
ज्यैष्ठाभिधाने जननं हि यस्य ॥"
इति कोष्ठीप्रदीपः ॥
ज्यैष्ठसामा, [न्] पुं, (ज्येष्ठसाम अधीते यः सः ।
इत्यण् ।) ज्येष्ठसामा । ज्येष्ठसामवेदाध्येता ।
इति मिताक्षरा ॥
ज्यैष्ठी, स्त्री, (ज्येष्ठानक्षत्रान्विता पौर्णमासीत्यण्
ङीप् च ।) ज्यैष्ठपूर्णिमा । इति शब्दरत्नावली ॥
(यथा, तिथितत्त्वधृतभविष्यपुराणवचनम् ।
"कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी
सिता ।
मन्वन्तरादयश्चैता दत्तस्याक्षयकारिकाः ॥")
ज्योष्ठी च ॥
ज्यो, ङ नियमे । व्रतादेशे । उपनीतौ । इति कवि-
कल्पद्रुमः ॥ (भ्वां-आत्मं-अकं नियमार्थे-व्रता-
देशार्थे तु सकं-अनिट् ।) व्रतस्यादेशो व्रता-
देशः । ङ, ज्यवते धार्म्मिको नियमो स्वादिकर्त्तः ।

ज्यवते प्रक्तितो जनं प्रतसुपदिशतीत्यर्थः। ज्यवते पुत्रं विप्रः उपनयतीत्यर्थः। इति दुर्गादासः॥

ज्योतिः, [स्] क्ली, (ज्युत दीप्तौ+इसिः। यद्वा, द्युत दीप्तौ+"द्युतेरिसिन्नादेश्च जः।" उणा। २। ११२। इति इसिन् दस्य च जः।) दृष्टिः। नक्षत्रम्। (यथा, "ज्योतींष्यग्निश्चामेध्यमप्रशस्तञ्च नाभिवीक्षेत॥" इति चरके सूत्रस्थानेऽष्टमेऽध्याये॥) प्रकाशः। इति मेदिनी। से, २३॥

ज्योतिः, [स्] पुं, (ज्योतते इति। ज्युत+कर्त्तरि इसिः। द्युत+इसिन् वा।) अग्निः। (यथा,—
"तस्यान्तरेण नाभेस्तु ज्योतिः स्थानं ध्रुवं स्मृतम्।
तदा धमति वातस्तु देहस्तेनास्य वर्द्धते।"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)
सूर्य्यः। इति मेदिनी। से, २२॥ मेथिका। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते १३।१४६।७६।
"स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः॥")

ज्योतिरिङ्गः, पुं, (ज्योतिषा इङ्गतीति। इगि गतौ+अच्। ज्योतिरिव इङ्गतीति वा।) खद्योतः। इति शब्दरत्नावली॥

ज्योतिरिङ्गणः, पु, (ज्योतिरिव इङ्गतीति। इगि गतौ+ल्युः।) कीटविशेषः। ज्योनाकपोका इति भाषा। तत्पर्य्यायः। खद्योतः २ ध्वान्तोन्मेषः ३ तमोमणिः ४ दृष्टिबन्धुः ५ तमोज्योतिः ६ ज्योतिरिङ्गः ७ निमेषकः ८। इति शब्दरत्नावली॥ ज्योतिर्व्वीजम् ९ निमेषरुक् १०। इति त्रिकाण्डशेषः॥

ज्योतिर्व्वीजं, क्ली, (ज्योतिर्वीजमिवास्य ज्योतिषो वीजमिव वा।) ज्योतिरिङ्गणः। इति त्रिकाण्डशेषः॥

ज्योतिर्हस्ता, स्त्री, (ज्योतिर्ज्योतीरूपं हस्तं शरीरमस्याः।) दुर्गा। अस्या नामनिरुक्तिर्यथा,—
"हस्तं शरीरमित्याहुर्हस्तञ्च गगनं तथा।
ज्योतिषि गहनत्वाच्च ज्योतिर्हस्ता मता स्मृता॥"
इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः॥

ज्योतिश्चक्रं, क्ली, (ज्योतिर्म्मयं चक्रम्। ज्योतिभिः स्वस्वावस्थानेन विरचितं चक्रं वा।) चन्द्रसूर्य्यादिग्रहनक्षत्रमण्डलम्। राशिचक्रम्। यथा,
"ज्योतिश्चक्रं शुभो मानमङ्गं प्रोवाच केशवः।
चातुर्लक्षं ज्योतिषस्य सारं रुद्राय सर्व्वदः॥"
इति गरुडपुराणम्॥

अपि च तिथ्यादितत्त्वे।
"सप्तविंशतिभिर्ज्योतिश्चक्रं स्तिमितवायुगम्।
तदर्कांशो भंशकाशिर्नैवर्चचरणाङ्कितः॥"

ज्योतिषं, क्ली, (ज्योतिः सूर्य्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच्।) वेदाङ्गशास्त्रविशेषः। तत् ग्रहणादिगणनशास्त्रम्। इत्यमरटीकायां भरतः॥
"पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता।
केरलिः शकुनश्चैव———————॥"
इति अमररत्नटीका॥*॥

अस्य सम्बन्धादि यथा,—
"अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति कीर्त्तितः।
अभिधेयञ्च जगतां शुभाशुभनिरूपणम्॥
यज्ञाध्ययनसंक्रान्तिग्रहषोडशकर्म्मणाम्।
प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयः॥"
इति नारदीयम्॥*॥

अस्याध्ययनं द्विजैः कर्त्तव्यम्। यथा,—
"सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।
वेदस्य निर्म्मलं चक्षुर्ज्योतिःशास्त्रमनुत्तमम्॥
विनैतदखिलं श्रौतं स्मार्त्तं कर्म्म न सिध्यति।
तस्माज्जगद्धितायेदं ब्रह्मणा निर्म्मितं पुरा॥
अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः॥"
इति नारदः॥*॥

शूद्रस्य पाठनिषेधो यथा,—
"अविद्यालोभाच्च मोहाच्च यो विप्रो ज्ञानतोऽपि वा।
शूद्राणामुपदेशन्तु दद्यात् स नरकं व्रजेत्॥"
इति गर्गः॥*॥

अस्य प्राधान्यकं यथा,—
"वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञान्॥
यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्द्ध्नि संस्थितम्॥"
इति वेदाङ्गज्योतिषम्॥*॥

अस्याध्ययनफलं यथा,—
"एवंविधस्य मुनिनेत्रशास्त्र-
स्वरूपमर्थं खलु दर्शनं वै।
निहन्त्यशेषं कलुषं जनानां
यद्वन्दनं धर्म्मसुखाकरं स्यात्॥"
इति माण्डव्यः॥*॥

अस्य ज्ञाने फलं यथा,—
"ज्योतिश्चक्रे तु लोकस्य सर्व्वस्योक्तं शुभाशुभम्।
ज्योतिर्ज्ञानन्तु यो वेद स याति परमां गतिम्॥"
इति गर्गः॥

ज्योतिषिकः, पुं, (ज्योतिर्ज्योतिःशास्त्रं अधीते इति। क्रत्वादित्वात् ठक् संज्ञापूर्व्वस्य विधेरनित्यत्वात् न वृद्धिः।) ज्यौतिषिकः। इत्यमरटीका। (यथा, मार्कण्डेये।
"धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुडाश्मकाः॥")

ज्योतिषी, स्त्री, (ज्योतिरस्त्यस्या इति अच् ङीप् च।) तारा। इति हेमचन्द्रः। ज्योतिषशास्त्रज्ञे, त्रि॥

ज्योतिष्कः, पु, (ज्योतिरिव कायतीति। कै+कः।) चित्रकवृक्षः। मेथिकावीजम्। इति राजनिर्घण्टः॥ (अस्य व्यवहारो यथा, "ज्योतिष्कफलतैलं वा क्षीरेण सर्ज्जिका हिङ्गु मिश्रं पिबेत्॥" इति चिकित्सितस्थाने चतुर्द्दशेऽध्याये सुश्रुतेनोक्तम्॥) गणिकारिकावृक्षः। इति रत्नमाला॥

ज्योतिष्काः, पुं, (... ... ...
... ...
... ...

ज्योतिष्का, स्त्री, (ज्योतिरिव ...
... च।) ज्योतिष्मती। ...
... ॥

ज्योतिष्टोमः, पुं, (ज्योतींषि ...
यत्र। "ज्योतिष्टोमः ...
... ...
... ...
(यथा, महाभारते। ३। ...
"... ...

ज्योतिष्मती, स्त्री, (ज्योतिरस्त्यस्या ...
उदित्वात् ङीप् च।) लताविशेष। ...
कङ्गनी इति ... इति
इति च भाषा। तत्पर्य्यायः। ...
कटभी ३ पिण्या ४। इत्यमरः। ...
पारावतपदी ६ वायसी ७ ...
मेधा ८ इङ्गुदी ९। इति रत्न...
लता १० अनलप्रभा ११ ज्योति...
सुला १२ दीप्ता १३ मेधा १४ ...
दुर्जरा १७ सरस्वती १८ ...
अस्या गुणाः। अतितिक्त...
त्वम्। वातकफापहत्वञ्च। ...
गुणाः। दाहदत्वम्। दीपन...
बुद्धिकारित्वञ्च। इति राजनिर्घ...
त्वम्। व्रणविस्फोटनाशित्वञ्च। ...
वल्लभः॥ रात्रिः। इति शब्द...
विशेषः। यथा, मात्स्ये। १२०। ...
"सरस्वती प्रभवति ...
अवगाढे शुभयतः ... पूर्व्व...
ज्योतिर्व्विशिष्टे, त्रि। यथा, रघुः।
"नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः"

ज्योतीरथः, पुं, (ज्योतिरेव रथः ...
ज्योतिश्चक्रस्य रथ इव वा ...
सूर्य्यादीनामाधारत्वात् ...
ध्रुवः। इति त्रिकाण्डशेषः॥

ज्योत्स्ना, स्त्री, (ज्योतिरस्त्यस्याम् ...
तमिस्रेति।" ५।२।११४। इति ...
नपत्वञ्च उपधालोपश्च।) चन्द्रज्योति...
इति हिन्दी भाषा। तत्पर्य्यायः। ...
कौमुदी ३। इत्यमरः। १।३।१...
कामवल्लभा ५ चान्द्रातपः ६ ...
शीता ८ अमृततरङ्गिणी ९। ...
भारते। १।१।८६।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः ...
ज्योत्स्नाशुक्लरात्रिः। इति मेदि...
पटोलिका। इत्यमरटीकायां ...
गुणाः। त्रिदोषशमनत्वम्। ...
कषायत्वम्। मधुरत्वम्। ...
त्वञ्च। इति राजवल्लभः॥ ...

नाशा ॥ दुर्गा । यथा,—
भाप्रसादशीलत्वात् ज्योत्स्ना चन्द्रार्क-
मालिनी ।"
इति देवीपुराणे ४५ अध्याय: ॥
पि च ।
रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ।
ोत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥"
इति मार्कण्डेये देवीमाहात्म्ये ५ अध्याय: ॥
प्रभातकालः । यथा, विष्णुपुराणे । १ ।५।३६।
ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याऽभि-
धीयते ॥")
त्स्नाप्रियः, पुं, (ज्योत्स्ना प्रियाऽस्य ।) चकोरः ।
ति हेमचन्द्रः ॥
त्स्नावृक्षः, पुं, (ज्योत्स्नाया दीपधारण इव
ः ।) दीपाधारः । इति त्रिकाण्डशेषः ॥
स्नी, स्त्री, (ज्योत्स्ना अस्त्यस्या इत्यण् ङीप्
। संज्ञापूर्व्वकस्य विधेरनित्यत्वान्न वृद्धिः ।)
न्द्रिकायुक्ता रात्रिः । ज्योत्स्नारात्रिरिति
ाता । पटोलिका । इत्यमरः ।२ । ४ । ११८॥
न्झा इति भाषा ॥ रेणुकानाम गन्धद्रव्यम् ।
ति शब्दचन्द्रिका ॥
तिषिकः, पुं, (ज्योतिषं ज्योतिषशास्त्रमधीते
द वा इति ठक् वृद्धिश्च ।) दैवज्ञः । इत्य-
रः । २ । ८ । १४ ॥
त्स्नः, त्रि, (ज्योत्स्नया अन्वितः । इत्यण् ।)
मिः । ज्योत्स्नायुक्तः ॥
त्स्निका, स्त्री, (ज्योत्स्ना अस्त्यस्या इति
क् पूर्व्ववृद्धिष्टाप् च ।) ज्योत्स्नान्विता निशा ।
ति शब्दरत्नावली ॥
त्स्नी, स्त्री, (ज्योत्स्ना पूर्णचन्द्रचन्द्रिका
स्त्यस्याः इत्यण् पूर्व्ववृद्धिः ङीप् च ।) पूर्णिमा-
ात्रिः । इति हेमचन्द्रः ॥ ज्यौत्स्नी । इत्य-
रटीकायां रायमुकुटः ॥
अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वां परं-
र्कं-अनिट् ।) रेफोपधः । ज्रयति शत्रुं बली ।
ति दुर्गादासः ॥
ि कि हाने । गतवृद्धवयोभाव इति यावत् ।
ति कविकल्पद्रुमः ॥ (क्र्यां-चुरां पक्षे भ्वां-परं-
कं-अनिट् ।) णि, ज्रीणाति ज्रीणः ज्रीणिः ।
क, ज्रायति ज्रयति । णिकाभ्यामेव पाक्षिक-
ुरादित्वे सिद्धे कि पाठो भ्वादित्वार्थः । इति
ुर्गादासः ॥
, म रोगे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
कं-सेट् ।) ज्वरति जनो धातुवैषम्यात् । म,
ज्वरयति । इति दुर्गादासः ॥
, पुं, (ज्वरति जीर्णो भवत्यनेन । ज्वर +
करणे घञ् भावे घञ् वा । संज्ञापूर्व्वक-
त्वात् वृद्ध्यभावः ।) ज्वरणम् । स्वनामख्यात-
रोगः । तत्पर्य्यायः । जूर्त्तिः २ । इत्यमरः । ३ ।
२ । ३६ ॥ ज्वरिः ३ ज्वातङ्कः ४ रोगश्रेष्ठः ५
महागदः ६ । इति राजनिर्घण्टः ॥ तापकः ७
सन्तापः ८ । इति शब्दरत्नावली ॥ * ॥

तस्योत्पत्तिर्यथा,—
"कालाग्निरुद्रः कोपेन चिक्षेप ज्वरसुल्बणम् ।
बभूवुर्य्यादवाः सर्व्वे ज्वराक्रान्ता हरिं विना ॥
तं दृष्ट्वा भगवान् कृष्णः ससर्ज्ज वैष्णवं ज्वरम् ।
तं चिक्षेप ज्वरं हन्तुं माहेशं रणमूर्द्धनि ॥" * ॥
माहेशज्वराकारो यथा,—
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव विकृताकृतिः ॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥" * ॥
तस्य भेदाः ।
"वायुजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरभेदाश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
जातिभेदे ज्वरभेदो यथा, हरिवंशे ।
श्रीकृष्ण उवाच ।
"शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि ।
सर्व्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे ॥
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसि ।
चतुष्पादान् भजैकेन द्वितीयेन च स्थावरान् ॥
तृतीयो यश्च ते भागो मानुषेषूपपत्स्यते ।
त्रिधाभूतं वपुः कृत्वा पक्षिषु त्वं भव ज्वर ॥
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् ।
एकान्ततश्चतुर्भागः खोरकश्च चतुर्थकः ॥
मानुषेष्वथ खेदाय वस त्वं प्रविभज्य वै ।
जातिष्वथावशेषासु निवस त्वं शृणुष्व मे ॥"
अस्यार्थः । "मानुषेषु यस्तृतीयो भागः तस्य
चतुर्भागं कृत्वा एकांशेन पक्षिषु वस द्वितीयेन
एकान्ता देवालयेषु तृतीयांशः खोरकः चतु-
र्थांशेन मानुषेषु वस ॥"
"वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः ।
पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च ॥"
आतुर्य्यं निःसारता ॥
"पद्मिनीषु हिमो भूत्वा पृथिव्यामपि चोषरः ।
अपां तु नीलिकां विद्यात् शिखोद्भेदश्च बर्हिणाम् ॥
गैरिकः पर्व्वतेष्वेव मत्प्रसादाद्भविष्यसि ।
गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि ॥
एवं विविधरूपेण भविष्यसि महीतले ।
दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि ॥
ऋते देवमनुष्यांश्च नान्यस्तां विषहिष्यति ॥"
तस्य गारुडोक्तनिदानादिर्य्यथा,—
धन्वन्तरिरुवाच ।
"वक्ष्ये ज्वरनिदानं हि सर्व्वज्वरविबुद्धये ।
ज्वरो रोगपतिः पाप्मा मृत्युराजोऽशनोऽन्तकः ॥
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्द्ध्वनयनोद्भवः ।
तत्सन्तापो मोहमयः सन्तापात्मापचारजः ॥
विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते ।
पाकलो गजेष्वभितापो वाजिष्वलर्कः कुक्कुरेषु ।
इन्द्रमदो जलदेऽम्बु नीलिका ज्योतिरोषधिषु
भूम्यामूषरो नाम ॥ * ॥
"हृल्लासच्छर्द्दनं कासः स्तम्भः शैत्यं त्वगादिषु ।
अङ्गेषु शीतपिड़कासाश्चोदर्दः कफोद्भवे ॥

काले यथास्वं सर्व्वेषां प्रवृत्तिर्वृद्धिरेव वा ।
निदानोक्तानुपशयो विपरीतोपशायिता ॥ * ॥
अरुचिश्चाविपाकश्च स्तम्भमालस्यमेव च ।
हृद्दाहश्च विपाकश्च तन्द्रा आलस्यमेव च ॥
वस्तिर्विमर्गविलया दोषाणामप्रवर्त्तनम् ।
लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं मुखम् ॥
यच्च सुप्तं गुरुत्वञ्च गात्राणां बहुमूत्रता ।
न विजीर्णा न चाग्लानिर्ज्वरस्यामस्य लक्षणम् ॥
क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम् ।
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ॥ * ॥
यथास्वलिङ्गं संसर्गे ज्वरसंसर्गजोऽपि वा ।
शिरोऽर्त्तिमूर्च्छावमिदेहदाह-
कण्ठास्यशोषारुचिपर्व्वभेदाः ।
उन्निद्रता संभ्रमरोमहर्षौ
जृम्भातिवाक्त्वं पवनात् सपित्तात् ॥ * ॥
तापहान्यरुचिपर्व्वशिरोरुक्-
पीनसश्वसनकासविबन्धाः ।
शीतजाड्यतिमिरभ्रमितन्द्राः
श्लेष्मवातजनितज्वरलिङ्गम् ॥ * ॥
शीतस्तम्भस्वेददाहव्यवस्था-
तृष्णाकासश्लेष्मपित्तप्रवृत्तिः ।
मोहस्तन्द्रालिप्ततिक्तास्यता च
ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य ॥ * ॥
सर्व्वजो लक्षणैः सर्व्वैर्द्दाहोऽत्र च मुहुर्म्मुहुः ।
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि ॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा ।
गीतनर्त्तनहास्यादिप्रकृतेहाप्रवर्त्तनम् ॥
सास्रुणी कलुषे रक्ते भग्ने लुलितपक्ष्मणी ।
अक्षिणी पिण्डिकापार्श्वमूर्द्धपर्व्वास्थिरुग्भ्रमः ॥
सस्वनौ सरुजौ कर्णौ महास्वेदोऽति नैव वा ।
परिदग्धा खरा जिह्वा गुरुस्रस्ताङ्गसन्निभा ॥
रक्तपित्तकफे जिह्वा लोचने शिरसोऽतिरुट् ।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् ॥
हृद्व्यथा मलसंसर्गः प्रवृत्तिर्वाल्पशोऽति वा ।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता ॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् ।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् ॥
वायुना कफरुद्धेन पित्तमन्तःसुपीड़ितम् ।
यथाविलाच्च सौम्याच्च वहिर्म्मार्गं प्रपद्यते ॥
तेन हारिद्रनेत्रत्वं सन्निपातोद्भवे ज्वरे ।
दोषे विवृद्धे नष्टेऽग्नौ सर्व्वसंपूर्णलक्षणः ॥
असाध्यः सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा ।
अन्यश्च सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम् ॥
त्वचि कोष्ठे च वा दाहं विदधाति पुरोऽनु वा ।
तद्वद्वातकफौ शीतं दाहादिर्दुस्तरस्तयोः ॥
शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ।
शीते शान्तेऽक्षरे मूर्च्छा मदस्तृष्णा च जायते ॥
दाहादौ पुनरन्ते स्युस्तन्द्रास्वेदवमिक्लमाः ॥ * ॥
आगन्तुरभिघाताभिषङ्गशापाभिचारतः ॥
चतुर्द्धा तु क्षतच्छेददाहाद्यैरभिघातजः । * ।
श्रमाच्च तस्मिन् पवनः प्रायो रक्तं प्रदूषयन् ।
सव्यथाशोथवैवर्ण्यं सरुजं कुरुते ज्वरम् ।

ग्रहावेशौषधिविषक्रोधभीशोककामजः ।
अभिघाताद्यश्चैवाभिषङ्ग कम्पातापरोदने ।
ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः ॥*॥
विषान्मूर्च्छातिसारास्यश्यावता दाहहृद्भ्रमः ।
क्रोधात् कम्पः शिरोरुक् च प्रलापो भयशोकजे ।
कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः ॥
ग्रहादौ सन्निपातस्य रूपादौ मरुतस्त्रयोः ॥
कोपः कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ ।
सन्निपातज्वरौ घोरौ तावसह्यतमौ मतौ ॥*॥
तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते ।
पूर्व्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः ॥
सदाहमूर्च्छैर्यस्तस्य प्रत्यहं वर्द्धते ज्वरः ।
इति ज्वरोऽष्टधा दृष्टः समासाद्द्विविधस्तु सः ॥
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः ।
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः ॥
पूर्व्वं शरीरे शारीरे तापो मनसि मानसे ।
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् ॥
दाहः पित्तयुते मिश्रं मिश्रेऽन्तःसंश्रये पुनः ।
ज्वरेऽधिकं विकाराः स्युरन्तःक्षोभो मलग्रहः ॥
बहिरेव बहिर्वेगे तापोऽपि च सुसाधितः ।
वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ॥
वैकृतोऽन्यः सुदुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ।
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ॥
कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः ।
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ॥
कफो वसन्ते तमपि वातपित्तं भवेदनु ।
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥
सर्व्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ।
ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्बहुमूत्रता ॥
न प्रवृत्तिर्न विड्जीर्णा न क्षुत् सामज्वराकृतिः ।
ज्वरवेगोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ॥
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥
जीर्णतामविपर्य्यासात् सप्तरात्रञ्च लङ्घनात् ।
ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् ॥
प्रायशः सन्निपातेन भूयसाप्युपदिश्यते ।
सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।
धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः ॥
तापयन्तस्तनुं सर्व्वां तुल्यदूष्यादिवर्द्धिताः ।
बलिनो गुरवस्तब्धा विशेषेण रसाश्रिताः ॥
सन्ततं निष्प्रतिद्वन्द्वा ज्वरं कुर्य्युः सुदुःसहम् ।
मलं ज्वरोष्मा धातून् वा स शीघ्रं क्षपयेत्ततः ॥
सर्व्वाकाररसादीनां शुद्ध्याशुद्ध्यापि वा क्रमात् ।
वातपित्तकफैः सप्तदशद्वादशवासरान् ॥
प्रायोऽनुयाति मर्य्यादां मोक्षाय च वधाय च ।
इत्यग्निवेशस्य मतं हारीतस्य पुनः स्मृतिः ॥
द्विगुणा सप्तमी या च नवम्येकादशी तथा ।
एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥
शुद्ध्यशुद्धौ ज्वरः कालं दीर्घमप्यनुवर्त्तते ।
कृशानां व्याधियुक्तानां मिथ्याहारादिसेविनाम् ॥
अल्पोऽपि दोषो दुष्ट्यादेर्लब्ध्वान्यतमतो बलम् ।
स प्रत्यनीको विषमं मलाद्वृद्धिक्षयान्वितः ॥
सोऽरिपक्षो ज्वरं कुर्य्याद्विषमक्षयवृद्धिभाक् ।

दोषः प्रवर्त्तते तेषां स्वे काले ज्वरयन् बली ॥
निवर्त्तते पुनश्चैव प्रत्यनीकबलाबलः ।
क्षीणदोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते ॥
लीनत्वात् कार्श्यवैवर्ण्यजाड्यादीनादधाति सः ।
आसन्नविवृतास्यत्वात् स्रोतसां रसवाहिनाम् ॥
आशु सर्व्वस्य वपुषो व्याप्तिर्दोषेण जायते ।
सन्ततः सततस्तेन विपरीतो विपर्य्ययात् ॥
विषमो विषमारम्भः क्षपाकालेन सङ्क्रमात् ।
दोषो रक्ताश्रयः प्रायः करोति सततं ज्वरम् ॥
अहोरात्रस्य सन्धिः स्यात् सकृदन्येद्युराश्रितः ।
तस्मिन् मांसवहा नाड्यो मेदोनाड्यो तृतीयके ॥
ग्राहो पित्तानिलान्मूर्ध्नस्त्रिकस्य कफपित्ततः ।
स पृष्ठस्यानिलकफात् स चैकाहान्तरः स्मृतः ॥
चतुर्थको मलैर्मेदोमज्जास्थ्यन्यतमाश्रितैः ।
मज्जास्थस्त्वेवापरः प्रभावमनुवर्त्तयेत् ॥
द्विविधं कफेन जङ्घाभ्यां स पूर्व्वं शिरसोऽनिलात् ।
अस्थिमज्जोभयगते चातुर्थकविपर्य्ययः ॥
त्रिधा व्यहं ज्वरयति दिनमेकञ्च मुञ्चति ।
बलाबलेन दोषाणामन्नचेष्टादिजन्मनाम् ॥
पक्वानामविपर्य्यासात् सप्तरात्रन्तु लङ्घयेत् ।
ज्वरः स्यात् मनसस्तद्वत् कर्मणश्च तदा तदा ॥
गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात् ।
तुल्यो भूयाच्च दोषाणां दुश्चिकित्स्यश्चतुर्थकः ॥
सूक्ष्मात् सूक्ष्मतरास्येषु दूराद्दूरतरेषु च ।
दोषो रक्तादिमार्गेषु शनैरल्पश्चिरेण यत् ॥
याति देहस्य नाशं सन्तापादीन् करोत्यतः ।
क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः ॥
विषमो विषमारम्भः क्रियाकालानुसारवान् ।
यथोत्तरं मन्दमतिर्मन्दशक्तिर्यथायथम् ॥
कालेनाप्नोति सदृशान् स इत्यादिक्रिया तथा ।
दोषो ज्वरयति कृच्छ्राद्विरात्रिचिरतरेण च ॥*॥
भूमौ स्थितं जलैः सिक्तं कालमेव प्रसीदति ।
अङ्कुराय यथा बीजं दोषबीजं भवेत्तथा ॥
वेगं हत्वा विषं यद्वदाशये लीयते बलम् ।
कुपथ्यात्तबलं भूयः काले दोषविषं तदा ॥
एवं ज्वराः प्रवर्त्तन्ते विषमाः सततादयः ॥*॥
उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम् ॥
अरोचको वमिः श्वासः सर्व्वस्मिन् रसगे ज्वरे ।
रक्तनिष्ठीवनं तृष्णा दाहश्चोष्णस्तु पिडकोद्गमः ॥
दाहरागभ्रममदप्रलापो रक्तसंश्रिते ।
तृड्ग्लानिसृष्टवर्चस्कमन्तर्दाहो भ्रमस्तमः ॥
दौर्गन्ध्यं गात्रविक्षेपो मांसस्थे मेदसि स्थिते ।
स्वेदोऽतितृष्णा वमनं दौर्गन्ध्यं चासहिष्णुता ॥
प्रलापो ग्लानिररुचिरस्थिगे त्वस्थिभेदनम् ।
दोषप्रवृत्तिरुद्गारः श्वासाङ्गविक्षेपकूजनम् ॥
अन्तर्दाहो बहिःशैत्यं श्वासो हिक्का च मज्जगे ।
तमसो दर्शनं मर्म्मच्छेदनं स्तब्धमेढ्रता ॥
शुक्रप्रवृत्तिर्मृत्युश्च जायते शुक्रसंश्रये ।
उत्तरोत्तरदुःसाध्याः पञ्चाद्ये तु विपर्य्यये ॥
प्रलिम्पन्निव गात्राणि घर्म्मेण गौरवेण च ।
मन्दज्वरः प्रलापस्तु सशीतः स्यात् प्रलेपकः ॥
नित्यं मन्दज्वरो रूक्षः शीतः कृच्छ्रेण गच्छति ।

कामाद्वा: [illegible]
श्रद्धाभिरवर्णाभिरनुकेन उद्वेग [illegible]
न च ज्वालितो [illegible]
कषायानी मधी मत श्रीवैत्तिक [illegible]
लोष्टोऽथ वा शिरामन्तो [illegible]

निदानपानीयवर्णे [illegible]
शरीरे विषमज्यातो ज्वरः [illegible]
आमाशये यदा दुष्टे श्लेष्मपित्ते [illegible]
तदा शैत्यं देहे [illegible]
कायं पित्तं यदा दुष्टं [illegible]
उष्णत्वं तेन देहस्य [illegible]
वातश्लेष्मवान् साध्यो मोचितो [illegible]
अस्थिमज्जागतः [illegible]
निर्गतो ज्वरवेगात् [illegible]
करोत्यङ्गञ्च [illegible]
दैवो मनुष्यागमन [illegible]
पाको हतो [illegible]
स्वेदः श्रमः प्रलिम्बाभि [illegible]
कण्ठश्च शुद्धिं विगतज्वरलक्षणम् ।
इत्यादि महापुराणे गारुडे
समाप्तम् । १५२ अध्यायः ।
अथ ज्वरस्य चिकित्सा ।

धन्वन्तरिरुवाच ।

"ज्वरोऽष्टधा पृथक् [illegible]
सुखपर्पटकोशीरचन्दनोशीरवालकैः ।
समशीतं जलं दद्यात् । [illegible]
नागरं देवदारुञ्च धान्यकं बृहतीद्वयम् ।
दद्यात् पाचनकं [illegible]
आरग्वधाभयामुस्तातिक्तापद्मिकैर्कैः ।
कषायः पाचनं साम्ये [illegible]
मधूकसारसिन्धूत्थवचोषणकणाः [illegible]
[illegible] पिष्ट्वाम्भसा नस्यं कुर्य्यात् [illegible]
[illegible] कटुकारसैः [illegible]
सच्चारो भेदनं क्वाथः पेयः सर्व्वज्वरापहः ।
महौषध्यमृतामुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ।
अपामार्गजटा कट्यां लोहितैः [illegible]
बद्ध्वा वारे रवेर्नूनं ज्वरं हन्ति [illegible]
गङ्गाया उत्तरे कूले [illegible]
तस्मै तिलोदकं दद्यात् [illegible]
गुडूच्याः क्वाथकल्काभ्यां [illegible]
[illegible] बलायाश्च सिद्धः [illegible]
घृतः ।

धात्री शिवा कणा वह्निक्वाथः सर्व्व-
ज्वरातिसारहरमौषधं परमम् ।
पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः ।
पाठेन्द्रयवभूनिम्बमुस्तपर्पटकाः [illegible]
जयन्त्यामसमीसारज्वरं [illegible]
नागरातिविषामुस्तभूनिम्बामृतवत्सकैः ।
सर्व्वज्वरहरः क्वाथः सर्व्वातीसारनाशनः ।
सुखपर्पटकोदीच्य [illegible]

NOTICE.

AGENTS
Trübner & Co., London.

AGENT
Pandit Jai-taram Mukundaji, Bombay.

SIR RADHAKANTA'S IMPROVED AND ENLARGED SABDAKALPADRUMA.

A Sanskrit Encyclopedic Lexicon.

ew edition is issuing in monthly parts of 8 formes (Royal quarto, 32 pages) each, and we omplete it in four years; generally a fasciculus will contain double parts or numbers.

ing the book within reach of the general public, we offer it for sale to those who register them-subscribers in India at the lowest possible price of one Rupee for each part, and in countries out 5s. for each part.* The number of parts in which the new Appendix would be completed, cannot ssed, they will bear the same price except to those who had subscribed before 1st January 1888. t subscribers in India, if they choose to pay in advance, can obtain the whole work exclusive of the for 75 Rupees, and in countries out of India, for £8. The advance payments being exclusive of Postage. bscriber, in and out of India, the price for each part will be Rs. 1-8 and 4s. respectively. Muffussil are requested to send Rs. 10 in advance to ensure their enlistment as subscribers, or in lieu of such to order despatch of books to them by value payable parcels. We make it a rule to defer supplying ers any part or parts of the work till all arrears due for the preceding ones, are paid.

mittances and communications, except where special Agents may be preferred, are to be made to i Charan Basu, No. 71, Pathuriaghata Street, Calcutta. Subscribers are requested to see that receipts (when sent to him) bear his seal and signature.

nclude this announcement by an earnest appeal to all students of Sanskrit, Savants, Princes and ons of learning in India, Europe and America, to help us to lay before them a grand Repertory of an learning replenished with new treasures. We specially urge our claim to the aid of our brother all parts of our country, who cannot but feel it a duty to encourage attempts to preserve and improve unique monument of the genius, scholarship, industry and philanthropy of our great patrirach of nd zealous friend of education whom, we loved to call as the Hindu of Hindus. We hope that by improvements and enlargement of its scope, the Sabdakalpadruma of Raja Sir Radhakanta would be Encyclopædia Indica of the future, which, it would be the common aim of all to see accomplished.

: SABDAKALPADRUMA OFFICE,
1, *Pathuriaghata Street*,
Calcutta, 20*th August* 1888.

BARODA PRASAD BASU,
HARI CHARAN BASU,
Proprietors of the Sabdakalpadruma.

The first volume of the work has been completed and the first 17 numbers of the second volume have come out of the Press. ade arrangements, speedily to complete the main body of the work by bringing out a second series beginning with प, while the roceeds from the initial letter and terminates with न. The first 3 numbers or parts of the second series have already issued.

NOTICE

SABDAKALPADRUMA.

To expedite the completion of the main work, arrangements have been made to divide the publi[illegible] two series, the first commencing with the initial letter is to terminate in 'ন', the second starting f[illegible] bring the work to a conclusion. The numbers of the two series will generally issue synchronically a[illegible] [illegible]ers in future can expect to have numbers of the two series simultaneously.

বিজ্ঞাপন।

শ্রীমদ্দেবীভাগবত।

[illegible] ও উপাদেয় এবং এপর্য্যন্ত ইহা বঙ্গাক্ষরে মুদ্রিত হয় নাই। ইহার [illegible] যেরূপ সংক্ষেপে এইমাত্র বলিলেই বোধ করি গ্রন্থের যথেষ্ট পরিচয় দেওয়া হইবে যে, পুরাণের বৈষ্ণবগণ যেমন [illegible] পুরাণ বলিয়া নির্দ্দেশ করেন, সেইরূপ সম্প্রদায় নিরপেক্ষ অনেকানেক কৃতবিদ্য মহোদয়গণের মতে [illegible] এ সম্বন্ধে তাঁহারা যে সকল যুক্তি প্রদর্শন করেন তাহা এক প্রকার অখণ্ডনীয় [illegible] শ্রীমদ্ভাগবতের ন্যায় দ্বাদশ স্কন্ধে ও ১৮০০০ অষ্টাদশ সহস্র শ্লোকে বিরচিত এবং [illegible] অধ্যয়ন করিলেই প্রাচীন বলিয়া বোধ হয়। ইহা দেবী ভগবতীর মাহাত্ম্য ও বৃত্তান্তনিচয়ে পরিপূর্ণ। [illegible] টীকাকার নীলকণ্ঠকৃত দেবীভাগবতের মহাপুরাণত্ব-সংস্থাপন সম্বন্ধীয় বিচার পাঠে সমস্ত অবগত হইতে পারিবেন।

[illegible] পর আমাদিগের অন্তঃকরণে একটী অভিনব ভাবের উদয় হইয়াছিল, অর্থাৎ দুই একখানি [illegible] পুরাণের যথাযথ টীকা ও অনুবাদ সহ প্রচার করিয়া উক্ত বিষয়ের অভাব মোচনের নিমিত্ত [illegible] হইতে সাহস করিতে পারি নাই। পরন্তু, সেই সর্ব্বনিয়ন্তা পরমকরুণাময় পরমেশ্বরের কৃপায় [illegible] আমার অগ্রজ [illegible] প্রসাদ বসু বাহাদুর এবং আর কতকগুলি দেশহিতৈষী বিজ্ঞবর মহাশয় [illegible] এই অনর্ঘ দেবীভাগবতেরই মূল, নীলকণ্ঠ-বিরচিত টীকা, টিপ্পনী এবং অবিকল [illegible] আবশ্যক বিবেচনায়, আমরা ইহার মূল, টীকা ও গদ্যানুবাদের প্রচারে প্রবৃত্ত হইলাম। [illegible]

১। [illegible] ৮ পেজি ৯ ফর্ম্মায় এক এক খণ্ড প্রকাশিত হইতেছে কোন কোন মাসে দুই বা ততোধিক [illegible] দুই বৎসরের মধ্যে সম্পূর্ণ হইবে। অনুমান ৫৬ খণ্ডে গ্রন্থখানি সম্পূর্ণ হইবে।

২। [illegible] কিন্তু নিয়মিত গ্রাহকগণের পক্ষে ।৶০ আনা, এবং ১২ খণ্ডের অগ্রিম মূল্য ৪৲ টাকা; আগামী [illegible] ১৪৲ টাকা, অগ্রবর্ত্তী পক্ষে এখন ৮৲ টাকা এবং বাকি ৭৲ টাকা আগামী আশ্বিন মাসের মধ্যে দিলেই চলিবে।

৩। [illegible] হইবেন তাঁহাকে আদ্যোপান্ত সমস্ত খণ্ডই গ্রহণ করিতে হইবে। অগ্রিম মূল্য না পাইলে [illegible] হইবে।

৪। কোন গ্রাহক স্থান পরিবর্ত্তন করিলে তাঁহার নূতন ঠিকানা পত্র দ্বারা জানাইবেন। গ্রহণাভিলাষিগণ স্ব স্ব নাম ধাম স্পষ্ট [illegible]

ঈশ্বরোপাসনা।

[illegible] বেদ, উপনিষদ্, বেদান্ত, সাংখ্য, যোগবাশিষ্ঠ, তন্ত্র ও পুরাণ প্রভৃতি [illegible] এই আশঙ্কায় [illegible] ইহাতে জ্ঞান, ভক্তি ও কর্ম্মের কি প্রভেদ [illegible]

[illegible]

[illegible]

[illegible]

२८-२८ संख्ये ।

शब्दकल्पद्रुमः ।

अर्थात्

एतद्देशस्थसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-
सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-
तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-
स्त्र्युक्ताव्ययस्वरादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः ।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः ।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिरूषित-
स्वग्रन्थपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः । नागराक्षरैः प्रकाशितश्च ।

द्वितीयः काण्डः ।

चक्षवर्गः । चकाराद्यौतविंश-खर्व्वौ ।

कलिकाता-राजधान्यां

रामनारायण-यन्त्रे मुद्रितः । ७१ नं० पाथुरियाघाट-ष्ट्रीट्-स्थितभवनात् प्रकाशितश्च । शकाब्दाः १८१०

PRINTED BY K. P. BASU, RAMNARAYAN PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET. CALCUTTA:

To be had at the Sabdakalpadruma Office, No 71. Pathuriaghata Street, Calcutta: and at the Baptist Mission Press, No. 24 Lower Circular Road Calcutta: Price for Subscribers in India, Re. 1 and Countries out of India 3s. for each number.

शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ॥
लाश्वदंष्ट्राबिल्वानि पाठा नागरधान्यकम् ।
तदाहारसंयोगे हितं सर्व्वातिसारिणाम् ॥१३
एलघृताग्निनिर्यूहः स्वकं सध्वतिसारणुत् ॥१४॥
तीसारे हितस्तद्वत् कुटजत्वक्फलाहृतः ॥१५॥
सकातिविषाबिल्वबालाकन्दकषायकः ।
चिश्च आम्रमूलाढ्य त्वतीसारे सशोणिते ॥"१६
इति गारुडे १७४ अध्यायः ॥
पि च ।
बलवद्धं पलाशस्य अपामार्गस्य वा हर ! ।
तं सर्व्वज्वरहरं भूतप्रेतादिमुद्रवेत् ॥ १७ ॥
तैं वृश्चिकमूलन्तु पर्य्युषितजलेन वै ।
हि निनाशयेद्दाहज्वरञ्च परमेश्वर ! ॥ १८ ॥
र्व्वावाश्वेव तद्वद्धं भवेदैकाहिकादिनुत् ॥१९॥
तन् सकाञ्जिकं पीतं रक्तकुष्ठज्वरादिनुत् ॥"२०
इति तत्रैव १९३ अध्यायः ॥
वचा त्रिकटुकश्चैव करञ्जं देवदारु च ।
ञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
ायङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम् ।
नमाखेपनस्यैव स्नानमुद्वर्त्तनं तथा ॥
पस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥२१
भयामलकदाक्षाः पाठा चैव विभीतकम् ।
रा च समस्तैः क्वाथ ज्वरहरं भवेत् ॥"२२
इति च गारुडे १९९ अध्यायः ॥ * ॥
कमते शिवज्वरस्योत्पत्तिर्यथा,—
यमानसंक्रुद्धरुद्रनिश्वाससम्भवः ।
रोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ॥
स्य विप्रकृष्टकारणकथनपूर्व्विका सम्प्राप्तिर्यथा,
मिथ्याहारविहारस्य दोषा ह्यामाशयाश्रयाः ।
हिरग्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥"
स्य सामान्यलक्षणं यथा,—
स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणन्तथा ।
गपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते ॥"* ॥
स्य पूर्व्वरूपं यथा,—
श्रमोऽरतिर्व्विवर्णत्वं वैरस्यं नयनप्लवः ।
च्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥
जृम्भाङ्गमर्द्दो गुरुता रोमहर्षोऽरुचिस्तमः ।
प्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे ॥"* ॥
तलादिज्वराणां प्रति नियतदूष्या धातवो यथा,
सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ।
दोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ।
यात्चातुर्थकं घोरमन्तकं रोगसङ्करम् ।
ाहं वा दशाहं वा द्वादशाहमथापि वा ॥
सत्या योऽनिसर्गो स्यात् सन्ततः स निगद्यते ।
होरात्रे सततको द्वौ कालावनुवर्त्तते ॥
न्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते ।
तीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥
पित्तश्लेष्माभिषङ्गोत्थं ब्रुवते विषमज्वरम् ।
कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ।
ातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ।
चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ।
जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरस्तोऽनिलसम्भवः ।
विषमज्वर एवान्यश्चातुर्थकविपर्य्ययः ॥
मध्ये व्यहनी ज्वरयत्यादावन्ते च मुञ्चति ॥"* ॥
वातबलासकज्वरो यथा,—
"नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी ॥"
विषमज्वरविशेषाः ।
"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहे चार्द्धंचोष्णं प्रजायते ॥"* ॥
शीतपूर्व्वो ज्वरो यथा,—
"त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥"
दाहपूर्व्वो ज्वरो यथा,—
"करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥
द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ॥"
उक्तवातादिज्वराणां धातुविशेषदूष्यतया
अधिकलक्षणानि यथा,—
"गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ ।
रसस्थे तु ज्वरे लिङ्गं दैन्यञ्चास्योपजायते ॥ १ ॥
रक्तनिष्ठीवनं दाहो मोहश्छर्द्दनविभ्रमौ ।
प्रलापः पिडका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥२
पिण्डिकोद्वेष्टनं तृष्णासृष्टमूत्रपुरीषता ।
उष्मान्तर्द्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ॥३
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्द्दिरेव च ।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ॥४
भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्द्दिरेव च ।
विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ॥ ५ ॥
तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा ।
अन्तर्द्दाहो महाश्वासो मर्म्मच्छेदश्च मज्जगे ॥६॥
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ॥"७
अथ वैद्यकमते सामान्यतो ज्वरस्य चिकित्सा-
माह ।
"अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ।
साधारणीं क्रियान्तत्र विदधीत चिकित्सकः ॥
सामान्यतो ज्वरी पूर्व्वं निर्व्वाते निलये वसेत् ।
निर्व्वातमायुषो वृद्धिमारोग्यं कुरुते यतः ॥
प्रजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापहः ॥
तालवृन्तभवो वातस्त्रिदोषशमनो मतः ॥
वंशव्यजनजः सोष्णो रक्तपित्तप्रकोपनः ।
चामरो वस्त्रसंभूतो मायूरो वेत्रजस्तथा ॥
एते दोषजिता वाताः स्निग्धा हृद्याः सुपूजिताः ।
नवज्वरी भवेद्यत्नाद्गुरुवस्त्रसमावृतः ।
यथाऽम्बरं मारीचं पिबेत् शिशिरवारयन् ॥
दिवापि स्वप्नशीलोऽपि मद्यादेर्न निवर्त्तते ।
न तु मद्यादिदोषाद्य भेषजानां प्रवर्त्तते ॥"* ॥
ततो ज्वरे वर्ज्जनीयान्याह सुश्रुतः ।
"परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च ।
दिवास्वप्नं व्यवायञ्च व्यायामं शिशिरं जलम् ॥
क्रोधप्रवातभोज्यानि वर्ज्जयेत्तरुणज्वरी ॥"
परिषेकः स्नानादिः । प्रदेहो अनुलेपना-
भ्यङ्गादिः । स्नेहान् पाने निषिद्धान् ॥ *
निषिद्धानिषेवाद्दोषमाह ।
"शोषं छर्द्दिं मदं मूर्च्छां भ्रमं तृष्णामरोचकम्
प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात् ॥"
आदिशब्देन प्रदेहादयो गृह्यन्ते ॥ * ॥
हारीतेन प्रत्येकं दूषणमुक्तम् ।
"व्यायामाज्ज्वरसंवृद्धिर्व्यवायात् स्तम्भमूर्च्छनम्
रतिश्च स्नेहपानात्तु मूर्च्छा छर्द्दिर्मदोऽरुचिः ॥
गुर्व्वन्नभोजनात् स्वप्नाद्विष्टम्भो दोषकोपनम् ।
अग्निमान्द्यं स्वरत्वञ्च शीतनीं चाप्रवर्त्तनम् ॥"
रतिरिति व्यवायादित्यत्र सम्बध्यते । स्वप्नात्
दिवास्वापात् ॥ * ॥ अन्यञ्च वर्ज्जयेत् ।
"सज्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च ।
असात्म्यान्यन्नपानानि विरुद्धाध्यशनानि च ॥
व्यायाममतिचेष्टाञ्चाभ्यङ्गं स्नानञ्च वर्ज्जयेत् ।
तेन ज्वरः शमं याति न शान्तश्च पुनर्भवेत् ॥
ज्वरी लङ्घनं कुर्य्यादिति चरकः वाग्भटश्च ।"
"आमाशयस्थो हत्वाग्निं सामो मार्गं पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
अस्यायमर्थः । "यतो हेतोः आमाशयस्थो दोषो
वातपित्तश्लेष्मरूपः स्वहेतुदुष्टः अग्निं हत्वा
आच्छाद्य सामः अपक्वाहाररसहितोमार्गं रस-
मार्गं पिधापयन् । अन्नार्थत्वाद्वर्त्तावपि कर्त-
रीन् । तेन पिदधदित्यर्थः । ज्वरं करोति तस्मा-
द्धेतोर्ज्वरी लङ्घनमाचरेदित्यर्थः ॥ * ॥
"त्रिविधं त्रिविधे दोषे तत् समीक्ष्य प्रयोजयेत् ।
दोषेऽल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् ।
प्रभूते शोधनं तच्च मूलादुन्मूलयेन्मलान् ॥"
चरकश्च ।
"तरुणन्तु ज्वरं पूर्व्वं लङ्घनेन शमं नयेत् ।
आमदोषमलिङ्गाद्वा लङ्घयीत यथाविधि ॥"
अन्यच्च ।
"ज्वरादौ लङ्घनं कुर्य्यात् ज्वरमध्ये तु पाचनम् ।
ज्वरान्ते रेचनं कुर्य्यात् कोष्ठशुद्ध्यै यथाक्रमम् ॥
दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च ।
लङ्घितश्चाप्यदोषश्च यवागूपानमाचरेत् ।
शालिषष्टिकमुद्गानां यूषं वा भक्तमाचरेत् ।
मधुकोषेन संसिद्धा यवागूर्ज्वरलङ्घने ॥
अनिलङ्घितश्च तं दृष्ट्वा तस्य सन्तर्पणं हितम् ।
द्राक्षादाडिमखर्ज्जूरप्रियालैः सपरूषकैः ॥
तर्पणार्थं तु कुर्व्वीत तर्पणं ज्वरशान्तये ॥"
अत्र लङ्घनशब्देनानशनमुच्यते । यत आह
सुश्रुतः ।
"आमदर्शिभिर्दोषैरनशनं क्षामसानुगः ।
[illegible] कुर्व्वीत संसर्गमाचरेत् ॥"
आमदर्शिभिर्दोषैर्निखिलैर्दोषैः क्रमशः ।
संसर्गं शीघ्रमाश्रित्य [illegible] ॥ * ॥
तत् चरक आह ।
"चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥"
चतुःप्रकारा संशुद्धिः वमनविरेचनास्थापनशिरो-

शिरोविरेचनानि । न त्वनुवासनं तस्य हंहण-
त्वात् । अत्र लङ्घनं कर्षणमित्यर्थः । तथा च
सुश्रुतः ।
"शरीरलाघवकरं यद्‌द्रव्यं कर्म्म वा पुनः ।
तल्लङ्घनमिति ज्ञेयं हंहणन्तु पृथग्विधम् ॥
लङ्घनात् कर्षणादन्यत् शरीरपोषकमित्यर्थः ॥*॥
ननु आमहस्तिमिसैर्द्दोषैरित्यादिपूर्व्वोक्तसुश्रुत-
वचनात् सामान्यतो ज्वरिणा यथाशनरूपं
लङ्घनं क्रियते तथा चतुःप्रकारा संशुद्धिः
इत्यादिचरकवचनाद्वमनादिरूपं लङ्घनं सर्व्व-
ज्वरिभिः कथं न क्रियते । तत्रोच्यते । वम-
नादिकमवस्थाविशेषेषु क्रियते न तु सर्व्वज्वरेषु ।
तथा च सुश्रुतः ।
"सोत्क्लेशे बलिने देयं वमनं श्लैष्मिके ज्वरे ।
पित्तप्राये विरेकस्तु कार्य्यः प्रशिथिलाशये ॥"
प्रशिथिलाशये अत्र प्रोपसर्गः वैपरीत्ये तेन
गूढाशये इत्यर्थः ॥ * ॥
"सरुजेऽनिलजे कार्य्यं सोदावर्त्ते निरूहणम् ।
कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनम् ॥"
अपि च । सर्व्वज्वरिभिः पिपासानिग्रहश्च न
कार्य्यः ॥ यत आह हारीतः ।
"तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥"
अतोऽवस्थाविशेष एव पिपासासहनम् ॥ * ॥
ज्वरिभिर्म्मारुतसेवनं न कार्य्यम् । सुश्रुतेन प्रवात-
सेवनस्य सर्व्वथा निषिद्धत्वात् अतो मारुतसेवनं
अवस्थाविशेष एव युक्तम् । आतपसेवनञ्चा-
वस्थाविशेष एव संगृहीतम् ॥ * ॥
"लङ्घनाम्बुयवागूभिर्य्यदा दोषो न पच्यते ।
तदा तं मुखवैरस्यतृष्णारोचकनाशनैः ॥
ज्वरघ्नैः पाचनैर्हृद्यैः कषायैः समुपाचरेत् ।"
इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः । आया-
मोऽपि न कार्य्यस्तस्यातिनिषिद्धत्वात् । अवस्था-
विशेषे पुनःपार्श्वपरिवर्त्तनादिरूपः सोऽपि
कर्त्तव्यः । तस्माच्चतुःप्रकारा संशुद्धिरित्यादि-
श्लोके लङ्घनपदं कर्षणपर्य्यायमिति निर्णीतम् ॥
अनशनरूपस्य लङ्घनस्य फलमाह ।
"लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले ।
विज्वरत्वं लघुत्वञ्च क्षुच्चैवास्योपजायते ॥
लङ्घनेन अनशनेन दोषे मध्ये क्षयं नीते ।
यत आह ।
"आहारं पचति शिखी दोषानाहारवर्ज्जितः ।"
पचतीति । सन्धुक्षितेऽनले आच्छादकदोषे
संक्षीणे अग्नौ प्रदीप्ते । यथोक्तसंप्राप्तिसामग्री-
विघटनात् । विज्वरत्वं शरीरस्य गौरवाभावेन
लघुत्वम् । क्षुत् बुभुक्षा च जायते इत्यर्थः ॥ * ॥
अन्यच्चाह सुश्रुतः ।
"अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥"
अनवस्थितदोषाग्नेः अनवस्थितः स्वस्थानादि-
गतस्तो गतो दोषोऽग्निश्च यस्य तस्य ज्वरिणः ।
काङ्क्षा अन्नाभिलाषः । रुचिः लङ्घनेनामपाका-

न्मुखशोधादिनाये यमश्च यन् प्रसन्नं भेन
रुचिः शोभा । रुचिः स्त्री दीप्तौ शोभायामभि-
लाषयोरिति मेदिनीकारः ॥ * ॥ संप्रति सम्यक्
लङ्घनस्य लक्षणमाह ।
"वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते ॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये ।
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि ॥"
हृदयस्य शुद्धिरनवरोधः । उद्गारशुद्धिः सधूमा-
म्लोद्गाराभावः । कण्ठस्य शुद्धिः कफाद्यनिग्नलम् ।
आस्यशुद्धिः मुखस्य प्रसन्नत्वम् । तन्द्राक्लमे
तन्द्रा क्लमः गमितान् । तन्द्रा निद्रावत् ।
क्लमोऽन्न ग्लानिः । क्षुत्पिपासासहोदये क्षुत्-
पिपासाभ्यां सह युगपदुदये । अन्तरात्मनि
मनसि । एतानि लक्षणानि मिलितान्येव सम्यक्
कृतं लङ्घनं बोधयन्ति । न तु प्रत्येकम् ॥ * ॥
हीनस्य लङ्घनस्य लक्षणमाह ।
"कफोत्क्लेशः सहृल्लासः ष्ठीवनञ्च मुहुर्म्मुहुः ।
कण्ठास्यहृदयाशुद्धिस्तन्द्रा स्याद्धीनलङ्घने ॥
कफोत्क्लेशः कफस्य वमनायोपस्थितिः ॥"
हृल्लासः हृदयात् कफस्य निर्गमः ॥ * ॥
अतिशयितस्य लङ्घनस्य लक्षणमाह ।
"पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः ॥
मनसः संभ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि ।
देहाग्निबलहानिश्च लङ्घनेऽति कृते भवेत् ॥
दौर्ब्बल्यं श्रोत्रनेत्रयोः कर्णनेत्रयोः स्वविषय
ग्रहणासामर्थ्यम् । मनसः संभ्रमः भ्रान्तिः ।
ऊर्द्ध्ववात उद्गारबाहुल्यम् । हृदि तमः अन्ध-
कारप्रविष्टस्येव ज्ञानम् ॥ * ॥ बलं रक्षन्
लङ्घनं कारयेदित्याह ।
"बलाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥
अयमर्थः । एनं ज्वरिणं बलविरोधिना अनति-
बलक्षयकारिणा लङ्घनेन उपपादयेत् उप-
चरेत् । कुत इति चेत्तत्राह । यदर्थ इति । यस्मै
आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः ।
तत् आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः ॥*॥
केषाञ्चिदनशनस्य निषेधमाह सुश्रुतः ।
तद्धि मारुततृष्णाक्षुन्मुखशोषभ्रमान्वितैः ।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः ॥
न चयाध्वश्रमक्रोधकामशोकचिरज्वरे ।
तत् अनशनं उच्चयमारुतयुक्तेन ज्वरिणा न
कार्य्यम् । मारुतोऽत्र निरामो बोद्धव्यः । सामे तु
मारुते लङ्घनं कार्य्यमेव । यत आह तन्त्रान्तरे ।
"अवश्यमेव कुर्व्वीत ज्वरी सामे समीरणे ।
लङ्घनं ह्यामपाकार्थं न तदूर्द्ध्वं यथा कफे ॥
तदूर्द्ध्वं आमपाकादूर्द्ध्वम् । अतएवोक्तम् ।
कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमशयादूर्द्ध्वमपि वायुर्न सहते क्षयम् ॥"*॥
आमस्य लक्षणमाह ।
"आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात् ।

आमसं[illegible] न [illegible]
[illegible] ।
"आ[illegible] [illegible]
[illegible] [illegible] वा [illegible] ।
[illegible] ।
"[illegible] [illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]
"[illegible] सामो [illegible]
[illegible] [illegible] [illegible]
[illegible]
[illegible] [illegible]
[illegible]
[illegible] सामो वायुः [illegible]
[illegible] ॥ * ॥ [illegible]
माह ।
"निरामो विशदो रूक्षो [illegible]
विपरीतगुणैः शान्तिं [illegible] ।
अथ प्रसङ्गात् सामस्य पित्तस्य
पित्तं सामं भवेदम्लं दुर्गन्धं हरितं [illegible]
[illegible] [illegible] [illegible]
[illegible] इति [illegible] ॥
तस्य निरामस्य लक्षणमाह ।
"निरामं पीतमात्यन्तमनुष्णं
दुर्गन्धि रुचिकृद्वह्निबलवर्द्धनमीरितम् ।
अथ सामस्य कफस्य लक्षणमाह ।
"आविलस्तन्तुलः स्त्यानः कण्ठदेशे [illegible]
सामो [illegible]
स्त्यानः संहतः ॥
तस्य निरामस्य लक्षणमाह ।
"फेनवान् निरामो निर्गन्धः पेयाङ्गिरसो
भवेत् स पिच्छिलः
अथ सामस्य व्याधेर्लक्षणमाह ।
"आलस्यतन्द्राहृदयाविशुद्धि
दोषाप्रवृत्त्यानिलमूढतादि ।
गुरूदरत्वारुचिसुप्रताभि-
रामान्वितं व्याधिमुदाहरन्ति ।
आमं जयेल्लङ्घनकोष्णपेया
लघ्वन्नसूपोदनतिक्तयूषैः ।
विरूक्षणस्वेदनपाचनैश्च
संशोधनैरूर्द्ध्वमधस्तथैव ॥
तद्धि मारुततृष्णाक्षुदित्यादिश्लोके इत्यादि
मेव विवक्षिता तेन निरामवायौ
न कार्य्यम् ।
तथा मुखशोषभ्रमावपि निरामौ
सामयोस्तु तयोर्लङ्घनं कार्य्यमेव ।
वृद्धादिभिरपि निरामैरेव लङ्घनं
सामैः पुनस्तैरपि लङ्घनं कार्य्यमेव । एते
चयो [illegible] । वातजे ज्वरे [illegible]
ज्वरी लङ्घनेऽपि कर्षं [illegible]

...शीतोष्णजलादि सोयात् प्राणान् रिरक्षति।
तः कदाचिदपि न कचिद्वारि वारयेत् ॥
रवैनच।
...सर्वेषां जीवानां सदःप्राणविनाशिनी।
...दिवं तस्मात् पानीयं प्राणधारणम् ॥
...दत्तं भेषजमपि नागं ज्वरी किञ्चिद्वारयेत्
...यिद्भूयस आह सुश्रुत एव।
...यन्तं जीविनां जीवो जगत् सर्वन्तु तन्मयम्।
...नेऽत्यन्तनिषिद्धे न कचिद्वारि वारयेत् ॥
...नं जलम् ॥ किञ्चित्तु वारयेदेव। तथा च।
...रे मेहामये वह्नेः मन्देऽप्यथोदरे तथा।
...रोचके प्रतिश्याये प्रसेके श्वयथौ क्षये ॥
...नि च मधुमेहे च पानीयं मन्दमाचरेत् ॥
...मेहे सुश्रुतोक्ते। मन्दमाचरेत् अल्पं पिबेत्।
...त आह।
...अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम्।
...याति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः ॥*॥
...च जलं ज्वरी शीतलं न पिबेदित्याह सुश्रुतः।
...नज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे।
...ध्मानशूले तथाध्माने व्याधौ वातकफोद्भवे ॥
...पग्रहसिध्माशीगुल्मश्वासकासेषु विद्रधौ।
...हिक्कायां स्नेहपाने च शीतं वारि विवर्ज्जयेत् ॥"
...प्रन्थस्य स एव।
...सेव्यमानेन शीतेन ज्वरस्तोयेन वर्द्धते।"
...अत्र शीतं जलमक्वथितं निषिद्धम्। तथा सति
...क्वथितं ग्राह्यं व्यायातम् ॥ तत्र क्वथितस्य विधि-
...ह्याह।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलञ्च यत्।
...अर्द्धावशेषं तत्तोयं क्वथितं ज्ञेयं दीपनं पाचनं लघु ॥
निर्व्वेगं शनैः ॥ क्वथितस्य विषयानाह सुश्रुतः।
"वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु तृष्यते।
दीपनं स्यात् कफच्छेदि वातपित्तानुलोमनम् ॥
तद्धि मार्द्दवकृद्दोषस्रोतसां शीतमन्यथा ॥"
वाग्भटश्च।
"तृष्णायां प्रशमुष्णाम्बु पिबेद्वातकफज्वरे।
तत् कफं विलयं नीत्वा तृष्णामाशु निवर्त्तयेत् ॥
उदीर्य्य चाग्निं स्रोतांसि मृदूकृत्य विशो-
धयेत्।
वातपित्तकफस्वेदशकृन्मूत्राणि सारयेत् ॥" * ॥
अथोष्णोदकस्य लक्षणं गुणाश्च।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलं तथा।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वरकासकफश्वासवातपित्तामभेदसाम्।
नाशनं वस्तिसंशोधि पथ्यमुष्णोदकं सदा ॥*॥"
अथर्त्तुभेदे जलस्य पाकभेदः।
"त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते।
हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः ॥"*॥
अन्ये तु।
"निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम्।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ॥
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते।
इति केचिद्बुधाः प्राहुर्व्विज्ञटाशमदर्शनात् ॥"

...शेषितम्।
"वसुभिर्हेषु वार्षेषु षेदेषु त्रिषु पञ्चयोः।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात् ॥"
अत्र दोषाणां यथोल्बणता क्षीणता वा तथा
व्यवस्था कल्पनीया ॥
"तत् पादहीनं पित्तघ्नमर्द्धहीनन्तु वातनुत्।
त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघु ॥" *॥
त्रिपादहीनस्य तन्त्रान्तरे आरोग्याम्बुसंज्ञा।
तस्य लक्षणं गुणाश्च।
"पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते।
आरोग्याम्बु सदा पथ्यं कासश्वासकफापहम् ॥
सद्यो ज्वरहरं ग्राहि दीपनं पाचनं लघु।
आनाहपाण्डुशूलार्शोगुल्मशोथोदरापहम् ॥"
अथर्त्तुभेदे जलस्य ग्रहणाय देशभेदः।
"हेमन्ते शिशिरे चाम्बु सारसं वा तडागजम्।
वसन्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं हितम् ॥
नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः।
विषवत् पत्रपुष्पादिदुष्टं निर्झरयोगतः ॥
औद्भिदं चान्तरीक्षं वा कौपं प्रावृषि च स्मृतम्।
शस्तं शरदि नादेयं नीरमंशूदकं परम् ॥
दिवा रविकरैर्जुष्टं शीतं शीतकरैर्निशि ॥
शयमंशूदकं नाम स्निग्धं दोषत्रयापहम्।
अनभिष्यन्दि निर्दोषमान्तरीक्षजलोपमम् ॥
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥"
अन्यच्च।
"शरद्यगस्त्योदयादखिलं सलिलं हितम्।
वृद्धसुश्रुतश्च।
"कार्त्तिके मार्गशीर्षे च पयोमात्रं प्रशस्यते ॥"
यथर्त्तुपक्वमपि जलं विषयविशेषे शीतलं पिबे-
दित्याह सुश्रुतः।
"दाहातिसारपित्तास्रमूर्च्छामद्यविषार्त्तिषु।
मूत्रकृच्छ्रे पाण्डुरोगे तृष्णाच्छर्द्दिभ्रमेषु च ॥
मद्यपानात् समुद्भूते रोगे पित्तोत्थिते तथा।
सन्निपातसमुत्थे च शृतं शीतं प्रशस्यते ॥"
क्वथितस्य जलस्य शीतलकरणविशेषे गुण-
विशेषमाह सुश्रुतः।
"शृताम्बु तत्त्रिदोषघ्नं यदन्तर्व्वाष्पशीतलम्।
अरूक्षमनभिष्यन्दि क्षमिहृड्ज्वरहृल्लघु ॥
धारापातेन विष्टम्भि दुर्ज्जरं पवनाहृतम् ॥
अन्तर्व्वाष्पशीतलं पिहितमेव शीतलम्।
अत्रापरेऽपि विशेषाः।
"दिवा शृतं पयो रात्रौ गुरुतामधिगच्छति।
रात्रौ शृतं दिवा शीतं गुरुत्वमधिगच्छति ॥
तत्तु पर्य्युषितं वह्निगुणभ्रष्टं त्रिदोषकृत्।
गुर्व्वम्लपाकं विष्टम्भि सर्व्वरोगेषु निन्दितम् ॥
शृतं शीतं पुनस्तप्तं तोयं विषसमं भवेत्।
निर्य्यूहोऽपि तथा शीतः पुनस्तप्तो विषोपमः ॥"
रात्रौ तूष्णोदकस्य लक्षणमन्यदाह।
"अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा।
अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत् ॥"
तस्य गुणाः।
"श्लेष्मानिलामदोषघ्नं दीपनं वस्तिशोधनम्।
श्वासकासज्वरहरं पीतमुष्णोदकं निशि ॥"
अन्यच्च।
"भिनत्ति श्लेष्मसङ्घातं मारुतं चापकर्षति।
अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि ॥"
रात्रावुष्णोदकञ्च तप्तमेव पिबेदित्याह।
"उष्णं तदग्निजननं लघ्वच्छं वस्तिशोधनम्।
पार्श्वशूलपीनसाध्मानहिक्कानिलकफापहम् ॥
शस्तं सद्यःशूलेषु सद्यःशुद्धौ नवज्वरे ॥"
विषयविशेषे त्वाममेव जलं शीतलं पिबेदित्याह
सुश्रुतः।
"मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये।
भ्रमक्लमपरीतेषु तमके वमथौ तथा ॥
ऊर्द्धगे रक्तपित्ते च शीतमम्भः प्रशस्यते ॥"
धूमोद्गारेऽविदग्धेऽन्ने शोषे च मुखकण्ठयोः।
शीतमम्भः आममेव न तु क्वथितम्। क्वथितन्तु
शीतं दाहादिषु यदुक्तं तत् सज्वरेषु। विज्वरेषु
तु दाहादिष्वामं शीतं प्रशस्यते इति भेदः ॥*॥
आमादिजलानां जठराग्निना पाककालावधि-
माह।

> "आमं जलं पाकमुपैति यामं
> पक्वं पुनः शीतलमर्द्धयामम्।
> पक्वं कदुष्णञ्च ततोऽर्द्धकालं
> कालात्ययः पौतजलस्य पाके ॥

पित्तमद्यविषोत्थेषु तिक्तकैः शृतशीतलम् ॥"
जलं हितमिति शेषः ॥ *॥ तिक्तानि बहुलानि
तेभ्यो निर्धार्य्य योगमाह सुश्रुतः।
"मुस्तपर्पटकोदीच्यच्छत्राख्योशीरचन्दनैः।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये ॥"
छत्रात्र धान्यकम्। यत आह निघण्टौ धन्व-
न्तरिः। कुस्तुम्बुरुः स्वर्णिकारा छत्रा धान्यं
वितुन्नकमित्यादि। तद्गुणाश्च।
"धान्यकं दीपनं रुच्यं पाचनं स्वादुपाकि च।
दोषत्रयतृषादाहश्वासकासज्वरप्रणुदित्यादि ॥"
चक्रदत्तवङ्गसेनवृन्दादयः छत्रास्थाने नागरं
पठन्ति। तद्यथा,—
"मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैरिति।
नागरं कटुकमपि नात्र पित्तजनकं मधुरपाकि-
त्वादिति तेषामभिप्रायः। नागरं नागरमुस्तकं
इति केचित्। क्वचिदेकदेशेन समुदायोऽव-
गम्यते। यथा भीमो भीमसेन इति। तीसटे तु
नागरस्थाने पद्मकम् ॥ * ॥ एतस्य प्रक्रिया।
चन्दनैरित्यत्र सहार्थे तृतीया। तेन मुस्ता-
दिभिः षड्भिरामैरेव चूर्णैः सहितं जलं शृतं
जलमेव केवलं यथर्त्तुपक्वं पश्चात्तच्छीतलीकृतं
दद्यात्। तथा च वङ्गसेनः।
यदम्बु शृतशीतासु षडङ्गादि प्रयुज्यते।
कर्षमात्रं ततो द्रव्यं ग्राहयेत् प्रास्थिकेऽम्भसि ॥
अस्यायमर्थः। यत् हेतोः। अम्बु जलेषु।
शृतशीतासु शृतासु केवलास्वेव यथर्त्तुपक्वासु।
शीतासु शीतलीकृतासु। षडङ्गादि द्रव्यं प्रयु-
ज्यते। आममेव संक्षुद्य जले स्थाप्यते। तत्
प्रदेयत्वात् कर्षमात्रं द्रव्यं समुदितं षडङ्गादि

ज्वरः
ज्वरः

प्रास्थिकेऽम्भसि प्रस्थमार्द्धे कथितशीतले जले चैनं ग्राहयेत्। अतएव षड़ङ्गमभिधाय षडङ्ग-पानीयमिति वङ्गसेनादिभिरुक्तम्। अस्मिन् पक्षे चन्दनं श्वेतं ग्राह्यं न तु रक्तम्। तत्-कषायलेपपर्य्यायेन प्रयोक्तुमुक्तम्। यत आह। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति। षड़ङ्गपानीयमिदम्॥ * ॥ षडङ्गादेः पाने तु विधान्तरे प्रक्रिया भिन्ना तामाह वङ्गसेनः। कर्षमात्रमिह द्रव्यं ग्राहयेत् प्रास्थिकेऽम्भसि। अर्द्धेऽवृतं प्रयोक्तव्यं पाने पेयादिसन्निधौ॥ अादिशब्देन यूषयवागूविलेपिभक्तानि गृह्यन्ते॥ * पानप्रक्रियां शार्ङ्गधरोऽप्येनामेवाह। चूर्णं द्रव्यं पलं साधं चतुःषष्टिपले जले। अर्द्धशिष्टन्तु तद्देयं पाने पेयादिसन्निधौ॥ पानप्रयोगश्च षड़ङ्गसुक्तवान्। अस्मिन् पक्षे चन्दनं रक्तं ग्राह्यम्। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति वचनात्॥ * ॥

अथ रक्तचन्दनस्य गुणाः।

शतु रक्तं हिमं स्वादु छर्द्दितृष्णास्रपित्तजित्। तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम्॥

षड़ङ्गादि प्रयुज्यते इत्यादि शब्देन वक्ष्यमाणा योगा उच्यन्ते। ते यथा,—

श्रीपर्णीचन्दनोशीरपरूषकमधूकजम्। पानं पित्तज्वरं हन्याच्छारिवाद्यं सशर्करम्॥

अत्र श्रीपर्णीपरूषकयोः फले ग्राह्ये। मधूकस्य तु पुष्पम्। अन्यच्च।

हन्यात् मधूकमधुकं तथैवोत्पलपूर्व्वकम्। पानं शृतं हिमं किंवा श्रोतृपलं शर्करायुतम्। हन्यात् पित्तज्वरमिति शेषः। उत्पलमत्र-कमलमित्यादि।

दिवास्वापं न कुर्व्वीत यतोऽसौ स्यात्कफावहः। ग्रीष्मवर्ज्जेषु कालेषु दिवास्वापो निषिद्ध्यते॥ उचिभो हि दिवास्वापो नित्यं तेषां शरीरिणाम्। बालादयः प्रकृत्यन्ति येषामस्वपतो दिवा॥ * ॥ येषां दिवास्वप्न उचितस्तानाह।

व्यायामप्रमदाध्ववाहनरतान् क्लान्तानती-सारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडि-तान्।
क्षीणान् शोषकृतान् शिशून् मदहतान् वृद्धा-न्भाज्जीर्णिनो
रात्रौ जागरितान् नरान् निरशनान् कामं दिवा स्वापयेत्॥ * ॥

अथ वातिकादिज्वरेषु पाककालमाह।

वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि॥ *
दशभ्योऽधिकैर्दिनैर्नवज्वरोऽपि ज्वरो भवति। [illegible]

अत आह सुश्रुतः।

ज्वरस्य तावत्प्रथमावस्था जीर्णतावधिः।
आसप्तरात्रात्तरुणं ज्वरमाहुर्मनीषिणः।
द्वादशाहमभिधाय मध्यं जीर्णं ततः परम्॥
आसप्तरात्रादिति। अत्राङ् मर्य्यादायाम्। रात्रिशब्दो दिवसस्योपलक्षकः। तेन सप्तम-दिवसादर्व्वाक् ज्वरस्तरुण इत्यर्थः। तथा चोक्तं तन्त्रान्तरे।

ज्वरे यतीते षड़हे जीर्णं इत्युच्यते बुधैरिति।
दशरात्रात् परं जीर्णमाहुरन्ये मनीषिणः।
अतएव जातूकर्णः। जीर्णस्तयोदशदिवस इति॥

अथ ज्वरे भेषजप्रयोगसमयः।

वातिके सप्तरात्रे तु दशरात्रेण पैत्तिके।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम्॥
सप्तरात्रे इत्यत्र रात्रिशब्दो दिवसस्योपलक्षकः। अतएवोक्तम्।

पाययेदातुरं सामनौषधं सप्तमे दिने।
शमनेनाथ वा दृष्ट्वा निरामं तदुपाचरेदिति॥

शार्ङ्गधरेणाप्युक्तम्।

गुडूचीपिप्पलीमूलनागरैः पाचनं स्मृतम्।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनीति॥

हारीतेनाप्युक्तम्।

एतां क्रियां प्रयुञ्जीत षडात्रं सप्तमेऽहनि।
पिबेत् कषायसंयोगात् पेयां ज्वरविनाशिनीम्॥

एतां क्रियां लङ्घनादिरूपाम्। कषायसंयोगात् कषायेण साधितां पेयामित्यर्थः॥ खरनादेना-प्युक्तम्।

इति षडाह्निकः प्रोक्तो नवज्वरहरो विधिः।
ततः परं पाचनीयं शमनीयं ज्वरे हितम्॥
ततः परं सप्तमेऽहनीत्यर्थः॥ वाग्भटश्च।
सप्ताहादौषधं केचिदाहुरन्ये दशाहतः।
लघ्वन्ने भोजिते केचिद्देयमामोल्बणे न तु॥
सप्ताहात् सप्ताहमारभ्येत्यर्थः। अत्र ल्यप्-लोपे कर्म्मणि पञ्चमी। अतएव सुश्रुतः।
दशरात्रात् परं सर्व्वदातव्यमिति निश्चितम्।
अतएव दशरात्रेण द्वादशाहेनेति लङ्घनदशा यतीतेनेत्यर्थः॥ अत्र चरकस्तेवमाह।
ज्वरितं षड़हेऽतीते लघ्वन्नं प्रतिभोजितम्।
पाचनं शमनीयं वा कषायं पाययेत्तु तम्॥
अस्यायमर्थः। ज्वरितं षड़हे लङ्घनेन यतीते सप्तमेऽहनि भोजितलघ्वन्नं अष्टमे दिने कषायं पाययेदित्यर्थः॥ तथा च सुश्रुतः।
सप्तरात्रात् परं केचिन्मन्यन्ते देयमौषधम्॥
सप्तरात्रात् परं अष्टमेऽहनीत्यर्थः। केचि-च्चरकादयः। चक्रदत्तोऽपि।
सप्तरात्रेण पच्यन्ते सप्तधातुगता मलाः।
निरामस्तु ततः प्रोक्तो ज्वरः प्रायोऽष्टमे दिने॥
इदं मानि कषायदाने सप्तमाष्टमयोर्दिवसयो-र्विकल्पः॥ * ॥ तथापि वयोबलादिदोषदेश-कालोचितं कुर्य्यात् भेषजमत्र दोषपाकं दृष्ट्वा दद्यादित्याह सुश्रुतः।
"दैनिके वा ज्वरे देयमल्पकालसमुत्थिते।
सर्व्वज्वरेष्वपि भेषजं दोषपाकतः॥" इति।

अस्यायमर्थः। अल्पकालसमुत्थिते [illegible] दोषपाकं दृष्ट्वा भेषजं देयम्। [illegible] रात्रापेक्षा। तथा च [illegible] तरुणज्वरयुक्तस्यापि दोषपाकं [illegible] देयमित्यर्थः॥ * ॥ [illegible]
मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु [illegible] पक्वं दोषं विजानीयाज्ज्वरे देयं [illegible] ज्वरे मृदौ स्वल्पीभूते। [illegible] मूत्रपुरीषेषु। प्रचलेषु स्वमार्गस्थेषु निरामम्। [illegible] यम्। दोषाणां दुष्टत्वानि [illegible] ज्वरस्य तदुपद्रवाणां चोपशम। वैकल्यं वैपरीत्यं तस्मात् [illegible] मते।

[illegible]

दोषप्रकृतिरुत्साहो निरामज्वरलक्षण। दोषप्रकृतिः दोषाणां स्वमार्गेषु [illegible] निदाने उत्साहस्थाने अष्टाह [illegible] ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे [illegible] अत्रानुक्ते प्रभातं स्यात् कषायेषु [illegible] सुखभेषजसम्बन्धो निषिद्धस्तरुणे ज्वरे। तोयपेयादिसंस्कारैर्निर्दोषं तत्र भेषजम्। सुखभेषजं क्वाथः तस्य सम्बन्धः पानम्। यत आह।
न कषायं प्रशंसन्ति नराणां तरुणे ज्वरे। कषायेणाकुलीभूता दोषा येन [illegible] आकुलीभूताः प्रवृद्धाः समार्गं [illegible] यतस्ततो गताः। अत्र कषायशब्दो [illegible] गृह्यते॥ * ॥ उक्तञ्च क्वाथस्य [illegible] शृतं क्वाथः कषायश्च निर्यूहः स निगद्यते [illegible] तोयपेयादिसंस्कारैर्निर्दोषं तत्र भेषजम् [illegible] तत्र तरुणे ज्वरे भेषजं सुखभेषजं तोयपेयादिसंस्कारैर्निर्दोषम्। [illegible] न तु कल्पनमुद्दिश्य कषायः प्रतिषिद्धः [illegible] कल्पनं तोयपेयायवाग्वादिकम्॥ * ॥ [illegible] स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टौ [illegible] ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् इति वचनात् स्वरसादयोऽपि कषाय [illegible] तत्र।
यः कषायः कषायः स्यात्

यः कषायः कषायः स्यात् [illegible]
कार्षेण अष्टमभागावशिष्टकरणे [illegible] वर्णः कषायरसश्च स्यात्। [illegible] तरुणज्वरे निषिद्धः॥ * ॥ [illegible]
यस्य लक्षणमाह।
मार्द्दशिरः कषायः स्वादुयः षोडशगुण [illegible] क्वथितोऽसः षड़ङ्गादि न निषिद्धो [illegible] अस्यायमर्थः। यः क्वाथः [illegible] ऽम्भसा क्वथितः पक्वः अथ च पादावशिष्ट [illegible] भागावशेषः स कषायः स्यात्। [illegible] द्वादिस्तरुणज्वरे न निषिद्धः।

...कायोक्तलक्षणाभावेन कषायत्वाभावात् ॥*॥
...नवज्वरे कषायस्य दोषमाह ।
...षा दुष्टाः कषायेण स्तम्भितास्तरुणे ज्वरे ।
...भान्ते न विपच्यन्ते कुर्व्वन्ति विषमज्वरम् ॥
...गेण स्तम्भिताः प्रक्षये निवारिताः ।
... आह कषायरसगुणान् ।
...यः स्तम्भनः शीतो रूक्षः पित्तकफापहः ।
इत्यादि ।
...भान्ते आध्मानं कुर्व्वन्ति । न विपच्यन्ते
...विना न विपच्यन्ते दुःखं दत्त्वा विलम्बेन विप-
...न्ते इति यावत् ॥ अन्यच्च ।
...पच्यन्ते न पच्यन्ते कषायैः स्तम्भिता मलाः ।
...निमार्गेण याते घोरं कुर्य्युर्नवज्वरम् ॥*॥
...तुमस्थितदोषाणां वमनं तरुणे ज्वरे ।
...रोगं श्वासमानाहमोहञ्च कुरुते भृशम् ॥"
...मामर्षः । कफादिदोषोपस्थितौ स्वयमेव
...भवति वमनं न तद्दोषाय । अनुपस्थित-
...पायान् तरुणे ज्वरे वमनं बलकृतं हृद्रो-
...दीन् करोतीत्यर्थः । एतेन वचनेन तरुणे
...वरे बलात् वमनं निषिद्धम् ॥*॥
...वस्थाविशेषे तदपि कर्त्तव्यमित्याह ।
...थ्यो भुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते ।
...मनं वमनार्हस्य शस्तमित्याह वाग्भटः ॥"
...मनं चेति विकल्पो लङ्घनापेक्षया वमनार्हत्वे-
...नेन गर्भिण्यतिकृशातिवृद्धादिनिरासः । वाग्-
...टोक्त वृद्धवाग्भटः ॥
...वमितं लङ्घयेत् प्राज्ञो लङ्घितं न तु वामयेत् ।
...मनं श्लेष्मवाहुल्याद्दन्याल्लङ्घनकर्षितम् ।
... कार्य्यं गुर्व्विणीबालवृद्धदुर्व्बलभीरुभिः ॥"
...नमनमिति शेषः । अनेन वचनेन गुर्व्विण्या-
...दीनामनशननिषेधात् ज्वरे सामे पाचनं निरामे
...मनं पथ्यान्नमण्डादिकञ्च दद्यात् ॥*॥
...पाचनशमनयोर्लक्षणमाह ।
...यत् पचत्याममाहारं पचेदामरसञ्च यत् ।
...मरसान् पचेद्दोषांस्तद्धि पाचनमुच्यते ॥
... शोधयति यद्दोषान् समान्नोदीरयत्यपि ।
...समीकरोति संदुष्टांस्तत् संशमनमुच्यते ॥"
... न शोधयति नोर्द्ध्वाधोमार्गाभ्यां पातयति ।
...नोदीरयति न वर्द्धयति ॥*॥ तयोः संप्रदानं
...कालञ्चाह ।
"पाययेदातुरं सामं पाचनं सप्तमे दिने ।
...लङ्घनेनाथवा दृष्ट्वा निरामं तदुपाचरेत् ॥
...मन्नादष्टौ प्रदेयन्तु पाचनं दिनमत्रयम् ।
...शमनीयं प्रदेयन्तु पथ्यान्नं ततः परम् ॥
...शोधनं दीपनश्चैव रसकान्नं प्रदापयेत् ॥" ·
...दक्षिसंहितायाः ॥ अन्यच्च ।
"...सर्व्वैपाक्यदोषञ्च शमनीयैरुपाचरेत् ॥"
...च ।
"...सामज्वरे ... ... ।
... ... ॥
...मामो ... ... बलवान् ज्वरः ।
...आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम् ।

भेषजं ह्यामदोषस्य भूयो जनयति ज्वरम् ॥"
भूयो बाहुल्येन । अन्यच्च ।
"पाययेद्दोषहरणं मोहादामज्वरे तु यः ।
झषाङ्कः, पुं, (झषः ...
इति हेमचन्द्रः॥ ...
...
झषाशनः, पुं, (झषस्य ...
...इति त्रिकाण्डशेषः॥

झषोदरी, स्त्री, (झषो मत्स्य एव उदरं उत्पत्तिस्थानमस्याः । झषस्य उदरं उत्पत्तिस्थानमस्याः इति वा । [illegible]) व्यासमाता । इति त्रिकाण्डशेषः ॥

झाङ्कृतं, क्ली, (झाम् इत्यव्यक्तशब्दस्य कृतं करणं यत्र ।) चरणालङ्कारविशेषः । इति धरणिः ॥

झाटः, पुं, (झट+घञ् ।) निकुञ्जः । कान्तारः । व्रणादीनां मार्ज्जनम् । इति मेदिनी । टे, २६ ॥

झाटलः, पुं, (झाटं लातीति । ला+कः ।) घण्टापाटलिः । इत्यमरः । २ । ४ । ३८ ॥

झाटा, स्त्री, (झट्+णिच्+अच् ततष्टाप् च ।) भूम्यामलकी । इत्यमरः ॥ यूथीदृचः । इति शब्दचन्द्रिका ॥

झाटिका, स्त्री, (झाटा+स्वार्थे कन् । टापि अत इत्वं ।) भूम्यामलकी । इति शब्दचन्द्रिका ॥

झामकं, क्ली, (झम्+ण्वुल् ।) दग्धेष्टका । इति हारावली । २१४ ॥ झामा इति भाषा ॥

झामरः, पुं, (झामं राति । रा+कः ।) शस्त्रशाणः । इति शब्दरत्नावली । टेकुयार शाण इति भाषा ॥

झार्झरः, पुं स्त्री, (झर्झरवाद्यं शिल्पमस्य । "शङ्खजर्झरवादनरत्नाम् ।" ४ । ४ । ५६ । इति ठक् ।) झार्झरिकः । झर्झरवाद्यकर्त्ता । इति व्याकरणम् ॥

झालि, स्त्री, आम्रविशेषः । झालि इति ख्याता । यथा, भावप्रकाशस्य पूर्व्वखण्डे २ भागे ।
"आमामलकसर्ज्जिरं राजिकालवणान्वितम् ।
[illegible] भालिकथ्यते ।
[illegible] कफशोधिनी ।
[illegible] रोचनी वह्निबोधिनी ॥"
([illegible] इति पाठोऽपि क्वचिद्दृश्यते ॥)

झाडुः, पुं, ([illegible] । झा+ डुः ।) वृक्षविशेषः । इति शब्दरत्नावली । झाउ इति भाषा ॥

झाबुकः, पुं, ([illegible] स्वार्थे कन् ।) वृक्षविशेषः । झाउ इति भाषा । तत्पर्य्यायः । [illegible] झाबुः ३ झाडुः ४ । इति शब्दरत्नावली ॥

झिङ्गाकं, क्ली, ([illegible] + [illegible] । पृषोदरात् साधुः ।) [illegible] । झिङ्गा इति भाषा । [illegible] । [illegible] । [illegible] । इति राजवल्लभः ॥

झिङ्गिनी, स्त्री, [illegible] । पृषोदरात् साधुः । [illegible] च ।) [illegible] । इति [illegible] । [illegible] । इति शब्दरत्नावली ॥

झिङ्गी, स्त्री, ([illegible] । पृषोदरात् साधुः ।) [illegible] । इति [illegible] ॥

झिञ्झाकः, पुं, ([illegible] ।) [illegible] । ([illegible] ।) [illegible] । इति [illegible] । २६ ॥

झिञ्झिरिटा, स्त्री, [illegible] । झिञ्झिरीटा । इति [illegible] । [illegible] । [illegible] ॥

झिञ्झिरा ४ रोमाश्रयफला ५ वृत्ता ६ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कषायत्वम् । रक्तातिसारनाशित्वम् । वृष्यत्वम् । सन्तर्पणत्वम् । बल्यत्वम् । मद्दिपोशीरवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

झिञ्झी, स्त्री, (झिञ्झा इत्यव्यक्तशब्दोऽस्त्यस्याः । अच् ततो ङीष् च ।) झिल्ली । यथा,—
"झिञ्झीवाद्यक्तमधुरा कूजन्ती मधुराकृतिः ॥"
इत्यागमः ॥

झिण्टी, स्त्री, (झिमिति कृत्वा रटतीति । रट्+अच् । ङीष् च पृषोदरात् साधुः ।) पुष्पवृक्षविशेषः । झाँटी इति भाषा । तत्पर्य्यायः । सैरीयकः २ इत्यमरः । २ । ४ । ७५ । कण्टकुरण्टः ३ सैरेयकः ४ झिण्टिका ५ । इति राजनिर्घण्टः ॥ नीलझिण्ट्याः पर्य्यायः । बाणा १ दासी २ आर्त्तगलः ३ । इत्यमरः । २ । ४ । ७४ । बाणः ४ आर्त्तगलः ५ इति तट्टीका । सहचरः ६ नीलकुरण्टकः ७ । इति रत्नमाला ॥ अरुणझिण्ट्याः पर्य्यायः । कुरवकः १ । इत्यमरः ॥ पीतझिण्ट्याः पर्य्यायः । कुरण्टकः १ सहचरी २ । इत्यमरः ॥ सहचरः ३ सहाचरः ४ । इति तट्टीका ॥ पीरः ५ पीतपुष्पः ६ दासी ७ कुरण्टकः ८ । इति रत्नमाला ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयशूलवातकफशोफकासत्वग्दोषनाशित्वञ्च । कुन्तरञ्जनम् । इति राजनिर्घण्टः ॥

झिरिका, स्त्री, (झिरीति अव्यक्तशब्देन कायति शब्दायते इति । कै+कः टाप् च ।) झिल्ली । इति शब्दरत्नावली ॥

झिरी, स्त्री, (झिर् इत्यव्यक्तशब्दो अस्त्यस्याः । अच् ङीष् ।) झिल्ली । इति शब्दरत्नावली ॥

झिल्लिः, स्त्री, (झिर् इत्यव्यक्तशब्देन लिम्पतीति । लिप्+डिः । रस्य लः ।) वाद्यविशेषः । यथा, गूढार्थदीपिकायाम् ।
"घण्टाशङ्खस्तथा भेरीन्दरङ्गी झिल्लिरेव च ।
पञ्चानां शब्दने वाद्यं देवताराधनेषु च ॥"

झिल्लिका, स्त्री, (झिर् इत्यव्यक्तशब्दं लिम्पतीति । लिप्+डिः रस्य लत्वे साधुः । ततः स्वार्थे कन् ।) झिल्ली । (यथा, रामायणे । २।८६।११ ।
"झिल्लिकाविरुतैर्दीर्घैः रुदतीव समन्ततः ॥")
आतपस्य रुचिः । [illegible] । इति हेमचन्द्रः ॥
झिल्लिकारावः । उद्वर्त्तनखण्डः । इति शब्दरत्नावली । (उद्वर्त्तनद्रव्यम् । झिण्टी । इति मेदिनी । के, ८६ ॥)

झिल्ली, स्त्री, (झिल्लि+कृदिकारादक्तिन इति वा ङीष् ।) कीटविशेषः । झिँझिपोका इति भाषा । तत्पर्य्यायः । झिल्लीका३ झिल्लिका३ झिरिका४ भीरुका ५ झिरी ६ चीरिका ७ चीरिका ८ झिल्ली ९ झङ्कारी १० चीरुका ११ । इति शब्दरत्नावली । चीरी १२ । इत्यमरः । २ । ५ । २८ ॥ चीरुका १३ । इति तट्टीका ॥ (यथा, माघकाव्ये, ६ । ११ ॥

"अहन्यथझिल्लीस्वनकर्कश[illegible]
उलूकवाग्भिर्यथिताम्बराक[illegible]
आतपरुचिः । वर्त्ती । उद्वर्त्तन[illegible]
मेदिनी ॥ स्थालीलग्नदग्धान्न[illegible]

झिल्लीकण्ठः, पुं, (झिल्लीव कण्ठोऽस्य ।) गृहकपोतः । [illegible]

झिल्लीका, स्त्री, (झिल्ली+[illegible] टाप् ।) झिल्लिका । इति हेमच[illegible]

झीरुका, स्त्री, (झिर [illegible] रु+शब्दे बाहुलकात् कन् टाप् [illegible] इत्यमरः । २ । ५ । २८ ॥

झु, उ गत्याम् । (भ्वा-आत्मं-सकं-[illegible] स्थाने झुङ इत्यपि केचित् । उ, [illegible] दुर्गादासः ॥

झुण्टः, पुं, (झट् संघाते+[illegible] स्तम्बः । अप्रकाण्डवृक्षः । इति [illegible]

झुमरिः, स्त्री, रागिणीविशेषः । य[illegible]
"प्रायः शृङ्गारबहुला [illegible]
एकैव झुमरिर्लोके
अतो लघ्वमेतस्या [illegible]
इदं हि प्राकृतं छन्दं प्रविष्टं [illegible]
इति [illegible]

झूणिः, पुं, क्रमुकभेदः । स्त्री, दुर्गा[illegible]
मेदिनी । णि, १४ ॥

झृ, ष य ज्याने । गलबद्धुषयोभाव [illegible]
(दिवां-परं-अकं-अनिट् ।) [illegible]
ष, झरा । य, झीर्य्यति । इति दु[illegible]

झोड़ः, पुं, गुवाकवृक्षः । इति शब्[illegible]

झ्यु, उ गत्याम् । इति कविकल्पद्रु[illegible]
सकं-अनिट् ॥)

ञ

ञ, ञकारः । स व्यञ्जनदशमवर्णः [illegible]
वर्णश्च । (अस्यो[illegible]
अस्योच्चारणस्थानं तालु । इति [illegible]
अस्योत्पत्तिर्यथा,—
"त्रिसर्गोत्तालुगः सोष्मा प्[illegible]
इति प्र[illegible]
(पाणिनिमते तु अस्योत्पत्ति[illegible]
न्वितत्वात् । अस्योच्चारणे [illegible]
मध्यस्य स्पर्शः आभ्यन्तरप्रय[illegible]
[illegible]
उत्र वामदक्षाङ्गुलये माव[illegible]
कुलीयतन्त्रमातायां) अस्य [illegible]
"कुण्डलीत्रयमासाद्य दयावी [illegible]
चतुर्वाधोगता माला [illegible]
निरञ्जनि तासु विश्वार्थ
कुण्डलीदृशरूपा तु या माला [illegible]
महामत्रिरूपा वा [illegible]
चतुर्भुजा धूम्रवर्णा [illegible]
नानालङ्कारसंयुक्ता [illegible]

ट

…नित्यां वरदां भक्तवत्सलाम् ।
…रूपां तस्तत्त्वं दशधा जपेत् ॥”
इति वर्णोद्धारतन्त्रम् ॥ ॥
… यथा,कामधेनुतन्त्रे ।
…संयुक्तं णकारं शृणु सुन्दरि ! ।
…ताकारं या स्वयं परकुण्डली ॥
…यं वर्णं पञ्चप्राणात्मकं सदा ।
…सहितं वर्णं त्रिबिन्दुसहितं सदा ॥”
…शतिर्नामानि यथा,—
…शविंशतिर्नामानि यथा,— … मरुदो वियत् ।
… बोधनी विश्वा कुण्डली मत्सदो वकः ॥
…री नागविज्ञानी सथाङ्गुलगतो चकः ॥
…धूर्णिता बुद्धिः स्वर्गात्मा घर्घरध्वनिः ।
…प्रमादः ससुखो विरजा चन्द्रेश्वरी ॥
…गः पुष्पधन्वा च रागात्मा च वराचिणी ॥”
इति नानातन्त्रशास्त्रम् ॥
… इत्येकाक्षर-
… गायनः । घर्घरध्वनिः । … वाममतिः । इति
… बलीवर्द्दः । शुक्रः । … गणपाठे धातोरुभय-
…मी । जे, १ ॥ (… इति वोपदेवः ॥)
…विज्ञापको ऽनुबन्धविशेषः । स प्रेरणार्थे भवति ।
…, प्रत्ययविशेषः । … धातोरनुबन्धविशेषः ।
… इकारस्तिष्ठति । … इति वोपदेव
…संमागतप्रत्ययबोधकः । …) जि-
…नी ॥ पुं, (जिः प्रत्ययविशेषो ऽन्ते यस्य ।) जि-
… यान्तः । यथा, “जिप्रान्तप्रबधे” इत्यादि
…मनेपदप्रकरणीयसूत्रम् ॥ स च प्रत्ययः
…तिः शब्दाश्च भवति । यथा, जिः प्रेरणे
… वे: छत्वाद्याने जिरिति च मुग्धबोध-
…करणम् ॥ सम्यग्बोधयाकरणस्य परिच्छेद-
…षः । यथा, इति आन्तपादः ॥

ट

…रः । स व्यञ्जनेकादशवर्णः । टवर्गप्रथम-
…व । अस्योच्चारणस्थानं मूर्द्धा । इति व्याक-
…म् ॥ (अस्योच्चारणे मूर्द्धस्थानेन जिह्वामध्यस्य
…ः । आभ्यन्तरप्रयत्नः । मातृकान्यासेऽस्य
…न्यासः । वह्नीयवर्णमाला-
…सेऽपि न्यास्यत्वम् । …
…) तस्य लेखनप्रकारो यथा,—
…टोयःक्रमतो रेखा कुण्डलीरूपतस्तथा ।
…न्ति तासु नित्यासु कुबेरयमवायवः ॥
…वा कोणगता चोर्द्ध्वा तत्र रुद्रगता तु सा ।
…नित्या परमा शक्तिश्चतुर्वर्गप्रदायिनी ॥
…नमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि ! ।
…तीपुष्पवर्णाभां पूर्णचन्द्रनिभाननाम् ॥
…ताङ्गुलमायुक्तां सर्वालङ्कारसंयुताम् ।
…मोक्षप्रदां नित्यां सदा सौरसखीं पराम् ॥
…ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥”
इति वर्णोद्धारतन्त्रम् ॥ ॥
…स स्वरूपं यथा,—
…कारं चञ्चलापाङ्गि ! स्वयं परमकुण्डली ।
…टिविद्युल्लताकारं पञ्चदेवमयं सदा ॥

पञ्चप्राणयुतं वर्णं गुणत्रयसमन्वितम् ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥”
इति कामधेनुतन्त्रम् ॥

तस्य २७ सप्तविंशतिनामानि यथा,—
“टङ्कारः कपाली च सोमवाः खेचरी ध्वनिः ।
मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
दक्षाङ्गकार्द्धचन्द्रश्च जरा भूतिः पुनर्भवः ।
बृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः ॥
राजा गिरिर्महाधनुर्प्राणात्मा सुमुखो मरुत् ॥”
इति नानातन्त्रशास्त्रम् ॥

टं, क्ली, (टल् + डः ।) करङ्कः । इति विश्वः ॥

टः, पुं, (टल् + डः ।) वामनः । पादः । निस्वनः ।
इति मेदिनी । टे, १ ॥

टक, इ क बन्धे । इति कविकल्पद्रुमः ॥ (चुरां-
परं-सकं-सेट् ।) इ क, टङ्कयति । इति दुर्गा-
दासः ॥

टक्कदेशीयः, पुं, (टक्कदेशे भव इति छः ।)
वास्तूकशाकः । इति त्रिकाण्डशेषः ॥

टगरः, पुं, (टः टङ्कणः क्षारविशेषः गर इव ।
तीव्रगुणत्वात्तथात्वम् ।) टङ्कणक्षारः । हेला-
विभ्रमगोचरः । केकराक्षे, त्रि । इति मेदिनी ।
रे, १६० ॥

टङ्कः, पुं, (टकि + घञ् ।) कोपः । कोषः । असिः ।
ग्रावदारणः । इति मेदिनी । के, २४ ॥ (यथा,
अनर्घराघवे । १ । २२ ।
“यः क्षत्रदेहं परितश्च टङ्कै-
स्तपोमयैर्न्नाद्यपणघकार ॥”)
स तु चतुर्माषकरूपस्तु-
परिमाणविशेषः । स तु चतुर्माषकरूपश्चतु-
र्विंशतिरक्तिकारूपो वा । जङ्घा । इति हेम-
चन्द्रः । ३ । ५८३ ॥ दर्पः । इति हलायुधः ॥

टङ्कः, पुं क्ली, (टकि + घञ् अच् वा ।) नील-
कपित्थः । (यथा, सुश्रुते सूत्रस्थाने ४६ ।
“शीतं कषायं मधुरं टङ्कं मारुतकृद्गुरु ॥”)
खनित्रम् । टङ्कणः । इति शब्दरत्नावली ॥
दर्पः । इति शब्दरत्नावली ॥

टङ्ककः, पुं, (टङ्कति बध्नाति मनः स्नेहेनेति ।
टकि + ण्वुल् । यद्वा, टङ्क्यते बध्यतेऽनेन मन
इति । घञ् । ततः संज्ञायां कन् ।) रजतमुद्रा ।
इति रूप्याध्यक्षशब्दे अमरटीकायां रायमुकुटः ॥ रूप्याध्यक्षशब्दे अमरटीकासारसुन्दरी
भरतश्च ॥ टाका इति भाषा ॥

टङ्ककपतिः, पुं, (टङ्ककस्य पतिः रक्षकः ।) रूप्या-
ध्यक्षः । टङ्कशालानियुक्तः । इत्यमरटीका-
सारसुन्दरी ॥ टाकशालेर अध्यक्ष इति भाषा ॥

टङ्कशाला, स्त्री, (टङ्ककस्य शाला ।) रजत-
मुद्रादिनिर्माणस्थानम् । इत्यमरटीकासारसुन्दरी ॥ टाक-
शाल इति भाषा ॥

टङ्कटीकः, पुं, शिवः । इति त्रिकाण्डशेषः ॥

टङ्कणः, पुं, (टकि बन्धे + ल्युः । पृषोदरात् णत्वे
साधुः ।) क्षारविशेषः । सोहागा इति भाषा ।
(यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“विरूक्षणोऽग्निकरः श्लेष्मघ्नः पित्तदूषणः ।
अग्निदीप्तिकरस्तीक्ष्णष्टङ्कणः क्षार उच्यते ॥”)

तत्पर्य्यायः । पाचनकः २ मालतीतीरजः ३
लोहश्लेषणः ४ रसघोधनः ५ । इति हेम-
चन्द्रः । ४ । १० ॥ टङ्कणक्षारः ६ रङ्गक्षारः ७
रसाधिकः ८ लोहद्रावी ९ रसघ्नः १० सुभगः
११ रङ्गदः १२ वर्त्तुलम् १३ कनकम् १४
क्षारम् १५ मलिनम् १६ धातुवल्लभम् १७ ।
इति राजनिर्घण्टः ॥ मालतीतीरसम्भवः १८
द्रावी १९ द्रावकः २० लोहशुद्धिकारकः २१ ।
इति भावप्रकाशः ॥ स्वर्णपाचकः २२ । इति
रत्नमाला ॥ अस्य गुणाः । कटुत्वम् । उष्ण-
त्वम् । कफस्थावरादिविषकासश्वासनाशित्वञ्च ।
इति राजनिर्घण्टः ॥ अग्निवातपित्तकारित्वम् ।
रूक्षत्वम् । इति भावप्रकाशः ॥ (देश-
विशेषः । यथा, बृहत्संहितायाम् । १४।१२ ।
“कङ्कटङ्कणवनवासि शिबिकफणिकारकोङ्कणा-
भीराः ॥”) इति

टङ्का, स्त्री, (टकि + अच् टाप् ।) जङ्घा । इति
मेदिनी । के, २५ ॥

टङ्कानकः, पुं, (टङ्कं दर्पं कोपं वा आनयति उद्दी-
पयतीति । आ + नी + णिच् + ण्वुल् ।) श्रक्षदार-
वृक्षः । इति शब्दचन्द्रिका ॥

टङ्कारः, पुं, (टल् वैक्लव्ये + वाहुलकात् डः । टं
वैक्लव्यं चित्तस्य विकृतिं करोतीति । कृ +
कर्म्मण्यण् ।) विस्मयः । प्रसिद्धः । शिञ्जित-
ध्वनिः । इति मेदिनी । रे, १६० ॥ (यथा,
काशीखण्डे । २६ । ६६ ।
“टीकिताशेषमातालटङ्किकेलोद्भिपाटवे ।
टङ्काररुद्ध्यतुकल्लोला टीकनीया महातटा ॥”
टङ्कारस्त्र्यनुकरणशब्दस्य
घ + घञ् । कारः टं इति अव्यक्तशब्दस्य
कारः करणं यत्र । ध्वनिमात्रे । यथा, भाग-
वते । ३ । १७ । ८ ।
“अन्तर्ग्रामेषु मुखतो वमन्तो वह्निमुल्बणम् ।
शृगालोलूकटङ्कारैः प्रणेदुरशिवाः शिवाः ।”)

टङ्कारी, स्त्री, (टङ्कं गच्छतीति । ऋ + “…
ण्यण् ।” ३ । २ । १ । इत्यण् । ततो गौ-
रादित्वात् ङीप् ।) क्षुपविशेषः । टेकारी
भाषा । अस्य गुणाः । वातश्लेष्मा…
वयथानाशित्वम् । तिक्तत्वम् । दीपनत्वम् ।
लघु । इति राजनिर्घण्टः ॥

टङ्गं, पुं क्ली, (टकि + अच् ।) खनित्रम् ।
भेदः । जङ्घा । इति मेदिनी । गे, …

टङ्गः, पुं, (टङ्क + पृषोदरात् साधुः ।
इति शब्दचन्द्रिका ॥ सोहागा इ…
चतुर्माषकपरिमाणम् । इति वैद्यक…

टङ्गणः, पुं क्ली, (टङ्कण + पृषोदरा…
टङ्कणः । सोहागा इति भाषा । …
श्लेष्मवायुनाशित्वम् । क्षारत्वम् …
उष्णत्वम् । अग्निवर्द्धकत्वम् ।
भेदकत्वम् । बलवर्द्धनत्वञ्च । इ…

टङ्गिनी, स्त्री, (टकि बन्धे + णिनि…
दरात् गत्वे ङीपि च साधुः । …
इति शब्दचन्द्रिका ॥ आकना…

टङ्गनी, स्त्री, (टङ् इत्यव्यक्तशब्दं नयतीति । नी+क्विप् ।) ज्येष्ठी । इति त्रिकाण्डशेषः ॥
टङ्कारी, स्त्री, (टङ्कमित्यव्यक्तशब्दं रातीति । रा+कस्ततो ङीप् ।) ढक्कावाद्यः । लम्बावाद्यम् । पटहवाद्यम् । इति मेदिनी । रे, १५६ ॥
टङ्कुरः, पुं, (टङ्कु इत्यव्यक्तशब्दं रातीति । रा+कः ।) भेरीशब्दः । इति हेमचन्द्रः ॥
टल, न विक्लवे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) न, टालः टलः । विक्लवो विह्वलीभावः । इति दुर्गादासः ॥
टलनं, क्ली, (टल+भावे ल्युट् ।) विक्लवः । टला इति भाषा ॥
टा, स्त्री, (टलति प्रलये भूकम्पादौ वा । टल+ड टाप् च ।) पृथिवी । इत्येकाक्षरकोषः ॥
टाङ्करः, पुं, (टङ्कस्येदं टाङ्कम् । टङ्क+अण् । टाङ्कं रातीति । रा+कः ।) नागवीटः । इति त्रिकाण्डशेषः ॥
टारः, पुं, (टां पृथ्वीं आचरतीति । चर+अण् ।) अश्वः । तुरङ्गः । इति हेमचन्द्रः ॥
टिक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट् ।) ऋ, अटिटिकत् । ङ, टेकते । इति दुर्गादासः ॥
टिटिभकः, पुं, (टिटीत्यव्यक्तशब्दं भणति । भण+डः । ततः स्वार्थे कन् ।) टिट्टिभपक्षी । इत्यमरटीका ॥
टिट्टिभः, पुं, (टिटीत्यव्यक्तशब्दं भणतीति । भण+डः ।) पक्षिविशेषः । टीठि इति भाषा । तत्पर्यायः । टीटिभकः २ । इति शब्दरत्नावली । टिट्टिभकः ३ । इत्यमरः । २।५।३५ । टिट्टिभकः ४ । इति तट्टीका ॥ (यथा, मनुः । ५ । ११ ।
"क्वाविद्धं टिट्टिभं तथा ।" [illegible]
असुरविशेषः । यथा,
"इतो टिट्टिभ: प्रभुर्टिट्टिभो नाम दानवः ।
मायूरेण च रूपेण घातयिष्यति माधवः ॥"
इति गारुडे ८० अध्यायः ॥
([illegible] । [illegible] । यथा, महाभारते । २ । ८ । १५ ।
"टिट्टिभो विटभूतश्च [illegible] ।"
[illegible]
"[illegible] शूराः सर्वे [illegible] ॥")
टिट्टिभकः, पुं, (टिट्टिभ+स्वार्थे कन् ।) टिट्टिभपक्षी । इत्यमरः । २।५।३५ ॥ [प्रकाशः ॥
टिण्टिभका, स्त्री, [illegible] । इति भाव-
टिण्डिशः, पुं, शाकविशेषः । टिण्डिसा । इति हिन्दी इति च भाषा । तत्पर्यायः । रोमशफलः २ टिण्डिशः ३ मुनिनिर्मितः ४ । इति राजनिर्घण्टः ॥ टिण्डिशः ५ । अस्य गुणाः । रुचिकारित्वम् । भेदकत्वम् । पित्तश्लेष्मापहारित्वम् । शीतत्वम् । वातलत्वम् । रूक्षत्वम् । मूत्रलत्वम् । इति भावप्रकाशः ॥

टिप, क क्षेपे । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) क, टेपयति । क्षिपति प्रेरयति । इति दुर्गादासः ।
टिप्पनी, स्त्री, (टेपयति व्याख्यायतेऽनया । टिप+करणे ल्युट् ङीप् च । पृषोदरादित्वात् पस्य द्वित्वं साधुः ।) टीका । यथा,—
"श्रीमत्प्राणमनं नत्वा लीलावत्याः सुटिप्पनी ।
भवेशेन सुबोधार्थं क्रियते यद्गुरोः शुभम् ॥")
टीक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः । (भ्वा-आत्मं-सकं-सेट् ।) ऋ, अटिटीकत् । ङ, टीकते । इति दुर्गादासः ॥
टीका, स्त्री, (टीक्यते गम्यते प्रविश्यते ज्ञायते अनया । टीक+घञर्थे कः । टाप् च ।) विवरणग्रन्थः । इति लिङ्गादिसंग्रहे अमरः ॥
टुण्टुकः, पुं, श्योनाकवृक्षः । इत्यमरः । २।४।५६ ॥ क्षुद्रखदिरवृक्षः । इति शब्दचन्द्रिका ॥ (टुण्टु इत्यव्यक्तशब्देन कायति शब्दायते इति । कै+कः ।) पक्षिविशेषः । इति शब्दरत्नावली ॥ टुण्टुनि इति भाषा । श्योनाकभेदः । इति राजनिर्घण्टः ॥
टुण्टुकः, त्रि, नीचः । इति मेदिनी ॥ क्रूरः । इति विश्वः ॥
टुण्टुका, स्त्री, टङ्कणीवृक्षः । इति शब्दचन्द्रिका ॥
टुणाका, स्त्री, तालमूलीवृक्षः । इति शब्दचन्द्रिका ॥
टेरकः, त्रि, वक्रचक्षुः । टेरा इति भाषा । तत्पर्यायः । वलिरः २ केकरः ३ केदरः ४ । इति शब्दरत्नावली ॥
ट्वल, न विक्लवे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) वकारयुक्तः । न, ट्वालः ट्वलः । विक्लवो विह्वलीभावः । इति दुर्गादासः ॥

ठ

ठ, ठकारः । स व्यञ्जनद्वादशवर्णः टवर्गद्वितीयवर्णश्च । (अर्द्धमात्राकालेनोच्चार्योऽयं वर्णः ।) अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (अस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्पर्शः आभ्यन्तरप्रयत्नः । विवारश्वासघोषा महाप्राणश्च बाह्यप्रयत्नाः । यद्युक्तं वर्णमालायाम्) तस्य लेखनप्रकारो यथा,—
"वामाकुण्डलाकारो रेखाधिष्ठितदेवताः ।
निर्वाणं क्रमतो नित्यं चन्द्रसूर्याग्नयः प्रिये ! ॥
मात्रायोगस्तु विज्ञेयष्ठकारः परमेश्वरि ! ।
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! ॥
पूर्णचन्द्रप्रभां देवीं विकसत्पङ्कजेक्षणाम् ।
इन्दरीं कौस्तुभयुतां धर्मकामार्थमोक्षदाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ ॥
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"ठकारं चञ्चलापाङ्गि ! कुण्डलीमोक्षरूपिणी ।
पीतविद्युल्लताकारं सदा त्रिगुणसंयुतम् ॥
पञ्चदेवात्मकं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिबिन्दुसहितं वर्णं [illegible]
तस्य [illegible]
"ठः शून्यो मञ्जरी बीजः [illegible]
[illegible]
वनजो नन्दजो जिह्वा [illegible]
वर्तुलः कुण्डलो वह्निरम्बरं [illegible]
[illegible] ईशानो [illegible]
एकपादो विभूतिश्च ललाटं [illegible]
दयनो [illegible]
इति [illegible]

ठः, पुं, शिवः । महाध्वनिः । इत्येकाक्षरकोषः ॥ मण्डलः । शून्यगोचरः । इति मेदिनी । ठे, १ ॥
ठक्कुरः, पुं, देवता । ठाकुर इति भाषा ।
"श्रीदामनामगोपालः श्रीमान् [illegible]
[illegible]
ठठं ठठठं } अनुकरणशब्दः । भाषा । यथा, महाना[illegible]
"रामाभिषेके मदविह्वलायाः
कक्षाच्युतो हेमघटस्तरुण्याः ।
सोपानमासाद्य चकार शब्दं
ठठं ठठं ठं ठठठं ठठं ठः ॥"
ठेरः, त्रि, वृद्धः । यथा, [illegible]
इति काव्यप्रकाशे देशीभाषा ।

ड

ड, डकारः । स व्यञ्जनत्रयोदशवर्णः टवर्गतृतीयवर्णश्च । अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । ।
"ऋटुरषाणां मूर्द्धा ।" [illegible]
वर्णोद्धारतन्त्रे मातृकान्यासे लेखनप्रकारो [illegible]
"दक्षाधःक्रमतो रेखा [illegible]
लक्ष्मीर्वाणी भवानी च
ब्रह्मरूपा तथा माया [illegible]
ध्यानमस्य [illegible]
[illegible]
त्रिनेत्रां वरदां नित्यां [illegible]
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं द[illegible]
इति [illegible]
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"डकारं चञ्चलापाङ्गि ! सदा
पञ्चदेवमयं वर्णं पञ्चप्राणमयं स[दा]
त्रिशक्तिसहितं वर्णं त्रिबिन्दु[सहितं]
चतुर्ज्ञानमयं वर्णं आत्मादितत्त्व[संयुतम्]
पीतविद्युल्लताकारं डकारं [illegible]
तस्य ८४ चतुर्विंशतिनामानि [illegible]
"डः स्मृतिर्दारुको नन्दिः [illegible]
[illegible]
कौमारी शङ्करस्त्रासः [illegible]

ती भीमा द्विजिह्वः पृथिवी सती। ...मा कान्तिर्नाभिः स्वाती च लोचनम्॥"

इति नानातन्त्रशास्त्रम्॥

... अस्य प्रथमोपन्यासे फलं भीमा। ...रत्नाकरटीकायाम्।

...र्मा टो विप्रोभां भयमय च यजस्तु खं यस्तु युद्धम्॥")

... डयते उड्डीयते भक्तानां हृदयाकाशे ... शिवः। डी+बाहुलकात् डः।) ...

...यते आकाशमार्गे नभोगुप्यत्वादिति। डी ... इः।) शब्दः। त्रासः। इत्येकाक्षरकोषः॥ ...इः।) शब्दः। इति मेदिनी। ड, १॥

...ड्डामिः। इति मेदिनी...

...री, स्त्री, (डं अशोचकादिजनितत्रासं ...र्गति नाशयतीति। गृ+अच्। निपातनात् ...इति नाशयतीति। ...आगमः। ततो ङीप्।) फलविशेषः। तत्-...र्यायः। डाङ्गरी २ दीर्घर्बोरुः ३ ...दीर्घफला ७।

...ङ्गारी ५ नागपुष्पी ६ गजदन्तफला ७। ...सा गुणाः। शीतलत्वम्। रुचिकारित्वम्। ...पित्तनाशदोषार्शोनाशकत्वादिरोधनाशित्वम्। ...पित्तत्वम्। गौल्यत्वञ्च। इति राजनिर्घण्टः॥ ...र्थत्वम्। गौल्यत्वञ्च। इति राजनिर्घण्टः॥ ...री, स्त्री, (डङ्गरी पृषोदरादित्वात् ...) ...रीफलम्। इति राजनिर्घण्टः॥

...

विप्लवः ३। इत्यमरः।३।२।१४॥ डिम्बः ४ विप्रः ५ डामरः ६। इति भरतः॥ (यथाह गर्गः।

"तत्र चक्षुर्षो लिङ्गैर्हेतुः स तु ... प्रोक्ता।

...

डमरः, पुं, (डमित्यव्यक्तशब्दं ऋच्छतीति। ऋ+"ऋगयादयश्च।" उणां १।३८। इति कु-प्रत्ययेन निपातनात् साधुः।) वाद्यभेदः। कपालियोगिवादनम्। इत्यमरः।१।७।८॥ चोयमध्ये गुटिकाद्वयालम्बितः। इति भरतः॥ चीरमध्ये गुटिकाद्वयालम्बितः। इति सारसुन्दरी॥ (यथा, योगसारे २ परि-च्छेदे।

"वादयन् डमरुं योगी यत्र कुत्राश्रमे शिवः॥")

चमत्कारः। इति त्रिकाण्डशेषः॥

डयनं, क्ली, (डीयते आकाशमार्गे गम्यतेऽनेनेति। डी+करणे ल्युट्।) कर्णीरथः। (डी ङ नभो-गतौ+भावे ल्युट्।) नभोगतिः। इति हेम-चन्द्रः।४।३८४॥

डालकं, क्ली, पैष्पादिनिर्मितपात्रम्। डाला इति भाषा। यथा,—

"त्रिशतञ्च घटाधिकं डालकं वस्त्रसंयुतम्।

... ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

डवित्थः, पुं, काष्ठमयहस्ती। यथा,—

"डित्थः काष्ठमयो हस्ती ...॥"

इति मुग्धबोधव्याकरणे विभक्तिसारः॥

...

डामरः, पुं, शिवोक्ततन्त्रशास्त्रविशेषः। (यथा, काशीखण्डे। २६।७०।

"डमरुमरुश्च डामरोत्तमधारका॥"

"डामरी डामरकल्पो नवाचार्यदेवीमन्त्रस्य प्रतिपादको यन्त्रो महाराष्ट्रे गुप्तगृहस्थितमन्त्रोक्तं प्रतिपादितं मन्त्रमयं महच्छरीरं यस्याः॥"

इति तट्टीका॥) स तु षड्विधः। तेषां नामानि श्लोकसंख्याश्च यथा। योगडामरः २३,५३३। शिवडामरः ११,००७। दुर्गाडामरः ११,५०२। सारस्वतडामरः ६,६०५। ब्रह्म-डामरः ७,१०५। गन्धर्वडामरः ६०,०६०। इत्यमर-इति वाराहीतन्त्रम्॥ डमरः। चमत्कारः। यथा। भूतानां टीकायां भरतः॥ चमत्कारः। यथा। भूतडामरशब्दनिर्भ-डामरश्चमत्कारोऽनेति भूतडामरशब्दनिर्भ-यते निर्भयकारः॥ (गर्वः। आटोपः। यथा, गीतगोविन्दे। १२।२२।

"मम रुचिरे चिकुरे कुरु मानद! मानसज-ध्वजचामरे।

रतिगलिते ललिते कुसुमानि शिखण्डि-शिखण्डकडामरे॥"

कोटचक्रविशेषः। यथा, समयामृते।

"अथातः संप्रवक्ष्यामि कोटचक्रमिहाद्भुतम्॥"

इत्युपक्रम्य,—

"प्रथमो गिरिकोटश्च गतः कोटश्च डामरः॥"

इत्युक्तवान्॥

...

शृङ्गारविशेषः। यथा, प्रयोगसारे।

...

इत्युपक्रम्य,—

...

डालिमः, पुं, (दालिमः पृषोदरादित्वात् ...) दालिमः। इत्यमरटीकायां भरतः॥ इति भूरिप्रयोगः॥

डाहलः, पुं, देशविशेषः। ...

डिङ्गरः, पुं, ... धूर्त्तः। सेवकः। ...

डिण्डिमः, पुं, (डिण्डीति शब्दं ...) वाद्यविशेषः। इत्यमरः।१।७।... इति भरतः॥ ...

"डिण्डिमो रोमशफली सुनिर्निर्मित इत्यपि ।
डिण्डिमो वर्त्तिकान्तेदो पित्तश्लेष्मापहः स्मृतः ।
सुशीतो वातलो रुच्यो मूत्रकृच्छ्राश्मरीहरः ॥")

डित्थः, पुं, काष्ठमयहस्ती । यथा, सुपद्मव्याकरणे विभक्तिपादे ।
"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः ॥"
विशेषलक्षणयुक्तपुरुषः । यथा,—
"श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः ।
सर्व्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते ॥"
इति कलापटीकायां व्याख्यासारः ॥
(द्रव्यवाचिसंज्ञाशब्दभेदः । यथा, साहित्यदर्पणे । "द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः ॥")

डिप, इ क ङ ञ संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-उभं च-सकं-सेट् ।) मूर्द्धन्यवर्गतृतीयादिः । इ क ङ, डिम्पयते । ञ, डिम्पयति डिम्पयते । अयमात्मनेपदीत्यन्ये । संहतौ राशीकरणम् । इति दुर्गादासः ॥

डिप, क ङ ञ संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-उभं-च सकं-सेट् ।) मूर्द्धन्यवर्गतृतीयादिः । क ङ, डेपयते । ञ, डेपयति डेपयते । पुनःपाठात्सेदुर्बलः । अयमात्मनेपदीत्यन्ये । संहतौ राशीकरणम् । इति दुर्गादासः ॥

डिप, षि क य इर् शुदि । इति कविकल्पद्रुमः ॥ (तुदां-चुरां-दिवां च-सकं-सेट् ।) षि, डिपति अडिपीत् । क, डेपयति । य, डिप्यति । इर्, अडिपत् अडेपीत् । तुदाद्यन्तर्गणस्यैव कुटादित्वमिति दिवादिपक्षे गुणः । दिवादिपक्षे पुषादित्वाभिर्यं ङ इत्यन्ये । शुदि प्रेरणे । इति दुर्गादासः ॥

डिब, इ क मोदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) मूर्द्धन्यवर्गतृतीयादिः । इ क, डिम्बयति । मोदः प्रेरणम् । इति दुर्गादासः ॥

डिभ, इ क ञ सङ्घे । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सकं-सेट् ।) इ क ञ, डिम्भयति डिम्भयते । अयमात्मनेपदीति केचित् । सङ्घो राशीकरणम् । इति दुर्गादासः ॥

डिम, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां परं-सकं सेट् ।) डिडिमः । सौत्रधातुरयम् । इति दुर्गादासः ॥

डिमः, पुं, नाटकस्य रूपकविशेषः । इति हेमचन्द्रः । २ । १९८ ॥ (तल्लक्षणादिकं यद्रुक्तं साहित्यदर्पणे । ६ । २४६ ।
"मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः ॥
अङ्गी रौद्ररसस्तत्र सर्व्वेऽङ्गानि रसाः पुनः ।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ ॥
नायका देवगन्धर्व्वयक्षरक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ।
वृत्तयः कैशिकीहीना निर्व्विमर्षाश्च सन्धयः ।
दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्ज्जिताः ॥")

डिम्बं, क्ली, (डिम + घञ् ।) भयम् । कलनम् । पुप्फुसः । इति हारावली । २४४ ॥ डमरः । इत्यमरः । ३ । ५ । १४ ॥

डिम्बः, पुं, (डिबि क्षेपे + भावे घञ् ।) भयध्वनिः । अण्डम् । पुप्फुसः । प्लीहा । विप्लवः । इति मेदिनी । बे, ५ ॥ डिम्भः । इति द्विरूपकोषः ॥

डिम्बाहवः, पुं, (डिम्बः नृपतिशून्यत्वात् विप्लवस्तत्र आहवः ।) नृपतिरहितयुद्धम् । इति जटाधरः ॥ (यथा, मनुः । ५ । ९५ ।
"डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च ॥"
"डिम्बाहवो नृपरहितयुद्धं तत्र हतानाम् ॥"
इति तट्टीकायां कुल्लूकभट्टः ॥)

डिम्बिका, स्त्री, (डिम्बयति नायकधर्मीये मोहयत्यात्मानमिति । डिम्ब + ण्वुल् । टाप् अत इत्वञ्च ।) कामुकी । जलडिम्बः । शोणकवृक्षः । इति शब्दरत्नावली ।

डिम्भः, त्रि, (डिम्भयति संहतो भवतीति । डिम्भ + पचाद्यच् ।) शिशुः । इत्यमरः ।२।६।३८ ॥ (यथा, रसिकरञ्जने । १ ।
"शृङ्गारम्भोऽस्मिन् महितमतिडिम्भैर्ल्लितमलं ।
मयिच्छन्नं दर्भैश्चचकचकर्मैः परिचितम् ॥")
मूर्खः । इति मेदिनी । भे, ४ ॥ अस्य रूपान्तरं डिम्बः । इति द्विरूपकोषः ॥

डिम्भकः, त्रि, (डिम्भ एव । डिम्भ + स्वार्थे कन् ।) बालकः । इति शब्दरत्नावली ॥ (सनामख्यातः शाल्वदेशाधिपतेर्ब्रह्मदत्तस्य पुत्रः । यथा, हरिवंशे भविष्यपर्व्वणि । ३१ । १८ ।
"हंसो ज्येष्ठो नृपसुतो डिम्भकोऽनन्तरोऽभवत् ॥"
अस्य विशेषविवरणं तत्रैव विस्तरशो द्रष्टव्यम् ॥)

डिम्भचक्रं, क्ली, (डिम्भ इव चक्रम् ।) नराणां शुभाशुभनिर्णायकचक्रविशेषः । यथा,—
"डिम्भचक्रे लिखेद्धानि भानुभादित्रिभत्रके ।
मुखे त्रीणि द्वयं स्कन्धे चैकैकं बाहुहस्तयोः ॥
हृदि पञ्च नाभिगुह्ये चैकैकं षट् च जानुनोः ।
चरणाभ्यां तथैकैकं जन्मभेषगतात् फलम् ॥
शीर्षस्थे छत्रलाभः स्यात् वक्त्रे मिष्टान्नभोजनम् ।
स्कन्धे धनी च बाहुभ्यां स्थानभ्रष्टो भवेन्नरः ॥
पाणिभ्यां तस्करो लक्ष्मीर्हृदयस्थे च नाभितः ।
गुह्ये कामी भ्रमी जान्वोरल्पजीवी च पादयोः ॥"
इति स्वरोदयः ॥

डिम्भा, स्त्री, (डिम्भ + टाप् ।) अतिशिशुः । इत्यमरः । २ । ६ । ४१ ॥

डी, ङ् ओ ङ य गतौ । नभोगतौ । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं अकं च-सेट् ।) ओ, डीनः । ङ य, डीयते । इति दुर्गादासः ॥

डी, ङ नभोगतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं सेट् ।) ङ, डयते पक्षी । अस्यापि निष्ठायां डीनः । इति कातन्त्रादयः । धातुपारायणिकास्तु इमनिषेधे ओदित्त्वमत्रैव पठन्ति मध्यादयस्त्वादिमिवस्त्वथादृगुणे डयित इत्याहुः । गोयीचन्द्रोऽपि । क्वचित् डयितवान् इत्युदाजहार । मतान्ते तु डीन इति । दुर्गादासः ॥

डीनं, क्ली, (डी नभोगतौ + भावे क्त ।) खगगतिः । इति जटाधरः ॥ महाभारते,
"चक्रात् मंडल विक्रम्य ...
उड्डीयोगतिसमनः सदृशैः प्रतो ।
संकलाड पञ्चगमनमनुष्ये वर्त्तिकम् ।
षट् विंशतिरमी मेदाः ...
महाडीनं विडलैनो पातनं ...
गतं तत्र पयोहिंड काकनं पुराणम् ।
प्रध्याइति: प्रतिगतिरिति
तैषां निपाताः
तद्यथा । ...
पतनम् २ प्रडीनं प्रपतनेमना १
मण्डलम् ४ निडीनं नीचैःपतनम् ५
सव्यकुपतनम् ६ तिर्य्यग्डीनं ...
निडीनं विचित्रं पतनम् ८ परिडीनं
पतनम् ९ पराडीनं पराङ्
सुडीनं सुन्दरमापतनं ११ अभिडीनं
सुखेन पुनः पुनः पतनम् १२ ...
पतनेन मण्डलगतिः १३ निडीनं ...
मण्डलः पतनम् १४ अतिडीनं ...
अवडीनं अधःपतनम् १६ प्रडीनं
वेगवता १७ अवसंडीनं ...
पत्ता १८ डीनडीनकं पतनं विडीनं
सितञ्च १९ संडीनोड्डीनं
संडीनडीनं शोभनगमनमावन् २१
तदेव सामान्यगमनम् २२ डीनावडीनं
बाधः कुत्सितञ्च २३ सम्पातं चतु...
गमनम् २४ समुदीषं परस्परगमना...
गतम् २५ ततोऽप्यत् यातिरिक्तं
लताद्यैरच्छेदतं पतनम् २६ ।
विंशतिसंख्येषु पतनं एकं डीनानां
शेषमं पतनभावं सविशेषकाणि पतन...
विंशतिसंख्यानि तत्र तानि
भावपतुर्भिर्विशेषैर्विमिश्रिताणि ...
शेषस्यैकमिति एकोत्तरं शतम् । ...
विशेषणानि यथा । गतं गमनमात्रं
आगमनम् । प्रतिगतं गतेन पुनरा...
क्षेत्र पुनर्गमनञ्च । इति महाभारते । ...
आगमशास्त्रविशेषः । यथा, मुण्डमाला...
"डामरं डमरं डीनं ...
समकोटिमहायन्त्रा मम वक्त्राद्विनि...

डीनडीनकं, क्ली, (डी + भावे क्तः । ... कन् । डीनेन सह डीनकं ... वा पतनम् ।) पक्षिणां ... इति जटाधरः । अस्य विवरणं ... द्रष्टव्यम् ॥

डीनावडीनं, क्ली, (डीनेन सह अव ...) पक्षिगतिविशेषः । तत्तु एकस्यां गतौ ... मिश्रणम् । अधःकुत्सितमनञ्च । ... भारते कर्णपर्व्वटीका ॥

(डुमिति कृत्वा ध्वनी गच्छतीति । गै+
। डुण्डुभसर्पः । इति त्रिकाण्डशेषः ॥
पुं, (डुण्डुः सन् भातीति । डुण्डु इत्यनु-
शब्देन भाति वा । भा+कः ।) सर्प-
ः । ढोंड़ा इति भाषा । तत्पर्य्यायः ।
कः २ इत्यमरः ।१।८।५॥ डुण्डुभः ३ ।
भगः ३ नागाह्नः ४ डुण्डुः ५ । इति
शेषः ॥ (यथा, देवीभागवते ।८।११।२८
र स वने घोरं डुण्डुभं जरदान्वितम् ।
सहस्रसुदन्य पक्षं सं गतुपायकुः ॥")
पुं, (डुलुडुलिति शब्दं लातीति । ला+
) क्षुद्रपेचकः । तत्पर्य्यायः । क्षुद्रोलूकः २
मेचः ३ पिङ्गलः ४ वृक्षाश्रयी ५ हस-
६ विशालाक्षः ७ भयङ्करः ८ । इति
निर्घण्टः ॥
स्त्री, (डुलि+पृषोदरादित्वात् साधुः ।)
। कमठी । इत्यमरटीकायां रायमुकुटः ॥
, स्त्री, (डुलिरिव कायतीति । कै+कः ।
टाप् ।) खञ्जनाकारपक्षिविशेषः । इति
धरः ॥
स्त्री, (डुलिः+ङीष् वा ।) चिल्लीशाकः ।
राजनिर्घण्टः ॥
स्त्री, क्षुपविशेषः । तत्पर्य्यायः । जीवन्ती
शाकश्रेष्ठा ३ सुदलागुका ४ वहुपत्री ५
पत्रा ६ सूक्ष्मपत्रा ७ जीवनी ८ । अस्या
ः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् ।
नत्वम् । कफवातकण्ठामयरक्तपित्तार्त्ति-
नाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥
पुं, स्वनामख्यातक्षुद्रजातिः । यथा,—
शालस्यैव होमस्य ध्यानकस्य तथा इति ।
रस्यैव भक्तीरो भृगुदश्च दयाश्रमी ॥
सुण्डी लिङ्गधारी समा एते यशस्विनि ! ।
र प्रमादतः स्नात्वा गायत्र्यष्टशतं जपेत् ॥"
इति मत्स्यसूक्ततन्त्रे ३८ पटलः ॥
स्त्री, हस्तादिबन्धनसूत्रम् । यथा,—
अनन्त इत्युदीर्य्याथ धृत्वा तत्करपल्लवम् ।
तदाकृष्य तड्डोरं क्षिप्तवान् पावकोपरि ॥"
इति भविष्यपुराणे अनन्तव्रतकथा ॥
, स्त्री, (डोर+स्वार्थे कन् ।) डोरम् । यथा,
दशग्रन्थियुक्तं कुङ्कुमाक्तं सुडोरकम् ।
पच पुरुषस्यैव बध्नीयात् वामदक्षिणे ॥"
इति भविष्यपुराणे अनन्तव्रतकथा ॥
ी, स्त्री, (डोरमिव डयते इति । डी+क्विप् ।)
ली । इति राजनिर्घण्टः ॥

ढ

कारः । स व्यञ्जनचतुर्दशवर्णः । टवर्गचतुर्थ-
श्च । (अर्द्धमात्राकालेनोच्चारणीयः ।) अस्यो-
रणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (पाणि-
यादिषु अस्योच्चारणे जिह्वामध्यभागेन मूर्द्ध-
र्शः आभ्यन्तरप्रयत्नः । संवारनादघोषा महा-
प्राणश्च वाह्यप्रयत्नाः । मातृकान्यासेऽस्य दक्ष-
पादाङ्गुलीमूले न्यासक्रिया । वङ्गीयवर्णमाला-
याम् ।) तस्य लेखनप्रकारो यथा,—
"ऊर्द्धाधःक्रमतो रेखा वामदक्षिणतो गता ।
ततः सा कुण्डलीरूपा विष्णुशक्तिस्वरूपिणी ॥
मध्यशक्तिमयी मात्रा ध्यानमस्य प्रचक्षते ।
रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम् ॥
अष्टादशभुजां भीमां महामोक्षप्रदायिनीम् ।
एवं ध्यात्वा मन्त्ररूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ ● ॥
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"ढकारं परमाराध्यं या स्वयं कुण्डली परा ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ॥
सदा त्रिगुणसंयुक्तं आत्मादितत्त्वसंयुतम् ।
रक्तविद्युल्लताकारं ढकारं प्रणमाम्यहम् ॥"
तस्य २६ षड्विंशतिनामानि यथा,—
"ढो ढक्का निर्गुणः पूर्णो यक्षेशो धनदेश्वरः ।
अर्द्धनारीश्वरस्तोयमीश्वरी त्रिशिखी नवः ॥
दक्षपादाङ्गुलेर्मूलं सिद्धिदण्डो विनायकः ।
प्रहासो त्रिवेदा नद्धिनिर्गुणो निधनो ध्वनिः ॥
विघ्नेशः पालिनी त्वक्चधारिणी क्रोडपुच्छकः ।
एलापुरं त्वगात्मा च विश्वात्मा श्रीमनोरतिः ॥"
इति नानातन्त्रशास्त्रम् ॥
ढः, पुं, (ढौकते उच्चैःशब्देन व्याप्नोति श्रवणे-
न्द्रियमिति । ढौक गत्यावरणयोः+डः ।) ढक्का ।
(यथा, तन्त्रे ।
"ढो ढक्का निर्गुणः पूर्णो यक्षेशो धनदेश्वरः ॥")
श्वा । श्वलाङ्गूलम् । इति मेदिनी । ढे, १ ॥
निर्गुणः । ध्वनिः । इत्येकाक्षरकोषः ॥
ढक्कः, पुं, देशविशेषः । इति भूरिप्रयोगः ॥ ढाका
इति भाषा ॥
ढक्का, स्त्री, (ढक् इति गभीरशब्देन कायतीति ।
कै+कः टाप् च ।) वाद्यविशेषः । ढाक इति
भाषा । तत्पर्य्यायः । यशःपटहः २ । इत्य-
मरः । १ । ७ । ६ ॥ विजयमर्द्दलः ३ । इति
शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् ।२४७।
"ढक्कामाहत्य मदं वितन्वते करिण इव चिरं
पुरुषाः ॥")
ढक्कारी, स्त्री, (ढक्कां जयढक्कावत् गभीरसिंहनादं
ऋच्छति समराङ्गणे इति । ऋ+अच् ङीप्
च ।) तारिणी । यथा,—
"ढक्कारवा च ढक्कारी ढक्कारवरवा ढका ॥"
इति कुलचक्रार्णवे तारासहस्रनामस्तोत्रम् ॥
ढण्टी, स्त्री, वाक्यविशेषः । यथा, रुद्रयामले
अन्नपूर्णासहस्रनाम कथने ।
"ढण्टीवाक्यस्वरूपा च ढकाराक्षररूपिणी ॥"
ढालं, क्ली, (ढौकते आप्नोति शरीरं अनेन ।
ढौक+अच् । पृषोदरात् आत्वे लत्वे च साधुः ।)
फलकम् । ढालिपत्त्रजयकरीति अन्नदाकल्पीय-
सहस्रनामविवरणात् ॥
ढाली [न्] त्रि, (ढालमस्यास्तीति । इनिः ।) ढाल-
विशिष्टः । चर्म्मी । यथा,—
"ढालिपत्त्रजयकरी ढकारवर्णरूपिणी ॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम् ॥
ढामरा, स्त्री, हंसी । इति धनञ्जयः ॥
ढुण्ढ्, अन्वेषणे । इति कविकल्पद्रुमः ॥ (भ्वा-
परं-सकं-सेट् ।) ढाद्यन्त्यो दन्त्यनोपधः । ष-
योगान्मूर्द्धन्यः । तेन यङादौ नलोपे ढुण्ढ्यन
इत्यादि । ढुण्ढति धनं लोकः । इति दुर्गादासः ॥
ढुण्ढिः, पुं, (ढुण्ढ्यतेऽसौ भक्तैरिति । ढुण्ढ अन्वे-
षणे+इन् ।) गणेशः । तन्नामकरणं यथा,—
गणेशं प्रति शिववाक्यम् ।
"अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातुः
सर्व्वार्थढुण्ढिततया भव ढुण्ढिनामा ।
काशीप्रवेशमपि को लभतेऽत्र देही
तोषं विना तव विनायक ! ढुण्ढिराज ! ॥"
तन्माहात्म्यं यथा,—
"ढुण्ढे ! प्रणम्य पुरतस्तव पादपद्मं
यो मां नमस्यति पुमानिह काशिवासी ।
तत्कर्णमूलमधिगम्य पुरादिशामि
तत्किञ्चिदत्र न पुनर्भवतास्ति येन ॥"
"यः प्रत्यहं नमति ढुण्ढिविनायक ! त्वां
काश्यां प्रगे प्रतिहताखिलविघ्नसङ्घः ।
नो तस्य जातु जगतीतलवर्त्ति वस्तु
दुष्प्रापमत्र परत्र च किञ्च नापि ॥"
"प्रथमं ढुण्ढिराजोऽसि मम दक्षिणतो मनाक् ।
आढुण्ढ्य सर्व्वभक्तेभ्यः सर्व्वार्थान् संप्रयच्छसि ॥"
तस्य यात्राविधानं यथा,—
"माघशुक्लचतुर्थ्यान्तु नक्तं व्रतपरायणाः ।
ये त्वां ढुण्ढेऽर्च्चयिष्यन्ति तेऽर्च्याः सुरसुरद्वि-
षाम् ॥
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम् ।
शुक्लां शुक्लतिलैर्व्वहान् प्राश्नीयाल्लड्डुकान् व्रती ॥
काश्यां यात्रा प्रयत्नेन चैत्रसिद्धिमभीप्सुभिः ।
तस्यां चतुर्थ्यां त्वत्प्रीत्यै ढुण्ढे ! सर्व्वोपसर्गहृत् ॥
तां यात्रां नात्र यः कुर्य्यान्निवेद्य तिललड्डु-
कान् ।
उपसर्गसहस्रैस्तु स हन्तव्यो ! ममाज्ञया ॥
होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः ।
तस्यां चतुर्थ्यां मन्त्रज्ञस्तस्य मन्त्रः प्रसेत्स्यति ॥"
इति काशीखण्डे । ५० अध्याये ॥
ढोलः, पुं, (ढः ढक्का तदाकारं लातीति । ला+कः
पृषोदरात् ओत्वे साधुः । ढुल उत्क्षेपे अच् ।
पृषोदरात् साधु र्वा ।) स्वनामख्यातवाद्यम् ।
यथा,—
"ढक्काढोलप्रिया नित्या ढोलवाद्यप्रमोदिनी ।
ढोलरूपा ढोलधरा ढोलशब्दस्वरूपिणी ॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम् ॥
ढौक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा-
आत्मं-सकं-सेट् ।) चतुर्दशस्वरी । ऋ, अडु-
ढौकत् । ङ, ढौकते । इति दुर्गादासः ॥
(आप्नोति । वदनं ढौकते । इति कालिदासः ॥)

ण

ण, णकारः । स व्यञ्जनपञ्चदशवर्णः । टवर्गपञ्चमवर्णश्च ॥ (अर्द्धमात्राकालेनोच्चार्य्यः ।) अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (शिक्षाग्रन्थादिमते तु अस्योच्चारणे जिह्वामध्येन मूर्द्धः स्पर्शः नासिकायाश्च प्रयोग इत्याभ्यन्तरप्रयत्नः । संवारनादघोषाः अल्पप्राणश्च बाह्यप्रयत्नाः । मातृकान्यासेऽस्य दक्षपादाङ्गुल्यग्रे न्यासक्रिया ॥ वङ्गीयवर्णमालायाम् ।) तस्य लेखनप्रकारो यथा,—

"कुण्डलीवगता रेखा मध्यतस्तत ऊर्द्ध्वतः ।
वामादधोगता सैव पुनरूर्द्ध्वं गता प्रिये ! ॥
ब्रह्मेशविष्णुरूपा सा चतुर्व्वर्गफलप्रदा ॥
ध्यानमस्य णकारस्य प्रवक्ष्यामि च तत् शृणु ।
त्रिभुजां वरदां रम्यां महाभीतिप्रदायिनीम् ॥
रक्ताम्बरधरां नित्यां धर्म्मकामार्थमोक्षदाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा,—
"णकारं परमेशानि ! या स्वयं परकुण्डली ।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं देवि ! सदा त्रिगुणसंयुतम् ।
आत्मादितत्त्वसंयुक्तं महामोहप्रदायकम् ॥"
इति कामधेनुतन्त्रम् ॥

तस्य चतुर्विंशतिनामानि यथा,—
"णो निर्गुणं रतिर्ज्ञानं जम्भनः पक्षिवाहनः ।
जया शम्भुर्नरकजित् निष्कला योगिनीप्रियः ॥
द्विमुखं कोटवी श्रोत्रं समृद्धिर्बोधिनी मता ।
त्रिनेत्रो मानुषी व्योमदक्षपादाङ्गुलेर्मुखः ॥
माधवः शङ्खिनी वीरो नारायणश्च निर्णयः ॥"
इति नानातन्त्रशास्त्रम् ॥

णः, पुं, (णमति अज्ञानं ज्ञानेनैव इति । णम प्रणौ + डः । पृषोदरादित्वात् साधुः ।) ज्ञानम् । निश्चयः । एकाक्षरकोषः । विन्दुदेवः । स बुद्धदेवविशेषः । भूषणम् । गुणवर्ज्जितः । तारकेश्वरः । इति मेदिनी । णे, १ ॥

णक्ष, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) णक्षति । प्रणक्षति । इति दुर्गादासः ॥

णख, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) प्रणखति । इति दुर्गादासः ॥

णट, नृत्यविशेषे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सकं च-सेट् ।) प्रणटति । वोपदेवमते णत्वेऽपि नास्य प्रणत्वं नेह पाठः केषाञ्चिदनुरोधात् । अत्र नृत्यं नाट्यवर्णनम् । इति दुर्गादासः ॥

णट, अ नृत्ते । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) अ, प्रणटति । [illegible] नटनम् । अत्र त्रिकाण्डशेष-[illegible] पूर्व्वं [illegible] नर्त्तनमित्यर्थः । [illegible] यतः पूर्व्वम् ।

स्फटिककटकभूमिर्नाटयत्येष शैलः । इति माघः । अस्य तु । नाट्येन केन नटयिष्यति दीर्घमायुरिति मुरारिः । इति दुर्गादासः ॥

णद, अव्यक्तोक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) अव्यक्तोक्तिरव्यक्तशब्दः । नदति घण्टा । इति दुर्गादासः ॥

णद, क भाषि । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) क, नादयति । इति दुर्गादासः ॥

णभ, ऋ ङ हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट् ।) ऋ, अननभत् । ङ, नभते । इति दुर्गादासः ॥

णभ, य श हिंसे । इति कविकल्पद्रुमः ॥ (दिवां-क्र्यां-च-परं-सकं-सेट् ।) य, नभ्यति । श, नभ्नाति । इति दुर्गादासः ॥

णम, औ शब्दे । नतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-नतौ सकं अकं च अनिट् ।) औ, नन्ता । शब्दार्थो न भाषायाम् । नतिरिह नमस्कारो नम्रीभावश्च । नमति गुरुं लोकः । नमन्ति फलिनो वृक्षाः । अमंस्तेऽयस्य ज्वलकणखचेत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः । नमयति नामयति प्रणमयति । अङ्कुशमवनामितं बधिरकर्णजापः कुतः । इत्यादौ अवनमनं अवनामः अव-नम् सतो अवनामं करोतीति णौ रूपम् । इति दुर्गादासः ॥

णय, ङ गतौ । रक्षे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट् ।) ङ, नयते । इति दुर्गादासः ॥

णर्द्द, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) वोपदेवविधावस्य णत्वेऽपि इह पाठः केषाञ्चिदनुरोधात् । प्रणर्द्दति । इति दुर्गादासः ॥

णल, अ बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) अ, नालः नलः । नलति केशं लोकः बध्नाति इत्यर्थः । गन्धे इति केचित् । नलो ऽदर्शनमिति गोविन्दभट्टः । इति दुर्गादासः ॥

णश, ऌ य ऊ नाशे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-वेट्-ऊदित् ।) नाशो दर्शनाभावः । इति रायः । मुक्तायनमिति सर्व्वधरः । ऌ, अनेशत् अनशत् । य, नश्यति धर्म्महिंसारो भवति इत्यर्थः । ऊ, नशिष्यति नङ्क्ष्यति । इति दुर्गादासः ॥

णस, ङ कुटौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-अकं-सकं च-सेट् ।) कुटिरिह कुटिलीभावस्तत्करणञ्च । ङ, नसते नासा कुटिला स्यादित्यर्थः । नसते नासा वायुः कुटिलीकरोतीत्यर्थः । इति दुर्गादासः ॥

णह, य ञ औ बन्धे । इति कविकल्पद्रुमः ॥ (दिवां-उभं-सकं-अनिट् ।) य ञ, नह्यति नह्यते । औ, [illegible] । इति दुर्गादासः ॥

णाथ, ऋ ङ याच्ञादौ । इत्यैश्वर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-अकं च-सेट् ।) वोपदेवविधौ णत्वेऽप्यस्य इह पाठः केषाञ्चिदनुरोधात् । ऋ, [illegible] इह उपतापः । [illegible] ङित्त्वेऽपि [illegible] आत्माशिषोरन्यत्र परस्मैपदम् । [illegible] वसो उपतापयति इत्यर्थः । [illegible] आशंसते इत्यर्थः । [illegible] अर्थः । नाथति भूपं भूमिं [illegible] अर्थः । मार्गैरेय वर [illegible] किन्तु न भूभृतः पतिर्मित्रं भवति । [illegible] सम्यगैश्वर्य्यविशेषः । आशिषि [illegible] परस्मैपदं विभाषेति केचित् ।

णाध, ऋ ङ नाथे । इति कविकल्पद्रुमः ॥ ([illegible] आत्मं-सकं-सेट् ।) [illegible] ऽपि इह पाठः [illegible] नाधत् । ङ, नाधते नाथो [illegible] नाति । इति दुर्गादासः ॥

णास, ऋ ङ ध्वाने । शब्द इति [illegible] कल्पद्रुमः ॥ (भ्वा-आत्मं-अकं-सेट् ।) ऋ, अननासत् । ङ, नासते । [illegible]

णिक्ष, चुम्बने । इति कविकल्पद्रुमः ॥ ([illegible] सकं-सेट् ।) निक्षति । इति दुर्गादासः ॥

णिज, इर ङ शुद्धौ । [illegible] आत्मं-सकं-सेट्-इरित् ।) ङ, कर्म्मणि निङ्क्ते । अङ्, ईदित्वात् [illegible] यान्तो विकल्पो [illegible] इति दुर्गादासः ॥

णिज, लि इर् ञ औ पोषे । [illegible] कल्पद्रुमः ॥ (ह्वां-उभं-सकं-अनिट् ।) नेनेक्ति नेनिक्ते । इर, [illegible] नेक्ता । इति दुर्गादासः ॥

णिद, इ कुत्सने । इति कविकल्पद्रुमः ॥ ([illegible] सकं-सेट् इदित् ।) चलं निन्द्यम् । केचित्तु अतिविकल्पमिच्छन्ति [illegible] इसमासे उपसर्गात् समाहितादि [illegible] यथा, प्रणिन्दकः प्रनिन्दकः । [illegible] तु आरादपि विकल्पो इष्यते । [illegible] निन्द्यते । निन्दति दुष्टं लोकः । इति दुर्गादासः ॥

णिद, ऋ ञ सन्निधौ । कुत्से । [illegible] द्रुमः ॥ (भ्वा-उभं-सकं [illegible] सेट्-ऋदित् ।) सन्निधिः सन्निकर्षः । ञ, नेदति नेदते दयालुं दीनः । [illegible] दुर्गादासः ॥

णिल, श गहने । इति कविकल्प[illegible] परं-सकं-सेट् ।) श, निलति । [illegible] निलति शास्त्रं सुधीः दुर्बोधम् । इति दुर्गादासः ॥

णिव, इ सेके । इति कविकल्प[illegible] सकं-सेट् । इदित् ।) इ, निन्वति । [illegible] दुर्गादासः ॥

रीखे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-
।) शीखे समाधौ । नेशति योगी । निनि-
। इति दुर्गादासः ॥
सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
-सेट् । उदित्वात् क्वापेट् ।) उ, नेमित्वा
। इति दुर्गादासः ॥
ङ ल चुम्बने । इति कविकल्पद्रुमः ॥
(भ्वां-आत्म-सकं-सेट् ।) ल ङ, निंस्ते । ङ,
सते । इति दुर्गादासः ॥
प्रापणे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-
-अनिट् ।) वोपदेशपाठो नादित्वेन
म इति ख्यातः । प्रणयति । एवं सर्व्वत्र ।
अमिह चान्तस्य रूपम् । तथा च । तृणाति
यति च वेद्यत्यपि नयत्यम् । इति क्रिया-
रटः ॥ प, नयति नयते गां वनं गोपः प्रापय-
अर्थः । इति दुर्गादासः ॥
वर्णे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-
च-सेट् ।) वर्णं इह कृष्णवर्णीभावकृत्-
स्य । नीलति वस्त्रं तमालस्य । नीलति
तन्तुवायः । इति दुर्गादासः ॥
जीवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
-सेट् ।) नीवति लोकः स्थूलः स्यादित्यर्थः ।
इति दुर्गादासः ॥
स्तुतौ । इति कविकल्पद्रुमः ॥ (अदां-परं-
-सेट् ।) ल, नौति । इति दुर्गादासः ॥
च श क्षौ प्रेरणे । इति कविकल्पद्रुमः ॥
(तुदां-उभं-सकं-अनिट् ।) च श, नुदति नुदते
पोषः । क्षौ, नोत्ता । इति दुर्गादासः ॥
स्तवने । इति कविकल्पद्रुमः ॥ (तुदां-परं-
-सेट् ।) इत्याक्षोरर्थमिति वररुचिः । शि,
ति । अनुवीत् । इति दुर्गादासः ॥
र च सन्निधौ । कुतृषणे । इति कविकल्पद्रुमः ॥
(भ्वां-उभं-अकं-सकं च-सेट् ।) सन्निधिः सन्नि-
। ऋ, अनिनेदत् । च, नेदति नेदते
पार्श्वे दीनः । निनेदुः । इति दुर्गादासः ॥
मर ङ प्रवे । इति कविकल्पद्रुमः ॥ (भ्वां-
आत्म-सकं-सेट् ।) ऋ, अनिनेपत् । ङ, नेपते
। प्रवो गतिः । इति दुर्गादासः ॥ * ॥
धातवः कभावतो ढत्वपवादयो वोपदेशेन
न्यायाद्याः ॥

त

तकारः । स व्यञ्जनवर्णः । तवर्गप्रथम
। (अस्योच्चारणस्थानं दन्ताः ।) अस्यो-
च्चारणे यत्नः । इति व्याकरणम् ॥ (अस्यो-
च्चारणे स्पष्टत्वेन जिह्वाग्रस्य स्पर्शः आभ्य-
न्तरयत्नः । विवारश्वासाघोषाः बाह्ययत्नाः ।
...[illegible]
...[illegible] तस्य लेखनप्रकारो
यथा,—

"आदौ विन्दुगता मध्ये कुण्डलीत्वमवाप्य या ।
दक्षाङ्गमगता नित्या ब्रह्मविष्णुशिवात्मिका ॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! ।
चतुर्भुजां महाभीमां महामोक्षप्रदायिनीम् ॥
सदा षोड़शवर्षीयां रक्ताम्बरधरां पराम् ।
नानालङ्कारभूषां वा सर्व्वसिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"तकारं चञ्चलापाङ्गि ! स्वयं परमकुण्डली ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ॥
त्रिशक्तिसहितं वर्णं आत्मादितत्त्वसंयुतम् ।
त्रिविन्दुसहितं वर्णं पीतविद्युत्समप्रभम् ॥"
तस्य ३२ द्वात्रिंशन्नामानि यथा,—
"तः पूतना हरिः शुद्धिः शक्ती शक्तिर्जटी ध्वजा ।
वामस्फिक्‌वामकटौ च कामिनी मध्यकर्णकः ॥
आषाढ़ी तरुतुरञ्च कामिका पृष्ठपुच्छकः ।
रत्नकश्च ग्रामसखी वाराही मकरोऽभया ॥
सुगतोऽर्द्धसुखा शुद्धजातुश्च क्रोड़पुच्छकः ।
शम्भी विश्वामरश्चन्द्रश्चातुराया च सौरकः ॥
जयन्तिपुलको भ्रान्तिरनङ्गमदनातुरा ॥"
इति नानातन्त्रशास्त्रम् ॥
तं, क्ली स्त्री, (तु + भावे डः ।) तरणम् । (तरति
भवसागरमनेनेति । तॄ + करणे डः ।) पुण्यम् ।
इति मेदिनी । ते, १ ॥
तः, पुं, (तर्हति समति वा छिनत्ति भयादिकर-
येन जनानिति । तर्द्द तन या + डः ।) चौरः ।
अमृतम् । पुच्छम् । क्रोड़ः । म्लेच्छः । इति
मेदिनी । ते, १ ॥ गर्भः । शटः । इति शब्दरत्ना-
वली ॥ रत्नम् । सुगतः । योधः । गौरविवर्णित-
पुच्छम् । क्रोड़पुच्छम् । इत्येकाक्षरकोषः ॥
तक, हसने । हासे । इति कविकल्पद्रुमः ॥ (भ्वां-
परं-सकं-हासे अकं-सेट्) तकति । इति दुर्गा-
दासः ॥
तक, ङ सीव्ये । इति कविकल्पद्रुमः (भ्वां-परं-
अकं-सेट् ।) सौख्यं दुःखेन जीवनम् । ङ,
तङ्कते दरिद्रेण दुःखेन जीवति इत्यर्थः ।
तङ्कति दीनः दुःखेन जीवति इत्यर्थः । इति
दुर्गादासः ॥
तकिलः, त्रि, (तक् + "मिथिलादयश्च ।" उणां ।
१ । ५६ । इति इलच् गलोपश्च ।) धूर्त्तः ।
इत्युणादिकोषः ॥
तकिला, स्त्री, (तकिल + टाप् ।) औषधम् ।
इत्युणादिकोषः ॥
तक्मा, त्रि, (तक्म शाप्ततर्ंणीति । तक + मन् ।)
[illegible] । (तक हसने + "अविसिवि सर्वि
[illegible]" १ । ८ । १४ । [illegible]
[illegible] ।) [illegible] ॥
तक्रं, क्ली, (तनक्ति सङ्कोचयति दुग्धं तासाम्
[illegible] ।"[illegible]"
उणां । २ । १३ । इति रक् [illegible]
[illegible] ।) [illegible] ॥

तत्पर्य्यायः । गोरसजम् २ घोलम् ३ काल-
शेयम् ४ विलोड़ितम् ५ दण्डाहतम् ६ अरि-
ष्टम् ७ अम्लम् ८ उदश्वित् ९ मथितम् १०
द्रवः ११ । इति राजनिर्घण्टः ॥ तत्
त्रिधम् । तेषां भिन्नानि नामानि लक्षणानि
यथा,—
"सशरं निर्जलं घोलं मथितं त्वसरोदकम् ।
तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिकम् ॥
छच्छिका सरहीनं स्यादच्छा प्रचुरवारिका ॥"
तेषां गुणाः ।
"वातपित्तहरं घोलं मथितं कफपित्तनुत् ।
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु ॥
वीर्य्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम् ।
ग्रहण्यादिमतां पथ्यं भवेत् संग्राहि लाघवात् ॥
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपणम् ।
कषायोष्णविकाशित्वाद्रौक्ष्याच्चापि कफापहम् ॥
न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः ॥
उदश्वित् कफकृद्बल्यं श्रमघ्नं परमं मतम् ।
छच्छिका शीतला लघ्वी पित्तश्रमतृषापहा ॥
वातनुत् कफकृत् सा तु दीपनी लवणान्विता ॥"
अथोद्धृतस्नेहार्द्धोद्धृतस्नेहानुद्धृतस्नेहानां तक्राणां
गुणाः ।
"समुद्धृतं घृतं तक्रं पथ्यं लघु विशेषतः ।
स्तोकोद्धृतघृतं तस्माद्गुरु वृष्यं कफापहम् ॥
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम् ॥" * ॥
अथ दोषविशेषे व्याधिविशेषे च तक्र-
विशेषाः ।
"वातेऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम् ।
पित्ते स्वादुसितायुक्तं श्लेष्मण्युष्णं कटु ॥
हिङ्गुजीरयुतं घोलं सैन्धवेन सुसंयुतम् ।
भवेदतीव वातघ्नमर्शोऽतीसारहृत् परम् ॥
रुचिदं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ।
मूत्रकृच्छ्रे तु सगुड़ं पाण्डुरोगे सचित्रकम् ॥" * ॥
अथामतक्रगुणाः ।
"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ।
पीनसश्वासकासादौ पक्वमेव प्रयुज्यते ॥" * ॥
अथ तक्रसेवननिषेधाः ।
"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ॥"
[illegible]
"[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥" * ॥
[illegible] ।
"[illegible] ॥"
इति भावप्रकाशः ॥

("गुल्मिदोषशमनं तक्रं श्रेष्ठन्तदुच्यते ।
शोथ दर्शिग्रहणीघ्नमर्शोदरविकारजित् ।"
इति मथिततक्रगुणाः ।
"छिद्यं कफहृत् किञ्चिद्दृष्णं शोफकरं गुणाम् ।
मेहार्शोग्रहणीगुल्मपाण्ड्वामयविनाशनम् ।"
इति माहिषतक्रगुणाः ।
"छागलं लघु संस्निग्धं त्रिदोषशमनं परम् ।
गुल्माशग्रिहण्योशूलं पाण्ड्वामयविनाशनम् ।"
इति छागीतक्रगुणाः ।
"तथाच त्रिविधं तक्रं कथ्यते शृणु पुत्रक ! ।
यथायोगेन तत् सम्यक् शस्यते येषु रोगिषु ।
समुद्धृतघृतं तक्रमर्द्धोद्धृतघृतञ्च तत् ।
अनुद्धृतघृतञ्चान्यदित्येतत्त्रिविधं मतम् ।
सर्व्वं लघु च पथ्यञ्च त्रिदोषशमनं परम् ।
ततः परं हृष्यतमं क्रमेण समुदीरितम् ।
समुद्धृतघृतन्तक्रं लघु पथ्यतमं मतम् ।
गरोदरार्शोग्रहणीपाण्डुरोगज्वरातुरे ।
प्लीहोग्मन्यहे वापि शोषात्यामदमेहिषु ।
हितं संग्रहणं बल्यं पित्तरक्तविरोधकृत् ।
अर्द्धोद्धृतघृतं तस्माद्‌वृष्यं गुरु कफप्रदम् ।
मधुरं पित्तरक्तघ्नं श्रमघ्नं परमं मतम् ।
अनुद्धृतघृतं सान्द्रं गुरु विद्यात् कफावहम् ।
बलप्रदञ्च क्षीणानामामशोषातिसारहृत् ।"
इति त्रिविधतक्रगुणाः ।*।
"तक्रं ग्राहि कषायाम्लं वीर्योष्णं दीपनं लघु ।
श्रमापहरणं स्निग्धं ग्रहण्यर्शोऽतिसारहृत् ।
इति तक्रगुणाः प्रोक्ता न दद्याद् यत्र तच्छृणु ।
वाते शोषे च क्षीणानां ग्रीष्मकाले शरत्सु च ।
संमूर्च्छाभ्रमदाहार्त्तौ तथाच रक्तपित्तके ।
न शस्तं तक्रपानञ्च करोति विविधान् गदान् ।"
एतेषां तक्रं निषिद्धम् ।
इति हारीते प्रथमस्थानेऽष्टमेऽध्याये ।*।)

तक्रकूर्च्चिका, स्त्री, (तक्रजाता कूर्च्चिका ।) तक्रयोगेन उष्णदुग्धात् जाता । छाना इति भाषा । अस्या गुणाः । मलबद्धवातकारित्वम् । रूक्षत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ (यथा सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"ग्राहिणी वातला रूक्षा दुर्ज्जरा तक्रकूर्च्चिका ।")

तक्रमांसं, क्ली, (तक्रयोगेन पाचितं मांसम् ।) व्यञ्जनविशेषः । राजुनि इति पारस्य भाषा । तस्य पाकप्रकारो यथा,—
"पाकपात्रे घृतं दत्त्वा हरिद्राहिङ्गु भर्ज्जयेत् ।
छागादेः सकलस्थापि खण्डान्यष्टौ च भर्ज्जयेत् ।
सिद्धियोग्यं जलं दत्त्वा पचेन्मृदुतरं यथा ।
राजिकादियुते तक्रे मांसखण्डानि पातयेत् ।"
तस्य गुणाः ।
"तक्रमांसन्तु मांसं लघु रुच्यं बलप्रदम् ।
कफघ्नं पित्तदं किञ्चित् सर्व्वाहारस्य पाचनम् ।"
इति भावप्रकाशः ।

तक्राटः, पुं, (तक्राय तक्रोत्पादनाय अटतीति । अट् + अच् ।) मन्थानदण्डः । इति हारावली । ३१ ।

तच, त्वचो संवृतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) त्वचो मालब्यामेन संवरणम् । तच तञ्चने इति प्राञ्चः । तञ्चनं संवरणमिति रमानाथः । तचति कायं वर्म्मणा भटः । इति दुर्गादासः ॥

तच, क कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) क्षं, तचिष्यति तक्ष्यति । कार्श्यं क्षशकरणम् । तचति काष्ठं तचा । इति दुर्गादासः ॥

तच, ङ न तचे । इति कविकल्पद्रुमः ॥ (स्वा-परं-सकं-सेट् ।) तचः क्षशकरणम् । ङ, तचिष्यति तक्ष्यति । न, तक्ष्णोति काष्ठं तचा । इति दुर्गादासः ॥

तचकः, पुं, (तचतीति । तच + ण्वुल् ।) पातालस्थाष्टनागान्तर्गतनागविशेषः । स कश्यपात् कद्रुगर्भे जातः हृदाससुतः । अस्य वासः खाण्डववने आसीत् । अयं परीक्षितं दष्टवान् । इति श्रीभागवतम् ॥ (अयं हि च्छपणकरूपधारी उत्तङ्कस्य गुर्व्वर्थं कुण्डले अपहृत्य नागलोकं गतवान् । यथा, महाभारते । १ । ३ । १२७ ।
"तस्य तक्षको दृष्टमासन्नः स तं जग्राह । गृहीतमात्रः स तद्रूपं विहाय तक्षकस्वरूपं कृत्वा सहसा धरण्यां विवृतं महाविलं प्रविवेश ॥
तच तनूकरणे + "कुन् शिल्पिसंज्ञयोः ।" उणां । २ । ३२ । इति कुन् ।) त्वष्टा । इत्यमरः । ३ । २ । ४ ॥ विश्वकर्म्मा । इति शब्दरत्नावली ॥ द्रुमभेदः । इति हेमचन्द्रः ॥ सूत्रधारः । इत्यमरटीकायां सारसुन्दरी ॥ (स्वनामख्यातः प्रसेनजित्-पुत्रः । यथा, भागवते । ६ । १२ । ८ ।
"ततः प्रसेनजित् तस्मात् तक्षको भविता पुनः ।"
छेदके, त्रि । यथा, रामायणे । २ । ८० । १२ ।
"तथा वर्द्धकयश्चैव मार्गिणो वृक्षतक्षकाः ।")

तक्षणं, क्ली, (तक्ष तनूकरणे + भावे ल्युट् ।) क्षशकरणम् । (यथा, मनुः । ५ । ११५ ।
"द्रवाणाञ्चैव सर्व्वेषां शुद्धिराप्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम् ।")

तक्षणी, स्त्री, (तक्ष्यतेऽनेनेति । तक्ष + करणे ल्युट् । टित्त्वात् ङीप् ।) वासी अस्त्रम् । इति शब्दरत्नावली ॥

तक्षशिला, स्त्री, देशविशेषः । इति सिद्धान्तकौमुदी । (यथा, महाभारते । १ । ३ । २२ ।
"तेनैवमुक्ता भ्रातरस्तस्य तथा चक्रुः स तथा भ्रातॄन् सन्दिश्य तक्षशिलां प्रत्यभिप्रतस्थे ।")

तक्षा, [न्] पुं, (तक्षति तनूकरोतीति । तक्ष + "कनिन् युवृषितक्षिराजीति ।" उणां १ । १५६ । इति कनिन् ।) त्वष्टा । इत्यमरः । २ । १० । ९ ॥ (यथा, माघे । १२ । २५ ।
"अक्षाग्रसक्ष्मौ विगताक्षपाटवे
दशा निकामं विकलीकृते रथे ।
आमेव तक्ष्णा भिषजेव तत्क्षणं
प्रचक्रमे लङ्घनपूर्व्वकः क्रमः ।")

तग, इ स्खलने । कम्पे । गतौ । ...
...दमः ॥ (भ्वा-परं-सकं-...)
...र, कर्म्मणि तङ्ग्यते । इति दुर्गादासः ।

तगरं, मदीरुहः । [illegible] इति प्रसिद्धः । तगरपुष्प इति ...
पर्य्यायः । कालानुसार्य्य २ ...
लम् ४ शठम् ५ महोरगम् ६ ...
८ दीपनम् ९ तगरपादिकम् १० ...
माला ॥ विनम्रम् ११ ...
नहुषाख्यम् १४ दण्डहस्ती १५ ...
पिण्डीतगरकम् १७ पार्थिवम् १८ ...
णम् १९ कालानुसारकम् २० ...
दीनम् २२ । अस्य गुणाः । ...
णम् । ...
पथ्यलघु ॥ ... ।
गन्धद्रव्यविशेषः । तस्य पर्य्याय... ।
"कालानुसार्य्यं तगरं कुटिलं ... ।
अपरं पिण्डतगरं दण्डहस्ती च ... ।
तगरद्वयमुष्णं स्यात् स्वादु ...
विषापस्मारमूर्द्धाक्षिरोगदोषघ्न ...
... ।"

तगरः, पुं, (तं क्रोड़मार्गं ...
पुष्पवृक्षविशेषः । टगर इति भाषा ।
पर्य्यायः । चित्रपुष्पः २ । वर्व्वर-
च्छदः ३ । इति शब्दरत्नावली ॥ (
भारते । १३ । १०४ । ८७ ।
"प्रियङ्गुचन्दनाभ्याञ्च ...
पृथगेवानुलिम्पेत केशरेण च ... ।"
मदनद्रुमः । इति राजनिर्घण्टः ॥

तगरपादिकं, क्ली, (तगरस्य ...
विद्यतेऽत्र इति ठन् ।) तगरम् । ...
माला ॥

तङ्कः, पुं स्त्री, (टङ्क + पृषोदरात् साधुः ।)
दारणः । इत्यमरटीकायां रमानाथः ।
तङ्कृ जीवने + भावे घञ् ।) ...
स्तापः । भयम् । इति ...
भरतः ॥

तञ्ची, स्त्री, (तं पुच्छाकारं ...
चु + क्विप् ङीप् ।) ढिङ्गुपत्री । ...
निर्घण्टः ॥

तट, उच्छ्राये । इति कविकल्पद्रुमः ॥ (
अकं-सेट् ।) उच्छ्राय उर्द्धता ।
पुलिनम् । इति दुर्गादासः ॥

तट, क आघाते । इति कविकल्पद्रुमः ॥ (
परं-सकं-सेट् ।) क, ताडयति । ...
दासः ॥

तटं, क्ली, (तटति उच्छ्रितं भवतीति ...
+ पचाद्यच् ।) क्षेत्रम् । इति मेदिनी ।
(प्रदेशः । यथा, महाभारते । ३ । ...
"गोकर्णे पुष्करारण्ये तथा ...

तटः, त्रि, (तटति उच्छ्रितो भवतीति ...
अच् ।) तीरम् । इत्यमरः । १ । १० ...

।६७।५५।
टायुभौ॥"
तथात्वम्।
।३६।
ये नमः॥")
ु स्वरूपं यथा,
तथाच।
र्यां स्यात्
त्वगाभ्याम्।
प्रविष्टात्
ः सं विशच॥"
वेदान्तकारिका॥
+क।) तटस्थिते,
, नैषधे।३।५५।
वत्सलत्वं
त्या।
मध्या
तोऽपि॥"
ल:।
तीरस्थनिकटस्थयोः॥")
ति गच्छतीति। चक+
२।१। इत्यण्।) तड़ागः।
इति शब्दरत्नावली। (यथा,

परिपूरयितुं कियानयं यत्नः।
खनितः किं तटाकोऽपि॥")
स्यस्या इति। तट+"अत
। २। ११५। इति इनि-
नदी। इत्यमरः।१।१०।३०॥
ाग्रमप्रायाम्।६८२।
न! तरङ्गैर्मिवक्रेषु नाश्रये
निहितः।
तलद्दितलयान्तरिचे तरस्यक्तः॥")
तटति उच्छ्रिता भवतीति। तट+
य।) तीरम्। इत्यमरः।१।१०।७॥
ाहित्यदर्पणे।३।८६।
श्च प्रशानश्च नद्यादीनां तटी तथा॥")
आहतौ। इति कविकल्पद्रुमः॥ (भ्वा-
सकं-सेट्।) ड, तड्यते। इ, तण्डते।
दुर्गादासः॥
लिपि। आहतौ। इति कविकल्पद्रुमः॥
रा-परं-चकं-सकं च-चेट्।) क, ताड-
। लिपि दीर्घौ। इति दुर्गादासः॥
ः, पुं, (तड्यते आहन्यते ऊर्म्मिभिरिति।
ड्+घञ्।पृषोदरादित्वात् आलोपे साधुः।)
तड़ागः। इति द्विरूपकोषः॥
कः, पुं, (तड्यते आहन्यते ऊर्म्मिमालाभि-
रिति। तड़ि आहतौ+"पिनाकादयश्च।"
उणां ४।१५। इति आकप्रत्ययेन निपातनात्
। इति शब्दरत्नावली॥
।) नदी-

आकः।) आघातः। इति संक्षिप्तसारे उणादि-
वृत्तिः॥ (प्रभा। इत्युज्ज्वलदत्तः।४।१५॥)
तड़ागः, पुं क्ली, (तड+तड़ागादयश्च। इति
आगप्रत्ययेन निपातनात् साधुः।) यन्त्रकूटकः।
इति मेदिनी। गे, ३६॥ (तड्यते आहन्यते
ऊर्म्मिमालाभिरिति। तड़ि आहतौ+कर्म्मणि
आकः।) पद्मादियुक्तं सरः। तत्पर्य्यायः।
पद्माकरः २। इत्यमरः।१।१०।२८॥
तड़ाकः ३ तटाकः ४। इति शब्दरत्नावली॥
तड़गः ५। इति द्विरूपकोषः॥ शतधनुःप्रमाणजलाशयः। चतुर्दिक्षु पञ्चशत-
धनुःपरिमाणजलाशयः। चतुर्दिक्षु पञ्चपञ्चा-
रिंशद्धस्तान्यूनतायां सहस्रद्वितयहस्तान्यूनत्वेन
तड़ागः। इति नव्यवर्द्धमानधृतो वशिष्ठः॥ * ॥
तस्य जलगुणाः। वायुकारित्वत्। स्वादुत्वम्।
कषायत्वम्। पाके कटुत्वम्। शिशिरर्त्तौ हेमन्तकाले
प्रशस्तत्वञ्च। इति राजवल्लभः॥ * ॥ तस्योत्-
सर्गविधिर्यथा,—

पुलस्त्य उवाच।

"शृणु राजन्महाबाहो! तड़ागादिषु यो विधिः।
पुराणेष्वितिहासेषु मन्यते राजसत्तम!॥
प्राप्य पक्षं शुभं शुक्लमागते चोत्तरायणे।
पुण्येऽह्नि विप्रैः क्रियते कृत्वा ब्राह्मणवाचनम्॥
प्राक्प्रस्रवणाद्देशस्तड़ागस्य समीपतः॥
चतुर्हस्तसमा वेदी चतुरस्रा समन्ततः।
तथा षोड़शहस्तः स्यान्मण्डपश्च चतुर्मुखः॥
वेद्या उत्तरतो गर्त्तारत्निमात्रा तु मेखला।
नवसप्ताथवा पञ्च योनिवक्त्रा नृपात्मज!॥
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुल-
विस्तृता।

सर्व्वे स्युर्हस्तमात्राः स्युस्त्रिपर्व्वोच्छ्रितमेखलाः॥
सर्व्वे च सर्व्ववर्णाः स्युः पताकाध्वजसंयुताः।
अश्वत्थोडुम्बरप्लक्षवटशाखाकृतानि च॥
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत्॥
शुभास्तत्राष्ट होतारो द्वारपालाश्च चापरे।
अष्टौ तु जापकाः कार्य्या ब्राह्मणा वेदपारगाः॥
सर्व्वलक्षणसम्पूर्णा मन्त्रविद्विजितेन्द्रियाः।
कुलशीलसमायुक्ताः स्थापिता द्विजसत्तमाः॥
प्रतिगर्त्तेषु कलशा यज्ञोपस्करणानि च।
व्यजनञ्चासनं शुभ्रं ताम्रपात्रं सुविस्तरम्॥
आचार्य्यः प्रक्षिपेद्भूम्यामनुमन्त्र्य विचक्षणः।
त्र्यरत्निमात्रो यूपः स्यात् क्षीरिवृक्षविनिर्म्मितः॥
यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता॥
यजमानः पञ्चविंशतिर्व्वलयः॥
हेमालङ्कारिणः कार्य्याः पञ्चविंशतिर्त्विजः।
कुण्डलानि च हैमानि केयूरकटकानि च।
तथाङ्गुलीयपवित्राणि वासांसि विविधानि च॥
दद्युः समानि सर्व्वेषामाचार्य्ये द्विगुणं पुनः।
दद्याच्छयनसंयुक्तमात्मनश्चापि यत् कृतम्॥
सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ।
तथा कुलीरमण्डूका वायसः शिशुमारकः॥
एवमासाद्य तत् सर्व्वं स्वर्णपात्रे निधाय वै।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः॥
सर्व्वौषधिकस्नातः प्राशितो वेदपुङ्गवैः।

यजमानः सपत्नीकः पुत्त्रपौत्त्रसमन्वितः॥
पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम्।
ततो मङ्गलशब्देन भेरीणां निस्वनेन च॥
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन चार्व्वितम्।
षोड़शारं ततश्चक्रं पद्मगर्भसुशोभनम्॥
वेद्यामुपरि तत् कृत्वा ग्रहान् ग्रहपतींस्तथा।
संन्यसेन्मध्यतः सर्व्वान् प्रतिदिक्षु विचक्षणः॥
तत् पात्रं स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितम्।
ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः॥
विनायकञ्च विन्यस्य कमलामम्बिकां ततः।
शान्त्यर्थं सर्व्वलोकानां भूतग्राममशेषतः।
पुष्पभक्ष्यफलैर्युक्तमेवं कृत्वाधिवासनम्।
कुम्भांश्च रत्नगर्भांश्च वासोभिः परिवेष्टयेत्॥
गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्ततः।
पठध्वमिति तान् ब्रूयादाचार्य्यमपि पूजयेत्॥
बह्वृचौ पूर्व्वतः स्थाप्यौ दक्षिणे च यजुर्व्विदौ।
पश्चिमे सामगौ स्थाप्यावुत्तरेणाथर्व्वणौ॥
उदङ्मुखो दक्षिणतो यजमान उपाविशेत्।
पठध्वमिति तान् ब्रूयात् यजध्वमिति याजकम्॥
उत्कृष्टमन्त्रपाठेन तिष्ठध्वं मन्त्रजापकाः।
एवमादिश्य तान् सर्व्वान् पर्य्युक्ष्याग्निं स
मन्त्रवित्॥

जुहुयादाहुतीर्म्मन्त्रैराज्यञ्च समिधस्तथा।
ऋत्विग्भिश्चैव होतव्यं वारुणैरेव सर्व्वतः॥
वैराजं पौरुषं सूक्तं सौक्तं चान्द्रं सुसंहितम्।
शैशवं पञ्चनिधनं गायन्ति ज्येष्ठसामगाः॥
वामदेव्यं बृहत्साम रौरवं सरथन्तरम्।
गवां व्रतं विकर्णञ्च रक्षोघ्नं गरयस्तथा॥
गायन्ति सामगा राजन्! पश्चिमद्वारमाश्रिताः।
आथर्व्वणाश्चोत्तरतः शान्तिकं पौष्टिकं तथा॥
जपन्ति मनसा देवमाश्रिता वरुणं प्रभुम्।
पूर्व्वेद्युरभितो मन्त्रैरेवं कृत्वाधिवासनम्॥
गजाश्वरथ्यावल्मीकसंगमादथ गोकुलात्।
मृदमादाय दद्याच्च प्रक्षिपेच्च यथा तथा॥
रोचनाञ्च ससिद्धार्थान् गन्धान् गुग्गुलमेव
स्नपनं तस्य कर्त्तव्यं पञ्चगव्यसमन्वितम्॥
शुद्धिं कर्म्मणि मन्त्रैरेवं कृत्वा विधानतः
एवं रचति राज्यार्थान् विधियुक्तेन कर्म्मणा
ततः प्रभाते विमले संजाते तु गवां शत
ब्राह्मणेभ्यः प्रदातव्यं होमान्ते वाचया पु
पञ्चाशद्वाथ षट्त्रिंशत् पञ्चविंशतिरेव
ततः संवत्सरे प्राप्ते शुद्धे लग्ने सुशोभने
वेदशब्दैश्च गान्धर्व्ववाद्यैश्च विविधैः पु
कनकालङ्कृतां कृत्वा जले गामवतारये
सामगाय च सा देया ब्राह्मणाय विश
पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्वि
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव
धृतां चतुर्भिर्व्विप्रैश्च वे[illegible]
महानदीजलोपेतान्
उत्तराभिमुखो मुक्तो
आदर्शेन तु स्नात्वा
आपो हि ष्ठेति[illegible]

पूर्व्वदिने सुराश्चैव बलिं दद्यात् समन्वितः ।
[illegible]
[illegible]
[illegible]

[illegible]

इति मात्स्ये श्राद्धकल्पम् ।

[illegible]

इति कुमारसम्भवटीका ।

[illegible]

[illegible]

तण्डुलीय, पुं, कीटमात्रम् । (तण्डुले भवः । तण्डुल+ढः । अस्य रः ।) तण्डुलोदकम् । तर्य्यरे, त्रि । इति मेदिनी । ये, ५५ ॥

तण्डुलः, पुं, (तण्ड्यते आहन्यते इति । तड आघाते +"धापृवस्यज्यतिभ्यो नः ।" उणा० ३ । १०७ । इति उलच् । यद्वा, "कृमृशुदिनीवहिभ्य उलच् तडश्च ।" उणा० ।१।८। इतिउलच् तकारादेशश्च ।) विडङ्गम् । इति मेदिनी । ले, ८६ ॥

("पुंसि क्लीबे विडङ्गः स्यात् क्रिमिघ्नो जन्तुनाशनः ।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तण्डुलीयशाकम् । इति शब्दरत्नावली ॥ धान्यादिनिकरः । इति मेदिनी । ले, ८६ । चाउल इति भाषा । (यथा, पञ्चतन्त्रे । ३।५५।
"सङ्गतिः श्रेयसी पुंसां स्वपक्षे च विशेषतः ।
तुषैरपि परिभ्रष्टा न प्ररोहन्ति तण्डुलाः ॥
शुद्धस्य माद्रस्यो हंसयस्तण्डुलो यवः ।
सम्यानश्लेष्मदः पुरायस्तण्डुलः स्मृतः ॥
द्रव्यसंयोगसंस्कारविकारान् समपेक्ष्य तु ।
यदाकारक्रमात्सद्भ मोक्तव्या द्वन्द्वतोऽपि वा ॥
अनेकद्रव्ययोनित्वात् स्थाने तस्मात् विनिर्द्दिशेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

अस्य तण्डुलगुणाः । सुमधिकम् । कफनाशित्वम् । रुच्यत्वम् । पित्तकारित्वञ्च । इति राजवल्लभः ॥

तण्डुलपरीक्षा, स्त्री, (तण्डुलेन परीक्षा ।) चौर्य्यादिज्ञानार्थं दिव्यविशेषः । चाउलपड़ा इति भाषा । तद्विधानं यथाह पितामहः ।
"चौर्य्ये तु तण्डुला देया नान्यस्येति विनिश्चयः ।
तण्डुलान् कारयेच्छुक्लान् शालेर्नान्यस्य कस्यचित् ॥
मृण्मये भाजने सम्यगादित्यस्याग्रतः शुचिः ।
स्नानोदकेन संसिक्तान् रात्रौ तत्रैव वासयेत् ॥
प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् ।
तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्त्रिधा ॥
भूर्जस्यैव तु नान्यस्य अभावे पिप्पलस्य तु ।
शोणितं दृश्यते यस्य हनू तालु च शीर्य्यते ॥
गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्द्दिशेत् ॥"
स्नानोदकेन देवतास्नानोदकेन । तथा च कात्यायनः ।
"देवतास्नानपानीयसिक्ततण्डुलभक्षणे ।
शुद्धिर्निष्ठीवनात् शुद्धो नियन्धोऽशुचिरन्यथा ॥"
शिरोरोपितपत्रकं तण्डुलान् भक्षयित्वा निष्ठीवयेत् मार्कण्डेयः इति । निष्ठीवयेदिति वचनात् सिद्धम् । तुलाविधिवदिदं सर्व्वदिव्यसाधारणम् यजनादिकं पूर्व्वदिने प्रागेव कर्त्तव्यम् । शिरोरोपितपत्रञ्चात्र मन्त्रादि यथा,—
"तण्डुलान् भक्षयित्वा तु पत्रके ।
अभिमन्त्र्य शोधनं कुर्य्यात्तस्य शिरोगतम् ॥
[illegible]
[illegible]
[illegible]
[illegible] ॥"
इति दिव्यतत्त्वम् ।

तण्डुला, स्त्री, (तण्डते [illegible] उलच् ततष्टाप् ।) [illegible] इति राजनिर्घण्टः ।

तण्डुलाम्बु, क्ली, (तण्डुलस्य [illegible]) [illegible] इति भाषा । [illegible] इति वैद्यकपरिभाषा । [illegible] राजनिर्घण्टः । यथा, [illegible] मद्यद्रवविकारे ।
"पिबेत् समीरं तण्डुल [illegible]

तण्डुली, स्त्री, (तण्डुल+ङीष्) लता । [illegible] इति राजनिर्घण्टः । ([illegible] ग्रन्थे ज्ञातव्या ।)

तण्डुलीकः, पुं, (तण्डुलीव [illegible]) तण्डुलीयशाकः । इति शब्दार्थ [illegible]

तण्डुलीयः, पुं, (तण्डुलाय हितः "विभाषा हविरपूपादिभ्यः ।" इति छः ।) [illegible] इति चाँपानटिया इति च [illegible] इति अल्पमरवा इति च हिन्दी । पर्य्यायः । अल्पमारिषः [illegible] ११६ । तण्डुलीकः २ तण्डुलेरः [illegible] रत्नावली । मेघनादः [illegible] ७ [illegible] स्तनः ११ [illegible] अस्य गुणाः । शिशिरत्वम् । पित्तश्लेष्मनाशित्वम् । [illegible] मधुरत्वम् । [illegible] इति राजनिर्घण्टः । [illegible] अस्य पर्य्यायगुणाः ।
"तण्डुलीयो मेघनादः [illegible]
तण्डुलीयो लघुः शीतो [illegible]
[illegible]
"पानीयतण्डुलीयम् [illegible]
कटुकं तिक्तकं [illegible]

तण्डुलीयकः, पुं, (तण्डुलीय+कन्) तण्डुलीयशाकः । (यथा, [illegible]
"शाकः [illegible]
[illegible]
विडङ्गम् । इति राजनिर्घण्टः ।

तण्डुलीयिका, स्त्री, (तण्डुलीय+कन् टाप् । [illegible]) राजनिर्घण्टः ।

तण्डुलुः, स्त्री, (तण्डुल+[illegible]) विडङ्गम् । इति शब्दरत्नावली ।

[…] (तण्डुल+बाहुलकात् स्वार्थे ठः ।)
शाकः । इति हेमचन्द्रः । ४ । २५० ॥
[…] स्त्री, (तण्डुलान् तण्डुलप्रक्षालनात्
[…]ति । उत्+स्था+कः ।) तण्डुलाम्बु ।
[…]जनिर्घण्टः ॥
[…] स्त्री, (तण्डुलस्य तण्डुलक्षालनस्य
[…] । तण्डुलक्षालितं उदकं वा ।) तण्डु-
[…] यथा, वैद्यकपरिभाषायाम् ।
[…]गुर्वं दत्त्वा पलं कण्डितरक्तण्डुलान् ।
[…]ा ततो देयं तण्डुलोदककर्म्मणि ॥"
[…]णा यथा,—
[…] शीतलं वल्यं मधालिपारणापनम् ।
[…]शीतलञ्चैव हृद्यं तण्डुलोदकम् ॥"
[…]ति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ॥)
[…] पुं, (तण्डुलागामोघ इव यत्र ।) वेदवंशः ।
[…]ब्दचन्द्रिका ॥ वेउड्वाँश इति भाषा ।
[…]सृष्टश ॥
[…]तु: । इत्यमरः । ३ । ४ । ३ ॥ (यथा,
[…] ३ । ४६ ।
[…] तदङ्गमग्र्यं मघवन् ! महाक्रतो-
[…]सं तुरङ्गं प्रतिमोक्तुमर्हसि ॥")
[…] त्रि, बुद्धिस्थपरामर्शः । सेइ इति
सर्व्वनामशब्दोऽयम् । इति व्याकरणम् ॥
किरातार्ज्जुनीये । २ । २ ।
अपि वागधिपस्य दुर्व्वचं
[…]वचनन्तदृविदधीत विस्मयम् ॥")
[…]ब्रह्मणो नामविशेषः । यथा,—
[…]तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
[…]स्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥
[…]मित्युदाहृत्य यज्ञदानतपःक्रियाः ।
[…] विधानोक्ताः सततं ब्रह्मवादिनाम् ॥
[…]भिसन्धाय फलं यज्ञतपःक्रियाः ।
[…]याश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥"
[…] श्रीभगवद्गीतायाम् । १७ । २३-२५ ॥
[…] (तनोति मनोऽनेनेति । तन+"तनि-
[…] किच ।" उणां । ७।८८ । इति तन् ।)
[…]वाद्यम् । इत्यमरः । १ । ७ । ४ ॥
[…] (तन्यते स्म इति । तन्+क्तः ।) विस्तृतः ।
[…] , महाभारते । ४ । ५ । १ ।
[…]रा वद्धनिस्त्रिंशास्तस्तायुधकलापिनः ॥")
[…] । (यथा, भगवद्गीतायाम् । ८ । २२ ।
[…]न्तःस्थानि भूतानि येन सर्व्वमिदं ततम् ॥")
[…] पुं । इति मेदिनी । ते, २० ॥
[…] य, (तद्+"पञ्चम्यास्तसिल् ।" ५ ।
[…] । इति तसिल् । यद्वा, सर्व्वविभक्तिषु
[…] ।) हेतुः । इत्यमरः । ३ । ४ । ३ ॥
[…] , महाभारते । १२ । ३४८ । ७९ ।
[…]र्थेन सहैव ततो वैकारिकाः स्मृताः ॥"
[…] । परिप्रश्नः । पञ्चम्यर्थः । (यथा, मनुः ।
[…] ८५ ।
[…]णामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
[…]ह्य सर्व्वविद्यानां प्राप्यते ह्यमृतं ततः ॥"

सप्तम्यर्थः । यथा, मनुः । ४ । १५ ।
"न विद्यमानेष्वर्थेषु नार्त्त्यामपि यतस्ततः ॥"
तृतीयार्थः । यथा, नारदपञ्चरात्रे । २ । ६ ।
"आराधितो यदि हरिस्तपसा ततः किं
नाराधितो यदि हरिस्तपसा ततः किम् ॥")
कथान्तरम् । आनन्तर्य्यम् । इति विश्वः ॥ (यथा,
महाभारते । ४ । ५ । २ ।
"ततस्ते दक्षिणं तीरमन्वगच्छन् पदातयः ॥")

ततपत्री, स्त्री, (ततं विस्तृतं पत्रमस्याः ।) कदली-
वृक्षः । इति शब्दचन्द्रिका ॥

ततमः, त्रि, (तेषां मध्ये निर्द्धारितो योऽसौ ।
तद्+"वा वहूनां जातिपरिप्रश्ने डतमच् ।)
५ । ३ । ९३ । इति डतमच् ।) वहुषु मध्ये सः ।
अनेकेर मध्ये सेइ इति भाषा । (यथा,
ऐतरेयोपनिषदि । ३ । १२ । १३ ।
"स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्श-
मिति ॥")

ततरः, त्रि, (तयोर्मध्ये निर्द्धारितो योऽसौ । तद्+
"किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ।"
५ । ३ । ९२ । इति डतरच् ।) द्वयोर्मध्ये सः ।
दुयेर मध्ये सेइ इति भाषा ॥

ततस्त्यं, त्रि, (ततस्तत्र भवमिति । ततस्+"अव्यया-
त्त्यप् ।" ४ । २ । १०४ । इत्यस्य "अमेह-
क्वतसित्रेभ्य एव ।" इति वार्त्तिकोक्तेः त्यप्
प्रत्ययः ।) तत्रभवम् । तत्सम्बन्धि । इति व्याक-
रणम् ॥ तार इति भाषा ॥

ततिः, स्त्री, (तन्+भावे क्तिन् ।) श्रेणी । इति
हेमचन्द्रः । ६ । ५९ ॥ (यथा, विष्णुपादादि-
केशान्तवर्णनस्तोत्रे । १५ ।
"अस्माकं विस्मयार्हाण्यखिलमुनिजनप्रार्थ-
नीयानि सेयं
दद्यादाद्यानवद्या ततिरतिरुचिरामङ्गलान्यङ्गु-
लीनाम् ॥")

तति, त्रि, (तत् परिमाणमेषामिति । तद्+डति ।)
तत्परिमाणम् । ततगुलि इति भाषा । वहु-
वचनान्तोऽयम् । इति व्याकरणम् ॥

तत्कालः, पुं, (स चासौ कालश्चेति ।) वर्त्तमान-
कालः । तत्पर्य्यायः । तदात्वम् १ । इत्यमरः ।
३।८।२९॥ (यथा, कथासरित्सागरे । २ । ८३ ।
"वर्षस्य वेश्म वसुभिः स किलादरेण
तत्कालमेव समपूरयदुन्नतश्रीः ॥")

तत्कालधीः, त्रि, (तस्मिन् काले कार्य्यकाले
धीरुपस्थिता बुद्धिर्यस्य ।) प्रत्युत्पन्नमतिः ।
उपस्थितबुद्धिः । इति हेमचन्द्रः । ३ । ८ ॥

तत्क्रियः, त्रि, (सा क्रिया नियता वेतनस्तेन
यस्येति ।) कर्म्मकारः । वेतनं विना भारवहादि-
कर्त्ता । इत्यमरः ॥

तत्पुरुषः, पुं, (स चासौ पुरुषश्चेति स एव पुरुषो
वा ।) रुद्रः । इत्यमरः । ३ । ४ । ९ ॥ (यथा,
रघुः ३ । १४ ।
"दिशः प्रसेदुर्म्मरुतो ववुः सुखाः
प्रदक्षिणार्च्चिर्हविरग्निराददे ।

बभूव सर्व्वं शुभशंसि तत्क्षणं
भवो हि लोकाभ्युदयाय तादृशाम् ॥")

त(त्व)त्त्वं, क्ली, (तनोति सर्व्वमिदमिति । तन्+
क्विप् तुक् च । पृषोदरादित्वात् साधुः । यद्वा,
"सर्व्वं खल्विदं ब्रह्म ।" "ब्रह्मैवेदं सर्व्वम् ।"
इति श्रुतेस्तस्य ब्रह्मणो भावः इति । तत्+त्व ।)
स्वरूपम् । परमात्मा । विलम्बितनृत्यम् । इति
मेदिनी । वे, ९ ॥ वाद्यप्रभेदः । इति विश्वः ॥ वस्तु ।
इति त्रिकाण्डशेषः ॥ चेतः । इति धरणिः ॥ * ॥
चतुर्व्विंशतितत्त्वानि यथा । क्षितिः १ आपः २
तेजः ३ मरुत् ४ व्योम ५ गन्धः ६ रसः ७ रूपम् ८
स्पर्शः ९ शब्दः १० नेत्रम् ११ नासिका १२
जिह्वा १३ कर्णः १४ त्वक् १५ हस्तः १६ पादः १७
मुखम् १८ पायुः १९ लिङ्गम् २० प्रकृतिः २१
मनः २२ बुद्धिः २३ अहङ्कारः २४ । इति पुराण-
तन्त्रे ॥ तत्तु नानामुनिभिर्नानाविधमुक्तम् । तत्र
त्रीणि तत्त्वानि यथा । सत्त्वम् १ रजः २ तमः ३ ।
चतुर्व्विधानि यथा । तेजः १ आपः २ पृथ्वी ३
आत्मा ४ । पञ्चविधानि यथा । शब्दः १ स्पर्शः २
रसः ३ गन्धः ४ रूपम् ५ । षड्विधानि यथा ।
क्षितिः १ आपः २ तेजः ३ वायुः ४ आकाशम् ५
परमात्मा ६ । सप्तविधानि यथा । क्षितिः १
आपः २ तेजः ३ वायुः ४ आकाशम् ५ जीवः ६
आत्मा ७ । नवविधानि यथा । पुरुषः १
प्रकृतिः २ महत्तत्त्वम् ३ अहङ्कारः ४ नभः ५
वायुः ६ ज्योतिः ७ आपः ८ क्षितिः ९ ।
एकादशविधानि यथा । श्रोत्रम् १ त्वक् २
चक्षुः ३ घ्राणम् ४ जिह्वा ५ वाक् ६ पाणिः ७
उपस्थः ८ पायुः ९ अङ्घ्रिः १० मनः ११ ।
त्रयोदशविधानि यथा । नभः १ वायुः २ ज्योतिः
३ आपः ४ क्षितिः ५ श्रोत्रम् ६ त्वक् ७ चक्षुः
८ घ्राणम् ९ जिह्वा १० मनः ११ जीवात्मा
१२ परमात्मा १३ । षोडशविधानि यथा ।
नभः १ वायुः २ ज्योतिः ३ आपः ४ पृथ्वी ५
शब्दः ६ स्पर्शः ७ रूपम् ८ रसः ९ गन्धः १०
श्रोत्रम् ११ त्वक् १२ चक्षुः १३ जिह्वा १४
घ्राणम् १५ मनः १६ । सप्तदशविधानि यथा ।
पूर्व्वोक्तानि षोडश १६ आत्मा च १७ । पञ्च-
विंशतितत्त्वानि यथा । पूर्व्वोक्तानि सप्तदश १७
पुरुषः १८ प्रकृतिः १९ महान् २० अहङ्कारः
२१ मुखम् २२ पाणिः २३ उपस्थः २४ पायुः
२५ । षड्विंशतिविधानि यथा । पूर्व्वोक्तानि
पञ्चविंशतिः २५ जीवः २६ । सप्तविंशति-
विधानि यथा । पूर्व्वोक्तानि षड्विंशतिः २६
ईश्वरः २७ । इति श्रीभागवतम् ॥

तत्त्वज्ञानं, क्ली, (तत्त्वस्य ब्रह्मतत्त्वस्य ज्ञानम् ।)
बुद्धिगुणविशेषः । तत्तु ब्रह्मज्ञानम् । इति हेम-
चन्द्रः । २ । २२५ ॥ यथा,—
"प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्त-सिद्धान्ता-
वयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छल-
जातिनिग्रहस्थानानां षोडशपदार्थानां तत्त्व-
ज्ञानान्निःश्रेयसाधिगमः ।" इति गौतमसूत्रे ॥

तत्त्वन्यासः, पुं, (तत्त्वानां न्यासः ।) विष्णुपूजा-
विषयकन्यासविशेषः । यथा,—
"मातृकान्यासवद्यावाच्च जीवाद्यैकैकशो वदेत् ।
नमः परायेत्युच्चार्य्य ततस्तस्मात्मने नमः ॥
जीवं प्राणं इयं प्रोक्ता सर्व्वाङ्गेषु प्रविन्यसेत् ।
ततो हृदयमध्ये च तत्त्वमयञ्च विन्यसेत् ॥
इत्यच्युतोक्ततनुर्विदधीत तत्त्व-
न्यासं सपूर्व्वकपराक्षरनत्युपेतम् ।
भूयः पराय च तदाक्षयमात्मने च
नत्यन्तसुहृदस्तु तत्त्वमनुक्रमेण ॥
सकलवपुषि जीवं प्राणमायोज्य मध्ये
न्यसतु मतिमहङ्कारं मनश्चेति मन्त्री ।
कमुखहृदयगुह्याङ्घ्रिष्वथो शब्दपूर्व्वं
गुणगणमथ कर्णादिस्थितं श्रोत्रपूर्व्वम् ॥
वागादीन्द्रियवर्गमात्मनिलये त्वाकाशपूर्व्वं गणं
मह्यांस्ये हृदये शिरे चरणयोर्हृत्पुण्डरीकं हृदि ॥
मं बीजं हृत्पुण्डरीकतत्त्वं हृदि प्रविन्यसेत् ।
हं बीजं सूर्य्यमण्डलतत्त्वं हृदि प्रविन्यसेत् ॥
सं बीजं चन्द्रमण्डलतत्त्वं तत्र प्रविन्यसेत् ।
रं बीजं वह्निमण्डलतत्त्वं तत्रैव विन्यसेत् ॥
यं बीजं परमेष्ठितत्त्वं वासुदेवञ्च मूर्द्धनि ।
यं बीजमथ पुंस्तत्त्वं सङ्कर्षणमथो मुखे ।
लं बीजं विश्वतत्त्वञ्च प्रद्युम्नञ्च हृदि न्यसेत् ।
वं बीजं निवृत्तितत्त्वञ्च अनिरुद्धमुपस्थके ॥
लं बीजं सर्व्वतत्त्वञ्च पादे नारायणं न्यसेत् ।
क्ष्रौं बीजं कोपतत्त्वञ्च नृसिंहं सर्व्वगात्रके ॥
एवं तत्त्वानि विन्यस्य प्राणायामं समाचरेत् ॥"
अस्य फलं यथा,—
"तत्त्वन्यासं ततः कुर्य्यात् साधकः सिद्धिहेतवे ।
कृतेन येन देवस्य रूपतामेव याव्रसौ ॥"
इति गौतमीयतन्त्रम् ॥

तत्परः, त्रि, (सः परोऽस्य । यद्वा, तदेव परं सर्व्वो-
त्तममस्य ।) आसक्तः । इत्यमरः । ३ । १ । ८ ॥
(यथा, भागवते । ४ । १५ । ६ ।
"एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ।
इयञ्च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥")

तत्परायणः, त्रि, (तदेव परमयनमस्य ।) तदा-
सक्तः । यथा,—
"शुद्धा भवन्ति यद्भक्ता हन्यथा: तत्परायणाः ॥"
इति पद्मोत्तरखण्डम् ॥

तत्फलः, पुं, (तदेव फलमस्य । यद्वा, तनोति तन्यते
वा । तन + क्विप् तुक् च । तत् विस्तृतं फलमस्य ।)
कुवलयम् । कुष्ठनामौषधिः । चौरनाम-
गन्धद्रव्यम् । इति धरणिः ॥

तत्र, र कुटुम्बधारणे । इति माधवः । (भ्वा-परं-
सकं-सेट् ।) दानेनो धारणेऽर्थे वर्त्तते । इति
चान्द्राः । केचित्तु कुटुम्बधातुमनन्यमानालचि-
धातुः कुटुम्बस्य धारणेऽर्थे वर्त्तते इत्याहुः ।
तत्र धारणं इदमेवेदमित्थं इदयस्थी चेदेद्-
धारणभेदार्थः । इति दुर्गादासः ॥

तत्र } र वादे । मोदे । (भ्वा-परं-सकं-सेट् ।)
तत्र } दन्त्यवर्गादिरयं । तत्नोः । दन्त्यवर्गादिर्यो-
पथः । इति केचित् । तत्नोः । शीघ्रवागुरयम् ।
इति दुर्गादासः ॥

तत्र, इ क ङ धारणे । इति कविकल्पद्रुमः ॥
(चुरां-आत्मं-सकं-सेट् ।) आदिमध्ययोस्तकारः
शेषो रेफयुक्तः । धारणं धरणम् । भाषायामस्य
विस्तारणे प्रायः प्रयोगः । इ क ङ, तन्त्रयते
तन्तून् तन्तुवायः । इति दुर्गादासः ॥

तत्र, व्य, (तस्मिन्निति । तद् + "सप्तम्यास्त्रल् ।"
५।३।१० । इति त्रल् ।) तस्मिन् । तयोः । तेषु ।
इति व्याकरणम् । सेस्थाने इति भाषा । (यथा,
मनुः । २ । ११२ ।
"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")

तत्रत्यः, त्रि, तत्र भवः । (तद् + "अव्ययात्त्यप् ।"
४।२।१०४ । इत्यस्य "अमेहक्वतसित्रेभ्य एव ।"
इति वार्त्तिकोक्त्या त्यप् ।) तस्मिन्नुत्पन्नः । इति
मुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्-
सागरे । ५ । ८८ ।
"प्रातस्तत्र च तत्रत्यो जनोऽरोदीत् पुरो मम ॥")

तत्रभवान्, [त्] त्रि, (इतराभ्योऽपि दृश्यन्ते
इति प्राग्दीव्यतीयः प्रथमार्थे त्रल् । ततः
सुप्सुपेति समासः ।) श्लाघ्यः । इति जटाधरः ॥

तथा, व्य, (तेन प्रकारेण । तद् + "प्रकारवचने
थाल् ।" ५ ।३।२३ । इति थाल् । तेन प्रकारे-
णेत्यर्थः । यथा, मनुः । १ । ४ ।
"स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ।
प्रत्युवाचार्च्य तान् सर्व्वान् महर्षीन् श्रूयता-
मिति ॥")
साम्यम् । इत्यमरः । ३ । ४ । ८ ॥ (यथा,
मनुः । ६ । ९० ।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम् ॥")
अभ्युपगमः । पृष्टप्रतिवाक्यम् । समुच्चयः ।
(यथा, देवीभागवते । १ । २ । २६ ।
"समादरञ्च तथा भारतं मुनिना कृतम् ।
इतिहास इति प्रोक्तं पञ्चमं वेदसम्मतम् ॥")
निश्चयः । इति मेदिनी । थे, २६ ॥ (यथा,
रघुः । १ । २९ ।
"तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथा हि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥")

तथागतः, पुं, (यथा पुनरावृत्तिर्न भवति तथा
तेन प्रकारेण गतः । यद्वा, तथा सत्यं गतं
ज्ञानं यस्य । सुप्सुपेति समासः ।) बुद्धः ।
इत्यमरः ।१।१।१३ ॥ (यथा, सर्व्वदर्शनसंग्रहे ।
"यथा गतास्ते सुनयः शिवां गतिं
तथा गतिं सोऽपि गतस्तथागतः ॥"॥
तथा तेन प्रकारेणागतः ।) पूर्व्वोक्तप्रकारेणा-
गते, त्रि ॥ (यथा, महाभारते । ३।७७।५ ।
"ततो बभूव नगरे सुमहान् हर्षजः स्वनः ।
जनस्य संप्रहृष्टस्य नलं दृष्ट्वा तथागतम् ॥")

तथाच, व्य,(तथा च, च च इति द्वन्द्वसमासः ।) पूर्व्वो-
क्तार्थदृढीकरणम् । इति संक्षिप्तसारव्याकरणम् ॥

(यथा, मनुः । ९ । १९ ।
"तथाच श्रुतयो बह्व्यो निगीत[illegible]
स्वलक्षणपरीक्षार्थं तासां शृणुत [illegible]

तथैव, व्य, (तथा च एव च ।) तथा
प्रकार इति भाषा । यथा, रघौ
[illegible]

तथ्यं, क्ली, (तथा साधु । तथा +
४ । ४ । ९८ । इति यत् ।) सत्य[illegible]
मनुः । ८ । २७४ ।
"कार्य्यं वाण्यवना-सङ्गतम् [illegible]
तथ्येनापि ब्रुवन् दाप्यो दण्डं [illegible]
तद्वति त्रि । इत्यमरः । १ । ६ । [illegible]
महाभारते । ७ । १५७ । १ ।
"यदुक्तं नगुणोस्तथ्यान् कीर्त्तयन् [illegible]
शूरदेवात् सहस्रशः ! [illegible]

तदा, व्य, (तस्मिन् काले । "दानीं [illegible]
३ । १९ । इति दा ।) तस्मिन् क[illegible]
मरः । ३ । ४ । २२ । तेह समये [illegible]
(यथा, मनुः । १ । ५५ ।
"न [illegible]

तदात्वं, क्ली, (तदा इत्यस्य भावः । "[illegible]
भावस्त्वतलौ ।" ५ । १ । ११९ । [illegible]
तत्कालः । वर्त्तमानकालः । [illegible]
(यथा, महाभारते । २ । ५८ ।
"स योगभोगलोभान्धो [illegible]
आयतिञ्च तदात्वञ्च उभे सदो [illegible]

तदानीं, [म्] व्य, (तस्मिन् काले
दा च ।" । ५ । ३ । १९ । इ[illegible]
दानीम् ।) तस्मिन् काले । इत्यम[illegible]
(यथा, ऋग्वेदे । १० । १२९ । १ ।
"नासदासीन्नोसदासीत्तदानीं
नासीद्रजो नो व्योमा परो [illegible]

तदामुखं, क्ली, (तदा तस्मिन्नेव काले
आरम्भः । इति भूरिप्रयोगः । [illegible]

तद्दिनं, [म्] व्य, (तत् [illegible]
दिनं दिनार्थः ।) दिवसमध्यम् । [illegible]
प्रतिदिनम् । इति हेमचन्द्रः । [illegible]
पूर्व्वोक्तदिने, क्ली ॥

तद्धनः, त्रि, (तदेव व्ययेनाशे[illegible]
कृपणः । इति हेमचन्द्रः । ३ । [illegible]
धनमिति विग्रहे पूर्व्वोक्तधने, क्ली [illegible]

तद्बलः, पुं, (तस्मिन् काले एव [illegible]
वाणविशेषः । इति हेमचन्द्रः । ३ । [illegible]

तन, उ कि उपकृतौ । श्रद्धायाम् । [illegible]
इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वा-
सकं च-सेट् । उदित्त्वात् क्त्वेट् ।) [illegible]
तता । कि, तानयति तनति । [illegible]
कारः । अथातो हिंसार्थमदम् । [illegible]
गोविन्दभट्टः । उपसर्गादिर्थके । [illegible]
करणम् । वितानयति यः कीर्त्ति[illegible]
यशः । इति हलायुधः । इति ।

...दु विस्तारे । इति कविकल्पद्रुमः । (
...-परं-अकं-सेट् । ओदित्त्वात् क्तादेः ।)
...तनोति तनुते पुत्रं कविः । उ, तनित्वा
। इति दुर्गादासः ॥
...पुं, (तनोति विस्तारयति कुलमिति ।
...कलिगलिभ्यां...: कयन् ।" उणां । ४ ।
। इति कयन् ।) पुत्रः । इत्यमरः । २ । ६ ।
॥ (यथा, मनुः । ३ । १६ ।
...सम्भवस्तस्य च ॥")
...स्त्री, (तनोति कुलमिति । तन + कयन् +
।) कन्या । इत्यमरः । २ । ६ । २७ ॥
...का, भागवते । १ । १६ । २ ।
...उत्तरस्य तनयामुपयेमे इरावतीम् ॥")
...कुलाख्या । इति शब्दचन्द्रिका ।
..., त्रि, अपकर्षविशिष्टेन तनुः । (तनु
...तरप् ।) क्षुद्रः । इति व्याकरणम् ॥
...स् [स्] त्रि, अपकर्षातिशयेन तनुः ।
...तनु + ईयसुन् ।) अल्पः । इति व्याकरणम् ॥
...स्त्री, (तनोति तन्यते इति वा । तन +
...तनोतेरुः ।" उणां ।१।७ । इति उः ।)
...रम् । (यथा, विष्णुपुराणे । १ । १० । ५ ।
...या: स्वर्गं परित्यज्य मसागरान् मुनिसत्तम ।।
...तरपतौ सर्वे विभाज्या मातुर्मी मदुम् ॥")
...। इति मेदिनी । ने, ८ ॥ स्त्री । इति
...र्निर्घण्टः ॥
...त्रि, (तन + "भृग्वृगलीति ।" उणां १ । ७ ।
...: ।) अल्पः । विरलः । (यथा, मनुः ।३।१० ।
...दुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम् ॥")
...: । इति मेदिनी । ने, ८ ॥ (यथा, आर्या-
...शत्याम् । ५८५ ।   [गाधि ! ॥")
...तरन्तीं रसमत्तमामध्यमार्गं तनोषि तनु-
...[स्] स्त्री, (तनोति तन्यते वा । तन +
...र्तिपृवधियजितनिधनितपिभ्यो नित् ।" उणां
। ११८ । इति उसिः स च नित् ।) शरी-
...रम् । इत्युणादिकोषः ॥
...क्षीरः, पुं, (तनौ क्षीरं वृक्षनिर्यासो यस्य ।)
...आम्रातकः । इति राजनिर्घण्टः ॥
...च्छायः, पुं, (तनुर्विरला स्वल्पा छाया यस्य ।)
...बव्वूरकवृक्षः । इति राजनिर्घण्टः ॥ (तनो-
...छाया ।) शरीरच्छायायां स्त्री क्ली च ॥
...जः, पुं, (तनोः शरीरात् जायते इति । जन
+ "अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति
डः ।) पुत्रः । इति हलायुधः ॥ (यथा, पञ्च-
...तन्त्रे । ५ । २२ ।

"स्वामी द्वेष्टि सुसेवितोऽपि सहसा
प्रोज्झन्ति सद्बान्धवा
दीव्यन्ते न गुणास्त्यजन्ति तनुजाः
स्फारीभवन्त्यापदः ।
भार्या शोभनवंशजापि भजते
नो यान्ति मित्राणि च
न्यायारोपितविक्रमानपि नरान् येषां
न हि स्यादनम् ॥")

तनुजा, स्त्री, (तनोः शरीरात् जायते इति । जन + डः + टाप् ।) कन्या । इति शब्दरत्नावली ॥

तनुत्रं, क्ली, (तनुं त्रायते इति । त्रै + "आतो-ऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) वर्म । इत्यमरः । २ । ८ । ६४ ॥

तनुत्राणं, क्ली, (त्रायतेऽनेनेति । त्रै + करणे ल्युट् । तनोः शरीरस्य त्राणम् ।) तनुत्रम् । इति हलायुधः ॥ (यथा, महाभारते । ३ । १०४ । ४ ।
"इदञ्च मे तनुत्राणं प्रायच्छन्मघवान् प्रभुः ॥")
शरीररक्षणञ्च ॥

तनुत्वचा, स्त्री, (तनुः तन्वी त्वक् वल्कलमस्याः ।) क्षुद्राग्निमन्थः । इति राजनिर्घण्टः ॥

तनुपत्रः, पुं, (तनूनि पत्राणि यस्य ।) इङ्गुदी-वृक्षः । इति राजनिर्घण्टः ॥

तनुभस्त्रा, स्त्री, (तनोः शरीरस्य भस्त्रा इव । निश्वासवायुनिर्गमसाधनत्वात्वम् ।) नासिका । इति शब्दरत्नावली ॥

तनुरसः, पुं, (तनोर्देहस्य रस इव तनोर्निर्गतो रस इति वा ।) घर्मः । इति हारावली ।१५४॥

तनुरुह्, [ह्] क्ली, (तनौ शरीरे रोहतीति । रुह + क्विप् ।) तनूरुहम् । इति शब्दरत्नावली ॥

तनुरुहं, क्ली, (तनौ रोहति उत्पद्यते इति । रुह + "इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः ।) तनूरुहम् । इति शब्दरत्नावली ॥

तनुलः, त्रि, (तन्यते स्म इति । तन + उलच् ।) विस्तृतः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तनुवातः, पुं, (तनुः क्षीणो वातः वायुर्यत्र ।) नरकविशेषः । इति हेमचन्द्रः । ५ । २ ॥

तनुवीजः, पुं, (तनु क्षीणं स्वल्पमात्रं वा वीज-मस्य ।) राजवदरः । इति राजनिर्घण्टः ॥

तनुव्रणः, पुं, (तनुः क्षुद्रः स्वल्पः व्रणो यत्र ।) वल्मीकरोगः । इति शब्दरत्नावली ॥

तनुसञ्चारिणी, स्त्री, (तनु अल्पमात्रं यथा स्यात् तथा सञ्चरतीति । सम् + चर + णिनिः ङीप् च ।) वालिका स्त्री । इति शब्दमाला ॥

तनूः, स्त्री, (तनु + ऊङ् ।) शरीरम् । इत्य-मरः । २ । ६ । ७१ ॥

तनूकृतः, त्रि, (अतनुस्तनुरकारि । कृ + कर्मणि क्तः ।) तष्टः । अल्पीकृतः । इत्यमरः ।३।१।६६॥

तनूजः, पुं, (तन्वाः शरीरात् जायते इति । जन + डः ।) पुत्रः । इति जटाधरः ॥ (यथा, रघुः । ५ । ५३ ।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य ॥"
स्त्री, कन्या ॥)

तनूनपं, क्ली, (तन्वा ऊनं कृशं पातीति । पा + कः ।) घृतम् । इति शब्दचन्द्रिका ॥

तनूनपात्, [द्] पुं, (तनूनपं घृतं अत्तीति । अद् + विच् क्लिविल्के । यद्वा, तनूं स्वशरीरं न पात-यतीति । पत + णिच् + क्विप् । "नभ्राण्नपात् ।" ६ । ३ । ७५ । इति निपातितः ।) अग्निः । (यथा, ऋग्वेदे । ३ । २९ । ११ ।
"तनूनपादुच्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते ॥")
चित्रकवृक्षः । इत्यमरः । २ । ४ । ८० ॥

तनूरुहं, क्ली, (तन्वां रोहतीति । रुह + कः ।) रोम । (यथा, भागवते । ७ । ८ । २२ ।
"सन्नाद्युत्पर्णोदैरुद्धरितं तनूरुहै-
र्विष्वग्भुजानीकशतं नखायुधम् ॥"
तथाच शिवपुराणे । वायुसंहितायाम् ।१।१४ ।
"ननमस्कार तं दृष्ट्वा हृष्टसर्व्वतनूरुहः ॥")
पतत्रम् । इति मेदिनी । हे, ३० ॥

तनूरुहः, पुं, (तन्वाः शरीरात् रोहति उत्-पद्यते । रुह + कः ।) पुत्रः । गरुत् । (यथा, वृहत्संहितायाम् । ६३ । १ ।
"कुङ्कुटस्त्वृजुतनूरुहाङ्गुलि-
स्ताम्रवक्त्रनखचूलिकः सितः ॥")
लोम । इति हेमचन्द्रः ॥

तनूह्रदः, पुं, (तन्वाः तन्वां वा ह्रद इव ।) पायुः । इति त्रिकाण्डशेषः ॥

तनृप, उ दृप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) उ, तर्पित्वा तृप्त्वा । इति दुर्गादासः ॥

तनृष, उ ष सङ्कुचि । इति कविकल्पद्रुमः ॥ (रुधां-परं-अकं-सेट् ।) उ, तर्षित्वा तष्ट्वा । ष, तनषृमि व्योम विस्तृतम् । इति दुर्गादासः ॥

तनृश, उ ष सङ्कोचे । इति कविकल्पद्रुमः ॥ (रुधां-परं-अकं-सेट् ।) उ, तक्षित्वा तष्ट्वा । ष, तनक्षृमि व्योम विस्तृतम् । इति दुर्गादासः ॥

तन्तुः, पुं, (तन्यते विस्तीर्य्यते इति तनोति वा । तन + "सितनिगमीति ।" उणां १ । ७० । इति तुन् ।) सूत्रम् । इत्यमरः । २।१०।२८ ॥ (यथा, महाभारते । १२ । ४७ । २२ ।
"यस्मिन् नित्यं तते तन्तौ दृढे स्रगिव तिष्ठति ॥")
ग्राहः । इति हेमचन्द्रः ॥ सन्ततिः । यथा,—
"अन्तःस्थः सर्व्वभूतानामात्मा योगेश्वरो हरिः ।
स्वमाययावृणोद्गर्भं वैराट्याः कुरुतन्तवे ॥"
इति श्रीभागवतम् ॥

तन्तुकः, पुं, (तन्तुरिव तन्तुनेव वा कायतीति । कै + कः । तन्तु + संज्ञायां कन् वा ।) तन्तुभः । सर्षपः । इत्यमरटीकायां रमानाथः ॥ (यथा, सुश्रुते कल्पस्थाने ४ अध्याये । "पिङ्गलस्तन्तुक-पुष्पपाण्डुः षड्गोऽष्मिको वभ्रुकषायः ॥")

तन्तुकाष्ठं, क्ली, (तन्तुसमन्वितं काष्ठम् ।) तूली । इति शब्दरत्नावली ॥ ताँतेर काट इति भाषा ॥

तन्तुकी, स्त्री, (तन्तुरिव कायतीति । कै + कः ङीप् च ।) नाड़ी । इति राजनिर्घण्टः ॥

तन्तुकीटः, पुं, (तन्तूत्पादकः कीट इति शाक-पार्थिववत् मध्यपदलोपी समासः ।) कोषकारः । इति जटाधरः ॥ गुटिपोका इति भाषा ॥

तन्तुणः, पुं, (तन + वाहुलकात् तुनन् निपातनात् णत्वं एतदगकारान्त इत्येके ।) ग्राहः । इति हेमचन्द्रः ॥ हाङ्गर इति भाषा ॥

तन्तुपर्व्व, [न्] क्ली, (तन्तुः पवित्रारोपणं तत्प्रधानं पर्व्व यत्र पर्व्व तिथिविशेषः ।) परमेश्वरोपवीतदाननिधिः । सा श्रावणी पूर्णिमा । इति तिथ्यादितत्त्वम् ॥

तन्तुनागः, पुं, (तन्तुनाग इव ।) ग्राहः । इति हेमचन्द्रः ॥

तन्तुनिर्य्यासः, पुं, (तन्तुरिव निर्य्यासः तन्तुवत् निर्य्यासो यस्य वा ।) तालः । इति शब्दरत्नावली ॥

तन्तुभः, पुं, (तन्तुरिव भातीति । भा + कः ।) सर्षपः । इत्यमरः । २।९।१७ ॥ वत्सः । इति जटाधरः ॥

तन्तुरं, क्ली, (तन्तुरस्त्यस्येति । तन्तु + कुञ्जादित्वात् रः ।) मृणालम् । इति शब्दरत्नावली ॥

तन्तुलं, क्ली, (तन्तुरम् । रस्य लत्वम् ।) मृणालम् । इति हेमचन्द्रः ॥

तन्तुवापः, पुं, (तन्तून् वपतीति । वप + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) तन्तुवायः । इति जटाधरः । तांति इति भाषा ॥ तन्त्रम् । इति शब्दमाला । तांत इति भाषा ॥

तन्तुवायः, पुं, (तन्तून् वयति विस्तारयति जालाकारेणेति । वे + "संज्ञायाम् ।" ३ । २ । ७७ । इत्यण् ।) लूता । इत्यमरः । २।५।१३ ॥ (तन्तून् वयतीति । वे + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तन्त्रवायः । इति शब्दरत्नावली ॥ (यथा, मनुः । ८ । ३९७ ।
"तन्तुवायो दशपलं दद्यादेकपलाधिकम् ॥")

तन्तुविग्रहा, स्त्री, (विग्रह्यतेऽसौ । वि + ग्रह + अप् । विग्रहो देहः । तन्तुभिर्निर्म्मितो विग्रहोऽस्याः ।) कदली । इति त्रिकाण्डशेषः ॥

तन्तुशाला, स्त्री, (तन्तुवपनार्थं या शाला गृहमित्यर्थः ।) तन्तुवपनगृहम् । ताँतघर इति भाषा । तत्पर्य्यायः । गर्त्तिका २ । इति हेमचन्द्रः ॥

तन्तुसन्ततं, त्रि, (तन्तुना तन्तुभिर्व्वा सन्ततं व्याप्तम् ।) तन्तुविस्तृतवस्त्रादि । सिज्ञान कापड इति भाषा । तत्पर्य्यायः । स्यूतम् २ ऊतम् ३ उतम् ४ । इत्यमरः । ३ । १ । १०१ ॥

तन्तुसारः, पुं, (तन्तुः एव सारो यत्र ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥

तन्त्रं, क्ली, (तनोति तन्यते इति वा । तन + कर्म्मादौ यथायथं ष्ट्रन् । तत्रि कुटुम्बधारणे + घञ् वा ।) कुटुम्बकृत्यम् । (कुलप्रतिष्ठादिस्थितिः । यथा, महाभारते । १३ । ४७ । ६ ।
"सर्व्वानुपायानपि सम्प्रधाय
समुद्धरेत् स्वस्य कुलस्य तन्त्रम् ॥")
सिद्धान्तः । औषधिः । प्रधानम् । तन्तुवायः । परिच्छदः । श्रुतिशाखान्तरम् । हेतुः । उभयार्थप्रयोजकम् । इतिकर्त्तव्यता । इति मेदिनी ॥ राष्ट्रम् । परच्छन्दः । करणम् । अर्थसाधकः । तन्तुः । सैन्यम् । स्वराष्ट्रचिन्ता । इति हेमचन्द्रः ॥ (यथा, माघे । २ । ८८ ।
"तन्त्रावापविदा योगैर्म्मण्डलान्यधितिष्ठता ॥")
प्रबन्धः । इति शब्दरत्नावली ॥ शपथः । इति धरणिः ॥ धनम् । गृहम् । वयनसाधनम् । (यथा, महाभारते । १।३।१४० । "तन्त्रञ्चैतद् [illegible] लिपौ तस्मिन्नधिरोप्य सुतेन सर्व्वं वयन्तौ ॥") कुलम् । इति नानार्थध्वनिमञ्जरी । (शास्त्रम् । इति शिवः । यथा, देवीभागवते । १।११।१८ ।
"कारेन्द्रमनन्तं तामनैदामजिनम् ॥")
व्यवहारः । नियमादिः । यथा, महाभारते । १ । १०७ । २४ ।
"कुन्त्या मे प्रतिषेद्धव्या माद्रीः सह पुरोहितैः ।
आयकुर्व्वार्थकृत्यन्तैर्व्वनमतन्त्रेण च ॥")
त्रिलोकसारम् । तत्र चतुःषष्टितन्त्रकम् । यथा,—
"सिद्धीश्वरं महातन्त्रं काणीतन्त्रं कुलार्णवम् ।
ज्ञानार्णवं नीलतन्त्रं फेत्कारीतन्त्रमुत्तमम् ॥
देव्यागमं उत्तराख्यं श्रीक्रमं सिद्धियामलम् ।
मत्स्यसूक्तं सिद्धसारं सिद्धिसारस्वतं तथा ॥
वाराहीतन्त्रं देवेशि ! योगिनीतन्त्रमुत्तमम् ।
गणेशविमर्शिनी तन्त्रं नित्यातन्त्रं शिवागमम् ॥
चामुण्डां मुण्डमालाञ्च सुखमालाप्तमालकम् ।
हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम् ॥
कुलप्रकाशकं देवि ! कल्पं गान्धर्व्वमेव हि ॥
क्रियासारं निबन्धाख्यं स्वतन्त्रं तन्त्रमुत्तमम् ।
सम्मोहनं तन्त्रराजं ललितास्यं तथा प्रिये ॥
राधाख्यं मालिनीतन्त्रं रुद्रयामलमुत्तमम् ।
बृहच्छ्रीक्रमं तन्त्रं गवाक्षं सुकुमुदिनी ।
विशुद्धेश्वरतन्त्रञ्च मालिनीविजयं तथा ॥
समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम् ।
योगिनीहृदयं तन्त्रं भैरवं परमेश्वरि ! ॥
सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम् ।
तन्त्रान्तरञ्च देवेशि ! नवरत्नेश्वरं तथा ॥
कुलचूडामणितन्त्रं भावचूडामणीयकम् ।
तन्त्रदेवप्रकाशञ्च कामाख्यानामकं तथा ॥
कामधेनु कुमारी च भूतडामरमेव हि ।
मालिनीविजयं तन्त्रं यामलं ब्रह्मयामलम् ॥
विश्वसारं महातन्त्रं महाकालं कुलामृतम् ।
कुलोड्डीशं कुब्जिकाख्यं तन्त्रचिन्तामणीयकम् ॥
एतानि सर्व्वतन्त्राणि सफलानि युगे युगे ।
काली तारादिकादीनि तन्त्राणि परमेश्वरि ! ॥
कालकल्पे सुसिद्धानि चान्यकान्तासु भूमिषु ।
महाचीनादितन्त्राणि चान्यकल्पे महेश्वरि ! ॥
सुसिद्धानि वरारोहे ! रथक्रान्तासु भूमिषु ॥"
इति महासिद्धिसारतन्त्रम् ॥ ० ॥

अपि च ।
"चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति ! ।
सफलानीह वाराहे ! विष्णुक्रान्तासु भूमिषु ॥
कल्पभेदेन तन्त्राणि कथितानि च यानि च ।
मायाकल्पोऽनयैव विफलानीह सुन्दरि ! ॥"
इति महाविश्वसारतन्त्रम् ॥
तन्त्राणाम् लक्षणं यथा,—
"सृष्टिश्च प्रलयश्चैव देवतानां यथार्च्चनम् ।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च ।
षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्व्विधः ।

नवभिर्लक्षणैर्युक्तं तन्त्रमित्यभिधीयते [illegible]
[illegible] सप्तभिः ।
"[illegible]
कालभुजं पञ्चभिः कथ्यते [illegible]
गुणमयीश [illegible]
तन्त्रस्य लक्षणम् ।
"[illegible]
[illegible]
तदेतत् तत्रयमीश [illegible]
[illegible]
उपवसितामृतानाम् [illegible]
[illegible]
कोटिश्च [illegible]
कोशायोगाख्य [illegible]
वृहत्क्रम [illegible]
राधाक्रमो [illegible]
व्यवहारः [illegible]
इत्यादि [illegible]
तत्र गद्यमाप् ।
"[illegible]
[illegible]
व्यवहारः [illegible]
देवीनाञ्च यथा पुनः
तथा समयाचारा
सर्व्वकामप्रदं पुण्यं तन्त्रं वै देवदेव
कौलनं देवदेवस्य वक्त्रपद्मे [illegible]
[illegible]
तत्र श्लोकसंख्या यथा,—
"न शक्यं विस्तरात् [illegible]
संक्षेपात् [illegible]
दिवि देवे गणानां पाताले [illegible]
तन्त्रमार्गं भारते च [illegible]
आगमं त्रिविधं प्रोक्तं चतुर्व्वेदं
कल्पश्चतुर्व्विधः प्रोक्तः
यामलञ्च तथा तन्त्रं [illegible]
सुरकालं पञ्चधा सारतन्त्र [illegible]
महालयश्च कथितो योगः
चक्रशुद्धिरीत्या सिद्धसारस्वता ।
प्रथमोऽष्टसहस्रन्तु श्लोका दश [illegible]
द्वितीयो [illegible]
श्लोकाः [illegible]
शतद्वयं साधिकञ्च श्लोकानां [illegible]
त्रिंशोत्तरसहस्राणि [illegible]
प्रथमे प्रथमे तन्त्रे द्वितीये [illegible]
सहस्राणि तथा श्लोकाः [illegible]
भूतनेत्रसहस्राणि तृतीये [illegible]
शतत्रयं षट्त्रिंशोकाः प्रथम [illegible]
कलार्थसंख्या सहस्राणि [illegible]
पञ्चविंशाधिकाः श्लोका [illegible]
त्रिंशतिश्च सहस्राणि [illegible]
षट्श्लोकाश्च कथिताः [illegible]
षष्ठीदयसहस्राणि कालोत्तर [illegible]

[illegible] तन्त्रे च संख्यया ॥
[illegible]संख्यासहस्राणि [illegible] कीर्त्तिताः ।
[illegible] सहस्राणि [illegible]संख्यया ॥
[illegible]संख्यातान्यत्रैव च [illegible] ।
[illegible] सहस्राणि पञ्चशीर्षाधिकानि च ॥
[illegible] संख्यातानि यथार्थतः ।
[illegible] षड्विंशानि शतानि परिसंख्यया ॥
[illegible]णि च तावन्ति श्लोकानाञ्च यथार्थतः ।
[illegible]सहस्राणि श्लोकानाञ्चतुःसंख्यया ॥
[illegible]सहस्रश्लोकानि रुद्रेण च यथा पुरा ॥ ० ॥
[illegible]मरः परिपूर्णो ज्ञेयः प्रथमो योगडामरः ॥
[illegible] सर्वलिङ्गेन तथा पञ्चशतानि च ।
[illegible]विंशतिसहस्राणि श्लोकानि चैव संख्यया ।
[illegible]दशसहस्राणि संख्याताः शिवडामरे ॥
[illegible]ताः स्वेनैव लिखिता ईश्वरेणैव भाषिताः ।
[illegible]श्लोकसहस्राणि पञ्चश्लोकशतानि च ।
[illegible]लोकानि दुर्गायाः डामरे कथितानि च ॥
[illegible]श्लोकसहस्राणि नवश्लोकशतानि च ।
[illegible] तथा श्लोकाः पञ्चैव परिकीर्त्तिताः ॥
[illegible]संख्यासहस्राणि श्लोकानां ब्रह्मडामरे ।
[illegible]शतान्यत्र संख्यातानि शिवेन तु ॥
[illegible]टः श्लोकसहस्राणि गान्धर्व्वे डामरोत्तमे ।
[illegible]काश्च परिसंख्याता सप्तत्रयक्षयोनिना ॥
[illegible]मताः षट्च संख्याताश्चादायादियामले ।
[illegible]त्रिंशच्च सहस्राणि त्रयस्त्रिंशच्छतानि च ॥
[illegible]शीर्षे प्रकरणे ते द्वाविंशतिश्च संख्यया ।
[illegible]सहस्राणि शतान्यत्र तान्येव कथितानि च ॥
[illegible]चतुःसंख्यासहस्राणि शतानि परिसंख्यया ।
[illegible]शतिश्च तथा संख्या श्लोकाश्च विष्णुयामले ॥
[illegible]लसंख्यासहस्राणि वेदसंख्याशतानि च ।
[illegible]सप्ततिस्तथा श्लोकाः कनिष्ठे रुद्रयामले ॥
[illegible]श्लोकसहस्राणि त्रयोदशशतानि च ।
[illegible]विंशतिस्तथा श्लोका गणेशे यामलोत्तमे ॥
[illegible]संख्यासहस्राणि ह्यादित्याख्ये तु यामले ।
[illegible]णि नीलपताकायां सहस्राणि च पञ्च च ॥
[illegible]पञ्चविंशतिश्लोकाश्च कथिता वामकेश्वरे ।
[illegible]षोडशसहस्राणि द्वे शते विंशतिस्तथा ॥
[illegible]का स्मृतास्त्रये तन्त्रे संख्यातास्तन्त्रवेदिभिः ।
[illegible]दशसंख्यासहस्राणि त्रीणि संख्याशतानि च ॥
[illegible]श्लोकास्तथैवात्र तन्त्रे योगार्णवोत्तमे ।
[illegible]श्लोकसहस्राणि तावन्त्येव शतानि च ॥
[illegible]याख्ये च महातन्त्रे यथार्थतः प्रकीर्त्तिताः ।
[illegible]श्लोकसहस्राणि तावन्त्येव शतानि च ॥
[illegible]नार्द्धसंख्यया श्लोका दक्षिणामूर्त्तितन्त्रके ।
[illegible]श्लोकसहस्राणि तावन्त्येव शतानि च ॥
[illegible]षोडश तथा श्लोकाः कालिकाख्ये च तन्त्रके ।
[illegible]मेश्वर्य्यास्तन्त्रवरे सहस्राणि त्रयं महत् ॥
[illegible]कानां संख्यया चात्र तन्त्रराजे च संख्यया ।
[illegible]वश्लोकसहस्राणि नवश्लोकशतानि च ॥
[illegible]विंशति सहस्राणि हरगौर्य्योश्च तन्त्रके ।
[illegible]था च विंशतिः श्लोकास्तन्त्रेऽस्मिन् परि-
कीर्त्तिताः ।

सप्तसंख्यासहस्राणि द्वितीये तन्त्रवेदिभिः ।
चत्वारिंशतिश्च श्लोकाः सङ्ख्यातास्तन्त्रनिर्णये ॥
कुब्जिकाख्ये महातन्त्रे श्लोकाश्च दशसंख्यया ।
सहस्राणि तथा सप्तसङ्ख्यातानि मनीषिभिः ॥
द्वितीये षट्सहस्राणि सार्द्धञ्च कनिष्ठके ।
अर्कसंख्यासहस्राणि तथाङ्कशतानि च ॥
तावद्धा महाकल्पे सङ्ख्यातानि द्विजोत्तमैः ।
द्वाविंशतिसहस्राणि द्वाविंशतिशतानि च ॥
कात्यायन्यास्तु तन्त्रस्य सङ्ख्यातानि मनीषिभिः ।
पञ्चश्लोकसहस्राणि तावन्त्येव शतानि च ॥
प्रत्यङ्गिरायास्तन्त्रे च लिखितानि यथार्थतः ।
भूतसङ्ख्यासहस्राणि तथाहि तच्छतानि च ॥
महालक्ष्म्यास्तन्त्रराजे पञ्चश्लोकाश्च कीर्त्तिताः ।
गजसंख्यासहस्राणि श्लोकाश्च ऋतुसङ्ख्यया ॥
त्रिपुरार्णवे महातन्त्रे लिखिताः परमर्षिभिः ।
सरस्वत्याः सहस्रे द्वे द्वे शते सङ्ख्यया स्मृते ॥
पञ्चश्लोकास्तथैवात्र विज्ञातव्या द्विजातिभिः ।
द्वाविंशतिसहस्राणि ह्याद्ये तन्त्रोत्तमोत्तरे ॥
चतुर्गणाशतान्यत्र श्लोकाः पञ्चदशैव तु ।
द्वाविंशतिसहस्राणि तथा वाणशतानि च ।
द्वात्रिंशच्च तथा श्लोका योगिन्यास्तन्त्रराजके ।
द्वितीये षट्सहस्राणि तथा च त्रिशतानि च ॥
त्रयः श्लोकास्तथैवात्र वाराह्यास्तन्त्र उत्तमे ।
[illegible]सङ्ख्यासहस्राणि तत्त्वसङ्ख्याशतानि च ॥
गणाख्ये तन्त्रराजेऽस्मिन् श्लोका हि तत्त्वसङ्ख्यया ।
वर्णसङ्ख्यासहस्राणि द्वे शते परिनिश्चिते ॥
श्लोकास्त्रयश्च सङ्ख्यातास्तन्त्रे नारायणीयके ।
वेदसङ्ख्यासहस्राणि तान्येव च शतानि च ॥
श्लोका नवतिसङ्ख्याता मृडानीतन्त्रराजके ।
तृतीये त्रिसहस्राणि त्रिशतानि कनिष्ठके ॥
त्रिंशत्श्लोकाश्च सङ्ख्याता ज्ञातव्यास्तन्त्र-
वेदिभिः ॥”

उपतन्त्राणि यथा,—

“बौद्धोक्तान्युपतन्त्राणि कापिलोक्तानि यानि च ।
चद्भुतानि च एतानि जैमिन्युक्तानि यानि च ॥
वशिष्ठः कपिलश्चैव नारदो गर्ग एव च ।
पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्यो भृगुस्तथा ॥
शुक्रो वृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः ।
एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च ।
न सङ्ख्यातानि तान्यत्र धर्म्मविद्भिर्म्महात्मभिः ।
चारात्चारतराण्येव सङ्ख्यातानि निबोधत ॥”

इति वाराहीतन्त्रम् ।

(आगमतत्त्वविलासोक्ततन्त्रनामानि यथा,—

“स्वतन्त्रतन्त्रं फेत्कारीतन्त्रमुत्तरतन्त्रकम् ।
नीलतन्त्रं वीरतन्त्रं कुमारीतन्त्रमुज्ज्वलम् ॥
कालीनारायणीतन्त्रे तारिणीतन्त्रमुत्तमम् ।
वालातन्त्रञ्च समयातन्त्रं भैरवतन्त्रकम् ॥
भैरवीत्रिपुरातन्त्रे वामकेश्वरतन्त्रकम् ।
कुक्कुटेश्वरतन्त्रञ्च मातृकातन्त्रमेव च ॥
सनत्कुमारतन्त्रञ्च विशुद्धेश्वरतन्त्रकम् ।
सम्मोहनाख्यतन्त्रञ्च गौतमीयञ्च तन्त्रकम् ॥
वृहद्गौतमीयतन्त्रं भूतभैरवतन्त्रकम्
चामुण्डापिङ्गलातन्त्रे वाराहीतन्त्रकं तथा ॥
मुण्डमालाख्यतन्त्रञ्च योगिनीतन्त्रमुत्तमम् ।
मालिनीविजयं तन्त्रं तन्त्रं स्वच्छन्दभैरवम् ॥
महातन्त्रं शक्तितन्त्रं तन्त्रं चिन्तामणिं परम् ।
उन्मत्तभैरवं तन्त्रं त्रैलोक्यसारतन्त्रकम् ॥
विश्वसाराख्यं तन्त्रं तथा तन्त्रामृताभिधम् ।
महाफेत्कारीयतन्त्रं वायवीयञ्च तोड़लम् ॥
मालिनीललितातन्त्रे त्रिशक्तितन्त्रकं तथा ।
राजराजेश्वरीतन्त्रं महामोहस्वरोत्तरम् ॥
गवाक्षतन्त्रं गान्धर्व्वं तन्त्रं त्रैलोक्यमोहनम् ।
हंसमाहेश्वरं हंसपरमेश्वरतन्त्रकम् ॥
कामधेन्वाख्यतन्त्रञ्च तन्त्रं वर्णविलासकम् ।
मायातन्त्रं मन्त्रराजं कुब्जिकातन्त्रमुत्तमम् ॥
विज्ञानलतिकां लिङ्गागमं कालोत्तरं तथा ॥”

* * * *

“ब्रह्मयामलकञ्चादियामलं रुद्रयामलम् ॥
वृहद्यामलकं सिद्धयामलं कल्पसूत्रकम् ।
मत्स्यसूक्तं कल्पसूक्तं कामराजं शिवागमम् ॥
उड्डीशञ्च कुलोड्डीशमुड्डीशं वीरभद्रकम् ।
भूतडामरकं तद्वत् डामरं यक्षडामरम् ॥
कालिकाकुलसर्व्वस्वं कुलसर्व्वस्वमेव च ।
कुलचूड़ामणिं दिव्यं कुलसारं कुलार्णवम् ॥
कुलामृतकुलावल्यौ तथा कालीकुलार्णवम् ।
कुलप्रकाशं वाशिष्ठं सिद्धसारस्वतं तथा ॥
योगिनीहृदयं कालीहृदयं मातृकार्णवम् ।
योगिनीजालकुरकं तथा लक्ष्मीकुलार्णवम् ॥
ताराणवं चन्द्रपीठं मेरुतन्त्रं चतुःशतीम् ।
तत्त्वबोधं महोग्रञ्च स्वच्छन्दसारसंग्रहम् ॥
ताराप्रदीपं सङ्केतचन्द्रोदयमतिस्फुटम् ।
षट्त्रिंशत्तत्त्वकं लक्षनिर्णयं त्रिपुरार्णवम् ॥
विष्णुधर्म्मोत्तरं मन्त्रदर्पणं वैष्णवामृतम् ।
मानसोल्लासकं पूजाप्रदीपं भक्तिमञ्जरीम् ॥
भुवनेश्वरीं पारिजातं प्रयोगसारमुत्तमम् ।
कामरत्नं क्रियासारं तथैवागमदीपिकाम् ॥
भावचूड़ामणिग्रन्थं तन्त्रचूड़ामणिं परम् ।
वृहच्छ्रीक्रमसंज्ञञ्च तथा श्रीक्रमसंज्ञकम् ॥
सिद्धान्तशेखरं ग्रन्थं तां गणेशविमर्शिनीम् ।
मन्त्रमुक्तावलीं तत्त्वकौमुदीं तन्त्रकौमुदीम् ॥
मन्त्रतन्त्रप्रकाशाख्यं श्रीरामार्च्चनचन्द्रिकाम् ।
शारदातिलकं ज्ञानार्णवं सारसमुच्चयम् ॥
कल्पद्रुमं ज्ञानमालां पुरश्चरणचन्द्रिकाम् ।
आगमोत्तरकं तत्त्वसागरं सारसंग्रहम् ॥
देवप्रकाशिनीं तन्त्रार्णवञ्च क्रमदीपिकाम् ।
तारारहस्यं श्यामाया रहस्यं तन्त्ररत्नकम् ॥
तन्त्रप्रदीपं ताराया विलासं विश्वमातृकाम् ।
प्रपञ्चसारं तं तन्त्रसारं रत्नावलीं तथा ॥”

कालतन्त्रम् । वासनाजालम् । यथा, महा-भारते । १ । ३ । १४२ ।

“तन्त्रञ्चेदं विश्वरूपे युवत्यौ
वयतस्तन्तून् सततं वर्त्तयन्त्यौ ॥”

“तन्त्रं कालतन्त्रं विश्वोपादाननिमित्तादिकारण-समूहसमन्वम् ॥” इति दुर्घटार्थप्रकाशिन्यां

विमलबोधः । "इह तन्त्रं वायनाजालम् ।" इति नीलकण्ठः ।)

तन्त्रकं, क्ली, (तन्त्रात् तन्तुवायात् अचिरापहृतम् । तन्त्र+"तन्त्रादचिरापहृते । ५ । २ । ७० । इति कन् ।) नूतनवस्त्रम् । इत्यमरः । २ । ६ । ११२ ।

तन्त्रकाष्ठं, क्ली, (तन्त्रस्य काष्ठम् ।) तन्त्रवायस्य तुरी । इति त्रिकाण्डशेषः ।

तन्त्रता, स्त्री, (तन्त्रस्य भावः । तन्त्र+तल् ।) अनेकमुद्दिश्य सकृत्प्रवृत्तिः । यथा । "आग्नेयाष्टाकपालैन्द्रदध्यैन्द्रपयोयागानां प्रयाणां आग्नेयाष्टाकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां त्रयाणां सकृत् सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारः सिध्यति ।" "तथा नानाब्रह्मवधसत्त्वे सर्व्वोद्देशेन सकृत् प्रायश्चित्ते कृते ब्रह्मवधजन्यपापनाशः ।" "तन्त्रताया हेतुश्च । अदृष्टार्थैकजातीयकर्म्मकः कालदेशकर्त्रादीनां प्रयोगानुबन्धवैधहेतुभूतानामभेदे उद्देश्यविशेषाश्च इति । एवञ्च ।

'आतोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि । पवित्राणां तथा जाप्ये दाने च विधिदर्शितः ।'

इति विष्णूक्तम् ।

'अस्नात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन ।' इति वचनाच्च क्रियाङ्गस्नानं कर्त्तृसंस्कारद्वारैव तद्दिनकर्त्तव्याशेषकर्म्मार्थमेकमेव न तु प्रतिकर्म्म कर्त्तव्यम् ।" इति प्रायश्चित्ततत्त्वम् ।

तन्त्रवापः, पुं, (तन्यते विस्तीर्य्यते इति तन्त्रं सूत्रम् । तत् वपतीति । वप+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तन्त्रवायः । तन्त्रे, पुं क्ली । इति शब्दरत्नावली ।

तन्त्रवायः, पुं, (तन्त्रेण वयतीति । वे ञ तन्तुसन्ताने +"ह्वावामश्च ।" ३ । ० । २ । इत्यण् ।) वर्णसङ्करजातिविशेषः । ताँति इति भाषा । अस्योत्पत्तिर्यथा, पराशरपद्धतौ ।

"मालाकारात् कर्म्मकार्य्यां मणिकारश्च जायते । मणिकारात् मालाकार्य्यां मणिबन्धोऽप्यजायत । मणिबन्धात् मणिकार्य्यां तन्त्रवायाश्च जज्ञिरे ।"

तत्पर्य्यायः । कुविन्दः २ । इत्यमरः । २ । १० । ६ ॥ तन्त्रवानः ३ । इति भरतः । तन्तुवायः ४ । इति जटाधरः । तन्तुवापः ५ । इति शब्दरत्नावली । ऊर्णा । इत्यमरटीकायां स्वामी ।

तन्त्रिका, स्त्री, (तन्त्री इव । तन्त्री + स्वार्थे कन् । पूर्व्वह्रस्वश्च ।) गुडूची । इत्यमरः । २ । ४ । ८२ । (अस्याः पर्य्यायः ।

"गुडूची मधुपर्णी स्यादमृतामृतवल्लरी । छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च । जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली । चक्रलक्षणिका धीरा विशल्या च रसायनी । चन्द्रहासा वयस्था च मण्डली देवनिर्म्मिता ।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

तन्त्रिपालकः, पुं, जयद्रथः । इति शब्दमाला ।

तन्त्रीः, स्त्री, (तन्त्रयति मोहयति लोकानिति । तन्त्र + "अवितृस्तृतन्त्रिभ्य ईः ।" उणा । ३ । १५८ । इति ईः ।) वीणागुणः । (यथा, रामायणे । २ । ३९ । २९ ।

"नातन्त्रीर्विद्यते वीणा नाचक्रो विद्यते रथः ।")

वीणा । यथा, तत्रैव । १ । २ । १८ ।

"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः । शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ।")

गुडूची । देहशिरा । इति मेदिनी । नदीविशेषः । युवतीभेदः । इति शब्दरत्नावली । रज्जुः । इति हेमचन्द्रः । (यथा, मनुः । ४ । ३८ ।

"न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति । न चोदके निरीक्षेत स्वं रूपमिति धारणा ।")

तन्त्रसायः, पुं, (तन्त्रवायः निपातनात् तस्य रः ।) तन्त्रवायः । इत्यमरटीकायां रायमुकुटः ।

तन्द्रा, स्त्री, (तनूं द्रातीति । तनु+द्रा+कः । निद्रातन्द्रेति नात्वं निपात्यते । यद्वा, तन्द्र अवसादे+भावे घञ् ततष्टाप् ।) निद्रा । आलस्यम् । इति हेमचन्द्रः । (यथा, हठयोगप्रदीपिकायाम् । १ । ३९ ।

"न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा ।")

तस्या निदानं यथा । "तमोवातकफात्तन्द्रा ।" इति । लक्षणञ्च ।

"इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः । निद्रार्त्तस्येव यस्येहा तस्य तन्द्रा विनिर्द्दिशेत् ।"

इति माधवकरः ।

(कारणपूर्व्वकमस्याः सम्प्राप्तिलक्षणं चिकित्सितञ्च यथा, चरके सिद्धिस्थाने नवमेऽध्याये ।

"मधुरस्निग्धगुर्व्वन्नसेवनाच्चिन्तनाद्भयात् । शोकाद्व्याध्यनुषङ्गाच्च वायुर्नोदीरितः कफः ॥ यदासौ समवस्कन्द्य हृदयं हृदयाश्रयान् । समावृणोति चाभाषीत्तदा तन्द्रोपजायते ॥ हृदये व्याकुलीभावो वाक्चेष्टेन्द्रियगौरवम् । मनोबुद्ध्यप्रसादश्च तन्द्राया लक्षणं मतम् ॥ सवशं तत्र कर्त्तव्यं शोधनं शमनानि च । व्यायामो रक्तमोक्षश्च भोज्यञ्च कटुतिक्तकम् ।")

तन्द्रालुः, त्रि, (तनूं द्रातीति । तनु+द्रा+"स्पृहि गृहीति ।" ३ । २ । १५८ । इति आलुच् तनुशब्दस्य नात्वं निपात्यते ।) निद्रालुः । इति जटाधरः । (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।

"यदि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान् ।")

तन्द्रिः, स्त्री, (तन्द्रि मोहे धातुः+"वहुलमन्यत्रापि ।" उणा । ४ । ६६ । इति क्रिन् ।) निद्रा । आलस्यम् । इत्युणादिकोषः । (यथा, भागवते । ३ । २० । ४० ।

"दृष्ट्वा भुजगसिक्तानेव भगवानात्मतन्द्रिका । दिवासमो हृत्यतान् वीक्ष्य चामीलयद्दृशौ ।")

तन्द्रिका, स्त्री, (तन्द्रिरिव । स्वार्थे कन् टाप् च ।) तन्द्रिः । इति शब्दरत्नावली ।

तन्द्री, स्त्री, (तन्द्रि+"कृदिकारादक्तिनः ।" वा ङीष् ।) वाह्यसमादिना सर्व्वेन्द्रियाप्रसरणम् । अपकृष्टमार्दिना [illegible] निःसहत्वेति यावत् इत्यन्ये । [illegible] पर्य्यायः । प्रमीला २ । तन्द्रा ३ । तन्द्रिः ४ । इति तट्टीका । तन्द्रिका [illegible] आलस्यम् ६ । इति राजनिर्घण्टः । [illegible] महाभारते । ३ । ३०२ । १८ ।

"निक्षिप्य राजपुत्री [illegible] आलस्यं परमं यत्नं [illegible]" निद्रा । इति मेदिनी । रे, ३४ । [illegible]

यथा यथा, चरके सूत्रस्थाने [illegible]

"पाण्डुता गौरवं चार्द्ध [illegible] तन्द्रीश्च [illegible]"

तन्निः, स्त्री, (तनयतीति । [illegible] क्तिः ।) धवलकृष्णा । इति रत्न[illegible] इति पाठः ।

तन्मात्रं, क्ली, (तदेवेति । तत्+[illegible] यद्वा, सा मात्रा यस्य ।) रसगन्धस्पर्शशब्दानां संज्ञा । [illegible]

"इमान्येव [illegible] चोत्यन्ते । एतेभ्यः [illegible] चोत्पद्यन्ते ।" इति [illegible] यथा । "तन्मात्राणि [illegible] जायन्ते इति [illegible] तान् [illegible] तस्मात् एतान्येवेति । [illegible] सूक्ष्मभूतानि अवस्थारात्रमादि [illegible] शान्तैकस्वभावानि अविशेषाणि [illegible] इति [illegible] इति विद्वन्मनोरञ्जनी । ० । [illegible]

"भूतादिस्तु विकुर्व्वाणः सर्वं [illegible] ससर्ज [illegible]"

इति विष्णुपुराणे । १ [illegible]

तन्यतुः, पुं, (तनोति [illegible] तनु विस्तारे+"ऋतन्यञ्जिवन्यी [illegible] २ । इति यतुच् ।) रात्रिः । [illegible] उणादिकोषः । (वायुः । [illegible] इति माधवः । विद्युत् । इति [illegible] ऋग्वेदे । १ । ५२ । ६ ।

"वृत्रस्य यत् प्रवणे दुर्गृ[illegible]"

तन्वी, स्त्री, (तनुः+"वोतो गुणवचनात्" [illegible] १ । ४४ । इति ङीष् ।) [illegible]

"तत्र तन्वि ! कुचाभ्यां [illegible] आयसुमकरणाच्छ्रमात् यत्र [illegible]" इति [illegible]

शालपर्णी । इति राजनिर्घण्टः । (वृत्[illegible] चरणविशेषः । इति छन्दो[illegible] तन्वादिकं छन्दःशब्दे द्रष्टव्यम् ।)

तप, क दाहे । इति कविकल्पद्रुमः । ([illegible] सकं-सेट् ।) क, तापयति । [illegible] इति दुर्गादासः ।

… दाहे । इति कविकल्पद्रुमः ॥ (भ्वां-…उभं-च-सकं-सेट् ।) ङ, तपते । …, तपते । अयमात्मनेपदीत्यन्ये । इति दुर्गा-… ॥

… ओ } दवैश्वर्ययोः । इति कविकल्प-
… ओ } द्रुमः ॥ (भ्वां-परं-सकं-अकं-च-…ट् । दिवादिपक्षे आत्मं ।) दव उप- । "तपति तनुगात्रि ! मदनस्त्वाम् ।" ओ, …पीत् । य ङ, तप्यते धनी ईश्वरः स्यादि- । ओ, अतप्त । दिवादिपक्षे ऐश्वर्य्ये एव …े । इति दुर्गादासः ॥

…न्] क्ली, (तपति तापयति वा । तप उप- + "सर्व्वधातुभ्योऽसुन् ।" उणां । ४।१८८ । असुन् ।) वेधक्लेशजनकं कर्म्म । यथा,—
"…ऽतिचपला पुत्रि ! न क्षमं तावकं वपुः ।
…सहनस्वभावस्य तपसः सौम्यदर्शने ॥"
…तिथ्यादितत्त्वे मत्स्यपुराणवचनम् ॥ * ॥
…लं यथा,—
"…भिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः ।
…त्वं तथा लोको वदते सति साधने ॥"
इति च तत्रैव तद्वचनम् ॥ * ॥
… च । मरीचिरुवाच ।
"…स्य तपोमूलं यज्ञः स्वाध्याय एव च ।
…द्मे ! फलं ब्रूहि तपसोऽध्ययनस्य च ॥
वह्निरुवाच ।
…ध्यायनपसोर्वक्ष्ये तन्मे निगदितं शृणु ।
…ो हि परं नास्ति तपसा विन्दते महत् ॥
…ा क्षीयते पापं मोदते सह दैवतैः ।
…ा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ॥
…ा सर्व्वमाप्नोति तपसा विन्दते परम् ।
…विज्ञानसम्पन्नः सौभाग्यं रूपमेव च ॥
…ा लभते सर्व्वं तथैवाध्ययनेन च ।
…न् स्वधर्म्मसंयुक्तो नित्यं सिध्यति पण्डितः ॥
…ान् सुखमवाप्नोति इह लोके परत्र च ॥"
…ाये वह्निपुराणे नित्याह्निकसामान्यविधि-…ाध्यायः ॥ तपस्या । तत्त्रिविधम् । शारीरं …कं मानसञ्च । यथा,—
"…द्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम् ।
…ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते ॥१॥
…नुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत् ।
…स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते ॥२॥
…ःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
…भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥"३॥
…ि त्रिविधम् । सात्त्विकं राजसं तामसञ्च । …दा,—
"…श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः ।
…फलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१॥
…सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
…दिह प्रोक्तं राजसं चलमध्रुवम् ॥२॥
…मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ।
…परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥"३॥
…इति श्रीभगवद्गीतायाम् । १७ । १४—१९ ॥

…जनलोकादूर्द्ध्वलोकः । यथा,—
"अस्योपरि तपोलोकस्तेजोमय उदाहृतः ।
वैराजा यत्र ते देवा वसेयुर्द्देवपूजिताः ॥
वासुदेवे मनो येषां वासुदेवेऽर्पितक्रियाः ।
तपसा तोष्य गोविन्दमभिलाषविवर्ज्जिताः ॥
तं तपोलोकमासाद्य वसन्ति विजितेन्द्रियाः ।
शिलोञ्छवृत्तयो ये वै दन्तोलूखलिकाश्च ये ॥
येऽश्मकुट्टाश्च मुनयः शीर्णपर्णाशिनश्च ये ।
ग्रीष्मे पञ्चाग्नितपसो वर्षासु स्थण्डिलेशयाः ॥
हेमन्ते शिशिरे वा ये क्षिपन्ति सलिले क्षपाः ।
कुशाग्रनीरविन्दूंश्च तृषिता यतयोऽपिबन् ॥
वाताशिनोऽतिक्षुधिताः पादाङ्गुष्ठाग्रभूस्पृशः ।
ऊर्द्ध्वहस्ता रविदृशस्त्वेकाङ्घ्रिस्थाननिश्चलाः ॥
ये वै दिवानिरुच्छ्वासा मासोच्छ्वासाश्च ये परे ।
मासोपवासं कुर्व्वन्ति चातुर्म्मास्यव्रताश्च ये ॥
कल्पन्ते तोयपाना ये ये षण्मासोपवासकाः ।
ये च वर्षानिमेषा ये वर्षधाराम्बुतर्पकाः ॥
स्थाणुसाम्योपसंप्राप्ता मृगकण्डूतिसौख्यदाः ।
जटाटवीकोटरान्तः कृतनीडाण्डजाश्च ये ॥
प्ररूढवल्मिकाङ्गाश्च स्नायुनद्धास्थिसञ्चयाः ।
लताप्रतानैः परितो वेष्टितावयवाश्च ये ॥
शस्यानि च प्ररूढानि यदङ्गेषु महीपते ! ।
इत्येतैर्न्नियमैर्य्ये तु क्लिष्टात्मानस्तपोधनाः ॥
ब्रह्मायुषस्तपोलोके ते वसन्त्यकुतोभयाः ॥"
इति पद्मपुराणम् ॥ * ॥
चान्द्रायणादिव्रतम् । धर्म्मः । इति मेदिनी । सि, २४ ॥

तपः, पुं, (तपति तापयति वा । तप सन्तापे + पचाद्यच् ।) ग्रीष्मः । इत्यमरः । १ । ४ । १९ ॥ (यथा, माघे । १ । ६६ ।
"तपेन वर्षाः शरदा हिमागमो
वसन्तलक्ष्म्या शिशिरः समेत्य च ।
प्रसूनकॢप्तिं दधतः सदर्त्तवः
पुरेऽस्य वास्तव्यकुटुम्बितां ययुः ॥")

तपःकरः, पुं, (तपः करोतीति । कृ + टः ।) तपस्वी मत्स्यः । इति शब्दरत्नावली ॥ तपस्याकारके, त्रि ॥

तपःक्लेशसहः, त्रि, (तपसः क्लेशं सहते इति । सह + अच् ।) दान्तः । इत्यमरः । २ । ७ । ४३ ॥

तपःस्थली, स्त्री, (तपसः स्थली ।) काशी । इति त्रिकाण्डशेषः ॥

तपती, छाया नाम सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥ सूर्य्यकन्या । सा पूरुवंशीयसम्वरणराज-पुत्रसम्वरणभार्य्या । इति श्रीभागवतम् ॥ (यथा, महाभारते । १ । ९४ । ४० ।
"ततः सम्वरणात् सौरी सुषुवे तपती कुरुम् ॥"
अस्या विशेषविवरणादिकं तत्रैव १७२ अध्यायादौ द्रष्टव्यम् ॥)

तपनः, पुं, (तपतीति । तप + कर्त्तरि ल्युः ।) सूर्य्यः । (यथा, महाभारते । १ । १ । [illegible] ।
"[illegible]")
[illegible] । [illegible] । [illegible] । इति हेमचन्द्रः । [illegible] । इति [illegible]

अर्कवृक्षः । क्षुद्राग्निमन्थवृक्षः । सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशत्याम् । २६ ।
"अनयनपथे प्रिये ! न यथा यथा दृश्य एव दुष्यापे ।
ज्ञानैव केवलं निशि तपनशिला वासरे ज्वलति ॥")
अग्निविशेषः । यथा, हरिवंशे । १७८ । ३१ ।
"ते जातवेदसः सर्व्वे कल्माषः कुसुमस्तथा ।
दहनः शोषणश्चैव तपनश्च महाबलः ॥"
स्त्रीणां सत्त्वजे अलङ्कारविशेषे, क्ली । तल्लक्षणं यथा साहित्यदर्पणे । ३ । ११६ ।
"तपनं प्रियविच्छेदे स्मरावेशोत्थचेष्टितम् ॥"
उदाहरणं यथा, तत्रैव,—
"श्वासान्मुञ्चति भूतले विलुठति त्वन्मार्गमालोकते
दीर्घं रोदिति विक्षिपत्यत इतः क्षामां भुजावल्लरीम् ।
किञ्च प्राणसमानकाङ्क्षितवती स्वप्नेऽपि ते सङ्गमं
निद्रां वाञ्छति न प्रयच्छति पुनर्द्दग्धो विधिस्तामपि ॥")

तपनच्छदः, पुं, (तपनः अतिरक्तश्छदो यस्य ।) आदित्यपत्रवृक्षः । इति राजनिर्घण्टः ॥

तपनतनया, स्त्री, (तपनस्तापको वह्निस्तनयो यस्याः । वह्निगर्भत्वादस्यास्तथात्वम् ।) शमीवृक्षः । (तपनस्य सूर्य्यस्य तनया ।) यमुना । इति राजनिर्घण्टः ॥

तपनमणिः, पुं, (तपनः सूर्य्यस्तत्प्रियो मणिः ।) सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥

तपनात्मजा, स्त्री, (तपनस्य सूर्य्यस्य आत्मजा कन्या ।) गोदावरी नदी । इति हेमचन्द्रः ॥ यमुना च ॥

तपनी, स्त्री, (तपनः सूर्य्यो जनकतयास्त्यस्या इति अच् । ततो गौरादित्वात् ङीष् ।) गोदावरी । इति हेमचन्द्रः ॥

तपनीयं, क्ली, (तप + अनीयर् । वह्नौ शोधनीय-मतीवशोधनीयत्वादस्य तथात्वम् ।) स्वर्णम् । इत्यमरः । २ । ९ । ९४ ॥ (यथा, रघुः । १८ । ४१ ।
"तस्यादिमः [illegible]-
[illegible] तपनीयपीठम् ॥")

तपनीयकं, क्ली, (तपनीय + स्वार्थे कन् ।) सुवर्णम् । इति राजनिर्घण्टः ॥

तपनेष्टं, क्ली, (तपनस्य सूर्य्यस्य इष्टम् । सूर्य्यप्रियत्वादस्य तथात्वम् ।) ताम्रम् । इति राजनिर्घण्टः ॥

तपस्, पुं, (तपतीति । तप + "[illegible]" उणां । [illegible] । इति असुन् ।) [illegible] । इति त्रिकाण्डशेषः ॥ [illegible] । इति [illegible] ॥

[illegible], पुं, [illegible]
[illegible]
[illegible]
[illegible] इति हेम[illegible]

तपस्यं, क्ली, (तपसि माघे भवम्। तपस्+यत्।) कुन्दपुष्पम्। इति शब्दचन्द्रिका॥ (तपश्चरतीति। तपस्+क्यङ्। ततो भावे यत्।) तपश्चरणम्। यथा, महाभारते। १३।१०।१३।
"अथास्य बुद्धिरभवत् तपस्ये भरतर्षभ!॥")

तपस्यः, पुं, (तपसि माघे साधुः। तपस्+"तत्र साधुः।" ४।४।९८। इति यत्।) फाल्गुनमासः। इत्यमरः।१।४।१५। (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये। "तत्र माघादयो द्वादशमासाः द्विमासिकमृतुं कृत्वा षडृतवो भवन्ति। ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः।") अर्ज्जुनः। इति हेमचन्द्रः॥ (तामसस्य मनोः पुत्त्रविशेषः। यथा, हरिवंशे। ७।२४।
"द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोधनः।
तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः।
तामसस्य मनोरेते दश पुत्त्रा महाबलाः॥")

तपस्या, स्त्री, (तपश्चरतीति। "कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोः।" ३।१।१५। इति क्यङ्। ततः "अ प्रत्ययात्।" ३।३।१०२। इति अ ततष्टाप्।) तपः। तत्पर्य्यायः। व्रतादानम् २ परिचर्य्या ३ नियमस्थितिः ४। इति हेमचन्द्रः॥ व्रतचर्य्या ५। इति मेदिनी॥

तपस्विनी, स्त्री, जटामांसी। इत्यमरः।२।४।१२४॥ (तपस्वितुल्यजटायुक्तत्वादस्यास्तथात्वम्। यथा, वैद्यकरत्नमालायाम्।
"नलदं नन्दिनी पेशी मांसी कृष्णजटा जटी।
किराविनी च जटिला लोमशा तु तपस्विनी॥")
कटुरोहिणी। इति हेमचन्द्रः॥ महाश्रावणिका। इति भावप्रकाशः॥ (तपोऽस्या अस्तीति। तपस्+"तपःसहस्राभ्यां विनीनी।" ५।२।१०२। इति विनिः। ततः स्त्रियां ङीप्।) तपोयुक्ता स्त्री॥ (यथा, रामायणे। ३।२।७।
"पत्नीं स च महाकायो विद्धो ग्रहो तपस्विनीम्।
अनसूयां महाभागां सर्व्वभूतहिते रताम्॥"
दीना। दुःखिता। यथा, भागवते। १।८।४४।
"ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम्।
पितरं सान्त्वयामास गान्धारीञ्च तपस्विनीम्॥"
पतिव्रता। यथा, नैषधे। १।१३५।
"मदेकपुत्त्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे! त्वां करुणा रुणद्धि न॥"
लम्। [illegible]
कालिका [illegible]

चित्तम्। कमलाकरकोपमानम्। तद् यदादि-
कोटानां अनकल्पम्। इति त्रयोदशः। *।
अस्या दिग्भ्यो विपत्तयः एकाग्यामकरामयः।
इति ज्योतिषम्। यज्ञादिर्विधिदानम्। इति
मेदिनी। प्रतिष्ठा। इति हेमचन्द्रः। यज्ञादि-
सम्पादकतद्दक्षविहितदानम्। सा [illegible]
गौरभ्याद्दक्षिणाभूता। यथा,—
"कार्त्तिकीपूर्णिमायान्तु रासे राधाङ्गदेहतः
आविर्भूता दक्षिणा सा तेन दक्षिणा।"
दक्षिणाया अदाने तस्या शुद्धिर्यथा,—
"यज्ञो दक्षिणया साहं पुत्रेण च फलेन च।
कर्म्मिणां फलदाता वेदे वेदविदो विदुः।
कृत्वा कर्म्म च तस्यैव तूर्णं दद्याच्च दक्षिणाम्।
तत्कर्म्मफलमाप्नोति वेदैरुक्तमिदं [illegible]
कर्त्ता कर्म्मणि पूर्णे च तत्क्षणं [illegible]
न दद्याद्ब्राह्मणेभ्यश्च दैवेनाज्ञानतो [illegible]
मुहूर्त्ते समतीते तु द्विगुणा [illegible]
एकरात्रे व्यतीते तु [illegible]
त्रिरात्रे तद्दशगुणा [illegible]
मासे लक्षगुणा [illegible]
संवत्सरे व्यतीते तु [illegible]
कर्म्म तद्यजमानस्य [illegible]
स च ब्रह्मस्वापहारी [illegible]
दरिद्रो व्याधियुक्तश्च [illegible]
[illegible]

मेरः। इति हेमचन्द्रः॥ इक्ष्वाकुराजपुत्त्रः। इति रामायणम्॥ (यथा, हरिवंशे। १०। २२।
"पुत्त्रकश्चाम्बरीषश्च दण्डश्चेति सुतास्त्रयः।
यश्चकार महात्मा वै दण्डकारण्यमुत्तमम्॥"
क्रोधहन्तृसुरस्यांशेनावतीर्णः स्वनामख्यातनृपविशेषः। यथा, महाभारते।१।६७।३६।
"क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः।
दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ॥"
विष्णुः। यथा, महाभारते। १३। १४९। १०५।
"धनुर्द्धरो धनुर्व्वेदो दण्डो दमयिता दमः॥"
महादेवः। यथा तत्रैव। १२। २८४। १६।
"शम्बुकाय दण्डाय पर्णचीरपटाय च॥")
कालभेददण्डस्य प्रमाणं यथा,—
"षट्पलं पात्रनिर्म्माणं गभीरं चतुरङ्गुलम्।
स्वर्णमाषैः कृतच्छिद्रं कुण्डैश्च चतुरङ्गुलैः॥
यावज्जलप्लुतं पात्रं तत्कालं दण्डमेव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥
ब्राह्मणं प्रति दण्डोद्यमे दण्डनिपातने च दोषो यथा, प्रायश्चित्ततत्त्वे।
"अवगूर्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने॥"
"कौटसाक्ष्ये दण्डा यथा,—
लोभान्मोहाद्भयान्मैत्रात् कामात् क्रोधात्तथैव च।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते॥
एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत्।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्व्वशः॥
लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम्।
भयाद्द्वौ मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम्॥
कामाद्दशगुणं पूर्व्वं क्रोधात्तु त्रिगुणं परम्।
अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु॥
एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान्मनीषिभिः।
धर्म्मस्याव्यभिचारार्थमधर्म्मनियमाय च॥
कौटसाक्ष्यन्तु कुर्व्वाणान् त्रीन् वर्णान् धार्म्मिको नृपः।
प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत्॥ *॥
दण्डस्य स्थानानि यथा,—
दशस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्॥
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च॥
अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत्॥*॥
अधर्म्मदण्डने दोषो यथा,—
अधर्म्मदण्डनं लोके यशोघ्नं कीर्त्तिनाशनम्।
अस्वर्ग्यञ्च परत्रापि तस्मात्तत् परिवर्ज्जयेत्॥
अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकञ्चैव गच्छति॥ *॥
दण्डस्य वैपरीत्येन विक्रमो यथा,—
वाग्दण्डं प्रथमं कुर्य्याद्धिग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डन्तु वधदण्डमतः परम्।
वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात्।
तदैषु सर्व्वमप्येतत् प्रयुञ्जीत चतुष्टयम्॥

दण्डस्य भेदा यथा,—
पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः।
मध्यमः पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः॥
चौरो हृते प्रतिज्ञाते पञ्चकं शतमर्हति।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम्॥ *॥
दोषविशिष्टकन्यादाने दण्डो यथा,—
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति।
तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान्॥
अकन्येति च यः कन्यां ब्रूयाद्द्वेषेण मानवः।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन्॥ *॥
गवादीनां शस्यभक्षणे दण्डो यथा,—
पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः।
स पालः शतदण्डार्हो विपालान् वारयेत् पशून्॥
क्षेत्रादिसीमाविवादे दण्डा यथा,—
क्षेत्रकूपतडागानामारामस्य गृहस्य च।
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः॥
सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम्।
सर्व्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम्॥
गृहं तडागमारामं क्षेत्रं वा भीषया हरन्।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः॥ *॥
वाक्पारुष्ये दण्डा यथा,—
शतं ब्राह्मणमाकुश्य क्षत्त्रियो दण्डमर्हति।
वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्त्रियस्याभिशंसने।
वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः॥
समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत्॥
एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥
नामजातिग्रहन्त्वेषामभिद्रोहेण कुर्व्वतः।
निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः॥
धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः॥
श्रुतं देशञ्च जातिञ्च कर्म्म शारीरमेव च।
वितथेन ब्रुवन् दर्पाद्दाप्यः स्याद्द्विशतं दमम्॥
काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम्।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम्॥
मातरं पितरं जायां भ्रातरं तनयं गुरुम्।
आक्षारयन् शतं दाप्यः पन्थानं चाददद्गुरोः॥
ब्राह्मणक्षत्त्रियाभ्यान्तु दण्डः कार्य्यो विजानता।
ब्राह्मणे साहसः पूर्व्वः क्षत्त्रिये त्वेव मध्यमः॥
विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः।
छेदवर्ज्जं प्रणयनं दण्डस्येति विनिश्चयः॥ *॥
दण्डपारुष्ये दण्डा यथा,—
येन केनचिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम्॥
पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति।
पादेन प्रहरन् कोपात् पादच्छेदनमर्हति॥
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः।
कट्यां कृताङ्को निर्वास्यः स्फिचं वास्यावकर्त्तयेत्॥
अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः।
अवमूत्रयतो मेढ्रमवशर्द्धयतो गुदम्॥

केशेषु …
… १६।
लिङ्गमिन्द्रिः शतं
मांसभेत्ता …
वनस्पतीनां …
…
मनुष्याणां पशूनाञ्च
यथा यथा महद्दुःखं
अङ्गानां …
समुत्थानव्ययं दाप्यः
… १६।
स तस्योत्पादयेत्तुष्टिं
…
मूल्यात् पञ्चगुणो दण्डः
यानस्यैव तु …
दशातिवर्त्तनान्याहुः
छिन्ननास्ये भग्नयुगे
अक्षभङ्गे च …
छेदने चैव …
आक्रन्दे …
यत्रापवर्त्तते युग्यं वैगुण्य…
तत्र स्वामी …
प्राजकश्चेद्भवेदाप्तः
युग्यस्थाः प्राजकेऽनाप्ते स…
स चेत्तु पथि संरुद्धः
प्रमापयेत् प्राणभृतस्त…
… १२ …
प्राणभृत्सु महत्स्वर्द्धं
क्षुद्रकाणां पशूनाञ्च …
पञ्चाशत्तु भवेद्दण्डः शु…
गर्द्दभाजाविकानाञ्च द…
…
भार्य्या पुत्त्रश्च दासश्च …
… २९ …
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे …
… ३०।
चौरस्य दण्डविधिर्यथा,—
यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च…
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन्…
धान्यं दशभ्यः …
… ३२ …
तथाधरिमभेयानां शतादभ्यधिके वधः।
सुवर्णरजतादीनामुत्तमानाञ्च वाससाम्।
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते।
शेषेऽप्येकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्।
पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः।
मुख्यानाञ्चैव रत्नानां हरणे वधमर्हति।
महापशूनां हरणे शस्त्राणामौषधस्य च।
कालमासाद्य कार्य्यञ्च राजा दण्डं…
गोषु ब्राह्मणसंस्थासु छुरिकायाश्च…
पशूनां हरणे चैव सद्यः कार्य्योऽर्द्धपा…
सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य…

त्रि । यथा, महाभारते । ११३६।२८॥
नो महाबाहुर्दण्डपाणिरिवान्तकः ।
महासेनां मकरः सागरं यथा ॥")
, क्ली, (दण्डेन यत् पारुष्यं परुषता ।
नेनेति दण्डो देहस्तेन यत् पारुष्यं
परुषमिति मिताक्षरा ।) राज्ञां सप्त-
र्गतव्यसनविशेषः । इति हेमचन्द्रः ।
०२ ॥ अष्टादशविवादान्तर्गतविवाद-
। तत्तु ताड़नादि । इति मनुटीकायां
द्रः ॥ (यथा, मनुः । ८ । २७८ ।
र्ध्व प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् ॥")
पुं, (दण्डं शरीरं पालयतीति । पालि
।) अङ्गरक्षकमनुष्यः । दाड़िका इति
इति हारावली । १८० ॥ (दण्डेन
ीति । पालि+अच् ।) द्वारपालः ॥
, पुं, (दण्डमालवत् कायतीति । कै+
मत्स्यमत्स्यः । इति हारावली ।

, पुं, (दण्ड इव वालधिर्यस्य ।) हस्ती ।
न्दरमाला ॥
पुं, (दण्डं चक्रभ्रामणार्थं लगुड़ादिकं
ति । भृ+क्विप् तुगागमश्च ।) कुम्भ-
इति त्रिकाण्डशेषः ॥ (दण्डं दमनं
ति ।) दण्डधारके, त्रि ॥
, स्त्री, (दण्डाय प्रभुदमनाय या यात्रा
म् ।) दिग्विजयः । सञ्चालनम् । वर-
। इति मेदिनी । रे, २६५ ॥
, पुं, (दण्डं यच्छतीति । यम+अण् ।)
। दिनम् । यमस्य । इति मेदिनी । मे,

स्त्री, डङ्गरीफलम् । इति राजनिर्घण्टः ॥
, [न्] पुं, (दण्डेन पदतीति । पद+
।) दवँटः । द्वारपालः । इति हारा-
। १०८ । दण्डवक्तरि, त्रि ॥
, [न्] पुं, (दण्डेन वसतीति । वस+
।) द्वारपालः । इति त्रिकाण्डशेषः ॥
तप्राधिष्ठितपत्रः । इति जटाधरः ॥
म्भः, पुं, (दण्डं मन्थानदण्डं विष्कभ्नाति
ानि यत्र । वि+स्कम्भ+अधिकरणे
। वैः स्कभ्नातेर्नित्यमिति षत्वम् ।) यत्र
ेो आकर्षणार्थं रज्जुः दण्डो निबध्यते
पोलमथोपा खुँटी इति भाषा । तत्-
प । कुठरः २ । इत्यमरः । २।६।७४ ॥
कः, पुं, (धर्मविहीनत्वात् दण्ड इव दण्डः ।
मार्थे कन् ।) थुर्ही । इति राज-
ट ॥
, स्त्री, (दण्ड इव हस्तौ हस्तद्वौ
।) तगरपुष्पम् । इति राजनिर्घण्टः ॥
, स्त्री, घासम् । इति शब्दार्थकल्प-
॥ (दण्डिनो बहिर्दण्डादिकं यतीनां
धिनयत् आर्द्रलिङ्गत्वेन प्रतीयमानत्वात्
ाभिधीयमानं । दण्डस्य धारणस्य इयो

समाहारः । यतीनां दण्डं म्गचर्म्म च । यथा,
देवीभागवते । १ । १८ । ३१ ।
"दण्डाजिनकृता चिन्ता यथा तव वनेऽपि च ।
तथैव राज्यचिन्ता मे चिन्तयानस्य वा न वा ॥")
दण्डादण्डि, व्य, (दण्डैश्च दण्डैश्च प्रहृत्य प्रवृत्तं युद्धम् ।
"इच् कर्म्मव्यतिहारे ।" ५ । ४ । १२७ ।
इति इच् ।) परस्परदण्डकरणकप्रहाररूप-
युद्धम् । इति व्याकरणम् ॥ लाठालाठि इति
भाषा ॥
दण्डारः, पुं, (दण्डं ऋच्छतीति । ऋ+अण् ।)
वाहनम् । मत्तहस्ती । शरयन्त्रकम् । कुम्भ-
कारस्य चक्रम् । इति मेदिनी । रे, १६८ ॥
दण्डाहतं, क्ली, (दण्डेन आहतम् ।) घोलम् ।
इत्यमरः ।२।९।५३ ॥ (दण्डेन ताड़िते, त्रि ॥)
दण्डिकः, पुं, (दण्डोऽस्त्यस्येति । दण्ड+"अत इनि-
ठनौ ।" ५ । २ । ११५ । इति ठन् ।) दण्ड-
धारकः । छड़िबरदार इति आशाबरदार इति
च भाषा । मत्स्यविशेषः । डानिकया माछ
इति भाषा । अस्य गुणाः । कफवायुपित्त-
नाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राज-
वल्लभः ॥ (दण्डदातरि नियामके, त्रि । यथा,
महाभारते । ६ । ११ । २६ ।
"न तत्र राजा राजेन्द्र ! न दण्डो न च दण्डिकः ।
स्वधर्म्मेणैव धर्म्मज्ञ ! ते रक्षन्ति परस्परम् ॥")
दण्डिका, स्त्री, (दण्डवदाकृतिरस्त्यस्याः । दण्ड+
ठन्+टाप् ।) हारविशेषः । इति जटाधरः ॥
रज्जुः । यथा, अङ्गुल्योत्कर्षं दण्डिकां छिनत्ति ।
इति सुपद्मव्याकरणम् ॥ दण्डिका रज्जुरिति
तट्टीकाकारः ॥
दण्डितः, त्रि, (दण्डः सञ्जातोऽस्येति । दण्ड+
"तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५।२।३६।
इति इतच् ।) कृतदण्डः । तत्पर्य्यायः ।
शासितः २ शासितः ३ । इति हेमचन्द्रः ॥
दण्डी, [न्] पुं, (दण्डोऽस्त्यस्येति । दण्ड+"अत
इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।)
जिनविशेषः । इति त्रिकाण्डशेषः ॥ (स तु कवी-
नामग्रगण्यः काव्यादर्शदशकुमारचरितादिग्रन्थ-
प्रणेता । शङ्कराचार्य्यसमकालीनोऽयम् । यथा,
शङ्करविजये । १५ । १४० ।
　　"स कथाभिरवन्तिषु प्रसिद्धान्
　　विबुधान् भाजमहेन्द्रदण्डिमुख्यान् ।
　　शिथिलीकृतदुर्म्मताभिमानान्
　　निजभाष्यश्रवणोत्सुकांश्चकार ॥")
यथा, कालिदासः ।
"जाते जगति वाल्मीकौ कविरित्यभिधाभवत् ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥"
दमनकवृक्षः । इति राजनिर्घण्टः ॥ यमः ।
(यथा, महाभारते । १ । १६० । १७ ।
　　"हं दण्डमादाय विदूमनाशे
　　दण्डीव दण्डं निशिताग्र उग्रम् ।")
द्वाःस्थः । मञ्जुघोषः । (अस्य मस्करादित्वं
मनुक्तं मनौ । ६ । ४१-४८ ।

"आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ।
समुपोढ़ेषु कामेषु निरपेक्षः परिव्रजेत् ॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥
अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसङ्कुसुको मुनिर्भावसमाहितः ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्द्देशं भृतको यथा ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिवेज्जलम् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥
क्रुध्यन्तं न प्रतिक्रुध्येदाकुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत् ॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।
आकीर्णं भिक्षुकैर्वान्यैरागारमुपसंव्रजेत् ॥
क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेन्नियतो नित्यं सर्व्वभूतान्यपीड़यन् ॥
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥
अलावुं दारुपात्रञ्च मृण्मयं वैदलन्तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालञ्चरेद्भैक्षं न प्रसज्जेत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यात् मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥"
दण्डग्रहणादेव दण्डी । आर्य्यादिषु विष्टमानेषु
दण्डग्रहणेन प्रत्यवायो जायते । यदुक्तं महा-
निर्व्वाणतन्त्रे १२ पटले ।
"निशायां शैवदुःखशान्त्यायां महेश्वरि ! ।
सर्व्वं हि विमलं यस्य यः कुर्य्याद्दण्डधारणम् ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥" ·
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

येषुः इति साम्प्रदायिकाः । एतेषां काशी एव प्रधानतमं वासस्थानम् । * । महादेवः । यथा, महाभारते । १३ । १७ । १०८ ।
"मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ।"
योगाचार्य्यविशेषः । यथा, शिवपुराणे वायु-संहितायाम् । उत्तरभागे । १० । ५ ।
श्रीकृष्ण उवाच ।
"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यच्छलेन तु ।
अवताराणि शर्व्वस्य शिष्याश्च भगवन् ! वद ॥"
उपमन्युरुवाच ।
"महाकालश्च शूली च दण्डी मुण्डी स एव च ।"
धृतराष्ट्रपुत्राणामेकतमः । यथा, महाभारते धृतराष्ट्रपुत्रनामकथने । १ । ६७ । १०२ ।
"निषङ्गी कवची दण्डी दण्डधारो धनुर्ग्रहः ।"
दण्डीत्यत्र चापीति केचित् ।) दण्डयुक्ते त्रि । इति हेमचन्द्रः । २ । ३८५ । (यथा, महाभारते । १३ । १४ । ३७४ ।
"दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः ।")

दण्डोत्पलं, क्ली, (दण्डयुक्तमुत्पलमिव ।) क्षुप-विशेषः । डानिपोका इति कामरूपे इति च भाषा । अस्य गुणाः । चयश्वासकासनाशि-त्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥ तत्तु पीतरक्तश्वेतपुष्पभेदेन त्रिविधम् । पीतस्य पर्य्यायः । गोवन्दनी २ गन्धवल्ली ३ सहदेवी ४ सहा ५ । रक्तस्य पर्य्यायः । विश्वदेवा १ । श्वेतस्य । दण्डोत्पला १ । इति रत्नमाला ॥

दण्डोत्पला, स्त्री, (दण्डोत्पल+टाप् ।) श्वेत-पुष्पदण्डोत्पलम् । इति रत्नमाला ॥

दण्ड्यः, त्रि, (दण्ड्यते इति । दण्ड+कर्म्मणि ण्यत् । यद्वा, दण्डमर्हतीति । दण्ड+"दण्डादिभ्यो यत् ।" ५ । १ । ६६ । इति यत् ।) दण्डनीयः । दण्डि-तव्यः । (यथा, मार्कण्डेये । २८ । ३४ ।
"यथोक्तञ्च स्वकं धर्म्मं स्ववर्णाश्रमसंश्रितम् ।
नरोऽन्यथा प्रवर्त्तेत स दण्ड्यो भूभृतो भवेत् ॥")
तत्पर्य्यायः । दण्डार्हः २ । इति जटाधरः ॥ (यथा, रघुः । १ । २५ ।
"शिक्षे दण्ड्यतो दण्ड्यान् परिणेतुः प्रसूतये ।")

दत्, पु, दन्तः । इति शब्दचन्द्रिका । अस्य बहु-वचने दतः ॥

दत्तं, त्रि, (दीयते इति । दा+क्तः ।) दत्तम् । कृतदानम् । तत्पर्य्यायः । विश्राणितम् २ । इति त्रिकाण्डशेषः । विश्राणितम् ३ । इति शब्द-रत्नावली ॥ (यथा, माघे । १ । १५ ।
"स्वहस्तदत्ते मुनिमासने मुनि-
श्चिरन्तनस्तावदभिन्यवीविशत् ॥"
दा+भावे क्तः ।) दाने, क्ली । तत् सप्तविधं यथा,—
"दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकम् ।
पण्यमूल्यं भृतिस्तुष्टा स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥
अदत्तन्तु भयक्रोधशोकावेगरुगन्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितम् ।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्ये चाधर्म्मसंहिते ।
यद्दत्तं स्यादविज्ञानात् तदत्तमिति स्मृतम् ॥"
इति मिताक्षरा ॥

दत्तः, पुं, राजविशेषः । स कलिङ्गराजः । इति हेमचन्द्रः । ३ । ३६० ॥ (स तु भेदविशेषः । अपरः अन्विपरशुरामो नृपविशेषः । यथा, महाभारते । १२ । ४९ । १५ ।
"आयुर्मतङ्गो दत्तश्च द्रुपदो मात्स्य एव च ।"
यदुवंशीयस्य राजाधिदेवस्य पुत्रः । यथा, हरिवंशे । ३८ । २ ।
"राजाधिदेवपुत्रास्तु जज्ञिरे वीर्य्यवत्तराः ।
दत्तानिदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः ॥")
वैश्यस्योपाधिविशेषः । यथा,—
"शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः ।
भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् ॥"
इत्युद्वाहतत्त्वम् ॥
अधुना कायस्थादेरुपाधिश्च । (यथा, कुल-दीपिकायाम् ।
"गौड़े घोषौ कौलिन्यमाविरवसुतिलका मौलिका ये हि मित्राः
स्ते दत्ताः शीलदासाः करगुहवसिताः पालिताः सिंहदेवाः ॥")
भगवदवतारविशेषः । स अत्रिपुत्रः दत्तात्रेय इति नाम्ना ख्यातः । इति श्रीभागवतम् ॥ (पुत्र-विशेषः । यथा, देवीभागवते । १ । ६ । ४८ ।
"कुण्डः सहोढ़ः कानीनः क्रीतः प्राप्तस्तथा वने ।
दत्तः केनापि चायातो धनयासादसुताः स्मृताः ॥"
तथा, महाभारते । १ । १२० । ३४ ।
"दत्तः क्रीत उपक्रीत उपागच्छेत् स्वयञ्च यः ॥")

दत्तकः, पुं, (दत्त एव । स्वार्थे कन् ।) द्वादश-विधपुत्रान्तर्गतपुत्रविशेषः । सपिण्डदत्तकस्य अशौचव्यवस्था । यथा, "सापिण्ड्यस्य पुत्रीकरणे तु सपिण्डमरणादिनिमित्तं दत्तकस्य तन्मरणा-दिनिमित्तं सपिण्डानां दशरात्रमेव निर्विवादम् ।" इति अनन्तभट्टकृतदत्तकदीधितिः ॥ * ॥ औरसपुत्रेण सह तस्य समभागित्वम् । यथा,—
"दत्तपुत्रे यथाजाते कदाचिच्चौरसो भवेत् ।
पितुर्वित्तस्य सर्व्वस्य भवेतां समभागिनौ ॥
इत्यपि वचनं शूद्रविषयम् ।" इति दत्तकचन्द्रिका ॥
अन्यत् पोष्यपुत्रशब्दे द्रष्टव्यम् ॥

दत्तकपुत्रः, पुं, (दत्तक एव पुत्रः ।) द्वादशविध-पुत्रान्तर्गतपुत्रविशेषः । यथा, याज्ञवल्क्ये ।
"दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥"
तत्परिग्रहणस्य प्रकारो यथा,—
"शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकः ।
तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः ॥
नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्ता-नाय पूर्व्वेषाम् ।
स्त्री पुत्रं न दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानु-ज्ञानाद्भर्त्तुः ।
पुत्रं प्रतिग्रहीष्यन् बन्धून् [illegible]
निवेद्य [illegible] मध्ये [illegible]
[illegible] ।" इति वशिष्ठः । [illegible]
यथा,—
"गोत्ररिक्थे जनयितुर्न [illegible]
गोत्ररिक्थानुगः पिण्डो [illegible]
पितुर्गोत्रेण यः पुत्रः [illegible]
आचूड़ान्तं न पुत्रः स पुत्रतां [illegible]
चूड़ाद्या [illegible]
दत्ताद्यास्तनयास्ते [illegible]
[illegible]
यद्योग्या [illegible]
[illegible]
दत्तको द्विविधः । [illegible]
कश्च । द्वैयामुष्यायणो
दत्तः तस्यैव पुत्रः । [illegible]
[illegible]
रपि पुत्रः ।" इति मिताक्षरा ।

दत्तप्रदानिकं, क्ली, (दत्त [illegible] मधस्य । दत्तप्रदान+ठञ् ।) विवादपदान्तर्गतविवादपदविशेषः । दातव्यं यस्मिन् विवादपदे तत् [illegible]
"दत्त्वा [illegible]
दत्तप्रदानिकं नाम [illegible]
"अभयस्य विहितमार्गेण । [illegible]

दत्तात्मा, [न्] पुं, (दत्त [illegible] विशेषः । यथा,—
"दत्तात्मा तु स्वयं दत्तः । [illegible]
विवरणम् । "दत्तात्मा तु पूर्वं
विहीनस्ताभ्यां यत्नो वा तत्राप्र
स्वयं दत्तत्वमुपगतः ।" [illegible]
(विश्वदेवानामन्यतमः । [illegible]
१३ । ६२ । ३४ ।
"सोमपः सूर्य्यसावित्रो [illegible]

दत्तानपकर्म्म, [न्] क्ली, (दत्त [illegible] अनादानं यत्र ।) दत्तप्रदानिकम् । [illegible]

दत्तिः, स्त्री, (दा+भावे क्तिन् ।) दान इति शब्दरत्नावली । (यथा, रघुः । [illegible]
"अपशोकमनाः कुटुम्बि[illegible]
मनुयतोऽस्य निवापदत्तिभिः ॥")

दत्तेयः, पुं, (दत्ताया अपत्यं पुमान् । [illegible] इन्द्रः । इति त्रिकाण्डशेषः ।

दद, क दाने । इति कविकल्पद्रुमः । (भ्वा०-आत्मं-सकं-सेट् ।) क, ददते । दादः ॥

ददनं, क्ली, (दद+भावे ल्युट् ।) दान इति शब्दरत्नावली ॥

ददः, पुं, कच्छपः । इति संक्षिप्तसार उणादिवृत्तिः ॥ (ददाति कर्म्मणिः । [illegible] कात् कः । यद्वा, दरिद्राति [illegible] दरिद्रा+न्यायादित्वात् कुप्रत्ययेन [illegible] उज्ज्वलदत्तः । १ । ८९ ।) [illegible]

दद्रुः

...कौलाम्बराधि । दद्रुः ॥
... आरग्वधाख्यमौषधम् ॥
...
... दद्रुघ्नम् ।"
इति भावप्रकाशः ॥

...पुष्टिकारिकुष्ठघ्नः ।
...शोधि दद्रुकुष्ठविनाशनः ॥
...कांकि चाक्षी भल्लातकः कुष्ठी ।
...प्रोक्तं दद्रुनिवारणं परम् ॥
...प्रभाति भावप्रकाशे दृष्टम् ।
...कांकि इति निघण्टौ च ।"
...इति गारुडे १७१ अध्यायः ॥ * ॥
...इति गारुडे ... शिव ॥ ।
...कन्याभल्लातकाद्या अश्वगन्धं शिव ॥
...कौशाम्बी सर्वं तथा च दद्रुघ्नम् ॥
...अयोमलं शुद्धिर्न भल्लातकम् ।
...सर्वं हेमाभ कुष्ठदद्रुविनाशनम् ॥
...हारीताख्य पुष्पं गोमूत्रेण कृतम् ।
...वौ हन्ति दद्रुं यामार्धे हि सर्वं तथा ।"
...इति गारुडे १८४ अध्यायः ॥ * ॥
...कुष्ठं दद्रु चर्मदलं सद्यःछिन्ना ।
...कुष्ठं कुष्ठं मांसी च चन्दनम् ॥
...हरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ।
...क्षारोत्थं आर्कक्षीरं शाकपत्रम् ।
...भागौ विडङ्गादीनम् ...
...पाकिको भागो ...
...दद्रुकुष्ठमालं प्रयोगैः
...पाकेन वा ... मर्दयेत्
...वा दद्राविस्फोटवान्ति च ।
...विचर्चिका चैव दद्रुविस्फोटवान्ति च ।
...इति प्रयोगानि कोमलत्वं जायते ॥"
...इति च गारुडे १९८ अध्यायः ॥ * ॥

...दद्रुविनाशिनी ।
...दद्रुमिश्रो दद्रुघ्नो सिध्मादिनाशनः ।
...दद्रुकुष्ठनिवारकः ॥
... प्रयोगोऽपि दद्रुकुष्ठनाशकः ।
...मामयानाशनयमकर्दे-
...भुजङ्गा: कान्तिकलाधिकाः ।
...उद्वर्तिका: कान्तिकलाधिकाः ।
...प्रसिद्धा: प्रसिद्धौरपि बहुमन्तो
...विधि: प्रसिद्धौरपि बहुमूल्यो
...विनाशयन्ति ।"
...इति कुष्ठ विनाशयन्ति ।"
...दद्रुघ्नम् कुष्ठम् इति लोके ।
...समरी इति लोके ।
...अश्विनकाधा विडङ्गनक्ष कुष्ठीभीरम् ।
...अक्षिनकाथा विडङ्गाख्य कुष्ठीभीरम् ।
...द्विगुणमनु दद्रुघ्नः ॥
...मिति समभागं स्यादेषां द्विगुणम् दद्रुघ्नः ॥
...शीताङ्गे ... प्रसूतानि संदध्यात् ।
...गुणे गोतक्रे जाति प्रसूतानि संदध्यात् ।
...वर्धितपादूर्ध्वं सम्यक् निम्बोदयर्पानि ॥
...लिपेन दद्रुघ्नमाह सर्वमपि ।
...दद्रुकुष्ठमपाठं विनाशयति ॥"
...इति भावप्रकाशः ॥

("कामाकुलं सर्वथा: कीर्तितं
...पामर्दसा बीजम् ।
...कर्दमं तक्रमिदं: प्रसिद्धौ
...दद्रुघ्नो मलकाहीनयुक्तः ॥
...विश्वद्भूतं चक्रमर्दस्य बीज-
...मिद्भूतं मेघरं तालदीनम् ।
...सिद्धो केनोऽयं तपित्याद्येन
...सर्वं नाशयत्येव योगः ॥"

कृष्णतौरी आग्निवान् द्वितीयो
भिन्नः क्रमो वर्धनः साक्षकर्दः ।
मोहं गीता साध्यनीह दद्रुः
कामादेर्मोदयान्तेषु प्रयुक्ताः ।"
कामादेर्मोदयांशेषु प्रभुत्वाः ।"
इति च सुश्रुते चिकित्सितस्थाने नवमेऽध्याये ॥)
दद्रुकः, पुं, (दद्रुरेव । स्वार्थे कन् ।) दद्रुरोगः ।
इति शब्दरत्नावली ॥
दद्रुघ्नः, पुं, (दद्रुं दद्रुरोगं हन्तीति । हन्+टक् ।)
चक्रमर्दकः । इत्यमरः । २ । ४ । १४० ॥ (यथा,
भावप्रकाशे पूर्वखण्डे प्रथमे भागे ।
"चाकुन्दी चाथ दद्रुघ्नः दिमुमर्दो हरीतकी ।"
अस्य गुणा यथा,—
"दद्रुघ्नं शीतलं वातकफापहम् ।"
कफकासकृमिश्वासदद्रुकुष्ठप्रणाशनम् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
दद्रुणः, त्रि, (दद्रुरस्त्यस्येति । दद्रु+"लोमादि-
पामादिपिच्छादिभ्यः शनेलचः ।" ५ । २ । १०० ।
इति नः ।) दद्रुरोगी । इत्यमरः । ३ । १ । ५८ ॥
दद्रुनाशिनी, स्त्री, (दद्रुं नाशयतीति । नश +
णिच् + णिनिः । ङीप् ।) तैलकीटः । इति
राजनिर्घण्टः ॥
दद्रुरोगी, [न्] त्रि, (दद्रुरोगोऽस्त्यस्येति । दद्रु-
रोग+इनिः ।) दद्रुरोगविशिष्टः । देदुया इति
भाषा । तत्पर्यायः । दद्रुणः २ । इत्यमरः ।
३ । १ । ५८ ॥
दद्रुः, पुं, (दरिद्राति दुर्गं चक्रमनेनेति । दरिद्रा +
"दरिद्राति यांलोपश्च ।" उणा० १ । ८२ । इति
कुः । इकारैकारादाकारलोपश्च ।) दद्रुः । इत्य-
मरटीकायां भरतः ॥
दद्रुघ्नः, पुं, (दद्रुं हन्तीति । हन्+टक् ।) दद्रुघ्नः ।
इति शब्दरत्नावली ॥
दद्रुलः, त्रि, (दद्रुरस्त्यस्येति । दद्रु+पामादित्वात्
लः ।) दद्रुणः । इत्यमरटीकायां रमानाथः ॥ (भ्वा-आत्मं-
दध, ङ दद्रे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-
सकं-सेट् ।) ङ, दधते । दद्रे दाम्प्रत्योः ।
धारणार्थकारे इतिमतिपुर्यनीतमिति मधुर-
भट्टोक्तम् । गवलतानियात् असैव टीपरस्मैपद-
साधनमिति रमानाथः । वस्तुतस्तु धाञ्
धातोरेव रूपमेतत् साध्यम् । इति दुर्गादासः ॥
दधि, क्ली, (दधातीति । धा+"आदृगमहनजनः
किकिनौ लिट् च ।" ३ । २ । १७१ । इत्यस्य
दृगमिजनिभ्यः ।" ६ । २ । १७१ । इत्यस्य
वार्तिकोक्त्या किः स च लिड्वत् ।) क्षीरजः ।
इति शब्दरत्नावली ॥ क्षीरोत्तरा-
वस्थम् । इति भाषा । तत्पर्यायः ।
वस्थाभावः । दइ इति भाषा । तत्पर्यायः ।
क्षीरजम् २ मङ्गल्यम् ३ विरलम् ४ । इति
राजनिर्घण्टः ॥ पयस्यम् ५ । घनेतरत् दधि
इत्यामरः ॥ अस्य गुणाः । अम्लत्वम् ।
दुग्धम् । इत्यमरः ॥ अस्य गुणाः । अम्लत्वम् ।
गुरुत्वम् । वातदोषशमनत्वम् । संग्राहित्वम् ।
मूत्रावहत्वम् । मेध्यत्वम् । शोफकफपित्तरक्त-
शमनत्वम् । वह्निभ्रान्तिकारित्वम् । कासश्वास-
पीनसविषमज्वरशीतज्वरहितत्वम् । रक्तोद्रेक-
शुक्रवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ उष्ण-
त्वम् । दीपनत्वम् । स्निग्धत्वम् । कषायानुरस-
त्वम् । पाके अम्लत्वम् । पित्तश्लेष्मप्रदत्वम् । मूत्र-
कृच्छ्रप्रतिश्यायशीतकविषमज्वराविकारेषु प्रशस्तत्वञ्च ।
इति भावप्रकाशः ॥ स्वादुत्वम् । वृष्यत्वम् ।
दीपनत्वम् । मङ्गल्यत्वम् । इति राजवल्लभः ॥ * ॥
अथ गव्यदुग्धदधिगुणाः । रुच्यत्वम् । स्निग्धत्वम् ।
उत्तमगुणत्वम् । पित्तानिलापहत्वम् । सर्व-
धातुविवर्धकत्वञ्च ॥ * ॥
निःसारदुग्धदधिगुणाः । संग्राहित्वम् । शीतल-
त्वम् । वातलत्वम् । लघुत्वम् । विष्टम्भित्व-
म् । दीपनत्वम् । रुच्यत्वम् । ग्रहणीरोगनाशित्वञ्च ॥ * ॥
मधुरदधिगुणाः । शुचिस्थत्वम् । मधुरत्वम् ।
वातनिवारकत्वञ्च ॥ * ॥
शर्करामिश्रितदधिगुणाः । श्रेष्ठत्वम् । तृष्णा-
पित्तास्रदाहनाशित्वञ्च ॥ * ॥
गुडयुक्तदधिगुणाः । वातनाशित्वम् । वृष्यत्वम् ।
बृंहणत्वम् । तर्पणत्वम् । गुरुत्वञ्च । इति भाव-
प्रकाशः ॥ * ॥
वातश्लेष्मनाशित्वम् । इति चक्रदत्तः ॥ * ॥
रात्रौ दधिसेवने विशेषो यथा, रात्रौ दधि न
भुञ्जीत किन्तु घृतमधुकं मुद्गयूषं सर्पि-
र्भुञ्जीत वा । ... शर्करा ...
उष्णं ... ।
विकारेषु च ... दधि ... ।
... ।
दधि प्रशस्तं ... प्रायशो विगर्हि-
तम् ॥ * ॥
अविधिना दधिसेवने दोषः । ज्वरारक्तपित्त-
वीसर्पकुष्ठपाण्डुभ्रमकामलारोगप्राप्तिः ॥ * ॥
अथ गोदधिगुणाः । विशिष्टस्वादुत्वम् । बल-
त्वम् । रुचिप्रदत्वम् । पवित्रत्वम् । दीपनत्वम् ।
स्निग्धत्वम् । पुष्टिकारित्वम् । वायुनाशित्वम् ।
अथ दधिमध्ये गुणाधिकत्वञ्च ॥ * ॥
माहिषदधिगुणाः । सुस्निग्धत्वम् । श्लेष्मलत्वम् । अभि-
वातपित्तनाशित्वम् । स्वादुपाकित्वम् । अभि-
ष्यन्दित्वम् । गुरुत्वम् । रक्तदूषकत्वञ्च ॥ * ॥
छागीदधिगुणाः । उत्तमत्वम् । ग्राहित्वम् ।
त्रिदोषनाशित्वम् । श्वासकासार्शःक्षयकार्श्येषु
प्रशस्तत्वम् । दीपनत्वञ्च । इति भावप्रकाशः ॥ * ॥
आविकदधिगुणः । दुर्नामकफव्याधिप्रकोपन-
त्वम् ॥ अश्वीदधिगुणाः । वातनाशित्वम् ।
दीपनत्वम् । चक्षुर्हितत्वञ्च ॥ * ॥
औष्ट्रकदधिगुणाः । क्षारत्वम् । अम्लत्वम् ।
कटुपाकित्वञ्च ॥ * ॥
हस्तिनीदधिगुणाः । वीर्याढ्यत्वम् । कषाय-
त्वम् । कफवातनाशित्वञ्च ॥ * ॥
मानुष्यदधिगुणाः । मधुरत्वम् । बल्यत्वम् ।
स्निग्धत्वम् । सन्तर्पणत्वञ्च । इति राजवल्लभः ॥
अथ दधिभेदाः ।
"आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परम् ।
अम्लञ्चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा ॥"
मन्दादीनां लक्षणानि गुणाश्च ।
"मन्दं दुग्धवद्व्यक्तरसं किञ्चिद्घनं भवेत् ।"

मन्दं स्यात् स्वरविण्मूत्रं दोषत्रयविदाहकृत् ।
यत् स्वादु घनतां यातं व्यक्तं माधुर्य्यं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवज्जनैः ॥
यत्तिरोहितमाधुर्य्यं व्यक्ताम्लत्वं तदम्लकम् ।
अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥
तदत्यम्लं दन्तहर्षरोमहर्षकण्ठादिदाहकृत् ।
अत्यम्लं दीपनं रक्तपित्तदुष्टिकरं परम् ॥"

इति भावप्रकाशः ॥ * ॥

"लवणमधुरसर्पिःशर्कराशुद्धधात्री-
कुसुमरसविहीनं नैतदश्नन्ति नित्यम् ।
न च शरदि वसन्ते ग्रीष्मकाले न रात्रौ
न दधि कफविकारे पित्तदोषेऽपि नाद्यात् ॥
त्रिकटुकयुतमेतच्छालिकाचूर्णमिश्रं
कफहरमनिलघ्नं वह्निसन्धुक्षणञ्च ।
तुहिनशिशिरकाले सेवितञ्चातिपथ्यं
रचयति तनुदार्ढ्यं कान्तिसत्त्वञ्च नृणाम् ॥
दधिमधुरमीषदम्लं वाञ्छितञ्च नाप्युष्णम् ।
यावद् यावन्मधुरं दोषहरं तावदुष्णमिदम् ॥"

इति राजनिर्घण्टः ॥ * ॥

"दधि यत् स्वादु तन्मेदःकफाभिष्यन्दकारणम् ।
दध्यम्लमतियद्रक्तदूषणं कफपित्तकृत् ॥
विदाहि सृष्टविण्मूत्रं मन्दजातं त्रिदोषकृत् ।
दधि त्वसारं रूक्षन्तु ग्राहि विष्टम्भि वातलम् ॥
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥"

इति राजवल्लभः ॥ * ॥

(ऋतुभेदे दधिविशेषगुणा यथा,—
"शारदं दधि गुर्व्वम्लं रक्तपित्तविवर्द्धनम् ।
शोषं तृष्णां ज्वरं शूलं करोति विषमज्वरम् ॥

इति शारददधिगुणाः ॥ * ॥

गुरु स्निग्धञ्च मधुरं कफशुक्रबलवर्द्धनम् ।
हृद्यं मेध्यञ्च हैमन्तं पुष्टिदं तुष्टिदं हिरम् ॥

इति हैमन्तदधिगुणाः ॥ * ॥

शैशिरं सघनञ्चाम्लं मधुरं गुरु एव च ।
हृद्यं बलकरं पित्तश्रमापहरणं परम् ।

इति शैशिरदधिगुणाः ॥ * ॥

वासन्तं मधुरं स्निग्धं किञ्चिदम्लं कफात्मकम् ।
बलवृद्धीष्टिदा प्रोक्तं वसन्ते न प्रशस्यते ।

इति वासन्तदधिगुणाः ॥ * ॥

लघु चाम्लं भवेद्ग्रीष्मे चाप्युष्णं रक्तपित्तकृत् ।
शोषश्रमपिपासाकृद्दधियुक्तं न पीष्यते ॥

इति ग्रीष्मदधिगुणाः ॥ * ॥

वार्षिकं हिमकृत् प्रोक्तं दधि शस्तं न दोषलम् ।
शोषवातश्रमान् हन्ति श्रमातीसारनाशनम् ॥"

इति वार्षिकदधिगुणाः ॥ * ॥

"हिक्काश्वासशोषार्शसामतिसारे भगन्दरे ।
शस्तं प्रोक्तं दधि क्षीणे लवणेन त्रिमर्द्दितम् ॥

इति दधिभोजनविधिः ॥" * ॥

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ॥

"रोचनं दीपनं हृद्यं स्नेहनं बलवर्द्धनम् ।
पाकेऽम्लमुष्णं वातघ्नं मङ्गल्यं बृंहणं दधि ॥
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥"
"शरदि ग्रीष्मवसन्ते वातं शस्तं दधि शस्यते ॥"

इति चरके सूत्रस्थाने २७ अध्याये ॥

"दधि तु मधुरमम्लमत्यम्लञ्चेति त्रिविधम् ... स्निग्धमुष्णं पीनसविषमज्वरातिसारारोचक-
मूत्रकृच्छ्रकार्श्यापहं तथा प्राणकरं माङ्गल्यञ्च ॥
महाभिष्यन्दि मधुरं कफमेदोविवर्द्धनम् ।
कफपित्तकृदम्लं स्यादत्यम्लं रक्तदूषणम् ॥
विदाहि सृष्टविण्मूत्रं मन्दजातं त्रिदोषकृत् ।
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ॥
वातापहं पवित्रञ्च दधि गव्यं रुचिप्रदम् ।
दध्याजं कफपित्तघ्नं लघु वातक्षयापहम् ॥
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनम् ।
विपाके मधुरं वृष्यं वातपित्तप्रसादनम् ॥
बलासवर्द्धनं स्निग्धं विशेषाद्दधि माहिषम् ।
विपाके कटु सक्षारं गुरु भेदोहितं दधि ॥
वातमर्शांसि कुष्ठानि क्रिमीन् हन्त्युदराणि च ।
दीपनं कफवातानां दुर्नाम्नाशनं दधि ॥
दधि पाके च मधुरमत्यभिष्यन्दि रोचनम् ।
दीपनीयमचक्षुष्यं वाडवं दधि वातनम् ॥
रूक्षमुष्णं कषायञ्च कफमामापहञ्च तत् ।
स्निग्धं विपाके मधुरं बल्यं सन्तर्पणं गुरु ॥
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्य्या गुणोत्तरम् ।
लघु पाके बलासघ्नं वीर्य्योष्णं पित्तनाशनम् ॥
कषायानुरसं नाग्या दधि वर्चोविवर्द्धनम् ।
दधीन्युक्तानि यानीह गव्यादीनि पृथक् पृथक् ॥
विज्ञेयमेषु सर्व्वेषु गव्यमेव गुणोत्तरम् ।
वातघ्नं कफकृत् स्निग्धं बृंहणं न च पित्तनुत् ॥
कुर्य्याद्भक्ताभिलाषञ्च दधि यत् सुपरिस्रुतम् ।
शृतात् क्षीरात्तु यज्जातं गुणवद्दधि तत् स्मृतम् ॥
वातपित्तहरं रुच्यं धात्वग्निबलवर्द्धनम् ।
दध्नः सरो गुरुर्वृष्यो विज्ञेयोऽनिलनाशनः ॥
वह्निर्विधमनश्चापि कफशुक्रविवर्द्धनः ।
दधि त्वसारं रूक्षञ्च ग्राहि विष्टम्भि वातलम् ॥
दीपनीयं लघुतरं सकषायं रुचिप्रदम् ।
शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ॥
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
धारणकर्त्तरि, त्रि । इति मुग्धबोधम् ॥

दधिकूर्च्चिका, स्त्री, (दधिजाता कूर्च्चिका ।) उष्णीदकोष्णदुग्धे दध्यम्लसंयोगात् जाता । इति केचित् ॥ उष्णदुग्धे दध्यम्लसंयोगात् जाता इत्यन्ये ॥ छेना इति भाषा । अस्या गुणाः । वातनाशित्वम् । ग्राहित्वम् । रूक्षत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ (पर्य्यायोऽस्या यथा,—
"दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्च्चिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

दधिचारः, पुं, (दधिं चालयति विलोडयतीति । दधि+चल+णिच्+अण् । लस्य रत्वम् ।) दधिमथनदण्डः । तत्पर्य्यायः । वैशाखः २ मन्थाटः ३ करघर्षणः ४ । इति हारावली ॥ ३४ ॥

दधित्थं, क्ली, ([illegible]) [illegible] । इति [illegible] प्रकरणे [illegible] ॥)

दधित्थः, पुं, ([illegible] + "सुषिमः ।" [illegible] दधित्थात् साप् ।) इति [illegible] । (यथा,—
"नड्वदधित्थकानां [illegible]
इति चरके [illegible]
"दधित्थफलसारेभ्यो [illegible]
पाचको ग्राहिको चैव [illegible]
इति चरके सूत्रस्थाने [illegible]

दधिस्वादः, पुं, (दधिवत् स्वादु अनुकरोतीति । स्वा+सद+[illegible] अच् ।) इति रत्नमाला ॥ [illegible]

दधिधेनुः, स्त्री, (दधिनिर्म्मिता धेनुः ।) दध्यादिनिर्म्मिता धेनुः । यथा,—
"दधिधेनोर्महाराज [illegible]
अनुलिप्ते [illegible]
गोचर्म्ममात्रे तु पुनः
कुशैरास्तीर्य्य वसुधां
दधिकुम्भं [illegible]
चतुर्थांशेन वत्सन्तु [illegible]
[illegible]
ब्राह्मणाय कुलीनाय [illegible]
[illegible]
पुष्पदेशोपविष्टन्तु दधिशालेऽन्तरे
पादुकोपानहौ छत्रं [illegible]
दधिशाक्रं निमन्त्र्य दधिपिण्डं
एवं दधिमयीं धेनुं [illegible]
एकाहारो दिनं [illegible]
मच्यमानो वसेन्नाकं [illegible]
दीयमानां प्रपश्यन्ति ते यान्ति परमं
यत्र क्षीरवहा नद्यो यत्र
सुमय अयवः स्थितास्तत्र सर्व्वतः,
य इदं श्रावयेद्भक्त्या शृणुयादपि
सोऽश्वमेधफलं प्राप्य विष्णुलोके

दधिपुष्पिका स्त्री, (दधीव शुभ्रं [illegible] कप् । टापि अत इत्वम् ।) [illegible]
इति राजनिर्घण्टः ॥

दधिपुष्पी, स्त्री, (दधीव पुष्पमस्याः, ङीष् ।) कोलशिम्बी । इति [illegible]

दधिफलः, पुं, (दधीव शुभ्रो [illegible]) कपित्थवृक्षः । इत्यमरः । २ । ४ । २१ ।

दधिमण्डः पुं, (दध्नः मण्डः ।) मस्तु । [illegible] माला ॥ मात् इति भाषा ॥

दधिमण्डोदः पुं, (दधिमण्ड इव उदं उदकमस्य उदादेशः ।) सप्तसमुद्रान्तर्गतसमुद्रविशेषः । भागवते । ५ । १ । ३३ ।
"क्षीरोदेक्षुरस [illegible]
सुरोदाः सप्त जलधयः ॥")

NOTICE

SABDAKALPADRUMA.

To expedite the completion of the main work, arrangements have been made to divide the [illegible] two series, the first commencing with the initial letter is to terminate in 'স', the second starting [illegible] bring the work to a conclusion. The numbers of the two series will generally issue synchronically [illegible] bers in future can expect to have numbers of the two series simultaneously.

বিজ্ঞাপন।

শ্রীমদ্দেবীভাগবত।

[illegible] মহর্ষি [illegible] গ্রন্থখানি অতি প্রাচীন ও উপাদেয় এবং এপর্য্যন্ত ইহা বঙ্গাক্ষরে মুদ্রিত হয় নাই। ইহার অন্তর্গত [illegible] [illegible]। কেবল সংক্ষেপে এইমাত্র বলিলেই বোধ করি গ্রন্থের যথেষ্ট পরিচয় দেওয়া হইবে যে, পুরাণের বৈষ্ণব [illegible] [illegible] অন্তর্গত পঞ্চম পুরাণ বলিয়া নির্দ্দেশ করেন; সেইরূপ সম্প্রদায় নিরপেক্ষ অনেকানেক কৃতবিদ্য [illegible] [illegible] অন্তর্গত পঞ্চম পুরাণ। এ সম্বন্ধে তাঁহারা যে সকল যুক্তি প্রদর্শন করেন তাহা এক প্রকার [illegible] [illegible]। এই [illegible] শ্রীমদ্ভাগবতের ন্যায় দ্বাদশ স্কন্ধ ও ১৮০০০ অষ্টাদশ সহস্র শ্লোকে বিরচিত এবং [illegible] [illegible]। ইহার [illegible] যে অধ্যয়ন করিলেই প্রাচীন বলিয়া বোধ হয়। ইহা দেবী ভগবতীর মাহাত্ম্য ও [illegible] [illegible] নীলকণ্ঠকৃত দেবীভাগবতের মহাপুরাণত্ব-সংস্থাপন সম্বন্ধীয় বিচার পাঠে সমস্ত অবগত হইতে [illegible]

[illegible] প্রচারিত হওয়ার পর আমাদিগের অন্তঃকরণে একটী অভিনব ভাবের উদয় হইয়াছিল, অর্থাৎ [illegible] [illegible] পুরাণশাস্ত্র যথাসম্ভব টীকা ও অনুবাদ-সহ প্রচার করিয়া উক্ত বিষয়ের অভাব মোচনের [illegible] [illegible] হইতে সাহস করিতে পারি নাই। পরন্তু, সেই সর্ব্বনিয়ন্তা পরমকরুণাময় পরমেশ্বরের কৃপায় [illegible] আমার অগ্রজ রায় বরদাপ্রসাদ বসু বাহাদুর এবং আর কতকগুলি দেশহিতৈষী [illegible] [illegible] বিষয়ের মধ্যে প্রথমতঃ এই অনর্ঘ্য দেবীভাগবতেরই মূল, নীলকণ্ঠ-বিরচিত টীকা, টিপ্পনী এবং [illegible] [illegible] আবশ্যক বিবেচনায়, আমরা ইহার মূল, টীকা ও গদ্যানুবাদের প্রচারে প্রবৃত্ত [illegible] [illegible] '৫' ও [illegible] '4' [illegible]।

১। [illegible] ৮ পেজি ৯ ফর্ম্মায় এক এক খণ্ড প্রকাশিত হইতেছে কোন কোন মাসে দুই বা [illegible] [illegible] মধ্যে সম্পূর্ণ হইবে। অনুমান ৫৬ খণ্ডে গ্রন্থখানি সম্পূর্ণ হইবে।

২। [illegible] মূল্য [illegible]; কিন্তু নির্দ্দিষ্ট গ্রাহকগণের পক্ষে ।৶০ আনা; এবং ১২ খণ্ডের অগ্রিম মূল্য ৪৲ টাকা; [illegible] [illegible] মূল্য ১৫৲ টাকা; অগ্রিম পক্ষে এক্ষণ ৮৲ টাকা এবং বাকি ৭৲ টাকা আগামী আশ্বিন মাসের মধ্যে দিলেই [illegible]।

৩। [illegible] দেবীভাগবত লইবেন তাঁহাকে আদ্যোপান্ত সমস্ত খণ্ডই গ্রহণ করিতে হইবে। অগ্রিম মূল্য না পাইলে [illegible] [illegible]।

৪। [illegible] তাঁহার নূতন ঠিকানা পত্র দ্বারা জানাইবেন। গ্রহণাভিলাষিগণ স্ব স্ব নাম [illegible]

ঈশ্বরোপাসনা।

[illegible] বিষয় [illegible] হইয়া মন প্রতি নিয়ত নিত্য [illegible] [illegible] পারি তাহা হইলেও আপনাকে [illegible] [illegible] দেবতাত্মা, গোপালবিদ্যা, তন্ত্র ও পুরাণ প্রভৃতির [illegible] [illegible] উপাসনা [illegible] [illegible] বর্জন হইবে এই আশয়ে [illegible] [illegible] ভক্তি ও [illegible] [illegible]

[illegible] মূল্য [illegible]।

[illegible]

[illegible]

[illegible] संख्या।

शब्दकल्पद्रुमः।

अर्थात्

[illegible]-नानार्थ-पर्याय-समास-प्रयोग-धातु-तदनुबन्धाभिधेय-
[illegible]-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-
[illegible]-द्रव्यगुण-रोगनिदानौषध-
[illegible]-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-वाहादुरेण

विरचितः।

[illegible] प्रमाद-प्रयोग-पर्याय-धातुपदोदाहरणादिभिः
[illegible]
[illegible]

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

[illegible] संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

द्वितीयः काण्डः।

[illegible]।

कलिकाता-राजधान्यां

[illegible]-यन्त्रे मुद्रितः। ७१ नं पाथुरियाघाट-ष्ट्रीट्-स्थितभवनात् प्रकाशितश्च। शकाब्दाः १८१०

PRINTED BY [illegible], [illegible] PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET, CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71, Pathuriaghata Street, Calcutta; and at the Baptist Mission Press, No. 24, Lower Circular Road Calcutta: Price for Subscribers in India, Re 1, and Countries out of India 2s for each number.

दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
दन्तमांसानि पच्यन्ते मुखञ्च परिपूयते ॥
यस्मिन् स सर्व्वजो व्याधिर्महाशौषिरसंज्ञितः ॥ ५ ॥
दन्तमांसानि शीर्य्यन्ते यस्मिन् ष्ठीवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥ ६ ॥
वेष्टेषु दाहः पाकश्च तेभ्यो दन्ताश्चलन्ति च ।
आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः ॥
आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते ।
यस्मिन्नुपकुशो नाम पित्तरक्तकृतो गदः ॥ ७ ॥
घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।
भवन्ति दन्ताश्च चलाः स वैदर्भोऽभिघातजः ॥ ८ ॥
मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति ॥ ९ ॥
शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः ।
करालान् विकटान् दन्तान् करालो न स सिध्यति ॥ १० ॥
हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥ ११ ॥
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।
दीर्य्यमाणेष्विव रुजा यस्य दन्तेषु जायते ॥
दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥ १२ ॥
कृष्णच्छिद्रश्चलः स्रावी ससंरम्भो महारुजः ।
अनिमित्तरुजो वातात् स ज्ञेयः कृमिदन्तकः ॥ १३ ॥
वक्त्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥ १४ ॥
शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः ।
पित्तमारुतकोपेन दन्तहर्षः स नामतः ॥ १५ ॥
(दन्तमांसैर्मलस्रावैर्बाह्यान्तः श्वयथुर्गुरुः ।
सदाहरुक्स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥)
मलो दन्तगतो यस्तु कफमारुतशोषितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥ १६ ॥
कपालेष्विव दीर्य्यत्सु दन्तानां सैव शर्करा ।
कपालिकेति कथिता सदा दन्तविनाशिनी ॥ १७ ॥
योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः ।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः ॥" १८
इति माधवकरः ॥

दन्तकः, पुं, (दन्त इव । स्वार्थे कन् ।) पर्व्वतप्रशृङ्गम् । नागदन्तः । इति हेमचन्द्रः । ४ । १०० ॥ (दन्तः । इति सुश्रुतनिदानेऽर्थः ॥ त्रि, दन्तेषु प्रथितः । दन्त + "स्थानिभ्यः प्रथिते" । ५ । २ । ६६ । इति कन् ।)

दन्तकर्षणः, पुं, (दन्तान् कर्षतीव यः । कृष् + ल्युः ।) जम्बीरः । इति शब्दरत्नावली ॥

दन्तकाष्ठं, क्ली, (दन्तशोधनार्थं यत् काष्ठम् ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥ दन्तधावनार्थकाष्ठम् । तद्यथा नरसिंहपुराणे ।
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् ।
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥"
महाभारते ।
"तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् ।
क्षीरिणो वृक्षगुल्माद्या भक्षयेद्दन्तधावनम् ॥"
निषिद्धकाष्ठानि यथा,—
"गुवाकतालहिन्तालास्तथा ताली च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजसमुत्थैर्यः कुर्य्याद्दन्तस्य धावनम् ।
तावद्भवति चाण्डालो यावद्गां न च पश्यति ॥"
तस्य स्थौल्यं परिमाणञ्चाह विष्णुः ।
"कनिष्ठाग्रसमं स्थौल्ये सत्वचं द्वादशाङ्गुलम् ।
प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दन्तधावनम् ॥"
मरीचिः ।
"द्वादशाङ्गुलकं विप्रे क्षत्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलञ्च वैश्यानां शूद्राणाञ्च षडङ्गुलम् ॥
चतुरङ्गुलमानेन नारीणां विधिवन्नृणाम् ।
अन्तरप्रभवानाञ्च षडङ्गुलमुदाहृतम् ॥"
इत्याह्निकतत्त्वम् ॥

दन्तशाठकं, क्ली, (दन्तं शाठं काष्ठकम् । दन्तधावनयोग्यं काष्ठकम् ।) जम्बुद्रुमः । इति राजनिर्घण्टः ॥

दन्तच्छदः, पुं, (दन्तान् छादयतीति । छद संवरणे + णिच् + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति ह्रस्वः ।) ओष्ठः । इति हलायुधः ॥ (यथा, ऋतुसंहारे हेमन्तवर्णनायाम् । १२ ।
"दन्तच्छदैः सव्रणदन्तचिह्नैः
स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्द्दयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥")

दन्तच्छदोपमा, स्त्री, (दन्तच्छदस्य ओष्ठस्य उपमा सादृश्यं यस्य । यद्वा, उपमीयतेऽनयेति उपमा । दन्तच्छदस्य उपमा सादृश्यस्थलम् ।) बिम्बी । इति राजनिर्घण्टः ॥

दन्तधावनं, क्ली, (दन्तानां धावनम् ।) दन्तमार्ज्जनम् । (दन्तानां धावनं यस्मात् ।) दन्तकाष्ठम् । यथा, गारुडे २१४ अध्याये ।
"उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत् ।
ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम् ॥
मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥
करञ्जविल्वखदिरकरवीरवटार्ज्जुनाः ।
सर्जं ह्यसनो जातिकरञ्जार्कातिमुक्तकाः ॥
जम्बूमधूकापामार्गशिरीषोदुम्बरासनाः ।
क्षीरिकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने ॥
कटुतिक्तकषायाश्च धनारोग्यसुखप्रदाः ।
प्रक्षाल्य भुक्त्वा च शुचौ देशे त्यक्त्वा सदाचमेत् ॥
अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि ।
वर्ज्जयेद्दन्तकाष्ठन्तु तथैवार्कस्य वासरे ॥
अभावे दन्तकाष्ठस्य निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैः कुर्व्वीत मुखशोधनम् ॥"
दन्तशुद्धिः । तस्य विधिर्यथा,—
"प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम् ।
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन् ॥"
तस्य काष्ठानि यथा,—
"कैङ्कतं करवीराम्रकरञ्जबकुलासनान् ।

दन्तकाष्ठार्थमर्द्ध ...
प्रतिपच्च ...
निषिद्धो वैष्णव ...
अपामार्गश्च बिल्वश्च ...
इति प्रशस्ताः ...
तस्य निषिद्धकालानि यथा,—
"गुवाकतालहिन्ताल ...
नारिकेलेन ताला ...
तस्य दिनभेदेन शुभाशुभम् ...
"अर्क ...
तस्य निषिद्धदिने विधिर्यथा,—
"प्रतिपद्दर्शषष्ठीषु नवम्यां ...
दन्तानां काष्ठसंयोगो ...
दन्तधावनमन्त्रं ...
"दन्ताग्रैर्मयो ...
रोगविशेषे दन्तकाष्ठवर्ज्जनं यथा,
"अहिंसी अर्धशूली च ...
शोषी कासी च मूर्च्छितः ...

तस्य गुणा यथा,—
"निहन्ति ...
आरोग्यं वर्धयत्याशु ...
इति राजव ...
"व्रतस्थोऽपि ततः प्रातः कुर्य्याद्दन्त ...
जिह्वाया मार्जनञ्चापि ...
दक्षिणाभिमुखो भूत्वा पश्चिमा ...
न दन्तधावनं कुर्य्यात् कुर्य्याच्चे ...
मध्यमानामिकाभ्याञ्च ...
दन्तस्य धावनं ...
अश्वत्थवटबिल्वानां ...
न दन्तधावनं कुर्य्यात् ...
नित्यक्रियाफलं ...
प्रभाते कुरुते प्राज्ञः ...
सूर्य्योदये द्विजश्रेष्ठ ! यः ...
नित्यक्रियाफलं तस्य सर्व्वमेव ...
यः स्नानसमये कुर्य्यात् ...
निराशाः पितरो यान्ति तस्य ...
दन्तस्य धावनं कुर्य्याद्यो मध्याह्न ...
तस्य पुण्यं न गृह्णन्ति देवताः ...
स्नानकाले पुष्करिण्यां यः ...
तावन्मूर्खः स चण्डालो ...
भगवत्युदिते सूर्य्ये यः कुर्य्याद्दन्त ...
तद्दन्तकाष्ठे पितरो मुक्ता ...
उपवासदिने विप्र ! पितृश्राद्धे ...
न च तत्फलमाप्नोति दन्तधावन ...
प्रभाते मार्ज्जयेद्दन्तान् वाचा ...
कुर्य्यादादाय विप्रेन्द्र ! कदाचित् ...
उपवासे पितृश्राद्धे निषिद्धानि ...
दन्तधावनकाष्ठानां संपूर्णं ...
इति ब्रह्मवैवर्त्त ...

[illegible], पुं, (धावयत्यनेनेति । धावि + ल्युट् ।) [illegible] धावनः ।) खदिरद्रुमः । गुच्छकरञ्जः । [illegible]त्ननिर्घण्टः ॥ वकुलः । इति शब्द[illegible] ॥

[illegible]री, (दन्ता इव यवादि यस्य ।) कुन्द[illegible] इति शब्दरत्नावली ॥ (यथा कुमारे । [illegible] ॥ [illegible]वर्णावलम्बसन्दन्तनवं [illegible]गता नदीयं कुसकुसुमस्य ॥")

[illegible]स्त्री, (दन्त इव शुभ्रं पत्रं दलं यस्य । [illegible] कुन्दपुष्पम् । इति शब्दचन्द्रिका ॥

[illegible]स्त्री, (दन्त इव शुभ्रं पुष्पमस्य ।) कतक[illegible] इति शब्दचन्द्रिका ॥

[illegible]स्त्री, (दन्त इव शुभ्रं फलमस्य ।) कत[illegible] इति शब्दचन्द्रिका ॥

[illegible]पुं, (दन्त इव शुभ्रं फलमस्य ।) कपित्थः । [illegible]त्रिनिर्घण्टः ॥

[illegible] स्त्री, (दन्तवत् शुभ्रं फलं यस्याः । [illegible]) पिप्पली । इति राजनिर्घण्टः ॥

[illegible], पुं, (दन्तवद्धितो भागः । शाकपार्थि[illegible]तु समासः ।) गजायभागः । गजस्य [illegible] स्तनयमन्ती दीयमानः स दन्त[illegible]: । इत्यमरभरतौ ॥

[illegible] स्त्री, (दन्तस्य दन्तस्य वा मलम् ।) [illegible]मलेदः । तत्पर्यायः । पुप्पिका २ । इति [illegible] । ६५ ॥

[illegible]का, स्त्री, (दन्त इव शुभ्रं फलमस्याः । [illegible]दादि यत इत्वञ्च ।) दन्तोदरः । इति [illegible]जावली ॥

[illegible]: पुं, (दन्तस्य रोगः ।) दशनामयः । [illegible]गादि दन्तशब्दे द्रष्टव्यम् । तदौषधं यथा, [illegible] दन्तदार्ढ्युप्रमुटे तदैव विष्टवं विव ! । [illegible]का दन्तरोगाणां विनाशो हि मनोहर ! ।" [illegible]तिगावानिन्द्र दन्तरोगानिति पुष्पका[illegible] [illegible]मात् ॥ इति गारुडे १५८ अध्यायः ॥ [illegible]च गारुडे १६८ अध्याये ।

[illegible] बलमहस्तीरी सारी हिङ्गुदमनकम् । [illegible]मी यथा कुष्ठं दारु हिङ्गु रसाञ्जनम् ॥ [illegible]सं यवक्षारं बालुकं सैन्धवं तथा । [illegible] बिड़ं तुलं सद्यु मधु चतुर्गुणम् ॥ [illegible] तुङ्गरसेन कदलीरसेन च । [illegible] निर्लिसनदं ह्रदन्यासवह्न दरम् । [illegible] हरणादच पूवभावच दारणः । [illegible]धारस्य तैलस्य कुसुमः हरणीः स्थिराः ॥ [illegible] निवाहमावालि प्रकाशूरनदेसर । [illegible]रवैर्निदं यैङं सुदरन्तोभवानहम् ।" [illegible]यत्र ।

[illegible]सं यावारं चीरं एषक प्रस्थमितं पचेत् । [illegible] पञ्चमितैरेतैः क्वाथैर्वा चतुर्गुणैः । [illegible] [illegible] धृतम् । [illegible] दन्तचालेषु दन्तशीर्षं [illegible] ।

क्षीराद्रं पूतिवक्त्रच विदर्भं विरलास्थताम् । इन्द्राद्याः गदानेतान् कुर्याद्दन्तानपि स्थिरान् । लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम् ॥

इति लाक्षाद्यं तैलम् ।

सर्वैर्हिंसावनैः स्विन्नमर्दं कृमिदन्तकम् । तथा च नीलीवातघ्नैः स्नेहगण्डूषधारणैः ॥ भद्रदार्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः । कृमिदन्तापहं कोष्णं हिङ्गु दन्तान्तरे स्थितम् ॥ इन्द्रवारुणिमूलं च चर्वितं [illegible]कारिकाह्वयः । गण्डूषतैलयुतः कृमिदन्तकवेदनाप्रहः ॥ नीली वायसजङ्घा कटुतुम्बीमूलमेकैकम् । संचूर्ण्य दशनविधृतं दशनकृमिघातनं प्राहुः ॥ स्नेहानां कवलाः कोष्णाः सर्पिषश्चैत्रतस्य च । निर्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्दनाः ॥ स्नेहतस्य सर्पिषः त्रिवृता मद्यस्य सर्पिषः कवल इत्यर्थः ।

स्नैहिकोऽत्र हितो धूमो नस्यं स्नैहिकमेव च । देया रसवराग्रश्च क्षीरसन्तानिकाहृतम् ॥ शिरोवस्तिहितश्चापि क्रमो यश्चानिलापहः ।

अथ दन्तहर्षे ।

अच्छिन्नदन्तमूलानि शर्करायद्वरैर्द्विपक् । लाक्षाचूर्णैर्मधुयुतैस्ततस्तान् प्रतिसारयेत् ॥ दन्तहर्षक्रियां चात्र कुर्यान्निरवशेषतः । कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता ॥ अत्र दन्तशर्करायाम् । एषा क्रिया दन्तहर्ष-क्रिया ।

चलान्दन्तानि धीमान् रुचितं दन्तवन्धनम् । तथाविधाक्रिशं नस्यं दन्तरोगी विवर्जयेत् ॥"

इति भावप्रकाशः ॥

दन्तवस्त्रं, क्ली, (दन्तानां वस्त्रमिवाच्छादकत्वात् ।) ओष्ठः । इति हेमचन्द्रः । ३ । २६५ ॥

दन्तवासः, [स्] पुं, (दन्तस्य वासो वस्त्रमिवा-च्छादकत्वात् ।) ओष्ठः । इति त्रिकाण्डशेषः ॥ (यथा, कुमारे । ५ । ३४ ।

"यदि तदाविद्धवद्विरमृतं प्रवालमस्यान्तरशिश्रुवीरपान् । ततोऽनुकुर्याद्विशदस्य तस्या- स्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ॥")

दन्तवीजकः, पुं, (दन्ता इव वीजानि यस्य । ततः स्वार्थे कन् ।) दाड़िमः । इति राजनिर्घण्टः ॥

दन्तशठः, पुं, (दन्तेषु शठ इव अम्लरसत्वात् ।) दन्तशठः । इत्यमरटीकायां मथुरानाथः ॥

दन्तशठः, पुं, (दन्तेषु शठ इव अम्लरसकारक-त्वात् ।) जम्बीरः । कपित्थः । कर्मरङ्गः । नागरङ्गः । इति मेदिनी । टे । १६ ॥ (यथा, सुश्रुते । [illegible] । ४६ ।

"[illegible] दन्तशठमलं [illegible] ।")

अम्लः । इति हेमचन्द्रः । ६ । २६ ।

दन्तशठा, स्त्री, दन्तेषु शठा । चाङ्गेरी । इति [illegible] । टे । १६ ॥ (यथा, भावप्रकाशे । [illegible] दन्तशठाम्लरसावतिका ॥")

[illegible]

दन्तशर्करा, स्त्री, (दन्तस्य शर्करेव ।) दन्तरोग-विशेषः । कफवायुशोषितदन्तगतमलम् । पाथुरि इति भाषा ॥ (तस्य लक्षणं यथाह माधवकरः ।

"मलो दन्तगतो यस्तु कफवाताशोषितः । शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥"

यथा च सुश्रुते निदानस्थाने १६ अध्याये ।

"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै । सा दन्तानां गुणहरी तु विज्ञेया दन्तशर्करा ॥")

तस्यौषधम् यथा,—

"गौरसर्कर्कटीफलं पिष्टं वासोदकेन च । पीतं दिनत्रयेणैव नाशयेत् दन्तशर्कराम् ॥"

इति गारुडे १६० अध्यायः ॥

दन्तशाणः, पुं, (दन्तानां शाण इव । पिङ्गलता-जनकत्वात् ।) मिसुकृष्णम् । इति त्रिकाण्डशेषः ॥ मिसि इति भाषा ॥

दन्तशिरा, स्त्री, (दन्तानां शिरा यत्र ।) माड़ी । इति शब्दरत्नावली ॥

दन्तशूलः, पुं, (दन्तस्य शूल इव । शूलवेदनावद्-वेदनादायकत्वात् ।) दशनवेदना । तदौषधम् ॥ यथा,—

"त्रिफलानिम्बवव्याघ्री कटुकारग्वधैः शृतम् । नाशयेत्क्वथितं नित्यं दन्तशूलमसंशयम् ॥"

इति गारुडे १०८ अध्यायः ॥

दन्तहर्षः, पुं, (दन्तानां हर्षो यस्मात् ।) दन्त-रोगविशेषः । इति माधवकरः ॥ (अस्य लक्षणं यथा, सुश्रुते निदानस्थाने १६ अध्याये ।

"दशनाः शीतरूक्षाश्च सहन्ते स्पर्शनं न च । यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरणात् ॥"

दन्तग्लानिः । यथा,—

"यस्य वै खातमात्रस्य हृदयं पीयते भृशम् । नाशयेत् दन्तहर्षं च तं गवाक्षममादिशेत् ॥"

इति वाग्भटादयः ॥)

दन्तहर्षकः, पुं, (दन्तान् हर्षयतीति । हृष + णिच् + ण्वुल् ।) जम्बीरः । इति जटाधरः ॥

दन्तहर्षणः, पुं, (दन्तान् हर्षयतीति । हृष + णिच् + ल्युः ।) जम्बीरः । इति त्रिकाण्डशेषः ॥

दन्ताघातः, पुं, (दन्तानाहन्तीति । आ + हन + अण् ।) निम्बूकः । इति राजनिर्घण्टः । दशना-घातः । (यथा, नैषधे ।

"दन्ताघातविदारितारिविधिरैः सिन्दूरशोभा-करम् ।")

रतिक्रीडायां नख क्षतानि दन्तशब्दे द्रष्टव्यानि ।

दन्तार्बुदं, क्ली, पु, (दन्तस्य अर्बुदमिव ।) दन्त-रोगभेदः । तत्पर्यायः । दन्तमूलम् २ दन्त-रोगः ३ हिमयवः ४ । इति राजनिर्घण्टः ।

दन्तायुधः, पुं, (दन्त एव आयुधं यस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥

दन्तालिका, स्त्री, (दन्तान् अलति भूषयतीति । अल + ण्वुल् । टापि अत इत्वम् ।) [illegible] । इति त्रिकाण्डशेषः ॥

दन्तालः, पुं, ([illegible]) [illegible] । [illegible]

इति बलच्। "वले।" ६।२।११८। इति दीर्घः।) हस्ती। इत्यमरः। २।८।३४। (यथा, मनुटीकायां कुल्लूकभट्टः। ७।१०६। "सिंहः प्रबलमतिस्थूलमपि दन्तावलं छद्मनाक्रमति।")

दन्तिका, स्त्री, (दन्ती एव। स्वार्थे कन् टाप् पूर्व्व-ह्रस्वश्च।) दन्तीवृक्षः। इत्यमरः। २।४।१४४॥

दन्तिनी, स्त्री, दन्तिका। इति शब्दरत्नावली॥

दन्तिनी, स्त्री, (दन्तवदाकारो मूलेऽस्त्यस्याः। दन्त+इनिः+ङीप्।) दन्तीवृक्षः। इति राज-निर्घण्टः॥

दन्तिमदः, पुं, (दन्तिनो मदः।) हस्तिमदः। इति राजनिर्घण्टः॥

दन्ती, स्त्री, (दाम्यत्यनयेति। दम+"हसि-मृग्रिण्वामिदमि"इति। उणा। ३।८६। इति तन्। ततो गौरादित्वात् ङीष्।) स्वनामख्यातवृक्षः। तत्-पर्य्यायः। शीघ्रा २ श्येनघण्टा ३ निकुम्भी ४ नागस्फोता ५ दन्तिनी ६ उपचित्रा ७ भद्रा ८ रूक्षा ९ रेचनी १० अनुकूला ११ निःशल्या १२ चक्रदन्ती १३ विशल्या १४ मधुपुष्पा १५ एरण्ड-फला १६ तरुणी १७ एरण्डपत्रिका १८ अनु-रेचनी १९ विरोधनी २० कुम्भी २१ उदुम्बर-दला २२। इति राजनिर्घण्टः॥ निकुम्भः २३। दन्तिका २४ प्रत्यक्पर्णी २५ उदुम्बरपर्णी २६। इत्यमरः। २।४।१४४॥ अस्या गुणाः। कटु-त्वम्। उष्णत्वम्। शूलामयत्वग्दोषार्शोव्रणाश्मरी-शल्यशोधकत्वम्। दीपनत्वञ्च। इति राज-निर्घण्टः॥ अष्ठीलिकाध्मानगुल्मोदरनाशित्वम्। सारकत्वञ्च। इति राजवल्लभः॥ अथ लघुदन्ती।
"लघ्वी दन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि।
अपरेरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया॥
वाराहाङ्गी च कथिता निकुम्भश्च मकूलकः॥"
अथ द्रवन्ती।
"द्रवन्ती शम्बरी चित्रा न्यग्रोधी मूषिकाह्वया।
[illegible]॥
दन्तीद्वयं सरं पाके रसे च कटु दीपनम्।
[illegible]॥
[illegible]॥
[illegible]।
[illegible]।
[illegible]॥"
इति भावप्रकाशः॥

दन्ती, [न्] पुं, (प्रशस्तौ दन्तौ स्तः अस्येति। दन्त+इनिः।) हस्ती। इत्यमरः। २।८।३४। (यथा, देवीभागवते। ५।६।३५।
"[illegible] दन्तिनः ६"
[illegible]। यथा, आर्य्यासप्तशत्याम्। ६१४।
"[illegible]।"
[illegible]॥")

दन्तोदेवी, स्त्री, (दन्त्य इव [illegible]।) [illegible] [illegible]॥

दन्तुरः, त्रि, (उन्नता दन्ताः सन्त्यस्येति। "दन्त उन्नत उरच्।" ५।२।१०६। इति उरच्।) उन्नतदन्तः। दाँतो इति भाषा॥
"कदाचिद्दन्तुरो मर्त्त्यः कदाचिल्लोमशः सुखी।
कदाचित् शुम्भिलो दुःखी कदाचिच्चपला सती॥"
इति सामुद्रकम्॥
उन्नतानतः। इति मेदिनी। रे, १६६॥

दन्तुरच्छदः, पुं, (दन्तुर उन्नतानतश्छदो यस्य।) बीजपूरः। इति राजनिर्घण्टः॥

दन्तोलूखलिकः, त्रि, (दन्ता एव उलूखलः। सोऽस्त्यस्येति। "अत इनिठनौ।" ५।२।११५। इति ठन्।) वानप्रस्थविशेषः। दन्तमात्रेण छित्वा यो भक्षति सः। इति श्रीभागवतम्॥ (यथा, मनुः। ६।१७।
"अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा॥")

दन्त्यः, त्रि, (दन्तेषु भवः। दन्त+"शरीरावय-वाच्च।" ४।३।५५। इति यत्।) दन्तोद्भवः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥"
दन्तेभ्यो हितः। "शरीरावयवाद्यत्।" ५।१।६। इति यत्। दन्तहितजनकः। यथा, सुश्रुते। १।४६।
"दन्त्योऽभिमेधाजननोऽल्पकण्ठ-
स्तम्भोऽथ कैडर्योऽनिलहा गुरुश्च॥")

दन्दशूकः, पुं, (गर्हितं दशतीति। दनश+यङ्+"यजजपदशां यङः।" ३।२।१६६। इति ऊकः।) सर्पः। (यथा, वैद्यकरत्नमालायाम्।
"चक्षुःश्रवा दन्दशूको गूढपात् पन्नगोरगाः॥")
राक्षसः। इति मेदिनी। के, १६३॥ (हिंस्रे, त्रि। यथा, भट्टिः। १।२६।
"इष्वमति रघुसिंहे दन्दशूकान् जिघांसौ
धनुररिभिरसह्यं मुष्टिपीडं दधाने॥")

दनुभ, उ म दम्भे। इति कविकल्पद्रुमः॥ (स्वा-परं-अकं-सेट्। उदित्वात् क्त्वावेट्।) दम्भः परवञ्चनहेतुव्यापारः। उ, दम्भित्वा दब्ध्वा। म, दभ्नोति खलञ्छलयति इत्यर्थः। इति दुर्गा-दासः॥

दनुभ, क द संघाते। इति कविकल्पद्रुमः॥ (चुरा-आत्मं-सकं-सेट्।) क द, दम्भयते। सङ्घातो राशीकरणम्। इति दुर्गादासः॥

दनुभ, औ दंभने। इति कविकल्पद्रुमः॥ (स्वा-परं-सकं-अनिट्।) औ, अदाप्सीत्। दभ्नाति शिश्नधर्म्मं शुक्रधारकः। दंभनमिलनुस्वारश्चोर्णं पठित्वा नान्दिर्द्धात् अमाटि नकारलोप इत्याहुः। अमगच्च दधबौ दम्भः। नाधिङ्ग्रयते कश्चि-च्छिदया सहदाक्रया। इति रमानाथः। मधु-मतमते दंभनमिह धमाहः। तेन अदंभयश-र्द्दिनमौर्द्भंनाकपूरणं नय इति दंभिभू-भ्नः। इति माधवः। तत्र कवपतनाभस्तुरि-हर्षः। अत्र परस्मैपदं भिन्नामिति वक्षमः। चस्पनाच्च दंभं करोमीति भो आख्यम्। इति दुर्गादासः॥

दम, इ क मोदे। इति कविकल्प[illegible] परं-सकं-सेट्।) इ क [illegible] प्रेरणम्। इति दुर्गादास।

दम, क मोदे। इति [illegible] सकं-सेट्।) क, दामयति। [illegible]

दम्भं, त्रि, (दम्भोलीति। दम्भ [illegible] तस्येति।"उणा। ३।११। इति [illegible] इत्यमरः। ३।१।४१।
"[illegible]। [illegible]। [illegible]। [illegible]। [illegible]। दम्भ। [illegible] [illegible]
१।८१।२।
"अपि दम्भस्य [illegible]।"

दमड़े, पुं। इत्युणादिकोषः।

दम, भ य उ इर् शमे। [illegible] परं-अकं-सकं-सेट्। [illegible] भ य, दाम्यति। उ, दमित्वा [illegible] अदमत् अदमीत्। [illegible] इ इत्यन्ये। शमः शान्तीभावः। शम इतिपरस्य [illegible] करणेऽप्ययमिति धातुप्रदीप। सङ्घातात्। इति दुर्गादास।

दमः, पुं, (दमनमिति। [illegible] दान्तोपदेशस्येति।" ७।३।[illegible] भावः।) दण्डः। इत्यमरः। [illegible] दण्डस्य लक्षणं यथा,—
"दमनाद्दण्डनाच्चैव तस्माद्दण्डं [illegible]
यत्र श्यामो लोहिताक्षो [illegible]
प्रजास्तत्र [illegible]
(यथा, मनुः। ८।१२९।
[illegible]
तपःक्लेशसहिष्णुता। तत्पर्य्यायः। दमथः २। इत्यमरः। १।१।[illegible] तत्तु बाह्येन्द्रियनिग्रहः। इति [illegible]
इति केचित्॥ दमस्य लक्षणं
"कुत्सितात् कर्म्मणो विप्र
स कीर्त्तितो दमः प्राज्ञैः [illegible]
इति मार्क
(यथा, मनुः। ६।९२।
"धृतिः क्षमा दमोऽस्तेयं [illegible]
धीर्विद्या सत्यमक्रोधो [illegible]
कर्द्दमः। इति मेदिनी। म, [illegible]
इति निघण्टुः। २।३। यथा, [illegible]
"अयं यदि वो दमन्[illegible]"
महर्षिविशेषः। यथा, महाभारते।
"विश्वामित्रः स्थूलशिराः सवर्त्त[illegible]
मरुत्तस्य दामः पुत्रः। यथा, [illegible]
"मरुत्तस्य दमः पुत्रस्तस्यैव [illegible]
मरुत्तस्य पौत्रः। इति मार्कण्डेय[illegible]
प्राप्नोति [illegible]
धर्म्मार्थकामसुखभोगमहीं [illegible]
यावद्धृक्षयतिदशा [illegible]
[illegible]
नष्टार्थसिद्धिभयभङ्गशिरोर्त्ति [illegible]
सन्तापशोकपरदेशगतं [illegible]
[illegible]
सत्स्वभावनिपुणः प्रभा [illegible]
श्वेतातपत्रनृपपूजितदेहः [illegible]
स्वस्थ्यसामयनुवर्म्मयोग [illegible]
शौक्रीदशा भवति [illegible]
रवेरन्तर्दशा मासाः। [illegible]
उद्वेगचित्तपरिपीडित [illegible]
क्लेशप्रवासगदभीतिमतिभ्र [illegible]
दुःखप्रयोगभयभङ्गभयादि [illegible]
[illegible]
सोमस्य मासाः १० [illegible]
गदसङ्कटमथार्थ संस्थाप्य [illegible]
कुरुते रक्तबीजायो
अङ्गारस्य मासाः ४ दिनम् १० [illegible]
सर्व्वेषां लिपको भूत्वा
प्राप्नोति धनधान्यानि [illegible]
बुधस्य मासाः ११ दिनम् १० [illegible]
व्याधिः प्रभूयं विशं
करोति सर्व्वकार्य्याणि [illegible]
शनैश्चराः ६ दिनम् २० [illegible]
समारं [illegible] [illegible]
शौरिः करोति [illegible]

१ दिनम् २० पलम् ।
...नाशीर्भवति हानि विग्रहार्थिनः ।
...शश्च मातेः ...गता ॥ ६ ॥
...सा: ८ पलम् ।
...दुःखं ... व्याधिभीतिः ...भयात् ।
...श्चिकाष्ठ ... कुम्भाद्यशा गतः ॥ ७ ॥
...र्षः १ मासौ ८ पलम् ।
...मति रोगं ... कुगतिभयात् ।
...करोति कुजः शनेरन्तर्दशा गतः ॥ ८ ॥
...र्षः ६ । ० । चन्द्रस्य स्थूलदशावर्षाः १५ ।
...न्तर्दशावर्षौ २ मासः १ पलम् ।
...मौक्तिकनिधनारत्नागम-
...मधनादिभोगकलिताति ।
...विद्याविनय ... सौख्यनानि
...शान्तिः दशा ... कुमुदकरनिवासी ॥
...र्षः १ मासाः १ दिनानि १० पलम् ।
...निर्मोहान् चौरादीनां भयम्तथा ।
कुरुते नित्यं विधोरन्तर्दशाङ्गतः ॥
...र्षौ २ मासाः ४ दिनानि १० पलम् ।
...धनलाभश्च नानासौख्यानि च ।
...कुरुते सौख्यं विधोरन्तर्दशाङ्गतः ॥
...र्षः १ मासाः ४ दिनानि २० पलम् ।
...इष्टप्राप्तिं सकलं सौख्यसम्पदम् ।
...कुरुते सौरिश्चन्द्रस्यान्तर्दशाङ्गतः ॥
...र्षौ २ मासाः ७ दिनानि २० पलम् ।
...रोगानि सकलानि बन्धाभ्युदयम् ।
...विद्याधनार्थी विधोरन्तर्दशाङ्गतः ।
...र्षः १ मासाः ८ पलम् ।
...दुःखं दुःखं शोकं बन्धुभयम् ।
...राहुरेव चन्द्रमाकदशाङ्गतः ॥
...र्षौ २ मासाः ११ पलम् ।
...वस्त्रादिभिर्देवी लक्ष्मीश्च वर्धते ।
...शाकसिन्धुभिर्विधोरन्तर्गते सिते ॥
...मासाः १० पलम् ।
...बहुसौख्यञ्च व्याधिनाशमरिक्षयम् ।
...रविः कुर्याद्विधोः पाकदशाङ्गतः ॥
...र्षाः १५ । ० । कुजस्य स्थूलदशावर्षाः ८ ।
...न्तर्दशामासाः ७ दिनानि ३ । २० । पलम् ।
...क्रूरादिघातवधबन्धनधानि घर्मे
...चित्तातुरं विकलशून्यदशाभयञ्च ।
...चौरादिभीतिधनहानिविदेहपीडा
...कुर्यादिनाशमिधनञ्च दशा कुजस्य ॥
...र्षः १ । ३ । ३ । २० । पलम् ।
...वैरं कलुषं नानाविधदुःखाचयम् ।
...ति सौम्यसुतश्च क्षितिजान्तर्दशाङ्गतः ॥
...मासाः ८ । २६ । ४० । पलम् ।
...शिरादिभीतिश्च रोगमरणसम्भवम् ।
...विनश्यतो हृदः कुजस्यान्तर्गते शनौ ॥
...र्षः १ । ४ । २६ । ४० । पलम् ।
...विनाशनार्थदेहाद्यकाञ्चनम् ।
...सुखमाप्नोति कुजस्यान्तर्गते गुरौ ॥
...मासाः १० । २० । पलम् ।

काककाष्ठादिभुरैणं बन्धचौरादिसम्भवम् ।
कुरुते सिंहिकापुत्रो भौमस्यान्तर्दशाङ्गतः ॥
शुक्रस्य वर्षः १ । ६ । २० । पलम् ।
धनवृद्धिं सुखादींश्च नानावस्त्रं वराङ्गनाः ।
प्राप्नोति विपुलां लक्ष्मीं कुजस्यान्तर्गते भृगौ ॥
रवेर्मासाः ५ । १० । पलम् ।
नानारत्नञ्च सौख्यञ्च भूमिलाभमथापि वा ।
इत्यूलाभमवाप्नोति कुजस्यान्तर्गते रवौ ॥
सोमस्य वर्षः १ । १ । १० । पलम् ।
धनलाभं सुखं भोगं शरीरारोग्यमेव च ।
लोकानन्द्यमवाप्नोति क्षितिजान्तर्गते विधौ ॥
एवं वर्षाः ८ । ० । बुधस्य स्थूलदशावर्षाः १७ ।
तस्यान्तर्दशा २ । ८ । ३ । २० । पलम् ।

विद्याप्रतापद्रविणप्रतापप्रदत्वं
सौख्यादिनानावरभोगसुखोदयञ्च ।
नानाप्रकारविभवागमकोषवृद्धिं
नित्यं लभेद्बुधदशा प्रबलाच सिद्धम् ॥

शनेर्वर्षः १ । ५ । २६ । ४० । पलम् ।
वातपित्तकृता पीडा विरोधो बन्धुभिः सह ।
विशिष्टकलहश्चैव बुधस्यान्तर्गते शनौ ॥
गुरोर्वर्षौ २ । ११ । २६ । ४० । पलम् ।
व्याधिमुक्तमपत्नो धनाढ्यो दृढवक्षसः ।
सन्देहार्थी तदर्थ बुधस्यान्तर्गते गुरौ ॥
राहोर्वर्षः २ । १० । २० । पलम् ।
बन्धुनाशं मनस्तापं देहव्याधिश्च बन्धनम् ।
करोति बहुदुःखानि बुधस्यान्तर्गतस्तमः ॥
शुक्रस्य वर्षाः ३ । ३ । २० । पलम् ।
धनाढ्यो बन्धुपुत्रश्च धर्मवस्त्रं धनागमम् ।
कुरुते दानवाचार्यो बुधपाकदशाङ्गतः ॥
रवेर्मासाः ११ दिनानि १० । पलम् ।
प्रिया भवत्या सुखी गजवाजिसमन्वितः ।
प्रभाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
सोमस्य वर्षौ २ । ४ । १० । पलम् ।
कण्डूकादिमेहञ्च अर्शभयो भयमेव च ।
निशाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
कुजस्य वर्षः १ । ३ । ३ । २० । पलम् ।
करचित्तसमुद्भूतां शिरःपीडां भयावहाम् ।
माहेयः कुरुते शोकं बुधस्यान्तर्दशाङ्गतः ॥
एवं वर्षाः १७ । ० । शनेः स्थूलदशावर्षाः १० ।
तस्यान्तर्दशामासाः ११ । ३ । २० । पलम् ।

मिथ्यापवादव्यसनविराग्ययुक्तं
चौरादिभूपतिभयप्रसमीतिमुग्राम् ।
व्यापारनिराश्रय पाञ्चलकार्यहानिं
मन्दोदशा प्रकुरुते नियतं नराणाम् ॥

गुरोर्वर्षः १ । ८ । ३ । २० । पलम् ।
देवताद्वर्तं शान्तं नानाप्राप्तिं करोति च ।
सुहृत्सौख्यमनाढ्यत्वं मन्दस्यान्तर्गतो गुरुः ॥
राहोर्वर्षः १ । १ । १० । पलम् ।
दुःखाद्युर्वं भूरं घोरं दुःखञ्च प्राणसंशयम् ।
धनक्षयञ्च कुरुते शनेरन्तर्गतस्तमः ॥
शुक्रस्य वर्षः १ । ११ । १० । पलम् ।
दुःखदुर्भगसुधर्मः पूर्णो भार्यावित्तसमन्वितः ।
मानं सुखञ्च लभते सौरस्यान्तर्गते सिते ॥
रवेर्मासाः ६ । २० । पलम् ।
मदनाद्यभिगमनं करोति रविदीपितिः ।
जीवनस्य च सन्देहं शनेरन्तर्दशाङ्गतः ॥
सोमस्य वर्षः १ । ४ । २० । पलम् ।
कोपार्त्तं कुक्षिरोगञ्च धननिःसरणं भवेत् ।
बन्धुद्वेषञ्च कुरुते मन्दोरन्तर्दशाङ्गतः ॥
कुजस्य मासाः ८ । २६ । ४० । पलम् ।
देहपीडां तथा रोगं नानादुःखानि भूमिजः ।
धननाशञ्च कुरुते शनेरन्तर्दशाङ्गतः ॥
बुधस्य वर्षः १ । ६ । २६ । ४० । पलम् ।
आरोग्यं विजयं राज्यं बहुवित्तानि सोमजः ।
करोति सादरं सौख्यं शनेरन्तर्दशाङ्गतः ॥
एवं वर्षाः १० । ० । गुरोः स्थूलदशावर्षाः १६ ।
तस्यैवान्तर्दशावर्षाः ३ । ४ । ३ । २० । पलम् ।

राज्यागमं तनयवित्तविलासभोगान्
पर्याप्तसौख्यधनधान्यसमाश्रयञ्च ।
विद्याप्रसादवरदेवसुतार्थसौख्य-
सिद्धिं दशा सुरगुरोः कुरुते प्रियत्वम् ॥

राहोर्वर्षौ २ । १ । १० । पलम् ।
बन्धुद्वेषं गृहवादं स्थानभ्रंशं निराश्रयम् ।
कलहं कारयेन्नादुर्गुरोरन्तर्दशाङ्गतः ॥
शुक्रस्य वर्षाः ३ । ८ । १० । पलम् ।
कलहं बन्धुभिः सार्द्धं वित्तनाशं मनःक्षतिम् ।
स्त्रीवियोगञ्च कुरुते जीवस्यान्तर्गतः सितः ॥
रवेर्वर्षः १ । दिनानि २० । पलम् ।
बहुमित्रं बहुधनं सौभाग्यं राजवल्लभम् ।
कुरुते भास्करः शान्तिं गुरोरन्तर्दशाङ्गतः ॥
सोमस्य वर्षौ २ । ७ । २० । पलम् ।
भोगाढ्यो बहुमान्यः स्याद्विपुरोगविवर्जितः ।
इन्द्रतुल्यो भवेत्तेव गुरोरन्तर्दशाङ्गतः ॥
कुजस्य वर्षः १ । ४ । २६ । ४० । पलम् ।
तीव्रज्वरोत्थो रिपोर्दर्शनं भयवह्नीमदर्शनः ।
सुखसौभाग्यसंयुक्तः कुजे चान्तर्गते गुरौ ॥
बुधस्य वर्षौ २ । ११ । २६ । ४० । पलम् ।
सुस्थो सुमनाः सुखी बुद्धिशुद्धिः पुनः पुनः ।
देवार्चनरतो नित्यं जीवस्यान्तर्गते बुधे ॥
शनेर्वर्षः १ । ८ । ३ । २० । पलम् ।
वेश्यासक्तान्वयात् सौख्यं भवेद्वित्तविवर्जितः ।
सुमतीर्तिमता नित्यं गुरोरन्तर्गते शनौ ॥
एवं वर्षाः १६ । ० । राहोः स्थूलदशावर्षाः
१२ । तस्यान्तर्दशावर्षः १ । ४ । पलम् ।

मार्गादिदूषण-निदानविनादबन्ध-
घस्राभिघातभयदीनमराक्रान्तः ।
कष्टादिनिःसौख्यधनकाञ्चनदीनदेही
राहोर्दशा भवति जीवनसंशयाय ॥

शुक्रस्य वर्षौ २ । मासाः ४ । पलम् ।
शिरोरोगं कुदेहञ्च कुर्याद्दाम्पत्यवञ्चनाम् ।
बान्धवैः कलहो नित्यं राहोरन्तर्गते भृगौ ॥
रवेर्मासाः ८ । पलम् ।
शिरोरोगमयं घोरं [illegible] ...प्यम् ।
इष्टहानिमयं [illegible] ...तः ॥

दहरं, क्ली, (दह+बाहुलकात् अरः।) सूक्ष्मम्। यथा, श्रीभागवते। १०। ८७। १८।
"उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः। परिसरपद्धतिं हृदयमारुणयो दहरम्॥"
"आरुणयस्तु साधात् हृदयस्थं दहरं सूक्ष्ममेवोपासते।" इति तट्टीकायां श्रीधरस्वामी॥

दहरः, पुं, (दहति प्रच्छदत्यनाश्रनेन सन्तापयतीति। दह+अरः।) मूषिका। स्वल्पम्। भ्राता। बालकः। इति विश्वमेदिन्यौ॥

दह्रः, पुं, (दहतीति। दह+"स्फायितञ्चीति।" उणा० २। १३। इति रक्।) अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ दावानलः। इत्युणादिकोषः॥ नरकम्। बालकः। इति संक्षिप्तसारे उणादिवृत्तिः॥ हृदयाकाशम्। यथा, श्रीभागवते। ३। १२। ४४।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च। एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः॥"
"दह्रतः हृदयाकाशात्।" इति तट्टीकायां श्रीधरस्वामी॥ * ॥ अल्पम्। यथा, तत्रैव। ४। १। २६।
"[illegible] हविर्भुवि। [illegible] दह्राधिविंशवाश्च महात्मनः॥"
"दह्राग्निः अल्पाग्निः।" इति श्रीधरस्वामी॥

दा, दाने। इति कविकल्पद्रुमः॥ (भ्वां परं सकं अनिट्।) दा तु दाणे दाण दाणे प्रसिद्धोऽयम्। अतएव यच्छादेशः। यच्छति। इति दुर्गादासः॥

दा, कु ञ नि दाने। इति कविकल्पद्रुमः॥ (जुहोत्यादिं उभं सकं अनिट्।) कु, ददाति। ञ नि, ददाति दत्ते। इति दुर्गादासः॥

दा, ल लवने। इति कविकल्पद्रुमः॥ (अदादिं परं सकं अनिट्।) ल, दाति। लुनातीत्यर्थः। [illegible] इति पठित्वा पित्वाद्यासंज्ञाभावे प्रमादौ दापने इत्यादि मन्यन्ते। मतेन तु [illegible] दोषगे इत्येव। इति दुर्गादासः॥

दा, स्त्री, (दा+विच्।) शोधनम्। दानम्। छेदः। [illegible]। रक्षा। इति मेदिनी। दे, १॥

दाकः, पुं, (ददाति दक्षिणामिति। दा+"इण्भीकापा-[illegible]।" उणा० ३। ४०। इति कः।) यजमानः। इत्युणादिकोषः॥ दाता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

दाक्षं, क्ली, (दक्ष+वुन्।) दक्षाणां समूहः। [illegible]॥ (दाक्षीणां [illegible]। [illegible]।" ४। २। ४१। इति वुन्। दाक्षीपुत्रे। इति [illegible]॥)

दाक्षायणी, स्त्री, (दक्षस्यापत्यं स्त्री। दक्ष+फिञ्। [illegible]।) अश्विन्यादि [illegible]। अमरः। १। ३। २१। [illegible]। इति मेदिनी। णे, ५५। [illegible]। इति हेमचन्द्रः॥ (दक्षकन्यामात्रम्। यथा, मार्कण्डेये। ५०। २१।
"बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी। पत्न्यर्थं प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः॥"
अदितिः। यथा, महाभारते। १। ७५। ८।
"त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा। मारीचः कश्यपस्तस्यामादित्यान् समजीजनत्॥"
कद्रूः। विनता। यथा, तत्रैव। १। २२। ५।
"जग्मतुः परया प्रीत्या परं पारं महोदधेः। कद्रूश्च विनता चैव दाक्षायण्यौ विहायसा॥")
"दक्षस्य तेषामारभ्य प्रजाः सम्यग्विवर्द्धिताः। तत्र दाक्षायणीपुत्राः सर्व्वे देवाः सवासवाः॥ यथर्वोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा। सापि दक्षाय सुश्रोणी गौरी दत्ताय कन्यका॥ दुहितृत्वे पुरा याहि रुद्रेणोढा महात्मना। सा च दाक्षायणी देवी पुनर्भूत्वा नृपोत्तम॥"
इति वराहपुराणम्॥
दन्तीवृक्षः। इति रत्नमाला॥ * ॥

दाक्षायणीपतिः, पुं, (दाक्षायणीनां अश्विन्यादिनक्षत्राणां पतिः।) चन्द्रः। इति त्रिकाण्डशेषः॥

दाक्षायणीरमणः, पुं, (रमयतीति। रम+ल्युः। दाक्षायणीनां रमणः।) चन्द्रः। इति हलायुधः॥

दाक्षाय्यः, पुं, (दक्षाय्य एव। स्वार्थे अण्।) गृध्रः। इत्यमरः। २। ५। २१॥

दाक्षिकन्था, स्त्री, (दाक्षीणां कन्था। "संज्ञायां कन्थोशीनरेषु।" २। ४। २०। इति उशीनरत्वाभावात् न क्लीवता।) वाहीकेषु ग्रामसंज्ञा। इति नपुंसकलिङ्गसंग्रहटीकायां भरतः॥

दाक्षिणात्यः, त्रि, (दक्षिणा दक्षिणस्यां दिशि भवः। दक्षिणा+"दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ९८। इति त्यक्।) दक्षिणदेशोद्भवः। इति शब्दार्थकल्पतरुः॥ (यथा, महाभारते। २। २९६। २।
"प्राच्याश्च दाक्षिणात्याश्च प्रतीच्योदीच्यवासिनः॥")
नारिकेलः। इति राजनिर्घण्टः॥

दाक्षिण्यं, क्ली, (दक्षिणस्य भावः। दक्षिण+ष्यञ्।) अनुकूलता। इति हेमचन्द्रः। ६। ११॥ (सरलता। यथा, आर्य्यासप्तशत्याम्। ६०१।
"सौभाग्यं दाक्षिण्यादितिमुपदिष्टं त्वरैव सखीनाम्। वामाङ्गमेव देवाः कण्ठःस्थितौ नितैमुपता॥"
परच्छन्दानुवर्त्तनम्। यथा, रघुः। १। ३१।
"तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा। पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥")
मात्रिदिश? तत्तु दक्षिणाचारस्वरूपम्। यथा,
"[illegible] वामदाक्षिण्यभावाभ्यामपि पूजयेत्। अहादभैरवीं देवीमुपचारैस्तथैव च॥"
अपि च।
"[illegible] दिवसं निशि चैव मनुष्यान् मृगपक्षिणः। यो यजेत् यद्यर्थं [illegible] परिवेष्टितम्॥"

विधिवत् [illegible]
क्रियते सर्व्वस्तु [illegible]
सर्व्वत्र [illegible]
देवी च [illegible]
[illegible]

दाक्षिणार्हः, त्रि, (दक्ष[illegible] भवम्। दक्षिण+अण्। [illegible] दिक्सम्बन्धिनि च। [illegible] २८२।
"दाक्षिण्यात् अदितारं [illegible]

दाक्षीपुत्रः, पुं, (दाक्ष्याः पु[illegible] इति त्रिकाण्डशेषः॥ (यथा,
"दाक्षीपुत्रस्य तन्त्रे [illegible]

दाक्षेयः, पुं, (दाक्ष्या अपत्यं [illegible] "स्त्रीभ्यो ढक्।" ४। १। १२० [illegible] पाणिनिमुनिः। इति हेमच[illegible]

दाक्ष्यं, क्ली, (दक्षस्य भावः [illegible] ष्यञ्।) दक्षता। [illegible] आशुप्रत्ययः॥ (यथा, [illegible]
"दाक्ष्यं दाक्ष्यं [illegible]
समरति: शौर्य्यं तितुति: [illegible]

दाडकः, पुं, ([illegible] करोतीति। दन्त+डिप्+[illegible] दन्तः। इति शब्दार्थकल्पतरुः॥

दाडिमः, त्रि, (दलयतीति [illegible] मानप्रत्ययमादिमप्। [illegible] इति मेदिनी मे, ४४। [illegible] देवीभागवते। १। १९। [illegible]
[illegible]
तत्पर्य्यायः। करकः २। दन्त[illegible] पिक्षपुष्पः ३ दाडिमः ४ [illegible] पिक्कीरः ७ फलशाडवः [illegible] त्रिकाण्डशेषः॥ रक्तपुष्प: [illegible] दाडिमीसारः ११ कुट्टिम: [illegible] मणिबीजमयो [illegible] रक्तबीजः [illegible] दन्तबीजः १६ मधुबीजः [illegible] रोचनः १८ मणिबीजः [illegible] सुनफलः २२ सुबीजः [illegible] गुणाः। मधुराम्लम्। कषाय[illegible] कफपित्तनिलाधिकम्। [illegible] ग्राहकम्। लघुकम्। [illegible] रुचिराश्रय। [illegible] आध्मानम्। मोहनकम्। [illegible]
"द्विविधं तत्तु विज्ञेयं मधुरं [illegible] मधुरं तत्र [illegible]
लापहारि मधुरं तत्र [illegible] निर्घण्टः॥
"तत्पूर्वं त्रिविधं [illegible]

भारते चत्वारिंशत्दनोः पुत्रा उक्ताः । यथा, तत्रैव । १ । ६५ । २१—२२ ।
"चत्वारिंशद्दनोःपुत्राः ख्याताः सर्व्वत्र भारत ॥
तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः ॥
शम्बरो नमुचिश्चैव पुलोमा चेतिविश्रुतः ।
असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥"
इत्यारभ्य तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)

दानवघ्नः, पुं, (दानवं हन्तीति) वैद्यः । इति पुराणम् ॥ (वैश्वजातिको गान्धर्व्वो देवश्च अश्वविशेषः । यथा, महाभारते । १ । १०१ । ५१ ।
"वयपादिर्म्मांशच्च: स्यात् धर्म्मं वदरघं स्मृतम् ।
वैखा वै दानवघ्नाश्च कर्म्मवचा यवीयसः ॥")

दानवारिः, पुं, (दानवानामरिः ।) देवता । इत्यमरः । १ । १ । ६ ॥ (विष्णुः । यथा, काशीखण्डे । २६ । ८० ।
"दर्पितानेकक्कुत्का दुष्टदुर्ज्जयदुःसहृत् ।
दैत्यहृद्दुरितघ्नी च दानवारिपदालसा ॥"
"दानवारिपदालसा विष्णुपादार्घ्यसम्भूतेति । स्तुतेः ।" इति तट्टीका ॥ दानमेव वारि इति विग्रहे गजमदजले, क्ली ॥)

दानविधिः, पुं, (दानस्य विधिः ।) दानस्य विधानम् । यथा,—
"अथ दानविधिं वक्ष्ये तं मे शृणुत सुव्रताः ।
अन्येभ्यो ब्राह्मणाः श्रेष्ठास्तेभ्यश्चैव क्रियापराः ॥
ब्रह्मदेया च तेभ्योऽपि पात्रं विद्यातपोन्वितः ।
गोभूधान्यहिरण्यादि पात्रे दातव्यमर्च्चितम् ॥
विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥
दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतञ्च शक्तितः ॥
हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥
दातास्याः स्वर्गमाप्नोति वत्सरान् रोमसम्मितान् ।
कपिला चेत्तारयति भूयश्चासप्तमं कुलम् ॥
[illegible]
तावन्तः पृथिवी ज्ञेया [illegible] ॥
यथाकथञ्चिद्दत्त्वा गां धेनुं वाऽधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

तस्मात् सर्व्वप्रयत्नेन कार्य्यो वेदार्थसंग्रहः ॥
इतिहासं पुराणं वा लिखित्वा यः प्रयच्छति ।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणोत्तरम् ।
लोकायतं कुतर्कञ्च प्राकृतं म्लेच्छभाषितम् ।
न श्रोतव्यं द्विजेनैव तदधो नयति द्विजम् ॥
समर्थो यो न गृह्णीयात् दातृलोकमवाप्नुयात् ॥
कुशाः शाकं पयो गन्धाः प्रत्याख्येयं न वारि च ।
अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः ॥
अन्यत्र कुलटाषण्ढपतितेभ्यो द्विषस्तथा ।
देवातिथ्यर्च्चनकृते पितृभृत्यार्थमेव च ।
सर्व्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च ॥"
इति गारुडे ९८ अध्यायः ॥

दानशीलः, त्रि, (दाने शीलं स्वभावो यस्य । यद्वा, दानस्य शीलं सततमनुष्ठानं यस्य ।) दाता । तत्पर्य्यायः । वदान्यः २ वदंयः ३ । इति हेमचन्द्रः । ३ । १५ ॥ (यथा, महाभारते । ५ । १२२ । ५ ।
"यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥")

दानशौण्डः, त्रि, (दानेषु शौण्डः अतिदक्षः । "सप्तमी शौण्डैः ।" २ । १ । ४० । इति समासः ।) बहुप्रदः । इत्यमरः । ३ । १ । ६ ॥ (यथा, माघे । १४ । ३६ ।
"निर्गुणोऽपि विमुखो न भूपते-
र्दानशौण्डमनसः पुरोऽभवत् ॥")

दानसागरः, पुं, (दानानां सागर इव ।) षोडशमहादानविशेषः । यथा,—
"यः कश्चित् कुरुते देवि ! महती दानसागरम् ।
अथवान्यत् महादानं यत्किञ्चित् पृथिवीतले ।
पुरश्चरणं तथा होमं यः कुर्य्याद्विधिपूर्व्वकम् ।
सर्व्वं तस्य वृथा देवि ! गौरीपूजनं विना ॥"
इति कैलासयोगतन्त्रे आगमसन्दर्भे शारदया- देवदेवीसंवादे २५ पटलः ॥

दानीयः, त्रि, (दीयतेऽस्मै इति । दा दाने+ "कृत्यल्युटो बहुलम् ।" ३ । ३ । ११३ । इति सम्प्रदाने अनीयर् ।) सम्प्रदानम् । इति मुग्धबोधम् ॥ (यथा, तत्रैव कारकप्रकरणे ।
"सर्व्वोऽप्यर्थो यस्य नाना दानीयः प्रकाशो
ज्ञेयः ॥")

दानुः, त्रि, (ददातीति । दा + "दाभाभ्यां नुः ।" उणां ३।३२। इति नुः ।) दाता । विक्रान्तः । इति मेदिनी । ने, १० ॥ [illegible] । वायुः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (पुं, दानवः । यथा, ऋग्वेदे । ८ । १६ । ११ ।
"[illegible]
[illegible] ॥"
[illegible] । यथा, ऋग्वेदे । ८ । २५ । ६ ।
"[illegible] ॥")

दान्तः, त्रि, (दाम्यतीति । दम + कर्त्तरि क्तः ।) [illegible] । यथा, मनुः । ४ । ३५ ।
"[illegible] ॥")

यद्गङ्गायां कृतं सर्व्वं कोटि कोटि गुणम्भवेत् ॥
शिवस्य विष्णोरप्येव सन्निधौ दत्तमक्षयम् ।
शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ।
तत्र दानञ्च होमश्च कोटिकोटिगुणम्भवेत् ॥
यद्द्यत्र दुर्लभं द्रव्यं यस्मिन् कालेऽपि वा पुनः ।
दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा ॥
पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् ।
केवलं धर्म्मबुद्ध्या यद्धर्म्मदानं प्रचक्ष्यते ॥
सहस्रगुणितं दानं भवेद्दत्तं युगादिषु ।
कर्म्मश्राद्धादिकञ्चैव तथा मन्वन्तरादिषु ॥*॥
आहारं मैथुनं निद्रां सन्ध्याकाले विवर्ज्जयेत् ।
कर्म्म चाध्ययनञ्चैव तथा दानप्रतिग्रहौ ॥*॥
मानसेन तु यत्नेन दानेन तपसा तथा ।
देवलोके ध्रुवं वासो देवसायुज्यमेव च ॥*॥
गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम् ।
सहस्रगुणमाहूय याचिते च तदर्द्धकम् ॥
आशां दत्त्वा त्वदातारं दानकाले निषेधकम् ।
दत्त्वा सन्तप्यते यस्तु तमाहुर्ब्रह्मघातकम् ॥
योऽसद्भ्यः प्रतिगृह्यापि पुनः सद्भ्यः प्रयच्छति ।
आत्मानं संक्रमं कृत्वा परांस्तारयते हि सः ॥*॥
यस्य यद्दीयते वस्त्रमलङ्कारादि किञ्चन ।
तेषां दैवतसुधार्म्मं कृत्वा प्रोक्षणपूजने ।
उत्सृज्य मन्त्रमन्त्रेण प्रतिनाम्ना निवेदयेत् ॥
योऽर्च्चितः प्रतिगृह्णाति दद्यादर्च्चितमेव वा ।
तावुभौ गच्छतः स्वर्गं नरकञ्च विपर्य्यये ॥”

इति शुद्धितत्त्वम् ॥*॥

दानं त्रिविधं सात्त्विकं राजसं तामसञ्च ।
सात्त्विकं यथा,—
“दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
राजसं यथा,—
“यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं विदुः ॥”
तामसं यथा,—
“अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥”

इति श्रीभगवद्गीता ॥*॥

“दत्त्वाग्रं तामसं दानं भक्तिसत्कारिकाश्रनम् ।
परोक्षं हरते यस्तु यथाद्दानं प्रयच्छति ॥
न च गच्छन्ति वै स्वर्गं दातारो यत्र भाविनः ।
अनेन कर्म्मणा युक्ताः पच्यन्ते नरकेऽधमाः ॥”

इति मत्स्यपुराणम् ॥*॥

नित्यनैमित्तिकादिभेदेन तच्चतुर्व्विधं यथा,—
“नित्यं नैमित्तिकं काम्यं त्रिविधं दानमुच्यते ।
चतुर्थं विमलं प्रोक्तं सर्व्वदानोत्तमोत्तमम् ॥
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलन्तत् स्याद्ब्राह्मणाय च नित्यकम् ॥
यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुत्तमम् ॥
अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानं तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
ईश्वरप्रीणनार्थाय ब्रह्मवित्सु प्रदीयते ।
चेतसा धर्म्मयुक्तेन दानं तद्विमलं शिवम् ॥”

इति कूर्म्मपुराणम् ॥

रोगोपशमनाय दानविधिर्यथा,—
“गोदानं भूमिदानञ्च स्वर्णदानं सुराधैनम् ।
कृत्वा पश्चात् प्रतीकारं कुर्य्यात् पाण्डुप्रशान्तये ॥
महापापेषु सर्व्वेषु तदर्द्धं शाम्यतीयते ।
अथवापि यदुक्तीयात् कर्म्मं व्याधिनश्चातनात् ॥
कुर्य्यात् सर्व्वं कृतं कर्म्म कुष्ठरोगोपशान्तये ।
गोभूहिरण्यदानञ्च तथामिष्टान्नभोजनम् ॥
चतुर्व्विधं दानमिदं दत्त्वा कुर्य्यात् प्रतिक्रियाम् ।
कदाचिदपि सिध्येत आयुषश्च बलक्रिया ॥
मेहे सुवर्णदानञ्च शूले श्वासे भगन्दरे ।
अश्मर्य्यश्वप्रदानेन श्वासात् कासाद्विमुच्यते ॥
ज्वरेष्वीश्वरपूजा च रुद्रजाप्यं समाचरेत् ।
मतिदानान्नदानञ्च श्राद्धदानं भ्रमातुरे ॥
अग्निहोमश्चाग्निमान्द्ये कन्यादानञ्च गुल्मके ।
मेहाश्मरीविनाशाय लवणञ्च प्रदापयेत् ॥
बहुभोजनदानेन शूलरोगाद्विमुच्यते ।
घृतमधुप्रदानेन रक्तपित्तं प्रशाम्यति ॥
चतुर्व्विधेन दानेन साध्यः स्यादृ महयोगदः ।
सुवर्णदानात् कुष्ठी स्यादवन्त्यः सुखी भवेत् ॥
रौप्यदानाच्छिन्नकुष्ठं साध्यं वापि प्रशाम्यति ।
सिध्मले मधुदानञ्च वर्व्वरे लोहदानकम् ॥
सुखत्रयी ददेन्नागं गोदानं बहुमूत्रके ।
नेत्ररोगे घृतं दद्यात् सुगन्धं नासिकागदे ॥
तैलदानं कण्डुरोगे रसदानञ्च जिह्वके ।
उदकं दद्यात् पित्तरोगे लूतारोगे च देवदः ॥”

इति हारीते द्वितीयस्थाने प्रथमेऽध्याये ॥)

दानकर्म्म, क्ली, (दानमेव कर्म्म ।) दानक्रिया । तत्पर्य्यायः । दाति १ दाशति २ दासति ३ राति ४ रासति ५ पृणक्ति ६ पृणाति ७ शिक्षति ८ तुञ्जति ९ मंहते १० । इति दश दानकर्म्माणः । इति वेदनिघण्टौ ३ अध्यायः ॥

दानधर्म्मः, पुं, (दानाख्यो धर्म्मः दानरूपो धर्म्मो वा मध्यलोपिसमासः ।) दानस्य फलम् । यथा,

ब्रह्मोवाच ।

“अथातः संप्रवक्ष्यामि दानधर्म्ममनुत्तमम् ।
अर्थानामुचिते पात्रे श्रद्धया प्रतिपादनम् ॥
दानन्तु कथितं तच्च भुक्तिमुक्तिफलप्रदम् ।
न्यायेनोपार्ज्जयेद्वित्तं दानभोगफलञ्च तत् ॥
अध्यापनं याजनञ्च वृत्तमाहुः प्रतिग्रहम् ।
कुसीदं कृषिवाणिज्यं क्षत्रतोऽपि चार्ज्जयेत् ॥
यद्दीयते च पात्रेभ्यस्तद्दानं परिकीर्त्तितम् ।
नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम् ॥
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलं तत् स्याद्ब्राह्मणाय तु नित्यकम् ॥
यत्तु पापोपशान्त्यै च दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥
अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानं तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
ईश्वरप्रीणनार्थाय ब्रह्मवित्सु प्रदीयते ।

चेतसा धर्म्मयुक्तेन
दशभिः
ददाति वेदविदुषे च
भूमिदानात् परं दानं
नित्यं दत्त्वा ब्राह्मणाय
दद्यादहरहस्तात् श्रद्धया
सर्व्वपापविनिर्म्मुक्तो
उपोष्याभ्यर्च्चयेद्विद्वान् मधुरा
प्रीयतां धर्म्मराजेति यथा
यावज्जीवकृतं पापं
कृष्णाजिने तिलान् कृत्वा
ददाति यस्तु विप्राय सर्व्व
कृतान्नमुदकुम्भञ्च
निर्द्दिश्य
यो हि
ब्राह्मणान्
सन्ततिकामः सततं पूजयेत् पुरन्दर
कर्म्मणां सिद्धिकामस्तु पूजयेत्
भोगकामो हि शशिनं
मुमुक्षुः सर्व्वसंसारात्
अकामः सर्व्वकामो वा
वारिदस्तृप्तिमाप्नोति
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्
भूमिदः सर्व्वमाप्नोति
गृहदोऽग्र्याणि
अनडुहः श्रियं पुष्टां
यानशय्याप्रदो भार्य्यामैश्वर्य्यमभयप्रदः
धान्यदः शाश्वतं सौख्यं
वेदविद्भ्यो ददद्दानं स्वर्गलोके महीयते
गवां घासप्रदानेन सर्व्वपापैः प्रमुच्यते
इन्धनानां प्रदानेन दीप्ताग्निर्जायते नरः
दद्यान्नो रोगरहितः सुखी दीर्घायुरेव
असिपत्रवनं मार्गं क्षुरधाराकर्म्म
रौद्रञ्चातपञ्च तरति
यद्यदिष्टतमं लोके यच्चास्ति दयितं गृहे
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता
अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः
संक्रान्त्यादिषु कालेषु दत्तं
प्रयागादिषु तीर्थेषु गयायाञ्च विशेषतः
दानधर्म्मात् परो धर्म्मो भूतानां नेह विद्यते
स्वर्गायुर्भूतिकामेन देयं पापोपशान्तये
दीयमानन्तु यो मोहात् गोविप्राग्नि
निवारयति पापात्मा तिर्य्यग्योनिं स

निष्फलैतामशाद्धं न प्रयच्छति ।
देषु विशेषु मद्धरा च तु गर्हितः ॥"
गारुडे दानधर्म्मनाम ५१ अध्यायः ॥*॥
महाभारते शान्तिपर्व्वणि द्रष्टव्यम् ॥
पुं, (दाने मतिः श्रेष्ठः ।) सततदाता ।
दायकः ॥ (यथा, महाभारते । ५ ।
२२ ।
। दानपतिः पुत्रस्तथा शूरसपादरः ॥")
। इति श्रीभागवतम् ॥ (यथा, हरि-
७८ । ८४ ।
दानपते ! शिघ्रं तावद्दानयितुं प्रजान् ।
मच गोमांश्च वरदान् मम प्रावदात् ॥"
:। यथा, हरिवंशे । २३२ । ७ ।
प्रमादः सुतस्य, तथ्यश्चैव महासुरः ।
कटो दानपतिः श्रेसकम्पो कुसाकुलः ॥")
स्त्री, (दानस्य फलम्) दानजन्यफलम् ।
दं यथा,—
यर्हीयते दानं भक्त्या मात्रे विधानतः ।
तत्फलं विद्धि मवत्यानितये इम ! ॥
तत्तु यो दद्यात् भयात् क्रोधात्तथैव च ।
दानस्तु तत् सर्व्वं भुङ्क्ते गर्भस्थ एव तु ॥
चुलनाचैव दम्भार्थं चार्थकारणात् ।
दाति हिंसातिभ्यः स माल्ये तु तदश्नुते ॥
दैवविहीनस्य सन्ध्योपासनवर्ज्जितम् ।
यं दीयते वस्ते वृद्धकाले तदश्नुते ॥
कानि चत्वारि वृथा दानानि षोडश ।
हं संप्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
वस्य वृथा सक धर्म्मबाह्या नराः सदा ।
किं सदामलि परतामरताश्च ये ॥
महविहीनं यत् ईश्वरेभ्यः सदीयते ।
दुःकीर्त्तनाश्चैव वेदाभिग्रहणागिने ॥
योषार्ज्जितं दानं यद्धि ब्रह्महयि तथा ।
गुरुवञ्चके च स्तेनाय पतिताय च ॥
राय च यद्दत्तं सर्व्वदा ब्रह्मविद्विषे ।
ताय च सर्व्वस्व वृथत्याः मतये तथा ॥
चारकाय मत्स्याय सर्व्वत्र पिशुनाय च ।
गनि तु राजेन्द्र ! वृथादानानि षोडश ॥"
त्यादि वह्निपुराणे दानावस्थादिर्दूषनामा-
यः ॥
पुं, (दनोरपत्यम् । दनु + "तस्यापत्यम् ।"
१ । १२ । इति अण् ।) असुरः । इत्य-
। १।१।१२ ॥ (यथा, ऋग्वेदे ।२।११।१० ।
"नि मायिनो दानवस्य माया
अपादयत् पपिवान्त्सुतस्य ॥")
दनुकश्यपतनये कश्यपात्मात एकषष्टि-
दनुपुत्राः प्रधानास्तेषां नामानि यथा,
द्विमूर्द्धा १ शम्बरः २ अरिष्टः ३ हयग्रीवः ४
विभावसुः ५ अयोमुखः ६ शङ्कुशिराः ७
स्वर्भानुः ८ कपिलः ९ अरुणः १० पुलोमा ११
वृषपर्व्वा १२ एकचक्रः १३ तापनः १४ धूम्र-
केशः १५ विरूपाक्षः १६ विप्रचित्तिः १७
दुर्जयः १८ । इति श्रीभागवतम् ॥ (महा-
भारते चत्वारिंशद्दनोः पुत्रा उक्ताः । यथा,
तत्रैव । १ । ६५ । २१—२२ ।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत ॥
तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः ॥
शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः ।
असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥"
इत्यारभ्य तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)
दानवज्रः, पुं, (दाने वज्र इव ।) वैश्यः । इति पुरा-
णम् ॥ (वैश्यजातिको गान्धर्व्वो देवश्च अश्व-
विशेषः । यथा, महाभारते । १ । १७१ । ५१ ।
"वज्रमादित्यतः स्यात् चत्त्रं वषरदं स्मृतम् ।
वैश्या वै दानवज्राश्च कर्म्मवज्रा यवीयसः ॥")
दानवारिः, पुं, (दानवानामरिः ।) देवता । इत्य-
मरः । १ । १ । ९ ॥ (विष्णुः । यथा, काशी-
खण्डे । २९ । ८० ।
"दर्शितानेककुतुका दुष्टदुर्व्वृत्तदुःखहृत् ।
दैन्यदुःखहरिणी च दानवारिपदाब्जजा ॥"
"दानवारिपदाब्जजा विष्णुपादार्घसम्भूतेति
स्मृतेः ।" इति तट्टीका ॥ दानमेव वारि इति
विग्रहे गजमदजले, क्ली ॥)
दानविधिः, पुं, (दानस्य विधिः ।) दानस्य विधा-
नम् । यथा,—
"अथ दानविधिं वक्ष्ये तं मे शृणुत सुव्रताः ।
धर्म्मिभ्यो ब्राह्मणाः श्रेष्ठास्तेभ्यश्चैव क्रियापराः ॥
ब्रह्मदेता च तेभ्योऽपि पात्रं विद्यातपोऽन्वितः ।
गोभूधान्यहिरण्यादि पात्रे दातव्यमर्च्चितम् ॥
विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥
दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतन्तु शक्तितः ॥
हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥
दशवर्षार्पितं ग्रन्थं भ्रष्टं ग्रन्थं चमपतेः इतम् ।
मधाप्रनुमतिकं पात्रं कांस्यं वस्त्रञ्च कौशिके ॥
स्वर्णपिप्पलदानेन वस्त्रो वा वस्त्रविकापि वा ।
तस्यानपि च दातव्यं अपदं रोगवर्ज्जितम् ॥
दाता स्वर्गमवाप्नोति वत्सरान् रोमसम्मितान् ।
कपिला चैत्तारयति भूयश्चासप्तमं कुलम् ॥
यावद्वत्सस्य द्वौ पादौ मुखं योन्यां प्रदृश्यते ।
तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥
यथाकथञ्चिद्दत्त्वा गां धेनुं वाधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥
श्रान्तसंवाहनं रोगिपरिचर्य्या सुरार्च्चनम् ।
पादशौचं द्विजोच्छिष्टमार्ज्जनं गोप्रदानवत् ॥
द्विजाय दत्त्वा भूमिं दत्त्वा स्वर्गमवाप्नुयात् ।
भूदीपाश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ॥
गृहधान्यच्छत्रमालायानदत्त्वर्तं फलम् ।
शय्यादुदेयनं दत्त्वा स्वर्गलोके महीयते ॥
ब्रह्मदाता ब्रह्मलोकं प्राप्नोति सुरदुर्ल्लभम् ॥
वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि ।
मूल्येनापि लिखितानि ब्रह्मलोकमवाप्नुयात् ॥
इतिहासं पुराणं मत्कारयन् पुण्यवान् नरः ।
तस्मात् सर्व्वप्रयत्नेन कार्य्यो वेदार्थसंग्रहः ॥
इतिहासं पुराणं वा लिखित्वा यः प्रयच्छति ।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम् ।
लोकायतं कुतर्कञ्च प्राकृतं म्लेच्छभाषितम् ।
न श्रोतव्यं द्विजेनैव तदधो नयति द्विजम् ॥
समर्थो यो न गृह्णीयात् दातृलोकमवाप्नुयात् ॥
कुशाः शाकं पयो गन्धा मत्स्याश्चैव न वारि च ।
अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः ॥
अन्यत्र कुलटाषण्ढपतितेभ्यो द्विषस्तथा ।
देवातिथ्यर्च्चनकृते पितृभृत्यार्थमेव च ।
सर्व्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च ॥"
इति गारुडे ९८ अध्यायः ॥
दानशीलः, त्रि, (दाने शीलं स्वभावो यस्य । यद्वा,
दानस्य शीलं सततमनुष्ठानं यस्य ।) दाता ।
तत्पर्य्यायः । वदान्यः २ वदन्यः ३ । इति हेम-
चन्द्रः । ३ । १५ ॥ (यथा, महाभारते । ५ ।
१२२ । ५ ।
"यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥")
दानशौण्डः, त्रि, (दानेषु शौण्डः अतिदक्षः ।
"सप्तमी शौण्डैः ।" २ । १ । ४० । इति समासः ।)
बहुप्रदः । इत्यमरः । ३ । १ । ६ ॥ (यथा,
माघे । १४ । ४६ ।
"निर्गुणोऽपि विमुखो न भूपते-
र्दानशौण्डमनसः पुरोऽभवत् ॥")
दानसागरः, पुं, (दानानां सागर इव ।) षोडश-
महादानषोडशः । यथा,—
"यः कश्चित् कुरुते देवि ! मद्ध्ये दानसागरम् ।
तथैतुल्यं महादानं यत्किञ्चित् पृथिवीतले ।
पुरश्चर्य्यं तथा होमं यः कुर्य्याद्विधिबोधितम् ।
सर्व्वं तस्य वृथा देवि ! श्रीगुरोरर्च्चनं विना ॥"
इति श्रीकामधेनुतन्त्रे आगमसन्दर्भे ज्ञानदर्भके
देवदेवीसंवादे २५ पटलः ॥
दानीयः, त्रि, (दीयतेऽस्मै इति । दा दाने +
"कृत्यल्युटो बहुलम् ।" ३ । ३ । ११३ । इति
सम्प्रदाने अनीयर् ।) सम्प्रदानम् । इति मुग्ध-
बोधम् ॥ (यथा, तत्रैव कारकप्रकरणे ।
"सर्व्वोऽर्थो लोकः पाता दानीयः प्रभवो
लयः ॥")
दानुः, त्रि, (ददातीति । दा + "दाभाभ्यां नुः ।"
उणां ।३।३२ । इति नुः ।) दाता । विक्रान्तः ।
इति मेदिनी । ने, १० ॥ धर्म्मे । वायुः । इति
संक्षिप्तसारे उणादिवृत्तिः ॥ (पुं, दानवः ।
यथा, ऋग्वेदे । २ । १२ । ११ ।
"श्रीमान्यमानं यो अहिं जघान दानुं शयानं स
जनास इन्द्रः ॥"
दीयते इति कर्म्मणि नुः । देयः । यथा, ऋग्-
वेदे । ८ । २५ । ६ ।
"सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः ॥")
दान्तः, त्रि, (दाम्यतीति । दम + कर्त्तरि क्तः ।)
तपःक्लेशसहः । (यथा, मनुः । ४ । ३५ ।
"कॢप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः ॥")

दमितः । इत्यमरः । २ । ७ । ४३ ॥ (यथा, महाभारते । १ । २२२ । ४६ ।
"तथैवाप्सरसीश्च दान्तानां वातरंहसाम् ।"
दन्तेन निर्वृत्तम् । दन्त+"तेन निर्वृत्तम् ।"
४ । २ । ६८ । इति अण् । दन्तनिर्म्मितम् ।
यथा, महाभारते । ५ । ४६ । ५ ।
"रुचिरैरासनैः कीर्णां काञ्चनैर्दारवैरपि ।
अश्मसारमयैर्दान्तैः स्वास्तीर्णैः सोत्तरच्छदैः ॥")
दाता । इति संक्षिप्तसारे उणादिवृत्तिः ॥
पुं, दमनकवृक्षः । शिंशिपावृक्षः । इति राजनिर्घण्टः ॥ (विदर्भराजपुत्त्रविशेषः । यथा, महाभारते । ३ । ५३ । ८—९ ।
"तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्च्चसम् ॥"
स्त्री, अप्सरोविशेषः । यथा, महाभारते । १३ । १९ । ४५ ।
"विद्युता प्रशमी दान्ता विद्योता रतिरेव च ॥")
दान्तिः, स्त्री, (दम+क्तिन् । "अनुनासिकस्येति ।" ६ । ४ । १५ । इति दीर्घः ।) तपःक्लेशसहिष्णुता । तत्पर्य्यायः । दमथुः २ दमः ३ । इत्यमरः । ३ । २ । ३ ॥
दापितः, त्रि, (दाप्यते स्म इति । दा+णिच्+कर्म्मणि क्तः ।) साधितः । इत्यमरः । ३।१।४० ॥ धनादिना आयत्तीकृतः । इति भरतः ॥ धूर्त्तौ इति ख्यातं यस्मै दत्तं स इति रमानाथः ॥ दण्डितः । इति विद्याविनोदः ॥ शोधितऋणम् । इति नयनानन्दः ॥ दायित इति पाठोऽपि । इति कालिङ्गपुरुषोत्तमौ ॥
दाम, [न्] क्ली स्त्री, (दीयते इति । दा दाने दो अवखण्डने वा+"सर्व्वधातुभ्यो मनिन् ।" उणां । ४ । १४५ । इति मनिन् ।) यत्रैकस्मिन् बहुप्रग्रहयुक्ते अनेकगावो बध्यन्ते सत्। दाउनि इति दौंका इति च भाषा । तत्पर्य्यायः । सन्दानम् २ । इत्यमरः । २ । ९ । ७३ ॥ रज्जुः । इति दामोदरदर्शनात् ॥ (यथा, भागवते । १ । ८ । ३१ ।
"गोप्याददे त्वयि कृतागसि दाम तावत्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं निनीय भयभावनया स्थितस्य
सा मां विमोहयति भीरपि यद्बिभेति ॥"
माला । यथा, माघे । ४ । ५० ।
"उच्चमणद्युतिलम्बिपिच्छदाम्नः
शिखरशिरसः शिखिनेत्ररानस्य ॥"
दामरि, त्रि । यथा, ऋग्वेदे । ६ । ४४ । २ ।
"यः शग्मस्तुविशग्म ते रायो दामा मतीनाम् ॥"
"रायो धनस्य दामा दाता भवति ।" इति तद्भाष्ये सायनः ॥)
दामकर्म्म, [न्] क्ली, (दमनो दमनकवृक्षस्ते-दमिकप्रत्यये दामनं तदुभञ्जनसम्बन्धि कर्म्म यस्मिन् ।) दमनभञ्जनतिथिः । सा चैत्रशुक्लचतुर्दशी । इति तिथ्यादितत्त्वम् ॥

दामनी, स्त्री, (दामैव । दामन्+स्वार्थे प्रज्ञादित्वात् अण् । "अन् ।" ६ । ४ । १६७ । इति प्रकृतिभावः । "टिड्ढेति ।" ४ । १ । १५ । इति ङीप् ।) पशुबन्धनरज्जुः । तत्पर्य्यायः । पशुरज्जुः २ । इत्यमरः । २ । ९ । ७३ ॥ (यथा, हरिवंशे । ६५ । २४ ।
"कौलेरारोप्यमाणैश्च दामनीपाशपाशितैः ॥")
दामलिप्तं, क्ली, तमोलिप्तदेशः । इति हेमचन्द्रः । ४ । ४५ ॥
दामा, स्त्री, (दामन्+"डाबुभाभ्यामन्यतरस्याम् ।" ४ । १ । १३ । इति पक्षे डाप् ।) दाम । इति भरतः ॥
दामाञ्चनं, क्ली, (दामाञ्चलम् । पृषोदरादित्वात् लस्य नः ।) अश्वादेः पादबन्धनरज्जुः । इति हेमचन्द्रः । ४ । ३१० ॥
दामाञ्चलं, क्ली, (दाम्नः अञ्चलमिव ।) एकप्रपादित्रि बन्धः । अश्वादिपादबन्धनरज्जुः । इति हारावली । ६१ ॥ (यथा, माघे । ५ । ६१ ।
"सद्यः सरोषपरिचारकवार्य्यमाणा
दामाञ्चलस्खलितलोलपदं तुरङ्गाः ॥")
दामोदरः, पुं, ("दमादिसाधनेनोदारा उत्कृष्टा मतिर्या तया गम्यते इति दामोदरः । 'दामा-दामोदरं विदुः ।' इति भगवद्वचनात् । यशोदया दाम्नोदरे बद्ध इति वा दामोदरः ।
'दामानि लोकनामानि तानि यस्योदरान्तरे ।
तेन दामोदरो देवः श्रीधरस्तु रमाश्रितः ॥'
इति वा ।" इति विष्णुसहस्रनामभाष्ये शङ्करः ॥ ५३ ॥ तथा, महाभारते । ५ । ७० । ८ ।
"देवानां स्वप्रकाशत्वात् दमाद्दामोदरो विभुः ॥")
विष्णुः । इत्यमरः । १ । १ । १८ ॥ (दाम रज्जुरुदरे यस्य । श्रीकृष्णः । यथा, महाभारते । १ । १९० । १९ ।
"दामोदरो भ्रातरमुग्रवीर्य्यं
हलायुधं वाक्यमिदं बभाषे ॥"
यशोदयास्य उदरदेशे दाम्ना बद्ध आसीत् अतोऽस्य तथा नाम । यथा, हरिवंशे । ६३।१४,२६ ।
"दाम्ना चैवोदरे बद्धा प्रत्यबन्धदुदूखले ।
यदि शक्तोऽसि गच्छेति तमुक्त्वा कर्म्म साकरोत् ॥"
"स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात् ।
गोष्ठे दामोदर इति गोपीभिः परिगीयते ॥")
भूलाहृदविशेषः । इति हेमचन्द्रः । २ । १६० ॥ (शालग्रामशिलाविशेषः । तल्लक्षणं यथा, पद्मपुराणे ।
"स्थूलो दामोदरो ज्ञेयः सूक्ष्मचक्रो भवेत्तु सः ।
चक्रे तु मध्यदेशेऽस्य पूजितः सुखदः सदा ॥"
अस्य अन्यद्विवरणन्तु शालग्रामशब्दे द्रष्टव्यम् ॥ काश्मीरस्य नृपविशेषः । यथा, राजतरङ्गिण्याम् । १ । ६४ ।
"गतिं ग्भीरसुलभां तस्मिन् सुचरिते गते ।
श्रीमान् दामोदरो नाम तत्सुतरभूत् क्षितिम् ॥")
दाम्भिकः, पुं स्त्री, (दम्भेन चरतीति । दम्भ+"चरति ।" ४ । ४ । ८ । इति ठक् ।) बक-

पक्षी । इति राजनिर्घण्टः ।
(यथा, मनुः । ४ । १९५ ।
"धर्म्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः । ..."
दाय, ... इ दाने । इति कविकल्पद्रुमः ।
(आत्म-सक-सेट् ।) ... ।
इति दुर्गादासः ॥
दायः, पुं, (दीयते इति । दा+"ट ... युक् चिण्कृतोः ।" ७ । ३ । ३३ ।) यौतुकादिदेयधनम् । (यथा, ... ५१ । १ ।
"दायस्तु विविधं तस्मै ... यज्ञार्थं राजभिर्दत्तं ... कन्यादानकाले ... ब्राह्मणादिभ्यश्च यद्दत्तं ... ॥")
भरतः ॥ तत्पर्य्यायः । हरणम् । २ । ८ । २८ ॥ सोत्सुकभाषण... विभाजनीयधनम् । (यथा, मनुः । ९ । ...
... विभागार्हधनमात्रम् । यथा, ...
"संवत्सरं ...
ऊर्द्ध्वं संवत्सरात् ... दायं ...
(दा दाने+भावे घञ् ।) दानम् । ...
ये, ३० ॥ (यथा, मनुः । ८ । ...
"अस्वामिना ...
अज्ञानः स तु विज्ञेयो ... ॥")
स्थानम् । (दो छेदे+घञ् ।) ...
शब्दरत्नावली ॥ ... इत्यमरः ...
लीति । दा+"श्याद्व्यधेति ।" ३ । १ ...
इति णः । दामरि, त्रि । ...
दायकः, त्रि, (ददातीति । दा+ण्वुल् ।) दाता ।
यथा । हृतारिपतिदायक इति ...
सिन्धुः ॥ (यथाच महाभारते । ...
३३ ।
"तावत्सो ...
दायबन्धुः, पुं, (दाये बन्धुः ।) भ्राता ।
रत्नावली ॥
दायभागः, पुं, (दायस्य भागः ।) पूर्व्वस्वामिसम्बन्धिधनविभागः । पूर्व्वस्वा...
धीनं तत्स्वाम्युपरमे यत्र ...
दायशब्दस्तस्य विभागः ।
भूहिरण्यादावुत्पन्नस्य स्वत्व...
प्रमाणाभावेन वैशेषिकव्यवहार...
स्थितस्य गुटिकापातादिना व्य...
विशेषेण भजनं व्यञ्जनं वा ।
दायोगवादिकं बहुसाधारणं ...
कालविशेषवचनरोहणमेव ...
अथ दायाधिकारक्रमे पुत्र...
तथादौ स्वधने औरसपुत्र...
भावे पौत्रस्य । तदभावे प्रपौ...
पितृकर्म्मस्मृतिसमस्त...
सह तुल्याधिकारः । ...
कारिणी । तथाच विष्णुः ...

तस्य दानाधिकारित्वात् कर्त्तुमर्हति । …ौरसे दौहित्रस्त्रियार्थं दानादिकमपत्न्य-…ऽप्यधिकारः आधमणमध्युमनं तदानी…ति । भर्तुरौरसदौहित्रस्त्रियार्थमर्थानु-भर्तृमितिरभर्तृगृहभर्तृदौहित्रसन्तान-…मर्थैर्मातुर्भ्यो दद्यात् । एतेषा-मपि… दद्यात् । पत्न्यभावे दुहिता । प्रथमं कुमारी । अत्रायं विशेषः कन्या वाग्दत्ता पश्चात् परिणीता भर्त्रा अविद्य… । यदि मृता तदा तत्पितृदाये सपु-त्रसम्भावितपुत्राया भगिन्यास्तुल्याधिकारः । तदभावे चोढायाः पुत्रवत्याः सम्भावित-… तुल्याधिकारः । एतयोरेकतराभावे अन्यस्याः । एतयोरभावेऽपि वन्ध्यापुत्र-…योरधिकारः । सर्व्वदुहित्रभावे …धिकारः । तदभावे पितुरधिकारः । मातुरधिकारः । तदभावे सोदरस्याधि-…सोदराभावे सपत्नीवैमात्रेयाधिकारः । सोदरभ्रातृपुत्राणामधिकारः । संसृष्ट-…सोदरभ्रातृपुत्रेषु संसर्गिभ्रातृपुत्रस्याधि-… एवं संसृष्टसंसर्गिवैमात्रेयभ्रातृपुत्रे संसर्गिवैमात्रेयभ्रातृपुत्रस्याधिकारः । असंसर्गी सोदरभ्रातृपुत्रः संसर्गी चा-…भ्रातृपुत्रस्तदा तयोर्युगपदधिकारः । यदा सोदरवैमात्रेयभ्रातृपुत्रौ संसर्गिणावसंस-र्गिणौ वा तदा उभयथैव सोदरभ्रातृपुत्र-…कारः । भ्रातृपुत्राभावे भ्रातृपौत्रस्याधि-… । अत्रापि सोदरवैमात्रेयभ्रातृपुत्रवत् बोध्यः । भ्रातृपौत्राभावे पितृदौहित्र-…कारः । अत्र सोदरभगिनीपुत्रवैमात्रेय-…पुत्रयोस्तुल्यवदधिकारः । पितृदौहित्रा-…पितामहस्याधिकारः । पितामहाभावे …ह्या अधिकारः । पितामह्यभावे पितृव्य-…कारः । तदभावे पितृव्यपुत्रस्याधिकारः । …वे पितृव्यपौत्रस्याधिकारः । पितृव्यपौत्रा-…पितामहदौहित्रस्याधिकारः । पिता-…हित्राभावे पितृव्यदौहित्रस्याधिकारः । …वे प्रपितामहस्याधिकारः । तदभावे …ामह्या अधिकारः । ततः पितामहभ्राता-…री । तदभावे पितामहभ्रातृपुत्रः । तद-…पितामहभ्रातृपौत्रः । ततः प्रपितामह-…ऽधिकारी । ततः पितामहभ्रातृदौहित्रो-…री । तदभावे मातामहः । तदभावे …सः । तदभावे मातृष्वसीयः । तदभावे …पुत्रः । तदभावे मातुलपौत्रः । एषाम-…सकुल्याः । सकुल्योऽपि द्विविधः अधस्तन …श्च तत्र प्रपौत्रपुत्रादयोऽधस्तनाख्याः …पितामहादिरूपा ऊर्द्धतनाख्यास्तद-…नां सकुल्यानां क्रमेणाधिकारः । तेषामभावे …नानां क्रमेणाधिकारः । एवंविधसकुल्या-…वे समानोदकाः । तदभावे आचार्य्यः । तद-…शिष्यः तदभावे सहवेदाध्यायिब्रह्मचारिणः ।

तदभावे ग्रामस्थाः सगोत्राः । तदभावे तथा-विधाः समानप्रवराः । एतत्पर्य्यन्ताभावे तद्-ग्रामस्थास्त्रैविद्यत्वादिगुणयुक्ता ब्राह्मणा धनाधि-कारिणः । एतेषामभावे ब्राह्मणधनवर्ज्जं राजाधिकारी । ब्राह्मणधनस्य तु गुणवद्ब्राह्मण-पर्य्यन्ताभावे ब्राह्मणान्तरस्य ग्रामान्तरस्थस्यापि अधिकारः । वानप्रस्थयतिब्रह्मचारिणां धनं धर्म्मभ्रातृसच्छिष्याचार्य्या गृह्णीयुः । तदभावे एकत्रवासी एकाश्रमी वा गृह्णीयात् । ब्रह्म-चारी च द्विविधः नैष्ठिक उपकुर्व्वाणश्च । तत्र नैष्ठिकधने आचार्य्यस्याधिकारः । उपकुर्व्वाणस्य तु धनं पित्रादिभिरेव ग्राह्यम् । इति पुंधनाधि-कारिणः ॥ * ॥

अथ स्त्रीधनाधिकारक्रमः ।

तत्र कुमारीधने प्रथमं सोदरभ्राताधिकारी । तदभावे माता तदभावे पिता । वरदत्तधने वरोऽधिकारी ॥ * ॥

अथोढास्त्रीधनाधिकारक्रमनिरूपणार्थं तद्धनं निरूप्यते । विवाहकाले लब्धं यौतुकं धनम् १ भर्तृनीयमाना पितृमातृकुलात् यद्धनं लभते तत् २ भर्तृदत्तम् ३ मातृदत्तम् ४ पितृदत्तम् ५ भ्रातृ-दत्तम् ६ द्वितीयविवाहार्थिना पूर्व्वस्त्रियै पारि-तोषिकं यद्दत्तं तत् ७ अन्नाच्छादनम् ८ अल-ङ्करणम् ९ गृहादिकर्म्मनिरूपणशिल्पिस्वभर्तृद्वारे-णान्येषां गृहादिनिष्पादनाद्युत्कोचविषयान्येभ्यो यद्धनं लब्धं तत् १० पुत्रदत्तम् ११ मातुलादि-दत्तम् १२ विवाहात् परतः पित्रादिना भर्त्रा-दिना च यद्दत्तम् १३ । भर्तृदत्तस्थावराति-रिक्तानामेतेषां धनानां स्त्री दानादिकं कर्त्तु-मर्हति ॥ * ॥

तदेवं स्त्रीधने निरूपिते तस्यां मृतायां तद्धनाधिकारी निरूप्यते । तत्र यौतुकधने कुमार्य्याः प्रथममधिकारः । तदभावे वाग्-दत्तायाः तदभावे चोढायाः पुत्रवत्याः सम्भा-वितपुत्रायाश्च युगपदधिकारः । तदभावे वन्ध्या-विधवयोस्तुल्यवदधिकारः । तत्र कुमारी वाग्-दत्ता जाताधिकारानन्तरं परिणीता सती मध्याह्न्यातेनावस्थया पुत्रमनुत्पाद्यैव विधवा भूता वा तदा तस्यां मृतायां तत्सङ्क्रान्तमातृ-धने तद्भगिन्योः पुत्रवतीसम्भावितपुत्रयोरभावे वन्ध्याविधवयोरप्यधिकारः । सर्व्वदुहित्रभावे पुत्रस्याधिकारः । पुत्राभावे दौहित्रोऽधिकारी दौहित्राभावे पौत्रः । तदभावे प्रपौत्रः । तद-भावे सपत्नीपुत्रः । तदभावे सपत्नीपौत्रः । तदभावे सपत्नीप्रपौत्रः । एतत्पर्य्यन्ताभावे ब्राह्म-दैवार्षगान्धर्व्वप्राजापत्याख्यविवाहपञ्चकलब्ध-यौतुकधने भर्तुरधिकारः । भर्तुरभावे भ्रातुः । तदभावे मात्राधिकारिणी । तदभावे पिता । सपत्नीप्रपौत्रपर्य्यन्ताभावे आसुरराक्षसपैशा-चाख्यविवाहत्रिकलब्धयौतुकधने तु प्रथमं मातु-रधिकारः । तदभावे पितुः । पितुरभावे भर्तुः । अथायौतुकस्त्रीधनाधिकारिक्रमः । तत्र विवाह-पूर्व्वापरकालपितृदत्तयौतुकान्यातिरिक्तस्त्री-धने कन्यापुत्रयोर्युगपदधिकारः । तयोरेकतरा-भावे अन्यतरस्य तद्धनं तयोर्द्वयोरभावे ऊढायाः पुत्रवत्याः सम्भावितपुत्रायाश्च तुल्यवदधिकारः । एतयोरेकतराभावे अन्यस्या अधिकारः । एत-योर्द्वयोरभावे पौत्रः । पौत्राभावे दौहित्रः । तद-भावे प्रपौत्रः । तदभावे सपत्नीपुत्रः तदभावे सपत्नीपौत्रः । तदभावे सपत्नीप्रपौत्रोऽधिकारी । ततो वन्ध्या विधवा च तुल्यवदधिकारिण्यौ । एतयोरेकतराभावे चान्यतरस्याः । वन्ध्याविधवा-पर्य्यन्ताभावे यौतुकवत् ब्राह्मादिविवाहपञ्चक-विवाहितायाधने भर्तृभ्रातृमातृपितॄणां क्रमशो-ऽधिकारः । विवाहकाले तत्पूर्व्वापरकाले वा स्त्रियै यद्धनं पित्रा दत्तं तत्र धने प्रथमं कुमार्य्याः । तदनन्तरमूढयोः पुत्रवतीसम्भावितपुत्रयोः । तदनन्तरं वन्ध्याविधवयोश्चाधिकारः । सर्व्व-दुहित्रभावे पुत्रादेर्यौतुकधनान्तरवत् क्रमेणाधि-कारः । ततो ब्राह्मादिविवाहपञ्चकलब्धयौतुक-धनेषु पितृपर्य्यन्ताभावे आसुरादिविवाहत्रिक-लब्धयौतुकधनेषु च भर्तृपर्य्यन्ताभावे देवरादे-रधिकारः । तदभावे देवरभ्रातृश्वशुरयोः सुतानां युगपदधिकारः । एतेषामभावे असपिण्डोऽपि भगिनीपुत्रः । तदभावे भर्तृभागिनेयः । तद-भावे भ्रातृसुतः । तदभावे जामाता । जामातृ-पर्य्यन्ताभावे सपिण्डानन्तर्य्यक्रमेण श्वशुरभ्रातृ-श्वशुरादीनां सपिण्डानामधिकारः । सपिण्डा-भावे सकुल्याः समानोदकाः सगोत्राः समान-प्रवराश्च पुंधनवत् क्रमेणाधिकारिणः । एतत्-सर्व्वाभावे ब्राह्मणीधने स्वग्रामश्रोत्रियादेरधि-कारः । क्षत्रियादिधने राज्ञ एवाधिकारः । इति स्त्रीधनाधिकारिणः ॥ * ॥

अथ विभागानधिकारिणः ।

क्लीबपतितजात्यन्धबधिर-उन्मत्तजड़-मूकपङ्गुपितृद्विट्निरिन्द्रियोपपातिकाचिकित्स्य-रोगिणः । पतितवर्ज्जं एते भरणीयाः । पतित-पुत्रवर्ज्जमेतेषां पुत्रा यदि निर्दोषाः तदांश-भागिनः । क्लीबादीनां अपुत्रा भार्य्याः यदि सदाचारा भर्त्तव्याः । एषां दुहितरो विवाह-पर्य्यन्तं भरणीयाः ॥ * ॥

अथ विभाज्याविभाज्यधननिर्णयः ।

तत्र पैतामहं पित्रर्ज्जितं साधारणधनोपघाते-नार्ज्जितञ्चेति त्रिविधं धनं सर्व्वैरेव विभाज्यम् । किन्तु तत्राप्येकस्य द्वावंशौ अन्येषामेकैकांशः साधारणधनादनुपघातेन श्रौत्रियादिप्राप्तं धनं एवं साधारणधनाद्यनुपघातेनार्ज्जितविद्याधनं पितृ-पितृव्यादिप्रसादादिना लब्धं धनं भार्य्याप्राप्ति-काले लब्धं धनं मित्रवाप्राप्तं धनं आपित्कालनष्टं एतान्यविभाज्यानि । विद्याधनन्तु समविद्या-धिकविद्येभ्यो देयं एवं यदि विद्याभ्यासकाले भ्रातुः कुटुम्बभरणं भ्राता स्वधनव्ययद्वारेण कार्य्यं निर्व्वाहितवान् तदा तद्विद्यार्ज्जितधने मर्य्यादास्यापि अपरभ्रातुरंशित्वम् । स्वकुलात् पित्रादितो

लब्धविद्यार्जितधने तु सर्व्वेषां गस्तांग्रह्णांयामं-
शित्वम्। विद्याधनं यथा, यदि भवान् मद-
सुतमध्यापयति तदा भवते एतावद्धनं दातव्यं इति
पणितं तत्र भवतोऽध्यापनेन यत् पणितं धनं लब्धं
तत्। आध्यात्मिकविद्याद्यत्नम्। ऋत्विक्कर्म
कुर्व्वन् यजमानाद्दक्षिणादिरूपं लब्धं धनम्।
यत् किञ्चित् विद्यायाः प्रश्नं कृते तत्र सम्यगुत्त-
रेण परितोषादर्जितमेव किञ्चिद्धनं ददाति
तत्। यो कश्चित् शास्त्रार्थे मम संशयमपन-
यति तस्मै सुवर्णादिकमिदं दास्यामीत्युक्ते तस्य
संशयमपनयेन यल्लब्धम्। वादिनोः कृतपणाद-
धिकमर्थे न्यायकरणार्थमागतयोः सम्यङ्-
निर्णयेन यल्लब्धम्। शास्त्रादिषु स्वज्ञानं प्रकाश्य
प्रतिपक्षादिना यल्लब्धम्। तथाध्ययनादहार-
विचारे वा पदं निर्जित्य यल्लब्धम्। एतस्मिन्
[illegible] सहत्याने येन
[illegible] यल्लब्धम्। [illegible]
[illegible] यल्लब्धम्।
[illegible] यल्लब्धम्। एतानि
[illegible]॥ ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible] गृहीत्वा
[illegible] विभजेत्।
[illegible]
[illegible]
[illegible]

संसर्गिणामिति क्रमः॥ ॥ एवं यदा पिता पुत्त्रान्
विभज्य यथाशास्त्रं भागं गृहीत्वा पुत्त्रैः सहा-
संसृष्ट एव पुत्त्रान्तरमुत्पाद्य मृतस्तदा विभागा-
नन्तरजात एव तद्धनाधिकारी न पूर्व्वविभक्ताः
एवं पूर्व्वकालविभागेऽपि विभक्तजस्य नाधित्वम्।
यदि तु येन केनचित् पुत्त्रेण संसृष्टः सन् पिता
मृतः तदा तद्धनं संसृष्टविभक्तजाभ्यां सम
विभाज्यं यथा धने तथर्णेऽपि। यत्रविभाग-
गर्भायामेव स्त्रियां पुत्त्रा विभक्तास्तद्गर्भजातो
विभक्तद्रव्याण्येकीकृत्य पुनर्विभज्य स्वांशं गृह्णी-
यात् न तु विभक्तेन सह पितृधने शित्वम्॥ ॥

अथ पितृकृतविभागो निरूप्यते।

यत्र पितृकृतविभागस्तत्र स्वोपार्जितधने पितुरि-
च्छैव नियामिका। पितामहधने तु मातृरक्षो-
णित्वमिहहत्ता तदिच्छा नियामिका। स्वोपा-
र्जितधने पिता इच्छया धनं गृहीतुं शक्नोति
कस्मैचिदधिकं कस्मैचिदूनं दातुमर्हति। पैता-
महधनविभागे तु पिता स्वयमंशद्वयं गृहीत्वा
पुत्त्रेभ्य एकैकांशं दद्यात्। किन्तु पैतामहमणि-
मुक्ताप्रवालादिषु पितुः स्वाच्छन्द्यं भूमिनिबन्ध-
द्विपदान्यतमे न स्वाच्छन्द्यम्। स्वार्जितधनविभागे
पित्रा अपुत्त्रपत्नीभ्यः पुत्त्रतुल्यांशो देयः यदि
ताभ्यः स्त्रीधनं न दत्तं स्त्रीधने दत्ते सति अर्द्ध
देयम्। पुत्त्रकर्त्तृकविभागे तु विमातुरंशा-
भावः॥ ॥ शूद्रस्य दासीपुत्त्रोऽपि पितुरिच्छया
परिणीतस्त्रीजातपुत्त्रेण सह तुल्याधिकारी मृते
पितरि तदर्द्धांशाधिकारी। तथाविधभ्रातृभावे
दौहित्रे जीवति पितुः सर्व्वधनाधिकारी सति
दौहित्रे तेन सह तुल्याधिकारी॥ ॥ पितरि
मृते मातरि जीवन्त्यां पुत्त्राणां विभागो न
धर्म्मः यदि जीवन्त्यां मातरि विभागं कुर्व्वन्ति
तदा मातापि पुत्त्रतुल्यांशभागिनी। विमातुरं-
शाभावः किन्तु सा ग्रासाच्छादनादिना भर्त्तव्या।
एवं पितामहधने पौत्त्रैर्विभाज्यमाने पिता-
मह्यः पौत्त्रतुल्यांशभागिन्यः॥ ॥ औरसेन
दत्तकादीनां विभागे औरसस्य द्व्यंशित्वं
[illegible]कैकांशित्वम्। विभागस्तु पिता-
[illegible] सर्व्वं परिशोध्य तदवशिष्टधनस्य
कर्त्तव्यः। उत्तमर्णेभ्यो विभज्य वा तदृणं
परिशोधनीयम्। एवं भ्रात्रादिना वस्तुनीय-
तया [illegible] तत्र न विभक्ताश्च
विभागमध्ये प्रवेशनीयः। किन्तु [illegible]
[illegible] विभागः कार्य्यः॥ ॥ असंस्कृत
[illegible] संस्कारः कर्त्तव्यः।
[illegible] यथावत् [illegible]
[illegible] कर्त्तव्यः। [illegible]
[illegible] विभागः कार्य्यः॥ ॥

अथ [illegible] विभागः।

[illegible]
[illegible]
[illegible]
[illegible]

यथा यवस्था [illegible]
तु [illegible]
साधारणधनेऽपि [illegible]
श्रीकृष्णतर्कालङ्कारकृतं [illegible]
"देशस्य [illegible]
उदितः स्यात् [illegible]

दायविभागः, पुं, (दायस्य विभ[illegible]
यथा। "किं दायस्[illegible]
किंवा दायेन [illegible]
जीमूतवाहनः।

दायादः, पुं, (आदत्ते इति। द[illegible]
सोपसर्गे।" ३।१।१३६। इ[illegible]
याद: ग्राहकः।) सपिण्ड।[illegible]
३।३।८८। (यथा, महाभारते
"पुत्त्रान् तु शतं [illegible]
कनीयान् मम [illegible]

दायादी, स्त्री, (दायं [illegible]
स्त्रियां ङीष्।) [illegible]

दायितः, त्री, (दाय दाने + णिच्
इत्यमरटीकायां भरतः।

दारकः, पुं, (दारयति मातुः[illegible]
मिति। दृ + णिच् + ण्वुल्।)
मन्यः। २।२०। (यथा,
"कस्यैते दारका राजन्
सर्व्वेषां [illegible]
बालकः। इति मेदिनी। के
महाभारते। १। ८२। ११।
"प्रमिष्ठा [illegible]
दारकः। इति [illegible]
शूकरः। इति [illegible]

दारकः, त्रि, (दारयतीति। दृ
भेदकः। इति मेदिनी। के,
"शत्रुदारकं [illegible]
करोति [illegible]
इति [illegible]

दारकर्म्म, क्ली, (दाराणां कर्म्म
इति विवाहः[illegible]
१४। २६।
"दारकर्म्म ततो [illegible]

दारदं, क्ली, (दारदेन [illegible]
वेति। दृ + णिच् + [illegible]
इति शब्दचन्द्रिका। [illegible]
विषहरम्। यथा, "[illegible]
इति [illegible]
औषधविशेषः। [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]

दारुसिता, स्त्री, (दारुणि सिता शर्करेव ।) त्वक् । दारचिनि इति भाषा । तन्नामगुणाः ।
"त्वक्स्वाद्वी तु तनुत्वक् स्यात् तथा दारुसिता मता ।
उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् ॥
सुरभिः शुक्रला वर्ण्या मुखशोषतृषापहा ॥"
इति भावप्रकाशः ॥

दारुस्त्री, स्त्री, (दारुमयी स्त्री ।) दारुका । इति त्रिकाण्डशेषः ॥

दारुहरिद्रा, स्त्री, (दारुप्रधाना हरिद्रा ।) स्वनामख्यातक्षुपविशेषः । तत्पर्य्यायः । पीतद्रुः २ कालेयकः ३ हरिद्रुः ४ दार्व्वी ५ पचम्पचा ६ पर्ज्जनी ७ । इत्यमरः ।२।४।१०२ ॥ पीतिका ८ पीतदारु ९ स्थिररागा १० कामिनी ११ कटङ्कटेरी १२ पर्ज्जन्या १३ पीता १४ दारुनिशा १५ कालीयकम् १६ कामवती १७ दारुपीता १८ कर्कटिनी १९ दारु २० निशा २१ हरिद्रा २२ । इति शब्दरत्नावली ॥ अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । व्रणमेहकण्डुविसर्पत्वग्दोषविषकर्णाक्षिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफपित्तशोथनाशित्वम् । विशेषेण कफाभिष्यन्दनाशित्वञ्च । इति राजवल्लभः ॥

दारुहस्तकः, पुं, (हस्त इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५।३।९६। इति कन् । दारुणो हस्तकः ।) काष्ठनिर्म्मितहस्तः । काठेर हाता इति भाषा । तत्पर्य्यायः । तर्द्दूः २ । इत्यमरः । ६ । २ । ३४ ॥

दार्घसत्रः, त्रि, (दीर्घसत्रे भवः । दीर्घसत्र + अण् । "देविकाशिंशपेति ।" ७।३।१। इति आदाच आत् ।) दीर्घसत्रयागे भवः । इति सिद्धान्तकौमुदी ॥

दार्ढ्यं, क्ली, (दृढस्य भावः । दृढ + "वर्णदृढादिभ्यः ष्यञ् च ।" ५।१।१२३। इति ष्यञ् ।) दृढता । (यथा, पञ्चदश्याम् । ६ । १०४ ।
"वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरन्ति हि ॥")

दार्द्दुरं, क्ली, दक्षिणावर्त्तशङ्खः । जतु । जलम् । इति शब्दार्थकल्पतरुः ॥ दर्द्दुरधर्म्मश्च ॥

दार्भटं, क्ली, चिन्तानिमग्न । इति हारावली ।१६८॥

दार्म्मण्डः, पुं, (दारुवत् कठिनमण्डं यस्य ।) मयूरः । इति शब्दकल्पतरुः ॥

दार्व्वाघाटः, पुं, (दारु काष्ठं आहन्तीति । आ + हन् + "दारावाहनोऽणन्तस्य च टः संज्ञायाम् ।" ३।२।४९। इत्यस्य वार्त्तिकोक्त्या अण् टश्चान्तादेशः ।) शतपत्रकपक्षी । इत्यमरः । २ । ५ । १७ ॥ काठठोकरा इति भाषा । (यथा, महाभारते । १० । ७ । १८ ।
"दार्व्वाघाटस्तथाघासि चाश्वस्तावश भारत ॥")

दार्व्वाघातः, पुं, (दारुणि आघातो यस्मात् ।) दार्व्वाघाटपक्षी । इति शब्दरत्नावली ॥

दार्व्विका, स्त्री, (दारयतीति । दॄ + उणादिसिद्धात् वाधुः । दार्व्वी दारुहरिद्राविकारः । ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) कापोताञ्जनम् । गोजिह्वा । इत्यमरः । २ । ४ । ११९ ॥

दार्व्विपत्रिका, स्त्री, (दार्व्याः पत्रमिव पत्रमस्याः । दार्व्विपत्रा ततः स्वार्थे कन् टापि अत इत्वञ्च ।) गोजिह्वा । इति रत्नमाला ॥

दार्व्वी, स्त्री, (दारयति । दॄ + "उणादयश्च ।" उणा ४ । ९७ । इति निपातनात् साधुः ।) दारुहरिद्रा । (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"कटङ्कटेरी दार्व्वी स्यात्तथा दारुनिशेति च ।
स्थाला दारुहरिद्रा च पर्ज्जनी च पचम्पचा ॥"
अस्या गुणा यथा,—
"दार्व्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) गोजिह्वा । इति मेदिनी । वे, ११ ॥ देवदारु । हरिद्रा । इति विश्वः ॥

दार्व्वीकाथोद्भवं, क्ली, (दार्व्याः दारुहरिद्रायाः क्वाथादुद्भवो यस्य ।) रसाञ्जनम् । इति राजनिर्घण्टः ॥ रसाञ्जनम् । इति रत्नमाला ॥

दार्षदः, त्रि, (दृषदि पिष्टः । दृषद् + "संस्कृतं भक्षाः ।" ४ । २ । १६ । इत्यण् ।) दृषद्भवः । इति सिद्धान्तकौमुदी ॥

दालं, क्ली, (दलेभ्यः सञ्चितम् । दल + अण् । यदुक्तम्,—
"संस्रुत्य पतितं पुष्पात् यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥")
वन्यमधु । इति शब्दार्थकल्पतरुः ॥ इन्द्रनीलदलाकारश्च समक्षिकोत्पन्नं वृक्षकोटरान्तरभवं मधु । अस्य गुणाः । कटुत्वम् । कषायत्वम् । अम्लत्वम् । मधुरत्वम् । पित्तदोषकारित्वञ्च । इति राजनिर्घण्टः ॥

दालः, पुं, (दले जातम् । दल + अण् ।) कोद्रवः । इति हेमचन्द्रः ॥

दालनः, पुं, स्थावरविषभेदः । इति हेमचन्द्रः । ४ । २६६ ॥

दाला, स्त्री, (दल्यते स्थूलमतिभिरिति । दल + घञ् + टाप् ।) महाकालः । इति भावप्रकाशः ॥

दालिका, स्त्री, (दालेव । स्वार्थे कन् टाप् अत इत्वञ्च ।) महाकालः । इति भावप्रकाशः ॥

दालिमः, पुं, (दाड़िमः । डस्य लः ।) दाड़िमः । इत्यमरटीकायां भरतः ॥

दाली, स्त्री, (दाल्यते इति । दल + णिच् + इन् । कृदिकारादिति ङीष् ।) देवदाली लता । इति राजनिर्घण्टः ॥

दाल्भ्यः, पुं, (दल्भस्य मुनेर्गोत्रापत्यम् । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) मुनिविशेषः । (यथा, महाभारते ।२।४।११।
"बको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः ॥")

दाल्मिः, पुं, (दालयति असुरानिति । दल + णिच् + बाहुलकात् मिः ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

दाशः, पुं, (दुर्शीन दश... दशपमर्गे ।" ...।
(यथा, महाभारते ...
"हरिमिन्द्रः मया दशे ...
धनराशिः । इत्यमरः ...
महाभारते ...
...
दस्यौ दाशे ...
धर्षिः । इत्यमरटीकायां ...
दासः । इति भरतधृतहलायुधः

दाशार्हः, पुं, (दाशार्हस्ये... यदुवंशाः ।) वसुदेवः ।
दाशार्हः २ दाशार्हः ३ ...
दाशः ४ दाशः ५ । इत्यमरः ...
(यथा, महाभारते ...
"दाशार्हप्रभवश्च ...

दाशार्हः, पुं, (...
का ।) दाशार्हः । ...
कयादशूनां ...
"यद्दाशार्हाणामस्य ...

दाशिकः, त्रि, (देविकायां भव ।
शिंशपेति ।" ७ । ३ । १ ...
देविकाशरीरमाः । इत्यमरः ...

दाश, कृ ह म दाने । इति
आत्म-सकं-सेट् ।)
दाशन् । कृ ह, दाश्यते । ...

दाश, कृ न दाने । ...
उभं-सकं-सेट् ।) कृ, दाशति ...
दाशते । इति दुर्गादासः ॥

दाश, न ह हिंसने । ...
परं-सकं-सेट् ।) हिनोत्सौ ...
र वैदिकः । इति दुर्गादासः ॥

दाशः, पुं, (दाशते ...
दाने + सम्प्रदाने घञ् ।) इत्य...
टीकायां रमानाथः ॥ (इति
स्थानिति । दाश + "इश ...
इति टः मस्य चाव । धीवर ।
भागवते । २ । १ । ३९ ।
"मनुस्मृत्येति साधा वै ...
विपद्यमाना दाशस्य ...

दाशपुरं, क्ली, (दाशान् ...
मीति । पॄ + कः । ...
. १०२ । इति उज्ज्वलम् ।) दशपुर ...
कायां स्वामी ॥

दाशरथः, पुं, (दशरथस्य अपत्यम् ।
पितापुत्रसम्बन्धमात्रार्थे अण् ।
शब्दरत्नावली ॥ (यथा,
"प्रीयतां दाशरथाय ...
दशरथसम्बन्धिनि, त्रि । यथा, ...
"धनोगतदाशरथं न ...

दाशरथिः, पुं, (दशरथस्य अपत्यं ...
इञ् ।" ४ । १ । ९५ । इति ...

नरकः । (यथा, रामायणे । ७ । ६४ । ११ ।
यदा दाशरथिर्धर्म्मेनैवाधिगतोऽभवत् ।
या प्रहृष्टो रामं पतिमत्यालयत् ।”)
पुं, (दाम दाने + भावे घञ् । दामं दान-
ते । अर्द्ध + अच् ।) विष्णुः । इति हेम-
(यथा, महाभारते । १३ । १४९ । ६७ ।
...ो यदः सत्त्ववो दाशार्हः सात्वतां
पतिः ।”)
...दैत्यश्च ।
...पुं, मालवदेशः । इति त्रिकाण्डशेषः ।
..., (दाम्यति ददातीति । दाम + बाहुल-
...त् ।) दाता । इति जटाधरः ।
...[क्] त्रि, (दाश दाने + “दाश्वान् सा-
...मीढ्वांश्च । ” ६ । १ । १२ । इति क्वसुप्रत्ययेन
...तात् साधुः ।) ददाति । इति सुग्धबो-
(यथा, रघुः । १८ । ७१ ।
“तस्मै सुनिर्दोषहितस्तिहर्षौ
दाश्वान् सुदुस्माग्निर्मितसुमाय ।”)
...च दाने । इति कविकल्पद्रुमः । (भ्वां-
...सकं-सेट् ।) क, अददासत् । च, दासति
। इति दुर्गादासः ।
...न वधे । इति कविकल्पद्रुमः । (स्वां-पर-
...सेट् ।) र वैदिकः । न, दास्नोति । इति
...दासः ।
...पुं, (दस्यतीति । दसि + “दंसेष्टटनौ न
...।” उणां ५ । १० । इति टः नकारस्य
...शः ।) शूद्रः । (यथा, ऋग्वेदे । ७ । ६ । ३ ।
“यो दासं वर्णमधरं गुहाकः ।”
...दासमर्थानां समार्थिभिन्नेः । न तु कचचित्-
...ह्वदासानन्वय्नः । यथा, कुल्लूकभट्टीयायाम् ।
...रोटी नौतिमन्तविरचवतिहता गौडिता
ये हि सिद्धा-
...दया देवदासा करशुश्रवाहिता मालिता
विंशुरैवा ।”)
...शिवाः । धीवरः । इति मेदिनी । से, ४ ।
...ध्यायम् । इति विश्वः । शूद्रायां गानाल-
...पुरुमदविशेषः । यथा,—
...म्लेच्छेषु बाह्यचदसान् वर्णान्निरपिवसश्च ।
...तिमाकं नाम प्रसदं वेदन्यूनयोः ।”
...इत्युद्वाहतत्त्वम् ॥ ९ ॥
...सेवे दीयते भृतिमन्नादिकं यस्मै सः । पा-
...इति भाषा । तत्पर्य्यायः । भृत्यः २ दासेरः
...दासेयः ४ गोप्यकः ५ चेटकः ६ नियोज्यः ७
...किङ्करः ८ प्रैष्यः ९ भुजिष्यः १० परिचारकः
... । इत्यमरः । २ । १० । १७ । प्रेष्यः १२
...यः १३ प्रैषः १४ इति भरतः । परिकर्म्मी
...परिचरः १६ वराकः १७ वणचाना १८
...१९ अभिसरः २० वटुकः २१ । स
...प्रकारः । यथा नारदः ।
“गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः ।
मोक्षितो महतश्चर्णात् युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥”
अस्यार्थः । गृहजातो दास्यां गृहजातः । दाया-
दुपागतः क्रमागतः । अनाकालभृतः दुर्भिक्ष-
पोषितः । स्वामिना आहितो बन्धकीकृतः ।
मोक्षितः ऋणमोचनेनाङ्गीकृतदास्यः । तवाह-
मित्युपगतः कस्यापि दासः सन् स्वयं दासत्वेन

दीप, ई ङ य श्र दीप्ते। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सेट्।) दीर्घमध्यश्चलीनाः। ई, दीप्तः। ङ य, दीप्यते शिखि चन्द्रमाः। श्र, अदीदिपत् अदीदीपत्। इति दुर्गादासः॥

दीपः, पुं, (दीप्यते दीपयति वा स्वं परञ्चेति, दीप् दीपि वा+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) वर्त्तिस्थवह्निशिखा। तत्पर्य्यायः। प्रदीपः २ स्नेहाशः ३ दीपकः ४ दशाकर्षः ५ शिखातरुः ६ गृहमणिः ७

ज्योत्स्नावृक्षः ८ दशेन्धनः ९ दीपातिलकः १० दोषास्यः ११ तमोनुदः १२ । इति शब्दरत्नावली ॥ (यथा, मनौ । ४ । २२९ ।
"वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥")
तदर्थं स्नेहादिनियमो यथा,—
"घृतं तैलञ्च दीपार्थे स्नेहान्यन्यानि वर्ज्जयेत् ।"
इत्यादौ वह्निपुराणे आह्निकतपोनामाध्यायः ॥
अन्यच्च ।
"पुरश्चरणकृत्यञ्च दीपं शृणुष्व भैरव ! ।
दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ॥
चतुर्व्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेत् श्रिये ।"
इत्युपक्रम्य,—
"घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः ।
सार्षपः फलनिर्यासजातो वा राजिकोद्भवः ॥
दधिजश्चान्नजश्चैव प्रदीपाः सप्त कीर्त्तिताः ।
पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ॥
शणजा बादरी वापि फलकोषोद्भवाथवा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधाः स्मृताः ॥*॥
तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम् ।
तृणध्वजोद्भवं वापि दीपपात्रं प्रशस्यते ॥*॥
दीपवृक्षाश्च कर्त्तव्यास्तैजसाद्यैश्च भैरव ! ।
वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्व्वसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापं तथैव च ॥
तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा ।
दीपं दद्यान्महादेव्यै अन्येभ्योऽपि च भैरव ! ॥
कुर्व्वन्तं पृथिवीतापं यो दीपस्तु स्त्रजेन्नरः ।
स तापतापं नरकमाप्नोत्यब्द शतं समाः ॥
सुवृत्तवर्त्तिसंस्नेहपात्रेऽभग्ने सुदर्शने ।
कलाये दण्डकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
लभ्यते यस्य नामस्तु दीपस्य चतुरङ्गुलात् ।
न स दीप इति ख्यातो ह्योघवह्निस्तु स स्मृतः ॥
नेत्राह्लादकरः सर्व्वैः स्वल्पतापविवर्ज्जितः ।
सुशिखः शब्दरहितो निर्धूमो नातिह्रस्वकः ॥
दक्षिणावर्त्तवर्त्तिस्तु प्रदीपः श्रीविवृद्धये ।
दीपवृक्षस्थिते पात्रे शुक्लस्नेहप्रपूरिते ॥
दधिकार्पासवर्त्त्यां तु चारुदीप्तः प्रदीपकः ।
उत्तमः प्रोच्यते पुत्र ! सर्व्वतुष्टिप्रदायकः ॥
तृणैश्च वर्त्तितो दीपो मध्यमः परिकीर्त्तितः ।
त्रिगुणः पावनैतास्त्यामधमः परिकीर्त्तितः ॥
शाणं वा बादरं वाक्षं जीर्णं मलिनमेव वा ।
उपयुक्तन्तु नो दद्यात् वर्त्तिकार्थन्तु साधकः ॥
तस्माद्दात्मनेव सततं श्रीविवृद्धये ॥*॥
कौशजं रोमजं वस्त्रं वर्त्तिकार्थे न चाददेत् ।
न मिश्रीकृत्य दद्यात्तु दीपं स्नेहात् घृतादिकान् ॥
तथा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत् ।
वसामज्जास्थिनिर्यासैः स्नेहैः प्राण्यङ्गसम्भवैः ॥
प्रदीपं नैव कुर्व्वीत कृत्वा पङ्के निमीदति ।
अभिनावेऽथवा गव्ये दुर्गस्यादुग्धमाविनि ॥
नैव दीपः प्रदातव्यो विबुधः श्रीविवृद्धये ।
नैव निर्व्वापयेद्दीपं कदाचिदपि यत्नतः ॥
सततं लक्ष्मीपेतं देवार्थमुपकल्पितम् ।
न हरेन्नाशतो दीपं तथा लोभादिना नरः ॥
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ।
उद्दीप्तदीपप्रगिमः कालकामसमुद्भवः ॥
विकर्षोद्भवमेवाथ दीपालाभे निवेदयेत् ।
उत्सृष्टं नैव दीपार्थे कदाचिदपि योजयेत् ॥
प्रमृष्टार्थन्तु तं दद्याद्दपचाराद्वहिःक्रमम् ।
एवं वां कथितो दीपो धूपश्च श्रृणुतं सुतौ ॥"
इति कालिकापुराणे ६८ अध्यायः ॥
आर्द्रवस्त्रवर्त्तियुक्तदीपनिषेधो यथा,—
"दीपं वर्ज्जेत् वस्त्रवर्त्त्या प्रकर्षं तैलमेव च ।"
इति योगिनीतन्त्रे प्रथमतन्त्रे २ भागे ५ पटलः ॥
कार्त्तिकमासे दीपदानस्य माहात्म्यं यथा,—
"शृणु दीपस्य माहात्म्यं कार्त्तिके च हरि-
प्रिय ! ।
यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत् ॥
सूर्य्यग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे ।
तुलादानस्य यत् पुण्यं तदूर्णं दीपदानतः ॥
घृतेन दीपकं यस्तु तिलतैलेन वा पुनः ।
ज्वालयेन्मुनिशार्दूल ! अश्वमेधेन तस्य किम् ॥
तेनेष्टं क्रतुभिः सर्व्वैः कृतं तीर्थावगाहनम् ।
दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ॥
तावद्गर्ज्जन्ति पापानि देहेऽस्मिन् मुनि-
सत्तम ! ॥
यावत् कार्त्तिकमासेन दीपदानं कृतं भवेत् ।
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्त्ये रसातले ।
यावत्तु ज्वलति दीपः कार्त्तिके केशवाग्रतः ॥
श्रूयते चापि पितृभिर्गाथा गीता महामुने ! ।
भविष्यन्ति कुलेऽस्माकं कदाचित्ते सुता भुवि ॥
कार्त्तिके दीपदानैर्ये तोषयिष्यन्ति केशवम् ।
अपि नस्ते भविष्यन्ति कुले सर्व्वरता गुणैः ।
दीपदानं कार्त्तिके ये दास्यन्ति हरितुष्टिदम् ॥
गयायां पिण्डदानेन कृतं न प्रीणनं मृतैः ।
यैश्चापि कार्त्तिके दत्तो दीपस्तुष्टिकरो हरेः ॥
दीपं दास्यन्ति ये पुत्रास्तुष्ट्यर्थं चक्रपाणिनः ।
कार्त्तिके तैर्मुनिश्रेष्ठ ! नरकादुद्धृता वयम् ॥
मन्त्रहीनं क्रियाहीनं शुद्धिहीनं जनार्द्दन ! ।
व्रतं संपूर्णतां यातु कार्त्तिके दीपदानतः ॥
अनेनैव हि मन्त्रेण दीपं संकल्पयेत्सुने ! ।
मधुसूदनतुष्ट्यर्थं कार्त्तिके मुनिपुङ्गवः ॥"
इति पाद्मे उत्तरखण्डः ॥
अपि च ।
"दास्यते देवदेवाय दीपपुष्पानुलेपनम् ।
अपि नः स कुले भूयादेकादश्यां तिथौ नरः ॥
कार्त्तिक्युपवासञ्च सर्व्वपातकहानिदम् ।
इत्थं पितॄणां वचनं श्रुत्वा नृपतिसत्तमः ॥
ददौ च दीपान् विधिवत् विष्णोरायतने वशी ।
सुगन्धतैलसंपूर्णान् दीपान् सघृततैलकान् ॥
सर्षपस्य सुतैलेन मधुकासितसम्भवैः ।
दीपप्रदानान्नरकानन्यतामिस्रसंज्ञकान् ।
तीर्त्त्वां धर्म्मार्थया ब्रह्मन् ! विष्णुलोकमगात्ततः ॥"
इति वामनपुराणम् ॥

दीपं दृष्ट्वा [illegible]
"दीपं स्पृष्ट्वा तु यो देवि ! [illegible]
तस्यापराधाद्दै मुक्ते ! [illegible]
तस्कृतस्य महाभागे ! [illegible]
जायते वा [illegible]
चाण्डालस्य [illegible]
एवं मूल्वा तु सा [illegible]
महापापेन जायेत [illegible]
प्रायश्चित्तं [illegible]
तरन्ति मनुजा येन [illegible]
यस्य कस्यापि माधव [illegible]
चतुर्भक्तमाहारमा [illegible]
दीपं दत्त्वापराधाद्दै [illegible]
शुचिर्भूत्वा [illegible]
एतत्ते कथितं देवि ! [illegible]
संसारमोक्षणश्चैव [illegible]
पुरुषस्य दीपनिर्व्वाणे [illegible]
"[illegible]
अचिरेणैव कालेन [illegible]
[illegible]
नैव निर्व्वापयेद्दीपं देवार्थं [illegible]
दीपहर्त्ता भवेदन्धः [illegible]
कार्त्तिकचतुर्द्दश्यां [illegible]
यथा,—
"नरकाय प्रदातव्यो दीपः [illegible]
इति [illegible]
पृथिव्यां दीपो न संस्थाप्यः [illegible]
"सर्व्वसहा [illegible]
अकार्य्यपादघातञ्च दीपतापं [illegible]

दीपकं, क्ली, (दीपयतीति । [illegible]
काव्यालङ्कारः । [illegible]
के, १०४ । कुङ्कुमम् । इति [illegible]
काव्यालङ्कारस्य लक्षणं यथा,—
"पदार्थानां प्रस्तुतानामन्येषां [illegible]
एकधर्म्माभिसम्बन्धः स्यात्तदा [illegible]
अप्रस्तुतप्रस्तुतयोर्दीपकन्तु [illegible]
अथ कारकमेकं स्यादनेकासु [illegible]
यथा, माघे ।
बलावलेपादधुनापि पूर्व्व [illegible]
प्रसाध्यते तेन जगत्यजेय [illegible]
सतो च [illegible]
पुमांसमन्येति भवानिवान्यः [illegible]
इति माघः [illegible]
अपि च काव्यचन्द्रिकायाम् ।
"जातिक्रियागुणद्रव्यवाचकैः [illegible]
एकत्र वर्त्तिना [illegible]
यथा,—
समद्भुमरभाङ्कारपुंस्कोकिल [illegible]
मन्दचन्दनवातोऽपि इति [illegible]

(दीपयति जठराग्निमिति । दीपि+
यमानी । इति रत्नमाला ॥ (गुणा-
मानीशब्दे ज्ञेयाः ॥) लोघमस्तकः ।
इरत्नावली ॥ दीपः । (यथा, मत्स्याद-

मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
मलफमस्य फलमाप्नोति मानवः ॥")
महार्घ्ये पथिगो गच्छन्ति सः । इति
। ४ । ४०८ ॥ बाज् इति शिकरा इति
। रागविशेषः । अयं हनूमन्मते
द्वितीयरागः । सूर्य्यनेत्राग्निर्गतः । अस्य
सम्पूर्णः । षड्जस्तु षड्जस्वरः । गान-
ग्रीष्मर्त्तौ मध्याह्नः । अस्य रूपं यथा ।
कः । वस्त्रं पाटलवर्णम् । गलभूषणं
मालम् । मत्तहस्त्यास्फोटयन् । बहु-
श्च । कस्यचिन्मते । लज्जया दीप-
निजान्धकारमयं गृहं कृत्वा स्त्रीभी
अस्य रागिण्यः पञ्च यथा । देशी १
२ नट ३ केदारा ४ कानरा वा कर्णाटी
शाखाख्ये यथा । कुन्तलः १ कमलः २
वा कलिन्दः ३ चम्पकः ४ कुसुम्भः वा
५ रामः ६ लहिलः ७ हिमालः ८ ।
अस्य रागिण्यो यथा । केदारा १
२ गौड ३ गुर्ज्जरी ४ यदाची ५ ।
पुत्रा यथा । कुसुमः १ टङ्कः २ नट-
रः ३ विहागरा ४ किरोदलः ५
कला वा रमसमङ्गला ६ मङ्गलारकः ७
वा आड़ाना ८ । इति तद्दफतोल-
शसंगीतशास्त्रसंग्रहः ॥ (तालविशेषः ।
सङ्गीतदामोदरे ।
ष्टवुः श्रुतस्यैव ताले दीपकनामनि ॥")
स्त्री, (दीपस्य किट्टम् ।) दीपजात-
म् । इति शब्दार्थकल्पतरुः ॥
स्त्री, (दीपस्य कूपीव तैलधारकत्वात् ।)
कः । शलिता इति भाषा । तत्पर्य्यायः ।
खी २ दीपखोरी ३ विदाहिका ४ ।
ब्दमाला ॥
, स्त्री, (दीपं खोरयति गत्याघातं
स्थिरीकरोतीति । खोर् गत्याघाते+
अच् । गौरादित्वादिति ङीष् ।) दीप-
इति शब्दमाला ॥
, पुं स्त्री, (दीपस्य ध्वज इव ।) कज्ज-
इति जटाधरः ॥
ी, (दीपयति वह्निमिति । दीप+णिच्
: ।) तगरमूलम् । इति रत्नमाला ॥
म् । इति त्रिकाण्डशेषः ॥ (मन्त्रसंस्कार-
: । यथा, शारदातिलके ।
र्यो दश कथ्यन्ते संस्कारा सिद्धिदायिनः ।
जीवनं पश्चात्ताड़नं बोधनं तथा ॥
भिषेको विमलीकरणाप्यायनं तथा ।
दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥"
मायारमायोगो मनोर्दीपनमुच्यते ॥")

दीपनः, पुं, (दीप्यते इति । दीप+ल्युः ।) मयूर-
शिखा । (दीप+णिच्+ल्युः ।) शालिञ्चशाकः ।
इति शब्दचन्द्रिका ॥ कासमर्द्दः । पलाण्डुः ।
इति राजनिर्घण्टः ॥ दीपयितरि, त्रि ॥ (यथा,
ऋतुसंहारे । १ । ३ ।
"सुवासितं हर्म्म्यतलं मनोरमं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥")

दीपनी, स्त्री, (दीप्यते जठरवह्निरनया । दीप+
णिच्+ल्युट् । स्त्रियां ङीप् ।) मेथिका ।
(अस्याः पर्य्याया यथा,—
"मेथिका मिथिनी मेथिर्द्दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पाठा । यवानी । इति राजनिर्घण्टः ॥

दीपनीयः, पुं, (दीप्यते जठरवह्निरनेनेति । दीप+
णिच्+अनीयर् ।) यवानी । इति राज-
निर्घण्टः ॥ दीपनयोग्ये, त्रि । (यथा सुश्रुते ।
१ । ४५ ।
"दीपनीयमचक्षुष्यं वाड़वं दधि वातलम् ॥")
औषधवर्गविशेषः । यथा,—
"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः ॥"
इति चक्रदत्तः ॥

दीपपादपः, पुं, (दीपस्य पादप इव ।) दीप-
वृक्षः । इति शब्दार्थकल्पतरुः ॥

दीपपुष्पः, पुं, (दीप इव पुष्पं यस्य ।) चम्पक-
वृक्षः । इति राजनिर्घण्टः ॥

दीपवती, स्त्री, (दीपवत् तेजस्वित्वं अस्त्यस्या
इति । दीप+मतुप् । मस्य वः ।) कामाख्यायां
नदीविशेषः । यथा,—
और्व्व उवाच ।
"शाम्भवी कथिता या तु नदी मनुसम्भवा स्थिता ।
तस्याः पूर्व्वे समाख्याता नदी दीपवती मता ॥
एषा च हिमवज्जाता छिन्दन्ती दीपवत्तमः ।
तेन देवमनुष्येषु नदी दीपवती स्मृता ॥
दीपवत्याः पूर्व्वतस्तु शृङ्गाटो नाम पर्व्वतः ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

दीपवृक्षः, पुं, (दीपस्य वृक्ष इव आधारः ।) दीपा-
धारः । पिलसुज् इति देलुका इति च भाषा ।
तत्पर्य्यायः । दीपतरुः २ ज्योतिर्वृक्षः ३ । इति
त्रिकाण्डशेषः ॥ दीपपादपः ४ । इति शब्दार्थ-
कल्पतरुः ॥ (यथा, महाभारते ।१२।२०।४।
"यथा प्रदीप्तः पुरतः प्रदीपः
प्रकाशमन्यस्य करोति दीप्यन् ।
तथेह पञ्चेन्द्रियदीपवृक्षा
ज्ञानप्रदीप्ताः परवन्त एव ॥")

दीपशिखा, स्त्री, (दीपस्य शिखा कार्य्यत्वेन
अस्त्यस्याः । अच् । टाप् ।) कज्जलम् । इति
शब्दार्थकल्पतरुः ॥ (दीपस्य शिखा ।) प्रदीप-
ज्वाला ॥ (यथा, रघुः । ६ । ६७ ।
"सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ॥")

दीपशृङ्खला, स्त्री, (दीपानां शृङ्खलेव ।) दीपाली ।
इति हारावली । १२४ ।

दीपान्विता, स्त्री, (दीपैरन्विता युक्ता ।) गौण-
चान्द्रकार्त्तिकस्यामावास्या । यथा, भविष्य-
पुराणम् ।
"येयं दीपान्विता राजन् ! ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेद्दत्तं पितॄणां वै महालये ॥
पञ्चदशी अमावास्या । अमावास्यामधिकृत्य ।
दीपमालाश्च कर्त्तव्याः शक्त्या देवगृहेषु च ।
रथ्यापणश्मशानेषु नदीपर्व्वतसानुषु ॥
इति ब्रह्मपुराणोक्तनानास्थानदीपदानेन दीपा-
न्विता ख्याता येयमिति विशेषणाच्च ।" इति
श्राद्धतत्त्वम् ॥*॥ तत्र कर्म्माणि यथा,—
"प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि ॥
चतुष्पथे श्मशानेषु नदीपर्व्वतसानुषु ।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः ।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षि-
तान् ।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥
स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृतकैः सह ॥"
इति तिथितत्त्वम् ॥
तत्र श्यामापूजाप्रमाणं यथा,—
"दीपान्विता पार्व्वणाय स्मृता काल्यर्चनाय च ।
महानिशि द्वितीयं स्यात् पूर्व्वेद्युर्यामयामयोः ॥
महानिशि याममात्रयोः पूर्व्वेद्युरेव द्वितीयं
काल्यर्चनं स्यात् इत्यर्थः । प्रथमं पार्व्वणं द्वितीयं
काल्यर्चनमिति द्वितीयशब्दस्य तात्पर्य्यार्थः ।"
इति स्मृतिसारसंग्रहधृतयोगिनीतन्त्रम् ॥*॥
अपरञ्च ।
"दीपोत्सवे चतुर्द्दश्या संमिश्रा या भवेत् कुहूः ।
तस्यां या तामसी रात्रिः सोच्यते कालरात्रिका ॥
तस्यां पूजा प्रकर्त्तव्या काली तारा प्रियङ्करी ॥"
इति कालीकुलसद्भावः ॥

दीपाली, स्त्री, (दीपानां आली श्रेणी ।) दीप-
माला । तत्पर्य्यायः । दीपशृङ्खला २ । इति
हारावली । १२४ ॥ (दीपानां आली यत्र ।)
दीपान्वितामावास्या । तत्पर्य्यायः । यक्ष-
रात्रिः २ । इति त्रिकाण्डशेषः ॥

दीपिका, स्त्री, (दीपयति प्रकाशयति पदार्थी-
निति । दीप+णिच्+ण्वुल् । टापि अत
इत्वम् ।) नदिम्लारनौरणशेनिवामकल्लगोति-
यंन्त्रविशेषः । यथा, अस्तं गवर्नि मिहिरे निशि-
मलिनदीपाङ्कुरे च गोमिमले । उदाहरिषु
चलिपादपार्थे दीपिका क्रियते । एतद्भिन्ना तुवन-
परमात्कस्त्राहादिदीपिकाः सन्ति ॥ रागिणी-

विशेष: । सा हिन्दोलरागस्य भार्य्या । अस्या ध्यानं यथा,—

"प्रदीपकाले यहमन्दिरस्था
प्रदीपहस्तारुणगात्रवस्त्रा ।
मीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम् ॥"

अस्या गानकाल: सायाह्न: । इति सङ्गीतदामोदर: ॥ (प्रदीप: । यथा, रघु: ।८।७० ।

"स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपिकासनाथाम् ।")

प्रकाशिकामात्र, त्रि ॥

दीपिता, [ऋ] त्रि, (दीपयतीति । दीप+णिच्+तृच् ।) दीपिकर्त्ता । इति व्याकरणम् ॥

दीप्तं, क्ली, (दीप्यते स्म । दीपी+क्त: । "श्वीदितो निष्ठायाम् ।" ७ । २ । १४ । इति नेट् ।) स्वर्णम् । हिङ्गु । इति राजनिर्घण्ट: ॥ (स्वर्णहिङ्गु [illegible] शब्दे च [illegible] ।)

दीप्त:, पुं, (दीप+क्त: ।) लिकुच: । सिंह: । इति राजनिर्घण्ट: । ([illegible]रोगविशेष: । यथा, [illegible] [illegible] अध्याये ।

"[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

[illegible] अध्याये ।

"[illegible]
[illegible] ॥")

दीप्त, त्रि, (दीप+क्त: ।) [illegible] । [illegible] । [illegible] । इति मेदिनी । त, ५१ ॥ (यथा, [illegible] ।

"[illegible] ।
[illegible] ॥")

दीप्तकं, क्ली, (दीप्त+स्वार्थे कन् ।) स्वर्णम् । इति राजनिर्घण्ट: ॥

दीप्तजिह्वा, स्त्री, पुं, (दीप्ता जिह्वा यस्या: ।) [illegible] । इति [illegible] । (दीप्तजिह्व, त्रि । यथा, महाभारते । १ । [illegible] ।

"[illegible] ॥")

दीप्तपिङ्गल:, पुं, (दीप्त: पिङ्गलश्च । दीप्तं यथा [illegible] ।) इति राजनिर्घण्ट: ॥

दीप्तक, पुं, (दीप्त [illegible] ।) [illegible] । इति [illegible] ॥

दीप्तकीलक:, पुं, (दीप्ते [illegible] ।) [illegible] । इति राजनिर्घण्ट: ॥

दीप्तलोहं, क्ली, (दीप्तं [illegible] ।) [illegible] । इति राजनिर्घण्ट: ॥

दीप्ता, स्त्री, (दीप+क्त ।) [illegible] । [illegible] । [illegible] । इति राजनिर्घण्ट: ॥

दीप्ताक्ष:, पुं, (दीप्ते अक्षिणी यस्य ।) [illegible] । इति [illegible] । ([illegible], त्रि ।

यथा, महाभारते । १ । २२६ । ३७ ।

"दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहानन: ॥")

दीप्ताग्नि:, पुं, (दीप्त: अग्निर्जठराग्निर्यस्य ।) अगस्त्य: । इति त्रिकाण्डशेष: ॥ (प्रदीप्तो वह्नि: । यथा, भट्टि: । २ । २ ।

"सधूमदीप्ताग्निरुचीनि रेजु-
स्ताम्रोत्पलान्याकुलषट्पदानि ॥")

तीक्ष्णजठरानलयुक्ते, त्रि ॥ (यथा, सुश्रुते । १ । २० ।

"सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च ॥")

दीप्ताङ्ग:, पुं, (दीप्तं भासितमङ्गमस्य ।) मयूर: । इति शब्दरत्नावली ॥

दीप्ति:, स्त्री, (दीप+क्तिन् ।) दीपनम् । तत्पर्याय: । प्रभा २ रुक् ३ रुचि: ४ त्विट् ५ भा ६ भा: ७ छवि: ८ द्युति: ९ रोचि: १० शोचि: ११ । इत्यमर: ।१।४।३४॥ बाणवेगस्य तीव्रता । स्त्रिया अयत्नजगुण: । इति हेमचन्द्र: ।२।१३॥

"कान्तिरेव वयोभोगदेशकालगुणादिभि: ।
उद्दीपितातिविस्तारं प्राप्ता चेद्दीप्तिरुच्यते ॥"

इत्युज्ज्वलनीलमणि: ॥

(यथा, साहित्यदर्पणे । ३ । १३१ ।

"कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥")

लाक्षा । कांस्यम् । इति राजनिर्घण्ट: ॥

दीप्तिक:, पुं, (दीप्त्या कायतीति । कै+क: ।) दुग्धपाषाणवृक्ष: । इति राजनिर्घण्ट: ॥

दीप्तोपल:, पुं, (दीप्त: सूर्य्यकिरणसम्पर्कात् ज्वलित: उपल: ।) सूर्य्यकान्तमणि: । इति राजनिर्घण्ट: ॥

दीप्य:, पुं, (दीपाय अग्निदीपनाय हितमिति । दीप+"तस्मै हितम् ।" ५ । १ । ५ । इति अपूपादित्वात् पक्षे यत् ।) यमानी । (अस्य पर्य्यायो यथा,—

"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका ॥"

इति वैद्यकरत्नमालायाम् ॥)

जीरक: । इति राजनिर्घण्ट: ॥ (दीपाय साधुरिति । दीप+"तत्र साधु: ।" ४ । ४ । ९८ । इति यत् ।) मयूरशिखा । वनजटा इति ख्याता । इत्यमर: । २ । ४ । १११ ॥

दीप्यकं, क्ली, (दीपाय हितं साधुरिति वा । दीप+यत् । तत: स्वार्थे कन् ।) अजमोदा । यमानी । (यथा भावप्रकाशे शूलरोगाधिकारे ।

"सैन्धवं चव्यकं कुष्ठं दीप्यकञ्च समं पृथक् ॥")

मयूरशिखा । इति मेदिनी । कै, १०५ ॥

दीप्यक:, पुं, (दीप्य+संज्ञायां स्वार्थे वा कन् ।) अजमोदा । यमानी । (अस्य पर्य्याया यथा,—

"यमानी दीप्यको दीप्य: भूतिकश्च यमानिका ॥"

इति वैद्यकरत्नमालायाम् ॥)

[illegible] । इति भरतधृतरभस: ॥ (अस्य [illegible] । [illegible] यथा,—

"[illegible] दीप्यकस्तथा ।
[illegible] ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

दीप्र:, त्रि, (दीप्यते इति । [illegible] [illegible] इति र: ।) दीप्तियुक्त: । [illegible]
(यथा कथासरित्सागरे ।
"कश्चित् [illegible]

दीयमान:, त्रि, (दीयते इति । [illegible] शानच् ।) [illegible]
व्याकरणम् । यथा, [illegible]
"विवाहोत्सवयज्ञे[illegible]
पूर्व्वसङ्कल्पितं द्रव्यं [illegible]
[illegible]

दीर्घ, त्रि, (दृणातीति । दॄ [illegible] कात् घञ् ।) आयतम् । [illegible]
(यथा मेघदूते । १०१ ।
"दीर्घोच्छ्वासं [illegible]
सङ्कल्पैस्तैर्विशति [illegible]

दीर्घ:, पुं, (दॄ+बाहुलकात् [illegible] उष्ट्र: । (यथा, [illegible]
"सार्व्वोऽश्वार्य्य: [illegible]

[illegible] इत्युत्कट: । इति रत्नमाला । [illegible]
[illegible]
यथा । [illegible]
इति ज्योतिषतत्त्वम् । द्विमात्रिक:
आ ई ऊ ॠ ए ऐ ओ औ ।
व्याकरणम् । (दीर्घलक्षणं यथा,—
"एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ
त्रिमात्रस्तु प्लुतो ज्ञेयो [illegible]

दीर्घकणा, स्त्री, (दीर्घा कणा [illegible]
गौरजीरक: । इति राजनिर्घण्ट: ।

दीर्घकण्टक:, पुं, (दीर्घ: कण्टको [illegible]
इति राजनिर्घण्ट: ।

दीर्घकण्ठक:, पुं, (दीर्घ: कण्ठो [illegible]
बकपक्षी । इति शब्दचन्द्रिका ।

दीर्घकन्दकं, क्ली, (दीर्घ: कन्दो [illegible]
मूलकम् । इति राजनिर्घण्ट: ।
अस्य गुणादयो विज्ञेया: ।)

दीर्घकन्दिका, स्त्री, (दीर्घ: कन्द: [illegible]
इत्यत्र ।) मुषली । इति [illegible]

दीर्घकन्धर:, पुं, (दीर्घ: कन्धरो [illegible]
इति राजनिर्घण्ट: ।

दीर्घकाण्ड:, पुं, (दीर्घ: काण्डो [illegible]
इति राजनिर्घण्ट: ।

दीर्घकाण्डा, स्त्री, (दीर्घ: काण्डो [illegible]
पातालगरुडी । इति राजनिर्घण्ट: ।

दीर्घकील:, पुं, (दीर्घ: कील: [illegible]
अङ्कोठवृक्ष: । इति राजनिर्घण्ट: ।

दीर्घकीलक:, पुं, (दीर्घकील+स्वार्थे कन्
वृक्ष: । इति शब्दमाला ।

दीर्घकूरक, क्ली, (दीर्घ: कूरक: [illegible]
इति राजनिर्घण्ट: ।

..., पुं, (दीर्घाः केशा इव लोमान्यस्य ।)
... । इति राजनिर्घण्टः ॥ (देशभेदः ।
... बृहत्संहितायाम् । १४ । २३ ।
... वेलोपनन्दूलिकदीर्घग्रीवास्यकेशाश्च ॥"
... केशा यस्य ।) आयतकचे, त्रि ॥ (स्त्रियां
... ग आज्ञत्वात् । यथा, महानाटके ।१६।
... ठी चारुनेत्रा गजपतिगमना दीर्घकेशी
सुमध्या ॥")
... ष्का, स्त्री, (दीर्घः कोशो यस्याः । ततः
... यां कन् टाप् अत इत्वञ्च ।) दीर्घको-
... । इत्यमरटीकायां भरतः ॥
... ष्का, स्त्री, (दीर्घः कोषोऽस्याः । कामि
... इत्वम् ।) क्रियायिका । क्रियक् इति
... । तत्पर्य्यायः । द्रुनामा २ । इत्यमरः ।
... १० । २५ ॥
..., पुं, (दीर्घा आयतस्थानग्रहा गतिः
... मेचेनो यस्य ।) उष्ट्रः । इति राज-
... एटः ॥
... घ, पुं, (दीर्घो ग्रन्थिः पर्व्वास्य ।) गज-
... ली । इति राजनिर्घण्टः ॥ (विवृतिरस्य गज-
... पीशब्दे विज्ञेया ॥)
...:, पुं, (दीर्घा ग्रीवास्य ।) उष्ट्रः । इति
... चन्द्रः ।४।३२४॥ नीलक्रौञ्चः । इति राज-
... एटः ॥ (देशभेदः । यथा, बृहत्संहितायाम् ।
... १४ । २३ ।
... र्व्विलोचनन्दूलिकदीर्घग्रीवास्यकेशाश्च ॥")
... टिकः, पुं, (दीर्घा घाटास्यास्तीति । ठन् ।)
... । इति शब्दरत्नावली ॥
... ङ्गलः, पुं, (दीर्घं यथा तथा जङ्गलो गति-
... ।) भङ्गानमत्स्यः । इति शब्दमाला ॥
...:, पुं, (दीर्घा जङ्घास्य ।) बकः । इति
... काव्ययोषः । उष्ट्रः । इति जटाधरः ॥ आय-
... गाढजङ्घे, त्रि ॥
... ह्वः, पुं, (दीर्घा जिह्वा यस्य ।) सर्पः ।
... ते हेमचन्द्रः । ४ । ३६८ ॥ (दानवविशेषः ।
... था, महाभारते । १ । ६५ । ३० ।
... रिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥"
... र्य्यां टाप् । राक्षसीविशेषः । यथा, महा-
... रते । ३ । २८६ । ४४ ।
... र्घी चार्व्वी ललाटाक्षीं दीर्घजिह्वा-
मजिह्मकाम् ॥")
...:, पुं, (दीर्घश्चासौ तरुश्चेति कर्म्मधारयः ।)
... लः । इति शब्दार्थकल्पतरुः ॥
... लिमिषा, स्त्री, (दीर्घलिमिषः । अभिधानात्
... लिम् ।) कर्कटी । इति शब्दमाला ॥
... तुण्डा, स्त्री, (दीर्घं तुण्डं यस्याः ।) छुछु-
... न्दरी । इति त्रीकाण्डशेषः ॥
...:, पुं, (दीर्घं तृणमिति नित्यकर्म्मधारयः ।
... भिधानात् पुंस्त्वम् ।) पल्लवाद्यः । इति राज-
... निर्घण्टः ॥
... ण्डः, पुं, (दीर्घो दण्ड इव काण्डमस्येति ।)
... एरण्डवृक्षः । इति भावप्रकाशः ॥

दीर्घदण्डकः, पुं, (दीर्घदण्ड + स्वार्थे कन् ।) एरण्ड-वृक्षः । इति जटाधरः ॥

दीर्घदण्डी, स्त्री, (दीर्घदण्ड + गौरादित्वात् ङीष् ।) गोरची । इति राजनिर्घण्टः ॥

दीर्घदर्शी, [न्] पुं, (दीर्घं दीर्घात् वा पश्यतीति । णिनिः ।) पण्डितः । इत्यमरः । २ । ७ । ६ ॥ गृध्रः । इति शब्दरत्नावली ॥ भल्लूकः । इति राजनिर्घण्टः ॥ दूरदर्शके, त्रि ॥ (यथा, महाभारते । २ । ४८ । ४३ ।
"स हि धर्म्मं पुरस्कृत्य दीर्घदर्शी परं हितम् ॥")

दीर्घदृष्टिः, पुं, (दीर्घा दृष्टिर्दर्शनमस्य ।) दीर्घदर्शी । इति हलायुधः ॥

दीर्घद्रुः, पुं, (दीर्घश्चासौ द्रुश्चेति कर्म्मधारयः ।) तालवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घद्रुमः, पुं, (दीर्घो द्रुम इति नित्यकर्म्मधारयः ।) शाल्मलिः । इति राजनिर्घण्टः ॥

दीर्घनादः, पुं, (दीर्घो दूरगो नादोऽस्य ।) शङ्खः । इति राजनिर्घण्टः ॥

दीर्घनालं, क्ली, (दीर्घं नालमस्य ।) दीर्घरोहिषकम् । इति राजनिर्घण्टः ॥

दीर्घनालः, पुं, (दीर्घं नालं यस्य ।) वृत्तगुण्डः । यावनालः । इति राजनिर्घण्टः ॥

दीर्घनिद्रा, स्त्री, (दीर्घा निद्रेति नित्यकर्म्मधारयः ।) मृत्युः । इति हेमचन्द्रः । २ । २३८ ॥ (यथा, मार्कण्डेये । ७ । १३ ।
"सोऽद्य नतकार्म्मुकाचेमविद्योपितदिगन्तरैः ।
शरैर्विभिन्नसर्व्वाङ्गो दीर्घनिद्रां प्रवेक्ष्यति ॥")

दीर्घपटोलिका, स्त्री, (दीर्घा पटोलिका ।) लता-फलविशेषः । धुंदुल इति भाषा । अस्य गुणाः । स्निग्धत्वम् । कटुत्वम् । विष्टम्भित्वम् । गुरुत्वम् । वायुपित्तश्लेष्मरुधिरभेदकारित्वम् । मधुरत्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥

दीर्घपत्रः, पुं, (दीर्घं पत्रमस्य ।) राजपलाण्डुः । विष्णुकन्दः । हरिदर्भः । कुन्दरः । तालः । इति राजनिर्घण्टः ॥ कशेरुः । इति भावप्रकाशः ॥ (इक्षुभेदः । यथा, सुश्रुते सूत्रस्थाने ४५ अः ।
"कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ।
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोषकृत् ॥")

दीर्घपत्रकः, पुं, (दीर्घपत्र + संज्ञायां कन् ।) रक्तलशुनः । एरण्डः । हिज्जलः । वेतसः । इति राजनिर्घण्टः ॥ करीरवृक्षः । इति शब्दचन्द्रिका ॥ जलजमधूकः । इति जटाधरः ॥ लशुनः । इति हेमचन्द्रः । ४ । २५३ ॥ (इक्षुभेदः । यथा, सुश्रुते सूत्रस्थाने ४५ अः ।
"शतपर्व्वा नीलपोरो नैपालो दीर्घपत्रकः ।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः ॥")

दीर्घपत्रा, स्त्री, (दीर्घपत्र + टाप् ।) चित्रपर्णिका । चाङ्गेरियाभेदः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"शालिपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा ।
विदारिगन्धा दीर्घाङ्गी दीर्घपत्रांशुमत्यपि ॥")
वृश्चकम्पुः । इति रत्नमाला ॥ गन्धपत्रा ।
केतकी । डोड़ीचुपः । इति राजनिर्घण्टः ॥ (चिञ्चापरपर्य्याय उद्भिद्भेदः । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"चिञ्चा पञ्चाङ्गुली च दीर्घपत्रा सतिक्तका ॥")

दीर्घपत्रिका, स्त्री, (दीर्घपत्र + संज्ञायां कन् टाप् अत इत्वञ्च ।) श्वेतवचा । घृतकुमारी । शालपर्णी । इति राजनिर्घण्टः ॥

दीर्घपत्री, स्त्री, (दीर्घपत्र + गौरादित्वात् ङीष् ।) पलाशीलता । महाचञ्चुशाकः । इति राजनिर्घण्टः ॥

दीर्घपर्णी, स्त्री, (दीर्घं पर्णमस्याः । गौरादित्वात् ङीष् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥ (पृश्निपर्णीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

दीर्घपल्लवः, पुं, (दीर्घः पल्लवो यस्य ।) शणवृक्षः । इति राजनिर्घण्टः । आयतच्छदे, क्ली । तद्वति, त्रि ॥

दीर्घपात्, पुं, (दीर्घौ पादावस्य । समासे अन्त्यलोपः ।) कङ्कपक्षी । इति शब्दरत्नावली ॥

दीर्घपादः, पुं, (दीर्घौ पादौ यस्य । समासान्तविधेरनित्यत्वात् अन्त्यलोपाभावश्च ।) कङ्कपक्षी । इति हेमचन्द्रः । ४ । ४०० ॥

दीर्घपादपः, पुं, (दीर्घश्चासौ पादपश्चेति नित्यकर्म्मधारयः ।) तालः । पूगः । इति राजनिर्घण्टः ॥

दीर्घपृष्ठः, पुं, (दीर्घं पृष्ठं यस्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥

दीर्घफलः, पुं, (दीर्घं फलं यस्य ।) आरग्वधवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"आरग्वधो राजवृक्षः सम्पाकश्चतुरङ्गुलः ।
आरेवतो व्याधिघातः कृतमालः सुवर्णकः ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

दीर्घफलकः,पुं,(दीर्घफल + संज्ञायां कन् ।) अगस्त्यवृक्षः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या-गस्त्यशब्दे ज्ञातव्याः ॥)

दीर्घफला, स्त्री, (दीर्घाणि फलानि यस्याः ।) कपिलद्राक्षा । जतुका । इति राजनिर्घण्टः ॥

दीर्घबाला, स्त्री, (दीर्घः बालो यस्याः ।) चमरी । इति राजनिर्घण्टः ॥

दीर्घमारुतः, पुं, (दीर्घः अधिकगमनप्रयासी मारुतो निःश्वासवायुर्यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥

दीर्घमूलं, क्ली, (दीर्घं मूलं यस्य ।) लामज्जकम् । इति राजनिर्घण्टः ॥

दीर्घमूलः, पुं, (दीर्घं मूलं यस्य ।) मोरटलता । बिल्वान्तरवृक्षः । इति राजनिर्घण्टः ॥

दीर्घमूलकं, क्ली, (दीर्घमूल + संज्ञायां कन् ।) मूलकम् । इति राजनिर्घण्टः ॥

दीर्घमूला, स्त्री, (दीर्घं मूलं यस्याः । टाप् ।) श्यामालता । शालपर्णी । इति रत्नमाला ॥ (यथा, सुश्रुते । १ । ३८ ।
"प्रियङ्गु समङ्गधातकी पुन्नागनागचन्दन चन्दन-

मोचरसरसाञ्जनकुम्भीकसोमोऽश्मपद्मकेसर-योजनवल्ल्यो दीर्घमूला चेति॥")

दीर्घमूली, स्त्री, (दीर्घं मूलमस्याः। ङीप्।) दुरालभा। इति शब्दमाला॥

दीर्घरदः, पुं, (दीर्घौ रदौ दन्तौ यस्य।) शूकरः। इति त्रिकाण्डशेषः॥ आयतदन्ते, त्रि॥

दीर्घरसनः, पुं, (दीर्घा रसना जिह्वा यस्य।) सर्पः। इति शब्दचन्द्रिका॥

दीर्घरागा, स्त्री, (दीर्घः अधिककालस्थायी रागो यस्याः।) हरिद्रा। इति राजनिर्घण्टः॥

दीर्घरात्रं, क्ली, (दीर्घाः प्रचुरा रात्रयः यत्र च। अर्श आदित्वात् अच्।) चिरकालम्। इति त्रिकाण्डशेषः॥ (पुं, दीर्घा चासौ रात्रिश्चेति विग्रहे। "सर्व्वैकदेशसङ्ख्यातपुण्यवर्षादीर्घाद्रात्रेः।" इति मुग्धबोधसूत्रात् षः। पुंस्त्वमभिधानात्।) दीर्घा निशा च॥

दीर्घरोमा, [न्] पुं, (दीर्घाणि रोमाणि यस्य।) भल्लूकः। इति शब्दार्थकल्पतरुः॥ (महादेवस्य भूतानामन्यतमः। यथा, हरिवंशे भविष्यपर्व्वणि। १३।७।
"तस्याग्रे समपद्यन्त भूतसङ्घाः महद्भयः।"
"दीर्घरोमा दीर्घभुजो दीर्घबाहुर्विरक्षणः॥")

दीर्घरोहिषकं, क्ली, (दीर्घं रोहिषम्। ततः स्वार्थे संज्ञायां वा कन्।) कतृणभेदः। सुगन्धितृण-विशेषः। बड़ रोहिष इति भाषा। तत्पर्य्यायः। दृढ़काण्डम् २ दृढ़च्छदम् ३ पशेदम् ४ दीर्घनालम् ५ तिक्तसारम् ६। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कफवातभूतग्रह-विषनाशित्वम्। व्रणघ्नतविरोपणत्वञ्च। इति राजनिर्घण्टः॥

दीर्घवंशः, पुं, (दीर्घो वंश इव।) नलः। इति राजनिर्घण्टः॥ आयते दृढवंशे कुले च॥

दीर्घवक्त्रः, पुं, स्त्री, (दीर्घं वक्त्रं मुखं यस्य।) हस्ती। इति शब्दमाला॥ (लम्बवदने, त्रि॥)

दीर्घवर्त्तिका, स्त्री, कुम्भीरः। इति शब्दार्थकल्पतरुः॥

दीर्घवल्ली, स्त्री, (दीर्घा वल्ली।) महेन्द्रवारुणी। पातालगरुड़ी। पलाशी। इति राजनिर्घण्टः॥ आयता लता च॥

दीर्घवृन्तः, पुं, (दीर्घं वृन्तं यस्य।) श्योनाक-वृक्षः। इत्यमरः।२।४।५७॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"श्योनाको भूतपुष्पश्च पूतिवृक्षो सुनिद्रुमः।
दीर्घवृन्तश्च कट्वङ्गो भल्लूकटुण्टुकोऽरलुः॥")

दीर्घवृन्तकः, पुं, (दीर्घवृन्त+स्वार्थे कन्।) श्योनाकः। इति शब्दमाला॥ श्योनाकभेदः। इति राजनिर्घण्टः॥ (श्योनाकशब्देऽस्य विवरणं ज्ञातव्यम्॥)

दीर्घवृन्ता, स्त्री, (दीर्घं वृन्तं यस्याः।) इन्द्र-चिर्भिटी। इति राजनिर्घण्टः॥

दीर्घवृन्तिका, स्त्री, (दीर्घं वृन्तं यस्याः। कप्। टापि अत इत्वम्।) इलापर्णी। इति शब्दचन्द्रिका॥

दीर्घशरः, पुं, (दीर्घः शरः।) यावनालः। इति राजनिर्घण्टः॥

दीर्घशाखः, पुं, (दीर्घा शाखा यस्य।) शालवृक्षः। इति राजनिर्घण्टः॥ शणवृक्षः। इति शब्दचन्द्रिका॥

दीर्घशाखिका, स्त्री, (दीर्घा शाखा यस्याः। कापि अत इत्वम्।) [illegible]। इति राजनिर्घण्टः॥

दीर्घशिम्बिकः, पुं, (दीर्घा शिम्बिर्यस्य। कप्।) [illegible]। इति राजनिर्घण्टः॥

दीर्घशूककं, क्ली, (दीर्घं शूकं यस्य। कप्।) राजा-न्नम्। इति राजनिर्घण्टः॥

दीर्घसक्थ, त्रि, (दीर्घे सक्थिनी यस्य। "बहु-व्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्।" ५।४।११३। इति षच्।) दीर्घोरु। इति व्याकरणम्॥

दीर्घसक्थि, क्ली, (दीर्घे सक्थिनी यस्य। स्वाङ्गादि सूत्रेण न षच्।) शकटम्। इति व्याकरणम्॥

दीर्घसत्रं, क्ली, (दीर्घं बहुकालसाध्यं सत्रम्।) यज्ञविशेषः। (यथा, भागवते। १।१।२१।
"कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्।
आसीना दीर्घसत्रेण कथायां सक्षणा हरेः॥")
तीर्थविशेषः। इति शब्दार्थकल्पतरुः॥ (यथा, महाभारते। ३।८२।१०३—१०४।
"ततो गच्छेत राजेन्द्र! दीर्घसत्रं यथाक्रमम्।
यत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः।
दीर्घसत्रमुपासन्ते दीक्षिता नियतव्रताः॥
गमनादेव राजेन्द्र! दीर्घसत्रमरिन्दम!।
राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः॥")

दीर्घसुरतः, पुं, (दीर्घं बहुकालव्यापकं सुरतं मैथुनं यस्य।) कुक्कुरः। इति त्रिकाण्डशेषः॥

दीर्घसूत्रः, त्रि, (दीर्घेण बहुकालेन सूत्रं कार्य्या-रम्भो यस्य।) चिरक्रियः। इत्यमरः।३।१।१७॥
"अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिवः।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत्॥
रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते॥"
इति मत्स्यपुराणम्॥
(आयततन्तुकम्। यथा, माघे। १०।६१।
"मेखलागुणविलग्नमसूया
दीर्घसूत्रमकरोत् परिधानम्॥")
विकृते तन्तौ, क्ली॥

दीर्घसूत्री, [न्] त्रि, (दीर्घसूत्रं बहुकालं व्याप्य कर्म्मारम्भोऽस्यास्तीति। दीर्घसूत्र+इनिः।) दीर्घसूत्रः। इति हलायुधः॥ (यथा, गीतायाम्। १८।२८।
"विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते॥")

दीर्घस्कन्धः, पुं, (दीर्घः स्कन्धो यस्य।) तालवृक्षः। इति राजनिर्घण्टः॥

दीर्घा, स्त्री, (दीर्घ+टाप्।) पृश्निपर्णी। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा,—
"पृश्निपर्णी पृथक्पर्णी लाङ्गुली क्रोष्टुपुच्छिका।
धामनिः कलशी तन्वी गुहा क्रोष्टुकमेखला॥

[illegible]
दीर्घिका [illegible]

दीर्घाध्वगः, त्रि, (दीर्घमध्वानं [illegible] गः।) लेखहारः। उष्ट्रः, पुं। इति मेदिनी। ग, १०॥

दीर्घायुः, [स्] पुं, (दीर्घमायुर्यस्य।) काकः। जीवकः। चिरजीविनि, त्रि। इति मेदिनी। (यथा, महाभारते। [illegible]
"दीर्घायुः [illegible]
"तत्र [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
उत्तरोत्तरगुणैर्यो न दीर्घायु[illegible]
[illegible]
[illegible]
इति [illegible]॥

दीर्घायुधः, पुं, (दीर्घं आयुधं [illegible]) इति त्रिकाण्डशेषः॥ (दीर्घा [illegible] यस्य।) शूकरः। इति शब्द[illegible]

दीर्घायुष्यः, पुं, (दीर्घं आयुष्यं [illegible]) श्वेतमन्दारकः। इति राजनिर्घण्टः॥

दीर्घार्णकः, पुं, (दीर्घं वर्णं [illegible]) रक्तः। इति राजनिर्घण्टः॥

दीर्घिका, स्त्री, (दीर्घैव। [illegible] टापि अत इत्वम्।) [illegible] श्रयः। दीघि इति भाषा। तत्पर्य्याय[illegible] इत्यमरः।१।१०।२८॥ (यथा, रघुः। [illegible]
"[illegible]
[illegible] क्रोशति दीर्घिकाश्च[illegible]
[illegible]गुणाः। गुरुत्वम्। कटुत्वम्। पित्तकृत्त्वम्। कफवातघ्नत्वम्। [illegible]
इति राजनिर्घण्टः॥

दीर्घ[illegible], पु, (दीर्घा [illegible]) इति राजनिर्घण्टः॥

दीर्णः, त्रि, (दॄ विदारे+क्तः।) [illegible] (यथा, गौः रामायणे। २।३८।[illegible]
"आयसं हृदयं नूनं राममातुरसंशयम्।
यत्र दीर्णं प्रिये पुत्रे वनवासाय निर्गते॥")
भीतः। इति मेदिनी। न, १६॥ (यथा, महाभारते। ६।३।७६।
"एको दीर्घो दारयति सेनां [illegible]
तां दीर्णामनु दीर्यन्ते योधाः शूरतरा[illegible]

दीदिविः, पुं, किकीदिविः। इति शब्दमाला॥

दु, गतौ। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-अनिट्।) दवति। इति दुर्गादासः॥

न उपतापे । इति कविकल्पद्रुमः ॥ -सर्कं-अर्कं च-अनिट् ।) दु, दवथुः । । न, दुनोति । उपताप इहोपतप्ती- तिप्रीकरणञ्च । मन्मथेन दुनोमीति वर्त्तमप्रकर्षे सति कर्म्मकारं दुनोति ो न चेतः । इति कालिदासः । दासः ॥ , निषेधः । दुःखम् । निन्दा । अव- इति दुर्गादासधृतपुरुषोत्तमदेवः ॥ , दुःखमापन्नम् । कोपः । इति दुर्गा- दिनी ॥ (दुर्दुःखं तच्जनकं कूलं रोधो यस्मात् । ग तटस्य विषमत्वात् अस्य तथात्वम् ।) अत्यन्तमम् । इति राजनिर्घण्टः ॥ तनुछदौ । इति कविकल्पद्रुमः ॥ चुरा-परं-सर्कं-सेट् ।) विमर्दनमथः । हिन्तलाभावि घनपीनपयोधरे । गुणैर्गतो बालेन्द्रः खे न लभ्यते ॥" कम् । अन्तार्थः । तद्दिक्तलागमथ- मूलमेपि काले कमनीयः सर्व्वगुणैर्युतो नो आकाशे न लभ्यते यथे थे बाले ेन: कान्तः प्रतिदुःखेन लभ्यते । दुःख- यति । पद्मोम्पयमथः । इति केचित् । । अफरनम् । इति दुर्गादासः ॥ (दुर् दुष्टं खनतीति । खन + डः । दुःखयतीति । दुःख + पचाद्यच् ।) इति त्रिकाण्डशेषः ॥ (रोगः । यथा, मि षष्ठोरोगाधिकारे । मीयते दुःखैः शोधितसयममपि ॥" गेः ।" इति तट्टीका ॥) मनोधर्म- । प्रायकतं आत्मगुणभेदः । तत् धर्म- देवतां प्रतिकूलम् । इति भाषापरि- तत्पर्य्यायः । पीडा २ बाधा ३ व्यथा ४ म् ५ प्रसतिकम् ६ कष्टम् ७ कृच्छ्रम् ८ म् ९ । इत्यमरः ॥१।७।२३॥ आर्त्तिः १० ११ पीडनम् १२ अवाधा १३ बाध- आभरणम् १५ आनाहरणम् १६ विषा- पीडितम् १८ विदितम् १९ । इति रत्नमाला ॥ * ॥ ॥मय यथैव पोषय मद्भूखालयम् । येष लावण पीतिलानपि दुर्ल्लभम् ।" नि मकदेवो पृष्ठलालनपक्षम् । * ॥ आध्यात्मिकमाधिदैविकमाधिभौतिक भेदात् । यदुक्तं सत्त्वादीपदाम् । "दुःख- विघातः ।" इति । यो यदि दुःखमपि तत् तत्तु त्रिविधं आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च । तत्र आध्यात्मिकं द्विविधं शारीरं मानसञ्च । शारीरं व्याधिजम् । मानसं [illegible] कामक्रोधलोभमोहेर्ष्याविषादविशेषदर्शन- निबन्धनम् । सर्व्वञ्चैतदान्तरोपायसाध्यत्वात् [illegible] दुःखम् । बाह्योपायसाध्यञ्च दुःखं

द्वेधा आधिभौतिकमाधिदैविकञ्च । तत्र आधि- भौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तम् । आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेश- निबन्धनम् । तदेतत्प्रत्यात्मवेदनीयं दुःखं रजः- परिणामभेदो न शक्यते प्रत्याख्यातुम् । तदनेन दुःखत्रयेणान्तःकरणवर्त्तिना चेतनाशक्तेः प्रति- कूलतयाभिसम्बन्धोऽभिघातः इति । एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः ।") "दुःखमेवं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ! । उचितेनोपचारेण दुःखं मोक्षविनाशनम् ॥ अपद्वारकतो नित्यं नरो मोहेन चावृतः । ये मां नैव प्रपद्यन्ते ततो दुःखतरन्तु किम् ॥ सर्व्वाशी सर्व्वविक्रेता नमस्कारविवर्ज्जितः । ये च मां न प्रपद्यन्ते ततो दुःखतरन्तु किम् ॥ सर्व्वाण्यानि तु चिह्नानि पाकभेदन्तु कारयेत् । अवैष्णवे नरोऽर्च्चन्ति तत्र दुःखतरन्तु किम् ॥ प्राप्तकाले वैश्वदेवे ह्यतिथिमागतम् । अदत्त्वा तस्य यो भुङ्क्ते तत्र दुःखतरन्तु किम् ॥ अगम्यगमनं येषां परदाराभिमर्द्दकः । नरोपतापी मन्दात्मा तत्र दुःखतरन्तु किम् ॥ अक्षताद्युल्बणं कर्म्म दृष्टे संचरते नरः । यत्तु कालवशं प्राप्तश्च दुःखतरन्तु किम् ॥ इन्द्रियाणां वशगतानि गच्छमानानि मन्यते । न वै सहायताः पुंसि तत्र दुःखतरन्तु किम् ॥ अपराण्येव पितृत्वे केचित् प्रलापालिप्तमन्तिमम् । मृग्यमाणं केचिदर्च्चन्ति तत्र दुःखतरन्तु किम् ॥ परवशाहतां भार्य्यां समासेवन्ति भूमिपाः । केचित् तृष्णेषु दरन्ते ततो दुःखतरन्तु किम् ॥ विद्वान् हर्त्ता गुणज्ञश्च सर्व्वशास्त्रविशारदः । केचित्कृपा हरन्ते तत्र दुःखतरन्तु किम् ॥ विद्यमाने धने केचित् कृपणा भोगवर्ज्जिताः । दरिद्रो जायते राजा तत्र दुःखतरन्तु किम् ॥ पुत्रवक्त्रं इह भार्य्यं सपौरवं प्रदर्शयेत् । यत्रापि दुर्भगा तच ततो दुःखतरन्तु किम् ॥ लब्ध्वा तु मानुषीं संज्ञां चरमूत्रसमन्वितम् । मालेव न प्रपद्यन्ते ततो दुःखतरन्तु किम् ॥ लब्ध्वा भागवतानां यदौ यतोः दुःखदो ! । भागवतस्मरता स्वार्थसाले दुःखतरन्तु किम् ॥ एतत्ते कथितं भद्रे ! दुःखकर्म्म विनिश्चयम् । सर्व्वसंसारदुःखार्थे गच्छता परिरक्षति ॥" इति वराहपुराणम् ॥ * ॥ दुःखस्यापि यथा,— कारणत्रयम् १ आधिः २ आर्त्तिः ३ कारण्यं ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible] १० [illegible] ११ [illegible] १२ [illegible] १३ [illegible] १४ [illegible] १५ [illegible] १६ इति कविकल्पलता ॥ ([illegible]) [illegible] ॥ १ । ३ । १२ । [illegible] [illegible] ॥ दुःखदो, पु, ([illegible]) [illegible] [illegible]

दुर्दोहगवी । तत्पर्य्यायः । करटा २ । इति हेमचन्द्रः । ४ । ३३५ ॥

दुःखित, त्रि, (दुःखं सञ्जातमस्येति तारकादि- त्वादितच् ।) यद्वा, दुःखयतेः कर्म्मणि क्तप्रत्ययः । दुःखी । (यथा, मनौ । ८ । २८८ । "बन्धनानि च सर्व्वाणि राजमार्गे निवेशयेत् । दुःखिता यत्र दृश्येरन् विकृताः पापकारिणः ॥") भावे क्ते, दुःखम् । तत्र क्लीबे ॥

दुःखी, [न्] त्रि, (दुःखमस्यास्तीति इनिः ।) दुःखान्वितः । दुःखितः । यथा,— "दुःखिनो दुःखिनो वापि प्राणिनो मानवास्तथा । आसाद्य परिपाठन्ति ते यान्ति परमां गतिम् ॥ महामाहात्म्यभोगेच्छा सर्व्वसत्त्वगुणैर्विना । भवन्ति मदुःखेन मानवो निस्यदुःखिताः ॥" इति वह्निपुराणे ग्रिवेन्द्रपाकाख्याननामाध्यायः ॥)

दुःषमम्, व्य, (दुर्दुष्टं समं यत्र । "तिष्ठद्गुप्रभृतीनि च ।" इत्यव्ययीभावः । "सुविनिर्दुर्भ्यः सुपि ।" ८ । ३ । ८८ । इति षत्वम् ।) निन्दनीयम् । तत्पर्य्यायः । निःषमम् २ गर्हणम् ३ । इत्यमरः । ३ । ४ । १६ ॥

दुःसमम्, त्रि, (दुःषमम् । बाहुलकात् षत्वा- भावः ।) असमञ्जसम् । इति त्रिकाण्डशेषः ॥

दुःसहा, स्त्री, (दुःखेन सह्यतेऽसौ । दुः + सह + खल् । टाप् च ।) नागदमनी । इति राज- निर्घण्टः ॥ (दुःसहे, त्रि । यथा, रघुः ।११।२०। "राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी । गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥")

दुःसाधी, [न्] पुं, (दुर्दुष्टं कर्म्म साधयतीति । दुः + साधि + णिनिः ।) दौवारिकः । इति शब्द- रत्नमाला ॥

दुःसाध्यः, त्रि, (दुःखेन साध्यते इति । दुः + साध + ण्यत् ।) दुःसाधनीयः । दुःखेन साध्यते निष्पाद्यते यः । (यथा, पञ्चतन्त्रे । १ । १४८ । "तथौ दुर्गमौ दुःसाध्यौ रिपुर्भवति ।")

दुःस्थः, त्रि, (दुर्दुष्टं दुष्टं वा तिष्ठतीति । स्था + कः ।) दुर्गतः । मूर्खः । दुःखेन तिष्ठति यः । इति मेदिनी । थे, ८ । (यथा, भागवते । १ । १६ । ३२ । "तां दुःस्थामनुद्दसतीं [illegible] [illegible] [illegible] ।") दुःस्थं । इति शब्दार्णवः ॥

दुःस्पर्शः, पुं, (दुःखेन स्पृश्यते इति । दुः + स्पृश् + [illegible]) "[illegible] ।" १ । १ । १ । इति [illegible]) दुरालभा । इत्यमरः ।२।४।९१ । [illegible] यथा,— "[illegible] दुःस्पर्शा [illegible] ॥" इति [illegible] ॥ [illegible] । इति [illegible] । [illegible] त्रि । इति मेदिनी । षे, २१ । ([illegible] । १ । १५ । १ ।

"रवौ वायुः सद्रःस्पर्शः फूत्कारागौरयत्र सह्नुः ।
उन्मूलयन्नगपतीन् वात्यानीको रथध्वजः ॥")

दुःस्पर्शा, स्त्री, (दुःखेन स्पृश्यते इति । स्पृश् + खल् + टाप् च ।) कपिकच्छुः । आकाशवल्ली । कण्टकारी । (अस्याः पर्य्याया यथा,—
"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टालिका कण्टकिनी धावनी दृहती तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) दुरालभा । इति राजनिर्घण्टः ॥

दुःस्फोटः, पुं, (दुर्द्दुष्टं स्फोटयतीति । स्फोटि + अच् ।) शस्त्रभेदः । इति हेमचन्द्रः । ३ । ४५१ ॥

दुकूलं, क्ली, (दुष्टं कूलति आवृणोतीति । कूल + "इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः । पृषोदरात् साधुः । यद्वा, दु + "खजिपिञ्जादिभ्य ऊरोलोचौ ।" उणा । ४ । ९० । इति ऊलच् । धातोः कुक् च ।) क्षौमवस्त्रम् । (यथा, रघौ । ७ । १९ ।
"दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः ।")
सूक्ष्मवस्त्रम् । इति मेदिनी । ले, ९९ ॥

दुगूलम्, क्ली, (दुकूलं पृषोदरात् कस्य गः ।) दुकूलम् । पट्टवस्त्रम् । इति हेमचन्द्रः । ३ । ३३३ ॥

दुग्धम्, क्ली, (दुह्यते स्मेति । दुह + कर्म्मणि क्तः ।) स्त्रीमात्रस्तनजनिःसृततरद्रव्यविशेषः । दुध इति भाषा । तत्पर्य्यायः । क्षीरम् २ पीयूषम् ३ ऊधस्यम् ४ स्तन्यम् ५ पयः ६ अमृतम् ७ । इति राजनिर्घण्टः ॥ बालजीवनम् ८ । इति भावप्रकाशः ॥ अस्य सामान्यगुणाः । स्वादुत्वम् । स्निग्धत्वम् । ओजःकारित्वम् । धातुवर्द्धनत्वम् । वातपित्तहरत्वम् । वृष्यत्वम् । श्लेष्मलत्वम् । गुरुत्वम् । शीतलत्वम् । पिच्छाद्रत्वगुरुत्वञ्च ॥ * ॥ गोदुग्धगुणाः । प्रायधारकत्वम् । वलायुःपुंस्त्वशुक्रकारित्वम् । मेध्यत्वम् । रक्तपित्तरोगवायुनाशित्वम् । रसायनत्वञ्च ॥*॥ छागीदुग्धगुणाः । मधुरत्वम् । शीतत्वम् । मलबन्धकारित्वम् । रक्तपित्तविकारश्वासकासक्षयदोषनाशित्वञ्च ॥ * ॥ मेषीदुग्धगुणाः । गुरुत्वम् । स्वादुत्वम् । स्निग्धत्वम् । उष्णत्वम् । कफपित्तनाशित्वञ्च ॥ * ॥ माहिषदुग्धगुणाः । अतिस्निग्धत्वम् । निद्राकारित्वम् । अग्निनाशित्वञ्च ॥ * ॥ उष्ट्रीदुग्धगुणाः । रूक्षत्वम् । उष्णत्वम् । शोषवातकफनाशित्वम् ॥ * ॥ अश्वीदुग्धगुणाः । बलकरत्वम् । मधुराम्लरसत्वम् । लघुत्वञ्च ॥ * ॥ हस्तिनीदुग्धगुणाः । मधुरत्वम् । शुक्रकारित्वम् । कषायानुरसत्वम् । गुरुत्वञ्च ॥ * ॥ मानुष्यदुग्धगुणाः । प्राणधारकत्वम् । शरीरहितकारित्वम् । हृद्यत्वम् । तर्पणत्वञ्च ॥ * ॥ प्रसूतकाले गोदुग्धस्य गुणाः । गुरुत्वम् । विष्टम्भित्वम् । दुर्जरत्वम् । तस्मात् सप्तोत्तरात् परं सप्ताहं मासार्द्धमेव वा दुग्धं पयो ग्राह्यम् । तद्वन्नं दोषनं लघु ॥ * ॥ शिशुवत्सावत्सरूपायाः पयः दोषलम् । वृद्ध-

वत्सबत्सगोर्दुग्धं श्वेतवर्णकृष्णवर्णगोदुग्धस्य प्रशस्तम् ॥ * ॥ दृष्टभक्ष्यकमाधपर्णभक्षकोऽस्मद्गगोदुग्धं पक्वमपक्वं वा हितकारकम् ॥ * ॥ पर्यूषितदुग्धगुणाः । गुरुत्वम् । विष्टम्भित्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ अपक्वदुग्धगुणः । प्रायोऽभिष्यन्दित्वम् । गुरुत्वञ्च ॥ * ॥ सुतीष्णं कफवातनाशनम् । शृतशीतं पित्तनाशनम् । धारोष्णदुग्धं अमृततुल्यम् । स्त्रीस्तन्यदुग्धं विना सर्व्वमपक्वं दुग्धं त्याज्यम् । मलवत्दुग्धं विग्रथितं नष्ट इति ख्यातं दुग्धस्य त्याज्यम् ॥ * ॥ दुग्धान्नगुणाः । चक्षुर्हितत्वम् । बलकारित्वम् । पित्तनाशित्वम् । रसायनत्वञ्च ॥ * ॥
"शाकाम्लफलपिण्याककुलत्थलवणामिषैः ।
करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते ॥"
इति राजवल्लभः ।

अथ चतुर्व्विधक्षीरगुणः ।
"कैश्याविकं पथ्यतमं सुतोष्णं
क्षीरं त्वजानां शृतशीतमाहुः ।
दोहान्तशीतं महिषीपयस्यं
गव्यन्तु धारोष्णमिदं प्रशस्तम् ॥
इष्टं हृद्यमग्निवर्द्धनकरं पूर्व्वाह्नपीतं पयो
मध्याह्ने बलदायकं रतिकरं कृच्छ्रस्य विच्छेदनम् ।
बाल्ये वह्निकरं ततो बलकरं वीर्य्यप्रदं वार्द्धके
रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्व्वदा ॥
क्षीरं मुहूर्त्तान्नितयोषितं य-
दतप्तमेतद्विकृतिं प्रयाति ।
यथास्तु दोषं कुरुते तदूर्द्ध्वं
विषोपमं स्यादुषितं दशानाम् ॥
जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणे पीतं विषवद्धन्ति मानुषम् ॥
क्षीरक्वाथगुणः ।
चतुर्थभागं सलिलं निधाय
यत्नाद्यदावर्त्तितमुत्तमं तत् ।
सर्व्वामयघ्नं बलपुष्टिकारि
वीर्य्यप्रदं क्षीरमतिप्रशस्तम् ॥
गव्यं पूर्व्वाह्नकाले स्यादपराह्णे तु माहिषम् ।
क्षीरं समकरं पथ्यं मद्यं साम्लाश्च सर्व्वदा ॥
क्षीरं न भुञ्जीत कदाप्यतप्तं
तप्तञ्च नैतत्पर्य्युषितं सार्द्धम् ।
पिष्टान्नसन्धानकमाषमुद्ग-
कोशातकीकन्दफलादिकैश्च ॥
तथा च,
मत्स्यमांसगुडमुद्गमूलकैः
कुष्ठमावहति सेवितं पयः ।
शाकजाम्बवरसादिसेवित-
मारयत्यबुधमाशु सर्पवत् ॥ * ॥
स्निग्धं शीतं गुरु क्षीरं सर्व्वकालं न सेवयेत् ।
दोषानपि कुरुते मन्दं मन्दाग्निं नष्टमेव च ॥
निवर्त्तमाना विना सेव्यं सुपक्वं माहिषं पयः ।
कुर्व्वन्ति शाम्यतः सर्व्वे बलपुष्टिविवर्द्धनम् ॥
क्षीरं मनागपाकदर्षमधुरं चारं मनःप्रसादनम् ।
दन्तस्य निशताढ्यं करोति रक्तामयं कुरुते ॥*॥

मधुरं त्रिदोषशमनं
गुणहीनं निःसारं
मध्यमवयसो
तासां
तद्वाहि सततं क्षीरं
दुग्धाम्लं शीतलं
वातपित्तापहं वृष्यं हृद्यं
"दुग्धं सुमधुरं स्निग्धं
सद्यःशुक्रकरं
जीवनं हृद्यं
वयःस्थापकमायुष्यं
ग्रहण्यां पाण्डुरोगे च
शूलोदावर्त्तगुल्मेषु
रक्तपित्तातिसारे
गर्भस्रावे च सततं
बालवृद्धक्षतक्षीणाः
तेभ्यः सदातिशयितं
(दुग्धोत्पत्तिविवरणं यथा,—
"यद्
सारं जलस्य शुक्रस्य तथा त्रिविधं
पाचितं जाठरे वह्नौ निशि
पच्यमानं शिरामार्गे क्षीरं
तेन
अमृतं सर्व्वभूतानां क्षीरं
हारीतः संशयापन्नः
कथं रसस्य सम्प्राप्तिः कथं
कथं
कथं तत्र कुमारीणां स्तन्यं
एवं पृष्टो महाप्राज्ञः
अति हर्षप्रदं पुत्र ! परि
सितासितं तथा रक्तं त्रिविधं
रक्तं श्वेतत्वमायाति तथा क्षीरं
क्षीरनाशः कुमारीणां
अल्पधातुबलं यस्मात्
वन्ध्यानां
क्षीरञ्च न
प्रसवात् च नारीषु
तेन स्रोतो विशुद्धिः स्यात्
तस्मात् सद्यः प्रसूतायाः
तेन काठिन्यमायाति
पयसाविस्तृतं
इति हारीते प्रथमे स्थाने
(कतृणम् । तत्पर्य्यायाः
"कतृणं ध्यामकं दुग्धम्"

(दुह + क्तः ।) प्रपूरितः । इति मेदिनी ।
कलदोहः । (यथा, हरिवंशे १२।२५ ।
कैडाराज ! दुग्धा मन्दारिव भारत ! ।"
तार्थे क्तः ।) दोहने, स्त्री ।
, स्त्री, (दुग्धतुल्यः नाघ्नपनैरकाघ्नस्य
दुग्धतुल्य + इन् । टाप् ।) मिष्टान्नविशेषः ।
दुर्गं विनिक्षिप्तपयोदलीरैरु सान्द्रपिष्टेन ।
कर्णं विद्यावाप सदैव सार्धिका मत्स्य ।
कोषिलमध्यां घलमवना पूर्णमाथ ।
दिनक्वर्ता मनस्तेन सच्चवदनाय ।
दुग्धमाहे सपदेव कर्पूरगावितैः
इत्युक्तः ।"
दुग्धा ।
दुग्धकूपिका सा कला मिश्रातितमानवा ।
होतार्थी सुरकरी तन्वी प्रथा ।
इति भावप्रकाशस्य पूर्वखण्डे २ भागे ।
र्दं, स्त्री, (दुग्धस्य तालाय प्रतिहावे
। दुग्धताल + इः ।) दुग्धाम्लम् । क्षीर-
इति मेदिनी । घे, १६६ । दुग्धाम्लम् ।
मिश्रकः ।
र्दं, स्त्री, (मथ्यते क्षिप्ततिति । मथ +
तस्ये ल्युट् । दुग्धस्य मथनं मानम् ।)
क्षिप्तम् । तत्पर्यायः । दधकम् २ ।
हारावली । २२० ।
मा, पुं, (दुग्धं क्षीरं मापाय इव कठिनं
) क्षुपविशेषः । खिरणीला इति भाषा ।
यः । दुग्धपाषाणः २ दुग्धासा ३
। ४ गोलेइवन्तिनः ५ वलामा ६ दीलिकः ७
८ क्षीरकदः ६ । अस्य गुणाः । रुचत्वम् ।
त्वम् । ज्वरनिषहदीपनूषघ्नमादा-
त्विष । इति राजनिर्घण्टः ।
, स्त्री, (दुग्धवत् शुभं पुष्पं यस्येति
२ । गौरादित्वात् ङीष् ।) क्षुपविशेषः ।
। इति ख्याता । तत्पर्यायः । देव-
२ विशा ३ सहा ४ मधुसूरी ५ । इति
अर्थिका ।
पुं, (दुग्धस्य फेन इव फेनो यस्य ।) क्षीर-
णि । तत्पर्यायः । झाञ्जरः २ । इति
निघण्टः ।
, स्त्री, (दुग्धवत् शुभ्रा फेनो यस्याः ।
दित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्-
यः । पयःफेनी २ फेनदुग्धा ३ सतलिनी ४
५ घनदुग्धा ६ सीमासर्पी ७ । अस्याः
। कटुत्वम् । तिक्तत्वम् । क्रिमिहरत्वम् ।
ज्वरातिसृत्वम् । रुचत्वम् । दुग्धा स्तनस्य-
। इति राजनिर्घण्टः ।
, स्त्री, (दुग्धवत् शुभ्रं बीजं यस्याः ।)
तालबद्धलाबुविशेषः । अस्या
गुणाः । रुचत्वम् । दुर्भरत्वम् । बीजस्य
पनत्व । इति राजनिर्घण्टः ।

दुग्धाख्यः, पुं, (दुग्धवत् शुभ्रं अक्षं नेत्रं चिह्नविशेषो यस्य ।) उपलविशेषः । इति शब्दार्थकल्पतरुः ।
दुग्धाब्धितनया, स्त्री, (दुग्धाब्धेः क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति कविकल्पलता ।
दुग्धाश्मा, [न्] पुं, (दुग्धं क्षीरं अश्मा प्रस्तर इव कठिनं यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः ।
दुग्धिका, स्त्री, (दुग्धं निर्यासो बहुलतया विद्यते यस्याः । दुग्ध + ठन् । टाप् च ।) क्षुपविशेषः । दुधी इति दुग्धाक्षीर इति च भाषा । तत्पर्यायः । स्वादुपर्णी २ क्षीरावी ३ क्षीरिणी ४ दुग्धी ५ क्षीरी ६ क्षीराब्धिका ७ । इति शब्दरत्नावली । अस्या गुणाः । उष्णत्वम् । गुरुत्वम् । रूक्षत्वम् । वातलत्वम् । गर्भकारित्वम् । स्वादुक्षीरत्वम् । कटुत्वम् । तिक्तत्वम् । मलस्तम्भनकारित्वम् । मधुरत्वम् । स्वादुत्वम् । विष्टम्भित्वम् । रुच्यत्वम् । कफकुष्ठक्रिमिनाशित्वञ्च । इति भावप्रकाशः । दृग्भेदः । गन्धिका इति ख्याता । तत्पर्यायः । उत्तमा २ दुग्धफला ३ उत्तमपर्णिनी ४ । इति रत्नमाला ।
दुग्धिनिका, स्त्री, रक्तापामार्गः । इति राजनिर्घण्टः ।
दुग्धी, स्त्री, (दुग्धं क्षीरं बहुलतया अस्त्यस्या इति । अर्श आद्यच् । ततो गौरादित्वात् ङीष् ।) क्षीरावी । इति मेदिनी । घ, ८ । (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् । "उत्तमा दुग्धिका दुग्धी पयोधिका पयस्विनी ।") दुग्धपाषाणः । इति राजनिर्घण्टः ।
दुण्डुभः, पुं, (डु उपतापे + भावे क्विप् तुक् च । दुत् उपतापः । तमिरादरये प्रभवतीति । प्रभ + पचाद्यच् ।) जलव्यालसर्पः । निर्विषसर्पभेदः । इति मेदिनी । भे, १०५ ।
दुण्डिः, स्त्री, (दुण्डि + स्वार्थे कः ।) दुण्डिः । कच्छपी । इत्यमरटीकायां रायमुकुटः ।
दुत्तुरः, त्रि, दुर्भिक्षः । इति शब्दार्थकल्पतरुः ।
दुदुमः, पुं, (मोऽपि नम्रतीति । दुड् मज्जने + "उमः किच्च दुरिदर्भिषां कदुग्धे रवोऽनद ।" १ । ८३० । इति उणादिकोषटीकाधृतवचनात् उमः कच्च रवोऽन्तश्च ।) दुदुमवर्णः । समुद्रादिरनौदः । (यथा, महाभारते ।६।११६।१०। "हरणीनां महारोणां मध्यमध्यदुदुमान् ।" "क्ष्वेडितैश्वरहां वीरां मेघिनिःसंसंपदभीन् ।")
दुदुमः, पुं, (दुर् दुष्टौ हनः । पृषोदरादित्वात् साधुः ।) शिविरकराह्यः । इत्यमरः । २ । ४ । १३० ।
दुन्दमः, पुं, (दुन्द इत्यव्यक्तशब्देन नदति प्रभवति इति । नद अव्यक्ते शब्दे + डः ।) दुन्दुभिः । इति शब्दरत्नावली ।
दुन्दुः, पुं, वसुदेवः । इति त्रिकाण्डशेषः । दुन्दुभिवादनम् । इति शब्दरत्नावली ।
दुन्दुभिः, पुं, (दुन्द इत्यव्यक्तशब्देन भातीति । भा + बाहुलकात् किः ।) ढक्का । तत्-

पर्य्यायः । भेरी २ आनकः ३ । इत्यमरः । १ । ७ । ६ । (यथा, महाभारते । १ । १२३ । ८३ । "आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ।") वरुणः । दैत्यभेदः । इति मेदिनी । भे, १६ । (दानवविशेषः । यथा, हरिवंशे । ३ । ८१ । "जमदग्नी दुन्दुभिरञ्च मृतं गौरवराक्रमाः ।" "मधुरगौ विहारच गदेशी दुन्दुभिर्मया ।") रजोभेदः । नाटभेदः । इति शब्दरत्नावली । विषम् । इति हेमचन्द्रः । २ । २०७ । (कुकुरवंशीयस्य अन्धकस्य पुत्रः । यथा, भागवते । ६ । २४ । २० । "अन्धकाद्दुन्दुभिस्तस्मादविद्योतः पुनर्वसुः ।" क्रौञ्चद्वीपाधिपतेर्द्युतिमतः पुत्राणामन्यतमः । क्रौञ्चद्वीपस्य देशभेदश्च । यथा, ब्रह्माण्डे ३६ अध्याये । "कुशिव दुन्दुभिश्चैव तथा द्युतिमतस्तु वै । तेषाञ्च नामभिर्देशाः क्रौञ्चद्वीपाश्रयाः स्मृताः ।" "कुशेस्तु कुशलो देशो दुन्दुभेर्दुन्दुभिः स्मृतः ।" पर्वतविशेषः । यथा, मत्स्यपुराणे । १२१ । १३ । "स एव दुन्दुभिर्नाम श्मशानमभितो गिरिः । शब्दस्तत्र पुरा तस्मिन् दुन्दुभिस्ताडितः सुरैः ।" असुरविशेषः । यथा, रामायणे । ४ । ६ । ४ । "मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः । तेन तस्य महद्वैरं वालिनः स्त्रीकृतं पुरा ।")
दुन्दुभिः, स्त्री, यन्त्रः । नाम्नकः । इत्यमरः । ३ । ३ । १३५ । अत्र नायकविषये दानविशेषो भिर्थ इति ख्यातः । इति केचित् । अक्षबिन्दुत्रिकद्वयम् । इति रमसः । त्रिचतुष्कषड्बिन्दुत्रितयबिन्दुद्वयात्मकत्वं घाम्नटी इति ख्याता । इति केचित् । इति महेशटीकायां भरतः ।
दुन्दुमारः, पुं, धुन्धुमारः । इति शब्दार्थकल्पतरुः ।
दुरदृष्टं, क्ली, (दुर्दुष्टमदृष्टम् ।) दुर्भाग्यम् । इति स्मृतितत्त्वम् ।
दुरध्वः, पुं, (दुर्दुष्टोऽध्वा । "उपसर्गादध्वनः ।" ५ । ४ । ८५ । इति अच् ।) कुपथः । इत्यमरः । २ । १ । १६ ।
दुरभिग्रहः, पुं, (दुर्दुःखेन अभिगृह्यते स्पृश्यतेऽसौ इति । दुर् + अभि + ग्रह + खल् ।) अपामार्गः । इति राजनिर्घण्टः । (दुरभि + ग्रह + कर्मणि खल् ।) दुःग्राह्ये, त्रि ।
दुरभिग्रहा, स्त्री, (दुरभिग्रह + टाप् ।) कपिकच्छुः । दुरालभा । इति राजनिर्घण्टः ।
दुरारुः, पुं, (दुर्भेदः । दु + आ + "आरुः । बाहुलक इ तु शिद् ।" ३ । ११५ । इति उणादिकोषटीकाधृतवचनात् आरुप्रत्ययेन निपातनात् साधुः ।) धवभेदः । इत्युणादिकोषः ।
दुराचारः, पुं, (आचर्य्यते इति आर्भे घञ् । दुर्दुष्ट आचारः इति प्रादिसमासः ।) निन्द्याचरणम् । यथा, कथाकल्पतरौ । "प्राणे हरिस्मृते दैवे नरः पूर्वार्जितैः । दुराचारवताः सर्वे पश्चात्तापपराहताः ।"

(दुष्ट आचारो यस्य।) निन्दिताचारवति, त्रि। (यथा, देवीभागवते। १। ११। १६।
"महापातकयुक्तस्त्वं दुराचारोऽतिगर्हितः।")

दुराधर्षः, पुं, (दुष्टान् यज्ञविघ्नकारिराक्षसादीन् आधर्षति दूरीकरोतीति। धृष् + अच्।) गौरसर्षपः। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते। १३। १४९। २२।
"अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्।"
"दैत्यादिभिर्धर्षयितुं न शक्यते इति दुराधर्षः।"
इति तद्भाष्ये शङ्करः॥ दुःखेन आ ईषदपि धर्षयितुमशक्यः इति। धृष् + "ईषद्दुःसुषु" इति। ३। ३। १२६। इति खल्।) अधर्षणीये, त्रि॥ (यथा, महाभारते। ६। १९। ३२।
"भीमसेनो गदां भीमां प्रकर्षन् परिघोपमाम्।
प्रचकर्ष महासैन्यं दुराधर्षो महामनाः॥")

दुराधर्षा, स्त्री, (दुराधर्ष + स्त्रियां टाप्।) कुटुम्बिनीक्षुपः। इति राजनिर्घण्टः॥

दुरारुहः, पुं, (दुःखेन आरुह्यते इति। दुर् + आ + रुह + घञर्थे कर्म्मणि कः।) विल्वः। नारिकेलः। इति राजनिर्घण्टः॥ (दुःखारोहणीये, त्रि। यथा, महाभारते। ३। १४०। ९१।
"स मा त्वयाद्य गन्तव्यं प्रभृहि पुरुषर्षभ!।
अन्तःपरमगन्धोऽयं पर्व्वतः सुदुरारुहः॥")

दुरारुहा, स्त्री, (दुरारुह + टाप्।) खर्ज्जुरी। इति राजनिर्घण्टः॥

दुरारोहः, पुं स्त्री, (दुःखेन आरुह्यते इति। रुह + कर्म्मणि खल्।) खर्ज्जूरः। इति राजनिर्घण्टः॥ दुःखारोहणीये, त्रि॥ (यथा, महाभारते। ४। ५। १४।
"इयं कूटे मनुष्येन्द्र! गहने महती शमी।
भीमशाखा दुरारोहा श्मशानस्य समीपतः॥")

दुरारोहा, स्त्री, (दुरारोह + टाप्।) शाल्मलिवृक्षः। इति त्रिकाण्डशेषः॥ शिम्बी। इति राजनिर्घण्टः॥

दुरालभा, स्त्री, (दुःखेन आलभ्यते स्पृश्यते छिद्यते वाऽसौ। दुर् + आ + लभ + खल् + टाप्। कण्टकविशिष्टत्वात् न नुम्।) स्वनामख्यातकण्टकगुल्मविशेषः। स च यवासभेदः। छिङ्गुया इति ख्याता। तत्पर्य्यायः। दुरालम्भा २ धन्वयासः ३ ताम्रमूला ४ कच्छुरा ५ दुस्पर्शा ६ धन्वी ७ धन्वयासकः ८ प्रबोधनी ९ समुद्रान्ता १० विरूपा ११ दुरभिग्रहा १२ दुर्लभा १३ दुःस्पर्शा १४। इति राजनिर्घण्टः॥ यासः १५ यवासः १६ दुःस्पर्शः १७ कुनाशकः १८ रोदनी १९ कच्छुरा २० अनन्ता २१। इत्यमरः। २। ४। ९५॥ समुद्रान्ता २२ गान्धारी २२ कारभी २३। इति भावप्रकाशः॥ मरुद्भवः २४ दुरवः २५ कच्छुरा २६। इति शब्दरत्नावली॥ विरक्षकः २७। इति जटाधरः॥ (यवासकः २८। इति शब्दार्णवः।) अस्या गुणाः। शार-त्वम्। ज्वरच्छर्द्दिश्लेष्मपित्तविसर्पवेदनानाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सारत्वम्। अम्लत्वम्। मधुरत्वम्। वातगुल्मप्रमेहनाशित्वञ्च। इति राजनिर्घण्टः॥
"यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा॥"
इति भावप्रकाशः॥
(गङ्गा। यथा, काशीखण्डे। २९। ८८।
"दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा॥")
दुरालभनीये, त्रि॥

दुरालम्भा, स्त्री, (दुःखेन आलभ्यते इति। दुर् + आ + लभ + खल् + नुम् च।) दुरालभा। इति राजनिर्घण्टः॥ (यथा, महाभारते। १३। ९८। ३१।
"तीक्ष्णवीर्य्यास्तु भूतानां दुरालम्भाः सकण्टकाः।
रक्तभूयिष्ठवर्णाश्च कृष्णाश्चैवोपहारयेत्॥")

दुरालापः, पुं, (दुष्ट आलापः इति मादिसमासः।) गालिः। इति शब्दार्थकल्पतरुः॥

दुरासदः, त्रि, (दुःखेन आसद्यते इति। दुर् + आ + सद् + "ईषद्दुःसुषु।" ३।३।१२६। इति खल्।) दुष्प्राप्यः। यथा,—
"दुरासदो दुर्विषहो भूतानां स बभूव ह॥"
इति श्रीभागवतम्॥
(यथा च, देवीभागवते। १। १०। ३२।
"धर्म्मस्य पुरतः प्राप्ते कामभावे दुरासदे॥"
(दुष्प्रवेशः। यथा, माघे। १६। १०।
"घनजालनिभैर्दुरासदाः
परितो नागकदम्बकैस्तव।
नगरेषु भवन्तु वीथयः
परिकीर्णा वनजैर्मृगादिभिः॥")

दुरितं, क्ली, (इण भावे + क्तः। दुष्टमितं गमनं नरकादिदुर्गतिप्राप्तिर्यस्मात्।) पापम्। इत्यमरः। १। ४। २३॥ (यथा, रघौ। ८। २।
"दुरितैरपि कर्त्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत्॥")
तद्वति, त्रि॥

दुरितदमनी, स्त्री, (दुरितं पापं दम्यते यया इति। दम + करणे ल्युट्। ङीप् च।) शमी। इति राजनिर्घण्टः॥ (दम + ल्युः।) पापनाशिनी च॥

दुरिष्टकृत्, पुं, (दुरिष्टम् अभिचारयज्ञं करोतीति। दुरिष्ट + कृ + क्विप् तुगागमश्च।) अभिचारकर्त्ता। तस्य नरकं यथा,—
"देवद्विजपितॄन् द्वेष्टा रत्नदूषयिता च यः।
स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत्॥"
इति विष्णुपुराणे। २। ६। १४॥
"दुरिष्टकृत् अभिचारकर्त्ता।" इति तट्टीका॥

दुरीहः त्रि (दुर् + ईहन्।) अतिमन्दः। अयमनर्योरेखा वा अतिशयेन दुः निन्दितः। इति व्याकरणम्॥

दुरीषणा, स्त्री, (दुष्टा ईषणा इच्छाभिग्रंथनम्। मादिसमासः।) शापः। इति शब्दार्थकल्पतरुः॥

दुरूहः, त्रि, (दुःखेन ऊह्यते [illegible] कर्म्मणि खल्।) दुर्वितर्क्यः। [illegible]
"काव्यप्रकाशस्य [illegible]
गदाधरो याति [illegible]"
इति [illegible]

दुरोदरं, क्ली, (दुष्ट [illegible] उदरमस्य वा। [illegible] भेदः। पाशकक्रीडा। इत्य [illegible]
(यथा, वक्रोक्तिपञ्चाशिकायाम् [illegible]
"यदि किं [illegible] दुरोदर [illegible]

दुरोदरः, पुं, (दुष्ट [illegible] द्यूतकृत्। (यथा, महाभारते [illegible]
"दुरोदरा विहिता [illegible]
महात्मना [illegible]
पणः। इति मेदिनी। रे, ४३।

दुर्गं, क्ली, (दुःखेन गम्यते [illegible]
"सुदुरोरधिकरणे।" ३। १। [illegible]
भाषितपुंस्का डः।) [illegible]
इत्यमरः। २। ८। १७। [illegible]
च भाषा। तत्पर्य्यायः। कोट्टः [illegible]
"स्कन्धावारो [illegible]
इति [illegible]
"अथ कीदृशो राजधानी [illegible]
इति [illegible]
"पुरं दुर्गमधिष्ठानं [illegible]

तत्तु षड्विधम्। यथा,—
"तत्र दुर्गं नृपः कुर्य्यात् [illegible]
धन्वदुर्गं महीदुर्गं नरदुर्गं [illegible]
वार्क्षञ्चैवाम्बुदुर्गञ्च [illegible]
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं [illegible]
दुर्गञ्च परिखोपेतं वप्राट्टालक [illegible]
शतघ्नीयन्त्रमुख्यैश्च शतशश्च [illegible]
इति मात्स्ये [illegible]

राजसत्तु करणावश्यकत्वं [illegible]
यथा,—
"दुर्गास्तु सततं [illegible]
दूषितानगरानाथा दुर्गं दुर्गा [illegible]
दुर्गं बलं नृपाणान्तु विशं दुर्गं [illegible]
शतमेको योधयति दुर्गस्थो [illegible]
...रः मनुर्भद्रः पञ्चमः परिकीर्त्तितः ।
...षष्ठश्च सप्तमश्चकामुभौ ॥
...र्म्मियोरेतो नवमो विजयः स्मृतः ।
...कलशाः ख्याता अधिदैवं निबोधत ॥
...नुष ! यथा तेषां दिशां न्यासो व्यवस्थितः ।
...दः समाख्यातो विजयो नाम नामतः ॥
...लिङ्गः साक्षात् सर्व्वपापहरः शुभः ।
...ो ज्येष्ठतमो द्वितीयो जलसम्भवः ॥
...ः नवश्चैव चतुर्थस्तु हुताशनः ।
...भवनामस्तु षष्ठस्त्वाकाशसम्भवः ॥
...मदनः प्रोक्त आदित्यस्य सदाशमः ।
...रुमादिना देवा शिवेनाधिष्ठिताः पुरा ॥
...सर्व्वपापो सर्व्वात्मा नवमः शिवः ।
...पूर्व्वतो न्यासः पश्चिमे जलसम्भवः ॥
...वायवो न्यास्य आग्नेये अग्निसम्भवः ।
...पश्चात्तु ऐशान्याकाशसम्भवः ॥
...उत्तरतो योग्यं सौरं दक्षिणतो न्यसेत् ।
...स्थानात् पूर्व्वरूपं विचिन्तयेत् ॥
...मुखे ब्रह्मा ग्रीवायां विष्णुरेव हि ।
...मातृकाः सर्व्वे देवा देवाश्च पन्नगाः ॥
...तु कलशास्तेषां सप्तद्वीपा च मेदिनी ।
...चैव नदीनां च सम्बन्धो सुखदस्तथा ॥
...धारास्तेषामवस्थिताः स्थिताः ।
...देवैः सिद्धास्तेकामतो शुभे ! ॥
...तडागैश्च वहैश्च वा ।
...सागरैश्च सुखवहाः ॥
...सर्व्वकिल्विषनाशनाः ।
...सदा साध्याः कलशा ईदृशाः शुभाः ॥
...वा प्रतिष्ठाप्रकर्म्मणि ।
...विधेया सर्व्वकामप्रसाधकाः ॥
...धारणे यज्ञकालाद्यः विधिसंस्थिताः ।
...महापीठास्थित हे भारत्याः स्मृताः ।

एकैकान्तु कलां गृह्य शिवादीनां यथाक्रमम् ।
संहृत्य संस्थिता यस्मात्तेन ते कलसाः स्मृताः ॥
हैमराजततास्रा वा मृन्मया लक्षणान्विताः ।
पञ्चमाङ्गुलवैपुल्यस्तत्सेधः षोडशाङ्गुलः ॥
कलसानां प्रमाणन्तु मुखमष्टाङ्गुलं भवेत् ॥"

इति देवीपुराणम् ॥

धारयत्कर्मीरि, त्रि ॥ (यथा, पञ्चतन्त्रे ।२।१७५।
"अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥")

धारणं, क्ली, (धृ + णिच् + भावे ल्युट् ।) विधारणम् । इति मेदिनी । णे, ५६ ॥ धरण इति भाषा ॥ (यथा, सुश्रुते । १ । ४६ ।
"तेद्द्रव्याच्च निर्हरेद्दाशु कर्षं गण्डूषधारणात् ॥"
पुं, कश्यपपुत्रो नागविशेषः । यथा, महाभारते । ५ । १०३ । १६ ।
"विरजा धारणश्चैव सुबाहुर्मुखरो जयः ॥"
धारयतीति । धृ + णिच् + ल्युः । धारके, त्रि । यथा, महाभारते । १२ । ३३५ । ५४ ।
"अस्मुर्व्वेषामिदं देहं तपसे कृतनिश्चयाः ।
धारणाः सर्व्वलोकानां सर्व्वधर्म्मप्रवर्त्तकाः ॥")

धारणा, स्त्री, (धार्य्यते या सा । धृ + णिच् + युच् । टाप् ।) बुद्धिः । इति राजनिर्घण्टः ॥
(यथा, याज्ञवल्क्ये । ३ । ७३ ।
"इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
धारणा प्रेरणं दुःखमिच्छाहङ्कार एव च ॥")
न्यायपथस्थितिः । तत्पर्य्यायः । संस्था २ मर्य्यादा ३ स्थितिः ४ । इत्यमरः । २।८।२६ ॥
(यथा, मनुः । ४ । ३८ ।
"न लङ्घयेत् वत्सतन्त्रीं न प्रधावेच्च वर्षति ।
न चोदके निरीक्षेत स्वं रूपमिति धारणा ॥")
योगाङ्गविशेषः । इति मेदिनी । णे, ५६ ॥
"स तु अद्वितीयवस्तुन्यन्तरिन्द्रियधारणम् ।" इति वेदान्तसारः ॥ ध्येये चित्तस्य स्थिरबन्धनम् । इति हेमचन्द्रः ॥
"तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥"
इति विष्णुपुराणे । ६ । ७ । ८१ ॥
ब्रह्मणि मनोधारणम् । यथा,—
"ब्रह्माकारिकमा ध्यानं स्यात् धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥"
इति गारुडे ४८ अध्यायः ॥
[illegible] धारणा यथा,—
"प्राणायामा [illegible] च धारणा [illegible] ।
[illegible]
[illegible]
[illegible]
[illegible] धारणाः [illegible]
[illegible] ।
[illegible] धारणा [illegible] ।"
इति गारुडे २१० अध्यायः ।
[illegible]
"[illegible]"

यत्कालावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ।
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादशधारणाः ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु स यतो युक्तः समाधिः सोऽभिधीयते ॥
ध्येयान्न चलते यस्य मनोऽभिध्यायतो भ्रमम् ।
प्राण्यावधि कृतं कालं यावत् सा धारणा स्मृता ॥"
इति च गारुडे २४० अध्यायः ॥

धारणी, स्त्री, (धार्य्यते शरीरमनया । धृ + णिच् + ल्युट् । स्त्रियां ङीप् ।) नाडिका । बुद्धोक्तमन्त्रभेदः । इति मेदिनी । णे, ५५ ॥ श्रेणी । इति हेमचन्द्रः ॥

धारणीया, स्त्री, (धार्य्यतेऽसाविति । धृ + णिच् + अनीयर् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥ धार्य्ये, त्रि ॥

धारयित्री, स्त्री, (धारयति गर्भमिति । धृ + णिच् + तृच् । स्त्रियां ङीप् ।) पृथिवी । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, महाभारते । ५ । ८५ । ८ ।
"त्वं हि धारयिता श्रेष्ठः कुरूणां कुरुसत्तम ! ॥")

धारा, स्त्री, (धार्य्यते अश्वा यया । धृ + णिच् + अङ् । स्त्रियां टाप् ।) अश्वानां गतिप्रकारः । तद्यथा । आस्कन्दितम् १ धौरितकम् २ रेचितम् ३ वल्गितम् ४ प्लुतम् ५ । इत्यमरः । २ । ८ । ४८ ॥ (यथा, माघे । ५ । ६० ।
"आयाकुलं प्रकटयन्तमपीतरस्मिन्
धाराः प्रसाधयितुमव्यतिकीर्णरूपाः ।
सिद्धं मुखे नवसु वीथिषु कश्चिदश्वं
वल्गाविभागकुशलो गमयाम्बभूव ॥"
"अश्वनिर्गीतितत्त्वा अश्वगतिस्तत्त्वा धारा अभिमिताः ।
'आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ।'
इति वैजयन्ती ॥
'गतयोऽमूः पञ्च धाराः ।' इत्यमरश्च । अन्यत्रापि तु संज्ञान्तरोक्ताः ।
'गतिः पुना चतुष्का च तत्सम्भवाश्च या ।
पूर्व्वोक्ता मया ख्याता पञ्च धाराः प्रकीर्त्तिताः ॥
[illegible] धारा [illegible] ।
[illegible]
प्रमाद् ।'
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] । (यथा, [illegible] ।
६ । ११५ । ४२ ।
"[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

...[illegible] १ अङ्के ।
"पुत्रं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥")
उत्कर्षः । रथचक्रम् । इति हेमचन्द्रः ।३।४१६॥
(यथा, रघुः । १३ । १५ ।
"आभाति वेला लवणाम्बुराशे-
र्धारानिबद्धेव कलङ्करेखा ॥")
यद्यः । अतिवृष्टिः । (यथा, पञ्चतन्त्रे । २।६२ ।
"पर्जन्यस्य यथा धारा यथा च दिवि तारकाः ।
सिकतारेणवो यद्वत् संख्यया परिवर्जिताः ।
गुणाः संख्यापरित्यक्तास्तद्वदस्य महात्मनः ॥")
समूहः । इति शब्दरत्नावली ॥ घनासारवर्षणम् । सद्यः । इति विश्वः ॥ (प्रवाहः । यथा, शाकुन्तले । १ । ३० ।
"त्वदर्थं मन्त्रधाराभिरभिः पावनं जलम् ।
नैव नामभिधिष्यामि पानमात्रः पुनन्तु ते ॥")
[illegible] इति विक्रमचरितम् । ० । (तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । ९३ ।
"ततो गच्छेत नरव्याघ्र भरतर्षभ ।।
धारां नाम महाप्राज्ञ ! सर्व्वपापप्रमोचनीम् ।
तत्र स्नात्वा नरव्याघ्र ! न शोचति नराधिप ॥")
[illegible]
धारावासनविधिः । यथा, दुर्गासप्तशती ।
"यदा महाजलराशौ धारा देवस्य वर्द्धति ।
[illegible] धारयेत् द्विजैः ।
[illegible] महाध्वनि ॥"
धाराकदम्बः, पुं, (धारा [illegible] कदम्बः । [illegible]) कदम्बभेदः । [illegible] इति भाषा ॥ तत्पर्य्यायः । प्रावृष्यः २ पुलकी ३ भृङ्गवल्लभः ४ [illegible] ५ [illegible] ६ नीपः ७ प्रावृषेण्यः ८ कलम्बः ९ । [illegible] १० । इति राजनिर्घण्टः ॥ धाराकदम्बः । इति त्रिकाण्डशेषः ॥
धाराङ्कुरः, पुं, (धाराया वृष्टेः अङ्कुर इव ।) [illegible] करकः । वर्षोपलः । नीहारः । इति मेदिनी । र, २६९ ॥
धाराङ्गः, पुं, (धारा उत्कर्षं [illegible] अङ्गं यस्य ।) [illegible] खड्गः । इति हेमचन्द्रः ॥
[illegible]

धाराफलः, पुं, (धारा फले यस्य ।) मदनवृक्षः । इति राजनिर्घण्टः ॥ (मदनशब्देऽस्य गुणपर्य्याया ज्ञातव्याः ॥)
धारावनिः, पुं, (धाराया वृष्टेः अवनिः पृथ्वीव अभिधानात् पुंस्त्वम् ।) वायुः । इति त्रिकाण्डशेषः ॥
धाराविषः, पुं, (धारा एव विषमिव यस्य प्राणनाशकत्वात् ।) खड्गः । इति त्रिकाण्डशेषः ॥
धारासम्पातः, पुं, (धाराणां सम्यक् पातो यत्र ।) महावृष्टिः । तत्पर्य्यायः । धारा १ सम्पातः २ आसारः ३ । यथा,—
"धारा सम्पात आसारस्तिलयश्चापि कुर्व्वपि च ॥"
इति शब्दरत्नावली ॥
(यथा, प्रबोधचन्द्रोदये ५ अङ्के ।
"ततो देवि ! परस्परं करितुरगरथपदातीनां निरन्तर-शरनिकर-धारासम्पातोपदर्शितदुर्द्दिनानां तेषामकालं च योधानां तुमुलः सम्प्रहारः प्रावर्त्तत ॥")
धारास्नुही, स्त्री, (धारान्विता स्नुही ।) त्रिधारस्नुही । इति राजनिर्घण्टः ॥ तेकाँटासिज इति भाषा ॥
धारिणी, स्त्री (धरतीति । धृ + णिनिः + ङीप् ।) धरणी । इति शब्दरत्नावली ॥ शाल्मलिवृक्षः । इति शब्दचन्द्रिका ॥ चतुर्द्दशदेवयोषित्सु । यथा,—
"शची वनस्पती गार्गी धूम्रोर्णा रुचिराकृतिः ।
सिनीवाली कुहू राका तथा चानुमतिः शुभा ॥
आयतिर्नियतिः प्रज्ञा सेला वेला च नामतः ।
एताश्चतुर्द्दश प्रोक्ता धारिण्यो देवयोषितः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(धारणकर्त्री । यथा, विष्णुपुराणे । १।१३।८८ ।
"प्राणप्रदाता स पृथुर्यस्माद्भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥"
आधारस्वरूपा । यथा, तत्रैव । १ । १३ । ९१ ।
"सैव धात्री विधात्री च धारिणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥"
"धात्री माता विधात्री कर्त्री धारिणी आधारः पोषणी पोषणकर्त्री ।" इति तट्टीकायां श्रीधरस्वामी ॥)
धारी, [न्] पुं, (धरतीति । धृ + णिनिः ।) पीलुवृक्षः । इति जटाधरः ॥ त्रि, धारणविशिष्टः ॥ (धारकः । यथा, महाभारते ।५ । ३९ । ११ ।
"नरैव विदुरं भूयः कृत्स्नां मत्तधारिणम् ॥" [illegible]
ग्रन्थानुस्मर्त्तृः । यथा, मनुः । १२ । १०३ ।
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥")
धार्त्तराष्ट्रः, त्रि, ([illegible]) [illegible]
"[illegible] ।" १ । २ । १६६ । इति [illegible] १ । १८ । २ ।
"[illegible] ॥")
धारोष्णं, क्ली, (धारायां दोहनसमये उष्णम् ।) दोहनोत्तरक्षणावधि नैसर्गिकोष्णम् । सद्यो दुग्धम् ।

"धारोष्णन्तु [illegible]
[illegible]
("धारोष्णं गो[illegible]
दीपनञ्च त्रिदो[illegible]
धारोष्णं शस्यते [illegible]
इति भावप्रकाश[illegible]
धार्त्तराष्ट्रः, पुं, [illegible]
हाँस इति भाषा [illegible]
(यथा, वेणीसंहारे [illegible]
दुर्गनायाम् ।
"सत्पक्षा मधुरगिरः [illegible]
[illegible]
सर्पविशेषः । धृतराष्ट्र[illegible]
रे, २७० ॥ (यथा, वैदो[illegible]
"[illegible]
प्रायेषु [illegible]
[illegible]
स्तथा भवन्ति [illegible]
धार्त्तराष्ट्रपदी, स्त्री, ([illegible]
मूलं यस्याः । ङीष् प्रकारः ।)
राजनिर्घण्टः ॥ ([illegible]
ज्ञातव्यः ॥)
धार्म्मिकः, त्रि, (धर्म्मं चरतीति । [illegible]
चरति ।" ४ । ४ । ४१ । इति
धर्म्ममधीते वेद वा । [illegible]
ठक् ।" ४ । २ । ६० । इति ठक् ।)
तत्पर्य्यायः । धेवक् १ । इति
(यथा, महाभारते । १ । १११ । [illegible]
"धार्म्मिकश्च कुरुणां [illegible]
धार्य्यं, त्रि, (ध्रियते इति । धृ + ण्यत् ।)
यम् । यथा,—
"धातागुराधयस्तु[illegible]
[illegible]
[illegible]
मार्ष्य वर्ष्य [illegible]

(ध्रियते परिधीय[illegible]
भागवते । ८ । १८ [illegible]
"वयं तत्तापि भ्रात: [illegible]
[illegible]
धाव, उ न गतौ । [illegible]
(भ्वा-उभ-अक-शुद्धौ [illegible]
मात् ऊदितः ।) उ,
धावति धावते । अयः [illegible]
[illegible]
[illegible]
मधेन [illegible]
'[illegible]
[illegible]
इति दुर्गादासः ।

[illegible] भाषा । [illegible] (यथा, गीः [illegible] ।

[illegible]) [illegible] ।

[illegible] ।२।११८ ।

[illegible] इति मेदिनी । [illegible] (यथा,

[illegible] धावने ।"

[illegible]) [illegible]

[illegible] ।३।१।६८ । (यथा,

भागवते । ७ । ८ । ३३ ।

[illegible] । इति अमरः ।

[illegible] ।३।१।६२ ।

धिक्क्रिया, स्त्री, ([illegible] क्रिया ।)

निन्दा । इति हेमचन्द्रः । [illegible]

धिष्, [illegible] इति कविकल्प-

द्रुमः । [illegible]

[illegible] इति दुर्गा-

दासः ।

धिषण, पुं. [illegible]

[illegible]

"[illegible]"

"[illegible] । इति नानार्थ [illegible]

[illegible] । यथा, [illegible]

"[illegible]"

[illegible]

[illegible]

ध्यो ङ य श्राराधे) नादरे । इति कविकल्प-
द्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) अनादर
इति कातन्त्रादौ । ध्यो, धीनः । ङ य, धीयते
जनं लोकः । इति दुर्गादासः ॥

धीः, स्त्री, (ध्यै चिन्तने + भावे क्विप् । सम्प्रसार-
णञ्च ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा,
मनौ । ६ । ९२ ।
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम् ॥")

धीनः, त्रि, पीतः । इति धेधातोः क्तप्रत्ययेन
निष्पन्नः ॥

धीतिः, स्त्री, (धेट् पाने + क्तिन् ।) पिपासा । इति
हेमचन्द्रः । ३ । ५८ ॥

धीदा, स्त्री, (धियं ददातीति । दा + कः । स्त्रियां
टाप् ।) कन्या । मनीषा । इति हेमचन्द्रः ॥

धीन्द्रियं, क्ली, (धीजनकमिन्द्रियम् ।) ज्ञानेन्द्रि-
यम् । तद्यथा । मनः १ नेत्रम् २ श्रोत्रम् ३
त्वक् ४ रसना ५ घ्राणम् ६ । इत्यमरः । १ ।
१ । ८ ॥

धीमान्, [त्] पुं, (धीरस्यास्तीति । धी + मतुप् ।)
बृहस्पतिः । पण्डिते, त्रि । इति मेदिनी । ते,
१११ ॥ (यथा, मनुः । १ । १०२ ।
"तस्य कर्म्मविवेकार्थं शेषाणामनुपूर्व्वशः ।
स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ॥"
भरद्वाजस्य शिष्यः पुत्रः । यथा,—
"बली सदाम तनयः तस्य धीमान् विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ॥"
इति विष्णुपुराणे । ४ । १९ ।
पुरूरवसः उर्व्वशीगर्भजातः पुत्रविशेषः ।
यथा, महाभारते । १ । ७५ । २४ ।
"षट्सुता जज्ञिरेऽथैलादायुर्धीमानमावसुः ।
दृढायुश्च वनायुश्च शतायुश्चोर्व्वशीसुताः ॥")

धीमती, स्त्री, (धीमत् + स्त्रियां ङीप् ।) बुद्धि-
मती । इत्यमरः । ३ । ६ । १९ ॥

धीरं, क्ली, (धियं रातीति । रा + कः ।) कुङ्कु-
मम् । इति मेदिनी । रे, ११ ॥ (पर्य्यायोऽस्य यथा,
भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥")

धीरः, पुं, (धियं राति ददाति रक्षतीति वा ।
रा + कः ।) ऋषभौषधिः । इति राजनिर्घण्टः ॥
बलिराजः । इति शब्दरत्नावली ॥

धीरः, त्रि, (धियं ईरयतीति । ईर + अण् । यद्वा,
धियं राति । रा + कः ।) धैर्य्यान्वितः ।
धीरः । पण्डितः । इति मेदिनी । रे, ११ ॥
(यथा, भारवौ । १ । ६ । ३१ ।
"सहसा विदधीत न क्रियाम-
विवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥"
[illegible] । इति शब्दरत्नावली । मन्दः । इति
[illegible] । (यथा,—

"देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥"
इति रसमञ्जर्य्याम् ।)
विनीतः । इति संक्षिप्तसारोणादिवृत्तिः ॥
(गम्भीरः । यथा, रघुः । २ । ४४ ।
"अथोपदेन गगनस्पृशा रघुः
स्वरेण धीरेण निवर्त्तयन्निव ।")

धीरत्वं, क्ली, (धीरस्य भावः । धीर + त्व ।)
धीरता । यथा,—
"प्रागल्भ्यौदार्य्यमाधुर्य्यशोभाधीरत्वकान्तयः ।
दीप्तिश्चायत्नजा भावहावहेलाः स्त्रियोऽङ्गजाः ॥"
इति हेमचन्द्रः । ३ । १७३ ॥

धीरपत्री, स्त्री, (धीरं मनोहरं पत्रमस्याः ।
स्त्रियां ङीष् ।) धरणीकन्दः । इति राज-
निर्घण्टः ॥

धीरस्कन्धः, पुं, (धीरः अचपलः भारसह इति
यावत् स्कन्धो यस्य ।) महिषः । इति हेमचन्द्रः ।
४ । ३४८ ॥

धीरा, स्त्री, (धीर + टाप् ।) काकोली । महा-
ज्योतिष्मती । इति राजनिर्घण्टः ॥ (गुडूची ।
अस्याः पर्य्याया यथा,—
"गुडूची मधुपर्णी स्यादमृताऽमृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मानावस्थायां मध्याप्रगल्भानायिकाभेदः ।
अस्या लक्षणम् । व्यङ्ग्यकोपप्रकाशा धीरा ।
मध्याया धीरायाः कोपव्यञ्जिका गीः । प्रौढा-
धीरायास्तु रत्यौदास्यम् । सा द्विविधा ।
ज्येष्ठा कनिष्ठा च । मध्या धीरा यथा,—
"लीलालिपुञ्जे भवतो निकुञ्जे
स्मारं बभूव श्रमवारिधारा ।
देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥"
प्रौढा धीरा यथा,—
"नो तल्पं भजसे न जल्पसि सुधाधाराङ्कुरा
गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाश-
च्छलात् ।
इत्थं केतकगर्भगौरि ! दयिते कोपस्य संगोपनं
किं स्यादेव न चेत् पुनः सहचरी कुर्व्वीत
साक्षिज्वितम् ॥"
इति रसमञ्जरी ॥

धीराधीरा, स्त्री, (धीरा अधीरा च ।) मानाव-
स्थायां मध्याप्रगल्भा नायिकाभेदः । अस्या
लक्षणम् । व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा । मध्याया
धीराधीरायाः कोपव्यञ्जिका चपकवाक्‌गीः ।
प्रौढाधीराधीराया रत्यौदास्यं तर्ज्जनताड-
नादि च कोपस्य प्रकाशकम् । सा द्विविधा ।
ज्येष्ठा कनिष्ठा च । मध्याधीराधीरा यथा,—

"कामातुर[illegible]
नाथोऽपि [illegible]
इत्थं निगद्य [illegible]
निःश्वस्य वा[illegible]
प्रौढाधीराधी[illegible]
"तल्पोपान्त[illegible]
काकुवाकुलवा[illegible]

इत्यन्यसखकरे [illegible]
प्रौढी प्रेङ्खमयू[illegible]

धीलटिः, स्त्री, (धि[illegible]
मोहयतीति । लट्[illegible]
४ । ११७ । इति ह[illegible]
वली ॥ २१६ ॥

धीवा, [न्] पुं स्त्री, ([illegible]
संप्रसारणञ्च ।" [illegible]
क्वनिप् । संप्रसारणञ्च[illegible]
धीवरी बहुधीवा । इ[illegible]

धीवरः, पुं, (दधाति मत्स्[illegible]
छ्वरधीवरपीवरेति । [illegible]
ष्वरच् प्रत्ययेन निपात[illegible]
इत्यमरः । १ । १० । १५[illegible]
२ । २० । १७ ।
"यतो हि निम्नं भवति न[illegible]
यतश्चिदं तनधापि नयनो[illegible]

धीवरी, स्त्री, (धीवर + ङी[illegible]
कैवर्त्ती । इति मुग्धबोध[illegible]
इत्युणादिकोषः ॥

धीशक्तिः, स्त्री, (धियः शक्तिः[illegible]
तत्पर्य्यायः । निष्क्रमः १ । इ[illegible]
सा चाष्टधा । यथा,—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धार[illegible]
ऊहापोहार्थविज्ञानं तत्त्वज्ञान[illegible]

धीसखः, पुं, (धियः सखा बा[illegible]
सखिभ्यष्टच् । इति टच् ।) मन्[illegible]
चन्द्रः । ३ । ३८३ ॥

धीसचिवः, पुं, (धियि बुद्धौ
सहायः ।) मन्त्री । इत्यमरः । ॥
धु च न कम्पे । इति कविकल्प[illegible]
सकं-अनिट् ।) च ग, धुनो[illegible]
इह आत्मस्य त्यागः । धुनो[illegible]
धुनोत्यर्थान् वायुरेव [illegible]
दासः ॥

धुः, स्त्री, (धवतीति । धु [illegible]
कम्पनम् । इति [illegible]

धुन, ङ सन्दीपन । [illegible]
दुमः ॥ (भ्वा-आत्म-[illegible]
ङ धुनय[illegible]
[illegible]

(धु + क्त।) शब्द। निपुण। इति ।हे, ८८। (यथा, रघुः। ११। १६।
"धौरेयधुर्यार्द्दहया
निर्गतक्रमा मनोरमा।
धन्यार्द्दि मनागमस्तदा
धृतदेन विलुप्तान्दोलया॥")
ति, (धुनोति वैमनार्दिदन्तीसाहचर्या-
धु कम्पने + बहुलवचनात् तिः स च
) तटी। इत्यमरटीकायां भरतः॥
, ऋग्वेदे। ८। ३०। ३।
"अधोरस्मीरदुधोक्ममये
दिवे दिवे धृवयो दन्धर्षवम्॥"
फलितेवश्मोमुदविकेषु। यथा, तत्रैव।
८१। ८।
धुनिदेव्युनिमतीर्ष्टे कौरम। नीरार-
मदन्ती:॥"
ऊ नं धुनिः कम्पयित्वा धुतुरामसि कतो
ती: कम्पयेनिनतकुरुवती: अथवा धुनि-
च्छनिर्णोदकार्मेषुर:। स एव प्रतिवन्धक-
तां नाद्धैरेन:।" इति तद्भाष्ये
।। कुरयति कम्पयति धुनुतिरिति। मर-
।। यथा, माहात्म्येन हितानाम् ।३।८।१७
धस्य सौमस्य धान्यस्य धुनिस्य॥"
र्वते, त्रि। यथा, ऋग्वेदे। १। ७८। १।
प्रतेवो दनोविचारेरिष्टुर्नुनिर्मल इव
प्रर्यामात्॥")
ति, (धुनि + इन्द्रियारादिति वा ङीष्।)
। इत्यमरः। १।१०।३०॥ (यथा,
गे। ८। ८८। ५५।
निधत: मन्दरेविनताकवतोत्त-
लिपस्य धुनि कर्थधुनीव दिवि॥")
पः, पुं, (धुनीनां नदीनां नाथः।) समुद्रः।
सार्लनिर्घण्टः॥
, पुं, (धुन्धुं धन्धकं राक्षसं मारय-
। मारि + कप्।) कुवलयाश्वराजः। स
इक्ष्वाकुः। इति महापुराणम्॥ (अस्य
नासकथा यथा, हरिवंशे। १२। ३६-५६।
धुन्धुतौ राक्षसेरमहैव महाबल:।
पार्श्वे तुर्ये प्रासात् तस्मे धुन्धुनिवारणे॥
ईश्वरश्च उवाच।
न! मयोऽसत्यवशद् तदयो सम।
पैते हिताकांक्ष! धुन्धुमारी च संश्रयः॥
र्वे पादिवः तदयं रार्जर्षिर्धुन्धुनाश्ये।
ल तस्यैव तस्मे वहितया॥
त्वस्तु प्रयाणां भवेत सह सार्थेव!॥
लङ्घनदिशो धुन्धोस्सस्य मरिष्यते॥
निनसदा विष्णुर्मनीवाविदया विभुः।
के नियोगादूनं लोकानां हितकाम्यया॥
द् भयात् दुर्वशे दिवि शब्दो महानभूत्।
कैनाहृतवतो धुन्धुमारो भविष्यति॥
दिव्यैश्च तं देवाः समन्तात् समवाकिरन्।
दुन्दुभयश्चापि प्रदुर्भवन्तरन्॥

स तस्य तपतां श्रेष्ठस्तदैः सह वीर्यवान्।
सङ्गुरं खानयामास बालुकार्णवमध्ययम्॥
नारायणेन कौरव! तेजसाप्यायित: स वै।
बभूव सुमहातेजा भूयो बलसमन्वित:॥
तस्य पुत्रैः खनद्भिस्तु बालुकान्तर्हितस्तदा।
धुन्धुरासादितो राजन्! दिशमाश्रित्य पश्चिमाम्॥
मुखजेनाग्निना लोकान् संहरन्निव।
वारि सुस्राव वेगेन महोदधिरिवोदये॥
सोमस्य भरतश्रेष्ठ! धारोर्म्मिकलिलं महत्।
तस्य पुत्रकृतं दग्धं त्रिभिरूनन्तु रक्षसा॥
ततः स राजा कौरव! राक्षसं तं महाबलम्।
आससाद महातेजा धुन्धुं धुन्धुनिवर्हणः॥
तस्य वारिमयं वेगमापीय स नराधिपः।
योगी योगेन वह्निञ्च शमयामास वारिणा॥
निहत्य तं महाकायं बलेनोदकराक्षसम्।
उतङ्कं दर्शयामास कृतकर्म्मा महायशाः॥
उतङ्कस्तु वरं प्रादात् तस्मै राज्ञे महात्मने।
अददाच्चाक्षयं वित्तं शत्रुभिश्चापराजयम्॥
धर्म्मे रतिञ्च सततं स्वर्गे वासं तथाक्षयम्।
पुत्राणाञ्चाक्षयाल्लोकान् स्वर्गे ये रक्षसा
हताः॥")

मत्स्यैरु:। स्कन्धः। मर्दालिकः। इति
मेदिनी। रे, २१०॥

धुरन्धर:, पुं, धवदृक्षः। इति रत्नमाला॥
(पर्य्यायोऽस्य यथा,—
"धवो धटो नन्दितरः स्थिरो गौरो धुरन्धरः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
धुरं धरतीति। धृ + खच् + मुम्।) भार-
वाहकादिभारवोढा। तत्पर्य्यायः। धुर्य्यः
२ धुर्यः ३ धौरेयः ४ धुरीणः ५। इत्यमरः।३।
८।६६॥ यथा,—
"धुरन्धरो धुरीणश्च धौरेयधुर्य्यधुर्वहाः।
यत्र कार्यधुरामपि तां कुर्वन्तारमपि वा धुरम्॥
तद्वद्धुरीणः स्यात्तथा चैकधुरीणैव च।
स तु सर्वधुरीणः स्यात् सर्वां वहति यो धुरः॥"
इति शब्दरत्नावली॥
(व्यासिद्धमस्य मन्त्री। स तु कौटिल्येन राजानं
हत्वा स्वयमेव राज्यमकरोत्। यथा, राजा-
वल्याम् २ तरङ्गे।
"व्यासिद्धस्य तदा मन्त्री बहुराज्यमदान्वितः।
धुरन्धराभिधो धीरो वस्तुबुद्धिविलक्षणः॥
देवापत्तौ समीपस्थे धनमानपरायणः।
सहसा च तमाविश्य मारयिष्यसमर्हणम्॥
सहासौ हतवानीशं हत्वा हतमतिस्तदा।
अदात्तं समागत्य राज्यं प्रासादधुरन्धरः॥
मुनिवर्गेनिलयो यन्तुहा भोगाद्धतमानम्।
देवैर्दत्तं हतं राज्ये स्थापयित्वा सर्वं मतः॥"
भारतवर्षेरे:, स तु मत्स्यवंशस्य राज्यविशेषः।
यथा, तै:, रामायणे। ६। ३२। १५।
"स्वर्ग्ये हम्र्ये गताः प्रहस्तस्य महात्मनः।
धुरन्धर: कम्पनश्चर्मं समुत्थायः समुद्धरः।
इति प्रहस्तस्य सर्व्वे समुत्थितास्तु॥")

धुर्य्याइवमात्रे, त्रि॥ (यथा, महाभारते। ३।
१८६। १०।
"अनडुहं सुव्रतं यो ददाति
हलस्य वोढ़ारमनन्तवीर्य्यम्।
धुरन्धरं बलवन्तं युवानं
प्राप्नोति लोकान् दशधेनुदस्य॥"
श्रेष्ठ:। यथा, तत्रैव। १३। १३७। ३१।
"दत्वा तु सततं तेभ्यु कौरवाणां धुरन्धर!।
दानधर्म्मनिधानतुष्टा दृष्टिर्बन्धोपिधारिणी॥")

धुरा, स्त्री, (धुर् + पचे टाप्।) धूः। भारः।
इत्यमरटीकायां भरतः॥

धुरीणः, त्रि, (धुरं वहतीति। "खः सर्व्वधुरात्।"
४। ४। ७८। इत्यत्र योगविभागात् खः।)
भारवाहः। इत्यमरः। ३। ८। ६५॥ (श्रेष्ठः।
यथा, पञ्चतन्त्रे। ३। २०७।
"हे भद्रव्यवहाराणां धुरीण! यथापि मत्कृत-
कर्मणिवालिह्ना खल्वाद्दुतापि यत्र यत्र स्वस्व-
व्यवहारादिषु वसाम॥")

धुरीयः, पुं, (धुरमर्हतीति। छः।) वनवृषभः।
इति राजनिर्घण्टः॥ भारवोढ़ा, त्रि॥

धुर्य्यः, त्रि, (धुरं वहतीति। धुर् + "धुरो यड्-
ढकौ।" ४। ४। ७७। इति यत्। "न भकु-
र्च्छुराम्।" ८। २। ७९। इति न दीर्घः।)
धुरन्धरः। इत्यमरः। ३। ८। ६५॥ (यथा,
रघुः। ५। ६६।
"तमरेकवासन्निव विमलिं धुरविर्णिक-
समा सवानमदधुर्य्यदामवसमी॥"
श्रेष्ठ:। यथा, भागवते। ४। २२। ६८।
"वस्वसु धुर्य्यो महतां संस्थिताध्यात्मशिक्षया॥")
ऋषभौषधी वनवृषभ पुं। इति राजनिर्घण्टः॥
(ऋषभादिरपि। यथा, महाभारते। ३।
१८७। १२। "धुर्य्याणि शाम्ये धुर्य्याणि ब्राह्मण
यामच्छन्। सर्व्वतोय नमो यथारथं यानं
धुर्य्यमदरन् यथ प्राप्यात्॥")

धुर्व्व, इ हिंसे। इति कविकल्पद्रुमः॥ (भ्वा-परं-
सकं-सेट्।) इदित्। धुन्व्यते। धूः धुरौ धुरः। ई, धूर्णः।
किन्तु वार्थं धूर्णः। इति मतीषादिविदासितः।
इति दुर्गादासः॥

धुवका, स्त्री, (धवति धुनः धुवनमस्तीति गीत
कम्पयतीति। धु कम्पने + "कुञ्शिलिसंहदी-
शकृप्रभ्यादि।" उणां २। ३२। इति कुन्।
तत्टाप्।) धुवका। इत्युणादिकोषः॥ धुवा
इति भाषा॥

धुवनः, पुं, (धवतीति। धू + "भूसूधूभ्रस्जिभ्य-
श्छन्दसि।" उणां २। ८०। इति क्युन्।)
अग्निः। इति सिद्धान्तकौमुदी॥ (यथा, ऋग्-
वेदसंहितायां। १३। २। ८। ५।
"ये मही धुवनं मन्दवे॥")

धुविनं, स्त्री, (धुवतीति। धू ... इन्-
मित्यालमावेगनयेदेः ... इत्य-
मरः। २। ७। २३॥

धुस्तूरः, पुं, धुस्तूरः। ... [illegible]

... (धुनोति, कम्पयति चित्तं सेवनेन । धु कम्पने + "खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा° ४ । ९० । इति ऊरः । "धुनोतेः स्तुट् च ।" इत्युज्ज्वलदत्तोक्त्या स्तुट् ।) क्षुपविशेषः । धुतुरा । इति भाषा । तत्पर्य्यायः । उन्मत्तः २ कितवः ३ धूर्त्तः ४ कनकाह्वयः ५ मातुलः ६ मदनः ७ । इत्यमरः । २ । ४ । ७७ ॥ धत्तूरः ८ । इति हेमचन्द्रः ॥ शठः ९ मातुलकः १० श्यामः ११ शिवशेखरः १२ खर्ज्जूघ्नः १३ काहलापुष्पः १४ खलः १५ कण्टफलः १६ मोहनः १७ शलभः १८ मत्तः १९ शैवः २० । इति राजनिर्घण्टः ॥ देविका २१ तूरी २२ महामोही २३ शिवप्रियः २४ धुस्तूरः २५ धुत्तुरः २६ । इति शब्दरत्नावली ॥ अस्य गुणाः ॥ मदवर्णाग्निवातकारित्वम् । ज्वरकुष्ठयूकालिक्षाव्रणश्लेष्मकण्डूक्रमिविषनाशित्वम् । कषायत्वम् । मधुरत्वम् । तिक्तत्वम् । उष्णत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥ कटुत्वम् । कान्तिकारित्वम् । त्वग्दोषखर्ज्जूभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ मूर्च्छाकारित्वम् । वह्निपित्तनाशित्वञ्च । इति राजवल्लभः ॥ (उपविषविशेषोऽयम् । तद्यथा,—

"अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका ।
करवीरकधुस्तूरौ पञ्च चोपविषाणि तत् ॥
अर्कक्षीरं स्नुहीक्षीरं लाङ्गलीकरवीरकम् ।
गुञ्जाहिफेनधुस्तूरौ सप्तोपविषजातयः ॥"

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे ॥)

धू, ञ कम्पे । इति कविकल्पद्रुमः ॥ (भ्वा-उभं-सकं-वेट् ।) ञ चेहापि कम्पेरणमेव । ञ, धवति धवते । धवति चन्दनमञ्जरीचेति हलायुधः । इति दुर्गादासः ॥

..., न ञ गि कम्पे । इति कविकल्पद्रुमः ॥ (भ्वा-क्र्या स्वा-उभं-सकं-वेट् ।) स चेहापि कम्पेरणम् । न ञ, धूनोति धूनुते । गि ञ, धुनाति धुनीते । धूनः धूतिः । धूनोति चम्पककाननीति हलायुधः । धुनाति वायुरश्वत्थम् । ...ोते बन्धूकं तिलकुसुममथवा हि पवनः । ...ति दुर्गादासः ॥

..., क कम्पे । इति कविकल्पद्रुमः ॥ (चुरां-...-प सकं सेट् ।) कम्प इह भावस्य रूपम् । धूनयति मारुतो मालतीलताम् । अधुनीत् । ...ावयति । वायुर्विधूनयति केशरपुष्परेणून् । ...ुराशे हलायुधः । प्रीधूनोतेर्नु वा इत्यत्र ...धातस्य अर्थं गमिति चेन्न । स्वार्थविहि-...ंशादेश समन्वस्य बाध्यत्वात् । अन्यथा ...धि धूनयति इत्यादिप्रयोगा न स्युः । ...ारीणां बाध्या इति चेत् समाधानात् ...यायां तेषां णौ सत्वे कम्पेरणस्य ...ः स्यात् । किञ्च कम्पनार्थे धूनय-...मावत्वमात् नन्तस्थे नकारः ...ुरापायं इह । इति दुर्गा-...

धूः, [र्] स्त्री, (धुर्व्वतीति । धुर्व्व + क्विप् ।) यानमुखम् । रथादेरग्रभागः । इत्यमरः । २ । ८ । ५५ ॥ (यथा, महाभारते । १ । १९६ । २१ ।

"रथात् प्रांशुः पताकाभिः रथाश्च रथधूर्गतः ॥")

भारः । (यथा, रघुः । १ । ३४ ।

"तेन धूर्जगतो गुर्व्वी सचिवेषु निचिक्षिपे ॥")

चिन्ता । इत्येकाक्षरकोषः ॥ (अग्रम् । यथा, रघुः । २ । २ ।

"अपांसुलानां धुरि कीर्त्तनीया ॥"

हिंसके, त्रि । यथा, ऋग्वेदे । १० । ८४ । ७ ।

"इषुधुरो इषयुक्ता बहुसाः ।"

"इषभिर्धूरो धूर्भिर्हिंसितृभिः । तृतीयार्थे प्रथमा ।" इति तद्भाष्ये सायनः ॥)

धूकः, पुं, (धूनोति कम्पयतीति । धू + "अतिय-धूनीभ्यो दीर्घश्च ।" उणा° ३ । ४७ । इति कन् ।) वायुः । इत्युणादिकोषः ॥ धूर्त्तः । कालः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धूतः, त्रि, (धू + क्तः ।) कम्पितः । (यथा, मेघदूते । ३५ ।

"धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्यास्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥")

भर्त्सितः । इति मेदिनी । ते, २८ ॥ त्यक्तः । इत्यमरः । ३ । १ । १०७ ॥ तर्कितः । इति धरणिः ॥

धूनः, त्रि, (धू + "स्वादिभ्यः ।" ८ । २ । ४४ । इति निष्ठातस्य नः ।) कम्पितः । धूधातोः क्तः स्वादित्वात्तस्य नादेशः । इति संक्षिप्तसार-व्याकरणम् ॥

धूनकः, पुं, (धूनयति संधुक्षयति अग्निमिति । धू + णिच् + ण्वुल् ।) वह्निवल्लभः । इति त्रिकाण्डशेषः ॥ धूना इति भाषा ॥

धूननं क्ली, (धू + णिच् + ल्युट् ।) कम्पनम् । काँपान । इति भाषा । इति ण्यन्तधूधातोरनटा साध्यम् ॥ (यथा, राजतरङ्गिण्याम् । ६ । १२ ।

"कुर्व्वाणा भक्तिशीलश्रीनिषेधं मूर्धधूननैः ॥")

धूनिः, स्त्री, कम्पनम् । धूधातोः क्तिस्थाने स्वादित्वान्निः । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

धूप, तापे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) षष्ठस्वरी । धूपायति धूपायते । आय-न्तत्वादुभयपदमिति वोपदेवः । अन्ये तु आय-स्याभावपक्षे परस्मैपदमेव । अधूपीत् दुधूप इत्यादि । तापः सन्तापीकरणम् । इति दुर्गादासः ॥

धूप, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, धूपयति । इति दुर्गादासः ॥

धूपः, पुं, (धूपयति सुगन्धेन प्रीणयित्वा दीप्यतीति । धूप + अच् ।) गन्धद्रव्यविशेषोत्थधूमस्तद्दहनञ्च । तत्पर्य्यायः । गन्धपिशाचिका २ । इति हेमचन्द्रः । ३ । ३९३ ॥ ॥ यथा,—

"एवं वा कथितो दीपो धूपश्च श्रूयतां सखौ ।
नानाविधसुगन्धः सुगन्धोऽतिमनोहरः ॥
दह्यमानस्य काष्ठस्य धूमसौरभस्य वा ।

... परागस्याथवा धू... स धूप इति निर्दि... राशीतैर्नैवेकत्र... श्रोषाधिकर्त्तया तत्... श्रीचन्दन ...

उद्... पीत... नमेरु... सन्तान... इक्षेषु धू... अराच... कर्पूरः श्री... सर्व्वौषधि... जातीकोष... चोदे इति... यत्र धूपो इत्... मन्त्रवाहः पि... अन्योन्ययोगत... एतैर्विधूपयेद्देव... येषां धूपोद्भवेभ्रां... निर्य्यासश्च पराग... कृत्रिमश्चेति पञ्चैते... न यत्र धूमं वितरेत्... न रक्तविद्रुमं मत्र्यं... यत्र धूपः मन्त्रवाहः... लघ्वगुरुः सकर्पूरो... यत्र धूपेन वा देवी म... यत्र धूपेनैव तु दकधूपेने... मेरोरन्यासमायुक्तान् म... परकीयास्तथा प्रातात्... पुष्पं धूपस्य गन्धस्य उपच... घ्रातानिवेद्य देवेभ्यो नरो... न भूमौ वितरेत् धूपं नासने... यथा तथाधारगतं कृत्वा तत्... रक्तविद्रुमशालौ च सुरयः स... सन्तानको नमेरुश्च कालागुरुश्च... जातीकोषादिसंयुक्तो धूपः... त्रिपुरायास्तथैवायं मातृकामपि... सर्व्वेषां पीठदेवानां कान्तादीनाञ्च... एष वां कथितो धूपः मञ्जु तं...

इति कालिकापुराणे ६८...

अपि च ।

"पुष्पाणि च सुगन्धीनि धूपञ्च प्रवरं... गुग्गुलुं कुन्दुरुं चैव देवदारु गु... सिह्लकं चन्दनं काष्ठं श्रीवासं चागुरं... सर्ज्जरसं मत्स्यं चैव देवे चैमे च कर्म्मणि ॥"

इति वह्निपुराणे भोजना...

रोगनाशकधूपो यथा,—

"...

विडालवर्हिकाकाच वराहोष्ट्रकुक्कुट... हंस एषाञ्च विण्मूत्रं मांसं वा रोम... धूपं दद्यात् ज्वरार्त्तस्य उन्मत्तेऽथ...

...न्यान्यधजातानि धूपितानि महेश्वर ! ।
...न्ति रोगजातानि हथमिन्द्राशनिर्यथा ॥"
इति गारुडे १९८ अध्यायः ॥
...यथा,—
...ध्यामवचाव्यनिम्बार्कागुरुदारुभिः ।
...ज्वरहरो धूपः कार्य्योऽयमपराजितः ॥"
...ति चैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
...ङ्गधूपो यथा,—
...गुग्गुल्वगुरुउशीरशर्करामधुचन्दनैः ।
...पेतान्यर्थमिश्रैर्नामैर्देवस्य देशिकः ।"
...श्च ।
...नाज्यमधुसंमिश्रं गुग्गुल्वगुरुचन्दनम् ।
...ङ्गधूपमेतत्तु सर्व्वदेवप्रियं सदा ।"
...ङ्गो यथा,—
"रोगरोगहरोरोगहरेश्वाः
...रवरजतुमयुपत्रविशेषाः ।
...र्क्कविवर्ज्जितवारिजमुद्रा
...धूपवर्त्तिरिह सुन्दरि ! भद्रा ॥"
...श्च ।
...धु मुस्तं घृतं गन्धो गुग्गुल्वागुरुशैलजम् ।
...लं सिद्धसिद्धार्थं दशाङ्गो धूप उच्यते ॥"
...दशाङ्गो यथा,—
...गुरु सरलं दारु पत्रं मलयसम्भवम् ।
...रमुरं कुष्ठं गुडं सर्ज्जरसं घनम् ॥
...तकीं नखीं लाक्षा जटामांसीश्च शैलजम् ।
...दशाङ्गं विदुर्धूपं देवे पित्रे च कर्म्मणि ॥"
इति तन्त्रसारः ॥ * ॥
...ण्डाणां षोड़शाङ्गधूपो यथा,—
...लकं गुग्गुलुः कुष्ठं कर्पूरं मलयोद्भवम् ।
...दारु जटामांसी जातीकोषश्च वालकम् ॥
...मांसी त्वगुरुकं त्वगुशीरश्च केशरम् ।
...ा तथा तेजपत्रं सर्व्वमेतद्घृताक्तकम् ॥
...यं षोड़शाङ्गः स्याद्गोविन्दप्रीतिकारकः ॥"
...दशाङ्गो यथा,—
...गुलुचन्दनं पत्रं कुष्ठञ्चागुरु कुङ्कुमम् ।
...शीरोषश्च कर्पूरं जटामांसी च वालकम् ।
...मोरश्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तितः ॥"
...ङ्गो यथा,—
...र्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम् ।
...रं वालकं पत्रं त्वग्जातीकोषमुत्तमम् ॥
...नेर्द्दशवद्युतं दशाङ्गो धूप ईरितः ॥"
...ङ्गो यथा,—
...गुलमुरकं तेजपत्रं मलयसम्भवम् ।
...रं वालकं कुष्ठं नूतनं कुङ्कुमं तथा ॥
...ङ्गः कथितो धूपो गोविन्दप्रीतिदः शुभः ॥"
...ङ्गो यथा,—
...नं कुङ्कुमं नूनं कर्पूरं गुग्गुलोऽगुरु ।
...यं घृतसंयुक्तः पञ्चाङ्गः समुदाहृतः ॥"
...धूपे वर्ज्जनीयद्रव्यम् । यथा,—
...रं शालनिर्य्यासं मद्भकं सरलञ्च तु ।
...मधुरिका तैलं गन्धकाष्ठं कलमकम् ॥
...कं टङ्कणं तालं हिङ्गुलञ्च मनःशिला ।

कक्कोलमपरं दार्व्वीं गन्धमादी रसाञ्जनम् ॥
अष्टवर्गः शटी मेथी शिलाजिन्मत्स्यचन्दनम् ।
कुङ्कुमं रेणुकं रास्नाजमोदा शतपुष्पिका ॥
हरिद्रा जीरकं कृष्णजीरश्च रक्तचन्दनम् ।
कर्पूरकं मरुवकं यवानी ग्रन्थिकन्तथा ॥
शैलजं धातकीपुष्पं नखी मोचरसादिकम् ।
सुगन्धधूपे देवर्षे ! सर्व्वमेतद्विवर्ज्जयेत् ॥"
इति पाद्मोत्तरखण्डम् ॥

धूपदानविधिर्यथा,—
"मध्यमानामिकाभ्यान्तु मध्यपर्व्वणि देशिकः ।
अङ्गुष्ठाग्रेण देवेशि ! धृत्वा धूपं निवेदयेत् ॥
धूपस्थानं समभ्यर्च्य तर्ज्जन्या वामयास्पृशन् ।
धूपभाजनमन्त्रेण प्रोक्षाभ्यर्च्य क्षुदाणुना
उत्तोल्य दक्षिणेनैव घण्टां वामदिशि स्थिताम् ॥
वादयन् वामहस्तेन दक्षहस्तेन चार्पयेत् ॥"
इति तन्त्रसारः ॥

गन्धमाल्यमदत्त्वा धूपदाने दोषो यथा,—
"अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ।
क्रूपणो जायते भूमे यातुधानो न संशयः ॥
वर्षाणि चैकविंशानि अयस्कारनिवासकः ।
तिष्ठतेऽत्र महाभागे ! एवमेतन्न संशयः ॥"
इति वराहपुराणम् ॥ * ॥

विषघ्नधूपो यथा,—
"सक्तुः सर्ज्जरसोपेतः सर्षपा एलवालुकैः ।
सुवर्णां तस्करतरोः कुसुमैरर्ज्जुनस्य तु ॥
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम् ।
न तत्र कीटा न विषं न दर्दुरसरीसृपाः ॥
न कृत्या कर्म्मणस्तत्र धूपोऽयं यत्र दह्यते ॥" * ॥

सर्पनिर्म्मोचनधूपो यथा,—
"कार्पासास्थिभुजङ्गस्य यथा निर्म्मोचनं भवेत् ।
सर्पनिर्म्मोचनो धूपः प्रशस्तः सततं गृहे ॥"
इति मत्स्यपुराणे १९२ अध्यायः ॥

धूपनः, पुं, (धूपयति संधुक्षयति वह्निमिति । धूप + ल्युः ।) शालवृक्षनिर्यासः । धूना इति भाषा । तत्पर्य्यायः । शालवेष्टः २ सर्ज्जरसः ३ वह्निवल्लभः ४ । इति शब्दमाला ॥ (यथा, मनुः । ७ । २१९ ।
"परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेशाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः ॥"
क्ली, धूप + ल्युट् । धूमादिना सन्धुक्षणम् । यथा, महाभारते । १३ । ९९ । ७ ।
"अग्निकार्य्याणि समिधः कुशाः सुमनसस्तथा ।
बलयश्चान्नशाखाभिर्धूपनं दीपकर्म्म च ॥")

धूपवृक्षः, पुं, (धूपोत्पादको वृक्षः ।) सरलवृक्षः । इति त्रिकाण्डशेषः ॥ (सरलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

धूपवृक्षकः, पुं. (धूपवृक्ष + स्वार्थे कन् ।) सरलवृक्षः । इति शब्दरत्नावली ॥

धूपागुरु, क्ली, (धूपाय सन्धुक्षणाय यदगुरु ।) दाहागुरु । इति राजनिर्घण्टः ॥

धूपाङ्गः, पुं, (धूपसाधनमङ्गं यस्य ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥

धूपायितः, त्रि, (धूप्यते स्मेति । धूप सन्तापे + "आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ इति आयः । ततः क्तः ।) सन्तप्तः । अध्वादिना श्रान्तः । इत्यमरभरतौ ॥ दत्तधूपगृहादि । यथा, तन्त्रप्रमोदे ।
"प्रदीपपरिदीपिते विविधधूपधूपायिते ॥"

धूपार्हं, क्ली, (धूपाय अर्ह्यते पूज्यते इति । अर्ह पूजायाम् + घञ् ।) कृष्णागुरु । इति राजनिर्घण्टः ॥ धूपयोग्ये, त्रि ॥

धूपितः, त्रि, (धूप्यते स्मेति । धूप + क्तः ।) सन्तापितः । (यथा, हरिभक्तिविलासे ।
"ततो गन्धपवित्रञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥")
अध्वादिना श्रान्तः । इत्यमरभरतौ ॥ दत्तधूपः । यथा,—
"यवादिना दोहदधूपितो द्रुमः ।"
इति वृक्षायुर्वेदः ॥

धूमः, पुं, (धूनोति धूयते वा । धू ञ कम्पे + "इषियुधीन्धीति ।" उणां १ । १४४ । इति मक् ।) आर्द्रेन्धनप्रभवः । धूँया इति भाषा । तत्पर्य्यायः । भस्मः २ मरुद्वाहः ३ खतमालः ४ शिखिध्वजः ५ अग्निवाहः ६ तरी ७ । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । ७ । २६ ।
"हविःशमीपल्लवलाजगन्धी
पुण्यः कृशानोरुदियाय धूमः ॥")
अस्य गुणः । वातपित्तवृद्धिकारित्वम् । इति राजवल्लभः ॥ स च मेघाञ्जनयोर्जनकः ॥ (यथा, मेघदूते । ५ ।
"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः ॥"
भीमादिवद्गुत्तरपदलोपे धूमकेतुः । यथा, गर्गः ।
"उल्कापाते च त्रिदिनं धूमे पञ्चदिनानि च ॥"
उद्गारजवायुविशेषः । चोंया ढेँकुर इति भाषा ॥ यथा, आह्निकतत्त्वधृतवचनम् ।
"धूमोद्गारे तथा वान्ते क्षुरकर्म्मणि मैथुने ॥"
चिकित्साविशेषः । यथा,—
"श्वेता ज्योतिष्मती चैव हरितालं मनःशिला ।
गन्धाश्चागुरुपत्राद्या धूमो मूर्द्धविरेचनम् ॥
गौरवं शिरसः शूलं पीनसार्द्धावभेदकौ ।
कर्णाक्षिशूलं कासश्च हिक्काश्वासौ गलग्रहः ॥
दन्तदौर्ब्बल्यमास्रावः स्रोतोघ्राणाक्षिदोषजः ।
पूतिघ्राणास्यगन्धश्च दन्तशूलमरोचकः ॥
हनुमन्याग्रहः कण्डूः क्रिमयः पाण्डुता मुखे ।
श्लेष्मप्रसेको वैस्वर्य्यं गलशुण्ड्युपजिह्विका ॥
खालित्यं पिञ्जरत्वञ्च केशानां पतनन्तथा ।
क्षवथुश्चातितन्द्रा च बुद्धेर्मोहोऽतिनिद्रता ॥
धूमपानात् प्रशाम्यन्ति बलं भवति चाधिकम् ।
शिरोरुहकपालानामिन्द्रियाणां स्वरस्य च ॥"
"पीत्वा भुक्त्वा स्नात्वा छर्द्दित्वा दन्तान् निघृष्य च ।
नावनाञ्जननिद्रान्ते चात्मवान् धूमपो भवेत् ॥
तथा वातकफात्मको न भवत्यूर्द्ध्वजत्रुजाः ।
रोगास्तस्य तु पेयाः सुरामानाक्षिरछ्वदस्य ॥

परं द्विकालमायो स्यादस्तः कालेन शुद्धिमान् ।
प्रयोगे चैद्दिके मेकं वैरेचं शिरसा पिबेत् ।
अनुक्लेनियमं शुद्धिसंधूमं शिरसः क्रमः ।
धर्मरिमाणां रोगाणां सम्यक् पीतस्य लक्षणम् ।
धार्षयंमाणं मृदुलं रक्तपित्तं शिरोभ्रमम् ।
कुर्यात् पानिनीतस्य धूमः कुर्यादुपद्रवान् ।"
"न विरिक्तः पिबेद्धूमं न कृते बस्तिकर्मणि ।
न रक्ती न विषार्त्तो न शोची न च गर्भिणी ।
न श्रान्तो न मदे नामे न निशि न प्रजागरे ।
न मूर्च्छाभ्रमतृष्णासु न चीणे नापि च चते ।
न मद्यदुग्धे पीत्वा च न स्नेहं नच माक्षिकम् ।
धूमं न भुक्ता दध्ना च न रूक्षः क्रुद्ध एव च ।
न तालुशोषे तिमिरे शिरस्यभिहते न च ।
न शङ्खके न रोहिण्यां न मेहे न मदात्यये ।
एषु धूममकालेषु मोहात् पिबति यो नरः ।
रोगास्तस्य प्रवर्द्धन्ते दारुणा धूमविभ्रमात् ।"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ।
"धूमः पञ्चविधो भवति तद्यथा, प्रायोगिकः स्नैहिको वैरेचनः कासघ्नो वामनीयश्चेति । तत्रैलादिना कुष्ठतगरवर्ज्जेन [illegible] [illegible]
[illegible]

धूमकेतुपदः । इति मेदिनी । ते, १९८ ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ८२ ।
"द्रमयः शङ्करो नित्यं वर्चस्वी धूमकेतनः ।")
धूमकेतुः, पुं, (धूमः केतुश्चिह्नं यस्य ।) वह्निः । (यथा, महाभारते । १ । १०३ । १७ ।
"प्रभां सहनृपश्रेष्ठौ धूमकेतुस्थयोद्गताम् ।")
उत्पातविशेषः । स धूमाभा तारका । इत्यमरभरतौ ॥ (यथा, कुमारे । २ । ३२ ।
"भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥")
ग्रहभेदः । इति त्रिका० ॥ * ॥ केतवश्च त्रिसाप्तानि ज्योतींषि स्थिराण्युत्पातरूपाणि । तदुदये कालाशुद्धिर्यथा,—
"धूमकेतौ सहनृपते ग्रहणे चन्द्रसूर्ययोः ।
ग्रहाणां सङ्गरे चैव न कुर्यान्मङ्गलक्रियाम् ॥
उल्कापाते च त्रिदिनं धूमे सप्त दिनानि च ।
वज्रपाते दिनञ्चैकं वर्ज्जयेत् सर्वकर्मसु ॥"
इति गार्ग्यवचनम् ॥
भोजराजः ।
"पञ्च रवीन्द्वोर्ग्रहयोः प्रकम्पे
केतूद्गमोल्कापतनादिदोषे ।
अतो दशाहानि वदन्ति तज्ज्ञा-
स्त्र्योदशाहानि वदन्ति केचित् ॥
ययकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्ययोः ।
प्रयाणन्तु त्यजेत् प्राज्ञः सप्तरात्रमतःपरम् ॥
मासाय: [illegible] कर्म त्रिरात्रकम् ।
गृहस्थस्त्वेकरात्रं सर्वकर्म समाचरेत् ॥"
इति मलमासतत्त्वम् ॥
अथ केतूनां संख्यानम् ।
"शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ॥"
तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोडश रूपुनिश्वासजाः । द्वादशादित्यसम्भवाः । दश दशमारविमयजे ब्रह्मकोपजाः । अब्जै पैतामहाः । चतुर्दश वर्षे वौद्दालकस्य पुत्राः । सप्तदश मरीचिकश्यपललाटजाः । पञ्च च प्रावापनिसदनाः । नवो विभावसुताः । धूमोद्भवश्चैकः । चतुर्दश मध्यमाने-रुत्तो सोमेन सह सम्भूताः । एकस्तु ब्रह्मकोपजः ।" * । गर्गादयः सहस्रं वदन्ति । तथा च गर्गः ।
"ऋषिभ्योऽस्यपाराधामनुभावाय दर्शनम् ।
धावन्तः सहस्रं ज्ञात्वा महतां संविशेष ते ।"
नारदाद्यो मुनिरेकमेव केतुं बहुरूपं प्राह । यथा,—
"दिव्यान्तरीक्षभौमस्य एकः केतुः प्रकीर्त्तितः ।
शुभाशुभफलं लोके ददात्युदयमनोदये ।"
तत्र धूमकेतुलक्षणम् ।
"दर्शयन्तरीक्षमन्दो न शुभकारी धूमकेतुरुपगः ।
[illegible]
"[illegible]
[illegible] स धूमकेतुः

स च न शुभ[illegible]
सदृशो न [illegible]
त्रिसाच विशे[illegible]
संहितायाम् । [illegible]
स्निग्धमूर्त्तिरदृ[illegible]
लौकस्याभावाय [illegible]
शुक्रचापसङ्काशः [illegible]
संस्थश्च मृत्युकरः [illegible]
संहिताटीका ॥ ([illegible]
सतास्ववेदके । ६ । [illegible]
"पुष्करद्वीपे महावर्षे [illegible]
धूमकेतुरिति ख्यातः [illegible]
तथाच युक्तिकल्पतरौ [illegible]
"इलावृते महावर्षे एक[illegible]
धूमकेतुरिति ख्यातः स [illegible]
महादेवः । यथा, महा[illegible]
"धन्वन्तरिर्धूमकेतुस्कन्दो [illegible]
धूमगन्धिकं, क्ली, (धूमस्येव [illegible]
इत् । ततः स्वार्थे कन् ।) [illegible]
भावप्रकाशः ॥
धूमजाङ्गलं, क्ली, (धूमस्य [illegible]
जाङ्गलं यथं तमान्यानी [illegible]
वज्रक्षारम् । इति राजनिर्घ[illegible]
धूमध्वजः, पुं, (धूमः ध्वजश्चिह्नं [illegible]
इति हेमचन्द्रः । ४ । १६१ । [illegible]
दर्शनघंयदे पार्श्वाकरणे ।
"कथमन्यथा धूमोपगमनमानन्द [illegible]
यता प्रशस्तियपदीन ।")
धूमप्रभा, स्त्री, (धूमस्य प्रभा । [illegible]
धूमान्धकारबहुल: । [illegible]
धूममहिषी, स्त्री, (धूमस्य महिषी [illegible]
भटी । इति त्रिकाण्डशेषः ।
धूमयोनिः, पुं, (धूम इव [illegible]
यस्य ।) मेघः । [illegible]
चिन्तामणिधृतवचने ।
"यद्धूमोद्गत [illegible]
दावाग्निधूमसमसमर्धं [illegible]
स्तनधूमोद्गते [illegible]
धाभिचाराग्निधूमोत्थं [illegible]
तजलः । इत्यमर. ।
धूमलः, पुं, [illegible]
[illegible]
"[illegible]
[illegible]
तदुक्तं [illegible]
धूमसंहति [illegible]
[illegible]
धूमसी स्त्री, [illegible]
"[illegible]
[illegible]

(धूमस्य आभा इव आभा यस्य।) ... इति शब्दमाला। मद्यति, त्रि।

...स्त्री, ...

... यथा,—

"... दीर्घा च ...

...

...

...

...

...

... ॥"

इति ...सारः।

... यथा, ...

... धूमावगाहितः।

... प्रोक्तो वैदिक...कारकः।"

... धूमावती भाषा।)

... स्त्री, (धूम इव ...

... धूम+टन्। स्त्रियां टाप्।) ...

... इति त्रिकाण्डशेषः। (...विशेषः।

... इति भाषा। तद्यथा,—

"...

... ॥"

इति ... ध्याये।)

... स्त्री. (धूमादुत्थिता ... मिति।

... धूमयोनिमेधेनीनुपक्रम...

... ।) ... इति

... । (धूमोत्थिते, त्रि।)

... स्त्री, यमपत्नी। इति त्रिकाण्डशेषः।

... महाभारते। १३। १६५। ११।

"... धूमोर्णया सह।

... च महर्षीश्च धनेश्वरः॥")

...ति, पुं, (धूमोर्णायाः पतिः।) यमः।

...रत्नावली। ५७॥

...स्त्री, (धूमानां समूहः इति। धूम+ ...

... ।) धूमसमूहः। इत्यमरः। ३।२।४३॥

... पुं, (धूम्रा इव अटतीति। अट+अच्।)

... । भिङ्गा इति भाषा। तत्पर्य्यायः।

... २ ... ३। इत्यमरः। २। ५। १६॥

... पुं, (धूमं धूम्रवर्णं राततीति। रा+कः।

...रादित्वात् साधुः।) श्यामरक्तमिश्रित-

...। तत्पर्य्यायः। धूमलः २ कृष्णलोहितः ३।

... त्रि। इत्यमरः। १। ५। १६। (यथा,

... ११। १६।

"... व्यालावधुमितीरकः।

...")

... इति राजनिर्घण्टः। (असुरविशेषः।

... हरिवंशे। २३२। ८।

"... धूम्रश्चैव महासुरः।"

... सैनिकविशेषः। यथा, महाभारते।

... ६२।

"... सैनिकाः॥"

"... सदा॥")

धूम्रकः, पुं, (धूम्रवर्णेन कायतीति। कै+कः।) उष्ट्रः। इति जटाधरः॥

धूम्रपत्रा, स्त्री, (धूम्रं धूम्रवर्णं पत्रं यस्याः। अजादेराकृतिगणत्वात् टाप्।) क्षुपविशेषः। तत्पर्य्यायः। धूम्राह्वा २ सुलभा ३ स्वयम्भुवा ४ गृध्रपत्रा ५ क्षमाणी ६ क्षमिणी ७ श्रीमता-मघा ८। अस्या गुणाः। रसे तिक्तत्वम्। शोफपलितकासवातापित्वम्। उष्णत्वम्। कफ-त्वम्। अग्निदीपनकारित्वञ्च। इति राज-निर्घण्टः॥

धूम्रमूलिका, स्त्री, (धूम्रं मूलमस्याः। कप्। टापि अत इत्वम्।) नूलीतृणम्। इति राजनिर्घण्टः॥

धूम्रलोचनः, पुं, (धूम्रे लोचने यस्य) कपोतः। इति राजनिर्घण्टः॥ शुम्भासुरसेनापतिः। यथा, मार्कण्डेयपुराणे। ८६। ३।

"हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम्॥"

धूम्रवर्णः, पुं. (धूम्रं वर्णमस्य।) तुरुष्कः। इति राजनिर्घण्टः॥ (पर्व्वतविशेषः। यथा, हरि-वंशे। २२८। ७३।

"देवाहत्पर्वतश्चैव तथा वै वासुकी गिरिः।
क्रौञ्चः सप्तर्षिशैलश्च धूम्रवर्णश्च पर्व्वतः॥")
कृष्णलोहितवर्णयुक्ते, त्रि॥ (यथा, महा-भारते। ३। २८३। २६।

"कृशाया धूम्रवर्णाया तिस्रः कोट्यो व्यव-
स्थिताः॥")

धूम्रवर्णा, स्त्री, (धूम्रं वर्णमस्याः टाप्।) वह्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषः। इति जटाधरः॥ (यदुक्तं मुण्डकोपनिषदि। २। ४।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः॥")

धूम्रा, स्त्री. (धूम्र+टाप्।) शशाण्डुली। इति राजनिर्घण्टः॥ (धरनामवसोर्माता यथा, महाभारते। १। ६६। १८।

"धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा॥")

धूम्रिका, स्त्री शिंशपावृक्षः। इति राजनिर्घण्टः॥

धूर, ई ष य वधे। गत्यां। इति कविकल्पद्रुमः॥ (दिवा-आत्म-सकं-सेट्।) दीर्घी। ई, धूर्यः। ष य, धूर्य्यते। इति दुर्गादासः॥

धूर्जटिः, पुं, (धूः भारभूता जटा यस्य। यद्वा, जट संघाते+इन्। धूर्गङ्गा जटिष्वस्येति। धुर-स्त्रैलोक्यचिन्ताया जटिः संघातो यत्र वा।) शिवः। इत्यमरः। १। १। ३५॥ (यथा, भाग-वते। ४। ५। २।

"क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटि-
र्जटां तडिद्वह्निसटोग्ररोचिषम्॥")

धूर्त्तं, क्ली, (धूर्व्वतीति। धूर्व्व+"हसिमृग्रिण्वा-" इत्यादिना तन्।) उणा० ३। ८६। इति तन्।) विड्लवणम्। इति राजनिर्घण्टः॥ लौहकिट्टम्। इति हेम-चन्द्रः। ३। ४०॥

धूर्त्तः, पुं, (धूर्व्वति हन्तीति। धूर्व्व+तन्।) धुस्तूर-वृक्षः। इति मेदिनी। ते, २८॥ चोरकः। इति राजनिर्घण्टः॥ (शठवचनम्। इति विश्वः। ते, २२॥)

धूर्त्तः, त्रि, (धूर्व्वति हिनस्तीति। धूर्व्व+"हसि-मृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्।" उणा० ३। ८६। इति तन्।) द्यूतकृत्। वञ्चकः। शेषस्य पर्य्यायः। मायी २। इति हेमचन्द्रः। ३। १४८॥ विटः ३। इति मेदिनी। ते, २८॥ (यथा, महाभारते। ४। ६। १२।

"प्रिया हि धूर्त्ता मम देविनः सदा
भवांश्च देवोपम! राज्यमर्हति॥"

यथा च पञ्चतन्त्रे। ३। ७३।

"नराणां नापितो धूर्त्तः पक्षिणां चैव वायसः।
दंष्ट्रिणाञ्च शृगालश्च श्वेतभिक्षुस्तपस्विनाम्॥"

धूर्त्तकः, पुं, (धूर्त्त+कन् स्वार्थे।) शृगालः। इति शब्दरत्नावली॥ धूर्त्तश्च॥ (नागभेदः। यथा, महाभारते। १। ५७। १३।

"बाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम्॥")

धूर्त्तकृत्, पुं, (धूर्व्व+भावे तन्। धूर्त्तनं हिंसनं करोतीति। कृ+क्विप्। तुगागमश्च।) धुस्तूरः। इति शब्दमाला॥ वञ्चककारके, त्रि॥

धूर्त्तजन्तुः, पुं. (धूर्त्तश्चासौ जन्तुश्चेति।) मानुषः। इति शब्दचन्द्रिका॥

धूर्त्तमानुषा, स्त्री, (धूर्त्ता हिंसिता मानुषा येन-येति।) रास्ना। इति शब्दचन्द्रिका॥

धूर्द्धरः, पुं, (धरतीति। धृ+अच्। धुरां धरः। पृषोदरादित्वात् दीर्घः।) धुरन्धरः। इत्यमर-टीकायां रमानाथः॥

धूर्व्वहः, त्रि, (वहतीति। वह्+अच्। धुरां वहः। पृषोदरादित्वात् दीर्घः।) धुरन्धरः। इत्यमरः। २। ९। ६५॥

धूर्व्वी, स्त्री, (धुरं वनतीति। वन+क्विप्। ततः अन्तो वीभावः।) रथाग्रभागः। तत्पर्य्यायः। यानमुखम् २ वधूः ३। इति हेमचन्द्रः। ३। ४२१॥

धूलकं, क्ली, (धू+बाहुलकात् लकः।) विषम्। इति शब्दचन्द्रिका॥

धूलिः, स्त्री, (धुवति धूयते वेति। धू+बाहुल-कात् लिः।) पार्थिवचूर्णम्। धूला इति भाषा। (यथा, भागवते। ३। १४। २४।

"श्मशानचक्रानिलधूलिधूम्र-
विकीर्णविद्योतजटाकलापः।
भस्मावगुण्ठामलरुक्मदेहो
देवस्त्रिभिः पश्यति देवरस्ते॥")

तत्पर्य्यायः। रेणुः २ पांशुः ३ रजः ४। इत्य-मरः। २। ८। ९८॥ धूली ५ पांशुः ६। इति भरतः॥ क्षितिकणः ७ चौर्णः ८ चूर्णम् ९ तूलम् १० महीरजः ११ वातकेतुः १२ नभः-केतुः १३ कणा १४ क्षितिरजः ... इति शब्दरत्नावली॥ ...

दीपसद्वातनुच्छायाछिन्नकेशनखादिकम् ।
अजमार्जाररेणुश्च हन्ति पुण्यं पुराकृतम् ॥"
इति कर्म्मलोचनः ॥
"अजरजः खररजस्तथा सम्मार्ज्जनीरजः ।
स्त्रियः पादरजो राजन् ! शक्रादपि हरेत् श्रियम् ॥"
इति लक्ष्मीचरित्रम् ॥

धूलिका, स्त्री, (धूलिरिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५।३।९६ । इति कन् । टाप् ।) कुज्झटिका । इति शब्दरत्नावली ॥ (नीहारः । यथा, नीहारे बाणयन्त्रे चेति इत्यत्र नीहारे धूलिकायामिति मनुटीकायां कुल्लुकभट्टः ॥)

धूलिकेदारः, पुं, (धूलिप्रधानः केदारः । इति मध्यमोपिसमासः ।) वप्रः । चेत्रम् । इति त्रिकाण्डशेषः ॥

धूलिगुच्छकः, पुं, (धूलीनां गुच्छक इव । इवार्थे कन् ।) पटवासकः । फल्गुचूर्णम् । इति त्रिकाण्डशेषः ॥

धूलिध्वजः, पुं, (धूलिरेव ध्वजो यस्य ।) पवनः । इति त्रिकाण्डशेषः ॥

धूलिपुष्पिका, स्त्री, (धूलिः परागस्तत्प्रचुरं पुष्पं यस्याः । कापि अत इत्वम् ।) केतकी । इति राजनिर्घण्टः ॥

धूलीकदम्बः, पुं, (धूलीनां कदम्बमत्र ।) नीपः । निम्बः । वकनद्रुमः । इति मेदिनी । बे, १० ॥ (धूलिसमूहे, स्त्री ॥)

धूलीकदम्बकः, पुं, (धूलीकदम्ब + स्वार्थे कन् ।) नीपः । इति जटाधरः ॥

धूलीपटलः, पुं, (धूलीनां पटलं यत्र ।) उड्डीयमानधूलीसमूहः । यथा, धूलीपटले धूमलश्रमे मनाक्सना धूमलेन । इत्यादि सामान्यलक्षणायां शिरोमणिः ॥ (धूलीसमूहे, स्त्री ॥)

[illegible]धूम, क कान्तिकृतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) अङ्कसरी । कान्तिकृतिः शोभितकरणम् । वस्त्रं धूमयत्यङ्गम् । इति दुर्गादासः ॥

[illegible], क धूमे । इति कविकल्पद्रुमः ॥ (चुरां परं-सकं सेट् ।) अङ्कसरी । धूमः कान्तिकृतिः । वस्त्रं धूमयत्यङ्गम् । इति दुर्गादासः ॥

[illegible] क धूमे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) अङ्कसरी । धूमः कान्तिकृतिः । धूसयत्यङ्गं चन्दनः । महिषधूसरितः सरि[illegible]तमिति वाचस्पतिरदयनकाद्ध्यात्म [illegible] [illegible] रमामाद्यः । समन्ते तापयमङ्गन्यामतो [illegible]म् । इति दुर्गादासः ॥

[illegible], (धूसयतीति । धू + "कृधूमदिभ्यः किन्," [illegible] । ७३ । इति सरन् । स च किन् ।) [illegible]वर्णः । तद्वति, त्रि । इत्यमरः । १ । [illegible] ॥ (यथा, रघौ । ११ । ६० ।
"[illegible]रैरविरलैरधूसराणताः
[illegible]रधिराक्तशासनः ।")
[illegible]भः । कपोतः । इति राजनिर्घण्टः ॥
[illegible] इति हेमचन्द्रः । ६ । २८ । ७ ॥

धूसरवस्तूनि यथा । धूलिः १ लूता २ करभः ३ गृहगोधिका ४ कपोतः ५ धूषिकः ६ रङ्गम् ७ काककण्ठः ८ खरादिः ९ । इति कविकल्पलता ॥

धूसरच्छदा, स्त्री, (धूसर ईषत् पाण्डुवर्णश्छदो यस्याः ।) श्वेतवुह्ना । इति रत्नमाला ॥

धूसरपत्रिका, स्त्री, (धूसरं पत्रमस्याः । ङीप् । स्वार्थे कन् । टापि पूर्व्वह्रस्वः ।) हस्तिशुण्डीक्षुपः । इति राजनिर्घण्टः ॥

धूसरा, स्त्री, (धूसर + टाप् ।) पाण्डुरफलीक्षुपः । इति राजनिर्घण्टः ॥

धूसरी, स्त्री, (धूसर + ङीप् ।) किन्नरीभेदः । इति मेदिनी । रे, १० ॥

धूस्तूरः, पुं, (धूस् कान्तिकरणे + भावे क्विप् । सं तूर्य्यते हिनस्तीति । तुर हिंसे + "इगुपधज्ञेति," ३ । १ । १३५ । इति कः ।) धूस्तूरवृक्षः । इत्यमरटीकायां भरतः ॥

धृ, क धृत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-अनिट् ।) क, धारयति । इति दुर्गादासः ॥

धृ, ङ अवध्वंसे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) अवध्वंसः पतनम् । ङ, धरते पत्रं इत्यात् । गोविन्दभट्टस्तु अविध्वंसने इति पठित्वा विध्वंसनं ध्वंसनं तस्याभावोऽविध्वंसनं स्थापनमिति व्याख्याति । इति दुर्गादासः ॥

धृ, ङ य स्थितौ । धृतौ । इति कविकल्पद्रुमः ॥ (तुदां-आत्मं-स्थितौ अकं-धृतौ सकं-अनिट् ।) ङ य, ध्रियते । इति दुर्गादासः ॥

धृ, ञ धृत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-अनिट् ।) ञ, धरति धरते । इति दुर्गादासः ॥

धृण, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) धर्णति । इति दुर्गादासः ॥

धृण, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । इदित् ।) सप्तमस्वरी । इ, धृञ्जति । इति दुर्गादासः ॥

धृतः, त्रि, धृधातोः कर्म्मणि कर्त्तरि च क्तप्रत्ययेन निष्पन्नः ॥ धारणविशिष्टः । धरा इति भाषा । (यथा, महाभारते । १ । ७४ । १०३ ।
"अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥")
अवध्वस्तः । पतित इति यावत् । स्थितः । (स्थिरीकृतः । निश्चितः । यथा, महाभारते । ७ । १६ । १८ ।
"धृतो धनञ्जयवधे प्रतिज्ञाश्चापि चक्रिरे ।"
पु, त्रयोदशमनो रौच्यस्य पुत्रविशेषः । यथा, हरिवंशे । ७ । ८२ ।
"चित्रसेनो विचित्रश्च नयो धर्म्मभृतो धृतः ।
सुनेत्रः क्षत्रवृद्धश्च सुनयो निर्भयो दृढः ।
रौच्यस्यैते मनोः पुत्रा अन्तरे तु त्रयोदशे ॥"
द्रुह्युवंशीयबभ्रोः पुत्रः । यथा, भागवते । ९ । २३ । १४ ।)

"दृष्टोऽथ तनयो[illegible]
आरभ्यतस्य गा[illegible]

धृतराष्ट्रः, पुं, (धृतं [illegible] स जन्मान्धः धा[illegible] व्यासाज्जातः । इति[illegible] (अयं हि गन्धर्व[illegible] यथा, महाभारते । [illegible]
"अरिष्टायास्तु यः पु[illegible]
स गन्धर्वपतिर्जज्ञे कु[illegible]
सुराणां । नागभेदः । [illegible] (यथा, महाभारते । २[illegible]
"कम्बलाश्वतरौ नागौ
पक्षिभेदः । इति त्रिकाण्ड[illegible] विशेषः । यथा, विष्णुपुराणे [illegible]
[illegible]
बलिराजस्य पुत्रविशेषः । यथा[illegible] ७४ ।
"बलेः
धृतराष्ट्रश्च सूर्यश्च
जनमेजयस्य ज्येष्ठपुत्रः । यथा, [illegible] १ । ९४ । ५४ ।
"जनमेजयस्य
धृतराष्ट्रः प्रथमजः

धृतराष्ट्री, स्त्री, (धृतराष्ट्रस्य पत्नी । [illegible] पत्नी । इति मेदिनी । रे, २७२ । [illegible] भारते । १ । ६६ । ५७, ५८ ।
"काकीं श्येनीं तथा
[illegible]
ताभ्यां तु उत्प[illegible]
"धृतराष्ट्री तु [illegible]
चक्रवाकांश्च भ[illegible]
हंसपदीलता । [illegible]

धृतिः, पुं, (ध्रियते [illegible] नात पुंस्त्वम् ।) [illegible] (विश्वेदेवविशेषः । [illegible] ९१ । ३० ।
"बलं धृतिर्विनामा [illegible]
यदुवंशीयनृपविशेषस्[illegible]
हरिवंशे । ३१ । ५५ ।
"विजयस्य धृतिः पुत्र[illegible]
निमिवंशीयानामेकतमः [illegible] १३ । २६ ।
"सुनक्षत्रसुतो यस्य धीत[illegible]
यदुवंशीयबभ्रोः पुत्र । [illegible] ४ । १२ । १५ । "रोमपादा[illegible] धृतिः ॥")

धृतिः, स्त्री, (धृ + क्तिन् [illegible] ६ । ९२ ।
"धृतिः नामा [illegible]
धौर्भिद्या [illegible]
योगभेदः । धैर्य्यम् । यथा, [illegible] याम् । ३४ । ३ ।

[illegible] ॥")

[illegible] इति [illegible] ॥

[illegible] इति कौषीतकी [illegible] ॥

[illegible] यथा,—

[illegible]

इति [illegible] ॥

[illegible], स्त्री, (धृषद् + "इगुपधात् कित् ।" [illegible]) [illegible] इति [illegible] ॥

[illegible] [ज्] पुं, (धृष्णोति । धृष + "कौटुभि [illegible]" [illegible] इति कनिन् ।) [illegible] इति [illegible] ॥

[illegible] इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) [illegible] धर्षति धर्षति । [illegible] इति अङ्कसारः । [illegible] इति दुर्गादासः ॥

[illegible] उ संहतौ । हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-हिंसे सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, धर्षित्वा धृष्ट्वा । संहतिः । [illegible] इति दुर्गादासः ॥

[illegible], क ङ प्रसहने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) प्रसहनम् अभिभवः । क ङ, धर्षयते वह्निं पयः । इति दुर्गादासः ॥

[illegible] क्ष न प्रागल्भ्ये । इति कविकल्पद्रुमः ॥ (स्वां-परं-अकं-सेट् ।) त्रि, धृष्टोऽस्ति । क्ष, धर्षितं धृष्टं तेन । न, धृष्णोति गुरोरग्रे यः । [illegible] इति रमानाथः । इति दुर्गादासः ॥

[illegible] पुं (धृष्णोतीति । धृष + "पृभिदिव्यधिगृधिधृषिहृषिभ्यः ।" उणां १ । २४ । इति कुः ।) दक्षः । इत्युणादि कोषः । संघातः । प्रगल्भः । इति संक्षिप्तसारोणादिवृत्तिः ॥

[illegible], त्रि, (धृष + क्तः ।) प्रगल्भः । इति मुग्धबोधव्याकरणम् ॥ (यथा, भागवते । ५ । १२ । ७ ।

"[illegible]
[illegible] प्रशस्य भृत्यः ॥")

निर्लज्जः । तत्पर्यायः । प्रगल्भः २ वियातः ३ । इत्यमरः । ३ । १ । २५ ॥ धृष्णुः ४ धृष्णक् ५ । इति जटाधरः । धर्षितः ६ । इति शब्दरत्नावली ॥ कृतविप्रियमप्यशङ्कितपतिविशेषे, पुं । तस्य लक्षणं यथा, "कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः । दृष्टदोषोऽपि मिथ्यावाग्धृष्टो नायकः स्मृतः ॥" इति रसमञ्जरी ॥ (कौशिकीयवृष्णेः पुत्रः । यथा, हरिवंशे । ३६ । २४ ।

"कुन्तेर्धृष्टः सुतो जज्ञे रम्यरथः प्रतापवान् ॥"

वैवस्वतमनोः पुत्रविशेषः । यथा, भागवते । ८ । १३ । २ ।

"मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ।
सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ॥"

धृष्टिरिति क्वचित् दृश्यते ॥)

धृष्टा, स्त्री, (धृष्यते स्मेति । धृष प्रागल्भ्ये + क्तः । टाप् ।) असती । इति शब्दरत्नावली ॥

धृष्णक्, [ज्] त्रि, (धृष्णोतीति । धृष प्रागल्भ्ये + "ऋत्विग्दधृक् ।" ३ । २ । ५९ । इत्यत्र "धृष्णक् ।" इति कान्तनिपातनैर्न सिद्धम् ।) निर्लज्जः । इत्यमरः । ३ । १ । २५ ॥

धृष्णिः, पुं, (धर्षति अभिभवति अन्धकारमिति । धृष प्रसहने + बाहुलकात् निः । स च कित् ।) किरणः । इत्यमरः । १ । ३ । ३३ ॥

धृष्णुः, त्रि, (धृष्णोतीति । धृष + "त्रसिगृधिधृषिक्षिपेः क्नुः ।" ३ । २ । १४० । इति क्नुः ।) धृष्टः । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे । ६ । २५ । ५ ।

"न हि त्वा शूरो न तुरो न धृष्णु-
र्न त्वा योधो मन्यमानो युयोध ॥")

पुं, रश्मिका । इति शब्दचन्द्रिका ॥ (वैवस्वतमनुपुत्रः । यथा, हरिवंशे । १० । १ ।

"मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः ।
इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्यातिरेव च ॥"

सावर्णस्य मनोः पुत्रविशेषः । यथा, तत्रैव । ७ । ६० ।

"वरिष्णुरार्यो धृष्णुश्च राजः सुमतिरेव च ।
सावर्णस्य मनोः पुत्रा भविष्या दश भारत ! ॥"

चन्द्रवंशीयकुकुरराजस्य सुतः । यथा, तत्रैव । ३७ । १८ ।

"कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा ।
कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत् ॥"

कवेः पुत्रविशेषः । यथा, महाभारते । १३ । ८५ । १३३ ।

"कविः काव्यश्च धृष्णुश्च बुद्धिमानुशनास्तथा ।
भृगुश्च विरजाश्चैव काशी चोग्रश्च धर्मवित् ॥
अष्टौ कविसुता ह्येते सर्वमेभिर्जगत्ततम् ॥")

धे, ट पाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) धयति । टः स्त्रियामीवर्थः । स्तनन्धयी । इति दुर्गादासः ॥

धेनः, पुं, (धीयते इति धयत्यमरादिति वा । धेट् पाने + "धेट इच्च ।" उणां ३ । ११ । इति न इच्चान्तादेशः ।) समुद्रः । इति हेमचन्द्रः ॥ नदः । इति मेदिनी ॥

धेना, स्त्री, (धेन + टाप् । "टित्त्वेऽपि नद्यर्थे ङीप् । इति उज्ज्वलदत्तोक्तेर्न ङीप् ।" इति केचित् ।) नदी । (दयानन्दस्तु ऋग्वेदेऽपि [illegible] भ्यामन्तौ दधाना समभिधेयं वर्णप्रकाशेन लौकिकाय वा । यद्वा, धेट् पाने 'धेट इच्' इति नप्रत्ययः इकारस्यान्तादेशः गुणः । धयन्ति पानमिति धेना । [illegible] । यद्वा, आस्वादः । धीयते पीयते आस्वाद्यते यानेन धयन्ति प्राणिनः इति धेना ।" इति देवराजयज्वा । १ । ११ । ३८ ।) भारतीभेदः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । ३ । १ । ९ ।

"अस्य धारा अक्षरन्दि धेनाः ।"

"धेना माध्यमिका वाक्च जिघ्रति ।" इति तद्भाष्ये सायनः ॥)

धेनिका, स्त्री, (धेनैव । स्वार्थे कन् । टाप् । अत इत्वम् ।) धान्याकम् । इति भावप्रकाशः ॥

धेनुः, स्त्री, (धयति शिशून् सुतान् धीयते वत्सैरिति वा । धेट् पाने + "धेट इच्च ।" उणां ३ । ३४ । इति नुः इकारान्तादेशः ।) नवप्रसूता गौः । तत्पर्यायः । नवसूतिका २ । इत्यमरः । २ । ९ । ७१ ॥ नवप्रसूतिका ३ । इति शब्दरत्नावली ॥

दानीयदशधेनवो यथा,—

"यास्तु पापविनाशिन्यः पठ्यन्ते दशधेनवः ।
तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ! ॥
तस्या वैदिकपर्य्यायः । अवनयः १ यह्वाः २ खाः ३ सीराः ४ स्रोत्याः ५ एन्यः ६ धुनयः ७ रुजानाः ८ वक्षणाः ९ खादोअर्णाः १० रोधचक्राः ११ हरितः १२ सरितः १३ अग्रुवः १४ नभन्वः १५ वध्वः १६ हिरण्यवर्णाः १७ रोहितः १८ सस्रुतः १९ अर्णाः २० सिन्धवः २१ कुल्याः २२ वर्यः २३ उर्व्यः २४ इरावत्यः २५ पार्वत्यः २६ स्रवन्त्यः २७ ऊर्ज्जस्वत्यः २८ पयस्वत्यः २९ सरस्वत्यः ३० तरस्वत्यः ३१ हरस्वत्यः ३२ रोधस्वत्यः ३३ भास्वत्यः ३४ अजिराः ३५ मातरः ३६ नद्यः ३७ । इति सप्तत्रिंशन्नदीनामानि । इति वेदनिघण्टौ । १ । १३ ॥ (चतुर्दशमात्रावृत्तविशेषः । तल्लक्षणं यथा,— "ननतनगुरुगैः चयतिर्नदी स्यात् ॥")

नदीकदम्बः, पुं, (नदीनां कदम्बं समष्टी यत्र ।) महाश्रावणिका । इति राजनिर्घण्टः ॥ (नदीनां कदम्बम् ।) नदीसमूहे, क्ली ॥

नदीकान्तः, पुं, (नदीनां कान्तः पतिः ।) समुद्रः । (नदी कान्ता प्रिया यस्य ।) हिज्जलवृक्षः । सिन्धुवारकः । इति मेदिनी । ते, २०० ॥

नदीकान्ता, स्त्री, (नदी कान्ता यस्याः ।) जम्बुवृक्षः । काकजङ्घौषधिः । इति मेदिनी । ते, २०१ ॥ (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) लता । इति हेमचन्द्रः ॥

नदीकूलप्रियः, पुं, (नदीकूलं प्रियं यस्य । नदीकूलजातत्वादस्य तथात्वम् ।) जलवेतसः । इति जटाधरः ॥

नदीजं, क्ली, (नद्या जायते इति । जन+डः ।) स्रोतोऽञ्जनम् । इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"स्रोतोऽञ्जनं नदीजञ्च श्रुघ्नं स्रोतोजमाञ्जनम् ॥")

नदीजः, पुं, (नद्या जायते इति । जन+डः ।) अर्ज्जुनवृक्षः । इति रत्नमाला ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वी धनञ्जयः पार्थो नदीजः ककुभोऽर्ज्जुनः ॥")
यावनालशरः । हिज्जलवृक्षः । इति राजनिर्घण्टः ॥ (विटमाक्षिकः । इति हेमचन्द्रः । ४ । १२१ ॥ यथा, सुश्रुते उत्तरतन्त्रे । १७ ।
"नदीजशिम्बीकटुकाव्यथाञ्जनं
मनःशिला द्वे च निशे यकृद्दचं ॥"
नृपतिविशेषः । यथा, महाभारते । ५ । ४ । १९ ।
"सुरारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ॥"
भीष्मः । गङ्गागर्भजातत्वात् तथात्वम् । यथा, तत्रैव । ५ । १४८ । ३२ ।
"कथन्तु धर्म्मज्ञतया महात्मा
न राज्यकामो नृवरो नदीजः ॥")
नदीजाते, त्रि ॥ (यथा, महाभारते । ७ । १०२ । ८ ।
"पार्व्वतीयैर्नदीजैश्च सैन्धवैश्च महाह्रदैः ॥")

नदीजा, स्त्री, (नद्या जायते या सा । जन+डः+टाप् ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

नदीतरस्थानं, क्ली, (नद्यास्तरस्थानमत्र तरस्थलम् ।) घट्टः । इति भूरिप्रयोगः ॥ (नद्या तरस्थानम् ।) नदीभिन्नस्थानम् ॥

नदीनः, पुं, (नदीनां इनः पतिः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ वरुणः । मघा । अयं नदीन इत्याद्युत्तरनैषधः ॥ (अनेनोर्वंशीयस्य सहदेवस्य पुत्रः । यथा, हरिवंशे । २९ । ४ ।
"सहदेवस्य धर्म्मात्मा नदीन इति विश्रुतः ।
नदीनस्य जयत्सेनो जयत्सेनस्य सङ्कृतिः ॥"
न दीनः इति नञ्समासे दरिद्रभिन्ने, त्रि ॥)

नदीनिष्पावः, पुं, (नदीसमुद्भवो निष्पावः ।) धान्यभेदः । तत्पर्य्यायः । कटनिष्पावः २ कर्द्दुरः ३

नदीजः ३। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। अग्निप्रदत्वम्। गुरुत्वम्। शीतलत्वम्। कफदत्वम्। रूक्षत्वम्। काषायत्वम्। विषदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

नदीमातृकः, त्रि, (नदी मातेव पोषिका यस्य। कप्।) नद्यम्बुसम्पन्नव्रीहिपालितदेशः। इत्यमरः। २। १। १२॥

नदीवङ्कः, पुं, (नद्याः वङ्कः।) वङ्कुरः। इति शब्दमाला। बाँक इति भाषा॥

नदीवटः, पुं, (नदीसमीपजातो वटः।) वटीवृक्षः। इति राजनिर्घण्टः॥

नदीष्णः, त्रि, (नदीं स्नातीति। स्ना+ "सुपि स्थः।" ३।२।४। इति कः। "निनदीभ्यां स्नातेः कौशले।" ८। ३। ८९। इति षत्वम्।) नद्यवगाहनदक्षः। नदीस्नानकुशलः। इति भट्टिटीकायां पुरुषोत्तमः। नदीष्णः। इति पुरुषोत्तमः। यथा,—

"ततो नदीष्णान् पथिकान् गिरिज्ञान्॥"

इति भट्टिः॥

नदीसर्जः, पुं, (नद्याः सर्ज इव। नदीतीरजातत्वात् तथात्वम्।) अर्जुनवृक्षः। इत्यमरः। २। ४। ४१॥ (पर्यायोऽस्य यथा,—

"ककुभोऽर्जुननामाख्यो नदीसर्जश्च कीर्त्तितः। इन्द्रद्रुरित्यपि ..."

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे।)

नदेयी, स्त्री, (नद्यां भवा। "नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक्। पुंयोगादित्वात् ङीष्।) चाङ्गेरी। भूजम्बुः। इति शब्दचन्द्रिका॥

नद्धः, त्रि, (नह्यते स्मेति। नह+क्तः।) बद्धः। (यथा, ऋग्वेदे। १०। १९। १०।

"... ...")

त्रुटितम्। इति मेदिनी। धे, ६॥

नद्धी, स्त्री, (नह्यतेऽनया। नह+ इत्यादि ष्ट्रन्। ङीष्।) चर्मरज्जुः। इत्यमरः। २।१०।२७॥ (यथा, ...

"... ...")

नद्यम्रः, पुं, (नद्याः आम्र इव।) समुद्रान्तःशाकः। इति राजनिर्घण्टः॥

नद्युत्तरः, त्रि, (नद्याः उत्तरः।) नदीतरणकर्त्ता। ... इति ... इति च भाषा। नद्युत्तरः ... [illegible] यथा,—

"[illegible]"

इति [illegible]॥

ननन्दा, [ऋ] स्त्री, (न नन्दति तुष्यति सेवयापि। नञ्—नन्द—"नञि च नन्देः।" उणां २। ९९। इति ऋन्। ...) भर्तृभगिनी। ननद इति भाषा॥ तत्पर्यायः। ननान्दा २ नन्दिनी ३ नन्दा ४ पतिस्वसा ५। इति शब्दरत्नावली॥

ननान्दा, [ऋ] स्त्री, (न नन्दति सेवयापि। नन्द+"नञि च नन्देः।" उणां २। ९९। इति ऋन् वृद्धिश्च।) ननन्दा। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १०। ८५। ४६।

"सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु॥")

ननु, अ, (न नुदति प्रेरयतीति। नुद+मितद्वादित्वात् डुः।) प्रश्नः। पृच्छा। अवधारणम्। (यथा, रघुः। १। ६०।

"उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे। दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्॥")

निश्चयः। (यथा, महाभारते। १३। ६। १८।

"लोको दैवं समालोक्य उदासीनो भवेन्ननु॥")

अनुज्ञा। (यथा, शिशुपालवधे। ६। ६१।

"ननु सन्दिशेति सुदृशोदितया त्रपया न किञ्चन किलाभिदधे॥")

अनुमतिः। अनुनयः। आमन्त्रणम्। आमन्त्रणम्। सम्बोधनम्। (यथा, कुमारे। ४। ३२।

"विधुरां ज्वलनातिसर्जनात् ननु मां प्रापय पत्युरन्तिकम्॥")

एषामुदाहरणानि यथा,—

"प्रश्ने ननधीयामहे। अवधारणे ननु गच्छामः। अनुज्ञायां सर्वेणैव गायताम्। अनुनये ननु चल। प्रसीद। आमन्त्रणे ननु चैत्र। विरोधोक्तिः। इत्यमरभरतौ। विनिग्रहः। अनुग्रहः। परप्रश्नः। अधिकारः। सम्भ्रमः। इति मेदिनी। ने, ३४। आक्षेपः। प्रत्युक्तिः। वाक्यारम्भः। इति हेमचन्द्रः। ६। १७८। उत्प्रेक्षाभङ्ग्यादर्शनम्। यथा,—

"मयि प्रकृष्टे कुरु पूर्णं किंवा प्रायोऽनुविधे च। ननु नाम हि जानामि उत्प्रेक्षायामकारि च॥"

इति कारकचन्द्रिका॥

ननुच, अ, विरोधोक्तिः। इत्यमरः। ३। ४। १३॥ ननुचेति समुदितं विरोधवचने ननुशब्दो विरोधोक्तौ चकारात् ननुचेति वा। इति भरतः॥

नन्दः, पुं, (नन्दतीति। नन्द+पचाद्यच्।) विष्णुः। यथा। "आनन्दो नन्दनो नन्दः।" इति महाभारते। १३। १४९। ६८। नवपतिभेदः। स तु महापद्मस्य नाम्नो भूपः। (यथा, भागवते। १२। १। ७—११।

"महानन्दिसुतो राजन्! शूद्रागर्भोद्भवो बली। महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत्। ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः। स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः। शासिष्यति महापद्मो द्वितीय इव भार्गवः। तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः। य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः। नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति। तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ॥")

व्यानन्दः। निधिविशेषः। इति ... रत्नावली। गोपभेदः। स च ... नन्दः पुरा द्रोणनामा वसूनाम् ...

"द्रोणो वसूनां प्रवरो ... करिष्यमाण ... जातयोर्नौ महादेवे भुवि ... भक्तिः स्यात् परमा ... तस्तीवुक्तः स भगवान् ... व्रजे नन्द इति ..."

इति श्रीभागवते। १०। ८। ...

वेणुविशेषः। यथा,—

"महानन्दस्तथा नन्दो विनन्दश्च ... चत्वार उत्तमा वंशा ... दशाङ्गुलो ..."

इति ...

(स्कन्दानुचरविशेषः। यथा, महाभारते ...

"स्कन्दस्यानुचरविशेषः ... ४५। ६१। नागविशेषः। इति ... ५। १०३। १२। ...

यथा, भागवते। ४। ७। २२।

"इत्यौ प्रद्योतानावतारौ ... यज्ञेश्वरं विश्वतनुं परं पुरम्। सुनन्दनन्दाद्यनुगैर्वृतं मुदा ... प्रपन्नं प्रयतः ...

धृतराष्ट्रस्य पुत्राणामन्यतमः। ... भारतम्। १। ६७। ६६। वसुदेवस्य पुत्रविशेषः। इति ... २४। ४८। क्रौञ्चद्वीपस्थ ... इति भागवतम्। ५। २०। २१। ...स्यातो ...

"अभिवन्द्य ... पुत्रीकरणमीमांसां ..."

नन्दकः, पुं, (नन्दयतीति। नन्द+ण्वुल्।) खड्गः। इत्यमरः। १। १। ... हरिवंशे। १२०। ३३।

"इत्याज्ञाय प्रार्थ्य मया ... प्रहरार्थं गदां ... मित्रः। इति त्रिकाण्डशेषः। ... च त्रि। इति मेदिनी। के, १९। ... आनन्दः। आनन्दकारक॥ (इति महाभारतम्। १। ...

... स्यानुचरविशेषः। इति ... ३५। ६६। धृतराष्ट्रस्य पुत्र... महाभारतम्। १। १८७। ...)

नन्दकि:, स्त्री, (पिप्पली। इति ...)

नन्दकी, [न्] पुं, (नन्दकः ... नन्दक+इनिः।) विष्णुः ...

"शङ्खभृन्नन्दकी चक्री ..."

इति म...

नन्दगोपिता, स्त्री, (नन्द... इत्यत्र।) राधा।

गोपः यस्या जातः। तारकादित्वात्
।) नन्दगोपगृहभूम्यादिः ॥
पुं, (नन्दनमिति। नन्द+"इतोऽशुष्।"
। ५८। इति अशुष्।) आनन्दः। इति
रत्नावली ॥
स्त्री, (नन्दयतीति। नन्द+"नन्दिग्रहि-
दिभ्यो ल्युणिन्यचः।" ३। १। १३४। इति
) इन्द्रवनम्। इत्यमरः। १। १। ४८॥
ा, कुमारे। २। ४१।
भ्रान्देरमातानां क्रियन्ते नन्दनद्रुमाः॥"
दशावरहस्तिविशेषः। अस्य विवरणन्तु
शब्दे द्रष्टव्यम्॥ आनन्दः। यथा, महा-
ते। २। २५। ६।
सवाथार्हतो विप्रान् प्रयाहि भरतर्षभ!।
ामप्रहर्षाय सुहृदां नन्दनाय च॥")
े, त्रि। इति मेदिनी। ने, ८०॥ (यथा,
भारते। ३। १४६। ५।
 दिव्यं सुरुचिरं भीम पुष्पमनुत्तमम्।
संस्थानसम्पन्नं मनसो मम नन्दनम्॥")
 पुं, (नन्दयतीति। नन्द+ल्युः।) पर्वत-
। यथा, कालिकापुराणे ७५ अध्याये।
रे तु चन्द्रकूटस्य नन्दनो नाम वै गिरिः।
न् वसति शक्रस्तु कामाख्यासेवने रतः॥
प्रभावं समासाद्य सर्वदेवेश्वरो हरिः।
तु विरश्मिप्रान्तो सततं वर्त्तते नतः॥
कूटस्य तु गिरेर्नन्दनस्य तथा गिरेः।
तरं तथा चन्द्रं प्रदर्शयति त्रिधा॥
कुण्डजले स्नात्वा समारुह्य च नन्दनम्।
ाथ शक्रं लोकेशं महाफलमवाप्नुयात्॥"
षविशेषः। इति हेमचन्द्रः। ४। २६३॥
र्षे, पुं क्ली, इति वाचस्पतिः॥ यथा, सुश्रुते
स्थाने २ अध्याये।
कपायककर्कन्धूरीयसौरीयककरघाटकरभ-
नवराटकानि सप्त त्वक्सारनिर्य्यासविशेषाः॥"
ृतराष्ट्रपुत्रविशेषः। यथा, महाभारते।
। ६५। ३६।
दैनं नन्दनश्चैव सर्व्वविद्याविशारदौ।
न्दाय ददतुः प्रीतावश्विनौ भरतर्षभ!॥"
ुद्रपुरुषविशेषः। यथा, भागवते।४।६।३३।
 नन्दनादीनमहाविष्टैः भ्रान्तैः संभ्रान्त-
विग्रहम्।
ालमानं सखा च भर्त्ता गुह्यकरक्षसाम्॥"
देवत्वविशेषः। इति हेमचन्द्रः।३।३६२॥ वसु-
रविशेषः। यथा, हरिवंशे द्वितीयाम् ।५।३८।
"नन्दनोऽथ विजयो जयस्तथा
समधोऽथ परतश्च दुर्मुखः॥"
ादेवः। यथा, महाभारते।१३।१७।७५।
न्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः॥")
युः। यथा, "आनन्दो नन्दनो नन्दः।" इति
ाभारते। १३। १४९। ६६॥
ः, पुं,स्त्री, (नन्दयतीति। नन्द+ल्युः।) सुतः।
ति मेदिनी। ने, ८०॥ (यथा, रघुः।३।४१।

"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः॥")
भेकः। इति शब्दरत्नावली॥
नन्दनजं, क्ली, (नन्दने जायते इति। जन+डः।)
हरिचन्दनम्। इति राजनिर्घण्टः॥ (नन्दनात्
आनन्दाज्जायते इति।) हर्षजाते, त्रि॥ (पौत्रश्च॥)
नन्दनन्दनः, पुं, (नन्दस्य नन्दनः सुतः आनन्द-
जनको वा।) श्रीकृष्णः। इति शब्दरत्नावली॥
तस्य लीलासंवरणान्ते तत्महिषीणां दस्यु-
हस्तगतत्वकारणं यथा,—
व्यास उवाच।
"कः श्रद्दध्यात् सगाङ्गेयान् हत्वाखं सर्व्वकौर-
वान्।
आभीरेभ्यश्च भवतः कः श्रद्दध्यात् पराभवम्॥
पार्थैतत् सर्व्वभूतस्य हरेर्लीलाविचेष्टितम्।
त्वया यत् कौरवा ध्वस्ता यदाभीरैर्भवान् जितः॥
गृहीता दस्युभिर्याश्च भवता शोचिता स्त्रियः।
तदप्यहं यथावृत्तं कथयामि तवार्ज्जुन!॥
अष्टावक्रः पुरा विप्रो जलवासरतोऽभवत्।
बहून्वर्षगणान् पार्थ! गृणन् ब्रह्म सनातनम्॥
जितेष्वसुरसंघेषु मेरुपृष्ठे महोत्सवः।
बभूव तत्र गच्छन्त्यो ददृशुस्तं वरस्त्रियः॥
रम्भातिलोत्तमाद्यास्तु शतशोऽथ सहस्रशः।
तुष्टुवुस्तं महात्मानं प्रशशंसुश्च पाण्डव!॥
आकण्ठमग्नं सलिले जटाभारधरं मुनिम्।
विनयावनताश्चैनं प्रणेमुः स्तोत्रतत्पराः॥
यथा यथा प्रसन्नोऽसौ तुष्टुवुस्तं तथा तथा।
सर्व्वास्ताः कौरवश्रेष्ठ! वरिष्ठन्तं द्विजन्मनाम्॥
श्रीअष्टावक्र उवाच।
प्रसन्नोऽहं महाभागा भवतीनां यदीप्सितम्।
मत्तस्तद्व्रियतां सर्व्वं प्रदास्याम्यतिदुर्लभम्॥
श्रीपराशर उवाच।
रम्भातिलोत्तमाद्यास्तं वैदिक्योऽप्सरसोऽब्रुवन्।
प्रसन्ने त्वय्यसंप्राप्तं किमस्माकमिति द्विज!॥
इतरास्त्वब्रुवन् विप्र! प्रसन्नो भगवान् यदि।
तदिच्छामः पतिं प्राप्तुं विप्रेन्द्र! पुरुषोत्तमम्॥
श्रीव्यास उवाच।
एवं भविष्यतीत्युक्त्वा प्रोत्ततार जलान्मुनिः।
तमुत्तीर्णञ्च ददृशुर्विरूपं वक्रमष्टधा॥
तं दृष्ट्वा गूह्यमानानां यासां हासः स्फुटोऽभवत्।
ताः शशाप मुनिः कोपमवाप्य कुरुनन्दन!॥
श्रीअष्टावक्र उवाच।
यस्माद्विरूपरूपं मां मत्वा हासावमानना।
भवतीभिः कृता तस्मादेष शापं ददामि वः॥
मत्प्रसादेन भर्त्तारं लब्ध्वा तु पुरुषोत्तमम्।
मच्छापोपहताः सर्व्वा दस्युहस्तं गमिष्यथ॥"
"इत्युक्तस्य मुनेः श्रामादष्टावक्रस्य केशवम्।
भर्त्तारं प्राप्य ता याता दस्युहस्तं वराङ्गनाः॥
तत्त्वया नात्र कर्त्तव्यः शोकोऽल्पोऽपि हि
पाण्डव!।
तेनैवाखिलनाथेन सर्व्वं तदुपसंहृतम्॥"
इति विष्णुपुराणे। ५। ३८। ६८—

नन्दनन्दिनी, स्त्री, (नन्दस्य नन्दिनी कन्या।)
"नन्दगोपगृहे जाता यशोदागर्भसम्भवा।" इति
मार्कण्डेयपुराणोक्तदेवीवचनात् तथात्वम्।)
दुर्गा। इति शब्दरत्नावली॥
नन्दनमाला, स्त्री, (नन्दना आनन्दजनिका
माला।) कृष्णप्रीतिकरमालिकाविशेषः। यथा,
"भूप नन्दनमालान्तु कुरुते कृष्णवेश्मनि।
देवकन्याहृतैस्तैश्च सेव्यते सुरनायकैः॥"
इति द्वारकामाहात्म्ये हरिभक्तिविलासधृत-
विष्णुधर्म्मोत्तरम्॥
नन्दना, स्त्री, (नन्दयतीति। नन्दि+ल्युः। टाप्।)
दुहिता। इति जटाधरः॥
नन्दन्तः, पुं, (नन्दत्यनेनेति। नन्द+"रुहिनन्दि-
जीविप्राणिभ्यः षिदाशिषि।" उणां ३।१२७।
इति झच् स च षित्।) पुत्रः। राजा। मित्रम्॥
इति संक्षिप्तसारोणादिवृत्तिः॥
नन्दपालः, पुं, (नन्दं आनन्दं निधिविशेषं वा
पालयतीति। पालि+अण्।) वरुणः। इति
शब्दरत्नावली॥
नन्दपुत्त्री, स्त्री, (नन्दस्य पुत्त्री।) दुर्गा। इति
त्रिकाण्डशेषः॥
नन्दयन्तः, त्रि, (नन्दयतीति। नन्दि+"तृभू-
वहीति।" उणां ३। १२८। इति झच् स च
षित्।) आनन्दजनकः। इति सिद्धान्तकौमु-
द्यामुणादिवृत्तिः॥
नन्दा, स्त्री, (नन्दयतीति। नन्दि+अच्+टाप्।)
गौरी। अलिञ्जरः। गारा इति भाषा। तिथि-
विशेषः। तास्तु उभयपक्षयोः प्रतिपत्षष्ठ्येका-
दश्यः। इति मेदिनी। दे, ६॥ (यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्॥"
इति ज्योतिषम्॥)
ननान्दा। इति शब्दरत्नावली॥ सम्पत्। इति
हेमचन्द्रः॥ * ॥ दुर्गाया नन्दानामकारणं
यथा,—
"एवमुक्ता भवं ब्रह्मा पुनर्देवीं च चाब्रवीत्।
त्वया देवि! महत् कार्य्यं कर्त्तव्यमस्मदर्त्ति नः॥
भविष्यं महिषाख्यस्य असुरस्य विनाशनम्।
एवमुक्ता ततो ब्रह्मा धर्म्मं देवाय पार्थिव!॥
यथागतास्ततो जग्मुर्देवी स्थाप्य हिमे गिरौ।
संस्थाप्य नन्दिता यस्मात्तस्मान्नन्दा तु सा भवेत्॥"
इति वराहपुराणम्॥ * ॥
अपि च।
"नन्दते सुरलोकेषु नन्दने वसतेऽथवा।
हिमाचले महापुण्ये नन्दा देवी ततः स्मृता॥"
तस्या माहात्म्यादि यथा,—
"यथा गङ्गा नदीनान्तु उत्तमत्वे व्यवस्थिता।
तद्वदुत्तमा नन्दा उत्तमत्वेन संस्थिता॥
नाहं भाद्रपदे देवि! [illegible]
तदन्तेषु आषाढमाहे [illegible]
विवाह [illegible]
न [illegible] हराः [illegible]
विषमावरुणाः [illegible]

निशुम्भो गता देवि यान्ति देव्याः प्रसादतः ॥"
इति देवीपुराणम् ॥
(कामधेनुविशेषः । यथा, वह्निपुराणे कामधेनु-
प्रदाननामाध्याये ।
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा ।
निर्गता मथ्यमानेऽब्धौ उषःस्नानं शुभप्रदम् ॥"
अस्या दानविधिस्तु कामधेनुशब्दे द्रष्टव्यः ॥
धर्मपुत्रस्य हर्षस्य पत्नी । आनन्दस्वरूपतया
एवास्यास्तथात्वम् । यथा, महाभारते । १ ।
६६ । ३२ ।
"नन्दा तु भार्य्या हर्षस्य यासु लोकाः प्रति-
ष्ठिताः ॥"
शाकद्वीपान्तर्गतनदीविशेषः । यथा, मात्स्ये ।
१२१ । ३१ ।
"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥"
"एताः सप्त महाभागाः प्रतिवर्षं शिवोदकम् ।
भावयन्ति जनं सर्वं शाकद्वीपनिवासिनम् ॥"
द्विशालगृहविशेषः । यथा, विश्वकर्म्मप्रकाशे
७ अध्याये ।
"नन्दाख्यं तद्विशालञ्च धनदं शोभनं स्मृतम् ॥")
नन्दात्मजः, पुं, (नन्दस्य आत्मजः ।) श्रीकृष्णः ।
इति शब्दरत्नावली ॥ (यथा, पाद्मोत्तरखण्डे
१११ अध्याये ।
"पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥")
दुर्गायाम्, स्त्री ॥
नन्दिः, पुं, स्त्री, (नन्दयतीति । नन्दि + "सर्व-
धातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।)
द्यूताङ्गम् । (भावे इन् ।) आनन्दः । (यथा,
महाभारते । ३ । १८ । ११ ।
"सोऽवर्द्धत महातेजा मगधाधिपतेः सुतः ।
मातापित्रोर्नन्दिकरः शुक्लपक्षे यथा शशी ॥"
...तदर्थे स्त्रीलिङ्गेऽपि दृश्यते । यथा, तत्रैव ।
५ । १११ । २० ।
"कदा मे भूयसी नन्दिर्देवमनुपश्यसि ॥")
नन्दिकेश्वरे, पुं । इति मेदिनी । दे, ६ ॥ (यथा,
महाभारते । १३ । १४ । २०५ ।
"पुरस्ताच्चैव देवस्य नन्दिं पश्याम्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शङ्करम् ॥")
विष्णुः । यथा, महाभारते ।१३।१४९।९८ ।
"स्वक्षः स्वङ्गः शतावर्त्तो नन्दिर्ज्योतिर्गणेश्वरः ।"
(महादेवः । यथा, तत्रैव । १२ । १७ । ७४ ।
...विमितश्च नन्दिर्नन्दिकरो हरिः ।")
...कः, पुं, (नन्द आनन्दः हेतुतयास्त्यस्येति ।
...न्द + ठन् ।) नन्दीश्वरः । इति शब्दमा-
...। (नन्दिरेव । स्वार्थे कन् ।) आनन्दः ।
...ा, स्त्री (नन्द आनन्द ...स्मिन्निति ।
...) इन्द्रक्रीडास्थानम् । इति शब्दमाला ।
...दा + स्वार्थे कन् । टापि अत इत्वम् ।)
...रट । इति शब्दरत्नावली । प्रतिपत्तिथिः ।
...तिथिपर्व्वे ।
...ज्ञे रसौ ... सुखामारभ्य नन्दिकाम् ॥"
...ताख्ये च ॥

नन्दिकेश्वरः, पुं, (नन्दिक ईश्वरश्च ।) शिवद्वार-
पालः । तत्पर्य्यायः । नन्दी २ शालङ्कायनः ३
ताण्डवतालिकः ४ । इति त्रिकाण्डशेषः ॥ नन्दी-
श्वरः ५ तण्डुः ६ । इति हेमचन्द्रः ॥ (यथा,
हरिवंशे । १८२ । ८६ ।
"ततो नन्दिं महादेवः प्राह गम्भीरया गिरा ।
नन्दिकेश्वर ! संयाहि यतो बाणो रणे स्थितः ॥")
उपपुराणविशेषश्च ॥
नन्दिघोषः, पुं, (नन्दिरानन्दजनको घोषो यस्य ।)
अर्ज्जुनस्य रथघोषः । वन्दिजनघोषः । इति
मेदिनी । षे, ५३ ॥ मङ्गलघोषणा च ॥ (इयं-
घोषयुक्ते, त्रि । यथा, महाभारते । १३ ।
१०७ । १०५—१०८ ।
"पञ्चविंशे तु दिवसे यः प्राश्नेदेकभोजनम् ।
सदा द्वादशमासांस्तु पुष्कलं यानमाप्नुयात् ॥
सिंहव्याघ्रप्रयुक्तैस्तु मेघनिस्वननादितैः ।
स रथैर्नन्दिघोषैश्च पृष्ठतोऽह्यनुगम्यते ॥
देवकन्यासमारूढैः काञ्चनैर्विमलैः शुभैः ।
विमानमुत्तमं दिव्यमास्थाय सुमनोहरम् ॥
तत्र कल्पसहस्रं वै वसते स्त्रीशताकृते ।
सुधारसश्चोपजीवन्नमृतोपमसत्तमम् ॥")
नन्दितरुः, पुं, (नन्दिरानन्दजनकस्तरुः ।) धव-
वृक्षः । इति भावप्रकाशः ॥
नन्दिनी, स्त्री, (नन्दयतीति । नन्दि + णिनिः ।
ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥ (अस्य
पर्य्यायो यथा, भावप्रकाशे ।
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ॥"
जटामांसी । तत्पर्य्यायो यथा, वैद्यकरत्न-
मालायाम् ।
"नलदं नन्दिनी पेशी मांसी लघ्वजटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥")
उमा । गङ्गा । ननान्दा । वशिष्ठधेनुः । इति
मेदिनी । ने, ८१ ॥ सा च धेनुः सुरभिकन्या ।
यथा, दिलीपं प्रति वशिष्ठवाक्यम् ।
"पुरा शक्रमुपस्थाय तवोर्व्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥
इमां देवीमृतुस्नातां स्मृत्वा सपदि सत्वरः ।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥
अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥"
"इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥"
इति रघुः । १ । ७५-८२ ॥
इमामेवाराध्य लब्धवरो दिलीपो रघुनामानं
वंशतिलकं पुत्रं लब्धवान् ॥ * ॥
द्रोणाख्या वसुः पत्नीवाक्यात् एनां हृत्वा वशिष्ठ-
शापेन पृथिव्यां भीष्मनाम्ना विख्यात आसीत् ।
तत्कथा यथा, महाभारते ।१।९९।११-३५।
"अथ तद्वनमाजग्मुः कदाचिद्वरवर्णिनि ! ।
पृथ्वाद्या वसवः सर्वे देवा देवर्षिसेवितम् ॥
ते सदारा वनं तच्च व्यचरन्त समन्ततः ।
रेमिरे रमणीयेषु पर्वतेषु वनेषु च ॥

तस्यैकस्याथ ...
सा वरुणो ...
नन्दिनीं नाम ...
सा क्रियासम ...
वने वै दर्शयाम ...
स्वायम्भुव सुरो ...
उपपन्नां गुणैः ...
एवं गुणसमायुक्तां ...
दर्शयामास राजेन्द्र ...
द्यौस्तदा तां तु दृष्ट्वै ...
उवाच राजंस्तां देव ...
एषा गौरुत्तमा देवी ...
ऋषेस्तस्य वरारोहे ! ...
अस्याः क्षीरं पिबेन्मर्त्यः ...
दशवर्षसहस्राणि स जी ...
एतत् श्रुत्वा तु सा देवी ...
तमुवाचानवद्याङ्गी भर्त्तार ...
अस्ति मे मानुषे लोके ...
नाम्ना जितवती नाम ...
उशीनरस्य राजर्षेः सत्यसन्ध ...
दुहिता प्रथिता लोके ...
तस्या हेतोर्महाभाग ! सवत्सां ...
आनयस्वामरश्रेष्ठ ! त्वरितं पुण्य ...
यावदस्याः पयः पीत्वा सा ...
मानुषेषु भवत्वेका ...
एतन्मम महाभाग कर्त्तुमर्हस्यनिन्दित ...
प्रियं प्रियतरं ह्यस्मान्नास्ति ...
एतत् श्रुत्वा वचस्तस्या देव्याः ...
पृथ्वाद्यैर्भ्रातृभिः सार्द्धं द्यौस्तदा ...
तदा कमलपत्राक्षो नियुक्तो ...
ऋषेस्तस्य तपस्तीव्रं न ...
हृता गौः सा तदा तेन प्रपातस्तु ...
अथाश्रमपदं प्राप्तः ...
न चापश्यत् स गां तत्र ...
ततः स मृगयामास वने तस्मिंस्तपोधनः ।
नाध्यगच्छच्च मृगयंस्तां गां ...
ज्ञात्वा तथापनीतां तां वसु ...
ययौ क्रोधवशं सद्यः शशाप च ...
यस्मान्मे वसवो जह्रुर्गां वै ...
तस्मात् सर्व्वे जनिष्यन्ति मानुषे ...
एवं शशाप भगवान् वसूंस्तान् ...
वशं क्रोधस्य संप्राप्त आपवो मुनिसत्तम ...
शप्त्वा च तान् महाभागस्तपस्ये ...
एवं स शप्तवान् राजन् ! वसून् ...
महाप्रभावो ब्रह्मर्षिर्देवान् ...
अथाश्रमपदं प्राप्तास्ते वै भूयो ...
शप्ताः स्म इति जानन्त ऋषि ...
प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ ॥
लेभिरे न च तस्मात् प्रसादमृषिसत्तमात् ।
आपवात् पुरुषव्याघ्र ! ...
उवाच च स धर्मात्मा शप्ता यूयं ...

दस्तु यत्कृते दूयं मया शप्ताः स वत्स्यति ।
ष्ठितो मानुषे लोके दीर्घकालं स्वकर्मणा ॥
हृतं तचिकीर्षामि तुभ्यान् नुदो यदह्रवम् ।
प्रजास्यति चाप्येष मानुषेषु महात्मनाः ॥
विष्यति च धर्मात्मा सर्वशास्त्रविशारदः ।
नुः प्रियहिते युक्तः स्त्रीभोगान् वर्जयिष्यति।”)
स्याः प्रभावो यथा,—
र्षिष्ठस्याश्रमपदं मफुल्लवनमनुत्तमम् ।
नलज्ञवतां श्रेष्ठो विश्वामित्रो महात्मनाः ॥
तो वशिष्ठो भगवान् कपालो तुनिसत्तमः ।
श्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥
ानिदं कर्तुमिच्छामि बलस्यास्य महाबल ।
त चैवाप्रमेयस्य यथार्हं प्रतिसत्कृतान् ॥
ाढमित्येव गाधिनी वशिष्ठं प्रत्युवाच ह ।
त्युक्तो महातेजा वशिष्ठो जपतां वरः ॥
ाजुहाव ततः प्रीतः कल्माषीं धुतकल्मषाम् ।
लिनैव महार्हेण सत्कारं तद्विधत्स्व मे ॥
त्युक्ता वशिष्ठेन शवला शत्रुसूदन ! ।
दधे विविधान् कामान् यस्य यस्य यथेप्सितान् ॥
ान्नापुरन्दरो राजा सनाप्रपुरोहितः ।
ष्टः परमहर्षेण वशिष्ठमिदमब्रवीत् ॥
वां शतसहस्रेण दीयतां शवला मम ।
त्युक्तस्तु भगवान् वशिष्ठो मुनिसत्तमः ॥
श्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम् ।
ाटचैर्गकुमी राघव दास्ये नन्दिनीं तव ॥
ामेन तु वशिष्ठोऽसौ न तत्याज यदा तुनिः ।
ेऽस्य शवलां राजा विश्वामित्रस्तदाहरत् ॥
ा द्वारवाञ्जाताः काम्बोजा रविसन्निभाः ।
बवधासित्रंजाताः मह्लवाः शस्त्रपाणयः ॥
ोनिदेशाच यवनाः शकदेशाच्छकास्तथा ।
ोमकूपेषु च म्लेच्छास्तथा रामकिरातकाः ॥
िर्निषूदितं सैन्यं विश्वामित्रस्य तत्क्षणात् ।
स्याश्रितं साश्वं सरथं रघुनन्दन ! ॥”
इति रामायणे आदिकाण्डम् ॥
र्विवरणं महाभारते । १।१७७ अध्याये च
शेषतो द्रष्टव्यम् ॥ कन्या यथा, हरिवंशे ।
१०१ । ७ ।
दे्यो गोकुलसम्भूतां नन्दगोपस्य नन्दिनीम् ।”
ानन्दजननात् गङ्गापि । यथा, महाभारते ।
१।६६।२६ ।
“द्यं गुणसमायुक्तां वदते वसुनन्दिनी ।
देवमाना राजेन्द्र ! पुरा पौरवनन्दनः ।”
“वसुनन्दिनी वसुप्रिया ।” इति नीलकण्ठः ॥
कस्याचित् परमात्मनपर्विशेषः । यथा, महा-
भारते । ८ । २६ । ५ ।
“मध्ये माहवतात् राजन् ! कुमाराद्युवरानि-
मान् ।”
“ददाना तुदामा च विश्वोका नन्दिनी तथा ।”
तीर्थविशेषः । यथा, महाभारते । ३ । ८४ ।
१३१ ।
“ततो गच्छेत महाराज कूपं देवनिषेवितम् ।
नरमेधस्य यत् पुण्यं तदाप्नोति नराधिप ! ॥”

चाड़िमुनिमाता । इति हेमचन्द्रः । ३ । ५१६ ॥ चयोदशाक्षरवृत्तिविशेषः । अस्य विवरणं छन्दः-शब्दे द्रष्टव्यम् । दुर्गा । इयन्तु देविकातटे पीठ-स्थाने विराजते । यथा, देवीभागवते । ७ । ३३ । ६८ ।
“शिवकुण्डे शुभा नन्दा नन्दिनी देविकातटे ॥”)

नन्दिनीतनयः, पुं, (नन्दिन्यास्तनयः ।) व्याड़ि-मुनिः । स च अभिधानकारकः । इति हेम-चन्द्रः । ३ । ५१६ ॥

नन्दिनीसुतः, पुं, (नन्दिन्याः सुतः ।) व्याड़िमुनिः । इति जटाधरः ॥

नन्दिवर्द्धनः, पुं, (नन्दिं वर्द्धयतीति । वृध्+णिच्+ल्युः ।) शिवः । (नन्दिं आनन्दं वर्द्धयतीति ।) पक्षान्तः । पुत्रः । इति मेदिनी । ने, २३८ ॥ (यथा, गोः रामायणे । २ । ६६ । १४ ।
“सुषुवे यमनित्रघ्नं कौशल्या नन्दिवर्द्धनम् ।”) मित्रम् । इति शब्दरत्नावली ॥ (विमानविशेषः । यथा, विश्वकर्मप्रकाशे । ६ अध्याये ।
“विमानं छन्दकं तद्वदनेकशिखरान्ततः ।
स चाष्टभूमिकस्तद्वत् चमतिर्नन्दिवर्द्धनः ॥”
निमिवंशीयविशेषः । इति भागवतम् । ९ । १३ । १४ ॥) आनन्दवर्द्धके, त्रि ॥ (यथा, हरिवंशे । ६८ । २८ ।
“कृष्ण कृष्ण महाबाहो गोपानां नन्दिवर्द्धन ! ।
इन्द्रवालेय वै शिघ्रं सर्वराजो विषायुधः ॥”)

नन्दिवृक्षः, पुं. (नन्दिरानन्दजनको वृक्षः । यद्वा, नन्द+इन् । तस्याः वृक्षः ।) नन्दीवृक्षः । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्य यथा, वैद्यक-रत्नमालायाम् ।
“नन्दिवृक्षो मेषशृङ्गी तथा मेषविषाणिका ।
चतुर्भद्रकचतुष्क मेण्मशृङ्गी यथाद्रुमा ॥”)

नन्दी, स्त्री, दुर्गा । यथा, देवीपुराणे ।
“तुराः सुस्थिरशा देवा नन्दिनी दुन्दुभिर्मता ।
तेयाञ्च वादिनी नन्दी ईशानात् त्रिदशेश्वरी ॥”

नन्दी, [न्] पुं, (नन्द आनन्दोऽस्यास्तीति । इनिः ।) गर्दभाण्डवृक्षः । (यथा,—
“शरीरं कुलकं नन्दी कुबेरा शकुमारिणी ।
कटिकं केसुकं शीर्व सशोभाञ्जककर्षणम् ॥
विद्धं माषे कटुपाही मारुतं कफनिर्दारित् ॥”
इति वाभटे । १ । ६ अध्याये ।)
वटवृक्षः । इति मेदिनी । ने, ८१ । शिवगण-विशेषः । स च विविधः । यथा,—
“आद्यः कनकनन्दी च गिरिकाख्यो द्वितीयकः ।
सोमनन्दी तृतीयस्तु विज्ञेया नन्दिकेश्वरः ॥”
इति वह्निपुराणे गणभेदनामाध्यायः ॥
शिवद्वारपालः । स शिवांशः शालङ्कायनमुनि-पुत्रः । यथा,—
“अन्यच्च ते प्रवक्ष्यामि परं गुह्यं वसुन्धरे ! ।
तस्यतस्य तु दुर्गेनिरेव सर्वं सुतम् ॥
तं प्रावज्ञानि परं मानं प्राप्ता देवो महेश्वरः ।
पुत्रदस्तनरं रूपं कृत्वा हरिसुतानघम् ॥
शालङ्कायनपुत्रं योगमायासमन्वितः ।

प्राप्नोति तं न जानाति दक्षिणं पार्श्वमास्थितः ॥
मायायोगबलोपेतश्चापो वै शूलमाविश्य ।
रूपवान् गुणवांश्चैव वपुषादित्यसन्निभः ॥
स तं न ज्ञायते जातं समेवाराधने स्थितः ।
अथ नन्दी प्रहस्याह महादेवाद्यया मुनिम् ॥
उत्तिष्ठ मुनिशार्दूल ! सफलस्ते मनोरथः ।
त्वद्भिया ज्ञाप्यतोऽस्मि पुत्रस्ते शाधि मां प्रभो ! ॥
त्वया तपः समारब्धमीश्वरेण समं सुतम् ।
प्राप्स्यामीति ततो मह्यं सदृशोऽन्यो न कश्चन ॥
विचार्य्येति तदाहं वै जातोऽस्मि स्वयमेव हि ॥”
इति वराहपुराणम् ॥
स एव कल्पान्तरे शिवांशजशिलादतनेः पुत्रः । यथा,—
“जजाप रुद्रमनिशं यत्र नन्दी महायशाः ।
प्रीतस्तस्य महादेवो देव्या सह पिनाकधृक् ॥
ददौ चात्मसमानत्वं मृत्युवञ्चनमेव च ।
अभूदृषिः स धर्मात्मा शिलादो नाम धर्मवित् ॥
आराधयन् महादेवं पुत्रार्थं वृषभध्वजम् ।
तस्य वर्षसहस्रान्ते तप्यमानस्य विश्वकृत् ॥
शर्वः सोमार्द्धविधृतो वरदोऽस्मीत्यभाषत ।
स वव्रे वरमीशानं वरेण्यं गिरिजापतिम् ॥
अयोनिजं मृत्युहीनं तथा चैवोपमया समम् ।
तथास्त्वित्याह भगवान् देव्या सह महेश्वरः ॥
पश्यतस्तस्य विप्रर्षेरन्तर्धानं गतो विभुः ।
ततो यियक्षुः स्वां भूमिं शिलादो धर्मवित्तमः ॥
चकर्ष लाङ्गलेनोर्व्वीं भित्त्वादृश्यत शोभनः ।
संवर्त्तकानलप्रख्यः कुमारः प्रहसन्निव ॥
रूपलावण्यसम्पन्नस्तेजसा भासयन् दिशम् ।
कुमारतुल्योऽप्रतिमो मेघगम्भीरया गिरा ॥
शिलादं तात तातेति प्राह नन्दी पुनः पुनः ।
तं दृष्ट्वा नन्दिनं जातं शिलादः परिषस्वजे ॥
मुनिभ्यो दर्शयामास ये तदाश्रमवासिनः ॥”
इति कूर्म्मे ४० अध्यायः ॥
(हिमनिवाप्यमौषिककामस्थानानन्दनमः ।
यथा, षट्चक्रकारिकायाम् ।
“गुरुः कीर्त्तिदंशः कुक्कुटनन्दी घोषो धनुर्गुणः ।”)

नन्दीमुखी, स्त्री, (नन्दी मुखे यस्याः । ङीष् ।) तन्द्रा । इति हेमचन्द्रः । २ । २२० ॥

नन्दीवृक्षः, पुं, (नन्दि+वा ङीष् । नन्द्याः वृक्षः । नन्दीजनको वृक्षो वा ।)शीघ्रमटशप्रसिद्धस्तम्भि-वृक्षविशेषः । तत्पर्य्यायः । तूणीकः २ तुणिकः ३ तूणी ४ मीनकः ५ कच्छपः ६ नन्दी ७ कुबेरकः ८ कान्तः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतत्वम् । विषरक्तशारदशिरोऽक्षि-सौवर्णत्वनाशित्वम् । मुक्तशिलम् । तुदिदीप्तिहाट-त्वञ्च । इति राजनिर्घण्टः ॥ ● ॥ अन्यच्चाहारः क्षौरत्वात् सत्वानुमिष्टो वृक्षः । इति भरतः ॥ तुं दू इति भाषा इत्य इति केचित् । तत्पर्य्यायः । तूणः २ कुबेरकः ३ तूणिः ४ कच्छः ५ कान्त-लकः ६ । इत्यमरः । २ । ४ । १२८ ॥ तुन्नि: ७ । इति भरतः ८ कूणिः ९ तुन्दः १०

नन्दिकः ११ नन्दितघकः १२। इति शब्द-रत्नावली ॥*॥ मेषश्टङ्गीतृषः। इति रत्नमाला॥ स्वालोद्गमः। इति भावप्रकाशः॥

नन्दीशः, पुं, (नन्दी ईशश्च।) नन्दी। इति हेम-चन्द्रः।२।१२४॥ भरतोक्ततालभेदः। यथा,—
"सिंहनन्दनन्दीशचन्द्रबिम्बद्वितीयकाः॥"
तस्य लक्षणं यथा,—
"गो लघुर्गौलघुः प्लुतश्चाथ नन्दीश्वरे मताः।"
इति सङ्गीतदामोदरः॥
(नन्दिनो नन्दिगणस्य ईशः। इति विग्रहे शिवः।)

नन्दीश्वरः, पुं, (नन्दिनो गणविशेषस्य ईश्वरः।) शिवः। इति शब्दरत्नावली॥ नन्दीशतालः। इति सङ्गीतदामोदरः॥ (नन्दी ईश्वरश्च।) शिवद्वारपालः। तस्य शिवपार्श्वस्थत्वकारणं यथा,—
"नगश्रेणागते काले नन्दी नाम महामुनिः।
आरिराधयिषुः शर्व्वं तपस्तेपे सुदारुणम्॥
ततस्तु भगवान् प्रीतस्तस्मै शिवाय शङ्करः।
उवाच च वचः साक्षात्तपोऽर्थं वरदः प्रभुः॥
वरान् वृणीष्व विप्रेन्द्र! यानिच्छसि महामुने॥
तांस्ते सर्व्वान् प्रदास्यामि दुर्लभानपि मारिष।
इत्युक्तोऽसौ भगवता शर्व्वेण मुनिपुङ्गवः।
प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना॥
यदि प्रीतोऽसि भगवन्। यद्यनुग्राह्यता मम।
यद्भक्तो दृढं देव भवत्यस्तु सुराधिप।
तथा साक्षे भवेद्भक्तिरपि नित्यं महेश्वर!
भवतो भक्तिमिच्छामि सर्व्वभूतहिते मयि॥
एवमुक्तस्तु तथा नन्दिना स महेश्वरः।
प्रहस्योवाच तं प्रीत्या ततो मधुरया गिरा॥
महत्तरो गणेशानः सर्व्वगुणोत्तमः।
भविष्यसि च यद्देवो देवतानां पूजितः॥
अनेनैव शरीरेण जरामरणवर्ज्जितः।
कुमाराद्यैर्मयाद्यैस्ते देवैर्मान्यवरो मतिः॥
सार्द्धं ताभ्यां वरिष्ठश्च मामकानां द्विजोत्तम!
नन्दीश्वर इति ख्यातो भविष्यसि च संशयः॥
अष्टमूर्त्तिं देवानां! देवश्रेष्ठ सर्व्वतः।
सं प्रसूर्व्वेण लोके महेश्वराद्गुणोत्तर!!
मातेशान्यर्थं दर्शन सर्व्वभूतानि सर्व्वतः।
... सर्व्वभराश्रयः प्रसादं मार्कण्डेयाधिप!!
... देहि च मां देहि दयालुञ्च मामपि।
... द्विविधमरणविशोऽपि च।
... नु त्वयैव नित्यं मया स्तोत्रं महाधिप!!
... त्रिपुरा सह महाभागेन वर्त्तताम्॥"
इति वराहपुराणम्।

...र, [र] क्ली, (नन्द+इन्+अः ङीप्।) ...वरदाई वा वट।) इत्यमरटीका। ...शब्दचन्द्रिका।

..., पुं, (नन्दिनस्य आवर्त्तो यत्र।) ...वर्त्तविशेषः। इत्यमरः।२।२।१०॥ तस्य ... यथा,—
... पुष्पावर्त्तं स्वस्तिकं वा नन्द्यावर्त्तमतः पद्मम्।
पूजनीयोत्तरच्छायं नन्द्यावर्त्तं वदन्ति तत्॥"
इति भरतधृतवाक्यम्॥
तगरद्रुमः। इति विश्वः॥ मत्स्यभेदः। तस्य गुणः। संग्राहित्वम्। कफपित्तविनाशित्वञ्च।
इति राजवल्लभः॥

नपुंसकं, क्ली, (न स्त्री न पुमान्। "नञ्स्नञ्नञा-दिति।" ६।३।७५। इति निपातनात् स्त्रीपुंसयोः पुंसक-आदेशः।) क्लीबम्। इत्यमरः।२।६।३८॥ हिजिड़ा इति भाषा॥ तस्य कारणं यथा,—
"उभयोर्व्वीजसामान्ये जायते वै नपुंसकम्॥"
इति मुग्धबोधः॥*॥
(नपुंसको भवेदिति भाष्यप्रयोगात् पुंलिङ्गोऽपि भवति। तथा, च पञ्चतन्त्रे।१।१६७।
"परदेशभयाद्भीता बहुमाया नपुंसकाः।
स्वदेशे निधनं यान्ति काकाः कापुरुषा मृगाः॥")
नपुंसकगर्भस्य चिह्नं यथा,—
"नपुंसकं यदा गर्भो भवेद्गर्भोऽर्द्धसंहतिः।
उन्नते भवतः पार्श्वे पुरस्तादुदरं महत्॥"*॥
नपुंसकविशेषानाह।
"आसेक्यश्च सुगन्धिश्च कुम्भीकश्चेर्षकस्तथा।
अमी सशुक्रा बोद्धव्या षण्ढको भूषसंज्ञकः॥"
तेषां लक्षणान्याह।
"पित्रोस्तु स्वल्पवीर्य्यत्वादासेक्यः पुरुषो भवेत्।
स शुक्रं प्राश्य लभते ध्वजोन्नतिमसंशयम्॥
यः पूतियोनौ जायेत स हि सौगन्धिको भवेत्।
स गुदे ब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते।
स कुम्भीक इति ज्ञेयो गुदयोनिस्तु स स्मृतः॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते।
ईर्षकः स तु विज्ञेयो दृष्टियोनिश्च स स्मृतः॥
यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते।
तत्र स्त्रीचेष्टिताकारो जायते षण्ढसंज्ञकः॥"
इति भावप्रकाशः॥
(अस्य विवृतिर्यथा,—
"समवीर्य्यत्वेन नरः स्त्रीपुत्रनिर्भवेत्।
नपुंसकमिति ख्यातं न स्त्री न पुरुषो वदेत्॥"
"समशोणितवीर्य्येनापि प्रजाया विकृतेरपि।
समो भवेद्यदा शुक्रो नपुंसकस्तदा स्मृतः॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये॥)

नप्ता, [ऋ] पुं, (न पतन्ति पितरो येनेति। पत+ "नप्तृनेष्टृत्वष्टृ" इति।" उणां २।९६। इति तृच्प्रत्ययेन निपातनात् साधुः।) पुत्रकन्ययोः पुत्रः। नाति इति भाषा। नप्तृवर्गीयः। पौत्रः २ दुहितुः सुतः ३। इति हेमचन्द्रः॥ (यथा, महाभारते।१।८५।२०।
"कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो!
अतीत्य पुरुनिरस्य राज्यं पूरोः प्रदास्यसि॥")

नप्ती, स्त्री, (नप्तृ+"ऋन्नेभ्यो ङीप्।" ४।१।५। इति ङीप्।) पुत्रकन्ययोः पुत्री। नातिनी इति भाषा। नप्तृवर्गीयः। पौत्री १ सुतात्मजा २। इत्यमरः।२।६।२८॥ नप्त्री ३ पौत्रिका ४।

...इति रमसः॥
...पुत्रस्य पुत्र्या...
...नभा। इत्यमरः...
नभः, पुं, (नभति हिंसायाम्+प...
...शब्दरत्नावली॥...
...पुत्रविशेषः। इति...
...मन्वन्तरदेवविशेषः...
...कृष्णप्रणीतस्य पु...
...१५।२०॥)

नभः, [स्] क्ली, (नह्यते... "नहेर्दिव भश्च।" उण... भश्चान्तादेशः।) आका... २।१॥ (यथा, मनुः।...
"नैवेनोदयन्तमादित्यं नास्तं... नोपसृष्टं न वारिस्थं न म...

नभःक्रान्ती, [न्] पुं, (नभः... मस्यास्तीति। इनिः।) सिंह... माला॥

नभःप्राणः, पुं, (नभसः प्राण...) इति त्रिकाण्डशेषः॥

नभःसत्, [द्] पुं, (नभसि सीदति... क्विप्।) देवः। इति त्रिकाण्डशे...

नभःसरित्, स्त्री, (नभसः सरित् नदी...) इति त्रिकाण्डशेषः॥

नभःस्थितः, पुं, (नभसि स्थितः।) इति हेमचन्द्रः।४।२।...

नभश्चक्षुः, पुं, (नभसश्चक्षुरिव।) सूर्य्यः... शब्दमाला॥

नभश्चमसः, पुं, (नभसश्चमस इव।) चन्द्रः... चित्रापूपः। इन्द्रजालम्। इति मेदिनी। ... ३८॥

नभश्चरः, पुं, (नभसि चरतीति। चर+...) पक्षी। विद्याधरः। (यथा, रघुः।१८।६।
"नभश्चरैर्गीतयशाः स लेभे
नभस्तलश्यामतनुं तनूजम्॥")
मेघः। वायुः। इति मेदिनी। र, १४१।
(आकाशचारिणि, त्रि। यथा, ... २३।
"निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन वा॥")

नभसं, क्ली, (नभते शाकोतीति। "अभिनभिभ्यामसच्।" उणां।३।... असच्।) आकाशम्। यथा, "तस्य ... वर्ग..." सिंहादयो... मन्वन्तरदेवगणविशेष... वंशे। ०।१०।
"अङ्गिरा नभसः सर्व्व..."

नभसङ्गमः, पुं, (नभसं गच्छतीति। गम+...) खगः... २।५।३१॥

स्त्री, (नमस्करणम् ।) नमस्करणम् ।
र्वे । ८ । ९८ ।
...सुरैर्विधिवत्प्रयता स्याद्-
...नया मौर्व्विरिश्चिनारुणौ ।
...र्विस्मयविलम्बम्
...प्रणाममिमि नमस्ते ।"
(नमसि मेघाय साधुः । नमस् + "तत्र
" ४ । ४ । ९८ । इति यत् ।) मात्र-
इत्यमरः । १ । ४ । १७ । (यथा,
। १५२ । १ ।
नमो नमस्तेऽस्तु निरीक्ष्य मानि
...मयदा नोपदरुन्धकीर्त्तम् ।")
[स्] पुं, (आकाशस्थाद्यूर्द्धमिति श्रुतेः
...नुर्विशारदस्तेनात्प्रयस्यैति । नमस् +
...स्य घः ।) वायुः । इत्यमरः । १ ।
६१ (यथा, रघुः । ४ । ८ ।
...कम्मलीकस्य पुरुहृतनया मनः ।
...नातिशोषोपी नभस्वानिव दीपिका ।")
स्] पुं, (नभति हिनस्ति कीटादी-
नभ + "सर्व्वधातुभ्योऽसुन् ।" उणां ४ ।
इति असुन् ।) श्रावणमासः । (यथा,
१२ । ७८ ।
...र नभोऽम्बुधि मैथिली मौकशोभनः ।
...नस्यदोर्दृशिमस्वरुह इत्यानिरे ।")
...नभम् । नभः । विमलम्बुः । मतट्टम्बरः ।
...दिनी । सि, २६ । पलितस्पर्शम् । इति धरणी ।
स्त्री, (नभाति व्याप्नोतीति । नभ +
...शास्यघ ।" उणां । ४ । १५ । इति
।) नभः । इत्युणादिकोषः ।
, पुं, (नभसि व्याकाशे गज इव ।)
। इति त्रिकाण्डशेषः ।
, स्त्री, (नभसि गतिर्गमनम् ।) व्याकाश-
म् । यथा,—
...नोऽशुनिकटीनदयनानि नभोगती ।"
इति हेमचन्द्रः । ४ । ३८४ ।
, पुं, (नभसः शोभि प्रपूरयति नदा-
...नीनि । दुह प्रपूरणे + कः ।) मेघः । इति
...माला ।
, पुं. (नभसि द्वीप इव ।) मेघः । इति
...माला ।
, पुं, (नभसि धूम इव ।) मेघः । इति
...माला ।
, स्त्री, (नभसो नदी ।) स्वर्गङ्गा । इति
...प्रदीपः ।
, पुं, (नभसो मणिरिव ।) सूर्य्यः । इति
...चन्द्रः । २ । ८ ।
...मण्डलदीपः, पुं, (नभोमण्डले दीप इव ।)
...। यथा, तिथ्यादितत्त्वे ।
...नमस्कन्दरीयाय शिरोरत्नाय धूर्ज्जटे ।
...निर्व्वद्धमानाय नभश्चन्द्राय चारवे ।"
...पः, पुं, (नभसः अम्बु जलं पिवतीति । पा +
।) चातकपक्षी । इति हेमचन्द्रः । ४ । ३९५ ।

नभोरजः, [स्] क्ली, (नभसो रज इव ।)
अन्धकारः । इति शब्दमाला ।
नभोरेणुः, स्त्री, (नभसि रेणुरिव ।) कुज्-
झटिका । इति त्रिकाण्डशेषः ।
नभोलयः, पुं (नभसि लयो यस्य ।) धूमः । इति
शब्दरत्नावली ।
नभ्यं, त्रि, नभस इदमित्यर्थे यत्प्रत्ययः । नभसम्बन्धि ।
(नाभये हितम् । नाभि + "उगवादिभ्यो यत् ।"
५ । १ । २ । इति यत् । "नाभि नभञ्च ।" इति
नभादेशः । रथाङ्गम् । "नभ्योऽक्षः । नभ्य-
मञ्जनम् । रथनाभावेवेदम् ।" इति सिद्धान्त-
कौमुदी ।)
नभ्राट्, [ज्] पुं. (न भ्राजते इति । भ्राज दीप्तौ
+ क्विप् ।) मेघः । इति हेमचन्द्रः । २ । ७८ ।
नमः, [स्] अ, (नम शब्दनत्योः + भावे
असुन् ।) नतिः । इत्यमरः । ३ । ४ । १८ ।
(यथा, मार्कण्डेये ।
"नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।"
क्लीवलिङ्गेऽपि दृश्यते । यथा, भागवते । ३ ।
१९ । ८२ ।
"विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः ।")
त्यागः । रतम् । इत्युणादिकोषः । (क्ली,
अन्नम् । इति निघण्टुः । २ । ७ । वज्रम् । इति
निघण्टुः । २ । २० । स्तोत्रम् । यथा, ऋग्वेदे ।
७ । १९ । १ ।
"एता वो वश्मि नमसोर्ज्जो नपातमा हुवे ।")
नमतः, पुं, (नम्यते इति । नम + "भृमृदृशि-
यजीति ।" उणां । ३ । ११० । इति अतच् ।)
प्रभुः । धूमः । नटः । इत्युणादिकोषः ।
नमसः, पुं, (नमतीति । नम + "अत्यविचमि-
तमीति ।" उणां । ३ । ११७ । इति असच् ।)
अनुकूलः । इत्युणादिकोषः ।
नमस्तिः, त्रि, (नमः करोतीति । नमस् + "नमो-
वरिवः ।" ३ । १ । १९ । इति क्यच् । क्तः ।
"अस्य विभाषा ।" ६ । ४ । ५० । इति वा
यलोपः ।) कृतनमस्कारः । पूजितः । तत्-
पर्य्यायः । नमसितः २ अर्हितः ३ अप-
चायितः ४ अर्च्चितः ५ अपचितः ६ । इत्यमरः ।
३ । १ । १०१ ।
नमस्कारः, पुं. (नमः शब्दस्य कारः करणं यत्र ।)
प्रणामः । इति शब्दचन्द्रिका । (नमः कर-
णम् । नमस् + कृ + घञ् ।) नतिः । स च
त्रिविधः । कायिकः वाचिकः मानसिकश्च ।
यथा,—
"कायिको वाचिकश्चैव मानसस्त्रिविधः स्मृतः ।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः ।"
कायिकादिरपि त्रिविधो यथा,—
"प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यां धरणीं गत्वा शिरसा स्पृश्य मेदिनीम् ।
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः ।
जानुभ्यां क्षितिं स्पृष्ट्वा शिरसा स्पृश्य मेदिनीम् ।
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः ।
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा ।
अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते ।
या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
क्रियते भक्तियुक्तैर्व्वा वाचिकस्तूत्तमः स्मृतः ।
पौराणिकैर्व्वैदिकैर्व्वा मन्त्रैर्या क्रियते नतिः ।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा ।
यत्तु मानुषवाक्येन नमनं क्रियते सदा ।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ ।
इष्टमध्यानिष्टगतैर्म्मनोभिस्त्रिविधं पुनः ।
नमनं मानसं प्रोक्तमुत्तमाधममध्यमम् ।
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः ।
कायिकैस्तु नमस्कारैर्द्देवास्तुष्यन्ति नित्यशः ।
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः ।
प्रणाम इति विज्ञेयः स पूर्व्वं प्रतिपादितः ।"
इति कालिकापुराणे ७० अध्यायः ॥ * ॥
रात्रौ तन्निषेधो यथा,—
"रात्रौ नैव नमस्कुर्य्यात्तेनाशीरभिचारिका ।
अतः प्रातःपरं दत्त्वा प्रयोक्तव्ये च ते उभे ।"
इति महाभारतमिति केचित् ॥
नतिकरणम् । तत्तु करशिरःसंयोगादि । स्वाप-
कर्षबोधकव्यापारविशेषः । इति मुग्धबोध-
टीकायां दुर्गादासः ।
"सर्व्वे चापि नमस्कुर्य्युः सर्व्वावस्थासु सर्व्वदा ।"
अभिवादयेदित्यनुवृत्तौ प्रश्नः । नाप्रयतायाप्रयतश्च । इति शुद्धितत्त्वम् ।
"स्त्रियो नमस्या वृद्धाश्च वयसा मद्गुरेव ताः ।"
इति स्मृत्यर्थसारः ॥ * ॥
"देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सम्भ्रमात् ।
स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ ।
ब्राह्मणश्च गुरुं दृष्ट्वा न नमेद्यो नराधमः ।
यावज्जीवनपर्य्यन्तमशुचिर्म्मदनो भवेत् ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
"देवतायतनं दृष्ट्वा दृष्ट्वा तु दण्डिनं तथा ।
नमस्कारं न कुर्य्याद्यः प्रायश्चित्ती भवेन्नरः ।
सभायां यज्ञशालायां देवतायतनेषु च ।
प्रत्येकन्तु नमस्कारो हन्ति पुण्यं पुराकृतम् ।
उपविश्य नमेत् स्त्री दीर्घायुर्नामयो भवेत् ।
स स्त्री नरकं याति ब्राह्मणो याव्यधोगतिम् ।
दूरस्थं जलमध्यस्थं धावन्तं मदगर्व्वितम् ।
क्रोधवन्तं विजानीयात् नमस्कारञ्च वर्ज्जयेत् ।
पुष्पहस्तो वारिहस्तस्तैलाभ्यक्तो जलस्थितः ।
आशीःकर्त्ता नमस्कर्त्ता उभयोर्नरकं भवेत् ।"
इति कर्म्मलोचनम् ॥ * ॥
"मातुः पितुः कनीयांसं न नमेद्वयसाधिकः ।
नमस्कुर्य्याद्गुरोः पत्नीं भ्रातृजायां विमातरम् ।"
मनुः ।
"अभिवादयेत् पूर्व्वमाशिषं न प्रयच्छति ।
[illegible] तस्माद्द्वार्गं प्रपद्यते ।
[illegible] नृपान् चाण्डालिनि दारुनि ।
[illegible] स्त्रिये नारीसुतेन च ।"
इति मलमासतत्त्वम् ॥ * ॥

"गुरुपत्नीषु युवती नाभिवाद्येह पादयोः ।
कुर्व्वीत वन्दनं भूयो भगो योऽहमिति ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
अभिवादनशीलः स्यान्नित्यं वृद्धेषु धर्म्मतः ।
असावहम्भो नामेति सम्यक् प्रणतिपूर्व्वकम् ॥
आयुरारोग्यसिद्ध्यर्थं तन्द्रादिपरिवर्ज्जितः ।
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्व्वाक्षरः प्लुतः ।
यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥
व्यत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥
ब्राह्मणं कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु ॥"*॥
अभिवादनीया गुरवो यथा,—
"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ।
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ॥
माता मातामही गुर्व्वी पितुर्मातुश्च सोदराः ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियाम् ।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः ॥
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः ।
गुरून् दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ॥"

इति कूर्म्मपुराणे ११ अध्यायः ॥ *॥

अथ सप्तधा नतिलक्षणानि ।
"त्रिकोणमथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणम् ।
दण्डमष्टाङ्गमुग्रञ्च सप्तधा नतिलक्षणम् ॥
[...]ऐशानी वाथ कौवेरी दिक् कामाख्याप्रपूजने ।
[...]प्रशस्ता स्थण्डिलादौ च सर्व्वमूर्त्तिषु सर्व्वतः ॥
[...]त्रिकोणादियन्त्रस्याथ यदि पूर्व्वमुखो यजेत् ।
[...]क्षिणात् प्राग्भवीं गत्वा यत्रस्थां निर्द्दिशेत्तदा ।
[...]होतरासनः कुर्य्यात् साधको देवपूजनम् ।
[...]ा याम्यात्तु वायवीं गत्वा कुर्य्यात्तु संस्थितिम् ।
[...]त्याद्वायवीं गत्वा दिशं तस्याश्च प्राग्भवीम् ।
[...]ऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणवत् ।
[...]ीयो यो नमस्कारस्त्रिपुराप्रीतिदायकः ॥१॥
[...]वायवीं गत्वा वायव्यात् प्राग्भवीं ततः ।
[...]पि दक्षिणं गत्वा तां व्यक्त्वा प्रविश्य च ॥
[...]ो राक्षसीं गत्वा ततश्चाप्युत्तरां दिशम् ।
[...]ष तथाग्नेयीं भ्रमणं द्विस्त्रिकोणवत् ।
[...]ो यो नमस्कारः प्रीतिदः शिवदुर्गयोः ॥२॥
[...]वायवीं गत्वा तस्माद्वाग्रस्य दक्षिणम् ।
[...]ोऽसौ नमस्कारः सोऽर्द्धचन्द्रः प्रकी-
र्त्तितः ॥ ३ ॥
[...]दक्षिणं कृत्वा वर्त्तुलाकृतिसाधकः ।
[...] कथ्यतेऽसौ प्रदक्षिण इति द्विजैः ॥४॥
[...]ानमन्यानं पश्चात्कृत्वा नमस्कृतिः ।
[...]विना या तु विनत्य क्षिति दण्डवत् ।
[...]ते देवैः सर्व्वदेवौघमोददः ॥ ५ ॥
पूर्व्ववद्दण्डवद्भूमौ निपत्य हृदयेन तु ।
चिबुकेन मुखेनाथ नासया हनुकेन च ।
ब्रह्मरन्ध्रेण कर्णाभ्यां यद्भूमिस्पर्शनं क्रमात् ।
तदष्टाङ्ग इति प्रोक्तो नमस्कारो मनीषिभिः ॥६॥
प्रदक्षिणत्रयं कृत्वा साधको वर्त्तुलाकृतिः ।
ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यः स्यान्नमस्कृतौ ।
स उग्र इति देवौघैरुच्यते विष्णुतुष्टिदः ॥ ७ ॥
नदीनां सागरो यावद्द्विपदां ब्राह्मणो यथा ।
नदीनां जाह्नवी यावद्देवानामिव चक्रधृक् ।
नमस्कारेषु सर्व्वेषु तथैवोग्रः प्रशस्यते ॥
त्रिकोणाद्यैर्नमस्कारैः कृतैरेव तु भक्तितः ।
चतुर्व्वर्गं लभेद्भक्तो न चिरादेव साधकः ॥
नमस्कारो महायज्ञः प्रीतिदः सर्व्वतः सदा ।
सर्व्वेषामपि देवानामन्येषामपि भैरव ! ॥
योऽसावुग्रो नमस्कारः प्रीतिदः सततं हरेः ।
महामायाप्रीतिकरः स नमस्कारोत्तमः ॥"

इति कालीपुराणम् ॥

नमस्कारी, स्त्री, (नमस्कारः कारञ्जलिरिव पत्र-सङ्कोचोऽस्यस्या इति । अच् । गौरादित्वात् ङीष् ।) खदिरिकाशाकः । लाजालु इति ख्यात इति केचित् ॥ किन्तु रभसेन वराह-क्रान्ता लज्जालुः समङ्गा जलकारिकेति खदिरि-कायाम् । सङ्कोचपत्री लज्जालुरिति लज्जा-लुकायां पठितम् । अञ्जलिरूपपत्रत्वादञ्जले-र्नमस्कारयञ्जकत्वात् नमस्कारशीलेव नमस्कारी । इत्यमरटीकायां भरतः ॥ (यथास्याः पर्य्यायो वैद्यकरत्नमालायाम् ।
"गण्डकाली नमस्कारी समङ्गा खदिरी कथित् ॥")

नमस्यः, त्रि, (नमस्य नामधातुः + कर्म्मणि यत् ।) नमस्कारयोग्यः । यथा,—
"स्त्रियो नमस्या दृष्टाश्च वयसा मधुरेव ताः ॥"

इति मलमासतत्त्वम् ॥

नमस्या, स्त्री, (नमस्य + भावे अः । स्त्रियां टाप् ।) पूजा । इत्यमरः । २ । ७ । ३५ ॥

नमस्यितः, त्रि, (नमःकृतमिति । नमस् + "नमो-वरिवः इति ।" ३ । १ । १९ । इति क्यच् ।) पूजितः । इत्यमरः । ३ । १ । १०१ ॥

नमितः, त्रि, नमोऽस्य जात इत्यर्थे इतच्प्रत्यय-निष्पन्नः । जातनमस्कारः । नामितः । यथा,—
"अयः शालग्रामाश्मनगरिमोद्गारसरसाः
सुधौः को वा कौमोरपि नमितमूर्द्धा न पिबति ॥"

इति विदग्धमाधवनाटकम् ॥

नमुचिः, पुं, (न मुञ्चतीति । मुच + इन् । स च किन् ।) कन्दर्पः । दैत्यभेदः । इति मेदिनी । चे, १४ ॥ यथा,—
"काश्यपस्य दनुर्नाम भार्य्यासीद्द्विजसत्तम ! ।
तस्यास्तु द्वौ सुतावास्तां सहस्राक्षाद्बलाधिकौ ।
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः ।
तृतीयो नमुचिर्नाम महाबलसमन्वितः ॥"

इति वामने ५२ अध्यायः ॥

(इन्द्र एनं निहतवान् । यथा, महाभारते । ९ । ४३ । ३३—३६ ।

"नमुचिर्नामासुरः सर्व्व[...]
रोन्द्रः सख्यमकरोत् समय[...]
न चार्द्रेण न शुष्केण न रात्[...]
वधिष्याम्यसुरश्रेष्ठ ! सखे ! स[...]
एवं स समयं कृत्वा दृष्ट्वा नीह[...]
चिच्छेदास्य शिरो राजन्नपां फे[...]
तच्छिरो नमुचेश्छिन्नं पृष्ठतः प्र[...]
भो मित्रघ्न ! पापेति ब्रुवाणं[...]

नमुचिद्विट्, [ष्] पुं, (नमुचिं द्वे[...]
"सत्सूद्विषेति ।" ३ । २ । ६१ । [...]
इन्द्रः । यथा, माघे । १ । ५१ ।
"विरुद्ध चक्रे नमुचिद्विषा वशी
य इत्थमस्वास्थ्यमहर्द्दिवं दिवः ॥"

नमुचिसूदनः, पुं, (नमुचिं दैत्यविशेषं [...]
सूदि + ल्युः ।) इन्द्रः । इत्यमरः । १ । [...]

नमेरुः, पुं, (नम्यते इति । नम + [...]
एरुः ।) वनाश्वः । इति मूरिप्रयोगः ।
पुन्नागः । इति राजनिर्घण्टः । (यथा, [...]
४ । ७४ ।
"विश्रयसुर्नमेरूणां छायास्वध्यास्य [...]

नमोगुरुः, पुं, (नमस्करणीयो गुरुः ।)
गुरुः । ब्राह्मणः । इति कश्चित्

नम्ब, गतौ । इति कविकल्पद्रुमः । (भ्वा०-
सेट् ।) ओष्ठ्यवर्गशेषोपधः । नम्बति ।
दुर्गादासः ॥

नम्रः, त्रि, (नमतीति । नम + " [...]
३।२।१६७। इति रः ।) नतः
(यथा, पञ्चतन्त्रे । २ । १९ [...]
"यन्नम्रं सरलञ्चापि तच्चापत्[...]
धनुर्मित्रं कलत्रञ्च दुर्लभं शुद्ध[...]

नम्रकः, पुं, (नम्र इव प्रतिकृतिः [...]
कृतौ ।" ५ । ३ । ९६ । इति क[...]
इति भावप्रकाशः ॥ (नम्र इव । [...]
नते, त्रि ॥)

नय, ङ गतौ । इति कविकल्पद्रुमः ।([...]
सकं-सेट् ।) ङ, नयते । इति दुर्गा[...]

नयः, पुं, (नीयतेऽनेनेति । नी + "एरच् [...]
५६ । इत्यच् ।) नीतिः । तत्पर्य्यायः [...]
इत्यमरः । ३।२।९ ॥ (यथा, पञ्चतन्त्रे । [...]
"कथञ्चिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता [...]
द्यूतविशेषः । इति मेदिनी । ये, १४ ॥ नै[...]
इति हेमचन्द्रः ॥ न्याय्ये नेतरि च
शब्दरत्नावली ॥

नयनं, क्ली, (नीयते दृष्टिविषयोऽनेनेति ।
करणे ल्युट् ।) चक्षुः । इत्यमरः । २ । ६ [...]
(यथा, मार्कण्डेये । १८ । ४० ।
"नीलोत्पलाभनयनां पीन[...]
नी च प्रापणे इत्यस्माद्भावे [...]
प्रापणम् । (आनयनम् । यथा, [...]
१२० । ११ ।
"सख्ये हितञ्च देवेश ! भूयस्ते [...]
नयनं पारिजातस्य द्वारकां मम रोचते ॥"

तीयतेऽनयेति। नी + करणे ल्युट् +
नीनी। इति शब्दचन्द्रिका ॥
ं, (नयनयोरुत्सवो यस्मात्।)
ति शब्दरत्नावली ॥ चक्षुरुत्सवश्च ॥
, (नयनयोरुपान्तः प्रान्तभागः।)
ति राजनिर्घण्टः ॥
. (नयनयोरौषधम्।) पुष्पकासी-
हेमचन्द्रः। ४। १२३ ॥
(नयस्य पीठीव।) चषकाङ्गम्।
डमेयः ॥ हक् इति भाषा ॥
ं, (नये नीतौ विशारदो विज्ञः।)
ः। यथा,—
वेधितस्तद्वो देशभाषाविशारदः।
कः कार्य्यो राज्ञा नयविशारदः ॥”
इति मात्स्ये ८८ अध्यायः ॥
ाति प्रापयति आनन्दमिति। नृ
च्।) राजकर्पूरलम्। इति
५२ ॥
याति इति। नृ + अच्।) मनुष्यः।
। ६। १ ॥ (यथा, मनुः। १। ८६।
नराः श्रेष्ठा नरेषु ब्राह्मणाः
स्मृताः ॥”)
ति राजनिर्घण्टः ॥ (यथा, देवी-
। २। १६।
दि दैत्येन्द्र! नास्यास्ति मरणं ध्रुवम्।
हाभाग! त्वयि ते नरिषातर! ॥”)
महादेवः। यथा, महाभारते।
११५।
शुद्धश्च तपःस्रष्टा रविर्नरः ॥”)
इति मेदिनी। रे, ५२ ॥ (नर-
न्नादस्य तथात्वम्।) शङ्कुः। इति
॥ अथ नरककारणम्। “नितुः
रः ॥” अन्यच्च। तन्त्रेऽपि।
निर्यो नित्यं कुम्भीपाकेषु कल्पकान्।
दं दूनं केचिदाहुर्मनीषिणः ॥
मदान्ते मोक्षा तत्परं नरः।
न्यच्च स्यादभयं नात्र संशयः ॥”
इति शाङ्गीतरक्षेत्रे १५ अध्यायः ॥
नासौ हरेरधमुतो धर्म्मपुत्रःऋषिः।
भागवते। ६। ५। १५।
स्थितौ तत्र नरनारायणाश्रमी।
दृष्ट्वा चक्षाते तत उत्तमम् ॥”
स्येषु सर्व्वेष विद्यते नरकम्। ॥
येः। यथा, विष्णुपुराणे। २। ६। २८।
रत्नोऽपि ह्यधःशून्यनरकान् ॥”)
(इत्यादि लोकं आनयतीति। नृ +
नः संज्ञायां वुन्।” उणां। ५। ३५।
) देवताविशेषः। इत्युणादिकोषः।
स्तु कं हरो यत्र।) देहविशेषः।
र्भे वराहदेवाज्जातः। यथा,—
या भौमाया गर्भे वीर्य्येण वीर्य्यवान्।
सतो भूतो देवशत्रोऽपि दोर्द्दरः ॥”

तस्य नामकारणं यथा,—
“मातृवत्स शिरस्तत्र स्तत्र प्राप्य बालकः।
स्वशिरस्तत्र विन्यस्य यदंकस्थौ भयं तदा ॥
नरस्य शीर्षे स्वशिरो निधाय स्थितवान् यतः।
तस्मात्तस्य मुनिश्रेष्ठो नरकं नाम वै व्यधात् ॥”
तस्य राज्यं यथा,—
श्रीभगवानुवाच।
“करतोया सदागङ्गा पूर्व्वभागावधिश्रिता।
यावल्ललितकान्तास्ति तावद्देशं पुरं तदा ॥
अत्र देवी महामाया योगनिद्रा जगत्प्रसूः।
कामाख्यारूपमादाय सदा तिष्ठति शोभना ॥
अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः ॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्व्वदा।
चन्द्रः सूर्य्यश्च सततं वसतोऽत्रैव पुत्रक! ॥
सर्व्वे क्रीडार्थमायाता रहस्यं देशमुत्तमम्।
अत्र श्रीः सर्व्वतोभद्रा भोग्यमत्र सदा बहु ॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा ॥
अत्र त्वं वस मद्दत्ते त्वभिषिक्तो मया स्वयम्।
इत्युदारः महामाये राजा भूत्वा महाबल! ॥”
तस्य महिषी माया यथा,—
“ततो विदर्भराजस्य पुत्रीं मायाह्वयां हरिः।
पुत्रार्थे वरयामास नरकस्य कृतां गुणैः ॥
तामुद्वाह्य कृतीर्न्मिस्तस्मिन् पुरवरे स्वयम्।
तथा कर्म्म स्वतनयं राज्येनाभ्यषेचयत् ॥”
तस्य पुत्रा यथा,—
“अनुमध्याञ्च मायायां कालेन नरकः क्रमात्।
भगदत्तं महाशीर्षं मदवन्तं सुमालिनम् ॥
चतुरो जनयामास पुत्रांस्तांश्च क्षितेः सुतः।
महाबलान् महावीर्य्यान् देवैरप्यैदुरासदान् ॥”
इति कालिकापुराणे ३८ अध्यायः ॥
नारकी यातनास्थानम्। तद्यथा यथा,—
“तातालातालश्च महानो लोकालाश्च यदन्तरम्।
सुचिरं यानि स्यन्ते सुयानि चतुर्द्दश ॥
अष्टाविंशति विख्यातास्ते नरककोटयः।
नरकाणामधस्तात् पुनः सप्तादिमयतः ॥
तस्याधस्तादमावास्या ततः कर्म्मणो महान्।
नरधी धर्म्मचक्रस्य देहं धार्म्मिते क्रमात् ॥”
इति वह्निपुराणे नरकवर्णनाध्यायः ॥
तत्पर्य्यायः। नारकः २ निरयः ३ दुर्गतिः ४ ।
इत्यमरः। १। ८। १ ॥ * ॥ नरकसंख्या यथा,—
“उद्दिष्टं नरकाः सन्त! घोराः महाभयानकाः।
चत्वारिंशत्कर्म्म हैरी प्रकारं महितोऽपि ॥”
तत्राहं नाथाद्वे सार्त्तान्तरकाख्य पुराणं।
“अवीचिः कृमिभक्षश्च तथा वैतरणी महान्।
कूटशाल्मलिरप्युग्रः सुश्रुतसंज्ञक एव ॥
निरुच्छ्वासः पूतिमांसः कृष्णसूत्रं निगद्यते ॥
[illegible]
[illegible]
[illegible]
[illegible]

कुम्भीपाकः क्षुरस्थेयः सञ्जीवनसुतापनम् ॥
कालसूत्रं महापङ्कं शीतोष्णं क्षुरमेव च।
अम्बरीषं तथा घोरं महारौरवसंज्ञकः ॥
सूचीमुखेक्षुयन्त्रञ्च तैलं ताम्रघटस्तथा।
असिपत्रं तथा शाल्मं भूमिर्वासगयहारिका ॥”
इति देवीपुराणम् ॥
नरकागामिनो यथा,—
यम उवाच।
“न गच्छन्ति नरा घोरान् बहवोऽधर्म्मनिर्म्मि-
तान्।
यथाश्च सुबहूंस्तत्र प्राप्नुवन्ति तपोधन! ॥
विस्तरेण तु तत् सर्व्वं ब्रवीमि मुनिसत्तम! ॥
श्रूयतां तन्महाभाग! श्रुत्वा चैवोपधारय ॥
नाग्निचिन्नरकं याति न मनुष्यो न भूमिदः।
शूरश्च शतवर्षी च वेदानाञ्चैव पारगः ॥
पतिव्रता न गच्छन्ति सत्यवाक्याश्च ये नराः।
अजिताश्चाप्यदाश्चैव स्वामिभक्ताश्च ये नराः ॥
तिलं गाश्च हिरण्यञ्च पृथिवीञ्चापि शाश्वतीम्।
ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः ॥
स्वदारनिरता दान्ताः परदारविवर्ज्जकाः।
सर्व्वभूतात्मभूताश्च सर्व्वभूतानुकम्पकाः ॥
न गच्छन्ति तु तं देशं यानिष्ठं तमसावृतम्।
यातनास्थानसम्पूर्णं घोरामग्निभयप्रदम् ॥
आगमस्यो हिता ये च ये च निष्ठाम्बरं गताः।
उदासीना न गच्छन्ति मात्सर्य्यं च इता नराः ॥
न गच्छन्त्यथ दातारः सर्व्वभूतहिते रताः।
शुश्रूषका मातृपित्रोर्न्न गच्छन्ति न संशयः ॥
अहिंसका न गच्छन्ति ब्रह्मचर्य्यव्रतस्थिताः।
नतिमन्तो दानवन्तो हितभक्ताश्च ये नराः ॥
यथोक्तं यज्ञदानाश्च सत्यपालिन एव च।
आनुशंस्यपरा ये च ये हिता आविहिंसकाः ॥
गुरुविद्यानुगाश्च सनिनो मौनवर्जिताः।
नित्यस्वाध्यायिनो दान्ताः सदा सन्ध्याश्च ये नराः ॥
मानवान् पूजयन्तो ये आत्मभावेन भाविताः।
स्वधर्म्मे युक्ता ये च न गच्छन्ति हृषीकेशाः ॥
ब्राह्मणा अनरत्नेष प्राप्नुवन्ति न संशयः ॥
निराशाः सर्व्वकामेभ्यो निराशाः हरिनिःस्पृहाः।
न गच्छन्ति हि तं घोरं पथ हि नानवर्ज्जिताः ॥”
इति वराहपुराणम् ॥ * ॥
नरकगामिनो यथा,—
नारद उवाच।
“पुनर्ब्बैलोक्ये सर्व्वाणि कर्म्माणि ये तु कुर्वन्ति हि।
कर्म्मणैव तु कार्य्येषु दैवपूर्व्वे भूमिप! ॥
इति पृथक् सर्व्वं मनुजान् ब्राह्मणान्निरवकः
क्रमः।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

…तीयाश्च मित्राणां ते वै निरयगामिनः ॥
मायका दुषकाश्चैव समयानाञ्च दूषकाः ।
ये प्रव्रजितमाश्चैव ते वै निरयगामिनः ॥
वृत्तिच्छेदं गृहच्छेदं दारच्छेदञ्च पार्थिव ।
मित्रच्छेदं तथाशायाः कृत्वा नरकगामिनः ॥
विषमव्यवहाराश्च विषमाश्चैव वृत्तिषु ।
लाभेषु विषमाश्चैव नरा निरयगामिनः ॥
क्षमाघ्नं कृतनिर्व्वेध्यं कृतभक्तं कृतघ्नकम् ।
भेदैर्ये वर्त्तयन्ति ते वै निरयगामिनः ॥
द्यूतसंव्यवहाराश्च निष्परीषाश्च मानवाः ।
प्राणिहिंसाप्रवृत्ताश्च ते वै निरयगामिनः ॥
वेदविक्रयिणश्चैव वेदानाश्चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥
केशविक्रायका राजन् ! विषविक्रायकाश्च ये ।
क्षीरविक्रायकाश्चैव ते वै निरयगामिनः ॥
चातुराश्रम्यबाह्याश्च श्रुतिबाह्याश्च ये नराः ।
विकर्म्मभिश्च जीवन्ति ते वै निरयगामिनः ॥
ब्राह्मणानां गवाश्चैव कन्यानाञ्च महामते ! ।
येऽन्तरं यान्ति कार्य्येषु ते वै निरयगामिनः ॥
शस्त्रविक्रायकाश्चैव कर्त्तारश्च महीपते ! ।
शल्यानां धनुषाश्चैव ते वै निरयगामिनः ॥
शिलाभिः शङ्कुभिर्व्वापि श्वभ्रैर्व्वा मनुजर्षभ ! ।
ये मार्गमनुरुन्धन्ति ते वै निरयगामिनः ॥
अगोप्तारश्च राजानो बलिषड्भागतस्कराः ।
समर्थाश्चाप्यदातारस्ते वै निरयगामिनः ॥
क्षान्तान् दान्तानथ प्राज्ञान् दीर्घकालसहोषि-
तान् ।
…त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः ॥
…बालानामथ वृद्धानां दासानाञ्चैव ये नराः ।
…अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिनः ॥
…एतत् कथितं राजन् ! धर्म्माधर्म्मविनिर्णयम् ।
…दृष्ट्वा पुरुषः कर्म्म धर्म्ममेव समाचरेत् ॥"
इति पाद्मे स्वर्गखण्डे २४ अध्यायः ॥
…कविशेषगामिपापिनो यथा,—
…साक्षी तथा सम्यक् पक्षपातेन यो वदेत् ।
…यदनृतं वक्ति स नरो याति रौरवम् ॥
…पुरहर्त्ता च गोघ्नश्च दमितस्तम ! ।
…ति नरके रोधे यश्चोच्छ्वासनिरोधकः ॥
…मद्यपो हर्त्ता सुवर्णस्य च शूकरे ।
…नरके यश्च तैः संसर्गमुपैति वै ॥
…यष्टा तप्ते तथैव गुरुतल्पगः ।
…सगामी हन्ति राजभटांश्च यः ॥
…यकृद्रथ्यपालः केशरिविक्रयी ।
…पच्यन्ते यश्च भक्तं परित्यजेत् ॥
…ः ।'
…पि गत्वा महाज्वाले निपात्यते ।
…र्त्ता यो यश्चाक्रोष्टा नराधमः ॥
…श्च वेदविक्रायकश्च यः ।
…ञ्च श्वाने यान्ति लवणं द्विज ! ॥
…पतति मर्य्यादादूषकस्तथा ।
…ष्टा रजदूषयिता च यः ॥
…मे कृमीशे च दुरिष्टकृत् ॥

पित्रदेवातिथीन् यस्तु पर्य्युपास्ति नराधमः ।
लालाभक्षे स यातुग्रे शरकर्त्ता च वेधके ॥"
'पर्य्युपास्ति परित्यज्य भोक्ता गृहस्थे ।'
करोति कर्णिनो यस्तु यस्तु खड्गादिकृन्नरः ।
प्रयान्ति ते विशसने नरके भृशदारुणे ।
असत्प्रतिग्रहीतारो नरके चाप्यधोमुखे ।
अयाज्ययाजकश्चैव तथा नक्षत्रसूचकः ।
वेगी पूयवहश्चैको याति मिष्टान्नभुङ्नरः ॥
'वेगी मायकारी । पुत्रादीन् वर्ज्जयित्वा एक
एव मिष्टान्नभुक् ।'
लाक्षामांसरसानाञ्च तिलानां लवणस्य च ।
विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! ॥
मार्ज्जारकुक्कुटच्छागान् श्वशृगालविहङ्गमान् ।
पालयन्नरकं याति तमेव द्विजसत्तम ! ॥
रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा ।
सूची माहिषकश्चैव पर्व्वकारी च यो द्विजः ॥
'पर्व्वी जीवति आराभ्यासः कुण्डः तस्य भोजी
माहिषो महिषीपभोजी । यथा,—
महिषीत्युच्यते भार्य्या भोगोपार्ज्जितं धनम् ।
उपजीवति यस्तस्याः स वै माहिषकः स्मृतः ॥
इति स्मृतिः ॥
पर्व्वकारी धनादिलोभेनापर्व्वसु अमावास्या-
दिक्रियाप्रवर्त्तकः ।'
अगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः ।
रुधिरान्धे पतन्त्येते सोमं विक्रीयते च ये ॥
मधुहा ग्रामहन्ता च याति वैतरणीं नरः ।
रेतःपानादिकर्त्तारो मर्य्यादाभेदिनश्च ये ॥
ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये ।
असिपत्रवनं याति वनच्छेदी वृथैव यः ॥
औरभ्रिको मृगव्याधो वह्निज्वाले पतन्ति वै ।
यान्त्येते द्विज ! तत्रैव यश्चापाकेषु वह्निदः ॥
व्रतेषु लोपको यश्च स्वाश्रमाद्विच्युतश्च यः ।
सन्दंशयातनामध्ये पततस्तावुभावपि ॥
दिवास्वप्नेषु स्कन्दन्ति ये नरा ब्रह्मचारिणः ।
पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥
एते चान्ये च नरकाः शतशोऽथ सहस्रशः ।
येषु दुष्कृतकर्म्माणः पच्यन्ते यातनागताः ॥
तथैव पापान्येतानि तथान्यानि सहस्रशः ।
भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ॥
वर्णाश्रमविरुद्धञ्च कर्म्म कुर्व्वन्ति ये नराः ।
कर्म्मणा मनसा वाचा निरयेषु पतन्ति ते ॥
अधःशिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः ।
देवाश्चाधोमुखान् सर्व्वानधःपश्यन्ति नारकान् ॥
स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः ।
धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् ॥
सहस्रभागाः प्रथमा द्वितीयानुक्रमास्तथा ।
सर्व्वे ह्येते महाभाग ! यावन्मुक्तिसमाश्रयाः ॥
यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः ।
पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ॥"
इति विष्णुपुराणे । २ । ६ । ७—१२ ॥
अपि च ।
"कथयामि विचित्राणां कर्म्मणां विविधा गतीः ।

…नाः यमुन मयारा…
नि:क्रामित:, त्रि, (निर् वा निस्+क्रम+णिच्+क्त: ।) निष्क्रामित: । इत्यमरटीकायां सारसुन्दरी ॥

नि:क्षत्र:, त्रि, (निर्गत: क्षत्र: क्षत्रियो यत्र ।) क्षत्रियशून्यदेशादि । यथा,—

"अथ मारे मोऽयमर्मे पश्यन् प्रबुद्धो नृपान् ।
नि:क्षत्रा: कृपिती नि:क्षत्रामकरोन्महीम् ॥"

इति श्रीभागवतप्रथमस्कन्ध: ॥

नि:प्रभ:, त्रि, निष्प्रभ: । निर्गता प्रभा यस्येति ... स तु कस्यपि वेति विभाषया विसर्गस्य ... भाव: । इति व्याकरणम् ॥

नि:शब्द..., त्रि, ... ॥

[illegible]

र्, स्त्री, (निर्निश्चितं सेव: । "बहुगुर- सुरेति ।" १ । १ । ७७ । इति निपातनात् ।) गुणम् । (यथा, भागवते । १।१।२० ।
भगवत्तं राम पुराणं प्रकर्षणमितम् ।
न:श्रीरघुविरं चकार भगवानपि: ।
वैदादौ गीयमा धर्मं सद्ययनं परम् ।")
: । (यथा, मनु: । १२ । ८३ ।
ध्यानमवीयमाणमिन्द्रियाणाञ्च संयम: ।
गुरुसेवा च नि:श्रेयसकरं परम् ।")
। बहुमान: । भक्ति: । इति शब्दरत्ना-
।
र्, पुं, (निर्निश्चितं श्रेयो मङ्गलं यस्मात् ।)
इति मेदिनी । सं, ५६ ।
द, (निर्गतं समं यत्र । "निरदुःखप्रभृ- ।" ८ । १ । १७ । इत्यव्ययीभावत्वम् ।
दुर्गं: इति यावत् ।) निन्दा । तत्-
: । गर्हणम् । दु:षमम् ३ । इत्यमर: । ३ ।
६ । मेदिनी । इति शब्दरत्नावली ।
, त्रि, (निर्गतास्ति सङ्गो यत्र ।) मेलन-
: । यथा, विष्णुपुराणे । १ । २ । ५२ ।
"सङ्गस्य सङ्गाद्भवतु यो मे
समादिदोषो सुविनीतोऽस्ति तेन ।
नि:सङ्गता मुक्तिपदं यतीनां
सङ्गादशेषा: प्रभवन्ति दोषा: ।"
र्भिर्निर्दिष्टत्वात् । यथा,—
कर्मैव कुर्वाणो नि:सङ्गो मितमोहनै: ।
र्मसिद्धिं लभते रोचनार्थां मधुस्रुति: ।"
मतमास्तस्य श्रीभागवते वाक्यस्कन्धवच- ।
:, त्रि, (निर्गतास्ति सन्धिर्यत्र ।) दृढ: ।
विकाण्डशेष: । सन्धिरहितश्च ।
त:, पुं, (निर्गतास्ति सम्पातो गमनागमनं ।) निशीथ: । इति त्रिकाण्डशेष: । (गमना-
गमरहित:, त्रि । यथा, हरिवंशे । ८० ।
—६२ ।
दुष्प्रचारेण दूषितं तहनं महत् ।
निर्गतैर्वापि सेवते वनहस्तिभि: ।
म्पात: क्रत: पश्चात्तेन तद्विषयाश्रय: ।")
र्, स्त्री, (निर् + सृ + ल्युट् ।) सरणम् ।
: । गेहादितलम् । निर्वाणम् । निर्गम: ।
हेमचन्द्र: । (यथा, देवीभागवते । ४ ।
२८
नाशे महद्दु:खं दग्भार्गनिवासनम् ।
नि:सरणे दु:खं योनियन्त्रे विदारणे ।")
:, पुं, (निर्गत: सारो यस्मात् ।) शाखोट-
: । इति शब्दचन्द्रिका । श्योनाकप्रभेद: ।
राजनिर्घण्ट: । साररहिते, त्रि । यथा,—
यो कदलीस्तम्भनि:सारे संसारे सारमार्गणम् ।
करोति स संमूढो जलबुद्बुदसन्निभे ।"
इति उद्भटवचनम् ।
मनु नि:सारमनित्यं दु:खभाजनम् ।
निर्वेदं प्रयात्विन्दु: प्रयातित्वहि भवति ।

यदैवोत्पद्यते सारासि:सारं जगदब्धया ।
पुदलाभिन् निलीयन्ते महाप्रलयसङ्गमे ।
उत्पत्तिप्रलयाभ्याम् यद्गामि:सारतां हरि: ।
प्रभवे दर्शयामास भावेन जगतां पति: ।"
इति कालिकापुराणे २७ अध्याय: ।

नि:सारणं, क्ली, (निर् + सृ + णिच् + भावे ल्युट् ।) नि:सरणम् । (नि:सार्यतेऽनेनेति । निर् + सृ + णिच् + करणे ल्युट् ।) गवादीनां प्रवेशनिर्ग- मादिपथ: । इति शब्दरत्नावली ।

नि:सारा, स्त्री, (निर्गतास्ति सारो यस्या: ।) कदलीवृक्ष: । इति राजनिर्घण्ट: ।

नि:सारित:, त्रि, (निर् + सृ + णिच् + कर्मणि क्त: ।) बहिष्कृत: । तत्पर्याय: । अपकृत: २ निष्कासित: ३ । इति जटाधर: । साराभाव- वांश्च ।

नि:स्नेह:, त्रि, (निर्गतास्ति स्नेहो यस्य ।) स्नेह- शून्य: । यथा । नि:स्नेहं कीदृशमित्यादि स्मृति: । (यथा, रामायणे । २ । ३९ । ७ ।
"अहो दशरथो राजा नि:स्नेह: स्वसुतं प्रति ।"
स्नेहहीन: । यथा, मनु: । ५ । ८० ।
"मासं मुङ्क्त्वावलिं स्नेहं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु नि:स्नेहं गामालभ्यार्कमीक्ष्य वा ।"
तैलविहीनै: । यथा, पञ्चतन्त्रे । १ । ६१ ।
"शिरसा विधृता नित्यं स्नेहेन परिपालिता: ।
केशा अपि विरज्यन्ते नि:स्नेहा: किं न सेवका: ।")

नि:स्नेहा, स्त्री, (निर्गत: स्नेह: रसो यस्या: ।) अतसी । इति त्रिकाण्डशेष: । (अनुरागरहिते, त्रि । यथा, पञ्चतन्त्रे । ४ । ३७ ।
"यदर्थे स्वकुलं त्यक्तं जीवितार्द्धञ्च हारितम् ।
सा मां त्यजति नि:स्नेहा क: स्त्रीणां विश्वसे- न्नर: ।")

नि:स्राव:, पुं, (नि:स्रवतीति । निर् + स्रु + ण: ।) भक्तरस: । भक्तसमुद्भवमण्ड: । माड् इति चैन् इति च भाषा । तत्पर्याय: । आचाम: २ मासर: ३ । इत्यमरहेमचन्द्रौ ।

नि:स्व:, त्रि, (निर्गतास्ति स्वं धनं यस्य ।) दरिद्र: । इत्यमर: । ३ । १ । ४९ । तस्य लक्षणं यथा,—
"स्थूलाकारौ विरूक्षौ च वक्रौ माद्रौ शिरालकौ ।
संशुष्कौ पाण्डुरनखौ नि:स्वस्य विरलाङ्गुली ।"
इति गारुडे सामुद्रकम् ।
ज्ञातिरहितश्च ।

निकटं, त्रि, (नि समीपे कटतीति । नि + कट + अच् ।) अदूरम् । तत्पर्याय: । सनीडम् २ आसन्नम् ३ सन्निकृष्टम् ४ सनीडम् ५ । इत्य- मर: । ३ । १ । ६६ । अभ्याश: ६ सदेश: ७ अन्त: ८ अन्तिक: ९ समर्याद: १० सवेश: ११ अभ्यास: १२ अभ्यर्ण: १३ अविदूर १४ उप- कण्ठ: १५ अभित: १६ । इति शब्दरत्नावली । (यथा, शान्तिशतके । ३ । २ ।
"दिवसरजनीतूर्यध्वानै: पतद्भिरनारतं
वहति निकटे काल: स्रोत:समस्तभयावहम् ।

इह हि पततां नास्त्यालम्बो न चापि निवर्त्तनं
तदिह महतां कोऽयं मोहो यदेव महाविल: ।"
तद्वैदिकपर्याय: । तलित् १ आसात् २ अम्ब- रम् ३ तुर्वशे ४ अस्तमीके ५ आके ६ उपाके ७ अर्वाके ८ अन्तमानाम् ९ अवमे १० उपमे ११ । इत्येकादशान्तिकनामानि । इति वेदनिघण्टौ २ अध्याय: ।

निकर:, पुं, (निकरोति व्याप्नोतीति । नि + कृ + अच् ।) समूह: । इत्यमर: । २ । ५ । ३९ । (यथा, कलाविलासे । २ । २६ ।
"इत्यादिसुखबुद्धेरसमञ्जसवर्त्मनें रण्ड: क्रत्वा ।
गृह्णाति कनकनिकरं हृत्वंसवामगौरवे: यामा: ।")
सार: । न्यायदेयधनम् । निधि: । इति मेदिनी । रे, १७२ ।

निकर्षणं, क्ली, (निर्गतास्ति कर्षणं यत्र ।) सन्नि- वेश: । इत्यमर: । २ । ३ । १९ । नगरादिषु दिगादिपरिच्छिन्नप्रदेश: । इति भरत: । पूर्व्व- दिगाद्यवच्छिन्नगृहादयामपीति कलिङ्ग: । पुरा- देर्वहिर्विहरणभूमि: । इति स्वाम्यादय: । प्राङ्गणादिसन्निवेश: । इति सारसुन्दरी ।

निकष:, पुं, (निकषति घिनष्टि स्वर्णादिकं यत्रेति । नि + कष + "गोचरसञ्चरेति ।" ३ । ३ । ११९ । इति चकारात् घ: ।) शाण: । इत्यमर: । २ । १० । ३२ । कष्टिपातर इति भाषा) (यथा, रघु: । १७ । ४६ ।
"निकषे हेमरेखेव श्रीरासीदनपायिनी ।") ।

निकषा, स्त्री,(निकषति हिनस्तीति । कष हिंसे + पचाद्यच् । ततष्टाप् ।) राक्षसमाता । इत्य- मर: । सा सुमालिकन्या विश्रवसो भार्या च । इति रामायणम् ।

निकषा, अ, (नि + कष गतौ + "आ: समिन्- निकषिभ्याम् ।" उणां । ४ । १७४ । इति आ: ।) निकटम् । इत्यमर: । ३ । ४ । १९ । (यथा,—माघे । १ । ६८ ।
"पयोधिमाबद्धचलज्जलाविलं
विलङ्घ्य लङ्कां निकषा हनिष्यति ।")
मध्यम् । इति मेदिनी । षे, ७९ ।

निकषात्मज:, पुं, (निकषाया आत्मज: ।) राक्षस: । इत्यमर: । १ । १ । ६३ ।

निकस:, पुं, (निकसति विनष्टि स्वर्णादिकं यत्र । नि + कस + घ: ।) निकष: । इत्यमरटीकायां भरत: ।

निकामं, क्ली, (नि + कम इच्छायाम् + घञ् ।) इष्टम् । यथेप्सितम् । इत्यमर: । २ । ९ । ५७ । (यथा, देवीभागवते । १ । ७ । ४० ।
"कुर्व्वन्ति देवि ! भजनं सकलं निकामं
ज्ञात्वा समस्तजननीं किल कामधेनुम् ।")

निकाय:, पुं, (निचीयते इति । नि + चि + "कहि चानोत्तराद्ये ।" ३ । ३ । ४२ । इति घञ् । आदेश्च क: ।) लक्ष्यम् । सधर्मिप्राणिसंहति: । (यथा, महाभारते । १ । १२३ । ६५ ।
"तथा देवनिकायानां देवराजाद् दिवौकसाम् ।")

संहतानां समुच्चयः । (यथा, श्रीकण्ठचरिते । ६ । १८ ।
"नीरन्ध्रविन्यैर्नृपमनोनिकाय-
कापायपङ्कप्रणयाद्यलीकः ॥")
निलयः । (यथा, मनुः । १ । ३६ ।
"एते मनूंस्तु सप्तान्यानसृजन् भूरितेजसः ।
देवान् देवनिकायांश्च महर्षींश्चामितौजसः ॥")
परमात्मा । इति मेदिनी । ये, ८० ॥

निकाय्यः, पुं, (निचीयतेऽस्मिन् धान्यादिकमिति । नि+चि+"पाय्यसान्नाय्यनिकाय्येति ।" ३ । १ । १२९ । इति ण्यत्प्रत्ययेन निपातनात् साधुः ।) गृहम् । इत्यमरः । २ । २ । ५ ॥ (यथा, भट्टिः । ६ । ६६ ।
"न प्रणाय्यो जनः कश्चिन्निकाय्यं तेऽधितिष्ठति ।
देवकार्य्यविघाताय धर्म्मद्रोही महोदये ॥")

निकारः, पुं, (नि+कृ+घञ् ।) विप्रकारः । अपकारः । उत्कारः । धान्यस्योत्क्षेपणम् । इत्यमरभरतौ ॥ खलीकारः । इति स्वामी ॥ धिक्कारः । इति शब्दमाला ॥

निकारणं, क्ली, (निकारयति हिंसात्यनेनेति । नि+कृ+णिच्+ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११२ ॥

निकाशः, त्रि, (निकाशते शोभतेऽनेन इति । काश दीप्तौ+करणे ल्युट् ।) नीकाशः । इत्यमरटीका ॥ (तालव्यशकारान्तोऽपि दृश्यते ॥)

निकुञ्चकः, पुं, (निकुञ्चतीति । नि+कुञ्च कौटिल्ये+ण्वुल् ।) परिमाणविशेषः । कुडवपादः । स च प्रसृत इति ख्यातः । इति भरतधृतसर्व्वस्वम् ॥ वानीरवृक्षः । इति भावप्रकाशः ॥ (जलवेतसः । तत्पर्य्यायो यथा,—
"निकुञ्चकः परिव्याधो नादेयो जलवेतसः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

निकुञ्चितं, क्ली, (नि+कुञ्च+क्तः ।) अङ्गहारान्तर्गतशिरोविशेषः । यथा,—
"आकम्पितं कम्पितञ्च धुतं विधुतमेव च ।
परिवाहितमाधूतमवधूतं तथाञ्चितम् ॥
आकुञ्चितं परावृत्तमुत्क्षिप्तञ्चाप्यधोगतम् ।
लोलितं प्रसृतञ्चेति चतुर्द्दशविधं शिरः ॥"
इति सङ्गीतदामोदरः ॥

निकुञ्जं, पुं क्ली, (नितरां कौ पृथिव्यां जायते इति । जन्+डः । पृषोदरादित्वात् नुमागमे साधुः ।) कुञ्जम् । इत्यमरः । २ । ४ । ८ ॥ (यथा, आर्य्यासप्तशत्याम् । ४८३ ।
"रचिते निकुञ्जपत्रैर्भिक्षुकपात्रे ददाति साय-
म्रम् ।
पर्य्युषितमपि सुगन्धिश्वासकदुष्णं मधूरसम् ॥")

निकुञ्जिकाम्ला, स्त्री, (निकुञ्जिका कुञ्जोद्भवा अम्ला ।) कुञ्जिकाम्लप्रभेदः । तत्पर्य्यायः । कुञ्जिका २ कुञ्जवल्ली ३ । इयं गुणैः श्रीवल्ली-सदृशी । इति राजनिर्घण्टः ॥

निकुम्भः, पुं, कुम्भकर्णपुत्त्रः । (यथा, रामायणे । ६ । ७५ । ४६ ।
"स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ ।
प्रेषयामास संक्रुद्धो रावणो बहुभिः सह ॥")
दन्तिकावृक्षः । इति मेदिनी । भे, १७ ॥
(अस्य पर्य्यायो यथा,—
"निचारको निकुम्भः प्रत्युपचित्रा गुडूचकः ।
दारायणी विषघ्ना च तथोदुम्बरपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)
(प्रह्लादस्य पुत्त्रविशेषः । यथा, महाभारते । १ । ६५ । १९ ।
"प्रह्लादस्य त्रयः पुत्त्राः ख्याताः सर्व्वत्र भारत ! ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ! ॥"
दनोः पुत्त्राणामन्यतमः । यथा, तत्रैव । १ । ६५ । २५ ।
"निसुन्दश्च निकुम्भश्च कुपटः कपटस्तथा ।
शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा ।
इति ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः ॥"
स्वनामख्यातः क्षत्रियविशेषः । इति सह्याद्रि-खण्डे । १४ । ४४ । महादेवस्य पार्श्वानुचर-विशेषः । यथा, हरिवंशे । ९८ । ४५ ।
"पार्श्वे तिष्ठन्तमाहूय निकुम्भमिदमब्रवीत् ।
गणेश्वरपुरीं गत्वा शून्यां वाराणसीं कुरु ॥"
तथा च रघुः । २ । ३५ ।
"अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम् ॥"
स्कन्दस्य सैनिकविशेषः । यथा, महाभारते । ९ । ४५ । ५३ ।
"शृणु नामानि चान्येषां येऽन्ये स्कन्दस्य सैनिकाः ।
विविधायुधसम्पन्नाश्चित्राभरणवर्म्मिणः ।
शङ्कुकर्णो निकुम्भश्च पद्मः कुमुद एव च ॥"
हर्य्यश्वपुत्त्रविशेषः । यथा, हरिवंशे । १२ । २ ।
"धौन्धुमारिर्दृढाश्वस्तु हर्य्यश्वस्तस्य चात्मजः ।
हर्य्यश्वस्य निकुम्भोऽभूत् क्षत्रधर्म्मरतः सदा ॥")

निकुम्भाख्यबीजं, क्ली, (निकुम्भाख्यस्य दन्तिकावृक्षस्य बीजवत् बीजं यस्य ।) जयपालः । इति राजनिर्घण्टः ॥ (जयपालशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

निकुम्भितं, क्ली, नृत्यविषयकाष्टोत्तरशतकरणान्तर्गतकरणविशेषः । यथा, सङ्गीतदामोदरे ।
"करणानान्तु सर्व्वेषां सामान्यं लक्षणं त्विदम् ।
प्रायो वामकरो वक्षःस्थितोऽन्यः पुरतोऽग्रगः ॥
पादाभ्यां करणं ज्ञेयं तदिहाष्टोत्तरं शतम् ।
निकुम्भितं पार्श्वक्रान्तमतिक्रान्तं विवर्त्तकम् ॥
विद्युद्भ्रान्तं गजक्रीडं क्रान्तञ्च गरुडप्लुतम् ॥"

निकुम्भी, स्त्री, (निकुम्भ+गौरादित्वात् ङीष् ।) दन्तीवृक्षः । इति राजनिर्घण्टः ॥

निकुरम्बं, क्ली, (निकुरतीति । नि+कुर+बाहुलकात् अम्बच् ।) समूहः । इत्यमरः । २ । ५ । ४० ॥ (पुलिङ्गेऽपि दृश्यते । यथा, श्रीकण्ठचरिते । १८ । ४० ।
"आरक्तगण्डरचितविद्रुमदण्डभाजो
मत्ताश्चि फेननिकुरम्ब इवाट्टहासः ॥")

निकृतः, त्रि, (नि+कृ+क्तः ।) शठः । इत्यमरः । ३ । १ । ४६ ॥ नीचः । इति मेदिनी । ते, ११९ ॥

निकृतिः, स्त्री, (नि+कृ+क्तिन् ।) नीचः । शठः । शाठ्यम् । इति [illegible] ११८ ॥ (यथा, किराते । १ । ४५ ।
"न समयपरिरक्षणं क्षमन्ते
निकृतिपरेषु परेषु भूरिधामः ॥")
दैन्यम् । इति शब्दरत्नावली ॥

निकृष्टः, त्रि, (नि+कृष+क्तः ।) इत्यमरः । ३ । १ । ५४ ॥ निन्दितः । इति भरतः ॥

निकेतः, पुं, (निकेतति निवसत्यत्र । कित निवासे+अधिकरणे घञ् ।) इत्यमरटीकायां भरतः ॥ (यथा, मनौ । ४ । ११ । १२ ।
"तस्य निलयं लब्ध्वा कामूर्मि [illegible]
निकेतं चानिकेतेषु [illegible]

निकेतनं, क्ली, (निकेतति + कित+अधिकरणे ल्युट् ।) [illegible]मरः । २ । २ । ४ ॥ (यथा, [illegible] १ । २० । ४२ ।
[illegible]
उवाच तं वरारोहा
पलाण्डौ, पुं । इति शब्दचन्द्रिका ॥

निकोचकः, पुं, (निकोचति शब्दायते । कुच शब्दे+वुन् ।) अङ्कोठवृक्षः । [illegible] ४ । २८ ॥ (यथा, सुश्रुते । १ । ३[illegible]
[illegible]
माथप्रभृतीनि ॥" क्वचित् क्लीवलिङ्गे । यथा,—
"मातामात्योऽङ्गाभिभुक्तं [illegible]
उद्भमाधं प्रियालञ्च हंसकं [illegible]
इति वाभटे

निकोठकः, पुं, (निकोचकः [illegible] चस्य ठः ।) निकोचकः । भरतः ॥ (यथा,—
"तिलः पियालाभिषुकौ विभीतकाः
क्षीराभयैरण्डमधूकसर्षपाः ।
कुसुम्भबिल्वारुककूलकानडी-
निकोठकाक्षोडकराञ्जिपुन्नाः ।
सरोहिणाश्रवरसंज्ञिताश्च्या-
सुण्डङ्गमा मधूच्छ्रदयाः [illegible]
इति चरके

निक्वणः, पुं, (नि+क्वण शब्दे+ ३ । ३ । ६५ । इति अप् ।) [illegible] वीणादेः शब्दः । तत्पर्य्यायः । [illegible] क्वाणः ३ क्वणः ४ क्वणनम् ५ । इत्यमरः । १ । ७ । २४ ॥ प्रादेरप्युपसर्गादुत्तरस्य प्रक्वाणः ६ प्रक्वणः ७ इत्यादयः आदिना संक्वाणः संक्वणः उपक्वाणः इत्यादयः । इति भरतः ॥

...दः, पुं, (नि+क्वण शब्दे+भावे घञ् ।) ...क्वणः । इत्यमरः । १ । ७ । २४ ॥

...र्व्वं, क्ली, (निखर्व्वति बहुलसंख्यां गच्छतीति । ...+खर्व्व गतौ+पचाद्यच् ।) दशखर्व्वसंख्या । ...दशकोटयः । इति लीलावती हेम-चन्द्रश्च ॥ (यथा, महाभारते । २ । ६१ । ३ । "...दृष्टैव महापद्मं निखर्व्वं कोटिरेव च ॥") ...निह्रोत्पदम् । यथा । इन्द्रः खर्व्वो निखर्व्व-... इत्यादि ॥

...र्व्वः, त्रि, (नितरां खर्व्वः ।) वामनः । इति ...शब्दरत्ना... । ३ । ११८ ॥

...लं, त्रि, (निवृत्तं खिलं शेषो यस्मात् ।) ...कृत्स्नम् । इत्यमरः । ३ । १ । ६५ ॥ (यथा, ...भागवते । १ । २ । ३० ।
"निखिलजगज्जनानां नामधेयं कालकन्दं
...प्रकटय भगवद्धा नामधेयं पुराणम् ॥")

...डः, पुं क्ली, (निगलति बध्नातीति । नि+गल+अच् । लस्य डत्वम् ।) हस्तिनां लोह-...पादबन्धनकरणम् । इति भरतः ॥ यॉड्र ...ि इति च ख्यातः ॥ तत्पर्य्यायः । ...२ अन्दुकः ३ । इत्यमरः । २ । ८ । ४१ ॥ ...हीरः ४ अन्दुः ५ । इति शब्दरत्नावली ॥ ...था, माघे । ५ । ४८ ।
"...पराणि परितो निगडान्यलावीत्
...करेणुराजः ॥")

...डितः, त्रि, (नि+गल+क्तः । लस्य डत्वम् । ...निगडो जातोऽस्येति । तारकादित्वात् ...इतच् ।) बद्धः । इति हेमचन्द्रः । ३ । १०३ ॥

...णः, पुं, होमधूमः । इति त्रिकाण्डशेषः ॥

...दः, पुं, (नि+गद भाषे+"नौ गदनदपठ-स्वनः ।" ३ । ३ । ६४ । इति अप् ।) भाष-...णम् । कथनम् । तत्पर्य्यायः । निगादः २ । ...इत्यमरः । ३ । २ । १२ ॥ (यथा, भागवते । ...३ । १९ ।
"...ति निगदेनाभिष्टूयमानो भगवाननिमिष-...र्षभवर्य्याभिवन्दितचरणः सदय-...हासः ॥") पठ्यमानः । यथा । निगदस्तु ...वेद इत्यागमः ॥

...मः, पुं, (निगमे पुर्य्यां भवः । निगम+"तत्र ...भवः ।" ४।३।५३ । इत्यण् । संज्ञापूर्व्वकत्वात् ...) वणिक् । (निगम्यतेऽनेनेति । ...गम+"गोचरसञ्चरेति ।" ३।३।११९ । इति ...निपातनात् साधुः ।) पुरी । कटः । (निगम्यते ...नेनेति ।) वेदः । (यथा, देवीभाग-...वते । १ । ५ । ६९ ।
"...कपटं वाचः ...[illegible]...
...[illegible]...
...परमम् ॥")
...पथः । एष इति यावत् । इति मेदिनी । ...म । निश्चयः । (यथा, "तस्या एव ...[illegible]... ॥" ...इति निगमस्यार्थस्येदमध्याये ।)

...ख्यातः । इति हेमचन्द्रः । ४ । ३८ ॥ (उपदेशः । यथा, भागवते । १ । ५ । ३९ ।
"इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम् ।
अदान्मे ज्ञानमैश्वर्य्यं स्वस्मिन् भावञ्च केशवः ॥")

निगरः, पुं, (नि+गॄ+"ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् ।) भोजनम् । इति राज-निर्घण्टः ॥

निगरणं, क्ली, (नि+गॄ भक्षणे+भावे ल्युट् ।) भक्षणम् । इति मेदिनी । णे, ८८ ॥

निगरणः, पुं, (निगीर्य्यते भक्ष्यतेऽनेनेति । नि+गॄ+करणे ल्युट् ।) गलः । इति मेदिनी । णे, ८८ ॥ होमधूमः । इति शब्दरत्नावली ॥

निगादः, पुं, (नि+गद भाषे+भावे घञ् ।) कथनम् । इत्यमरः । ३ । २ । १२ ॥

निगारः, पुं, (नि+गॄ भक्षणे+भावे घञ् ।) निगरणम् । भक्षणम् । इत्यमरः । ३ । २ । ३७ ॥

निगालः, पुं, (निगलति भक्षयत्यनेनेति । नि+गल भक्षणे+करणे घञ् ।) अश्वगलोद्देशः । इत्यमरः । २।८।४८ ॥ (यथा, अश्ववैद्यके । २।१४ ।
"घण्टाबन्धनमीपस्थो निगालः परिकीर्त्तितः ।
...निगालस्य गलमाहुर्मनीषिणः ॥")

निगालवान्, पुं, (निगालोऽस्त्यस्येति । निगाल+मतुप् मस्य वः ।) अश्वः । इति शब्दचन्द्रिका ॥

निगुः, पुं, (निगम्यते विद्यतेऽनेनेति । नि+गम+बाहुलकात् डुः ।) मनः । इति त्रिकाण्डशेषः ॥ मलम् । मूलम् । मनोज्ञम् । चित्रकर्म्म । इति संक्षिप्तसारोणादिवृत्तिः ॥

निगूढः, पुं, (निगुह्यते संव्रियते इति । नि+गुह+क्तः । "यस्य विभाषा ।" ७ । २ । १५ । इति । नेट् ।) ...। इति हेमचन्द्रः । ४ । २३८ ॥ गुप्ते, त्रि । यथा,—
"आसीं विधुः ...[illegible]... मौली
...[illegible]...
...[illegible]...
...[illegible]... ॥"
उद्भटः ॥

निग्रहः, पुं, (नियमेन ग्रहणमिति । नि+ग्रह+"ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) ...[illegible]... । इत्यमरः । ३ । २ । ३१ ॥ (यथा, मनुः । ७ । १७५ ।
"निग्रहं प्रकृतीनाञ्च कुर्य्याद्योऽरिबलस्य च ।
उभयोरेव तं विद्वान् ...[illegible]... यथा ॥")
बन्धनम् । (यथा, महाभारते । १ । ११९ । ...
"...[illegible]...
...[illegible]... ॥")
...[illegible]... । सीमा । इति ...[illegible]... ॥ (...[illegible]... । यथा, रघुः । ८ । ५१ ।
"...[illegible]...
...[illegible]... ॥"
दण्डः । यथा, रघुः । ११ । ५५ ।
"...[illegible]...
...[illegible]...

सामदानविधिभेदनिग्रहाः
सिद्धिमन्त इव तस्य भूपतेः ॥")
चिकित्सा । इति राजनिर्घण्टः ॥ विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।
"प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥"
("सर्व्वं प्रलये निगृह्णातीति निग्रहः ।" इति शाङ्करभाष्यम् ॥ महादेवः । इति महाभारतम् । १३ । १७ । ६४ ॥)

निग्राहः, पुं, (नि+ग्रह+"आक्रोशेऽवन्योर्ग्रहः ।" ३।३।४५ । इति घञ् ।) निग्रहः । आक्रोशः । यथा । निग्राहस्ते भूयात् । इति संक्षिप्तसार-व्याकरणम् ॥ (यथा च भट्टिः । ७ । ४३ ।
"संहरायान्तु वैदेहीं निग्राहो वोऽधमा नराः ॥")

निघः, पुं, (नियमितं निर्विरोधेन वा हन्यते ज्ञायते इति । नि+हन+"निघो निमितम् ।" ३ । ३ । ८७ । निपातनात् साधुः ।) विश्वक्-समः । समन्तात् तुल्यारोहपरिणाहः । इत्यमर-भरतौ ॥

निघण्टिका, स्त्री, गुडूचकन्दः । इति राज-निर्घण्टः ॥

निघण्टुः, पुं, (निघण्टति शोभते इति । घण्ट-दीप्तौ+"मृगय्वादयश्च ।" उणां । १ । ३८ । इति कुप्रत्ययेन साधुः ।) नामसंग्रहः । इति हेमचन्द्रः । २ । १७२ ॥

निघसः, पुं, (अदनमिति । नि+अद् भक्षणे+"नौ ण च ।" ३ । ३ । ६० । इति अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घस्लादेशः ।) आहारः । इत्यमरः । २ । ९ । ५६ ॥

निघातिः, स्त्री, (निहन्यतेऽनयेति । नि+"हनि-...र्वनियशीति ।" उणां । ४ । १२४ । इति इञ् । हस्य कुत्वम् ।) लौहयष्टी । लौहमुद्गरः । इत्युणादिकोषः ॥

निघुष्टं, क्ली, (निघुष्यते स्मेति । नि+घुष+भावे क्तः ।) घुष्टम् । घोषणम् । इति शब्द-रत्नावली ॥

निघ्नः, पुं, (नि+हन् ...+"...[illegible]...-द्रिति ।" उणां । १ । १५३ । इति ...[illegible]... निपातनात् साधुः ।) ...। इत्युणादिकोषः ॥ ...[illegible]... । इति संक्षिप्त-सारोणादिवृत्तिः ॥ (...[illegible]... । इति ...[illegible]... । ३ । ३ ।)

निघ्नः, त्रि, (...[illegible]... । नि+हन+...[illegible]... कः । ...[illegible]... ।) अधीनः । इत्यमरः । ३ । १ । १६ ॥ (यथा, रघुवंशे । १४ । १८ ।
"...[illegible]...
...[illegible]...
...[illegible]...
...[illegible]... ॥")
...[illegible]... । इति ...[illegible]... ॥ (यथा, कुमार-सम्भवे । ३ । ५८ ।
"...[illegible]... ॥"

पुं। सूर्य्यवंशीयनृपभेदः। यथा, हरिवंशे। १५। २२।

"अनरण्यसुतो निघ्नो निघ्नपुत्त्रौ बभूवतुः।")

निचयः पुं, (नि+चि+"एरच्।" ३। ३। ५६। इत्यच्।) समूहः। (यथा, महाभारते।४।२।१।

"आहरिष्यामि दारूणां निचयान् महतो-ऽपि च।")

निश्चयः। इति शब्दरत्नावली॥

निचिकी, स्त्री, (निचिना कायति शोभते इति। कै+क। गौरादित्वात् ङीष्।) नैचिकी। उत्तमा गौः। इत्यमरटीकायां भरतः॥

निचितं, त्रि, (निचीयते स्मेति। नि+चि+क्त।) पूरितम्। व्याप्तम्। इति हेमचन्द्रः। ६। १०८॥ (यथा, महाभारते।३।१२८।४।

"पश्य नानाविधाकारैरग्निभिर्निचितां महीम्।")

सञ्चितम्। यथा, भावप्रकाशे अतिसाराधिकारे।

"वायुः प्रवृद्धो निचितं बलाशं
नुदत्यधस्तादहिताशनस्य।"

नदीभेदे, स्त्री। यथा, महाभारते।६।८।१८।

"कौशिकीं निदिवां कृत्यां निचितां लोहिता-रणीम्।")

निचुलः, पुं, (निचोलति समुच्छ्रयतीति। नि+चुल+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) हिज्जलवृक्षः। इत्यमरः। २। ४। ६१॥ (पर्य्यायोऽस्य यथा,—

"इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) वेतसवृक्षः। इति राजनिर्घण्टः॥ निचोलः। इति हेमचन्द्रः।४। २११॥

निचुलकं, स्त्री, (निचुल इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) निचोलकम्। इति हारावली। १६२॥

निचोलः, पुं, (निचोल्यते इति। नि+चुल+घञ्।) येन सुतेनासुतेन वा वस्त्रान्तरमाच्छादयति। इत्यमरभरतौ॥ याकुड़ि इति ख्यातः। तत्पर्य्यायः। निचुलः २। उत्तरच्छदः ३ प्रच्छदपटः ४॥ इति हेमचन्द्रः। ३। ३४०॥ (यथा, राजतरङ्गिण्याम्। ३। १६८।

"सन्ततध्वान्तमिषतस्तीव्रशीतभयीकृताः।
आशाश्चकाशिरे नीलनिचोलाच्छादिता इव॥")

निचोलकः, पुं, (निचोल इव कायतीति। कै+क।) भटादेश्चोलाकृतिसन्नाहः। तत्पर्य्यायः। कूर्पासः २ वारबाणः ३ कञ्चुकः ४। इति हेमचन्द्रः। ३। ४३९॥

[निच्छ]विः, स्त्री, (निकृष्टा छविः साहश्यं यत्र।) तीरभुक्तिदेशः। इति त्रिकाण्डशेषः॥ त्रिहुत इति भाषा॥

[निच्छि]विः, पुं, वर्णसङ्करजातिभेदः। इति जटाधरः॥ यथा,—

"[झ]ल्लो मल्लश्च राजन्याद्व्रात्यात् निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड़ एव च॥"

इति मनुः। १०। २२॥

निजं, त्रि, (नियमेन जायते इति। नि+जन+डः।) स्वकीयम्। (यथा, हितोपदेशे।

"अयं निजः परो वेति गणना लघुचेतसाम्।")

नित्यम्। इत्यमरः। ३। ३। ९२॥

निट्, [श्] स्त्री, (निगरी शृणाति तनूकरोति व्यापारानिति। शो+कः। पृषोदरादित्वात् साधुः।) निशा। यथा,—

"वासतेयी निशाक्षणा च वासतेयी तमा-स्विनी॥"

इति रात्रिपर्य्याये त्रिकाण्डशेषः॥

(यथा, मनुः। ९। ६०।

"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत् पुत्त्रं न द्वितीयं कथञ्चन॥")

निडीनं, क्ली, (नीचैर्डीनं पतनमस्मिन्।) पक्षिगतिविशेषः। (यथा, महाभारते।८।४१।२६।

"निडीनमथ संडीनं तिर्य्यग्डीनगतानि च॥")

प्रमेयांनम्। इति जटाधरः॥

नितिका, स्त्री, कलायविशेषः। खेंसाड़ा इति भाषा॥ तत्पर्य्यायः। शतीला २ तिपुटी ३। इति शब्दचन्द्रिका॥

नितम्बः, पुं, (निभृतं ताम्यति आकाङ्क्षते कामुकेरिति। तमु आकाङ्क्षायाम्+उल्वादयश्चेति साधुः। यद्वा, नितम्बति पीड़यति कामकचित्तमिति। नि+तम्ब हिंसायाम्+अच्।) स्त्रीकट्याः पश्चाद्भागः। इत्यमरः।२।६।७४॥ पाछा इति भाषा॥ (यथा, माघे। ११। ५।

"विपुलतरनितम्बाभोगरुद्धे रमण्या:
शयितुमनधिगच्छन् जीवितेशोऽवकाशम्॥")

स्कन्धः। रोधः। कटकः। (यथा, भट्टिकाव्ये। २। ८।

"गिरेर्नितम्बे मरुता विभिन्नं
तोयावशेषेव हिमाभमभ्रम्॥")

कटिमात्रम्। इति मेदिनी। बे, १९॥ (यथा, विदग्धमुखमण्डने।

"तरुण्यालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥")

नितम्बिनी, स्त्री, (अतिशयितो नितम्बोऽस्यस्या इति। नितम्ब+"अत इनिठनौ।"५।२।११५। इति इनिः स्त्रियां ङीप्।) प्रशस्तनितम्बविशिष्टा। इत्यमरः।२।६।३॥ (यथा, आर्य्यासप्तशत्याम्। ५५४।

"वैगुण्येऽपि महता विनिर्मितं भवति कर्म्म शोभायै।
दुर्वहनितम्बमन्थरमपि हरति नितम्बिनी-वृत्तम्॥")

स्त्रीमात्रम्। इति राजनिर्घण्टः॥ (यथा, कुमारसम्भवे। ३। ७।

"नितम्बिनीमिच्छसि मुक्तलज्जां
कण्ठे स्वयं ग्राहनिषिक्तबाहुम्॥")

नितम्बबिम्बे, त्रि। यथा, रघुः।१८।२६।

"लोध्रमाननयनः शयांशुके-
मेंखलागुणपदैर्नितम्बिभिः॥")

निदरी, [श्] च, (नि+ ... णेति।" ३।४।११। ...
यथा,—

"नागोदरी नाग...
पक्कोलिकानी निश...

निदर्भ, क्ली, (निदरी तथा ...
नामधाताम्नानामर्थनानामति...
इत्यादयो॥

निदाघं, क्ली, (निदाघ्यतीति। ...
"अनुनासिकात्स्येति।" ६।३।११ ...
अतिशयः। (यथा, कुमारसम्भ...

"केनाभ्यसूया पदकाङ्क्षि...
निदाघदोषैर्व्वनिता तनोति...

तद्वति, त्रि। इत्यमरः। १। १। ६...

नित्यं, क्ली, (नियमेन भवम्। नि+ ...
त्यप्।" ४।२।१०४। इति त्यप्।)।
वचनम्। तत्पर्य्यायः। सततम् २
अश्रान्तम् ३ सन्ततम् ४ अविरतम् ५
रतम् ७ अनवरतम् ८ अजस्रम् ९।
१।१।६८॥ प्रसक्तम् १० ध्रुवम् ...
तम् १२। इति जटाधरः॥ तद्वति, त्रि।
अमरः॥

यथा एकादश्यामुपोषणं नित्यम्।
भावप्रतियोगि। यथा, अयं नित्यम्
इच्छायामानम्। यथा, नित्यं
कुमाराः। अहरहःक्रियमाणत्वे
तम्। यथा, आगतं वादितं नित्यम्
वच्छिन्नपरम्पराकः। यथा, वर्णा नित्याः

नित्यः, त्रि, (नियमेन भवः। नि+
त्यप्।" ४। २। १०४। इत्यत्र "
इति वक्तव्यम्।" इति वार्त्तिकोक्त्या
अविनाशी। तत्पर्य्यायः। शाश्वतः २
सदातनः ४ सनातनः ५। इत्यमरः।
(यथा, महाभारते। १। १००। २।

"दमो दानं क्षमा बुद्धिर्ह्रीर्धृतिस्तेज
नित्यान्यासन् महासत्त्वे शान्तनौ

समुद्रे, पुं। इति राजनिर्घण्टः॥

नित्यकर्म्म, [न्] क्ली, (नित्यं कर्म्म।)
अकरणाभावप्रतियोगिकार्य्यम्। इति
तद्यथा,—

"नित्यं नैमित्तिकञ्चैव नित्यनै
गृहस्थस्य त्रिधा कर्म्म तन्निबोधत
पञ्चयज्ञाश्रितं नित्यं यदेतत् कथितं
नैमित्तिकं तथा चान्यत्
नित्यनैमित्तिकं ज्ञेयं पर्व्वश्राद्धादि

इति मार्कण्डेयपुराणे

तत्त्यागे दोषो यथा,—

"नित्यानां कर्म्मणां विप्र। तस्य हानि
अकुर्व्वन् विहितं कर्म्म द्रुतः पतति
प्रायश्चित्तेन महता शुद्धिमाप्नोत्यसंशयम्
यथा नित्यक्रियाहानेः कृता मैत्रेय

...र्वं नित्यादिनित्यं पूर्वोक्तनित्यमेव ।
...नित्यकर्म सर्वा निर्दोषं साधुभिः सदा
...कार्यं नित्यस्य यदिदं तुल्यं प्रागुते ॥
...मर्त्य नश्येत न शुद्धिः मानकर्मभिः ॥"
...विष्णुपुराणे ३ अंशे १८ अध्यायः ॥ * ॥
...नित्यकर्मकरणविधियों यथा,—
...पूर्वे कालवे याति नित्यकर्म न चाचरेत् ।
...नित्य मध्यान्तरे न चाचरेत् ॥
...च मधुपर्के पुण्यकर्माणि मैथुने ।
...तदा कार्यो नित्यकर्माणि संत्यजेत् ॥
...सर्वेषां च देव मुक्ता च किञ्चन ।
...नित्यं सर्वे सर्वत्र तथा ॥
...नित्यं नैमित्तिकं काम्यम् ।
...मृत्युर्यत्र धर्मं मुक्ता न चाचरेत् ॥
...कर्म कृत्वा । भोजनादिकमाहवे ।
...नित्यकर्म नित्य नैमित्तिकैः सदा ॥
...पूर्वपादं चक्रांस्फुरदादिकम् ।
...संपूर्ण नित्यकर्माणि संत्यजेत् ॥
...नित्यपूर्वं प्रभोजनिद्वयी दिवा ।
...नृत्यदर्शनं मध्यानि न चाचरेत् ॥
...तु काम्यं किञ्चिन्न चाचरेत् ।
...श्राद्धं देवपूजनं यत् ॥
...विप्र प्रकर्षेव च मासिका ।
...प्रसन्नानि देवानां च नैत्यं ॥"
इति कालिकापुराणे ५८ अध्यायः ॥
...रूपं, स्त्री, (नित्यं कालावलम्बनमाह... दान् महालयं यौवनम् ।) वैदिकयौवनम् ।
...नित्यदिवसम् । यथा,—
...दैवे दिवसे पूर्वेऽहि दिवसे वरः ।
...प्रकृतिव प्रकृताते न तु कर्हिचित् ॥"
इति ज्योतिःसारसंग्रहः ॥ * ॥
...सर्वेषु ।
...कालमानकालेऽनुकर्मविशेषा-
...कालविशेषदिवसानाम् ।
...नित्यानिस्ति... दिने
...दिनं प्रविशत् न चापि निधानम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
...नाना सौराः सावनैवैवा निर्दिष्टाः
...निर्दिष्टाः तद्विदे निर्दिष्टाः ।
...सार्वत्रिकसर्वनिर्दिष्टाः । मासानां
...। तिथयस्तु दर्शादिसम्पूर्णानाम्-
...निर्दिष्टाः । उत्पत्ति दैवत-
...दिवसा । सावनी इदा
...दिवसानि पुण्यमाः तिथिः । सावा-
...दिवसा दिनानि नक्षत्राणां च
...पक्षश्राद्धे मर्यादानां निर्दिष्टमासादि-
...वर्ज्यम् । सप्तमदिनेऽधिस्थिते दिवे ।
...सप्तमान्तरं मासदिनं पुण्यतीर्थम्-
मानः ।
...नित्यदिवस सर्वतः सौरदिनो भवति
वक्तव्यम् ।"
...तिथिमानं । इति ज्योतिषम् ॥

नित्यगतिः, पुं, (नित्यं गतिरस्येति ।) वायुः । इति हेमचन्द्रः । ४ । १७२ ॥ (यथा, महाभारते । ७ । ८५ । ७२ ।
"यथा वायुर्नित्यगतिर्जलदान् भरतर्षभ ॥")

नित्यदा, व्य, (नित्य + दाच् ।) सर्व्वदा । यथा,—
"पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥"
इति श्रीभागवते ४ स्कन्धः ॥

नित्यदानं, क्ली, (नित्यं दैनन्दिनं दानम् ।) प्रतिदिनकर्त्तव्यदानम् । यथा, गरुडपुराणे ।
"नित्यं नैमित्तिकं काम्यं त्रिविधं दानमीरितम् ।
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ॥
अनुद्दिश्य फलं तत् स्याद्ब्राह्मणाय तु नित्य-
कम् ॥"

नित्यप्रलयः, पुं, (नित्यः प्रलयः ।) चतुर्विधप्रलयान्तर्गतप्रलयविशेषः । यथा,—
"नित्यः सदैव भूतानां यो विनाशो दिवानिशम् ॥"
इति विष्णुपुराणे १ अंशे ७ अध्यायः ॥
"सदैव दीयमानानां कालेन जातानां दिवानिशं यो विनाशः स नित्यः ॥" इति तट्टीकायां स्वामी ॥

नित्ययौवना, स्त्री, (नित्यं स्थिरं यौवनं यस्याः ।) द्रौपदी । इति हेमचन्द्रः । ३ । २०८ ॥ (नित्यं यौवनं यस्येति ।) स्थिरयौवने, त्रि ॥

नित्यवैकुण्ठः, पुं, (नित्यः सनातनो वैकुण्ठः ।) विष्णोः स्थानविशेषः । यथा,—
"ऊर्द्ध्वं तस्मात् दक्षिणे नित्यवैकुण्ठ एव च ।
आकाशादपरो नित्यो ब्रह्माण्डबहिरम्बरः ॥
ईश्वरेच्छासमुद्भूतो नित्यस्थश्च निरामयः ।
आकाशवत् सुविस्तारश्चान्तर्बहिर्निर्मितः ॥
तत्र नारायणः श्रीमान् वनमाली चतुर्भुजः ।
लक्ष्मीसरस्वतीगङ्गातुलसीपतिरीश्वरः ॥
सुनन्दनन्दकुमुदपार्षदादिभिरन्वितः ।
सर्व्वेशः सर्व्वसिद्धेशो महाद्युतिमहोज्ज्वलः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः ॥

नित्या, स्त्री, (नित्य + टाप् ।) पार्व्वती (यथा, मार्कण्डेये । ८१ । ८ ।
"श्रेष्ठायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ॥") मनसा देवी । इति शब्दरत्नावली ॥ शक्तिविशेषः । अस्या मन्त्रो यथा,—
"वाग्भवं कामबीजञ्च नित्यक्लिन्ने मदद्रवे ।
स्वाहेति नवकूटाख्यो द्वादशार्णो मनुरितः ॥"
ध्यानं यथा,—
"अरुणकिरणजालैरञ्जिताशावकाशा
विधृतजपवटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या फुल्लकह्लारसंस्था
निवसतु हृदि बाला नित्यकल्याणशीला ॥"
इति तन्त्रसारः ॥
(नदीविशेषः । यथा, महाभारते ६ । ९ । ३६ ।
"कौशिकीं निम्नगां शोणां बाहुदामथ चन्द्रमाम् ॥")

नित्यानध्यायः, पुं, (नित्यं सर्व्वदा यस्य तथा यत्र-स्थाने अध्ययनाभावः ।) सर्व्वदा वर्ज्जनीयपठनकालादि । यथा,—

"इमान्नित्यमनध्यायानधीयानो विवर्ज्जयेत् ।
अध्यापनञ्च कुर्व्वाणः शिष्याणां विधिपूर्व्वकम् ॥
कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥
विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥
एतांस्त्वभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥
निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्ज्जने ।
एतानाकालिकान् विद्यादनध्यायानृतावपि ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने ।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥
नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥
अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्ज्जने ।
उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् ॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥
यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् ॥
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकाद्यन्नमेव च ॥
नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः ।
अमावास्याचतुर्द्दश्योः पौर्णमास्यष्टकासु च ॥
अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्द्दशी ।
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्ज्जयेत् ॥
पांशुवर्षे दिशां दाहे गोमायुविरुते तथा ।
श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥
नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ।
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥
प्राणि वा यदि वाप्राणि यत्किञ्चित् श्राद्धिकं
भवेत् ।
तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः
स्मृतः ॥
चौरैरुपप्लुते ग्रामे सम्भ्रमे चाग्निकारिते ।
आकालिकमनध्यायं विद्यात् सर्व्वाद्भुतेषु च ॥
उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥
नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम् ।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥
न विवादे न कलहे न सेनायां न सङ्गरे ।
न भुक्तमात्रे नाजीर्णे न वमित्वा न शुक्तके ॥
अतिथिञ्चाननुज्ञाप्य मारुते वाति वा भृशम् ।
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ॥
सामध्वनावृग्यजुषी नाधीयीत कदाचन ।
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च ॥
ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः ।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥
एतद्विद्वन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहम् ।
क्रमतः पूर्व्वमभ्यस्य पश्चाद्वेदमधीयते ॥

पशुमण्डूकमार्ज्जारश्वसर्पनकुलाखुभिः ।
अन्तरागमने विद्यादनध्यायमहर्निशम् ॥
द्वावेव वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः ।
स्वाध्यायभूमिञ्चाशुद्धामात्मानञ्चाशुचिं द्विजः ॥"
इति मानवे । ४ । १०९—१२० ॥

नित्यानित्यवस्तुविवेकः, पुं, (नित्यानित्ये वस्तुनी तयोर्व्विवेकः विवेचनम् ।) ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् । इति वेदान्तसारः ॥

नित्याभैरवी, स्त्री, (नित्या तदाख्यया प्रसिद्धा भैरवी ।) भैरवीविशेषः । अस्या ध्यानादिकं षट्कूटाभैरवीध्यानादिवत् ॥ ध्यानं यथा,—
"बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम् ।
मुण्डमालावलीरम्यां बालसूर्य्यसमांशुकाम् ॥
सुवर्णकलसाकारपीनोन्नतपयोधराम् ।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम् ॥"
दधतीमिति ध्येयः । इति तन्त्रसारः ॥ (अस्या बीजं यथा, 'हसकलरडें' 'हसकलरडीं' 'हसकलरडौं' ॥')

निदं, क्ली, (नेदतीति । निद कुत्सायाम् + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) विषम् । इति शब्दचन्द्रिका ॥

निदद्रुः, पु, (निद्रात् विषात् द्राति पलायते इति । द्रा + मृगय्वादित्वात् कुप्रत्ययेन साधुः ।) मनुष्यः । इति शब्दचन्द्रिका । (निर्नास्ति दद्रु-र्यस्येति विग्रहे । दद्रुरोगरहिते, त्रि ॥)

निदर्शनं, क्ली, (निदृश्यतेऽनेनेति । नि + दृश् + ल्युट् ।) दृष्टान्तः । उदाहरणम् । यथा,—
"यतः प्रायेऽपि दृष्टान्ताबुभे शास्त्रनिदर्शने ॥"
इति नामार्थटीकायां भरतः ॥
("दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनम् ॥ यथाग्निर्व्वायुना सहितः कोष्ठे वृद्धिमृच्छति तथा वातपित्तकफदुष्टो व्रण इति ॥" इत्युत्तरतन्त्रे अष्टमेऽध्याये सुश्रुतेनोक्तम् ॥)

निदर्शना, स्त्री, (निदर्शयतीति । नि + दृश् + णिच् + ल्युः । टाप् ।) काव्यालङ्कारविशेषः । तस्य लक्षणम् ।
"अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम् ।
सदसद्वा निदर्श्येत यदि सा स्यान्निदर्शना ॥"
उदाहरणं यथा, दण्डी ।
उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
भावयितुमृद्धीनां फलं सुहृदनुग्रहम् ॥"
यथा च साहित्यदर्पणे । १० । ७० ।
भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित् ।
बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना ॥
सम्भवद्वस्तुसम्बन्धनिदर्शना । यथा,—
'कोऽत्र भूमिवलये जनान् सुधा
तापयन् सुचिरमेति सम्पदम् ।
वेदयन्निति दिनेन भानुमा-
नाससाद चरमाचलं ततः ॥'
अत्रैरीदृशार्थस्य वेदनक्रियायां कर्त्तृत्वेनान्वयः
इदमर्थज्ञानसमर्थचरमाचलप्राप्ति-

रूपधर्म्मसत्त्वात् । स च दयेरतापनगमनरूप परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति । असम्भवद्वस्तुसम्बन्धनिदर्शना लेके-वाक्यानेकवाक्यगतत्वेन द्विविधा । तत्रैकवाक्यगा यथा,—
'कलयति कुवलयमाला-
ललितं कुटिलः कटाक्षविक्षेपः ।
अधरः किसलयलीला-
माननमस्याः कलानिधिर्व्विलासम् ॥'
अत्रान्यस्य धर्म्मं कथमन्यो वहत्विति कटाक्ष-विक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिक-मवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति । यथा वा ।
'प्रयाणे तव राजेन्द्र ! मुक्ता वैरिमृगीदृशाम् ।
राजहंसगतिः पद्भ्यामाननेन शशिद्युतिः ॥'
अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागो-ऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते । स चासम्भवन् राजहंसगतिमिव गतिं बोधयति । अनेकवाक्यगा यथा;—
'इदं किरातार्जुनमनोहरं वपु-
स्तपः क्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥'
अत्र यत्तच्छब्दनिर्द्दिष्टवाक्यार्थयोरभेदेनान्वयो-ऽनुपपद्यमानस्तादृशवपुषस्तपः क्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति । यथा वा ।
'लब्धेदं बन्धुतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्म्मया ॥'
अत्र भवभोगलोभेन आत्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्य्यव-सानम् । एवम् ।
'क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥'
अत्र मन्मया सूर्य्यवंशवर्णनमुडुपेन सागर-तरणमिवेति पर्य्यवसानम् । इयं क्वचिदुपमेय-वृत्तस्योपमानेऽसम्भवेऽपि भवति । यथा,—
'योऽनुभूतः कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे ।
समास्वादि स मृद्वीकारसे रसविशारदैः ॥'
अत्र प्रस्तुताधरस्य मधुरिमधर्म्मस्य द्राक्षा-रसेऽसम्भवात् । पूर्व्ववत् साम्ये पर्य्यवसानम् ।
मालारूपापि यथा मम ।
'क्षिपसि शुकं वृषदंशकवदने
मृगमर्पयसि मृगादनरदने ।
वितरसि तुरगं महिषविषाणे
निदधच्चेतो भोगवितानेः ॥'
इह बिम्बप्रतिबिम्बताक्षेपं विना वाक्यार्थापर्य्य-वसानम् । दृष्टान्ते तु पर्य्यवसितेन वाक्यार्थेन सामर्थ्याद्बिम्बप्रतिबिम्बताप्रत्यायनम् । नापीय-मर्थापत्तिरत्र 'हारोऽयं हरिणाक्षीणाम्,' इत्यादौ सादृश्यपर्य्यवसानाभावात् ॥)

निदाघः, पुं, (निदह्यते... दह + घञ् । ... काशः । (यथा, रघुः
"ते प्रजानां प्रजानाथ...
मनो बहुर्निदाघान्ते...
उष्णः । घर्म्मः । इत्यमरः...
रघुः । १२ । ३२ ।
"रावणावरजा तत्र राघ...
अभिरेदे निदाघानां यात्रा...
निदाघे वर्णनीयानि यथा...
मल्लिकापुष्पम् २ वानः ३ ...
वायुः ६ मेकः ७ मृगः ८ प्रा...
ष्णा ११ आम्रादिपक्वफलं...
कल्पलता ॥
("ता एवौषधयो निदाघे...
मात्रं लभ्यो भवन्त्यासु ...
सूर्य्यप्रतापोपशोषितदेहानां देह...
लघुत्वादेश्चद्राश्च यावत् ...
स तस्य प्रायश्च चापद्यः...
क्षिप्रदेहानां प्राणिनां ...
कान् व्याधीन् जनयति ॥" ...
स्थाने षष्ठेऽध्याये ॥
"निदाघोष्णपित्तश्चैव प्रकुप्यन्ति
नित्यास्यनिलश्चैव विधिना ...
मरीचसं तक्रमवदुष्णमन्यं तथोतनम् ।
यायामश्च ...
इति चोत्तरतन्त्रे चतुःषष्टितमेऽध्याये
सोक्तम् ॥)

निदाघकरः, पुं, (निदाघः उष्णः ... यस्य । निदाघस्य उष्णस्य करो वा ।) ... इति हारावली । ११ ॥

निदाघकालः, पु, (निदाघ एव कालः । ... घस्य कालो वा ।) ग्रीष्मः । ... आषाढमासौ । यथा,—
"प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये ॥"
इति ऋतुसंहारे ॥

निदानं, क्ली, (नि निश्चयं दीयतेऽनेन । दा + करणे ल्युट् ।) ... मरः । १ । ४ । २८ । (यथा, रघुः । १
"निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दोहृदलक्षणं दधौ ॥")
कारणम् । वत्सदामादि । (यथा, ...
१ । ३२ । २ ।
"उद्धुमियायाममदत्रविदानम् ।"
नि + दो छेदे + भावे ल्युट् ।) ...
इति मेदिनी । ने, ८३ । नि + दैप शोधे + ...
ल्युट् ।) शुद्धिः । तपःफलयाचनम् । ...
नम् । इति हेमचन्द्रः । ६ । १४० । ...
निर्णयः । इति त्रिका । ...

:त्वम् २ आरानम् ३ रोगहेतुः ४ । इति
:निर्घण्टः ॥ * ॥
:शनं पूर्व्वरूपाणि रूपाण्युपशयस्तथा ।
:तन्निदानं विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥
मत हेत्वायतनप्रत्ययोत्थानकारणैः ।
:तमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते ॥"
इति माधवकरः ॥
ने कर्म्मफलाको रोगोत्पादश्च हेतुर्निदानम् ।"
इति रक्तनिदानव्याख्याने विजयेनोक्तम् ॥
इ खलु हेतुर्निमित्तमायतनं कर्त्ता कारणं
:यः समुत्थानं निदानमित्यनर्थान्तरम् । तत्त्रि-
: असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परि-
मश्चेति तस्त्रिविधविकल्पा व्याधयः प्रादुर्भव-
मियर्षोम्यवायदाः ।" इति निदानस्थाने
मेऽध्याये चरकेणोक्तम् ॥ मैत्रमुनिकृत-
विन्दुसारन्यविशेषः । यथा, ब्रह्मवैवर्त्ते । १ ।
। २१ ।
सो निदानं करधलन्तं सर्व्वधरं परम् ।
निर्ययतत्त्वश्च चकार कुम्भसम्भवः ॥")
ं, त्रि, (निदिह्यते स्मेति । दिह उपचये +
।) देहादिना वर्द्धितम् । तत्पर्य्यायः । उप-
तम् २ । इत्यमरः । ३ । १ । ८८ ॥
ा, स्त्री, (निदिग्ध + टाप् ।) एला । इति
दचन्द्रिका ॥ (विवृतिरस्या एलाशब्दे
तव्या ॥)
धिका, स्त्री, (निदिग्धा + स्वार्थे संज्ञायां
कन् । कापि अत इत्वम् ।) एला । इति
दचन्द्रिका ॥ (यथा, सुश्रुते । ३ । १० ।
"नित्यहस्तीविल्वपटोलेषु निदिग्धिकाः ॥")
कण्टकारिका । इत्यमरः । २ । ४ । ९३ ॥
अस्याः पर्य्यायो यथा,—
"गाक्रान्ता बृहती व्याघ्री भण्टाकी च निदि-
ग्धिका ।
दी धावनिका क्षुद्रा दुःस्पर्शा कण्टकारिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
ासनं, क्ली, (पुनः पुनरतिशयेन वा निध्याय
ति । नि + ध्यै + सन् । ततो भावे ल्युट् ।)
:पुनःस्मरणम् ॥ अद्वितीयवस्तुनि तदाकारा-
ारिताया बुद्धेः स्वजातीयप्रवाहः । इति
रान्तसारः ॥
ः, पुं, (नि + दिश + घञ् ।) आज्ञा ।
मरः । २ । ८ । २५ ॥ (यथा, देवीभाग-
ते । २ । १० । ४८ ।
"श्रुत्वा तान् द्विजान् मत्वा निदेशं भूपतेर्यया ॥")
सनम् । उपान्तम् । इति मेदिनी । शे, २३ ॥
यथा, मनुः । २ । १९७ ।
"ाड्मुखस्याभिमुखो दूरस्थस्यैत्य चान्ति-
कम् ।
न्न तु शयानस्य निदेशे चैव तिष्ठतः ॥")
त्तनम् । इति धरणिः ॥
शी, स्त्री, (निदिशतीति । नि + दिश +
ति ङीप् ।) दिक् । इति राजनिर्घण्टः ॥

निदेष्टा, [ऋ] त्रि, (निदिशतीति । नि + दिश + तृच् ।) निदेशकर्त्ता । निदिशति इति युत्-प्रत्ययात् तृचा निष्पन्नः । इति मुग्धबोधमतम् ॥

निद्रा, स्त्री, (निन्द्यते इति । निदि कुत्सायाम् + "निन्देर्नलोपश्च ।" उणां । २ । १७ । इति रक् नलोपश्च ।) मेध्यामनःसंयोगः । इति जगदीशः ॥ सुषुप्त्यवस्थास्वप्नावस्था । इति चण्डीटीकायां नागभट्टः ॥ घुम इति भाषा ॥ तत्पर्य्यायः । शयनम् २ स्वापः ३ स्वप्नः ४ संवेशः ५ । इत्यमरः । २ । ७ । ३६ ॥ सुप्तिः ६ स्वपनम् ७ । इति शब्दरत्नावली ॥ यथाकाले सेवितनिद्रा-गुणाः । धातुसाम्यत्वम् । अतन्द्रितत्वम् । पुष्टिवर्णबलोत्साहाग्निदीप्तिकारित्वञ्च ॥ * ॥ दिवास्वप्नगुणः । स्निग्धत्वम् । तृट्शूलहिक्काजीर्णातिसारिणां हितत्वञ्च ॥ * ॥ आसीनप्रचलायितस्य उपविश्य निद्रावशाद्दोलायमानस्य गुणः । अरूक्षत्वम् । अनभिष्यन्दित्वञ्च ॥ * ॥ निद्रासात्म्यीकृतानां दिवा रात्रौ च स्वपतां जाग्रतां वा दोषो न भवति । इति राजवल्लभः ॥ * ॥
निद्रारहिता यथा,—
"कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च ।
परनारीप्रसक्तस्य परद्रव्यहरस्य च ॥" * ॥
सुखसुप्ता यथा,—
"सुखं स्वपित्यऋणवान् व्याधिमुक्तश्च यो नरः ।
सावकाशस्तु यो भुङ्क्ते यस्तु दारैर्न शङ्कितः ॥"
इति गारुडे नीतिसारः ॥
("सत्त्वाच्च तम एव स्यात् जायते स्वपते प्रभुः ।
तमसा प्रावृतो देही योग्या च शून्यतावृतः ॥
देहं विश्रमते यस्मात्तस्मान्निद्रा प्रकीर्त्तिता ।
नासार्द्धे च भ्रुवोर्म्मध्ये लीयते चान्तरात्मना ॥
तस्माच्चेतो भवेत्तत्र निद्रायालीयते नृणाम् ॥"
इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम् ॥
"निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम् ।
वृषता क्लीवता ज्ञानमज्ञानं जीवितं न च ॥
अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता ।
सुखायुषी पराकुर्य्यात् कालरात्रिरिवापरा ॥"
इति वाभटे सूत्रस्थाने सप्तमेऽध्याये ॥
"पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम् ।
जाग्रतस्तद्विकशति स्वपतश्च निमीलति ॥
निद्रान्तु वैष्णवीं पाप्मानमुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिस्पृशति ॥ तत्र यदा संज्ञावहानि स्रोतांसि तमो भूयिष्ठः श्लेष्मा प्रतिपद्यते तदा तामसी नाम निद्रा सम्भवत्यनवबोधिनी सा प्रलयकाले । तमोभूयिष्ठानामहःसु निशासु च भवति । रजो भूयिष्ठानामनिमित्तम् । सत्त्वभूयिष्ठानामर्द्धरात्रे । क्षीणश्लेष्माणमनिलबहुलानां मनःशरीराभितापवताञ्च नैव सा वैकारिकी भवति ॥
हृदयं चेतनास्थानमुक्तं सुश्रुत ! देहिनाम् ।
तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनाम् ॥
निद्राहेतुस्तमः सत्त्वं बोधने हेतुरुच्यते ।
स्वभाव एव वा हेतुर्गरीयान् परिकीर्त्यते ॥

पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः ।
रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान् ॥
करणानान्तु वैकल्ये तमसाभिप्रवर्द्धिते ।
अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते ॥
सर्व्वर्त्तुषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

निद्राणः, त्रि, (नि + द्रा + क्तः । "संयोगादेरातो धातोर्यण्वतः ।" ८ । २ । ४३ । इति तस्य नः ।) निद्रागतः । तत्पर्य्यायः । शयितः २ । इत्यमरः । ३ । १ । ३३ ॥ (यथा, आर्य्यासप्तशत्याम् । ५२६ ।
"विहितविविधाशुबन्धो मानोन्नतयावधीरितो मानी ।
लभते कुतः प्रबोधं स जागरितेव निद्राणः ॥")

निद्रालुः, त्रि, (निद्रातीति । नि + द्रा + "स्पृहिगृहीति ।" ३ । २ । १५८ । इति आलुच् ।) निद्राशीलः । निद्रा विद्यते अस्य शीतोष्णेत्यादिना आलुः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । स्वप्नक् २ शयालुः ३ । इत्यमरः । ३ । १ । ३३ ॥ तन्द्रालुः ४ । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । ५ । ४१ ।
"काम्यं विवर्ज्जयेच्चौर्य्यं निद्रालुश्चर्म्मचौरिकाम् ।
जिह्वालौल्यञ्च रोगाढ्यो जीवितं योऽत्र वाञ्छति ॥")

निद्रालुः, स्त्री, (निद्रा हेतुत्वेनास्त्यस्या इति । निद्रा + बाहुलकात् आलुः ।) वार्त्ताकी । वनबर्व्वरिका । इति राजनिर्घण्टः ॥ नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

निद्रावृक्षः, पुं, (निद्राया वृक्ष इव ।) अन्धकारः । इति शब्दमाला ॥

निद्रासंजननं, क्ली, (निद्रां संजनयतीति । सं + जन + णिच् + ल्युः ।) श्लेष्मा । इति शब्दमाला ॥

निधनं, क्ली, (नि + धा + "कृपृवृजिमन्दिनिधाञः क्युः ।" उणां । २ । ८२ । इति क्युः ।) नाशः । तत् तु अदर्शनं मरणञ्च । (यथा, विष्णुपुराणे । १ । १३ । ७३ ।
"एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ॥
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥")
कुलम् । तत्तु कुलस्थानं कुलमुख्यञ्च । इत्यमरभरतौ ॥

निधनः, पुं क्ली, (नि + धा + क्युः ।) मरणम् । इत्यमरः । २ । ८ । ११६ ॥ वधतारा । सा तु जन्मनक्षत्रात् सप्तमी तारा । यथा, जन्मसम्पद्विपत् क्षेमः प्रत्यरिः साधको वध इत्यादि । प्रत्यरौ लवणं दद्यान्निधने तिलकाञ्चनम् । इति ज्योतिस्तत्त्वम् ॥ (निष्क्रान्तं धनं यस्य ।) धनहीने, त्रि ॥

निधानं, क्ली, (निधीयतेऽत्रेति । नि + धा + आधारे ल्युट् ।) निधिः । इति हेमचन्द्रः । २ । १०६ ॥ (यथा, पञ्चतन्त्रे । २ । १६४ ।
"कन्दैः फलैर्मुनिवरा गमयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ॥")
आधारः । यथा,—

निधानभगतं सद्य: सर्व्वं समधिगच्छति ।"

इत्यागम: ॥

(यथा, देवीभागवते । १ । १६ । ३४ ।
"ब्रह्मविद्यानिधानस्य संसारार्णवतारकम् ॥")
कार्य्यावसाने प्रवेशस्थानम् । यथा,—
"एतन्नानावताराणां निधानं बीजमव्ययम् ॥"

इति श्रीभागवतम् ॥

निधि:, पुं, (निधीयतेऽस्मिन्निति । नि + धा + कि: ।)
नलिकानामगन्धद्रव्यम् । तत्पर्य्याय: । इति राज-
निर्घण्ट: ॥ (यथा, देवीभागवते । ३ । २२ । १० ।
"कन्यां सुकेशीं निधिकल्पकाशम्
मेने तदात्मानमनुत्तमञ्च ॥")
जीवकौषधि: । इति शब्दचन्द्रिका ॥ आधार: ।
यथा । गुणनिधि: । जलनिधि: । इत्यादय: ॥
चिरमनष्टस्वामिकभूजातधनविशेष: । इति
प्राञ्च: ॥ अज्ञातस्वामिकचिरनिखातस्वर्णादि ।
यथा । अधुना भूमौ चिरनिखातस्य सुवर्णा-
देर्निधिशब्दवाच्यस्याधिगमे विधिमाह ।
"राजा लब्ध्वा निधिं दद्यात् द्विजेभ्योऽर्द्धं द्विज:

पुन: ।

विद्वानशेषमादद्यात् स धर्म्मस्वामी प्रकीर्त्तित: ॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् ।
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥"
"उत्तमलक्षणं निधिं राजा लब्ध्वार्द्धं ब्राह्मणेभ्यो
दत्त्वा शेषं कोषे निवेशयेत् । ब्राह्मणस्तु विद्वान्
श्रुताध्ययनसम्पन्न: सदाचारो यदि निधिं लभेत
तदा सर्व्वमेव गृह्णीयात् । यस्मादसौ सर्व्वस्य
जगत: प्रभु: । इतरेण तु राजविद्वद्ब्राह्मण-
व्यतिरिक्तेनाविद्वद्ब्राह्मणक्षत्रियादिना निधौ
लब्धे राजा षष्ठांशमधिगन्त्रे दत्त्वा शेषं निधिं
स्वयमाहरेत् । यथाह वशिष्ठ: । अप्रज्ञायमानं
वित्तं योऽधिगच्छेत् राजा तद्धरेदधिगन्त्रे षष्ठ-
मांशं प्रदद्यात् इति । गौतमोऽपि निध्यधिगमो
राजधनं न ब्राह्मणस्याभिरूपस्यात्राब्राह्मणोऽप्या-
ख्याता षष्ठं अंशं लभेतेत्येक इति । अनिवेदित
इति कर्म्मणि निष्ठा । अनिवेदित-
स्तु राजा इत्यनिवेदितविज्ञात: । य: कश्चि-
न्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च
राजा स सर्व्वं निधिं दाप्यो दण्डञ्च शक्त्यपेक्षया ।
...प निधेरपि स्वाम्यागमरूपसङ्ख्यादिभि: स्वत्वं
...ावयति तदा तस्मै राजा निधिं दत्त्वा षष्ठं
...द्यं वांशं स्वयमाहरेत् । यथाह मनु: ।
...मायमिति यो ब्रूयान्निधिं सत्येन मानव: ।
...ाददीत षड्भागं राजा द्वादशमेव वेति ॥
...दिशकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्य: ।"

इति मिताक्षरायां व्यवहाराध्याय: ॥

...स्य बन्धा रत्नविशेष: । तत्पर्य्याय: ।
...२ । इत्यमर: । १ । १ । ७२ ॥ शेवधि: १ ।
...न: ॥ नवैते यथा,—
...निधयो महापद्म: पद्मो मकरकच्छपौ ।
...न्दनीलाश्च वर्च्चोऽपि निधयो नव ॥"

इति हारावली ॥

मार्कण्डेयपुराणे तु वर्च्च इति हित्वा अष्टावेव
उक्ता: । इति भरत: ॥ * ॥ तल्लक्षणं यथा,—
"पद्मिनी नाम या विद्या लक्ष्मीस्तस्याधिदेवता ।
तदाधाराश्च निधयस्तान्मे निगदत: शृणु ॥
तत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।
मुकुन्दनीलौ नन्दश्च शङ्खश्चैवाष्टमो निधि: ॥
सत्यामृद्धौ भवन्त्येते सद्भि: सह भवन्त्यमी ।
एते ह्यष्टौ समाख्याता निधयस्तव क्रोष्टुके ! ॥
एभिरालोकितं चित्तं मनुष्यस्य महामते ! ।
यादृक् स्वरूपं भवति तन्मे निगदत: शृणु ॥
पद्मो नाम निधि: पूर्व्व: स यस्य भवति द्विज ! ।
स तस्य तत्सुतानाञ्च तत्पौत्राणाञ्च नान्यग: ॥
दाक्षिण्यसार: पुरुषस्तेन चाधिष्ठितो भवेत् ।
सत्त्वाधारो महाभागो यतोऽसौ सात्त्विको

निधि: ॥

सुवर्णरौप्यताम्रादिधातूनाञ्च परिग्रहम् ।
करोत्यतितरां सोऽथ तेषाञ्च क्रयविक्रयम् ॥
करोति च यथा यज्ञान् दक्षिणाञ्च प्रयच्छति ।
सम्पादयति कामांश्च सर्व्वानेव यथाक्रमम् ॥
सभादेवनिकेतांश्च स कारयति तन्मना: । * ।
सत्त्वाधारो निधिश्चान्यो महापद्म इति श्रुत: ॥
सत्त्वप्रधानो भवति तेन चाधिष्ठितो नर: ।
करोति पद्मरागादिरत्नानाञ्च परिग्रहम् ॥
समौक्तिकप्रवालानां तेषाञ्च क्रयविक्रयम् ।
ददाति योगशीलेभ्यस्तेषामावसथांस्तथा ॥
स कारयति तच्छील: स्वयमेव च जायते ।
तत्प्रसूतास्तथाशीला: पुत्त्रपौत्त्रक्रमेण च ॥
पूर्व्वर्द्धिमात्र: सप्तासौ पुरुषांश्च न मुञ्चति ।
महापद्मस्तु विप्राणां यस्मै सम्प्रजायते ॥ * ॥
तामसो मकरो नाम निधिस्तेनावलोकित: ।
पुरुषोऽथ तम:प्राय: सुशीलोऽपि हि जायते ॥
बाणखड्गर्ष्टिधनुषां चर्म्मणाञ्च परिग्रहम् ।
दंशनानाञ्च कुरुते याति मैत्रीञ्च राजभि: ॥
ददाति शौर्य्यवृत्तीनां भूभुजां ये च तत्प्रिया: ।
क्रयविक्रयश्च शस्त्राणां नान्यत्र प्रीतिमेति च ॥
एकस्यैव भवत्येष नरस्य न सुतानुग: ।
द्रव्यार्थं दस्युतो नाशं संग्रामे वापि संव्रजेत् ॥ * ॥
कच्छपाख्यो निधिर्योऽन्यो नरस्तेनाभिवीक्षित: ।
तम:प्रधानो भवति यतोऽसौ तामसो निधि: ॥
व्यवहारान् स निखिलान् पण्यजातं करोति च ।
कर्म्माण्यनखिलान्येव न विश्वसिति कस्यचित् ॥
समस्तानि यथाङ्गानि निवद्धास्ते हि कच्छप: ।
तथावष्टभ्य रत्नानि तिष्ठत्याकुलमानस: ॥
न ददाति न वा भुङ्क्ते तद्विनाशभयाकुल: ।
निधानमुर्व्व्यां कुरुते निधि: सोऽप्येकपूरुष: ॥ * ॥
रजोगुणमयश्चान्यो मुकुन्दो नाम यो निधि: ।
नरोऽवलोकितस्तेन तद्गुणो भवति द्विज ! ॥
वीणावेणुमृदङ्गादिगीतवाद्यपरिग्रहम् ।
करोति गायतां वित्तं नृत्यताञ्च प्रयच्छति ॥
वन्दिमागधसूतानां विटानां लास्यपाठिनाम् ।
ददात्यहर्निशं भोगान् भुङ्क्ते तैस्तु समं द्विज ॥
कुलटासु रतिश्चास्य भवत्यन्यैश्च तद्विधै: ।

प्रयाति सङ्गमेकञ्च ...
रज:सत्त्वमयश्चान्यो ...
उपैति साम्यमधिकं ...
समस्तधातुरत्नानां ...
प्रतिग्रहं करोत्येष तथैव ...
आधार: ...
सहते नावमानोक्तिं स्वल्पा...
स्तूयमानश्च महतीं प्रीतिं ...
यं यमिच्छति वै ...
बह्व्यो भार्य्या भवन्त्यस्य सुतिम...
सन्ततौ सप्त च ...
प्रवर्द्धमानोऽनु नरमष्टभागेन ...
दीर्घायुष्यश्च सर्व्वेषां ...
बन्धूनामेव भरणं ये च दूरादुपाग...
तेषां करोति वै नन्द: परलोके ...
भवत्यस्य न च स्नेह: सहवासिषु
पूर्व्वमित्रेषु शैथिल्यं प्री...
तथैव सत्त्वरजसी यो ...
स नीलसंज्ञस्तत्सङ्गी ...
वस्त्रकार्पासधान्यादिफल...
मुक्ताविद्रुमशङ्खानां ...
काष्ठादीनां करोत्येष ...
क्रयविक्रयमन्येषां नान्यत्र ...
तडागान् पुष्क...
वन्धांश्च सरितां वृक्षांस्तथा ...
अनुलेपनपुष्पादिभोगभुग् वा...
निर्वीर्य्यश्चापि ...
रजस्तमोमयश्चान्य: शङ्खसंज्ञो ...
तेनापि नीयते विप्र ! तद्गुणत्व...
एकस्यैव भवत्येष नरं नान्यमुपैति ...
यस्य शङ्खो निधिस्तस्य ...
एक एवात्मना स्वन्नं भुङ्क्त...
कदन्नभुक् परिजनो न च ...
न ददाति सुहृद्भार्य्यासुतपौत्रस्नुषादि...
स्वपोषणपर: शङ्खी नरो भवति सर्व्वदा ।
इत्येते निधय: ख्याता ...
मिश्रावलोकिनो मिश्रस्व...
यथाख्यात: स्वभावस्तु ...
सर्व्वेषामाधिपत्ये च श्रीरेषा ...
इति मार्कण्डेयपुराणे ...
(पौरववंशीयनृपविशेष: । ...
पुत्त्र: । मत्स्यपुराणादिमते ...
विख्यात: । ५० । ८७ ॥ यथा, ...
परिच्छेदे
"कुरुणे पृथिवीमेनां रक्ष्यार्थ्यं ...
राजासने तत: सोऽपि स्थापयित्वा ...
सरमारायणं देव तस्मै स वरं ददौ ...
निधिस्तु निधिसंज्ञार्थं चकार ...
विष्णु: । यथा, महाभारते । १३ ।
"सर्व्व: शर्व्व: शिव: स्थाणुर्भूतादि...
"प्रलयकालेऽस्मिन् सर्व्वं निधीयते इति ...
इति तद्भाष्ये शङ्कर: ॥

[illegible]। यथा, [illegible] । १६ । १०।७१ ।
[illegible] निन्दितकर्म्मकारी [illegible] ।")
[illegible], पुं, ([illegible]) [illegible] । इति
[illegible] । [illegible] । [illegible] । [illegible]-
[illegible] । [illegible] ।
[illegible], स्त्री, ([illegible]) [illegible] । [illegible] । ७ । ४० ।
[illegible] । ११ । १८ ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।")
[illegible] । इति शब्दरत्नावली । ([illegible]) [illegible] । इति [illegible] ।
[illegible]
[illegible], स्त्री, (नि+धे+ल्युट् ।) [illegible] ।
[illegible] । ६ । ८ । ११ ।
[illegible], पुं, (नि+ [illegible] +घञ् ।) शब्दः ।
इति शब्दरत्नावली ।
[illegible], पुं, (नि+नद+"नौ गदनदपठस्वनः ।"
३ । ३ । ६४ । इति अप् ।) शब्दः । इत्यमरः ।
१।६।२३ । (यथा, देवीभागवते । १।९।४० ।
[illegible] ।")
[illegible], पुं, (नि+नद्+भावे घञ् ।) शब्दः ।
इत्यमरः । १ । ६ । २३ । (यथा, रामायणे । ६ । १ । १९ ।
[illegible] ।")
[illegible], त्रि, (निन्दति तच्छीलः । णिदि कुत्-
सायाम् + "निन्दहिंसेति ।" ३ । २ । १४६ ।
इति वुञ् ।) निन्दाकारकः । यथा,—
"न भाराः पर्वता भारा न भाराः सप्तसागराः ।
निन्दका हि महाभारा भारा विश्वासघातकाः ॥"
इति कर्म्मलोचनम् ॥
[illegible], त्रि, (निन्द्यं निन्दार्हं तन्त्रं कुलतन्त्रं
[illegible] ।) निन्दितकुलः । इति शब्दरत्नावली ॥
[illegible], क्ली, (णिदि कुत्सायाम्+भावे ल्युट् ।)
निन्दा । इति शब्दरत्नावली ॥
निन्दा, स्त्री, (निन्दनमिति । णिदि+"गुरोश्च
हलः ।" ३ । ३ । १०३ । इति स्त्रियां अः ।)
अपवादः । कुत्सितः । इति शब्दरत्नावली ॥
निन्दनम् । तत्पर्य्यायः । अवर्णः २ आक्षेपः ३
निर्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः
७ जुगुप्सा ८ कुत्सा ९ गर्हणम् १० । इत्यमरः ॥
गर्हा ११ कुत्सनम् १२ परिवादः १३ जुगु-
प्सनम् १४ अपक्रोशः १५ भर्त्सनम् १६ अव-
वादः १७ । इति शब्दरत्नावली ॥ गर्हणा
१८ धिक्क्रिया १९ । इति हेमचन्द्रः ॥ (यथा,
मनुः । २ । २०० ।
"गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥")
हरीश्वरभक्तादिनिन्दायां दोषो यथा,—
"हरेश्वरयोर्भक्तं ये च निन्दन्ति पापिनः ।
भ्रष्टैवान् माम्पायोंचैव स्वगुरुं च पतिव्रताः ॥

[illegible] तथा ।
[illegible] यावच्चन्द्रदिवाकरौ ॥
[illegible] दिवानिशम् ।
भक्षिताः कीटनिकरैः शब्दं कुर्व्वन्ति कातराः ॥
ये निन्दन्ति च भक्तानं महान्तं जगतां गुरुम् ।
[illegible] प्रवरं दुर्गां लक्ष्मीं सरस्वतीम् ॥
[illegible] गुरुपत्नीं गङ्गां वेदांश्च वेदमातरम् ।
[illegible] तपस्वी पूतांश्च सतां सत्यप्रदं गुरुम् ॥
[illegible] वायुयोरुद्दं [illegible] ।
भक्षिताः सर्पसंघैश्च शब्दं कुर्व्वन्ति सन्ततम् ॥
[illegible] निन्दन्ति सूर्य्येशं दैवमाद्यं विधाय च ।
[illegible] पुराणस्य श्रुतेः परम् ॥
[illegible] गोपीगोपगणांश्च महर्षिकान् ।
[illegible] देव ! विधातुरायुषा समम् ॥
[illegible] गर्त्तसंघेश्च वेष्टिताः ।
भक्षिता विकृताकारैः कीटैः सर्पैः समावृतैः ॥
[illegible] भीताः शब्दं कुर्व्वन्ति सन्ततम् ।
[illegible] भुवे भवन्ति शोभिताः ॥
[illegible] दशनं तस्मिन् यमकिङ्कराः ।
[illegible] कुर्व्वन्ति दण्डताडनम् ॥
कुर्व्वन्ति [illegible] प्रहारैस्तृषिता भिया ।
[illegible] प्रपत्ते पुनः ॥
[illegible] कमलोद्भवः ।
परनिन्दा विनाशाय स्वनिन्दा यशसे परम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।४०।४१ अः ॥
"वेदनिन्दारतान् मर्त्त्यान् देवनिन्दारतांस्तथा ।
द्विजनिन्दारतांश्चैव मनसापि न चिन्तयेत् ॥
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्ज्जयेत् ।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्ज्जयेत् ॥
यस्तु देवानृषींश्चैव वेदं वा निन्दति द्विजः ।
न तस्य निष्कृतिर्दृष्टा शास्त्रेष्विह मुनीश्वराः ! ॥
निन्दयेद्वै गुरुं देवं वेदं वा सोपबृंहणम् ।
कल्पकोटिशतं साग्रं रौरवे पच्यते नरः ॥
तूष्णीमासीत निन्दायां न ब्रूयात् किञ्चिदुत्तरम् ।
कर्णौ पिधाय गन्तव्यं न चैनानवलोकयेत् ॥
वर्ज्जयेद्वै परेषान्तु रहस्यं गर्हणं बुधः ।
न निन्देद्योगिनः सिद्धान् व्रतिनो वा यतीं-
स्तथा ॥
देवतायतनं प्राज्ञो देवानाञ्चाश्रितस्तथा ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥

निन्दास्तुतिः, स्त्री, (निन्दया स्तुतिः ।) व्याज-
स्तुतिः । यथा,—
"निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुति-
निन्दयोः ।"
निन्दया स्तुतिर्गम्यत्वे व्याजेन स्तुतिरिति च
व्युत्पत्त्या व्याजस्तुतिः । इति साहित्यदर्पणः ।
अपि च ।
"यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ मता ।"
उदाहरणम् ।
"तापसेनापि रामेण जितेयं भूतधारिणी ।
त्वया राज्ञापि सैवेयं जिता माभून्मदस्तव ॥"
इति दण्डी ॥

"इयमयनिम ! दृशौ यस्मिन् [illegible]-
[illegible] विद्विषां मौलिता श्रीः ।
ननु तव निहतारेरप्यसौ किम् नीता
त्रिदिवमपगताङ्गैर्बल्लभा कीर्त्तिरेभिः ॥
इत्यादौ निन्दास्तुतिवपुषा व्यक्तयस्य ।" इति
काव्यप्रकाशः ॥

निन्दितः, त्रि, (निन्दास्य जातेति । निन्दा+
"तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ ।
६ । इति इतच् ।) निन्दायुक्तः । तत्पर्य्यायः ।
धिक्कृतः २ अपध्वस्तः ३ निर्भर्त्सितः ४ ।
इति जटाधरः ॥ (यथा, देवीभागवते । ६ ।
७ । ४९ ।
"मधु मन्यति मूढात्मा प्रमात्तं नैव मन्यति ।
करोति निन्दितं कर्म्म नरकान्न बिभेति च ॥")

निन्दुः, स्त्री, निन्द्यतेऽप्रजस्त्वेनासौ । णिदि कुत्सायां-
मित्यादौ औणादिक उप्रत्ययः । मृतवत्सा ।
इति हेमचन्द्रः । ३ । १९५ ॥

निपः, पुं क्ली, (नियतं पिबत्यनेनेति । नि+पा+
अस्वतन्त्राः प्रजाः सर्वाः स्वतन्त्रः पृथिवीपतिः ।
अस्वतन्त्रः स्मृतः शिष्य आचार्ये तु स्वतन्त्रता ।
अस्वतन्त्राः स्त्रियः सर्वाः पुत्रा दासाः परि-
ग्रहाः ।
स्वतन्त्रस्तत्र तु गृही यस्य यत् स्यात् क्रमागतम् ।
गर्भस्थैः सदृशो ज्ञेयः अष्टमाद्वत्सराच्छिशुः ।
बाल आषोडशाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ।
जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः ।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे च पूर्वजः ।'
परिग्रहाः अनुजीविप्रभृतयः । तथा च बृह-
स्पतिः ।
'पितृमातृसुतभ्रातृदासाद्यैरनुजीविभिः ।
यदृणं तैः कुटुम्बार्थे तद्गृही दातुमर्हति ।'
कात्यायनः ।
'कुटुम्बार्थमशक्तो तु गृहीतं व्याधितेन वा ।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत् ।
कन्यावैवाहिकञ्चैव प्रेतकार्ये च यत् कृतम् ।
एतत् सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ।'
प्रभोरिति कर्तरि षष्ठी तेन प्रभुणा दातव्य-
मिति रत्नाकरः । बृहस्पतिः ।
'यः स्वामिना नियुक्तोऽपि धनाय व्ययाय च ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः ।
प्रमाणं तत्कृतं सर्वं सामान्यामयवेदयन् ।
स्वदेशे वा विदेशे वा स्वामी तन्न विसंवदेत् ।'
सम्यक्तत्त्वं स्वामिन इत्यर्थः ।" इति व्यवहार-
तत्त्वम् । अधिकरणविशेषः । यथा,—
"विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ।"
इति स्मृतिमीमांसा ।
न्यायमते तदभावाप्रकारकत्वे सति तत्प्रकारक-

ज्ञानम् । यथा । वह्निमान् पर्व्वत इत्यादि-
बोधः । इति भाषापरिच्छेदः ॥ तत्त्वमीयावच्छिन्न-
प्रकारत्वाद्यप्रकारत्वानिरूपितप्रमातावच्छेदका-
वच्छिन्नविशेष्यताशालिज्ञानम् । इति जग-
दीशः ॥

निर्णयनं, क्ली, (निर् + नी + भावे ल्युट् ।) निर्णयः ।
इति शब्दरत्नावली ॥

निर्णयपादः, पुं, (निर्णयात्मकः पादो भागविशेषः ।)
चतुष्पाद्व्यवहारान्तर्गतव्यवहारविशेषः । तस्य
रूपम् । मिलितानां सभासदां पराजितोऽय-
मित्यवधारणम् । इति व्यवहारतत्त्वम् ॥

निर्याणं, क्ली, (निर् + नी + णिच् + ल्युट् ।)
मातङ्गापाङ्गदेशः । तत्पर्य्यायः । निर्याणम् २ ।
इति शब्दरत्नावली ॥

निर्णिक्तं, त्रि, (निर्णिज्यते शुध्यति स्मेति । निर् +
णिज् + क्तः ।) अपनीतमलम् । शोधितम् ।
इत्यमरः । ३ । १ । ५६ ॥ (यथा, चिन्तामणि-
धृतस्मृतिवचनम् ।
"जलदेवस्तथैव श्मशानं गोष्ठिकालयम् ।
निर्णिक्तपादः प्रविशेन्नानिर्णिक्तः कदाचन ॥")

निर्णीतं, त्रि, (निर् + नी + क्तः ।) कृतनिर्णयः ।
निश्चयीकृतः । यथा,—
"निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत् ॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णीतव्यवहाराणां प्रमाणमफलं तथा ॥"
इति व्यवहारतत्त्वम् ॥
तद्वैदिकपर्य्यायः । "निण्यम् १ सस्वः २ सनुतः
३ हिरुक् ४ प्रतीच्यम् ५ अपीच्यम् ६ । इति
षडन्तर्हितान्तर्हितनामधेयानि ।" इति वेद-
निघण्टौ । ३ । २५ ॥

निर्णेजकः, पुं, (निर्णेनेक्ति निर्म्मलीकरोति वस्त्र-
मिति । निर् + णिज शौचे + ण्वुल् ।) रजकः ।
इत्यमरः । २ । १० । १० ॥ (यथा, मनुः ।
४ । २१६ ।
"कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च ।
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति ॥")

निर्द्दटः, त्रि, परापवादरक्तः । दयाशून्यः । तीव्रः ।
मत्तः । निष्प्रयोजनः । इति शब्दरत्नावली ॥

निर्द्दयः, त्रि, (निर्गता दया यस्मात् ।) दयाशून्यः ।
इति जटाधरः ॥ (यथा, रघुः । ११ । ८४ ।
"न प्रहर्त्तुमलमस्मि निर्द्दयं
विप्र इत्यभिभवत्यपि त्वयि ।"
निर्गता दया यस्मो यमुद्दिश्य दया विरोधिता
इत्यर्थः । अत्याहः । यथा, मनुः । ६ । २३६ ।
"शान्तिमन्त्रिभिर्स्वैते व्यक्ताः हतलक्षणाः ।
निर्द्दया निर्नमस्काराश्च मनोरनुशासनम् ॥")

निर्द्दरं, क्ली, (निर् + दृ + अप् ।) निर्भरम् ।
(निर्गतो दरश्छिद्रं यस्मात् ।) सारम् । त्रि, कठि-
नम् । (यथा, रामायणे । २ । ८५ । १६ ।
"ध्याननिर्द्दरशैलेन विनिःश्वसितधातुना ॥")
अपभये च त्रि । इति मेदिनी । रे, १०५ ॥

(निर्द्दीर्य्यते विदीर्य्यते घनमस्मादिति । निर् +
दृ विदारे + अप् । निर्भरः । इति कश्चित् ॥
निर्गतोऽस्ति दरो भयो यस्मादिति निर्भये, त्रि ।)

निर्द्दहनः, पुं, (नितरां दहतीति । निर् + दह +
ल्युः ।) भल्लातकः । इति राजनिर्घण्टः ॥
(भल्लातकशब्देऽस्य गुणादिकं ज्ञातव्यम् ॥
नितरां दहनो वह्निर्यत्र ।) अग्निमूलकः ॥

निर्द्दहनी, स्त्री, (निर्गतं दहनं यस्याः । स्त्रियां
ङीप् ।) मूर्व्वालता । इति रत्नमाला ॥ (यथा,
"सूतं तथा निकरोषिषवीष
तथाभया निर्द्दहनीच तुल्याम् ।
पिबेच्च गोमूत्रयुतां कपोते
शूले तथामस्य च पाचनार्थम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे शूलाधिकारे ॥)

निर्दिग्धः, त्रि, (निर् + दिह + क्तः ।) बली ।
मांसलः । इति हेमचन्द्रः । ३ । ११३ ॥

निर्दिष्टः, त्रि, (निर् + दिश + क्तः ।) निश्चितः ।
यथा,—
"निर्दिष्टविषयं किञ्चिदुपात्तविषयन्तथा ।
अपेक्षितक्रियञ्चेति त्रिधापादानमिष्यते ॥"
इति रामतर्कवागीशः ॥
(आदिष्टः । यथा, रघुः । १ । ९५ ।
"निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः ॥"

निर्द्देशः, पुं, (निर् + दिश + भावे घञ् ।) आज्ञा ।
इत्यमरः । २ । ८ । २५ ॥ (यथा, भागवते ।
६ । १ । ३८ ॥
"यूयं वै धर्म्मराजस्य यदि निर्द्देशकारिणः ।
ब्रूत धर्म्मस्य नस्तत्त्वं यच्च धर्म्मस्य लक्षणम् ॥")
कथनम् । (यथा, गीतायाम् । १७ । २३ ।
"ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः ॥")
उपान्तः । इति मेदिनी । शे, २३ ॥

निर्द्देष्टा, [ऋ] त्रि, (निर्द्दिशतीति । निर् + दिश +
तृच् ।) निर्द्देशकर्त्ता । यथा, "तथाहि अर्थौ
नाम साध्यस्य अर्थस्य निर्द्देष्टा तत्प्रतिपक्ष-
स्तदभाववादी प्रत्यर्थी ।" इति मिताक्षरायां
व्यवहाराध्याये साधारणप्रकरणम् ॥

निर्द्दोषः, त्रि, (निर्गतो दोषो यस्मात् ।) दोष-
रहितः । यथा,—
"निर्द्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति ।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु ॥"
इति मिताक्षरा ॥

निर्धनः, पुं, (निर्गतं धनं यस्मात् ।) जरद्गवः ।
इति शब्दचन्द्रिका । धनशून्ये, त्रि । यथा,—
"अवाच्यापि नरः पूज्यो यस्यास्ति विपुलं धनम् ।
शशिवस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥"
इति चाणक्ये । ८२ ॥

निर्धर्म्मः, त्रि, (निर्गतो धर्म्मो यस्मात् ।) धर्म्म-
रहितः । यथा,—
"महापराधे निर्धर्म्मे कृतघ्ने क्लीवकुत्सिते ।
नास्तिकव्यात्यदासेषु कोषपानं विवर्जयेत् ॥"
इति मिताक्षरा ॥

निर्धारः, पुं, (निर्धार्य्यतेऽनेनेति ।
घञ् ।) निश्चयः ।
जातिकर्म्म वा गुणतोऽपि
यथा । मनुष्याणां क्षत्रियः शूरः ।
बहुक्षीरा । अध्वगानां धावकः
इति दुर्गादासः ॥ धारणेऽपि च ।

निर्धारणं, क्ली, (निर्धार्य्यते इति । नि
णिच् + भावे ल्युट् ।) निश्चयः । निर्द्धा
निर्द्धारणे षष्ठी समासो न इति
दासः ॥

निर्धारितं, त्रि, (निर्धार्य्यते
निर् + धृ + णिच् + कर्म्मणि क्तः ।)
निश्चयः । यथा । "
विशेषस्य ।" इति विश्वप्रकाशः ।

निर्धार्य्यं, त्रि, (निर्धियते इति ।
"ऋहलोर्ण्यत् ।" ३ । १ । १२४ ।
धारि + यत् वा ।) निर्धारणीय-
तयम् । निर्णयकर्म्मकर्त्ता । इति
निर्धार्य्यशब्दटीकायां रमानाथः ।

निर्धूतं, त्रि, (निर् + धू + क्तः ।)
(यथा, मार्कण्डेये । ८५ । ७४ ।

परित्यक्तम् । यथा, ज्योतिस्तत्त्वे ।
"निर्धूतं निर्धूतबुद्धिं

(निरस्तम् । यथा,
"पठन्ति ये नित्यमनन्यचेतसः
शृण्वन्ति भावाकृतसंज्ञितं
रामायणं सर्व्वपुराणसम्मतं
निर्धूतपापा हरिमेव यान्ति ते ॥
भर्त्सितम् । यथा, रामायणे ।
"पुराहं वालिना राम ! राज्यात्

प्रव्रजामि

निर्धौतं, त्रि, (निर् + धाव +
"च्छ्वोः शूडनुनासिके च ।" ६ । ४ ।
वकारस्योठादेशः । "एत्येधत्यूठ्सु ।"
इति वृद्धिः ।) प्रक्षालितम् । यथा,—
"तस्याः

निर्धौतोऽधरशोणिमा विलुलितस्तनौ

इति

निर्बन्धः, पुं, (निर् + बन्ध + भावे घञ् ।)
निर्वेशः । निरन्धोऽपि पाठः । इति ।
६ । १२६ ॥ (यथा, भागवते । ३ । १४ ।
"स विदित्वाथ भार्य्यायास्तं
नत्वा दिष्टाय रहसि तयाथोपविवेश ह ।
अभिलषितप्राप्तौ भूयो यत्नः ।
कुमारसम्भवे । ५ । ६६ ।
"अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।"

था शिशुगन्ध:। शिम्बूर्नां सैञ्छाविशेष:। वासटि इति ख्यात:। इति केचित्। इति गहशब्दटीकायां भरत: ॥
र्हणं, क्ली, (निर्+बर्ह+भावे ल्युट्।) नवर्हणम्। मारणम्। इत्यमरटीकायां नील-कण्ठ: ॥
टः, त्रि, (निर्+भट्+अच्।) दृढ़:। इति त्रिकाण्डशेष: ॥
यः, त्रि, (निर्गतं भयं यस्य यस्माद्वा।) भय-रहित:। तत्पर्य्याय:। अजानेय: २। इति त्रिकाण्डशेष: ॥ (यथा, हरिवंशे।८३।११।
रणक: स तु तौ प्राह युवां कस्य वनेचरौ।
द्यौ वासांसि यौ मौढ्यादृयापीते निर्भया-
वुभौ ॥"
, रौच्यमनुपुत्रे। यथा, हरिवंशे। ७। ८३।
पुनेत्र: पञ्चरद्विश्च सुतपा निर्भयो दृढ़:।
रौच्यस्यैते मनो: पुत्रा अन्तरे तु त्रयोदशे ॥")
रं, क्ली, (नि:शेषेण भरो भरणं यत्र।) अतिशय:। (यथा, गीतगोविन्दे। १। ४८।
राधोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
भ्यर्णं परिरभ्य निर्भरमुर: प्रेमान्धया राधया।
साधु तद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बित: स्मितमनोहारी हरि:
पातु व: ॥")
रति, त्रि। इत्यमर:। ३। ४। २॥ (यथा, भागवते। ६। १८। २०।
ं वीरमाहौशनसी प्रेमनिर्भरया गिरा ॥")
र्त्सनं, क्ली, (नितरां भर्त्सनम्। निर्+भर्त्स+ल्युट्।) स्वलीकार:। अपक्तकम्। इति मेदिनी। ने, १८६॥ भर्त्सनञ्च ॥ (यथा, महाभारते। ३। ३०४। ५।
निर्भर्त्सनापवादैश्च तथैवाप्रियया गिरा।
...स्य एषा राजन्! न चकाराप्रियन्तदा ॥")
र्त्सितं, त्रि, (निर्+भर्त्स+क्त।) कृत-निर्भर्त्सन:। तत्पर्य्याय:। निन्दित:२ धिक्कृत: ३ अपध्वस्त: ४। इति जटाधर: ॥ (यथा, कुमारसम्भवे। ३। ५३।
"अशोकनिर्भर्त्सितपद्मरागम् ॥")
ग्यः, त्रि, (निष्क्रान्तं भाग्यं यस्य।) भाग्य-रहित:। यथा, "मढ़ाल्पापटुनिर्भाग्या मन्दा: स्यु:।" इत्यमर:। ३। ३। १४॥
र:, पुं, (निर्गतो मदो दानवारि गर्व्वो वा यस्मात्।) कालवशान्निर्गलितमदहस्ती। तत्-पर्य्याय:। उद्दान्त: २। इत्यमर:। २। ८। ३६॥
दर्पे, त्रि॥ (यथा, महाभारते। ३। ५। ११।
तस्य संवत्सरेऽतीते व्रतोऽङ्गसमवस्थितम्।
निर्मदं दु:खितं दृष्ट्वा पितरो राममब्रुवन् ॥")
ध्या, स्त्री, (निर्गतं मध्यं यस्या:। शून्यमध्य-त्वादेवास्यास्तथात्वम्।) नलिका। इति भाव-प्रकाश: ॥ (नलिकाशब्देऽस्या विवृतिर्विशेषो ज्ञातव्य: ॥)

निर्म्मन्थ्यदारु, क्ली, (निर्म्मन्थ्यं यज्ञार्थं घर्षणीयं दारु।) अरणि:। यज्ञे अग्न्युत्पादनार्थं घर्षणीय-काष्ठम्। इत्यमर:। २। ७। १९॥
निर्म्मलं, क्ली, (निर्गतं मलमस्मात्।) निर्म्माल्यम्। अभ्रकम्। त्रि, मलहीने। इति मेदिनी। ले, १०२॥ (यथा, महाभारते। ३। ६५। ४।
"निर्म्मलस्वादुसलिलं मनोहारि सुशीतलम् ॥"
निष्पापे। यथा, मनु:। ८। ३१८।
"राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवा:।
निर्म्मला: स्वर्गमायान्ति सन्त: सुकृतिनो यथा ॥"
यथा, देवीभागवते। १। १८। ३७।
"मनस्तु सुखदु:खानां महतां कारणं द्विज!।
जाते तु निर्म्मले ह्यस्मिन् सर्व्वं भवति निर्म्मलम् ॥")
निर्म्मलोपल:, पुं, (निर्म्मल: विशुद्ध: उपल:।) स्फटिक:। इति राजनिर्घण्ट: ॥
निर्म्माणं, क्ली, (निर्म्मीयते इति। निर्+मा ल्युट्।) निर्म्मिति:। (यथा, भागवते। २। ५। ३२।
"यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणा:।
यदायतननिर्म्माणे न शेकुर्ब्रह्मवित्तम! ॥")
सार:। समञ्जसम्। इति मेदिनी। णे, ५८॥
निर्म्माल्यं, क्ली, (निर्+मल+ण्यत्।) देवो-च्छिष्टद्रव्यम्। देवस्वत्वनिवृत्तिविशिष्टं देवदत्तं वस्तु। यथा,—
"अर्व्वाक् विसर्ज्जनाद्द्रव्यं नैवेद्यं सर्व्वमुच्यते।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति क्षणात् ॥"
इति गरुड़पुराणम् ॥*॥
तस्य स्थापनं चेपणञ्च यथा। "ऐशान्यां मण्डलं कृत्वा निर्म्माल्यशेषं दद्यादिति। वैष्णवे तु ॐ विष्वक्सेनाय नम:। शाक्ते तु ॐ शेषिकायै नम:। शिवे ॐ चण्डेश्वराय नम:। सूर्य्ये ॐ तेजश्चण्डाय नम:। गणेशे ॐ उच्छिष्टगणेशाय नम:। कालिकादौ ॐ उच्छिष्टचाण्डालिन्यै नम:। तथा च विद्यानन्दनिबन्धे।
'सर्व्वं गन्धमताद्दूर्पे शाक्ते शेषाय वेष्टवे।
तेजश्चण्डमथोच्छिष्टमोजमुच्छिष्टपूर्व्विकाम् ॥
चाण्डालीं शेषिकां चण्डं विष्वक्सेनं क्रमाद्-
यजेत् ॥'
सोऽसौ गणेश:।
'हृदये च वहिर्देवीं समर्प्य विधिवत्तत:।
निर्म्माल्यञ्च ततो देवि नैवेद्यं भक्षयेत् सुधी: ॥'
तन्त्रान्तरे।
निर्म्माल्यं शिरसा धार्य्यं सर्व्वाङ्गे चानुलेपनम्।
नैवेद्यञ्चोपभुञ्जीत दत्त्वा तद्भक्षशालिने ॥"
इति तन्त्रसार: ॥*॥
"उद्रके तद्गते वा निर्म्माल्यं तत्र संक्षिपेत् ॥"
इति कालिकापुराणे ५५ अध्याय: ॥
निर्म्माल्यकालो यथा,—
"मणिमुक्ताप्रवालानां देवदत्तानि यानि च।
न निर्म्माल्यं [illegible] मालकार्यं स्पृशेद्य च।
[illegible] च [illegible] नैवेद्यं [illegible]।
[illegible] ॥

पट्टवस्त्रं निमासञ्च यत्नस्वच्छस्त्वच: स्नानम्
यावदन्नं भवेदुष्णं परमान्नन्तथैव च ॥"
इत्येकादशीतत्त्वे योगिनीतन्त्रम् ॥
शिवनिर्म्माल्ये विशेषो यथा, स्कान्दे।
"निर्म्माल्यं यो हि मे भक्त्या शिरसा धारयिष्यति।
अशुचिर्भिन्नमर्य्यादो नर: पापसमन्वित:।
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते ॥
अज्ञचापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत्।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते! ॥
शुचि: स्नानादिनेति शेष:। एवञ्च स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुत: शुचिरिति कालिकापुराणं अशुचिविषयम् ॥ अनुपनीत-विषयमिति श्रीदत्त:। वङ्गचगुह्यपरिशिष्टम्।
अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम् ॥"
इति तिथितत्त्वम् ॥
तस्य उत्तारणकालो यथा,—
अथ निर्म्माल्योत्तारणम्। अत्रिस्मृतौ।
"प्रात:काले सदा कुर्य्यान्निर्म्माल्योत्तारणं बुध:।
दूषिता: पशवो वद्धा: कन्यका च रजस्वला ॥
देवता च सनिर्म्माल्या हन्ति पुण्यं पुराकृतम् ॥
नारसिंहे शौनकोक्तौ।
देवमाल्यापनयनं देवागारे समूहनम्।
स्नापनं सर्व्वदेवानां गोप्रदानसमं स्मृतम् ॥
नारदपञ्चरात्रे।
य: प्रातरुत्थाय विधाय नित्यं
निर्म्माल्यमीशस्य निराकरोति।
न तस्य दु:खं न दरिद्रता च
नाकालमृत्युर्न च रोगमात्रम् ॥
अरुणोदयवेलायां निर्म्माल्यं शल्यमां प्रहेत्।
प्रातस्तु स्नानकाले च घटिकामात्रयोगत: ॥
अतिशल्यं विजानीयात्ततो वज्रप्रहारवत्।
अरुणोदयवेलायां शल्यं तत् क्षमते हरि: ॥
घटिकामामतिक्रान्तौ क्षुद्रं पातकमावहेत्।
मुहूर्त्ते समतिक्रान्ते पूर्णं पातकमुच्यते ॥
अतिपातकमेव स्यात् घटिकानां चतुष्टये।
मुहूर्त्तत्रितये पूर्णे महापातकमुच्यते ॥
तत: परं ब्रह्मवधो महापातकपञ्चकम्।
प्रहरे पूर्णतां याति प्रायश्चित्तं ततो न हि ॥
निर्म्माल्यस्य विलम्बे तु प्रायश्चित्तमथोच्यते।
अतिक्रान्ते मुहूर्त्तार्द्धे सहस्रं जपमाचरेत् ॥
पूर्णे मुहूर्त्ते जप्त्वाति सहस्रं चाष्टसंख्यकं ॥
सहस्रत्रितयं कुर्य्यात् घटिकानां चतुष्टये।
मुहूर्त्तत्रितये... जपमाचरेत् ॥
प्रहरे पूर्णतां याति पुरश्चरणमुच्यते।
प्रहरे समतिक्रान्ते प्रायश्चित्तं न विद्यते ॥"
इति गौतमीयतन्त्रे [illegible] विभाग: ॥
निर्म्माल्या, स्त्री, (निर्म्मल्यते इति। निर्+मल+ण्यत्। टाप्।) [illegible]। इति [illegible] ॥
निर्म्मितं, त्रि, (निर्+मा+क्त।) [illegible]। [illegible]। [illegible]। यथा, [illegible]-
[illegible] ॥

अपरतिः ४ उपरतिः ५ आरतिः ६ । इति हेमचन्द्रः ॥ (यथा, गरुडपुराणे १६६ अध्याये ।
"वास्तोरकस्य समधु पीतमक्तगतस्य वै ।
मापरोगस्य सन्तापनिवृत्तिं कुरुते शिवः ॥")
प्रवृत्तिप्रागभावः । यथा, "प्रवृत्तुपाधिना विनाशं प्राप्यात् प्रागभाव एव खनिवृत्तिनिराकरणात् साध्यमानो निवृत्तिरुच्यते ।" इत्येकादशीतत्त्वे कलञ्जाधिकरणविचारः ॥

निवेदनं, क्ली, (निविद्यते विज्ञाप्यतेऽनेनेति । नि+विद्+ल्युट् ।) आवेदनम् । विज्ञापनम् । समर्पणम् । यथा,—
"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ॥"
इति श्रीभागवतम् । ७ । ५ । २३ ॥

निवेदितं, त्रि, (नि+विद्+कर्म्मणि क्तः ।) कृतनिवेदनम् । यथा, नन्दिकेश्वरपुराणे ।
"मया निवेदितं भक्त्या गृहाण परमेश्वरि ! ॥"

निवेशः, पुं, (नि+विश्+घञ् ।) विन्यासः । (निविशन्त्यस्मिन्निति । अधिकरणे घञ् ।) शिविरम् । (यथा, महाभारते । ५ । ८ । २ ।
"तस्य सेनानिवेशोऽभूदध्यर्द्धमिव योजनम् ॥")
उद्वाहः । इति मेदिनी । शे, २१ ॥ (यथा, महाभारते । १ । १४ । १ ।
"ततो निवेशाय तदा स विप्रः संशितव्रतः ।
महीं चचार दारार्थी न च दारानविन्दत ॥")
निवेशनम् । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ३ । १६ । ४४ ।
"निवेशार्थं गृहं रम्यमप्रमाणादिकं तथा ।
मित्रं समनुसाध्य परिचर्य्यार्थमेव च ॥")

निवेशनं, क्ली, (निविशन्त्यस्मिन्निति । नि+विश्+अधिकरणे ल्युट् ।) गृहम् । इति जटाधरः ॥ (यथा, देवीभागवते । ३ । २४ । ४६ ।
"किमीयसंयुतः सोऽथ प्राप्तायोध्यां सुदर्शनः ।
सभार्य्यः कर्म्मणोत्साह ययौ राजा निवेशनम् ॥")
नगरम् । इति हेमचन्द्रः ॥ (यथा, रामायणे । ७ । ७५ । १८ ।
"यो हि वंशं समुत्पाद्य पार्थिवस्य निवेशने ।
न विधत्ते नृपं तत्र नरकं स हि गच्छति ॥")
प्रवेशः । निवेशनस्य व्याकुतिभिर्बुलिति स्मृतिः । (नि+विश्+णिच्+भावे ल्युट् । स्थापनम् । यथा, रामायणे । ७ । ७५ । १७ ।
"विश्वस्य महावाहो भरतं सहलक्ष्मणे ।
शत्रुघ्नं समरिदम समर्थः निवेशने ।"
प्रवेशने, त्रि । यथा, हरिवंशे भविष्यपर्व्वणि । १८ । ११ ।
"आकाशोऽसि[illegible] सूक्ष्म सर्व्वप्राणिनिवेशनः ।
नमस्ते भगवन् ! विष्णो तुभ्यं ब्रह्मात्मने नमः ।")

निवेशनीयः, त्रि, (नि+विश्+अनीयर् ।) निवेश[illegible] । यथा । [illegible]
इति भाव्यं दोषः । इति [illegible]-

निवेश्यः, त्रि, (नि+विश्+ण्यत् ।) निवेशनीयः । यथा, व्याप्तिपञ्चकटीकायां गदाधरः । प्रतिबन्धकतायां निवेश्यत्वादिति शक्तिः ॥ (यथा, हरिवंशे । ११५ । २८ ।
"तदियं पूः प्रकाशार्थं निवेश्या मयि सुव्रत ! ॥"
शोधनीयः । यथा, महाभारते । ३ । २४ । १६ ।
"अवश्यं राजपिण्डस्तैर्निवेश्य इति मे मतिः ॥"
"निवेश्यः आनृण्यार्थं शोधनीयः ।" इति तट्टीकायां नीलकण्ठः ॥ विवाहार्हः । यथा, महाभारते । १ । १६२ । ६ ।
"भवान्निवेश्यः प्रथमं ततोऽयं
भीमो महाबाहुरचिन्त्यकर्म्मा ॥"
"निवेश्यः विवाह्यः ।" इति तत्र नीलकण्ठः ॥)

निशठः, पुं, बलदेवपुत्त्रः । यथा, "बलदेवोऽपि रेवत्यां निशठोल्मुकौ पुत्त्रावजनयत् ।" इति विष्णुपुराणे । ४ अंशे १५ अध्यायः ॥

निशमनं, क्ली, (नि+शम+णिच्+ल्युट् ।) दर्शनम् । श्रवणम् । इति मेदिनी । ने, १९० ॥

निशा, स्त्री, (नितरां श्यति तनूकरोति व्यापारानिति । नि+शो+कः । टाप् ।) रात्रिः । तत्पर्य्यायः । रात्री २ रजोजननी ३ शर्व्वरी ४ चक्रभेदिनी ५ घोरा ६ श्यामा ७ याम्या ८ दोषा ९ तुङ्गी १० नैशी ११ प्रताची १२ वासतेयी १३ उषा १४ वासतेयी १५ तमा १६ निट् १७ । इति त्रिकाण्डशेषः ॥ अवशिष्टो रात्रिशब्दे द्रष्टव्यः ॥ (यथा, ऋतुसंहारे । १ । ९ ।
"सितेषु हर्म्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य निर्य्यन्त्रणमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥")
हरिद्रा । दारुहरिद्रा । इति मेदिनी । शे, ६ ॥ (अस्याः पर्य्यायो यथा,—
"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
मेषवृषमिथुनकर्कटधनुर्मकरलग्नानि । यथा,—
"अजवृषमिथुनकुलीरा धन्विमृगाख्या ।
निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥"
इति ज्योतिस्तत्त्वम् ॥

निशाकरः, पुं, (निशां करोतीति । निशा+कृ+"दिवाविभानिशेति ।" ३ । २ । २१ । इति टः ।) चन्द्रः । इत्यमरटीका ॥ (यथा, पञ्चतन्त्रे । १ । २० ।
"रविनिशाकरयोर्ग्रहपीडनं
गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमताञ्च निरीक्ष्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥")
कुक्कुटः । इति शब्दरत्नावली ॥ (निशाकरश्चन्द्रः शिरोदेशेऽस्यास्तीति । अच् । महादेवः । यथा, महाभारते । १३ । १७ । ७७ ।
"हरिदासः सबलश्च नीलमोऽथ निशाकरः ॥")

निशागणः, पुं, (निशानां रात्रीणां गणः ।) रात्रिसमूहः । तत्पर्य्यायः । [illegible] इति हेमचन्द्रः ॥

निशाचरः, पुं, (निशायां रात्रौ चरतीति । निशा+चर+"चरेष्टः ।" ३ । २ । १६ । इति टः ।) राक्षसः । (यथा, रघुः । ११ ।
"अचिरात् यज्वभिर्भागं कल्पितं [illegible]
मायावि[illegible]
शृगालः । पेचकः । सर्पः । [illegible] २७२ ॥ चक्रवाकः । इति [illegible] भूतः । इति धरणिः ॥ चोरकः । [illegible] निघण्टुः ॥ ([illegible] उर इति नेपालदेशे भवति ।
"निशाचरो धनहरः कितवो रोचको मधुरस्तिक्तः कटुकश्च तीक्ष्णो हृद्यो हिमो हन्ति
[illegible]"
इति [illegible]
महादेवः । यथा, महाभारते । १३ [illegible]
"वसुवेगो महावेगो [illegible]"
रात्रिचरमात्रे, त्रि ॥

निशाचरी, स्त्री, (निशायां चरतीति । चर+टः । स्त्रियां ङीप् ।) कुलटा । [illegible] रे, २७३ ॥ केशिनीनामगन्धद्रव्य । [illegible] धरः ॥ राक्षसी । यथा,—
[illegible]
स्त्रियां तदनुगा सखी कुलटा [illegible]
नायोर्हंसमनकारणं लभते [illegible]

(यथा च रघुः । ११ । २० ।
"राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥"
"अत्र ताडकायाः अभिसारिका इत्यभिधीयते रामेति । [illegible] निशाचरी राक्षसी अभिसारिका [illegible] तत्र मल्लिनाथः ।)

निशाचर्म्म, [न्] क्ली, ([illegible] कावात् ।) अन्धकारः । इति [illegible]

निशाजलं, क्ली, (निशायां जलम् । [illegible] षष्ठीसमासः ।) हिमम् । इति [illegible]

निशाटः, पुं, (निशायां रात्रौ [illegible] अच् ।) पेचकः । इति हेमचन्द्रः ॥
निशाचरे, त्रि ॥

निशाटकः, पुं, (निशायां रात्रौ अटतीति वा । अट+ण्वुल् । [illegible]) राजनिर्घण्टः ॥ (रात्रिचरे, [illegible]

निशाटनः, पुं, (निशायां अटनं [illegible] ल्युः ।) पेचकः । इति शब्द[illegible]

पृथिवी। (नदीविशेषः। यथा, मात्स्ये। ११३। २२।
"कौशिकी तु तृतीया च निश्चला गण्डकी तथा।
इक्षुर्लोहितमित्येता हिमवत्पार्श्वनिःसृताः॥")
अचले, त्रि। यथा,—
"निवसतु सदा गेहे निश्चला सिन्धुपुत्त्री॥"
इत्याद्युद्भटः॥

निश्चलाङ्गः, पुं, (निश्चलवत् अङ्गं यस्य।) बकः। इति राजनिर्घण्टः॥ पर्व्वतादिः। स्पन्दरहिते, त्रि॥

निश्चायकः, त्रि, (निश्चिनोतीति। निर्+चि+ण्वुल्।) निश्चयकर्त्ता। निर्णायकः। यथा, अनुपाधित्वनिश्चायकदर्शनत्वे न हेतुत्वमिति व्याप्तिपञ्चमाथुरी॥

निश्चारकः, पुं, (निश्चरतीति। निर्+चर+ण्वुल्।) पुरीषचयः। वायुः। स्वच्छन्दम्। इति मेदिनी। कें, १८५॥

निश्चिन्तः, त्रि, (निर्गता चिन्ता यस्मात्।) चिन्तारहितः। यथाह कश्चित्।
"गतार्थं सुलभं भजस्व कुमते! मर्त्यस्य चाष्टौ गुणा
निश्चिन्तो बहुभोजकोऽतिसुरतो रात्रिन्दिवा स्वप्नभाक्।
कार्य्याकार्य्यविचारणाविरहितो मानापमाने समे
दृष्टा सर्व्वजनस्य गर्हितचरणौ मार्खश्चिरं जीवतु॥"

निश्चीयमानः, त्रि, (निर्+चि+कर्म्मणि शानच्।) निश्चयविषयः। यथा। ननु तथापि एवकारस्य निश्चीयमानस्यैव सार्थकत्वाभावात् कुतः प्रशस्तिर्म्मानमिति शब्दशक्तिप्रकाशिकाटीकायां रामभद्रः॥

निश्चुक्वं, क्ली, (निःशेषेण चुक्कनम्।) दन्तशालनम्। इति त्रिकाण्डशेषः। मिसी इति भाषा॥

निश्चेष्टः, त्रि, (निर्गता चेष्टा यस्मात्।) चेष्टारहितः। निश्चेष्टितः। यथा,—
"अन्तर्व्वत्नीनिश्चेष्टो देवो विगतलोचनः।
अपतत्तरायो ममत् मध्यमानो यतुर्व्वते॥"
इति श्रीभागवते दशमः॥

निश्वासः, पुं, (नि+श्वस+भावे घञ्।) बहिर्म्मुखश्वासः। नासिकावायुः। भावः, व, इनः ३। इति हेमचन्द्रः। (यथा, ब्रह्मवैवर्त्ते। ४।११।८८।
"संहर्त्तुं सर्व्वब्रह्माण्डं शक्ता निःश्वासमात्रतः।")

निश्वाससंहिता, स्त्री, (निश्वासाख्या संहिता।) शिवप्रोक्तशास्त्रविशेषः। यथा,—
"इत्यनुवर्त्तितेषु पुरा शिवकथामाः।
वेदशास्त्रमधुना तन्त्रार्थक संहिताम्।
निश्वासाख्यो नवतत्त्वो क्रिया ताम्रचण्डाखिकाः।
निश्वासकाहिताकारी हि लयमामनमामनः।
वेद वामुत्रमो दौरा सौम्यः माहुरनान्न हि।
अन्यगतरमार्थेदु वदर्थादेव वायते।
तत् पुनश्चेव निवेदं तौरं सौम्यनिरिर्यनम्॥"
इति वराहपुराणम्॥

निषङ्गः, पुं, (नितरां सजन्ति शरा यत्र। नि+सञ्ज+अधिकरणे घञ्।) तूणीरः। इत्यमरः। २। ८। ८८॥ (यथा, रघुः। २। ३०।
"ततो मृगेन्द्रस्य मृगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः॥")
खड्गः। इति मेदिनी। गे, ४०॥

निषङ्गथिः, पुं, (नि+सञ्ज+"गौ सञ्जेर्थथिन्।" उणां। ४। ८७। इति भावे थथिन्। नित्त्वात् कुलम्। ततः षत्वम्।) समालिङ्गः। आलिङ्गनम्। इत्युणादिकोषः। २। १६१॥ धन्वी। रथः। स्कन्धः। तूणम्। सारथिः। इति संक्षिप्तसारोणादिवृत्तिः॥ (आलिङ्गके, त्रि। इत्युज्ज्वलदत्तः॥)

निषङ्गी, [न्] पुं स्त्री, (निषङ्गोऽस्त्यस्येति। निषङ्ग+इनिः।) धनुर्धरः। इत्यमरः। २। ८। ६८॥ (यथा, रघुः। ७। ५६।
"रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः॥"
स्वनामख्यातो धृतराष्ट्रपुत्त्रः। इति महाभारतम्। १। ११७। ११॥)

निषण्णः, त्रि, (निषीदति स्मेति। नि+सद्+गत्यर्थेति क्तः। "रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः।" ८। २। ४२। इति निष्ठातस्य धातोर्दकारस्य च नः।) उपविष्टः। यथा,—
"मादावसुश्चयन्तो श्रीर्देवकार्यार्थकामिके।
निषण्णा पङ्कजे पूज्या नमो देव्यै श्रिया इति॥"
इति तिथ्यादितत्त्वम्॥

निषण्णकं, क्ली, (निषण्ण+संज्ञायां कन्।) सुनिषण्णकम्। इति शब्दरत्नावली॥

निषदः, पुं, (निषीदन्ति षड्जादयः स्वरा यत्र। नि+सद्+बाहुलकात् अप्।) निषादस्वरः। इत्यमरटीकायां स्वामी॥ (स्वनामख्यातनृपविशेषः। यथा, महाभारते। १। ६। १५।
"भङ्गासरिः सुनीथश्च निषदोऽथ वहीनरः॥")

निषद्या, स्त्री, (निषीदन्त्यस्यामिति। नि+सद्+"संज्ञायां समजनिषदेति।" ३। ३। ९९। इति अधिकरणे क्यप्।) पण्यविक्रयशाला। इत्यमरः। २। २। २॥ हट्टः। इत्यन्ये। इति भरतः॥ क्षुद्रखट्वा। इति त्रिकाण्डशेषः॥

निषद्वरः, पुं, (निषीदन्ति विषण्णा भवन्ति जना अत्रेति। नि+सद विशादे गतौ+"नौ सदेः।" उणां। २। १२४। इति ष्वरच्। "सदिरप्रतेः।" ८। ३। ६६। इति षत्वम्।) कर्द्दमः। इत्यमरः। १। १०। ९॥

निषद्वरी, स्त्री, (नि+सद विशादे+अधिकरणे ष्वरच्। षित्वात् ङीष्।) रात्रिः। इति मेदिनी। रे, २०१॥

निषधः, पुं, पर्व्वतविशेषः। इत्यमरः। २। ३। ३॥ स तु इलावृतस्य दक्षिणे हरिवर्षस्य सीमापर्व्वतः। प्राग्यायतः। अयुतयोजनोत्सेधः। हिसहस्रयोजनविस्तीर्णः। ... स्कन्धे १६ अध्यायः॥ कठिनम्। (यथा, महाभारते। ३। ५३। ३।
"ब्रह्मण्यो वेदविच्छूरो निषधेषु महीपतिः।") ... देशविशेषः। निषधदेशाधिपतिः। इति मेदिनी। ... निषादस्वरः। इति हेमचन्द्रः। ... (रामपौत्त्रे कुशवंशीयनृपभेदे ... १५। ९६।
"रामस्य तनयो जज्ञे कुश ...
अतिथिस्तु कुशात्मजः ...")

निषादः, पुं, (निषदने ...
यद्वा, निषीदति पापमत्र। नि ...
अधिकरणे वा घञ्।) चण्डालः। ...
२। १०। २०॥ ...
यथा, अग्निपुराणे।
"मथ्यमाने ततो ...
ह्रस्वोऽतिपृथुः श्यामकान्तिः ...
तौ मन्त्रैर्विकलं दृष्ट्वा निषीदेत्यब्रुवन् ...
निषादवंशकर्त्ता स बभूव ...
... ...
ये चान्ये विन्ध्यनिलयाः शबरा ...
अधर्म्मरुचयो ये च विज्ञेयाः ...
पारिभाषिकचण्डालो ...
"व्याघ्रकर्त्तुरदाता च ...
शरणागतं यश्च हन्ति ...
धीवरविशेषः। इति मेदिनी। ...
(निषीदन्ति षड्जादयः स्वरा यत्र। ...
घञ्।) सप्तस्वरान्तर्गतसप्तमस्वरः। ...
हस्तिस्वरतुल्यस्वरः। ...
टम्। व्याकरणमते दन्तः। ...
सर्व्वस्वराणां मध्ये उच्चः। ...
अस्य कूटतानाः ५०४०। ...
समुदायेन १८२४० भवन्ति। ...
गणोऽस्मनुष्यः। ... ...
द्वीपः। देवता सूर्य्यः। वारः ...
निषादे ८ दण्ड—१४ पलानि। ...
उग्रा क्षोभिणी च। मूर्च्छना ...
रसा। मध्यस्थाने ...
च। निषादवर्ज्जिता ...
च। नादपुराणमते। ...
वीणायां धैवताद्विषड्‌ ...
सप्तशलाकीयाऽस्य ...
इत्यागं भवति। इति सङ्गीतदामोदरः।
"षड्जादयः षडेते च स्वराः
निषीदन्ति यतो लोके ...
चतस्रः पञ्चमे षड्जे मध्यमे ...
ऋषभे धैवते निषादे ...
इति ...
(अस्य अक्षरत्वमी उत्पत्तिः। ...
त्रिशिखी वर्णः। पुष्करद्वीपे जन्म। ...
तुम्बुरुः। सूर्य्यो देवता। ... छन्दः।
उपयोगित्वम्। इति सङ्गीतदर्पणः।)

नी, [द] पुं, (निषीदत्यस्मिन्निति । नि + सद् + आधारे क्विप् ।) स्वप्नारोहः । इत्य-मरः । ३ । ५ । ४१ ॥ नाद्गुन् इति ख्यातः ॥ यथा, माघे । ५ । ६१ ।

"प्रत्यग्रमज्जनविशेषविविक्तमूर्त्ति-
र्म्नीरास्फुरित्युदकं घटितं निषादी ॥"

निषिद्धं, त्रि । यथा, रघुः । २ । ५२ ।

"कामन्यादर्शनिमग्नवीचारास्तु निषादिभिः ।
शैशिरैरोमन्थमुदाप्रकाणुम् ॥")

निषिद्धं, त्रि, (निषिध्यते स्मेति । नि + षिध + क्तः ।) निषेधविषयम् । यथा,—

"निषिद्धे विधिनिर्देशे च सहाकार्ये प्रतापवर्के ।
निषिद्धेऽपि दिने कुर्य्यात्सर्वं नित्यमिमिनम् ॥"

इति तिथितत्त्वम् ॥

निषिद्धकर्म्माणि यथा,—

मार्कण्डेय उवाच ।

"दृष्ट्वा कर्म्माद्रं सुगीतायाम् महात्मानं सुरा-
सदाम् ।
निषिद्धानि यदेवा तदेव प्रथमं वद ॥

नारद उवाच ।

व्याकर्णं प्रसुविषर्दिष्य
सर्पस्मिन्धा पशुपालस्य ।
कुर्वदन्यानि तथापि देतो-
रसमीमतु परमं माहात्म्य ॥

दानमेव्यं प्रविधनं जीवनस्य कनिष्ठया ।
कौटिल्यं कौमर्ष्टायस्य कुसीदश्च विवर्ज्जयेत् ॥
नृपो राजन् ! स भवति धर्म्मार्थिनो दुरासदः ।
ब्रह्मणी रमते यस्तु निष्कृतो कर्णरूपया ॥
प्रामणिको विकर्म्मा च यो दिव्यचरितात्मजः ।
देवार्थमपि प्रद्वेः सम: स परिकीर्त्तितः ।
वेदेषु वर्जनीयोऽसौ वैदिके तान्त्रिकेऽपि च ॥

निर्म्मर्य्यादे चातुर्य्यं कृतघ्ने
हिंसात्मके ब्रह्मधर्म्मे स्थूलि ।
दयस्य कन्यस्य न देयमेव
दानस्य दत्तं विफलं नरेन्द्र ! ॥

दानार्थानां करादानं विना वैवाहिकस्य यः ।
प्रतिग्रहः स निन्दोऽत्र परत्र चासुखप्रदः ॥
पुष्टे मशायकस्यैव तथा कातरतादिषु ।
कुमार्यं प्रमादाय दाने धर्म्मे विरक्तता ॥
कन्येचा सराहस्य ब्राह्मणानामनादरः ।
कन्याधानामसम्मानं तेषां कर्म्मानिषेचनम् ॥
महादानं परीवादो निषिद्धः चतुस्त्रस्य-
नाम् ॥

वैश्यानां धनलोभेन मिथ्यामल्पप्रकाशनम् ।
कुमालनं मधूनाय व्यक्तिन्दा विभवे सति ॥
गृहदाय महाराज ! इदैव धनसञ्चयः ।
निर्द्देनैः छतकार्य्यस्य छतसन्तानकर्म्मणः ॥
कन्यकादानरान्यस्य शूद्रस्य जगतीपते ! ।
वर्णान्तरगतस्यापि स्वधर्म्मगतस्य च ॥
चान्यथा विहिताः सर्व्वे वर्ज्जयित्वा निरा-
श्रयम् ॥"

इति माह्ने सर्गखण्डे २७ अध्यायः ॥

अपि च ।

"यस्तु भागवतान् दृष्ट्वा भूत्वा भागवतः शुचिः ।
अभ्युत्थानं न कुर्व्वीत स्वयं वेनापि हिंसितः ॥
यश्च कन्यां पिता दत्त्वा न प्रयच्छति तां पुनः ।
असौ मित्रगणानेन हिंसिता नात्र संशयः ॥
भार्य्यां प्रियकरीं ये तु साध्वीं हिंसन्ति निर्घृणाः ।
न ते हुतां प्राप्नुवन्ति हिंसका दुष्टयोनिजाः ॥
ब्रह्मघ्नश्च सतघ्नश्च गोघ्नश्च हतपापकाः ।
एतान् प्रियान् विवर्ज्जेत उक्ता ये चान्त्य-
जातकाः ॥

प्राप्यवर्त्ते न भोक्तव्यं न च्छेत्तव्यं कदाचन ।
अश्वत्थो वटश्चैव न च्छेत्तव्यौ कदाचन ॥
न च्छेत्तव्यो बिल्वश्च उडुम्बरश्च कदाचन ।
कर्म्मण्यास्तेन ये वृक्षा न च्छेत्तव्याः कदाचन ॥
यदीच्छेत् परमां सिद्धिं मोक्षधर्म्मं सनातनम् ।
भक्ष्याभक्ष्य ते प्रिये देहितवं तदन्तरे ॥
करीरस्य वधः प्रस्तः पलाण्डुम्बरस्य च ।
पटोलभक्षी भवेत्तेन अभक्ष्याः पूतिवासिकाः ॥
न भक्षणीयं वाराहं मांसं मनुजस्य सर्व्वशः ।
अभक्ष्या ब्राह्मणैर्ह्येते दोषिणस्तेहि न संशयः ॥
परिवादं न कुर्व्वीत न हिंसां वा कदाचन ।
पैशुन्यञ्च न कर्त्तव्यं स्तैन्यं वापि कदाचन ॥
अतिथिञ्चागतं दृष्ट्वा दूराभ्यागमनं क्वचित् ।
संविभागस्तु कर्त्तव्यो येन केनापि पुत्रक ! ॥
गुरुपत्नी राजपत्नी ब्राह्मणी वा कदाचन ।
मनसापि न गन्तव्या एवं विष्णुः प्रभाषते ॥
कनकादीनि रत्नानि यौवनस्था च कामिनी ।
तत्र चित्तं न कर्त्तव्यमेवं विष्णुः प्रभाषते ॥
दृष्ट्वा परस्य भार्य्यानि व्याकुलो दयनन्तया ।
तत्र मन्युर्न कर्त्तव्य एवं धर्म्मः सनातनः ॥"

इति वराहपुराणम् ॥

(निवारितम् । यथा, देवीभागवते । २ । ६ । ६० ।
"मा मा मा नेति बहुधा निषिद्धोऽपि तथाऽग्रमम् ।
चालिलिङ्ग प्रियां दैवात् पपात धरणीतले ॥")

निषेकः, पुं, (निषिच्यते प्रक्षिप्यत इति । नि + सिच् + घञ् ।) गर्भाधानम् । इति निषेकादि-कृत्मन्त्रटीकायां भरतः ॥ * ॥

"निषेकात्सम्भवि पत्नी गुरुभर्त्ता शुभाशुभम् ।
मन्त्रच्छिद्रमसम्प्रश्च सर्व्वमेतन्न यत्नतः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३३ अध्यायः ॥

(यथा, मनुः । २ । १६ ।
"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्य-
चित् ॥"

क्षी, रेतः । यथा, मनुः । ४ । १५१ ।
"दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टान्नं निषेकञ्च दूरादेव समाचरेत् ॥"
"निषिच्यत इति निषेकं रेतश्चोत्सर्जेत् ।"
इति तट्टीकायां कुल्लूकभट्टः ॥ (क्षरणम् ।
यथा, रघुः । ८ । ३८ ।
"नतु तैलनिषेकबिन्दुना
सह दीमार्चिरपैति [illegible] ")

निषेकादिकृत्, पुं, (निषेकादिं गर्भाधानादिकं करोतीति । निषेकादि + कृ + क्विप् ।) गर्भा-धानादिकर्त्ता । आदिना सीमन्तोन्नयनादेर्म्मन्त्र-विद्यादानादेश्च ग्रहणं तत्कर्त्ता पित्रादिर्गुरुः स्यात् । इत्यमरभरतौ ॥

निषेधः, पुं, (नि + षिध् + घञ् ।) प्रतिषेधः । निवृत्तिः । विधिविपरीतः । यथा,—
"विधीनां पूज्यता नाम कर्म्मानुष्ठानतो मता ।
निषेधस्तु निवृत्तात्मा कालमात्रमपेक्षते ॥"

इति तिथितत्त्वम् ॥

निषेवणं, क्ली, (नि + सेव + भावे ल्युट् ।) सेवा । यथा, भागवते । १ । २ । १६ ।
"शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥"

निषेव्यः, त्रि, (नि + सेव + भावे ण्यत् ।) सेव-नीयः । यथा, भागवते । १ । १२ । २२ ।
"मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव ॥"

निष्क, क ङ माने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) मङ्केन्यपञ्चमः । क ङ, निष्कयते स्वर्णं वणिक् । इति दुर्गादासः ॥

निष्कः, पुं क्ली, (निश्चयेन कायति शोभते इति । निस् + कै + आतश्चेति कः ।) पलाष्टकः सुवर्णः । चारि मोहर इति भाषा ॥ यथा, मनुः । ८ । १३७ ।
"शरणानि दश ज्ञेयः शतमानस्तु राजतः ।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥"

साष्टशतसुवर्णः । हेम । उरोभूषणम् । (यथा, रामायणे । १ । ६ । ११ ।
"नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान्। नामृष्टो न च लिप्ताङ्गो नासुगन्धश्च विद्यते ॥"
"नाल्पभोगी नादाता नाप्यनङ्गदनिष्कधृक् ॥")
पलम् । दीनारः । इत्यमरः । ३ । ३ । १४ ॥ अस्य टीका यथा । "शास्त्रीयषोडशमाषकपरिमितं स्वर्णं सुवर्णं तेषां सुवर्णानां अष्टाधिकशतम् । हेम कर्षमात्रम् । उरोभूषणं वक्षोऽलङ्कारः । पलं शास्त्रीयमानविशेषः । उरोभूषणं पलञ्च हेम एवेति केचित् । दीनारः सम्प्रत्यवहारार्थं मानवस्तु एव निष्कः । केचित्तु दीनार इति पल इत्यस्य विशेषणम् । दीनारे पदे लौकिक-मते न तु शास्त्रीये इत्याहुः ॥ लाक्षांस्तु द्वात्रिंशद्रत्तिकापरिमितं काञ्चनं दीनारः । तथाहि ।
'दीनारो रोमकैरष्टाविंशत्या परिकीर्त्तितः ।
सुवर्णसप्ततिमो भागो रोमक उच्यते ॥'

इति विष्णुगुप्तः ॥

सुवर्णोऽशीतिरत्तिकापरिमितं काञ्चनं तस्य सप्ततितमो भागः सप्तमांशाधिकैकरत्तिकायां रोमकः तदष्टाविंशत्या द्वात्रिंशद्रत्तिकापरिमितं हेम दीनार इति मध्यदेशीयाहुः ।" इति भरतः ॥ * ॥ सर्वर्णः । सर्वपलम् । इति हेमचन्द्रः ॥ [illegible] जटाधरः ॥ माषकचतुष्टय- [illegible] भाषा ॥ (यथा, [illegible] निष्कइव च ॥" इति [illegible] शार्ङ्गधरेणोक्तम् [illegible]

कोडमहन्थः। कोल काहन इति भाषा। (यथा, लीलावत्याम्। २।
"वराटकानां दशकद्वयं यत्
सा काकिणी ताश्च पणश्चतस्रः।
ते षोडश द्रम्म इहावगम्यो
द्रम्मैस्तथा षोडशभिश्च निष्कः॥")

निष्कण्ठः, पुं, (निर्गतः कण्ठः स्कन्धो यस्य।) वरुणद्रुमः। इति शब्दचन्द्रिका।

निष्कर्षः, पुं, (निर् वा निस्+कृष्+भावे घञ्।) निश्चयः। यथा, अस्यार्थं निष्कर्षं इत्यादापरा- [illegible] (कराये प्रमाणेऽहमम्। इति नीलकण्ठः। यथा, महाभारते। ५। १३। ११।
"अनुकर्षञ्च निष्कर्षं व्याधिपावकमूर्च्छनम्।
[illegible] युधिष्ठिरे।")

निष्करुण, त्रि, (निर्गता करुणा यस्मात्।) करुणाशून्यम्। (यथा, महाभारते। १। २०८। ८।
"[illegible] मानवाः।
[illegible]") [illegible] इति मेदिनी। [illegible]

[illegible]

निष्कुटः, [illegible]
"परिज्ञाश्चैव कौरव्य! प्रतोलीर्निष्कुटानि च।
गवाक्ष्यः प्रपश्येत गुह्यमेतद्युधिष्ठिर!॥")
क्षेत्रम्। (यथा, महाभारते। २। ५०। ६।
"इक्षुदण्डैर्वर्धयन्ति धान्यैश्च नदीमुखैः।
समुद्रनिष्कुटे जाताः पारेसिन्धु च मानवाः॥")
कपाटः। इति मेदिनी। टे, ४८। कपाटः। इति हारावली। आगानामहल इति पारस्यभाषा।

निष्कुटिः, स्त्री, (कुट कौटिल्ये+"इगुपधात् कित्।" उणां ४। ११९। इति इन्। निर्गता कुटिः कौटिल्यं यस्याः।) एला। इत्यमरः। २। ४। १२५। (पर्यायोऽस्या यथा,—
"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला इहदैला च चन्द्रबाला च निष्कुटिः॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

निष्कुटी, स्त्री, (निष्कुटि+कृदिकारादिति वा ङीष्।) निष्कुटिः। इत्यमरटीकायां भरतः। २। ४। १२५।

निष्कुम्भः, पुं, (निस्+कुम्भ+अच्।) दन्तीवृक्षः। इत्यमरटीकायां रायमुकुटः। (निर्गतः कुम्भो यस्मात्।) कुम्भशून्ये, त्रि॥

निष्कुषितः, त्रि, (निस्+कुष+क्तः।) निष्कासितः। यथा,—
"काकैर्निष्कुषितं श्वभिः कवलितं गोधीभि- राम्रोलितम्॥"
इत्यादि वाल्मीकिकृतगङ्गास्तोत्रम्॥

निष्कुहः, पुं, (नितरां कुहयति इति। कुह विस्मापने+पचाद्यच्।) वृक्षकोटरम्। इत्यमरः। ३। ३। १९।

निष्कृतिः, स्त्री, (निर्+कृ+क्तिन्।) निर्मुक्तिः। निस्तारः। यथा,—
"प्रकृते नैव निष्कृतिर्ह्यपि गुरुतल्पगे।
[illegible] नास्ति निष्कृतिः॥"
इति प्रायश्चित्ततत्त्वम्॥
([illegible], पुं। यथा, महाभारते। १। ११८। १४।
"यत्तोऽप्रमत्तान् भूपालो यः करोतीह निष्कृतिम्।
[illegible]")

निष्क्रमः, पुं, (निष्क्रमणेऽनेनेति। निस्+क्रम+घञ्। "[illegible]" ७। ३। ३४। इति न वृद्धिः।) बुद्धिशक्तिः। इत्यमरः। ३। ३। ७१। निर्गमः। (यथा, कथासरित्सागरे। ७१। ४१।
"[illegible] निष्क्रमम्।
[illegible]")
[illegible]। इति मेदिनी। मे, ४९। निष्क्रमण [illegible]
"[illegible] निष्क्रमः॥"
इति [illegible]। १। १। १०॥

निष्क्रमः, त्रि, (क्रमरहिते, त्रि। यथा, [illegible]
"निष्फलं निष्क्रमं [illegible]"

निष्क्रमणं, क्ली, (निस्+क्रम+[illegible]) [illegible]

[illegible]

नेन । सामर्थ्यम् । निर्गतिः । इति मादि-
ष्टवैजयन्ती ॥ प्रत्युपकारः । विनिमयः ।
, माघे । १ । ५० ।
"सत्तुणिपन् यः इषिचीन्द्रतामरं
वरप्रदानस्य चकार शूलिनः ।
वसन्तुधारादिततायवक्ष्मम-
खर्मप्रहासैयतखेन निष्क्रयम् ॥"
क्रय । यथा, मनुः । ८ । ४६ ।
निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते ॥")
तः, त्रि, (निर् + क्रम + क्तः ।) निर्गतः ।
, मार्कण्डेये । ८७ । ५ ।
ष्टीकुटिलापाङ्गा ललाटफलकाद्द्रुतम् ।
ि करालवदना विनिष्क्रान्तासिपाशिनी ॥"
माद, महाभारते । १३ । २ । ६५ ।
ज्ञामि मयि कल्याणि तथा सन्निहितेऽनघे ।
र्यिसेऽवक्रान्तः प्रमाणं यद्यहं तव ॥")
, क्ली, (निर्गता क्रिया यस्य ।) ब्रह्म ।
, वेदान्तसूत्रभाष्यम् ।
क्रियं निर्गुणं शान्तं निरवद्यं निरञ्जनम् ॥"
ान्यं, त्रि । यथाह कश्चित् ।
"चन्दनानि यदि सन्ति बहूनि
प्रेमरञ्जुकृतबन्धनमन्यत् ।
दारुभेदनिपुणोऽपि षडङ्घ्रि-
र्निष्क्रियो भवति पङ्कजबद्धः ॥"
न, पुं, (निःस्रुतः क्वाथो यत्र ।) मांसादि-
ः । झोल इति भाषा । तत्पर्य्यायः ।
कः २ । इति हेमचन्द्रः । ३ । ७७ ॥
, पुं, (वर्णाश्रमादिभ्यो निर्गतः । निस् +
दिमान् डट् ।" ४ । २ । १०४ । इत्यस्य
तो गतौ ।" इति वार्त्तिकोक्त्या त्यप् ।
न्नामादौ लक्षिते ।" ८ । ३ । १०१ । इति
म् ।) म्लेच्छजातिविशेषः । इति हेमचन्द्रः ।
। ५८८ ॥ (पुक्कसादिः । इति महीधरः । यथा,
सनैवसंहितायाम् । ५ । २३ ।
"यं ते निष्ट्यो यममाद्यो निपस्खान ॥"
ा स्थै शब्दसंघातयोः । नितरां स्त्यायति
वातत्येष सह वर्त्तत इति निष्ट्यः । यद्वा,
ंट शरीरात् स्त्यायति विस्तीर्णो भवतीति
ष्ट्यः पुक्कसादिः । यद्वा, निर्गतो वर्णाश्रमेभ्यो
ापचण्डालादिः । निसो गते इति वार्त्तिकेन
ि उपसर्गाद्गतार्थे त्यप् इति काशिका-
म् ।" इति तत्र वेददीपः ॥)
, त्रि, (नितरां तिष्ठतीति । नि + स्था +
ः ।) स्थिरः । नितिष्ठतीति स्थाधातोरप्रत्यय-
त्वम्ः ।
, स्त्री, (नितरां तिष्ठतीति । नि + स्था +
ातश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।
उपसर्गादिति ।" ८ । ३ । ६५ । इति षत्वम्
ाप् ।) निष्पत्तिः । नाशः । (यथा, भाग-
ते । ५ । १२ । ८ ।
"यदा क्षितावेव चराचरस्य
विदाम निष्ठां प्रभवञ्च नित्यम् ॥")

अन्तः । निर्वहणम् । इत्यमरः । ३ । ६ । ४० ॥
याच्ञा । इति मेदिनी । ठे, ६ ॥ क्तक्तवतू
प्रत्ययौ । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥
(यथा, "क्तक्तवतू निष्ठा । १ । १ । २६ । एतौ
निष्ठासंज्ञौ स्तः ।" इति सिद्धान्तकौमुदी ॥)
धर्म्मादौ श्रद्धा । यथा,—
"निष्ठया हि प्रतिष्ठा स्यादनिष्ठस्य कुतः फलम् ।
प्राप्नोति नैष्ठिकः स्वीयं धर्म्मं त्रातुं न चेतरः ॥
एकस्य देवस्य विहाय मन्त्र-
मेकं परस्मिन्नुरतोऽपि तस्य ।
तदा भवेन्मृत्युरनैष्ठिकत्वा-
न्निष्ठाविहीनस्य न क्वापि सिद्धिः ॥"
इति वैद्यकुलतत्त्वे भरतमल्लिकः ॥
प्राप्यम् । यथा,—
"भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः ।
तेषामशान्तकामानां का निष्ठा विजितात्म-
नाम् ॥")
इति श्रीभागवतैकादशस्कन्धपञ्चमाध्यायश्लोक-
टीकायामाख्यायां श्रीधरस्वामी ॥ (नि + स्था +
क्विप् । स्थितिः । यथा, ऋग्वेदे । ३ । ३१ । १० ।
"जाते निष्ठामदधुर्गोषु वीरान् ॥"
"निष्ठां पूर्व्वं यथास्थितिम् ।" इति सायनः ॥)
निष्ठानं, क्ली, (नि + स्था + करणे ल्युट् ।) व्यञ्ज-
नम् । इत्यमरः । ३ । ३ । ११५ ॥ (यथा,
रामायणे । २ । ९१ । ६७ ।
"व्यञ्जनैश्चापि च वाराहैर्निष्ठानवरसञ्चयैः ।
फलनिर्व्यूहसंसिद्धैः सूपैर्गन्धरसान्वितैः ॥")
निष्ठितं, त्रि, (नि + स्था + क्तः ।) नितरां स्थितम् ।
यथा, भागवते । २ । ७ । ३६ ।
"देवद्विषां निगमवर्त्मनि निष्ठितानां
पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं
वेषं विधाय बहुभाष्यत औपधर्म्यम् ॥"
"देवद्विषां दैत्यानां निष्ठितानां नितरां स्थिता-
नाम् ।" इति श्रीधरस्वामी ॥ (निष्ठा जाता-
स्येति । तारकादित्वादितच् ।) निष्ठाविशिष्टः ।
निश्चयेन स्थितश्च ॥ (सम्यग् ज्ञाता । यथा,
रामायणे । १ । १ । १४ ।
"रक्षिता स्वस्य धर्म्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥")
निष्ठीवः, पुं, (नि + ष्ठिव + भावे घञ् । पृषोदरा-
दित्वात् दीर्घः ।) निष्ठीवनम् । इति हिस्त्य-
कोषः ॥ (यथाह माघः ।
"निष्ठीवः पार्श्वतो यावदेकस्थाने निषी-
दनम् ॥")
निष्ठीवनं, क्ली, (नि + ष्ठिव + भावे ल्युट् । ष्ठिवु-
सिवोर्ल्युटि दीर्घो वेति वामनः । पृषोदरादि-
त्वादिति दुर्घटः ।) मुखाद्वारा लालानिःसरणम् ।
थुथु इति थुथु इति च भाषा ॥ तत्पर्य्यायः ।
निष्ठेवः २ निष्ठ्यूतिः ३ निष्ठेवनम् ४ । इत्यमरः ।
३ । २ । ३८ ॥ निष्ठेवा ५ । निष्ठीवम् ६ । इति
शब्दरत्ना ॥ (यथा, मार्कण्डेयपुराणे । ३४ । ८० ।

"क्षुतेऽवलीढे वान्ते च तथा निष्ठीवनादिषु ।
कुर्य्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् ॥")
निष्ठुरं, त्रि, (नि + स्था + मद्गुरादयश्चेति उरच् ।)
परुषम् । कठिनम् । इत्यमरः । ३ । १ । ७६ ॥
(यथा, माघे । ५ । ४८ ।
"भग्ने शनैर्मुकुलिताक्षमनादराने
संरब्धहस्तिपकनिष्ठुरचोदनाभिः ॥")
निष्ठ्यूतं, त्रि, (नि + ष्ठिव् + क्तः । "च्छ्वोः शूडिति ।"
६ । ४ । १९ । इत्यूट् ।) क्षिप्तम् । इत्यमरः ।
३ । १ । ८७ ॥
निष्ठ्यूतिः, स्त्री, (नि + ष्ठिव् + क्तिन् । "च्छ्वोः
शूडिति ।" ६ । ४ । १९ । इत्यूट् ।) निष्ठीवनम् ।
इत्यमरः । ३ । २ । ३८ ॥
निष्ठेवः, त्रि, (नि + ष्ठिव् + घञ् ।) निष्ठीवनम् ।
इत्यमरः । ३ । २ । ३८ ॥
निष्ठेवनं, क्ली, (नि + ष्ठिव् + भावे ल्युट् ।) निष्ठी-
वनम् । इत्यमरः । ३ । २ । ३८ ॥
निष्णातः, त्रि, (नितरां स्नाति स्मेति । नि +
स्ना + क्तः । "निनदीभ्यां स्नातेः कौशले ।"
८ । ३ । ८९ । इति षत्वम् ।) विज्ञः । निपुणः ।
इत्यमरः । ३ । १ । ४ ॥ (यथा, सुश्रुते सूत्रस्थाने
तृतीयेऽध्याये ।
"यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधञ्चार्हति राजतः ॥")
पारं गतः । यथा, भागवते १ । ४ । २१ ।
"वैशम्पायन एवैको निष्णातो यजुषामुत ॥"
निष्पक्वं, त्रि, (नितरां पक्वम् ।) क्वथितयञ्जन-
दुग्धतैलादि । इति भरतः ॥ तत्पर्य्यायः ।
क्वथितम् २ । इत्यमरः । ३ । १ । ९५ ॥ पक्वता-
न्तरञ्च ॥
निष्पताकध्वजः, पुं स्त्री, राज्ञां पताकाशून्यदण्ड-
विशेषः । इति युक्तिकल्पतरुः ॥ तद्विवरणं ध्वज-
शब्दे द्रष्टव्यम् ॥
निष्पत्तिः, स्त्री, (निर् + पद + क्तिन् ।) समाप्तिः ।
सिद्धिः । यथा,—
"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥"
इति रामतर्कवागीशधृतकारिका ॥
(नादस्यावस्थाविशेषः । यथा, हठयोगप्रदी-
पिकायाम् । ४ । ६९ ।
"आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥"
तथा, तत्रैव । ४ । ७६ ।
"रुद्रग्रन्थिं यदा भित्त्वा शर्व्वपीठगतोऽनिलः ।
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥")
निष्पत्राकृतिः, स्त्री, (निष्पत्र + कृ + भावे क्तिन् +
डाच् ।) अत्यार्त्तिः । अत्यन्तपीडा । इति
हेमचन्द्रः । ६ । ८ ॥
निष्पदिका, स्त्री, (निष्पन्नकृत्या पदानि । टप् ।)
मद्योत्पत्तिः । इति शब्दचन्द्रिका ॥
निष्पन्दनं, क्ली, (निष्पन्दं पाचनादिकं पानम् ।)
...

द्रुतिकल्पतरुः ॥ तल्लक्षणादि नौकाशब्दे द्रष्टव्यम् ॥

निष्पन्नः, त्रि, (निर् + पद् + क्तः ।) निष्पत्ति-विशिष्टः । सम्पन्नः । तत्पर्य्यायः । सिद्धः २ निर्वृत्तः ३ । इत्यमरः । ३ । १ । १०० ॥ (यथा, देवीभागवते । ३ । ८ । २२ ।

"निष्पापत्वं फलं विद्धि तीर्थस्य मुनिसत्तम !।
कृषेः फलं यथा लोके निष्पन्नान्नस्य भक्षणम् ॥")

निष्पादनं, क्ली, (निर् + पद् + णिच् + ल्युट् ।) निष्पत्तिः । निष्पत्तिनियुक्तिः । यथा, धात्वर्थता-वच्छेदकफलनिष्पादकतया इदस्तेयनुमतिप्रका-शनेन कर्तुरिच्छामनुमाय दाननिष्पादनेन वेति कारकचक्रे भवानन्दसिद्धान्तवागीशः ॥

निष्पादना, स्त्री, (निर् + पद + णिच् + युच् । स्त्रियां टाप् ।) निष्पत्तिप्रेरणम् । यथा,—

"यदा निष्पादनापन्नधुस्तदा चैत्रः कटं करोति।
यदा निष्पत्त्यर्थस्तदा क्रियते कटः स्वयमेवेति ।"

इति रामतर्कवागीशः ॥

निष्पादितं, त्रि, (निर् + पद + णिच् + क्तः ।) कृतनिष्पादनम् । यथा,—

"निष्पादितं देवकार्य्यमनयैवं प्रतीयते ।"

इति भागवते ।९।१३।५०॥

[निष्पा]द्यं, त्रि, (निर् निश्चयेन पाद्यते समाप्यते इति । निर् + पद् + णिच् + यत् ।) निष्पा-[दनी]यम् । (यथा, राजतरङ्गिण्याम् ।२ । १५८।

[त]द्वे बहूनि निष्पाद्ये यमात् कौमोदमाप्नयत्।
[मह]दीशाध्यगो दिष्टा मोहितोऽस्मि न
निन्दया ।")

[...]म् । यथा, "चेष्टायामारेक इत्यादेर्निष्पा-[दन]म् साधनमिति रामतर्कवागीशः ॥

[निष्पावः,] पुं, (निष्पूयते तुषादप्यनयनेन शोध्यते [...] निर् + पू + णिच् + घञ् ।) धान्यादीनां [...]करणम् । बहुलीकरणम् । तत्पर्य्यायः । [...]वनम् २ पवः ३ । इत्यमरः । २ । ९ । २४ ॥ [...] पूतीकरणम् ४ । यथा,—

"धान्यादिविस्तुषीकार्य्यबहुलीकरणादिषु ।
तथा च पूतीकरणे निष्पावः पवनं पवः ।"

इति शब्दरत्नावली ॥

[...]राजशिम्बीबीजम् । भटवास इति भटवांस [...]इति वा हिन्दीभाषा । तत्पर्य्यायगुणाः ।

"निष्पावो राजशिम्बी स्यात् बल्लकः श्वेतशिम्बिकः।
[नि]ष्पावो मधुरो रूक्षो विपाकेऽम्लो गुरुः सरः ।
[...]लावणकृद्विलासक्षन्यातरिमसरः ।
[...]ताद्दृष्टो विषशूलघ्नोदृष्टशुक्रकफापहः ।"

इति भावप्रकाशः ॥

[...]स्पृष्टेऽतिवैदेहि । करणे घञ् ।) शूर्पवातः । [...]मारः । (यथा, मार्कण्डेयपुराणे ।१५।८४।
[...] कुत्वा मतो रसः शूर्पं कृत्वा निर्वात्मिकः ।
[...]था तु निष्पावात् जायते मत्सरीमिकः ।")
[...]रः । अन्नोदनः । हिम्बिका । निर्निहलो,
[...]इति हेमचन्द्रे । ४, ३८ । श्रीमर्दमो ।
[...]काण्डः । (यथा,—

"मारातितीव्रगोधाविदाहितैल-
निष्पावपिण्याककुलत्थयूषैः ॥"

इति माधवकृतरुग्विनिश्चये शूलाधिकारे ॥)

निष्पावकः, पुं, (निष्पाव एव । स्वार्थे कन् ।) श्वेतशिम्बी । अस्य भक्ष्यफलगुणः । मलबन्धकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (अस्य गुणा यथा,—

"निष्पावको वैषवलासशोष-
शुक्रामको रूक्षगुणो विदाही ।
कषायकः स्वाम्मधुरो गुरुश्च
स्तन्यासपित्तञ्च करोति वातम् ॥"

इति हारीते प्रथमस्थाने दशमेऽध्याये ॥)

निष्पावी, स्त्री, (निष्पाव + स्त्रियां ङीष् ।) शिम्बी-विशेषः । वोड़ा इति भाषा ॥ सा द्विधा । तत्र हरिद्वर्णायाः पर्य्यायः । ग्रामजा २ फलिनी ३ नखपूर्व्विका ४ मण्डपी ५ फलिका ६ शिम्बी ७ शुष्कफला ८ विशालफलिका ९ निष्पाविः १० चिपिटा ११ ॥ शुभ्रायाः पर्य्यायः । अङ्गुलि-फला १ नखनिष्पाविका २ कृष्णनिष्पाविका ३ ग्राम्या ४ नखपुञ्जफला ५ अम्रगा ६ । एतयो-र्गुणाः । कषायत्वम् । मधुररसत्वम् । कफ-शुद्धिकारित्वम् । मेध्यत्वम् । दीपनत्वम् । रुचि-कारित्वञ्च । इति राजनिर्घण्टः ॥

निष्प्रतिभः, त्रि, (निर्गता प्रतिभा बुद्धिर्यस्य ।) अज्ञः । जडः । इति जटाधरः ॥ (निर्गता प्रतिभा दीप्तिरस्येति । दीप्तिशून्यः । यथा, हरिवंशे । ८२ । ३४ ।

"पौष्याकारासु तारासु प्रभनिष्प्रतिभासु च ।
नैष्प्रभमार्हंधे रूपसुरगाच्छदिवाकरः ।")

निष्प्रत्यूहः, त्रि, (निर्गतः प्रत्यूहो बाधा यस्येति ।) निर्व्विघ्नः । यथा,—

"निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः ।"

इति मुरारिः ॥

(स्त्री, गङ्गा । यथा, काशीखण्डे । २९ ।१०३ ।

"निष्प्रत्यूहा नाकनदी निरयार्णवदीर्घनौः ।")

निष्प्रभः, त्रि, (निर्गता प्रभा यस्येति ।) प्रभा-शून्यः । दीप्तिरहितः । तत्पर्य्यायः । विगतः २ अरोकः ३ । इत्यमरः । ३ । १ । १०० ॥ (यथा, रघुवंशे । ११ । ८१ ।

"निष्प्रभश्च रिपुरास भूभृतां
धूमशेष इव धूमकेतनः ।")

निष्प्रयोजनं, त्रि, (निर्गतं प्रयोजनं यस्मिन्निति ।) प्रयोजनरहितम् ।

"अन्यथा हि महाबाहो लघूनामुपदेशतः ।
दुष्कायतपदेशो हि निष्प्रयोजनतां व्रजेत् ।"

इति प्रायश्चित्ततत्त्वम् ॥

(यथा, हरिवंशे । ९१ । १६ ।

"निराकर्त्तुं निराकारं निष्प्रयोजनमासनम् ।")

निष्प्रवाणं, त्रि, (निर्गता प्रवेयं तन्तवो इति । निर् + प्र + वे + करणे ल्युट् ।) नववस्त्र-वासः । नववस्त्रम् । इति शब्दरत्नावली । ६८ ॥

निष्प्रवाणि, त्रि, (निर्गता प्रवाणी तन्तुवायशलाका [...]

[...]व्यञ्जनस्य वा । [...]
इति कपोतभावो [...]
तत्पर्य्यायः । [...]
रम् ४ । इत्यमरः । [...]
तम् ५ अफलम् ६ [...]
रत्नावली ॥

निष्फलः, त्रि, (निर्गतं फलं [...]
यथा, "फलालोऽस्त्री व नि[...]
२।८।२२ ॥ (यथा, देवीभाग[वते ...]
"इति तीर्थे यदेतानि देहा[...]
निष्फलः श्रम एवैकः कर्षकस्य [...]

निष्फला, स्त्री, (निर्गतं फलं यस्[...]
पश्चाप्रदस्केन्द्र ऊर्ध्वं मत[...]
तत्पर्य्यायः । निष्फली २ निष्फ[...]
विकली ५ विकला ६ ऋतुहीना [...]
शब्दरत्नावली । विरजाः ८ [...]
इति जटाधरः ॥

निष्फली, स्त्री, (निर्गतं फलं यस्याः ।
निष्फला । इति शब्दरत्नावली ।

निःसम्पातः, पुं, (निर्गतः सम्पातो यत्र ।)
निःसम्पातः । इति शब्दरत्नावली ।

निसर्गः, पुं, (नि + सृज् + घञ् ।)
इत्यमरः । १ । ७ । १८ । (—
कुमारे । १ । ६ ।

"निसर्गदुर्बोधमबोधवि[...]
क भूपतीनां चरितं क ज[...]
रूपम् । सर्गः । इति मेदिनी । [...]
महाभारते । १३ । ८५ । १३१ ।
"निसर्गाद्ब्रह्मणश्चापि वरुणो [...]
दानम् ॥ यथा, मनुः । ८ [...]
"न सेवाधौ सोपकारे कौ[...]
न चाधेः कालसंरोधान्निसर्गो [...]

निसिन्धुः, पु. वृक्षविशेषः । नि[...]
तत्पर्य्यायः । सिन्धुकः २ सि[...]
शुक्लपुष्पकः ५ सिन्धुवारः ६ [...]
निर्गुण्डी ८ इन्द्राणिका ९ । इति [...]

निसूदनं, क्ली, (नि + सूद् + णिच् [...]
वधः । इत्यमरः । २ । [...]
(यथा, "प्रवासनं निसूदनं नि[...]
वधपर्य्यायं प्रवासनशब्दं पठन्ती [...]
इति ।८।२४२ मनुटीकायां [...]
त्रि, नि + सृ + क्तः । [...]
रघुवंशे । ८ । ३ ।

"उभयमेव वदन्ति मनीषिणः
समयवर्त्तितया तत्कर्मणाम् ।
धर्मनिसृष्टतमर्थपतेश्च तं
यमनुजं मनुष्यधराधिपम् ।")

निसृता, स्त्री, (निसृतं दला । नि + सृ + [...]
त्रिवृता । इति रत्नमाला । [...]
(त्रिवृतायामस्याः गुणादयो [...] ।)

निसृष्टं, त्रि, (नि + सृज् + क्तः ।) दत्तम् ।
[इत्यम]रः । ३ । १ । ८८ । [...]

…स्मिन् निरहेऽपि कृतो शान्त्यादिनुन्नति ।
…र्नं हि गत्वा वक्तुनामुखोऽहनि ॥")
…धनम् । इति त्रिकाण्डशेष: ॥
…र्थ:, पुं, (निरस्तो मन्थोऽर्थ: प्रयोजनं
…मिति ।) कूटार्थकत्व: । यथा,—
…निरर्थकौ निरर्थक यथा मन्दिरसारक: ।
…र्वैर्निरर्थका कृतो कृत्यानि यथा त्रिधा ॥"
…करणं यथा,—
…उन्मीलन्निमुग्धीव मन्दं वदति नीरसम् ।
…निदं कुरुते कर्म निरर्थकस्तु स स्मृत: ॥"
इति साहित्यदर्पणे ३ परिच्छेद: ॥
…कानानार्थकानां निहत: । यथा हरदत्त: ।
…: मानिनो निहतोऽपि धनापचयमानने ।
…मोहविपाकेन्द्रे निरर्थकस्तु स स्मृत: ॥"
इति पद्मपुराणम् ॥
…हर्षविह: । तस्य लक्षणं यथा,—
…धीर: निरर्मानि: मूढ: स्वामिकार्यविघातक: ।
…मोरथप्रशान्तो च निरर्थक: स उच्यते ॥"
इति कङ्कालतरामोदर: ।
…नी, स्त्री, (निरन्तरं समवदाकारोऽस्त्यस्या
…मि । अच् । गौरादित्वात् ङीष् ।) वटिका ।
…मि शब्दचन्द्रिका ॥ वड़ि इति भाषा ।
…निर्गतौ सर्वौ यस्या इति ।) सन्ध्यौना च ।
…रणं, स्त्री, (निर्गतोऽर्थतः स्त्रीति । निर् + तृ +
…भावे ल्युट् ।) उपाय: । निस्तार: । तरणम् ।
…इति मेदिनी । ण, ८८ ॥ निर्गम: । इति विश्व: ॥
…र्हणं, स्त्री, (निर् + तृह हिंसायाम् + भावे
…ल्युट् ।) मारणम् । इत्यमर: । २ । ८ । ११६ ॥
…र्णं, त्रि, (निरस्तं तलं सञ्चयमस्येति ।)
…र्तुलम् । इत्यमर: । ३ । १ । ६८ ॥ (यथा,
…मारसम्भवे । १ । ४२ ।
"वृत्तस्य तस्या: समवस्तुरस्य
उल्लाकलापस्य च निस्तलस्य ।")
…लम् । इति मेदिनी । ल, १०३ ॥ (नितरां
…लम् ।) तलम् । इति हेमचन्द्र: ॥
…तार:, पुं, (निर् + तृ + घञ् ।) निस्तरणम् ।
…उद्धार: । (यथा, शृङ्गारशतके । ७१ ।
"…संसार तव निस्तारपदवी न दवीयसी ।
…न्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणा: ॥")
…तारबीजं, स्त्री, (निस्तारस्य संसारसमुद्र-
…निस्तरणस्य बीजम् ।) संसारतरणकारणम् ।
…तद्यथा,—
"…करणं कीर्त्तनं विष्णोरर्चनं पादसेवनम् ।
…वन्दनं स्मरणं नित्यं भक्त्या नैवेद्यभक्षणम् ॥
…चरणोदकपानञ्च तन्मन्त्रजपनं तथा ।
…इदं निस्तारबीजञ्च सर्वेषामीप्सितं भवेत् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३६ अध्याय: ॥
(अपि च । महानिर्वाणतन्त्रे ।
…एतौ मापद्गते घोरे तपोहीनेऽति दुस्तरे ।
…निस्तारबीजमेतावद् ब्रह्ममन्त्रस्य साधनम् ॥
…साधनानि बहूक्तानि नानातन्त्रागमादिषु ।
…कलौ दुर्बलजीवानामसाध्यानि महेश्वरि ! ॥"

उद्धारकारणमाधम् । यथा,—
"भीमां तरि: सरित्तीयगभीरनीरा
याता वयं मकरमित्यमनर्थहेतु: ।
निस्तारबीजमिदमेव कृशोदरीणां
यन्माधव त्वमपि सम्प्रति कर्णधार: ॥"
इत्युद्भट: ।)

निस्तितीर्षु, त्रि, (निर् + तृ + सन् + उ: ।)
निस्तरितुमिच्छु: । यथा,—
"तत: सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षताम् ॥"
इति श्रीभागवते । १ । १ । २२ ॥

निस्तुषक्षीर:, पुं, (निस्तुषं परिष्कृतं क्षीरं यस्येति ।)
गोधूम: । इति राजनिर्घण्ट: ॥

निस्तुषरत्नं, क्ली, (निस्तुषं निर्मलं रत्नम् ।)
स्फटिक: । इति राजनिर्घण्ट: ॥

निस्तुषितं, त्रि, (निस्तुष + कर्तौ णिच् + क्त: ।)
त्वग्विहीनम् । त्यक्तम् । लघूकृतम् । इति
मेदिनी । त, २०२ ॥

निस्तेजा:, [स्] त्रि, (निर्गतं तेजो यस्मादिति ।)
तेजोरहित: । यथा,—
"इदं कदम्बमालाख्यं ऋषभाद्यं पठेत्तु य: ।
सर्वं नष्टं तथा देवि ! निस्तेजो न च सिद्ध्यति ॥"
इति ब्रह्मयामलीयगायत्रीकवचस्तवम् ॥
(यथा च देवीभागवते । २ । ८ । ११ ।
"छलप्रहारसदा मार्गे चौराभीरैश्च लुण्ठिता: ।
धनं सर्वं गृहीतञ्च निस्तेजाश्चार्जुनोऽभवत् ॥")

निस्त्रिंश:, पुं (निर्गतस्त्रिंशदङ्गुलिभ्य इति ।
निरादय इति समास: । "संख्याया अतत्पुरुषस्य
उपसंख्यानम् ।" ५।४।११३ । इत्यस्य वार्त्तिकोक्त्या
डच् ।) खड्ग: । इत्यमर: । २ । ८ । ८८ ॥
(यथा, महाभारते । ४ । ३१ । २४ ।
"नकुलस्तैष निस्त्रिंशो गुरुभारसहो दृढ: ॥")
निर्दये, त्रि । इति मेदिनी । श, २१ ॥ (यथा,
अमरुशतके । ५ ।
"हतोऽस्मा: प्रणयस्त्वयैव भवता चैयं चिरं
लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियम् ।
मन्युर्दु:सह एष यात्युपशमं नो सान्त्ववादै:
स्फुटम् ।
हे निस्त्रिंश ! विमुक्तकण्ठकरुणं तावत् सखी
रोदितु ॥")
त्रिंशत्शून्य: । इति व्याकरणम् ॥

निस्त्रिंशधारी, [न्] त्रि, (निस्त्रिंशं धरतीति ।
निस्त्रिंश + धृ + णिनि ।) खड्गधारी । तत्-
पर्यायं यथा, नातृके १५८ अध्याय: ।
"तुरुष्कवदन: प्रांशुर्दृढभक्ति: कुलोचित: ।
शूर: क्लेशसहश्चैव खड्गधारी प्रकीर्त्तित: ॥"

निस्त्रिंशपत्रिका, स्त्री, (निस्त्रिंश: खड्ग इव पत्र-
मस्या अस्तीति । ठन् ।) स्नुहीवृक्ष: । इति
राजनिर्घण्ट: ॥

निस्त्रैपुष्पिक:, पुं, राजधत्तूरक: । इति…
निर्घण्ट: ॥

निस्नेहफला, स्त्री, (निस्नेहं तैलविहीनं फलं
यस्या: ।) श्वेतकण्टकारी । इति राज-
निर्घण्ट: ॥

निस्यन्द:, पुं, (नि + स्यन्द + भावे घञ् ।) स्यन्द-
नम् । इति त्रिकाण्डशेष: ॥ (यथा, महाभारते ।
१२ । ३३५ । ८ ।
"मेरो: सहमै: स हि योजनानां
द्वात्रिंशतोर्ध्वं कविभिर्निरुक्त: ।
अनिन्द्रियाश्चानशनाश्च तत्र
निस्यन्दहीना: सुसुगन्धिनस्ते ॥")

निस्पन्द:, त्रि, (निर्गत: स्पन्दश्चपलतादिस्पन्दनं
यस्मात् ।) स्पन्दरहित: । ईषत्कम्पशून्य: । यथा,
"कावेरीनीरभूमीरुहभुजगवधूभुक्तमुक्तावशिष्ट:
कार्णाटीपीनपीनस्तनवसनदृढान्दोलनिस्पन्द-
मन्द: ॥"
इति विक्रमादित्यराजसभायां राघवपद्मम् ॥

निस्पन्दतरं, त्रि, (निस्पन्द + तरप् ।) एकान्त-
स्पन्दरहितम् । यथा, नैषधे । ८ । १३ ।
"तस्मिन् वने नैषधकेशमाये
निमग्य निस्पन्दतरे भवद्भ्याम् ।
तस्याशुचन्वं न विमोच्य गन्तु-
मपारि तल्लोचनखञ्जनाभ्याम् ॥"

निस्पृह:, त्रि, (निर्गता स्पृहा इष्टानिष्टविषयवासना
यस्येति ।) स्पृहाशून्य: । यथा,—
"निस्पृह: सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥"
इति श्रीभगवद्गीतायाम् । ६ । १८ ॥

निस्पृहा, स्त्री, अग्निशिखावृक्ष: । यथा,—
"अनन्ता निस्पृहा चापि मालिनी विष्णुवल्लभा ॥"
इति शब्दचन्द्रिका ॥
स्पृहाया अभावश्च ॥ (अव्ययीभाव: ॥)

निस्र(ष्य)न्द:, पुं, (नि + स्यन्द इ क्षरणे + भावे
घञ् । "अनुविपर्यभिनिभ्य: स्यन्दतेरप्राणिषु ।"
८ । ३ । ७२ । इति वा षत्वम् ।) स्यन्दनम् ।
क्षरणम् । यथा,—
"माकन्दरसनिस्यन्दसुन्दरोद्गारकारिणौ ।
अवयानन्दिनावेतौ वन्दिनाविव राजत: ॥"
इति प्रसन्नराघवनाटके पञ्चधरमिश्र: ॥
(यथा च रामायणे । २ । ९४ । १३ ।
"जलप्रपातैरुद्भेदैर्निष्यन्दैश्च क्वचित् क्वचित् ।
स्रवद्भिर्भात्ययं शैल: स्रवन्मद इव द्विप: ॥" ·
निस्यन्दते इति कर्त्तरि अच् । क्षरणशीले,
त्रि । यथा, रघु: । ३ । ४१ ।
"तरङ्गनिस्यन्दजलेन लोचने
प्रमृज्य पुत्रेण पुरस्कृत: सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दन: ॥")

निस्राव:, पुं, (निस्रवति इति । नि + स्रु +
+ घञ् ।) भक्तसमुद्भवमण्डम् । …
इति च भाषा । तत्पर्याय:
आचाम: ३ । इत्यमर: । २ …
घञ् । इत्य: । यथा, …
…३… …म् ॥")

निमन्, पुं, (नि+मन+"नौ मदमदध्वटस्वनः ।" ३ । ३ । ६४ । इति अप् ।) शब्दः । इत्यमरः । १ । ६ । २३ । (यथा, महाभारते । ७ । २६ । ३ ।
"यदा प्राग्ज्योतिषो राजा गजेन मधुसूदन ।
शरमात्रोऽभिनिघ्नाग्नो पुर्ने तस्यैव निस्वनः ॥")

निस्वानः, पुं, (नि+स्वन+भावे घञ् ।) शब्दः । इत्यमरः । १ । ६ । २३ ॥

निहननं, क्ली, (नि+हन+ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११३ ॥

निहन्ता, [ऋ] त्रि, (नि+हन+तृच् ।) हनन-कर्त्ता । यथा, भट्टिः ।
